SRI AUROBINDO LIBRARY
PONDICHERRY, INDIA

Fumigated OCT 1993

*But thought nor word can seize eternal truth*

# INDEX TO VOL III.


| | Page. |
|---|---|
| Bála-ramáyaṇa-náṭaka, ... ... ... ... ... ... ... ... ... | 8,34,51,75,99,124,150,173,195,216,236 |
| Benares, Ancient and Medieval: A monograph, ... ... ... ... | 137,163 |
| Indra, as represented in the Hymns of the Rigveda, ... ... ... ... | 186,206 |
| Ingratitude, ... ... ... ... ... ... ... ... ... | 136 |
| Iśwara-pratyabhijná-sútra-vimarśini, ... ... ... ... ... ... | 1,27,43,67,93,117,143,169 |
| Káśi-rája-kánana-śatakam, ... ... ... ... ... ... ... | 18,40,60,84,105 |
| Kumára-sambhava, A Critical Comparison of Mallinátha's and Premachandra's Commentaries on the 8th Canto of the, ... ... ... ... ... | 61 |
| " A Discussion on the Origin of the, ... ... ... ... ... | 19,85 |
| Mahábhárata, Letter regarding a couplet of the, ... ... ... ... | 42 |
| Notices of Books, ... ... ... ... ... ... ... ... ... | 136,163,188,268 |
| 'Pandit,' Letter on the Plan of the, ... ... ... ... ... ... | 22 |
| Pandits, and their manner of teaching, ... ... ... ... ... ... | 22 |
| Prasanna-rághava-nátakasya upasanhárah, ... ... ... ... ... | 8 |
| Raghu, ... ... ... ... ... ... ... ... ... ... ... | 42,64 |
| Raghu's Campaign, ... ... ... ... ... ... ... ... ... | 65,90 |
| Raghuvanśa, Canto viii, Spring, ... ... ... ... ... ... ... | 227 |
| Ráma in the Spring, ... ... ... ... ... ... ... ... | 135 |
| Rámáyaṇa, ... ... ... ... ... ... ... ... ... ... ... | 223,267 |
| " Scenes from the, ... ... ... ... ... ... ... | 204 |
| Śita in Prison, ... ... ... ... ... ... ... ... ... | 92,113 |
| Speech, A Sanskrit version of the, delivered, at the distribution of prizes, in the Benares College, by the Honourable Sir William Muir, K. C. S. I., Lieutenant Governor, North Western Provinces, ... ... ... | 16 |
| Tárá's Lament, ... ... ... ... ... ... ... ... ... | 135 |
| Transliteration of Oriental words into Roman Characters, Letters on the, ... | 114,245 |
| Upadeśa-sáhasrí-prastávaná, ... ... ... ... ... ... ... | 189 |
| Upadeśa-sáhasryá gadya-prabandhah, ... ... ... ... ... ... | 189,209,229,249 |
| Vaiśeshika Aphorisms of Kaṇáda, ... ... ... ... ... ... | 185,202,220,242,265 |
| Vidhavodvahavivekam adhikṛitya kinchid uchyate, ... ... | 263 |
| Vṛishabhánujá-náṭiká, ... ... ... ... ... ... ... ... | 257 |
| Widow-marriage, ... ... ... ... ... ... ... ... ... | 222 |
| Yathoddeśa-káryakála-paksha-tippaní-paríkshá-śeshah, ... ... ... ... | 108 |
| Yoga Philosophy, Aphorisms of the, continued from Dr. Ballantyne's work, ... | 88,111,134,161 |


## SUPPLEMENT.


| | |
|---|---|
| Rájakíya-váráṇasí-vidyá-mandira-saraswatí-bhavana-varti-pustakánám súchí-pattram, | No. 35. A, p. i., v. |
| Transliteration of Oriental words into Roman Characters, Memo. on the, ... | No. 28. A. p. i. |

# काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपचद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

# THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 25. Benares June 1st, 1868. Vol. III.


## ॥ ईश्वरप्रत्यभिज्ञासूत्रविमर्शिन्याः ॥

॥ चतुर्थमाह्निकं पञ्चमस्य चादिमो भागः ॥

पदार्थरत्ननिकरं निजहृद्गुञ्जपुञ्जितम् ।
यद्वन्तं स्मृतिसूत्रान्तः सन्तत्यैव स्तुमः शिवम् ॥

एवं ज्ञानपूर्विका स्मृतिस्तदुभयानुग्राहिण्यपोहनशक्तिरिति तावद्वस्तुसम्भवक्रमेण प्रदर्शितम् । उपक्रमानुसारेण स्मृतिरेव सूचितप्रसङ्गविपर्ययसमर्थनदृशा विवेच्या । "सत्यं किं तु स्मृतिज्ञान,,मिति ह्युपक्रान्तम्, तत्र संस्कारमात्रान्मा नामो * दपादि स्मृतिः । इदं तु वक्तव्यम् । तथाभूतभवदभ्युपगतभगवत्प्रभावोऽपि कथमेनां कुर्यादिति शङ्कां शमयितुं स्मृतितत्त्वनिरूपणाय "स हि पूर्वानुभूतार्थोपलब्धे,,त्याद्य"र्थो भातः प्रमातरो,,त्यन्तं श्लोकाष्टकम् । तत्र श्लोकेन स्वपक्षे स्मृतिरुपपन्नेति कथितम् । द्वितीयेन स्मृतेः पूर्वानुभवविषयीकृतस्वलक्षणप्रकाशनसामर्थ्यमुक्तम् । तृतीयेनानुभवेन तद्विषयेण चैकीभावपर्यन्त आवेशः स्मरणस्योक्तः । तुर्येणानुभवस्य न विषयतया स्मृत्या प्रकाशनमिति निरूपितम् । पञ्चमेन योगिज्ञानमप्यनुभवं पृथग्भावेन न विषयीकरोतीति वदता तुर्यश्लोकार्थ एवोपोद्बलितः । षष्ठेनाशङ्क्यमानमनुभवस्य स्मृत्या पृथग्विषयीकरणं काल्पनिकमित्यवास्तवीकृतम् । सप्तमेन स्मृतिप्रसङ्गाद्विकल्पेऽपि पूर्वानुभवेनैक्यात्मावेशो दर्शितः । अष्टमेन स्मर्तव्यस्य स्मृतेः स्मर्तुश्चैकचितत्त्वविश्रान्तिरुक्ता । प्रसङ्गाच्च दृश्यस्य दर्शनस्य द्रष्टुश्चेति तात्पर्यार्थः ॥

* उत्पादीति पाठोऽत्र युक्तः । माङ्योगे ऽटोऽप्राप्तेः । अडितो योगकल्पनायां तु लुङो ऽनुपपत्तेस्तस्याप्रामाणिकत्वाच्च । उपपादीति पुस्तकान्तरे बहिर्लिखितं पाठान्तरमपि साध्वेव ।

अथ क्रमेण श्लोकार्थ उच्यते ।

(१) स हि पूर्वानुभूतार्थोपलब्ध्या परतोऽपि सन् ।
विमृशन्स इति स्वैरी स्मरतीत्यपदिश्यते ॥

पूर्वमनुभूतस्यार्थस्य य उपलब्धा अन्तर्मुखो बोधः स तावदद्यापि परतः स्मृतिकालेऽप्यस्त्येव । संविन्मात्रस्वरूपस्य कालकृतसंकोचरूपविशेषात्मकविच्छेदायोगात् । अनुभवस्य चान्तरर्थोऽप्यपृथग्भावेनावस्थित इत्येतदप्ययत्नसिद्धम् । इदं तु चिन्त्यम् । अकालकलिते संवेदने तदन्तर्वर्त्तिनि च विश्वत्र भावजाते यदि तावच्चिन्मयतापरामर्श,स्तदहमित्येतावतैव पूर्णेन विमर्शेन भाव्यम् । अथेदंतया पृथग्भावावभासनेन, तथापि तत्र द्वयी गतिः, अहमित्यंशे यदि विश्राम्यतीदन्ता, तदा "ऽहमिद,,मिति सदाशिवादिदशया भाव्यम्, । अथ न रोहति, तदिदमित्येवावभासेन भवितव्यम्, । अपूर्वताभासनाच्च तदनुभवनमेव स्यान्न स्मरणमित्याशङ्क्याह । स्वैरीति । स्वमात्मीयमुपकरणमीरयति स्वकर्तव्येष्ववश्यन्तच्छीलश्च स्वं चात्मानमीरयति न पुनः स्वकर्तव्ये प्रेरकमपेक्षते इति स्वैरी स्वतन्त्रः । तेन स्वतन्त्रत्वात्स इत्येवं विमृशति । स इति विमर्शनस्य चेयद्रूपम् यत्सर्वथा कालकलितस्वरूपपरामर्शनमेव न, नाप्यत्यन्तभेदपरामर्शनमेवा,पि तु योभावः पूर्वमनुभवकाले तद्देशकालप्रमात्रन्तरसाचिव्येन पृथक्कृतो न चाहन्तायामेव विलीनीकृतः स तादृगेव तमसेवाच्छाद्यावस्थापितः संस्कारशब्दवाच्यस्तस्य तमाच्छादक * मपहस्तयति । तत्रापहस्तिते स पूर्ववत्पृथक्कृत इवावभाति । "ननु चेदंतया

* दूरीकरोति । अत्र स्वैर्यैव कर्त्ता बोद्धव्यः । करणं चैकसंबन्धिज्ञानादिकम् । एतदाच्छादकापहस्तनमेव संस्कारोद्बोधनं बोध्यम् ।

ऽवभासेत पूर्ववदेव,, । नैवम् । तदानींतनावभासनपृथक्कृतशरीरादिसम्बन्ध * मनवधूयैव हि तत्प्रकाशः । ततश्चेदानींतनावभासनकालपरामर्शोऽपि न निमीलतीति । एतत्परामर्शभित्तिप्राधान्येन पूर्वकालपरामर्श इति विरुद्धपूर्वापरपरामर्शस्वभाव एव स इति परामर्श उच्यते । एवं च स एव परमेश्वरः स्मरति । एतदेव हि तस्य स्मरणं यदेवंप्रकारपरामर्शाचित्तकालकलादिस्पर्शसहिष्णु मायाप्रमातृभावपरिग्रह इति † मायाविद्याद्वयाद्वयमयं तत एव सकलसिद्धिवितरणचतुरचिन्तामणिप्रख्यमागमिकाः स्मरणमेव मन्त्रादिप्राणितं मन्यन्ते ।

ध्यानादिभावं स्मृतिरेव लब्ध्वा
चिन्तामणिस्त्वद्विभवं व्यनक्ति ।

इत्यलं तावदनेन । वृत्तन्तसमासेन यवतो ऽनुभवस्यार्थमुखेन कालस्पर्शमर्थविश्रान्ततां द्वयोरपि प्रमातरि निरूढिं ‡ भेदाभेदाभ्यां दर्शयति । वृत्तावेकार्थीभावात्तस्य च भेदाभेदमयत्वमिति वक्ष्यामः ॥

एतदेव स्मृतितत्त्वमुपपादयितुं श्लोकान्तराणि ॥

तत्र "यदि कश्चिद्ब्रूयात् । इह स्मृति § विकल्पो न चानेनार्थः प्रकाश्यते । अर्थासंस्पर्शिनो हि विकल्पाः । अनुभवेन च येन सो ऽर्थः प्रकाशतां नीतः स इदानीं कीर्तिमात्रमूर्तिर्जातः । न च सो ऽपि स्मृत्या प्रकाश्यते । ज्ञानस्य ज्ञानान्तरेणाऽसंवेद्यत्वात्, असत्वाच्चेति । अर्थस्य प्रकाशनाभावादिदं स्मरामीति ज्ञानं भ्रान्तिमात्रमेवेति पुनरप्यापतितमिति,, तदा तं प्रत्युच्यते ।

(२) भासयेच्च स्वकाले ऽर्थात्पूर्वाभासितमामृशन् ।
स्वलक्षणं घटाभासमात्रेणाथाखिलात्मना ॥

इह * स्मृतिविकल्पे तावदर्थोऽध्यवसीयते । अन्यथा सुप्तमूर्च्छितकल्पतापत्तेः । एवं च यावदध्यवसायो ऽर्थस्य तावदर्थादिति सामर्थ्यादियदभ्युपगन्तव्यं यत्सो ऽर्थः प्रकाशते, अप्रकाशमाने ऽध्यवसातव्ये ऽध्यवसायोऽन्धप्रायः स्यात् । प्रकाशनं च न तदानींतनकालस्य त्यागेन, नापि स्वीकारेण, इदमित्येवावभासनप्रसङ्गात् । तस्मादतीतानुभवकालः पूर्वानुभूतभावस्वालक्षण्याक्षेपकत्वेनापेक्षणीयो वेद्यभागे प्रकाशात्मकावभासाभिनिवेशितया, स्मर्तृदेहप्राणाद्यवभासकालश्चावलम्बनीयो वेदकभागे विमर्शांशाभिनिवेशित्वेन, । आभासमात्रं हि भावस्य स्वरूपं प्रत्याभासं प्रमाणस्य व्यापारात् । तदेवाभासान्तरव्यामिश्रणया दीपसहस्रप्रभासंमूर्छनवत्स्फुटीभवति आभासान्तरव्यामिश्रणाभाव ऽपि तु कालाभाससम्भेदेनैव स्वालक्षण्यं तस्याभासस्य करोति कालशक्तेरेव भेदकत्वादिति वक्ष्यते । एवं तावत्स्वलक्षणीभावः प्राक्तनदेहाभाससाचिव्याद्युदितकालाभासयोजनया घटाभासस्येति तावत्येव वा स्मृतिराभासान्तरैरपि वा व्यामिश्रातिस्फुटात्यन्तस्फुटीभावे ऽपि तदानींतनकालता न त्रुट्यति । अन्यसाधारण्येनानवभासनात् । "तथा ऽवभासे तु योगिनस्तन्निर्माणमेव ब्रह्मभाषितादौ तु नवमेवावभासनमिति,, तत्र तु आगमादिमानान्तरानुभूतब्रह्मादिस्वरूपस्मरणपरम्पराभ्युपायः । भासयेदिति विधिरूपेण नियोगेन नियमो लक्ष्यते, न चाभासयतीत्येतच्च, अपि तु भासयत्येवेति, "स्वकालइति,, स्मरणकाले, आमृशन्निति वेदकभागनिवेशी वर्तमानकाल उक्तः । पूर्वावभासितं स्वलक्षणमिति वेद्यांशस्पर्शी भूतकालो घटाभासस्यापि केवलस्य स्वालक्षण्यापत्तिहेतुर्दर्शितः । इयदेव स्मृतेरव्यभिचारि वपुः । अर्थितातिशयात्तु स्फुटत्वमित्यथशब्दो द्योतयति तदेवाह । अखिलात्मनेति सर्वाभाससंमिश्रेण वपुषेत्यर्थः ॥

नन्वेवं स्वलक्षणस्य प्रकाशने भेदेन बहिस्तदवभासेत एतदेव हि बहिरवभासनं यत्स्वलक्षणप्रकाशनमिति शङ्काशमनाय निरूपयति ।

(३) न च युक्तं स्मृतेर्भेदे स्मर्यमाणस्य भासनम् ।
तेनैक्यं भिन्नकालानां संविदां वेदितैष सः ॥

स्मरणज्ञानाद्भिन्नत्वेन बहीरूपतया यदि सोऽर्थो भासेत स्मर्यमाणस्य च यद्भासनं तदेव न स्यात् । स्मर्यमाणमेव तन्न स्यात् । अनुभूयमानमेव तद्भवेदिति यावत् । "ननु चैवं कथं स्वलक्षणस्य प्रकाशनम्,, । उक्तमेतत् । नेदानीं प्रकाशनमपि तु पूर्वकालएव, तदा चासौबहिरवभासतएव । "ननु चेदानीं तर्हि किं,, विमर्शनमिति ब्रूमः । "ननु प्रकाशनविमर्शनयो-

* अनवधूयैवेति । अयं भावः । योऽयं विषयतानामकः प्रकाशस्य नीलसुखादौ संबन्धः सोऽन्तर्मुखस्य विमर्शस्य विषयप्रवणताकालात् तत्कालवृत्तिशरीरादिभ्यश्च नातिरिच्यते । ततश्चाच्छादकापहस्तनोत्तरकाले पुनरन्तर्मुखप्रकाशस्य पूर्वानुभूतविषयोन्मुखस्यानुभवकालशरीरादिरूपसंबन्धेनोपसर्जनेन प्रधानभावमापादितोऽपहस्तनाव्यवहितोत्तरकालशरीरादिरूपः संबन्धो नीलादौ विषये परामर्शस्य स इत्याकारतां प्रति प्रयोजयतीति । मतत् पर्यवस्यति । यदनुभवकालादिविशिष्टः संस्कारोद्बोधाव्यवहितोत्तरकालशरीरादिर्विषये स्मरणस्य संबन्धस्तेनैव च विमर्शसंसृष्टो विषयः सइत्यभिलापस्य विषयइति । यस्तु विमर्शः कालदेशाद्यविशिष्टकालादिना विषयेण संबध्यते सएवेदमित्यभिलापेनानुभवपदेन च व्यवह्रियतइति बोध्यम् ।

† मायाविद्यारूपं यद् द्वयं पूर्वोत्तरान्तर्मुखविषयोन्मुख्याख्यं तस्याद्वयमेकविमर्शापारोहस्तन्मयमित्यर्थः ।

‡ प्रमातर्यहमित्यन्तर्मुखे बोधे ऽनुभवस्याभेदो वास्तविको भेदस्तु काल्पनिक इति बोध्यम् ।

§ इदं विकल्पपदं प्रमाणेतरवृत्तिमात्रपरं न तु "शब्दज्ञानानुपाती वस्तुशून्यो विकल्प,, इति लक्षितपरम् । ततश्च गगनकुसुमनरविषाणादिविकल्पेन यथा ऽर्थो न स्पृश्यते तथा स्मृत्या ऽपि न स्पृश्यतेति भावः ।

* "स्मृतिकाले,, इति पुस्तकान्तरे पाठः स च स्वकाल इति मूलानुगुणः ।

र्भिन्नकालत्वमापतितम् । ततः किम् । उभयमपि न किं चित्स्यात् । अन्योन्यजीवितत्वादस्य,, । मैवम्, । यस्य हि संवेदनान्येव भिन्नानि तत्त्वं तस्येदमप्रतिसमाधेयमेव । अस्मद्दर्शने तु भिन्नकाला अपि संविदस्तत्कालात्यागेनैवैकताभासनेन स्वतन्त्रः प्रमाता यावदन्तर्मुखतया तावत्यंशे विमृशति तावत्प्रकाशस्य तात्कालिकबहिर्भावावभासः विमर्शस्येदानीन्तनान्तर्मुखा स्थितिरिति। एतदेव वेदनाधिकं वेदितृत्वं वेदनेषु संयोजनवियोजनयोर्यथारुचिकरणं स्वातन्त्र्यं कर्तृत्वं चैतदेवोच्यते । घटमहमन्वभूवमिति वा स घट इति वा ऐक्यमनुसंधानमनुसन्धातुरभिन्नमिति दर्शयितुं यदेवैक्यं स एव वेदितेति सामानाधिकरण्येन दर्शितम् । एष स इत्याच्छादितस्यैव प्रमातृतत्त्वस्य स्फुटावभासनं कृतमिदमिति विस्मयगर्भयोक्त्या प्रत्यभिज्ञानमेव सूचितम् । यदाह ग्रन्थकार एव ।

इत्थं स्वसंवित्ति मपह्नुवानै-
र्यैस्तद्दुर्दद्भिः कलुषीकृतं यत् ।
प्रमातृतत्त्वं स्फुटयुक्तिभिस्तान्
मूकान्विधाय प्रकटीकृतं तत् ॥

इति ॥

ननु च प्राच्य एवानुभवो यदि स्मर्यमाणस्य बहिरवभासनरूपः प्रकाशस्तर्हीयदुच्यताम् । सो ऽनुभव इदानीं स्मरणेन विषयीक्रियत इति ऐक्येन त्वलौकिकेन को ऽर्थ इति व्यामोहं विहन्तुमाह ।

(४) नैव ह्यनुभवो भाति स्मृतौ पूर्वार्थवत्पृथक् ।
प्रागन्वभूवमहमित्यात्मारोहेण भासनात् ॥

वैधर्म्यसाधर्म्याभ्यां दृष्टान्तः, प्रागित्यनुभवकाले यथा स पूर्वो घटादिरर्थः पृथगितीदन्तया भाति स्म नैवं स्मरणकाले स्मृतिज्ञानात्पृथक्त्वेन इदं पूर्वमनुभवनमिति भाति यथा च स्मृतिज्ञानकाले तस्मात्स्मृतिज्ञानात्सो ऽर्थः प्रागिति पूर्वस्वभावो न भेदेनाभाति स्मृतिकाले बहिरवभासाभावात्।एवं तत एव हेतोः पूर्वो ऽप्यनुभवो न भेदेनाभाति "कथं तर्ह्युभयं भाति अन्वभूवमित्येवम् । एतत्किमुच्यते इति चेत्,, । अहमित्येवंस्वभावो य आत्मा पूर्वापरसंविदन्तर्मुखस्वभावस्तत्र यदारोहणं विश्रमस्तेन हेतुना पूर्वसंविद्रूपतायाः स्वप्रकाशाया भासना तल्लीनस्यापि घटस्य स्वप्रकाशदेशीयत्वेनावभासनम् । आत्मनि चारोहणं विश्रमणमनुभवस्यार्थस्य च प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूत इति न्यायात्संख्याक्षिप्ते तद्वति वा कर्तृभूते ऽस्मदर्थे प्रत्ययार्थे ऽनुभवो ब्रुडितः । तद्द्वारेणार्थो ऽपि च न तु स्वातन्त्र्येणैवासौ तदर्थमेव कर्म न निर्दिष्टम् । घटादिः पुनरनुभवकाले नास्मदर्थमारोहयति हि यस्माच्चैव भाति पूर्वो ऽनुभवः पृथगपरार्धोक्ताद्धेतोः तस्मात्संविदामैक्यमिति पूर्वेण सम्बन्धः । लुङा भूतकालस्य द्योतितत्वात्प्रागिति भिन्नक्रमः उत्तमपुरुषेणास्मदर्थस्याहमित्यपि आरोहणमिति रुहिरपि णिजन्तो ऽपि ॥

ननु क एवमाह अनुभवः पृथङ्न भातीति, घटवच्चभातीति चेत् । किं ततः, घटो ऽपि हि नानुभवभङ्ग्या भातीति किं न भाति, स्वभावेन भातीति तूभयत्रापि समानम् । तथाहि । अतीतानागतसूक्ष्मादि यथा योगिज्ञाने विषयीभवतीत्यभ्युपगतं, तथा परचित्तमपि * "प्रत्ययस्य परचित्तज्ञान,,मित्यादौ, तत्र ज्ञानवृत्तिपरिणतमेव सत्वं चित्तशब्देनोक्तम् अन्यथा प्रत्ययस्य संयमविषयीकार्यत्वं किमुच्यते आलम्बनयोगश्च कथं शङ्क्येत न च सालम्बनमिति तस्मात्परकीयमनुभवनमिव निजमपि विषयीक्रियतामित्याशङ्क्य दृष्टान्त एवासिद्ध इति भान्तीत्यन्तेन, अभ्युपगमेन वा सिद्धत्वे ऽपि प्रकृते ऽर्थे विषम इति शेषेण दर्शयति ।

(५) योगिनामपि भासन्ते न दृशो दर्शनान्तरे ।
स्वसंविदेकमानास्ता भान्ति मेयपदे ऽपि वा ॥

योगिनां यदेतद्दर्शनान्तरं भावनाद्युद्भवः परचित्तविषयो ज्ञानविशेषः तत्र दृश इत्युपलब्धयो न भान्ति । तथाहि । सौगतानां तावत्स्वप्रकाशैकरूपं ज्ञानं तच्चेज्ज्ञानान्तरेण वेद्यं तर्हि यदस्य निजं वपुरनन्यवेद्यतया प्रकाशनं नाम न तत्प्रकाशितं स्यात् । सांख्यानामपि पुरुषच्छायैवोपलब्धिः पुरुषश्चासंवेद्यपर्वेति कथं वेद्या स्यात् । वैशेषिकानामप्यात्मन्यभेदेन समवायि संवेदनं परगतं मनसा कथं गृह्येतान्तः शरीरवृत्तिना । तच्छरीरान्तरनुप्रवेशे तु तस्यैवाहमिति शरीरीकरणादहंतावभासितत्वादात्मनो भेदो विगलेत् । नित्यानुमेयत्वं तु नात्मन उपपद्यते । ज्ञानस्य च ज्ञानान्तरवेद्यत्वे ऽनवस्थाद्युक्तम् । तस्माद्योगिनः परचित्तवेदनावसर इयान्प्रकाशः, एतद्देहप्रकाशसहचारी घटसुखादिप्रकाश इति तत्र घटसुखादिरिदन्तया भाति । तद्गतस्तु प्रकाशो ऽहमित्येव स्वप्रकाशतया प्रकाशते । प्रमात्रीकृतपरदेहप्राणादिसमवभाससंस्कारात्तु तच्चिष्ठामिदन्तां प्रकाशभागे ऽपि मन्यमान इदं परज्ञानमित्यभिमन्यते । अविगलितस्वपरविभागो योगी प्राप्तप्रकर्षस्तु सर्वमात्मत्वेन पश्यन् स्वसृष्टमेव स्वपरविभागं पश्यतीति ज्ञानस्य न योगिज्ञानेन प्रकाश्यता । भवतु वा । तथा पि प्रकृते

* प्रत्ययस्य रागादिमत्याः स्वकीयचित्तवृत्तेः संयमेनाश्रयादिरूपैरशेषविशेषैः साक्षात्करणात् ततस्तस्माच्चित्तात् परस्य भिन्नस्य चित्तान्तरस्याप्यशेषविशेषतो ज्ञानं संकल्पमात्रेणैव भवतीत्यर्थ इति योगवार्त्तिककारैर्व्याख्यातमिदम् ।

नैतत्समम् । तथाहि । अयमनुभवतीति परनिष्ठ एवासावनुभवे योगिनः प्रकाशो न त्वहमनुभवामीत्यात्मारोहेण । इह त्वन्वभूवमित्यहमंशविश्रान्तिरनालीढेदम्भावैवानुभवस्येति युक्तमुक्तम् । यस्मादनुभवः पृथङ्ग् भाति तस्मादैक्यं भिन्नकालानां संविदां वेदितेति ॥

यद्यहम्भावविश्रान्तिवशादनुभवः स्मृतौ पृथङ्ग् भातीत्युच्यते तदा परामर्शान्तरं साक्षादवेदंतया ऽनुभवं परामृशद् यदि वा इदंभावोचितघटादिविश्रान्ततामनुभवस्य प्रथयदुपलब्धमिति तदनुसारेणापि किं न व्यवह्रियत इति पराभिप्रायं प्रतिक्षिपति ।

(६) स्मर्यते यद्दृगासीन्मे सैवमित्यपि भेदतः ।
तद्व्याकरणमेवास्या मया दृष्टमिति स्मृतेः ॥

लोकस्य तावदेवं न संवेदनं, स हि न पृथग्भूतां दृशं कां चिन्मन्यते सा दृङ्ग् आसीदित्येवम्, अपि तु यत्स्मर्यते एवं भूतमपि यत्स्मरणं कस्य चिद्विवेचकंमन्यस्य तत्स्मृतेर्व्याकरणं पदस्येव प्रकृतिप्रत्ययार्थनिरूपणं काल्पनिकं विभज्याकरणं परत्र प्रतिपादनमात्रम् । सो ऽपि यदि मूलप्रतीतिं विमृशति पूर्वोक्तक्रमेण तदानुभवं पृथग्भूतं न वेदयत एव तद्राहोः शिर इति वत्कल्पितं भेदं मन्यते । अन्यथा स घट इतिवत्सा दृगित्यत्रापि प्राक्तनं दृगन्तरमपेक्षणीयं स्यात् । तदित्यनेन हि घटस्य वा दृशो वानुभवविषयतापत्तिरुच्यते । अन्यथा दृगित्येव स्यात् । ततश्च दृङ्ग्या दृगन्तरेणानुभूतेत्यापतेत् तत्रापि तथात्वे ऽनवस्था । ननु स्मृतेर्मौलिकं किं रूपम्, । उच्यते, । मया दृष्टमिति, । नन्वत्र दयितावदननलिनादिविश्रान्तं दर्शनमुक्तं, न त्वात्मारूढं, कर्मणि निष्ठोत्पत्तेः, स एष स्ववाचमेव न चेतयति । कर्तुः क्रियया ह्याप्यं कर्मेति दृशिक्रियायाः कर्तृनिष्ठतैव तथा च कर्तृस्थामेव दृशिक्रियामाहुः दर्शयते भृत्यान्राजेत्यादौ जैमिनीयैरपि ज्ञानरूपा दृशिर्भावनात्मिका प्रमातृविश्रान्तैवोक्ता, केवलं प्रकटता विषयधर्मो दृष्टता नामान्या संविद्वा स्वातन्त्र्येत्यन्यदेतत् प्रमातृविश्रान्तत्वमेव कथयितुं मयेत्युक्तम् तेनान्वभूवमहं मयानुभूतमिति शब्दवैचित्र्यमात्रमिदं, न त्वर्थभेदः, अन्ये तु भिन्नक्रमत्वेन योजयन्ति । दृगासीत्सा मे इत्येवं मया दृष्टमिति च यत् स्मरणं तद्व्याकरणमस्या इत्यनन्तरोक्तान्वभूवमित्युचितपरामर्शायाः स्मृतेरिति । अपिश्चार्थे ॥

ननु दृष्टमपि निर्विकल्पेन यावन्नपरामृष्टं विमर्शविशेषविश्रान्त्या तावन्न स्मर्यते । मार्गदृष्टमिव तृणपर्णादि विशेषरूपेण तत्स्विदमेव विचारणीयम् । समनन्तरभावि विकल्पकाले तद्दर्शनमिदन्तयावभातपूर्वं वा न वेति तदाशङ्काह ॥

(७) या च पश्याम्यहमिमं घटो ऽयमिति वा ऽवसा ।
मन्यते समवेते सा ऽप्यवसातरि दर्शनम् ॥

इह दर्शनं यादृशं निजेन वपुषा तादृशेनैव तेन भातव्यं सर्वदा । तच्च स्वकाले ऽनन्यप्रकाशमहमित्येतावता रूपेणोचितप्रकाशं तद्विकल्पांशविचारस्तावन्न कुत्रचिदङ्गम् । भवतु वा । किं त्ववसायो ऽप्येवंभूत इत्यपि शब्देन सूचयति । तत्र समनन्तरभाविना विकल्पेन वस्तु परामृश्यमानमनुभवपरामर्शमुखेन वा परामृश्यते ऽहमिमं पश्यामीति वर्तमानतया इममित्यनेन च प्रत्यक्षव्यापारत्वं प्रत्यक्षायमाणत्वेन दर्शितम् । एवमेव वा परामृश्यते घटो ऽयमिति । अत्रायंशब्देन प्रत्यक्षायमाणत्वमुक्तम् । तत्रान्त्ये विकल्पे दर्शनस्य पृथक्परामर्श एव नास्तीति का तत्रेदंताशङ्का । ततश्च पारिशेष्यात् अहंतया तस्यात्रास्ति परामर्शः । तदभावे विकल्पस्य निमीलिताक्षेपिभावात्स्वयमर्थास्पर्शे स्फुटतमविषयपर्यवसितः कथमध्यवसायो भवेत् । आद्ये तु दर्शनं परामृष्टमप्यस्मदर्थान्तर्भूतमहम्भावास्पदमवसातरि विश्रान्तं स्वप्रकाशमेव परामृष्टमिति विकल्पो ऽपि न बोधान्तरबोध्यतां बोधयति बोधस्य । अवसायो ऽवसा,समवेतमित्यपृथग्भावमाह । अवसातरीति । स्वतन्त्रे ऽन्तर्मुखे बोधात्मन्यहंतास्पदे इत्यर्थः दर्शनमिति निर्विकल्पकमनुभवनम् । उपलक्षणं चैतत् । विकल्पस्मृत्यादेरपि ज्ञानस्य ज्ञानान्तरेण परामर्शे ह्ययमेव न्यायः विकल्पयाम्यहं विकल्पितं मया स्मृतं मयेत्यहंतारूढ्यैव विकल्पादेरवभासात् । अत एवात्मनो ऽमी विकल्पाद्याः शक्तिविशेषास्तद्विश्रान्तशरीरत्वादिति दर्शितं ज्ञानस्मृत्यपोहनशक्तिमानित्यत्र ॥

एवमियतः प्रमेयस्य यत्फलं तदुपसंहर्तुमाह ।

(८) तन्मया दृश्यते दृष्टो ऽयं स इत्यामृशत्यपि ।
ग्राह्यग्राहकता भिन्नावर्थौ भातः प्रमातरि ॥

तदिति तस्मादर्थे पूर्वोक्तस्य प्रमेयस्य हेतुभावेनोपजीवनमिह सूचयति । यत एवमुक्तम् । अनुभवस्यार्थस्येव स्मरणाचभेदेनावभासः । स्मृतिशक्तिश्च परमेश्वरस्यैव तत इदमत्र परिनिष्ठितं तत्त्वमिति । इह स्मृतिरनुभवं क्रोडीकरोतीत्युक्तम् । अनुभवश्च द्विधा परामर्शभेदात् कदा चित्स्वात्मपरामर्शपूर्वकमनुभाव्यमामृशति यत्रास्याभिसंधिप्रधानता मया दृश्यते इति । कदा चिदनुभवनीयमेव प्रधानतया परामृशति । यत्रा ऽनभिसंधेरेव सहसा वस्तूपनिपातो ऽर्थक्रियां प्रत्यायहविशेषो वा अयमिति । तत्रापि च प्रकाशपरामर्शो ऽस्त्येव । अन्यथा प्रकाशायोगात् । एवमुभयथा ऽनुभवे प्रत्येकं स्मृतिरपि द्वयपरामर्शमप्युदेति । चत्वारः स्मरणभेदाः द्वाव-

नुभवभेदौ अनुसंधानरूपं प्रत्यभिज्ञानमप्येतदुभयमेलनात्मकमत्रैवान्तर्भूतं तच्चैतद्भेदादष्टधा पूर्वापरविश्रान्तिकृतात्प्रत्येकं द्विधा भेदाच्च षोडशधा तदेते द्वाविंशतिः संवेदनभेदाः । तेषु च ग्राह्यं तावत्प्रकाशाद्बहिर्भूतमन्यथा प्रकाशनायोगात् बहिर्भूतं च तदन्यथार्थत्वासम्भवात् । न च तत एव तदेव तदेव पृथग्भूतं चा पृथग्भूतं च भवतीति नूनमन्यः कल्पितप्रकाशात्मा कश्चिदत्रार्थो ऽस्ति यतो ऽयमर्थराशिः पृथग्भवन्नन्योन्यमपि पृथक्तामधिगच्छेत्। अन्यथा प्रकाशाभिन्नानां परस्परमपि कथंकारं पृथग्भावो भवेत् । सो ऽयं वेद्यैकदेश एव विच्छिन्न एवानुज्झितवेद्यभाव एवाहमिति विच्छेदशून्योचितेन परामर्शेन परामृश्यमानो मायाप्रमातेति वक्ष्यते । देहबुद्धावित्यत्र स च ग्राहक इत्युच्यते । एवं सममेव स्वात्मनि विमलमुकुरस्थानीये यद्युगलकं स्वस्मात्प्रकाशरूपादव्यतिरिक्तमवभासयति परमेश्वरः । तदेवैतद्भगवतो ज्ञानकर्तृत्वं स्मरणकर्तृत्वं च ज्ञानशक्तिस्मृतिशक्तिरूपमुच्यते इति तात्पर्यार्थः । अक्षरार्थस्तु मया दृश्यत इति अयमिति च यदामृशति प्रमाता प्रकाशरूपो येनानुभवतीत्युच्यते । तत आमर्शनादेतल्लक्ष्यते । ग्राह्यरूपेण ग्राहकरूपेण योजितौ घटादिदेहादिस्वभावावर्थौ वेद्यौ प्रमातरि विशुद्धप्रकाशरूपे भातः प्रकाशेते । एवं दृष्ट इति स इति च यत्परामृशति प्रकाशरूपः प्रमाता यतो ऽसौ स्मरतीति व्यपदेश्यस्ततो ऽप्येतदेव लक्ष्यते । अनुभवरूपोपजीवितत्वं पूर्वोक्तं द्रढयितुं प्रसङ्गादत्र ज्ञानशक्तेरप्युन्मीलनं कृतम् * लक्षणे शत्रादेशः अपि शब्दश्चार्थे अर्थशब्दो विच्छिन्नवेद्यवाची । ग्राहको मायीयः कल्पितः प्रमाता शुद्धप्रकाशस्वभावः ॥ ८ ॥

आदितः सूत्रश्लोकाः ३० व्याख्याताः ॥

श्रीमदाचार्याभिनवगुप्तविरचितायामीश्वरप्रत्यभिज्ञासूत्रविमर्शिन्यां स्मृतिशक्तिनिरूपणम् ॥

॥ इति चतुर्थमाह्निकम् ॥

---

† यदनुत्तरसंबोधादानन्दविकस्वरेच्छया पूर्णम् ।
ईश्वरमुन्मिषदमृतौघसुन्दरं तत्स्तुवे धाम ॥
स्वरूपगृहमध्यान्तर्भावभाण्डप्रकाशकम् ।
प्रज्वाल्य दीपं ज्ञानाख्यं स्वप्रकाशं शिवं स्तुमः ॥
महागुहान्तर्निर्मग्नभावजातप्रकाशकः ।
ज्ञानशक्तिप्रदीपेन यः सदा तं स्तुमः शिवम् ॥

---

* लक्षणहेत्वोः क्रियाया इत्यनुशासनात् ।

† इदं श्लोकद्वयं यदनुत्तरेत्यादि पुस्तकान्तरे ऽदर्शनात् पूर्वोत्तराह्निकेषु महाप्रकरणारम्भं विनैकैकश्लोकोपनिबन्धनस्यैव दर्शनात् प्रक्षिप्तमिति लक्ष्यते ।

एवं तावत्स्मृतिशक्तेः स्वरूपं प्रतिपादितम् । अधुना तदुपजीवनीयज्ञानशक्तिपरामर्शनिर्णयं वितत्य "वर्तमानावभासाना,,मित्याद्यया "सक्रमं प्रतिभासत,,इत्यन्तया श्लोकैरेकविंशत्या निरूपयति । तत्राद्येन श्लोकेन वस्तुनि प्रतिज्ञां करोति । एवंभूता ज्ञानशक्तिरिति । ततः श्लोकद्वयेन प्रकाश एवार्थानां स्वरूपमित्याह । ततो द्वयेन प्रकाशबाह्यानामर्थानां सद्भावं विज्ञानवादोपगतवासनादूषणेन दृढीकृतमाशङ्क्य तृतीयेन तदनभ्युपगमे ऽपि तावन्न किं चिदुपरुध्यत इति दर्शयति । अथ श्लोकेन स्वदर्शने ऽर्थनत्वमुपदर्शयन्बाह्यार्थसद्भावे प्रत्यक्षं निराकरोति प्रमाणत्वेन । ततो द्वयेनानुमेयतामपि बाह्यस्य निरस्यति । अनन्तरं श्लोकेन चिदात्मन्यर्थानामवश्यं सद्भावः परामर्शात्मनेति प्रकटयति । ततो ऽपि प्रकाशस्य प्रमातृरूपस्य प्रत्यवमर्श एव जीवितमिति श्लोकचतुष्टयेनानुभवागमन्यायस्वरूपनिरूपणाभिरभिधत्ते । अनन्तरं ज्ञानपरामर्श एव ज्ञेयं शुद्धं प्रमातृरूपतानुज्झितं च प्रथयतीति तस्यैव प्रधानत्वे न्यायं श्लोकत्रयेणाह । प्रकाशैकरूपत्वे च ज्ञानज्ञात्रादिभिन्नमिति श्लोकेनाह । ततो ज्ञातरीव विशुद्धे ज्ञाने ऽप्यविकल्पकसविकल्पकरूपे विमर्श एव प्राणितमिति श्लोकद्वयेनाह । ततो ज्ञातुर्ज्ञानस्य च पूर्वपक्षे दूषितं यद्भिन्नत्वं तदुपसंहारदिशा श्लोकेन समर्थयत इति तात्पर्यमाह्निकस्य ॥

श्लोकार्थस्तु निरूप्यते ॥

ननु स्मरणविकल्पादीनामनुभव एव जीवितं तत्र यदि भेदेनाभासन्ते ऽर्थाः तत्तेष्वपि तथैवावभास उचितः । नो चेदन्यथा, तदनुभव एव तावज्ज्ञानशक्तिरूपो विचारणीय इत्याशयेनाह ।

(१) वर्तमानावभासानां भावानामवभासनम् ।
अन्तः स्थितवतामेव घटते बहिरात्मना ॥

वर्तमानत्वेन स्फुटतया ऽवभासनमिदमित्येवमाकारं येषां तेषां यदेतद्बहिरात्मना कल्पितमायीयशून्यादिशरीरान्तप्रमातृपृथग्भावेन हेतुना भिन्नानां । ततो मायाप्रमातुर्विच्छिन्नानामवभासनं तत्परमार्थप्रमातरि शुद्धचिन्मये ऽन्तः स्थितवतां तेन सहैकात्म्यम * नुज्झतामेव घटते प्रमाणेनोपपद्यते । तेनानुज्झितसंविदभेदस्य भावस्य † कल्पितप्रमात्रपेक्षया भेदेन प्रकाशनं भगवतो ज्ञानशक्तिरित्युक्तं भवति ॥

प्रमाणेनोपपद्यत इत्युक्तं तत्प्रमाणं दर्शयति ।

---

* उज्झ उत्सर्गे ।

† अनेन च विषयस्य ज्ञानात्मकता पारमार्थिकी कल्पितत्वाद्[illegible]वस्तु भेद इत्युक्तं भवति ।

(२) प्रागिवार्थो ऽप्रकाशः स्यात्प्रकाशात्मतया विना।
न च प्रकाशो भिन्नः स्यादात्मार्थस्य प्रकाशता ॥

अर्थो नीलादि,स्तस्य नीलादिरूपतैव यदि प्रकाशमानता, न पुनरपरा का चिदर्थशरीरोत्तीर्णा प्रकाशात्मता, तर्हि यथा सर्वान्प्रति नीलमेव तत्सम्भावनया भण्यते, । न कं चिद्वा प्रति, वस्तुतो वा स्वात्मन्येव तन्नीलं परस्य परनिष्ठत्वानुपपत्तेः, स्वात्मनि वा न नीलं प्रकाशानुग्रहेण विना व्यवस्थानायोगात् तथा प्रकाशमानता ऽप्यस्य सर्वान्प्रति न कं चिद्वा प्रति, अपि तु स्वात्मन्येव स्वात्मन्यपि वा न स्यादित्यन्धता जगतः । "अर्थेन्द्रियालोकादिलक्षणवर्गात्प्रकाशरूपो ऽसौ नीललक्षणो विशिष्ट एव जातः,, । एवमपि स एव प्रसङ्गः, । प्रकटतावादेप्ययमेव दोषः, सर्वथा ऽर्थशरीरविश्रान्तश्चेत्प्रकाशो ममावभासत इति प्रमातृलग्नतया प्रकाशस्थितिर्दुरूपपादा, प्रमाता हि तदानीमिन्द्रियादिमयो ऽर्थरूपस्य प्रकाशस्य कारणं भवेद्बीजमिवाङ्कुरस्य, न चाङ्कुरो बीजापेक्षोऽङ्कुरात्मा, ततो यदि न प्रकाशात्मा स भवेत्प्रागिव ज्ञानोदयात्पूर्वं यथा सो ऽप्रकाशस्तथा ज्ञानोदये ऽपि स्यात्। "ननु ज्ञानमर्थप्रकाशरूपमेव तत्कथं ज्ञानस्योदयानुदययोरर्थस्य तुल्यता स्यात्,, । स्यादेतद्यद्युपपद्येत, । यावता ऽर्थाद्भिन्नं यज्ज्ञानं प्रकाशरूपं तदर्थस्य सम्बन्धितया कथं स्यात् । यदि तावदर्थः प्रकाशत इत्येवंभूतं ज्ञानस्य स्वरूपं तदर्थज्ञानयोरभेद एवायातः * । अर्थस्वभावस्य ज्ञानत्वेनोक्तत्वात् । अर्थस्वभावत्वे च प्रकाशस्यार्थात्मतायामुक्तं दूषणम् । अथार्थं प्रकाशयतीति ज्ञानस्य स्वरूपं, तर्हि प्रकाशमानमर्थं करोति ज्ञानमित्यापतिते पुनरपि स एव दोषः, कृतप्रतानश्चायं प्रकृत्यर्थण्यर्थविवेको मयैव भेदवादविदारणे इति तत एवान्वेष्यः । तस्माद्भिन्नः प्रकाशो ऽर्थस्य संबन्धी भवतीति संभावनैव नास्ति । अतश्चेदमुपपत्त्या ऽऽयातमर्थस्य स्वरूपं प्रकाशमानत्वं प्रकाशाभिन्नत्वमिति । प्रकाशश्च यदि घटे ऽन्यः पटे ऽन्यस्तदानुसन्धानस्यायोगो, द्वयोः प्रकाशयोःस्वात्ममात्रविश्रान्तिपर्यवसानादिति वितत्योपपादितं नश्येज्जनस्थितिरित्यत्र तस्मादेक एव प्रकाशः । एतदेवावृत्त्या दर्शितं "न च प्रकाशोभिन्नः स्या,,दिति ॥

व्यतिरिक्तस्य ज्ञानस्यार्थप्रकाशरूपतामभ्युपगम्यापि बाधकान्तरमाह ।

(३) भिन्ने प्रकाशे चाभिन्ने सङ्करो विषयस्य तत् ।
प्रकाशात्मा प्रकाश्यो ऽर्थो नाप्रकाशश्च सिद्ध्यति ॥

* अर्थः प्रकाशत इत्यनेनार्थवृत्तिप्रकाशक्रियाया एव बोधनात् क्रियाक्रियावतोश्चाभेदादिति भावः ।

यद्यर्थादन्य एव ज्ञानात्मा प्रकाशो ऽतएव भिन्नो ऽर्थत,स्तर्हि स्वात्मनि तस्य प्रकाशमात्ररूपत्वादभेद एव । तथाहि । नीलस्य प्रकाशः पीतस्य प्रकाश इति यो ऽयं नीलांशः पीतांशश्च स तावज्ज्ञानस्य न स्वरूपम् । भेदवादत्यागापत्तेः अथ विषय,स्तद्देवेदं विचार्यते । इह प्रकाशबलान्नीलपीतयोर्भेदो ऽभ्युपगन्तव्यः । येनैव च प्रकाशेन नीलो नील इत्युपगम्यते तेनैव च प्रकाशेन पीतः पीत इति कथं सङ्गच्छताम् । नीलेन जनितः पीतेन जनितस्तेन वा सहैकसामग्रीक इत्यादि यदुच्यते, तत्सिद्धे नीलपीतयोर्भेदे स्यात् । स एव विचार्यः । अथ नीलाकारो ऽसौ, * तद्यदि प्रतिबिम्बबला, त्तद् द्वितीयबिम्बानवभासादयुक्तम्, । अथाभेद,स्तर्हि त्यक्तो भेदवादः । तथा कारणतादिवादे शिखरस्यज्ञानं बहुतरनीलादिजन्यमेकत्र पट्वन्यत्र मन्दमिति कथं भेदः, प्रकाशशरीरस्याभेदात् । तथाभूते चान्यतरदर्शनोद्बोधिते ऽपि संस्कारे बलादेवाशेषस्मरणप्रसङ्ग इति भूयान्संकरः । स्यादेतत् । अर्थ एवास्तु किमनेन दोषापादकेन प्रकाशेनेति । अत्राह । अप्रकाशस्य सिद्धिरेव न का चित् । स्वात्मनि हि नीलं यदि पीतं न किं चिद्वा तत्किं दुष्येत् । अतएव ग्रन्थकृतैवान्यत्रोक्तम् ।

एवमात्मन्यसत्कल्पाः प्रकाशस्यैव सन्त्यमी ।
जडाः प्रकाश एवास्ति स्वात्मनः स्वपरात्मभिः ॥

इति । तद्यदि प्रकाशस्तदा भवत्यर्थः प्रकाशश्चासौ कथम् । यदि प्रकाशतैव घटस्य वपुः सैव पटस्येत्यादिविश्ववपुः प्रकाशः सिद्धः ॥

एकस्यैव प्रकाशस्यैवंभूतक्रमाक्रमकार्यकारणभावादिविचित्रवैश्वरूप्यप्रदर्शनसामर्थ्यरूपमैश्वर्यमित्येतावत्पर्यवसाययितव्यम् । तच्चैवं पर्यवस्यति । यदि प्रकाशस्य विचित्रभावे हेत्वन्तरमपाकृतम् । तत्र प्रकाशस्याविचित्रस्य क्रमेण विचित्रताकारणं प्रतिबिम्बात्मकं तत्प्रतिबिम्बसजातीयं यत्तदेव नीलादिरूपं बाह्यम् । तच्च यद्यप्यनुमेयं तथापीदं नीलमिति प्रत्यक्षेणाध्यवसायादध्यवसायप्राणितत्वाच्च प्रमाणस्थितेः प्रत्यक्षव्यपदेश्यं भविष्यति बाह्यार्थवादिकथितमिति हेत्वन्तरमनुमीयमानं बाह्यरूपमाशङ्कमानस्त्वेन दर्शयति ।

(४) तत्तदाकस्मिकाभासो बाह्यं चेदनुमापयेत् ।
नह्यभिन्नस्य बोधस्य विचित्राभासहेतुता ॥
न वासनाप्रबोधो ऽत्र विचित्रो हेतुतामियात् ।
तस्यापि तत्प्रबोधस्य वैचित्र्ये किं निबन्धनम् ॥

* तदाकारत्वं च तत्प्रतिबिम्बप्रयुक्तं यदि स्यात् तर्हि प्रतिबिम्बस्थले बिम्बप्रतिबिम्बयोर्द्वयोरुपलम्भान्नीलद्वयाभासप्रसङ्ग इति भावः ।

इह बोधस्तावदभिन्नः प्रकाशमात्रमेव ह्यस्य परमार्थः प्रकाशाधिकं यदि नीलस्य रूपं तर्हि तदप्रकाशरूपमिति न प्रकाशेत । अथ तथाप्रकाशरूपत्वमेवास्य रूपं पीतप्रकाशः कथं स्यात् । अथापि क्रमिकनीलपीतादिप्रकाशरूपमेव तस्य रूपं नीलाद्याभासशून्यो ऽहमिति प्रकाशः स्वापाद्यवस्यासु न स्यात् । तस्मात्प्रकाशः प्रकाश एवं । अणुमात्रमपि न रूपान्तरमस्यास्तीति अभिन्नो बोधः । तस्य चाभिन्नस्य कदा चिन्नीलाभासता कदा चित्पीताभासतेति ये विचित्राभासास्तत्र कारणत्व हि यस्माचोपपन्नं हेतावभिन्ने कार्यभेदस्यासम्भवात् । तस्मात्स स विचित्रनीलपीतादिरूप आकस्मिको ऽज्ञातप्रत्यक्षसिद्धहेतुकःसन्बाह्यं विज्ञानगतप्रतिबिम्बात्मकस्वस्वभावसम्पादकमौचित्यवशान्निजरूपसदृशं क्रमोपनिपतद्रूपबहुतरभेदात्मकं ज्ञानात्सर्वथा पृथग्भूतमनुमापयतीति सम्भावयते बाह्यार्थवादी । न चास्येदं सम्भावनामात्रं अपि तु निश्चयपर्यवसाय्येव भवति । तथाहि । विज्ञानवादिना यो हेतुर्वैचित्र्ये वासनाप्रबोधलक्षण उक्तः स नोपपद्यते । स्मृतिजनकः संस्कारो वासनेति तावत्प्रसिद्धम् । इह त्वनुभववैचित्र्ये हेतुः पर्येषणीयो वर्तते । अस्तु वा नीलाद्याभाससंपादनसामर्थ्यरूपा ज्ञानस्य योग्यतात्मिका शक्तिर्वासना । तस्याश्च स्वकार्यसंपादनौन्मुख्यं प्रबोधः । ततो बोधेष्वाभासवैचित्र्यमिति । तत्रापि तु ब्रूमः । यद्यप्याभासानां ज्ञानान्तर्वर्तिनामपारमार्थिकं संवृतिसत्वमुच्यतापि । तथापि यदेषां कारणं तद्वस्तु सदेवाङ्गीकार्यम् । अवस्तुनः सर्वसामर्थ्यविरहितालक्षणस्य कार्यसंपादनप्राणितसामर्थ्यात्मकस्वभावानुपपत्तेः । एवं स्थिते या एता वासना आभासकारणत्वेनेष्यन्ते तासां बोधाद्यदि भिन्नं रूपं तच्च परमार्थसत्तदयं शब्दान्तरप्रच्छन्नो बाह्यार्थवादप्रकार एव । अथ संवृतिसत्तर्हि तेन रूपेण कारणतानुपपत्तिः । अथ येन रूपेणासां पारमार्थिकता तेन कारणता । तर्हि ज्ञानमात्रं तच्चाभिन्नमिति नीलाद्याभासरूपस्य कार्यभेदस्यासिद्धिः । एवं वासनानामविचित्रत्वे तत्प्रबोधोविचित्र इति का प्रत्याशा । भवन्तु वा वासना भिन्नास्तथापि तु बोधमात्रातिरिक्तस्य देशकालभावादेः प्रबोधकाभिमतस्य विचित्रस्य कारणस्याभावात्प्रबोधो विचित्र इत्येक एव प्रबोध इति सममेव नीलादिवैचित्र्यं भासेत । "अथ स्वसंतानवर्तीनि बोधान्तराणि विचित्राणि प्रबोधकारणानीति,, । तदसत् । सुखदुःखनीलपीतादिपूर्वापरादिदेशकालभेदस्य विज्ञानमात्ररूपत्वे विज्ञानस्य च प्रकाशमात्रपरमार्थतायां स्वरूपभेदासंभवे बोधवैलक्षण्यानुपपत्तेः । परप्रमातृरूपेषु बोधान्तरेषु संतानान्तरशब्दवाच्येष्वपि तुल्योयमवैलक्षण्यप्रकारः । तत्रापि परकीयाभिमतस्य कृशस्थूलादेः कायस्य श्वासप्रश्वासादेः प्राणस्य सुखदुःखादेर्वा गुणस्यानुमात्रभिमतसंविन्मात्ररूपाभेदे परत्वं कस्येति न विद्मः । बोधस्य तन्निष्ठस्येति चे,त्सोऽपि प्रमाणेन यदि न सिद्धस्तदसन्नेव, सिद्धो ऽपि प्रमेयतयाचे, त्तज्जड एव, । तथापि च कायादिवदेव ज्ञानमात्रस्वभावः स्वसंविन्मात्ररूपत्वे परं प्रत्यप्यस्यासिद्धेः । ननु व्याहारादिक्रियास्वात्मनीच्छया व्याहरेयमित्येवंरूपया हेतुभावेनव्याप्ता दृष्टा ऽतश्चैत्रकायेपि तया तद्धेतुकया भाव्यम् । न च मत्संततिपतिता समीहा ऽस्तीति स्वसंवेदनेन निश्चितम् । ततश्च परसमीहा सिद्ध्यति । तदेव संतानान्तरमिति । अत्रोच्यते । इहानुमातुर्व्यापाराभासो द्विधा भाति । व्याप्तिग्रहणकाले विच्छेदप्राणोहं व्याहरामीत्येवंरूपः । अनुमानावसरे च व्याहरत्ययमिति विच्छेदजीवित इत्यन्यस्य व्याप्तिर्गृहीता । अन्यश्चाभासः कथमिदानीं हेतुः स्यात् व्याहरतीत्याभासस्य च हेतुरविदित एवेति । कथं ततो हेतोः समीहा नुमीयते । किं च व्याहरत्ययमिति यः प्रमात्रन्तरेनुमातृसंमते विच्छिन्नतयावभासः सोनुमेयसंमतायाः परसमीहायाः कथं कार्यः स्यात् । तस्या हि व्याहरामीत्याभासः कार्यो योसाववविच्छेदजीवितः । न चाविच्छेदमयस्य विच्छेदमयः कार्यमिति युक्तम् । तथाभूतकार्यकारणभावग्रहणोपायाभावात् । नहि स्वात्मनि योयमविच्छिन्नाभासः सपरत्र विच्छिन्नं व्याहरत्ययमित्येवंरूपमाभासं जनयतीति केनचित्प्रमाणेन सिद्धम् । परसिद्धिपूर्वकत्वादस्यार्थस्य परप्रमातृसिद्धेश्च एवंभूतार्थसिद्ध्यधीनत्वेनेतरेतराश्रयात् । न चावश्यमविच्छिन्नाद्विच्छिन्नेन भाव्यमिति नियमोस्ति, व्यभिचारात् । न च विच्छिन्नोप्याभास उत्पद्यतामिति तदनुसन्धानात्तदुत्पत्तिर्नियता । तत्सद्भावेप्यनुत्पत्ते, स्तदभावे चोत्पत्ते,र्विच्छिन्न आभासः परत्रोत्पद्यतामिति या समीहा तया सह परत्रोत्पन्नस्य विच्छिन्नाभासस्य कार्यकारणभावग्रहणमेव परासिद्धौ न युक्तमिति व्याप्तेरेवासिद्धिः । प्रमात्रन्तराणि च यदि भिन्नानि तदा तन्निष्ठानामवभासानां भेद एव ज्ञानादव्यतिरिक्तं चेति न्यायात् । ततश्चैकाभासनिष्ठत्वाभावादेकाभासविश्रान्तः संभूय प्रमातॄणां व्यवहारो न स्यादित्यन्योन्यानुरक्तं भूतग्रस्तप्रकृतिप्रायं जगदापद्येत । अनुमीयमानमपि च बोधान्तरमनुमातृसंमताद्बोधाद्यदि भिन्नं तदस्ति तावत्सम्भवः । यत्प्रमेयं बोधाद्भिन्नमस्तीति । सहोपलम्भनियमादेरनैकान्तिकत्वान्नीलपीतादिनापि प्रमेयराशिना किमपकृतं येनास्य स्वरूपविश्रान्तिर्न सह्यते । तस्मात्प्रमात्रन्तराणामप्यसिद्धिरेव । सिद्धौ वा सर्वत्र प्रमात्रन्तर्गता आभासा एकैकत्र परत्राभासवैचित्र्यहेतुभूतं वासनोद्बोधवैचित्र्यं जनयेयुर्नियमे हेत्वन्तराभावादिति । तथापि न नीलादिवैचित्र्यसिद्धिः । एवं वासनानां तदुद्बोधहेतूनां च विचित्राणामनुपपत्तिरेव । ततश्च स्थितमेतदभिन्नो बोधस्तस्याकस्मिकाभासभेदहेतुत्वानुपपत्तेर्बाह्योऽर्थो नुमेयः संभाव्यत इति यदि

वादिनोच्यते इति श्लोकद्वयार्थः, चेच्छब्दः श्लोकद्वयवाक्यार्थशङ्काद्योतकः ॥ ५ ॥

॥ एतदाह्निकशेष उत्तराङ्के भविता ॥

---

## ॥ श्रीः ॥

### ॥ अथ प्रसन्नराघवनाटकस्योपसंहारः ॥

इत्थं विबुधजनमनोनन्दनः श्रीजयदेवकविप्रणीतः प्रसन्नराघवनामको ग्रन्थः सर्वत्र संस्कृतवाण्या प्राकृतभाषाया अर्थलेखनेन तत्तदुचितस्थलेषु टिप्पणीलेखनेन च पाठनाद्यनेकव्यापारव्यापृतत्वेनालब्धपूर्णावकाशेनापि मया सुसंस्कृत्य प्रतिमासमेकैकाङ्कमुद्रणेन श्रीजगदीशकृपया निर्विघ्नतया प्रकाशितः । अथ पूर्वकृतैतत्कविवर्णनोऽप्यहमन्योत्तमग्रन्थानामपि रचयिताऽयं कविः सुमित्रायाः पुत्रश्चेति बोधयितुमिच्छुस्तद्विषये प्रमाणं लिलेखिषुरेवं ब्रुवे । यश्चायमद्यत्वे निखिलालङ्कारलक्ष्यलक्षणाज्ञानतमोनिरसनाय चन्द्रस्यालोक इव चन्द्रालोक इति ग्रन्थः प्रसिध्यति तमिमं सहृदयहृदयाह्लादकं संक्षिप्तमपि विशदीकृतसकलालङ्कारतत्त्वमपूर्वं ग्रन्थमयमेव महाकविर्जयदेवः प्राणैषीदित्येतद्ग्रन्थसमाप्तिस्थायिमश्लोकद्वयतः स्फुटमवसीयते । तथाहि ।

> जयन्ति याज्ञिकश्रीमन्महादेवाङ्गजन्मनः ।
> सूक्तपीयूषवर्षस्य जयदेवकवेर्गिरः ॥
> महादेवः सत्रप्रमुखमखविद्यैकचतुरः
> सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ ॥
> प्रणीतस्तेनासौ सुकविजयदेवेन दशभि-
> श्चिरं चन्द्रालोकः सुखयतु मयूखैर्दश दिशः ॥

एवमत्रास्य कवेर्मातापित्रोर्नामोल्लेखादयं कविर्गीतगोविन्दकारान्महाकवेर्जयदेवाद्भिद्यत इत्यप्यस्त्यतिरोहितं विदुषाम् । यतोऽयं भोजदेवात् रामादेव्यामजनीति गीतगोविन्दस्थायिमश्लोकात् स्फुटं प्रतीयते।

तथाच श्लोकः ।

> श्रीभोजदेवप्रभवस्य रामा-
> देवीसुतश्रीजयदेवकस्य ।
> पराशरादिप्रियवर्गकण्ठे
> श्रीगीतगोविन्दकवित्वमस्तु ॥

एवं रामगीतादीनां बहूनां ग्रन्थानां रचयिताऽयं कविरस्मिन् प्रसन्नराघवनाटके जानकीपरिणयमारभ्य श्रीरामचन्द्रोऽतिप्रचण्डं दशकण्ठमाहवे शरौघैर्विनिपात्य कृतविभीषणलङ्काराज्याभिषेकः सीतया सह पुष्पकमारुह्य पुनरयोध्यामगादित्यन्तां कथां सुधातः स्वादीयैर्गद्यैः पद्यैश्च व्यतानीत् । अस्मिन्नाटके प्रायो वीररस एवोपलभ्यते क्वचित् शृङ्गारकरुणारसावपि ।

एवमहमेतदुत्तमं काव्यं काशीविद्यासुधानिधिपत्रद्वारा तत्पत्रसुधाचकोरमनोविनोदनाय प्रकाश्येतः परमेतत्पत्रद्वारैवान्यानपि प्राचीनोत्तमकाव्यग्रन्थान् यथावसरं प्रकाशयिष्य इत्यलं पल्लवितेनेति शम् ।

गोविन्ददेवशास्त्री

---

## ॥ श्रीः ॥

### ॥ अथ बालरामायणाख्यनाटकस्य प्रस्तावना ॥

अथ प्राचीनोत्तमकाव्यसुधास्वादलोलुपानां गुणैकपक्षपातिनां रसिकजनानां प्रीत्यै सकलनाटकावतंसभूतं बालरामायणाख्यं नाटकमेतत्पत्रद्वारेदानीं प्रकाशयितुमिच्छुरादौ तावदेतद्रचयितुर्वर्णनं संक्षेपतः कुर्वे । अस्य महानाटकस्य रचयिता सूर्यवंशीययायावरकुलजन्मा सत्यवतीतनूजो रघुकुलचूडामणेर्महेन्द्रपालस्य गुरुः श्रीराजशेखरः कविरास्ते । सोऽयं संस्कृतेऽतिनिष्णातोऽपि सर्वविधप्राकृतभाषार्णवपारदृश्वा केवलया प्राकृतभाषयैव कर्पूरमञ्जर्याख्यं सट्टकाभिधं नाटकविशेषं प्राकृतबहुलातिप्रौढसंस्कृतभाषया विद्धमरोहरां विद्धशालभञ्जिकाख्यां नाटिकां च व्यतनोत् । अयं च कविरतिशूरः सकलशास्त्रार्थतत्त्ववेत्ता केरलक्षितिपतिः श्रीशङ्कराचार्यसमकालिको राजशेखराख्यो राजाऽऽसीत्। अयमतिमानुषचरित्रं श्रीशङ्कराचार्यं दिदृक्षुस्तत्र तदनुमतिं लब्धुकामस्तत्समीपे स्वसचिवं प्रेष्य तद्वारा कृताभिर्बहुविधाभिस्तुतिभिस्तोषितात् श्रीशङ्कराचार्यादासादिततत्समीपगमनानुज्ञस्तत्र गत्वा हाटकायुतसमर्पणपूर्वं स्वप्रणीतमपूर्वं नाटकत्रयमाचचक्षे । तन्नाटकत्रयश्रवणेनातिसंतुष्टवतस्तस्मात् भिक्षोर्लब्धस्वाभिमतवरःस्वीयां पुरीमाजगामेति शङ्करविजयीयपञ्चमसर्गस्थैवमेनमतिमर्त्यचरित्रमिति दशमश्लोकमारभ्यागमत् कृतकृत्यधीर्निजां नगरीं तस्य गुणानुदीरयन्नित्यन्तैरेकविंशत्या श्लोकैरिमां कथां तद्ग्रन्थकारः श्रीमाधवाचार्यो व्यलिखत् । उपलभ्यते चैषु दिवसेषु बालरामायणं कर्पूरमञ्जरी विद्धशालभञ्जिकेति नाटकत्रयमेवैतत्कविप्रणीतम् । एतेनास्य कवेरतिप्राचीनत्वं द्योत्यते । एवमयं राज्ञां कवीनां च शेखरभूतो राजशेखरनामा कविः स्ववंशमौक्तिकमणेः श्रीरामचन्द्रस्य बाल्यदशामारभ्य समग्रं चरितं विवक्षुरेतद्दशाङ्कघटितमपूर्वं बालरामायणाख्यं महानाटकमकरोत् । एतन्नाटकमपि प्रसन्नराघवमिव वीररसप्रधानं स्थल-

विशेषे शृङ्गारकरुणरसगर्भितं चास्ति । अतः समीचीनकाव्यपठनजनितफललाभ एतदुत्तमकाव्यस्य सुधास्यन्दिनीनां सूक्तीनां श्रवणेन भवेदयं च कविरनेकोत्तमगुणालङ्कृतश्चासीदित्येतत्प्रथमाङ्कस्थाभ्यां पारिपार्श्विकं प्रत्यन्योक्तिद्वारा सूत्रधारवचनरूपाभ्यामग्रिमश्लोकाभ्यां स्फुटमवगम्यते । तथाच सूत्रधारोक्तिः ।

किं न श्रुतं शङ्करवर्मणो वर्णनम् ।

पातुं श्रोत्ररसायनं रचयितुं वाचः सतां संमता<br>
व्युत्पत्तिं परमामवाप्तुमवधिं लब्धुं रसस्रोतसः ।<br>
भोक्तुं स्वादु फलं च जीविततरोर्यद्यस्ति ते कौतुकं<br>
तद्भ्रातः शृणु राजशेखरकवेः सूक्तीः सुधास्यन्दिनीः ॥

अपिच ।

आपन्नार्तिहरः पराक्रमधनः सौजन्यवारांनिधि-<br>
स्त्यागी सत्यसुधाप्रवाहशशभृत्कान्तः कवीनां गुरुः ।<br>
वर्ण्यं वा गुणरत्नरोहणगिरेः किं तस्य साक्षादसौ<br>
देवो यस्य महेन्द्रपालनृपतिः शिष्यो रघुग्रामणीः ॥

अथास्य नाटकस्यैकमेव पुस्तकमत्रैव काश्यां निवसतःपरमसुहृदो ढुण्ढिराजाचार्यशास्त्रिणः सकाशान्मयाऽऽसादितम् । ततःपरमस्यां नगर्यामन्यनगरीषु चैतत्पुस्तकान्तरलाभायातिमार्गणपरोऽप्यलब्धपुस्तकान्तर एतत्पुस्तकमेव महता परिश्रमेण सम्यक् परिशोध्येदानीं पाठशालाध्यक्षस्य श्रीमतो ग्रिफिथसाहिबस्याज्ञया काशीविद्यासुधानिधिपत्रेमुद्रणद्वारेमं ग्रन्थं प्रकाशयितुमुद्यतोऽस्मि ।

अतः सर्वैश्वर्यवन्तं विनतजनमनःसंतोषदायिनं श्रीपरमेश्वरमिदमेव प्रार्थये यदेतत्पत्रदर्शनोत्सुकानां रसिकजनानां मनःस्वेतदुत्तमं काव्यं परमां मुदमादधात्वित्यलं बहुलेखनेनेति शम्.।

गोविन्ददेवशास्त्री

---

॥ श्रीगणेशाय नमः ॥

प्रसक्तेर्यः पात्रं तिलकयति यं सूक्तिरचना<br>
य आद्यः स्वादूनां श्रुतिचुलुकलेह्येन मधुना ।<br>
यदात्मानो विद्याः परिणमति यश्चार्थवपुषा<br>
स गुम्फो वाणीनां कविवृषनिषेव्यो विजयते ॥ १ ॥

नान्द्यन्ते सूत्रधारः ससंरम्भं परिक्रम्य पुरोऽवलोक्य सप्रश्रयमञ्जलिं बद्ध्वा भोभो भुजस्तम्भालानितलक्ष्मीकरेणुना रघुकुलैकतिलकेन महेन्द्रपालदेवेनाधिकृताः सभासदः सर्वानेव वो गुणनिधिर्विज्ञापयति विदितमेवैतद्भवताम् । यत्तु नाट्याचार्येण धूर्तिलेन प्रतिज्ञातम् ।

वीराद्भुतप्रायरसे प्रबन्धे<br>
लोकोत्तरं कौशलमस्ति यस्य ।<br>
नाट्ये च नृत्ये च परं प्रवीणा-<br>
मसौ सुतां मे परिणेष्यतीति ॥ २ ॥

तत्र दक्षिणापथादागतो रङ्गविद्याधरनामा भरतपुत्रो भवद्भिः परीक्षितो नच निर्व्यूढस्तन्मामपि परीक्षध्वम् । कर्णं दत्त्वा ऽऽकाशे किं ब्रूथ विलक्षेण सता कर्णाटनटेन तेन निर्मर्यादमिदमुदितम् । यदुताखण्डितप्रसरा हि पुरुषकाराः कर्णाटानां तथाहि ।

अहमेष हरिष्यामि परिणेतुः पुरोऽपि ताम् ।<br>
नारीपरिभवं सोढुं दाक्षिणात्या न शिक्षिताः ॥ ३ ॥

अञ्जलिं बद्ध्वा तदिदं मयापि निवेद्यते यदि हि परिणयामि ।

अपि द्वीपान्तरादेष हृतां प्रत्याहरामि ताम् ।<br>
कलत्रहरणे पुंसां कियदर्णवलङ्घनमिति ॥ ४ ॥

विचिन्त्य । किं पुनस्तत् ।

प्रविश्य पारिपार्श्विकः । एदं तम् * ।

सूत्रधारः । मारिष किमिदम् ।

पारिपार्श्विकः । देवादेसपत्तं तं णिरूवेदु भावो † ।

सूत्रधारः । सखेदम् । कथमन्यदुपक्रान्तमन्यदापतितं सोऽयमातपार्थिनः पयोदाभ्युदयः । विचिन्त्य । सविघ्नविप्रुष एव काम्यक्रियारम्भाः । विभाव्य आमनिर्वेदः सिद्धेर्मूलम् । निश्चित्य भवत्वेवं तावत् प्रकाशम् । मारिष रसान्तरेण नावहितं मे चेतः । तद्भवानेव वाचयतु ।

पारिपार्श्विकः । गृहीत्वा वाचयति ।

कमवड्ढन्तविलासं रसाअले कं करेइ कन्दप्पो ‡ ।

सूत्रधारः । अये प्रश्नोत्तरम् । सेयमस्मत्प्रीतिरितिदेवादेशः । तत्स्वयमेव वाचयामि । गृहीत्वा वाचयति ।

निर्भयगुरु§र्व्यधत्त च वाल्मीकिकथां किमनुसृत्य ॥ ५ ॥

कथं भाषाचित्रकमेकालापकं चैतत् स्वगतं सूचनाक्रमोऽपि विचिन्त्य । वालरामायणम् ‖ । विमृश्य नाटयितव्यमित्यर्थतोऽभिहितं भवति ।

---

* एतत् तत् ।

† देवादेशपत्रं तत् निरूपयतु भावः ।

‡ क्रमवर्धमानविलासं रसातले कं करोति कन्दर्पः ।

§ निर्भयराजस्य महेन्द्रपालस्य गुरुरुपाध्यायो राजशेखरः । तथाच कर्पूरमञ्जर्याम् ।

वालकई कइराओ णिब्भअराअस्स तह उवज्झाओ ।<br>
इय जस्स परम्पराए अप्पा माहप्पमारूढो ॥<br>
बालकविः कविराजो निर्भयराजस्य तथा उपाध्यायः ।<br>
इति यस्य परम्परया आत्मा माहात्म्यमारूढः ॥

‖ बालरामायणम् ।

पारिपार्श्विकः । अहो अच्चरिअमच्चरिअम् * । अएणं लिहिदं अएणं पढीअदि ।

सूत्रधारः । सहर्षम् । अनुकूलं हि दैवं सर्वस्मै स्वस्तिकरोति यत्प्रस्तुतसंवादी देवादेशः ।

पारिपार्श्विकः । दिठ्ठिआ कालिंदीमन्दाइणीसलिलं विअ पढमं दुधा पहाविअ पच्छा तं कज्जं एक्कीभूदम् † ।

सूत्रधारः । सहर्षम् । संप्रति हि ।

सद्विज्ञानं कुलतिलकतां याति दारैरुदारैः
फुल्ला कीर्त्तिर्भ्रमति सुकवेर्दिक्षु यायावरस्य ।
धीरोदात्तं जयति चरितं रामनाम्नश्च विष्णोः
काव्यव्याजात्तदियमपरा काप्यहो कामधेनुः ॥ ६ ॥

पारिपार्श्विकः । वम्मीइणा मुणिवरिठ्ठेण दिठ्ठणिबन्धणस्स रामचन्दचरिदस्स को उण सो विसेसो जं एस कई दंसइस्सदि ‡ ।

सूत्रधारः । मारिष क्वचित्कश्चित्प्रगल्भते नहि सर्वः सर्वं जानाति ।

पारिपार्श्विकः । भाव णं भणामि पच्चक्खीकिदसअलसग्गसद्दत्थादो तत्यभवदो महेसिणो अदिक्कमिअ किं एसं चम्मचक्खू पेक्खिस्सदि § ।

सूत्रधारः । मारिष मामैवम् ।

वदनेन्दुषु वामदृशामिन्दीवरपत्रमंघटितम् ।
रसनासु च सुकवीनां निवसति सारस्वतं चक्षुः ॥ ७ ॥

प्राज्ञश्चायम् । वस्त्वन्तरमतिशयानो हि प्रज्ञाप्रकर्षः । सूक्तमिदं तेनैव महामन्त्रिपुत्रेण ।

उदन्वच्छन्ना भूः स च निधिरपां योजनशतं
सदा पान्थः पूषा गगनपरिमाणं गणयति ।
इति प्रायो भावाः स्फुरदवधिमुद्रामुकुलिताः
सतां प्रज्ञोन्मेषः पुनरयमसीमा विजयते ॥ ८ ॥

पारिपार्श्विकः । ता णमक्कारो करीअदु ‖ ।

सूत्रधारः । ननु नमस्कृतं तेनैव ।

योगीन्द्रश्छन्दसां स्रष्टा रामायणमहाकविः ।
वल्मीकजन्मा जयति प्राच्यः प्राचेतसो मुनिः ॥ ९ ॥

प्रबन्धोपक्रमे च स किल कविरेवमुक्तवान् ।

ब्रह्मभ्यः शिवमस्तु वस्तु विततं किंचिद्वयं ब्रूमहे
हे सन्तः शृणुतावधत्त विधृतो युष्मासु सेवाञ्जलिः
यद्वा किं विनयोक्तिभिर्मम गिरां यद्यस्ति सूक्तामृतं
माद्यन्ति स्वयमेव तत्सुमनसो याञ्चा परं दैन्यभूः ॥ १० ॥

सर्वभाषाविचक्षणश्च स एवमाह ।

गिरः श्रव्या दिव्याः प्रकृतिमधुराः प्राकृतधुराः
सुभव्योऽपभ्रंशः सरसरचनं भूतवचनम् ।
विभिन्नाः पन्थानः किमपि कमनीयाश्च त इमे
निबद्धा यस्त्वेषां स खलु निखिलेऽस्मिन्कविवृषा ॥ ११ ॥

एतत्प्रबन्धमहत्वं प्रति तेनेदमुक्तम् ।

ब्रूते यः कोपि दोषं महदिति सुमतिर्बालरामायणेऽस्मिन्
प्रष्टव्योऽसौ पटीयानिह भणितिगुणो विद्यते वा नवेति ।
यद्यस्ति स्वस्ति तुभ्यं भव पठनरुचिर्विद्धि नः षट् प्रबन्धा-
नैवं चेद्दीर्घमास्तां नटवटुवदने जर्जरा काव्यकन्या ॥ १२ ॥

पारिपार्श्विकः । विहस्य भाव अलङ्किदकदमगोत्तो पवित्तीकिदकदमणामहेओ एस कई जस्सिं णाम भावस्स देवस्स अ एव्वं पक्खवादो * ।

सूत्रधारः । अप्यनभिज्ञ गगनार्णवमाणिक्यं पूषणमपि तर्हि पृच्छ ।

स मूर्त्तो यत्रासीद्गुणगण इवाकालजलदः
सुरानन्दः सोपि श्रवणपुटपेयेन वचसा ।
नचान्ये गण्यन्ते तरलकविराजप्रभृतयो
महाभागास्तस्मिन्नयमजनि यायावरकुले ॥ १३ ॥

तदामुष्यायणस्य महाराष्ट्रचूडामणेरकालजलदस्य चतुर्थो दोर्दुकिः शीलवतीसूनुरुपाध्यायश्रीराजशेखर इत्यपर्याप्तं बहुमानेन । स्मृतिं नाटयित्वा अहो किमपि कमनीया कवेरात्मन्याशीः ।

आद्यः कन्दो वेदविद्यालतानां
जैहं चक्षुर्निर्निमेषं कवीनाम् ।
यो येनार्थी तस्य तत्प्रक्षरन्ती
वाङ्मूर्तिर्मे देवता सन्निधत्ताम् ॥ १४ ॥

इदं च सूक्तमुक्तवान् ।

जिह्वे देवि सरस्वतीं भगवतीमेवं समयां कुरु
त्वां बद्धाञ्जलि राजशेखरकविः सोऽयं स्वयं याचते ।

* आश्चर्यमाश्चर्यम् । अन्यत् लिखितमन्यत् पठ्यते ।

† दिष्ट्या कालिन्दीमन्दाकिनीसलिलमिव प्रथमं द्विधा प्रवाह्य पश्चात् तत् कार्यमेकीभूतम् ।

‡ वाल्मीकिना मुनिवरिष्ठेन दृष्टनिबन्धनस्य रामचन्द्रचरितस्य कः पुनः स विशेषो यमेष कविर्दर्शयिष्यति ।

§ भाव ननु भणामि प्रत्यक्षीकृतसकलसर्गशब्दार्थात् तत्रभवतो महर्षेरतिक्रम्य किमेष चर्मचक्षुः प्रेक्षिष्यते ।

‖ तन्नमस्कारः क्रियताम् ।

* अलङ्कृतकतमगोत्रः पवित्रीकृतकतमनामधेय एष कविर्यस्मिन् नाम भावस्य देवस्य चैवं पक्षपातः ।

स्तुत्येऽस्मिन्निजवंशमौक्तिकमणौ रामे त्रिरामे द्विषां
कुण्ठा मे प्रतिभैव दैवतवशाद्वाचां प्रवृत्तिर्यदि ॥ १५ ॥

पारिपार्श्विकः । ता किं रण वरणीअदि * ।

सूत्रधारः । ननु वर्णितमेव दैवज्ञेन ।

बभूव वल्मीकभवः कविः पुरा
ततः प्रपेदे भुवि भर्तृमेदुताम् ।
स्थितः पुनर्यो भवभूतिरेखया
स वर्त्तते संप्रति राजशेखरः ॥ १६ ॥

अपिच । किं न श्रुतं सभ्यस्य शङ्करवर्मणो वर्णनम् ।

पातुं श्रोत्ररसायनं रचयितुं वाचः सतां संमता
व्युत्पत्तिं परमामवाप्तुमवधिं लब्धुं रसस्रोतसः ।
भोक्तुं स्वादु फलं च जीविततरोर्यद्यस्ति ते कौतुकं
तद्भ्रातः शृणु राजशेखरकवेः सूक्तीः सुधास्यन्दिनीः ॥ १७ ॥

अपिच ।

अपवार्त्तिहरः पराक्रमधनः सौजन्यवारांनिधि-
स्त्यागी सत्यसुधाप्रवाहशशभृत्कान्तः कवीनां गुरुः ।
वर्ण्यं वा गुणरत्नरोहणगिरेः किं तस्य साक्षादसौ
देवो यस्य महेन्द्रपालनृपतिः शिष्यो रघुग्रामणीः ॥ १८ ॥

नेपथ्ये गीयते ।

मुक्कहरिणाङ्कमण्डलपासप्पसरो बुधो विवुहवग्गो ।
ओत्थरिअ राहुविहुरं णलिणीणाहं समुल्लिहइ † ॥ १९ ॥

सूत्रधारः । आकर्ण्य कथमुपश्रुतदेवादेशैः कुशीलवैरुपक्रान्त-मेव यदियं शुनःशेपस्य प्रावेशिकी ध्रुवा । विमृश्य ध्रुवा हि नाम नाट्यस्य प्रथमे प्राणाः । तथाहि ।

प्रथयति पात्रविशेषान् सामाजिकमनांसि रञ्जयति ।
अनुसंदधाति च रसान् नाट्यविधाने ध्रुवा गीतिः ॥ २० ॥

तदेह्यावामप्यनन्तरकरणीयाय सज्जीभवाव इति निष्क्रान्तौ । आमुखम् ।

ततः प्रविशति शुनःशेपः ।

शुनःशेपः । प्रातःसवन एव यजमानं द्रष्टुमिच्छामि । तत्र कश्चित्सध्यां वन्दमानस्य मे कालातिपातः संवृतः । ऊर्ध्वमवलोक्य कथमद्याप्यपटिष्ठमञ्जिष्ठं च मञ्जु मार्त्तण्डीयं तेजः । तथाहि ।

उषःप्रवालद्रुमबालपल्लवा-
स्त्रिलोकहर्म्याङ्गणहस्तदीपिकाः ।
दिनद्विपेन्द्रारुणकर्णचामरा
मरीचयोऽर्कस्य लुठन्ति कोमलाः ॥ २१ ॥

स्मृत्वा ।

यदेतदर्यमसरमम्बरस्थं
ज्योतिः स पूषा पुरुषः पुराणः ।
अथास्य शिष्यः किल याज्ञवल्क्य-
स्तस्यापि राजा जनकः स योगी ॥ २२ ॥

राक्षसरक्षोवधं रामभद्रमानेतुं सिद्धाश्रमादयोध्यां गच्छता तातविश्वामित्रेण यज्ञोपानिमन्त्रकस्य परमसुहृदः श्रोत्रियक्षत्रियस्य महाराजसीरध्वजस्य स्वप्रतिनिधिः प्रेषितोऽस्मि । आसन्नसत्रसमयस्य चागच्छतोऽध्वरविधिरवभृथावशेषो वर्तत इति मे तर्कः । तदेष राजर्षेः सौत्यातिकोऽपि भवन्न गुरोरपराधभूमिः स्यामिति परिक्रामति ।

प्रविश्य तापसच्छद्मना राक्षसः । स्वगतम् ।

संप्रेषितो माल्यवताहमद्य
ज्ञातुं प्रवृत्तिं कुशिकात्मजस्य ।
पुरं निमीनां मिथिलां च गन्तुं
तां चाप्ययोध्यां रघुराजधानीम् ॥ २३ ॥

कुलपुत्रक इति सप्रसादमादिष्टश्चास्मि । यथा सीतानाम्नीमयोनिजां जनककन्यां धूर्जटिधनुरारोपणपणपरिणेयां देवो दशाननः श्रुतवान् । तस्य मर्त्यमण्डलचाराधिकारनियुक्ता सहोदरी शूर्पणखा नित्यमेवंविधानां राजकार्याणां संपादयित्री उचितविधायिनी च मे वत्सा । प्रभुचित्तानुवर्त्तनं हि सेवकजनसिद्धविद्या । सीतार्थी च मिथिलां प्रस्थातुकामो महाराजरावणः । किं बहुनाऽयमपरो गण्डस्योपरि पिण्डकोद्भेदो यत्किल प्रस्थास्यमानेन निशाचरचक्रवर्तिना तत्रभवतो नीललोहितान्तेवासिनः पार्वतीधर्मपुत्रकस्य जामदग्न्यस्य सकाशं परशुमार्गणाय मायामयः प्रहितः । तदिदमसमञ्जसमिव पश्यामि । यतः ।

शमव्यायामाभ्यां प्रतिविहिततन्त्रस्य नृपतेः
परं प्रत्यावापः फलति कृतसेकस्तरुरिव ।
बहुव्याजं राज्यं न सुकरमराज्यप्रणिधिभि-
र्दुराराधा लक्ष्मीरनवहितचित्तं चलयति ॥ २४ ॥

विमृश्य । अहह । अनमात्यायतसिद्धेर्धिङ्मन्त्रित्वम् । कुतः ।

स्वेच्छया कुरुते स्वामी यत्किंचन यतस्ततः ।
तत्तत्प्रतिचिकीर्षन्तो दुःखं जीवन्ति मन्त्रिणः ॥ २५ ॥

विचिन्त्य । तद्भवद्भविष्यदनर्थयोर्भवदनर्थं प्रथमं प्रतिकुर्वीतेति नीतिविदः । तदेष सीतावृत्तान्त एव प्रथमं प्रतिविधातव्यः । भद्रमुख तत्त्वया मेनकाकामुकस्य त्रिशङ्कुयाजिनः क्षत्रियब्रा-

---

* तत् किं न वर्ण्यते ।

† मुक्तहरिणाङ्कमण्डलपार्श्वप्रसरो बुधो विबुधवर्गः ।
अवतीर्य राहुविधुरं नलिनीनाथं समुल्लिखति ॥

ह्मणस्य तस्य प्रवृत्तिरस्मासु निवेदनीया स च सिद्धाश्रमादुच्चलित इति श्रुतिः । तस्य दशरथः सीरध्वजश्च परं मित्रे । तत्र यदि दशरथं प्रति यायात् तदहमन्यापदेशेन दशकन्धरस्य यात्राभङ्गाय यतिष्ये । स हि नक्तंचराणां निसर्गामित्रो विश्वामित्रः । व्रतचर्यया वीरव्रतचर्यया च समर्थः । दशरथोऽपि तथाविध एव । जनकश्च योगी शान्तो दान्तश्च । अहं तु मिथिलां पुरीं प्रत्युच्चलितस्त्वरितमिमां विचित्य रघुराजधानीं यास्यामि । विमृश्य तादृश एव तादृशानामपसर्पः स्यादिति कृततापसवेषोऽपि महर्षिभ्यो बिभ्यत् संचरामि । पुरोऽवलोक्य कथं तापसः । प्रत्यभिज्ञाय तत्रापि विश्वामित्रधर्मपुत्रः शुनःशेपः । भवत्वस्मादेव तत्किंवदन्तीलाभः । उपसृत्य भगवन्नभिवादये ।

शुनःशेपः । अभिलषितेन युज्यस्व ।

इतिपरिक्रामतः ।

राक्षसः । विलोक्य भगवन्साप्तपदीनं सख्यं मां मुखरयति तत्प्रष्टुकामोऽस्मि ।

शुनःशेपः । ब्रह्मन्नभिधीयताम् ।

राक्षसः । विद्यास्नातक इव लक्ष्यसे तत् कथमयं स्वाध्यायप्रत्यूहः ।

शुनःशेपः । गुरोरादेशः ।

राक्षसः । कस्ते गुरुः ।

शुनःशेपः । भगवान्विश्वामित्रः ।

राक्षसः । स्वगतम् । भवतु कोपयाम्येनम् । सुप्तमत्तकुपितानां हि भावज्ञानं द्रष्टव्यम् । प्रकाशम् । अथ कोऽयं विश्वामित्रो नाम ।

शुनःशेपः । सकोपम् । अये द्वीपान्तरादिवागतोऽसि यद्भगवन्तं विश्वामित्रमपि न जानासि ।

> न्यस्यान्यान् दक्षिणस्यां दिशि गगनमुनीन् सप्त कॢप्तर्क्षपङ्क्तौ
> नव्यं हव्यं च कृत्वा त्रिदशजनहृते सर्वयागाङ्गवर्गे ।
> वासिष्ठीं शापमुद्रां सपदि विदलयन् यो महासत्रबन्धे
> मध्यव्योम त्रिशङ्कोः शतमखविमुखः स्वर्गसर्गं चकार ॥२५॥

अपिच ।

> क्षत्रब्रह्ममहानिधिः क्षितिभुजां जेता मुनीनां च यः
> पाणी यस्य परं पवित्रितनलौ चापस्रुचोर्धारणात् ।
> विश्वामित्र इति त्रिलोकतिलकं त्वं वेत्सि नास्मद्गुरुं
> योऽस्मिंश्चित्रशिखण्डिनां भगवतां धात्रा कृतः सप्तमः ॥२७॥

संप्रत्येव राक्षसभयात् सत्रे दीक्षिष्यमाणः स भगवान् रक्षितारं रामभद्रं वरीतुमयोध्यां गतः ।

राक्षसः । सत्रासम् । भगवन् । मा कोपीः । बटुस्वभावसुलभं चापलमत्रापराध्यति न पुनरज्ञानम् । कःपुनःस्तम्भितरम्भं भगवन्तं विश्वामित्रं न जानाति । स्वगतम् । कृतं यत् कर्तव्यम् । संप्रति चारसंचारस्यावसरः । प्रकाशम् । क्व पुनर्गुर्वादेशो गमयिता ।

शुनःशेपः । मिथिलापुरीम् ।

राक्षसः । किं तत्र ।

शुनःशेपः । गुरुसुहृदो राजर्षेः सीरध्वजस्य यज्ञोपस्थानम् । ब्रह्मंस्त्वमपि वैदेशिक इवासि तत्कुतः पुनरिदमागम्यते ।

राक्षसः । स्वगतम् भवत्वेवं तावत् । प्रकाशम् । रोहणाचलपरिसरोत्तंसादगस्त्याश्रमतः ।

शुनःशेपः । किंचित्सानुशयम् । कोऽयमगस्त्यो नाम ।

राक्षसः । विहस्य भगवन् कृतप्रतिकृतमेतत् । निजोदयनिर्विषीकृतभुवनाम्भस्कं कः पुनरगस्त्यं न जानाति ।

> निषेद्धा विन्ध्यस्य प्रथमचुलुकाचान्तजलधिः
> कृतापद्वातापेर्न स कलशभूः कस्य विदितः ।
> गुरुर्लोपामुद्राहृदयदयितो यस्त्रिजगत-
> स्त्रयीं माणिक्याद्रेरधिवसति वैखानसवृषा ॥ २८ ॥

शुनःशेपः । परस्परं गुर्वधिक्षेपादुभावपि प्रायश्चित्तिनौ वर्तावहे ।

राक्षसः । तदनुजानीहि मामघमर्षणाय ।

शुनःशेपः । निर्वर्तितगुर्वाज्ञोऽहमपि प्रायश्चित्ते यतिष्ये । किन्तु किंचित्प्रष्टव्यमस्ति ।

राक्षसः । नियोजय ।

शुनःशेपः । लङ्कोपकण्ठवर्तिनि तत्राश्रमपदे कश्चिदस्ति दशकण्ठोदन्तः ।

राक्षसः । यत्किल स्थाणवीयधनुरारोपणपणेन रावणः सीतां परिणेष्यतीति तत्र कंश्चिदेवंविधः ।

शुनःशेपः । विहस्य स्वगतम् । अये लघुवित्तवृत्तिनिर्भिन्नहृदयार्थो राक्षस इवैषः । युक्तियुक्तं चैतत् ।

> अगर्भसंभवां कन्यां दशकण्ठो जगज्जयी ।
> आरोप्य हरकोदण्डं कथं न परिणेष्यति ॥ २९ ॥

प्रकाशम् । ब्रह्मन्ननुमन्यस्व मां मिथिलाप्रवेशनाय ।

राक्षसः । मामपि कार्यवशादितो गत्वा प्रायश्चित्ताय ।

इतिनिष्क्रान्तौ । शुद्धविष्कम्भकः ।

ततः प्रविशति पुष्पकेण रावणः प्रहस्तश्च ।

रावणः ।

> यस्यारोपणकर्मणापि बहवो वीरव्रतं त्याजिताः
> कार्यं सज्जितबाणमीश्वरधनुस्तद्दोर्भिरेभिर्मया ।
> स्त्रीरत्नं तदगर्भसंभवमितो लभ्यं च लीलायिता
> तेनैषा मम फुल्लपङ्कजवनी जाता दृशां विंशतिः ॥ ३० ॥

प्रहस्तकः। सर्वतोऽवलोक्य कथं दशाननदेवदर्शनाकाङ्क्षि वृन्दारकवृन्दमिदमयतः समयमपि गगनाभोगं बिभर्ति। साक्षेपम्।

वह्ने निह्नोतुमर्चिः परिचिनु पुरतः सिञ्चतो वारिवाहान्
हेमन्तस्यान्तिके स्याः प्रथयति दवथुं येन ते ग्रीष्म नोष्मा।
मार्तण्डाश्चण्डतापप्रशमनविधये धत्त नाडीं जलार्द्रां
देवो नान्यप्रतापं त्रिभुवनविजयी मृष्यते श्रीदशास्यः॥ ३१॥

रावणः। सौत्सुक्यं हंहो नभस्तरुपुष्प पुष्पक किंचिदुच्यसे।

सेवागतामरविमानसहस्रसेनाः
सीमन्तयन् मम मनोजयिना जवेन।
तां मैथिलस्य नृपतेर्व्रज राजधानीं
यत्राद्भुतं हरधनुर्धरणीसुता च॥ ३२॥

प्रहस्तकः। किमद्याप्युत्कण्ठते देवः। नन्ववतीर्णममुना गगनार्णवपोतपात्रेण विमानराजेन जनकमन्दिरे। तद्भवतु देवागमनं सीरध्वजाय निवेदयामि। उच्चैः।

वामैराकृष्य वेगात् प्रगुणितशिरसः पाणिभिः केशबन्धान्
सव्यैरव्याजशस्त्रप्रणयनपटुभिश्छिन्दतः कण्ठपीठीः।
मन्वानस्यानुरूपामुपकरणगतिं प्रीतये चन्द्रमौले-
र्यस्यान्तस्तोषपोषं व्यधित दशमुखी विंशतिर्बाहवश्च॥ ३३॥

सोऽयं स्वयंग्रहणदुर्ललितो दशास्य-
स्त्वां याचते दुहितरं पणपूर्वमेव।
संबन्धसन्धिमनुना च सहानुभूय
वंशो निमज्जयतु यावदियं धरित्री॥ ३४॥

कर्णं दत्त्वाऽऽकाशे किं ब्रूथ सोऽयं पुराणब्रह्मवादी याज्ञवल्क्यशिष्यो राजर्षिर्जनक आङ्गिरसेन पुरोधसा सार्धमितोऽभिवर्तते। तदिदमास्थानमण्डपोपकण्ठमधिष्ठीयतामित्यवतरतः।

ततः प्रविशति जनकः शतानन्दश्च।

जनकः।

यन्मीमांसयतः श्रुतीः शतपथाः साक्षात्कृतब्रह्मणो
विश्वामित्रमहामुनेरपि वयं वर्त्तामहे चेतसि।
अप्युल्लीढकषायपायनधियां सद्यः समाधिश्लथं
तत्सङ्गीतकमन्तरेण हृदयं हर्षोत्तरीनर्ति नः॥ ३५॥

शतानन्दः। राजर्षे सूर्यप्रशिष्य सत्याशिषस्ते गुरवो यद्भगवान् विश्वामित्रोऽपि मैत्रीमनुरुध्यते। प्रहस्तस्तदेव पठति।

जनकः। आकर्ण्य। अये तपस्यतामपि न निरत्ययः सुखप्रत्ययः। यत्सीतार्थी दशकण्ठोऽपि गृहानुपगच्छति।

शतानन्दः। अहह। आश्चर्यमेकोऽपि गरीयान्दोषः समग्रमपि गुणग्रामं दूषयति। तथाहि।

आज्ञा शक्रशिखामणिप्रणयिनी शास्त्राणि चक्षुर्नवं
भक्तिर्भूतपतौ पिनाकिनि पदं लङ्केति दिव्यापुरी।
उत्पत्तिर्द्रुहिणान्वये च तदहो नेदृग्वरो लभ्यते
स्याच्चेदेष न रावणः क्व नु पुनः सर्वत्र सर्वे गुणाः॥ ३६॥

जनकः। सखेदम्। भगवन्नौतथ्य गृहानुपगताय सीतार्थिने लङ्केश्वराय किमुत्तरम्।

शतानन्दः। राजर्षे चिरं दत्तमेवोत्तरम्।

जनकः। भगवन् केन।

शतानन्दः। भगवता शिपिविष्टेन।

जनकः। किमिव।

शतानन्दः। स्वधनुः।

जनकः। निःश्वस्य।

गिरिशधनुरधिज्यं रावणः कर्त्तुमीष्टे
करतुलितहराद्रेर्दुष्करं किं हि तस्य।
किमुत न स निमीनां यौनसंबन्धयोग्य-
स्तदिति हि मम चित्तं चिन्तया मूर्च्छतीव॥ ३७॥

शतानन्दः। राजर्षे मा विषीदस्व। पाणिप्रणयिनं कोदण्डदण्डं प्रसादीकुर्वतः पार्वतीपतेर्विवोढा कः सीताया अभिमत इति न जानीमः। इदं तु प्रतिजानीमहे यदुत न प्रचण्डदोःखण्डोऽपि दशकण्ठः श्रीकण्ठमनीषितमपरथा प्रस्थापयिष्यति। तदेहि दुर्वृत्तमपि मुनिपुत्रमुचितेन संभावयाव इत्युत्थाय परिक्रामतः।

जनकः। पुरोऽवलोक्य। दिष्ट्या दृष्टपुलस्त्यप्रसवाः प्रमोदामहे। लङ्केश्वर इतइतो भवानिदमासनमास्यताम्। सर्वे यथोचितमुपविशन्ति।

शतानन्दः। ऋषिपुत्रको दिव्यश्चासि तत्कतमामातिथेयीं कुर्मः।

महोक्षो वा महाजो वा श्रोत्रियाय विशस्यते।
निवेद्यते तु दिव्याय स्रक्सुगन्धिर्निधिर्विधिः॥ ३८॥

रावणः। ब्रह्मर्षे इयमस्माकमातिथेयी।

यत् पार्वतीहठकुचग्रहणप्रवीणे
पाणौ स्थितं पुरभिदः शरदां सहस्रम्।
गीर्वाणसारकणनिर्मितगात्रमत्र
तन्मैथिलीक्रयधनं धनुराविरस्तु॥ ३९॥

प्रहस्तकः। आविरस्तु सममगर्भसंभवया सीतया।

रावणः। सप्रत्याशं स्वगतं च।

निर्माल्यं नयनश्रियः कुवलयं वक्त्रस्य दासः शशी
कान्तिः प्रावरणं तनोर्मधुमुचो यस्याश्च वाचः किल।
विंशत्या रचिताञ्जलिः करतलैस्त्वां याचते रावण-
स्तां द्रष्टुं जनकात्मजां हृदय हे नेत्राणि मित्रीकुरु॥ ४०॥

शतानन्दः । इदमाविर्भवति दशानन माहेश्वरं धनुः ।

रावणः । स्वात्मानं प्रतीदमाविर्भवति माहेश्वरं धनुर्न पुनरद्यापि मान्मथम् ।

शतानन्दः । सहेलमालोक्य ।

स्फूर्जद्वज्राहतसुरगिरिस्वर्णचूर्णच्छटाभि-
स्तुल्योल्लासैस्त्रिभुवनदृशां दत्तदौस्थित्यमुद्रः ।
आशारन्ध्राण्ययमविरतं रुद्रकोदण्डदण्डः
स्वेच्छाचण्डो रचयति रुचां पञ्जरैः पिञ्जराणि ॥ ४१ ॥

नेपथ्यं प्रति कः कोऽत्रभोः सौविदल्लेषु कन्यान्तःपुरादागच्छतु जनकराजकन्या । नेपथ्ये इयमियम् । ततः प्रविशति सीता सख्यौ च ।

सीता । ससाध्वसोल्लासम् । अम्महे रक्खसो त्ति सुणिअ सच्चं सज्झसकोदूहलाणं अन्तरे वट्टामि * ।

एका । भट्टिदारिए । रक्खसोत्ति मा णं परिहव रक्खसचक्कवट्टीक्खु एसो † ।

सीता । अहिअदरं उव्वेअणिज्जो ‡ ।

द्वितीया । अह किं मन्तेध किं कादुं इध आअदो § ।

प्रथमा । सङ्करसरासणं समारोहदुं ‖ ।

द्वितीया । णं एव्वं भण भट्टिदारिअं परिणेदुं ¶ ।

प्रथमा । अयि उद्दामरसीले कहं पुण असङ्करो अलद्धसङ्करप्पसादो वा इमं चावमारोवइस्सदि ** ।

सीता । स्वगतम् । अम्महे ऊससिदह्मि अणब्भवरिसेण पिअसहीवअणेण †† ।

सर्वाः परिक्रामन्ति ।

सीता । पुरोऽवलोक्य एक्कासणोववेसिणो कदि उण एदे जणा ‡‡ ।

सख्यौ । णं एक्को एव्व एसो दसमुहो विंसदिभुअदण्डो अ §§ ।

सीता । तादसदानन्दमिस्साणं अन्तरे उवविसिस्सम् ‖‖ ।

रावणः । सौत्सुक्यमवलोक्य स्वगतम् । अहो त्रिभुवनातिशायि मकरध्वजसञ्जीवनं रामणीयकमस्याः । तथाहि ।

* अहो राक्षस इति श्रुत्वा सत्यं साध्वसकौतूहलयोरन्तरे वर्ते ।

† भर्तृदारिके राक्षस इति मैनं परिभव राक्षसचक्रवर्ती खल्वेषः ।

‡ अधिकतरमुद्वेजनीयः ।

§ अथ किं मन्त्रयथ किं कर्तुमिहागतः ।

‖ शङ्करशरासनमारोपयितुम् ।

¶ नन्वेवं भण भर्तृदारिकां परिणेतुम् ।

** अयि उद्दारशीले कथं पुनरशङ्करो ऽलब्धशङ्करप्रसादो वेमं चापमारोपयिष्यति ।

†† अहो उच्छ्वसितास्मि अनभ्रवर्षेण प्रियसखीवचनेन ।

‡‡ एकासनोपवेशिनः कति पुनरेते जनाः ।

§§ नन्वेक एवैष दशमुखो विंशतिभुजदण्डश्च ।

‖‖ तातशतानन्दमिश्राणामन्तर उपवेक्ष्यामि ।

इन्दुर्लिप्त इवाञ्जनेन जडिता दृष्टिर्मृगीणामिव
प्रम्लानारुणिमेव विद्रुमलता श्यामेव हेमद्युतिः ।
पारुष्यं कलया च कोकिलवधूकण्ठेष्विव प्रस्तुतं
सीतायाः पुरतश्च हन्त शिखिनां बर्हाः सगर्हा इव ॥४२॥

किंच बहुष्वपि निजेषु कर्मसु विवेक्रि कर्त्रे किंचिदेव रोचते । यतः ।

एतां यथाहृदयवर्त्तनमायताक्षीं
संसारसारनिचयेन विधाय वेधाः ।
शङ्के दिदेश मदनं परिरक्षितार-
मारात् स मां किरति येन शरैः शिताग्रैः ॥ ४३ ॥

शतानन्दः । पुलस्त्यनन्दनेदं तद्धनुरियं सा सीता ।

रावणः । इदं तद्धनुरयं स रावणः । किं पुनरसंभावनागर्भमदशकण्ठोचितं व्याहरसि । पश्य ।

सार्द्धं हरेण हरवल्लभया च देव्या
हेरम्बषण्मुखवृषप्रमथावकीर्णम् ।
कैलासमुद्धृतवतो दशकन्धरस्य
कैषा नरद्धनुषि दुर्मददोःपरीक्षा ॥ ४४ ॥

प्रहस्तकः । स्वगतम् । इदं शिपिविष्टान्यस्मादपृष्टगुणारोपणकर्म कार्मुकम् । कथमेतत् । विचिन्त्य पराक्रमपरीक्षायां को वा महादेवोऽपि देवस्य किंच ।

छतं सुराणां सारेण स्याणवीयमिदं धनुः ।
किङ्करास्ते च देवस्य सुकरा रोपणक्रिया ॥ ४५ ॥

रावणः । सरोषं धनुरादाय ।

अस्मद्दोर्द्दण्डचण्डाञ्चननिबिडगुणग्रन्थिभुग्नाभयाश्रि
व्यश्रीभावोद्घृष्टत्रुटदनणुरणत्कर्मणः कार्मुकस्य ।
कल्पान्तोद्भ्रान्तभर्गप्रहतडमरुकोड्डामरध्वानधीर-
ष्टाङ्कारस्तारतारस्त्रिदशनिशमितो व्योमरन्ध्रं रुणद्धु ॥ ४६ ॥

शतानन्दः । अपवार्य । अहो लङ्कापतेरपूर्वो गर्वगरिमा यन्ममापि शतानन्दस्य न निश्चिनुते चेतः किं भवितेति । दुरारोपमैन्दुशेखरं धनुर्दुर्निवारा रावणभुजदण्डाः ।

जनकः । स्वगतम् । भगवन् भर्ग सन्निधत्स्व निजे धनुषि यथा जनककुलालङ्करणं भवति मे वत्सा । जितत्रिजगतापि जामात्रा वयमपत्रपामहे ।

सीता । आत्मगतंसप्रणामम् । अम्ब वसुन्धरे पसीद सीदा विण्णवेदि पढमं मे अन्तरं देज्ज पच्छा रावणो धनुं आरोविज्जदु * ।

* अम्ब वसुन्धरे प्रसीद सीता विज्ञापयति प्रथमं मे अन्तरं देहि पश्चाद्रावणो धनुरारोपयतु ।

सख्यौ । आकाशे भगवं अणङ्ग णमो दे माक्खु रक्खसं उद्दिसिअ सुउमारजणजोग्गं पहरणं संधिहिसि * ।

प्रहस्तकः । सगर्वम् । हन्त न सर्वदा सर्वस्य सदृशो दशापाकः । यतः ।

वामो बाहुर्मृडान्याः करकलितरणत्कङ्कणालीकरालो
यस्मिन्सव्यश्च शम्भोर्भुजगवलयवान् सद्मिमाकर्षणं तत् ।
कैलासोद्धारधीरं दशवदनभुजामण्डलीयन्त्रबन्धं
रेरे कोदण्डदण्ड प्रतिपत तदलं नासि सोढा दृढो ऽपि ॥ ४७ ॥

विचिन्त्य भवतु पातालचरानम्बरचरांश्चसावधानान्विधास्ये । अधो ऽवलोक्य ।

पृथ्वि स्थिरा भव भुजङ्गम धारयैनां
त्वं कूर्मराज तदिदं द्वितयं दधीथाः ।
दिक्कुञ्जराः कुरुत तत्त्रितये दिधीर्षां
देवः करोति हरकार्मुकमाततज्यम् ॥ ४८ ॥

ऊर्ध्वमवलोक्य ।

अश्वान् विश्वासयैतान् क्षणमरुण कुरु स्वर्गमातङ्गकण्ठं
गाढोरुग्रन्थिमाधोरण विबुधगणाः कर्णयोर्दत्त हस्तान् ।
लङ्केन्द्रोदग्रपाणिप्रणयिभवधनुर्भङ्गजन्मा कठोरष्टाङ्कारः स्वर्गरोदःकुहरवलयितस्त्रासकारी न कस्य ॥ ४९ ॥

रावणः । अहो मम दशाननस्याज्ञा यदमीषां स्वावयवानामपि जितगगनचाटुकारः सर्वत्र व्यापारः । तथाहि संप्रत्येव तावत् ।

निष्पर्यायनिवेशयेशलरसैरन्योन्यनिर्भर्त्सिभिर्हस्ताग्रैर्युगपत्क्षिपत्य दशभिर्वामैर्धृतं कार्मुकम् ।
सव्यानां पुनरप्रथीयसि विधावस्मिन् गुणारोपणे
मत्स्वेवाविदुषामहंप्रथमिका काप्यम्बरे वर्तते ॥ ५० ॥

विचिन्त्य । सजुगुप्सानुतापम् । अविमृश्यकारिता हि पुंसः परं परिभवस्थानं यत्प्राकृतवदप्राकृतो ऽपि रावणः पणेन परिणेतुकामः । तत्सर्वथा किमनेन ।

रुद्राद्रेस्तुलनं स्वकण्ठविपिनच्छेदो हरेर्वासनं
कारावेश्मनि पुष्पकापहरणं यस्येदृशाः केलयः ।
सो ऽहं दुर्मदबाहुदण्डसचिवो लङ्केश्वरस्तस्य मे
का श्लाघा घुणजर्जरेण धनुषा कृष्टेन भग्नेन वा ॥ ५१ ॥

इति सावज्ञं क्षिपति ।

सख्यौ । भट्टिदारिए दिट्ठिआ वड्ढसे समं दे पाणिग्गहणमङ्गलेण मुक्कं रावणेण धणू † ।

* भगवन्ननङ्ग नमस्ते मा खलु राक्षसमुद्दिश्य सुकुमारजनयोग्यं प्रहरणं संदधासि ।

† भर्तृदारिके दिष्ट्या वर्धसे समं ते पाणिग्रहणमङ्गलेन मुक्तं रावणेन धनुः ।

सीता । साश्वासमात्मगतम् । हिअअ अणुऊलो विअ दे देवो वम्महो अ * ।

शतानन्दः । भो लङ्केश्वर परममाहेश्वरो ऽसि तत्किमिदमसंस्तुतं प्रस्तुतम् ।

जनकः । ससंरम्भमुत्थाय ।

न ब्रह्मोपनिषन्निषेवणरतिर्नो याज्ञवल्क्यो गुरुः
कोपावेशनविस्रसा च सहसा शक्नोति रोद्धुं मनः ।
दृष्ट्वा शम्भुमहाधनुःपरिभवं पाणिर्जराजर्जरस्तेनाभ्युत्सहते ममैष युगपच्चापाय शापाय च ॥ ५२ ॥

विमृश्य नेपथ्यं प्रति कः को ऽत्र भोः । धनुर्धनुः । प्रविश्य धनुरुपनीय निष्क्रान्तः पुरुषः ।

जनकः । परिकरं बद्ध्वा गृह्णाति ।

रावणः । सकोपहासम् ।

हस्तालम्बितमक्षसूत्रवलयं कर्णावतंसीकृतं
स्रस्तं भ्रूयुगमुन्नमय्य रचितं यज्ञोपवीतेन च ।
सन्नद्धा जघने च वल्कलपटी पाणिश्च धत्ते धनुर्दृष्टं भो जनकस्य योगिन इदं दान्तं विरक्तं मनः ॥ ५३ ॥

शतानन्दः । आश्चर्यम् । अहो महाप्रभावो मे याज्यः । अस्य हि ।

वाञ्छानुगौ न जरसा जनकस्य पाणी
सत्यं स एष तपसस्तु परः प्रकर्षः ।
मौर्वी स्वयं यदधिरोहति चापकोटिं
संधानकर्मणि शराश्च यदुत्सहन्ते ॥ ५४ ॥

सीता । हद्धिहद्धि । तादोवि णाम उवसमेक्कधणो धणुव्वावारेदि स एष हुदवहं वरिसिदुकामो मिअङ्कमणी † ।

प्रहस्तकः । आः क्षत्रियबन्धो वृथावृद्ध दशाननमुद्दिश्य धनुरारोपयसि नन्वेष ते पौलस्त्यशस्त्रं चन्द्रहासः शिक्षयिता ।

रावणः । उच्चैर्विहस्य सोल्लुण्ठम् ।

घुणव्रणनभङ्गुरं पशुपतेः पुराणं धनुर्निरीक्ष्य भुजमण्डलीबलमदाद्विकीर्णं मया ।
स एष न तितिक्षते समरसीम्नि सीरध्वजः
समं हसत हे मुखान्यसममेतदुद्घट्टनम् ॥ ५५ ॥

जनकः । पुलस्त्यपुत्र संवृणु शस्त्रं एष ते परममाहेश्वरः सीरध्वजो न क्षमते ।

रावणः । अहो सीतास्नेहो मामार्द्रयति यदहमपि दशकण्ठ ईदृशानां वचसां सोढा । ससंरम्भम् ।

* हृदय अनुकूल इव ते देवो मन्मथश्च ।

† हा धिक् हा धिक् तातो ऽपि नामोपशमैकधनो धनुर्व्यापारयति व एष हुतवहं वर्षितुकामो मृगाङ्कमणिः ।

यज्वा जरापरिणतः श्वशुरो भविष्यन्
ब्रह्मैकतानहृदयो गुणवांस्तथेति ।
क्षान्तेर्निमित्तमिदमत्र ममैकमेकं
हे पाणयः किमिति वाञ्छथ चन्द्रहासम् ॥ ५६ ॥

जनकः । रावण दूतो भव एष प्रहण्यसे । नेपथ्ये ।

जनक विरम रोषात् त्वं हि संन्यस्तशस्त्रः
कथमयमुपरागस्त्वद्गुरुर्याज्ञवल्क्यः ।
परिणतिपरिहीणक्षुद्रराजन्यजन्यं
तदिह शरनिवेशं संवृणु व्रीडिताः स्मः ॥ ५७ ॥

जनकः । बालर्षे शुनःशेप यदात्थ इदमपास्तं शस्त्रम् । तथाकृत्वा तज्जगतामपराक्षसत्वायेदं शापोदकमुत्सृजामीति कमण्डलुमादत्ते ।

शतानन्दः । भगवतो वैकर्त्तनादागतस्य निरवधिसीम्नो ब्रह्मतत्त्वोपलम्भस्य तपोराशेश्च किमयं व्ययः क्रियत इति शापोदकमुपसंहरेति ।

जनकः । भगवन् । विश्वामित्रधर्मपुत्र कुलगुरो गौतम ।

कृते राक्षसराजेन पिनाकस्य पराभवे ।
जानन्ति युक्तं गुरवो भवद्भिः परवानहम् ॥ ५८ ॥

रावणः । मिथिलेश्वर किमिति संरम्भसे । ननु रभसनिर्जितैरावणो रावणः खल्वहम् ।

मयि कण्ठपरिच्छेदपरितोषितशङ्करे
कुण्ठीभवन्ति सर्वेषामस्त्राणि च तपांसि च ॥ ५९ ॥

त्वं किल संबन्धज्येष्ठो ब्रह्मविद्यावरिष्ठ इति च मया क्षम्यते ।

सख्यौ । अपवार्य हदास दे वअणं जणअकुलदेवदाओ पडिहणन्तु * ।

शतानन्दः । निशाचरचक्रवर्त्तिन् मा वृथा कत्थस्व । वक्रीकृतचण्डीशचापदण्डस्य शोभत एष व्याहारो न पुनस्तव ।

रावणः । सक्रोधम् । किंकिमाह भवान् । निशाचरचक्रवर्तिन् मा वृथा विकत्थस्वेत्यादि पूर्वोक्तमनुवदति । विचिन्त्य तत्किमत्र साम्प्रतम् ।

परिषदियमृषीणामेष वृद्धो नरेन्द्रः
कथमथ तदमुष्मिन् मैथिलीलालसोऽपि ।
निजभुजबलदृप्यद्दोरवर्यै समाजे
हठहरणविनोदं राक्षसेन्द्रः करोतु ॥ ६० ॥

ससंरम्भम् । शृणुत भोः शृणुत निशाचरपतेः प्रतिज्ञाम् ।

कुर्वन् मौर्वीनिवेशक्रमनमदटनि स्पष्टटङ्कारटङ्कं
शम्भोः कोदण्डदण्डं बधिरितभुवनं भूर्भुवःस्वस्त्रयेऽपि ।
यस्तामेनां वरीता रसयति तदसृक् चन्द्रहासो ममासिः
कण्ठास्थिग्रन्थिशल्कीकरणभवरणत्कारवाचालधारः ॥ ६१ ॥

नेपथ्ये कलकलः ।

रावणः । भोः प्रहस्त किमयमकाण्डचण्डो विस्तीर्णजलधरध्वानतानवक्रदेष निर्घोषः ।

प्रहस्तकः । देव देवमनुपततामस्मद्बलानामेष निर्भरभरितभुवनाभोगतलः कलकलः ।

नेपथ्ये वैतालिकः । जयजय त्रिजगत्पते पौलस्त्य सुखाय माध्यंदिनी संध्या भवतु देवस्य संप्रति हि ।

शीतं श्रीखण्डकाण्डं निबिडयति फणी भोगनालेन लीनश्छायावृक्षस्य मूले रचयति चमरी रम्यरोमन्थलीलाम्
सेर्ष्यान्तर्मानुषीयं वितरति कमितुर्घर्मितस्याङ्कपालीं ।
लीलाकस्तुरिकैणी सरति विचरितुं सारणिग्रन्थिपर्णम् ॥ ६२ ॥

रावणः । तद्वयमपि निसर्गरमणीयेषु मिथिलापुरीपरीसराक्रीडेषु क्रीडाभिर्द्वित्राणि दिनान्यात्मानं विनोदयामस्तदादिश्यन्तां सेनापतयः ।

ताम्बूलीनद्धमुग्धक्रमुकतरुतलप्रस्तरे सानुगाभिः
पायंपायं कलावीकृतकदलदलं नारिकेलीफलाम्भः ।
सेव्यन्तां व्योमयात्राश्रमजलजयिनः सैन्यसीमन्तिनीभिर्दात्यूह * व्यूहकेलीकलितकुहकुहारावकान्ता वनान्ताः ॥ ६३ ॥

इति निष्क्रान्ताः सर्वे ।

॥ प्रतिज्ञापौलस्त्यो नाम प्रथमोऽङ्कः ॥

---

* हताश ते वचनं जनककुलदेवताः प्रतिघ्नन्तु ।

* दात्यूहः कोकिलजातिः ।

---

## ॥ श्रीः ॥

॥ हे आर्यस्त्रीपुरुषाः काशिकविद्यालयच्छात्राश्च ॥

एतज्जनपदं प्रति मदागमनादुत्तरमद्यैव प्रथमत एतादृशे कार्येऽध्यक्षो भवामि । तदनल्पं कौतुकमावहति ममायमवसरः । पश्यंश्चेमां विशालां शालामङ्गलैरेतद्देशीयैस्सामाजिकैरेतद्विद्यालयच्छात्रवर्गैश्च संकुलां निपुणमहं स्मरामि पञ्चदशभ्यो वर्षेभ्यः पूर्वं संवृत्तस्यैतत्सदृशस्य प्रसङ्गस्य यत्रासौ श्रीमांस्तामसनोऽद्याऽपि युष्माभिस्सस्नेहं सादरं च स्मर्यमाण एतद्वास्तुप्रवेशं विदधौ । सन्ति च केचन तदानीं समागतवतां जनानां मध्येऽद्य मां परितः येष्वहं वाराणस्याः श्रीमन्महाराजमार्यंञ्च देवनारायणसिंहमवलोकयामि यो ऽयं तत्काले नागरिकजनविक्षोभे कृतैर्गुरूपकारैर्विशिष्टं राजप्रसादमवाप । नूनमेतच्छालादर्शनोद्बुद्धतत्तत्संस्कारेण चेतसा ततोऽपि दूरतरं कालं स्मरामि यदा चतुर्विंशते र्वर्षेभ्यः पूर्वं मम भ्राता श्रीमान् जान्म्यूर आसीदस्य विद्यामन्दिरस्याद्योऽध्यक्षः ॥

अथाऽद्य श्रीमते ग्रिफियाद्यत्पाठशालाख्यानमस्माभिः श्रुतं तदभूत्प्रीतिकरम् । अवगम्यतेहि तेन यद्गतवर्षेआङ्गलशालायां विद्यार्थिनामभ्यासा अभूवन्प्रायेण सिद्धिसंयुतास्सन्ति चैतेषां फलान्यतिश्लाघनीयानि संतोषकराणिचेत्यवैमि ।

परन्त्वहमत्र पाठालये ऽवतिष्ठमानः पूर्ववृत्तान्यस्यानुस्मरन्युष्मासु निवेदयामि यद् आङ्गलशालायाः फलैरेव नास्य विद्यालयस्य फलवत्ता विज्ञेया किन्तु विशिष्टशालाभूतेयं काशिकपाठशालाऽऽङ्गलसंस्कृतविभागस्य फलैरेव सिद्धिमत्यसिद्धिमती वेति वेदनीया । एतैरेव चास्या अभ्युदयो हीनता वा परिचेया ॥

अथास्याः पूर्ववृत्तान्तान्संक्षेपतो वर्णयामि । एकनवत्युत्तरसप्तदशशततमे ख्रिष्टीयवर्षे संस्कृतपाठशाला संस्थापिताऽभूत् । यदुक्तं श्रीमता तामसनेनैतद्वास्तुप्रवेशावसरे । त्रिंशदधिकाष्टादशशततमे वर्षे आङ्गलभाषाध्ययनाय पृथगालयस्संस्थापितः । चतुश्चत्त्वारिंशदधिकाष्टादशशततमेऽब्दे भवति श्रीमति जान्म्यूरेऽध्यक्षे द्वे इमे शाले एकीकृते । त्रिपञ्चाशदधिकाष्टादशशततमे संवत्सरे जानवरीमासस्य दशमे दिवसउदारमिदं वेश्म श्रीमता तामसनेन प्रतिष्ठापितम् । यदिदं हिन्दीभाषायां विलिखितं छात्रबोधनपत्रं धारयामि तत्तदानीमपाठि । यानीमानिच वाक्यानि तत उद्धृत्य पठामि तैः काशिकपाठशालायाः समुदीक्षितस्य महतः फलस्य प्रतीति र्भविष्यति । यथा । भिन्नास्वपि भाषासु तत्त्वं विज्ञानं च नैव भिद्यते इत्यवधार्य राजकीयपाठालये तत्त्वजिज्ञासवश्छात्राः स्वस्वभाषासु भिन्नास्वपि तांस्तान् ज्ञानोपार्ज्जनप्रयत्नान् विधातुमेकत्रैव समागच्छन्तु तुलयित्वा च परस्परं विविधांस्तत्त्वानुसंधानोपायानन्योन्यमुपकुर्वीरन्त्विति । तथाहि । संस्कृतशालायां गौतमसूत्रानुसारेण व्याप्तिग्रहोपायमभ्यस्यन्ति विद्यार्थिनः । आङ्गलशालायां चेममेव विषयं बेकनप्रकाशितया रीत्या शीलयन्ति । किंचेदं तावदभीष्टं यद् येष्वंशेषु गौतमबेकनयोरस्ति सर्वथैकमत्यं न तत्र मतभेदः कल्प्यतामथच यत्र वस्तुत एवास्ति मतभेदस्तत्रोभयोर्मतयोर्मिथस्तुलनया तत्त्वं निरूप्य परिग्राह्यम् । एवञ्चेतरास्वपि विद्यासूचितानुचितयोर्विवेकं कृत्वोचितस्यैव परिग्रहः कार्यः ।

या च तद्दिने श्रीमता तामसनेन समुदीरिता वचनावली तत्राप्ययमुत्कीर्तितोऽभीष्टार्थः । यथा । वेश्मन्यत्र सुशीलता समनुशील्यतां तत्त्वं च प्रकाशितमहिम महीयतामिति । अथचेत्थं विनयनेन भारतीयजनस्य समीचीनं बुद्धिविपरिणामं दशासमुन्नतिं चाशासानः स उवाच यदस्मात्स्थलाद्रीतिरियं परितः प्रसरतु आशाचेयममोघा भवतु यद्यत्रात्रगृहे वयमद्य समागतास्स्मस्तत्रैवानुशील्यमाना विद्या महति लोकबुद्धिपरिणामे भूयादेकतमं करणमिति ।

काशिकपाठशालाध्यक्षतापरित्यागात्किंचिदुत्तरं विद्यार्थिभ्यः श्रीमता जान्म्यूरेण प्रेषितं यत्पत्रं तस्याप्यंशं युष्मदनुमत्या वाचयामि । तथाहि । तत्त्वज्ञानमेव विद्यायाः फलमिति तत्त्वैकपक्षपतधिया न तावत्सांसारिकफललाभायैव विद्याव्यासक्ता यूयं भवतेत्यभिलषामि । बुद्धिसंस्कारश्चित्तोन्नतिर्विवेकादीनां धीशक्तीनामुपचितिर्भगवतोऽद्भुतानां सृष्टीनां विश्वनियमनाय तेनैव विहितानां नियमानां च ज्ञानमित्येतानि शिक्षायाः सन्ति परमोत्कृष्टानि फलान्येतेभ्योऽपि परतरं शीलसमुन्नतिरूपं फलं साधुविनयनक्रियाया अस्तीति मनसा विचारयन्तो विद्यां शीलयथ चेत्तर्हीष्टं मे भवेदिति ।

अथासौ प्राचीनसंस्कृतग्रन्थनिबन्धॄणां समुज्ज्वलकीर्तीनां महतीं राजिं सूचयामास येन तद्वंशीया यूयं स्वकुलसमुचितं किंचिद्विधातुमुत्साहवन्तो भवेत । किंच यं गतशनिवारे पराह्णे काशिकसभायामौत्सुक्येन नैपुण्येन च विचार्यमाणं श्रुत्वा प्रीतिमलप्सि तस्मिन् देशभाषायां ग्रन्थराजिविरचनरूपे विषयेऽसौ काशिकपाठशालासकाशाद्यानि फलान्याशास्त तान्येवं स उदीरयामास । यथा ।

विज्ञानवर्द्धनस्योत्तमोत्तमोपायत्वेन विशुद्धतमानामुदारतमानां पथ्यतमानां तत्त्वानामागारद्वारोद्घाटकत्वेन चाङ्गलभाषाया अध्ययनानुवृत्तये युष्माननुरुन्धानोऽपि प्रायेण सर्वेषु व्यापारेषु सिद्धिलाभाय स्वकीयभाषाया अपि निपुणः परिचयोऽवश्यमपेक्षित इति द्रढीयांसं संस्कारं युष्माकं चेतस्युत्पादयितुमिच्छामि । किञ्च न जात्वाङ्गली भाषा भारतीयजनभाषा भवेत् । युष्मद्देशीयजनहितसंपृक्तानि सर्वाणि राजकार्याणि प्रायस्साकल्येन देशभाषयैव निर्वाह्यन्ते । अनयैव च भाषया लोकविज्ञानवृद्धिरपि साध्येत यदनुकूलतां येन केनापि प्रकारेण गन्तुं सर्वेपि यूयं समुत्सहध्व इतिमन्येऽतश्च सुललितवाणीनिबद्धैरुपादेयैरुदारैश्चार्थैर्विशिष्टं देशभाषावाङ्मयं क्रमेण प्रादुर्भवेदिति युष्माभिरुत्कण्ठयाऽभिलषणीयम् ।

अथेदानीं हे सुहृदोऽहं युष्मान्पृच्छामीमाः पूर्वोक्ता महत्य आशाः कथमपि सफलीभूता वा । वर्षे वर्षे बहवो विद्यार्थिनोऽङ्गलसंस्कृतवर्गेषु पठित्वा पाठालयमत्यजन् । येषां महापुरुषाणां यशांसि भारतवर्षस्य प्राचीनवाङ्मये समुल्लसन्ति तेषां स्मृत्या तद्वंशोचितग्रन्थादिविरचने जनिता वा युष्माकमुदारा स्पृहा यथा तर्कितं । आहोस्विदेतादृशी बुद्धिर्नैव विद्यते युष्माकम् । किंच देशभाषायां ग्रन्थावली यथा निर्मीयेत तथा किंचित्प्रयत्नोऽप्यनुष्ठितो वा युष्माभिः । हे युरोपीय विद्यारत्नोद्भासितमानसाश्छात्रा यैर्युष्माभिः स्वोपार्जितैर्विज्ञान

धनैः स्वदेशीयजना योजनीयाः सन्ति विद्यते वा किमपि तादृशं वस्तु यद्युष्मत्कृतित्वेन निर्दिशेम । देशभाषायां वाङ्मयमितिनामार्हा नैव सन्ति ग्रन्था इत्यत्र को विवदेत । न चाङ्गलसंस्कृतविद्यार्थिभिरेतत् साधयिष्यत इति लक्ष्यते ।

अपरञ्च । प्राच्यप्रतीच्यदर्शनेषु निष्णाता जना उभयोस्तत्त्वानुसंधानरीतीः परस्परं तुलयिष्यन्ति प्रचारयिष्यन्ति च भारतीयजनबुद्ध्यनुकूलविधयोचितां रीतिमुचितं च तन्त्रमित्युत्प्रेक्षाऽकारि श्रीमता तामसनेन । ननु लोकप्रतिभानुगुण्यभाजा युरोपीयप्रतिपादनरीतिमपेक्ष्याधिकां प्रतीतिं प्रीतिं च जनयितुं समर्थया रीत्या पूर्णतरेणोदारतरेणच भावेन साक्षात्परतत्त्वमपि प्रकाशयिष्यत इत्येतदाशया विशालीभवन्त्योत्कटयोदारया लोकानुकम्पाबुद्ध्या भारतीयजनकल्याणपरायणहृदयः श्रीमांस्तामसनस्तादृशशुभतरकालस्यागमं तर्कयामास यत्रेयं शाला लोकोन्नमनाय बलवदुत्तोलनयन्त्रमिवोपयुक्ता भविष्यति तदभ्युदयसाधनेषु चैकतमं भविष्यतीत्येदर्थकं तदीयवाक्यं पूर्वं मया पठितम् ।

लोकचित्तोद्बोधनायान्यत्रास्ति किंचिदनुष्ठीयमानं किमिति यूयमिह निरुद्यमास्तिष्ठथ । वङ्गदेशे विश्वविद्यालयउत्कर्षहेतुरस्ति सोऽस्माकमुपकाराय न भवति नच संस्कृतशास्त्रविज्ञानात् तदीयविद्वत्समाजात् लभ्यते कापि प्रतिष्ठेति वदथ चेत्तर्हि प्रतिवदामि भोःमित्राणि भवाम्यहं समदुःखो युष्माभिर्भवेयं च प्रीतो यदि विश्वविद्यालयस्योद्यमेन प्राच्यविद्यानुशीलनं वर्धमानं पश्येयम् । किन्तु युष्मदनुत्साहे बलवान्हेतुरयं किम् । किं नामोत्कर्षकारणं कावाधिका शक्तिः बिए संस्कृतविद्यापारीण इति वोपाधेर्लभ्यतां शक्तिस्तु विज्ञानात्सौशील्याच्चैवहि भवति । तथाच कविना यदुक्तं तत्स्मरथ मनुष्य एव काञ्चनं पदवीतु तत्र मुद्राक्षरमात्रमिति । किंचैवमेवाङ्गलसंस्कृतविद्यायामपि वाच्यम् । यदीयं हि श्रीमता तामसनेन मतां शक्तिं गुणं वाधारयति तर्हि पाठशालीयप्रतिष्ठोपाधिविरहादेव नासिद्धार्था भविष्यति । एवं च हे मित्राणि अङ्गलसंस्कृतविद्या परीक्ष्यमाणास्तीति गम्यते अस्यै च परीक्षाया उचितानुकूलावसरदानमस्ति युष्मत्कृत्यम् । ननु संस्कृतशास्त्राणि एतद्देश्यानि चिरं पिहितानि धर्माभासस्य देहात्मैक्यस्य च प्रतिपादकत्वेनैव वा लोके ख्यातानि स्यास्यन्त्याहोस्वित् प्रतीच्यशास्त्रैः कृतसंबन्धानि लोकबुद्धिशुद्धिरूपं तन्महत्फलमुपादयिष्यन्ति यत् कृतोभयशास्त्रसंबन्धायाः शिक्षारीतेरुद्भावकैरौत्सुक्यपूर्वमुत्प्रेक्षितम् । महावातागमस्येव नीरचाञ्चल्यमिव लक्ष्यते वा किमपि पूर्वलक्षणमस्य चिरप्रतीक्षितस्य महतउदर्कस्य ।

हे अङ्गलसंस्कृतविद्यार्थिन इमे प्रश्ना युष्माभिरेव विचारणीयाः । येषाञ्च महापुरुषाणामाशया इमेऽभिहिता स्तेषामुदाराकाङ्क्षापूरणानुकूलतां स्वयमेवोपगन्तुमुत्कटोऽभिलाषो मदुक्तिभिर्युष्मच्चेतसि समुज्जृम्भताम् ।

अस्मिन्प्रसङ्गे प्राचीनाया अस्या नगर्याः सामर्थ्यशालिनां जनानां महान्तमिमं समागमं दृष्ट्वा परमं प्रीतोस्मीति भूयोऽपि वदामि । अपिच काशिकसभायामत्रच लोकस्य शिक्षायां विज्ञानवृद्धौ च यद्वर्धमानमौत्सुक्यं युष्माकं पश्यामि तेन परमोत्कृष्टफलाशां कर्तुमुत्सह इति ॥

प्रतीच्योदीच्यजनपदोपनियामकेन
माननीयेन श्रीमदार्य्यविलियम्म्यूरेण
काशिकविद्यालये
विद्यार्थिभ्यः पारितोषिकवितरणावसरे
कृतमिदं प्रतिपादनं
समाप्तम् ।

---

यागेश्वरनामधेयस्मरहराधिष्ठानपूतपदासु चन्द्रप्रभातटिनीतीरवर्तिनीषु विन्ध्यगिरिकाननभूमिषु मृगयाविहारिणो राजाधिराजद्विजराजकाशीराजश्रीश्वरीप्रसादनारायणसिंहस्य समभिव्याहारविहारिणा लब्धतत्प्रधानकोविदपदेन वङ्गदेशाधिवासिना कविना श्री ताराचरणतर्करत्नेन काशीराजकाननशतकं नामयदभिनवकाव्यं व्यरचि तत्र तावत्

यागेश्वरस्मरहराश्रितपूतनारे,सद्गन्धशीकरगधीरसमीरतीरे। चन्द्रप्रभाविमलनिर्मलनीलनीरे, चेतश्चरत्वविरतं रतिपत्यगारे ॥ १ ॥

हित्वा चिरप्रणयिनीमनिमेषनेत्रामागत्य विन्ध्यगिरिकाननमद्य कश्चित् । स्पृष्ट्वा समीरमवलोक्य तदीयशोभामुद्भावयत्यखिलमात्मगतस्वभावम् ॥ २ ॥

धन्या मयूरमृगवानरसारसाद्या, यस्मादितः कुसुमशायकवासभूमौ । अङ्के निधाय दयिताः शयिताः सुखेन, हाहा वयं तु पिशुना विफलं भ्रमामः ॥ ३ ॥

आशालते किमधुना फलमाप्नुकामा, संश्रित्यशीतलमनोहरवन्यभूमिम् । जानासि किन्नवतचेतनहीनचित्ते, बालावियोगदहनाः सततं ज्वलन्ति ॥ ४ ॥

रे पान्थकृन्तनकर त्वमितः प्रयाहि, कान्तारतिश्रमजयधर्मविनाशहेतो । नोचेत्समीरमृगया चरणे चरन्तं, संघातयामि हरिणं धरणीशमुक्त्वा ॥ ५ ॥

पाखंडगात्रपरिलाञ्छितपङ्कशैत्यं, स्पृष्ट्वा शरीरमधरीकृतपङ्कजात्याः । दावानलेन सततं सह वर्द्धमानं, स्प्रष्टुं समीरमिह किंसुखवासना ते ॥ ६ ॥

किंचित्त्व संप्रति विहारसुखाभिलाषि, दृष्ट्वा स्वभावरमणी-

यमरण्यमेतत् । जानासि किं न बलवाननिवार्य्य एषः, दीनादृगम्बुजनिपातकजन्मवह्निः ॥ ७ ॥

रे दुर्विनीतनयने नयने ऽहरिण्या, दृष्ट्वा विनोदमभिलब्धुमिहप्रयासः । हित्वा सुधासमसुनिर्मलशीतलापं, पान्थस्य यादृशरतिर्मृगतृष्णिकायाम् ॥ ८ ॥

अस्मात्कुरङ्गि न भयं नहि ते वधार्थी, तिष्ठ क्षणं भयवती किमितःप्रयासि । दृष्ट्वा विलोलनयने कुटिले त्वदीये, शङ्कुं दृढं हृदयगं क्षणमुद्धरामि ॥ ९ ॥

रेरे कुरङ्गि किमु पश्यसि नेत्रभङ्ग्या, दूरेप्रयासि नहितेऽस्मिसुदर्शनार्हः । बालां मदेकहृदयां मुहुरीक्षमाणां, दग्ध्वा वियोगदहनेन समागतोऽहम् ॥ १० ॥

नाहोकुरङ्गितवनेत्रमवेत्य मुग्धस्तस्या जगज्जयिदृशः प्रियदासएषः । यस्याः कटाक्षपरिनिर्जितनेत्रशोभा, हित्वा जनालयमहो वनमाश्रिता त्वम् ॥ ११ ॥

चन्द्रप्रभे तटिनि चारुपयःप्रकाशै, रूपं प्रदर्शयसि किं जडदेहिनीह । नालोकिता बत जगत्प्रियपङ्कजाक्ष्या, लावण्यजीवननिर्धोहितरङ्गशोभा ॥ १२ ॥

चन्द्रप्रभे नहि पुनस्तव भाग्यवत्त्वं, लोकोत्तरं सलिलपूरमितासि चेत्त्वम् । तीक्ष्णेनिदाघसमये नवयौवनाढ्या, संसर्गसौख्यरहितासि यतश्चिरेण ॥ १३ ॥

कर्कन्धुवृन्दमधुराम्लकलोहितानि, धृत्त्वा फलानि किमु दम्भभरं तनोषि । दूरेस्तुतत्फलमहोनवहेमवल्ल्या, नादृष्टमोष्टयुगपत्रमनिन्दितायाः ॥ १४ ॥

रेवल्लिगर्वितमते कुसुमप्रकाशै, रूपं प्रदर्शयसि मां किमु लीलयात्वम् । न ज्ञायते समवलोकि मया रतेषु, विश्रान्तकुन्दरदनास्मितवक्त्रशोभा ॥ १५ ॥

रेरे नवे कुसुमिते ऽद्य प्रसूनवल्लि, कण्ठावलम्बनकरीप्रियपादपस्य । भूमौ ददासि चरणं नहि गर्वयोगाज्जानासि किं ननवयौवनमल्पकालम् ॥ १६ ॥

सक्षादनङ्गरमणीमिवहेमवल्लीं, लावण्यसिन्धुसुधयापरिवर्द्धमानाम् । वन्यां लतां कठिनकंटकिकुट्टितांगीं, किंसमेयदृतर्ईक्षितुमक्षिणी मे ॥ १७ ॥

रेरे मयूर परिहृत्य वधूं मयूरीं दूरे चर प्रणयसागरमज्जदङ्ग । नोचेन्मदेकहृदयाविरहाधिजन्म, दुर्वार्य्य वह्निशिखया ज्वलितासि सद्यः ॥ १८ ॥

रेरे कलापिकुलचित्रकलापशाली, शोभां प्रदर्शयसि लोकचयं किमद्य । हाहा न वेत्सि नवनीरदनीलवेणाः, केशाः कुशेशयदृशां कुशलीभवन्ति ॥ १९ ॥

रे कुञ्जमञ्जुलतता कृतचारुशोभ, सौभाग्यमेव गणयामि तदात्वदीयम् । संचाररञ्जितदिगन्तरमत्तदन्ति, यानास्थिराम्बुजदृशो यदि पादचारः ॥ २० ॥

॥ रामनगरराजधानी ॥

---

श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्येण मल्लिनाथटीकासहितं कुमारसम्भवकाव्यं १९२४ वत्सरे कलिकातानगरस्थसंवादज्ञानरत्नाकरयन्त्रे मुद्रितम् । तस्यैव विज्ञापनपत्रे "एतच्च काव्यं कविना शैवाभिधमहापुराणोत्तरखण्डीयद्वादशावध्यष्टादशाध्यायपर्य्यन्तप्रतिपाद्यतारकासुरवधकथामाश्रित्य प्रणीतम्,, इति स एव लिलेख । तदन्त्यन्तमसंगतम् । यतोऽस्मिन्नेव काव्ये विद्यमानानां शब्दार्थकथाकल्पनानां वक्ष्यमाणपुराणस्थाभिः ताभिः सह प्रायशोऽभेदो दृश्यते नतु शैवाभिधमहापुराणान्तर्गतकथयेति । एवं "किन्तु तत्र पार्वतीतपस्यानन्तरं पार्वतीं प्रति प्रसन्नेन महादेवेन स्वयं वरविधानकर्तव्यताया उपदेशः इह तु सप्तर्षिमण्डलस्य तत्प्रार्थनार्थं हिमवन्तं प्रति प्रेषणमित्येव कविकल्पितं नतु तत् पुराणकथामूलमित्येव विशेष,, इति यदुक्तं तदपि न मनोरमम् । यतः वक्ष्यमाणे पुराणे पार्वतीपरिणयेच्छया सप्तर्षिमण्डलस्य स्मरणं तेन च समागतेषु तेषु तत्परिणयार्थं हिमालये तन्मण्डलप्रेषणमित्यादिकथा यथा वर्तते तथैवास्मिन्नपि काव्येऽस्ति अनेनेदमेव पुराणं तत्काव्यमूलमिति निश्चीयते । यथा ।

अस्ति तावत् पञ्चाशत्खण्डमण्डितं स्कान्दं पुराणम् । तदन्तर्गता चैका शाङ्करी संहिता त्रिंशत्सहस्रग्रन्थास्तिरेण सुविस्तृता वर्तते । तत्रैकं शिवरहस्याख्यं खण्डम् । तच्च सम्भवासुरवीरमाहेन्द्रयुद्धदेवदक्षोपदेशकाण्डभेदात् सप्तविधम् । अत्र चावच्छेदकावच्छेदेन श्रीमतः कार्तिकेयस्यैव विक्रमवर्णनम् । अथ च शूरपद्मः सिंहवक्त्रस्तारकश्चेति त्रयो भ्रातरः तेषु च सर्वकनिष्ठस्तारक इत्यासुरकाण्डीया कथा ॥

कविवरः कालिदासस्तु कुमारसम्भवं काव्यं सम्भवकाण्डीयकथामात्राश्रयेण रचयामास नतु शैवाभिधमहापुराणस्य कथामाश्रित्य । तथाहि ।

॥ द्वितीयेऽध्याये शङ्करसंहितायाः ॥

दिने दिने वर्धमाना रेखा चान्द्रमसीव सा ।
अपुपद्वपुषो वृद्धिमानन्देन पितुः सह ॥ १ ॥

॥ कुमारसम्भवस्य प्रथमे सर्गे ॥

दिने दिने सा परिवर्धमाना लब्धोदया चान्द्रमसीव लेखा ॥
पुपोष लावण्यमयान् विशेषान् ज्योत्स्नान्तराणीव कलान्तराणि ॥ १ ॥

॥ तथा २ अध्याये ॥

पर्वतापत्यतां याता पार्वतीत्यभिधां दधे ।
मात्रोमेति निषिद्धा यदुमाख्या प्रणवात्मिका ॥ २ ॥

॥ १ सर्ग ॥

तां पार्वतीत्याभिजनेन नाम्ना बन्धुप्रियां बन्धुजनो जुहाव ॥
उमेति मात्रा तपसो निषिद्धा पश्चादुमाख्यां सुमुखी जगाम ॥ २ ॥

॥ ४ अध्याये ॥

इति स्तुतः सुरश्रेष्ठः सुरश्रेष्ठैर्निजाश्रितैः ।
प्रसादाभिमुखो भूत्वा प्राह स्म करुणानिधिः ॥ १ ॥

॥ द्वितीयसर्गे ॥

इति तेभ्यः स्तुतीः श्रुत्वा यथार्था हृदयङ्गमाः ।
प्रसादाभिमुखो वेधाः प्रत्युवाच दिवौकसः ॥ १ ॥

॥ ५ अध्याये ॥

किमिदं किमिदं वत्सा यूयं सम्भूय सादरम् ।
विषण्णवदना देवाः शरणं मां समागताः ॥ २ ॥

॥ २ सर्ग ॥

किमिदं द्युतिमात्मीयां न बिभ्रति यथा पुरा ।
हिमक्लिष्टप्रकाशानि ज्योतींषीव मुखानि वः ॥ २ ॥

॥ ५ अध्याये ॥

यदात्थ भगवन्नेवं सुरा विप्रकृतास्तराम् ।
सर्वात्मनां त्वमात्मासि कथं नैव तु बुध्यसे ॥ ३ ॥

॥ २ सर्ग ॥

एवं यदात्थ भगवन्नामृष्टं नः परैः पदम् ।
प्रत्येकं विनियुक्तात्मा कथं न ज्ञास्यसि प्रभो ॥ ३ ॥

॥ ५ अध्याये ॥

पद्मबन्धुः पद्महस्तः शूरपद्मस्य विद्विषः ।
विकासयति पद्मानि तावन्मात्रातपः सदा ॥ ४ ॥

॥ २ सर्ग ॥

पुरं तावन्तमेवास्य तनोति रविरातपम् ।
दीर्घिकाकमलोन्मेषो यावन्मात्रेण साध्यते ॥ ४ ॥

॥ १० अध्याये ॥

गतवस्त्रं नभस्तूष्णीं नन्दीशाज्ञावशेन वै ।
चकम्पिरे न वृक्षाश्च चक्रुर्भृङ्गा न हुङ्कृतिम् ॥
चुकूजिरेऽण्डजा नैव तदा चित्रार्पिता इव ।

॥ ३ सर्ग ॥

निष्कम्पवृक्षं निभृतद्विरेफं मूकाण्डजं शान्तमृगप्रचारम् ॥
तच्छासनात् काननमेव सर्वं चित्रार्पितारम्भमिवावतस्थे ॥ १ ॥

॥ १२ अध्याये ॥

हा नाथ जीवसीत्याशु ब्रुवन्त्योत्थितया तया ।
कणशः कणशो भस्म समालोकि नभःस्थले ॥ १ ॥

॥ ४ सर्ग ॥

अपि जीवितनाथ जीवसीत्यभिधायोत्थितया तया पुरः ॥
ददृशे पुरुषाकृति क्षितौ हरकोपानलभस्म केवलम् ॥ १ ॥

॥ १२ अध्याये ॥

ततः सा बहुशोकार्ता विलुठन्ती धरातले ।
विकीर्णमूर्धजा चाथ विललापाकुलेन्द्रिया ॥ २ ॥

॥ ४ सर्ग ॥

अथ सा पुनरेव विह्वला वसुधालिङ्गनधूसरस्तनी ॥
विललाप विकीर्णमूर्धजा समदुःखामिव कुर्वती स्थलीम् ॥ २ ॥

॥ १२ अध्याये ॥

अयि नाथ विशालाक्ष तवाङ्गमतिसुन्दरम् ।
जगत्सु सुकुमाराणामुपमानं क्व वा गतम् ॥

॥ ४ सर्ग ॥

उपमानमभूद्विलासिनां करणं यत् तव कान्तिमत्तया ॥
तदिदं गतमीदृशीं दशां न विदीर्ये कठिनाः खलु स्त्रियः ॥ ३ ॥

॥ १२ अध्याये ॥

अपि मां त्वत्पराधीनजीवितां त्यक्तसौहृदः ।
विहाय विद्रुतोऽसि त्वं निस्सेत्वम्बुजमम्बुवत् ॥ ४ ॥

॥ ४ सर्ग ॥

क्व नु मां त्वदधीनजीवितां विनिकीर्य क्षणभिन्नसौहृदः ॥
नलिनीं क्षतसेतुबन्धनो जलसङ्घात इवासि विद्रुतः ॥ ४ ॥

॥ १२ अध्याये ॥

अपराद्धं मया किं ते त्वया मह्यं न किञ्चन ॥
अकस्माद् दर्शनं मह्यं विलपन्त्यै न दीयते ॥ ५ ॥

॥ ४ सर्ग ॥

कृतवानसि विप्रियं न मे प्रतिकूलं च न ते मया कृतम् ॥
किमकारणमेव दर्शनं विलपन्त्यै रतये न दीयते ॥ ५ ॥

॥ १२ अध्याये ॥

बन्धनं मेखलादाम्ना त्वं गोत्रस्खलितेषु ते ।
क्षमस्व तच्च मे कान्त स्वकर्णोत्पलताडनम् ॥ ६ ॥

॥ ४ सर्ग ॥

स्मरसि स्मर मेखलागुणैरुत गोत्रस्खलितेषु बन्धनम् ॥
च्युतकेशरदूषितेक्षणान्यवतंसोत्पलताडनानि वा ॥ ६ ॥

॥ १२ अध्याये ॥

मम त्वं हृदये नित्यं वससीति मृषा वचः ।
न सत्यं यदि तत्सत्यं त्वयि दग्धे न मे मृतिः ॥ ७ ॥

॥ ४ सर्गे ॥

हृदये वससीति मत्प्रियं यदवोचस्तदवैमि कैतवम् ॥
उपचारपदं न चेदिदं त्वमनङ्गः कथमक्षता रतिः ॥ ७ ॥

॥ १२ अध्याये ॥

त्वया कृतमिदं मेऽङ्गे मण्डनं पौष्पमार्तवम् ।
दृश्यते न त्वमद्येत्थं कथमीशेन नाशितः ॥ ८ ॥

॥ ४ सर्गे ॥

रचितं रतिपण्डित त्वया स्वयमङ्गेषु ममेदमार्तवम् ॥
ध्रियते कुसुमप्रसाधनं तव तच्चारु वपुर्न दृश्यते ॥ ८ ॥

॥ १२ अध्याये ॥

अस्मात् लोकादमुं लोकं प्रस्थितस्य तवाधुना ।
पदवीं प्रतिपद्येऽहं विधिना वञ्चितामुना ॥ ९ ॥

॥ ४ सर्गे ॥

परलोकनवप्रवासिनः प्रतिपद्ये पदवीमहं तव ॥
विधिना जन एष वञ्चितस्त्वदधीनं खलु देहिनां सुखम् ॥ ९ ॥

॥ १३ अध्याये ॥

क्षणं निद्रां गता बालाऽपररात्रौ प्रतिक्षपम् ।
स्वप्ने दृष्ट्वा पतिं भूयः प्रबुद्धा विललाप च ॥ १ ॥
हे कान्त व्रजसि क्व त्वमिति गृह्णाति बाहुना ॥

॥ ५ सर्गे ॥

त्रिभागशेषासु निशासु च क्षणं निमील्य नेत्रे सहसा व्यबुध्यत ॥
क्व नीलकण्ठ व्रजसीत्यलक्ष्यवागसत्यकण्ठार्पितबाहुबन्धना ॥ १ ॥

॥ १३ अध्याये ॥

सर्वेऽपि च त्वां वेदान्ता रोदसी व्याप्य विष्ठितम् ।
विद्वांसोऽपि पुरार्याद्याः परिपूर्णं वदन्ति हि ॥
कथं न वेत्सि भावस्थं जनं जगदधीश्वर ॥ २ ॥

॥ ५ सर्गे ॥

यदा बुधैः सर्वगतस्त्वमुच्यसे न वेत्सि भावस्थमिमं कथं जनम् ॥ २ ॥

॥ १४ अध्याये ॥

मत्तवारणमारूढौ दम्पती द्विजपुङ्गवैः ।
स्वस्तिवाचनकैस्तूर्यैस्तुवन्ति किल वन्दिनः ॥
युवां वृद्धोक्षमारूढौ भूतवेतालसेवितौ ।
निरीक्ष्य जनता लोके स्मेरवक्त्रा भविष्यति ॥ ३ ॥

॥ ५ सर्गे ॥

इयञ्च तेऽन्या पुरतो विडम्बना यदूढया वारणराजहार्यया ॥
विलोक्य वृद्धोक्षमधिष्ठितं त्वया महाजनः स्मेरमुखो भवि-
ष्यति ॥ ३ ॥

॥ १५ अध्याये ॥

अरुन्धती च कल्याणी प्रागल्भ्यं तत्र यातु सा ।
पुरन्ध्री भूधरेन्द्रस्य यथा न विवदेत् तथा ॥
एवंविधेषु कार्य्येषु पुरन्ध्रीणां प्रगल्भता ॥ १ ॥

॥ ६ सर्गे ॥

आर्य्याप्यरुन्धती तत्र व्यापारं कर्तुमर्हति ।
प्रायेणैवंविधे कार्य्ये पुरन्ध्रीणां प्रगल्भता ॥ १ ॥

॥ १५ अध्याये ॥

इति वेदान्तविज्ञानविनिश्चितयतीश्वरे ।
परिग्रहोन्मुखे तेऽपि जहुर्व्रीडां तथाविधाम् ॥ २ ॥

॥ ६ सर्गे ॥

तस्मिन् संयमिनामाद्ये जाते परिणयोन्मुखे ।
जहुः परिग्रहव्रीडां प्राजापत्यास्तपस्विनः ॥ २ ॥

॥ १५ अध्याये ॥

प्रोचुरङ्गिरसं सर्वे कथयेति कथाविदम् ।
अथ तेषां पुरः श्रीमानङ्गिरा मुनिसत्तमः ॥
उवाच मधुरं वाक्यं सर्वभूधरनायकम् ॥ ३ ॥

॥ ६ सर्गे ॥

अथाङ्गिरसमग्रण्यमुदाहरणवस्तुषु ।
ऋषयश्चोदयामासुः प्रत्युवाच स भूधरम् ॥ ३ ॥

॥ २२ अध्याये ॥

खेलगामी स तं देवमुवाह वृषभेश्वरः ।
धुन्वन्मुहुः प्रोतव्वने विषाणे धृतचामरे ॥ १ ॥

॥ ७ सर्गे ॥

खे खेलगामी तमुवाह वाहः सशब्दचामीकरकिङ्किणीकः ।
तटाभिघातादिव लग्नपङ्के धुन्वन्मुहुः प्रोतघने विषाणे ॥ १ ॥

॥ २२ अध्याये ॥

उत्सृष्टनीवीवसनं सव्येनादाय चार्भकम् ।
अन्येन काचित् त्वरया पाणिना प्राप जालकम् ॥ २ ॥

॥ ७ सर्गे ॥

जालान्तरप्रेषितदृष्टिरन्या प्रस्थानभिन्नां न बबन्ध नीवीम् ।
नाभिप्रविष्टाभरणप्रभेण हस्तेन तस्थाववलम्ब्य वासः ॥ २ ॥

॥ २२ अध्याये ॥

अन्या सम्भाव्य नयनमञ्जनेन शलाकया ।
अन्यद्द विस्मृत्य नयनमागवाक्षं जगाम सा ॥ ३ ॥

॥ ७ सर्गे ॥

विलोचनं दक्षिणमञ्जनेन सम्भाव्य तद्वञ्चितवामनेत्रा ।
तथैव वातायनसन्निकर्षं ययौ शलाकामपरा वहन्ती ॥ ३ ॥

॥ २२ अध्याये ॥

अलक्तकेन सम्भाव्य पादमेकमथापरा ।
निर्गत्य तावन्मात्रेण वर्त्म चक्रे तदञ्चितम् ॥ ४ ॥

॥ ७ सर्गे ॥

प्रसाधिकालम्बितमग्रपादमाक्षिप्य काचिद् द्रवरागमेव ।
उत्सृष्टलीलागतिरागवाक्षादलक्तकाङ्कां पदवीं ततान ॥ ४ ॥

॥ २२ अध्याये ॥

पुरे पुरन्ध्यः प्रासादजालानि स्वैर्मुखाम्बुजैः ।
अम्भोजावरणानीव चक्रुरिन्दीवरेक्षणाः ॥ ५ ॥

॥ ७ सर्गे ॥

तासां मुखैरासवगन्धगर्भैर्व्याप्तान्तराः सान्द्रकुतूहलानाम् ॥
विलोलनेत्रभ्रमरैर्गवाक्षाः सहस्रपत्राभरणा इवासन् ॥ ५ ॥

॥ २२ अध्याये ॥

विलोक्य देवदेवेशमासामक्षाणि मानसैः ।
साकं सर्वात्मना चक्षुः प्राप तं सुतरामिव ॥ ६ ॥

॥ ७ सर्गे ॥

तमेकदृश्यं नयनैः पिबन्त्यो नार्य्यो न जग्मुर्विषयान्तराणि ॥
तथाहि शेषेन्द्रियवृत्तिरासां सर्वात्मना चक्षुरिव प्रविष्टा ॥ ७ ॥

॥ २२ अध्याये ॥

बालापि देवदेवेशं बालेन्दुकृतशेखरम् ।
चचारातो महद्गौरी तयोदुश्चरितं चिरम् ॥ ८ ॥

॥ ७ सर्गे ॥

स्थाने तपो दुश्चरमेतदर्थमपर्णयापेलवयापि तप्तम् ॥

---

TO THE EDITOR OF THE PANDIT.

SIR,

As it is the duty of every one, interested in the progress of literature, and consequently in that of your journal, to suggest any improvement worthy of notice, I write the following few lines and submit them to your perusal. In my opinion the plan of your journal is susceptible of improvement. The chief principle of my view is that every prakaraṇa (प्रकरण) should be complete in itself i. e. after the end of each year, the subscribers may be able to unloose the several pamphlets printed during the year and arrange the several prakaraṇas separately so that they may have so many useful books. I shall illustrate my plan by taking the Nos. for September and October 1867. After finishing the "प्रकरणपंचिकोपसंहरणं", on the 71st page, the page (71st) should be left blank. The preface and the essay on "नरेश्वरपरीक्षा" should be commenced on a new page i. e. at the top of the 73rd page (vol. 1[1]) for example, and the pages should be marked 1, 2, 3, &c. Then according to my calculation the 78th becomes sixth; this page should be printed up to bottom and should not be encroached upon by the commencement of another topic, which has been the case. In the next number i. e. that for October 1867, the page 93rd where the "नरेश्वरपरीक्षा" begins should be marked 7th, the next 8th and so on. The same course must be followed for "हरिविलास" commenced on the 78th page i. e. it should be commenced on the 79th page and the pages should be numbered one, two, three and so on. In fact the pamphlet should be issued in such a form that every "प्रकरण" Sanskrit as well as English can be arranged separately without destroying the order of the pages. When a "प्रकरण" is finished a title page should be issued for that प्रकरण. In short I recommend the plan of "सर्वसंग्रह" a pamphlet containing the works of Marathi Poets, successfully conducted by the able and beneficent guidance of Mr. Màdhava Chandrobá who during the past 7 years received the merited praise of the educated public for the efforts exerted in the advancement of Marathi Literature. The plan proposed if adopted will be of much use to the public and will invite more subscribers.

POONA: 25th *May* 1868.

Yours truly

A POONITE.

---

## THE PANDITS AND THEIR MANNER OF TEACHING.

BY DR. BALLANTYNE.

From the Benares Magazine, December, 1850.

At page 447 of the Magazine we broke off, in our account of the Hindú "De Poetica," at the end of the first section of the *Sáhitya Darpana*—the "Mirror of Composition." The second section, as already mentioned, treats of "the various powers of a word." The subject is dry but curious, and, if we cannot be either very instructive or entertaining on it, we shall endeavour to be intelligible and brief.

Before treating of the "powers of a word" our author—like Mrs. Glasse before proceeding to make soup of her hare—thinks it necessary to "catch his word." Now, as regards the point yet attained, we only know [—see page 446–] that "A speech whereof the soul is flavour is Poetry." But what is a *speech?* To this our author, at the commencement of his second section, replies—"Let a Speech [or sentence] be a collection of words possessing Compatibility, Expectancy, and Proximity." These

requirements he illustrates severally. First—the collection of words "He irrigates with fire" is no sentence—for, fire being incompatible with irrigation, the collection of words is nonsensical. Secondly, the collection of words "cow horse man elephant" is no sentence—for, the words do not "look out for" one another, being nowise interdependent. Thirdly—the word "Devadatta," pronounced just now, makes no sentence with the word "goes" pronounced twenty-four hours afterwards—the want of "Proximity" being destructive of the apprehension. Of course this last rule refers more particularly to the south. In the "north countrie" a man might oppose, to the third requirement, the instance of the Laird of Balnamoon, who, on riding across a bridge, turned round and asked his man John—"John—do you like eggs?" "Yes" said John.—They proceeded; and, about a year afterwards, on passing the same spot, the Laird looked back and asked "How?"—"Poached" replied John—nothing at a loss.

But—as far as we have gone—a sentence—with or without "flavour"—is only a sentence—and is Poetry to be confined to a *sentence?* Moved, apparently, by this consideration, our author—who comes oddly close upon Aristotle every here and there—declares that "A collection of sentences is a great sentence"—adding that "Thus is a sentence held to be of two kinds," and citing, as examples of the "great sentence," the *Mahábhárata*, the *Rámáyaṇa*, and the *Raghuvanśa*. In like manner Aristotle says, in his "Poetics" "But a sentence is one in a twofold respect; for it is either that "which signifies one thing, or that which becomes many "from conjunction. Thus the *Iliad* indeed is one by "conjunction."

Well—a sentence being a "collection of words"—a word is next defined as meaning "letters [so combined "as to be] suited for use, not in logical connection, conveying a meaning, and only one." The investigation of this definition, we remit to another time, if not to another place. But a word, (whether the investigation of the definition be kept in abeyance or not,) may have a meaning, or rather three—for, according to our author, "The Meaning is held to be threefold—the Express "*(váchya,)* the Indicated *(lakshya,)* and the Suggested "*(vyangya).*" How this happens he next declares—saying "The express meaning is that conveyed to the "understanding by [the word's] Denotation *(abhidhá)*: "the indicated [meaning] is held [to be conveyed] by "[the word's] indication *(lakshaṇá)*; the suggested [is "held to be conveyed] by [the word's] Suggestion *(vyanjaná).* Let these [viz., Denotation, Indication, and "Suggestion,] be the three *powers (śakti)* of a word." Among these three powers, the primary one, it is remarked, is Denotation—"it being this which conveys the "meaning which belongs to the word by convention *(sanketa).*" How one learns the conventional meaning of words the author illustrates thus. "On the old man's "saying, when giving directions to the middle-aged man, "—'Bring the cow'—the child, having observed him "[the man to whom the order was given by his senior] "employing himself in bringing the cow, determines, "first, that 'The meaning of this sentence was the fetching of a body possessing a dewlap &c." and afterwards, "through the insertion and omission [of the portions of "the sentence which he as yet understands only in the "lump] in such sentences as 'Fasten the cow'—'Bring the "horse'—he ascertains the convention that the word "'cow' shall mean the thing with a dewlap &c., and the "word 'bring' shall mean fetching." When the young philologist has thus acquired a certain stock of words, he is able to make additions to it sometimes by gathering the sense of unknown terms from the context, and sometimes by learning it from the mouth of persons worthy of his confidence.

As it would be impracticable to make a convention in regard to every individual case, a convention is made—according to our author, who on this point follows the grammarians—in respect of "Kinds, Qualities, Things, and Actions." These he defines as follows. "Kind "[or genus—*játi*] is the nature of a cow or the like [which "resides] in the [individual] body [called] cow or the like [—and in virtue whereof such and such *is* a cow or the "like]. Quality *(guṇa)* is a settled habit of a thing "which causes the making of a distinction—for [the "qualities] *white* &c. difference such a thing as a cow "from its congeners—such as a *black* cow. Names of "things *(dravya)* are those that denote a single individual—as Hari, Hara, (and other proper names). Actions *(kriyá)* are habits of a thing [not settled, as qualities are, but] in course of accomplishment—as "'cooking' [—which is the habit of the thing whilst in "progress towards being ready for eating—] for, what is "denoted by such a word as 'cooking' is the collection "of proceedings from first to last, as the putting on [the "pot with the rice to boil] and ultimately taking it off "again."

How the power called "Indication" comes into play is thus explained. "Where the primary meaning of a "word is incompatible (with the other matters in the "sentence) the power of Indication *(lakshaṇá)* is communicated (to the word) whereby another meaning (than "the express one—yet) in connection therewith, is thought "of—either through notoriety (of the employment of the "term in some particular secondary sense), or through a "Motive (—discernible—for using the word rather than

"some other word which would have conveyed the mean- "ing expressly."

This he further illustrates as follows. "The power by "which, in such (an expression) as 'The impetuous "Kalinga,' a word, such as 'Kalinga,' incompatible (with "'impetuosity'—if taken) in its own sense—as that of a "particular country (on the Coromandel coast), causes "one to think of (not the country, for instance, that the "word denotes, but) the men, for instance, connected "therewith; and (—to give a second example—the "power) by which, in such (an expression) as 'A herd-"station on the Ganges,' a word, such as 'the Ganges,' "incompatible with the matter in question (—here, viz., "the actual locus of the station of herdsmen—) inas-"much as the thing that it denotes is in the shape, for "instance, of a mass of water (on the surface of which "the herdsmen could not have built the huts of which "the herd-station consists—) causes one to think of "something connected with itself by the relation of prox-"imity or the like—such as the river's *bank—this* "power of a word—*communicated* to it—other than "the power which (—to use the language of some) be-"longs to it naturally, or (to use the language of others) "which is not that given to it by God—(this second "power it is that) is called *Indication.*"

The distinction between the two examples just given requires attention. "In the former, "the reason (why "the word denoting the region of Kalinga has the pow-"er of indicating the inhabitants of that region) is "'Notoriety'—the fact, simply, of its being familiarly "known (that the name of the region is employed to "signify its inhabitants—as Shakespere uses the name "of 'France' to signify the king of France.) In the "latter of the examples the 'Motive' (for using the "word 'Ganges' when we really mean 'bank of the "Ganges') consists in this that it causes one to think of "the extreme of coolness and purity (pertaining to the "Ganges itself) which would not have been apprehend-"ed from the exposition of (the same matter in the shape "of the expression) 'A herd-station on *the Bank of the "Ganges.*"

Our author now plunges into some profound and whimsical discussion on a point in regard to which he differs with the author of the *Kávya Prakáśa*, and on which he seems to have the best of the argument. The other (like a Hindú Horne Tooke) holds that words denote just what their etymology gives, and hence the word *kuśala* ("expert") means strictly "a getter of sacrificial grass"—the etymology being *kuśam láti* "he gets sacrificial grass." The word comes to *indicate* an "expert" man "through the relation of a homogeneousness of character in respect of the being a person of discrimination"—which the gatherer of sacrificial grass must be—else how could he tell one kind of grass from another? To this our author retorts, that "The "primary meaning of the word is simply that of 'ex-"pert'—notwithstanding that the sense of 'gatherer of "sacrificial grass' might be obtained from the etymolo-"gy:—for, the reason for the (technically recognized) "etymology of words is one thing (—viz. the conve-"nience of the grammarians, who are bound to furnish "an etymology for every word that is not a radical—) "and the reason for the employment (of a word) is an-"other (—viz., the fact of the word's having, by conven-"tion, such a denotation as the speaker happens to have "occasion for)." By way of a reductio ad absurdum he brings forward the word *go* "a cow"—which, according to *Páṇini*, is derived from the verb *gam*, "to move"—and he proposes for consideration the applicability of the term, on the opposite hypothesis, to the animal when fast asleep. The whole discussion, we incline to think, must constitute one of those parts of the book on which the young Bráhman student luxuriates.

Our author next proceeds to divide the power of Indication into four-score different species. Even the pandits are disposed to rebel against this, and to prefer for once the comparative simplicity of the *Kávya Prakáśa* which contents itself with eight. We shall not inflict the eighty upon the reader, but shall select the more noticeable. First, then,—the indicatory word either abandons its own meaning, with a view to indicating something else—when the case is one simply of "Indication indicative" *(lakshaṇa-lakshaṇá)*; or it carries its own sense along with it, and then the case is one of "Indication inclusive" *(upádána-lakshaṇá.)* Of the former the expression "A herd-station on the Ganges" is an example —for there the word "Ganges," as already shown, stands for the bank alone and not for the body of water. Of the latter an example is "The lances enter." Here the "lances" of course mean men bearing lances—but when the men, indicated by the word, enter, then the lances, denoted by the word, enter also. "These (kinds of Indication), further," says our author, "are severally twofold, "through 'Superimposition *(áropa)* and 'Introsuscep-"tion,' *(adhyavasána)*." The explanation of these terms "is rather curious. "Let that (Indication) be 'Super-"imponent' which makes one think of the identity with "something else of an object *not swallowed* (by that "with which it is identified, but expressed along with it.) "That (Indication) is held to be 'Introsusceptive' (which "makes one think of the identity with something else) "of an object *swallowed* (—not expressed—but recog-"nised as it were within that with which it is identified)." For example—"The horse—the white—gallops":—

here the horse" and "the white" mean just one and the same thing, and both terms are exhibited; but the same sense would be equally well understood (by a jockey, for example, to whom the horse was notoriously "the white" —or "the dun"—or "the chestnut"—) if the sentence were briefly "The white gallops." Here the "white" has swallowed the "horse," and the case is one of "Indication inclusive introsusceptive founded on Notoriety" *(rúḍhávupádána-lakshaṇá sádhyavasáná.)* This classification of phraseology may serve to illustrate a passage in the "Poetics" of Aristotle, which Mr. Theodore Buckley (of Christ Church) concurs with Dr. Ritter in condemning as spurious. The passage occurs in the 21st chapter, where, in speaking of metaphors, Aristotle, as rendered by Mr. Buckley, says "And sometimes the proper term is added to the relative terms." We incline to regard the passage as genuine. Let us see. Aristotle goes on to remark "I say, for instance, a cup has a similar relation to Bacchus that a shield has to Mars. "Hence, a shield may be called the cup of Mars, and a "cup the shield of Bacchus." Now, it seems to us that if the following proportion—viz.

Cup : Bacchus : : shield : Mars,

were not present to the mind of the hearer, then (to use Mr. Buckley's words—on a kindred passage in the 11th chap. 3d Book of the Rhetoric—) "with a view to guard the metaphor from any incidental harshness or obscurity" the proper term may be advantageously added—making what our author calls a case of the "Superimponent" *(saropá.)* Thus, had Aristotle followed up his remark by a special example, we should have read "The cup—the shield of Bacchus"—"The shield—the cup of Mars." According to the Hindú phraseology, when we say "The cup of Mars", then, (through Indication introsusceptive) the cup has *swallowed* the shield—which latter, nevertheless, is discerned within the other by the eye of the intelligent. In the same way—wishing to avoid obscurity—one says, at full length, "That *cow*,—the man of the Panjáb," and then one can say (to take another example of our author's) "That *cow* talks." Here "cow" has swallowed "Panjábí." On the question as to the precise relation between the cow and the Panjábí, under the circumstances, there is an infinite quantity of subtlety expended—to the discomfiture of course of all that differ from our author —who is a perfect Baconian Aristotle in respect of "bearing no brother near the throne."

When certain kinds of Indication specified have come to be sixteen, there is a duplication of these in respect of the consideration that the thing "suggested" may belong to the thing "indicated" or not. Of the case where the thing suggested does *not* belong to the thing indicated, the standing example "A herd-station on the Ganges" serves as an illustration—for here the "purity &c." are properties *not* of the bank but only of the river. Of the other case the following example is given —from the *Víra Charitra* of Bhavabhúti— viz.—

> Here are the clouds, in which the cranes disport,
> And by whose smooth dark loveliness the sky
> Is overspread. Here are the dewy winds,
> And the melodious joy-screams of the peacocks—
> Friends of the clouds. Be all these as they list.
> I—very firmly stout of heart—am *Ráma*—
> *I* endure all [—hard though it be to bear
> Those vernal sights and sounds with patience which
> Enhance the joy of lovers when united.]
> But how will *she* be now—Videha's daughter?
> Alas, my goddess—O do *thou* be patient.

Here—says our author—the property indicated (viz. patience) belongs to the thing indicated (viz., *the peculiar* Ráma italicised in the fifth line) which was not the case in respect of the *bank* of the Ganges. But we must get on—leaving, till some other occasion, the further elucidation of this point as regards those who may feel interested about it; and we proceed to the *third* power of a word—viz., "Suggestion," which is declared as follows:—

"When Denotation &c., surcease (—after having done "their duty,) that function, of a word or its sense &c., by "which something further is caused to be thought of, is "what we call *Suggestion*."

As the power of "Suggestion" may originate in the powers of "Denotation" and "Indication," and either in the word or in the sense of the word, or in the drift of the whole discourse &c., there are abundant subdivisions of this power also. At one point in the discussion (—reminding us of Dr. Johnson, who met the exclamation of surprise on his once defending Garrick whom he himself had so often abused, with the intimation—"Garrick is my dog, Sir;—I allow no one else to kick him." —) our author turns round upon some assailants of the author of the *Kávya Prakása*—and, after bringing him off in triumph (for his own use,) he exclaims—"But "enough of this (idly censorious) glancing (on the part "of these objectors—) at the venerable man (—to whom "—though constrained to find fault with him occasion-"ally myself—I am indebted for so much of the mate-"rials of my work, that I may call him) the bestower of "my livelihood."

"Suggestion" is held to originate in the "Denotation" in such cases as that exemplified by our author in a set of verses by "the lotus-feet of his father" so crammed with dreary double-entendre that we hasten past it. When founded on "Indication"—it may be exemplified by the universally familiar "herd-station on the Ganges"—which some of our pandit friends cannot hear mentioned without grinning "like Cheshire cats"—the grinning of which cats (—according to Charles Lamb—though he professes himself unable to explain

*why*—, is said to be occasioned by the recollection that Cheshire was once a County Palatine, and the cats can't help laughing whenever they think of it. Verily the pandits who have heard all that they are likely, in a reasonable life-time, to have heard on the topic, ought not to be grudged their laugh—if they have heart for it.

But, apart from the Denotative or the Indicative powers of *words*, Suggestion may be based upon the *sense*—and this may have a reference to some "speci- "ality of the Speaker, or the Addressed, or the Sen- "tence, or the Proximity of some one else, or the "Drift, or the Occasion, or the Place, or the Time, or the "Emphasis, or Gesture &c." Of the case where Time, Place, the character of the Speaker, &c. combine to suggest somewhat more than is plainly expressed—we have the example following :—

> Tis loves's own season—jocund Spring.
> The God of the flowery bow,
> Now scatters his shafts, and the breezes bring
> Fresh vigour as they blow.
> Round the arbours the shading creepers curl,
> And my husband is far away—
> *Do* think of something—can't you, girl ?
> What *are* we to do to-day ?

"Here"—says the commentator—"some one in virtue "of the known character of the Speaker suggests to her "confidante—'Let my un-avowed lover be speedily sum- "moned."

Where the speciality is in respect of the person adressed, we may have such an example as the following—viz.

> From your bosom the sandal-wood unguent is rubbed.
> And your lip has lost its red ;
> The collyrium is washed from your eyes, and a glow
> O'er your face and form has spread.
> You *lying* girl—you've been to bathe—
> No concern about *me* could prevent you—
> And you haven't gone with my message at all
> To the *wretch* to whom I sent you.

"Here"—says the commentator—"by 'Indication of "the contrary' *(viparíta-lakshaṇá)*—'You *did* go to "him' is indicated, and 'To play with him' (instead of "delivering your message) is suggested"—and all this in virtue of the person addressed being a "lying girl."

Where the speciality is in respect of the proximity of some one else—to the speaker—we may have such an example as the following—viz.

> That crane, on the floating lotus-leaf,
> Stirs not :—you could not tell
> But, on a slab of emerald,
> It were a white conch-shell.

"Here"—says the commentator—"from the immobi- "lity of the crane its security (is inferred), and from that "the fact that the place is devoid of people (— who, had "they been there, would have frightened the crane)" whence—as the lines suggest to one Proximate to the speaker—what a pleasant place for a tête à tête.

With reference to "Emphasis" we have the following example—which might go to the Scotch tune of "He's low doon, he's in the broom, that's waiting for me."

> His faither sends him—gang he maun—
> And far awa' frae me ;
> But, when Spring comes back again,
> Will he come back ?—*not he.*

"Here"—according to to the commentator—she *says* "'He wont come back'—but by the (slily appropriate) "Emphasis it is suggested that 'He assuredly *will* come back.'"

Where the speciality consists in the gesture, we may have such an example as the following—viz.

> His look entreated her to speak the hour
> Of assignation ;—which when she did spy,
> The dame, quickwitted, closed the lotus-flower
> Full fraught with meaning from her laughing eye.

"Here"—says the commentator—"by the gesture of "closing the lotus, &c., it is suggested by some woman, "that the twilight (—when the lotus-flowers close them- "selves—) is the time of assignation."

Here we come to the end of Chapter Second—and if all the examples of the cases considered in it turn upon the "tender passion," we verily believe that the reason is this, that that passion happens to stand at the top of the list of sentiments recognised by the Hindús, and the author would have met (—what he did not care to encounter—) a storm of obloquy had he taken his examples, immethodically, from any of the other topics without exhausting the first.

K.

---

A TRILINGUAL DICTIONARY ; being a comprehensive Lexicon in English, Urdú and Hindí, exhibiting the syllabication, pronounciation, and etymology of English words, with their explanation in English, and in Urdú and Hindí in the Roman character, by Mathurá Prasáda Miśra, Head Master Queen's College, Benares.

"After a thorough examination of Mathurá Prasád's Dictionary, I consider it to be a remarkable advance on any work of the same kind that has preceded it. Covering as it does, and very adequately, the ground of two leading Indian languages, it may be regarded as one of the most valuable linguistic helps to the Indian official that has appeared for many years ; and it is, of course, equally valuable to the Indian Student of English." *Dr. Hall.*

May be procured direct from us, by Book post ; from any bookseller in Calcutta, Madras, or Bombay ; or from Messrs. Trübner & Co., London.—*Price Rs.* 16.

*Communications of a literary nature should be addressed to the* Editor : *all letters on business, to the Proprietors,* Messrs. E. J. Lazarus & Co., *to whom Drafts should be made payable.* Advertisements *will be inserted at four annas per line.*

The PANDIT may be ordered of the Publishers, or through Messrs. Trübner and Co., London.

*Annual subscription, in advance, including postage, Rs.* 12.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

# काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

# THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 26. Benares July 1st, 1868. Vol. III.


## ॥ ईश्वरप्रत्यभिज्ञासूत्रविमर्शिन्याः ॥

॥ पञ्चमाह्निकस्य पूर्वाङ्कप्रक्रान्तस्यावशिष्टभागः ॥

एवमाशङ्क्यमानत्वेन परसम्भावना दृढा दर्शिता । अधुना त्वेनां संभावनां शिथिलयितुं तावदाह ।

(५) स्यादेतदवभासेषु तेष्वेवावसिते सति ।
व्यवहारे किमन्येन बाह्येनानुपपत्तिना ॥

स्यादेतदिति पूर्वोक्तसम्भावनाभ्युपगमे यदा व्याख्यायते तदा किं त्विति वाक्यशेषेण तच्छैथिल्यविषयं सम्भावनान्तरं शेषश्लोकेन दर्श्यते इति व्याख्येयम् । यदि त्वध्याहारो न सह्यते तदा स्यादेतदिति इदमपि सम्भावनान्तरं स्यात् यदनेन श्लोकेनोच्यत इत्येकवाक्यतया योज्यम् । अनया ऽपि कष्टकल्पनया बाह्यानर्थान्प्रसाधयता भवता तैर्न किं चित्कर्तव्यम् । आभासैरेव तैर्भवता ऽभ्युपगतैर्व्यवहारसिद्धेः । नहि नित्यानुमेयेन कश्चिद्व्यवहार इति किं बाह्येन । यत्र साधकं च नास्ति प्रमाणं बाधकं च प्रकाशाद्भेदे ऽनुमेयतयापि प्रकाशनाभाव इति तावन्मुख्यम् । अभ्युच्चयबाधकास्तु अवयविनो वृत्त्यनुपपत्तिः, समवायासिद्धिः, कम्पाकम्पावरणानावरणरक्तारक्तदिग्भागभेदादिविरुद्धधर्मयोगः, । अणुसंचयबाह्यवादे ऽपि संचयस्यान्यस्याभावे ऽणव एव । ते च यदि संयुज्यन्ते निरन्तरतया तदवश्यं दिग्भागभेदः । देवनाच्च षट्सु दिक्षु संचीयमानेषु षट्स्वणुषु मध्यमस्य परमाणोर्यत्रैव धाम्न्येको लग्नस्तत्रैव यद्यपरस्तदेकपरमाणुमात्रता । अथान्यत्रैको ऽन्यत्रापरस्तदवश्यं भागभेदापत्तिरिति भाग एव परमार्थसंस्तस्याप्येवैव सरणिरिति न किं चिदवशिष्यते बाह्यं तत्त्वतः । "न चैतद्वाच्यं मूर्तानामेकदेशत्वायोगात्संयोगे भिन्नदेशत्वाव्यावृत्तेस्तन्निष्ठं द्व्यणुकं नाम कार्यद्रव्यमणुपरिमाणं तेभ्यस्त्रिभ्यो महत्कार्यमिति,, अवयविवादो ह्ययं, स च पूर्वमेवापबाधितः, । "यच्चाव्याप्यवृत्तित्वं संयोगस्योच्यते,, तन्निरंशे कथं संगच्छताम्, स्वाश्रये हि यद्यसौ समवैति किमन्यदस्यावशिष्टं यन्न व्याप्नुयादिति । अभ्युच्चयबाधकं चेदमिति नात्रास्माभिर्भरः कृतः। विस्तरेण च प्रज्ञालंकारे दर्शितमेतदाचार्यशंकरनन्दनेन ॥

ननु बाधकं नाम प्रमाणसिद्धे वस्तुनि न किं चित्कर्तुं समर्थं तेनैव दृढेन प्रमाणेन बाधकाभिमतस्य बाधितस्याप्रमाणत्वसंपादनात् दर्शितं चेह साधकं प्रमाणं "कार्यहेतुस्तत्तदाकस्मिकाभास,, इति कारिकयेत्याशङ्क्याह ।

(६) चिदात्मैव हि देवो ऽन्तःस्थितमिच्छावशाद्बहिः ।
योगीव निरुपादानमर्थजातं प्रकाशयेत् ॥

इह तावत्स्वप्नस्मरणमनोराज्यसंकल्पादिषु नीलाद्याभासवैचित्र्यं बाह्यसमर्पकहेतुव्यतिरेकेणैव निर्भासत इति यद्यप्यस्ति सम्भवः, तथापि तदाभासवैचित्र्यमस्थैर्यात्सर्वप्रमातृसाधारण्यात्पूर्वानुभवसंस्कारजत्वसम्भावनादवस्त्विति शङ्क्येत । यत्पुनरिदं योगिनामिच्छामात्रेण पुरसेनादिवैचित्र्यनिर्माणं दृष्टं, तत्रोपादानं प्रसिद्धमृत्काष्ठशुक्रशोणितादिवैचित्र्यमयं न सम्भवत्येव, "नह्येवं वक्तुं शक्यं सर्वगताः परमाणवो योगीच्छया झटिति संघटिताः कार्यमारप्स्यन्त इति,, यत एतल्लोकप्रसिद्धकारणभावानतिक्रमसिद्धये निरूप्यते, न चैतत्प्रसिद्धं परमाणुभ्य एव स्थूलं घटादि जायत इति, किं तु कपालादिव्यवधानेन, तत्रापि नियतसहकारिसमवलम्बनं करचरणादिव्यापारो विशिष्टदेशकालधर्माधिपत्ययोगः शिक्षाभ्यासप्रकर्ष

नाधिकरणमात्मनो दर्शितं * गुरुणा ऽनन्तेन, द्रव्यं हि तदुच्यते यद्विश्रान्तः पदार्थवर्गः सर्वो भाति चार्प्यते चार्थक्रियायै, तद्यदि न कुप्यते तत्सकलोयं तत्त्वभूतभावभुवनसंसारः संविदि विश्रान्तस्तथा भवतीति स एव गुणकर्मादिधर्माश्रयभूतपदार्थान्तरस्वभावस्तामेव मुख्यद्रव्यरूपामाश्रयत इति सैव द्रव्यम्। तदनन्तधर्मराशिविश्रमभित्तिभूतायास्तस्याः स एव धर्मश्चैतन्यमिति कर्तृकृदन्तादुत्पन्नेन भावप्रत्ययेन सम्बन्धाभिधायिनापि प्राधान्येन दर्शितः। तथाहि सम्बन्धस्य सम्बन्धिविश्रान्तस्य प्रतीतिः द्रव्यरूपस्य च सम्बन्धिनः प्रकृत्योक्तत्वाच्चितिक्रियारूपं धर्मसम्बन्धिनमवगमयता ष्यञा निष्कृष्ट एवांशः प्रत्यायितो भवति, चिति क्रिया च चितौ कर्तृता स्वातन्त्र्यं संयोजनवियोजनानुसंधानादिरूपमात्ममात्ररूपतायामेव जडवदविश्रान्तत्वमपरिच्छिन्नप्रकाशसारत्वमनन्यमुखप्रेक्षित्वमिति, तदेवानात्मरूपाज्जडात्संयोजनवियोजनादिस्वातन्त्र्यविकलाद्वैलक्षण्यदायीति तदेव परत्वेन प्रधानतया ऽभिसंधायात्मा चेतन इति वक्तव्य धर्मान्तराधरीकरणाय विमर्शधर्मोद्धुरीकरणाय चात्मा चैतन्यमित्युक्तम्। चित्क्रियाचितिकर्तृतातात्पर्येणेति समासः अर्धयुक्पादविश्रान्तिरिति हि काव्येयं समयो न शास्त्रे, यदि वा चित्क्रियात्मोदितः चितिकर्तृता चेति पृथगेव, एवं तु न क्वचित्पठितम्॥

ननु यथा प्रकाशो ऽप्रकाशश्चेत्युभयमपि स्वात्मनि ततश्च प्रकाश इत्युक्ते जडान्न वैलक्षण्यमुदितं स्यात् तद्वद्विमर्शोप्यविमर्शोपि च स्वात्मनीति तेनापि कथं वैलक्षण्यं जडाजडयोरित्याशङ्क्याह।

(११) चितिः प्रत्यवमर्शात्मा परा वाक्स्वरसोदिता।
स्वातन्त्र्यमेतन्मुख्यं तदैश्वर्यं परमात्मनः॥

चेतयतीत्यत्र या चितिश्चितिक्रिया तस्याः प्रत्यवमर्शः स्वात्मचमत्कारलक्षण आत्मा स्वभावः। तथाहि, घटेन स्वात्मनि न चमत्क्रियते स्वात्मा न परामृश्यते, न स्वात्मनि तेन प्रकाश्यते, नापरिच्छिन्नतया भास्यते, ततो न तेन चेत्यत इत्युच्यते। चैत्रेण तु स्वात्मन्यहमिति संरम्भोद्योगोल्लासविभूतियोगाच्चमत्क्रियते, स्वात्मा परामृश्यते, स्वात्मन्येव प्रकाश्यते, इदमिति यः परिच्छेद एतावद्रूपतया तद्विलक्षणीभावेन नीलपीतसुखदुःखतच्छून्यताद्यसंख्यावभासयोगेनावभास्यते, ततश्चैत्रेण चेत्यत इत्युच्यते। एवं च विमर्शः स्वात्मन्यविमर्शोपि स्वात्मनीत्यसिद्धमेतत्। विमर्शो हि सर्वसहः परमप्यात्मीकरोति आत्मानं च परीकरोति, उभयमेकीकुरुते, एकीकृतं द्वयमपि न्यग्भावयतीत्येवंस्वभावः, प्रत्यवमर्शश्चान्तरभिलापात्मकशब्दनस्वभावः, तच्च शब्दनं संकेतनिरपेक्षमेवाविच्छिन्न * चमत्कारात्मकमन्तर्मुखशिरोनिर्देशप्रख्यमकारादिमायीयसांकेतिकशब्दजीवितभूतं नीलमिदं चैत्रोहमित्यादिप्रत्यवमर्शान्तरभित्तिभूतत्वात्पूर्णत्वात् † परा, वक्ति विश्वमभिलपति प्रत्यवमर्शेनेति च वाक्, अत एव सा स्वरसेन चिद्रूपतया स्वात्मविश्रान्तिवपुषोदिता सततमनस्तमिता नित्या, अहमित्येव, एतदेव च परमात्मनो मुख्यं स्वातन्त्र्यमैश्वर्यमीशितृत्वमनन्यापेक्षित्वमुच्यते परापरं त्विदंभावरूपस्य प्रत्यवमर्शस्याख्यातिप्राणस्योद्बोधमात्रेपि अहंभाव एव विश्रान्तेः श्रीसदाशिवादिभूमौ पश्यन्तीदशायाम् अपरं त्विदंभावस्यैव निरूढौ मायागर्भाधिकृतानामेव विष्णुविरिञ्चेन्द्रादीनां तत्त्वेषां परमेश्वरप्रसादजमेवेति अन्यनिरपेक्षतैव परमार्थत आनन्द ऐश्वर्यं स्वातन्त्र्यं चैतन्यं च। तस्माद्युक्तमुक्तं तेन "जडात्स हि विलक्षण„ इति॥

प्रधानागमेष्वप्येतत्प्रदर्शितमेवेति निरूपयति।

(१२) सा स्फुरत्ता महासत्ता देशकालाविशेषिणी।
सैषा सारतया प्रोक्ता हृदयं परमेष्ठिनः॥

इह घटः कस्मादस्ति खपुष्पं च कस्मान्नास्तीत्युक्ते वक्तारो भवन्ति, घटो हि स्फुरति मम न त्वितरदिति, तदेतद्घटत्वमेव यदि स्फुरत्त्वं ‡ स्फुरणसम्बन्धस्तत्सर्वस्य स्फुरेन्न कस्यचिद्वा, तस्मान्मम स्फुरतीति कोर्थः मदीयं स्फुरणं स्पन्दनमाविष्ट इति, स्पन्दनं च किंचिच्चलनम्, एषैव च किंचिद्रूपता, यदचलमपि चलमाभासत इति, प्रकाशस्वरूपं हि § मनागपि नातिरिच्यते अतिरिच्यत इवेत्यचलमेवाभासभेदयुक्तमिव च भातीति। तत उक्तम्।

आत्मैव सर्वभावेषु स्फुरन्निर्वृत्तचिद्विभुः।
अनिरुद्धेच्छाप्रसरः प्रसरद्दृक्क्रियः शिवः॥

इति।

अतिक्रुद्धः प्रहृष्टो वा किं करोमीति वा मृशन्।
धावन्वा यत्पदं गच्छेत्तत्र स्पन्दः प्रतिष्ठितः॥

इति।

स्पन्दतत्त्वविविक्तये

इति।

गुणादिस्पन्दनिःष्यन्दः

---

* योगसूत्रकारेण भगवत्पतञ्जलिना। बादरायणेन तद्भाष्यकारेण च।

* चमुअदने। चमतो भुञ्जानस्य करणं व्यापार आत्मीयताप्रत्यवमर्शलक्षणः संरंभो ऽस्य नीलादेरहं भोक्तेति चमत्कारः।

† पृ पालनपूरणयोः।

‡ कृत्तद्धितसमासेभ्यः संबन्धाभिधानं भावप्रत्ययेनेत्यनुशासनात्।

§ ईषत्।

इति च । लोकेऽपि विविधवैचित्र्ययोगेऽपि स्वरूपादचलज्जनो गम्भीरः स्पन्दवानित्युच्यते । सत्ता च भवनकर्तृता, सर्वक्रियासु स्वातन्त्र्यं, सा च खपुष्पादिकमपि व्याप्नोतीति महती, देशकालौ नीलादिवत्सैव सृजतीति ताभ्यां विशेषणीया न भवति । यत्किल येन तुल्यकक्ष्यतया भाति तत्तस्य विशेषणं * कटकइव चैत्रस्य, न च देशकालौ विमर्शेन तुल्यकक्ष्यौ भातः, तयोरिदंतया तस्य चाहंतया प्रकाशे तुल्यकक्ष्यत्वानुपपत्तेः । एवं देशकालास्पर्शाद्विभुत्वं नित्यत्वं च, सकलदेशकालस्पर्शोऽपि तन्निर्माणयोगादिति ततोऽपि व्यापकत्वनित्यत्वे । तदुक्तम् ।

महासत्ता महादेवी विश्वजीवनमुच्यते ।

इति । सारमिति यदतुच्छं रूपं तदियमेव विमर्शशक्तिः । ग्राह्यग्राहकानां हि यत्प्रकाशात्मकं रूपं तस्याप्यप्रकाशवैलक्षण्यापेक्षिका इयमेवेति श्रीसारशास्त्रेऽपि निरूपितम् ।

यत्सारमस्य जगतः सा शक्तिर्मालिनी परा ।

इति । सैषेति शक्तिप्रत्यभिज्ञानं दर्शितम् । हृदयं च नाम प्रतिष्ठास्थानमुच्यते,तच्चोक्तनीत्या जडानां चेतनं, तस्यापि प्रकाशात्मत्वं, तस्यापि विमर्शशक्ति,रिति विश्वस्य परमे पदे तिष्ठतोऽविश्रान्तस्येदमेव हृदयं विमर्शरूपं परमन्त्रात्मकं तत्र तत्राभिधीयते, सर्वस्य हि मन्त्र एव हृदयं, मन्त्रश्च विमर्शनात्मा, विमर्शनं च परवाक्छक्तिमयम् । तत एवोक्तम् ।

न तैर्विना भवेच्छब्दो नार्थो नापि चितेर्गतिः ।

इति ।

तत्र तावत्समापन्ना मातृभावम्

इत्यादि चेत्यागमेषु । तथा तत्र भवद्भर्तृहरिणापि ।

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन गम्यते ॥
वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती ।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी ॥

इति ।

सैषा संसारिणां संज्ञा बहिरन्तश्च वर्तते ।
यदुत्क्रान्तौ विसंज्ञोऽयं दृश्यते काष्ठकुड्यवत् ॥

इत्यादि च । तदेते न विदुरित्येतन्निर्वाहितम् । बौद्धैरप्यध्यवसायापेक्षं प्रकाशस्य प्रामाण्यं वदद्भिरुपगतप्राय एवायमर्थोऽभिलापात्मकत्वादध्यवसायस्येति ॥

नन्वसंख्यशक्तिश्रेणीशोभितवपुषि परमशिवे विमर्शशक्तिरेवेयमित्यंकारमभिषिच्यते कस्मादित्याशङ्क्याह ।

(१३) आत्मानमत एवायं ज्ञेयीकुर्यात्पृथक्स्थितिः ।
ज्ञेयं न तु तदौन्मुख्यात्खण्ड्येतास्य स्वतन्त्रता ॥

* कटकवांश्चैत्रइत्यत्र ।

स्वातन्त्र्यामुक्तमात्मानं स्वातन्त्र्यादद्वयात्मनः ।
प्रभुरीशादिसंकल्पैर्निर्माय व्यवहारयेत् ॥

सर्वाः शक्तीः कर्तृत्वशक्तिरैश्वर्यात्मा समाक्षिपति, सा च विमर्शरूपेति युक्तमस्या एव प्राधान्यमिति तात्पर्येणोत्तरमुक्तम् । शब्दार्थस्तु अयं प्रकाशात्मा परमेश्वरः स्वात्मानं ज्ञातृरूपत्वादज्ञेयमपि ज्ञेयीकरोतीति यत्सम्भाव्यते कारणान्तरस्यानुपपत्तेर्दर्शितत्वाद्दृढेन संभावनानुमानेन तदत एव विमर्शशक्तिलक्षणात्कर्तृत्वाद्धेतोर्भवति, यतो ह्ययमात्मानं परामृशति ततो विश्वनिर्भरत्वात्तथा नीलादित्वेन चकास्ति । "नन्वेवैव कुतः संभावना आत्मानं ज्ञेयीकरोतीत्याह,,पृथक् प्रकाशाद्बहिर्भूता स्थितिर्यस्य तादृग्ज्ञेयं नैव भवति । तुरवधारणे, तत्र चोक्ता युक्तयः अभ्युच्चययुक्तिमप्याह । यदि व्यतिरिक्तं ज्ञेयं स्यात्, तज्ज्ञातृरूपस्यात्मनो यदेतज्ज्ञेयविषयमौन्मुख्यं स्वसंवेदनसिद्धं दृश्यते तत्रास्य स्यात्, तेन व्यतिरिक्तविषयौन्मुख्येनान्याधीनत्वं नाम पारतन्त्र्यमस्यानीयते, पारतन्त्र्यं च स्वातन्त्र्यस्य विरुद्धं, स्वातन्त्र्यमेव चानन्यमुखप्रेक्षित्वलक्षणमात्मनः स्वरूपमिति व्यतिरिक्तोन्मुख आत्मा ऽनात्मैव स्यात्, अनात्मा च जडो ज्ञेयं प्रति नोन्मुखीभवति इति प्रसङ्गः, ततः प्रसङ्गविपर्ययादिदमायातम्, अव्यतिरिक्तोन्मुखः स्वतन्त्रः सन्नात्मानमेव ज्ञेयीकरोति, न च केवलं नीलादिरूपमेव ज्ञेयं यावदत्यक्तकर्तृभावं स्वातन्त्र्येणापरित्यक्तमेव सन्तमात्मानं निर्माय व्यवहारेण ध्यानोपासनार्चनोपदेशादिना योजयतीति यत्सम्भाव्यते तदप्यत एवेति सम्बन्धः । "ननु स्वातन्त्र्ययुक्तं च निर्मीयते चेति विरुद्धमिदं,, तत्राहाद्वयात्मनः संविदेकरूपस्य स्वातन्त्र्याद्धेतोरिदं न युज्यते, यत्किल मायापदे ऽतिदुर्घटं प्रतिभाति तत्संपादने यदप्रतिहतं स्वातन्त्र्यं, तदेव पुनः स्वातन्त्र्यशब्देन दर्शितम्, अत एवेत्यनेन तु विमर्शशक्तिरूपमित्यपुनरुक्तम् । अथ वा ऽत एव स्वातन्त्र्यादिति सामानाधिकरण्येन श्लोकद्वयेन सम्बन्धनीयम् । उदाहरणमत्रार्थे दर्शयति, नीलादिनिर्माणवदस्य स्वतन्त्ररूपनिर्माणस्याप्रसिद्धत्वात्, ईश्वरो भगवानात्मा नित्यो विभुः स्वतन्त्र इत्येवमादौ हि प्रमातुः पूजयितुर्ध्यातुर्वा पृथग्भूतं तत्प्रमेयं ध्येयं पूज्यं च भातीति तत्तावन्निर्मितम् न चानीश्वररूपम् । एवं हीश्वर इत्यनीश्वर इति संकल्पध्यानादेस्तुल्यत्वं स्यात् न चैवं, फलभेदस्योपलब्धेरिति । तस्मात्स्वातन्त्र्यशून्यताभासनेन स्वातन्त्र्ययुक्तताभासनेन च यदिदमुभयं ज्ञेयमात्मरूपमेव परमेश्वरो भासयति तद्विमर्शशक्तिबलादेवेति सैव प्रधानमिति ॥

"ननु प्रकाशबलाद्भावव्यवस्था, स च प्रकाशो विमर्शसार इति । तद्विमर्शाभेदे तदेव तदिति वक्तुं युक्तम्, ईश्वर आत्मेत्या-

## ॥ अथ बालरामायणाख्यनाटकस्य ॥

॥ द्वितीयोऽङ्कः ॥

अतः परं परशुरामरावणीयो भविष्यति ।

ततः प्रविशति भृङ्गिरिटिः ।

भृङ्गिरिटिः । सपरिक्रममात्मानं निर्वर्ण्य । अये विकृतरूपतापि क्वचिन्महते ऽभ्युदयाय यतः ।

स्नायुप्रायनिबद्धकीकसतनुं नृत्यन्तमालोक्य मां
चामुण्डाकरतालकुट्टितलयं वृत्तेविवाहोत्सवे ।
ह्रीमुद्रामपनुद्य यद्विहसितं देव्या समं शम्भुना
तेनाद्यापि मयि प्रभुः स जगतामास्ते प्रसादोन्मुखः* ॥ १ ॥

पुनर्निरूप्य सोपहासम् । अहो त्रिभुवनाधिपतेरनुचरस्य महार्हवेषता ।

कौपीनाच्छादनं वल्कमक्षसूत्रं† जटासटाः ।
रुद्राङ्कुशस्त्रिपुंड्रं च वेषो भृङ्गिरिटेरयम् ॥ २ ॥

विचिन्त्य भृङ्गिरिटिस्वामिनो वा कीदृशो वेषविशेषः ।

दिगम्बरो वहति भुजङ्गभूषणं
कपालवान् कलयति दाम कौणपम् ।
वृषप्रियो रचयति भस्मगुण्ठना-
मुमापतेश्चरितमचिन्त्यकारणम् ॥ ३ ॥

यद्वा यस्य लैङ्गोद्भवं भैरवीयं तौम्बुरवमौमापतमार्द्धनारीश्वरमैन्दुशेखरमन्तकान्तकरं कालकूटीयं जम्भारिभुजस्तम्भनं दक्षमखोन्माथि मान्मथं त्रैपुरमन्धकासुरीयमित्यपरमप्यपरिमेयं चित्रं चरित्रजातमाचक्षते । तस्य भगवतश्चेष्टापरीक्षायां को नाम परमेष्ठिवैकुण्ठावपि । किं पुनर्भृङ्गिरिटिः । तथाहि ।

नग्नस्तिष्ठति तं नमन्ति विबुधाः संवीतदिव्यांशुकाः
प्रीतो याति वृषेण वारणगतस्तं वासवः सेवते ।
भूषा तस्य नृणां कपालशकलाः स्तोता धनेशः स्वयं
दौर्गत्यस्य परं पदं स भगवान् शम्भुर्विभुत्वस्य च ॥ ४ ॥

तत्किमनेन यथादिष्टमनुतिष्ठामि । परिक्रम्यावलोक्य च । अये नारदः कलहकुतूहली खल्वेष मुनिः यद्वा ।

लिङ्गोद्भवव्यतिकरे स्वमहत्वहेतो-
र्नारायणद्रुहिणयोरुदभूद्विवादः ।
यस्मादयं कलिमुखो मुनिराविरासीत्
तन्मा कथं नु भवतु प्रियसंप्रहारः* ॥ ५ ॥

विचिन्त्य । भवत्वस्मादेव तर्हि तयोरुदन्तमुपलप्स्य इति परिक्रामति । ततः प्रविशति यथा निर्दिष्टो नारदः ।

नारदः । विचिन्त्य सत्यंसत्यमिदं गीयते दुस्त्यजा प्रकृतिरिति । यतः ।

युयुधे युद्ध्यते को वा योत्स्यते वा मदोद्धतः ।
इति मे व्यग्रमनसः कालो ऽभ्येति च याति च ॥ ६ ॥

अपिच ।

स्रस्तान्त्रतन्त्रतुरगाणि कृपाणघात-
घूर्णत्करीण्यनणुपूतनफूत्कृतानि ।
धावत्कदम्बकटुताण्डवडामराणि
द्रष्टुं रणान्यहरहस्त्रिजगद्भ्रमामि† ॥ ७ ॥

विमृश्य यो यत्रानुरक्तः स तदन्यतिरस्कारेण तदेव बहु मन्यते । तथाहि ।

तन्मम ब्रह्म परमं तत्तपः सा क्रतुक्रिया ।
स स्वाध्यायः स च जपो यद्वीक्ष्ये युद्धमुद्धतम् ॥ ८ ॥

येन केन चिद्व्यसनिनो जनस्य तदसन्निधाने तत्प्रतिनिधिरपि विनोदाय । तथाचाहम् ।

अलाभे वीरयुद्धस्य नखवादनसंभृतम् ।
सापत्न्यककलिं स्त्रीणां पश्यामि च शृणोमि च ॥ ९ ॥

किंच ।

लावकतित्तिरिकुक्कुटमेषैर्महिषैश्च या रणक्रीडाः ।
द्रुहिणाच्युतकलियोनेस्ताः प्रीत्यै नारदस्य मुनेः ॥ १० ॥

अपिच ।

वीराणां शस्त्रसंस्फोटे करिणां दन्तघट्टने ।
व्याघ्राणां नखनिर्भेदे नारदः परितुष्यति ॥ ११ ॥

आत्मानं निर्दिशन् । अपिच ।

यन्नारीतनुरच्युतः स भगवान् कन्दर्पदर्पापहो
यच्चाभूद्गिरिशः पतिश्च मरुतां यत्फेनपुञ्जायुधः ।
सौम्यं यच्च विमुच्य रूपमभवच्चण्डी हिमाद्रेः सुता
तत्सर्वं मम नारदस्य ललितं युद्धैकलीलारुचेः‡ ॥ १२ ॥

---

* स्नायुप्रायाणि स्नायुप्रचुराणि निबद्धानि कीकसान्यस्थीनि यस्यामेतादृशी तनुर्यस्य । एतेन भृङ्गिरिटेर्विकृतरूपता सूचिता । अतो विवाहोत्सवे प्रवृत्ते शम्भुना सह भगवती देवी लज्जामुद्रां विहाय विकृतरूपिणं नृत्यन्तं भृङ्गिरिटिं दृष्ट्वा यज्जहास तेन भगवान् शिवो न केवलं तदानीमेव तस्मिन् तुष्टः किन्तु सोऽद्यापि तस्मिन् तुष्ट एव । महात्मानो हि येन केनापि कारणेन यस्मिन्नेकवारं संतुष्टास्तस्मिन् सर्वदा प्रसादोन्मुखास्तिष्ठन्तीति भावः ।

† अक्षसूत्रं रुद्राक्षमाला ।

* यस्मादयं कलिमुखो मुनिराविर्भूतस्तस्मात् कथं नु प्रियसंप्रहारः प्रियविनाशो मा भवत्वपित्ववश्यं भवत्विति भावः ।

† स्रस्तानि गलितान्यन्त्रतन्त्राणि प्रधानान्त्राणि येषामेवंविधास्तुरगा येषु । कृपाणघातैर्घूर्णन्तो मूर्च्छापरवन्तः करिणो येषु । अनणून्युत्कटानि पूतनानां रणरुधिरपानोत्सुकदेवयोनिविशेषाणां फूत्कृतानि येषु । धावन्ति यानि कदम्बानि योद्धृसमूहास्तेषां कटुना त्रासजनकेन ताण्डवेन डामराणि भयानकान्येवंविधानि रणानि द्रष्टुमहं नित्यं त्रिलोकीं पर्यटामि । एतेन सततमतिघोररणाभिकाङ्क्षी भगवान् नारद इति सूच्यते ।

‡ एतास्तिस्रः कथाः श्रीमद्भागवतादौ प्रसिद्धाः ।

संप्रत्येवोपस्थितामिव मनोरथसिद्धिं पश्यामि यदावेदितमेतस्य * त्रयीविद्याशिष्येण माठरेण यथा याचितपरशुं दशग्रीवमाधूतधूर्जटिधनुषं चाभियोक्तुं मिथिलापुरीं प्रस्थितो राम इति । विचिन्त्य तदहमपि तत्र गत्वा तयो † रमर्षवृद्धिविधिना मनोरथानामप्यपथं समरसंभारमालोकयामि । इति परिक्रामति ।

भृङ्गिरिटिः । वेगात्कतिचित्पदानि गत्वा स्वागतं देवर्षेर्नारदस्य ।

नारदः । कथं महादेवानुचरो भृङ्गिरिटिः । उपसृत्य स्वस्ति भृङ्गिरिटये । क्व पुनः प्रस्थीयते ।

भृङ्गिरिटिः । यत्र वीरवर्गवरिष्ठौ जामदग्न्यदशकण्ठौ ।

नारदः । प्रमथप्रथम साधु स्मारितोऽस्मि । तत्कथय कः पुनर्जामदग्न्यदशग्रीवयोर्वीरव्रतचर्यासु प्रकृष्यते ।

भृङ्गिरिटिः । देवर्षे महदन्तरं रामरावणयोर्वीरव्रतचर्यां प्रति पश्य ।

त्रिःसप्तावधि बाधिता क्षितिभुजामाजन्मवैखानसः
कर्तामातृवधैनसः स सकलश्रुत्यर्थवीथीगुरुः ।
विश्वस्याश्च भुवः कृतौ वितरिता श्यामाकमुष्टिंपचो
रामः सोमसुदप्रमेयमहिमा कासां गिरां गोचरः ॥ १३ ॥

नारदः । चन्द्रशेखरसखे न रावणोऽपि वीरव्रतचर्यां प्रति केनाप्यतिसंधीयते । यतः ।

आसीदस्ति भविष्यति क्वचिदपि त्रैलोक्यमालोक्यतां
यद्येतस्य दशाननस्य सदृशो दिव्या हि युष्मद्दृशः ।
तुल्यं कृत्स्नशिरश्छिदः कृतनुतेः स्तोकत्रिलोकीप्रदो
यस्मात्सोऽपि वरप्रदानसमये देवः शिवो लज्जितः ‡ ॥ १४ ॥

भृङ्गिरिटिः । देवर्षे नारद यथा समर्थयसे । तथाहि ।

एकः कैलासमद्रिं करगतमकरोच्चिच्छिदे क्रौञ्चमन्यो
लङ्कामेकः कुबेरादहृत वसतये कोङ्कणानब्धितोऽन्यः ।
एकः शक्रस्य जेता समिति भगवतः कार्तिकेयस्य चान्य-
स्तत् कामं कर्मसाम्यात्किमपरमतयोर्मध्यगा वीरलक्ष्मीः ॥ १५ ॥

नारदः । सहर्षं हस्तमुद्यम्य ।

चित्रं नेत्ररसायनं त्रिदशतासिद्धेर्महामङ्गलं
मोक्षद्वारमपावृतं मम मनःप्रह्लादनाभेषजम् ।
साकं नाकपुरन्ध्रिभिर्नवपतिप्राप्त्युत्सुकाभिः सुराः
सर्वे पश्यत रामरावणरणं वक्ष्येष वो नारदः ॥ १६ ॥

* एतस्य जामदग्न्यस्य ।

† तयोः जामदग्न्यदशग्रीवयोः ।

‡ एककालावच्छेदेन सकलमस्तकच्छेदकृत् स्तोता चायं दशग्रीव इति कथमहमभीष्टवरदोऽपि तुच्छां त्रिलोकीं दास्यामीति वरप्रदानसमये भगवान् शिवोऽपि ललज्जे । एवंविधो दशग्रीवोऽपि कासां गिरां गोचरो न कासामित्यर्थः ।

भृङ्गिरिटिः । युद्धैकरुचे मा निर्भरं संरम्भस्व । त्वन्मनोरथपरिपन्थी हि देवादेशः । यद्देवोऽस्मि स्वचापतिरस्कारमप्यविगणय्य ऋचीकपुलस्त्यसहितस्तयोरन्योन्यमन्युग्रन्थिश्लथीकरणाय प्रेषितः ।

नारदः । सविषादमात्मगतम् । धिक्कष्टमुत्थितश्च कौतुकद्रुमाङ्कुरो झटिति त्रुटितश्च तदन्तरितं तावदिदं रामरावणीयं युद्धमयोध्यां गत्वा परं रामरावणीयं योजयिष्यामि संप्रत्येवोभयरामीयं वा । प्रकाशम् । भूर्भुवःस्वस्त्रितयवासिभिरप्यनुल्लङ्घनीयो देवादेशः । तदहं ब्रह्मणः सदनं प्रति तावद्यास्यामि ।

भृङ्गिरिटिः । अहमपि प्रस्तुतकार्यसिद्धय इति निष्क्रान्तौ ।

शुद्धविष्कम्भकः * ।

ततः प्रविशति रावणः प्रतीहारी च ।

रावणः । सीतामनुसंधाय ।

तद्वक्त्रं यदि मुद्रिता शशिकथा तच्चेत्स्मितं का सुधा
सा दृष्टिर्यदि हारितं कुवलयैस्ताश्चेद्गिरो धिङ्मधु ।
सा चेत्कान्तिरतन्त्र † मेवकनकं किं वा बहु ब्रूमहे
यत्सत्यं पुनरुक्तवस्तुविरसः सर्गक्रमो वेधसः ॥ १७ ॥

प्रतीहारी । स्वगतम् । कहं अज्जवि सच्चेअ चित्तभित्ती तंचेअ चित्तअम्म ता गाढमभिणिविट्ठो दसाणणो कामो ता मणो सदमण्णुपक्खवादो एत्थ वित्थरइ । आकाशे । हंहो विसमबाण जुत्तमिणं सरिसमिणं जं दाणिं एदहमेत्तेवि दसाणणपसादे ईदिसो दे पुरन्दरपक्खवादो जेण सअलजणणिन्दणिज्जेण इमिणा उभअवेदणत्तणेणावि ण लज्जीअदि । भोदु कज्जं कज्जन्तरमन्तरेदि ता एव्वं दाव । प्रकाशम् । देव माआमओ दुवारुद्देसे चिट्ठदि ‡ ।

रावणः । अनाकर्ण्य भोभो मदन अति हि नाम दुर्ललितोऽसि यन्मय्यपि प्रहरसि यद्वा ।

* भूतभविष्यत्कालिककथांशानां निदर्शकः संक्षिप्तार्थो योऽङ्कस्य प्रारम्भे रचनाविशेषः स विष्कम्भक इत्युच्यते । स च द्विधा शुद्धः संकीर्णश्च तत्र मध्यमेन मध्यमाभ्यां वा पात्राभ्यां यः प्रयोजितः स शुद्धो यो हि नीचमध्यमपात्रकल्पितः स संकीर्णः । तथाच साहित्यदर्पणे ।

वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः ।
संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः ॥
मध्येन मध्यमाभ्यां वा पात्राभ्यां संप्रयोजितः ।
शुद्धः स्यात् स तु संकीर्णो नीचमध्यमकल्पितः ॥

† अतन्त्रमप्रधानं तुच्छमित्यर्थः ।

‡ कथमद्यापि सैव चित्रभित्तिस्तदेव चित्रकर्म तद्गाढमभिनिविष्टो दशानने कामस्तन्मन्ये शतमन्युपक्षपातो ऽत्र विस्तार्यते । हंहो विषमबाण युक्तमिदं सदृशमिदं यदिदानीमेतावन्मात्रे ऽपि दशाननप्रसादे ईदृशस्ते पुरन्दरपक्षपातो येन सकलजननिन्दनीयेनानेनोभयवेदनत्वेनापि न लज्ज्यते । भवतु कार्यं कार्यान्तरमन्तरयति तदेवं तावत् देव मायामयो द्वारोद्देशे तिष्ठति ।

अपि प्रहर्त्ता मम वल्लभो ऽसि
मृगाङ्कबन्धो निखिलामरेषु ।
यैर्व्यापृतस्त्वं मयि रावणे ऽपि
तैरेव बाणैर्यदि तां प्रति स्याः ॥ १८ ॥

प्रतीहारी । पूर्वोक्तमभिधत्ते ।

रावणः । हन्तहन्त नैकप्रकारो मदनव्यापारः । यतो मम वैदेहीदर्शनतः प्रभृति ।

न्यञ्चत्कुञ्चितमुन्मुखं हसितवत्साकूतमाकेकरं
व्यावृत्तं प्रसरत्प्रसादि मुकुलं सप्रेम कंप्रं स्थिरम् ।
उद्भ्रु भ्रान्तमपाङ्गवृत्ति विकचं मज्जत्तरङ्गाकुलं
चक्षुः साश्रु च वर्त्तते रसवशादेकैकमन्यक्रियम् * ॥ १९ ॥

प्रतीहारी । स्वगतम् । सव्वधा मदोदरीमन्दीकिदसिणेहगण्ठिणो से सीदामआ उल्लावा । विचिन्त्य । ता भोदु णिसग्गदूसहेण से परसुरामणामग्गहणेण सिढिलेमि सीदावेसं । प्रकाशम् । णं विण्णवेमि परसुरामपासपडिणिअत्तो † इत्यर्धोक्ते ।

रावणः । मायामयस्तच्छीघ्रं प्रविशतु ।

प्रविश्य मायामयः । देव मायामय इतो दृष्टिदानेनानुग्राह्यः ।

रावणः । अथ याचितपरशुना परशुरामेण किमभिहितमासीत् ।

मायामयः । त्रैलोक्यमाणिक्य रामोदन्तमाकर्णयतु स्वामी ।

पौलस्त्यः प्रणयेन याचत इति श्रुत्वा मनो मोदते
देयो नैष हरप्रसादपरशुस्तेनाधिकं ताम्यति ।
तद्वाच्यः स दशाननो मम गिरा दत्ता द्विजेभ्यो मही
तुभ्यं ब्रूहि रसातलत्रिदिवयोर्निर्जित्य किं दीयताम् ॥ २० ॥

रावणः । कदा नु खलु परशुरामो रसातलत्रिदिवयोर्जेता दाता च संवृत्तः । रावणः पुनः प्रतिग्रहीता । ततस्त्वया किमसौ प्रत्युक्तः ।

मायामयः । नक्तंचरचक्रवर्त्तिन् इदमिदं निवेद्यते ।

देवो यद्यपि ते गुरुः स भगवान् खण्डेन्दुचूडामणिः
क्षोणीमण्डलमेकविंशतिमिदं वारान् जितं यद्यपि ।
द्रष्टव्यो ऽस्यमुमेव भार्गवबटो कण्ठे कुठारं वहन्
पौलस्त्यस्य पुरस्तथापि रचितप्रत्यग्रसेवाञ्जलिः ॥ २१ ॥

रावणः । सप्रसादम् । कथमीदृशमनीदृशो ऽभिदधीत ततस्ततः ।

मायामयः । तूष्णीं तिष्ठति ।

रावणः । पराभिहितं हि भाषमे तन्निर्विशङ्कं निवेदय ।

मायामयः । देव प्रकृतिमुखरा हि ब्राह्मणजातिर्देवादेश इति निवेद्यते ।

परशुमिममदेयं याचते युद्धहेतो-
र्गिरिशधनुरधिज्यं कर्त्तुमुत्कण्ठते च ।
तदिदमभिदधीथास्तं प्रवाचं पिशाचं
तव भुजतरुखण्डं मत्कुठारो न सोढा ॥ २२ ॥

रावणः । सक्रोधहासम् । सूक्तं भद्रेण प्रकृतिमुखरा ब्राह्मणजातिरिति तदनुभविष्यति क्षुद्रक्षत्रियविजयदुःशिक्षितो मुनिखेट * श्चापलस्य फलम् ।

मायामयः । अस्तमितान्यविक्रमगतीनि जगन्ति त्रीण्यपि मन्वानो नितरां दृप्यति ब्रह्मवीरः ।

रावणः । कतरदधिष्टानमध्यास्ते स ते ब्रह्मवीरः ।

मायामयः । स्वगतम् । सक्रोपग्रन्थिरिवास्मत्स्वामी भवतु न प्राणनिर्याणे ऽप्यनुचितवाचो भवन्ति भृत्याः प्रकाशम् ।

निःशेषं काश्यपाय क्रतुविधिगुरवे दक्षिणीकृत्य पृथ्वीं
काण्डैर्ज्योतिःशिखण्डैर्मधुरिपुशयने व्यस्तवान् वारि येभ्यः ।
तानेलानालिकेरीक्रमुकफणिलताराजरम्भावनान्ता-
नम्भोधेर्गर्भभागानधिवसति मुनिर्भार्गवो भर्गशिष्यः ॥ २३ ॥

रावणः । तर्हि मिथिलातः सिंहलानुत्तरेण लङ्कां साधयतः सविधीभविता ।

मायामयः । देव प्रकृतिरोषणो रेणुकापुत्रस्तमागतमुत्प्रेक्षे ।

रावणः । तत्प्रियंप्रियं नः । नेपथ्ये ।

स एष भृगुपुङ्गवो गिरिशबालशिष्यो मुनिः
परश्वधशिखाशुशुक्षणिहुताखिलक्षत्रियः ।
उपैति धृतमत्सरो गुरुशरासनन्यक्कृतेः
क्व नाम दशकन्धरो वहतु चन्द्रहासं करे ॥ २४ ॥

रावणः । अनाकर्णनमभिनीय । अपि न नर्मगर्भमभिधत्से ।

मायामयः । सत्यमेतत् ।

रावणः । स विनोदयिता मे कन्दर्पकण्डूलभुजदण्डमण्डलम् । नेपथ्ये पुनस्तद्देव ।

मायामयः । ननु प्राप्त एवायमसावितः समहस्तास्फाल्यमानमार्जनामञ्जुमुरजनिनदनिष्यन्दसुन्दरेण रवेण निवेदितनिजागमनो जामदग्न्यः ।

ततः प्रविशति करेण शरमान्दोलयन्धृतधनुर्जामदग्न्यो माठरश्च ।

माठरः । स्वगतम् ।

---

मदनव्यापारेण रावणस्याक्षिविंशत्या एकैकमक्षि न्यञ्चत् कुञ्चदित्यादिविविधप्रकारकमभूदित्यर्थः ।

† सर्वथा मन्दोदरीमन्दीकृतस्नेहग्रन्थेरस्य सीतामया उल्लापास्तद्भवतु निसर्गदुःसहेनास्य परशुरामनामग्रहणेन शिथिलयामि सीतावेशम् । ननु विज्ञापयामि परशुरामपार्श्वप्रतिनिवृत्तः ।

* मुनिखेटो मुन्यपसदः ।

अयमेव महाभागो भृग्वपत्यं यदस्य हि ।
यदेव ब्रह्म परमं स एव गिरिशो गुरुः ॥ २५ ॥

किंच अनाकलितसत्वसारसंभारभीषणरमणीयाकृतयो हि महात्मानः । तथा हि ।

वैखानसो मुनिवृषा प्रवरश्चवीर-
श्चित्रं चरित्रमिदमस्य मुदे भिये च ।
क्षीराम्बुधेरिव पयः सभुजङ्गराजं
मार्तण्डरूपमिव घर्मपरिप्लुतं च ॥ २६ ॥

विचिन्त्य । भवत्वेवं तावत् । प्रकाशम् । भगवन् भार्गव किमिदमपाकृतच्यवनादिवचःशृङ्खलाविसंष्ठुलमपक्रममुपक्रांतम् ।

जामदग्न्यः । सस्मरणमनाकर्ण्य । अहो मयि महान् खलु महेश्वरवल्लभायाः प्रसादः । कुतः ।

गोदानमङ्गलविधेरनु रेणुका यान्
केशानवर्द्धयत तातनिवारिता ऽपि ।
वेणीकृता मम जटापटलस्य हेतो-
स्ते कुन्तलाः स्वयमपास्य भवं भवान्या ॥ २७ ॥

माठरः । भगवन् भार्गवेत्यादि तदेवाभिधत्ते ।

जामदग्न्यः । महाब्राह्मण किमुच्यते यदनभिज्ञो ऽसि वीरव्रतचर्याक्रमस्य न च विन्दानस्य योगमार्गमसुप्रतिपदः परब्रह्मानन्दः । पश्यतु भवान् ।

सेर्ष्यं पश्यति षण्मुखे भगवती कोदण्डशिक्षाश्लथं
धम्मिल्लं विरचय्य चुम्बितवती यं वत्सला मूर्द्धनि ।
सोढा सो ऽपि हि भार्गवो गुरुधनुर्निर्भर्त्सनं रावणा-
दित्याकर्ण्य गणैर्वृतः स्मितमुखैरीशो ऽपि लज्जिष्यते ॥ २८ ॥

माठरः । शिष्यस्नेह एव मां मुखरयति । तदाचार्याः प्रमाणम् ।

जामदग्न्यः । स एष भृगुपुङ्गव इत्यादि पठति ।

रावणः । साधु भोः साधु सत्यमिन्दुशेखरशिष्यो ऽसि ।

वीरप्रसूर्जगति भार्गव रेणुकैव
या त्वां त्रिलोकतिलकं सुतमभ्यसूत ।
शक्रेभकुम्भतटखण्डनचण्डधारो
येनैष मे न गणितो युधि चन्द्रहासः ॥ २९ ॥

जामदग्न्यः । पुलस्त्यापत्य अयमस्माकमाकस्मिकवीरव्रतदायी विफलीकृतकृतान्तक्रोधहासः स ते चन्द्रहासः । येन शिपिविष्टपरितुष्टये स्वकण्ठकाण्डमण्डलीं द्विधा कृतवानसि ।

रावणः । आं जामदग्न्य स एवैष निसर्गकरालः करवालः येन सा मम भूर्भुवःस्वस्त्रयी पादपीठे लोठिता ।

जामदग्न्यः । लङ्केश्वर ईदृश एवायं चन्द्रहासः ।

दृष्टे मुखानामेतस्मिन्कण्ठखण्डनशङ्कया ।
स्वेषां च न परेषां च जायन्ते कम्पसंपदः ॥ ३० ॥

रावणः । भार्गवभार्गव मामैवं किं करवाम यदतिक्रान्ते वस्तुनि साक्षिप्रत्ययपरतन्त्रा व्यवहाराः । ततश्च ।

आस्कन्धावधि कण्ठकाण्डविपिने द्राक्चन्द्रहासासिना
छेत्तुं प्रक्रमिते मयैव टसितित्रुश्च्छिरासंततौ ।
अस्मेरं गलिताश्रु गद्गदपदं भुग्नभ्रु वा यद्यभू-
द्वक्रेष्वेकमपि स्वयं स भगवांस्तन्मे प्रमाणं शिवः ॥ ३१ ॥

जामदग्न्यः । आत्मवधः प्रथमः पातकेषु । अनेनापि विकत्थसे इत्यहो ते श्रुतिषु वैचक्षण्य यदित्थमध्यगीष्महि ।

असुर्या इति ते लोका अन्धेन तमसा वृताः ।
तांस्ते मृत्वाभिगच्छन्ति ये के चात्महनो जनाः ॥ ३२ ॥

रावणः । आः क्षत्रियापुत्र ब्राह्मण इव मीमांसमानस्त्रिवेदीं विप्लावयसि । तदेष ते राजा रावणो दण्डधरः ।

जामदग्न्यः । विहस्य अहो वर्णाश्रमेषु वैशारद्यं राज्ञः । तदिदमध्याप्यसे ।

सकलस्यास्य लोकस्य जातिर्भवति मातृतः ।
ऋषीणां तु श्रुतिदृशां पितृतो धर्मनिर्णयः ॥ ३३ ॥

रावणः । यदात्थ एवमपि भवतु ।

जामदग्न्यः । किं पुनरैरम्मदे महसि न दारवीयं ज्योतिरस्तमयते । अतश्च ।

यः पाणिप्रणयात्पवित्रिततनुर्देवेन खट्वाङ्गिना
यः शस्त्रैकगुरुर्गजासुरवधूवैधव्यमुद्राप्रदः ।
तत्रास्मिन् परशौ शिताग्रहुतभुग्ज्वालाच्छटाडामरे
श्लिष्यन्तः सहसा व्रजन्ति विलयं ते चन्द्रहासादयः ॥ ३४ ॥

रावणः । विहस्य । अथमसौ चन्द्रहासस्य विलापयिता कुठारो यः खण्डैकभाग इत्यमाङ्गलिकत्वाद्भगवता भर्गेण भवते दत्तः । तत्तपस्यतस्ते महदुपकरणमासीत्समित्काण्डखण्डनाय ।

जामदग्न्यः । आं रावण स एवायं भगवतो भवानीवल्लभस्य प्रसादचिन्तकः परशुर्महदुपकरणं च मे तपस्यतः समित्काण्डखण्डनाय क्रुद्धस्तु प्रचण्डदुर्वृत्तदण्डनाय ।

रावणः । जामदग्न्येदृश एवायं खण्डपरशुपाणेः परशुरासीत् । आधारनिबन्धनो यदाधेयस्य गुणाध्यारोपः । मुक्ताशुक्तिसंपुटपीतं हि पश्य पाथो ग्रन्थीभवति ।

जामदग्न्यः । निशाचरचक्रवर्त्तिन् न सार्वत्रिकमिदं सलिलगर्भगतो ऽपि गभस्तिमाली दुरालोक एव । जामदग्न्यपाणिप्रणयवानपि हरपरश्वधो दुर्निषेध एव ।

रावणः । ओमिति ब्रूमः । यदि न दुर्निषेधः कथमिव रेणुकाशिरश्छेदे ऽपि स्वच्छन्दः । अपिच रे ब्रह्मबन्धो ।

देवीविलासमुकुरः परशुर्य आसीत्
स्तस्वैरमासुरशिरोमणिशातधारः ।

तं रेणुकारुधिरपङ्कृताङ्कमेनं
द्रष्टुर्न कस्य हृदयं करुणा रुणद्धि ॥ ३५ ॥

विचिन्त्य । हंहो नीललोहितशिष्य नूतनः खल्वेष क्षत्रियधर्मो यत्र जननीजने ऽपि शौर्यपर्यवसायः । तथाप्यादिृयसे । अहो स्वतन्त्रा लोकयात्रा । यद्वा असतामपि महापुरुषशुश्रूषा किमपि कामदुघा । यतः ।

त्वं जामदग्न्य जननीवधपातकेन
न ब्रह्मवर्चसवतां सविधे ऽभविष्यः ।
गीर्वाणवद्यचरणस्तव चन्द्रमौलि-
राचार्यकं स भगवान् यदि नाकरिष्यत् ॥ ३६ ॥

तथाप्येतदभिधीयसे ।

चापाचार्यस्त्रिपुरविजयी कार्त्तिकेयो विजेयः
शस्त्रव्यस्तः सदनमुदधिर्भूरियं हन्तकारः* ।
अस्त्येवैतत् किमु कृतवता रेणुकाकण्ठबाधां
बद्धस्पर्द्धस्तव परशुना लज्जते चन्द्रहासः ॥ ३७ ॥

जामदग्न्यः । कथं नाम न लज्जते यतो निसर्गनिरवग्रहं न जानाति जामदग्न्यम् ।

रेवाम्भोगर्भमज्जद्द्विविधवरवधूहस्तयन्त्रोज्झिताभिः
क्रीडन् वारां लताभिः स्मरसि यदकरोदर्जुनः कार्तवीर्यः ।
तद्दोष्णां यत्तु रामो रणभुवि विदधे वेगवल्गत्कुठारः
प्रायः पौलस्त्य सा ते श्रवणपरिणतिं नो गता किंवदन्ती ॥ ३८ ॥

प्रतीहारी । स्वगतम् । एदं तं रक्खसाणं पि रक्खसो अत्थित्ति† ।

रावणः । विहस्य मानुषेण रावणपराजय इत्यहो सुभाषितम् । तं प्रति आर्चीकिरपत्य शत्रुरिति योधनीयो भवति न पुनर्मृधादौ पैर्यालजनीयः । विभाव्य । यद्वा आयुधनिषेध्या रिपवो न सामसाध्याः । हस्तमुद्यम्य भार्गवभार्गव मा निरर्गलं प्रगल्भस्व । न निरस्त्रेषु निशाचरपतिः प्रहरति यदि ते निर्विघ्नो वीरव्रतचरितोत्कर्षः । अतश्च ।

त्रैयम्बकः परशुरेष निसर्गचण्डः
सौपर्णकेतनमिदं धनुरुन्नतं च ।
अस्मिन् द्वये विमृहि भार्गव हेतिमेकां
येनाग्रमृच्छति करं मम चन्द्रहासः ॥ ३९ ॥

जामदग्न्यः । किं नाम रामो ऽप्येवमुच्यते । वाडवीयमपि ज्योतिरर्णवार्णःपानार्थमभ्यर्थ्यते । किंच ।

कैलासाद्रिविटङ्कतः सह सुरैर्द्रष्टुं प्रवृत्ते हरौ
मध्यस्थे शशिशेखरे रणविधौ सूनोश्च शिष्यस्य च ।
सार्द्धं येन विनिर्जितो गणचमूचक्रेण हेरम्बिणा स्कन्दो
ऽसौ दशकण्ठ कुठारभसास्तस्मिन् मयि त्वादृशाः ॥ ४० ॥

रावणः । विहस्य । सैषा गुरुप्रदेया गुरुपुत्रे दक्षिणा तदिदमनुष्ठितं गुरुवद्गुरुपुत्रे वर्त्तितव्यमिव ।

जामदग्न्यः । भवानिव न सर्वः श्रुत्यर्थवीथीविदग्धः । यतस्त्वैव गुरुवद्गुरुपुत्रे प्रवृत्तिः ।

वयं पुनरशास्त्रचक्षुपस्तदिदं ब्रूमहे । यथा ।

वन्द्यः पितेव स भवान् नलकूबरस्य
रम्भा स्नुषा धनपतेरिव सा तवापि ।
यत्त्वन्यदत्र हृदयान्न नतदेति कण्ठं
दोषस्तथापि यदि तेत् स्मृत एष रुद्रः ॥ ४१ ॥

रावणः । आधेयविक्रमकर्माणो* येन केन चिदपवदन्ते । किंच ।

हेरम्बडम्बरिणि नन्दिनिनन्दिहेता-
वुद्दामचन्द्रमसि संयति षण्मुखेन ।
मुक्तो ऽसि यत् पशुपतिप्रणयानुरोधात्
तेन त्वमेव विजयी विजितः कुमारः ॥ ४२ ॥

जामदग्न्यः । किमभेद्यमम्भसां किमदूष्यं दुर्जनवचसां यतो जामदग्न्यवचांस्यपि विचार्यन्ते । पश्यपश्य ।

ईशो गुरुर्गिरिसुता जननी किमाभ्यां
शश्वत् स एव समरेषु पराङ्मुखस्य ।
अद्यापि काण्डचयखण्डितचन्द्रकायः
साक्षी शिखण्डनिवहो गुहवाहनस्य ॥ ४३ ॥

रावणः । कस्य पुनः प्रत्यक्षपराङ्मुखस्य मतिमतः सतो ऽनुमाने बहुमानः । ततश्च तदेवाभिधीयसे त्रैयम्बकः परशुरित्यादि पुनः पठति ।

जामदग्न्यः । निशाचरचक्रवर्त्तिन् अपकुर्वतापि भवता परमुपकृतं यदेष स्मारितो ऽस्मि ततश्च ।

येन न्यक्कृतमिन्दुशेखरधनुर्दर्पादनादृत्य मां
स्वर्बन्दीभिरसूयितः स बलवान् पौलस्त्य कस्ते करः ।
द्राक्छित्त्वा मणिबन्धनाद्गलयिनं रामः कुठारेण तं
देव्याः कोपविभिन्नमास्यशशिनि स्वं धाम संधास्यति† ॥ ४४ ॥

अथवा एकस्मिन्नपराधिनि सर्वे ऽपि सहधर्मचारिणो ऽपराद्धारः । ततश्च ।

---

* हन्तकारो बलिः ।

† एतत्तत् राक्षसानामपि राक्षसो ऽस्तीति ।

* आधेयविक्रमकर्माण आरोपितविक्रमकर्माणः ।

† रामो देव्या आस्यशशिनि कोपविभिन्नं कोपनिर्गलितं स्वं धाम तेजः संधास्यतीत्यन्वयः । भर्तृशरासनन्यक्काररूपानुचितकर्मकारिणस्तस्य रावणकरस्य छेदनेन देवी हर्षोत्फुल्लवदना भवेदिति भावः ।

ये हेलोद्धृतचन्द्रचूडगिरयो ये चन्द्रहासार्थिनः
संग्रामे युगपद्भवन्ति सभयं श्लिष्टाश्च ये रम्भया ।
दोर्दण्डास्त इमे क्षुरप्रपतनच्छिन्नोच्चलत्पाणयो
मत्कोपाद्द्विवि नालशेषकमलामासूत्रयन्त्वब्जिनीम् ॥ ४५ ॥

रावणः । अथ सनाथः प्रमथनाथो भवता परिग्राहकेण । अथ भगवती भवानी च विमाननानतं शिरः समुन्नेष्यति । विचिन्त्य ।

बन्दीकृतामरपतेर्जितपुष्पकस्य
तस्याट्टहासमुखराणि मुखानि मेऽद्य ।
तूणीधनुःपरशुवल्कजटाक्षसूत्री
वैखानसो भृगुबटुर्यदयं विपक्षः ॥ ४६ ॥

जामदग्न्यः । विरोचनसुपाजनपरीक्षितविक्रमस्य शोभत एव मादृशेषु बटुरित्यधिक्षेपः । सजुगुप्सम् ।

अपि दशमुख कच्चिद्वृत्तपातालयात्रः
स्मरसि लयविचित्रं वक्त्रवाद्यं विधाय ।
यदसि बलिवधूभिः स्मेरनेत्रोत्पलाभि-
र्निजकरतलरङ्गे नर्तितः कौतुकेन ॥ ४७ ॥

रावणः । सर्वमस्ति यतो न भार्गव इव रावणः करुणात्मनि परित्रातव्ये स्त्रीजने पुरुषः ।

जामदग्न्यः । भार्गवो न रावण इव पशावप्यपुरुषः । अपिच किंचित्पृच्छामि ।

त्वां संक्रन्दननन्दनः किल कपिः कक्षागुहागह्वरे
कृत्वा प्रत्युदधि व्यधत्त स यदा सन्ध्यासमाधिव्रतम् ।
शङ्के रावण बाहुयन्त्रघटनासंरोधमन्दीकृत-
श्वासश्रेणिविसंष्टुलाननवनो दुःखं तदासीः स्थितः ॥ ४८ ॥

रावणः । सक्रोधहासम् । मुग्धबुद्धयो हि यथाश्रुतस्य ग्रहीतारो न पुनर्विवेक्तारः । अतश्च पश्यपश्य ।

अर्द्धं नारी पुमानर्द्धमिति संचिन्त्य चेतसा ।
चण्डीशस्यापि कोदण्डे यस्यावज्ञा न संहृता ॥ ४९ ॥
भूर्भुवःस्वस्त्रयीवीरः स एष दशकन्धरः ।
का नाम राम तस्यास्था बटौ वा मर्कटेऽपि वा ॥ ५० ॥

जामदग्न्यः । पुलस्त्यापत्य यद्वा तद्वा भवतु भार्गवस्तादृशानि तु वीररत्नानि न जात्या जुगुप्सते । पश्य ।

लोकोत्तरं चरितमर्पयति प्रतिष्ठां
पुंसां कुलं न हि निमित्तमुदात्ततायाः ।
वातापितापनमुनेः कलशात् प्रसूति-
र्लीलायितं पुनरमुद्रसमुद्रपानम् ॥ ५१ ॥

रावणः । अरे दुर्मुख बटो वैखानसखेट विडम्बितत्र्यम्बकाचार्य स्वहेतिधारातिथीकृतरेणुकामूर्द्धन् मूर्धाभिषिक्तरुधिरजलनिवापाञ्जलितर्पितपितृक क्षत्रियागर्भपातनमहापातकिन् एष प्रदर्श्यते दशाननदोर्दण्डमण्डलीसामर्थ्यसारः । ततश्च ।

लूत्वा बिसलतालावं कण्ठं ते रेणुकारिपोः ।
स एष चन्द्रहासासिः प्रायश्चित्तं चरिष्यति ॥ ५२ ॥

यद्वा ।

क्वायं मे चन्द्रहासः प्रकृतिशतलिपिन्यस्तनैत्रप्रशस्तिः
स्वर्मातङ्गस्य कुम्भे क्व च कुहक भवान् ब्राह्मणः शस्त्रवाही ।
वामेभ्योऽस्मत्करेभ्यो बहिरयमिह यस्तत्कनिष्ठाङ्गुलीभूः
प्रारब्धब्रह्मघोषं हरतु नखशिखा त्वच्छिरः कन्धरातः ॥ ५३ ॥

जामदग्न्यः । अरे रे पुनरुक्ताकार दुराचार निशाचरचरम विरिञ्चिकुलकलङ्क लङ्कापपते पातकैकरसिक कुबेरवैरिन्नभिलषितरम्भापरीरम्भ दाक्षायणीप्रणामपरिहारिन्नन्त्रेव ते दृश्यते दोर्दण्डमण्डलीसामर्थ्यसारः ।

रावणः । विहस्य स्वसारानुसारेण भार्गवो दशकण्ठमप्यकलयति । नेपथ्यं प्रति पुष्पक इतइतः ।

प्रविश्य पुष्पकम् । अयमहम् ।

रावणः । एव समारुह्यस इत्यर्द्धारोहणावरोहणनाटितकाभ्याम् । अहह मनाक्किल वीरव्रतसमयमुद्रामतिक्रान्तोऽस्मि ।

जामदग्न्यः ।

वीरव्रतान् जहिहि रावण चन्द्रशालां
मा पुष्पकस्य मयि पादचरेऽपि रामे ।
पश्यन्त्विमाः समरमप्सरसोऽद्य तावन्
न्यक्पातिभिर्विहितमूर्ध्वचरैश्च बाणैः ॥ ५४ ॥

रावणः । अनभ्यस्तचरस्तवैष समरारम्भ इति ममानुकम्पा ।

जामदग्न्यः । सोल्लुण्ठम् । पशुपतिनाप्यननुकम्प्यमानमनुकम्पस इत्यहो सकरुणा ते धिषणा । किं पुनरिदमुच्यते ।

यथाभ्यासं प्रवर्तन्ते त्वादृशामत्र पत्रिणः ।
हरान्तेवासिनस्त्वेते सर्वतोदिक्कविक्रमाः ॥ ५५ ॥

रावणः । तद्यदि तवाधुना भगवांस्त्रिनेत्रस्त्राता इत्युभावपि चापारोपणं नाटयतः ।

ततः प्रविशतः सशिष्यावृचीकपुलस्त्यौ भृङ्गिरिटिश्च । शिष्यः पुरो निर्दिशन् । साश्चर्यम् । किं उण इदो एदाओ अखण्डपिण्डिअसिहासंहचण्डीकिअचित्तभाणुणो तक्खणोवणादडाहुत्तरणतारतरजच्चकंचणमअकेउदण्डमण्डलीओ अमन्दसच्छन्दसंपडिअजडिलजालालिपक्खालणासविसेससमुज्जलन्तअग्गिरासिअअसंठिअधअपडाडम्बरिल्लीओ णिबिडुह्नापम्भारपरिगमेवि अमुलायमाणसरसुप्पलाविच्छिण्णकणाअकोक्कणाअपरिअरेण अ विराअमाणाओ विमाणपन्तीओ गअणपेर-

न्ताहिं झत्ति ओसरन्ति * । ऋचीकः । वत्स दाक्षायण ।

नश्यन्नानाविमानाङ्गणमणिवलभीरत्नवातायनेभ्यो
वक्त्रैराकण्ठदृश्यैर्यदमरललना लोलमालोकयन्ति ।
यच्चेदं व्योम विद्युत्खचितमिव पुरस्तेन मन्ये किमन्य-
द्वत्साभ्यामाद्रियन्ते शिखिनिचयमुचो देवताः शस्त्रमय्यः ॥५६॥

पुलस्त्यः । सविशेषमालोक्य सखे तत्त्वानुगतस्ते तर्कः ।

एकत्रैकतमो परत्र दशधा कीर्णो यदाकर्ण्यते
टङ्कारस्तिरयन् जगन्ति धनुषामेकादशानामयम् ।
रामो ऽसौ स च रावणो रणधरां धर्तुं समभ्युद्यता-
वीषद्वालकुशाङ्कुरामरवधूकेशग्रियैः पाणिभिः ॥ ५७ ॥

शिष्यः । एकतो ऽवलोक्य । सचमत्कारम् । पेक्खह पेक्खह इदो एदाओ अमन्दसिन्दूरसुन्दरिअकुम्भपब्भारभासुराओ पअण्डमुण्डमण्डलीमण्डिअसुण्डादण्डडम्बरुड्डामराओ पअट्टमअधाराधोरणीणीरन्धणिरुद्धरेणुरमणिअसरणीओ गलगुहाणिउञ्जपुञ्जिअगञ्जिअणिज्जिदजलदजालत्थणिदवित्थराओ दोग्घट्टघटाओ ओदरन्ति † भृङ्गिरिटिः । भद्र दाक्षायण साधु दृष्टं वारणास्त्रमिदमामन्त्रितं रावणेन यतः ।

उत्सर्पद्दर्पहेलागुलुगुलितगलाडिण्डिमोड्डामरिण्यः
सन्नाहन्यासकर्मक्रमरुचिररुचः सादिभिः शोभमानाः ।
एतास्तीव्राङ्कुशाग्रप्रगुणितशिरसः श्रेणयो वारणानां
प्रेङ्खद्भिः शीकराम्भस्स्तबकितककुभः केतुभिः संपतन्ति ॥५८॥

शिष्यः । इदोवि एदे उत्तुङ्गलाङ्गूलग्गालिङ्गिअगअणङ्गणुच्छङ्गा घणघोणघुरुघुराघोसघग्घरिज्जन्तगलगुहाकुहरप्फारफुल्लगल्लविदुरिल्ला विज्जुप्पुञ्जपिञ्जरिददिट्ठिच्छडाकडक्खदुप्पेच्छा सहसत्ति सीहसंहा ओदरन्ति ‡ ।

पुलस्त्यः । इदमपि द्विरदास्त्रप्रतिद्वंद्वि पञ्चाननास्त्रमामन्त्रितं जामदग्न्येन यतः ।

गुञ्जापुञ्जारुणाक्षैर्धुतविकटसटासंकटस्कन्धबन्धै-
र्विभ्रद्भिर्बभ्रु गात्रं खरनखरशिखाश्रेणिनिर्याणरौद्रैः ।
एतैः कण्ठप्रणालीप्रणयिघुरुघुराघोरनिर्घोषनिघ्नै-
र्निर्विघ्नं सिंहसंघैरिदमतिरभसात्क्रान्तमेवान्तरिक्षम् ॥५९॥

सर्वे साकूतम् । एतएत एतयोरन्तरे भवामः । शिष्यवर्जमितरे हस्तमुद्यम्य ।

विरम भार्गव संहर संगरं
त्यज धनूंषि दशापि दशानन ।
विषहते न परस्परवैशसं
स भवतोर्भगवान् वृषभध्वजः ॥ ६० ॥

रावणः । सविषादं सो ऽयं दिधक्षोर्दावपावकस्य गरिमसारः सीकरासारः । विमृश्य ।

वीरः स भार्गवमुनिः स च राक्षसेन्द्रो
यो ऽयं द्विधा प्रविततो यशसां प्ररोहः ।
कस्मान् न वाञ्छति मया स तमष्टमूर्ति-
रेकायनं त्रिजगति क्रियमाणमीशः ॥ ६१ ॥

जामदग्न्यः । सावज्ञम् ।

न्यक्कारो गुरुकार्मुकस्य कुरुते मां वीरवर्गे पुनः
साक्षाद्भृङ्गिरिटिर्गिरा पशुपतेराज्ञापयत्येष च ।
हा तत्किं करवै किमन्यदथवा याचे महीमन्तरं
येन स्यां सशरासनः सपरशुः कालाग्निरुद्रातिथिः ॥६२॥

इतरे तदेव पठन्ति । रावणः । भार्गवभार्गव देवादेशान्मित्रमसि तदिदमापृच्छसे गमनाय ।

जामदग्न्यः । यथात्थ मित्रमसि तद्देष प्रेष्यसे । इतरे प्रियं नः प्रियं नः ।

नेपथ्ये । भगवन् भार्गव तत्रभवत्या परमे ब्रह्मणि वर्तमानया मैत्रेय्या लोकयात्रापरतन्त्रया च कात्यायन्या समं समुपरतकल्को याज्ञवल्क्यस्त्वामाह ।

अतिथिरसि किमन्यद्देवदेवो गुरुस्ते
वयमपि च सदाराः साग्नयो ऽस्मिन् वसामः ।
तदुपसर गृहाक्षस्त्वं भृगोः पुत्रभाण्डं
बटुपरिषदभीष्टाः सन्त्वनध्यायचेष्टाः ॥ ६३ ॥

जामदग्न्यः । यथाह सूर्यशिष्यः ।

इति निष्क्रान्ताः सर्वे ।

॥ रामरावणीयो नाम द्वितीयो ऽङ्कः ॥

* किं पुनरित एता अखण्डपिण्डितशिखासङ्घचण्डीकृतचित्रभानवस्तत्क्षणोपनतदाहोत्तरणतारतरजात्यकाञ्चनमयकेतुदण्डमण्डल्यो ऽमन्दस्वच्छन्दसंपतितजटिलज्वालालिप्रक्षालनासविशेषसमुज्ज्वलदग्निराशिचयसंस्थितध्वजपटाडम्बरिण्यो निविडोष्मप्राग्भारपरिगमेष्वम्लायमानसरसोत्यनाविच्छिन्नकनककोकनदपरिकरेण च विराजमाना विमानपङ्क्त्यो गगनप्रान्तेभ्यो झटित्यपसरन्ति ।

† प्रेक्षध्वं प्रेक्षध्वम् । इत एता अमन्दसिन्दूरसुन्दरितकुम्भप्राग्भारभासुराः प्रचण्डमुण्डमण्डलीमण्डितशुण्डादण्डडम्बरोड्डामराः प्रवृत्तमदधाराधोरणीनीरन्ध्रनिरुद्धरेणुरमणीयसरण्यो गलगुहानिकुञ्जपुञ्जितनिर्जितजलदजालस्तनितविस्तरा दोर्घट्टघटा अवतरन्ति ।

‡ इतो ऽप्येते उत्तुङ्गलाङ्गूलाग्रालिङ्गितगगनाङ्गणोत्सङ्गा घनघोणघुरघुराघोषघर्घरद्गलगुहाकुहरस्फारफुल्लगल्लव्यतिकरा विद्युत्पुञ्जपिञ्जरितदृष्टिच्छटाकटाक्षदुष्प्रेक्ष्या सहसैव सिंहसङ्घा अवतरन्ति ।

कान्तं नियोज्य प्रणयादभिसारिकायाः
सोत्कण्ठमेत्य रहसि प्रियमीक्षयन्त्याः ।
हासप्रभा घनतमो यदि नाशयेत् त्वं
वाच्यस्तदैव सुषमैकपदं निकुञ्ज ॥ २१ ॥

नैतद्विहङ्गरणितं तव कुञ्ज किञ्चित्
शोभाकरं भवति येन तमोऽधिवासः ।
कान्ता समेत्य यदि नाथमुपेत्य किञ्चित्
सम्भाषयेत् स्मितपुरस्तव सातिशोभा ॥ २२ ॥

गर्वं न तेन वह पादप चित्तमध्ये
छायाप्रदो यदि च तापचयापहन्ता ।
दूरावलोकनपराकृततापवीथ्या-
श्छायासु नो निवसतिर्नवहेमवल्ल्याः ॥ २३ ॥

किं रे नवङ्किशलयम्परिदर्शनीयं
प्रेम्णा तनौ वहसि भूषणबुद्धितोऽग ।
जानीहि भूषणमिदं न पुनः स्वकीयं
कामस्य सर्वजयिनोऽग्निमयः शरोऽसौ ॥ २४ ॥

नूनम्मतिर्भवति सम्प्रति मे नृपस्ते
रे पाप पादप पलाश सुरञ्जितोष्ठः ।
नोचेत् कथम्बत नवीनपलाशशोभां
धृत्वा विराजसि पुनर्न भयं गतोऽसि ॥ २५ ॥

रेरे कुसुम्भ कुसुमोच्चयवर्षणेन
क्षेमं तनोषि कुसुमेषु समागमेषु ।
वैधं न ते यदिह दाहमुपैष्यसि त्वं
दाहज्ज्वलद्विरहिदेहदहाद्दवाग्नेः ॥ २६ ॥

यस्यैव पुष्पनिचयः पथिकोत्तमाङ्गं
छित्त्वा तदीयरुधिरावलिलोहिताङ्गः ।
जाने न साम्प्रतमहो महतां समाजे
तस्य प्रसूननिचयः किमशोकनामा ॥ २७ ॥

किंवा वियोगदहनैः परिदग्धदेहान्
पान्थान् विनाश्य सविधागममात्रकेण ।
यस्मात् त्वदीयनिखिलाधिविनाशहेतुः
किन्तेन पुष्प भवसि त्वमशोकनाम ॥ २८ ॥

रेरे विहङ्ग गणरागभराङ्गरागं
गीतं करोषि जनमोहनकारणं किम् ।
मुग्धा वयं न रमणोद्यमवल्लभाव-
बालाप्रतीपवचनं श्रुतमेव यस्मात् ॥ २९ ॥

पुण्ये वने स्थितिकरः फलपत्रसेवी
शाखाऽवलम्बनकरो द्विज एव नाम्ना ।
नो सत्त्वयी विहग तेन निजद्विजत्वं
सार्थङ्करोषि पथिकाङ्गविकर्तनैः किम् ॥ ३० ॥

उत्तुङ्गशृङ्ग किमहो परिवर्द्धमानम्,
सर्वोन्नतत्वमभिदर्शयसि स्वकीयम् ।
मा गर्वमुद्वह निजं त्वमरण्यवासि-
कान्ताकुचौ विलसतो जितहेमशृङ्गौ ॥ ३१ ॥

शान्त्यास्पदं वदति काननमेतदज्ञः
कालस्य सर्वजयिनो रणभूमिमेव ।
नो चेद्विलोक्य सहसा तरुणो बलीयान्
मूर्च्छामुपैति किमहो परिकम्पिताङ्गः ॥ ३२ ॥

यस्मिन् लता च भुजगी विटपी कृतान्तः
शीतानिलोऽनलमयः कुसुमं च तीक्ष्णम् ।
वज्रस्वनोपमविहंगरवः प्रशान्त्यै
केनाश्रितं मुनिभिरेतदहं न जाने ॥ ३३ ॥

नासौ सुहृन्मनसिजस्तव काननांग
प्रच्छन्नशत्रुरतितीक्ष्णतरोऽनिवार्य्यः ।
अस्यैव बाणदहनस्तवदाहहेतु-
र्दावानलो नहि पुनस्तरुघर्षणोत्थः ॥ ३४ ॥

रे तीक्ष्ण कानन परं तव सुन्दरत्वम्
श्रुत्वा विलोकयितुमत्र समागतोऽहम् ।
दूरेऽस्तु ते परमसुन्दरताविलोको
मा मां विनाशय कृतान्तरदप्रकाश ॥ ३५ ॥

पान्थस्य कण्ठकलनाद्रुधिराक्तदन्त-
व्याकीर्णदन्तनिचयान् कुसुमच्छलेन ।
पान्थान् विकर्त्तयितुमुग्रतरान् प्रकाश्य
यद्राजसे विपिन किं तदहं न जाने ॥ ३६ ॥

यस्मिन् द्विजाः प्रचपला मधुपानमत्ता
यस्मिन् सदा मृगदृशां भवति प्रचारः ।
यस्मिन् पलाशनिकरः परितः प्रदीप्तः
किन्तद्वनं भवति शान्तिभृतां निवासः ॥ ३७ ॥

रे पञ्चबाण निशितान् निजपञ्चबाणान्
धृत्वा वसंतसचिवो विहगस्वनेन ।
मासं विधेहि जगतां जयशब्दमुच्चै-
र्योगेश्वरः स्मरहरः सविधे प्रदीप्तः ॥ ३८ ॥

दूरं प्रयाहि मदन त्वमितो गृहीत्वा
स्वीयं समस्तमभितापकरं हि वस्तु ।
नो चेत् समेत्य कथयाम्यधुनैव देवं
योगेश्वरं त्रिपुरनाशकरं स्मरारिम् ॥ ३९ ॥

एवं वदन् कृशतनुर्विरहाधिमग्नो
गत्वा पुरान्तकपदं पुनरेव दग्धः ।
तत्रस्थकामपरिवर्द्धनकल्लताद्यै-
रोषाज् जुगुप्सति विशुष्कतरौष्ठभागः ॥ ४० ॥

॥ रामनगरराजधानी ॥

TO THE EDITOR OF THE PANDIT.

SIR,

In Mr. Chambers' account of the Ruins at Mavalivaram (The Seven Pagodas') published in the first volume of the Asiatic Researches and also in the notes by Mr. Gubbins, descriptive of the same locality, published in Vol. XXII of the Journal of the Asiatic Society of Bengal, the following couplet is quoted from the Mahabharata:—

गङ्गायाः दक्षिणे भागे योजनानां शतद्वयं ।
पञ्चयोजनमात्रेण पूर्वाब्धेश्चैव पश्चिमे ।

Will any of your correspondents assist me in verifying this quotation, by informing me where the lines are to be found?

Yours faithfully,
M. W. C.

---

RAGHU.

*(Raghuvansa, III., 38.)*

Watched by young nobles, in the Prince's charge,
The sacred steeds have safely roamed at large;
None dared to check their course, where'er they sped,
And nine and ninety now have duly bled.
But INDRA, fearing for his shaken throne,
Jealous of rites he ever deemed his own,
Came down in fury from his home, the skies,
Veiling his glorious form from human eyes,
And from the keepers stole away the steed,
Loosed by the Priest, where'er he chose, to feed.
In sad surprise the baffled guardians stood,
But straight, approaching from the neighbouring wood,
The Cow, the holy Cow, to aid them came,
And cheered their bosoms, for they knew her fame.
Quick on his eyes young RAGHU, honoured lord,
Her holy milk that streamed to help them, poured;
And sights not given to the eyes of men
Lay all disclosed before his piercing ken.
He saw the God whose furious bolt of yore
From their rough sides the mountains' pinions tore,
Urging away, away in rapid course,
Tied to his car, the consecrated horse.
He saw 'twas INDRA by his coursers' hue,
His thousand eyes that never close, he knew;
Then, with a voice that made the welkin ring,
The fearless youth addressed the heavenly king:
"Lord of the Gods, men say thou holdest dear
The gifts and sacrifice we offer here.
Then why, O INDRA, doth thy soul delight
To check my father in this holy rite?
Lord of the Worlds, thy fury should oppose
Not kings the friends of worship, but its foes.
For if thou check the offerings of the just,
The holy Law is trampled in the dust.
Then listen, INDRA, and release the steed
My father destines in the rite to bleed:
For holy guides, who show the righteous way,
From virtue's path themselves will never stray."

His fearless words fill INDRA with surprise;
He turns his chariot back, and thus replies:—
"True are thy words, O royal youth, but know
That Glory's lovers guard it from the foe:
And by this rite thy father seeks to shine
In dazzling splendour that shall dim e'en mine.
As one Chief Spirit, VISHNU is adored,
And SIVA worshipt as the one Great Lord;
So in this honour none with me may vie:
Lord of the hundred Slaughtered Steeds am I.
Therefore this courser that should bleed to-day,
Like ancient KAPIL will I drive away.
Then cease thy labour, be not over-bold,
Nor share the fate of SAGAR'S sons of old!"

Then cried the Prince, unconscious he of fear:
"Prepare for battle if thou wilt not hear!
Low on this plain must vanquished RAGHU bleed
Ere thou in triumph bear away the steeds."

He spoke: an arrow from his side he took,
While fair as SIVA'S was the hero's look.
Straight to the mark the golden arrow sped,
And fixed in INDRA'S heart its glittering head.
The wounded God his bow in anger bent,
Bright as that arch that spans the firmament.
Through RAGHU'S bosom pierced the vengeful shaft
And drank of human blood its first sweet draught,
For in the furious battles waged before
Its thirst was quenched with hideous demons' gore.

*(To be continued.)*

---

A TRILINGUAL DICTIONARY; being a comprehensive Lexicon in ENGLISH, URDÚ and HINDÍ, exhibiting the syllabication, pronounciation, and etymology of English words, with their explanation in English, and in Urdú and Hindí in the Roman character, by Mathurá Prasáda Miśra, Head Master Queen's College, Benares.

"After a thorough examination of Mathurá Prasád's Dictionary, I consider it to be a remarkable advance on any work of the same kind that has preceded it. Covering as it does, and very adequately, the ground of two leading Indian languages, it may be regarded as one of the most valuable linguistic helps to the Indian official that has appeared for many years; and it is, of course, equally valuable to the Indian Student of English." *Dr. Hall.*

May be procured direct from us, by Book post; from any bookseller in Calcutta, Madras, or Bombay; or from Messrs. Trübner & Co., London.—*Price Rs.* 16.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

# काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

# THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 27. Benares August 1st, 1868. Vol. III.


## ॥ ईश्वरप्रत्यभिज्ञासूत्रविमर्शिन्याः ॥

॥ षष्ठसप्तमे आह्निके ॥

स्वात्मा भेदघनान्भावांस्तदपोहनटङ्कतः ।
छिन्दन्यस्स्वेच्छया चित्ररूपकृत्तं स्तुमः शिवम् ॥

एवं स्मृतिशक्तिर्ज्ञानशक्तिश्च निरूपिता । अथ तदुभयानुग्राहिण्यपोहनशक्तिर्वितत्य श्लोकैकादशकेना "हंप्रत्यवमर्शो यः प्रकाशात्मे" त्यादिना "सिद्धे सर्वस्य जीवत" इत्यन्तेन निर्णीयते । तत्र श्लोकेन प्रत्यवमर्शो न विकल्पो विशेष इति सूच्यते,ततः श्लोकेन शुद्धे ऽहंप्रत्यवमर्शे ऽपोहनव्यापारासम्भव उच्यते,ततः * स्वदृष्टावेव तदुपपत्तिरिति श्लोकेन,ततोऽपि द्वयेनाशुद्धस्याहमित्यवमर्शस्य विकल्परूपता,ततः श्लोकेनानुसन्धानस्यापि विकल्पता,एवंभूतानुसंधानादिरूपमेव परमेश्वरस्य स्रष्टृत्वमिति श्लोकेन,ततः प्रकृते चिदात्मन्यर्थावभासस्य सत्तोपसंह्रियते श्लोकेन, ततो द्वयेन तस्यैवार्थावभासस्यानुभवस्मरणादौ वैचित्र्यमुच्यते, तदुक्तिश्च प्रकृतायामपीश्वररूपस्वात्मप्रत्यभिज्ञायामुपयुज्यत इति श्लोकेने,त्याह्निकस्य तात्पर्यार्थः ॥

अथ ग्रन्थार्थो व्याख्यायते ।

उक्तमिदं स्वभावमवभासस्य विमर्श इति तत्र विमर्शोऽभिलापात्मना शब्देन योजित एव, तद्योजना कृतं च विकल्परूपत्वं शुद्धेऽपि परमेश्वरे प्राप्तं,न चैतदिष्टं, तस्य संसारपदे मायात्मन्युपपत्तेरित्याशङ्क्याह ।

( १ ) अहंप्रत्यवमर्शो यः प्रकाशात्मापि वाग्वपुः ।
नासौ विकल्पः स ह्युक्तो द्वयाक्षेपी विनिश्चयः ॥

प्रकाशस्य विशुद्धसंविद्रूपस्य देहादिसंस्पर्शैरनाविलीभूतस्य य आत्मा जीवितभूतः सारस्वभावो विच्छेदशून्यो ऽन्तरभ्युपगमकल्पो ऽनन्यमुखप्रेक्षित्वस्वातन्त्र्यविश्रान्तिरूपः अहमिति प्रत्यवमर्शः असौ विकल्पो न भवति, विकल्पत्वाशङ्कायां बीजं दर्शयति।वाग्वपुरिति। विषयरूपाच्छ्रोत्रग्राह्याच्छब्दादन्य एवान्तरवभासमानः संविद्रूपावेशी शब्दनात्माभिलापो वागित्यनेनोक्तः, वक्त्यर्थं स्वाध्यासेन सोयमित्यभिसम्बन्धेन, "यदि वाग्वपुः कस्मान्न विकल्पः" आह, * न ह्यस्य विकल्पलक्षणमस्ति । तथाहि । विविधा कल्पना विविधत्वेन च शङ्कितस्य कल्पो ऽन्यव्यवच्छेदनं विकल्पः, विविधत्वं च वह्न्यावनग्निसंभावनासमारोपनिरासे सति भवद्द्वयं वह्न्यवह्निरूपमाक्षिपति, तेन विकल्पे ऽवश्यं तच्च निश्चेतव्यम्,अतच्च व्यपोहितव्यं भवति ॥

तथा च ।

(२) भिन्नयोरवभासो हि स्याद्घटाघटयोर्द्वयोः ।
प्रकाशस्येव नान्यस्य भेदिनस्त्ववभासनम् ॥

घटे हि दृष्टे घटस्यानएवाघटोपि योग्यदेशाभिमतस्यानाक्रमणशीलो विज्ञानजनकः स्वकारणोपनीतः सम्भाव्यते घटादिस्वभावः, अतो घटाघटयोर्द्वयोरवभासस्य संभावनात्समारोपः सावकाशीभवति । अघटस्य सत्यारोपे निषेधलक्षणो ऽपोहनव्यापार इति तदनुप्राणिता विकल्परूपता घट इत्यस्य निश्चयस्य, लिङ् सम्भावनायाम् । यस्त्वयं प्रकाशो नाम तस्य

* स्वमते ।

* विकल्पलक्षणानाक्रान्तिश्च भिन्नयोरवभासो हीत्यनेनोपपाद्यते । तदुत्थापक एष संदर्भः ।

स्थाने यः सम्भाव्यते स तावदप्रकाशरूपो न भवति,तुल्यकक्ष्यस्य हि सम्भावनं भवति,न च यत्प्रकाशेन कर्तव्यं तदप्रकाशस्य कदाचिद्दृष्टं, सम्भावनारोपणाद्विबलादेव चास्याप्रकाशरूपत्वं विघटेत। अतः प्रकाशतुल्यस्यान्यस्याप्रकाशरूपस्य भेदिनस्तत्तुल्यकक्ष्यस्यापोहनात्मकभेदनव्यापारासहिष्णोरवभासनमेव नास्ति तदभावे कस्यापोहनम्, * अवभाससम्भवे ऽपि प्रकाशरूपत्वमेव, न च प्रकाशस्य स्वरूपदेशकालभेदो, येन द्वितीयः प्रकाश एकस्मात्प्रकाशादपोह्येत, इति। हीति, यस्माद् एवं, ततो द्वयाभावादपोहासम्भवे विकल्परूपत्वाभावाच्चिन्मात्रे परामर्शात्मनि अहमिति प्रत्यवमर्श एव न तु विकल्पः ॥

"ननु घटे परिनिष्ठितरूपे दृष्टे † तद्दर्शनमुपजीवता विकल्पेन कथमघटस्य निषेधनं क्रियते, नह्यघटस्य केन चित्तामापि गृहीतम्, अघटवासनापि घटे दृष्टे कथंकारं प्रबुध्यताम्" सत्यमेवं शाक्यः पर्यनुयोज्यो, न तु वयम् । यतः ।

(३) तदतत्प्रतिभाभाजा मात्रैवातद्व्यपोहनात् ।
तन्निश्चयनमुक्तो हि विकल्पो घट इत्ययम् ॥

इह प्रमाता नाम प्रमाणादतिरिक्तः प्रमासु स्वतन्त्रः संयोजनवियोजनाद्याधारवशात्कर्ता दर्शितः । तस्य च प्रमातुरन्तः सर्वार्थावभासश्चिन्मात्रशरीरोपि तत्सामानाधिकरण्यवृत्तिरपि दर्पणनगरन्यायेनास्तीत्यप्युक्तम् । एवं च तत्प्रतिभां घटाभासमतत्प्रतिभां चाघटाभासं प्रमाता भजते सेवते तावत्। तदविकल्पदशायां चित्स्वभावोसौ घटश्चिद्वदेव विश्वशरीरः पूर्णः, न च तेन के चिद्व्यवहाराः,तन्मायाव्यापारमुल्लासयत्पूर्णमपि खण्डयति भावम् । तेनाघटस्यात्मनः पटादेश्चापोहनं क्रियते निषेधनरूपं, तदेव व्यपोहनमाश्रित्य तस्य घटस्य निश्चयनमुच्यते घट एवेति * । एवार्थस्य सम्भाव्यमानापरवस्तुनिषेधरूपत्वात् । एष एव परितश्छेदात्तत्क्षणकल्पात्परिच्छेदः, "हीति" यत एवं तस्माद्युक्तं द्वयाक्षेपी विकल्प इति,पूर्वश्लोकोक्ते वस्तुद्वये श्लोकद्वयेन हेतू क्रमेणोक्तौ,यस्मादेवं विकल्पः ततोहमिति शुद्धो विमर्शः न विकल्प इति श्लोकत्रयेण महावाक्यार्थः । शाक्यैरपि प्रमातुरेवायं व्यापार उक्तः † एकप्रत्यवमर्शाख्य इत्यत्र प्रपत्तेति स्वयमिति च वदद्भिः, स त्वेतैः कथं समर्थ्य इत्यास्तामेतत् ॥

नन्वेवमहमित्यपि प्रत्यवमर्शेनाहंरूपस्य घटादेः प्रतियोगिनो ऽपोहनीयस्यापोहे विकल्परूपता कथं न स्यादित्याशयेनाह ।

(४) चित्तत्वं मायया हित्वा भिन्न एवावभाति यः ।
देहे बुद्धावथ प्राणे कल्पिते नभसीव वा ॥
प्रमातृत्वेनाहमिति विमर्शोन्यव्यपोहनात् ।
विकल्प एव स परप्रतियोग्यवभासजः ॥

अहमित्यवमर्शो द्विधा, शुद्धो मायीयश्च, तत्र शुद्धो यः संविन्मात्रे विश्वाभिन्ने विश्वच्छायाच्छुरितस्वच्छात्मनि वा, ऽशुद्धस्तु वेद्यरूपे शरीरादौ, तत्र शुद्धे ऽहंप्रत्यवमर्शे प्रतियोगी न कश्चिदपोहितव्यः सम्भवति, घटादेरपि प्रकाशसारत्वेनाप्रतियोगित्वेनानपोह्यत्वादित्यपोह्याभावे कथं तत्र विकल्परूपता, अशुद्धस्तु वेद्यरूपे शरीरादौ अन्यस्माद्देहादेर्घटादेश्च व्यवच्छेदेन भवन्विकल्प एवेति वाक्यार्थः । अक्षरार्थस्तु चित्तत्वं प्रकाशमात्ररूपं हित्वा सदप्यपहस्तनया ऽप्रधानीकृत्य भिन्ने देहादावहमेव देहादिनीलादौ प्रमेये प्रमाता इत्यभिमानेन योहं स्थूल इत्यादिविमर्शः स विकल्प एव, न तु शुद्धं प्रत्यवमर्शमात्रम् । अत्र हेतुः, परो द्वितीयो देहादिर्घटादिश्च प्रतियोगी तुल्यकक्ष्यो ऽन्योन्यपरिहाराच्च विरुद्धस्तस्य यो ऽवभासः समारोपणलक्षणः तस्माद्यतोसौ तन्निषेधानुप्राणितो ऽहमित्यवमर्शो जातः अहं स्थूलो न कृशो न घटादिरिति शुद्धप्रकाशरूपस्यापहस्तनमेव देहादेर्भेदे हेतुः, तदपहस्तने तु परमेश्वरस्य स्वात्मप्रच्छादनेच्छारूपाभेदाप्रकाशनं भ्रान्तिरूपं प्रति स्वातन्त्र्यरूपा मायाशक्तिर्हेतुः, चिद्रूपस्य

* अयमाशयः। यद्रूपपुरस्कारेण विकल्पो वस्तु विषयीकरोति तद्रूपाभाववद् विकल्प्यमानवस्तुसजातीयं चापोह्यते । यथा घट इत्याकारके विकल्पे घटत्वाभाववद् दृश्यत्वेन घटसजातीयं पटादिकम् । अहमित्याकारकविमर्शस्तु प्रकाशत्वेन स्वरूपतो वा परमशिवमवभासयन् नापोहव्यापारं स्वस्मिन् धारयितुं प्रभवति । परमशिवात्मकप्रकाशसजातीयस्य तदितरस्याभावेन व्यवच्छेद्यस्यैवासंभवादिति ।

नन्विदमिति द्वितीया शाखा भवत्यहमित्याकारकविमर्शस्य तुल्यकक्ष्येत्यस्ति संभवो व्यवच्छेद्यस्येत्याशङ्कामपाकरोति । अवभाससंभवे ऽपीति । सर्वो हि भावराशिः प्रकाशस्वरूपान्तर्निमग्न एवेतीदंविमर्शो ऽपि प्रकाशस्वरूपतया संग्राह्यकोटिप्रविष्ट एवेति नास्ति व्यवच्छेद्यस्य संभव इति भावः ।

अस्य चाहंविमर्शस्य न यत्किंचिद्वस्त्ववभासरूपत्वं, येन वस्त्वन्तरावभासो ऽस्य व्यवच्छेद्यः स्याद्, अपि तु कृत्स्नवस्त्ववभासात्मकत्वमेव, अन्यथा परमशिवात्मकत्वासंभवात्, परमशिवात्मकविमर्शे एवापोहनव्यापारासंभवस्य प्रतिपादनीयत्वात्, तदनात्मके घटइत्यादिविमर्शे ऽहंविमर्शैकदेशकल्पे ऽपोहनव्यापारस्येष्टत्वादिति प्रतिपादयति । नचेत्यादिना । स्पष्टीभविष्यति चैतच्चित्तत्त्वं मायया हित्वेति सूत्रव्याख्यायाम् ।

† निर्विकल्पकम् ।

* अहंविमर्शस्यान्तर्मुखस्य विषयप्रवणतावसरे सर्वस्यैव विश्वस्य तदन्तर्भुडितत्वे ऽपि सामग्रीविशेषबलेनाघटोन्मुख्यप्रतिबन्धपुरस्सरं यद् घटोन्मुख्यमेव भवति तदेव पटादेर्व्यपोहनम् ।

† एकप्रत्यवमर्शाख्य इति श्लोके प्रपत्तेति स्वयमिति च पदद्वयं वदद्भिरुक्त इत्यर्थः । तथा च श्लोकः ।

एकप्रत्यवमर्शाख्ये ज्ञानएकत्र हि स्थितः ।
प्रपत्ता तदतद्धेतून् भावान् विभजते स्वयम् ॥

इति ।

चापहस्तनं देहादेरेवात्यक्तवेद्यभावस्य भिन्नस्यैव उपपत्तिशून्यतयैव प्रमातृत्वाभिमानः । तथा च देहाभिमानभूमिकायां स्थिताश्चार्वाकाश्चैतन्यविशिष्टः कायः पुरुष इति कायमेव प्राधान्येनाहुः । स्त्रीबालमूर्खाणां तथाभिमानात् । ततो ऽपि विवेकवन्तः पाकजोत्पत्तिपरिणामादिबलादस्थिरं शरीरं मन्वानाः प्राणशक्तिसमधिष्ठानेन च विना विकारशतावेशं शरीरस्य पश्यन्तो बुभुक्षापिपासायोगयोग्यं प्राणमेवात्मानं के चन श्रुत्यन्तविदो मन्यन्ते । ततो ऽपि समधिकविवेकभाजः प्राणस्याप्यनित्यत्वादनुसंधानयोग्यतामपश्यन्तो ज्ञानसुखाद्याश्रयभूतां बुद्धिमेव काणादप्रभृतय आत्मानमाहुः । अपरे तु तस्या अपि योगिदशायां वेद्यभावादपरत्वं मन्यमानाः असंवेद्यपर्वरूपं यत्र किं चिद्रूपं सकलवेद्यराशिविनिर्मुक्तं शून्यत्वान्नभस्तुल्यं न तु महाभूताकाशस्वभावं प्रमातृतत्वं शून्यब्रह्मवादिसांख्यप्रभृतय आहुः । तस्मिन्नपि वेद्ये शून्यान्तरं तत्रापि शून्यान्तरमिति यावद्भेदस्तावत्कल्पना न त्रुट्यति, तदर्थमाह, कल्पित इति, न चानवस्था परमार्थप्रकाशबलेन सर्वस्य यतः प्रकाशो न तु देहादिवशात्तथात्वाभिमानमात्रं देहादिः प्रमातेति संकोचमात्ररूपं चित्तत्वं शून्यं भूतलं यथा घटाभावः संकोचोपरिवेद्यांशच्छायाच्छुरितं तु चित्तत्वमेव बुद्धिप्राणदेहादीति । अमी एव च भूमिकाविशेषा उत्तरोत्तरमारोहतां योगिनां जाग्रदादितया * पिण्डस्थादितया चागमेषु भण्यन्ते । अपहस्तनं च व्याख्यास्यते ।

कलोद्गलितमेतच्च चित्तत्वं कर्तृतामयम् ।
अचिद्रूपस्य शून्यादेर्मितं गुणतया स्थितम् ॥

इति । तत्स्थितमशुद्धो ऽहमित्यवमर्शो विकल्प एव ॥

† द्विविधो ऽपि चायमहंप्रत्ययो द्विधा, अनुभवमात्ररूपश्चानुसंधानात्मा च, ‡ शिवात्मन्यहमिति सदाशिवात्मन्यहमिदमिति शुद्धो द्विधा, अशुद्धो ऽप्यहं स्थूल इति योहं स्थूलो ऽभवं सोहं कृशो बालो युवा स्थविरः स एवाहमित्यशुद्धोपि द्विविधः, तत्र शुद्धे विकल्परूपत्वमप्रतिष्ठमेवेत्युक्तम्, अशुद्धे त्वनुभवरूपे विकल्पत्वमुपपादितम्, अशुद्धे ऽपि त्वनुसंधानात्मकतया ऽभेदस्य प्रस्फुरणात्कश्चिदविकल्पकत्वं शङ्केत, तस्य व्यामोहं व्यपोहयितुमाह ।

(५) कादाचित्कावभासेया पूर्वाभासादियोजना ।
संस्कारात्कल्पना प्रोक्ता सा ऽपि भिन्नावभासिनि ॥

देहे इत्यादि वर्तते कादाचित्कः कदाचिद्भवो नियतदेशकालाकारोवभासो यस्य देहादेः स्वलक्षणरूपस्य तत्र या पूर्वावभासेन बालादिशरीराभासेन योजना योहं बालः स एवाद्य युवेत्यनुसंधानमादिग्रहणादुत्तरेण भाविना ऽऽभासेन सह योजना स्थविरो भविता ऽस्मीति सा योजना सर्वा कल्पना विकल्प एव, न तु शुद्धः प्रत्यवमर्शः । अत्र देहादेर्विशेषणं हेतुत्वाशयेन, यतो भिन्नावभासित्वमेव देहादेस्तदानीमप्यविच्छिन्नम् । यदि हि तस्य देहादेः सर्वतः पूर्णत्वमवच्छेदहीनत्वं पश्यन्ननुसंधानमहमिदमिति विदध्यात् तदियं सदाशिवभूः केन विकल्पास्पदत्वेन भण्येत, यावता विच्छिन्ने एव सोनुसंधिः । भिन्ने ऽपि कथमनुसंधानमिति चेदाह । संस्कारात् । प्राक्तनानुभवकृतवासनाप्रबोधजस्मृतिवशाद् इति यावत् । प्राणे बलाबलवशादनुसंधिः, बुद्धौ ज्ञानसुखादितारतम्यात्, शून्ये वैतत्यावैतत्ययोगाद्, अयमपि विकल्प एव । एवं स एवायं घट इति घटानुसंधानेपि विकल्पत्वं मन्तव्यम् । किं त्वेतास्वनुसंधानभूमिष्ठाधिक्येन विद्याशक्तिरचिरद्युतिवदुद्दीप्यत इति तासां परपदपरिशीलनप्रथमकल्पाद्युपायत्वमभ्युपागमन्गुरवः ॥

न च देहादीनां पूर्वपूर्वप्रमातृवेद्यता, येन प्रमातुरप्रकाशे प्रमेयं न भाति, तत्प्रकाशश्च न पूर्वप्रकाशं विना सो ऽपि न प्रमात्रन्तरप्रकाशं विनेत्यनवस्था स्या,दपि तु विशुद्धप्रकाश एव विश्वस्य प्रकाश इति निरूपयन्नुक्तयुक्त्या सदैव सृष्ट्यादिशक्त्यवियोगो ऽपि भगवत उक्तो भवतीति दर्शयति ।

(६) तदेवं व्यवहारे ऽपि प्रभुर्देहादिमाविशन् ।
भान्तमेवान्तरर्थौघमिच्छया भासयेद्बहिः ॥

यत्पूर्वं दर्शितं देहे बुद्धावित्यादि तदेवमुपपद्यते, कथम्, यदि व्यवहारे मायापदे देहप्राणादिमपि प्रभुरेव प्रकाशपरमार्थ इच्छया मायाशक्तिरूपया ऽऽविशन्देहप्राणादिप्राधान्येन स्वरूपं प्रदर्शयन्नन्तः संविन्मात्रे भान्तमहमित्येवंरूपमर्थौघमिच्छयैव बहिरिदमिति भासयति, तत एतदुपपद्यते । अन्यथा त्वनवस्था स्यात् । हेतौ लिङ् । अपिशब्द एवशब्दश्च भिन्नक्रमौ । यदेतावदुक्तं, तदिति, तस्माद्धेतोरेवं जातं वक्ष्यमाणरूपं, किं तत्, यत्किल प्रभुः परस्परं व्यवहारकाले क्रयविक्रयप्रेक्षाव्याख्यादौ चैत्रमैत्रादिसम्बन्धिनो देहप्राणादीनेकतया तावत्याभासे आविशन्नन्तर्भान्तमेवानुज्झितान्तःप्रकाशमेव सन्तं बहिरेकाभासतया भासयतीति सम्भाव्यत इत्येतज्ज्ञातम् । तेनतेन प्रमात्रा सहैक्यं सृज्यते, अन्येन प्रमात्रैक्यं

---

* पिण्डं कुण्डलिनी शक्तिः पदं हंसः प्रकीर्त्तितः ।
रूपं चिद्विन्दुरित्युक्तो रूपातीतः परः शिवः ॥
इति पिण्डादिस्वरूपप्रतिपादको मण्डनसंग्रहस्थः श्लोकः ।

† शुद्धाशुद्धभेदात् ।

‡ अहमिति शुद्धो ऽहं स्थूल इत्यशुद्धश्चानुभवमात्ररूपौ । अहमिदमिति शुद्धो योऽहं स्थूल इत्यादिरशुद्धश्चानुसंधानात्मानौ ।

संह्रियते, घटादिमात्ररूपे स्थितिः क्रियते, पूर्णस्वरूपनिमीलनात्तिरोभाव अधीयते, तावत्याभासे ऐक्यावभासनपूर्णत्ववितरणादनुग्रहः क्रियते, तेन न केवलं महासृष्टिषु महास्थितिषु महाप्रलयेषु प्रकोपतिरोधानेषु दीक्षाज्ञानाद्यनुग्रहेषु भगवतः कृत्यपञ्चकयोगो यावत्सततमेव व्यवहारे ऽपि । यदुक्तम् ।

सदा सृष्टिविनोदाय सदा स्थितिसुखासिने ।
सदा त्रिभुवनाहारतृप्ताय स्वामिने नमः ॥

इति ।

प्रतिक्षणमविश्रान्तः ।

इति ।

प्राकाम्यमात्मनि यदा प्रकटीकरोषि
व्यक्तीः

इति च ॥

इहान्तरर्थावभासः स्थित एव तत्किं तत्र कारणान्तरचिन्तयेति प्रकृतं प्रमेयं, तत्सिद्धये उपपत्तिरुक्ता, तेन विनेच्छारूपः प्रत्यवमर्शो न स्यादिति, तत्प्रसङ्गात्प्रत्यवमर्शविकल्पादिस्वरूपमुपपादितमिति शिष्याणां धियं समाधातुं प्रकृतं प्रमेयमुपपादयन्नुपसंहरति ॥

(७) एवं स्मृतौ विकल्पे वाप्यपोहनपरायणे ।
ज्ञाने वाप्यन्तराभासः स्थित एवेति निश्चितम् ॥

प्रकाशात्मा परमेश्वर एव यतो देहादिप्रमातृताभिमानदशायामपि वस्तुतः प्रमाता, एवमित्यतो हेतोरिदं सिद्धं भवति, स्मरणे ऽपोहजीविते च विकल्पे ऽनुभवज्ञाने चान्तराभासः प्रकाशविश्रान्तः स्थित एव, नात्र संशयः कश्चित्, यदि देहादिरेव परमार्थप्रमाता स्यात्तच्छरीरस्य प्राणस्य धियः शून्यस्य वान्तर्घटादीति न किं चिदेतत् । घटादिपरिहारे च देहादेस्स्थितत्वात् । परमार्थप्रकाशस्तु सर्वसह इति तदन्तर्विश्वमित्यनायाससिद्धमेतत् ॥

नन्वन्तराभासवर्गस्य बहिराभासनं यदि सर्वत्रास्ति कस्तर्हि स्मरणादावाभासभेदः, न चासौ न संवेद्यते, स्फुटादिप्रस्फुरणस्यानपन्हवनीयत्वादित्याशङ्क्याह ।

(८) किं तु नैसर्गिको ज्ञाने बहिराभासनात्मनि ।
पूर्वानुभवरूपस्तु स्थितः संस्मरणादिषु ॥

अनुभवज्ञानस्येदं नीलमित्यन्तराभासं बहिराभासयतः सोन्तर्भावाभासो नैसर्गिको निसृष्टः स्वातन्त्र्यादागतो न तु स्मरणादेरिवान्यज्ञानकृतवासनादिबलात्, स्मरणे उत्प्रेक्षणे प्रत्यक्षपृष्ठभाविन्यध्यवसाये च योन्तर्नीलाद्यवभासो बाह्यतया ऽवभासयितव्यो, नासौ स्वात्मीयो, ऽपि तु पूर्वानुभवसंस्कारजोसौ, तत्र संस्कारो नामानुभवस्य कालान्तरे ऽप्यनुवर्तमानता, अतो ऽसौ वर्तमानानुभवो यतो नीलाद्याभाससंभिन्न,स्ततस्तत्तादात्म्यापन्नं स्मरणाद्यपि तथा निर्भासते, तत एव स्मरणकालासंभवी स आभासस्तदनुभवपूर्वकालकलित एवेति स्वयं स्मरणादेर्निर्विषयत्वं गृहीतग्राहित्वं चोद्घोष्यते, एतदेवास्फुटत्वमिति सिद्धो ऽनुभवस्मरणादौ आभासभेदः । अन्तराभासवर्गस्य बहिराभासनाव्यवधानेन स्फुटत्वाव्यवधानेन तु तात्कालिकत्वाभावादस्फुटतेति ॥

नन्वनुभवज्ञानादैन्द्रियिकादन्यत्सर्वं ज्ञानं व्यवधानेन बहिराभासनरूपं प्राप्तमित्याशङ्क्य प्रविभागमाह ।

(९) स नैसर्गिक एवास्ति विकल्पे स्वैरचारिणि ।
यथाभिमतसंस्थाना भासना बुद्धिगोचरे ॥

यः प्रत्यक्षव्यापारमनुपजीवन्न्याक्षेपसारतया मनोराज्यसंकल्पादिर्विकल्पः स स्वैरं कृत्वा स्वप्रेरणेन परप्रेरणनैरपेक्ष्येण स्वातन्त्र्येण चरत्युदेति व्ययते च । तत्र यो बहिरवभासो नीलादेरन्तराभासमयस्य स नैसर्गिक एव, तथा ह्यपरिदृष्टपूर्वमपि श्वेतं दशनशतकलितकरयुगलयुक्तं दन्तिनमन्तः प्रमातृभूमौ स्थितं बहिरन्तःकरणभूमौ स्वच्छधीदर्पणात्मिकायां सविकल्पस्तात्कालिकमेवावभासयति ॥

अस्माच्चान्तराभाससम्भवसमर्थनप्रसङ्गागतादाभासभेदविचाराच्छास्त्रे यत्प्रयोजनं मुख्यतया ऽभिसंहितं स्वात्मनीश्वरप्रत्यभिज्ञानरूपं तदधिकरणसिद्धान्तनीत्या ऽनायाससिद्धमिति दर्शयति ।

(१०) अत एव यथाभीष्टसमुल्लेखावभासनात् ।
ज्ञान क्रिये स्फुटे एव सिद्धे सर्वस्य जीवतः ॥

यदिदं यथाभीप्सस्य बहिरसत्वादननुभूतस्यापि सम्यगुल्लेखनमवभासनं च विकल्पस्य प्रसङ्गाद्दर्शितमस्मादेव हेतोरिदमपि सिद्ध्यति, यः कश्चित्कीटो वा ब्रह्मा वा जीवनक्रियाविष्टस्तस्यावभासनरूपा ज्ञानशक्तिरुल्लेखनरूपा च क्रिया शक्तिर्नैसर्गिकी, ततस्तस्यां भूमौ व्यतिरिक्तेश्वरोपकल्पितपूर्वसिद्धसृष्ट्युपजीवनसम्भावनापि नास्तीति स्वमेवैश्वर्यंस्फुटं प्रत्यभिज्ञेयं च जानाति करोति चेति ज्ञानक्रियास्वातन्त्र्यलक्षणम् । एकवचनेन सर्वस्य जीवजातस्य. वस्तुत एकेश्वररूपतां सूचयतीति शिवम् ॥ ११ ॥

आदितः सूत्रश्लोकाः ६३ व्याख्याताः ॥

श्रीमदाचार्याभिनवगुप्तविरचितायामीश्वरप्रत्यभिज्ञासूत्रविमर्शिन्यामपोहनशक्तिनिरूपणम् ॥

॥ इति षष्ठमाह्निकम् ॥

अनन्तशक्तिरत्नानां यदेकाश्रयसंश्रयात् ।
विचित्रचन्द्रिकोल्लाससंसिद्धिस्तं स्तुमः शिवम् ॥

एवं स्मृत्यादिशक्तीनां वितत्य स्वरूपमियता दर्शितं, यत्त्वत्र प्रमातुरपि स्वरूपमुन्मीलितं तत्तासामेव शक्तित्वं समर्थयितुं, नहि स्वतन्त्रं शक्तिस्वरूपं भवितुमर्हतीति, अधुना तु तासां शक्तीनामेक आश्रयः, स च तच्छक्तिसंयोजनादिस्वाच्छन्द्ययोगान्महेश्वरो, न तु जडस्वरूपवह्न्यादिवद्दाहकपाचकादिशक्त्याश्रयमात्रमिति यदुभयमुपक्षिप्तं, "न चेदन्तः कृतानन्तविश्वरूप" इत्यत्र सूत्रे, तद्वितत्य निर्णेतव्यं, तत्रैकमाश्रयं निर्णेतुं "या चैषा प्रतिभे"त्यादि "व्यवहारोनुभूयते" इत्यन्तं चतुर्दशभिः श्लोकैराह्निकं प्रस्तूयते । तत्र श्लोकेनैक आश्रयः स्वरूपत उपदिश्यते, ततोपि द्वयेन व्यवहारः सर्वः सत्येकस्मिन्नाश्रये युज्यते नासतीत्यन्वयव्यतिरेकात्मा युक्तिरुच्यते, ततो व्यवहारस्वरूपं कार्यकारणभावतः, स्मरणतः, सत्यासत्यप्रविभागत,श्चेति संक्षिप्य श्लोकेन श्लोकाष्टकेन च प्रतिपाद्यते, ततः श्लोकेन सर्वार्थो निगम्यते इत्याह्निकार्थसंक्षेपः ॥

अथ श्लोकार्थो व्याख्यायते ।

यदुक्तं, सर्वस्य सिद्धे ज्ञानक्रिये जीवत इति तत्कथं, यावता ज्ञानादिव्यतिरिक्तः कोसावन्यो यस्य ते स्याताम्,काणाददिशा हि दूषितस्तदाश्रयः "ततो भिन्नेषु धर्मेषु" इत्यादिना तदेतदाशङ्क्य स्वदर्शनदिशा तमेकं स्वरूपत उपक्षिपति ।

(१) या चैषा प्रतिभा तत्तत्पदार्थक्रमरूषिता ।
अक्रमानन्तचिद्रूपः प्रमाता स महेश्वरः ॥

प्रतिभाति घट इति यद्यपि विषयोपश्लिष्टमेव प्रतिभानं भाति, तथापि न तद्विषयस्य स्वकं वपु,रपि तु संवेदनमेव तत्तथा चकास्ति मां प्रतिभातीति प्रमातृलग्नत्वात् । तथा च वेदः । "न तत्र रविर्भाति नेन्दुतारकं नैता विद्युतो भान्ति कुतो ऽयंवह्निः तमेव भान्तमनुभाति विश्वं तस्य भासा विश्वमिदं विभाति" इति । शत्रा ऽविरतस्फुरणत्वं, कर्मप्रवचनीयेन यदीयस्वातन्त्र्योपकल्पितनिर्माणक्रियाजनितो वेद्यवेदकभावरूपो लक्षणात्मा सम्बन्धो द्योतितः, केवलं विषयोल्लेखबलाद्बहिः क्रमावभासः समर्थितः, स सक्रमयौगपद्यादिविचित्ररूपो यः पदार्थानां वक्ष्यमाणेश्वरस्वातन्त्र्यरूपदेशकालशक्त्युपकल्पितः क्रमो देशकालपरिपाटी, तेन रूषिता, प्रतिबिम्बकल्पतयोपरक्ता या प्रतिभोक्ता, केवलं भिन्नसंवेद्येत्यादिना, एषेति च, सर्वस्य स्वप्रकाशरूपा, परमार्थतश्चान्तर्मुखत्वेन प्रकाशमात्रपरमार्थतया भेदाभावादक्रमा, सैव महेश्वरः । अविद्यमानोन्तः परिच्छेदो देशतः कालतः स्वरूपतश्च यस्याश्चितः संविदस्तदेव रूपं यस्येति । अत एव बहिर्मुखप्रकाशात्मकविज्ञानस्वभावस्य प्रमाणवर्गस्य योन्तः प्रत्याभासमिदमिदमित्यनन्तो विकल्पमयो विमर्शात्मा प्रमासमूहः, तत्र संयोजनवियोजनविश्रमणाद्यनेकप्रकारस्वातन्त्र्यपूर्णः शुद्धोहंप्रत्यवमर्शमयः प्रमाता स भण्यते, अतश्च बहिर्घटप्रकाशः, अयं घट इत्यन्तर्विकल्पः स्वीकृतपूर्वरूपः, अहमिति तदुभयविश्रान्तिस्थानमितीयत्पूर्णं प्रकाशस्य स्वरूपम् ॥

अत्रैवोपपत्तिं दर्शयितुमन्वयं तावदाह ।

(२) तत्तद्विभिन्नसंवित्तिमुखैरेकप्रमातरि ।
प्रतितिष्ठत्सु भावेषु ज्ञातेयमुपपद्यते ॥

संविन्निष्ठा हि विषयव्यवस्थितय इति यदुच्यते, न तद्भिन्नरूपप्रमात्मकसंविन्मात्रविश्रान्त्या सिद्ध्यति, अपि तु तास्ता विभिन्नाः संविदो निश्चयरूपाः प्रमात्मानो यास्तान्येव मुखानि द्वाराणि उपाया मार्गास्तैर्मुखैर्नदीस्रोतःस्थानीयैर्यद्यमी भावा नीलसुखादय उह्यमाना एकस्मिन्नहमिति प्रमातृरूपे महासंवित्समुद्रे प्रतितिष्ठन्ति आभिमुख्येन विश्रान्तिं भजन्ते, तत एषु परस्परं समन्वयरूपं यज्ज्ञातेयं तदुपपत्त्या घटते ज्ञातीनां भावस्तच्छब्दप्रवृत्तिनिमित्तं परस्परं जानीयुरिति कर्म चान्योन्ययोगक्षेमोद्वहनात्मकं जातेयं तच्च समन्वयाभिप्रायेणेह दर्शितं, न जडानां स्वतः समन्वयः कदाचिदपीति प्रतिपादयितुम् ॥

तथा च व्यतिरेकमुखेनैतदेवाह ।

(३) देशकालक्रमजुषामर्थानां स्वसमापिनाम् ।
सकृदाभाससाध्योसावन्यथा कः समन्वयः ॥

अर्थानां जडानां तज्ज्ञानानां तद्विकल्पानां तन्निश्चयानां च देशक्रमं कालक्रमं चात्यजतां स्वसमापिनां स्वरूपमात्रप्रतिष्ठानां कः समन्वयः न कश्चिदित्यर्थः । यतो ह्यसौ समन्वयः सकृदाभासेन देशकालाकारमिश्रीकरणात्मना योजनाभासेन साधयितुं शक्यो, नान्यथा, नहि पृथक्पृथक्परिक्षीणेषु स्रोतस्सु तदुह्यमानास्तृणोलपादयः समन्वयं कं चिद्यान्तीति, अनेकत्वेन देशादिभेद इत्याशयेन सकृच्छब्दस्तन्निषेधतात्पर्येण प्रयुक्तः ॥

तत्र कोसौ समन्वय इत्याशङ्क्य बहुतरव्यापकं कार्यकारणभावं तावद्दर्शयति ।

(४) प्रत्यक्षानुपलम्भानां तत्तद्भिन्नांशपातिनाम् ।
कार्यकारणतासिद्धिहेतुतैकप्रमातृजा ॥

इहाग्नौ प्रत्यक्षे धूमं नोपलभते, ततो धूमं प्रत्यक्षेण पश्यति, अग्निं तु यदि नोपलभते धूममपि नोपलभते, इति प्रत्य-

त्ताभ्यामनुपलम्भैश्चेति * पञ्चकात्कार्यकारणभावो धूमाग्न्योः सिद्ध्यतीति यदुक्तं, तत्कथम्, अग्निप्रत्यक्षेण हि धूमे न किं चि † दुल्लठमग्निलक्षणे धूमाद्भिन्नेंशे तस्यावगमहेतुत्वा,त्स्वस्वभावरूपे भिन्नेंशेविश्रान्तत्वाच्च,परविषयानवगाहनाज्ज्ञानान्तरस्वरूपानावेशाच्चेति,। पातिर्ज्ञापनवाची पतिश्च विश्रान्तिवाची प्रयुक्तस्तन्त्रेण, एवं धूमानुपलम्भादौ चतुष्टये वाच्यम्, ततश्चाग्निः, धूमाभावो, धूमो,ग्न्यभावो धूमाभाव, इत्येतानि वस्तूनि यथा पृथक्प्रमातृसंवेद्यानि धूमाग्न्योः कार्यकारणतां न गमयन्ति, तथा ‡ एकप्रमातृवेद्यान्यपि । विकल्पोप्यनुभवातिरिक्तं ज्ञापयन्नप्रमाणमेव । यदा तु प्रत्यक्षानुपलम्भस्रोतःपञ्चकेन तानि पञ्च वस्तूनि एकसंवित्समुद्रविश्रान्तानि कृतानि, तदैकीभूतानि प्रमात्रा स्वतन्त्रतया ऽन्योन्यसापेक्षाणि, न तु घटपटादिवद्भास्यन्ते, स एवैक आभासः कार्य्यकारणभावावभास इति, न किं चिदवद्यम् ॥

ननु प्रत्यक्षानुपलम्भैर्यत्कृतं तत्स्मरणबलादेकीकरिष्यति, उक्तं तावदत्र स्मृतिरप्यनुभूतातिरिक्तेर्थे न व्याप्रियते सापि च विज्ञानसमन्वयरूपा एकप्रमातृसद्भावं विना कथं स्यादिति दर्शयति ॥

(५) स्मृतौ यैव स्वसंवित्तिः प्रमाणं स्वात्मसंभवे ।
पूर्वानुभवसद्भावे साधनं सैव नापरम् ॥

इहानुभूतो विषयः प्रकाशते स्मृतौ, तत्र विषयस्य सा स्मृतिर्न नूतनः प्रकाशः, § अपि त्वस्य स प्राच्य एवानुभवप्रकाशः, स चानुभवे ज्ञानरूपत्वेन ज्ञेयरूपत्वाभावान्न ज्ञानान्तरसंवेद्यो,पि तु स्वप्रकाशः, स च स्मृतिकाले यद्यस,स्तत्कथं प्रकाशताम्, भवतु वासौ, तथापि स्मृतिप्रकाशो ऽनुभवप्रकाश इत्यन्योन्यभिन्नं युगलमिति न कदाचित्स्मृतिः स्यात् । तस्मादेतदेवमुपपद्यते, यदेव स्मृतिस्वसंवेदनं तदेवा ऽनुभवस्य स्वसंवेदनं न त्वपरं स्वसंवेदनव्यतिरिक्तं प्रत्यक्षमनुमानादिकं वा तत्र क्रमते । ततश्च तावत्कालव्याप्यविच्छिन्नमेकं यत्स्वसंवेदनं तदेव प्रमातृतत्त्वमिति सिद्धम् । अन्यत्रानुभवितरि स्मर्तान्यो नोपपद्यत इत्यनयाच्छायया स्मृत्या प्रमातृसिद्धिः पूर्वमुक्ता, इदानीं तु स्वसंवेदनैकीभावेन भङ्ग्यन्तरेणेति विशेषः ॥

नन्वनुभवातिरिक्तेप्यर्थे सन्तुविकल्पाः प्रमाणम्, अप्रामाण्यं हि बाधबलाद्भवति, बाधाभावे तत्कथं स्यादित्याशङ्क्य, सोप्ययं बाध्यबाधकभावः सत्यासत्यप्रविभाजनया विश्वेषां व्यवहाराणां जीवितभूतो नैकेन प्रमातृतत्वेन विना घटत इति वितत्य दर्शयति ।

(६) बाध्यबाधकभावोपि स्वात्मनिष्ठाविरोधिनाम् ।
ज्ञानानामुदियादेकप्रमातृपरिनिष्ठितेः ॥

बाधाभावे प्रामाण्यमित्येतदर्थमवश्यसमर्थ्यो यो बाधव्यवहारः सोपि कथमित्यपिशब्दस्यार्थः । इह शुक्त्या तावद्रजतस्य न का चिद्बाधा नाम क्रियमाणा दृश्यते, शुक्तिज्ञानेन रजतज्ञानं बाध्यत इत्यपि न युक्तं, स्वस्मिन्विषये आत्मनि च स्वरूपे द्वयोर्ज्ञानयोः परिनिष्ठितयोर्विश्रान्तयोरन्योन्यं विरोधस्याभावात् । अथायमेव विरोधः परस्परपरिहाररूपः, तर्हि सर्वेषां ज्ञानानां विरोधाद्बाध्यबाधकभावस्य परिनिष्ठेव न लभ्येति सुतरां विघटेत सत्येतरप्रविभागः । नञप्यत्र तन्त्रेण व्याख्येयः । एतदुक्तं भवति, यदि ज्ञानं स्वयं नश्यति, तदा किं ज्ञानान्तरेणास्य कृतं, नहि तेन तत्काले संभवता तस्य विषयापहारः कर्तुं शक्यः, न रजतमित्यपि ज्ञानं स्वं रजताभावं विषयीकुर्वन्न विषयमपहरेद्रजतज्ञानस्य । अथापि ज्ञानं ज्ञानान्तरेण नाश्यत इत्यपि पक्षः, तत्रापि सर्वेषां ज्ञानानामियमेव सरणिरिति किं चिदेव बाध्यमिति कथं स्यात् । यदा तु रजतज्ञानं शुक्तिज्ञानं चैकत्र स्वसंवेदने विश्राम्यतस्तदैतदुपपद्यते, तथा ह्येकत्रापि प्रमातृतत्त्वे विश्राम्यतां ज्ञानानां नैकप्रकारैव विश्रान्तिरपि तु विचित्रतयैव सा संवेद्यते । यथा हि; नीलमित्युत्पलमिति ज्ञाने प्रमातरि विश्राम्यन्त्यौ परस्परोपरागाभासेन विश्राम्यतः, घट इति पट इति परस्परानाश्लेषेण, शुक्तिकेति न रजतमिति वा ज्ञानं रजतमिति ज्ञानस्योन्मूलनं तदीयविमर्शात्मकप्रमातृरूपव्यापारानुवर्तनविध्वंसं कुर्वत्प्रमातरि प्रतिष्ठां भजते । एवं कार्यकारणादौ विश्रान्तिवैचित्र्यं प्रमेयासम्भवि प्रमात्रा स्वातन्त्र्येण निर्मितं तत एवास्य प्रमास्वतन्त्रतादायि वाच्यम् । एवमेकत्र प्रमातरि पूर्वज्ञानस्य परिवर्जनेन यतो निश्चिता स्थितिरतो बाध्यबाधकव्यवहार उपपन्नः, नीलादिवत्किल तानपि व्यवहारान्स एव परमेश्वरः स्वातन्त्र्यादाभासयति तत्तेपि सत्या एवेति ॥

अत्र परकीयं मतमाशङ्क्ते दूषयिष्यामीति ।

(७) विविक्तभूतलज्ञानं घटाभावमतिर्यथा ।
तथा चेच्छुक्तिकाज्ञानं रूप्यज्ञानाप्रमात्ववित् ॥

* आर्द्रेन्धनसंयुक्ते वह्नौ धूमोत्पत्तेः पूर्वं प्रत्यक्षत उपलभ्यमाने ऽपि धूमस्तदानीं नोपलभ्यते, अथ च तेन वह्निना दह्यमानआर्द्रेन्धने धूम उपलभ्यतइति प्रतीतं, तत्र याविमौ वह्नेर्धूमस्य चोपलम्भौ तौ प्रत्यक्षौ, यश्चैष धूमोत्पत्तेः प्राक्कालिको धूमोपलम्भाभावो यो चैतावग्निं त्वित्यादिव्यतिरेकप्रदर्शकवाक्येनोपदर्शितावुपलम्भाभावौ ते त्रयो ऽनुपलम्भा इत्येतत् पञ्चकमन्वयव्यतिरेकरूपं कार्यकारणभावसाधकम् ।

† उपकृतम् ।

‡ एकाश्रयानभ्युपगमे प्रमातुरेकत्वस्यैवासंभवेन समानसन्तानादेरेवौपचारिकैकत्वव्यवहारं प्रति विषयतायाः आवश्यकत्वेन चैत्रमैत्रादिनानाप्रमातृप्रमितस्येव सजातीयानेकसन्तानप्रमितस्यापि कार्यकारणभावग्राहकत्वं न संभवतीति भावः ।

§ गृहीतग्रहणस्वभावत्वात् तस्याः, ।

इह शुक्तिकाज्ञानं स्वात्मानं संविदत्स्वात्माभिन्नं प्रमाणत्वं बुध्यते, तत्परिच्छिनत्तीति न्यायात् तत्परिच्छेदनान्तरीयकश्चान्यव्यवच्छेद इत्यशुक्तिज्ञानरूपस्य रजतज्ञानस्याऽप्रमाणत्ववेदनं तदेवोच्यते, यदेतच्छुक्तिकासंवेदनाभिन्नप्रमाणत्ववेदनं, न चैतदपूर्वं यद्वस्त्वन्तरज्ञानमेव वस्त्वन्तराभावज्ञानमिति, शुद्धभूभागग्रहणमेव हि घटाभावज्ञानमिति प्रसिद्धमेतत्, एवमप्रमाणत्वसंवेदनमेव रजतज्ञानस्य बाध्यत्वमुच्यते । अतश्च बाध्यबाधकत्वमेवं सिद्धमिति चेदस्माभिरुच्यते तत्किं प्रमात्रैक्येनेति ॥

अत्र प्रसङ्गादभावव्यवहारस्य सिद्धौ तत्त्वमुपपादयिष्यन्दृष्टान्तमेव तावत्परदर्शने दूषयति ।

(८) नैवं शुद्धस्थलज्ञानात्सिद्धेत्तस्याघटात्मता ।
न तूपलब्धियोग्यस्याप्यत्राभावो घटात्मनः ॥

यो दृष्टान्त उक्तः स एव न, कुत इति चेदुच्यते, इह भूतलं न घट इति तादात्म्येनाभावो व्यवहर्तव्यः कदा चित्, कदा चिद्व्यतिरेकेण इह भूतले घटो नेति, तत्र शुद्धभूतलज्ञानादाद्योयं व्यवहारः सिध्यति । यत्र दृश्यत्वं नोपयोगि, उपलब्धिलक्षणप्राप्तिरपि हि यस्य नास्ति पिशाचादेः स्वभाववलाद्यस्य वा शब्दादेस्तद्ग्राहकश्रोत्रादिसामग्रीसाकल्यस्य तत्रैव ज्ञानसंसर्गिवस्त्वन्तरप्रतिपत्त्यभावेनापि निश्चयात्तस्यापि तादात्म्येनाभावो व्यवहार्यः, भूतले न पिशाचो न शब्द इति । यत्र तु दृश्यत्वं विशेषणमवश्यमुपयोगि तत्र व्यतिरेकेणाभावे व्यवहर्तव्ये नैषोऽभ्युपायः ॥

कुत इति चेद्,अतिप्रसङ्गादिति ब्रूमः, तमेव दर्शयति ।

(९) विविक्तं भूतलं शश्वद्भावानां स्वात्मनिष्ठितेः ।
तत्कथं जातु तज्ज्ञानं भिन्नस्याभावसाधनम् ॥

विद्यमाने ऽपि घटे भूतलं शुद्धमेव, नहि भावा मिश्रीभवन्ति, ततश्च तदापि शुद्धभूतलज्ञानमस्तीति सत्यपि घटे कथमभावो व्यतिरेकेण न व्यवह्रियते अत्र भूतले घटो नास्तीति, "तज्ज्ञानमिति" विविक्तभूतलभागज्ञानं "जात्विति" कस्यां चिदेव दशायां घटासन्निधानरूपायां भिन्नस्य घटस्याभावं साधयति न तु सर्वदेति केन प्रकारेण भवेत् । एतेनात्र भूतले पिशाचो नास्तीत्यपि स्याद् इत्यापतितं मन्तव्यम् ॥

नन्वेवं व्यतिरेकाभावनिष्ठो व्यवहारो लोके तावदविगीतः कस्यां चिदेव दशायां दृष्टस्तत्र का गतिरित्याशङ्क्य चिरंतनैरपरिदृष्टं तत्सिद्धिप्रकारं दर्शयति ।

(१०) किं त्वालोकचयोन्धस्य स्पर्शो वोष्णादिको मृदुः ।
तत्रास्ति साधयेत्तस्य स्वज्ञानमघटात्मताम् ॥

इह भाव एव भावान्तरस्याभाव इति व्यवहर्तव्यः इत्ययं तावदपरित्याज्यः प्रातीतिकः पन्थाः, तत्र भावस्य भावान्तरेण य आधार्याधारभावः स एव भावतदभावयोः, ततश्च भूतले घटव्यतिरिक्तं वस्त्वन्तरं शिलादिकमालोकपुञ्जादिकं वा यच्चाक्षुषे ज्ञाने भाति तदेव व्यवह्रियते भूतले घटाभावो भूतले घटो नास्तीति वा, यत्रापि नास्ति चक्षुर्व्यापारो नेत्रनिमीलनसन्तमसादौ,तत्रापि भूतले घटोचितकठिनस्पर्शविविक्तं मृदुमुष्णं शीतमनुष्णाशीतं वा गृह्णंस्तमेवात्र घटाभाव इति व्यवहरति, वायुस्पर्शस्य सर्वगस्यावश्यं भावादिति वाक्यार्थः । पदार्थस्तु "किं त्विति" स्वमतोपक्षेपाय प्रतिभाप्रश्नपरामर्शः, किं पुनरत्रन्याय्यमिति तत्राह । तत्र भूतले आलोकचयस्तावदस्ति ज्ञेयः, अन्धस्य चोष्णादिकः स्पर्शोस्ति, तस्यालोकचयस्य स्पर्शस्य वा यत्स्वं ज्ञानमन्यघटादिविविक्तेन स्वेन रूपेण ज्ञानं तत्कर्तृ तस्यालोकादेरघटरूपतां घटाभावरूपतां तत्र भूतले साधयतीति शक्योयमर्थः शक्तिलिङ्चेति लिङ् । आन्तरप्राणस्पन्दनजनितसूक्ष्मशब्दाकर्णनाच्च श्रोत्रादिसाकल्यं संभावयमानस्तमेव शब्दमेकज्ञानसंसर्गिणं शृण्वञ्छब्दान्तरं निषेधयति, नेहान्यः शब्द इति, तत्सूक्ष्मशब्दाभावमपि सूक्ष्मतमान्तर्नादावहितश्रोत्रो वेदयते, रसगन्धस्पर्शाभावेपि दन्तोदकरसं,त्रिपुटिकागन्धं,कायीयं च स्पर्शं, संवेदयमानेनैव संवेद्यः । नह्येकज्ञानसंसर्गयोग्यवस्त्वन्तरोपलम्भेन विनोपलब्धिकारणसाकल्यनिश्चयोस्तीत्येकान्त एषः । अचिरप्रवृत्ततत्तद्विषयानुभवकल्पितस्य तदैव ध्वंसनाशङ्कनात्करणस्य कारणसाकल्यनिश्चयः किमेकज्ञानसंसर्गितयेति चेन्न, तत्तदभावोपलिप्सुर्हि प्रयत्नेन तत्तदिन्द्रियाधिष्ठानं व्यापारयन्नेव लक्ष्यते ॥

नन्वेवमदृश्यस्यापि पिशाचादेर्निषेधव्यवहारो व्यतिरेकेणापि प्राप्नोति, स ह्यालोकपुञ्जो यथा घटादन्यस्तद्वत्पिशाचादेरपि तदेतदाशङ्क्याह ॥

(११) पिशाचः स्यादनालोको ऽप्यालोकाभ्यन्तरे यथा ।
अदृश्यो भूतलस्यान्तर्न निषेध्यः स सर्वथा ॥

आलोकपुञ्जो यद्यपि पिशाचाद्व्यतिरिक्तो, यद्यपि चालोकोस्त्यपिशाचात्मा, इत्येतावत्सिध्यति, तथाप्यत्र पिशाचो नास्तीत्येतदशक्यमध्यवसातुं, घटो ह्यालोकपूरमध्येप्यसम्भाव्यो घटसन्निधौ तत्रालोकपूराऽपसर्पणात्, अतश्च सिद्ध्यतीदमत्र घटो नास्तीति, पिशाचस्तु तादृक्स्वभावो यो भूतलमध्येप्यालोकमध्येपि वा भवन्भूतलस्यालोकस्य वा तां निबिडतां न प्रतिहन्ति, अतश्चालोकमध्ये तस्य संभावनात्कथं व्यतिरेकेण निषेधव्यवहारः । एवं रूपमध्ये रसादेः संभावनात् तस्यापि

निषेधः, यद्यप्यनालोक आलोकादन्यः पिशाचस्तथाप्यसौ भूतलस्यान्तर्मध्ये ऽदृश्यो भवतीति सम्भाव्यते यथा, तद्वदेवालोकस्याभ्यन्तरे सोस्ति इति सम्भाव्यत एव, ततश्च यद्यप्यालोकस्ततो ऽन्य इत्यनेन यथा निषिद्धः पिशाचस्तथापि सर्वप्रकारेण न निषिद्ध इति तदभावनिबन्धनाः कथं तत्र व्यवहाराः प्रवर्तन्तामिति श्लोकार्थः ॥

एवं प्रसङ्गादभावव्यवहारस्य तत्त्वमुपदर्श्य प्रकृते योजयति ।

(१२) एवं रूप्यविदाभावरूपा शुक्तिमतिर्भवेत् ।
नत्वाद्यरजतज्ञप्तेः स्यादप्रामाण्यवेदिका ॥

यथा ऽलोको घटाभाव इत्यालोके गृहीते प्राग् गृहीतस्य घटस्य न किं चिदायातं, तथैव शुक्तिज्ञानं रूप्यज्ञानाभाव इती यत्सम्भाव्यते, यथा घटज्ञानं घटज्ञानप्रामाण्यसंवित्, पटज्ञानाभावः पटज्ञानाभावप्रामाण्यसंवित्, इयता च न पूर्वप्रवृत्तं पटज्ञानमप्रमाणीभवति,एषा हि तस्य घटज्ञानस्य स्वरूपचिन्ता सर्वा, न ज्ञानान्तरस्याद्यस्य किमप्यतो जातम्, एवं शुक्तिरियमिति न रजतमिदमिति च ज्ञानमेव स्वात्मना प्रकाशताम्, अहं शुक्तौ रजताभावे च प्रमाणं न तु रजते इति, तावता तु प्राक्तनस्य रजतज्ञानस्य न किं चिद्वृत्तमिति तद्विषयीकृतं रजतं कथमसत्यं स्यात् ॥

नन्विदमित्यनेन तदेव परामृश्यते यत्र रजतज्ञानमभूत्तत्रैवेदानीं न रजतमिति शुक्तिरिति च ज्ञानं प्रमाणभूतं जातं तदतो ऽनुमीयते यत्प्राच्यं रजतज्ञानमप्रमाणमिति, नह्येतत्संभवति विरुद्धविषयावगाहिज्ञानद्वयं प्रमाणमेकत्रविषयीभवतीति, तदयमानुमानिको बाधव्यवहारो भविष्यतीत्याशङ्क्याह ।

(१३) धर्म्यसिद्धेरपि भवेद्बाधा नैवानुमानतः ।
स्वसंवेदनसिद्धा तु युक्ता सैकप्रमातृता ॥

न केवलं स्वसंवेदनान्न सिद्ध्यति बाधा, यावदनुमानतोपि न सिद्ध्यति,धर्मिणोसिद्धेरपि शब्दाद्धेतोरव्याप्तेश्च, अपिरुभयत्र नेयः, इह धर्मिणि सिद्धे सिद्धेन हेतुना स्मर्यमाणव्याप्तिकेन साध्यधर्मो ऽयोगव्यवच्छेदो ऽनुमानव्यापारः । इह च प्राच्ये रूपज्ञाने धर्मिणि अप्रामाण्यं साध्यो धर्मः, तत्र शुक्तिकाज्ञानं वा न रजतमिति ज्ञानं वा तज्ज्ञानविषयीकार्यत्वं वा विषयगतं हेतूक्रियते, न चैतद्युक्तं, तत्काले प्राच्यरूप्यबोधस्य बाध्यस्य धर्मिणो भावात्, न चापि तस्य शुक्तिज्ञानादयो धर्मा, न चापक्षधर्मात्साध्यसिद्धिः, अतः स्मर्यमाणं तद्धर्मिस्यात्, इत्यप्यसत्, अथ शुक्तिर्न रजतज्ञानस्य विषय इति साध्यते शुक्तिका ज्ञानविषयत्वादिति, तद्यदीदानीं, तत्सिद्धसाधनम्, अथ पूर्वं,तदा तत्पूर्वस्वसंवेदनेन बाध्यविषयता, केन चैवं व्याप्तिर्गृहीता, यत्रेदानीमन्यज्ञानं तत्र पूर्वमन्यत्र भवतीति, अनुमानान्तरेणेति चेदनवस्था, । एतेनैतत् प्रत्युक्तम्, एकस्मिन्विषये कथं ज्ञानद्वयं स्यादिति । को ह्येकविषयतां द्वयोर्ज्ञानयोर्जानीयात् । ते हि तावत्स्वात्मनि स्वविषये च विश्राम्यत इत्युक्तमित्यनुमानतोपि न बाधा, न च तथाभूतमपि व्यवधानमत्र प्रतीतौ संवेद्यते, स्वसंवेदनसिद्धतया झटिति भासनात्, अत एवैतदप्यशक्यं वक्तुं मा भूद्बाधा नामेति । एवं परपक्षे ऽनुपपत्तिं प्रदर्श्य स्वपक्षे एकप्रमातृपरिनिष्ठितेरुदियाद्बाध्यबाधकभाव इति वाक्येन प्रतिज्ञातं निगमयति । युक्ता सैकस्मात्प्रमातुर्यदि जायेतेति, स एव हि तथा निर्मातेति व्याख्यातमेव, स्थिते चैवं यदि व्यवहारसिद्धये ऽन्यथानुपपत्तिरप्युच्यते तदुच्यतां काममधुना सर्वं सिद्ध्यतीति ॥

न केवलमेते कार्यकारणभावस्मरणबाधाव्यवहाराः सकललोकयात्रासामान्यव्यवहारभूता एकप्रमातृप्रतिष्ठा,यावदवान्तरव्यवहारा अपि ये क्रयविक्रयादयः समला, उपदेश्योपदेशभावादयश्च निर्मला,स्तेपि एकप्रमातृनिष्ठा एव भवन्ति, व्यवहारो हि सर्वस्समन्वयप्राण इत्युपसंहारक्रमेण दर्शयति ।

(१४) इत्थमत्यर्थभिन्नार्थावभासखचिते विभौ ।
समलो विमलो वापि व्यवहारोनुभूयते ॥

तत्तद्विभिन्नेति श्लोकद्वयोक्तेनानेनोपपत्तिप्रकारेणान्वयव्यतिरेकात्मना यद्विभौ देशकालानवच्छिन्ने ऽत एवात्यर्थभिन्नैर्मायाबलाद्भेदैकप्राणितैर्नीलसुखाद्याभासैः * प्रतिबिम्बकल्पैरनतिरिक्ततया वर्तमानैः खचिते स्वरूपानन्यथाभावेनोपरक्ते विश्रान्तः सर्वो व्यवहारो ऽनुभूयते, अनुभव एवात्र दृढतमं प्रमाणमिति यावत्, अनुभूयते च सोपदेशैरवधानधनैः, येनैषां यैव संसारसंमता व्यवहारदशा सैव प्रमातृतत्त्वप्रख्यात्मिका शिवभूमिः । यदुक्तम् ।

ग्राह्य ग्राहकसंवित्तिस्सामान्या सर्वदेहिनाम् ।
योगिनां तु विशेषो ऽयं संबन्धे सावधानता ॥

इति । अप्रत्यभिज्ञातात्मपरमार्थानां समलो व्यवहारः अन्येषां स एव निर्मल इति शिवम् ॥ १४ ॥

आदितः सूत्रश्लोकाः ७७ व्याख्याताः ॥

श्रीमदाचार्याभिनवगुप्तविरचितायामीश्वरप्रत्यभिज्ञासूत्रविमर्शिन्यामेकाश्रयनिरूपणम् ॥

॥ इति सप्तममाह्निकम् ॥

* प्रतिबिम्बाधारेतरबिम्बस्य वास्तविकस्याभावात् प्रतिबिम्बकल्पैरित्युक्तम् ।

## ॥ अथ बालरामायणाख्यनाटकस्य ॥

॥ तृतीयोऽङ्कः ॥

अतः परं विलक्षलङ्केश्वरो भविष्यति ।
ततः प्रविशति गृध्रमिथुनम् ॥

पक्षी । प्रिये सुवेगे भगवतो लक्ष्मीपतिलाञ्छनस्य निसर्गनागशत्रोरमृताहरणविश्रुतविक्रमस्य शकुन्तचक्रवर्तिनो वैनतेयस्यास्मत्कुलप्रथमपुंसः सकलगोत्रधुरन्धरेण भविष्यतापत्येन नूनमन्तर्वत्न्यसि यत् ते निशाचरमांसास्वादनेन तत्कीलालकवलेन च दोहदविधेरयमुपस्थितः समयः ।

सुवेगा । अयि चित्तसिहण्ड तेल्लोक्केक्कमल्ले रक्खसरक्खाकरे पुलत्थकुमारे णन्दमाणे दुल्लहं दोहलअमिमं मण्णे * ।

चित्रशिखण्डः । भवति यथात्थ किमुच्यते रावणः खल्वसौ पश्य ।

साक्षाद्यत्प्रपितामहः कमलभूर्मानः स कोप्युन्नतो
न स्त्रीति प्रणनाम यश्च वरदां देवीं भवानीमपि ।
यच्छौर्योदयसाक्षिणी च सकला सा भूर्भुवःस्वस्त्रयी
तं व्यावर्त्य दशास्यमन्यचरितस्तोत्रेण लज्जामहे ॥ १ ॥

किंतु ।

गतः स कालो यत्रासीत् मुक्तानां जन्म वल्लिषु ।
वर्त्तते सांप्रतं तासां हेतवः शुक्तिसंपुटाः ॥ २ ॥

यतः श्रुतताडकाताडनोऽपि न निशाचरपतिरद्यापि निजदोर्दण्डचण्डिमोचितमाचरति ।

सुवेगा । हंहो गरुत्मद्गोत्तालङ्करण कधेसु कीदिसी उण सुन्दसुन्दरीए वहविडम्बणा संवुत्ता † ।

चित्रशिखण्डः । प्रिये श्रूयताम् । एकदा स भगवान् विश्वस्य मित्रं विश्वामित्रः सप्ततन्तुत्राणाय दाशरथिमयोध्यातः सिद्धाश्रमं सलक्ष्मणं राममानिनाय । वैतानिकं च विततान । तत्र यथोचितसामोद्गारिण्युद्गातरि शस्तमन्त्रसंस्कृताहुतौ होतरि प्रचरणकर्मधुर्ये ऽध्वर्यौ दिव्यां गिरमनुवर्तमाने यजमाने सम्यगवेक्षिताखिलकर्मणि ब्रह्मणि सरभसमनैरम्मदमदाम्भोलमनैन्दवममार्तण्डीयमचैत्रभानवं च ज्योतिरुदजृम्भत ।

सुवेगा । अच्चरिअमच्चरिअम् । तदोतदो ‡ ।

चित्रशिखण्डः । ततश्च सपुत्रदारेषु दिगन्तरादागतेषु किमिदमिति कान्दिशीकेषु मुनिषु तत्रोदघोषि जनैः ।

रक्ताभ्यक्तोरुसृक्का गुरुकवलवलज्जाङ्गलव्यग्रतालुः
फेत्कारैः फुल्लगल्लव्यतिकरगुरुभिः कम्पयन्ती जगन्ति ।
अन्योन्येनाग्रपाणिप्रणयि शवयुगं ताडका ताडयन्ती
सेयं द्राग्दृष्टदंष्ट्राङ्कुरकपणरणत्कारभीमा ऽभ्युपैति ॥ ३ ॥

सुवेगा । अहह भीसणाणं वि भीसणा हदासा । तदोतदो * ।

चित्रशिखण्डः । अथ स भगवान् कुशिकनन्दनस्तत्प्रमथनार्थं राममेव नियुयुजे ।

सुवेगा । दुक्करमुवक्कन्तं भअवदा कोसिएण । तदोतदो † ।

चित्रशिखण्डः । ततः संजातस्त्रीवधविचिकित्सामुद्रो रामभद्रः सविनयमिदमाह ।

स्त्रीराक्षसी कथमिवात्र पतन्तुबाणाः
प्रेष्यस्य ते कुशिकनन्दन तत्प्रसीद ।
आदिश्यतामिह हि को ऽपि तपस्वितन्त्रे
मन्त्राक्षरैः कतिपयैर्य इमामपास्येत् ॥ ४ ॥

सुवेगा । अहो उचिदकारित्तणं राहवस्स । तदोतदो ‡ ।

चित्रशिखण्डः । अथैकजन्मानुभूतक्षत्रब्रह्मभावः स भगवांस्त्रिपताकेन पाणिना चिबुके राममुन्नमय्य निजगाद ।

कालरात्रिकरालेयं स्त्रीति किं विचिकित्ससे ।
तज्जगत्त्रितयं त्रातुं तात ताडय ताडकाम् ॥ ५ ॥

सुवेगा । साकूतम् । तदोतदो § ।

चित्रशिखण्डः । ततः सहैव मुनिगिरां विरामेण रामकार्मुकतो भुजङ्गभोगभीषणा बाणपद्धतिराविरासीत् । उक्तं च लक्ष्मणेन ।

विध्वस्तहस्तयुगलं ललितान्त्रतन्त्र-
मुन्मुक्तरक्ततति खण्डितकालखण्डम् ।
उत्कृत्तकृत्ति रचितं च शरैः शरीर-
मार्ये ऽखिलाङ्गपरिताडिनि ताडकायाः ॥ ६ ॥

सुवेगा । डिम्भत्तणेवि तरुणराहवोचिदं चरिदं रामभद्दस्स । तदोतदो ‖ ।

चित्रशिखण्डः । ततस्त्रैशङ्कवस्य शोकशङ्कोः शमयिता सुन्दासुरवधूवधचरित्रेण चित्रीयमाणः ।

साकं लेभे जृम्भकास्त्रैः समस्तै-
र्विश्वामित्रस्तुष्यतो यं कृशाश्वात् ।
रामायासौ तं धनुर्वेदमाद्यं
प्रीतः प्रादात् तत्र सौमित्रये च ॥ ७ ॥

---

* अये चित्रशिखण्ड त्रैलोक्यैकमल्ले राक्षसरक्षाकरे पुलस्त्यकुमारे नन्दमाने दुर्लभं दोहदकमिमं मन्ये ।

† गरुत्मद्गोत्रालङ्करण कथय कीदृशी पुनः सुन्दसुन्दर्या वधविडम्बना संवृत्ता ।

‡ आश्चर्यमाश्चर्यम् ।

* अहह भीषणानामपि भीषणा हताशा । ततस्ततः ।

† दुष्करमुपक्रान्तं भगवता कौशिकेन । ततस्ततः ।

‡ अहो उचितकारित्वं राघवस्य । ततस्ततः ।

§ ततस्ततः ।

‖ डिम्भत्वे ऽपि तरुणराघवोचितं चरितं रामभद्रस्य ।

सुवेगा। ग्रहो से भरदमादामहस्स मुणिणो सुसदिससंजोग्रगब्भाचरिग्रविब्भमा। किंच तदो कोसिएण पडिवण्णं *।

चित्रशिखण्डः। ततश्च शकुन्तलायाः पिता सुकेतुसुतान्मथनपरीवितविक्रमं संक्रान्तकार्मुकोपनिषदं सलक्ष्मणं राममादाय शङ्करशरासनारोपणप्रवर्तितसीतास्वयंवरयात्रां मिथिलां पुरीं प्रत्युच्चचाल।

सुवेगा। तदोतदो †।

चित्रशिखण्डः। ततस्तेषां ताटकेयौ निजतेजस्तिरस्कृतमार्तण्डमरीचिर्मारीचः सततोद्यतबाहुः सुबाहुश्च जननीवधविरुद्धावध्वानमनुरुन्धाताम्।

सुवेगा। ठाणेक्खु ग्रहिणिविट्ठा दुट्ठा दुट्ठरक्खसीसुदा तदो किं संवुत्तं ताणं ‡।

चित्रशिखण्डः। यत्तयोर्मातुः। तथाहि।

कोदण्डात्तरलमुदञ्चतः शरस्य
द्राग्द्वेधा व्यधित सुधारया सुबाहुम्।
मारीचं सपदि च पुङ्खपत्रवातै-
रम्भोधेः पुलिनचरं चकार रामः। ॥ ८ ॥

सुवेगा। सपरितोषम्। रक्खसकुलक्खग्रकारिक्खु रामग्रन्दचरिदम् §।

चित्रशिखण्डः। तस्माच्च समरतः सुचिरसंचितेन निशाचराणामसृजा मांसेन च संपादय दोहदम्।

सुवेगा। णाह एव्वं तुए उवग्ररन्तेण णिज्जिदसग्रलसउन्तसीमन्तिणीसोहग्गा सुवेगा कग्रा किं पुण किंपि पुच्छीग्रदि ‖।

चित्रशिखण्डः। प्रिये समादिश्यताम्।

सुवेगा। कीस दशाणणोवि ग्रवमाणणासहणसहावो वट्टदि ¶।

चित्रशिखण्डः। ग्रयि सुपर्त्रिणि सर्वावमानी दशाननः कथमवमाननं सहते। किंतु सीताविरहवैधुर्यमत्रापराध्यति। न विना हिमानीमचण्डो मार्तण्डः।

सुवेगा। कीदसा उण सीदाविरहवेदणविणोदा दसाणणस्स **।

चित्रशिखण्डः। लङ्कापुरचारिणा त्रिकूटाचलपतिराजेन रत्नशिखण्डेन भवद्वैरेण निवेदिता एव।

सुवेगा। के उण दे *। चित्रशिखण्डः। नन्वेते कथ्यन्ते।

इन्दुः सीतावदनसदृशो जानकीनेत्रहृद्यं
नीलाम्भोजं बिसकिसलया मैथिलीहासभासः।
सम्यक्साम्यादिति च बहवस्तस्य जाता जगत्यां
लङ्काभर्तुर्जनकतनयाविप्रलम्भे विनोदाः ॥ ९ ॥

विनोदान्तरं पुनरिदमद्य। यत्किल भगवतः पुरन्दरस्यादेशात्तत्रभवता भरताचार्येण सीतास्वयंवरचरितसंबद्धं नूतनं नाटकमुपनिबद्धं सुरसदसि प्रयुक्तं च। तद्दर्शनाय दशाननेन द्रौहिणिर्भणितः तेनचाप्सरोभिः सह पुत्रशतमपि लङ्कां पुरीं प्रति प्रहितमिति।

सुवेगा। ता एहि ग्रह्मेवि णिग्ररज्जाहिट्ठाणं विंझगिरिं गदुग्र णिबिडणीडणिवासिणो दोहलग्रं संपादेह्म † इति परिक्रम्य निष्क्रान्तौ।

मिश्रविष्कम्भकः।

ततः प्रविशति रावणः प्रहस्तश्च।

रावणः। मदनाकूतमभिनीय। हृदय दिष्ट्या वर्द्धसे सीताप्रतिकृतिदर्शनेन। नेपथ्ये। जयजय त्रिजगत्पते पौलस्त्य सुखाय सायंतनी सन्ध्या भवतु देवस्य संप्रति हि।

माञ्जिष्ठीकृतपट्टसूत्रसदृशः पादानयं पुञ्जयन्
यात्यस्ताचलचुम्बिबिंबो परिणतं स्वैरं ग्रहग्रामणीः।
वात्यावेगविवर्तिताम्बुजरजश्छत्रायमाणः चणं
चीणज्योतिरितोऽप्ययं सभगवानर्णोनिधौ मज्जति॥१०॥

रावणः। दिष्ट्या गतं दिवसेन। भोभो प्रहस्त तदुच्यन्तां वैरिञ्चा मुनयः प्रस्तूयतामिति।

प्रहस्तः। नेपथ्याभिमुखमवलोक्य। भोभो भरतपुत्राः प्रेक्षणकक्रुते कृतत्वराः चणदाचरचक्रवर्ती तत्प्रस्तूयताम्। प्रविश्य कोहलः।

कर्पूर इव दग्धोऽपि शक्तिमान् यो जनेजने।
नमः शृङ्गारबीजाय तस्मै कुसुमधन्वने ॥ ११ ॥

रावणः। द्वादशग्रदेयं प्रवर्तिता नान्दी तत्प्रस्तावयिष्यति।

कोहलः। तत्रभवतः परमेष्ठिनो मानसभुवः प्रथमपुत्रस्य नाट्ययोनेर्भरताचार्यस्य कृतिरभिनवं सीतास्वयंवर इति नाटकं प्रयोक्तव्यम्। ग्रतः कमलसम्भवोपदिष्टनाट्यवेदेन स्वपौरुषपरितोषितखण्डपरशुदर्शितलास्यताण्डवप्रपञ्चचतुरेण भवतः दीयमानमवधानमभ्यर्थये। यतः।

---

* ग्रहो ग्रस्य भरतमातामहस्य मुनेः सुसदृशसंयोगगर्भाश्चरितविभ्रमाः। किंच ततः कौशिकेन प्रतिपन्नम्।

† ततस्ततः।

‡ स्थाने खल्वभिनिविष्टौ दुष्टौ दुष्टराक्षसीसुतौ। ततः किं संवृत्तं तयोः।

§ राक्षसकुलक्षयकारि खलु रामचन्द्रचरितम्।

‖ नाथ एवं त्वयोपकुर्वता निर्जितसकलशकुन्तसीमन्तिनीसौभाग्या सुवेगा कृता किं पुनः किमपि पृच्छ्यते।

¶ कथं दशाननोऽप्यवमाननासहनस्वभावो वर्तते।

** कीदृशाः पुनः सीताविरहविनोदा दशाननस्य।

* के पुनस्ते।

† तत् एहि ग्रावामपि निजराज्याधिष्ठानं विन्ध्यगिरिं गत्वा निबिडनीडनिवासिनो दोहदं संपादयावः।

श्रवणैः पेयमनेकैर्दृश्यं दीर्घैश्च लोचनैर्बहुभिः ।
भवदर्थमिव निबद्धं नाट्यं सीतास्वयंवरणम् ॥ १२ ॥

रावणः । किं पुनरिदमसंस्तुतं प्रसूयते । कः पुनरसौ यो ऽयमत्रमयि रावणे ऽपि सति सीतां स्वयं वृणुते । विमृश्य । भवतु निरङ्कुशाः कविवाचः ।

कोहलः । समन्तादवलोक्य अहो राक्षसराजस्य त्रिभुवनशिरःशेखरायमाणा प्रभुशक्तिः तथाहि ।

ज्योतींषि प्रस्तुवन्ति प्रतिफलनवशान् मौक्तिकन्यासलक्ष्मी-
मिन्दोर्ज्योत्स्ना वितानीभवति भगवतां दर्पणत्वं रवीणाम् ।
सन्ध्यारागश्च रङ्गे रचयति सहसा सान्द्रसिन्दूररेखां
स्वेदच्छेदाय चैते दिशिदिशि मरुतस्तालवृन्तीभवन्ति ॥ १३ ॥

भोभो लङ्केश्वरसभासदः स तत्रभवान् द्रौहिणिरेह ।

वाग्वैदर्भी मधुरिमगुणं स्यन्दते श्रोत्रलेह्यं
वस्तुन्यासो हरति हृदयं सूक्तिमुद्रानिवेद्यः ।
सद्यः सूते रसमनुपमप्रौढिजन्मा प्रसादः
संदर्भश्रीरिति कृतधियां धाम गीर्देवतायाः ॥ १४ ॥

ततश्च ।

सुवर्णबन्धविद्योति कुरुत श्रवणाश्रयम् ।
सच्छायमुल्लसद्वृत्तं काव्यं मुक्तामयं बुधाः ॥ १५ ॥

नेपथ्ये गीयते ।

प्रकटितरामाम्भोजः कौशिकवान् सपदि लक्ष्मणानन्दी ।
सुरचापदमनहेतोरयमवतीर्णः शरत्समयः ॥ १६ ॥

कोहलः । कथमुपक्रान्तं भरतपुत्रैः । यदियं रामलक्ष्मणानुगतस्य भगवतो विश्वामित्रस्य प्रावेशिकी ध्रुवा । तदहमप्यनन्तरकरणीयाय सज्जो भवामि । इतिनिष्क्रान्तः ।

॥ प्रस्तावना ॥

ततः प्रविशति विश्वामित्रो रामलक्ष्मणौ च ।

विश्वामित्रः । अहो तत्त्वे ऽभिनिविष्टं मनो जनकस्य । यद्वा याज्ञवल्क्याद्यजुर्विज्ञानविभवः खल्वसौ । स हि चन्द्रमसो ऽनुभावो यदस्य ग्रावाणो ऽपि निस्यन्दन्ते ।

रामलक्ष्मणौ । भगवन्नुपाध्याय किमसौ वैदेहः शुक्लान्यपि यजूंषि विज्ञाय याज्ञवल्क्यतो न वनाय प्रतितिष्ठते ।

विश्वामित्रः । वत्स दाशरथे राम वत्स लक्ष्मण स खलु राज्याश्रममहामुनिरित्थं समर्थयते ।

स्थितिः पुण्ये रण्ये सह परिचयो हन्त हरिणैः
फलैर्मेध्या वृत्तिः प्रतिनदि च तल्पानि दृषदः ।
इतीयं सामग्री फलति हि विरक्त्यै स्पृहयतां
वनं वा गेहं वा सदृशमुपशान्तस्य मनसः ॥ १७ ॥

रामः । सत्यमिदं गीयते । अतथाविधो न तथाविधरहस्यवेदी ।

रावणः । साक्षेपम् । अये अयमसौ रामो दाशरथिर्यस्ताडकारिस्ताडकेयारिश्च । मुनिमुद्दिश्य । अहो क्षत्रियब्राह्मणस्याभिचारे चातुर्यं यदस्मत्परिजने ऽपि जनितवानयमपि क्षत्रियडिम्भो डिम्भडम्बरम् ।

लक्ष्मणः । पुरो ऽवलोक्य । अये सविधीकृतधनुषि स्वयंवरयात्राभुवि वर्त्तामहे । यतः ।

क्वणत्कनककिङ्किणीमुखरतोरणैर्गोपुरै-
र्विचित्रमणिदीधितिस्फुरणसूचितेन्द्रायुधैः ।
चकास्त्ययमवाङ्मुखीकृतनभश्चरीलोचनः
स्थितोन्नतनरेश्वरः किमपि मञ्चहर्म्योच्चयः ॥ १८ ॥

विश्वामित्रः । समन्तादवलोक्य ।

पुरविजयि तदेतत् कार्मुकं चन्द्रमौले-
रयमिह जनकानामग्रणीर्योगिनां च ।
अयमपि च निमीनां धर्मबन्धुः पुरोधाः
सुरयजनसमुत्था मैथिली चेयमत्र ॥ १९ ॥

ततः प्रविशन्त्युपविष्टा यथानिर्दिष्टा जनकशतानन्दसीताः प्रतीहारी धात्रेयिका च ।

शतानन्दः । भोः सीरध्वज अद्य खलु ताडितताडकाकुटुम्बस्य रामभद्रस्य दर्शनेन दशरथशैशवमनुस्मारितो ऽस्मि यत्तेनापि ।

अदृष्टश्मश्रुभेदेन गतेन क्षणमित्रताम् ।
वज्रपाणेः कृतं राज्यमदैत्यमपदानवम् ॥ २० ॥

जनकः । एवमेवैतत् । न खल्विक्ष्वाकूणामपेक्षितवयःप्रक्रमो विक्रमः ।

शतानन्दः । हेमप्रभे शाम्भवधनुःसमीपवर्त्तिनीं कुरु राजपुत्रीं प्रवृत्ता स्वयंवरयात्रा ।

सीता धात्रेयिका तथा कुरुतः ।

विश्वामित्रः । वत्स लक्ष्मण यथानिर्दिष्टं जनकासनासन्नवर्तिनं मञ्चकैकदेशमारोहय रामभद्रम् । आरोह च स्वयं, येन सीरध्वजो ऽनुसंधत्ते ।

रामलक्ष्मणौ तथा कुरुतः ।

रामः । स्वगतम् । अये इयमसौ सीता यस्याः स्वयं भगवती वसुमती माता यागभूमिर्जन्ममन्दिरं इन्दुशेखरकार्मुकारोपणं च जामातृगुणः । सस्पृहं निर्वर्ण्य ।

समन्तात् साभोगं न च कुचविभागाञ्चितमुरो
नितम्बः स्वां लक्ष्मीमभिलषति नाद्यापि लभते ।
दृशो लीलामुद्रा स्फुरति च नचातिस्थितिमती
तदस्यास्तारुण्यं प्रथममवतीर्णं विजयते ॥ २१ ॥

विचिन्त्य । हंहो हृदय इतः प्रभृति नूनमस्खलितशासनः कुसुमायुधो भविता । पश्य ।

वहतु धनुरसङ्गादैत्तवं वैणवं वा
प्रहरतु च पृषत्कैः कौसुमैरायसैर्वा ।
तदपि मकरकेतुर्मूर्ध्नि धन्वीश्वराणा-
मियमिह युवभावं यावदङ्गीकरोति ॥ २२ ॥

सम्यग्विभाव्य । तामियं वयोवस्थामलङ्करोति यस्यामभिनवाकल्पविकल्पविभ्रमभङ्गिव्यग्रमानसा शङ्के दिवानिशं तिष्ठतीति । यतः ।

उत्तालालकभञ्जनानि कबरीपाशेषु शिक्षारसो
दन्तानां परिकर्म नीविनहनं भ्रूलास्ययोग्याग्रहः ।
तिर्यग्लोचनवर्तितानि वचसां छेकोक्तिसंक्रान्तयः
स्त्रीणां स्नायति शैशवे प्रतिपलं कोप्येष केलिक्रमः ॥ २३ ॥

रावणः । इयमसौ हृदयविशल्यकरणौषधिर्मैथिली । तदखिलनेत्रसंपातनेन पश्याम्येनाम् । सुचिरं विभाव्य ।

धम्मिल्लो ललितः स्मितं शुचि दृशौ दीर्घे भ्रुवौ भङ्गुरे
पाशाभे श्रवसी विशालमलिकं माञ्जिष्ठपृष्ठो ऽधरः ।
कण्ठो रुक्मरुचिः समुन्नतमुरः काम्यं च काञ्चीपदं
दृग्द्वन्द्वानि चिरं विभज्य दशधा तन्मैथिलीं पश्यत ॥ २४ ॥

आकाशे । सीतामनुसंधाय सोन्मादमिव ।

तरङ्गय दृशो ऽङ्गने पततु चित्रमिन्दीवरं
स्फुटीकुरु रदच्छदं व्रजतु विद्रुमः श्वेतताम् ।
क्षणं वपुरपावृणु स्पृशतु काञ्चनं कालिका-
मुदञ्चय मनाङ्मुखं भवतु च द्विचन्द्रं नभः ॥ २५ ॥

प्रतीहारी । समन्तादवलोक्य भूमिपालान् यत् सत्यं निरुपमरूपसंपदो जनस्य साहायकेन स भगवान् कुसुमायुधः किमपि कामिजनं विडम्बयति यतः ।

एतेनोच्चैर्विहसितकसौ काकलीगर्भकण्ठो
लुब्धश्चक्षुः प्रहितममुना साङ्गभङ्गः स्थितोऽयम् ।
हारस्यायं कलयति करेणैष हर्षाच्च किंचित्
स्त्रैणः पुंसां नवपरिगमः काममुन्मादहेतुः ॥ २६ ॥

किंचिदुच्चैः ।

शृणुत जनकशुल्कं क्षत्रियाः सर्व एते
दशवदनभुजानां कुण्ठिता यत्र शक्तिः ।
नमयति धनुरैशं यस्तदारोपणेन
त्रिभुवनजयलक्ष्मीर्मैथिली तस्य दाराः ॥ २७ ॥

रावणः । सक्रोधहासम् । अप्यलीककवे मुढ कथमिव करतललुलितकैलासशैलोच्चयाः कार्मुकलतारोपणे ऽपि दशकण्ठबाहवः कुण्ठाः । किंच रे विचक्षणंमन्य रुद्राद्रेस्तुलनमित्यादि पठति ।

हेमप्रभा । सहि जाणइ उवक्कन्ता धणुज्जता ता सफलपरिस्समं होदु संपअं पआवयिणो पिअसहीए रूवणिम्माणणिउणत्तणं अत्थु अ कदत्थो कुसुमकोअण्डस्स कोअण्डजोग्गो परिस्समो * । प्रतीहारी । पुरो ऽवलोक्य स्वगतम् । अये नरक एष प्रथममुपस्थितः । प्रकाशम् ।

कृष्णागुरुद्रुमतलेषु सुराङ्गनाभि-
रामोदिगन्धमृगबन्धुषु गीतकीर्तिः ।
शौरेर्वराहवपुषो जगतीकलत्रे
प्राग्ज्योतिषाधिपतिरेष सुतः किलाभूत् ॥ २८ ॥

किंच ।

अस्योद्योगे प्रसर्पत्पटुपटहरवोद्रिक्तदानद्रवाणां
सन्नाहन्यासदर्पद्विगुणिततरसां वारणानां भरेण ।
निःशेषन्यञ्चदुर्वीवलयपरिणतिस्रस्तसन्नाहबन्धः
पृष्ठाष्ठीलं विलोलं कलयति कलया जर्जरं कूर्मराजः ॥ २९ ॥

हेमप्रभा । दंसणमेत्तमहणिज्जत्तकामरूवो कामरूवेसरो एसो ता इमस्सिं तरुणतापिच्छरिंछोलीसरिछच्छाआ णिवडन्तु णिविडकडक्खविक्खेवा † ।

सीता । जो सुरपडिपक्खो असुरो ‡ ।

हेमप्रभा । सहि मा उत्तम्म ण असुरसमारोवणिज्जं सङ्करसरासणम् § ।

प्रतीहारी । अहो प्रभावो भवानीवल्लभस्य यद्वसुमतीसूनुरपि ।

दोर्दण्डचरितोच्चण्डो हरचिन्ताचमत्कृतः ।
कार्मुकारोपणायैव समुत्थाय पुनः स्थितः ॥ ३० ॥

रावणः । धिग्भवन्तं वासुन्धरेय धिक् । यदभिमानिनामारम्भस्यानिर्वहणमन्दो दुर्यशःकन्दः ।

प्रहस्तः । देव न सर्वो दशाननः ।

प्रतीहारी । अन्यतो ऽवलोक्य स्वगतम् । अये कथमसौ पाण्ड्यः । प्रकाशम् ।

यत्कीर्तिं मलयाद्रिचन्दनलताकुञ्जे भुजङ्गाङ्गनाः
श्रुत्वा तच्छबरीजनात् फणिपतेर्गायन्ति संगीतिषु ।
पाण्ड्यः सोऽयमुदन्वदन्वयवृषा किंचान्यदस्य स्वयं
दातुं मौक्तिककामधेनुरसमा सा ताम्रपर्णी सरित् ॥ ३१ ॥

---

* सखि जानकि उपक्रान्ता धनुर्यात्रा तत् सफलपरिश्रमं भवतु साम्प्रतं प्रजापतेः प्रियसख्या रूपनिर्माणनिपुणत्वम् । अस्तु च कृतार्थः कुसुमकोदण्डस्य कोदण्डयोग्यः परिश्रमः ।

† दर्शनमात्रमहनीयकामरूपः कामरूपेश्वर एषः । तदस्मिंस्तरुणतापिच्छकान्तिसदृशच्छाया निपतन्तु निबिडकटाक्षनिक्षेपाः ।

‡ यः सुरप्रतिपक्षो ऽसुरः ।

§ सखि मा उत्ताम्य नासुरसमारोपणीयं शङ्करशरासनम् ।

अपिच ।

वाचः संवननं सतां रणविधिः क्लृप्तामरीवल्लभो
नेत्रोन्मादकरं वपुर्मृगदृशां हस्तावचेयं यशः ।
इत्येतस्य निसर्गसुन्दरगुणस्यैतत्परं लाञ्छनं
पात्रापात्रविवेचनं न यदभूत् सर्वस्वदानेष्वपि ॥ ३२ ॥

हेमप्रभा । कपोलकन्तिणिब्भच्छिअमुद्धमहूअकुसुमपण्डिमे पण्डमेइणीणाहो एसो ता इमस्स वअणसदवत्ते णिवेसअ संचरन्तछच्चरणरिंछोलीसच्छाअं दिट्ठिम् * ।

सीता । जो दमिडचूडामणी † ।

प्रतीहारी । साकारसंवरणं विहस्य ।

रभसादयमादाय कोदण्डं मदनद्विषः ।
व्रीडाविनमितग्रीवो वन्दित्वा पुनरुज्झति ॥ ३३ ॥

रावणः । विहस्य अहो द्रविडपतेः सुसूत्रितस्त्यागकारणपरिग्रहः ।

प्रतीहारी । अन्यतोऽवलोक्य । स्वगतम् । अये अयं माहिष्मतीपतिः । प्रकाशम् ।

अत्रेर्लोचनशुक्तिमौक्तिकमणेर्देवात्सुधादीधिते-
र्गोत्रं हैहयभूभुजां यदुदगात्तस्मिन्नभूदर्जुनः ।
दोःसीमन्तितनर्मदेन वपुषा पौलस्त्यदर्पद्रुहः
सूनुर्वाञ्छितमेघनादविजयस्तस्यैष शत्रुंतपः ॥ ३४ ॥

रावणः । आः जरत्क्षत्रियप्रतीहार दुरभिधायिनमेनं त्वां मृष्यतां नाम दशास्यः । वत्समेघनादनिन्दापदं पुनरयं न क्षमते चन्द्रहास इति खड्गमादित्सते ।

प्रहस्तः । देव मुनिजनप्रयोज्यं प्रेक्षणकमेतत् तदलमकाण्डसंरम्भेण ।

प्रतीहारी ।

यन्मेखला भवति मेकलशैलकन्या
वीतेन्धनो वसति यत्र च चित्रभानुः ।
तामेष पाति कृतवीर्ययशोवतंसां
माहिष्मतीं कलचुरेः कुलराजधानीम् ॥ ३५ ॥

अपिच ।

अस्याहवे हरिचमूखुरखण्डितोर्वी-
पांसुप्रसारपरिपूर्तिभिया वहन्ति ।
नेत्राणि नित्यविकचानि मरुत्तरुण्यो
नीरन्ध्रपाणिपुटयुग्मपिधानवन्ति ॥ ३६ ॥

हेमप्रभा । गुरुअणदंसिअविणअणम्मदे णम्मदेक्कालङ्करणमाहिस्सईणेअरणरिन्दो एसो ता इमस्सिं तरलपह्मलधवलविसाला लोअणणरत्तणीला दिज्जन्तु सहसेति णेत्तपेरन्ता * ।

सीता । जो खत्तिअकुलकुमारोवि भविअ अवमणिआअपरसुरामपरक्कम्मो † ।

प्रतीहारी । स्वगतम् । अहो गर्वगरिमा हैहयकुलकुमारस्य । प्रकाशम् ।

त्रैयम्बके ऽपि कोदण्डे दोर्दण्डमदडामरः ।
अयमाद्रियते वीरो नारोपणपणक्रियाम् ॥ ३७ ॥

प्रहस्तः । मूढ दशकण्ठायसे किंतु न वन्दीकृतमहेन्द्रोऽसि ।

प्रतीहारी । अन्यतोऽवलोक्य स्वगतम् । अये अयमितश्चेदिपतिः । प्रकाशम् ।

सीतास्वयंवरनिदानधनुर्धरेण
दग्धात् पुरत्रितयतो विभुना भवेन ।
खण्डं निपत्य भुवि या नगरी बभूव
तामेष चैद्यतिलकस्त्रिपुरीं प्रशास्ति ॥ ३८ ॥

किंच ।

पाणिप्रस्थैर्बकुलसुमनःसौरभं यो मिमीते
दम्पत्योर्यः सुरतचरिते सौख्यसंख्यां करोति ।
यश्च ज्योत्स्नां चुलुकपुटकैः काममाचामतीन्दोः
शक्तः स्तोतुं स खलु निखिलान्यस्य कीर्त्यद्भुतानि ॥ ३९ ॥

हेमप्रभा । अमन्दमअणमअदाणपअडहाले डहालेसरो एसो ता इमं पेच्छ तिरिच्छदंसणलीलाणिमीलिअकालिमेण कलिअससिहण्डपण्डिमेण दिट्ठिच्छडाकडक्खेण ‡ ।

सीता । जो सो णम्मदालङ्किदमण्डलाहिपई § ।

प्रतीहारी ।

मानी गिरिशकोदण्डमयमाकलयन् दृशा ।
सद्यो निभृतमुन्मार्ष्टि निजदोर्दण्डमण्डलम् ॥ ४० ॥

रावणः । अहो मेकलपतेः स्वपरिच्छेदवैदग्धी ।

प्रतीहारी । अन्यतोऽवलोक्य । स्वगतम् । अयमितः सिंहलेश्वरः । प्रकाशम् ।

यस्याम्बुधिः स भगवान् स च रोहणाद्रिः
कोशाविमौ मदनमन्त्रपदैर्वचोभिः ।
सोऽयं प्रियो यदि हसन् मृदु सिंहलेन्द्रः
क्रीडानिधानमनुराधपुरं धिनोति ॥ ४१ ॥

---

* कपोलकान्तिनिर्भर्त्सितमुग्धमधूककुसुमपाण्डिमे पाण्ड्यमेदिनीनाथ एष तदस्य वदनशतपत्रे निवेशय संचरत्षट्चरणकान्तिसच्छायां दृष्टिम् ।

† यो द्रविडचूडामणिः ।

* गुरुजनदर्शितविनयनर्मदे नर्मदैकालङ्करणमाहिष्मतीनगरनरेन्द्र एष तदस्मिंस्तरलपक्ष्मलधवलविशाला लावण्यरक्तनीला दीयन्तां सहसैव नेत्रपर्यन्ताः ।

† यः क्षत्रियकुलकुमारोऽपि भूत्वा ऽवमानितपरशुरामपराक्रमः ।

‡ अमन्दमदनमददानप्रकटभाले दशार्णेश्वर एष तदिमं प्रेक्षस्व तिर्यग्दर्शनलीलानीमीलितकालिम्ना कलितशशिखण्डपाण्डिम्ना दृष्टिच्छटाकटाक्षेण ।

§ यः स नर्मदालङ्कृतमण्डलाधिपतिः ।

किंच ।

यस्योच्चण्डासिदण्डप्रहतिविदलितैर्वैरिवर्गैरलक्ष्य-
विप्तास्त्रोद्भ्रान्तवीरप्रतिबलकलनाशून्यसंग्राममार्गे ।
जीवत्संस्कारशक्त्या भुवि चरति चिरात्कृत्तबन्धं कबन्धे
दत्तो देवीभवद्भिः सह सुरकुसुमैरात्मनःसाधुवादः ॥ ४२ ॥

हेमप्रभा । असमन्तजोव्वणारोहणारम्भे रोहणमाणिक्कगिरिणो परमेसरो एसो ता इमं णिज्झाअन्ती कुण खणविसट्टकन्दोट्टणिउरम्बकरम्बिअं अम्बरद्धन्तं* ।

सीता । जो कोत्थुहसगोत्तरअणरइदसेहरालङ्किदसिरुद्देसो† ।

प्रतीहारी । स्वगतम् । अनिश्चिन्वता चितेन मन्दोद्यमद्वयम् । प्रकाशम् ।

अस्य चण्डीशकोदण्डे स्वदोर्दण्डे च भूपतेः ।
गतागतशते सख्यं विदधाते विलोचने ॥ ४३ ॥

रावणः । सिंहलपते किमिदं संदिह्यते न च संदेहदेहो वीरव्रतनिर्वाहः ।

प्रतीहारी । अन्यतोऽवलोक्य । स्वगम् । कथं मथुरानाथः । प्रकाशम् ।

हन्तुं रीपूनवतरिष्यति शार्ङ्गपाणिः
कंसप्रलम्बवृषकेशिमुखानिहेति ।
यस्यामशुश्रम पुराणकवेर्वचांसि
तामेष पार्थिवपतिर्मथुरां प्रशास्ति ॥ ४४ ॥

किंच ।

दृष्ट्वा व्योमनि बालमभ्रशकलं लेह्यं जगच्चक्षुषां
नीपानां कुसुमावतंसजननं नृत्यप्रदं बर्हिणाम् ।
यात्रावेशहरं जिगीषुमनसामस्य स्फुटत्कञ्चुकः ।
कान्ताभिः सुहृदां द्विषां च युगपत् प्राप्तः प्रमोदोत्सवः ॥४५॥

हेमप्रभा । णिसग्गसव्वङ्गमहुरे महुरेक्कालङ्करणं एसो ता इमस्सिं णिवेसअ दिट्ठिं जइ तुमं णिरुवमरूवरेहादंसणुक्कण्ठाविसंठुलमाणसासि‡ ।

सीता । जो विन्दावणविहारदुल्ललिओ§ ।

प्रतीहारी । स्वगतम् । कथमधिगतकोदण्डपाण्डित्योऽप्ययमुदास्ते । प्रकाशम् ।

आरोपयतु वा मा वा राजैष हरकार्मुकम् ।
सूच्यते ऽस्य धनुर्योग्या प्रकोष्ठकिणमालया ॥ ४६ ॥

रावणः । सोपहासम् । कथं मधुराधिपतिर्महाधन्वी न सुरचापारोपणकर्मणि परमप्रवीणः ।

प्रतीहारी । अन्यतो ऽवलोक्य स्वगतम् । अयमितो ऽवन्तिपतिः । प्रकाशम् ।

निर्वाणैकरुचिर्भवश्च भगवांस्त्रैलोक्यलीलागुरु-
र्देवो ऽसौ मकरध्वजश्च वसतो विश्रान्तवैरव्रतम् ।
यस्यामाश्रमतृष्णयैव नगरीमेकासनीं तामसौ
शिप्राम्भःपरिखावतीं नरपतिः सत्यव्रतो रक्षति ॥ ४७ ॥

किंच ।

वीरश्रीवेणिबन्धो भुजभुजगफणा शत्रुषु भ्रूपताका
देवस्य प्रेतभर्तुः पृथुतरपृतनाद्वीपिनीवीचिलेखा ।
क्रोधाग्नेर्धूमवर्तिः सुरयुवतिदृशां शृङ्खलादाम दीर्घं
लक्ष्मीलीलाकटाक्षः प्रतिसमरमभूदस्य जैत्रः कृपाणः ॥४८॥

हेमप्रभा । रहचलणचडुलणिअम्बुद्देसविसाले विसालेक्कसाभिलासो एसो ता कीरउ इमस्सिं क्खणमण्डलतण्डवपण्डिच्चपत्तलब्भूलदालङ्किदा दिट्ठी* ।

सीता । जो तिउरडहणट्ठाणट्ठिअमहाकालणामन्तरिअखण्डपरसुणामपवित्तिअणिहालवट्टो† ।

प्रतीहारी । स्वगम् । कथं धनुरारोपणपराङ्मुखोऽयम् । प्रकाशम् ।

नेत्रत्रिभागमात्रेण निरीक्ष्य हरकार्मुकम् ।
एष स्थितो वलत्कण्ठः सुहृदालापतत्परः ॥ ४९ ॥

रावणः । हंहो कुशस्थलीनाथ कोऽयमनाकलितकालपरिणामजर्जरे ऽपि धनुष्यनध्यवसायस्तव ।

प्रतीहारी । अन्यतोऽवलोक्य । स्वगम् । कथमयं क्रथकैशिकाधिपतिः । प्रकाशम् ।

वाग्देवता वसति यत्र रसप्रसूति-
र्लीलास्पदं भगवतो मदनस्य यच्च ।
प्रेङ्खद्विदग्धवनिताञ्चितराजमार्गं
तत्कुण्डिनं नगरमेष विभुर्बिभर्ति ॥ ५० ॥

किंच ।

रूपाधारैकवेधाः कुलगृहमुचितं चातुरीचेष्टितानां
कन्दर्पाव्हानविद्या हृदयहृतिकरो रागिणां मुक्तिहेतुः ।

---

* असमस्तयौवनारोहणारम्भे रोहणमाणिक्यगिरेः परमेश्वर एष तदिमं निध्यायन्ती कुरु क्षणविशदकमलनिकुरम्बकरम्बितमम्बरार्द्धान्तम् ।

† यः कौस्तुभसगोत्ररत्नरचितशेखरालङ्कृतशिरउद्देशः ।

‡ निसर्गसर्वाङ्गमधुरे मधुरैकालङ्करणमेष तदस्मिन्निवेशय दृष्टिं यदि त्वं निरुपमरूपरेखादर्शनोत्कण्ठाविसंष्ठुलमानसासि ।

§ यो वृन्दावनविहारदुर्ललितः ।

* रथचरणनितम्बोद्देशविशाले विशालैकसाभिलाष एष तत् क्रियतामस्मिन् क्षणमण्डलताण्डवपाण्डित्यपत्रलभ्रूलतालङ्कृता दृष्टिः ।

† यस्त्रिपुरदहनस्थानस्थितमहाकालनामान्तरितखण्डपरशुनामपवित्रितनिभालपट्टः ।

श्रुत्वैतन्नाम नष्टेष्वरिषु रणभुवो दिव्यभावात्तमेषु
व्यर्थः स्वःसुन्दरीणां वरवरणविधौ वेपलाभो बभूव ॥ ५१ ॥

हेमप्रभा । सिणिद्धसामलघणकुडिलकुन्दले कुन्दलेसरो एसो ता दूमस्स दंसणेण सहलीकुरु पसद्दसमप्पमाणं णअणणिम्माणम् * ।

सीता । जो मरहट्ठवरिट्ठो † ।

प्रतीहारी । स्वगतम् । अये प्रकृतिपराधीनं चरितमेतस्य । प्रकाशम् ।

हरचापसमारोपे प्रेरितोऽप्यनुजीविभिः ।
स्वरूपं वर्णयत्येष कुन्तविद्याविशारदम् ॥ ५२ ॥

रावणः । अति हि नाम शैशवोचितमाचरितमनेन ।

प्रतीहारी । अन्यतोऽवलोक्य । स्वगतम् । कथमयं काञ्चीपुरपरमेश्वरः । प्रकाशम् ।

देवस्य मन्मथजितो नयनानलोत्थे
जातः कुले कुलवतां प्रवरः कुमारः ।
कृत्स्नांस्त्रिलोकभवनाभरणैर्यशोभिः
काञ्च्याः पुरः पतिरयं पुरतश्चकास्ति ॥ ५३ ॥

किंच ।

वीराश्चण्डसिदण्डप्रहरणसुहृदः संमुखं संपतन्तो
ये जाताः पात्रमाजिष्वनिमिषसुमनोदामदानोत्सवस्य ।
अस्य प्रेङ्खत्तुरग्रप्रहतिभिरमरीभूय तैरेव भूयः
शेषाणां मूर्ध्नि मुक्ताः सुरकुसुममहावृष्टयः पुष्टभृङ्गाः ॥ ५४ ॥

हेमप्रभा । णवकञ्चणकञ्चिदामालङ्किदकञ्चिदेसे कञ्चिदेसेसरो एसो ता दूमस्स वअणहरिणङ्के विसम्मउ दंसिअमअणबाणसिट्ठी दिट्ठी ‡ ।

सीता । जो चन्दसेहरप्पसादीकदकुलक्कमागदवुसहलञ्छणो § ।

प्रतीहारी । स्वगतम् । कथमप्रमाणीकृतेन्द्राणीशाप इवायम् । प्रकाशम् ।

चापारोपमपास्यैव स्थितः सीतास्वयंवरे ।
दृश्यते भूभुजां नेत्रैरेष रोषकषायितैः ॥ ५५ ॥

रावणः । सक्रोधम् । रेरे निर्मर्याद स्वयंवरसमयं विभिन्दन्नेव न भवसि । विभाव्य सलज्जम् । नन्वेष भवसि । प्रहस्तः । विहस्य ।

अस्य स्वयंवरविभेदसमुत्सुकस्य
दृष्ट्वा स्फुरत्पुलकपत्त्मलमङ्गमङ्गम् ।
प्रत्युल्लसन्ति च रुषो विलयं च यान्ति
प्रेङ्खाप्रपञ्चमनुसृत्य दशाननस्य ॥ ५६ ॥

प्रतीहारी । अन्यतोऽवलोक्य स्वगतम् । कथमयं वीरशृङ्गारललितलम्पटो लाटेश्वरः । प्रकाशम् ।

दैवात् कुशेशयभुवो भुवनैकबन्धोः
संध्याविधौ कलयतश्चुलुकं जलस्य ।
यो जातवान् प्रतिमया स मुनिश्चुलुक्यस्तस्यान्वयैकतिलको नृप एष लाटः ॥ ५७ ॥

किंच ।

हेलावल्गितकण्ठनालविलसन्मुक्तालतालङ्कृतं
वासां संदधतीभिरेकविजयी सोऽयं द्विषां धामसु ।
भृङ्गाग्रग्रहक्लृप्तकेतकदलस्पर्द्धावतीनां दृशां
वारस्त्रीभिरदभ्रविभ्रमवशादातृप्ति पात्रीकृतः ॥ ५८ ॥

हेमप्रभा । अट्ठमीचन्दसुन्दरललाडे लाडेसरो एसो ता दूमस्सिं सामलधवलपवालसच्छसुरचावरिञ्छोलिच्छात्रं विच्छाअन्ता दिज्जन्तु लडहकडक्खविक्खेवा * ।

सीता । जो पदिदिणमण्डणमेत्तवावारे सत्तचित्तो † ।

प्रतीहारी । स्वगतम् । स्वभावेन मायावानयम् । प्रकाशम् ।

मार्जनाव्याजलग्नेन करेणोत्सरता पुनः ।
न गृहीतं न च त्यक्तमनेन हरकार्मुकम् ॥ ५९ ॥

रावणः । सत्यं शृङ्गारलीलालम्पट एवायं लाटराजः । किमत्र वीरव्यपदेशेन ।

प्रतीहारी । अन्यतो ऽवलोक्य ।
स्वगतम् । कथमयं कुशस्थलीनाथः । प्रकाशम् ।

विश्वामित्रमहामुनेर्यदजनि ब्राह्मण्यलाभात्पुरा
चात्रं गोत्रमयं तदादिनृपतिर्दिग्विश्रुतः सुश्रुतः ।
प्रोक्तं येन नृणां महाकरुणया चित्रं चिकित्सामृतं
कीर्तिस्तम्भविभूषणाश्च ककुभो यद्वाहिनीशैः कृताः ॥ ६० ॥

किंच ।

वासो जाम्बवपल्लवानि जघने गुञ्जास्रजो भूषणं
हस्तस्वस्तिकदानमञ्चलविधिर्धातुद्रवो मण्डनम् ।
उत्तंसः शितिकण्ठपिच्छलतिका वेषो ऽयमल्पैर्दिनैरस्यारातिवधूजनेन शबरीसंवासतः शिक्षितः ॥ ६१ ॥

---

* स्निग्धश्यामलघनकुटिलकुन्तले कुन्तलेश्वर एष तदस्य दर्शनेन सफलीकुरु प्रसृतिसमप्रमाणं नयननिर्माणम् ।

† यो महाराष्ट्रवरिष्ठः ।

‡ नवकाञ्चनकाञ्चिदामालङ्कृतकाञ्चिदेशे काञ्चिदेशेश्वर एष तदस्य वदनहरिणाङ्के विश्राम्यतु दर्शितमदनबाणसृष्टिर्दृष्टिः ।

§ यश्चन्द्रशेखरप्रसादीकृतकुलक्रमागतवृषभलाञ्छनः ।

* अष्टमीचन्द्रसुन्दरललाटे लाटेश्वर एष तदस्मिन् श्यामलधवलप्रवालस्वच्छसुरचापकान्तिच्छायामपि छादयन्तो दीयन्तां सुन्दरकटाक्षविक्षेपाः

† यः प्रतिदिनमण्डनमात्रव्यापारे सक्तचित्तः ।

हेमप्रभा। करअलगेज्झमज्झदेसे मज्झदेसणरिन्दो एसो ता दूमं कोदूहलफुल्लाविअणअणभरिज्जमाणवअणमण्डला पुलोएसु *।

सीता। जो मन्दरान्दोलिददुद्धसिन्धुसमुप्पण्णधण्णन्तरिचरमावदारस्स दिवोदासस्स पढमसिस्सो †।

प्रतीहारी।

वामहस्तधृतेशानधनुरन्येन पाणिना।

एष ज्यामटनीं नेतुं न शक्नोति न मुञ्चति ॥ ६२ ॥

रावणः। विहस्य। हंहो धनुर्वेदविद्याकुश्रुत सुश्रुत विविधेषु व्याधिषु भिषज्यतु भवान् न पुनः खण्डपरशवे धनुषि।

प्रतीहारी। समन्तादवलोक्य स्वगतम्। कथमथैते राजानः सर्वे ऽप्यहंपूर्विकया पार्वतीपतेर्भगवतो धनुरारोपयितुमुपस्थिताः। प्रकाशम्।

ओण्ड्रश्चण्डासिरश्मिर्मगधविभुरसावेष काम्बोजराजः

सौराष्ट्रोऽयं नरेद्रः शकनृपतिरितोऽप्यत्र नेपालपालः।

अन्ध्राणामीश्वरोऽग्रे सदसि समुदिताः क्ष्माभृतः सर्व एते

सीतायामिन्दुमौलेर्धनुषि च सरसाः प्रेमकौतूहलाभ्याम् ॥६३॥

हेमप्रभा। पेरन्तघोलन्तहारलदालङ्किदघणत्थणि घणत्थणिदपअण्डगम्भीरभीसणे सअलमहीमण्डलमण्डणेक्कपरक्कमे महामहीवइणो सञ्चरणचञ्चुरचञ्चरीअचञ्चुसंपुडट्ठिअसिहासंचिअचावलपुण्डरीअगब्भदलदोणीणं सरिच्छेण तिरिच्छेण अ सवणावदंसत्तणं दंसअन्तेण अच्छिविच्छोहेण जहिज्जं पेच्छ ‡।

सीता। कीस उण एदे णरिन्दा सअलखत्तिअमाणखण्डणखण्डपरसुचावारोवणमुहाडम्बरेण विडम्बअन्ति अत्ताणम् §।

प्रतीहारी। एकतरे पृथिवीपालाः।

एकाग्रया धिया ध्येयं न करस्पर्शमर्हति।

इति भक्त्या नमन्त्येते केवलं हरकार्मुकम् ॥ ६४ ॥

अन्यतरे तु राजानः।

आरोपणाय कलया कार्मुके कलिते ऽप्यमी।

तद्भारभुग्नसर्वाङ्गा जानुभिर्जगतीं गताः ॥ ६५ ॥

---

* करतलग्राह्यमध्यदेशे मध्यदेशनरेन्द्र एष तदिमं कौतूहलफुल्लितनयनभरितवदनमण्डला विलोकय।

† यो मन्दरान्दोलितदुग्धसिन्धुसमुत्पन्नधन्वन्तरिचरमावतारस्य दिवोदासस्य प्रथमशिष्यः।

‡ प्रान्तघूर्णद्धारलतालङ्कृतघनस्तनि घनस्तनितप्रचण्डगम्भीरभीषणान् सकलमहीमण्डलमण्डनैकपराक्रमान् महामहीपतीन् संचरणचञ्चुरचञ्चरीकचञ्चुसंपुटस्थितशिखासंचितचापलपुण्डरीकगर्भदलद्रोणीनां सदृक्षेण तिरश्चा च श्रवणावतंसत्वं दर्शयताऽक्षिविक्षोभेण यथेच्छं प्रेक्षस्व।

§ कथं पुनरेते नरेन्द्राः सकलक्षत्रियमानखण्डनखण्डपरशुचापारोपणमुखाडम्बरेण विडम्बयन्त्यात्मानम्।

रावणः। विहस्य परं नामीभिरारोपितमैशमापतं धनुरात्मापि नारोपितः प्रवीरजनसंख्यासु।

प्रतीहारी। स्वगतम्। कथमेते निखिलक्षत्रियाः क्षत्रियजनोचितेऽपि चापारोपणकर्मणि वितथसामर्थ्या वर्त्तन्ते। तदेतेषु परमनाकलितसत्वसारो विकर्त्तनकुलकुमार आस्ते। यद्वा किमनेनापि।

यस्य वज्रमणेर्भेदे भिद्यन्ते लोहसूचयः।

करोतु तत्र किं नाम नारीनखविलेखनम् ॥ ६६ ॥

विचिन्त्य। भवतु तथापि संकीर्त्तयाम्येनम्। अनाकलितसारा हि वीरप्रकाण्डप्रसूतिः।

रावणः। अनारोपितमसंभावनया लङ्केश्वरेण क्षत्रियैरप्यसामर्थ्येन मन्ये वृषध्वजायुधं दृप्यति। धनुरुद्दिश्य रेरे पुराणवेणुदलद्द्रोणीनिर्माण।

मुक्तं मयासि हरकार्मुक यत्तदानीं

मा तेन भूद् द्रढिमदर्पपरिग्रहस्ते।

त्वद्भङ्गमार्गपटुभिः स पुनः प्रकोष्ठै-

र्न्यस्तैव तिष्ठति हठैकरुचिर्दशास्यः ॥ ६७ ॥

इत्युत्थातुमिच्छति।

प्रहस्तः। देव नेयं जानकी नचेदमैन्दुशेखरं धनुः।

रावणः। तत्किमिदम्।

प्रहस्तः। प्रेक्षणकमिदम्।

प्रतीहारी।

यद्बिम्बमम्बरमणिर्यदपां प्रसूति-

र्नक्तं निषिञ्चति यदग्निशिखासु भासः।

ज्योत्स्ना निशासु हिमधाम्नि च यन्मयूखाः

पूषा पुराणपुरुषः स नमोऽस्तु तस्मै ॥ ६८ ॥

तस्मादजायत मनुर्नरराजबीजं

यस्यान्वये स सगरः स भगीरथश्च।

एकेन येन जलधिः परिखानितोऽय-

मन्येन सिन्धुसरिता परिपूरितश्च ॥ ६९ ॥

सावित्रात् मनुतो महीयसि कुले ये जज्ञिरे क्षत्रिया-

स्तेषामेष महारथो दशरथः क्ष्माचक्रमाक्रामति।

पीनांसः पृथुलोचनः प्रमदयन् कृत्स्नामयोध्यां गुणै-

र्विश्वामित्रवितीर्णचापनिगमस्तस्यैष रामः सुतः ॥ ७० ॥

रामः। वत्स लक्ष्मण कथमेष मां निर्दिशति। तदुत्थीयते।

लक्ष्मणः। एतदुत्थीयते। मञ्चावरोहणनाटितकेन परिक्रामतः।

प्रतीहारी। साधु रामभद्र साधु सत्यं मार्त्तण्डकुलैकमण्डनमसि।

रावणः । साधु रे क्षत्रियडिम्भ साधु तवैव परमखण्डितोऽभिमानग्रन्थिरनवधिरध्यवसायश्च । तन्मानुषीषु भवन्माता पुत्रवती ।

विश्वामित्रजनकौ । अतिदिलीपमतिदशरथमङ्गीकृतं कर्म रामभद्रेण ।

हेमप्रभा । कालेण बालत्तणं रामचन्दस्स चरिदेण उण सअलणरेन्दमण्डलीजेट्ठो * ।

शतानन्दः । सूर्यशिष्यान्तेवासिन्नतिसाहसिको रामभद्रः । यतः ।

क्रोदण्डमीशकरपीडनदृष्टसार-
मारब्धनिर्वहणनिर्वृतिपूर्वपुंसि ।
आरोपणाय परिसर्पति रामभद्रे
गोत्रं तुलां समधिरूढमहस्करस्य ॥ ७० ॥

प्रतीहारी ।

प्रणिपत्य कुमारोऽयं मृडान्यै च मृडाय च ।
उद्युक्तो धनुरादातुं न विद्मः किं करिष्यति ॥ ॥ ७१ ॥

हेमप्रभा । जं किदं भअवदा दक्खाअणीवल्लहेण । किंच केसरिकिसोरसरिच्छपओट्ठाणं पुरिसाणं भुअदण्डमण्डणिज्जे कज्जे किं विअ दुक्करं णाम † ।

रामः प्रदक्षिणयन् । स्वगतम् ।

वैदेहीवरबीजाय सुरसारमयाय च ।
तुभ्यं चण्डीशचापाय त्रिपुरप्लोषिणे नमः ॥ ७२ ॥

सरभसमादाय । प्रकाशम् ।

मद्दोर्दण्डद्वयाक्रान्त्या वत्स लक्ष्मण लक्षय ।
स्फुटिष्यति न कोदण्डं त्रुटिष्यति न वा गुणः ॥ ७३ ॥

रावणः । विहस्य इदं तच्चटगर्जितं नाम ।

लक्ष्मणः । सोढशङ्करकराकर्षणकर्मणि कार्मुके केयमसम्भावनाऽऽर्यस्य ।

रामः । तर्हीदमारोप्यते ।

रावणः । इयमपि सा नटबिभीषिका ।

प्रतीहारी । समन्तादवलोक्य ।

यथायथा धूर्जटिचापकोटिं
रामानुबन्धादधिरोहति ज्या ।
तथातथा सर्वनरेश्वराणां
मुखानि मूलान्मलिनीभवन्ति ॥ ७४ ॥

लक्ष्मणः । न केवलं वैलक्ष्यवतां महीपालानामिङ्केन वदनमालिन्येन संपन्नम् । अपितु ।

आर्ये रुद्रशरासनं तुलयति स्मित्वा स्थितं पार्थिवैः
सिञ्जासज्जनतत्परे विहसितं दत्त्वा मिथस्तालिकाः ।
आरोप्य प्रचलाङ्गुलीकिसलये म्लानं गुणास्फालन-
स्फाराकर्षणरुग्णपर्वणि पुनः सिंहासने मूर्च्छितम् ॥ ७५ ॥

प्रतीहारी । सहसाऽवलोक्य न केवलमाकृष्टं भग्नं च किंचिदुच्चैः ।

संस्पर्शादपि मन्यरस्य मरुतः सिञ्जानसिञ्जालतं
सार्द्धं क्षत्रवधव्रतैकगुरुणा क्रौञ्चाचलद्वेषिणा ।
दोर्दण्डाञ्चलमण्डलीकृतमिदं रामेण राज्ञां पुरः
प्रागप्राप्तपराभवं भवधनुष्टङ्कारवत् त्रुट्यति ॥ ७६ ॥

रावणः । सेयं कवीनां वचनकामधेनुः । यदसद्भूतमपि सूते ।

विश्वामित्रः । सखे जनक फलितमस्मद्धनुर्वेदविद्यान्तेवासितया रामभद्रस्य । तथाहि ।

गुर्वीं मौर्वीं विधुन्वन् विदधदतिभियः सप्तपातालपालान्
वृन्दैर्वृन्दारकाणां प्रसरति परितस्तूर्णमाकर्ण्यमानः ।
ठात्कारः खण्डिताशाकरिकरटतटीदानदुर्वर्ण एष
त्रुट्यत्पर्वोऽनुसंध्येर्वृषधरधनुषो रामदोर्यन्त्रितस्य ॥ ७७ ॥

शतानन्दः । आश्चर्यमाश्चर्यम् । अतिभवानीवल्लभं रामभद्रचरितम् । तथाहि ।

ओङ्कारो विश्वरक्षाक्रमनिगमविधेरन्तकस्याट्टहासः
संहर्ता शात्रवाणां पटुपटहरवः कीर्तिनिर्वासनस्य ।
दोर्यन्त्रासज्जिसिञ्जानमदटनिरटत्सर्वपर्वप्रसूत-
ष्ठीत्कारः शम्भुचापे जयति विजयिनो राघवस्यादिबन्दी ॥ ७८ ॥

जनकः । नमो भगवते नीललोहिताय ।

विश्वक्षमातलनरेश्वरदुष्करेऽस्मिन्
सद्यः कृते गुरुणि कर्मणि राघवेण ।
चण्डीशचापमथनाद् व्यथते च चित्तं
जामातृलाभरभसान्मम मोदते च ॥ ७९ ॥

सीता । सहि हेमप्पहे भग्गं भग्गस्स भअवदो चावं * ।

हेमप्रभा । संपण्णं च पिअसहीए पाणिग्गहणं † ।

रावणः । उच्चैर्विहस्य, प्रज्ञावतां हि चतुरस्तुद्रमतिविपयासु धिषणासु प्रतिवसति । यतः ।

रामेण मुग्धमनसा वृषलाञ्छनस्य
यज्जर्जरं धनुरभाजि मृणालभञ्जम् ।
तेनामुना त्रिजगदर्पितकीर्तिभारो
रक्षःपतिर्ननु मनाङ्न विडम्बितोऽभूत् ॥ ८० ॥

रामः । सकण्ठरोधम् ।

* कालेन बालत्वं रामचन्द्रस्य चरित्रेण पुनः सकलनरेन्द्रमण्डलीज्येष्ठः ।

† यत् कृतं भगवता दाक्षायणीवल्लभेन । किंच केसरिकिशोरसदृक्षप्रकोष्ठानां पुरुषाणां भुजदण्डमण्डनीये कार्ये किमिव दुष्करं नाम ।

* सखि हेमप्रभे भग्नं भर्गस्य भगवतश्चापम् ।

† संपन्नं च प्रियसख्याः पाणिग्रहणम् ।

वाचा कार्मुकमस्य कौशिकपतेरारोपणायार्पितं
मद्दोर्दण्डहठाञ्चनेन तदिदं भग्नं कृतव्यक्ककृति ।
नो जाने जनकस्तदत्रभगवान् व्रीडावशादुत्तरं
त्रिलिम्बे नतकन्धरो भगवते रुद्राय किं दास्यति ॥ ८१॥

लक्ष्मणः । अहो महदन्तरं पुरुषकाराणाम् ।

भग्नं निरीक्ष्य हरकार्मुकमित्ययैते
रोमाञ्चकञ्चुकमिदं वपुरुद्वहामः ।
आर्यस्तु कण्ठधृतवाणि विलक्षभावात्-
नासानिषण्णनयनं वदनं बिभर्ति ॥ ८२ ॥

विश्वामित्रः । किमुच्यते दिलीपकुलालङ्करणं दशरथोऽस्य जनयिता ।

शतानन्दः । महाराज सीरध्वज यथोचितमत्र प्रस्तूयतां समर्प्यतां वैदेही रामभद्राय ।

जनकः । मञ्चावरोहणनाटितकेन परिक्रम्य ।

रणचण्डीशकोदण्ड निजदोर्दण्डनिर्जिताम् ।
गृहाण पाणौ वैदेहीं पद्मा पद्मे निषीदतु ॥ ८३ ॥

इति पाणौ पाणिमर्पयति ।

रावणः । सक्रोधम् । आः कथमयमलीकदुर्विदग्धः क्षत्रियबटुकीटो ममापि लङ्केश्वरस्य पुरतः सीतायाः पाणिं पाणिना पीडयति । तदेव न भवति इति संरभते ।

प्रहस्तः । विहस्य स्वगतम् ।

दृष्ट्वैतां रभसादलीकजनकप्रत्तां मृषा मैथिलीं
हस्ताग्रे नटराघवेण विधृतां रागेण रङ्गाङ्गणे ।
उत्ताम्यन्ति रुषा कषायितदृशो देवस्य लङ्कापते-
र्दोर्दण्डा विधृतायुधाश्च वदनान्याक्लिष्टदंष्ट्राणि च ॥८४॥

प्रकाशम् । राक्षसपते पर्यवसितप्रायः प्रेक्षाविधिः । तद्भावयतु चतुराभिनयां वृद्धिं रसवृद्धिं च नर्तकानां देवः ।

रावणः । सस्मरणलज्जम् । आत्मगतम् । कथं प्रेक्षणकमेतत् । मुधा संरब्धमस्माभिः । प्रकाशम् । सखे प्रहस्त अपि स्मरसि दशकन्धरस्य प्रतिज्ञाम् ।

प्रहस्तः । देव स्मरामि कुर्वन् मौर्वीत्यादि पठति ।

रावणः । तदिदमनुष्ठास्यते ।

द्वितीयनेपथ्ये । वैतालिकः । जयजय महाराज सीरध्वज सुखाय सायन्तनी सन्ध्या तत्रभवतो भवतु देवस्य जामात्रा रामभद्रेण सह संप्रति हि ।

संकोचव्रतमादिशन् जलरुहां देवस्त्रिवेदीतनुः
सोऽयं विद्रुमकन्दसुन्दरवपुर्यात्यस्तमस्तातपः ।
माञ्जिष्ठत्रसरच्छदैकसुहृदां यद्दीधितीनां पुरः
प्रेङ्खद्भाति सनालनीलनलिनप्रस्ताररम्यं तमः ॥ ८५ ॥

अपिच ।

दिनसन्ध्यावरवध्वोर्वहति विवाहाग्निविभ्रमं भानुः ।
लाजायते च साक्षादुत्तरलस्तारकानिकरः ॥ ८६ ॥

पुनर्नेपथ्ये ।

देव देव्यो विज्ञापयन्ति ।

जनक कुलवधूनामेष सज्जः समाजो
विवहनविधिबन्धुर्वर्तते चाप्यनेहा ।
अनुभवितुमुदारां कौतुकागारदीक्षां
तदिह सह दुहित्रा प्रेष्यतां रामभद्रः ॥ ८७ ॥

जनकः । एष प्रेष्यते स्वयं च प्रस्थीयते । प्रतीहारस्य कर्णे एवमेवम् ।

प्रतीहारी । किंचिदुच्चैः ।

इह सुजनसमाजे सङ्गता ये नरेन्द्राः
स्फुटमुकुलितपाणिः प्राह सीरध्वजस्तान् ।
सविधमधिवसन्तो मत्पुरीगोपुराणां
परिचिनुत सपर्यां सोत्सवो यावदस्मि ॥ ८८ ॥

इति निष्क्रान्ताः सर्वे सीतास्वयंवरो नाम गर्भाऽङ्कः ।

रावणः । विचिन्त्य ।

राज्ञां वृथा सदसि रामयशः प्रकीर्णं
तूर्णं मुधा मुकुलिता च पिनाककीर्त्तिः ।
दीर्णेन जीर्णधनुषा गिरिशोज्झितेन
यातः पदं मम रुषां च मृषैव रामः ॥ ८९ ॥

सीतामनुसंधाय । तद्वक्ष्मित्यादि पठति ।

प्रहस्तः । देव समाप्तमेव देवप्रेक्षणकम् । तत् प्रेष्यन्तां वैरिञ्चा मुनयः परमेश्वरोऽपि प्रविशत्वभ्यन्तरम् ।

इति परिक्रम्य निष्क्रान्तौ ।

॥ विलक्षलङ्केश्वरो नाम तृतीयोऽङ्कः ॥

---

श्रीमन्महाराजाधिराजकाशीनरेशसभापण्डितवङ्गदेशनिवासिताराचरणतर्करत्नकृतकाशीराजकाननशतकनामधेयकाव्यस्यांशाः ॥

हे पार्वतीश मदनान्तकरः पुरा त्वम्
कालक्रमाद्भवसि चेन्मदनस्य वश्यः ।
दुर्नीतिदग्धजगतो मदनस्य शान्त्यै,
को वा भवेत् प्रभुरहो त्रिषु विष्टपेषु ॥ ४१ ॥
त्वां वीक्ष्य संप्रति ममेह मतिः स्थिरैषा,
कारागृहे गिरिश बद्धतमः स्मरेण ।
नो चेत् कथं कुसुमबाणधरैः पलाशैः
संवेष्टितोऽसि न बहिर्गमने समर्थः ॥ ४२ ॥

कामस्य चान्तकतया मदनान्तकत्वम्,
सार्थं करोषि मदनान्तकनाम नाद्य ।
कामोऽन्तको भवति यस्य स एव भूत्वा,
सार्थं करोषि पुनरेव तदात्मनाम ॥ ४३ ॥
मृत्युंजयोऽपि भगवन् विजितः स्मरेण,
जाने ततस्त्रिभुवनस्य जयी मनोजः ।
बाणप्रसूननिचयः स्वयमङ्गहीनो
लव्यं मनः स पुनरीश इदं विचित्रम् ॥ ४४ ॥
ज्ञातो मया गिरिश चन्द्रधरः पुरा त्वम्
भूपार्थमद्य मम निश्चय एष देव ।
कामे हतेऽमृतकरेण हि तस्य सख्या,
पादाहतः शिरसि तेन तु चन्द्रमौलिः ॥ ४५ ॥
जानन्ति ये न परमार्थकथां गिरीश,
ते वै वदन्ति तव भालतले तु नेत्रम् ।
जानीमहे वयमहो स्मरबाणपात-
दुर्लिप्रदारुणतरक्षतमेतदत्र ॥ ४६ ॥
नैवेन्द्रियस्य नियमेन पुराविदस्त्वाम्
हे चन्द्रखण्डधर योगिवरं वदन्ति ।
योगात् सदा दयितयैव पुनर्विशङ्के
नो चेत् कथं विहरसि त्वमरण्यमध्ये ॥ ४७ ॥
एवं वदन् कृशतनुर्विरहाधिमग्नो
विज्ञाय तं शिवमुदाररसैकसिन्धुम् ।
तापैकहेतुमनिवार्यगतिं मनोजम्
ज्ञात्वा पुनर्वदति शुष्कतरोष्ठभागः ॥ ४८ ॥
केचिद्वदन्ति गरलं प्रखरस्वभावम्
केचिद्वदन्ति दहनं हननाय तीक्ष्णम् ।
ब्रूमो वयं निखिलतत्त्वविवेकदृष्ट्या
काम त्वया सदृशवीर्यधरो न कश्चित् ॥ ४९ ॥
पुष्पं धनुः स्वयमपेततनुर्मधुस्ते,
मित्रं रथो हि पवनो मृदुमन्दगामी ।
लव्यं मनः प्रचपलं नहि भेदयोग्यम्
व्यस्तं समस्तमिह यत् तदतीव चित्रम् ॥ ५० ॥
यो दर्पितोऽस्ति नवयौवनराज्यभोगात्
तत्रैव गच्छ बलवान् यदि कामदेव ।
बालावियोगदहनैः परिदग्धकाये
दीने जने विफलमात्मशरप्रपातः ॥ ५१ ॥
कं वा वदामि खलु कः शृणुयान्महात्मा,
कृत्वा कृपामहह दीनजनस्य वाचम् ।
आयातमेतमटविच्छविदर्शनार्थम्
हाहा कथं दहति तीक्ष्णतरः स्मरोऽसौ ॥ ५२ ॥

ये राजसूयप्रमुखैश्च मखैः प्रसिद्धा
जीवन्ति ते न निहतास्तु युधिष्ठिराद्याः ।
आजन्मसाधितवधूनरवृन्दघात-
स्त्वं केन जीवसि पुनस्तपसा न जाने ॥ ५३ ॥
दुर्वृत्तवृन्ददमनाय पुरा पुराणो
देवस्त्रिलोकदयितो बहुधावतीर्णः ।
हत्वा दशास्यमुखदुर्जयदस्युसङ्घम्
त्वां जीवयन् किमु चकार पुनर्न जाने ॥ ५४ ॥
पापं क्षयाय जगतां सुकृतं जयाय
यद्गीयते तदिह मूढजनस्य वाक्यम् ।
नो चेत् कथं विविधपापचयैकपात्रम्
त्वं वर्द्धसे प्रतिदिनं स्मर सर्वदाहिन् ॥ ५५ ॥
न त्वं विषं न दहनो नतु कण्टको वा
शस्त्रं न मन्मथ बत स्वयमङ्गहीनः ।
सर्वात्मकोऽसि च पुनर्यत एक एव
तत्सर्वसाधितकृतिं निखिलां करोषि ॥ ५६ ॥
शक्तिर्मनोज कियतीति न वक्तुमीशा
ब्रह्मादयोऽपि विबुधाः क्व वयं मनुष्याः ।
प्राणः समस्तजगतां सुमनःप्रधानम्
श्रेष्ठो द्विजस्य तव सङ्गवशाच्निकृष्टः ॥ ५७ ॥
एवं वदन् विरहसागरमग्नचेता
मूर्च्छन् वणं च निपतन् क्षणमुद्धृताङ्गः ।
श्वासं जहत् कृशतनुर्हृदयाधिवासा-
मालम्ब्य चन्द्रवदनां वदतीत्यमेव ॥ ५८ ॥
हाहा सुधांशुवदने हृदयाधिवासे
प्राणप्रिये सरलहृन्मयि दत्तजीवे ।
दासं विनाद्य किमु जीवसि वा नवेति
संस्मृत्य चेतसि पुनर्न लभेय धैर्यम् ॥ ५९ ॥
त्वामन्तरेण शरदिन्दुनिभानने मे
यादृग्दशा भवति संप्रति तां नचान्यः ।
जानाति केवलमिमां रजनी दिवा च
साक्षी समस्तविषयस्य हृदिस्थ आत्मा ॥ ६० ॥

॥ रामनगरराजधानी ॥

---

श्रीकलिकातानगरस्यज्ञानरत्नाकरयन्त्रे मुद्रितस्य मल्लिनाथटीकासहितस्य कुमारसम्भवकाव्यस्य विज्ञापनपत्रे श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यः शैवाभिधमहापुराणस्योद्दिष्टकतिपयाध्यायकथामूलकमिदं काव्यमिति व्याजहार, ततः किमिदं तथ्यमतथ्यं वेत्ति विचारे प्रवृत्तेन मया स्कन्दपुराण-

न्तर्गतशङ्करसंहितास्थशिवरहस्यखण्डीयसम्भवकाण्डकथामूलकमिदं काव्यमिति निश्चित्य सप्तमसर्गपर्यन्तं कविवरेण श्रीकालिदासेन कृतानां शब्दार्थकल्पनानामभेदः स्वोदितपुराणस्थाभिस्ताभिः सह प्रदर्शितो मुद्रितश्च १८६८ ईसवीयवर्षस्य जूनमासीयकाशीविद्यासुधानिधिनामके पत्रे, तदनु अष्टमादिसर्गेषु शब्दादीनामभेदं द्रष्टुकामोऽयं जनः प्रेमचन्द्रटीकासहितमेकं पुस्तकं मल्लिनाथटीकासहितं चापरमुपलब्धवान् । अष्टमसर्गटीकादावेकादशश्लोकानामवतरणिकां दातुकामो मल्लिनाथः कतिपयश्लोकान् रचयामास । यथा

सम्भोगो विप्रलम्भश्च द्विधा शृङ्गार इष्यते ।
विप्रलम्भश्चतुर्धात्र वर्ण्यते रसकोविदैः ॥ १ ॥
पूर्वानुरागमानाख्यप्रवासकरुणात्मना ।
प्रागसङ्गतयोर्यूनोराद्यः स्यादुतरे त्रयः ॥ २ ॥
स्युः प्राक्सङ्गतयोरेव तत्र पूर्वानुरञ्जनम् ।
चक्षुःप्रीत्याद्यवस्थाभिः प्ररूढं शिवयोर्मिथः ॥ ३ ॥
विच्छिन्नं कामदाहेन प्रापय्य परमां दशाम् ।
ततः सप्तर्षिसंवादप्रमुखैः साधनैः पुनः ॥ ४ ॥
अथ सम्भोगशृङ्गारमनयोः समरागयोः ।
कुमारसम्भवफलं काव्येऽस्मिन्नाह सम्प्रति ॥ ५ ॥
सोऽपि संक्षिप्तसङ्कीर्णौ सम्पन्नश्च समृद्धिमान् ।
इति भेदात् चतुर्धोक्तिश्चतुर्णां च वियोगिनाम् ॥ ६ ॥
तत्रावस्थाप्रभेदेन शृङ्गारे नायिका त्रिधा ।
मुग्धा मध्या प्रगल्भा च तत्र ह्रीसाध्वसाविलाम् ॥ ७ ॥
मुग्धावस्थां समाश्रित्य देव्याः प्रथमसङ्गमे ।
आदावेकादशश्लोक्या ब्रूते पूर्वानुरागिणोः ॥ ८ ॥
संक्षिप्तं नाम सम्भोगशृङ्गारमनयोः कविः ।
चुम्बनेष्वधरेत्यत्र लक्षणं तस्य वक्ष्यते ॥ ९ ॥

प्रेमचन्द्रस्तु मङ्गलानन्तरं दुष्प्रापायास्तादृश्याः कविवरकालिदासकृतेः प्रशंसां तदष्टमसर्गटीकानिर्माणकारणं च कतिपयपद्यैरुपन्यस्य "सम्प्रति कुमारोत्पत्त्यनुकूलतया तयोः सपरिकरे सम्भोगशृङ्गारे वर्णयितव्ये प्रथमं तावदेकादशभिः श्लोकैः पार्वत्या मुग्धात्वं वर्णयति„ एतावदेव प्राह । मन्ये नैतावता रसविदामानन्द इति, यतः सपरिकर इत्यादि वदता रसालङ्कारसागरस्य काव्यादर्शस्य व्याख्यात्रापि प्रेमचन्द्रभट्टाचार्य्येण शृङ्गारलक्षणनिरूपणस्यानावश्यकत्वेऽपि तद्विभागः प्रथममवश्यं कर्तव्यः । एवं वक्ष्यमाणैकादशश्लोकेष्वात्मभूतसंक्षिप्तसम्भोगशृङ्गारस्य नामापि नास्तीत्यग्रिमतद्व्याप्यधर्मावच्छिन्नविचारांशे किं वक्तव्यम् ।

मल्लिनाथस्तु प्रथमसर्गादौ "इहान्वयमुखेनैव सर्वं व्याख्यायते मया । नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते„ ॥

इति प्रतिज्ञाभङ्गभयेन टीकाया न्यूनाधिकभावं न करोति व्याकरणविरुद्धं च न लिखतीति सार्वजनीनमेतत् । एवम्

भारती कालिदासस्य दुर्व्याख्याविषमूर्च्छिता ।
एषा सञ्जीविनी टीका तामद्योज्जीवयिष्यति ॥

इत्यपि स एव तदादौ लिलेख । एतदपेक्षया श्रीप्रेमचन्द्रस्याष्टमसर्गटीका दुष्टा वा नवेति विचार्य्यमाणे पूर्वोक्तभट्टाचार्यः कुत्रचिदनपेक्षितस्थले स्वपाण्डित्यं प्रकाशयामास, अपेक्षितस्थले च तूष्णींभावमेव जगाम, पाठानां त्वेतत्कल्पितानां नास्तीयत्तैव ।

एवंच कुमारसम्भवतृतीयसर्गे ४४ श्लोकस्य चतुर्थपादे त्रियम्बकं संयमिनं ददर्शेत्यत्र मल्लिनाथः सर्वस्य तद्व्याख्यानस्यान्ते "केचित्तु साहसिकास्त्रिलोचनमिति पेठुः„ इति यथा व्याजहार तथास्यापि भट्टाचार्यस्य पाठपरिवर्तने साहसमेवेति मे प्रतिभाति ।

ततः श्लोकेष्ववश्यं वर्णनीयान् रसविचारांस्तु सुतरां तत्याज प्रेमचन्द्रः, मल्लिनाथस्तु यथासम्भवं तान् सम्यगुद्भावयामास ।

पाणिपीडनविधेरनन्तरं शैलराजदुहितुर्हरं प्रति ।
भावसाध्वसपरिग्रहादभूत् कामदोहदसुखं मनोहरम् ॥ १ ॥

अस्मिन् श्लोके कामदोहदसुखमित्यस्य कामसंवर्धकं सुखमिति, एवं "नायिकानायकयोरन्योन्यानुभावदर्शनात् सुखमाविर्भवति तच्च मदनोद्दीपकमिति रसविदां स्थितिः, तथाच हरस्य गौर्यां नवोढायां स्वगोचरत्वप्रयुक्तसाध्वसदर्शनात् कश्चिन् मदनसंदीपनसुखमयो विकारः प्रादुर्बभूव इत्यर्थः, अत्र रसीभवतः स्थायिनः कार्यमनुभावः, तदुक्तम् ।

रसतां गच्छति स्थायी यत् कार्यमुपलक्ष्यते ।
अनुभावः स विज्ञेयो भावसंस्थानसूचकः ॥

इति च मल्लिनाथः स्पष्टीचकार, प्रेमचन्द्रस्तु नैतत् किमपि व्याजहार ।

अपिच विरुद्धमेवोपन्यस्तवान् ।

एवमालि निगृहीतसाध्वसं शङ्करो रहसि सेव्यतामिति ।
सा सखीभिरुपदिष्टमाकुला नास्मरत् प्रमुखवर्तिनि प्रिये ॥ २ ॥

अस्मिन् श्लोके प्रेमचन्द्रो नवस्त्रीसुलभलज्जापारवश्यमेव विस्मृतिहेतुं मन्यते स्म, मल्लिनाथस्तु "नहि भयपरिवृते चेतसि दृढतरोऽप्युपदेशः संस्कारमाधत्त इति भावः„ इति पार्वत्या विस्मृतिहेतुं सम्यगुद्भावयामास ।

अप्यवस्तुनि कथाप्रवृत्तये प्रश्नतत्परमनङ्गशासनम् ।
वीक्षितेन परिगृह्य पार्वती मूर्धकम्पमयमुत्तरं ददौ ॥ ३ ॥

साध्वसाद्वाङ्मयोत्तरादाने शिरःकम्पमयोत्तरदाने च प्रमाणं लिलेख मल्लिनाथः, यथा "तदुक्तं रतिरहस्ये कन्याकेलिप्रस्तावे,

अविदित इव पृच्छेत् किञ्चिदल्पाक्षरार्थम् ।
प्रतिगिरमवदन्ती भीतिमेवानुरुन्ध्यात् ॥
अहमभिरुचिरस्ते तन्विनो वेति पृष्टा ।
प्रतिवचनपदे सा मूर्धकम्पं च कुर्यात् ॥

विहृतं नाम लज्जाया अनुभाव इति, तदुक्तम्,

कन्याया मानलज्जाभ्यां न दत्तं योग्यमुत्तरम् ।
क्रियया व्यज्यते यत्र विहृतं तदुदीरितम् ॥

इति,, प्रेमचन्द्रस्तु नैतस्य गन्धमप्युद्भावयामास ।

चुम्बनेष्वधरदानवर्जितं सन्नहस्तमदयोपगूहने ।
क्लिष्टमन्मथमपि प्रियं प्रभोर्दुर्लभं प्रतिकृतं वधूरतम् ॥ ४ ॥

अस्मिन् श्लोके "अगत्या वाम्यवतापि नवस्त्रीरतेन सत्कामुकास्तुष्यन्तीति भावः,, इति प्रेमचन्द्रो मनीषी व्यलिखत्, मल्लिनाथस्तु "अयं लज्जासाध्वसाभ्यां संकुचितोपचारत्वात् संक्षिप्तसंभोगः, तदुक्तं भूपालेन,

युवानो यत्र संक्षिप्तान् साध्वसव्रीडितादिभिः ।
उपचारान्निक्षिपन्ते स संक्षिप्त उदीरितः ॥

इति विशेषेणेदं व्याचख्यौ । एवम्,

वासराणि कतिचित् कथंचन स्थाणुना पदमकार्यत प्रिया ।
ज्ञातमन्मथरसा शनैः शनैः सा मुमोच रतिदुःखशीलताम् ॥ ५ ॥

"स्थाणुना शम्भुना कर्त्रा प्रिया पार्वती कर्मभूता कतिचिद्वासराणि कैश्चिदहोभिरित्यर्थः, अत्यन्तसंयोगे द्वितीया, कथंचन कृच्छ्रेण पदं पदक्षेपम्, अकार्यत कारिता, सुरतकर्मणीति शेषः, करोतेर्ण्यन्ताल्लङ्, हृक्रोरन्यतरस्यामिति कर्तुः कर्मत्वम्,ण्यन्ते कर्तुश्च कर्मण इत्यभिहितत्वं च,, इति मल्लिनाथः ।

प्रेमचन्द्रस्तु कतिचिद्वासराण्यल्पान्येव दिनानि व्याप्य प्रिया पार्वती स्थाणुना शिवेन कथंचन कष्टसृष्टा पदं स्थानं सुरतास्पदमित्यर्थः, अकार्यत चक्रे, स्वार्थे णिच् ।

इदं च भट्टाचार्यवचनं व्याकरणावैदग्ध्यमूलमेव, करोतेश्चुरादावपाठेन स्वार्थे णिचः करणस्यान्याय्यत्वात् यथाकथंचित्कृत्वेन समाधेरगतिकगतित्वाच्च ।

सस्वजे प्रियमुरो निपीडिता प्रार्थितं मुखमनेन नाहरत् ।
मेखलाप्रणयलोलतां गतं हस्तमस्य शिथिलं रुरोध सा ॥ ६ ॥

अत्र कृताल्पसाहसप्रतीकाराभ्यां तुल्यलज्जास्मरत्वं व्यज्यत इति मल्लिनाथः सम्यगेवोवाच, यत उरसि शिवेन गाढमालिङ्गिता पार्वती प्रियं सस्वज इत्यादिना तुल्यक्रिया स्पष्टमेव व्यज्यते, प्रेमचन्द्रस्तु "मध्यमव्रीडिता, इत्याह स्म ।

भावसूचितममध्यविप्रियं चाटुमत् क्षणवियोगकातरम् ।
कैश्चिदेव दिवसैस्तदा तयोः प्रेम रूढमितरेतराश्रयम् ॥ ७ ॥

"प्रेम प्रेमपदाभिलप्याङ्कुरावस्था रतिरित्यर्थः, इति प्रेमपदव्याख्यानवेलायां तदेतत् सर्वं स्पष्टीकृतं भूपालेन,, इत्यादिना मल्लिनाथोऽपूर्वमेवार्थं जगाद, प्रेमचन्द्रस्तु प्रेम प्रीतिरिति प्रसिद्धार्थमेव व्याजहार ।

तं यथात्मसदृशं वरं वधूरन्वरज्यत वरस्तथैव ताम् ।
सागराननपरा हि जाह्नवी सोऽपि तन्मुखरसैकनिर्वृतिः ॥ ८ ॥

"इत्थं समानुरागत्वकथनात् रसस्याभासत्वं निरस्तं तदुक्तम् ।

एकत्रैवानुरागश्चेत् तिर्यङ्म्लेच्छगतोऽपि वा ।
योषितो बहुसक्तिश्चेत् रसाभासस्त्रिधा मतः ॥

इति, कविनाप्युक्तं मालविकायाम्,

अनातुरोत्कण्ठितया प्रसिध्यता समागमेनापि रतिर्न मां प्रति ।
परस्परप्राप्तिनिराशयोर्वरं शरीरनाशोऽपि समानुरागयोः ॥

इति,, एवं मल्लिनाथो महाविशेषं दर्शयामास, प्रेमचन्द्रस्तु पदानामर्थप्रकाशनमेव मह मन्यमानो रसांशे तूष्णींभावं जगाम ।

दष्टमुक्तमधरोष्ठमम्बिका वेदनाविधुतपाणिपल्लवा ।
शीतलेन निरवापयत् क्षणं मौलिचन्द्रशकलेन शूलिनः ॥ ९ ॥

"अत्राधरपीडनात् सुखेऽपि दुःखवदुपचारात् कुट्टमितं नामानुभाव उक्तः, तदुक्तम्,

केशाधरादिग्रहणे मोदमानापि मानसे ।
दुःखितेव बहिः कुर्याद्यत्र कुट्टमितं हि तत् ॥

इति,, इदं मल्लिनाथः स्पष्टीचकार, प्रेमचन्द्रस्तु मौनमेव सर्वार्थसाधनं मन्यते स्म ।

चुम्बनादलकचूर्णदूषितं शङ्करोऽपि नयनं ललाटजम् ।
उच्छ्वसत्कमलगन्धये ददौ पार्वतीवदनगन्धवाहिने ॥ १० ॥

अस्मिन् श्लोके सहृदयहृदयाह्लादकत्वेन वर्णनीयमवश्यं रसविशेषं प्रेमचन्द्रस्तत्याज, मल्लिनाथश्च तं लिलेखेति विशेषः ।

एवमिन्द्रियसुखस्य चात्मनः सेवनादनुगृहीतमन्मथः ।
शैलराजभवने सहोमया मासमात्रमवसद्वृषध्वजः ॥ ११ ॥

हिमालये मासमात्रमेव शिवः किमिति वसतिं चक्रे इत्यत्र कारणं वधूवशीकरणस्य तावानेव कालोऽपेक्षितो नाधिको न न्यून इत्याकरयन्यमत्र प्रमाणत्वेनोपनिबद्धवान् मल्लिनाथः, तत्रेतरो रमणीयनानाप्रदेशविजिहीर्षामेव कारणं मन्यते स्म ।

तस्य जातु मलयस्थलीरतेर्धूतचन्दनवनः प्रियाक्लमम् ।
आचचाम सलवङ्गकेशरश्चाटुकार इव दक्षिणानिलः ॥ १२ ॥

यथा लोके कश्चिन्मनुजो महान्तमपि परिश्रमं प्रियवादैरपनयति तद्वन्मलयमारुतोऽपि पार्वत्याः सकलमपि तं दूरीचकारेति मल्लिनाथो व्याजहार, तदितरो न किमपि ब्रूते स्म ।

इष्टतामरसकेसरत्यजोः क्रन्दतोर्विपरिवृत्तकण्ठयोः ।
निघ्नतोः सरसि चक्रवाकयोरल्पमन्तरमनल्पतां गतम् ॥ १३ ॥

"इष्टतामरसकेसरत्यजोः, इष्टाः प्रियां अभिलषणीयभोज्या इत्यर्थः, ये तामरसानां पद्मानां केसराः किञ्जल्कास्तानपि त्यजत इति तथाभूतयोः, सति विरहे इष्टवस्त्वपि नास्वादयतीति भावः, विरहेण वियोगदुःखेन मुक्तकण्ठयोस्तथा भिन्नयोः पृथक्कूलस्थितयोरिति चक्रवाकमिथुनस्य विशेषणानामर्थमकल्पयत् प्रेमचन्द्रः, मल्लिनाथस्तु "दष्टतामरसकेसरत्यजोः, दष्टमर्धजग्धं यत् तामरसकेसरं पद्मकिञ्जल्कम्, मुखद्वयलग्नमेकमिति भावः, तत् त्यजत इति तथोक्तयोः, क्विप्, विपरिवृत्तकण्ठयोः परस्परालोकनार्थं कृतग्रीवाभङ्गयोर्निघ्नयोर्दैवाधीनयोः,, इति व्याचख्यौ ।

अथ सरसि वियुज्यमाने शनैः शनैर्जातातिव्यवधाने चक्रवाकमिथुने तामरसकेसरत्यागो विशेषणं तत्र चेष्टत्वविशेषणापेक्षया दष्टत्वविशेषणमेव सहृदयहृदयाह्लादकम्, यत इष्टवस्तूनां त्यागो विरहिणोरपि न तथा क्लेशं जनयति यथार्धजग्धस्यैकवस्तुनस्त्यागः, एवं तन्मिथुने कण्ठमुक्तिरपि विशेषणं तत्रच विरहस्य प्रयोजकता वक्तव्या, एवंच कण्ठे विरहप्रयोज्यमुक्तिविशेषणापेक्षया विपरिवृत्तत्वविशेषणमेव रसविदामानन्ददायकं यतः परस्परं वियुज्यमानं प्राणिमात्रमन्योन्यालोकनार्थमन्योन्यं ग्रीवां परिवृत्त्य पश्यतीति सर्वानुभवसिद्धम्, अथच तन्मिथुने पृथक्कूलस्थितिविशेषणापेक्षया दैवायत्तत्वविशेषणमेवातिरमणीयं यतस्तत्र पृथक्कूलस्थितिः सिद्धा चेदल्पमन्तरमनल्पतां गतमित्यसङ्गतं स्यात्, अथच चक्रवाकमिथुनस्य वियोगस्तु दैवायत्त इति वक्तुमुचितम्, यतः प्रेमचन्द्र एवैवमाह "चक्रवाकद्वन्द्वानि रात्रौ नैकत्र तिष्ठन्तीति प्रसिद्धिः,, इति ।

स्थानमाह्निकमपास्य दन्तिनः शल्लकीविटपभङ्गवासितम् ।
आविभातचरणाय गृह्णते वारि वारिरुहबद्धषट्पदम् ॥ १४ ॥

मल्लिनाथः "आविभातं विभातमारभ्य यच्चरणं भक्षणं तस्मै तदर्थमित्यर्थः, गृह्णते उपाददते, गजा ह्याप्रभातमहर्भुक्तजीर्णपर्याप्तं जलं सकृदेव सायं पिबन्तीति प्रसिद्धम्,, इति व्याख्यातवान्, प्रेमचन्द्रस्तु "आविभाति शरणाय गच्छत इति तृतीयपादव्याख्यानसमये शरणाय गृहाय निशानिवेशस्थानायेत्यर्थः, गच्छतो दन्तिनो वार्याविलीकृतं जलमाविभाति वनहस्तिनो हि सायं जलेषु विहृत्य निवेशस्थानं गच्छन्तीति स्वभावः,, ।

पश्य पश्चिमदिगन्तलम्बिना निर्मितं मितरुचा विवस्वता ।
दीर्घया प्रतिमया सरोऽम्भसां तापनीयमिव सेतुबन्धनम् ॥ १५ ॥

अतिप्रसिद्धपाण्डित्योऽपि प्रेमचन्द्रोऽस्मिन् श्लोके विद्यमानानां तृतीयान्तपदानां मध्ये कर्तृकरणभेदं न किमपि दर्शयामास, अथच पूर्वार्धे, मितकथे इत्यत्र मितरुचामिति पाठं कल्पयित्वा सरोऽम्भसां विशेषणत्वेन तत् कल्पयामास, एवं पश्येत्यस्य किं कर्मेत्यपि न विचारयामास, मल्लिनाथस्तु सेतुबन्धनरचनायां विवस्वतः कर्तृत्वं प्रतिबिम्बस्य करणत्वं पश्येत्यत्र वाक्यार्थस्य कर्मत्वं स्पष्टं व्याजहार ।

सामभिः सहचराः सहस्रशो वन्दनैश्च हृदयंगमस्वनैः ।
भानुमग्निपरिकीर्णतेजसं संस्तुवन्ति किरणोष्मपायिनः ॥ १६ ॥

"वन्द्यन्त एभिरिति वन्दनानि स्तोत्रवाक्यानि तैः,, इति प्रेमचन्द्रः, मल्लिनाथेन तु स्यन्दनाश्वहृदयंगमस्वनैरिति द्वितीयपादः "स्यन्दनाश्वानां रथाश्वानां हृदयंगमाः स्वना येषां तैः सामभिः,, इति सम्यग् व्याख्यातः ।

॥ रामनारायणशास्त्री ॥

## RAGHU.

*(Continued from page 42.)*

Again the hero youth his bowstring drew,
Swift to the mark again his arrow flew,
To INDRA'S arm, which blows upon the brow
Of his huge elephant had hardened, now
Still glittering with the remnant of the dyes
That glowed in beauty over SACHI'S eyes.
A second, feathered from the peacock's wing,
Laid low the banner of the heavenly king,
Who raged as though the foeman's hand had torn
The shining locks that Fortune's head adorn.
Furious and fast the battle waged, and through
The air, like winged snakes, their arrows flew,
Hissing from side to side; while, standing near,
Both Gods and men beheld that sight of fear.
Though INDRA sent his arrows forth like rain,
Still on that wondrous youth they beat in vain:
Not all the streams the labouring cloud can fling
Will dim the glory of the lightning's wing.
A shaft, with crescent head, from RAGHU'S bow
Severed the string of his celestial foe,
That parted with a sound like ocean's roar
When his waves dash upon a rocky shore.
Aside, in rage, the useless bow he threw,
Then from his hand his bolt of terror flew:
That flaming bolt that tamed the mountains' pride,
And rent the pinion from each rugged side.
Fiercely it smote, and from the eyes of all
Fell bitter tears to see their hero fall;
But in a moment rose triumphant cries,
As, shaking off the pain, they saw him rise.
His dauntless spirit INDRA saw with joy,
And loved the valour of the royal boy.
"Cease, cease! he cried, "Well-pleased am I to see
The bolt that conquered mountains braved by thee.
No longer fight, but, for thy valour's meed,
Ask any boon thou wilt except the steed."
With gentle words the royal youth replied,

The half-drawn shaft replacing by his side ;
While the long gilded reed one moment threw
O'er the young archer's hand a glittering hue :
"If, King of Gods, it be thy changeless will
To slight my prayer, and keep the courser still ;
Yet let my father through thy favour gain
All he might hope for if the steed were slain.
And, since each rite has now been duly done,
Grant that the meed of all his toil be won.
And, royal INDRA, grant again this prayer,
And let thy herald to my father bear
The joyful tidings, for no man within
His private halls may entrance lightly win."
His willing promise INDRA gave, and then
Turned his fleet horses to the east again.
And RAGHU bent, unconquered, not elate,
His steps in silence to the city gate.
DILIPA welcomed, with a father's pride,
Forewarned of all, the hero to his side ;
And pressed, with fingers trembling with delight,
Those limbs the thunder-bolt had marked in fight.
Thus then the mighty King, ere life's decline,
Performed his glorious ninety rites and nine ;
And, ever longing for his rest on high,
Reared a proud ladder up from earth to sky.
Mindful of duties by the Scriptures taught,
From worldly cares he drew his every thought ;
Resigned the white umbrella to his heir,
And all the signs of sovereign rule, to wear.
Than sought a tranquil dwelling with his Queen,
Where Hermits live beneath their leafy screen ;
For such, through ages, in their years' decline,
Is the good custom of IKSHWAKU'S line.

## RAGHU'S CAMPAIGN.

Crowned with the glory of his aged sire
Now shone King RAGHU, like the burning fire
That glows at evening with a brighter ray
Caught from the splendour of the dying day.
All neighbouring Chiefs were jealous of his fame ;
Their breasts no longer checked the stifled flame ;
The while his people, with their hearts elate,
Joyed in their monarch and his royal state,
As though they looked on INDRA'S flag unfurled
To scatter blessings o'er a grateful world.
In one short day the hero made his own
Both his foes' kingdoms, and his father's throne.
FORTUNE herself, sweet Goddess, all unseen,
Held o'er his sacred head her lotus screen,
And POESY in minstrels' form stood by,
Swept the wild strings, and raised his triumph high.
What though the earth, since ancient MANU'S reign,
Was wooed by every king, nor wooed in vain ;
She came a bride, with fresh unrifled charms,
A pure young virgin, to her RAGHU'S arms.
Gentle yet firm, he won each heart and mind,
Like the calm breathing of the soft south wind.
None wept the father when he saw the heir :
Who mourns the blossom when the fruit is fair ?
The holy men who virtue's lessons taught,
In his pure life their best example sought,
That showed his people what to seek or shun ;
All his deeds, virtue,—vice, all left undone.'
A new creation rose beneath his sway ;
Each sense was keener, and all nature gay.
The moon is worshipped for his gentle gleam,
The God of Day, for his bright fostering beam ;
And equal glory well might RAGHU claim,—
All virtues his that gild a monarch's name.
Though keen the vision of his long bright eyes,
He gained a clearer sight from lore that lies
Wrapt in the holy volume, where the sage
Has stored the wisdom of laborious age.
Firm was the Prince upon his father's seat
When autumn came with kingly glory sweet ;
A rich red lotus screened his royal head,—
For banners, flowery grass its tufts outspread.
Fair is that Autumn-God, but all confess
That fairer still is RAGHU'S loveliness.
O'er the wide earth, down Heaven's unclouded way,
Flash forth the glories of the Lord of Day ;
With speed scarce slower, glory scarce less bright,
From land to land flew RAGHU'S conquering might.
His shining bow aside has INDRA thrown ;
And RAGHU grasps, for glorious war, his own ;
For each in turn triumphant bends his bow,
One in the Heavens above, and one below.
Dear as the broad moon in the autumn skies
Was his loved presence to his people's eyes,
Who saw his glory in the planets shine,
And traced his splendour in the jubilant line
Of white swans in their airy flight o'erhead,
And sparkling lakes where lotuses are spread ;
While maidens in the shadowing sugar-cane
Raised high, to hymn their lord, the joyous strain,
Watching the crop the while, and loved to praise
His manly virtues e'en from childhood's days.
Calm grew the Ocean when AGASTYA rose ;
The name of RAGHU awed his trembling foes ;
For maddened bulls, that rend the river's side,
With his most gentle might but feebly vied.
His elephants that smelt the tainted breeze,
And rival odours of the Seven-leaf trees,

Provoked to fury by the daring flowers
Poured their own nectar forth in seven-fold showers.
Scarce was he ready for the sword and shield
When Autumn called him to the battle-field,—
War's proper season, when the Rains are o'er,
When roads are dry, and torrents foam no more.
Soon as the day to bless the chargers came,
The warrior's holy festival, the flame
Turned to the right, and with a ruddy hand
Gave him full triumph o'er each distant land.
Then when his kingdom was secured, and all
His city fortified with tower and wall,
His hosts he marshalled, his broad flag outspread,
And to subdue the world his army led.
Forth as he rode, the city matrons poured
The sacred grain upon their mighty lord,
Thick as the drops on VISHNU'S brow that fell
When MANDAR made the milky Ocean swell.
First to the East the hero takes his way,
His foemen trembling as his banners play.
Thick clouds of dust beneath his chariots rise,
Till dark as earth appear the changing skies;
While elephants, like autumn clouds in girth,
Make like to rainy skies the labouring earth.
Parted in four that mighty host appears:
In front, the gleaming of ten thousand spears;
Next come the tumult and the din, and then
The cars and horse, the elephants and men.
He marked his progress with a mighty hand;
The fountain gushed amid the thirsty sand;
The tangled forest harboured beasts no more,
And foaming floods the freighted vessel bore.
He led his army toward the Eastern Sea,
An endless stream of men, and seemed to be
A new BHAGÍRATH, ancient Sage, who led
The wandering GANGÁ down from SIVA'S head.
As strews some elephant, in headlong wrath,
With many a tree uptorn, his forest path,
He marked with plundered wealth his onward way,
And humbled princes owned the conqueror's sway.
Through all the East he passed, from land to land,
And reached, triumphant, Ocean's palmy strand.
Like an unsparing torrent on he went,
And low, like reeds, the lords of SUHMA bent.
Then fell the islets washed by GANGÁ'S wave,
Nor could their ships the hosts of BANGA save;
Like rice they bowed them, and, again restored,
Before his feet rich fruit for tribute poured.
Nor could thy waters, KAPISA, delay
The King who bridged with elephants his way.
Thence to KALINGA'S realm the victor rode;
His onward path the chiefs of UTKAL showed.
As fierce wild elephants are forced to kneel
Bending obedient to the driver's steel,
MAHENDRA'S towering brow and haughty crest
The mighty victor's awful strength confessed.
KALINGA'S chieftain with his warlike train
Stood like an ancient hill prepared to rain
Thick stones on INDRA pressing on to smite
From his rough sides the wings that helped his flight.
Undaunted RAGHU bore the arrowy shower
Like holy water in auspicious hour,
And, when proud victory his arms had crowned,
His men with betel leaves adorned the ground,
And lay at ease triumphant, drinking up
Their foemen's glory in the brimmng cup.
The Chief was captive of his sword and bow,
But RAGHU'S mercy bade him freely go;
No wealth he sought, but warred in honour's name,
So spared his land but spoiled his warlike fame.
Careless of conquest, o'er the palmy strand
He led his army to AGASTYA'S land.
His soldiers resting by KAVERI'S wave
The night to love and mirth and feasting gave,
While the fair river sought the jealous sea
Stained like a partner of their revelry.

*(To be continued.)*

ADVERTISEMENT.

*Just Published.*

SCENES FROM THE RAMAYAN, &c.

BY

RALPH T. H. GRIFFITH, M. A.

*8vo. Crown, Cloth; price 2 Rs. cash: by Book Post 2 Rs. 4 ans.*

CONTENTS.

PREFACE.
AYODHYA.
RAVAN DOOMED.
THE BIRTH OF RAMA.
THE HEIR APPARENT.
MANTHARA'S GUILE.
DASARATHA'S OATH.
THE STEP-MOTHER.
MOTHER AND SON.
THE TRIUMPH OF LOVE.
FAREWELL!
THE HERMIT'S SON.
THE TRIAL OF TRUTH.
THE FOREST.
THE RAPE OF SITA.
RAMA'S DESPAIR.
THE MESSENGER CLOUD.
KUMBHAKARNA.
THE SUPPLIANT DOVE.
TRUE GLORY.
FEED THE POOR.
THE WISE SCHOLAR.

Benares: E. J. LAZARUS & Co. Calcutta: W. NEWMAN & Co. London: TRÜBNER & Co., PATERNOSTER ROW.

*Communications of a literary nature should be addressed to the* EDITOR: *all letters on business, to the Proprietors,* MESSRS. E. J. LAZARUS & Co., *to whom Drafts should be made payable.* ADVERTISEMENTS *will be inserted at four annas per line.*

The PANDIT may be ordered of the Publishers, or through MESSRS. TRÜBNER and Co., LONDON.

*Annual subscription, in advance, including postage, Rs.* 12.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

# काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

# THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 28. Benares September 1st, 1868. Vol. III.


## ॥ ईश्वरप्रत्यभिज्ञाह्वयविमर्शिन्याः ॥

ज्ञानाधिकारस्याष्टमं चरममाह्निकं, क्रियाधिकारस्य चाद्यमाह्निकद्वयम्

स्वसंवेदनसंसिद्धव्यवहारवशेन यः ।
नित्यं महेश्वरः सिद्धः सिद्धानां तं स्तुमः शिवम् ॥

एवं ज्ञानस्मरणापोहनानि व्युत्पाद्य तेषामेकमाश्रयं विना व्यवहारो न युक्त इति निरूपितम्, एतावता न चेदन्तः कृतेत्यत्र यदुक्तमेक इति तत्परिघटितम्, अन्तराभाससमर्थनेनान्तःकृतानन्तविश्वरूप इत्यपि निरूपितम्, यत्तत्रैव महेश्वर इत्युक्तं तन्माहेश्वर्यं स्वातन्त्र्यरूपमुपपादयितव्यम्, तच्च ज्ञानविषयं क्रियाविषयं चेत्युभयप्रकारं, ततो भगवान् ज्ञाता कर्ता च, यद्यपि च प्रकाशविमर्शात्मकं चिदेकघनमेकमेव संविद्रूपं तथापि व्युत्पादनाय तत्परिघटित एवायं विभागः, तेन ज्ञानात्मकक्रियाविषयं स्वातन्त्र्यं यद्यपि क्रियाशक्तिरूपं तथापि ज्ञानाधिकार एव निर्णेतव्यं तद्विषयत्वात् । एवं च ज्ञानशब्दार्थः प्रकृतितः प्रत्ययतश्च संपूर्णतया निर्णीतो भवति। तत्र ज्ञानं नाम स्वयं भेदिताभासभेदोपाश्रयनियन्त्रणासंकुचितमहमिति संवेदनं, तत्राभासेषु यत्स्वातन्त्र्यं तदेव ज्ञानशक्तिविषयं स्वातन्त्र्यं संपद्यत इति "तात्कालिकाक्षसामक्ष्ये" त्यादिना "शुद्धे ज्ञानक्रिये यत" इत्यन्तेन श्लोकैकादशकेन तन्निरूप्यते। तत्राभासान्तरापेक्षो चाभासोन्यथा वेति श्लोकेनोक्त्वा स एवाभास एक इति श्लोकान्तरेणोच्यते, अर्थक्रियाभासोपि तथैवाभासनियत इति श्लोकद्वयेनोक्त्वा कुत एकस्मिन्नाभासे सार्थक्रियेति पुनः श्लोकद्वयेन, आभासान्तरविविक्तस्य भित्तिस्थानीयमान्तरत्वमिति श्लोकेन, ततो बाह्यत्वं स्वरूपतो विभागतश्च श्लोकयुग्मेन, ततः श्लोकेन ज्ञानादिशक्त्याश्रयस्यैकस्योपसंहारः, श्लोकान्तरेण महेश्वरत्वमुपसंहरता भाविनः क्रियाधिकारस्योपक्षेप इति संक्षेपार्थ आह्निकस्य ॥

अथ श्लोकार्थो निरूप्यते ।

ननु यदि परमेश्वरनिष्ठतयैव समस्तोयं व्यवहारः तदस्य स्फुटत्वास्फुटत्वप्रायप्रसिद्धवैचित्र्यानुपपत्तिः, येन किलायमनुप्राणितः स एक एव भगवान्, न च तद्व्यतिरेकेण व्यवहारस्य निजं किं चन तत्त्वमुत्पश्याम इत्याशङ्क्याह ।

(१) तात्कालिकाक्षसामक्ष्यसापेक्षाः केवलं क्वचित् ।
आभासा अन्यथा ऽन्यत्र त्वन्धान्धतमसादिषु ॥
विशेषोऽर्थावभासस्य सत्तायां न पुनः क्वचित् ।
विकल्पेषु भवेद्भाविभवद्भूतार्थगामिषु ॥

केवलमेतावता आभासानां भेदो, न पुनरर्थावभासस्य स्वात्मगतः क्वचिदपि भेद इति श्लोकद्वयस्य संमीलितस्य संबन्धः, यस्मिन्नेव काले स आभास आभाति तत्काल एव भवति यदक्षसामक्ष्यं बाह्येन्द्रियप्रत्ययत्वं नाम आभासान्तरं पश्यामीत्येवंरूपं तत्सापेक्षाः तद्व्यामिश्राः क्वचिदाभासा भवन्ति, यत्र स्फुटताव्यवहारः अन्धविषयोन्धकारस्थप्रमातृविषयः पुनर्योन्यो व्यवहारो ऽस्फुटतामयस्तत्र त आभासा अन्यथा। तथाहि, जात्यन्धस्य बाह्येन्द्रियप्रत्यक्षत्वलक्षणमाभासान्तरं नैवास्ति, दृष्टवतस्त्वन्धीभूतस्य संतमसस्थितस्य च तात्कालिकं तन्नास्ति, अपि तु प्राक्तनमेव बाह्येन्द्रियप्रत्यक्षत्वमनुसंधत्ते । तस्मादर्थावभासस्य केषु चिदपि विकल्पेषु सत्तायां स्वरूपे विशेषोस्तीति संभावना न कर्तव्या, ते हि विकल्पा भाविवस्तुगामिनो भविष्यन्निष्ठा वा भवन्तु वर्तमाननिष्ठा वा अ-

बाह्यत्वस्य विरोधी, प्रत्युत सर्वाभासभित्तिभूतोसौ, तत्कथं विरोध इति युक्तमुक्तम्, "सदैवान्तराणां सत्ते"ति ॥

ननु बाह्यत्वे सत्यर्थक्रिया, तच्च बाह्येन्द्रियगम्यत्वं, न च विकल्पोल्लिखितानां तत् संभवति, तत्कथममीषामर्थक्रिया स्यात्, दृश्यते हि विकल्पोल्लिखितः पिशाचादिस्त्रासादिविधायीत्याशङ्क्याह ।

(६) विकल्पे योयमुल्लेखः सोपि बाह्यः पृथक्प्रथः ।
प्रमात्रैकात्म्यमान्तर्यं ततो भेदो हि बाह्यता ॥

विमर्शविशेषरूपे विकल्पज्ञाने य उल्लिख्यमानः कान्ताचौरादिरर्थः सोपि बाह्यः, न केवलं बहिरवलोक्यमानः, यस्मात्सोपि प्रमातुः सकाशात्पृथगेव प्रथतेयमिति, यश्च प्रमातर्यहमित्येव विश्रान्तत्वं तदान्तरत्वम्, अन्तरिति निकटं, तच्च किं चिदपेक्ष्य, अपेक्षणीयश्च सर्वत्र प्रमातैवापेक्षणीयान्तराभावे, ततश्च प्रमातरि निकटं तादात्म्यं प्राप्तमेवेति ततो यद्भिन्नं तद्बाह्यमेवेति युक्ता * उल्लेखस्याप्यर्थक्रिया ॥

ननु कुम्भकारादिव्यापारेण घटादेरस्तु बाह्यत्वमन्तःकरणगोचरस्य तु किं कृतं तदित्याशङ्क्याह ।

(७) उल्लेखस्य सुखादेश्च प्रकाशो बहिरात्मना ।
इच्छातो भर्तुरध्यक्षरूपो ऽक्ष्यादिभुवां यथा ॥

अन्तर्विकल्पप्रतिबिम्बितस्य नीलादेर्यो बहिरात्मना प्रमातृविच्छिन्नेन स्वभावेन प्रकाशः स भर्तुरन्तराभासान्बिभ्रतो बहिः सृष्टिं च पुष्णत ईश्वरस्यैवेच्छया, यथैव चक्षुरादिविषयभूतानां प्रत्यक्षज्ञानशब्दवाच्यो बाह्यात्मना प्रकाशो नीलादीनाम् । एतदुक्तं भवति । कुम्भकारव्यापारो नाम परमार्थत ईश्वरेच्छैव तदवभासितकायस्पन्दपर्यन्ता, न पुनरन्यः कश्चन सः, ततश्च यथा ईश्वरेच्छया प्रकाशादबहिर्भूता अपि नीलाद्या बाह्यकरणगोचरीभूताः कल्पितात्प्रमातुर्विच्छिन्नरूपेण बाह्यत्वेन भासन्ते, तथान्तःकरणगोचरीभूता अपीति को विशेषः, सुखदुःखप्रायास्तु भरताद्युक्तरूपाः† स्थायिव्यभिचाररूपा रतिनिर्वेदादयो ऽन्तःकरणैकगोचरा बहिरात्मना भान्ति संकल्पेषु यद्यपि क्षेत्रज्ञस्यैव स्वातन्त्र्यं तथापि चित्परमार्थताया न्यग्भावयितुमशक्यत्वादीश्वरस्यैव वस्तुतः । यथोक्तं ग्रन्थकृतैव ।

यद्यप्यर्थस्थितिः प्राणपुर्यष्टकनियन्त्रिते ।
जीवे निरुद्धा तत्रापि परमात्मनि सा स्थिता ॥
तदात्मनैव तस्य स्यात्कथं प्राणेन यन्त्रणा ।

* कर्मणि घञ् ।
† रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्त्तिताः ॥

इति । यत्र त्वनिच्छोरेव क्षेत्रज्ञस्य स्वरसवाहिन्यात्क्षिप्तसारा सांकल्पिकी सृष्टिः, तत्र स्फुट ईश्वरस्यैव व्यापारः । तस्मात्सांकल्पिकानामपि बहिर्भावे परमेश्वरेच्छैव हेतुरिति सिद्धान्तः ॥

अधुना पूर्वोक्तमैक्यं माहेश्वर्यं च निगमयति ।

(८) तदैक्येन विना न स्यात्संविदां लोकपद्धतिः ।
प्रकाशैक्यात्तदेकत्वं मातैकः स इति स्थितम् ॥
स एव विमृशत्त्वेन नियतेन महेश्वरः ।
विमर्श एव देवस्य शुद्धे ज्ञानक्रिये यतः ॥

यदेतत् पूर्वोक्तेन ग्रन्थेनोपपादितं तदिति तस्माद्धेतोः संविदां ज्ञानानामैक्येन विना लोकपद्धतिर्लोकमार्गः सर्वो व्यवहारो न संभवेत् । संभवति चायं तस्मादैक्यमासां, न चैतद् दुर्घटं, यतो विषयप्रकाश एव संविदुच्यते, केवलं विषयोपरागमहिम्ना बहिर्मुखतया नीलप्रकाशोन्यः पीतप्रकाशश्चान्यः, परमार्थतस्तु प्रकाशस्य देशकालाकारसंकोचवैकल्यादेकत्वमेवेत्येक एव प्रकाशोन्तर्विश्रान्तः स एव च प्रमातोच्यत इति स्थितमिदानीमुपपत्तितः । न चास्यासौ प्रकाशलक्षणः स्वात्मा नीलाद्युपरागश्च परामर्शनशून्य एवास्ते स्फटिकमणेरिव, अपि तु सदैव विमृश्यमानरूप इति विमृशद्रूपत्वमनवच्छिन्नविमर्शिता अनन्योन्मुखत्वमानन्दैकघनत्वमेवास्य माहेश्वर्यम्, स एव ह्यहंभावात्मा विमर्शो देवस्य क्रीडादिमयस्य शुद्धे पारमार्थिक्यौ ज्ञानक्रिये, प्रकाशरूपता ज्ञानं तत्रैव स्वातन्त्र्यात्मा विमर्शः क्रिया, विमर्शश्चान्तः कृतप्रकाशः इति विमर्श एव परावस्थायां ज्ञानक्रिये, परापरावस्थायां तु भगवत्सदाशिवभुवि इदंतासामानाधिकरण्यापन्नाहंताविमर्शस्वभावे अपरावस्थायां च मायापदे इदंभावप्राधान्येन वर्तमाने इति विशेषः । सर्वथा तु विमर्श एव ज्ञानं तेन विना हि जडभावोस्य स्यादित्युक्तं स एव च क्रियेति भाविनः क्रियाधिकारस्योपक्षेपं करोतीति शिवम् ॥

॥ आदितः सूत्रश्लोकाः ८९ व्याख्याताः ॥

श्रीमदाचार्याभिनवगुप्तविरचितायामीश्वरप्रत्यभिज्ञासूत्रविमर्शिन्यां माहेश्वर्यनिरूपणम् ॥

॥ इत्यष्टममान्हिकम् ॥

॥ ज्ञानाधिकारःसमाप्तः ॥

---

॥ श्रीः ॥

॥ अथ क्रियाधिकारः ॥

विततविशदस्वात्मादर्शे स्वशक्तिरसोज्ज्वलां
प्रकटयति यो मातृस्वांशप्रमेयतटद्वये ।

बहुतरभवद्भङ्गीभूर्मिं क्रिया सरितं परां
प्रकटयतु नः श्रीमान्गौरीपतिः सततं परम् ॥
यत्र विश्रान्तिमासाद्य चित्रं क्रीडाविजृम्भितम् ।
क्रियाशक्तिः प्रियात्यन्तं दर्शयेत्तं स्तुमः शिवम् ॥

अथ क्रियाशक्तिस्वरूपं वितत्य निर्णेतुमधिकारान्तरमारभ्यते । तत्र श्लोकाष्टकेन"त एवे"त्यादिना "यद्वभास्यत" इत्यन्तेन परमेश्वरे परमार्थतो ऽक्रमा क्रिया परिमितसांसारिकप्रमातृगतक्रमावभासनयोगात्सक्रमा चेत्युपपाद्यते । तथाहि, श्लोकेनोक्तपूर्वपक्षप्रतिक्षेपः, ततः श्लोकेन सक्रमत्वाक्रमत्वविवेकः, ततः श्लोकत्रयेण क्रमस्वरूपनिरूपणं, ततः श्लोकद्वयेन सक्रमत्वाक्रमत्वयोर्विषयविभागः, विषयविभागे च सति वस्तुत एकत्रैव तयोर्विश्रान्तिरिति श्लोकेन निरूप्यत इति तात्पर्यमान्हिकस्य ॥

श्लोकार्थस्तु विभज्यते ।

तत्र पूर्वोक्तज्ञानशक्तिसमर्थनोपयोगिनि प्रमेये सिद्धे प्रमेयान्तरमप्ययत्नतः सिद्धमित्यर्थाधिकरणसिद्धान्तदिशा दर्शयति ।

(१) अत एव यदप्युक्तं क्रिया नैकस्य सक्रमा ।
एकेत्यादि प्रतिक्षिप्तं तदेकस्य समर्थनात् ॥

"यत्तावदुक्तं ज्ञानान्येवानुभवविकल्परूपादिभिन्नानि, न तेषामाश्रयो ऽस्ति कश्चित्, संस्काराच्च स्मृतिः सिद्धा, ज्ञानं च जडं चेन्नार्थस्य प्रकाशः, अजडं चेद्देशकालसंकोचवैकल्यादात्मतत्त्वादभिन्नमिति" तत्तावत्प्रतिक्षिप्तं, भिन्नानामनुभवादीनामनुपपत्तेर्वितत्य दर्शितत्वात्, न च संस्कारमात्रात् स्मृतिरित्येतदप्युक्तम्, अजडमेव चासंकुचितरूपं ज्ञानं तत्स्वातन्त्र्यावभासितज्ञेयोपरागवशात्त्वस्य संकोचावभास इत्यपि दर्शितं यतः, न केवलमतो हेतुकलाया ज्ञानशक्तिचोद्यानि निवारितानि, यावत्क्रियाशक्तिविषयाण्यपि दूषणान्यत एव हेतुजातादपसारितानीत्यपिशब्दार्थः । एका क्रिया क्रमिका कथमाश्रयस्यैकस्वभावत्वे सति घटत इति यदुक्तं, तथा तत्रतत्र स्थित इति द्विष्ठस्यानेकरूपत्वादिति च यदुक्तं, तदपि प्रतिक्षिप्तमेव । यदियति पूर्वपक्षे इयदेव जीवितमेकमनेकस्वभावं कथं स्यादिति, तत्र चोक्तं चित्स्वभावस्य दर्पणस्येव एकता ऽनपबाधनेनाभासभेदसंभवे क इव विरोध इति । तस्मात् प्रत्यभिज्ञानबलादेको ऽप्यसौ पदार्थात्मा स्वभावभेदान्विरुद्धान्यावदङ्गीकुरुते, तावत्ते विरोधादेव क्रमरूपतया निर्भासमानास्तमेकं क्रियाश्रयं संपादयन्तीति, ततश्च संबन्धादीनामप्युपपत्तिरिति * ॥

ननु च क्रमिकत्वमेव क्रियायाः स्वरूपं क्रमश्च कालकलनाहीने चिन्मये भगवति नास्ति, इति कथमस्य सा भवेदित्याशङ्क्याह ।

(२) सक्रमत्वं च लौकिक्याः क्रियायाः कालशक्तितः ।
घटते न तु शाश्वत्याः प्राभव्याः स्यात्प्रभोरिव ॥

उत्क्षिपत्यपक्षिपति हस्तमिति ये पूर्वोत्तरे क्षणास्ते क्रमवन्तः, तत्र येषां त एव क्रिया काणादानामिव, तेषां सा सक्रमा प्रत्यक्षेणैव भाति । ये तु मन्यन्ते तथाभूतपरिदृश्यमानभेदसंपादिका यासौ का चिदतीन्द्रिया हस्तगता शक्तिर्व्यापारोद्बोधरूपा नित्यानुमेया तस्याः केवलं पूर्वापरीभूतत्वमनुमीयते इति लौकिक्याः क्रियायाः सक्रमत्वं कालशक्तेराभासविच्छेदनप्रदर्शनसामर्थ्यरूपात् पारमेश्वराच्छक्तिविशेषाद्घटते उपपद्यते । या तु प्रभोः संबन्धिनी तदव्यतिरिक्ता क्रिया शक्तिः शाश्वती कालेनास्पृष्टा तस्याः सक्रमत्वमस्तीति संभावनापि नास्ति, यथा प्रभोः सक्रमत्वमसंभाव्यं तथा तस्या अपि । उक्तं हि ।

"हस्तस्य सक्रमत्वे तद्गतापि क्रिया तथा स्यात्,, ।
इति ॥

ननु कालो विशेषणभावमुपगच्छन् भावं स्वेन रूपेणावच्छिनत्ति तत्र को ऽसौ कालो नामेत्याशङ्क्याह ।

(३) कालः सूर्यादिसंचारस्तत्तत्पुष्पादिजन्म वा ।
शीतोष्णे वाथ तल्लक्ष्यः क्रम एव स तत्त्वतः ॥

ये इयत्तया परिनिष्ठिता आभासाः सिद्धा,स्तद्यथा चन्द्रसूर्यादीनां सहकारमल्लिकाकुटजादीनां शीतोष्णादेः परभृतमदविलासादेः, त एव कालः, यतो ऽपरिनिष्ठितं गमनपवनादि तैरियत्तया परिनिष्ठीयते परिवर्तकैरिव कनकं, स एव च सूर्यादीनां स्वभावविशेषस्तत्त्वतः परमार्थतः क्रमो नान्यः कश्चित्क्रमो नाम, क्रम एव च कालो नान्यो ऽसौ कश्चिदिति । एवकारो भिन्नाभिन्नक्रमो योज्यः, यौगपद्यमप्याभासयोरपराभासापेक्षया क्रम एव, चिरक्षिप्रादिधीरपि विततान्यत्ववशादाभासभेदे क्रमरूप एव, परत्वापरत्वबुद्धिरपि स्फुटत्वादिना तत्रैवेति, तेनतेन प्रतिमानवर्तकतुल्येन सूर्यसंचारादिना सहमीयमानो हेमस्थानीयो देवदत्ताभासस्य वैचित्र्यभेद इत्यमुच्यते दिवसं गच्छतीति ॥

नन्वेवं कालो भावस्वभावभूत एवास्तु कासौ कालशक्तिरित्याशङ्क्याह ।

(४) क्रमो भेदाश्रयो भेदोप्याभाससदसत्त्वतः ।
आभाससदसत्त्वे तु चित्राभासकृतः प्रभोः ॥

* इदमत्र बोध्यम् । लौकिकज्ञानव्यवहारमूलज्ञातृज्ञेयप्रकाशनसामर्थ्यं ज्ञानशक्तिर्देवस्य, तत्रैव संयोजनादिस्वातन्त्र्यात्मा विमर्शशक्तिरेव क्रियाशक्तिरिति, सा चेच्छास्वरूपैव पर्यवस्यतीति निरूपयिष्यते ।

इह स्वभावभेदमात्रं यदि क्रमात्मा कालः, तदङ्गुलीचतुष्टयं भिन्नस्वभावमिति भिन्नकालं भवेत्। तस्मादरुणाभासस्य सद्भावः स्फुटप्रभापुञ्जस्य चासद्भावः इत्येवंभूतो यो भेद आभाससद्भावासद्भावाभ्यामनुप्राणितस्तत्कृतः क्रमः कालात्मा, तौ चाभासानां भावाभावौ न बाह्यहेतुकृताविति विस्तार्योपपादितमिति, य एवं संवित्स्वभाव आत्मा स्वप्नसंकल्पादौ आभासवैचित्र्यनिर्माणे प्रभुः प्रभविष्णुरिति स्वसंविदितस्तत एव तौ भवतः, स ह्यात्मनि नीलादीनां भासानाभासयंश्चित्रतया परिमेययाभासयति। तथाहि लोहिताभासं उन्नताभासं दृढाभासं च सामानाधिकरण्येन, घटाभासं पटाभासं च पृथक्त्वावभासेन, अन्योन्यत्राभासाभावेन, स्वात्मनि त्वेकरसेनाभासेन, इयति च न क्रमस्योदयः। यदा तु शरदाभासं हेमन्ताभासेन च सर्वथैव शून्यमाभासयति, हेमन्ताभासं च शरदाभासेन, तदा कालात्मा क्रम उत्तिष्ठतीति, सेयमित्थंभूताभासवैचित्र्यग्रथनशक्तिर्भगवतः कालशक्तिरित्युच्यते॥

चित्राभासकृत्त्वमेव स्फुटयति।

(५) मूर्तिवैचित्र्यतो देशक्रममाभासयत्यसौ।
क्रियावैचित्र्यनिर्भासात्कालक्रममपीश्वरः॥

पदार्थस्य स्वं रूपं मूर्तिः, तस्या यद्वैचित्र्यं विभेदः तद्यथा, गृहमित्यन्यत्स्वरूपं, प्राङ्गनमित्यन्यद्, विपणिरित्यन्यद्, देवकुलमित्यपरम्, उद्यानमित्यन्यद्, अरण्यमिति तदितरत्, तस्माद्वैचित्र्यादाभास्यमानाद्देशरूपो दूरादूरव्रिततत्वाविततत्वादिः क्रमो भगवता ऽवभास्यते, यदा तु गाढप्रत्यभिज्ञाप्रकाशबलात्तदेवेदं हस्तस्वरूपमिति प्रतिपत्तौ मूर्तेरभेदो ऽथ चान्यान्यरूपत्वं भाति, तदा एकस्मिन्स्वरूपे यदन्यदन्यद्रूपं तद्विरोधवशादसहभवत्क्रियेत्युच्यते, तस्या यद्वैचित्र्यं परिमितापरिमितरूपतात्मकं तदेकानुसंधानेन फलसिद्ध्यादिनिबन्धनवशाद्यथारुचि चर्चितेन निर्भासयत्कालरूपं क्रममेव भासयति। "न चैतद्वाच्यमेकस्वरूपस्य कथमन्यदन्यद्रूपमिति" यतो नासौ कश्चिद्भावो य एवं विकल्प्यते, संविदेव हि तथा भाति, तथाभासनमेव चास्या ऐश्वर्यम्, नहि भासने विरोधः कश्चित्प्रभवति, स हि सुखदुःखादेर्भासनकृत एव, तथाभासनाभाव एव हि विरोधतत्त्वम्, एतदपिशब्देन ईश्वरशब्देन च दर्शितम्॥

नन्वेवमाभासविषयाभ्यामेव देशकालक्रमाभ्यां भवितव्यम्, अनाभासश्च प्रमाता, स नहि कस्य चिदाभासते, तस्य सर्वमाभाति यत,स्ततश्च तौ प्रमातरि कथं, दृश्येते च अभवमहं भवामि भवितास्मीति, गृहे तिष्ठाम्यरण्ये देवगृहे इति च। किं च स्वयं देशकालक्रमशून्यस्य किं दूरं किमन्तिकं किं वर्तमानं किमतीतं किं भावीति प्रमात्राश्रयो भावेष्वपि क्रमो न युक्तः। न च प्रमातृनिरपेक्षेष्वपि तेषु स्वात्मनि दूरत्वादि भूतत्वादि वा, तदेतत्समर्थयितुमाह।

(६) सर्वत्राभासभेदो ऽपि भवेत्कालक्रमाकरः।
विच्छिन्नभासः शून्यादेर्मातुर्भातस्य नो सकृत्॥
देशक्रमो ऽपि भावेषु भाति मातुर्मितात्मनः।
स्वात्मेव स्वात्मना पूर्णा भावा भान्त्यमितस्य तु॥

सर्वेषु वस्तुष्वेकानेकरूपेषु यः कालात्मा क्रमः तस्य य आकार उत्पत्तिनिबन्धनमिति व्याख्यात आभासस्य भावाभावकृतो भेदः स शून्यप्राणबुद्धिदेहादेर्भवतीति संभाव्यते, यतः स शून्यादिर्विच्छिन्नभाः, नहि तस्य भासनं स्वरूपं नीलादिवज्जडत्वात्, अपि तु संवित्स्फुरणमस्य भासनं, तद्यदास्य नास्ति यथा सुप्ते देहस्य संसारयात्रापतितत्वे शून्यस्य प्राणादेस्तदास्य भासनं विच्छिद्यत इत्याभाससद्भावासद्भावकृतः कालक्रमो ऽस्ति, "अतीतो ऽहं बालदेहाभासरूपो भवामि" "युवदेहाभासरूप इति" स च यतः प्रमाता ऽहंभावसमावेशनादपरिपूर्णाद् अत उद्रिक्तकालक्रमत्वाद् भावेष्वपि कालक्रममाभासयति, "यो ऽहं बालो ऽभवं तत्सहभावी घटाभासो ऽप्यभवदिति," न तु यः सकृद्विभात इत्यनया वाचोयुक्त्या ऽविच्छिन्नभासनः प्रमाता संविद्रूपस्तस्य स्वात्मनि कालक्रमः, नापि तदपेक्षया वेद्ये भावजाते, तद्धि तत्राभेदेन भातीति। एवं देशक्रमो ऽपि मितात्मनः परिच्छिन्नस्वरूपस्य शून्यादेर्देहान्तस्य स्वात्मनि भाति, इह तिष्ठामीति। स्वापेक्षया च भावेष्वपि यन्मम संयोगपारिमित्येन वर्तते तदन्तिकमितरद्दूरमिति। अमितस्य स्वरूपेयत्ताशून्यस्य तु संवित्तत्त्वस्य भावाः स्वात्मना ऽहंभावेन यतो भान्ति ततः पूर्णा अपरिच्छिन्नस्वरूपेयत्ताकाः, यतः स्वात्मा तस्य तथाभूत एवेति समुच्चयोपमा। तदुक्तम्। "अपूर्वो परं हीदं मूर्तितः क्रियातश्च सर्वं सर्वतः पूर्णमिति" क्रियाप्रसङ्गादिह कालक्रमः प्राकरणिको दृष्टान्तत्वेन एतत्प्रसङ्गाद्देशक्रमो निरूपितः, दृष्टान्तश्च पूर्वं वाच्य इति वैचित्र्यनिरूपणावसरे देशक्रमस्यादावभिधानं न्याय्यम्, उपसंहारे तु प्राकरणिकस्य कालक्रमस्यादौ निर्देशः, पश्चात्तु प्रासङ्गिकस्य देशक्रमस्येति॥

नन्वेवं सति प्रमातरि भगवति नास्त्येव क्रियेत्यायातं, कालक्रमाभावात्, क्रमाश्रयेण च तस्या अवस्थानादित्याशङ्क्याह।

(७) किं तु निर्माणशक्तिः साप्येवं विदुष ईशितुः।
तथा विज्ञातृविज्ञेयभेदो यदवभास्यते॥

इह तत्त्वतः परमेश्वरस्यास्याप्रतिहतस्वातन्त्र्यरूपाविच्छिन्नस्वात्मविमर्शमयमनन्योन्मुखतारूपेच्छैव क्रियेत्युपसंहरिष्यते ऽधिकारान्ते "एवमिच्छैव हेतुता कर्तृताक्रियेति,, चैत्रमैत्रादेरपि पचामीति यैवान्तरिच्छा सैव क्रिया, तथा चाधिश्रयणादिबहुतरस्पन्दनसंबन्धे ऽपि पचामीति न विच्छिद्यते। यत्तु पचामीति इच्छारूपं तदेव तथा स्पन्दनात्मतया भाति, तत्र तु न कश्चित्क्रमस्तत्त्वतः। एवमीश्वरस्यापि ईशे भासे स्फुरामि घूर्णे प्रत्यवमृशामीत्येवंरूपं यदिच्छात्मकं विमर्शनमहमित्येतावन्मात्रं तत्त्वं, न तत्र कश्चित्क्रमः। एतदेव चोच्यते प्रमातृप्रमेयवैचित्र्यक्रममुल्लसत्त्वमुना वाक्येन, तदत्रापि न कश्चित्क्रमः। यदा त्विच्छारूपं पचामीति स्पन्दनात्मतां कार्यपर्यन्तां गतं क्रमारूषितमाभाति तदा भगवदिच्छा प्रमातृप्रमेयभेदपर्यवसिता तत्क्रमोपश्लिष्टा भाति दर्पणतलमिव विततप्रवहन्नदीप्रवाहक्रमसमाश्लिष्टं। अत्र च केवलं दर्पणस्य तथेच्छा नास्ति, परमेश्वरस्य तु सास्ति, इत्युभयथा ऽस्य क्रियाशक्तिक्रमरूपक्रियानिर्माणसामर्थ्यं क्रमरूपक्रियोपरागयोगश्चेति। एवं देशक्रमे ऽपि वाच्यम्, तत्र त्वस्य चिच्छक्तिरुच्यते ऽन्यैः, इह तु क्रियाशक्तिरेव स्वीकृतेति पिण्डार्थः। अक्षरार्थस्तु तथेति स्वरूपभेदेन देशक्रमकारिणा क्रियाभेदेन च कालक्रमसंपादकेनोपलक्षितो यो विज्ञातुः शून्यादेः प्रमातुर्भेदो ऽन्योन्यं ज्ञेयाच्च, एवं घटादेः परस्परं ज्ञातुश्च स भगवता ऽवभास्यते, यत्तदवभासनं सा ईशितुरपि निर्माणशक्तिः क्रियाशक्तिर्न केवलं शून्यादेरेव क्रिया, यतश्च तन्निर्मितं ज्ञातृज्ञेयक्रियावैचित्र्यमसौ विद्वान्वेत्त्यनवरतं, तत्रैव हि तत्स्फुरति, ततो ऽपि तस्य सा क्रियाशक्तिः, अतो भासनविच्छेदाभावात् क्रमाभावे स्थूलदृष्ट्या यद्यप्यस्य भवेत्क्रियानुपपत्तिशङ्का, किं त्वेवमस्य क्रियाशक्तिरुपपन्नेति संगतिरिति शिवम्॥८॥

॥ आदितः सूत्रश्लोकाः ८७ व्याख्याताः ॥

इति श्रीमदाचार्याभिनवगुप्तविरचितायामीश्वरप्रत्यभिज्ञासूत्रविमर्शिन्यां क्रियाधिकारे क्रियाशक्तिनिरूपणं प्रथममान्हिकम्॥

॥ इति नवममान्हिकम् ॥

---

॥ श्रीः ॥

विरोधमविरोधं च स्वेच्छयैवोपपादयन्।
भेदाभेदौ च यो मन्वतत्त्ववित्तं स्तुमः शिवम्॥

यदुक्तमप्रतिहतसामर्थ्याद्भगवतो निर्माणशक्तिरिति तदेव बाह्यवाददर्शनानुपपद्यमानक्रियासंबन्धसामान्यादिपदार्थराशिसमर्थनमुखेन निर्वाहयितुं "क्रियासंबन्धसामान्ये"त्यादि "तेन न भ्रान्तिरीदृशी" त्यन्तश्लोकसप्तकेनान्हिकं प्रस्तूयते। तत्र प्रथमश्लोकेन सूत्रकल्पेन एकानेकरूपस्य क्रियादेर्बाह्यवादे विरुद्धधर्माध्यासदूषणेनानुपपद्यमानस्यावश्यसमर्थनीयं वपुरिति दर्श्यते, द्वितीयेन तत्रोपपत्तिस्सूच्यते, तृतीयेन निर्विकल्पकसंवेदनसंवेद्यत्वेपि विकल्पकाले एव स्फुटमेषां रूपमित्युच्यते, चतुर्थपञ्चमाभ्यामेकानेकस्वरूपताया विषयविभागश्चिन्त्यते, षष्ठेन ग्रहणकसूत्रसूचितसंबन्धस्वीकृतानां क्रियाकारकभावादीनां स्वरूपमुच्यते, सप्तमेनार्थक्रियोपयोग इति संक्षेपः॥

नन्वेवं तया निर्माणशक्त्या ऽवभासनारूपया यन्निर्मीयते तस्यावभासनैव निर्माणं नान्यत्। सा च द्विचन्द्रादेरप्यस्ति नीलादेरपि नीलादिनिष्ठस्य कर्मसामान्यसंबन्धादेरपि, ततश्चासत्यं सत्यं संवृत्यसत्यमिति य एवंप्रायेषु व्यवहारः स कथं संगच्छेत, निर्मेयत्वाविशेषादित्याशङ्क्य क्रियादीनामसत्यत्वं तावन्नोपपन्नमिति वदन् द्विचन्द्रादीनां त्वित्यमप्यसत्यत्वमिति सूचयन्नाह।

(१) क्रियासंबन्धसामान्यद्रव्यदिक्कालबुद्धयः।
सत्याः स्थैर्योपयोगाभ्यामेकानेकाश्रया मताः॥

चित्तत्वादन्यत्र या क्रियाबुद्धिः कर्तृकर्मकरणादिषु चैत्रो व्रजति तण्डुला विक्लिद्यन्ते एधा ज्वलन्तीति तस्या एकानेकरूपश्चैत्राद्यर्थ आश्रय आलम्बनं, तथाहि, तत्तद्देशकालाकारभिन्नस्तत्र चैत्रदेहो नैकस्वभावोपि स एवायमित्येकरूपतामपरित्यजन्नेव निर्भासते, स एव चैकानेकरूपोर्थः क्रिया, तथैव प्रतिभासनाच्च पारमार्थिकी, द्विचन्द्रादि तु तथाभासमानमप्युत्तरकालं प्रमाव्यापारानुवृत्तिरूपस्य स्थैर्यस्योन्मूलनेन द्विचन्द्रो नास्तीत्येवंरूपेणासत्यम्, इह पुनश्चलति चैत्र इत्येवंभूतो विमर्शोनुवर्तमानो न केन चिदुन्मूल्यमानः संवेद्यते, द्विचन्द्रादि च यद्यपि ह्लादोद्वेगयोरुपयुज्यते, तथापि द्विचन्द्रमानी न तावतीं तत्रार्थक्रियामभिमन्यते, अपि तु यादृशी एकेन शशिना कर्तव्या तिमिरापसारणादिरूपा तादृश्येवा परेणेति न तद्द्विगुणामर्थक्रियां तत्राध्यवस्यति, तस्यां चासौ नोपयुज्यते,व्रज्यायां तु यामेव यामप्राप्तिमध्यवस्यति तस्यामविकलायामुपयोगोस्या इति स्थैर्यादुपयोगाच्चैकानेकरूपक्रियातत्त्वालम्बना बुद्धिः सत्यैव, एवं संबन्धादिषु कालपर्यन्तेषु वाच्यम्। उत्तरकारिकासु स्फुटीभविष्यति॥

नन्वेकत्वमनेकत्वं चेति परस्परं विरुद्धे कथमेकत्र वस्तुनि स्याताम्, ततोयं च बाधकप्रमाणकृतः स्थैर्योन्मूलनप्रकार इत्याशङ्क्याह।

(२) तत्रैकमान्तरं तत्त्वं तदेवेन्द्रियवेद्यताम्।
संप्राप्यानेकतां याति देशकालस्वभावतः॥

इह तावच्चैत्रे चलति दृष्टे न जातु चित्र चलत्ययमिति बुद्धिर्जायते, न रजतमितिवद्, द्विचन्द्रेपि नायं द्विचन्द्रस्तिमिरवशादहमुपप्लुतनयनः परमेवं वेद्मीति भवत्युन्मूलना बुद्धिः। "यत्तूक्तमेकमेव कथमनेकं भवतीति" तत्रोच्यते, इह कारणमेव कथमकारणं भवति, "अथोच्यते विषयभेदात्तथेति" तद्विषयभेदे एतच्च विरुद्ध्यते इति केनायं वितीर्णो वरः, संवेदनेनेति चे,च्चलतीत्यादौ संवेदनमेवास्माभिः प्रमाणीकृतं किमिति न सह्यते। विषयभेदोपि चात्र वक्तुं न शक्यते। तथाह्याभासान्तरेणासंभेदने तदेकाभासमात्रमत एवान्यापेक्षावियोगादन्तरङ्गत्वादान्तरमनुवर्तमानं तथाभूताभासमात्रग्रहणोचितान्तःकरणसंवेद्यतया चान्तरं तथा स्वरूपापरिच्युतेस्तत्त्वमाभासान्तरयोगेन तननसहिष्णुत्वाच्च तत्त्वमेकमिति प्रतीयते तदेव देशाभासेनेहामुत्रेति कालाभासेनाधुना तदानीमिति स्वभावाभासेन कृशः स्थूल इत्यादिना मिश्रतया ऽनेकमिति बाह्येन्द्रियवेद्यतायां प्रतीयते। तथा स्वामिनश्चात्मसंस्थस्येत्युक्तनीत्या विश्वमेवान्तरं सदेकं तदेव "सान्तर्विपरिवर्तिनः उभयेन्द्रियवेद्यत्व"मिति वक्ष्यमाणकार्यकारणभावदृष्ट्या इन्द्रियवेद्यतायाम् अनेकं देशाद्याभासमिश्रणादिति। एकत्वमाभासान्तरामिश्रतायामन्तःकरणैकवेद्यत्वे चिन्मात्रायामनेकत्वं पुनराभासान्तरमिश्रतायामुभयकरणवेद्यत्वे चिदतिरिक्तभासने चेति स्फुटो विषयभेदः। तस्यैव च तथात्वमिति परामर्शबलादेव कारणाकरणवदुपादानसहकारिवत्। अथ व्यपदेशमात्रमेतत्कारणमकारणं चेत्यादि, तदिहाप्येकमनेकमिति व्यवहारमात्रम् नीलं पीतमविकल्पकं सविकल्पकमित्यपि सर्वं मायापदे व्यवहारमात्रमिति सर्वं समानम्। तस्मादेकानेकत्वविरोधो न बाधकस्तदेतदेवकारेणोक्तं, तत्रेति, तेषु क्रियादिषु यदान्तरं तत्त्वं तदेकं तदेवेन्द्रियवेदनीयतां प्राप्य देशादिभेदादनेकतां यातीति संबन्धः। तत्रेति सत्यत्वे स्थिते तयोर्वा एकत्वानेकत्वयोर्मध्ये एकत्वमेवमनेकत्वमेवमिति योजना॥

नन्वेवं विषयभेदे ऽभ्युपगम्यमाने यदैकं प्रतिभातं भवति तदा नानेकमनेकप्रतिभासे च नैकं प्रतिभातमिति कथमेकानेकरूपं वस्तु स्यात्, तथाहि बाह्येनेन्द्रियेण चैत्रे विचित्रदेशकः परमनुभूयते न त्वनेकाभाससंमिश्रीकारे बाह्येन्द्रियजस्याविकल्पस्य व्यापारः सन्निहितविषयबलोत्पत्तेरविचारकत्वादित्याहुः। विकल्पेनापि मानसेन तथाभूतं वस्तु नैव स्पृश्यते इति कया धिया वस्त्वेकानेकरूपं गृह्येत इतिपरव्यामोहनिबर्हणायाह।

(३) तद्द्वयालम्बना एता मनोनुव्यवसायि सत्।
करोति मातृव्यापारमयीः कर्मादिकल्पनाः॥

इह ज्ञानमालाया अन्तःसूत्रकल्पः स्वसंवेदनात्मा प्रमाता जीवितभूत इत्युपपादितं प्राक्, स च स्वतन्त्र इत्यपि निर्णीतम्। स च विशुद्धस्वभावः शिवात्मा, मायापदे तु संकुचितस्वभावः पशु,स्तदस्य मनःसमुल्लासावसरे विकल्पभूमिकायां स्फुट उल्लासः, ऐन्द्रियके निर्विकल्पके सदाशिवेश्वरदशाभ्युदयात्,अविकल्पकबोधाबहिर्भूतविमर्शव्यापारस्य पश्चाद्भाविनं व्यवसायं निश्चयात्मकं विकल्पकमनुव्यवसायशब्दवाच्यं विदधदन्तःकरणमेतान्क्रियासंबन्धादिविकल्पान्संपादयति, ते च विकल्पास्तद्द्वयमेकत्वानेकत्वरूपमवलम्बन्ते। नहि विकल्पेषु प्रतिभासमानमवस्तु तदिति ह्युक्तम्। प्रकाशतैव वस्तुत्वमिति, न च विकल्पस्य प्रकाशरूपतां मुक्त्वारोपणाध्यवसायाभिमानादिनामधेयं व्यापारान्तरमुक्तम्। ततो ऽबाह्यं बाह्यमारोपयन्तीत्यादि वचो वस्तुशून्यं, तच्चैतदुक्तं "भ्रान्तित्वे चावसायस्ये" त्यत्र। "अथ ब्रूयात्परो यदिन्द्रियज्ञानेन प्रकाशनीयं स्वलक्षणं तत्कथं विकल्पः स्पृशेदिति"। भवेदेवं यदि विकल्पो नाम स्वतन्त्रो भवेत्। यावता प्रमातुरसौ व्यापारः, प्रमाता च पूर्वानुभवान्तःस्वसंवेदनरूपः, तदस्य चायमेव पूर्वानुभवसंस्कारो यद्विकल्पनव्यापारकालेपि पूर्वानुभवात्मत्वमनुज्झन्नेवास्ते, ततः पूर्वानुभवो यावत्स्वलक्षणप्रकाशनात्मा तावत्पूर्वानुभवतादात्म्यापन्नप्रमातृतत्त्वव्यापारोपि विकल्पस्तद्विषय एव। अत एवमुक्तमाचार्येण।

पूर्वानुभवसंस्कारः प्रमातुरयमेव सः।
यदपोहनकालेपि स पूर्वानुभवः स्थितः॥

इति। तस्मात्प्रमातुर्यो व्यापार एकत्वानेकत्वसंयोजनात्मा स एव प्रकृतो यत्र तादृशीः क्रियादिकल्पना एकानेकवस्तुविषया एता इति ग्रहणकवाक्यसूचिता मन एव करोतीति स्थितम्। यद्यप्यविकल्पेपि सामान्याद्यवभासो घटमात्रावभासादौ, तथापि न तदा सामान्यादि स्फुटं समानोपरञ्जकत्वे संबन्धिद्वयोद्भवे क्रमिकक्षणसंतानात्यागेवयवकदम्बकस्वीकारे ऽवध्यवधिमत्परिग्रहादौ सामान्यसंबन्धक्रियाद्रव्यदिगादिपदार्थस्य परमार्थतः स्फुरणादिति मानसविकल्पग्राह्या एकानेकरूपाः सामान्यादय इति स्थितम्। इयं च संवृतिर्विकल्पबुद्धिः, तद्वशादुच्यतां संवृतिसत्यत्वं सत्यत्वस्यैव तु प्रकारस्तदिति द्विचन्द्रादिवन्नासत्यता॥

तत्र चायं संविदवतरणक्रमो यत्क्रियाशक्तेरेवायं सर्वो विस्फारः, तत्रापि संबन्ध एव मूलभूतः, तथाहि, समानानां यदेकं भाति तत्सामान्यं, देवदत्तस्य यद्वैतत्यं सा क्रिया,अवयवानां यदैक्यं वैतत्यं च देशतः सोवयवी, इममर्थं कृत्वा

ऽयमित्थं ततो ऽस्यायं पुरस्तादित्यादिर्दिक्, अस्यायं क्रियाप्रतानः सहभावेनास्ते विनाभावेन वेति वर्तमानादि कालः, यावद्धि प्रातिपदिकार्थस्य पृष्ठपाति वपुर्भाति तदतिरिक्तं सर्वं संबन्ध एवेति कारकाणामपि संबन्धरूपतैव, केवलं क्वचिदसौ संबन्धो व्यपदेशान्तरग्रन्थिं सहते, तथा सास्नादिमतां संबन्धो गाव इत्येकव्यपदेशसहिष्णुस्तत्र सामान्यादिव्यवहारः व्यपदेशान्तरग्रन्थिभङ्गे तु संबन्धवाचोयुक्तिरेव । अत एव मुष्टिप्रस्थपलादिप्रमाणपरिमाणोन्मानरूपं तत्रान्तर्गतं वाणुमहदादिसंख्यापृथक्त्वादि च यत्तत्सर्वं संबन्धस्यैव विजृम्भितम् । येपि सामान्यादि वस्त्वन्तरममंसत, तेपि तत्र समवायमभ्युपजग्मुर्जीवितत्वेन, समवायश्च संबन्धात्मा तदनुग्राह्यो वा केषांचित् । यत आहुः । "तां शक्तिं समवायाख्यामनुगृह्णाति संबन्ध इति । यदपि च कारकं, तदपि क्रियामुखप्रेक्षि, सापि कालं प्राणेश्वरमाश्रयति, सोपि क्रियाद्वारेण सर्वभावान्, सापि संबन्धमुद्गुरयतीति संबन्धाधीनैवेयं चित्रा लोकयात्रा । तदाहाचार्य एव ।

भेदाभेदात्मसंबन्धसहसर्वार्थसाधिता ।
लोकयात्राकृतिर्यस्य स्वेच्छया

इति । अतः संबन्धमेव प्रथमं निरूपयितुमाह ।

(४) स्वात्मनिष्ठा विविक्ताभा भावा एकप्रमातरि ।
अन्योन्यान्वयरूपैक्ययुजः संबन्धधीपदम् ॥

राजा पुरुषश्च बहिस्तटस्थौ स्वात्मैकपरिसमाप्तौ प्रमातृभूमौ यदैक्यं गच्छतः, न चैक्यमात्रं तयोर्विगलनापत्तेः, अपि तु परस्पररूपश्लेषात्मकं युगपदेव निमज्जदुन्मज्जद्भेदाभेदकोटिद्वयदोलारोहणलक्षणमन्वयरूपं तावन्तावेव संबन्धधिय आलम्बनं भवतो राज्ञः पुरुष इति । तथाहि, राजा यदा पूर्वं धिया गृहीतोपि न स्वात्मविश्रान्त्या तुष्यति तदा रूपान्तरेण पुंसा श्लेषं भजन्कृतार्थीभवति, पुरुषोप्येवं, स चैष रूपश्लेष एक एवोभयोश्चिदात्मनि तथावस्थानरूपः पूर्वप्रतिलब्धसंवित्प्रतिष्ठे तत एवाधिकसंविन्निमज्जनादनाभासमानपृथग्भवनलक्षणस्वातन्त्र्ये विश्राम्यतीति तत्रैव निर्भासते समास्कन्दितपुरुषपरमार्थोपि, एवं बहिरनेकता, अन्तस्तु परस्पररूपश्लेषैक्यमिति संबन्धस्य रूपम् ॥

(५) जातिद्रव्यावभासानां बहिरप्येकरूपताम् ।
व्यक्त्येकदेशभेदं चाप्यालम्बन्ते विकल्पनाः ॥

जात्यवभासस्यावभासमानरूपाया जातेर्ग्राहिका याः कल्पनास्ता न केवलं संबन्धवदन्तरेकरूपतां बहिश्चानेकरूपतामालम्बन्ते, यावद्बहिरपि व्यक्तिभेदलक्षणमनैक्यं बहिरेव तदनुस्यूततारूपामेकतामवलम्बनत्वं नयन्ति । गाव इति हि प्रतिभासे पृथक्त्ववता बहिर्व्यक्तयो भान्ति, येन च बहुवचनमन्वयायि चासां भाति वपुर्यत एकप्रातिपदिकार्थपरामर्शानुगमः, उभयं च तद्बहिरेव, इमा इत्यङ्गुल्या निर्देशात्, केवलं बाह्यत्वमपि स्थिते परमार्थप्रकाशान्तर्भावे इति न तत्र भेदाभेदौ दूषणं, चित्रसंवेदन इव, अनेन द्रव्येपि रक्तारक्तादिविरोधः कृतप्रतिविधानः । आन्तरं त्वैक्यं संबन्धद्वारेण तद्वदेव सर्वत्रैवमवभासमानस्य घट इत्यवयविद्रव्यस्य ग्राहिका याः कल्पनास्ता न केवलं संबन्धवदन्तर्बहीरूपतया एकानेकविषया यावद्बहिरप्येकं निःसंधिबन्धरूपत्वेन भिन्नं च अवयवलक्षणैकदेशद्वारेण स्वीकुर्वते, घट इति हि निःसंधिबन्धनैकघनात्मा विततरूपश्च भातीति ॥

(६) क्रियाविमर्शविषयः कारकाणां समन्वयः ।
अवध्यवधिमद्भावान्वयालम्बा दिगादिधीः ॥

कारकाणां कर्त्रादिशक्त्याधाराणां द्रव्याणां योन्योन्यं समन्वयो दृश्यते, यथा मातृमेयमानानां मिथः, सोन्तर्लीनप्रमात्मकक्रियाविशेषपरामर्शैकनिमित्तकः । नहि प्रमापरामर्शमन्तर्वर्तिनं विहाय वस्तुनः साक्षादन्वयोत्र संवेद्यते । अनन्यत्र भावरूपतानिमित्तताऽत्र विषयार्थः, कारकशक्तीनामपि यः स्वाश्रयैः संबन्धः सोपि क्रियापरामर्शनिमित्तकः, द्रव्याणां च शक्तीनां च क्रियया साकं साक्षात्संबन्ध इतीयं क्रियैव भगवती एतावद्विजृम्भितं संबन्धमाविर्भावयति । अस्मादिदं पूर्वं परं दूरे इत्येवं बहिर्भिन्नतया परामृश्यमानयोर्भावयोरन्तरभेदपूर्वकं भेदावमर्शमध्यमभेदविश्रान्तं च यद्रूपमामृश्यते तद्दिगित्युच्यते, अत्र हि तयोर्मुखाद्यवयवविशेषपरामर्शादरस्तत्सम्मुखत्वपराङ्मुखत्वादिनिश्चयः संयोगसंयुक्तसंयोगाल्पतादिपरिग्रहश्चोपयोगी, कालपरामर्शस्य पूर्वापरादिरूपत्वे जन्मस्थित्यल्पतादिविमर्शश्चिरक्षिप्रत्वादिरूपत्वे च पक्ष्यति पचत्यपाक्षीदित्यादौ तु संभावितस्फुटस्य स्फुटभूतपूर्वस्यात्मीयसंवेदनस्पन्दितप्राणादित्यादिक्रियान्तरस्य फलविशेषस्य चोदनादेः परामर्श उपयुज्यते । एवं संख्यापरिमाणपृथक्त्वसंयोगविभागप्रभृतिषु संबन्धरूपतैव वाच्या । सर्वथायं संक्षेपः, यत्र पदार्थाभासस्यात्मविश्रान्त्या संतोषमपुष्यत आभासान्तरपरामर्शविश्रान्तिसाकाङ्क्षतया स्वरूपनिष्ठा, तत्र संबन्धरूपतैव क्रियाशक्तिविजृम्भामयी, तत्रापि भावान्तरापेक्षया संबन्धान्तरमप्यस्तु, यथा संख्यादौ समवायं मन्यन्ते, न चानवस्था भवन्त्यपि दोषाय, पूर्वापरकल्पसृष्टानवस्थेव, नह्युत्तरसंबन्धसृष्टा विना पूर्वसंबन्धावभासे हानिः का चिद्येन मूले क्षतिः शङ्क्येत ॥

एवं सकललोकयात्रानुप्राणितकल्पानल्पसंबन्धबन्धुरीभावभावं क्रियाशक्तिविजृम्भात्मकमभिधाय तस्य स्थैर्यापयोगी पूर्वसूचितौ निरूपयितुमाह ।

(७) एवमेवार्थसिद्धिः स्यान्मातुरर्थक्रियार्थिनः ।
भेदाभेदवतार्थेन तेन न भ्रान्तिरीदृशी ॥

इह भावानां न सत्तासंबन्धः सत्त्वमव्यापकत्वादनवस्थावैयर्थ्यादिदोषात्, नार्थक्रिया वस्त्वन्तरत्वात्, न तत्कारित्वं सर्वदा तदावेशादर्शनात् । उक्तं हि । "अर्थक्रियापि सहजा नार्थाना"मिति । तत्कारित्वस्य च प्रत्यक्षानुपलम्भात्मकान्वयव्यतिरेकगम्यस्याप्रत्यक्षत्वे सतोऽप्यप्रत्यक्षत्वप्राप्तेर्नार्थक्रियाकरणयोग्यत्वं तस्य सत्यासत्यके निश्चयकाले दुरवधारित्वात् । सर्वस्य चास्याप्रकाशमानत्वे नरशृङ्गप्रायत्वम्, अर्थक्रियाकारितान्तरपर्येषणे चानवस्थेति, प्रकाशमानतैवानुन्मूल्यमानतथोचितविमर्शपरिस्पन्दाभावस्य सत्त्वम् । सा च भेदाभेदवपुषां संबन्धादीनामस्तीति निराशङ्कमेव सत्त्वमेषाम् । तथापि यदि परोऽनुबध्नीयादिह लोकः प्राचुर्येणार्थक्रियार्थी तत्कारिणि सत्यत्वं व्यवहरति तत्किं संबन्धादीनामस्तीति, तदस्य हृदयमाश्वस्यते, यदि न कुप्यसि तत् सर्वत्रैव व्यवहारे यत्रापि स्फुटा संबन्धादिधीर्नोदेति तत्राप्येवमेवेति । संबन्धादिरूपतया भेदाभेदवान्योऽर्थः तेनैवार्थक्रिया, न तु स्वात्ममात्रविश्रान्तेन का चिदपि कदा चिदप्यर्थक्रिया, तथाहि, सुखेन स्मर्यमाणेनाभिलाष इत्यादिक्रमेण सर्वो व्यवहारः सुखाभासश्च योऽनुभूतः स एवाभिलष्यते न त्वन्योऽननुभूतः स एव च यदि प्राप्यते तदभिलषितं प्राप्तमिति तुष्यते । यदि च तत्तदेव, तर्हि किमभिलष्यते प्राप्तत्वात् । अथातदेव, तथापि कथमर्थ्यते ऽज्ञातत्त्वात् । तस्मादेतदेवं भवति, यदि तदेव चातदेव च तदपि चातदपि चेति । एवं सुखसाधनेषु वाच्यम् । तदुक्तमाचार्येणैव ।

दृष्टार्थितायामिष्टं वा विमृष्येतेष्टकारि वा ।
न चाप्यदृष्टमिष्टं द्वौरपीष्टा दृष्टभोगभूः ॥
दृष्टं च सह दृष्ट्यैव विनष्टमिति कार्थिता ।
द्रष्टॄक्येन विमृष्टं तद्

इत्यादि । एवं चाभासात्मन्यस्मिन्नसंवेद्यमपि आभासान्तरं सामान्यसंबन्धरूपतया ऽनुप्रविष्टमन्यथा न कश्चिद्व्यवहार इति सकलदेशकालदशापुरुषोपभोगी यद्येष व्यवहारो न सत्यस्तर्हि नान्यस्य सत्यत्वं विद्म इति नात्र भ्रान्तिरिति भ्रमितव्यमिति शिवम् ॥ ७ ॥

॥ आदितः सूत्रश्लोकाः १०४ व्याख्याताः ॥

इति श्रीमदाचार्याभिनवगुप्तविरचितायामीश्वरप्रत्यभिज्ञासूत्रविमर्शिन्यां क्रियाधिकारे भेदाभेदविमर्शनं द्वितीयमान्हिकम् ॥

॥ इति दशममान्हिकम् ॥

---

## ॥ अथ बालरामायणाख्यनाटकस्य ॥

॥ चतुर्थोऽङ्कः ॥

अतः परं भार्गवभङ्गो भविष्यति ।

ततः प्रविशत्युपाध्यायो बटुश्च ।

बटुः । भोभो उवज्झाअ अब्भुवगदसिस्सभावो अहमेस भवभूदी सपादोपग्गहमभिवादेह्मि * ।

उपाध्यायः । विद्यावान्भूयाः । शिरसि स्पृशन् वत्स भवभूते कुतः पुनरुपनयनादिकाः संस्काराः कुतश्च मामुपाध्यायीकर्तुमागतोऽसि ।

बटुः । भअवदो भगवादो † ।

उपाध्यायः । भगवान् भार्गवो भगवतो भवानीवल्लभात् प्रतिपन्नकार्मुकोपनिषत् संविदितचतुर्दशविद्यास्थानरहस्यश्च तदनुपपन्नमिवेदं पश्यामि यद्गुताध्ययननिमित्तमाचार्यान्तरसमाश्रयणम् ।

बटुः । भो उवज्झाअ ण हु दिट्ठे अणुववण्णं णाम ‡ ।

उपाध्यायः । कथम् ।

बटुः । सो क्खु महेसी भविअ समरसमारम्भमहग्गहग्गहिओ § ।

उपाध्यायः । तस्य खल्वियं मात्रंशत्त्रभावसुलभा यावज्जीवमायुधपिशाची न हृदयादपक्रामति ।

बटुः । तेण क्खु अहं एदे विणिहदपडिवक्खदोघट्टघटाकडपासवासत्तसल्ला भल्ला विद्दाविअमहारहरिउदप्पा खुरप्पा असमसमरारम्भपवट्टिदवेरिवीरहिररआ णाराआ खण्डिअविपक्खधाणुक्कबाणासणदण्डा कण्डा सुट्ठुमुच्छिअचतुरङ्गबलसेण्णसहअरिसहस्सदंसणसव्वंगुक्कीरिदाओ भेरिआओ सअलखत्तिअगोत्तणिद्दलणदुव्विडिल्ला बाणावलित्ति पभूदकण्डसंभारअं वहन्तेण कुदो दाव विज्जाहिगमो णिअसरीरदोवि परिब्भंसिदोह्मि जदो गआणणगरुअङ्गभारोवि भविअ भिङ्गिरिटिपडिरूवो वट्टामि । सस्मरणम् । अदिक्कन्तदिअसप्पओसे उव

---

* भोभो उपाध्याय अभ्युपगतशिष्यभावोऽहमेष भवभूतिः सपादोपग्रहमभिवादये ।

† भगवतो भार्गवात् ।

‡ भो उपाध्याय न खलु दृष्टेऽनुपपन्नं नाम ।

§ स खलु महर्षिर्भूत्वा समरसमारम्भमहाग्रहगृहीतः ।

णिद्दलिदणीलकण्ठसरासणं दासरहिराममभिजुज्जिदुं णिच्छिदमणेण सत्रं चिन्तित्र बहवो बहुप्पत्रारफलसारा कण्डकरण्डत्रा संजमिदा । जाणं दुव्वहतणं त्रणुसंधित्र त्रद्धरत्तसमए णिहुदपदसंचारमवक्कमित्र उवज्झात्रत्तणेण भत्रवन्तमब्भुववण्णोह्मि * ।

उपाध्यायः । एतदेव स्वर्गगमनप्रभावभाजां मुन्यतिथीनां मुखेभ्यः श्रुतमस्माभिः । यदुत श्रुतभार्गवसमरसंरम्भेण पुरन्दरेणापि दशरथः सत्कृत्य प्रहितइति । विचिन्त्य । त्रहो महदन्तरमन्योन्यं रामयोः । यत् परिणतवयाः प्रगल्भविक्रमो वैखानससूनुर्यत् कैामारकमुग्धमधुराननो राजन्यपोतः । विमृश्य । त्रहह सकृद्दृष्टमपि नयनावलम्बिनमिव तमहमिमं पुरतः पश्यामि । त्रहो नु खलु भोः ।

ज्यायान् धन्वी नवधृतधनुस्ताम्रहस्तोदरेण
क्षत्रक्षोदव्यतिकरपटुस्ताडकाताडकेन ।
कर्णाभ्यर्णस्फुलितपलितः क्षीरकण्ठेन सार्द्धं
योद्धुं वाञ्छन् कथममुना लज्जते जामदग्न्यः ॥ १ ॥

बटुः । भो उत्रज्झात्र जदि क्खु एवंविधपरक्कमो परसुरामो ता की उण ण तिणत्रणबाणासणे पत्रट्टो त्रासि † ।

उपाध्यायः । स खलु शरासनशिक्षाविचक्षणः सब्रह्मचारिभिरनुयुक्तोऽपि पुनःपुनरित्यमभिधाय स्थितः ।

त्राचार्यो मे स खलु भगवानस्मदयाह्वनामा
तस्मादेषा धनुरुपनिषत् तत्प्रसादात् क्षमोऽपि ।
त्रध्यासीनः कथमहमहो वर्त्म वैखानसानां
सोतापाणिग्रहणपणितं चापमारोपयामि ॥ २ ॥

बटुः । कीरिसं मन्तेध भग्गवराहवाणं समरसंरम्भे कस्सिं जत्रवडात्रा पडिवज्जिस्सइ ‡ ।

उपाध्यायः । भद्र भवभूते किं कथयामि यदुभयपराक्रमावलोकि सन्देहदोलाधिरूढमिव चेतः । पश्य ।

एकः सङ्ख्येऽभिमुखमजयत् सूनुमद्धेन्दुमैालेस्तस्यैवान्यो धनुरनुपमं पुष्पमाथं ममाथ ।
द्वावप्येतावति हि बलिनैा किन्तु तद्धा जयश्रीर्यस्य प्रीतः स खलु भगवान् पार्वतीप्राणनाथः ॥ ३ ॥

नेपथ्ये ।

त्रत्रे पुलस्त्य पुलह प्रतिथे सुगीथ
शाण्डिल्य कुण्डिन विभाण्डक याज्ञवल्क्य ।
काण्वे वसिष्ठ यम दत्त पदं रणाय
शापेन निर्दहति नारद एष नो चेत् ॥ ४ ॥

भो नाकनायक विनायक चित्रभानो
भानो विशाख वरुण क्षणदेशदम्भो ।
कीनाश किन्नरपते पवमान रुद्र
द्राक्सङ्गरं भजत भार्गवराघवीयम् ॥ ५ ॥

रत्नप्रभे रजनि चित्रलते लवङ्गि
सैादामिनि भ्रमरि सुन्दरि देवसेने ।
रम्भे घृताचि कलकण्ठि सुकण्ठि सर्वाः
स्वर्यापितो व्रजत पश्यत रामभद्रम् ॥ ६ ॥

मायावने विहगवेग कृपाणकेतो
जीमूतवाहन कपिञ्जल हंसनाद ।
विद्यावतंस तिलकोत्तर केलिसार
विद्याधरास्त्वरितमेत रणाय यामः ॥ ७ ॥

हे हेमवर्ण मणिशेखर चित्रबाहो
वीणाविनोद मदवल्लभ रक्तकण्ठ ।
क्रीडाकुमार कनकाङ्गद रुद्रहास
द्राक् सारणीः सरत मां युधि चेद्दिदृक्षा ॥ ८ ॥

उपाध्यायः । वत्स भवभूते कलहकुतूहली नारदमुनिर्महर्षीन् देवानप्सरसो विद्याधरान् सिद्धांश्च हठप्रसादाभ्यामभिधत्ते तदेह्यावामपि तत्समरोपस्थानेन कमलसंभवसंभवं मुनिमनुवर्तामहे ।

इति निष्क्रान्तैा । मिश्रविष्कम्भकः ।

ततः प्रविशति मातलिसारथिना रथेन चामरधारिण्या वीज्यमानो दशरथः । समन्तादवलोक्य कथमुच्चिद्रपारिभद्रद्रुमस्तबकरमणीयारुणसन्ध्यानुबन्धिनि गगनाङ्गणपृष्ठे प्रतिष्ठामहे । विचिन्त्य । त्रहो काऽपि वैचित्री वर्तते त्रन्तरिक्षकुक्षैा प्रभातसमयस्य तथाहि ।

व्योमोत्सङ्गविभूषणस्य सवितुर्द्यावापृथिव्योः समं
ध्वान्तध्वस्तिरुदङ्कखैश्च किरणैः प्रारम्भि चावाङ्मुखैः ।

* तेन खलु त्रहं एते विनिहतप्रतिपक्षगजघटाकटपार्श्वव्यासक्तशल्या भल्लाः विद्रावितमहारथरिपुदर्पाः क्षुरप्राः त्रसमसमरारम्भप्रवर्तितवैरिवीरुधिरराग नाराचाः खण्डितविपक्षधानुष्कबाणासनदण्डाः काण्डाः सुष्ठुमूर्च्छितचतुरङ्गबलसैन्यसहचरिसहस्रदंशनसर्वाङ्गोत्कीरिता भेरिकाः सकलक्षत्रियगोत्रनिर्दलनदुर्ललिता बाणावलिरिति प्रभूतकाण्डसम्भारं वहता कुतस्तावत् विद्याधिगमो निजशरीरादपि परिभ्रंशितोऽस्मि । यतो गजाननगुर्वङ्गभारोऽपि भूत्वा भृङ्गिरिटिप्रतिरूपो वर्ते । त्रतिक्रान्तदिवसप्रदोषे पुनर्निर्दलितनीलकण्ठशरासनं दाशरथिराममभियोक्तुं निश्चितमनसा स्वयं चिन्तयित्वा बहवो बहुप्रकारफलसाराः काण्डकरण्डकाः संयमिताः येषां दुर्वहत्वमनुसंधायार्द्धरात्रसमये निभृतपदसंचारमवक्रम्योपाध्यायत्वेन भवन्तमभ्युपपन्नोऽस्मि ।

† भो उपाध्याय यदि खल्वेवंविधपराक्रमः परशुरामस्तत् किं पुनर्न त्रिनयनबाणासने प्रवृत्त त्रासीत् ।

‡ कीदृशं मन्त्रयथ भार्गवराघवयोः समरसंरम्भे कस्मिन् जयपताका प्रतिवर्तिष्यते ।

प्रत्यासन्नविरोधितस्य गगने मन्दाकिनीसद्मनां
पद्मानां प्रकरः प्रगेऽपि विकसत्यावृत्तकीर्णच्छदः ॥ ९ ॥

अपिच ।

निर्याति प्रथमप्रचारसमये स्फारध्वनड्डिण्डिम-
स्वस्ताधोरणदूरनामितगजेनाऽयं नभोवर्त्मना ।
अश्वं वा जघनान्तदोलितकरः स्ववाहिनीं गाहितुं
रोधस्ताडनकेलिरुग्णदशनयावाश्रिरैरावणः ॥ १० ॥

स्मरणमभिनीय । आर्य मातले सकलसुरसुन्दरीकरतलान्दोलितचामरचिकुरचुम्ब्यमानमांसलांसस्थलीसंदानितसन्तानकुसुममालाप्रालम्बेन समददानवद्विरदनिकुरम्बडम्बरडामरैकहारिणा हरिणा समादिष्टोऽस्मि यथा सखे दशरथ गच्छ त्वं मिथिलां पुरीं यदावेदितं मे मर्त्यमण्डलचाराधिकारचतुरेण चारणचक्रेण यदुत शङ्करशरासनसमारोपणपणप्रवर्तितसीतास्वयंवरयात्रापरतन्त्रायां मिथिलायां शिथिलाभिमानयन्त्रिमन्यरस्थितिषु सकलपृथ्वीपालेषु ।

गात्रं गोत्राचलेन्द्रस्त्रिनयनवलयं यस्य सिञ्जा भुजङ्गो
विष्णुर्बाणः पुराणां त्रयमभयमभूद् दुःखलव्यं शरव्यम् ।
धन्वी येनेन्दुमौलिः स च भुवनगुरुस्तद्धनुर्धाम धाम्नां
क्रूरक्रेङ्कारभारात्स्वभुजवलयितं रामभद्रेण भग्नम् ॥ ११ ॥

गुरुधनुर्ध्वंसजनितामर्षविषमेण वीतत्रासरेणुना रैणुकेयेन सह रामभद्रस्य समरसंरम्भो भवितेति तत्र च तत्प्रतिष्ठत्य वधूवरमयोध्यामध्यारोप्य सुरकार्यशेषसंपत्तये पुनरनाहूतेनोपस्थातव्यमिति । तन्नमुचिसूदनसीरथे कथय स भगवान् पौलोमीवल्लभो भृगुपतिचरितानि बहु मन्यते न वा ।

मातलिः । किं नाम बहु मन्यते न वेति शृणु श्रावयामि ।

आस्थानसद्मनि विलासगृहे विमाने
नेत्रे रथे च सततं सुरचक्रवर्ती ।
रामस्य चित्रलिखितानि कुतूहलेन
वीरो विलोकयति पूर्वविचेष्टितानि ॥ १२ ॥

यदस्यैव पुरन्दरस्यन्दनस्य चतुर्दिशं मत्तवारणीयफलकेषु रामचित्रं लिखितम् । अङ्गुल्या निर्दिशन् तत्तावदितो दीयतां दृष्टिः । इयं च प्ररोचना भृगुपतिपराक्रममहानाटकस्य यदुत भगवतस्त्र्यम्बकात् कार्मुकोपनिषल्लाभः ।

दशरथः । कथमयं विशालशिलः शिलोच्चयः । तत्रापि हिमालय इति प्रालेयपाण्डुराभिः शिखरश्रेणीभिर्लक्ष्यते ।

मातलिः ।

शैलेन्द्रो हिमवानयं गुरुगुहागर्भस्थविद्याधरी-
गीतत्वच्चरितः कृताश्रमपदो रुद्रेण पत्न्या सह ।
एतस्मिंश्चिरजीविभिः परिगतं दिव्यौषधीसेवनात्
कन्दर्पस्य वपुष्मतश्च चरितं राजन्ननङ्गस्य च ॥ १३ ॥

अन्यतो दर्शयन् इह धनुर्वेदविद्योपदेशः ।

देवस्त्र्यम्बक एष वन्द्यचरणो वृन्दैः सुधाभोजिना-
मत्रास्ते स शरासनोपनिषदं दातुं धृताचार्यकः ।
दूरावर्जितमौलयः सरभसाः सद्यः प्रतीच्छन्त्यमी
हेरम्बेण च षण्मुखेन च समं रामादयः सुव्रताः ॥ १४ ॥

दशरथः । अहो मनुष्यमुनिमहाभागधेयो भगवान् भार्गवो यस्य स्वयमर्द्धेन्दुमौलिर्धनुर्वेदविद्याचार्यः ।

सौदामिनी । कधं अधिगदोवदेसरहस्सा खुरलीखेलिणो इदो एदे वट्टन्ति किं उण दूरदेसप्पसरो लक्खविक्खेवो णिविडप्पहारितणं च रामबाणाणं सविसेसमालिहिदं एत्थ * ।

मातलिः । अहो महदन्तरं प्रज्ञाप्रकर्षस्य तथाहि ।

उपदिशति समानं कर्म कृत्स्नं पिनाकी
सममपि च यतन्ते कर्तुमभ्यासमेते ।
तदपि भृगुकुलेन्दुः काममुत्कृष्यतेऽसौ
ननु भवति निवीतं द्रव्यमेव क्रियाभिः ॥ १५ ॥

पुरोऽवलोक्य । अति हि नाम स्वच्छन्दचरितस्याऽपि देवस्य माध्यस्थ्यं तथाहि ।

बर्हिध्वजेऽपि सति सत्यपि दन्तिवक्त्रे
प्रेमोपधानमवधूय पिनाकपाणिः ।
हस्तेन नित्यधृतवासुकिकङ्कणेन
प्राज्ञप्रियः स्पृशति भार्गवमेव पृष्ठे ॥ १६ ॥

पुरतोऽवलोक्य कथं खुरलीखेलनप्रसरत्पृषत्कपङ्क्तीनां त्रिनयनान्तेवासिनां चेतसि विरचितं पदं परस्परस्पर्द्धया । पुनरवलोक्य कोदण्डपाण्डित्यनिबन्धनः प्रवृत्त एव कलहः ।

दशरथः । एवमेवैतत् ।

द्वन्द्वारम्भविजृम्भितभ्रुकुटिना भालेन रामे मुनौ
कोदण्डं निबिडाङ्गुलीपरिगमादास्फालयत्यग्रतः ।
ज्यानिर्घोषकषायितोदरजुषां गीर्वाणसेनापतेः
षड्वक्त्रीश्रवसां करोति न करद्वन्द्वं पिधानक्रियाम् ॥ १७ ॥

सौदामिनी । एस समरङ्गणसमासण्णकेलाससिहरणिवेसी भअवं वुसहलञ्छणो समं विसाहजणणीए देवीए पेक्खदि णंदिप्पमुहसेणावदिपरिव्वुदाणं कुमारहेरम्बाणं रामेण सह

* कथमधिगतोपदेशरहस्याः खुरलीखेलिन इत एते वर्तन्ते । किं पुनर्दूरदेशप्रसरो लक्ष्यविक्षेपो निबिडप्रहारित्वं च रामबाणानां सविशेषमालिखितमत्र ।

भत्ति समरसंरम्भविवसिदं * ।

मातलिः । न केवलं पश्यति स्वमनीषिकोत्कर्षेण शिष्ये किमपि प्रीयते यतः ।

सम्यक्कोदण्डविद्या विनयचतुरता कुत्र सोल्लेखरेखा
पुत्रान्तेवासिनोर्मे सपदि परिणतेत्येव वेत्तुं विशेषम् ।
देवः श्रीचन्द्रचूडार्मणिरचलसुतापाणिपद्मावलम्बी
स्थित्वोद्ग्रीवं विटङ्कात् स्फटिकशिखरिणो वीक्षते निश्चलाक्षः ॥ १८ ॥

दशरथः । अति हि प्रीयते यतः ।

नन्दत्नन्दिनि चण्डचण्डचरिते हेलाचलच्चन्द्रम-
स्युद्दामद्विरदास्यहास्यरसवत्याविष्टघण्टामुखे ।
भ्राम्यद्भृङ्गिरिटौ च भङ्गुरगणग्रामे सहैवोमया
संग्रामे प्रहरत्स्वयं दिशिदिशि प्रेम्णा हरेणेक्ष्यते ॥ १९ ॥

मातलिः । इतइतः पश्य हास्याद्भुतयोरधिष्ठानम् ।

दोर्दण्डद्वितयाञ्चितोच्चतधनुर्यन्त्रप्रसूतेषवः
शुण्डोद्दण्डपरश्वधाः परिणमद्दन्तार्गलाकोटयः ।
एताः कर्णविकीर्णवक्रकवचाः संरम्भिणः सङ्गरे
हेरम्बस्य हरन्ति हन्त हृदयं द्राक्कोपविक्रान्तयः ॥ २० ॥
नरनागक्रियामिश्रा हृतरुद्राम्बकक्रियाः ।
दुर्धरा हन्त हेरम्बरणव्यापारकेलयः ॥ २१ ॥

सौदामिनी । कुञ्जराणणरणकम्मणिम्माणपडिकोविदेण जमग्गिसूणुणा उवक्कन्तं किंपि जेण णासन्तगणग्गामं समज्जिदं विअ समरङ्गणं पडिहाअदि † ।

दशरथः । साधु सौदामिनि साधु यथा समर्थयसे ।

अत्रैते प्रमथाः सरन्ति सभियः कैलासशैलान्तरं
नन्दी भृङ्गिरिटिश्च लूनधनुषावत्रेषुधी मुञ्चतः ।
हेरम्बस्य च मुक्तमत्र मधुपैस्त्रासादमाद्यन्मुखं
क्रौञ्चारिः परमेष तिष्ठति हसन् सङ्ख्ये शरैः पुङ्खितैः ॥ २२ ॥

पुरोऽवलोक्य । कथं जामदग्न्यस्य पुरतोऽक्षरावली । वाचयति ।

त्वं पुत्रस्त्रिपुरद्रुहः पुनरहं शिष्यस्तदेतावता
तुल्योऽप्यस्तु कथं तवायमधिकः कोदण्डशिक्षाविधिः ।
तत्राधारनिबन्धनो यदि भवत्याधेयधर्मोदय-
स्तद्वाः स्कन्द गृहाण कार्मुकमिदं निर्णीयतामन्तरम् ॥ २३ ॥

मातलिः । भूकाश्यप पुरतः पश्य सहसा षण्मुखं संमुखीभूय स्थितवन्तं गजाननं च भृगुपतिः पाशुपतास्त्रेण ज्योतिश्छटाच्छादितरोदःकन्दरकुहरडामरेण हर्षादुपतिष्ठते ।

दशरथः । कथमक्षरावली वाचयति ।

क्रोधोद्बाधव्यतिकरसदृङ्गिर्भराभ्यासयोग्यो
मद्दोर्दण्डोपगमसदृशस्त्यक्तशिष्योचितश्च ।
दत्तातङ्को विबुधमनसां कर्तुमद्धा कबन्धं
चापादस्मात् प्रसरतु शरः सम्मुखः षण्मुखेऽपि ॥ २४ ॥

मातलिः । अत्रान्तरे किञ्चिज्जातम् ।

किञ्चित्कोपकषायितेन मनसा यावत् सतीसूनवे
प्रैयत्तं भृगुनन्दनो निजधनुर्यन्त्रे निधत्ते शरम् ।
हेलास्रस्तदुकूलसंवृतिमती विस्रंसिकाञ्चीलता
तावद्व्याकुलनूपुरं भगवती मध्ये मृडानी स्थिता ॥ २५ ॥

दशरथः । पुरतोऽवलोक्य । अयं तु प्रकृत्युद्धतो राम कथमित्यमतिप्रश्रयते । तदस्य त्रिभुवनातिशायि चरिताद्भुतं तथाहि ।

दृष्ट्वा रामः किसलयसमं पाणिमुद्यम्य सम्य-
ङ्मध्ये भूतां गिरिदुहितरं षण्मुखस्यात्मनश्च ।
संहृत्यास्त्रं विधृतशरधिर्मुक्तकोदण्डदण्डः
पादौ मार्जन्नमति नमता प्राग्जटामण्डलेन ॥ २६ ॥

सौदामिनी । अहो पसादादिसओ रामम्मि चन्दसेहरस्स तत्यभवं मच्चमण्डलाखण्डल ता इदो पेक्ख * ।

दशरथः । दृष्ट्वा ।

येनात्र खण्डपरशुः परशूत्तमेन
शम्भुः सुमेरुतटताडनखण्डितेन ।
रामाय निर्जितवते तमसौ कुठार-
मस्मै समर्पयति साञ्जलिसंपुटाय ॥ २७ ॥
दत्ते च विद्यास्थानानि देवस्तस्मै चतुर्दश ।
शतभङ्गीभवद्भद्रा महतां हि प्रसत्तयः ॥ २८ ॥

सौदामिनी । संकि तदोपहुदि रामो परसुरामोत्ति उच्चदि † ।

मातलिः । इदमयतः पश्य ।

यः शृङ्गाग्रैः सरणिमकृणत् क्रौञ्चशैलः सहेलं
यातुः शम्भोर्द्रुतरुपनिपत्प्राप्तये पादमूलम् ।
सोऽयं कोपाद्दहति विहितं मार्गणैर्भार्गवस्य
छिद्रद्वारं त्रिदिवसरसीहंसयात्रापवित्रम् ॥ २९ ॥

* एष समराङ्गणसमासन्नकैलासशिखरनिवेशी भगवान् वृषभलाञ्छनः समं विशाखजनन्या देव्या प्रेक्षते नन्दिप्रमुखसेनापतिपरिवृतयोः कुमारहेरम्बयो रामेण सह झटिति समरसंरम्भव्यवसितम् ।

† कुञ्जराननरणकर्मनिर्माणपरिकोपितेन जमदग्निसूनुनोपक्रान्तं किमपि येन नश्यद्गणग्रामं संमार्जितमिव समराङ्गणं प्रतिभाति ।

* अहो प्रसादातिशयो रामे चन्द्रशेखरस्य तत्रभवन् मर्त्यमण्डलाखण्डल तदितः प्रेक्षस्व ।

† शङ्के ततः प्रभृति रामः परशुराम इत्युच्यते ।

अथेदमग्रतः पश्य अयं हि पितृभक्त्यतिशयः परशुरामस्य यदुत रेणुकाशिरश्छेदः ।

दशरथः । अहह शान्तं पापं कथं जमदग्न्यपत्यमपि प्रमाद्यति हंहो पुरुहूतसूत ।

सहस्रं हि पितुर्माता गौरवेणातिरिच्यते ।
तत्किं पितृगिरा रामो विधत्ते रेणुकावधम् ॥ ३० ॥

यद्वा निरपराधवधादपि जमदग्निरपि प्रमाद्यतिस्म । विचिन्त्य कः पुनरयं मार्गो भार्गवस्य यदिदमपि प्रस्मर्यते ।

गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।
उत्पथप्रतिपन्नस्य परित्यागो विधीयते ॥ ३१ ॥

सौदामिनी । कर्णौ पिधाय कहं उण भअवदा भग्गवेण सुदं सवणेहिं सुणिअ वा अणुचिदआरि अणुट्ठिदं परसुधारावावारेण * ।

मातलिः । अथाग्रतः पश्य ।

दशरथः । दृष्ट्वा कथं प्रत्यापन्नजीविता पुनरस्य माता ।

मातलिः । आश्चर्यमाश्चर्यम् ।

यावद्वरं न वृणुते किल जामदग्न्य-
स्तुष्टात् पितुः स्वजननीप्रतिजीविताय ।
तावच्छिरः पृथगपि स्थितमस्य मातु-
र्वेगादुपेत्य विदधात्यकबन्धभावम् ॥ ३२ ॥

सौदामिनी । तक्खणजणिदजीविदावदाणस्स सोहइ जणणीसिरच्छेदोवि भअवदो भग्गवस्स † ।

दशरथः ।

यच्छिन्नं जननीशिरः पितृवराद्भूयोऽपि यत् संहितं
तच्छिष्यस्य पिनाकिनो महदभूच्चित्रं चरित्रं किल ।
तेनैतेन कथाद्भुतेन तु वयं वाचाऽपि लज्जामहे
यद्वा ते गुरवोऽविचिन्त्यचरितास्तेभ्योऽयमस्त्वञ्जलिः ॥ ३३ ॥

मातलिः । इदमन्यद्दृश्यतां द्रष्टव्यम् ।

दशरथः । अयं हि प्रचण्डदोर्दण्डसहस्रदुःसहो हैहयनरेन्द्रः श्रूयते ।

मातलिः ।

इष्टापूर्तपवित्रमाश्रमपदं प्राप्तोऽयमत्रार्जुनो
राजानं जमदग्निरत्रभगवान् सज्जातिथेयोऽर्चति ।
धेनोः कामदुहः कृतोऽत्र च मुनेर्वत्सापहारोऽमुना
प्राणान्मुञ्चति चैष गोग्रहविधावार्चीकिरस्मिन् मुनिः ॥ ३४ ॥

सौदामिनी । पुरतोऽवलोक्य सविचिकित्सम् । अहह अखत्तिअगोत्तोचिदं आचरिदं बाहुसहस्सजुत्तेण सहस्सज्जुणेण जं दाणिं समररच्छामुच्छिदभत्तारपरित्ताणणिमित्तं उअरि णिवेसिदणिअसरीरा पडिव्वदाणं पढमोदाहरणं रेणुआ किवाणधारापहारेहिं तहिं ताडित्ति ताडिदा * ।

दशरथः । कथं महतामपि प्रमादः । तदहो किमपि कन्दलितानुरागाः संसारभोगाः ।

मातलिः । पुरतोऽवलोक्य । अयमितो महावीरः पृष्ठासज्जिततूणीरः परमेश्वरोपदिष्टधर्मा सज्जीकृतकार्मुककर्मा परशुधाराज्योतिरुज्जृम्भणडामरः समरपरितोषितामरः सकलारण्यकजननिवेदितवृत्तान्तः साक्षादिव कृतान्तः शिखण्डिकेतुकाण्डावलीभिरप्यप्रकृतः शशिशेखरसेवानिवृत्तः सरभसमितोऽभ्युपेतः । कथमियमग्रतो वर्णावली । वाचयति ।

विद्वान् दारसखः परं परिणतो नीवारमुष्टिंपचः
सत्यज्ञाननिधिर्दधत् प्रहरणं होमार्जुनोर्हेतवे ।
रे दुःक्षत्रिय किं त्वया मम पिता शान्तो मया पुत्रवान्
नीतः कीर्त्यवशेषतां तदिह ते धिग्धिक्सहस्रं भुजान् ॥ ३५ ॥

मातुः प्रहारत्रयमाहितं मे
विनापराधादिह हैहयेन ।
निःक्षत्रियां त्वां विनिहत्य तेन
त्रिःसप्तकृत्वो जगतीं करोमि ॥ ३६ ॥

भोभो निरवद्यवाचस्तपोधनाः किं मम कोपप्रशमं परिमार्गध्वं तदस्मिन् परवान् वर्ते ।

सा सूतिश्च्यवनान्वये व्रतविधिः सोऽयं च वैखानसस्ता एताश्च गुरोरनङ्गदहनात् संस्कारशुद्धाः क्रियाः ।
तत्त्वज्ञानमिदं च यत्किल दया भूतेषु धर्मः परः
सर्वं तत् परिहृत्य मातृवधजः क्रोधानलो जृम्भते ॥ ३७ ॥

मातलिः । सत्यसङ्गरः परशुरामः ।

ज्यावल्लीवद्धलङ्केश्वरसकलसुहृद्दीनविज्ञापनायां
दत्त्वा यः कर्णमूचे यदुत चिरतरं शिक्षतां राक्षसेन्द्रः ।
सोऽपि ह्यास्कन्धबन्धत्रुटितभुजतरुर्भार्गवेणैव रोषात्
कीर्तिस्तम्भोपमश्रीः परशुविहतिभिर्द्राक्कृतः कार्तवीर्यः ॥ ३८ ॥

सौदामिनी । सच्चं परसुरामो भअवदो भग्गस्स सिस्सो किं उण भेरवरूवधारिणो ण उण सदासिवस्स कहं अण्णधा से भुअदण्डखण्डणेक्कमल्ला परक्कमारम्भा † ।

---

* कथं पुनर्भगवता भार्गवेण श्रुतं श्रवणाभ्यां श्रुत्वा वाऽनुचितकार्यनुष्ठितं परशुधाराव्यापारेण ।

† तत्क्षणजनितजीवितावदानस्य शोभते जननीशिरश्छेदोऽपि भगवतो भार्गवस्य ।

* अक्षत्रियगोत्रोचितमाचरितं बाहुसहस्रयुक्तेन सहस्रार्जुनेन यदिदानीं समररथ्यामूर्छितभर्तृपरित्राणनिमित्तमुपरि निवेशितनिजशरीरा पतिव्रतानां प्रथमोदाहरणं रेणुका कृपाणधाराप्रहारैस्तत्र ताडिति ताडिता ।

† सत्यं परशुरामो भगवतो भर्गस्य शिष्यः किं पुनर्भैरवरूपधारिणो न पुनः सदाशिवस्य कथमन्यथाऽस्य भुजदण्डखण्डनैकमल्लाः पराक्रमारम्भाः ।

दशरथः ।

एष त्रिःसप्तकृत्वस्त्रिभुवनतिलको माथकः क्षत्रियाणां
तावद्वा भूतधात्र्याः क्रतुषु गुणवते कश्यपाय प्रदाता ।
स्नाता क्षत्रास्रवापीष्वतनुषु वहलक्रोधवह्निप्रशान्त्यै
पित्रोः किञ्च प्रवीरः सपदि वितरिता तन्निवापाञ्जलीनाम् ॥३९॥

पुरोऽवलोक्य । अहो भार्गवपुङ्गवस्य पराक्रमातिशयो यदियं दशा वर्तते महीपालानां तथाहि ।

याचन्ते गृहिणीमुखैर्नृपतयः स्वप्राणभिक्षामिमे
बध्नन्तश्चरणाग्रयोर्निपतिताः कण्ठे कुठारान् परे ।
लीलादर्पणपाणयो विरचितस्त्रीवेशमेते नताः
किञ्चान्ये विगलन्ति चीवरभृतो द्वार्वेदिकाशायिनः ॥४०॥

मातलिः । पुरोऽवलोक्य तदिदमतिचरमं चरिताद्भुतं परमेश्वरशिष्यस्य परशुरामस्य ।

दत्त्वा पृथ्वीं जलधिरसनामर्थिने ब्राह्मणाय
स्फारज्योतिःशरविहतिभिः सिन्धुमुक्ते परान्ते ।
ब्रह्मावाप्त्यै जयपरशुनास्मिन् समित्काण्डलावः
शिष्यः शम्भोर्विहितवसतिस्तप्यतेऽसौ तपांसि ॥४१॥

दशरथः । किमपरमारम्भपर्यवसानयोरखण्डः खण्डपरशुशिष्यस्य वीरव्रतनिर्वाहः ।

सौदामिनी । उभअं खु एदं अप्पडिहदप्पहावं सुणिमो जं णीललोहिदणिडाललोअणुल्लासी भअवं हुदवहो जं चण्डीसकोअण्डरहस्सोवदेसणीसंदपल्लविदप्पदावप्पसरो परसुरामोत्ति * ।

दशरथः । समन्तादवलोक्य । आर्य मातले महावीरचरितावलोकनपरायत्ते चित्ते न किञ्चित्प्रतिभाति । तत्कथय कतमः पुनरयमन्तरिक्षोद्देशो यत्र वर्तामहे ।

मातलिः । पुरन्दरनगरीतः सप्तमो मर्त्यमण्डलतः प्रथम एष वायुस्कन्धः किं पुनरदूरवर्तिवसुधातलादस्मद्रथगतिः । रथवेगनाटितकेन सेयं विदेहनगरी तदिदं च विदेहपतिमन्दिरं तदवतीर्य महाराजदशरथो मामनुजानातु स्वर्गगमनाय सौदामिनीं च । अयं च मिथिलेश्वरप्रतीहारः प्रत्यभिज्ञाय भवन्तमभ्युत्थितः ।

दशरथः । अवतीर्य आर्य मातले भद्रे सौदामिनि साधयतं युवामिति ।

प्रविश्य प्रतीहारः प्रणम्य च इतइतोऽभ्येतु महाराज दशरथः ।

दशरथः । परिक्रम्य हंहो सीरध्वजदौवारिक अपि वृत्तविवाहमङ्गलो रामभद्रः ।

प्रतीहारः । न केवलं वृत्तविवाहमङ्गलः प्रस्थानोन्मुखश्च वर्तते तदर्थं च महाराजसीरध्वजो विश्वामित्रो रामभद्रलक्ष्मणौ सीताहेमप्रभे च तमिममास्थानमण्डपमधितिष्ठन्ति ।

दशरथः । हृदय किमुत्कण्ठसे सवधूटीकं रामभद्रं पश्येति प्रविशतः ।

ततः प्रविशन्त्युपविष्टा यथानिर्दिष्टाः सीरध्वजादयः ।

शतानन्दः सीतायाश्चिबुकमुन्नमय्य ।

यस्यास्ते जननी स्वयं क्षितिरियं योगीश्वरोऽयं पिता
मातर्मैथिलि शिक्ष्यते कथय किं तस्याः सुजातेस्तव ।
स्नेहात्केवलमुच्यते पुनरिदं स्त्रीणां पतिर्दैवतं
यद्भूयास्त्वमपास्य धर्ममपरं छायेव रामानुगा ॥ ४२ ॥

सीता । लज्जते ।

जनकः । वत्से वैदेहि यदभिधानीयं तदभिहितं कुलगुरुणाऽऽङ्गिरसेन तथाप्यपत्यस्नेह एष मां वाचालयति ।

अभ्युत्थानमुपागते गृहपतौ तद्भाषणे नम्रता
तत्पादार्पितदृष्टिरासनविधिस्तस्योपचर्या स्वयम् ।
सुप्ते तत्र शयीत तत्प्रथमतो जह्याच्च शय्यामिति
प्राच्यैः पुत्रि निवेदिताः कुलवधूसिद्धान्तधर्मा अमी ॥४३॥

शतानन्दः । जानकि इदं च प्रसङ्गानुगतं शिक्ष्यसे ।

निर्व्याजा दयिते ननान्दृषु नता श्वश्रूषु भक्ता भव
स्निग्धा बन्धुषु वत्सला परिजने स्मेरा सपत्नीष्वपि ।
पत्युर्मित्रजने सनर्मवचना खिन्ना च तद्द्वेषिषु
स्त्रीणां संवननं नतभ्रु तदिदं वीतौषधं भर्तृषु ॥ ४४ ॥

सीता रोदिति ।

जनकः । निःश्वस्य ।

सीते संवृणु बाष्पवारि भवती मुग्धा ममेदं मनो
व्युत्पत्त्याऽपि हि याज्ञवल्क्यगुरुतः संसारभागे स्थितम् ।
किञ्चान्यत्कथयामि मे हृदयतो ह्रीमुद्रया प्रोषितं
विश्वामित्रमहामुनेरपि पुरो यल्लोचने साश्रुणी ॥ ४५ ॥

शतानन्दः । कथमिव भगवान् कुशिकनन्दनोऽपि व्रीडाबीजं यस्यास्य ।

सांसारिकैर्वचोभिस्ते सीताविश्लेषजन्मभिः ।
द्रवतीव मनो बाष्पैर्विश्वामित्रमुनेरपि ॥ ४६ ॥

रामः । स्वगतम् कथमियं रोदिति । विभाव्य ।

बाष्पोत्पीडः श्लथपुटतया तावदन्तर्निरुद्धस्तूर्णोत्तीर्णस्तरलनयनस्तारकाभ्यां निपातः ।

* उभयं खल्वेतदप्रतिहतप्रभावं शृणुमो यन्नीललोहितभाललोचनोल्लासी भगवान् हुतवहो यच्चण्डीशकोदण्डरहस्योपदेशनिष्यन्दपल्लवितप्रतापप्रसरः परशुराम इति ।

सान्द्रस्यन्दः सपदि चपलैः पक्ष्मभिः प्रान्तकीर्णः
पूर्णस्रोतास्तदनु सुदृशा लोठितोऽवक्रकण्ठम् ॥ ४७ ॥

विचिन्त्य रुदन्त्यपि किमपि जानकी समाधाय मधुरस्य हि मानुषस्य प्रकृतिरेषा । तद्व्यथाकथमपि रमयति ।

सीता । ताद उम्मिलामण्डवीसुदकित्तीहिं समं गमिस्सं * ।

विश्वामित्रः । भो ता अपि यास्यन्ति ।

हेमप्रभा । तव सिक्खिदं भअवदा किंपि † ।

शतानन्दः । अति हि मुग्धा जानकी ।

प्रतीहारः । देवो दशरथो राजन् संबन्धी ते समागतः शतक्रतुरथेनायमभ्युत्थानेन पूज्यताम् । सर्वे सहसा समुत्थाय यथोक्तं कुर्वन्त्युपविशन्ति च ।

जनकः । पुरन्दरस्य सखे संबन्धिन् दशरथ ।

मया विना विवाहोऽभूदिति चेतसि मा कृथाः ।
यदासीत् सन्निधौ तत्र स्वयं कुशिकनन्दनः ॥ ४८ ॥

नेपथ्ये ।

उच्चण्डाच्चन्द्रचूडालिकफलकतटालङ्कृतेरूर्ध्वनेत्रात्
त्रैलोक्याकाण्डरोगज्वरजननगुरोर्मण्डितुर्मण्डलस्य ।
उत्तप्तस्वर्णचूर्णप्रतिकृति विकिरन् दिङ्निकुञ्जेषु तेजः
कोऽयं वेगाद्युष्मानिव सरति दृशां बर्हणो बर्हिरुत्यः ॥ ४९ ॥

पुनस्तत्रैव ।

यत्तूणे परशुर्धनुर्गुणनतं पाणौ शराः पञ्चषाः
कृष्णैणाजिनमक्षसूत्रवलयं यज्ञोपवीतं जटाः ।
तन्नूनं जमदग्निजो मुनिर्नृपा रोषादुपैत्यग्रत-
स्तुल्यं मूर्तिमिवैष बिभ्रदुभयीं वीरस्य शान्तस्य च ॥ ५० ॥

जनकदशरथौ । भगवन्नाङ्गिरस सञ्जातिथेयो भव भार्गवोऽतिथिर्भवति ।

शतानन्दः । अस्त्यतिथिरयं किं पुनः समरश्राद्धकर्मणि ।

रामः । वत्स लक्ष्मण निखिलवैखानसवन्द्यो वीरग्रामणीः श्रवणपरम्परोत्पादितकौतुकातङ्कमुद्रो भगवान् भार्गवो दिष्ट्या द्रष्टव्यः ।

लक्ष्मणः । आर्य न केवलं द्रष्टव्योऽनुभवितव्यश्च ।

रामः । के वयं भार्गवानुभवे ।

सीता । अपवार्य पिअसहि हेमप्पहे चण्डीससिस्सो खत्तिअअन्तअरो अ परसुरामोत्ति सुणिअ पल्लविदकोदूहलवल्ली पज्जलिदसज्झसरसपरवसा वट्टामि ‡ ।

हेमप्रभा । जुज्जदि पप्फुल्लकोदूहलत्तणं परसुरामदंसणेण उण ससज्झसत्तणं भग्गधणुद्दण्डचण्डचरिदस्स पुरदो रामअन्दस्स * ।

ततः प्रविशति सरोषसंभ्रमो जामदग्न्यः ।

जामदग्न्यः । भोः किमसावकाण्डचण्डो निबिडकडत्कारपूरितरोदसीकन्दरोदरमेदुरो निनदनिस्यन्दः । कर्णं दत्त्वा आकाशे । किं ब्रूथ दाशरथिना रामेण स्थाणवीयं धनुरारोपितमाकृष्टं भग्नं च तदुद्भवः कोदण्डकोटरकुटीरकटुरसौ सुटङ्कष्टङ्कारः । सविषादम् ।

पौलस्त्यस्य तिरस्कृतामरपतेस्ते बाहवो विंशति-
र्दम्भोलिव्रणगुच्छलाञ्छनभृतो यस्मिन् गताः कुण्ठताम् ।
तद्भग्नं यदि कार्मुकं भगवता रामेण चूडावता
धिग्धिङ्मां तदिदं नमः परशवे स्वस्त्यस्तु रुद्राय च ॥ ५१ ॥

विचिन्त्य । आत्मानं निर्दिशन् सत्यसङ्गरस्तदेष परशुरामः । तदेकवारं गुरुष्वपि प्रतिज्ञातमर्थं कथयति । यदित्थं कथयन्ति गुणदोषयोर्युगपदापततोर्गरीयसि प्रयतितव्यम् । अञ्जलिं बद्ध्वा आकाशतः ।

भोः सर्वे च्यवनादयः शृणुत मे रामस्य विज्ञापना-
माज्ञां वो न च लङ्घयामि किमु तद्भर्गस्य भग्नं धनुः ।
क्षुण्णक्षत्रियमेकविंशतिमतो वारान् विधातुर्जग-
द्द्वाविंशोऽपि ममैष संप्रति पुनर्जातः प्रतिज्ञाक्षणः ॥ ५२ ॥

सहसा परिक्रम्य । धनुर्भङ्गदर्शनं नाटयित्वा । हा शङ्करकरान्दोलनदुर्ललित हा त्रिपुरदहनडम्बरहठकर्मकर्मठ हा गीर्वाणसारपरमाणुनिर्माण हा दुर्जनजनकसदनदुर्निक्षेप हा नतसकलनाक पिनाक त्वमपीदृशं दृश्यसे तदिदमापतितं लूतातन्तुना गन्धगजालानसंदानं सूचीतुण्डेन वज्रमणिभेदः । तथाहि ।

पार्वत्या निजभर्तुरायुधमिति प्रेम्णा यदभ्यर्चितं
निर्मोकेन च वासुकेर्निचुलितं यत् सादरं नन्दिना ।
निर्दग्धत्रिपुरेन्धनं धनुरिदं तन् मन्मथोन्माथिनः
शिष्ये सत्यपि रामनामनि मयि द्विधा कृतं दृश्यते ॥ ५३ ॥

सक्रोधगर्वं समन्तादवलोक्य भोभो प्रोषितजामदग्न्यं जगदवीरं मन्यमाना वीरंमन्याः क्षणमात्रमवधत्त ।

चूडापञ्चकमण्डनः क्वनु शिशुश्चण्डः क्वचायं मुनि
र्नित्याकुण्ठखुरप्रखण्डितबृहत्क्रौञ्चाद्रिगर्भान्तरः ।
तत् सर्वानपि वः स्वयंवरविधौ राज्ञः समेतान् ब्रुवे
रामं रक्षत शक्तिरस्ति यदि वः क्रुद्धः पुनर्भार्गवः ॥ ५४ ॥

---

* तात उर्मिलामाण्डवीश्रुतकीर्तिभिः समं गमिष्यामि ।

† तव शिक्षितं भगवता किमपि ।

‡ प्रियसखि हेमप्रभे चण्डीशशिष्यः क्षत्रियान्तकरश्च परशुराम इति श्रुत्वा पल्लवितकौतूहलवल्ली प्रज्वलितसाध्वसरसपरवशा वर्ते ।

* युज्यते प्रफुल्लकौतूहलत्वं परशुरामदर्शनेन पुनः ससाध्वसत्वं भग्नधनुर्दण्डचण्डचरितस्य पुरतो रामचन्द्रस्य ।

कर्णं दत्त्वा आकाशे। किं ब्रूथ वह्निरेव वह्नेर्भेषजं राम एव रामस्य रक्षिता न परवीर्यरक्षणीयं रघुकुलमिति। विभाव्य। न निजवीर्यरक्षणीयं नापरवीर्यरक्षणीयं रघुकुलं नीललोहितान्तेवासिनि रामेऽभियोक्तरि। विचिन्त्य। अहो कालपरिपाको यदश्रुतपूर्वाणि वचांसि श्रूयन्ते यदनालोकितचराणि चालोक्यन्ते सखेदम्। इदं च दुःसहतरं निकारान्तरम्। हस्तमवधूय।

अद्यापि धिक्किमिव जीवति भार्गवोऽसौ
बाणावलूनगुहवाहनबर्हदामः।
यस्यावमत्य गुरुदत्तमिमं कुठारं
डिम्भोऽपि राम इति नाम यदस्य हर्ता ॥ ५५ ॥

कर्णं दत्त्वा आकाशे। किं ब्रूथ केन न वर्णितं दाशरथेः शङ्करकार्मुकारोपणं को न विस्मितस्तद्भङ्गेन साक्षेपम्। किमुक्तं केन न वर्णितमित्यादि पठति। तच्छृणुत भोः।

यः कर्ता हरचापदण्डदलने यश्चानुमन्ता ननु
द्रष्टा यश्च परीक्षिता च य इह श्रोता च वक्ता च यः।
सद्यः खण्डितकण्ठपीठवलयः केलिं करिष्यत्ययं
कीलालोल्लसितस्य तस्य परशुर्भर्गप्रसादीकृतः ॥ ५६ ॥

सरभसं परिक्रम्य। भो विदेहेश्वरशुद्धान्तसंचारिणः कुब्जवामनकिरातवर्षवरसौविदल्लाः क्व रामो दाशरथिः। नन्वेष भार्गवोऽभ्युपैति।

लूनक्षत्रियकण्ठमण्डलगलत्कीलालकुल्याभृत-
प्राग्भारेषु सरःसु यस्त्रिषु कृपा चक्रे निवापक्रियाम्
श्रुत्वा धूर्जटिचापदण्डदलनं नाम्नश्च सापत्नकं
रामो राममयं स्वयं गुहसहाध्यायी समन्विष्यति ॥ ५७ ॥

रामः। वत्स लक्ष्मण दूरत्वादविभावितेनापि तारतरेण वचसा सरोषसंभ्रमो भार्गवो मुनिः प्रतिभाति।

जामदग्न्यस्तदेव पठति।

रामः। सरभसमुपसृत्य भगवन् भार्गव सदयं प्रसीद सदाचार इति रामोऽभिवादयितुकामः।

जामदग्न्यः। विहस्य नाभिवादनप्रसाद्यो रेणुकासूनुः गरीयान् हि गुरुधनुर्भङ्गापराधः। किं न श्रुतम्।

अपि कालस्य यः कालः कण्ठे कालो महेश्वरः।
भार्गवस्तस्य शिष्योऽहं निसर्गनिरवग्रहः ॥ ५८ ॥

ततश्च।

मध्येनरेश्वरसभं रभसेन येन
मुक्तं धनुस्तडिति च त्रुटितं गुरोर्मे।
रामेऽपि नाम भजतां भुजदण्डयुग्म-
मुद्रामधामनि तदेतदकाण्डचण्डम् ॥ ५९ ॥

रामः। सविनयं केयमक्षान्तिर्भगवतो मुग्धबुद्धिषु मादृशेषु पुत्रभाण्डेषु पश्यतु हि तपोराशिः।

बाह्वोर्बलं न कलितं न च कार्मुकस्य
त्रैयम्बकस्य तनिमा तत एष दोषः।
तच्चापलं परशुराम मम क्षमस्व
डिम्भस्य दुर्विलसितानि मुदे गुरूणाम् ॥ ६० ॥

जामदग्न्यः। किं नाम तपोराशिरहं न शौर्यराशिः। किञ्च रे निदर्शितलाघव राघव स्ववर्णनापरं सगर्वमभिहितं तदाकर्णय यत्करोमि।

त्रुटितनिबिडनाडीचक्रवालप्रणाल-
प्रसृतरुधिरधाराचर्चितोच्चण्डरुण्डम्।
मडमडिति मृडानीकान्तचापस्य भङ्क्तुः
परशुरमरवन्द्यः खण्डयत्यद्य मुण्डम् ॥ ६१ ॥

रामः।

स्वायत्तेन कुठारेण स्वाधीने राममूर्द्धनि।
यथेष्टं चेष्टतामार्यस्त्वदाज्ञां को निषेधति ॥ ६२ ॥

जामदग्न्यः। यः प्रेतनाथस्यातिथ्यमनुभवितुकामः।

रामः। अञ्जलिं बद्ध्वा।

अनूचानं भक्त्या भृगुभव भवन्तं प्रणमति
क्रुधः शान्त्यै रामस्तदिह सुकुमारं कुरु मनः।
हठान्न्यस्यत्कण्ठे परशुमपि नोत्तेजयसि मां
रघूणां ब्रह्माणः किमपि यदमी गोत्रगुरवः ॥ ६३ ॥

जामदग्न्यः। विहस्य।

रुद्राणीधर्मसूनुर्विशिखविलिखनच्छिन्नक्रौञ्चाद्रिकुञ्जः
स्कन्दावस्कन्ददायी क्षतरणरसिकक्षत्रियक्षोदकेलिः।
दत्तोर्वीकव्यभिक्षः शरविधुतपयोराशिबद्धाश्रमोऽहं
श्रेष्ठः श्रीकण्ठशिष्यो धनुषि धृतरतिर्ब्राह्मणो रैणुकेयः ॥ ६४ ॥

शतानन्दः। किमुच्यते वीरवर्गवरिष्ठः श्रीकण्ठशिष्यः।

जामदग्न्यः। यदिहापि राजन्यपोते भार्गवो धनुर्धारयति तदसावस्यैवापराधो यदुत्फल्लफणं फणावन्तं न पश्यति। स तस्यैव दोषः। ततः।

पक्वकर्पूरनिर्व्यपमयं निरपिषत् त्रयम्।
मम व्रीडां च चण्डीशचापं च स्वं च जीवितम् ॥ ६५ ॥

जनकः। कथं सन्यस्तशस्त्रग्रहणस्यापि मम पुनरस्त्रग्रहणक्षणो वर्तते। नेपथ्याभिमुखमवलोक्य कः कोऽत्र भोः धनुर्धनुः।

पुरुषः प्रविश्य धनुरुपनीय निष्क्रान्तः।

जनकः। धनुरादाय।

चण्डीशचापमवमन्तरि राक्षसेन्द्रे
शस्त्रत्यजाऽपि धृतमेव मया त्वमासीः ।
रामाय कार्मुक पुनः परिगृह्यसेऽद्य
वत्सेऽपि वाञ्छितवतेऽनुचितं चरित्रम् ॥ ६६ ॥

समाधाय ।

प्रणमति जनकस्त्वां देवि दिव्यास्त्रविद्ये
मम धनुषि पुराणे सन्निकर्षं कुरुष्व ।
परिभवति मदये भार्गवो रामभद्रं
प्रहिणु तदिह बाणान् वार्द्धकं मां दुनोति ॥ ६७ ॥

दशरथः । संबन्धिन् जनक क्षतंक्षतं कार्मुकपरिग्रहेण कि-मिति प्रादुर्भूतसाहसावतंसमपि जामातरमवजानासि ॥ पश्य ।

यस्योत्पत्तिर्दिनकरकुले यं महाभागधेयं
विश्वामित्रो धनुरुपनिषद्येकशिष्यं व्यधत्त ।
श्रीकण्ठीये बलमविकलं यस्य चापे च दृष्टं
तस्यान्यस्माद्यदि परिभवः स्वस्ति वीरव्रताय ॥ ६८ ॥

विश्वामित्रः । महाराजसीरध्वज यथाह संबन्धी ते दश-रथः । धनुरपनीय जामदग्न्यं प्रति ।

रामः शिष्यो भृगुभव भवान् भागिनेयीसुतो मे
वामे बाहावुत तदितरे कार्यतः को विशेषः ।
दिव्यास्त्राणां तव पशुपतेरस्य मत्तस्तु लाभ-
स्तत् त्वां याचे विरम कलहादार्यकर्मारभस्व ॥ ६९ ॥

जामदग्न्यः । मातुर्मातुल न किञ्चिदन्तरं भवतो भवानी-वल्लभस्य च न किञ्चिदन्तरं क्षत्रियबटोस्त्वदन्तेवासिनः क्षत्रियान्तकरस्य शङ्करशिष्यस्य वा ।

शतानन्दः । अतिनिरर्गलवाग्भार्गवो यद्गुरुष्वपि नानुरुध्यते ।

जामदग्न्यः । किञ्च भोः स्वभुजोपार्जितब्रह्मभाव न शस्त्रग्रहणाधिकारः संबन्धमनुरुध्यते ।

रामः । ब्रह्मर्षे जामदग्न्य कः पुनरयं शस्त्रग्रहणाधिकारो यद्गुरुष्वपि तिरस्कारः ।

जामदग्न्यः । सभ्रुकुटीभङ्गम् । आः क्षत्रियखेट बटो वा-चाटोऽसि ।

भग्नरुद्रधनुःखण्डप्रोतेन शिरसा तव ।
मुण्डधारी व्रती चाहमुपस्यास्ये कपालिनम् ॥ ७० ॥

रामः । भगवन् किं पुनरिमाः सर्वंकषा रोषवाचः ।

सर्वत्यागी परिणतवयाः सप्तमः पद्मयोनेः
शिष्यः शम्भोरिति च यदि वः प्रश्रयी रामभद्रः ।
तत् किं भीमा भ्रुकुटिघटना तामिमां नास्मि सोढा
वोढा वीरव्रतविधिमयं यद्गुरुर्व्रीडमेति ॥ ७१ ॥

जामदग्न्यः । ततः किम् ।

रामः । ततश्चेदम् ।

यस्याचार्यकमिन्दुमौलिरकरोत् स ब्रह्मचारी चिरं
जातो यत्र गुहश्चकार च भुवं यद्गीतवीरव्रताम् ।
तत्कोदण्डरहस्यमद्य भगवन् द्रष्टैष रामः स ते
हेलोज्जृम्भितजृम्भकेण धनुषा क्षत्रं च नालं वयम् ॥ ७२ ॥

जामदग्न्यः । साधु रे क्षत्रियडिम्भ साधु साधु मातुर्मातु-लशिष्य साधु साधु ताडितताडकाकुटुम्बक साधु साधु भग्नभर्ग-बाणासन साधु साधु रैणुकेयरणरसिक साधु, किन्तु ।

चापं वृषाकपिनिरस्तसमस्तसारं
द्वेधा विधाय रघुनन्दन मा स्म दृप्यः ।
वैकुण्ठकार्मुकमकुण्ठकठोरभाव-
मारोपयैतदिह चेत् तव शक्तिरस्ति ॥ ७३ ॥

इति धनुरर्पयति ।

लक्ष्मणः । पुरोभूयादाय च धनुः । आर्यआर्य आर्यालाभ-पणीकृप्रणयिनि शङ्करकार्मुकारोपणे के नामान्ये दोर्दण्डचण्डि-ममात्रारोप्ये तु वैष्णवे धनुषि सति पदातिलवे लक्ष्मणे न प्रभुरार्यः ।

सीता । स्वगतम् । वच्छ लक्खण सुलक्खणोसि जो राह-वकुलोचिदचरिदधुरं धारेसि * ।

विश्वामित्रः । रामभद्रे भग्नधूर्जटिधनुषि ज्यायसि कनी-यसो भ्रातुरुचितमेव माधवीयं चापमारोपयितुं भङ्क्तुं वा ।

लक्ष्मणः । आरोपयति ।

शतानन्दः ।

दोर्दण्डन्यासलीलानमदटनि तडत्कारि नारायणीयं
सद्यः सज्जीकृतज्यं विरचयति धनुर्लक्ष्मणे श्यामलक्ष्म ।
रामस्याद्यस्य दत्तं मुखशशिनि पदं कालिकालाञ्छनेन
न्यस्तं नव्यस्य भव्ये कुमुदवनभुवा द्राक्स्मितज्योत्स्नया च ॥ ७४ ॥

विश्वामित्रः । योगिन् जनक सखे दशरथ रामभद्रभ्रातृ-त्वमति हि निर्व्यूढमिक्ष्वाकुकुललक्ष्मणो लक्ष्मणस्य ।

हेमप्रभा । सहि जाणइ पेक्ख देवरस्स दे भत्तुसरिसं परक्कमं ता सुभणिदं अज्जेण णिद्दलिदसङ्करसरासणे जेट्ठे कणिट्ठभादुणो समुचिदं जेव्व वैकुण्ठबाणासणविणासणम् । अण्णं कधेमि † ।

धणुविब्भमोमज्झणिविट्ठमुट्ठिणिबन्धरणन्तणिअदण्डम् ।
चलइ जेट्ठअणिवडन्तचडुलगुणघग्घरूसूसम् ॥
बह्मण्डभण्डभिन्दणवाउलपडुरवगुणमिस्सो ।
सन्धिज्जइ पअडपओदमण्डणाडम्बरड्डामरो ॥

---

* वत्स लक्ष्मण सुलक्षणोऽसि यो राघवकुलोचितचरितधुरं धारयसि ।

† सखि जानकि प्रेक्षस्व देवरस्य ते भर्तृसदृशं पराक्रमं तत् सुभणि-तमार्येण निर्दलितशङ्करशरासने ज्येष्ठे कनिष्ठभ्रातुः समुचितमेव वैकुण्ठ-बाणासनविनाशनम् । अन्यत् कथयामि ।

सवणन्तघडिअगुणलट्ठिणीबिडकुडिलन्तकोडिकुण्डलिअम्।
झणझणइ झत्ति पुणरुत्तिमञ्जुसिञ्जारवं चावम् ।
भुअजुअलदण्डमण्डलिअचण्डकोअण्डदण्डभङ्गभवो ।
पिण्डिज्जइ अह व बम्हण्डभण्डए कडु कडक्कारो ॥
इअ वलइअसन्धिअकट्ठिअस्स धणुहो णरेन्दसदणेसु ।
रहुउलविक्कममेक्कं कहइ व्व विदलणटङ्कारो * ॥

जनकः ।

हरधनुषि हठाधिरोपणेन
क्षितितनयापरिभाषितः पणोऽभूत् ।
विहितमपरिभाषितं पणत्वं
पुनरिदमूर्मिलया मुरारिचापे ॥ ७५ ॥

हस्तमुद्यम्य भोः संबन्धिन् दशरथ साऽपि वत्सा ममोर्मिला पारितोषिकं लक्ष्मणस्यास्तु ।

दशरथः । अस्तु ।

विश्वामित्रः । ते अपि माण्डवी श्रुतिकीर्त्तिश्च कुशध्वजदुहितरौ भरतशत्रुघ्नयोः स्ताम् ।

शतानन्दः । आं किमपि प्रियं नः ।

जामदग्न्यः । अति हि दशरथडिम्भौ प्रगल्भेते तदेतदपरं समरसंरम्भक्षमां मिथिलोपकण्ठक्षमामवतराम इत्यवतरति ।

नेपथ्यं प्रति । अये माठर धनुर्धनुः ।

प्रविश्य शिष्यः । इदं धनुः ।

जामदग्न्यः । आदाय ।

हर्षोन्मुक्तामृताद्रद्युसदनसुमनोदामसम्पर्कजीवन्मद्घ्राणक्षुण्णवीराय्यनणुरणमहारम्भनर्मायितानि ।
वर्त्तन्तां नव्यपत्युत्सुकविबुधवधूवाञ्छितच्छेदखेदव्याधूताविद्धपाणिप्रविचलवलयास्फालकोलाहलानि ॥७६॥

ततश्च ।

विधाय धरणीवन्ध्यमरामपलक्ष्मणम् ।
अनृणो गुरुपादानां गन्ताऽस्मि निजमाश्रमम् ॥ ७७॥

रामः । भगवन् भार्गव ।

करस्थे सति कोदण्डे तूणीरस्थेषु पत्त्रिषु ।
विधत्स्व स्वयशोवीर्ये किं वीरस्य विकत्थया ॥ ७८॥

इति परिक्रम्य निष्क्रान्ताः सर्वे ।

॥ भार्गवभङ्गो नाम चतुर्थोऽङ्कः ॥

---

* धनुर्विभ्रमो मध्यनिर्विष्टमुष्टिनिवन्धरणच्चिजदण्डम् ।
चलति जेय्यनिपतच्चटुलगुणघर्घरोच्छोपम् ॥
ब्रह्माण्डभाण्डभेदनव्यापृतपटुरवगुणमिश्रः ।
सन्धीयते प्रकटपयोदमण्डनाडम्बरोड्डामरः ॥
श्रवणान्तर्घटितगुणयष्टिनिविडकुटिलान्तकोटिकुण्डलितम् ।
झणझणायते झटिति पुनरुक्तिमञ्जुसिञ्जारवं चापम् ॥
भुजयुगलदण्डमण्डलितचण्डकोदण्डदण्डभङ्गभवः ।
पिण्ड्यते अथ च ब्रह्माण्डभाण्डे कटु कटत्कारः ॥
इति वलयितसन्धि आकृष्टस्य धनुषो नरेन्द्रसदनेषु ।
रघुकुलविक्रममेकं कथयतीव विदलनटङ्कारः ॥

॥ श्रीः ॥

॥ काशीराजकाननशतकम् ॥

यात्रादिने निकटवर्तिनि जीवितेशे,
भीत्या ह्रिया गुरुजनस्य गृहस्य कर्म ।
हा कुर्वती विकलहृत् सततान्यचेता
मामन्तरेण नहि कं कुरुते गृहस्थम् ॥ ६१ ॥

नाथ त्वमेव मम सर्वधनं नचान्यत्,
याचे न याहि विजहत् सुरतावसाने ।
सप्रेम कातरगिरेति मुहुर्वदन्ती,
विस्मर्यसे न पुनरेव मया कथंचित् ॥ ६२ ॥

गत्वा पुनस्त्वरितमेमि ममेति वाचम्,
श्रुत्वा गुरोः सदसि कातरमीक्षयन्त्याः ।
मालिन्यमाननविधोरिममन्तरेण
वश्यं करोति न पुनर्बत चेतनं कम् ॥ ६३ ॥

धाता विधास्यति कदा समयं ममैवम्,
जाने न चन्द्रवदने तव तत् प्रसन्नम् ।
द्रक्ष्यामि चारुवदनं शृणुयां कलोक्तिम्,
संसारसाररमणीयतनुं स्पृशेयम् ॥ ६४ ॥

यन्मे प्रिये त्वयि पुरा हृदि संस्थितायाम्,
जातो युगान्तरसमः पलकप्रपातः ।
सोऽहं सुदारुणविधेर्घटनावशेन,
वर्षान्तरेऽपि मुखमीक्षितुमक्षमोऽस्मि ॥ ६५ ॥

श्रेयान् प्रिये प्रणयतो विरहस्त्वदीयः,
शङ्के सुधांशुवदने यत एव पूर्वम् ।
मुग्धं चकार तव सङ्गवशात् प्रियत्वम्,
त्वामद्य नित्यमवलोकयते वियोगः ॥ ६६ ॥

श्रुत्वा पुराणकविकर्म वियोगिपक्षे,
ज्ञातास्त एव बहुशो विफलाः प्रलापाः ।
जानेऽधुना विरहदारुणवह्निलेशव्यक्तौ समस्तकरयो बलवत्प्रमोहाः ॥ ६७ ॥

धन्यस्त्वमेव विरहानलतीक्ष्णतेजा
नास्तेऽपरस्त्वदुपमस्त्रिषु विष्टपेषु ।
दृष्टो न वा न खलु दुष्टतमो न मूर्त्तो,
ज्ञातो जगद् दहसि तत्क्षणमेव सर्वम् ॥ ६८ ॥

लज्जावशाद्गुरुजनस्य गतावशक्ते,
मत्प्रेमकर्षितभवच्चलचित्तवृत्ते ।
शय्यास्थितोऽस्थिरतनुः सततोर्ध्वकर्णो,
हाहा पुनस्तव कदागमनं प्रतीक्षे ॥ ६९ ॥

रत्युत्सवं जनयता ददतातिशर्म,
वीणादिवादमवसादयता सुवस्त्रे ।
संचाररञ्जितदिशा भविता कदैष,
दासस्तवाङ्घ्रिवलयध्वनिना कृतार्थः ॥ ७० ॥
निद्रां गतोऽसि किमु नाथ निशेयमल्पा,
प्रोच्येति मन्दहसितेन तनुं स्पृशन्ती ।
स्पर्शेन निन्दितसुधाकमलाम्बुनाहो,
पार्श्वे स्थिता तु सुखयिष्यसि मां कदा त्वम् ॥ ७१ ॥
वर्षापयोधरगभीररवं निशम्य,
प्रोद्यन्मनोजशरपीडितकाययष्टे ।
भीतिच्छलेन सहसा निजबाहुपाशै-
रालिङ्गितं प्रियतमे नहि विस्मरामि ॥ ७२ ॥
हाहा कदा प्रियतमे सुरतान्तघर्म-
नाशाय पार्वणशरन्मृगलाञ्छनस्य ।
शीता गवाक्षपतिता विशदा मयूखा
योग्या भवन्ति हतभाग्यजनस्य पत्ते ॥ ७३ ॥
तीक्ष्णानिलेन हिमराशिवहेन तन्वि,
भूत्वा कदा सुनयने घनकम्पिताङ्गी ।
गाढानुलिङ्गनकरी कुटिलाङ्गयष्ट्या,
संतोषयिष्यसि सुधांशुमुखि स्वदासम् ॥ ७४ ॥
किं किं सखे त्यज रदच्छदकम्पनेन,
संभाष्य सीत्कृतिसमुल्लसिताननेन ।
शीतव्रणव्यथितमोष्ठयुगं प्रचुम्ब्य,
दासो भविष्यति कदैष पुनः कृतार्थः ॥ ७५ ॥
बालातपारुणरुचा वसनेन युक्ता,
ताम्बूलरागपरिरञ्जितचारुवक्त्रा ।
पुष्पस्रजा ग्रथितकेशकलापमूला,
साक्षादनङ्गरमणीव कदैष्यसि त्वम् ॥ ७६ ॥
यत्नं विनापि पुनरेव कदा त्वदीया-
मापादमस्तकमयीं सुषमां सुवक्त्रे ।
दृष्ट्वा चिरन्तनमिमं नयनीयतापं
शान्तं करोमि घनघर्मनिपीडिताङ्गि ॥ ७७ ॥
किंवा सुधांशुवदने निखिला ममैत-
दाशालताम्बरप्रसूनकरी भवित्री ।
दीनां मदेकहृदयां यत एव हित्वा,
किंचित्करद्रविणवासनया भ्रमामि ॥ ७८ ॥
साक्षात्कृतिस्तव पुनर्विरला विशङ्के,
तां चेद्विधास्यति विचित्रकरो विधाता ।
याचेऽहमेतदधुना न पुनर्ममैष,
उक्तेति दातुमुचिता सरले त्रपा मे ॥ ७९ ॥
किंवा प्रिये मरणमाप्स्यसि मां विना त्वम्,
प्रार्थ्यं त्वयैव सति धर्मसमीप एतत् ।
स्वीयैर्गुणैः सुमुखि येन पुनस्तदुक्तम्,
श्रोतव्यमल्पसुकृतेन मया भवेच्च ॥ ८० ॥

॥ रामनगरराजधानी ॥

---

प्रतिपादितं च श्रीतारानाथप्रदर्शितशिवपुराणोत्तरखण्डे वर्षपञ्चकपर्यन्तं गर्भधारणदुःखमसहमाना दशवर्षानन्तरं प्रसूतिर्भवितेति नारदवचनेनाल्पीकृतदुःखा मेनका पूर्णवर्षा पुत्रीं सुषुवे" इति, तत्र पार्वतीजन्मारभ्य कामदहनपर्यन्तं शिवपुराणोत्तरखण्डीययोस्त्रयोदशचतुर्दशाध्याययोर्विद्यमानानां शब्दार्थकल्पनानां साम्यमप्येतत्काव्यस्याभिस्ताभिः सह वर्तते, यथा

शिवपुराणोत्तरखण्डस्य १३ अध्याये ।

दिशः प्रसेदुः पवनः सुखं ववौ शङ्खं निदध्मुर्गगनेचरास्तदा ।
पपात भूमौ कुसुमाञ्जलिर्मुदा बभूव तज्जन्मदिनं सुखप्रदम् ॥१॥

कुमारसम्भवस्य १ सर्गे ।

प्रसन्नदिक् पांसुविविक्तवातं शङ्खस्वनानन्तरपुष्पवृष्टि ।
शरीरिणां स्थावरजङ्गमानां सुखाय तज्जन्मदिनं बभूव ॥ १ ॥

शि० १३ अध्याये ।

मेना तया पूर्णनिशेशवक्त्रा स्फुरत्प्रभामण्डलया रराज सा ।
यथा विदूराचलभूमिरम्बुदस्वनोत्तरा रत्नशलाकया मुने ॥ २ ॥

कु० १ सर्गे ।

तया दुहित्रा सुतरां भवित्री स्फुरत्प्रभामण्डलया चकाशे ।
विदूरभूमिर्नवमेघशब्दादुद्भिन्नया रत्नशलाकयेव ॥ २ ॥

शि० १३ अध्याये ।

तां पार्वतीत्याभिजनाच्च नामतो जुहाव सद्बन्धुजनः स्वभावतः ।
मात्रा निषिद्धा तपसे यदा तु सा ययावुमाख्यां भवभक्तिभाविनी ॥ ३ ॥

कु० १ सर्गे ।

तां पार्वतीत्याभिजनेन नाम्ना बन्धुप्रियां बन्धुजनो जुहाव ।
उमेति मात्रा तपसो निषिद्धा पश्चादुमाख्यां सुमुखी जगाम ॥३॥

शि० १३ अध्याये ।

गङ्गां यथा हंसगणाः शरत्सु वै रात्रौ स्वभासस्तु यथा महौषधीः ।
गुरूपदेशादुपदेशपण्डितां तां पूर्वसंस्कारगणा ययुर्मुदा ॥ ४ ॥

कु० १ सर्गे ।

तां हंसमालाः शरदीव गङ्गां महौषधीं नक्तमिवात्मभासः ।
स्थिरोपदेशामुपदेशकाले प्रपेदिरे प्राक्तनजन्मविद्याः ॥ ४ ॥

शि० १३ अध्याये ।

यदा देहं सती देवी दक्षरोषात् ससर्ज हा ।
ततो विमुक्तसङ्गोऽभूत् शङ्करस्त्वपरिग्रहः ॥ ५ ॥

कु० १ सर्गे ।

यदैव पूर्वे जनने शरीरं सा दक्षरोषात् सुदती ससर्ज ।
तदाप्रभृत्येव विमुक्तसङ्गः पतिः पशूनामपरिग्रहोऽभूत् ॥ ५ ॥

शि० १३ अध्याये ।

समाधेरनुमेने तां गिरिशः परिपन्थिनीम् ॥ ६ ॥

कु० १ सर्गे ।

प्रत्यर्थिभूतामपि तां समाधेः शुश्रूषमाणां गिरिशोऽनुमेने ॥ ६ ॥

शि० १४ अध्याये ।

ततस्ते लोकधातारं वागीशं सर्वतोमुखम् ।
प्रणिपत्य यथान्यायमिदमूचुस्ततो मुने ॥ ७ ॥

कु० २ सर्गे ।

अथ सर्वस्य धातारं ते सर्वे सर्वतोमुखम् ।
वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे ॥ ७ ॥

शि० १४ अध्याये ।

दर्शयन् महिमानं त्वं तिसृभिर्मूर्तिभिः प्रभो ।
उत्पत्तिस्थितिनाशानामेकोऽभूः कारणं स्मृतः ॥ ८ ॥

कु० २ सर्गे ।

तिसृभिस्त्वमवस्थाभिर्महिमानमुदीरयन् ।
प्रलयस्थितिसर्गाणामेकः कारणतां गतः ॥ ८ ॥

सहैवं शिवपुराणीयपूर्वोक्ताध्यायद्वयमात्रस्थाभिः कतिपयशब्दार्थकल्पनाभिरेतत्काव्यस्थानां तासां साम्यं वर्तते तथापि नैतत् काव्यं तत्पुराणकथामूलकं यतोऽस्यैव काव्यस्य ३ सर्गे,

स्मरस्तथाभूतमयुग्मनेत्रं पश्यन्नदूरान्मनसाप्यधृष्यम् ।
नालक्षयत् साध्वससन्नहस्तः स्रस्तं शरं चापमपि स्वहस्तात् ॥ ५१ ॥

शिवरहस्यैकादशाध्याये ।

अथ क्षणेन निर्मुक्तं मोहात् पञ्चशरस्तदा ।
पुनश्चादाय सशरं वेपमानः शरासनम् ॥

इत्यमस्मत्पक्षे कथासाम्यं स्पष्टमेव, तत्पक्षे तन्नास्ति, एवं शिवपुराणे रतिविलापनामापि न दृश्यते किंतु शिवस्यान्तर्धानानन्तरमाकाशवाणीवारिताल्पदुःखाया रतेः पूजया प्रसन्नो महादेवस्तस्यै वरं ददावित्युक्तम् ।

अथ चेदेवं न स्यात्, कालीपुराणकथामूलकत्वमप्यस्य स्यात्, यतस्तत्रापि कालीतपसा संतुष्टो महादेवः सह काल्या तपःकारणादिकमाभाष्य नाहं पित्राज्ञां विना विवाहकरणक्षमेति तया निवेदितस्तत्पर्वतसानावेव वसतिं चक्रे । एवं स्मरणमात्रेणागतं सप्तर्षिमण्डलं विवाहनिर्णयार्थं प्रेषयामासेत्यादिकथा समा वर्तते ।

अपिच,

तदिदानीं वदास्माकं स्कन्दस्य चरितं महत् ।
के वा दनुसुतास्तेन निहता वीर्यशालिना ॥

एतच्छिवरहस्यप्रथमाध्यायस्थश्लोकेनास्मिन् पुराणेऽवच्छेदकावच्छेदेन कुमारलीला वर्ण्यते, नच कालीपुराणशिवपुराणयोरप्येवमस्त्विति वाच्यम्, पार्वतीपरिणयादिकथानां प्रसङ्गादेव तत्र निरूपणीयत्वात् ।

उत्तरकुमारनवमादिसर्गाणां कविवरकालिदासकृतित्वाभावं स्फुटयितुं श्रोतृणां प्रकृतविवादोपयोगिकथाबोधाय नवमादिकतिपयसर्गाणां पूर्वोक्तपुराणकतिपयाध्यायानां च कथासंक्षेपः क्रियते । यथाहि,

अथ नवमादिसर्गकथासंक्षेपः ।

श्रीपार्वत्याः संभोगगृहं प्रविशमानेन विचित्रतरविलासासक्तकपटपारावतरूपेण चिरतरविहारासक्तमहादेवगतिं विज्ञातुकामेन पार्वतीपरमेश्वरदर्शनजनितभयेनाग्निना स्तूयमानस्यातिप्रसन्नस्य कुमारसम्भवं चिन्तयतो महादेवस्य रेतोनिर्गमः समजायत, तेन च रुष्टपार्वत्या शापोऽग्नयेऽदायि, स चाग्निस्तत् स्मरारिरेतः प्रगृह्य जगाम, अथ जगदानन्दकन्दो महादेवः पूर्वोक्तकर्मणा रुष्टां हिमाद्रिजां परितोष्य कबरीभारप्रभृतीन् सर्वावयवान् स्वयमेवालंचकार, ततः सेवार्थमागतमहेन्द्रादिसकलसुरमण्डलं महादेवाय निवेद्य सह पार्वत्या द्वारि समागताय महादेवाय नन्दी तद् दर्शयामास, अनन्तरं तद्विसृज्य वृषमारुह्य महादेवः सह पार्वत्या कैलासं जगाम, तदनु पार्वतीकरकलितात्मकरो महादेवो विकटं नृत्यन्तौ कालीभृङ्गिणौ दृष्ट्वा भयभीतया पार्वत्या समालिलिङ्गे ।

महादेवरेतोधारी रेतोदग्धाखिलदेहोऽग्निस्ततो देवसभामागत्य देवेन्द्रेण सह गङ्गामज्जनरूपं स्वतापोपशमनोपायमामन्त्र्य स्वर्धुनीं जगाम, गङ्गा चाग्निनिक्षिप्तं शार्वं रेतो दुःखेन बभार, गङ्गावारिसिक्ताङ्गोऽग्निरपि परां निर्वृतिमुपलेभे, अथ यदृच्छया गङ्गास्नानार्थमागतानां षण्णां कृत्तिकानां गङ्गाम्भःसंबन्धात् तद्रेतोधारणं बभूव, तदनन्तरं तद्धर्तुमन्योन्यमसहमानास्ताः शरवणे तत् तत्यजुः, तच्च शार्वं रेतः कृत्तिकाभिः शरवणेपन्यस्तं षण्मुखतामुपलेभे ।

अथ षट् कृत्तिकास्तं स्तन्यमपाययन्, गङ्गाग्निकृत्तिकानां परस्परं कलहश्च समजायत, तदा यदृच्छया विहारार्थं प्रवृत्तौ पार्वतीपरमेश्वरौ बालभावमापन्नं षण्मुखं ददृशतुः, अन-

न्तरं पार्वती परमेश्वरं पप्रच्छ, कोऽयं बालः, कस्य वा तनूजः, किमर्थं वा कलहश्चैतेषामिति, ततः षण्मुखोऽयं तवैव पुत्रो नान्यस्याः, कलहश्चैतेषां स्वकीयत्वभ्रान्त्येति शिवस्तामुदीरयामास, कथमिदमिति पुनस्तया पृष्टः प्रोवाच, निक्षिप्तमदीयबीजोऽग्निस्तद्गङ्गां निनाय, ततश्च स्वीयाम्भसि स्नातानां कृत्तिकानां तत्संबन्धात् तद्धारणम्, ताश्चासहमानास्तत् शरवणे चिक्षिपुरिति, ततो विमानादवतीर्य जगन्माता पार्वती तमङ्कमारोप्य स्तन्यं पाययामास, सोऽपि तदा तन्मुखमवलोकयांचक्रे, अथ पार्वतीपरमेश्वरौ सह पुत्रेण विमानमारुह्य कैलासमाजग्मतुः, तत्र तदा महानुत्सवोऽभूत्, गिरिजा चाजातदन्तानि षण्मुखमुखानि चुचुम्ब, अथ षण्मुखोऽपि पित्रोर्निकट एव विविधललितबालक्रीडां विरचयामास ।

अथ देवेन्द्रोऽपि पयोदपथेन नानागणैर्विराजमानं कैलासं नाम नगमाजगाम, तत्र द्वारे विराजमानं नन्दिनमावेद्य तदाज्ञयैवान्तः प्रविष्टो महेन्द्रो नानालङ्कारमण्डलेनालंकृतं ददर्श, अपिच लब्धावसरो नन्द्याज्ञया महेशं सह देवैः शक्रः प्रणनाम तुष्टाव च, तया स्तुत्या प्रसन्नो महादेवोऽहमेव तन्निरोधे समर्थो नान्य इत्युदीरयामास, तेन च प्रसन्नवदना इन्द्रादयो देवा ब्रह्मवरातिगर्वितस्य त्रैलोक्यलक्ष्मीहृदयैकशल्यस्य तारकस्य समूलोत्खननं त्वदीयोऽयं पुत्रोऽवश्यं करोत्विति निवेदयामासुः, ततो महादेवो निकट एव विहरन्तं षण्मुखं देवसेनानीर्भूत्वा संहराशु तारकं समूलं देवानां च भयं व्यपोहयेत्याज्ञापयामास, सोऽपि कुमारस्तामाज्ञां शिरसा स्वीचकार, पार्वती च तेनातितरां तुतोष ।

### शिवरहस्यकथासंक्षेपः ।

बहुकालपर्यन्तं शूल्येवं विचित्रोद्यानादिषु शनैः शनैस्त्यक्तव्रीडया नवोढया सह क्रीडासक्तमनाः समभवत्, तदोत्सवान्ते स्वं स्वं लोकं प्रति शूल्युत्सृष्टा महामेरुगुहावासा हरिमुखा देवाः संभूय मन्त्रयामासुः, सत्यवाक् सत्यप्रतिज्ञो महादेवः स्वमात्मजमुत्पाद्याद्य वो रक्षिष्य इत्यवोचत्, तदेवं तस्याः प्रतिज्ञाया महान् विलम्बो जात इति देवीदिव्यान्तःपुरवासी जगत्पतिः किं करोतीति ज्ञातुं सदागतेः प्राणिमात्रप्राणत्वात् तत्र वायुरेव प्रेष्य इति, परंतु कामस्येव स्वस्यापि गतिं मन्यमानः प्रभञ्जनो देवकार्यं कर्तुं नानुमेने, तदा ब्रह्मादिसकलसुरलोकप्रार्थनया रजताचलं स गन्तुमनाः प्रभुर्बभूव, तदा वायुर्द्वारस्थैर्भीमैर्गणैरलक्षितः सर्वज्ञकल्पस्य चन्द्रचूडान्तःपुरं चोरवत् किमिति प्रविशसीति वाचा भर्त्सयतोऽन्तःपुराधिपतेर्नन्दिनो निकटं जगाम, अथास्ति ममापराधो महांस्त्वयैव क्षम्यतां चन्द्रचूडान्तःपुरं च मां नयेति वायुनिवेदितः क्रुद्धो नन्दी न तेऽयं समयः समीरणेति तं निवारयामास, ततः सुराश्रितं रत्नसानुमाश्वाशुगः खिन्नो जगाम, परमेश्वरगतिमजानता वायुना निवेद्यमाना देवाधिदेवद्वारदेशसमाश्रयणमेवोपायत्वेन निश्चिन्वन्तः सुरगणाः सुमेरुशैलतः कैलासशैलमागत्य तत्र यदृच्छया बहिर्द्वारदेशमाश्रितं सिद्धगन्धर्वगणपसेवितं नन्दिनं संतानकप्रसूनकैरभ्यर्च्य स्तुतिभिस्तोषयित्वा च तारककृतशोकमहार्णवमग्नजगदुद्धरणकारणं परमेश्वरमुपसेवितुं निवेदयामासुः, अथ नन्दी तस्मै सुरान् सेवायै समागतान् व्यजिज्ञपत्, अथ नन्दी तदाज्ञां संप्राप्य पश्चात् सुरान् प्रापयत्, सह देव्या दिव्यसिंहासनारूढः स्मयमानमुखाम्बुजो महादेवः प्रीतिकण्टकितत्वग्भ्यो देवेभ्यो दर्शनं प्रददौ, अवशान्तरात्मानस्तेऽपि स्तुत्यं तं स्तुतिभिरस्तुवन्, अथ दिविषत्प्रार्थितो वदनषट्कालंकृततनुः पार्वतीं साकाङ्क्षं व्यलोकयत्, तदैवोर्ध्वरेतसो नयनषट्केन कोटिसूर्यकालाग्निसंनिभं तेजः षोढा निरगात्, तेनातितरां भीतानां देवानां प्रार्थनया संतुष्टस्य महादेवस्य स्मृतिमात्रेण चराचरजगद्व्याप्तमपि शार्वं रेतस्तदन्तिकं तत्क्षणमेव संप्राप, अथातिशान्तं सूक्ष्मीभूतं तत् तेजो देवांश्च विलोक्य हे वह्निवायू इदं मत्तेजो नयताश्वापगाम्, अन्ते शरवणं च, इति महादेवोऽवोचत् ।

एवं मुरारिप्रभृतयोऽमरा अप्यनुयान्त्विदमिति महादेव आज्ञापयामास, पवमानः पावकोऽपि परस्परं षड्विधं तत् समूह्य कथंचिद्गङ्गां नयतः स्म, सा च शार्वं रेतोऽसहमाना शरतटाकमध्यस्थपद्ममध्यमनयत्, तदैशं तेजस्तत्राल्पेनैव कालेन वदनषट्केन द्वादशभुजैः पादद्वयेन च विराजमानं वपुः पुपोष, ततश्च सर्वं जगत् तुतोष, अथ समाहूय कृत्तिकाषट्कं विष्णुरेनं स्तन्यमपाययत्, अथ एकोऽपि बालः षट्कृत्तिकातोषार्थं तद्वैव प्रौढामूर्तिरभवत्, अथ पुत्रवक्त्राम्बुजेक्षणोत्सुको महादेवः सह पर्वतराजपुत्र्या वृषमारुह्य प्रतस्थे, तदनु शरवणान्तिकमागता पार्वती परमेश्वराज्ञया षडपि बालानालिलिङ्ग, पूर्ववदेव षड्वक्त्रमेकमेवैकीचकार, अथ पितरौ पुत्रेण सह कैलासमाजग्मतुः, बालस्त्वचिरेणैव कालेन सकलविद्याः समभ्यस्य सकललोकालोकनविस्मयकरं मल्लयुद्धादिकं विधायैकदा सुमेरुशृङ्गविक्षेपक्रीडां कुर्वंस्तन्मायापहृतज्ञानेन देवेन्द्रेण सह समरविलासमारचयत् गीष्पतिस्तुत्या तुष्टो भूत्वा तत्प्रार्थितं सेनापत्यमङ्गीचकार, तदनु मुरारिप्रभृतयोऽमरा अपि कैलासस्यैवैकस्मिन् शिखरे सर्वसौभाग्यभाजनं स्कन्दपुरं विरचय्य तत्र हरात्मजं सेनापत्येऽभ्यषिञ्चन्, एवं गते महति काले मुरारिप्रभृतिदेवप्रार्थनया संतुष्टमानसौ पार्वतीपरमेश्वरौ सर्वशत्रुनिबर्हिणीमेकां शक्तिं मनसोत्पाद्य तत्संपन्नं पुत्रमा-

लिङ्ग मूर्ध्नि चाघ्राय सुरारातीन् संहरेत्याज्ञापयामासतुः, नानास्त्रसंपन्नमेनं प्रस्थापयामासतुश्च ।

एवमुत्तरकुमारसम्भवस्य कालिदासकृतित्वाभावसाधनार्थम्, ईसवीय १८६६ वर्षस्य अक्तूबरमासीयपत्रे केनचित् पण्डितेन विलिखिता युक्तयोऽप्यतिप्रबलाः । तत्रैतावान् संदेहः, नवमादिकृतिः कस्य वेति, प्रथमाद्यष्टमसर्गपर्यन्तं मल्लिनाथटीकासहितं कुमारसम्भवं नाम काव्यं तेलुगुदेशे चिरान्मुद्रितमुपलभ्यते, तत्रत्याश्च मन्यन्ते मल्लिनाथटीकोपलब्ध्याऽष्टमसर्गपर्यन्तं कालिदासस्यैव कृतिरिति, नवमादितत्कृतेरनुपलब्धिकारणोपन्यासश्च श्रीप्रेमचन्द्रतारानाथयोरष्टमाद्यनुपलब्धिवदेव समान एवास्ते ॥

न्यायशास्त्राध्यापको रामनारायणशास्त्री ॥

---

# THE APHORISMS
### OF THE
# YOGA PHILOSOPHY,
### OF
# PATAÑJALI

WITH ILLUSRATIVE EXTRACTS FROM THE COMMENTARY BY BHOJA RAJA.

*(In continuation of the work begun by the late Dr. Ballantyne.)*

## BOOK III.

*a.* May that Lord of Spirits (Śiva)—by the recollection of whose Lotus-Feet the superhuman faculties, Aṇimá &c., are (at the disposal) of devotees, be (helpful) for (the attainment) of prosperity !*

*b.* Thus then, to discuss the three Yogáṅgas, Dháraṇá &c, which have been generally stated before (see Aph. 29th book 1. P. 35) and to explain, by stating the appellation of Sañyama, the external and internal and other Siddhis (the superhuman faculties), Patañjali begins to define the three Yogáṅgas of which he declares (first) the nature of Dháraṇá (attention). †

Dháraṇá defined. देशबन्धश्चित्तस्य धारणा ॥ १ ॥

Aph. 1.—Fixing the internal organ (chitta) on a place is Dháraṇá (attention).

*a.* "On a place" i. e. at the circle of the navel, &c. The fixing of the internal organ, by abstracting it from all other objects, is called Dháraṇá (attention) of the internal organ, (chitta). ‡

*b.* Having defined Dháraṇá, he (Patañjali) proceeds to state Dhyána (contemplation). *

Dhyána defined. तत्र प्रत्ययैकतानता ध्यानम् ॥ २ ॥

Aph. 2.—A course of uniform (fixed on only one object) modification of knowledge at that place (where the internal organ is fixed in Dháraṇá) is Dhyána (contemplation).

*a.* A course of uniform modification of knowledge at that place where the internal organ is fixed in attention, by avoiding the otherwise (not uniform) modification of knowledge, is called Dhyána (contemplation.). †

*b.* [It is to be observed here that in this philosophy the usual tenet is, that knowledge in the shape of Dhyána does not take place unless it has recourse to a certain place. Therefore, the definition speaks of a course of uniform modification of knowledge at that place, where the internal organ is fixed in attention, Dháraṇá.]

*a.* He explains (now) Samádhi, the last of the Yogáṅgas, (things subservient to the Yoga). ‡

Samádhi defined. तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः ॥ ३ ॥

Aph. 3.—The same (contemplation) when it arises only about a material substance or object of sense, (and therefore) is (then) like a non-existence of itself (that is like ignorance) is Samádhi (meditation).

*b.* [The true meaning of this aphorism is this, that knowledge in the shape of contemplation always takes place about the following three, i.e. the material substance whether it be animate or inanimate, such as a cow, a jar &c., the term cow, jar &c., and the knowledge itself; but when it takes place only about the material substance and not about the latter two, then, such a knowledge in the shape of contemplation is called Samádhi.]

*c.* The term Samádhi means literally that state (of knowledge) in which the mind, having avoided the obstacles (see Aph. 30th book 1), is well fixed on, or confined to one object only. §

*d.* In order to give a technical term for the use of the three Yogáṅgas just defined, he says. ‖

Sañyama defined. त्रयमेकत्र संयमः ॥ ४ ॥

Aph. 4.—These three (when they operate only) on one object, constitute Sañyama.

*b.* The three which are characterised as Contemplation, Attention and Meditation, when they operate on

---

* यत्पादपद्मस्मरणादणिमादिविभूतयः । भवन्ति भाविनामस्तु भूतनाथः स भूतये ॥

† तदेवं पूर्वोद्दिष्टं धारणाद्यङ्गत्रयं निर्णेतुं संयमसंज्ञाभिधानपूर्वं बाह्याभ्यन्तरादिसिद्धिप्रतिपादनाय लक्षयितुमुपक्रमते । तत्र धारणायाः स्वरूपमाह ।

‡ देशे नाभिचक्रादौ चित्तस्य बन्धो विषयान्तरपरिहारेण यत् स्थिरीकरणं सा चित्तस्य धारणेत्युच्यते ।

* धारणामभिधाय ध्यानमभिधातुमाह ।

† तत्र तस्मिन् देशे यत्र चित्तं धृतं तत्र प्रत्ययस्य ज्ञानस्य या एकतानता विसदृशपरिणामपरिहारद्वारेण यदेव धारणायामालम्बनीकृतं तदालम्बनतयैव निरन्तरमुत्पत्तिः सा ध्यानमुच्यते ।

‡ चरमं योगाङ्गं समाधिमाह ।

§ सम्यक् आधीयत एकाग्रीक्रियते विक्षेपान् परिहृत्य यत्र मनः स समाधिः ।

‖ उक्तलक्षणस्य योगाङ्गत्रयस्य व्यवहाराय तान्त्रिकीं संज्ञां कर्तुमाह ।

only one object, are called in this philosophy by the appellation of Sañyama.*

*a.* He explains the fruit (result) of Sañyama.†

The fruit produced by Sañyama. **तज्जयात् प्रज्ञालोकः ॥ ५ ॥**

Aph. 5.—By subduing Sañyama, a discerning principle is developed.

*b.* "By subduing Sañyama" i. e. by rendering it natural (easily attainable) through endeavours, a principle, distinguishing things from others, is developed; that is to say, the intellect well apprehends a thing to be known.‡

*a.* He explains the use of Sañyama.§

The use of Sañyama. **तस्य भूमिषु विनियोगः ॥ ६ ॥**

Aph. 6.—Sañyama is to be used in the modifications (of the internal organ, chitta).

*b.* "In the modifications (of the internal organ)" in the shapes characterised by the rough (Sthûla) and fine (Sûkshma) objects, Sañyama is to be used, that is, to make the modifications fit, by Sañyama, for the future fruit just defined. When it is known that the lower modifications of the internal organ are subdued, Sañyama is then to be used in the superior modifications to subdue them, because, the Soul would never gain the fruit (aimed at) without subduing the lower modifications, though attempting to subdue the superior ones by Sañyama.‖—[The meaning of the whole is this, that a man should proceed towards concentration by gradually acquiring control over the modifications of the internal organ, in the shapes of rough and fine objects. When the superhuman faculties Aṇimá &c., attainable by the conquest of the respective modifications of the internal organ, are at his disposal, he is to know that those modifications are subdued, and then he should proceed further to subdue the other ones, otherwise, he is not to expect to gain access to Concentration (Yoga)].

*a.* In (the Second Book called) Sádhanapáda, he, having enunciated the eight Yogáńgas—things subservient to concentration (See Aph. 29), has defined (only) five (of them, i. e. forbearance—Yama &c.); but why has he not (there) defined the last three, attention &c.? With reference to this, he declares as follows:¶—

The three Yogáńgas interior to the meditation called Samprajñátasamádhi. **त्रयमन्तरङ्गं पूर्वेभ्यः ॥ ७ ॥**

Aph. 7.—The three Yogáńgas (i. e. attention, contemplation, and meditation) are more interior (i. e. immediately subservient to that kind of meditation in which there is distinct recognition, i. e. Samprajñátasamádhi,—See Aph. 17 Book 1.) than the first (five Yogáńgas, forbearance &c.)

*b.* The first (five) Yogáńgas, forbearance (Yama) &c, are not immediately subservient to that kind of meditation in which there is distinct recognition (i. e. Samprajñátasamádhi) but as the three (Yogáńgas, attention &c.) are immediately subservient to accomplish its nature, these three therefore are more interior—Antaránga—to it than the first five.*

*a.* He declares (now) that these three (Yogáńgas) also are exterior (Bahiranga) to the other kind of meditation in which distinct recognition is lost (i. e. Asamprajñátasamádhi—See Aph. 18. book. 1.)†

Those very three are exterior to the meditation called Asamprajñátasamádhi. **तदपि बहिरङ्गं निर्बीजस्य ॥ ८ ॥**

Aph. 8.—Those three also are exterior to the meditation without a seed (Nirbíja.)

*b.* "Nirbíja" i. e. that which has no support to depend on, that is to say, that kind of meditation in which recognition of an object is lost. To this kind of meditation, these three Yogáńgas are not immediately subservient, and therefore these also are exterior (Bahiránga) to this kind of meditation.‡

*a.* Now, being desirous to explain the Siddhis (superhuman faculties which arise from the Yogáńgas); to bring under discussion the particular circumstances of Sañyama (which has been defined before—See Aph. 4. Book III.) he declares the three modifications (of the internal organ) successively.§

The modification in the shape of Nirodha defined. **व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो निरोधपरिणामः ॥ ९ ॥**

Aph. 9.—Out of the two trains of self-reproductive thought, resulting from the Vyutthána and the Nirodha, when the former is subdued and the latter is manifested and, at that moment of manifestation, the internal organ (chitta) is concerned in both of the trains, then, such modification of the internal organ is the modification in the shape of Nirodha.

*b.* "Vyutthána" consists of the three modifications of the internal organ in the shape of Kshipta (cast), Múḍha

---

* एकस्मिन् विषये ध्यानधारणासमाधिलक्षणं त्रितयं प्रवर्तमानं संयमसंज्ञया शास्त्रे व्यवह्रियते ।

† तस्य फलमाह ।

‡ तस्य संयमस्य जयादभ्यासेन सात्म्योत्पादनात् प्रज्ञाया ज्ञातव्यविवेकस्वरूपाया आलोकः प्रसरो भवति । प्रज्ञा ज्ञेयं सम्यगवभासयतीत्यर्थः ।

§ तस्योपयोगमाह ।

‖ तस्य भूमिषु स्थूलसूक्ष्मालम्बनभेदेन स्थितासु चित्तवृत्तिषु विनियोगः कर्तव्यः । अधरामधरां चित्तभूमिं जितां ज्ञात्वोत्तरस्यां भूमौ संयमः कार्यः । नह्यसावात्माऽजिताधरभूमिरुत्तरस्यां भूमौ संयमं कुर्वाणः फलभाग् भवति ।

¶ साधनपादे योगाङ्गान्यष्टावुद्दिश्य पञ्चानां लक्षणं विधाय त्रयाणां कथं न कृतमित्याशङ्क्याह ।

* पूर्वेभ्यो यमादिभ्यो योगाङ्गेभ्यः पारम्पर्येण समाधेरुपकारकेभ्यो धारणादियोगाङ्गत्रयं संप्रज्ञातस्य समाधेरन्तरङ्गं समाधिस्वरूपनिष्पादनात्

† तस्यापि समाध्यन्तरापेक्षया बहिरङ्गत्वमाह ।

‡ निर्बीजस्य निरालम्बनस्य शून्यभावनापर्यायस्य समाधेरेतदपि योगाङ्गत्रयं बहिरङ्गं पारम्पर्येणोपकारकत्वात् ।

§ इदानीं योगाङ्गसिद्धीराख्यातुकामः संयमस्य विषयपरिशुद्धिं कर्तुं क्रमेण परिणामत्रयमाह ।

(darkened) and Vikshipta (better than kshipta): [That is the first is that modification of the internal organ in which it, by passion, is entirely cast in, i. e. engaged in the thought of an object; the second is that in which it, by darkness, takes the shape of sleep; and the third is that in which it is better than kshipta, i. e. in which, though it is inclined towards concentration, still it, every now and then, becomes engaged with other objects—see the sentence, given below, of the Commentary on the Yogabháshya, by Vijñanabhikshu.]* "Nirodha," is that modification in which the internal organ has only a pure element (Sattva) as an object of thought. From these two, result the two trains of self-reproductive thought, out of which, in succession, when the former is overcome, i. e. become incapable of producing any effect on account of its being hidden, and the latter is manifested, i. e. come in view in the present way and at that moment of Nirodha (just expounded,) the connection of the internal organ with both of the trains is called the modification (of the internal organ) in the shape of Nirodha.—The meaning is this, that when the quality in the shape of the train resulting from the Vyutthána has disappeared, and that in the shape of the train resulting from the Nirodha becomes manifest, and the internal organ appears to be connected with both of the trains, then, such modification of the internal organ is (technically) termed Nirodhapariṇáma. Though the internal organ is not fixed (because it consists of) the three principles of existence, i. e. Sattva (truth or existence), Rajas (passion or foulness) and Tamas, (darkness or ignorance) which always vary (according to the technicality of the Yoga and Sáṅkhya Philosophies) still this modification of the internal organ is called the fixed modification (of it).†

*a.* He states the (special) fruit of it ‡

The fruit resulting from the Nirodha-pariṇáma.

तस्य प्रशान्तवाहिता संस्कारात् ॥ १० ॥

Aph. 10.—A uniform flow (of modifications of the internal organ arises) from the (aforesaid) train of self-reproductive thought.

*b.* "A uniform flow &c." that is to say, the internal organ takes a uniform shape on account of its being deprived of the obstacles (Vikshepas or Antaráyas, sickness, languor &c.—see Aph. 30 book 1).*

## RAGHU'S CAMPAIGN.

*(Continued from page 66.)*

Now, bent on triumph, with his chosen train
He seized near MALAYA's feet the spacious plain
Where round the spicy trees doves ever fly.
Here, while his horses gallop swiftly by,
The pollen, shaken from the odorous boughs,
Falls on his elephants' sweet-streaming brows.
Here, in this southern land, though men can bear
The sunbeams striking in their noon-tide glare,
The PANDYA princes sank before the sight
Of RAGHU coming in his conquering might.
The fairest pearls that lay beneath the wave
Where TÁMRAPARNÍ meets the sea, they gave,
As 'twere their own beloved glory stored,
To give new honour to their sovereign lord.
On two fair hills, the country's lovely breasts,
Scented with sandal-wood, his army rests,
Then reaches SAHYA'S chain whose naked side
Boasts not the garment of the veiling tide.
The dames of KERALA in wild alarm
Cast off their earrings and each borrowed charm,
And on their tresses, once with sandal sweet,
Lay the dust flying 'neath the soldiers' feet.
Refreshing breezes from the woody shore
Of MURALÁ came gently, breathing o'er
The march-worn hero's weary limbs, and lent
Sweet perfume for his arms, the jasmine's scent.
Loud was the rustling of the Betel trees,
Stirred to quick motion by the morning breeze,
But louder, as the war-steeds paced along,
Rattled the harness of the mail-clad throng.
TRIKÚTA'S mountain, with his triple crest,
Showed lasting tokens of his might impress.
The hero's elephants his sides had rent,
And left him a triumphal monument.
By knowledge of the Truth, the holy sage
Controls his foes, the senses, and their rage;
True to the Law thus RAGHU marched by land
To PÁRASÍKA with his conquering band.
He saw, indignant, to the lotus eyes
Of YAVAN dames the wine-cup's frenzy rise,
Angry as when some early cloud looks down,
On opening lotuses with jealous frown.
Mad was the onset of the western horse,

† व्युत्थानं क्षिप्तमूढविक्षिप्ताख्यं भूमित्रयं निरोधः प्रकृष्टसत्त्वस्याङ्गितया चेतसः परिणामस्ताभ्यां व्युत्थाननिरोधाभ्यां यो जनितो संस्कारो तयोर्यथाक्रममभिभवप्रादुर्भावौ यदा भवतः। अभिभवो न्यग्भूततया कार्यकरणासामर्थ्येनावस्थानम्। प्रादुर्भावो वर्तमानेऽध्वन्यभिव्यक्तरूपतयाऽवस्थानं तदा निरोधक्षणे चित्तस्योभयवृत्तित्वादन्वयो यः स निरोधपरिणाम इत्युच्यते। अयमर्थः। यदा व्युत्थानसंस्काररूपो धर्मस्तिरोभूतो भवति निरोधसंस्काररूपश्चाविर्भवति धर्मिरूपतया च चित्तमुभयत्रान्वयित्वेनावस्थितं प्रतीयते तदा स निरोधपरिणामशब्देन व्यवह्रियते। चलत्वाद्गुणवृत्तस्य यद्यपि चेतसो निश्चलत्वं नास्ति तथाप्येवंभूतः परिणामः स्थैर्यमुच्यते।

* क्षिप्तमित्यादि। क्षिप्तं रजसा विषयेष्वेव वृत्तिमत्। मूढं तमसा निद्रादिवृत्तिमत्। क्षिप्ताद्विशिष्टं विक्षिप्तं सत्त्वाधिक्येन समादधदपि चित्तं रजोमात्रयाऽन्तरान्तरा विषयान्तरवृत्तिमत्। विज्ञानभिक्षुः।

‡ अस्यैव फलमाह।

* तस्य चेतस उक्तान्निरोधसंस्कारात् प्रशान्तवाहिता भवति। परिहृतविक्षेपतया सदृशप्रवाहपरिणामशालि चित्तं भवतीत्यर्थः।

And wild the fury of the conqueror's force;
No warrior saw—so thick the dust—his foe,
But marked him by the twanging of his bow.
Then RAGHU'S archers shot their keen shafts well;
The bearded head of many a soldier fell,
And covered closely all the battle-ground
Like heaps of honey that the bees surround.
The rest, dismayed, aside their helmets threw,
And gained the grace for which they bent to sue;
For the fierce anger that the mighty feel
Turns to soft pity when the suppliants kneel.
Stretched on the grass, with costly skins outspread,
Where leafy vines their branches laced o'erhead,
The weary victors at the close of day
Chased with the goblet all their cares away.

Then to the north he led his conquering train
Where proud KUVERA rules his rich domain;
Fierce as the thirsty sun that drinks the flood,
He with his shafts will drain his foemen's blood.
Then bathed his weary steeds in SINDHU'S tide
The crest all drooping and the foam-flecked side,
Then stamped in joy, and from their shoulders flung
The chains of golden flowers that round them hung.
Pale grew the cheek of every HÚNA dame,
Trembling in wild alarm at RAGHU'S name,
Had she not seen her warrior husband yield
To the young conqueror on the fatal field?

Before his might KAMBOJA'S chieftains fled,
And bent in humble fear the suppliant head;
By him subdued, they forced their pride to bring
Coursers and gold as gifts to KOSAL'S King.
Borne by those steeds he climbed HIMÁLAYA'S hill,
Whose crest now clothed with dust rose loftier still.
He told his warriors how the lions, brave
E'en as themselves, couched in the mountain cave,
Feared not the din as all the host went by,
But gazed unmoving, with untroubled eye.
Cold on his head the mountain breezes blew,
Shaking the birches as they whistled through;
Waking the reeds to song, and on their wings
Wafting cool drops from GANGÁ'S distant springs.
His soldiers rested 'neath the leafy screen,
Lying on mossy rocks, where deer had been
And left them sweet with musk. For him by night
Herbs, nature's torches, poured their trembling light,
Casting their radiance on the chains that tied
His weary elephants their trees beside.
How woodmen marvelled when they saw the mark
Left by those chains upon the pine-tree's bark!

Fierce was the battle with the mountaineers
Armed with their bows and arrows, stones and spears,
The thick sparks flying as they met. Then ceased,
Slain by his arrows, from the mirth and feast
The mountain revellers, and minstrel bands,
That walked as demi-gods those lofty lands,
Were taught the hero's victories to sing,
And each hill-tribe brought tribute to the King;
And thus young RAGHU'S might HIMÁLAYA knew,
And bared his treasures to the conqueror's view.

Down from the mountain-top the hero came,
Leaving its crest crowned with immortal fame,
Neglected KAILÁS mourning his disgrace,
Uptorn by RÁVAN from his ancient base.
As o'er LAUHITYA'S flood the army poured,
Trembled in wild alarm PRÁGJOTIS' lord;
E'en as his saplings shook, too weak to bear
The chains of elephants assembled there.
The dust that flew before the victor's car
Frightened the monarch as it rose afar;
The sun grew dark and gloomy, and on high
A tempest gathered in the rainless sky.
He saw and yielded: RAGHU'S power confessed,
And gave his youthful conqueror the best
Of KÁMARÚPA'S elephants, whose might
Had vanquished neighbouring kings in many a fight.

Thus when all princes owned the conqueror's sway,
He turned his chariot on his homeward way,
Letting the dust, beneath his wheels that rose,
Fall on the diadems of humbled foes.
Then in that solemn sacrifice, ordained
For boundless triumph o'er the nations gained,
He shared among the Priests his treasured store;
For righteous men are like the clouds that pour
The borrowed waters down in gentle rain,
And gather tribute but to give again.

The rite was ended, and the royal chief
Gave worthy honours to assuage the grief
Of those who mourned the fallen. To the brave,
Victorious warriors of his host he gave
Long leave, and bade them to their homes repair,
And soothe the longing dames left pining there.
Before his royal feet, well marked with lines
That told of conquest, and all happy signs,
The joyful soldiers bowed them ere they went,
Staining them yellow, as their heads they bent,
With fragrant dust and honey falling down
From the fair blossoms in each soldier's crown.

*Raghuvansa. IV.*

## SITA IN PRISON.

*(Ramayana III 61.)*

As some poor solitary deer,
When eager dogs are pressing near,
Lies sobbing in an alien wood
Far from her soft-eyed sisterhood;
So in King Ravan's hall, a prey
To fear and anguish, Sita lay,
With none to aid her in distress,
Girt round by many a giantess.

Pierced by the shaft of Love, the King
Strode to the centre of the ring.
He bade the captive lady rise,
And, lifting up her streaming eyes,
View all the glorious house that vied
With heavenly homes in pomp and pride:
Hall, bower, and chamber, bright with throngs
Of gay-robed dames, and cheered with songs
Of countless birds whose swelling throats
Blent sweetly their delicious notes
From gold and crystal pillars bright
With studs of pearl and lazulite.
Near lay a royal garden, fair
With terrace, lawn, and gay parterre,
Where roses glowed and peacocks played,
Delighted, in the Mango's shade.
Like cloudy pile, in skies of June,
That hides the path of sun and moon;
Or soaring up like Meru's head
All flaming with the morning's red,
So vast, so high that palace raised
Sky-cleaving pinnacles, and blazed
In the sun's path, from floor to spire
A shape of beauty clothed in fire.

He led her up the stair whereon,
Inlaid in gold, large diamonds shone,
And to her eyes that marked not showed
The glory of his rich abode:
The lattice with its ivory frame,
Where softened light through silver came;
And curtains, bound with golden braid,
Cast on the floor a rosy shade:
The car, obedient to his will,
That bore him over flood and hill:
Long galleries and stately halls
Where pictures lived upon the walls:
The mazy rill that murmured round
The grotto and the pleasure-mound:
Pools where the lily flushed, the lake
Where played the cygnet and the drake.
Thus with delight, from view to view,
The undelighted dame he drew,
And, as she trembled by his side,
'Look, Sita!' at each step he cried.
'Now, fair one, learn my power and might:
Ten million Rovers of the Night,
And lesser Fiends, a countless band,
Millions of millions, round me stand,
Who joy in fight and scorn to fly;
Of all this host sole lord am I.
Whose legions are so vast and bold?
What King so rich in gems and gold?
What earthly city can compare
With Lanka, fairest of the fair?
To thy sweet hand I yield the whole,
O dearer than my life and soul.
Thousands of women wait my sign:
O large-eyed, be their queen and mine.
My earnest prayer no longer spurn,
For Love's hot fires within me burn.
Sea-girt, three hundred leagues in length,
My Lanka lies, and if the strength
Of heavenly hosts her walls assail,
Though Indra lead, their might would fail.
No spirit of the earth or air,
No God can with my strength compare.
No longer let thy fancy dwell
On Rama in his hermit cell;
Leave the poor mortal to his fate,
And wed thee with a worthier mate.
Thy youth will not for ever stay,
Come, use it ere it glide away.
Let no vain hopes thy breast beguile
Of rescue from the Giants' isle.
Less vain the toil that sought to tame
The glory of the quenchless flame:
Less vain the toil that strove to bind
The gale that wanders swift as mind.
Man, Fiend, or God would find it hard
To rescue thee whom I would guard.
Spurn not, fair queen, a realm like this,
But dwell with me and reign in bliss.
Thy hermit life has washed away
What stain upon thy bright soul lay;
Now come, with me enjoy the meed
Of each high thought and noble deed.

*(To be continued.)*

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

## SITA IN PRISON.

*(Ramayana III 61.)*

As some poor solitary deer,
When eager dogs are pressing near,
Lies sobbing in an alien wood
Far from her soft-eyed sisterhood;
So in King Ravan's hall, a prey
To fear and anguish, Sita lay,
With none to aid her in distress,
Girt round by many a giantess.

Pierced by the shaft of Love, the King
Strode to the centre of the ring.
He bade the captive lady rise,
And, lifting up her streaming eyes,
View all the glorious house that vied
With heavenly homes in pomp and pride:
Hall, bower, and chamber, bright with throngs
Of gay-robed dames, and cheered with songs
Of countless birds whose swelling throats
Blent sweetly their delicious notes
From gold and crystal pillars bright
With studs of pearl and lazulite.
Near lay a royal garden, fair
With terrace, lawn, and gay parterre,
Where roses glowed and peacocks played,
Delighted, in the Mango's shade.
Like cloudy pile, in skies of June,
That hides the path of sun and moon;
Or soaring up like Meru's head
All flaming with the morning's red,
So vast, so high that palace raised
Sky-cleaving pinnacles, and blazed
In the sun's path, from floor to spire
A shape of beauty clothed in fire.

He led her up the stair whereon,
Inlaid in gold, large diamonds shone,
And to her eyes that marked not showed
The glory of his rich abode:
The lattice with its ivory frame,
Where softened light through silver came;
And curtains, bound with golden braid,
Cast on the floor a rosy shade:
The car, obedient to his will,
That bore him over flood and hill:
Long galleries and stately halls
Where pictures lived upon the walls:
The mazy rill that murmured round
The grotto and the pleasure-mound:
Pools where the lily flushed, the lake
Where played the cygnet and the drake.
Thus with delight, from view to view,
The undelighted dame he drew,
And, as she trembled by his side,
'Look, Sita!' at each step he cried.
'Now, fair one, learn my power and might:
Ten million Rovers of the Night,
And lesser Fiends, a countless band,
Millions of millions, round me stand,
Who joy in fight and scorn to fly;
Of all this host sole lord am I.
Whose legions are so vast and bold?
What King so rich in gems and gold?
What earthly city can compare
With Lanka, fairest of the fair?
To thy sweet hand I yield the whole,
O dearer than my life and soul.
Thousands of women wait my sign:
O large-eyed, be their queen and mine.
My earnest prayer no longer spurn,
For Love's hot fires within me burn.
Sea-girt, three hundred leagues in length,
My Lanka lies, and if the strength
Of heavenly hosts her walls assail,
Though Indra lead, their might would fail.
No spirit of the earth or air,
No God can with my strength compare.
No longer let thy fancy dwell
On Rama in his hermit cell;
Leave the poor mortal to his fate,
And wed thee with a worthier mate.
Thy youth will not for ever stay,
Come, use it ere it glide away.
Let no vain hopes thy breast beguile
Of rescue from the Giants' isle.
Less vain the toil that sought to tame
The glory of the quenchless flame:
Less vain the toil that strove to bind
The gale that wanders swift as mind.
Man, Fiend, or God would find it hard
To rescue thee whom I would guard.
Spurn not, fair queen, a realm like this,
But dwell with me and reign in bliss.
Thy hermit life has washed away
What stain upon thy bright soul lay;
Now come, with me enjoy the meed
Of each high thought and noble deed.

*(To be continued.)*

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

# काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

# THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 29. Benares October 1st, 1868. Vol. III.


## ॥ ईश्वरप्रत्यभिज्ञासूत्रविमर्शिन्याः ॥

॥ क्रियाधिकारस्य तृतीयमाह्निकम् ॥

प्रमाणानि प्रमावेशे स्वबलाक्रमणक्रमात् ।
यस्य वक्त्रावलोकीनि प्रमेयं तं स्तुमः शिवम् ॥

एवं क्रियाशक्तिविस्फारनिरूपणप्रसङ्गेन संबन्धपुरःसरं सामान्यादीनां तत्त्वमुपपादितमधुना तु संबन्धतत्त्वमेवैकघनतया व्युत्पादनीयम् । तच्च द्विविधमेव परमार्थतो, ज्ञाप्यज्ञापकता कार्यकारणता च, तत्र पूर्वस्यां मानमेयभावादिचिन्तास्पन्दभूतायां सर्वमुक्तचरं च वक्ष्यमाणं चायत्तं, प्रमाणाधीना वस्तुसिद्धिरिति तत्रतत्र प्रसिद्धेः, एवं च प्रकृतसमर्थनीयवस्तूपयोगितया स्वयं च संबन्धरूपतया ऽवश्यं विचार्यां वर्तमानादिस्थितिं निरूपयितु“मिदमेतादृगि”त्यादी“शादिव्यवहारः प्रवर्तत” इत्यन्तं श्लोकसप्तदशकेनान्हिकान्तरमारभ्यते । तत्र श्लोकद्वयेन प्रमाणतत्फलस्वरूपं, ततः प्रमेयस्य स्वरूपं निरूपयितुं प्रत्याभासं प्रमाणस्य व्यापारो न तु स्वलक्षणात्मकवस्त्वेकनिष्ठता नियमेनेति दर्शयितुं प्रत्यवमर्शबलेन आभासव्यवस्थेति दशभिः श्लोकैरुच्यते, तत्प्रसङ्गाद् मिथ्याज्ञानस्वरूपं श्लोकेन, प्रमेयस्वरूपसिद्धिश्च प्रकृतमपीश्वरवादमवलम्ब्य घटत इति श्लोकेनोपदर्श्यते, स चैष सर्वः प्रमाणतत्फलप्रमेयादिविभागः सति प्रदर्शितरूपे प्रमातरि ततो न तस्य प्रमेयता येनात्रापि प्रमाणव्यापारसंभवः केवलं व्यवहारमात्रसिद्धिफलं प्रमाणमत्रेति श्लोकत्रयेणेति तात्पर्यार्थः ॥

यदुक्तं “क्रियासंबन्धादिबुद्धयो न भ्रान्तिस्वभावा” इति तदेव निर्णेतुं प्रमाणतत्फलस्वरूपं तावत्प्रसिद्धमनुवदति ।

(१) इदमेतादृगित्येवं यद्वशाद्व्यवतिष्ठते ।
वस्तु प्रमाणं तत्सो ऽपि स्वाभासो ऽभिनवोदयः ॥
सो ऽन्तस्तथा विमर्शात्मा देशकालाद्यभेदिनि ।
एकाभिधानविषये मितिर्वस्तुन्यबाधिता ॥

यस्य वशात्सामर्थ्याद्वस्तु नीलसुखादकं व्यवतिष्ठते नियतां प्रकाशमर्यादां नातिवर्तते इदमिति स्वरूपेण एतादृगिति च विशेषणभूतनित्यानित्यत्वादिधर्मान्तरयोगेन तल्लोके प्रमाणमिति स्थितम् । तच्च विवेचकेन विचार्यमिह वस्तुनः स्वरूपं स्वात्मवशेनैव न तावद्व्यवतिष्ठते, जडत्वात्, मम नीलं प्रकाशते चैत्रस्य वेति च तदा कथमवभासः । तस्मादन्यवशेन व्यवतिष्ठते । अन्यो ऽपि चेज्जडस्तदन्धेनान्धस्य हस्तादानम् । तस्मादन्यो ऽसौ संविदात्मा । सो ऽपि यदि शुद्धो निर्विशेषो न तर्हि नीलस्यैव व्यवस्थाहेतुर्भवे,त्पीतादावपि तस्य तथात्वात् । तदसौ नीलोपरक्तो नीलोन्मुखो नीलप्रकाशस्वभाव इत्याभासः सन्नीलव्यवस्थापकः, तत्प्रकाशस्वभावतैव हि तद्व्यवस्थापकता । स च नीलस्य प्रकाशो यद्व्यतिरिक्तस्य तत्पीतस्यापि स्यात्, प्रकाशात्मकचित्तत्त्वतादात्म्याविशेषात् । तेन व्यतिरिक्तीकृतस्य नीलस्य स प्रकाशः । नीलं चेत्थं ततो व्यतिरेकाभासयोग्यं, यदि सो ऽप्याभासो महतः प्रकाशाद्व्यतिरिच्येत, महाप्रकाशाव्यतिरेके तस्य ततो नीलादेर्व्यतिरेकाभावप्रसङ्गात्, महाप्रकाशाच्च न व्यतिरेकं किं चिदपि सहते इति नूनं महाप्रकाशेन संकोच आत्मनि निर्भासनीयः संविदो वस्तूनां चान्योन्यसंकोचप्राणो नञर्थरूपो ऽसौ शून्य इत्युच्यते । संकोचावभास एव च मायीयप्रमातुरुत्थानम् । अत एकया सृष्टिशक्त्या प्रमातृप्रमाणप्रमेयोल्लासः परमार्थतः, तेन शून्य-

धीप्राणदेहाद्युपाध्याश्रयस्वीकारात्मकसंकोचपरिग्रहसंकुचितात्मायाप्रमातुरनन्तकालान्तर्मुखसंवेदनरूपात्स प्रमाणाभिमत आभासो यावत्प्रमेयोन्मुखतास्वभावस्तावत्प्रमेयस्य देशकालाकाराभाससंभेदवत्त्वात् सो ऽपि तथैव क्षणेक्षणे ऽन्यान्याभासरूपः स्रष्टव्यः। तदुक्त“मभिनवोदय” इति। अभिनवः क्षणवासपरिम्लान्यापि न कलङ्कितस्तेन नवनवोदय इत्युक्तं भवति। सोपि यदि तथाभूतो मायाप्रमातृलग्नो न भवेत्, ततो मम नीलावभासो यस्य तस्यैव पीताभासो ममेति न स्यात्, अस्ति चेदं स्वसंवेदनं यत्सर्वत्राबाध्यमानमित्येव स्वत्वेनावभासमानो य आभासो नवनवप्रमेयौन्मुख्यान्नवनवोदयः स प्रमाणं यतः प्रमां विधत्ते। कासौ प्रमा, फलस्वभावेति चेद्, आह, स एव बोधरूप आभासो मितिः प्रमाणफलमिति संबन्धः। नन्वेवं पर्यायत्वमुक्तं भवेन्न तु फलस्वरूपम्, आह, बाह्योन्मुखतया, प्रकाशरूपया तत्र तत्प्रमाणं, या तु तस्यैवान्तर्मुखात्मा विमर्शरूपता प्रागुपपादिता तत्स्वभावेन केवलं विषयदशासंकुचितेन स एव बोधः फलं, यथा हि यः शूरोहं स एव विजयीत्येकनिष्ठे शूरत्वविजयित्वे विवेकवता हेतुफलभावेन व्यवस्थाप्येते यतो ह्यहं शूरस्ततो विजयीत्येवं यतो नीलप्रकाशस्ततो नीलमिदमिति परामर्श इत्येकरूपत्वेपि हेतुफलभावो; यथोक्तं तद्वशात्तद्व्यवस्थानादिति। किं चेह व्यापाररूपमेव फलं, व्यापारश्च व्याप्रियमाणाद्व्यापार्यमाणाद्वा ऽनन्याकार एव सिद्ध इत्यभेदः प्रमाणफलयोः, विमर्शबलेन च यतः प्रमाणं, विमर्शश्च शब्दजीवितः, शब्दश्च आभासान्तरैर्देशकालादिरूपैरनामृष्ट एकत्रैवाभासमात्रे प्रवर्तते, घट इति, लोहित इति, ततो देशकालाभासयोः स्वलक्षणत्वार्पणप्रवणयोरनामिश्रणात्सामान्यायमाने आभासे प्रमाणं प्रवर्तते। अयमित्यपि ह्यवभास आभासान्तरानामिश्रे पुरोवस्थिताभासमात्रे इत्युक्तं श्रीमदाचार्यपादैरेव।

नियतेप्ययमित्येव परामर्शः पुरः स्थिते।
सर्वभावगतेदंतासामान्येनैव जायते॥

इति। तत एवाभासमात्रं वस्तुस्वलक्षणं तु तदाभाससामानाधिकरण्याभासरूपमाभासान्तरमेकमन्यदेव, अत्र च पृथगेव च प्रमाणं तत्परं मिश्रीकारेषु तेष्वाभासेषु गृहीतग्राहि न प्रमाणमित्यग्रे भविष्यति, अध्यवसायस्यास्मदुक्तनयेन शब्दप्राणितस्य प्रत्याभासविश्रान्तौ तदपेक्षमपि प्रामाण्यं वदता प्रत्याभासनिष्ठमेव प्रामाण्यमुपेत्यमित्यास्ताम्, किमवान्तरेण। ननु यदि विमर्शः प्रमाणव्यापारः स तर्हि द्विचन्द्रेप्यस्ति, मैवम्। स हि संस्कारयोगादात्मानमभिमतप्रसिद्धार्थक्रियाप्राप्तिपर्यन्तमनुवर्तयन्ननुन्मूलितवृत्तिः स्थिरः संस्तथा भवति, मध्ये पुनरुन्मूलनं चेत्सहते न तह्यसौ तथा विमर्शः, नायं विमर्शः पूर्वमप्येकेनान्तर्मुखेण वपुषा पूर्वमेव तस्य निर्मूलनात्, स्वसंविदत्र च साक्षिणी तदेवेदं नेदं रजतमिति वृत्तपूर्वस्यैव विमर्शस्याविमर्शीकरणं संवेद्यते। उक्तं चैतद्बाधविचारे। वक्ष्यते च “रजतैकविमर्श” इत्यत्र। एवं स्थिते द्विचन्द्रेपि यावत्परकुतूहलसंपादनमर्थक्रियासंमतमपूर्ववस्तुदर्शनया चिकीर्षति तावदवज्ञोपहासशोकादिविवशपरजनवचनाकर्णनेन समुन्मूल्यमानं प्राच्यं द्विचन्द्रोयमिति परामर्शं स्वसंवेदनादेवाभिमन्यते। नन्वेवं यत्रार्थक्रियां नान्विच्छति तत्र कथं बाधाबाधव्यवहारः, मा भूत्, किं नस्त्रुटितं, प्रवृत्तिर्हि न सर्वत्र प्रमाणात एव, किं तर्हि क्व चन संशयत एवा * र्थपक्षाधिक्याद् † अर्थित्वतारतम्यादपि वा कृष्यादौ, सविषान्नभोजने, निश्चितसंभावितदृष्टप्रत्यवाये च चौर्यादौ प्रवृत्तिदर्शनात्तदर्थित्वातिशयः प्रवृत्तौ तावन्निबन्धनम्, लोकश्च प्रवृत्तः क्व चनानुन्मूलितप्रमितिकः प्रमाणतां प्रतिपद्यते क्व चिदन्यथा भवन्विपर्ययमिति। एवमाजन्म यतो ऽनेनाभ्यस्त आ पूर्वजन्मशतेभ्योपि वा प्रमाणाप्रमाणविभागस्ततो मणिरूप्यादिवत्तत्स्वरूपमायातमात्र एव विलक्षणमीक्षते। अस्ति हि तस्य परमार्थतो वैलक्षण्यं कारणभेदादिकृतं, ततश्च यदार्तिं परिमितां सह्यामभिमन्यते तत एवार्थितामहाग्रहेण यत्र तत्र न प्रेर्यते तदा विसंवादभीरुर्निश्चितप्रामाण्याद्बाधाददृष्टे दृष्टे ऽपि वा प्रवर्तमानो न विसंवाद्यते इति स प्रेक्षापूर्वकारी भण्यते, तेन लौकिकं प्रमाणस्वरूपमनूदितं सामान्यसंबन्धादिज्ञानेपि मोहादप्रामाण्यशङ्कां शमयितुम्। अत एव विभागविशेषलक्षणपरी-

---

* प्रवृत्तिं प्रति हीष्टसाधनत्वोत्कटविषयताकज्ञानत्वेन कारणता, न त्विष्टसाधनत्वप्रमात्वेन। इष्टसाधनत्वभ्रमेणापि विषसंपृक्तान्नभोजनादौ प्रवृत्तिदर्शनात्। विषयतागतमौत्कट्यं च समानकोटिकसंशयीयविषयताव्यावृत्तः प्रवृत्तिनिवृत्त्यन्यतरप्रयोजकतावच्छेदकतावच्छेदको धर्मविशेषः। तादृशधर्मवद्विषयतानिरूपक एव संशयः संभावनेत्युच्यते। स एव चार्थपक्षाधिकः संशयो ज्ञेयः। प्रदर्शितमौत्कट्यं चाहार्यस्य विषयतायां न स्वीक्रियते। तस्य प्रवृत्तिनिवृत्त्योरप्रयोजकत्वेन तद्विषयतायास्तदनवच्छेदकतया कल्पकाभावात्।

† अर्थाच्चासंनिहित इत्यनुशासनादर्थस्यासांनिध्यमिना प्रत्याय्यम्। तच्चेन्घटितवाक्यप्रयोगकालिकमेव प्रत्यासत्त्या विवक्षणीयम्। सांनिध्यं च यस्मादर्थशब्दादिन् प्रत्ययाभिचकोर्षितस्तेन बुबोधयिषितो यो ऽर्थस्तस्य मत्वर्थीयेन प्रतिपिपादयिषितो यः संबन्धस्तद्वत्त्वम्। तदभावश्चासांनिध्यम्। स च संबन्धः प्रायेण स्वस्वामिभाव एव, यथा धान्येनार्थी हिरण्येनार्थीत्यादौ। क्व चिच्च तदतिरिक्तो ऽपि ज्ञातृज्ञेयभावादिः, यथा विद्यार्थीत्यादौ। असंनिहितपदेन चेच्छाविषयत्वमुपलक्ष्यते। संनिहितस्य सिद्धतया सिद्धेश्चेच्छां प्रति प्रतिबन्धकत्वेनासंनिहितस्यैवेच्छाविषयत्वस्य संभवात्। तेनानिच्छत्यर्थीति न प्रयोगः। यद्वा ऽसंनिहित इत्यस्यार्थशब्दविशेषणतया ऽर्थशब्दस्यैव विशेषणतयेच्छाबोधकत्वमिन्प्रकृतिभूतस्य। ततश्चार्थीत्यस्य यत्किंचिदुद्देश्यकेच्छावानिति पर्यवसितो ऽर्थः। एवं चार्थित्वमिच्छारूपमेव पर्यवसितं, तस्य च तारतम्यमतिशयः, औत्कट्यमिति यावत्। तच्च प्रत्यवायजनकत्वदर्शननिष्ठप्रवृत्तिसामग्रीविघटकत्वोन्मूलकतावच्छेदकत्वरूपोत्तेजकतावच्छेदकत्वं, तद्विशिष्टविषयतानिरूपकेच्छायाश्च फलबलात्प्रवर्तकत्वमुपेयते इति भावः।

क्षादिभिरिह नायासितो लोकः। यद्यदबाधितस्थैर्यमत एवाप्रतिहतानुवृत्तिकं विमर्शफलं विधत्ते तत्तद्बोधरूपं बोध्यनिष्ठं प्रमातृस्वरूपविश्रान्तं प्रमाणमिति। तच्चैन्द्रियके बोधे सुखादिसंवेदने योगिज्ञाने चाविवादमेव। मुख्यतयैव प्रमेयरूपे आभासे साक्षाद्विश्रान्तेः। अनुमानजातप्रतीतिराभासान्तरा* त्कार्यरूपात्स्वभावभूताद्वा आभासान्तरे प्रतिपत्तिः, वस्त्वन्तरस्य च तेन साकं कार्यकारणभावनियमः सामानाधिकरण्यनियमश्चेश्वरनियतिशक्त्युपजीवन एवावधार्यो भवति नान्यथा, तेन यावति नियतिर्ज्ञाता तावति देशे काले वाऽनुमानं प्रमाणम्। आगमस्तु नामान्तरः शब्दनरूपो द्रढीयस्तमविमर्शनात्मा चित्स्वभावस्येश्वरस्यान्तरङ्ग एव व्यापारः प्रत्यक्षादेरपि जीवितकल्पस्तेन यद्यदामृष्टं तत्तथैव, यथा नैतद्विषं मां मारयति गरुड एवाहमिति, तत्र तु तथाविधशब्दनात्मनि विमर्शे आनुकूल्यं यो भजते शब्दराशिः सोऽपि प्रमाणं, यथा वेदसिद्धान्तादिः, अन्योऽपि वा बौद्धार्हतागमादिः,तेन हि यच्छब्दनमुत्पादितं ज्योतिष्टोमकार्यहं स्वर्गं गन्तेति, दीक्षितोऽहमपुनरावृत्तिभागीति, कारुणिकोऽहं बुद्धपदं गन्तेति, गाढक्लेशसहिष्णुरहमर्हत्पदं प्रतिपत्तेति, तत्र न विपर्यय उदेति, तदाश्वस्तस्यैव तत्रानुष्ठानयोग्यत्वात्, अन्यस्य तु दृढप्रतिपत्तिरूपत्वाभावादप्रमाणमेव तथा विमर्शनात्मकं शब्दनं। नन्वेवं तदेवशास्त्रं कं चित्प्रति प्रमाणं कं चित्प्रति नेति स्यात् न चैतद्युक्तमपक्षपातित्वात्प्रमाणस्येति,। अतत्त्वज्ञोऽसि प्रतीतिवृत्तस्य,। तथापि नोपेक्ष्यसे,। अपक्षपाति प्रमाणमिति कोऽस्य वचनस्यार्थः, किं यदेकस्य नीलज्ञानं प्रत्यक्षरूपं तत्किं सर्वस्य नीलं भासयति, धूमज्ञानं वाग्निं, त्वं प्रातर्निधिमनेन विधिना लब्धासे इति च यस्सिद्धादेशरूप आगमः, स किं सर्वान्प्रति प्रमाणम् अथ कस्यापि कदा चित्किं चित्, तथा इहापि दृढविमर्शरूपं शब्दनमासमन्तादर्थं गमयतीत्यागमसंज्ञकं प्रमाणं सर्वस्य तावद्भवति, तत्र यथा मिथ्याज्ञाने सहायतां भजमानमालोकेन्द्रियादिकमप्रमाणतासचिवमप्रमाणं, न चैतावता सम्यग्ज्ञानस्वरूपस्य प्रत्यक्षस्य का चित्पक्षपातिता, तथा स एव ज्योतिष्टोमादिशब्दः शूद्रादेरदृढविमर्शात्मनि अत एवाप्रमाणे आगमाभासे साचिव्यं विदधदपि दृढविमर्शात्मकसत्यागमरूपशब्दनलक्षणप्रमाणोपयोगितायां प्रामाण्यं भजन्न पक्षपातापक्षपातदोषप्रतिक्षेपयोग्यः, सर्व एव ह्यागमो नियताधिकारिदेशकालसहकार्यादिनियन्त्रितमेव विमर्शं विधत्ते विधिरूपो निषेधात्मा वा, अत एव।

प्रसिद्धिरविगीता हि सत्या वागीश्वरी मता।
तयेति यत्र हि यदा यत्तद्ग्राह्यमशङ्कितैः॥

इति श्लोके यत्र यदेत्युक्तं तेन प्रत्यक्षागमौ बाधकावनुमानस्येति तत्रभवद्भर्तृहरिन्यायभाष्यकृत्प्रभृतय,स्तस्मात्प्रमाणलक्षणे ज्ञाते सर्वं प्रमाणस्वरूपं ज्ञातं भवति, किं विशेषलक्षणैः "यस्त्वविसंवादकत्वं तस्य लक्षणमाह" तेनापि प्रापकत्वं प्रवर्तकत्वं प्रवृत्तियोग्यशक्यप्राप्तिकवस्तूपदर्शकत्वं प्रमाणलक्षणं ब्रुवता न किंचित्प्रमाणाभिमतबोधविश्रान्तं स्वरूपमुक्तं, तच्चेदनेन लक्षणेन निर्वाह्यते तन्निर्व्यूढं भवत्यन्यथा मुखभङ्गमूर्धकम्पाङ्गुलीमोटनादिमात्रतत्त्वं तदित्यलं विस्तरेण॥

ननु चैकाभिधानविषये मितिरिति यदुक्तं तत्रैकमभिधानं बाह्यस्वलक्षण एव प्रवर्तते यदि, तत्कथमुक्तं प्रत्याभासं प्रमाणमाभासमिश्रीकरणाभासस्तु स्वलक्षणमित्याशङ्कां शमयन्प्रमाणस्य यत्प्रमेयं तत्परमार्थतो निरूपयितुमाह।

(२) यथारुचि यथार्थित्वं यथाव्युत्पत्ति भिद्यते।
आभासोप्यर्थ एकस्मिन्ननुसंधानसाधिते॥

यद्यपि घट इति बहिः परिदृष्ट एकोर्थस्तथापि तावानेवासौ न, अपि तु पृथग् निर्भज्यमानतामपि सहते, तथाहि स्वतन्त्रं वा विवेचन,मर्थित्वानुसारेण वा, पूर्वप्रसिद्ध्युपजीवनेन वा, तत्र त्रिधापि विवेचने क्रियमाणे पृथगेव भान्त्याभासाः। नन्वेवं चेत्कथमेकं स्वलक्षण,मुच्यते, तेषां पृथग्भासमानानामप्याभासानां यो विमर्शानुप्राणितभूतः स कदा चित्प्रत्याभासमेव विश्राम्यति तदा परापरसामान्यव्यवहारः, कदा चित्पुनर्गुणप्रधानतापादनेनात्रेदमित्थमिति व्यामिश्रणाप्राणो विमर्श,स्तदा तदेकं स्वलक्षणम्, अपिभिन्नक्रमः। अनुसंधानेन मिश्रताविमर्शनेन साधितो य एकोर्थः स्वलक्षणात्मा तत्रैकस्मिन्नपि सति रुचिं स्वातन्त्र्यमर्थित्वमर्थक्रियाभिलाषपरवशतां व्युत्पत्तिं वृद्धव्यवहारशरणतां चानतिक्रम्य भिद्यत एवाभासः॥

क्व यथेति निदर्शयितुमाह।

* कार्येण स्वभावेन वा कारणं स्वभावि वाऽनुमीयते। तत्र कार्येण यथा। नदीपूरेण वृष्टिः, धूमेन वह्निः। अत्र च नदीपूरधूमाभ्यां कार्याभ्यां स्वकारणीभूतौ वृष्टिवह्नी अनुमीयेते। स्वभावाद्यथा। औष्ण्येन तेजः। भवति चौष्ण्यं तेजसः स्वभावः। यस्य सत्ता यत्सत्तेतरसत्तां नापेक्षते यत्सत्तां चापेक्षते स तस्य स्वभावः। औष्ण्यस्य हि सत्ता तेजः सत्तेतरसत्तानधीना भवतीति भवत्यौष्ण्यं तेजसः स्वभाव इति तेन तेजोऽनुमीयते। तथा च श्लोकः।

कार्यकारणभावाद्वा स्वभावाद्वा नियामकात्।
अविनाभावनियमो दर्शनान्तरदर्शनात्॥

इति। इदमुदाहरणमात्रम्। घटत्वस्य द्रव्यत्वानुमापकत्वदर्शनात्। तस्य च द्रव्यत्वेकार्यत्वस्वभावत्वयोरभावात्। अत्र च श्लोके स्वभावपदेन तादात्म्यं विवक्षणीयमिति सर्वदर्शनसंग्रहस्वरसतः प्रतीयते। तद्रीत्या तु घटत्वद्रव्यत्वयोरपि तादात्म्यप्रयुक्तमेव सुग्रहत्वमविनाभावस्य शक्यते वक्तुम्। जातेः सकलव्यक्त्यनतिरिक्तत्वनये घटत्वद्रव्यत्वयोरपितादात्म्यस्य संभवाद् इति॥

(३) दीर्घवृत्तोर्ध्वपुरुषधूमचान्दनतादिभिः ।
यथा ऽऽभासा विभिद्यन्ते देशकालाविभेदिनः ॥
तथैव सङ्कटद्रव्यकाञ्चनोज्ज्वलतादयः ।
आभासभेदा भिन्नार्थकारिणस्ते पदं ध्वनेः ॥

इह तावदेकस्मिन्नपि चेतनतया प्रसिद्धे पुरुषस्वलक्षणे विततदेशव्यापितां दीर्घतामेव कदा चिद्विमृशति, या तरुणामप्यस्ति, निःसंधिबन्धरूपतां वा वृत्ततां, या शिलानामपि संभविनी, ऊर्ध्वदिगाक्रमणरूपां वा ऊर्ध्वतां, या स्थाणोरपि सम्बन्धिनी, गमनागमनादिस्वतन्त्रताभावयोग्यतारूपं वा पुरुषत्वं, यदन्यपुरुषसाधारणं,. तथाहि स्वतन्त्रया वा इच्छया रुचिरूपया एवं कुर्यात् । यथोक्तम् ।

या तु व्याक्षेपसारत्वाच्चेतसः स्वरसोद्गता ।

इति, विततदेशव्यापिन एव वार्थात्तिरोधिलक्षणामर्थक्रियामर्थयमानो विभजेदेवं व्यवहारे वृद्धैः कीदृग्दीर्घं गीयते इति व्युत्पित्समानो व्युत्पादयितुमिच्छुर्वा विभागं कुर्यादित्येवं तत्राभासानां भेदः, एकस्वलक्षणं तु एकस्मिन् देशाभासे कालाभासे च विश्रान्तेः, देशकालाभासावेव हि सामान्यरूपताप्रयोजकव्यापित्वनित्यत्वखण्डनाविधानसविधवृत्ती विशेषरूपतां वितरतः, एवं पुरुषत्ववदन्येपि ब्राह्मणाद्याभासा अपि निरूप्याः । एवमत्र तावत्प्रसिद्धतर आभासभेदो जडाजडसाधारणबहुतरधर्मास्पदत्वात् । अनेन निदर्शनेन धूमेपि धूमत्वचन्दनत्वश्रीखण्डचन्दनोत्थितत्वादयः प्रसिद्धा आभासभेदा विभजनीयाः । अनेन तु प्रसिद्धेन दृष्टान्तेनाप्रसिद्धभागोपि यो घटस्तत्राप्याभासभागभेदो भवति । तथाहि, किं चिदप्यत्र नास्तीति हृद्रङ्गमिवापद्यमानो घटं पश्यन्नस्तीदमिति सत्त्वाभासमेव पश्यति, अपरानाभासान्नाम्नापि तु नाद्रियते, तथा उदकाहरणार्थी घटाभासं, स्वतन्त्रनयनानयनयोग्यवस्त्वर्थी द्रव्याभासं, मूल्याद्यर्थी काञ्चनावभासं, हृद्यतार्थी औज्ज्वल्याभासम्, आदिग्रहणाद्दृढतरभावार्थी दार्ढ्याभासमिति द्रष्टव्यम् । एवं रुचिव्युत्पत्त्योरपि योजनीयम् । एवमेते आभासभेदा एव वस्तु, आभासमानतासारत्वाद्वस्तुतायाः, योप्याभासस्य प्राणभूतो विमर्शः सोपि प्रत्याभासमेव शब्दस्यापि जल्पात्मनो बोधजीवितप्रख्यस्य प्रत्याभासमेव विश्रान्तेः, सङ्कटो लोहित इत्याद्यर्थक्रियाकारित्वमप्यन्वयव्यतिरेकाभ्यां प्रत्याभासमेव नियतं, सदाभासेन हृद्रङ्गपरिहारमात्रस्य संपादनात् । तत्राभासान्तरस्य या ऽपेक्षा साग्न्याभासेनार्थक्रियायां साध्यायां यात्राभासस्यैव तदाभासनान्तरीयकत्वेनाभासान्तरस्यानियतस्यापेक्षणात् । एवं येनयेन मुखेनार्थो विचार्यते तेनतेनाभासमात्रात्मैव तथैव प्रतिभासनाद्विमर्शनादर्थक्रियाकारणाच्चेति सिद्धम् । एवं प्रसिद्धतरप्रसिद्धाप्रसिद्धत्वातिशयेनैकोप्यर्थो ग्रन्थकारेण त्रेधं निरूपितो दीर्घवृत्तेति धूमेति सङ्कटेति ॥

नन्वेवं प्रत्याभासमेव वस्तुत्वे एको घटात्मा न वस्तु स्यादित्याशङ्क्याह ।

(४) आभासभेदाद्वस्तूनां नियतार्थक्रिया पुनः ।
सामानाधिकरण्येन प्रतिभासादभेदिनाम् ॥

आभासानां मिश्रं यद्रूपं तत्रावश्यं कश्चिदाभासः प्रधानत्वेनान्याभासानां विश्रान्तिपदीकर्तव्यः, स तेषां समानमधिकरणं तेन सह यस्तेषां संबन्धस्तत्सामानाधिकरण्यं तेनोपलक्षितो यः प्रतिभासोर्थोन्मुखः प्रकाशस्तदनुप्राणकश्च कश्चन एदात्मा परामर्शस्तस्य सर्वस्यैकाभासविश्रान्ततानियमात्, तस्मात्तं सामानाधिकरण्याभासं समनुप्राणयति वाक्यात्मा वाक्यार्थपरामर्शरूपो विमर्शः, इहेदानीमेष घटोस्तीत्येवंरूपः, ततो हेतोर्ये अभेदिन एकस्वलक्षणतामाप्ताः, न तु स्वरूपभेदमुज्झन्तः तेषामन्याविशिष्टा समुदितरूपा अर्थक्रिया आभासविमर्शभेदे पुनरन्या नियता एकैकमात्ररूपा आभासप्रतिभासशब्दाभ्यां सूत्रे विमर्शोप्याक्षिप्तो मन्तव्यः, पुनः शब्दो विशेषद्योतकः काकाक्षिवदुभयत्र योज्यः, बहुवचनेनैक्येपि स्वरूपभेदापरित्याग उक्तः, तत्र चैक्यावभासे परतन्त्रं सत् पृथक्त्वं यदा ऽऽभासानां तदा समानरूपव्यक्त्युपरञ्जकत्वेन पारमार्थिकं सामान्यरूपत्वं, घटाभासस्य तु शुद्धस्य स्वतन्त्रपरामर्शे योग्यतामात्रेण सामान्यरूपता, न वस्तुतो, द्रव्यादयो हि सर्वः पदार्थः परतन्त्रतासारः । एवमेको घटात्मेत्यपि सत्यमेव आभासविमर्शार्थक्रियाबलेन तथावस्थापनादिति ॥

नन्वेकेनैवार्थक्रिया न तत्र, अपि चाभाससमुदायादर्थक्रियासमुदायः, आभासाश्च भिन्ना अपि यद्येकामर्थक्रियां कर्तुं मिश्रीभवन्ति तदा कस्तेषामियत्तावधिरिति चोद्यमपवदति ।

(५) पृथग्दीपप्रभासानां स्रोतसां सागरे यथा ।
अविरुद्धावभासानामेककार्या तथैक्यधीः ॥

पृथग्वर्तिन्यो या दीपस्य प्रभाः सूक्ष्मतमा अवलोकनसामर्थ्याधानलक्षणां यामर्थक्रियां न कृतवत्यस्तामेवैकभवनाभ्यन्तरं संमूर्छितात्मानो विदधते, न तत्रार्थक्रियाणां समुदायोस्ति, सागरपतितानि च स्रोतांसि बहुतरङ्गारम्भार्थक्रियाकारीणि तद्वद्घटः काञ्चनो लोहितस्ततोयं शिवलिङ्गशिरःसंमार्जनोचितसलिलाहरणार्थक्रियोचितो दृष्टमात्र एव तीव्रप्रीतिलक्षणार्थक्रियाकारीति सिद्धमेकार्थक्रियाकारित्वं, "यत्पुनराभासानां मिश्रेण का सीमेति" तत्रोच्यते, येषामविरोधस्त एवाभासा मिश्रीभवन्ति, नहि रूपाभासो मारुताभासेन मिश्री-

भवति, विरोधात्। सोऽपि नियतिशक्त्युत्थापितः पृथग्ये दीपप्रकाशास्तेषां सम्बन्धि यदेकं सागरे स्रोतसां च यदेकं वस्तु तेन कार्या यथा ऐक्यधीस्तथा विरुद्धा येऽवभासा घटलोहितकाञ्चनादयस्तेषां सम्बन्धि यदेकं स्वलक्षणं तत्कार्या ऐक्यधीरिति संबन्धः। ऐक्यधिया प्रतिभासो विमर्शोर्थक्रिया चेति स्वीकृतम्॥

नन्वेवं प्रत्याभासं प्रमाणस्य विश्रान्तत्वादग्न्याभासेग्निज्ञानं प्रमाणं धूमज्ञानं च धूमाभासमात्रे कार्यकारणभावाभासोपि तावन्मात्रे ततश्च धूमाभासोप्यग्न्याभासं व्यभिचरेदित्यादि बहुतरोपप्लवप्रसङ्ग इति शङ्कां व्यपोहितुमाह।

(६) तत्राविशिष्टे वन्ह्यादौ कार्यकारणतोष्णता-
तत्तच्छब्दार्थताद्यात्मा प्रमाणादेकतो मतः॥

तत्रेति प्रत्याभासं प्रमाणं विश्राम्यतीति अमुष्मिन्नपि पक्षे न कश्चिद्दोषः। तथाहि। अविशिष्टो यद्यपि वह्न्याभासो देशकालाभासप्रमुखैराभासैरसङ्कीर्णत्वेन सामान्यमात्ररूपत्वा,-त्तथापि स एवाभासो यावद्भिराभासैरविनाभूतो भगवत्या नियतिशक्त्या नियमितस्तावतोऽवभासान्स्वीकृत्यैव प्रमाणकृतां निश्चयपदवीमवतरति, तथा च वह्न्याभास इन्धनकार्यत्वाभासेन धूमकारणताभासेन उष्णस्वभावत्वाभासेन च स्वाभाविकाव्यभिचरितसाहचर्यः प्रतीयमानो विश्वत्रैव सर्वदैव च तथा प्रतीतो भवत्येकत्वात्तस्यास्वाभाविकोपि यः स्वभावः पुरुषकृतसमयादिमुखप्रेक्षी, तद्यथा अग्निशब्दवाच्यत्वं घटप्रतिपत्तिकारित्वमित्येवमादिः सोपि„एकप्रत्यक्षादेव निश्चीयते, तस्य हि प्रमातुः कृत्रिमेणेतरेण वा रूपेणाभासान्तरनान्तरीयकतया, ऽसौ वह्न्याभासः संविदितः सर्वदेशकालगतस्तथैव संविदित इति तत्र किं प्रमाणान्तरेण, तस्यतस्य यथेच्छं पुरुषसमयेन नियुज्यमानस्य शब्दस्यार्थोयं ज्वलद्भास्वराकार आभास इत्यनेन नियतिशक्तिरेव सर्वत्र शरणमिति पिशुनयति। एतदुक्तं भवति, यत्किं चित्कृत्रिममितरद्वा भावाभासस्याभासान्तरेण नान्तरीयकत्वं प्रतिभाति, तत्र नियतिशक्तिमात्रमेव परं विजृम्भते, तत्तु नियतिरूपं पूर्वापरविततकालम् इन्धनकार्यत्वे धूमकारणत्वे उष्णस्वभावत्वे चाभासमाने,अनतिचिरकालं तु वह्न्यादिशब्दवाच्यत्वाभासादाविति विशेषः। ततश्च नियतिशक्त्युपजीवनेनं धूमाभासोप्यग्न्याभासाव्यभिचारीति कश्चिन्न विप्लवः। कार्यता कारणता उष्णता च तस्यतस्यार्थता तत्तच्छब्दाभिधेयता, आदिग्रहणाद्गन्धरसशून्यता ऊर्ध्वदिक्संयोगिता जलविरोधिता च इत्येवंभूतो य आत्मा स्वभावो वह्न्यादौ स एकस्मादेव प्रमाणान्मतः संविदित इति यावत्। अर्धच्छेद इति काव्ये ऽयं समयो न ग्रन्थे इति द्वितीयतृतीयपादयोः सामस्त्येप्यदोषः, पृथग्भावप्रत्ययप्रयोगो वस्त्वन्तरापेक्षानपेक्षातः कृतकत्वाकृतकत्वाभ्यां वर्गभेदं सूचयितुम्॥

एवंभावस्वभावव्यवस्थापनं प्रत्याभासं विश्रान्तेनैकेनैव प्रमाणेन क्रियते, तेषामप्याभासानां यथोचितं यदन्योन्यनान्तरीयकत्वं तदेकेन संवेदनरूपेण, तदनेकप्रमिताभासविषयपूर्वप्रवृत्तसंवेदनकलापानुप्राणकान्तर्मुखस्वरूपेण निश्चीयते, तच्चैक्याभासमात्रे ऽनुसंधानरूपं प्रमाण,मनुसंधीयमानेषु त्वाभासेषु गृहीतग्राहित्वादप्रमाणं, तत्र तु प्रत्येकं प्राच्यमेव प्रमाणं भावस्वभावव्यवस्थापनात्मकं, मानसप्रवृत्त्यतिरिक्तकायप्रवृत्त्युपयोगस्तु यथा प्रमाणविषयस्तं प्रकारं दर्शयितुमाह।

(७) सा तु देशान्तराध्यक्षान्तरभिन्ने स्वलक्षणे।
तात्कालिके प्रवृत्तिः स्यादर्थिनः

बाह्या तावदर्थक्रिया स्वलक्षणतः, स्वालक्षण्ये च देशकालाभासयोजनस्यैवान्तरङ्गत्वं, तत्रापि च विशेषरूपतापि परामर्शं विना न किं चित्, परामर्शद्वारेण तु प्रमातरि विश्राम्यन्ती प्रमातुः संवेदनैकरूपस्य देशकालयोगेनैक्यादभ्युङ्क्त्येव विशेषरूपतामिति सर्वत्राद्वयं परमार्थतः, तथापि तु या विशेषरूपता भाति तस्याः परमेश्वरस्वातन्त्र्यमेव निमित्तं, यत् तन्मायाशक्तिरित्युच्यते, तत्र विशेषसाध्यार्थक्रियाविशेषेण योऽर्थी तस्य या स्वलक्षणे तस्मिन्विशेषरूपेऽर्थे तत्कालभाविनी वाङ्मनःकायप्रवृत्तिः, सा देशे, आदिग्रहणात्काले, स्वरूपान्तरे, स्वरूपानुसन्धानादौ, च यान्यध्यक्षान्तराणि बहूनि प्रत्यक्षाणि तेषां भिन्ने भेदे निमित्ते सति भवति नान्यथा, नैकैकतः प्रमाणात् सा प्रवृत्ति,रपि तु प्रमाणसमूहादेव, समूहता च परस्य नोपपन्ना, अस्माकं तु एकस्वसंवेदनविश्रान्तिमयी सा युज्यते इत्युक्तं प्राक् "न चेदन्तःकृत" इत्यत्र। इयमेव च सा प्रमाणानां योजना योजिका च युक्तिरित्युच्यते, गन्धद्रव्यादियुक्तिवत्। एवं प्रत्यक्षसमूहादेव प्रवृत्तिरिति तात्पर्यम्। देशादिकेष्वप्यध्यक्षेषु सत्सु देशाभासयोजनायामप्यन्तः प्रमातरि अभिन्नं यत्स्वलक्षणं तत्रेति वा सङ्गतिः। देशादिकैरध्यक्षान्तरैः प्रत्यक्षीभूतैराभासान्तरैर्भिन्ने स्वलक्षणे निमित्ते सति प्रवृत्तिरिति वा योजना। अत्रापि प्रमेयबहुत्वनिरूपणदिशा तदनुयायित्वेनाभिधीयमानः प्रमाणसमूहो निमित्तत्वेनोक्तो भवति॥

ननु किं प्रात्यक्ष्यामेव प्रवृत्तौ प्रमाणसमूह उपयोगी, नेत्याह।

(८) अप्यनुमानतः॥

न केवलं प्रत्यक्षतः प्रवृत्तिर्देशाधिकाध्यक्षान्तरभेदरूपप्रमाणसमूहनिमित्ता, यावदनुमानतो ऽपि तथैव धूमाभासमात्रे

अग्न्याभासमात्रे धूमाग्न्याभासाव्यभिचारित्वे पर्वताभासे च यानि प्रत्यक्षान्तराणि यच्च तद्गृहीतातिरिक्ते ऽयोगव्यवच्छेदे अग्निरत्रेत्येवंभूते पृथगनुमानं प्रमाणं तत्संमूहादेवार्थिनस्तात्कालिकी प्रवृत्तिरिति संबन्धः ॥

एवं विमर्शबलादेव भेदाभेदव्यवस्था, तदेव हि परमेश्वरस्य संवेदनात्मनः शिवनाथस्य स्वातन्त्र्यशक्तिविजृम्भितं, ततश्च परैर्यदुच्यते "दूरान्तिकादावर्थस्याभेद" इति तदप्युपपद्यते, न त्वन्यथा कथं चिदिति निरूप्यते ।

(६) दूरान्तिकतया ऽर्थानां परोक्षाध्यक्षतात्मना ।
वाह्यान्तरतया दोषैर्व्यञ्जकस्यान्यथापि सा ॥
भिन्नावभासच्छायानामपि मुख्यावभासतः ।
एकप्रत्यवमर्शाख्यादेकत्वमनिवारितम् ॥

प्रतिभासमात्रेण व्यवस्थां कुर्वतः कथं दूरादूरयोर्वस्तुनोरभेदः, प्रतिभासस्य सकलासकलावृत्तानावृत्तादितया यथा कथं चिदपि भेदात्, "ननु विमर्शे ऽपि प्रत्याभासं तथैव भिन्नता" सत्यं, तथापि तु परो यो विमर्शः स एवायं पदार्थ इत्येकप्रत्यवमर्शरूपः तेन प्राणितकल्पेन आ समन्तात् ख्यानं प्रथनं यस्य मुख्यावभासस्य एकरूपभावाभासस्यैकप्रत्यवमर्शे तदुचितो ऽपि ह्यस्त्येवैकावभास आभासविमर्शयोरन्योन्यमवियोगात्, तस्मान्मुख्यावभासादेकत्वमप्रतिहतमास्ते, यदेवानुमितं तदेव दृष्टमित्यत्र प्रत्यक्षपरोक्षतारूपेणात्मना स्वभावेन भिन्ना अवभासच्छाया अमुख्यो ऽवभासो येषां तेषामेकत्वं मुख्यावभासत एकप्रत्यवमर्शानुप्राणितादिति संगतिः । वाह्यान्तरतया भिन्नावभासानामैक्यं यथा, यदेव दृष्टं तदेवान्तरहमुल्लिखामीति, व्यञ्जकानां दीपालोकादीनां दोषैर्भिन्नावभासानामैक्यं यदेव रक्तोत्पलं दीपेन नीलं दृष्टं तदेव सूर्यांशुभिर्लोहितं पश्यामीति । अन्येन वापि प्रकारेणेन्द्रियापाटवादिना एकपार्श्वसंमुखत्वादिना वा येषामवभासच्छाया भिन्ना तेषामपि मुख्यप्रत्यवमर्शानुवर्त्यवभासस्वरूपबलादैक्यमेवेति स्थितम् ॥

ननु दूरादूरादावस्तु स एवार्थः, प्रमात्रध्यवसितार्थक्रियांशे तथैवोपयोगात्' वाह्यान्तरत्वादौ कथमान्तरस्यार्थक्रियायां प्रमात्रध्यवसितायामनुपयोगादिति भ्रान्तिं भङ्क्तुमाह ।

(१०) अर्थक्रियापि सहजा नार्थानामीश्वरेच्छया ।
नियता सा हि तेनास्या नाक्रियातोन्यता भवेत् ॥

इह कार्यकारणतोक्तेत्यत्र स्वरूपमिवार्थक्रियापि या मध्ये गणिता सा सहजार्थस्वरूपभूता न भवति, तत्कारित्वं हि यस्मादीश्वरेच्छया नियतं भवने चाभवने च यतो नैषां स्वरूपं तेन तस्या अकरणाद्धेतोर्भावस्यान्यत्वं नाशङ्कनीयं, स्वरूपभेदाद्धि संभाव्येतान्यत्वं, न च स्वरूपमर्थक्रियाकारित्वमित्युक्तं वक्ष्यते च बहुशः, स्वरूपं च प्रत्यवमर्शबलादेकमेव बाह्यान्तरादावपीति ॥

ननु विमर्शबलादेव यदि वस्तूनां भेदाभेदव्यवस्था तर्हीदानीं त्रिजगति निवृत्ता भ्रान्तिसंकथाः, शुक्तिकायामपि सत्यरजततैवापतति, इदं रजतमिति विमृश्यमानत्वात्, ततश्च भ्रान्त्यभावे बाधानुपपत्तेः किमर्थमुक्तं "मितिर्वस्तुन्यबाधितेति" व्यभिचाराभावे ह्यबाधितेत्यस्य विशेषणस्य व्यवच्छेद्यं न लभ्यत इत्याशङ्कां निरस्यति ।

(११) रजतैकविमर्शे ऽपि शुक्तौ न रजतस्थितिः ।
उपाधिदेशासंवादाद्द्विचन्द्रे ऽपि नभो ऽन्यथा ॥

इदं रजतं स्थिरं सर्वप्रमातृसाधारणमर्थक्रियायोग्यमिति इदमंशे रजताद्यंशेषु त * त्संमेलनांशे चाभासविमर्शबलान्न तावत्किं चिन्मिथ्यात्वम्, किं तूत्तरकालं यो भविष्यति विमर्शो नेदं रजतं वस्तु स्थिरं प्रमात्रन्तरगम्यमभिमतकार्यकारीति तद्विमर्शविमर्शनीयं यत् तत्पूर्वविमर्शकालसमुचितमेव रूपं तत्तस्मिन्पूर्वविमर्शकाले नैवामृश्यते भाव्यं च तेनामर्शनीयेन, तत्रैव काले नेदं रजतं ह्यभूदिति ह्युत्तरः परामर्शः, न तूदितप्रत्यस्तमितायां शतह्रदायामिवेदानीमेवेदं नेति विमर्शः, ततो यावता पूर्णेन रूपेण प्रख्यातव्यं विमर्शपर्यन्तं तावन्न प्रख्यातीति अपूर्णख्यातिरूपा ख्यातिरेव भ्रान्तितत्त्वं, तद्वशेनासद्विपरीतानिर्वाच्यादिख्यातयोप्युच्यन्ताम् । "ननु सत्यरूप्यज्ञानमप्यपूर्णख्यातिः" ततस्तर्हि किम्, इदमतः सर्वं भ्रान्तिरित्यागच्छेत् । दिष्ट्या दृष्टिरुन्मिमीलिषत्यायुष्मतः । मायापदं हि सर्वं भ्रान्तिः, तत्रापि तु स्वप्ने स्वप्न इव गण्डे स्फोट इवापरेयं भ्रान्तिरुच्यते, अनुवृत्त्युचितस्यापि विमर्शस्यास्थैर्यात्, अतश्च पृथगिदंताद्याभासेषु न का चन भ्रान्तिः, † मेलनांशे तु विमर्शानुवृत्तिनिर्मूलनं विमर्शोदयकालादेवारभ्य बाधकेन क्रियत इति तत्रैव भ्रान्तिभाव इति सिद्धम् । रजतस्य शुक्तिकया सह यद्यप्येको विमर्शस्तथापि शुक्तौ रजतस्य तेन ज्ञानेन या दत्ता स्थितिरिदं रजतमिति सा न, यत उपाधिरूपो यो देशो ऽत्र रजतमिति रजतच्छायामात्मना उपरञ्जयञ्छुक्तिदेशस्तस्यासंवादात्सम्यग्विमर्शनाच्च वृत्त्याभासने संवेदनं, वदिरत्राभासनविषयः, तस्याभावात्कारणात् । नन्वेवं भवतु शुक्ति

* संबन्धांशे ।

† मेलनं संबन्धः । इदमंशस्य शुक्त्यादेस्तत्राभेदेन प्रतीयमानस्यापणादिस्थरजतादेरवस्तुत्वस्य संभावयितुमशक्यत्वात् । ननु तादात्म्यस्यापि नीलोत्पलादेर्वास्तविकस्यात्रावभासनसंभवेन कथं तदंशे ऽपिविमर्शानुवृत्तिनिर्मूलनं क्रियतामिति चेत् । रजतप्रतियोगिकत्वावच्छिन्नशुक्त्यनुयोगिकत्ववत्तादात्म्यस्यावस्तुत्वादिति बुध्यताम् ।

का रजते, द्विचन्द्रज्ञाने तु द्वौ चन्द्रावित्याभासे शुक्तिकयेव मेलनं न केन चित्साकमाभासते यत्र बाधः स्यात्, एकाभासांशे च न बाध इत्युक्तं भवतैव, क एतदाह, मेलनं न केन चित्सहेति, एवं हि सति स्वालक्षण्येन नियतदेशकालतया कथमाभास,स्तद्देशकालाभ्यां सह तत्राप्यस्ति मेलनाभासः, यद्विमर्शानुविवृत्सुर्निरूप्यते, द्वित्वाभासचन्द्राभासयोरपि मेलनाभासे विमर्शानुवृत्तिव्यावर्तनं वाच्यम्, तदेतदाह। द्विरूपे चन्द्रे ऽपि न केवलं रजत एव, नभ इति देशविशेषः कश्चित्, अन्यथेति द्विचन्द्रावरुद्धो यो ऽनवमृष्टस्स न तथेति बाधकेनोन्मूलितप्राच्यविमर्शानुवृत्तिकः क्रियत इति। एवमाभासास्तन्मेलनं च नियमानुप्राणितमित्येतावदेव प्रमेयम्,। एतान्येवा*गमे तत्त्वानि वक्ष्यन्ते। वस्तु तत्त्वं प्रमेयमिति पर्यायः। तथा च काठिन्याभास इति पृथिवी, लोहिताभास इति रूपं तेजश्च, मेलनाभासो रजः, सन्निवेशस्तु नियतिरूपः, नियतिर्हि नियमः, स चाभावप्राणो ऽभावस्फुरणमेव च पृथिव्याभासस्य विचित्रतया चकासत्पृथुबुध्नोदराकारता, भेदाभासश्च माया, तत्पृष्ठे सत्यप्रकाशाभासश्च शिवतत्त्वमित्यास्तांतावदग्रे भविष्यत्येतत्†। सर्वथा तावदत्र प्रमेये भगवत एव भेदने चाभेदने च स्वातन्त्र्यं, घटगताभासभेदाभेददृष्टिरेव च परमार्थाद्वयदृष्टिप्रवेशे उपायः समवलम्बनीयः, न तु व्यवहारोप्ययं परमेश्वरस्वरूपानुप्रवेशविरोधीति प्रतिपादितम्॥

एतदेव स्फुटयन्सकलप्रमेयसिद्धिः परमेश्वर एवायत्तेति निरूपयति।

(१२) गुणैः शब्दादिभिर्भेदो जात्यादिभिरभिन्नता।
भावानामित्थमेकत्र प्रमातर्युपपद्यते॥

इहानुवृत्तं व्यावृत्तं च चकासद्वस्तु कतरेण वपुषा न सत्यमुच्यता,मुभयत्रापि बाधकाभावात्,। सत्यतो हि यदि बाधक एव एकतरस्य स्यात्तत्तदुदये स एव भागः पुनरुन्मज्जनसहिष्णुतारहितो विद्युद्विलायं विलीयेत, न चैव,मतएव भेदाभेदयोर्विरोधं दुःसमर्थमभिमन्यमानैरेकैरविद्यात्वेनानिर्वाच्यत्वमपरैश्चाभासलग्नतया सांवृतत्वमभिदधद्भिरात्मा परश्च वञ्चितः, संवेदनविश्रान्तं तु द्वयमपि भाति, संवेदनस्य स्वातन्त्र्यात्, सर्वस्य तिरश्चोप्येतत्स्वसंवेदनसिद्धं यत्संविदन्तर्विश्रान्तमेकतामापाद्यमानं जलज्वलनमप्यविरुद्धं, तत एवोक्तम्। "अत एव यथाभीष्टसमुल्लेखेति" अतश्च गुणैरुपाधिरूपैर्विशेषाधायितया विवक्षितैः शब्दादिभिर्वा दण्डादिभिरपि वा यो भेदो जातिवशात्सादृश्याद्वैदाग्रहणाद्वा यश्चाभेदो भावानामित्थमित्युक्तनीत्या क्रियासम्बन्धेत्यतः प्रभृतिनिरूपितः, स एकत्र प्रमातरि सकलप्रमाप्रमाणसंयोजनवियोजनादिविचित्रासंख्यकृत्यप्रपञ्चोचितस्वातन्त्र्ये भगवत्यस्मदीयहृदयैकान्तशायिनि शिवशब्दव्यपदेश्ये सत्युपपद्यते,नान्यथा,। विशेषणान्येव च भेदकानीति किमन्यैर्विशेषैः,। अयं स परमाणुर्य एतद्देशादिविशिष्टघटारम्भकाले पश्चात्तनसंघटिततद्व्यणुकारम्भकाले पूर्वं मिलितः। अयं स आत्मा यः पुरा स्वर्गसदने सुरयोषितमिमामित्थं परिरब्धवानितीयतैव योगिसर्वज्ञादीनां सिद्धः परमाण्वात्मादिषु भेदावभास इत्यलमवान्तरेण। सिद्धं तावद् भेदाभेदरूपं प्रमेयतत्त्वमेकप्रमातृविश्रान्त्या निःशङ्कतां श्रयतीति॥ १४॥

॥ शेषं श्लोकत्रयमुत्तराङ्के ॥.

* आगमाधिकारे।

† स्पष्टमागमाधिकारे।

## ॥ अथ बालरामायणाख्यनाटकस्य ॥

॥ पञ्चमोऽङ्कः ॥

अतः परमुन्मत्तदशाननो भविष्यति।

प्रविश्य मायामयः परिक्रम्य च साक्षेपम्। हंहो निसर्गनिरर्गलचरितैकनिबन्धन विधे इदमुपालभ्यसे कः पुनः प्रकारस्तव यद्रत्नाकरे ऽपि क्षारभावः सुधादीधितावपि लाञ्छनच्छाया पुलस्त्यापत्ये ऽपि मतिविपर्यासो यदादिष्टो ऽस्मि राक्षसराजेन यदुत गच्छ त्वं रघुराजधानीमयोध्यां तत्र च चण्डीशकोदण्डनिर्दलनलब्धजानकीजनितगर्वगरिमा प्रथमदाशरथिर्वाच्यः।

मैथिली यदि धनुर्लघो भवे-
त्तद्गुणात् प्रथमतस्तदीशिनः।
राम विद्धि तव मोहमित्यमुं
विष्टपत्रयपतेर्ममास्तु सा॥ १॥

किञ्च रे राजन्यपोत न श्रवणगोचरं गता राक्षसराजप्रतिज्ञेयम्। कुर्वन्मौर्वीत्यादि पठति। भद्र मायामय स इत्यभिहितस्तामर्पयिष्यति सा तु तदर्पिता।

अस्मद्विक्रमचेष्टितानि निखिलत्रैलोक्यहेलाजय-
प्रह्वीभूतसुरासुराणि भवतो भूमेः सुता शृण्वती।
पत्यौ द्वेषकषायितेन मनसा स्निग्धा मयि स्यास्यति
स्त्रीणां प्रेम यदुत्तरोत्तरगुणग्रामस्पृहाचञ्चलम्॥ २॥

विचिन्त्य। तत्कथमसौ निसर्गनिशाचरशत्रुर्वसिष्ठविश्वामित्रसनाथ इत्यमभिधातव्यो भवति सोऽयं कालकूटकवलनैकहस्तदिदं यमदंष्ट्राङ्कुरशलाकाकर्षणं विभाव्य भवतु तदिदमसमञ्जसं चेष्टितं देवस्य नयज्ञानवते माल्यवते निवेदयामि स खल्वस्माकं मतिनौविप्लवे कर्णधारः। सपरिक्रममवलोक्य

कथमयममात्यो माल्यवान् किमपि चिन्तयन् लेखहस्त आस्ते। विभाव्य तन्महाराजरावणदुर्नीतिपरम्परायत्तचित्तेनानेन भवितव्यं न हि तरणिकिरणस्पर्शादन्यो व्याधिरिन्दीवरवनस्य। सुखिनः परसौख्येन परदुःखेन दुःखिता जायन्ते कवयः काव्ये नयतन्त्रे च मन्त्रिणः।

ततः प्रविशति यथानिर्दिष्टो माल्यवान्।

माल्यवान्। मिथिलापुरीनिवासिना स्पशेन लेखः प्रहितस्तदमुं निरूपयामि। उन्मुच्य वाचयति। स्वस्ति लङ्कायां मतिमन्तं माल्यवन्तं विदेहनगरीतः कश्चित् सविनयमवबोधयति श्रेयोऽन्यत्।

सीतास्वयंवरविधौ धनुरीश्वरस्य
चक्रीकृतं भुजबलेन बभञ्ज रामः।
श्रुत्वा च तन्मुनिवृषा वृषकेतुशिष्यो
रोषाज्ज्वलन्निव पुरीं मिथिलामवाप ॥ ३ ॥

तदेतद्वो विदितमेव। इदमिदं निवेद्यते तत्र च शरनिकरवर्षणे क्षितितलनिघर्षणे सुभटवर्षणे कातरमनोधर्षणे परस्परप्रतिहतिमर्षणे कीलालपकर्षणे लोमहर्षणे च महारम्भे समरसंरम्भे।

शम्भोः शिष्यं कुशिकमुनितः प्राप्तविद्योपविद्यः
क्षुण्णक्षत्रं दशरथभुवामग्रणीः क्षत्रियाणाम्।
वृद्धं बालश्च्यवनकुलजं भास्वतो वंशजन्मा
रामं रामो व्यजयत गतिच्छेदिना सायकेन ॥ ४ ॥

विचिन्त्य। महती वार्ता। विभाव्य। तस्यापि कलत्रे राक्षसराजोऽनुरज्यत इति न सुखोदर्कं तर्कयामि।

मायामयः। विलोक्य कथमधीतलेखस्तद्यावदुपसर्पामि। परिक्रम्य कनिष्ठमातामह मायामयोऽभिवादयते।

माल्यवान्। अपि सुखं भद्रस्य महाराजरावणः किं कुरुते।

मायामयः। यदपङ्कजासनसंभवान्वयः कुरुते।

माल्यवान्। किमिव।

मायामयः। यदादिष्टोऽस्मीति पठति।

माल्यवान्। हसित्वा वृद्धबुद्धिर्हि प्रथमं पश्यति चरमं कार्यदुर्योगोऽवतरति यन्मया धूर्जटिधनुरधिक्षेपणतः प्रभृति मतिचक्षुषा दृष्टमेव यदुत दशकन्धरोऽनुधास्यति सीताहरणम्।

मायामयः। ततस्ततः।

माल्यवान्। ततश्च मया मन्दोदरीपितुर्मायागुरोर्मयस्य प्रथमशिष्यो विशारदनामा यन्त्रकारः सबहुमानं नियुक्तः सीताप्रतिकृतिकरणाय विरचिता च सा तेन रावणोपच्छन्दनार्थमभिहितं च।

सूत्रधारचलद्दारुगात्रीयं यन्त्रजानकी।
वक्त्रस्थसारिकालापा लङ्केन्द्रं वञ्चयिष्यति ॥ ५ ॥

मायामयः। सकौतुकम्। दृष्टा मातामहेनासौ कीदृशी यन्त्रजानकी।

माल्यवान्। मायामय मया दृष्टा यादृशी सत्यजानकी तस्मादेव च सीताधात्रेयिकाऽपि कारिता सिन्दूरिका नाम। प्रतिशिरसि परामृश्य तद्देवस्य मिथिलागमनं वीतविघ्नोपशमनं तद्वचनादुचितं तदुपवर्णनं तेन च कृतकसंविधानेन निरन्तरप्रेमोपार्जनं च सत्यापयितुमिदानीं निशाचरपतिर्वाच्यः। देव परपरिणीताऽपि सा।

तव त्रिलोकीविजयैकजन्मभि-
र्गुणैरुदारैरनुरञ्जितापि सा।
अनभ्यनुज्ञाजनितं करग्रहं
निषेधते हन्त नतेन मौलिना ॥ ६ ॥

मायामयः। अप्येवं प्रतिपत्स्यते दशाननः।

माल्यवान्। प्रतिपत्स्यते वचसा न मनसा। उभौ हसतः।

माल्यवान्। तदितिप्रतिपन्नवते दर्शनीया।

मायामयः। एवं कृते किं कृतं भवति।

माल्यवान्। शृणु यत्कृतं भवति सीताप्रतिकृतिदर्शनेन दशाननः प्रलोभितो भवति प्रलोभनेन च काललाभः काललाभो हि नयविदां प्रयोगग्रामं कन्दलयति प्रयोगपरतन्त्रा च कार्यसिद्धिः।

मायामयः। यथादिष्टमार्येण।

माल्यवान्। प्रयोगक्षमश्च कालो विलम्बनीयः सत्यापनाय।

मायामयः। यदादिशत्यार्यः।

माल्यवान्। तद्गच्छ त्वं यथाभिमतसिद्धये। अहमपि मन्त्रिमण्डपिकामध्यासिष्य इति निष्क्रान्तौ। विष्कम्भकः।

ततः प्रविशति रावणः प्रहस्तश्चामरधारिणी च।

रावणः।

न प्रीते परमेश्वरेऽपि शिरसां छेदेन होमेन वा
ज्यावल्लीनहनेन चामरपतौ द्वारार्गलासङ्गिनि।
संयत्यैलबिलात्तथा न च हृते विश्वातिथौ पुष्पके
द्रष्टव्या जनकात्मजेत्यथ यथा लङ्केश्वरो मोदते ॥ ७ ॥

विचिन्त्य हंहो हृदय न प्रसर्त्तव्यं यदावेदितममृतमयाक्षरं मायामयेन यथा किल।

सौधादुद्विजते त्यजत्युपवनं द्वेष्टि प्रभामैन्दवीं
द्वारात्त्रस्यति चित्रकेलिसदसो वेषं विषं मन्यते।
आस्ते केवलमब्जिनीकिसलयप्रस्तारशय्यातले
संकल्पोपनतत्वदाकृतिरसायत्तेन चित्तेन सा ॥ ८ ॥

तत्प्रहस्त शीघ्रं प्रवेशय जानकीं न कालहरणक्षमाः प्रियजनसमागममहोत्सवाः ।

प्रहस्तः । निष्क्रम्य सीतासिन्दूरिकामायामयैः सह प्रविष्टः ।

मायामयः । इयं सा ।

रावणः । इयं सा विभाव्य ।

चक्षुः स्मेरमवारिजं कुवलयं वक्त्रस्य मित्रं विधु-
र्भ्रूलेखा स्मरतोरणं स्मितलवो लीलालतापल्लवः ।
उच्छिष्टं कलकण्ठवाक् च वचसां शङ्के तदेणीदृशः
सर्वाङ्गीणमहो विधेः परिणतं विज्ञानचित्रं चिरात् ॥९॥

सिन्दूरिका । देव दसाणण चावारोहणदिअहम्मि ईसि दिट्ठाइं जाणई तुज्झ वअणाइं कुणइ एहिं दंसणपुणरुत्तयेआइं * ।

रावणः । भद्रे जानासि मदनपराधीनं जनमवस्थापयितुम् ।

सिन्दूरिका । अण्णधा वा रक्खसचक्कवत्तिणो विण्णवीअदि † ।

रावणः । सोल्लासम् । तत्कथय येन युगपदनुभवामि विंशतिधा श्रोत्रामृतम् ।

सिन्दूरिका । इदं विण्णवीअदि ‡ । संस्कृतमाश्रित्य ।

यन्मुग्धामपि चन्द्रिकां गमयति प्रावृत्य चीनांशुकं
स्वस्मै कुप्यति पञ्चमं रचयते यत्कण्ठनालाय च ।
यच्चान्यत्परिहृत्य पक्ष्मलदृशस्त्वत्संकथास्वादरो
लोकस्तत्र निरर्गलं प्रलपति त्वं ब्रूहि किं मन्यसे १० ॥

रावणः । सहर्षम् । ततस्ततः ।

सिन्दूरिका । भूयः संस्कृतमाश्रित्य ।

एतस्याः स्मरसंज्वरः करतलस्पर्शैः परीक्ष्यो न यः
स्निग्धेनाऽपि जनेन दाहभयतः प्लोषप्रदः पाथसाम् ।
निर्वीर्यीकृतचन्दनौषधिविधौ तस्मिंस्तडत्कारिणो
लाजस्फोटममी स्फुटन्ति मणयो विश्वेऽपि हारस्रजाम् ॥११॥

रावणः । अयि सीताधात्रेयिके तत्किमिति मैथिली मां प्रति साचीकृतवक्त्रमास्ते ।

धात्रेयी । णवाणुराओ एत्थ अवरज्झइ ण उण पिअसही जदो ।

---

* देव दशानन चापारोपणदिवसे ईषद्दृष्टानि जानकी तव वदनानि करोति इदानीं दर्शनपुनरुक्तयेयानि ।

† अन्यथा वा राक्षसचक्रवर्तिनो विज्ञाप्यते ।

‡ इदं विज्ञाप्यते ।

वक्कं च वत्तितंसं णिमेन्ति देहेण झत्ति वलिएण ।
पढमुणअवल्लहसङ्गमेण णडिआओ मुद्धमहिलाओ * ॥१२॥

रावणः । किमुच्यते सीतायाः प्रियसखी खल्वसि केतकसम्पर्कोसिचयमपि किमप्यामोदाय । सीतां प्रति अयि स्वागतं जनकराजजन्मनो जनस्य ।

सीता । सख्याः कर्णे एवमेवम् ।

सिन्दूरिका । लङ्केसर सहीसञ्चारिदक्खरा जाणई विण्णवेदि अज्ज साअदं मन्दोदरीदइददंसणेण † ।

रावणः । स्वगतम् । बाढं खिद्यति मयि वैदेही ईर्ष्यायितं हि स्त्रीणां प्रकाशकं प्रेमभरस्य । विहस्य प्रकाशम् । ननु जानकीदयितदर्शनेनेति संप्रति वक्तव्यं भवति सहर्षम् । हंहो हृदय मनोरथानामुपरि वर्तसे यतः ।

प्रेमरम्यमुभयोः समं दिशोः
कामिनां यदिह चापपिच्छवत् ।
एकतस्तु न चकास्ति साध्वपि
श्यामपृष्ठमिव बर्हिणश्छदम् ॥ १३ ॥

सीता । सख्याः कर्णे एवमेवं भण ।

सिन्दूरिका । विसज्जिअलज्जाकण्ठबन्धं अप्पणा भण जदो सअं दूदी दूदीणं वरिट्ठा ‡ ।

सीता । सवास्तंभम् । जधा समत्थिदं लङ्केसरेण ता एत्थ वत्थुणि मए विरइदाइं कदिचि वअणाणि सुणीअदु ।

एक्कदिसारम्मेणवि अलं सिणेहेण सिहिदलच्छविणा ।
थुणिमो समदोवासं पेच्छं अ पिच्छोवमं पेम्मम् § ॥ १४ ॥

रावणः । तर्हि घनप्रेमनिबिडप्रेमा दशकण्ठो विजयते ।

सीता । सुदरं जअदि दसकण्ठो ।

समपेम्मरसं समरूवजोव्वणं समविलासवेअट्टम् ।
समसुहदुःखं च जणं समपुण्णेहिं जणो लहइ ‖ ॥ १५ ॥

---

* नवानुरागोऽत्रापराध्यति न पुनः प्रियसखी । यतः
वक्त्रं च वर्तितासं नियमयन्ति देहेन झटिति वलितेन ।
प्रथमोपनतवल्लभसङ्गमेन नटिता मुग्धमहिलाः ।

† लङ्केश्वर सखीसंचारिताक्षरा जानकी विज्ञापयति अद्य स्वागतं मन्दोदरीदयितदर्शनेन ।

‡ विसर्जितलज्जाकण्ठबन्धमात्मना भण यतः स्वयं दूती दूतीनां वरिष्ठा ।

§ यथा समर्थितं लङ्केश्वरेण । तदत्र वस्तुनि मया विरचितानि कतिचित् वचनानि श्रूयन्ताम् ।
एकदिक्रम्येणापि अलं स्नेहेन शिखिदलच्छविना ।
स्तुमः समद्विपार्श्वं प्रेक्ष्यं च पिच्छोपमं प्रेम ॥

‖ सुतरां जयति दशकण्ठः ।
समप्रेमरसं समरूपयौवनं समविलासविशिष्टम् ।
समसुखदुःखं च जनं समपुण्यैर्जनो लभते ॥

रावणः । अहो सूक्तिपाको जनकसुतायाः । यतः ।

स्वादूनां प्रथमाय रूपविभवं मिथ्या मिथस्तन्वते
प्रेम्णो स्वस्ति मनोभवैकसुहृदे यस्य प्रसादादिह ।
दम्पत्योरनपेक्षितप्रियसखीचित्रप्रकारोक्तयो-
र्जायन्ते प्रहरान्तरेऽपि शतशः कोपप्रसादोदयाः ॥ १६ ॥

सीरध्वजात्मजे देवि तदिदं विज्ञाप्यसे ।

दृग्लीलासु सकौतुकं यदि मनस्तन्मे दृशां विंशति-
र्निःसन्धौ परिरम्भणे रतिरथो दोर्मण्डली दृश्यताम् ।
प्रेम्णा चेत्परिचुम्बने दशमुखी वैदेहि सज्जा पुरः
पौलस्त्यस्य च राघवस्य च महत् पश्योपचारेऽन्तरम् ॥१७॥

अपिच जानकि लङ्कास्वामित्वे सति ।

मदनघभुजदण्डश्यामचण्डप्रताप-
प्रतिहतदयितानां खेचरीणां शिरःसु ।
तव करपुटचेष्टासज्जसेवाञ्जलीनां
चरणनखशिखाली शेखरीभावमेतु ॥ १८ ॥

सीता । आं दसाणण आं पुरिसविसेसपरिसंकुक्करिसिणीओ जेव्व पुरन्धीओ होन्ति * ।

रावणः । किञ्चिदुपसृत्य सुन्दरि किमद्यापि संदिह्यते । तदेहि ।

लीलोद्याने यदि सुरपतेरस्ति वाञ्छा विहर्तुं
मेरोः शृङ्गे यदि च विसरत्तारकाचन्द्रदाम्नि ।
चण्डाभोगोड्डमरपुलकां देहि वैदेहि तन्मे
लङ्काभर्तुर्निबिडितकुचामादरादङ्कपालीम् ॥ १९ ॥

इति धारयति । सचमत्कारम् । कथमयमस्त्रैणः संस्पर्शः ।

रूपसंपदमरीषु नेदृशी
स्पर्श एष च दृषत्सहोदरः ।
तन्मतिर्मम विदेहजन्मनो
मां परीक्षितुमियं विजानता ॥ २० ॥

पुनर्निरूप्य । अये सारिकाधिष्ठितवक्त्रं सीताप्रतिकृतियन्त्रम् । अहो मतिमान् मायामयश्छलितोऽस्मि जनकराजपुत्र्याः प्रतिकृतिसमर्पणेन तद्गच्छ मद्विनोदार्थमिमां भवनस्थां कुरु । इति सीतासिन्दूरिके मायामयश्च निष्क्रान्ताः ।

रावणः । मदनाकूतमभिनीय प्रभञ्जनिके लीलोद्यानमार्गमादिश येन युगपदुपस्थितरात्रिंदिवे युगपदभ्युदितसूर्याचन्द्रमसि युगपद्विभक्तसर्वर्तुनि तत्र सीताविरहदुःखिनमात्मानं विनोदयामि । भोः प्रहस्त तदितो गत्वा सन्निधीयतां शिशिरःपदार्थसार्थो विप्रकृष्यतां तदितरः ।

प्रहस्तः । परिक्रामन् ।

कस्त्वं चैत्र किमत्र पुष्पधनुषः का शक्तिरिन्दोरपि
व्यावर्तस्व वसन्तवात विरम त्वं काकलीपञ्चम ।
देवेऽस्मिन् दशकन्धरे भवत मा संरम्भगर्भक्रमाः
प्रागल्भी भवतां हरौ विजयिनी तस्मिन्नहल्यापतौ ॥२१॥

निष्क्रान्तः । नेपथ्ये ।

राहो तर्जय भास्करं वरुण हे निर्वाप्यतां पावकः
सर्वे वारिमुचः समेत्य कुरुत ग्रीष्मस्य दर्पच्छिदम् ।
प्रालेयाचल चन्द्र दुग्धजलधे हेमन्तमन्दाकिनि
द्राग्देवस्य गृहानुपेत भवतां सेवाक्षणो वर्त्तते ॥ २२ ॥

प्रतीहारी । इदोइदो एदु देवो इमं लीलुज्जाणम् * ।

उभौ प्रविशतः ।

रावणः । भद्रे सकलर्तुसमलङ्कृतानुद्यानोद्देशान्द्रष्टुमिच्छामि ।

प्रतीहारी । ता इदोइदो एदु दसाणणदेवो † ।

रावणः । परिक्रामति ।

प्रतीहारी । एसो सलिलसोसदुरुद्दखिडदपुण्डरीअमण्डलो जलद्दासंदाणिदसुन्दरीदेहकन्दलसलीलपरिरम्भपक्खलिदकामिअणाअणुन्हो गिह्मो ‡ ।

रावणः । अये ग्रीष्मः । इह हि ।

यावन्नालं कमलकलिकाः प्रातरेव स्फुटन्ति
श्यामामध्ये विकचयति चेन्नीलमब्जं मृगाङ्कः ।
ग्रीष्मेऽमुष्मिन् जरठितरवौ रागिणां गात्रदेयाः
सद्यः शुष्कैरिव च सलिलैः संश्लिष्यन्ते जलार्द्राः ॥ २३ ॥

अपिच ।

कर्णे स्मेरं शिरीषं शिरसि विचकिलस्रग्लताः पाटलिन्यः
कण्ठे माला विशाला वपुषि च नलिनीमूलकाण्डाःकलापाः ।
सामोदं चन्दनाम्भः स्तनभुवि नयने स्नानमाञ्जिष्ठपृष्ठे
गात्रं लोलज्जलार्द्रं जयति मृगदृशां ग्रैष्मिको वेष एषः ॥ २४ ॥

तापातिरेकमभिनीय ।

अयि शिशिरतरोपचारयोग्ये
द्वितयमिदं युगपच्च सह्यमेव ।
जरठितरविदीधितिश्च कालो
दयितजनेन समं च विप्रयोगः ॥ २५ ॥

तदग्रतो दर्शय ।

* आं दशानन आं पुरुषविशेषपरिशङ्कोत्कर्षिण्य एव पुरन्ध्यो भवन्ति ।

* इतइत एतु देवः एतल्लीलोद्यानम् ।

† तदितइत एतु दशाननदेवः ।

‡ एष सलिलशोषदुरुद्धखण्डितपुण्डरीकमण्डलो जलार्द्रासंदानितसुन्दरीदेहकन्दलसलीलपरिरम्भपक्ष्मलितकामिजनानुष्णो ग्रीष्मः ।

प्रतीहारी । पदान्तरे स्थित्वा एस णीसेसमिलिदबन्धवो भग्गपथिअमग्गो लङ्गलीकुसुमालिङ्गिदचङ्गत्तणो विआसजज्जरिज्जन्तजरठकेसरकुडुम्बडम्बरो कुसुमाउहविलासविक्कमेक्कारम्भो वरिसारम्भो § ।

रावणः । अपि वर्षा ऋतुः । इह हि ।

पञ्चेषोर्गुणघोषणायगुणकस्त्रैलोक्यचिन्तातिथे
स्तूर्यं ताण्डवसंविधासु शिखिनां हंसप्रवासानकः ।
सूतिस्वस्त्ययनं विदूरवसुधारत्नाङ्कुराणामयं
गम्भीरस्तनितध्वनिर्जलमुचां रोदोगृहं गाहते ॥ २६ ॥

अपिच ।

संपिण्डीकृतजीर्णजीरककणश्रेणीश्रियः केशरान्
संनद्धं परितो निरन्तरदलद्रोणीनिवेशैस्त्रिभिः ।
प्रान्तभ्रान्तमधुव्रतीवलयितं स्वस्ति प्रियासंकटे
गन्धग्राह्यमबाह्यवृत्ति दलति क्रीडावने केतकम् ॥ २७॥

सोत्कण्ठम् ।

विरम जलदकाल स्वस्ति ते भद्र भूया-
दनुचितपरिवारस्त्वं तवैते तथा हि ।
विरहमविरहं वा नानुरुधन्ति मेघाः
सुखिनमसुखिनं वा सर्वमुत्कण्ठयन्ति ॥ २८ ॥

तदग्रतो दर्शय ।

प्रभञ्जनिका पदान्तरे स्थित्वा एस करन्दिओदारसुन्दरो दलितनीलेन्दीवरवणो बन्धूअविच्छाइदमहिन्दकोअण्डो विरलीकदकेअईकुसुमवासप्पसरो मनोहरीकदणीसेससरओ सरओ ‖ ॥

रावणः । अये शरत् ।

अवतरति घनात्ययः किमन्य-
द्विकसितकुङ्कुमकेसरावतंसः ।
परिसरपुलिनेषु निम्नगानां
सपदि समागतराजहंसयूथः ॥ २९ ॥

अपिच ।

कुर्वाणाः कैरवाणां मधुकणहरणं कूजितं रञ्जयन्तो
हंसालीकण्ठनालीष्वविकलकलमामोदमैत्रीपवित्राः ।
शेफालीफुल्लपालीपरिमलमिलनाश्चुम्बिताश्चञ्चरीकैः
कह्लाराह्लादकाराः कुवलयसुहृदः शारदा वान्ति वाताः ॥३०॥

साभिलाषम् ।

कुवलयमप्सु दिवीन्दुः सिन्धुषु पुलिनानि वाक्व हंसीषु ।
इत्यवयवैर्विभक्तां सीतां दर्शयति शरदेषा ॥ ३१ ॥

तापमभिनीय सोऽयमपरः शरन्नामा ग्रीष्मः। तदग्रतो दर्शय ।

प्रतीहारी । पदान्तरे स्थित्वा एस अणहिणन्दिदलीलामज्जणुम्मज्जणो पसरिदणीरन्धलोद्धरअपुञ्जपिञ्जरिददिम्मुहो अणियन्तिदकोञ्चीकुलकोलाहलाडम्बरकरविदसीमन्तो हेमन्तो * ।

रावणः । अये हेमन्तः ।

इह हि वहति कामं कामकोदण्डयष्टि-
र्द्रविडयुवतिगण्डश्यामिकां कोशकारः ।
चिरविरहितहंसीकण्ठकाण्डावपाण्डुः
स्फुरति च रुचिमत्ता पर्व्वणां पुण्ड्रकस्य ॥ ३२ ॥

अपिच ।

लम्पाकीनां किरन्तश्चिकुरविरचनां रल्लकांछासयन्त-
श्चुम्बन्तश्चन्द्रभागासलिलमविकलं भूर्जकाषैकचण्डाः ।
एते कस्तूरिकैणप्रणयसुरभयो वल्लभा बाह्लवीनां
कौन्तालीकेलिकाराः परिचयितहिमं हैमना वान्ति वाताः ॥३३॥

तापमभिनीय ।

सर्वाङ्गमदनोद्दाहः स कोऽपि मम वर्तते ।
अप्येष हन्त हेमन्तो यत्रोष्णसमयायते ॥ ३४ ॥

तदग्रतो दर्शय ।

प्रतीहारी । पदान्तरे स्थित्वा एस हिमुल्लसिदतरुणदमणअकन्दलो णिबिडपडन्ततुहिणकणुक्केरणिव्विग्घमहग्घिदपरिरम्भो अवदंसीकदतरुणतरणिकिरणुक्केरो पुराणदप्पणविच्छाअमअलञ्छणो णिज्जिदणीसेससिरी सिसिरो † ।

रावणः । अये शिशिरः । इह हि ।

वह्नेः शक्तिर्जलमिव गता दर्शनाद्दाहवृत्ते-
र्नित्योत्संधौ नवमरुवके वर्तते पुष्पकार्यम् ।
शीतात्त्रासं दधदिव रविर्याति चाशां कृशानो-
र्नीहारार्तैरिव च दिवसाः सांप्रतं संकुचन्ति ॥ ३५ ॥

अपिच ।

चूडागर्भनिवेशि दामविकलं मुक्ताफलैर्भूषणं
स्त्रीणां कुङ्कुमपिच्छिलः स्तनभरो गूढोदरं मन्दिरम् ।

§ एष निःशेषमिलितबान्धवो भग्नपथिकमार्गो लाङ्गलीकुसुमालिङ्गितसौन्दर्यो विकासजर्जरज्जरठकेसरकुटुम्बडम्बरः कुसुमायुधविलासविक्रमैकारम्भो वर्षारम्भः ।

‖ एषा करन्दिकावतारसुन्दरी दलितनीलेन्दीवरवना बन्धूकविच्छायितमहेन्द्रकोदण्डा विरलीकृतकेतकीकुसुमवासप्रसरा मनोहरीकृतनिःशेषसराः शरत् ।

* एष अभिनन्दितलीलाभज्जनोन्मज्जनः प्रसारितनीरन्ध्रलोध्ररजःपुञ्जपिञ्जरितदिङ्मुखोऽनियन्त्रितक्रौञ्चीकुलकोलाहलाडम्बरकरम्बितसीमान्तो हेमन्तः ।

† एष हिमोल्लसिततरुणदमनककन्दलो निबिडनिपतत्तुहिनकणोत्करनिर्विघ्नमहर्घितपरिरम्भोऽवतंसिततरणिकिरणोत्करः पुराणदर्पणविच्छायमृगलाञ्छनो निर्जितनिःशेषश्रीः शिशिरः ।

द्वित्राः स्थूलपटाः प्रसर्पदगुरुग्रामश्च धूमोद्गमः
संभोगाय भवन्ति चात्र कृतिनां दीप्रा विलासाप्तयः ॥३६॥

सखेदम् ।

नगरपरिघदीर्घा बाहुदण्डा ममैते
विजितकलभकुम्भा सा च तस्याः कुचश्रीः ॥
तव शिशिर समीरश्चैष नीहारसार-
स्त्रयमिति हि समेतं दुर्लभं रावणेन ॥ ३७ ॥

तदयतो दर्शय ।

प्रतीहारी । पदान्तरे स्थित्वा एस फलितफलिणीवणन्तरो णिरन्तरपल्लविदकङ्केलिलदादण्डो णिबिडुग्गीदकलकण्ठकण्ठो कुडजगण्ठिजडिलपुणाअणिवहो भग्गकुसुमिदसोहञ्जणसाही मरणसंदेहारोविदसअलपविसन्तो वसन्तो * ।

रावणः । अये वसन्तः । इह हि ।

सूते संप्रति दुग्धमुग्धसुभगं पुष्पोद्गमं मल्लिका
बाह्लीकीदशनव्रणारुणदलैः पत्रैरशोकोऽर्चितः ।
भृङ्गीलङ्घितकोटि किंशुकमिदं किञ्चिद्विवृन्तायते
माञ्जिष्ठैर्मुकुलैश्च पाटलितरोरस्त्येव काचिल्लिपिः ॥३८॥

किञ्च ।

सपदि सखीभिर्निभृतं विरहवतीस्त्रातुमत्र भज्यन्ते ।
सहकारमञ्जरीणां शिखोद्गमग्रन्थयः प्रथमे ॥ ३९ ॥

सम्यङ्निरूप्य सोत्कण्ठम् । सीतावयवशोभासंवादात्तद्विगुणप्रणयिनी मे मधुलक्ष्मीः । तथा हि ।

लावण्यार्द्रं मधूकान्यनुवदति दृशावुत्पलानां सनाभी
दत्तश्रीर्मल्लिकाभिः सह चरति सुहृत्सौरभं केसरस्य ।
वैदेह्याः पाटलानां सुजनयति रुचं किञ्च विम्बाधरोष्ठः
क्रीडाभिश्चित्र चैत्रत्वमसि तदिह मे वल्लभो दुर्लभश्च॥४०॥

प्रभञ्जनिका । अलं इमिणा । उक्कण्ठाकारीणं धुरन्धरो एसो † ।

रावणः । उत्कण्ठामभिनीय ।

घर्मर्त्तो दमय वसन्तमुत्कवन्तं

संतापमभिनीय ।

द्राग्गीष्मं स्थगयतु वार्मुचामनेहा ।

उत्कण्ठामभिनीय ।

त्वं वर्षाः शमय घनान्त

भूयः संतापमभिनीय ।

वारिदान्तं
हेमन्तः सह शिशिरेण हन्त हन्तु ॥४१॥

प्रभञ्जनिका । देव दिट्ठं सअलं रिदुचक्कवालं ता किम्पि मअरन्दमुच्चन्तबहलसीअरासारं सअं परिब्भमन्तजन्ततालवित्तं णिग्गण्ठिदगण्ठिरकणअकेरिआकवललुद्धगन्धहरिणणाहिको-ससुअन्धदसदिसं जाणइविरहवेदणाविणोदत्थाणत्थरअणसिलाचउक्किअं अलङ्करेदु देओ * ।

रावणः । यदभिरुचितं भवत्यै परिक्रामितकेन सखेदम् ।

आत्तं श्रान्तमिदं विपण्णममुना नीचैरनेन स्थितं
कम्पोऽस्मिन्निह जृम्भिना प्रलपितं चैतेन तूष्णीमदः ।
एतद्ध्यानपरं घनोऽत्र पुलकः स्रस्तं च बाष्पैरितः
सीतादुर्विनयेन मे दशमुखी हा धिक्कथं वर्ततास् ॥४२॥

प्रभञ्जनिका । स्वगतं जधा मअणो आणवेदि । प्रवेशनाटितकेन अअं रअणचउक्किआकेलिपल्लङ्को ता उअविसदु देवो † ।

रावणः । उपविश्य सकोपम् ।

तां गाढं प्रहरस्व मां परिहरन्

सावज्ञम् ।

तां मां च मा वा वधीः

सानुकम्पम् ।

तां हंतुं परिकल्पितैरपि शरैर्मामेव वा ताडय ।

सानुरागम् ।

यद्वा मन्मथ तां च मां च युगपद्विध्येः समग्रायुधो
येनाहं जनकात्मजा च सदृशं प्रेम प्रपद्यामहे ॥ ४३ ॥

तद्भद्रे सन्निधापय शिशिरोपचारसामग्री ।

प्रभञ्जनिका । देव देवदाओ आअदाओ तण्णिवेदिदा दाव सिसिरोवआरसामग्गी सव्वा सण्णिहिदा ता किं णाम ण चिन्तिदोवणदं लङ्केसरस्स ‡ ।

रावणः । पुरोऽवलोक्य ।

सलिलकलशपाणिर्जायतां मन्दरस्त्री
तुहिनगिरिकुटुम्बिन्यस्तु नीहारहस्ता ।
सपदि मलयजाया चन्दनाम्भो निधत्तां
व्यजतु चमरदण्डैः किञ्च नेपालपाली ॥ ४४ ॥

---

* एष फलितफलिनीवनान्तरो निरन्तरपल्लवितकङ्केलिलतादण्डो निविडोद्गीतकलकण्ठीकण्ठः कुटजग्रन्थिजटिलपुन्नागनिवहो भग्नकुसुमितशोभाञ्जनशाखी मरणसंदेहारोपितसकलप्रवसन् वसन्तः ।

† अलमनेन । उत्कण्ठाकारिणां धुरन्धर एषः

* देव दृष्टं सकलमृतुचक्रवालं तत्किमपि मकरन्दमुञ्चद्बहलसीकरासारां स्वयं परिभ्रमद्यन्त्रतालवृन्तां निर्ग्रन्थितग्रन्थिलकनककदलिकाकवललुब्धगन्धहरिणनाभिकोशसुगन्धदशदिशां जानकीविरहवेदनाविनोदस्थानस्थरत्नशिलाचतुष्किकामलङ्करोतु देवः ।

† यथा मदन आज्ञापयति । अयं रत्नचतुष्किकाकेलिपल्यङ्कस्तदुपविशतु देवः ।

‡ देव देवता आगताः । तन्निवेदिता तावत् शिशिरोपचारसामग्री सर्वा संनिहिता तत् किं नाम न चिन्तितोपनतं लङ्केश्वरस्य ।

किञ्चित्तापमभिनीय । अलमलं भवतीभिः । पर्वतकलत्राणि यूयं युष्मदङ्गसङ्गः सुतरां तापाय । अन्यतोऽवलोक्य ।

यासां जन्म विवस्वतो भगवतश्चण्डाच्च मार्तण्डत-
श्चण्डीशेक्षणतश्च मन्मथमयस्ताः सन्तु हर्म्याद्बहिः ।
याः सार्द्धं सुधया समं कमलया साकं मृगाङ्केण च
क्षीराब्धेरमराङ्गनाः समभवंस्तास्त्वन्तिके सन्तु मे ॥ ४५ ॥

ततश्च ।

रम्भा रम्भादलाग्रैर्व्यजतु विहरतां दावदानेन हारा
तारा ताराधिपश्रीरधितनु तनुतां चन्दनस्यन्दमेकम् ।
प्रम्लोचा मोचपाकच्छविरवतु बिसन्यासभङ्ग्या ममाङ्गा-
न्यज्जुद्राद्राग्दलार्द्रामुरसि च दधती मेनका मे न का च ॥ ४६ ॥

पुनः संतापितकेन यासां मद्विजितवल्लभविरहिणीनां भवतीनां सन्निधिरपि संतापाय किं पुनरुपचारः । अन्यतोऽवलोक्य ।

पार्श्वं मुञ्चतु वेत्त्यनङ्गगृहिणी नाङ्गोपचारक्रियां
चण्डी चामरभूषणैर्व्यजतु मां द्वात्रिंशता पाणिभिः ।
भास्वत्यत्रि सरोरुहैरलमलं घर्मो यदेषां प्रियः
स्वान्दारान्नय सन्निधिं जलनिधे नद्यस्तवान्तःपुरम् ॥ ४७ ॥

सहर्षमवलोक्य ।

पादौ पीडय ताम्रपर्णि मुरले हस्तौ हृदि स्थाप्यतां
भोः कावेरि मृणालदाम वितर द्राङ्नर्मदे वीजय ।
त्वं गोदावरि देहि चन्दनरसं हे तापि तापोष्मणः
शान्त्यर्थं सृज यन्त्रवारि विरही लङ्केश्वरः सीदति ॥ ४८ ॥

भूयःसंतापमभिनीय एता अपि मदनाङ्कुरितमदङ्गसङ्गात्परिक्लयन्ति । सक्रोधम् । प्रभञ्जनिके मत्प्रसाददुर्ललिताः खल्वेते ममाप्याज्ञां न गणयन्ति तदादिश्यन्तां किङ्करा यदुत ।

कम्पाघातैः सुरभिरभितः सत्वरं ताडनीयो
गाढाक्रान्तं मलयमरुतः शृङ्खलादाम दत्त ।
कारागारे क्षिपत तरसा पञ्चमं रागराजं
चन्द्रं चूर्णीकुरुत च शिलापट्टके पिष्टबिम्बम् ॥ ४९ ॥

द्वाराभिमुखमवलोक्य काः पुनरिमा द्वारि ।

प्रभञ्जनिका । वारुणी लच्छी सरस्सई * ।

रावणः । सावज्ञम् ।

दूरे तिष्ठतु वारुणी विरहिणां का नाम रत्नस्पृहा
लक्ष्मीः क्षीरमहोदधेरपि सुता स्वाहेव दाहे पटुः ।
वाचालासि सरस्वति व्रज गृहान्कः सूक्तिगोष्ठीक्षणो
यत्सत्यं न ममाद्य किञ्च न मुदे सीताप्रसादं विना ॥ ५० ॥

ऊर्ध्वमवलोक्य स्वगतं तथाप्येवं तावत् । प्रकाशम् । हंहो विबुधापसदाः किमिदं येन शिशिरोपचारं कर्तुमुद्दिष्टा उष्णोपचारं रचयथ तर्हि विस्मृतो वः प्रकृत्यमर्षणो दशकण्ठः । विचिन्त्य यद्वा प्रसादचिन्तकाः खल्वेते मम तत्र तेषु परुषमभिधास्ये जलार्द्रामभिनीय ।

चन्द्र ज्योत्स्नाजलार्द्रामपनय यदिदं दह्यते देहदाहैः सेकमभिनीय ।

क्षीराब्धे दुग्धसेको मदनहुतभुजा पिण्डभावं बिभर्ति । नलिनोपचारमभिनीय ।

हेमाम्भोज स्रजस्ते विशद महते ग्रीष्मपोषाय निष्ठाः हिमतापानुभवमभिनीय ।

प्रालेयाद्रे दवीयांस्त्वव हिमदवथुर्दृष्ट एवाम्बुजेषु ॥ ५१ ॥

प्रभञ्जनिका । अहो मम्महवामदा अहो देवपडिउलदा जं दाणिं रमणिज्जं वि उव्वेअणिज्जं सिसिरं वि उह्णं पडिहाअदि * ।

रावणः । साभ्यर्थनावज्ञम् ।

शेषाहे त्वत्फणानां पिबतु दशशती मारुतं चैत्रमित्रं
एहो जिह्वालता ते शशधरवपुषश्चन्द्रिकामेव लेढु ।
संकोचं पुष्पवन्तौ सपदि वितरतं पङ्कजेन्दीवराणां
त्वां याचे पञ्चबाणः पुरदहन पुनर्दह्यतामर्द्धदग्धः ॥ ५२ ॥

विचिन्त्य कथममी तापोत्कर्षेऽपि मम प्रत्यनीकप्रोत्साहनेनापि न विरमन्ति तदेवं तावत् साक्षेपम् ।

मास्म श्वाससटाः समीर चिरतः का कैतवी रावणे
धाराश्रूणि कृशीकुरुष्व वरुण त्वत्केलयः खल्विदम् ।
हंहो पावक तापमल्पय तनौ त्वत्तो जगद्दाहिका
व्यावर्तस्व वसन्त हन्त मदनः स्याद्येन वीतायुधः ॥ ५३ ॥

स्वगतम् । तत्कः पुनरत्र प्रकारस्तापोपशमने । विचिन्त्य भवत्वेवं तावत् । प्रकाशम् ।

हे संवर्ताः कुरुत करकावृष्टिभिर्मां विकीर्णं
द्राक्संभूय व्यजनचरितं धत्त कल्पान्तवाताः ।
क्रीडावापी भव हिमगिरे बुध्नबन्धाद्विलीनो
लङ्काभर्तुर्मनसिजशिखी नान्यथा शंशमीति ॥ ५४ ॥

सविशेषतापमूर्ध्वमवलोक्य किञ्च ।

सूत्रीकृतासु तरुणेन्दुकरच्छटासु
नक्षत्रबिम्बमयमौक्तिकगुम्फनाभिः ।
सीतावियोगविधुरस्य नवीनमार्गः
संपाद्यतां दशमुखस्य विलासहारः ॥ ५५ ॥

---

* वारुणी लक्ष्मी सरस्वती ।

† अहो मन्मथवामता अहो दैवप्रतिकूलता यदिदानीं रमणीयमप्युद्वेजनीयं शिशिरमप्युष्णं प्रतिभाति ।

अथवा किमेभिः क्षुद्रनक्षत्रमणिभिः । ततश्च ।

हस्तद्वयीनिविडपीडितपार्वणेन्दु-

निस्यन्दितामृतरसेन निषिञ्च किञ्चित् ।

अङ्गानि मे स्मरमहाज्वरतापभाञ्जि

स्वस्मै स्वयं ननु भिषज्यति राक्षसेन्द्रः ॥ ५६ ॥

प्रभञ्जनिका । देवस्स देवेण वेज्जत्तणं पडिवण्णं मअलञ्छणस्स उण का वत्ता* ।

रावणः । यद्वा किमनेनापि सीतावदनबन्धुना विधुरीकृतेन चन्द्रं प्रति सकरुणम् ।

हंहो चन्द्र विमुच्यतां चरणयोः पर्यन्तसेवाक्रम-

स्त्वं पीयूषरसस्य रागशशिनः पात्रं तु लङ्केश्वरः ।

तन्मे वक्रपरम्परापरिचिताः श्लेषं करिष्यन्त्यमी

मा कच्चिद्भवतोऽपि बिम्बवलये श्वासाश्चमत्कारिणः॥५७॥

मदनवेदनामभिनीय ।

आः काम मय्यपि विमुञ्चसि नाम बाणान्

किं रावणो न विदितः शमितामरो यः ।

यद्वा स एष तव राघवपक्षपात-

स्त्वामसौ प्रतिकरिष्यति चन्द्रहासः ॥ ५८ ॥

प्रभञ्जनिका । विडजणमाणसणिवासिणं विब्भमच्छगुणगारविअं मणहरीकदकादम्बरीमदुम्माणं पञ्चबाणं विणासअन्तेण देवेण दिज्जदु णिहुअणविण्णाणविसेसाणं जलञ्जली† ।

रावणः । विरसं विहस्य मकरध्वज यन्निवारितोऽपि मां प्रहरसि तदवगतस्त्वयार्थः । यत्किल ।

किं करिष्यति कोपेन देवो मे दशकन्धरः ।

यदनङ्गतया नास्मि चन्द्रहासासिगोचरः ॥ ५९ ॥

तत्किं न जानासि रावणः सर्वङ्कषप्रभाव इति । विचिन्त्य यद्वा मत्प्रसाददुर्ललितोऽयं सर्वदा तपस्वी तदेकवारमपराधमस्य क्षमे । ऊर्ध्वमवलोक्य सहसोत्थाय च ।

हे पाकशासन विसर्जय वारिवाहां-

स्त्वं कार्तिकेय कुरु दूरतरं मयूरम् ।

हे शक्र संवृणु निजानि तडिन्महांसि

लङ्केश्वरो विरहितः सहते न वर्षाः ॥ ६० ॥

अग्रतोऽवलोक्य के पुनरमी ।

प्रभञ्जनिका । देव सेवागदा भुअङ्गमा अत्ताणं दंसअन्ति‡ ।

* देवस्य देवेन वैद्यत्वं प्रतिपन्नं मृगलाञ्छनस्य पुनः का वार्ता ।

† विटजनमानसनिवासिनं विभ्रमपाण्डित्यगौरवितं मनोहरीकृतकादम्बरीमदोन्मानं पञ्चबाणं विनाशयता देवेन दीयतां निधुवनविज्ञानविशेषाणां जलाञ्जलिः ।

‡ देव सेवागता भुजङ्गमा आत्मानं दर्शयन्ति ।

रावणः ।

हे पन्नगाः किमपि रोषविषस्वरूपं

रूपं तु वेणिमनुचाञ्चति वल्लभायाः ।

तेनैष दुर्द्धरतरस्त्वरते कृपाणो

युष्मानियं नमति तेन च मौलिमाला ॥ ६१ ॥

परिक्रामन्नग्रतोऽवलोक्य कथमियं केलिकमलिनी । सहर्षम् ।

नवमरकतपात्रीरोचिषः पत्रपङ्क्ती-

स्तव कमलिनि वन्दे चक्षुषोश्चार्पयामि ।

यदिह नयनलेह्यं दोर्लतामध्यरोध-

स्तनतटपरिणाहं सूचयन्ति प्रियायाः ॥ ६२ ॥

अन्यतोऽवलोक्य अये कथममी ब्रह्मविमानहंसाः सीताविभ्रमगमनमवकृत्य परिक्रामन्तो मह्ममात्मानं रोचयन्ते । साक्षेपम् । आः क्षीरजलपृथक्करणपाण्डित्यसंगृहीताः सितशकुनयः केयं लुण्ठाकता । विचिन्त्य भवतु नलिनासनमेव तावदभिदधे । अञ्जलिं बद्ध्वा ।

हंहो पितामह निषेध विमानहंसान्

लीलागतं मृगदृशस्त इमे हरन्ति ॥

नोचेन्ममोपदिश तेषु यदाचरामि

त्वं येन दण्डनविधेः प्रथमप्रणेता ॥ ६३ ॥

विलोक्य कथं सत्वरं मामवलोक्य स्थितास्तन्मन्ये मद्भयाद्गतिस्तेयं परित्यक्तमेतैः । तत्र प्रत्यादिशामि । यदित्थं कथयन्ति सक्रद्धिहितदोषं दोषेभ्यो विनिवर्त्तमानं साधुवद्वीक्षेत । अन्यतोऽवलोक्य रे पुरन्दर मम पुरतः सीतामालिङ्गसि तन्नेयमहल्यामुनिपत्नी चन्द्रहास इतइत एष बिडौजसि समादिश्यसे ।

प्रभञ्जनिका । पुरतः स्थित्वा देव कहिं इह महेन्दो कहिं वा सीदा* ।

रावणः । निपुणं निरूप्य हन्तहन्त सादृश्याद्विप्रलब्धोऽस्मि । इन्दीवराकरोऽयं न विकस्वरलोचनः शचीरमणः । जलचन्द्रप्रतिमैषा तरङ्गदीर्घा न वैदेही ।

प्रभञ्जनिका । स्वगतम् । अण्णदो दंसिअ अवक्खिवामि से हिअआवक्खेवम् । प्रकाशम् । इदोइदो पेक्खदु दसाणणो देवो† ।

रावणः । साक्षेपम् । आः पन्नगाः प्रियतमामादाय पातालं प्रविशथ वैनतेयवैनतेय निवारयैतान् यद्वा ममापि रावणस्य सहायापेक्षा । तदेषोऽहमेव परिसर्पामि । इति संरम्भते ।

* देव क्वेह महेन्द्रः क्व वा सीता

† अन्यतो दर्शयित्वावक्षिपाम्यस्य हृदयावक्षेपम् । इतइतः प्रेक्षतां दशाननो देवः ।

प्रभञ्जनिका । पादयोर्निपत्य कहिं एत्थ पण्णग्गा कहिं एत्थ जाणई * ।

रावणः । निरूप्य यथाह भवती ।

अयं तोयावर्तो बत न वितलं नागवसते-
रयं वीचीच्छेदो न खलु फणिनामेष निवहः ।
इयं भृङ्गश्रेणी न पुनरलकानां विरचना
इदं हेमाम्भोजं विकसति न सीतामुखमिदम् ॥ ६४ ॥

विचिन्त्य तदितः स्थलकमलिनीमतो विलासकरिमृगपक्षिजातांश्च नीलोद्यानैकदेशान्निरूपयामि परिक्रामितकेनावलोक्य ।

सारङ्ग दृष्टिलसिते कलभाषिते च
पुंस्कोकिल स्मितसरोरुह सौरभे च ।
दिव्येभ विभ्रमगतौ च सदैव यस्याः
शिष्याः स्थ तां कथयत स्वगुरुं प्रियां मे ॥ ६५ ॥

विलोक्य कथमभी मद्भयात्सर्वेप्यप्रतिपत्तिमुखास्तिष्ठन्ति केवलमैरावतो मदवशात्कण्ठगर्जं करोति जाने प्रेयस्या यावदपहृतमनेन भवत्वेनमेव तावदाभाषे ।

कुम्भाभ्यां कुचसंपदूरुविभवो हस्तेन लीलागतं
केलीचङ्क्रमितेन गण्डतलयोः कान्तिश्च दन्तद्युता ।
स्वःस्तम्बेरमनाथ पक्ष्मलदृशो यस्यास्त्वयेदं हृतं
तां मे दर्शय येन संमदवता स्तेयं मया क्षम्यते ॥ ६६ ॥

विलोक्य कथं मामनादृत्य निजप्रियामभ्रमुं प्रति प्रवृत्तः । साक्षेपम् । रेरे कात्यायनीकेसरिकिशोर शिक्षयैनम् । विचिन्त्य अथवा शिक्षितचर एवायम् ।

कण्ठार्पितमहापाशश्चरणार्पितशृङ्खलः ।
बध्यते द्युकरी द्वारि कोस्त्यान्यो दण्डडम्बरः ॥ ६७ ॥

अन्यतोऽवलोक्य कथमद्यापर्वणि चन्द्रग्रहणं वसुमतीवर्ति तदेतदद्भुतम् ।

प्रभञ्जनिका । देव किसणपक्खदिअसेसु चन्दग्गहणंति झति जुत्तं ण पडिहाअदि † ।

रावणः । प्रभञ्जनिके यथात्थ सम्यग्विलोक्य च किञ्चिद्विहस्य च ।

जितनवनवनीतं धाम नो चन्द्रिकेयं
स्मितकुवलयनीले चक्षुषी नो कलङ्कः ।
सरलभुजगभङ्गिर्वेणिरेषा न राहु-
र्मुखमिदमिह तस्या नैष राकामृगाङ्कः ॥ ६८ ॥

विचिन्त्य क्व पुनरत्र सीतावदनेन्दुरपि विमृश्य ज्ञातं ध्यानानीतया सीतया मुहुर्मुहुर्विप्रलभ्यामहे । अन्यतोऽवलोक्य । अयं विलासकुरङ्गाग्रणीः समीरणसारङ्गः । विचिन्त्य कथं जानकीनयनलीलामलिम्लुचः । साक्षेपम् ।

शास्योऽसि मारुत हृते त्वन्मृगेण तदीक्षणे ।
स्वामी भृत्यापराधेन दण्डनीय इति स्थितिः ॥ ६९ ॥

पुरतोऽवलोक्य सरीसृपचक्रवर्तिन् वासुके गण्डूषयैनं यद्वा समानपरिग्रहदोषं चन्द्रमपि तावदाक्षिपामि ।

रजनीश विमुञ्च लाञ्छनैणं
दयितालोकन हृन्ममैष वध्यः ।
यदि चास्य परिग्रहं दधीथा-
स्तदितो मूढ दशाननं न पश्येः ॥ ७० ॥

सैंहिकेयसैंहिकेय कवलीकुरु कुरङ्गलाञ्छनम् ।

प्रभञ्जनिका । केलीकन्दोट्टवणविसट्टवण्णं परिपिक्ककप्पूरपिण्डपण्डुरअं मअलञ्छणमुच्छिन्दाणेण देवेण माणंसिणीमाणमुद्दाविद्दावणे किं कादव्वम् * ।

रावणः । भवति प्रभञ्जनिके सर्वदैव प्रसादपात्रं ममैषः । तदेकवारं तावच्छिक्षयामि ।

हे चन्द्रमस्त्यज मृगं कुरु रावणाज्ञां
तत्कारिणस्तव गुणद्वितयेन योगः ।
तन्मैथिलीनयनकान्त्यपहारदोषो
लुप्तश्चते भवति बिम्बमलाञ्छनं च ॥ ७१ ॥

पुरतोऽवलोक्य जानकिजानकि किमिव मायाऽपहृतं यदवगुण्ठ्य स्थिताऽसि । यद्वा प्रसादरसोन्मुखमनसोऽपि विलासहेतोः कामिन्यः कुप्यन्ते तत्प्रसादयामीति प्रणमति ।

प्रभञ्जनिका । का पुण एत्थ जाणई † ।

रावणः । इयमियम् ।

प्रभञ्जनिका । कहिं सा ‡ ।

रावणः । हस्तं व्यापारयन् हा हतोऽस्मि मन्दभाग्यः ।

इयं लता कापि निरन्तरच्छदा
प्रसूनगन्धाहृतषट्पदावलिः ।
अधो दधाना हरितं नवांशुकं
न मैथिली नीलदुकूलगुण्ठना ॥ ७२ ॥

अन्यतोऽग्रेऽवलोक्य कथममी चकोराः शकुन्तयः । अहो चारुचरितं चित्रमेतेषामन्यविहङ्गमवर्गासाधारणं यत्किल चन्द्रिकाचान्तिचातुर्यम् । तान् प्रति ।

---

* क्वात्र पंन्नगाः क्वात्र जानकी ।

†. देव कृष्णपक्षदिवसेषु चन्द्रग्रहणमिति झटिति युक्तं न प्रतिभाति

* केलीकमलवनविकसितवर्णं परिपक्वकर्पूरपिण्डपाण्डुरं मृगलाञ्छनमुच्छिन्दता देवेन मनस्विनीमानमुद्राविद्रावणे किं कर्तव्यम् ।

† का पुनरत्र जानकी ।

‡ क्व सा ।

अयि पिबत चकोराः कृत्स्नमुन्नामिकण्ठ-
क्रमकवलनचञ्चच्चन्द्रकान्तीरमिश्राः ।
विरहविधुरितानां जीवितत्राणहेतो-
र्भवति हरिणलक्ष्मा येन तेजोदरिद्रः ॥ ७३ ॥

किञ्च रे हतशकुनयः ।

चेतोभुवश्चरितविभ्रमसंविधानं
नूनं न गोचरमभूद्दयिताननं वः ।
तत्कान्तिसम्पदमवाप्स्यथ चेच्चकोराः
पानोत्सवं किमकरिष्यत चन्द्रिकासु ॥ ७४ ॥

प्रविश्य पटाक्षेपेण छिन्ननासा कृतावगुण्ठना शूर्पणखा साक्रन्दं पादयोर्निपत्य अज्ज एक्कमादुक पेक्ख तक्खअचूडामणी उप्पाडिदो वडवाणलजालाकलप्पअं घुल्लालिदं दसकण्ठकणिट्ठबहिणीए अच्चाहिदम् * । इति शिर उद्घाट्य दर्शयति ।

रावणः । सक्रोधम् ।

पौलोम्याप्यत्र वीरे समरभुवि भयाद्याचिते भर्तृभिक्षां
वैदेहीदत्तशौर्यव्रतमदनजिते यद्यभून्मय्यवज्ञा ।
तत्किं कस्यापि तस्य त्वयि विधुरमिदं कुर्वतः कर्म भग्न-
स्वर्गेभोद्दामदानस्रुतिरयमपि मे विस्मृतश्चन्द्रहासः ॥७५॥

तद्वत्से कथय ।

परस्परविघट्टनामुखरदन्तपत्त्रान्तर-
प्रवृत्तरसनं महाकहकहारवैर्भैरवैः ।
इदं मम महोद्भटं सभयशेषवक्त्रेक्षितं
प्रचण्डकुटिलोत्कटभ्रुकुटि भुग्नभालं मुखम् ॥ ७६ ॥

शूर्पणखा । स्वगतम् । रहुउलराअहाणीपरिट्ठिदे रामलक्खणे अहिसारअन्ती अणिच्छन्तेहिं तेहिं बलक्कारक्कमेण एत्थावत्था कदत्ति कधं जेट्ठभादुणो कधइस्सं ता एव्वं दाव प्रकाशम् । देव अओज्झाणअरीए रामेत्ति खत्तिअकुमारो अत्थि † ।

रावणः । स्वगम् । अस्ति यः सीतायाः पतिः । प्रकाशम् किं तस्य ।

शूर्पणखा । तस्स भरिआ भुवणेक्कसुन्दरी सीदा णाम ‡

रावणः । सावज्ञमात्मगतम् । त्रिभुवनसुन्दरीतिवक्तव्ये भुवनसुन्दरीत्याह । प्रकाशम् । ततः किं तस्याः ।

शूर्पणखा । लङ्केसरस्स समुचिदत्ति अपहरन्ती तेहिं कवालघट्टजोग्गा कदह्मि § ।

---

* आर्यैकमातृक प्रेक्षस्व तक्षकचूडामणिरुत्पाटितो वडवानलज्वालाकलापकं चूर्णितं दशकण्ठकनिष्ठभगिन्या अत्याहितम् ।

† रघुकुलराजधानीपरिस्थितौ रामलक्ष्मणावभिसरन्ती अनिच्छद्भ्यां ताभ्यां बलात्कारक्रमेणेदृशावस्था कृतेति कथं ज्येष्ठभ्रातुः कथयिष्यामि । तदेवं तावत् देव अयोध्यानगर्यां राम इति क्षत्रियकुमारोऽस्ति ।

‡ तस्य भार्या भुवनैकसुन्दरी सीता नाम ।

§ लङ्केश्वरस्य समुचितेति अपहरन्ती ताभ्यां कापालिकव्रतयोग्या कृतास्मि ।

रावणः । अये दाशरथिविनाशाय कारणद्वय संपन्ना सीता शूर्पणखा च । प्रकाशम् । वत्से मा विषीद निर्जितजामदग्न्यशस्त्रव्यापार एवासौ ततश्च ।

त्रुट्यद्दोर्द्दण्डखण्डोड्डमरपुरुपतत्कण्ठकोष्ठप्रकोष्ठं
स्फारस्फिक्पृष्ठपीठीहठदलितशिराकन्धराकाण्डखण्डम् ।
सस्तम्भं तत्रडिम्भं चटदितिविचटन्मुण्डपिण्डं प्रचण्ड-
श्चण्डीशोच्चण्डदंष्ट्राक्रकच इव दृढं चन्द्रहासस्तृणेढु ॥७७॥

इति परिक्रम्य निष्क्रान्तः ।

॥ उन्मत्तदशाननो नाम पञ्चमोऽङ्कः ॥

---

## ॥ श्रीपरमेश्वराय नमः ॥

॥ यथोद्देशकार्यकालपक्षटिप्पणीपरीक्षाशेषः ॥

यत्तु "प्रदेशैकवाक्यतया इतः प्रतीते"रिति प्रतीकमुपादाय "सर्वशास्त्राभिज्वलनं चैकवाक्यतया संस्कारकत्वमिति भावः । इदं चिन्त्यम् । संस्कारमात्रस्यैव ज्वलनशब्दार्थत्वे बाधकाभावेनैकवाक्यतयेति निवेशे मानाभावात् । स्वदेशे गृहीतवाक्यार्थस्य तत्रतत्र विधौ स्मृतिमात्रेण तत्तत्संस्काराभिप्रायेणैवैकदेशस्य इत्युक्तेरुपपत्तेश्च । एकवाक्यतया संस्कारकत्वे हि अधिकारस्यापि तथात्वेन ततो विशेषाभिधित्सया तथोक्त्यसंगतिः । प्रदीपदृष्टान्तस्तु एवमेतत् स्वबुद्धिजननद्वारेत्यन्तेन यत्न्येनैकवाक्यतामन्तरा त्वयैव योजितः । स्वबुद्धिजननद्वारेति त्वदुपपादनं चैकवाक्यतायां नानुकूलम् । कार्यकालपक्षे तवाप्येवमेव वक्तव्यत्वात् । नहि तवापि कार्यकालपक्षे परिभाषाणां स्वदेशे वाक्यार्थबोधाभावः । बाधकाभावात् । संज्ञाशास्त्रस्य त्विति वक्ष्यमाणविशेषोक्त्ययोगाच्च । नहि स्वबुद्धिरेकवाक्यतया बोधः, किं तु स्मृतिमात्रम् । संस्कार्यविधीनामनेकत्वेन युगपच्छ्रोतृबुद्ध्यारोहेण तावतामुपस्थानासंभवाच्च । प्रधानेन गुणाकर्षणेऽपि गुणेन प्रधानाकर्षणस्यायुक्तत्वाच्च । नहि प्रयाजादिवाक्यैः पूर्णमासादिवाक्यमाक्रष्यते । क्वचिति चेति सूत्रस्यकैयटस्तु एकदेशिपक्षाशयवर्णनाय प्रवृत्तः । इत एवारुच्या भाष्ये ऽथवेति पक्षान्तरमुपन्यस्तमिति दिग्" इति त्रिपथगायामभिहितम् ॥

तत् प्रत्युच्यते । परिभाषया विधेः संस्कारो हि शक्त्या संकेतेन वा विधिशास्त्रघटकपदैरुपस्थाप्यो यो ऽर्थस्तदितरार्थावगाही यो ऽप्रामाण्यज्ञानानास्कन्दितो बोधस्तत्प्रयोजककस्य चित् पदस्य लक्षणाग्रहः, पदविशेषस्याध्याहारो वा, विधिशास्त्रघटकस्य सन्दिग्धतात्पर्यकपदस्यार्थविशेषे तात्पर्यस्य निश्चयो वा, । तत्रार्थोपस्थापकपरिभाषाणां विधिशास्त्रघट-

कपदविशेषस्य लक्षणायाहकत्वं यथा तस्मिन्निती त्यादेः । इको गुणवृद्धी इत्यादीनां तु इक इत्यादिपदाध्याहारप्रयोजकत्वम् । एवं स्थिते पदोपस्थापकपरिभाषाविधेयेन पदेन विधिशास्त्रघटकपदानां परस्परनिरूप्यनिरूपकभावापन्नविषयताप्रयोजकत्वलक्षणस्य पदैकवाक्यत्वस्यार्थोपस्थापकपरिभाषाविधेयेनार्थेन सह विधिशास्त्रघटकपदोपस्थाप्यानामर्थानां परस्परनिरूप्यनिरूपकभावापन्नविषयताश्रयत्वरूपस्यार्थैकवाक्यार्थत्वस्य चावश्यस्वीकर्तव्यत्वेनैकवाक्यतयैवेति निवेशे मानाभावादित्यस्य को ऽर्थः । एकवाक्यतयैवेति मूलं त्वर्थैकवाक्यार्थताया अप्युपलक्षणमिति तद्व्याख्यावसर एवावोचाम ।

अधिकारत्वपरिभाषात्वयोः स्वरूपनिरूपणं तु मूलव्याख्यावसर एव स्पष्टमकुर्मेति तद्दिशा ऽधिकारापेक्षया विशेषाभिधित्सया प्रवृत्तस्य भाष्यग्रन्थस्य नासंगतेः शङ्का ऽप्यौचित्यमावहति ।

स्वबुद्धिजननद्वारेत्यत्रत्यस्वशब्दस्यात्मीयपरस्य विधेयार्थकतया परिभाषाविधेयार्थविषयकविधिशास्त्रजनितशाब्दबोधस्यैव स्वबुद्धिपदेन विवक्षणीयतया प्रदर्शितैकवाक्यताशयकत्वस्य सुव्यक्तं प्रतीततया केनाशयेन स्वबुद्धिजननद्वारेति ग्रन्थस्यैकवाक्यतायामननुकूलतां प्रतिपादयितुं प्रावर्तत भवान् ।

स्वदेशे तस्मिन्निती त्यादेर्वाक्यार्थबोधे किं सप्तमीनिर्देशघटितं शास्त्रमिति जिज्ञासायां यावन्तः सप्तमीनिर्देशघटितविधयो बुद्ध्युपारूढास्तावतामेव तत्र संस्कारेण तद्विषय एव च यथोद्देशपक्षस्य संभवेन तावतैव परिभाषाशास्त्रस्य साफल्ययहेणोपेक्षायाः कारणाभावेनावशिष्टविधीनां तत्तद्देशे एव जननीयस्य संस्कारस्य कृते परिभाषाशास्त्रस्य बोधान्तरस्यानावश्यकत्वेन पाठदेशे बोधमात्रेणैव विधिदेशे विधिशास्त्रस्य संस्कार इत्येव नागेशानुमतः परिभाषाविषये कार्यकालपक्षः संभाव्यते । तस्मिन्निती त्यादिपरिभाषाणां शास्त्रघटकसप्तमीनिर्देशाद्युद्देश्यकत्वस्येव संज्ञाशास्त्रघटकवृद्ध्यादिपदस्य शास्त्रघटकवृद्ध्यादिपदार्थकत्वस्याभावेन परिभाषास्थल इव जिज्ञासाया अनुत्थितौ साफल्यज्ञानाभावाद् विशेषप्रतिपत्त्युपेक्षाधियः संभवात्पुनर्बोधस्यावश्यकत्वेन पाठदेशे जातस्यापि बोधस्य विधिशास्त्रीयवाक्यार्थबोधाकरणत्वेन न लक्ष्यसंस्कारोपयोगित्वमित्याशयेन संज्ञाशास्त्रस्य तु कार्यकालपक्षे न पृथग् वाक्यार्थबोध इति ग्रन्थः प्रववृते । एवं स्थिते कार्यकालपक्षे इत्यारभ्य विशेषोक्त्ययोगाच्चेत्यन्तो ग्रन्थः कस्य भवदभिप्रेतार्थस्य साधने समुपयुज्यतेत्युच्यताम् ।

इदं तु चित्रं, यद् विनैव परिभाषार्थस्य विधिशास्त्रीयवाक्यार्थबोधे प्रवेशं स्मरणमात्रेणैव संस्कारकत्वमिष्यते । स्मृतेनार्थशतेनापि विना शाब्दधीविषयतां विषयसंकोचादिलक्षणस्य विधेः संस्कारस्यासंभवात् ।

“यच्च संस्कार्यविधीनामनेकत्वेन युगपच्छ्रोतृबुद्ध्यनारोहेण तावतामुपस्थानासंभवाच्चेत्युच्यते” तत्र ब्रूमो माभूच्छ्रोतृबुद्धौ युगपद्भानं क्रमेण तत्तद्बुद्धिस्वीकारे ऽपि का क्षतिः, । अनेकत्वे ऽपि संस्कार्यविधीनां समूहमालम्बयन्त्या बुद्धेरारोहस्य वक्तुं शक्यतया युगपच्छ्रोतृबुद्ध्यनारोहे ऽनेकत्वस्य हेतुतयोपन्यसनमपि रभसप्रलपितमेवेति ।

यदपि “गुणेन प्रधानाकर्षणस्यायुक्तत्वमुच्यते” तत्र च नहि प्रयाजादिवाक्यैरित्यादि दृष्टान्ततयोपन्यस्यते” तद् द्वयमपि न समीचीनम् । आकर्षणं हि प्रकृते उपस्थितिः सा च जिज्ञासितार्थस्य पर्यालोचनायां तदौपयिकसामग्रीसंघटने निराबाधैव । नहि गुणशास्त्रीयवाक्यार्थमितिकालिकत्वं जिज्ञासाया जिज्ञासितार्थप्रतिपत्तिप्रयोजकतां विहन्तुमुत्सहते । नहि कस्य चिदप्रधानपुरुषस्यापि को ऽस्य देशस्य राजेत्यादिजिज्ञासायां जिज्ञासाया अप्रधानपुरुषसमवेतत्वमात्रमन्त्रस्य जिज्ञासितविशेषप्रतिपत्तिं प्रति प्रतिबन्धकत्वं केनाप्यभ्युपेयते । एतावदेव हि तान्त्रिकव्यवहारतः प्रसिद्ध्यति । यद् “गुणे त्वन्याय्यकल्पना” इति । गुणप्रधानयोरेकतरबाधकल्पनाया नाप्राप्तौ गुणबाध एव कल्प्य इति च तदर्थः । प्रयाजादिवाक्यानामपि समभिव्याहृतपदैः प्रकरणादिना वा शेषत्वप्रतीतौ शेषिणो जिज्ञासायामुपतिष्ठन्त एव पौर्णमासादिवाक्यानि । केवलं पौर्णमासादिविधावाकाङ्क्षिततृतीयांशपूरकत्वमात्रेणाप्रधानत्वमेषाम् । अत एव प्रवर्ग्यादिवाक्येष्वनारभ्याधीतेषु शेषिण आकाङ्क्षायां प्राथम्यात् प्रकृतेरेवोपस्थितेस्तस्या एव शेषित्वमिति मीमांसकसमय इति कृतं पल्लवितेन ॥ शम् ॥

काशीस्थराजकीयपाठशालायाम्
धर्मशा॰ राजारामशास्त्री
सांख्यशा॰ बालशास्त्री

---

॥ श्रीः ॥

॥ काशीराजकाननशतकम् ॥

प्राणाः प्रयान्तु नहि तेन ममास्ति दुःख-
मिष्टं तदेव मम यद् विरहात् त्वदीयात् ।
हाहा हतस्तदभिमानवचस्त्वदीयं
कस्मिन् समाप्स्यति सतीति पुनर्विचिन्त्य ॥ ८१ ॥
प्राणा हि मे व नविपत्पतितस्य यान्ति,
एकं चिराय भवति स्थिर आत्मनीह ।

द्रक्ष्यामि ते मुखविधोर्विरहान्तरूपं
तवेचितं विषममेतदवार्य्यदुःखम् ॥ ८२ ॥

उत्तेजिता गुरुजनेन नितान्तधीरे,
कस्मै वदिष्यति कृशाङ्गि मनोऽभिमानम् ।
आकर्ण्य तत् प्रियगिरा परिचुम्ब्य वक्त्रं
को वा तदैव दवयिष्यति दुःखजातम् ॥ ८३ ॥

सेयं लता कुसुमिता स हि शीतरश्मिः,
सोऽसौ सुगन्धपवनो मृदुमन्दगामी ।
त्वामन्तरेण शरदिन्दुनिभानने मे
क्ष्वेडं वमत्यविरतं दृशयोर्ममाद्य ॥ ८४ ॥

केनैव ते प्रियतमेऽजनि कायमेतद्
जाने न येन वत सङ्गवशेन यस्य ।
तीक्ष्णं विषं विकिरतां द्विषताममीषां
सङ्गः सुधामय इव प्रतिबोधितो मे ॥ ८५ ॥

हाहा प्रिये बहिरपे हि हृदो मदीया-
दस्मि च वस्तुमुचितं तव हन्त किञ्चित् ।
प्राणावलम्बनकरीह परं त्वमद्य
दग्धासि चेद्धृदनलेन मृतो मृतोऽस्मि ॥ ८६ ॥

सोढुं न चैतमनलं तव कोमलाङ्गि,
शक्तिर्विलोकय बहिः परिवर्तमानाः ।
तप्ता मदङ्गदहनस्य तु सङ्गभाजः
कीलालपल्लवप्रसूनसमीरणाद्याः ॥ ८७ ॥

त्यक्तुं समर्थहृदयस्य भवत्कटाक्षं
प्राणेश्वरि प्रणयरवक्रतात्महारे ।
भिल्लीरवत्खरकठोरकृतेर्ममापि,
दुःसह्य एष विरहानलतापलेशः ॥ ८८ ॥

नास्ते त्रिशूलिसमवीर्य्यधरस्त्रिलोके,
पीत्वा हि जीवति विषं य इदं वदन्ति ।
मूढास्त एव न पुनर्मम तुल्यतेजाः
आस्तेऽपरस्तव वियोगसहो मृतो न ॥ ८९ ॥

एवं विलप्य पथिको धरणीशयानो
मूर्च्छान्वितोऽथ मृदुमारुतलब्धसंज्ञः ।
दृष्ट्वा समीपगतकाननसौम्यशोभां
दग्धो वियोगदहनैः पुनरेव वक्ति ॥ ९० ॥

ये पक्षिणः परभृता वितरन्तु दुःखम्,
ते सन्ततं भवति तेन न मे विचित्रम् ।
संचारिणोऽपि अलयः कृततीक्ष्णरावाः
कुर्वन्तु खण्डनमहो हृदयस्य नित्यम् ॥ ९१ ॥

दोषाकरो दहतु मां विषसोदरोऽसौ
हन्ताशुगो भवतु वह्निसखस्तथैव ।
पुष्पाणि वः समुचितं न तु तापदत्वं
यद्वो जगत्सु प्रथितं सुमनस्त्वमस्ति ॥ ९२ ॥

एतद्भूपं स्यानम्,
जानीत दस्यवो न यूयम् ।
राजति काशिनरेशः
श्रीश्वरीप्रसादनारायणसिंहः ॥ ९३ ॥

वचःश्रुतेर्वाक्यमुपैतु दूरं
यदीयवक्त्राम्बुजदर्शनोत्थम् ।
वक्तुं न शक्नोति सुखं त्रिलोकी
कदा स वो नावति तीक्ष्णरूपान् ॥ ९४ ॥

तमेव गत्वा कथयामि सद्यो
नासौ पुनः हन्तुमिदं समर्थः ।
दीनस्य तातः कुजनस्य हन्ता
पाता सतां यद्वसुधेश एषः ॥ ९५ ॥

नीतिशक्तिमवलोक्य यदीया-
मन्धवद् भृगुसुतस्य तु कार्यम् ।
यद्बुधेन निरणायि ततोऽन्धः
ख्यात एष न पुनः फलतोऽन्धः ॥ ९६ ॥

यदीयतेजोविभवं विभावसुं
द्वयं समालोक्य बुधाः पतङ्गवत् ।
तमेतमन्तं विविदुर्यदन्तरं
पतङ्गनामा तरणिस्ततोऽजनि ॥ ९७ ॥

नासौ साधारणो ज्ञेयो राजा काशीश्वरः स्वयम् ।
यदि स्यादस्य कोपाग्निः क्व यूयं तृणवज्जगत् ॥ ९८ ॥

बाल्याज्जरावधि यदीययशो दिगन्ते
गायन्ति दोषमिलितां रिपवोऽपि यस्य ।
वार्त्तां वदन्ति न पुनः स तु किं मलाब्धौ
मग्नो भविष्यति चिरं परिरक्ष्य युष्मान् ॥ ९९ ॥

सामान्यो न पुनर्धरापतिरयं धर्मः स्वयं मूर्तिमान्
किं ब्रूमः कृतिमस्य यां कथयितुं शक्तो न धाता स्वयम् ।
यस्माज्ज्ञानहताननन्यगतिकानस्याश्रये वासिनः
कृत्वा दुःखहतान् ददाति जगतामुच्चैः पदं सर्वदा ॥ १०० ॥

का कथा मानवानां तु अस्याश्रयनिवासिनाम् ।
आब्रह्मस्तम्बपर्यन्तं श्रितमेति परं पदम् ॥ १०१ ॥

पापारण्यनिवासिनो बलभृतो यूयं महातेजसो
दीनोऽहं प्रकृशोऽस्मि चेन्नृपतिना हन्तुं न योग्याः पुनः ।
काशीनायक एष चास्य विमले राज्ये समस्ताः समाः

काको निर्जरनायको नरपतिर्दीनः पतङ्गस्तथा ॥ १०२ ॥
राज्ञो भयं न पुनरेष महाबलं वः
किञ्चिच्च तिष्ठत महत् फलमस्य दास्ये।
उक्त्वेति काशिदयितं गदितुं स पान्थो
निर्याति विन्ध्यगिरिकाननभूमिभागात् ॥ १०३ ॥
आस्वादयन्तु रसिकाश्चतुरा रसक्रियास्वखिलासु।
साक्षात् प्रतीयमानप्रतीपस्वरूपगर्भं निबन्धम् ॥ १०४ ॥
रन्ध्राङ्कारुणवाजिचन्द्रविमिते ख्याते शकाब्दे शुभे
वाशिष्ठान्वयजन्मनो द्विजनुषो वङ्गाश्रये वासिनः।
श्रीकाशीशसभाबुधाग्र्यपदवीं प्राप्तस्य तर्कप्रियश्रीता-
राचरणस्य साम्प्रतमियं निष्ठां गता सत्कृतिः ॥ १०५ ॥

॥ समाप्तम् ॥

॥ रामनगरराजधानी ॥

# THE APHORISMS OF THE YOGA PHILOSOPHY, OF PATANJALI.

*(Continued from page 90.)*

*a.* Having described the modification in the shape of Nirodha (hindrance) he declares (now) the modification in the shape of Samádhi (meditation).*

The modification in the shape of Samádhi (meditation) defined.

सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधिपरिणामः ॥ ११ ॥

Aph. 11.—Out of the two (properties) of the internal organ—chitta—which consist of Sarvárthatá (that is its comprehension of several objects) and Ekágratá (i. e. its intentness on a single point); (when) the first is utterly destroyed and the second is manifested—(at that time the connection of the internal organ with both of the properties or the state in which it exists as Dharmí, i. e. endowed with the two properties) is the modification of the internal organ in the shape of Samádhi (meditation).

*b.* "Sarvárthatá" i. e. that property, in the shape of an obstacle, of the internal organ—chitta—which consists of its comprehension of several objects on account of its being changeable. "Ekágratá" (literally means intentness on a single point, but here it) means a uniform modification of the internal organ having its support on only one object. This also is a property of the internal organ. Out of these two, (when) the destruction (of the first) and the manifestation (of the 2nd) i.e. the destruction or an utter conquest of the first property characterised as Sarvárthatá and the manifestation or development of the 2nd one distinguished as Ekágratá, take place successively, (at that time, the connection of the internal organ, which has (then) an abundance of the principle Sattva—truth—with both of the properties or its existence as Anvayí (or Dharmí i.e. endowed with the two properties just mentioned) is technically called the modification in the shape of Samádhi—meditation. This modification differs from the former one only in this respect that, there, the subjugation and manifestation of the Sanskáras—trains of self-reproductive thought, that is, the subjugation of the former train of self-reproductive thought, resulting from Vyutthána before defined and the manifestation or the state of not being subdued, of the latter one, resulting from Nirodha—hindrance—are to take place. But here, (i.e. in the modification in the shape of Samádhi—meditation) the destruction and manifestation of the properties—Dharmas (and not of the Sanskáras), that is, the destruction or entering the past way, on account of utter regligence, of the property of an obstacle in the shape of Sarvárthatá and the production or manifestation, in the present way, of the property characterised as Ekágratá, (are to take place). †

*a.* (He) declares (now) the third modification of the internal organ (in the shape of) intentness on a single point (Ekágratá.)*

The third modification in the shape of intentness on a single point defined.

शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणामः ॥ १२ ॥

Aph. 12.—(When) the two particular states or modifications (pratyayas), the one tranquil (Śánta) and the other risen (udita), of the internal organ become equal, then its connection with both of the states is (its) modification in the shape of an intentness on a single point (Ekágratá).

*b.* The one particular state of the obstructed internal organ is tranquil (Śánta) i.e. entered the past way; and the other risen i.e. agitated in the present way. (When) both of these states also become equal or similar; as the internal organ, being abstracted from all other objects, has only one object, as its support, to contem-

* निरोधपरिणाममभिधाय समाधिपरिणाममाह।

† सर्वार्थता चलत्वान्नानाविधार्थग्रहणं चित्तस्य विक्षेपो धर्मः। एकस्मिन्नेवालम्बने सदृशपरिणामितैकाग्रत्वं तदपि चित्तस्य धर्मः। तयोर्यथाक्रमं क्षयोदयौ सर्वार्थतालक्षणस्य धर्मस्य क्षयोऽत्यन्तमभिभव एकाग्रतालक्षणस्य धर्मस्य प्रादुर्भावोऽभिव्यक्तिश्चित्तस्योद्रिक्तसत्त्वस्यान्वयितयाऽवस्थानं समाधिपरिणाम इत्युच्यते। पूर्वस्मात् परिणामादस्यायं विशेषः। तत्र संस्कारलक्षणयोर्धर्मयोरभिभवप्रादुर्भावौ पूर्वस्य व्युत्थानसंस्कारस्य न्यग्भावः। उत्तरस्य निरोधसंस्काररूपस्योद्भवोऽनभिभूतत्वेनानस्थानमिह तु क्षयोदयाविति। सर्वार्थतारूपस्य विक्षेपस्यात्यन्ततिरस्कारादनुत्पत्तिरतीतेऽध्वनि प्रवेशः क्षयः। एकाग्रतालक्षणस्य धर्मस्योद्भवो वर्तमानेऽध्वनि प्रकटत्वम्।

* तृतीयमेकाग्रतापरिणाममाह।

plate with, (then) the abiding (Avasthána) of the internal organ in both the states as Anvayí i.e. connected with both of them, is called the modification (of the internal organ) in the shape of intentness on a single point (Ekágratá.)†

*a.* To explain the (same) nature (of the modifications) about other things, as has been stated as to those of the internal organ, (he) says (as follows.)*

The modifications of the Elements and organs explained.

एतेन भूतेन्द्रियेषु धर्मलक्षणावस्था-
परिणामा व्याख्याताः ॥ १३ ॥

Aph. 13.—By this (exposition of the modifications of the internal organs) the (three) modifications in the shape of property (Dharma), indication (Lakshaṇa) and position (Avasthá) in (or of) the Elements and organs, have been (sufficiently explained.

*b.* "By this (exposition)" of the threefold modification of the internal organ (see Aphs. 9, 11, 12) the three modifications under the distinction of property, indication and position, have been explained or are to be understood, in (or of) the gross (Sthúla) and subtle (Súkshma) Elements and both the organs i.e. those of perception and action as they are characterised. [Now, the commentator explains these three successively.]

1st (When) a Dharmí (i.e. that which is endowed with a property) taken into consideration, leaving its former property, embraces another one (then) this its embracing of another property is the modification (of it) in the shape of property. As for example. [Take a lump of clay which is called Dharmí, as it is endowed with a property in the shape of lumpiness.] (When) the Dharmí clay (as it is called) by quitting the property in the shape of lumpiness, assumes another one in the shape of jar-hood (then) this modification (which the clay has now undergone) is called the modification of property.

2nd The modification in the shape of indication is as follows. (when) the same jar, by leaving the way called Anágata (not come in view) embraces the way called Vartamána (present) and, again by quitting it when it takes the way called Atíta (past), (then), this sort of modification is called the modification in the shape of indication. [The following example will sufficiently illustrate this. A stone has a statue already hidden in it and the sculptor only removes the outer parts of it to make it apparent. In the same manner, the jar exists already in the lump of clay and it only becomes visible when the potter removes the superfluous parts from it; therefore, according to this technicality of this Philosophy, the jar is said to exist in the Anágata way, before it becomes visible. On its being visible, it is said to be in the present way and when it is destroyed it is said to be in the way called Atíta—past.]

3rd The modification in the shape of position is as follows. In any two similar—i.e. belonging to the present way—moments, the same jar exists (and hence it is said) to be Anvayí (to the moments i.e. connected with both of them, but not without being changed, because, comparatively speaking, the jar was new in the first moment and became old in the next one), for the three visible principles of existence (Guṇa) cannot exist even in a single moment without being changed. (This kind of modification which the jar, existing in the present way, undergoes every moment, is called the modification in the shape of position.) †

*a.* Well then, what is a Dharmí? with reference to this query, he declares the definition of Dharmí. *

Dharmí what?

शान्तोदिताव्यपदेश्यधर्मानुपाती
धर्मी ॥ १४ ॥

Aph. 14.—A Dharmí is that which follows upon (or has) the properties in the shape of Śánta (tranquil), Udita (risen) and Avyapadeśya (incapable of denomination).

*b.* "Śántas" are those (properties) which have done their respective functions, i.e. entered the past (Atíta) way; "risen" are those (properties) which having abandoned the way not come in view (Anágata) perform their own functions, and "incapable of denomination" are those (properties) which exist in the shape ot Śakti (literally power, but here the Anágata way as the word is used here according to the technicality of the Mímánsá Philosophy and consequently) these cannot be particularly denominated. As for example, these are those properties which stand in this form) "all consists

† समाहितस्यैव चित्तस्यैकः प्रत्ययो वृत्तिविशेषः शान्तोऽतीतमध्वानं प्रविष्टः। अपरस्तूदितो वर्तमानेऽध्वनि स्फुरितो द्वावपि समाहितचित्तत्वेन तुल्यावेकरूपालम्बनत्वेन सदृशौ प्रत्ययावुभयत्रापि समाहितस्यैव चित्तस्यान्वयित्वेनावस्थानं स एकाग्रता परिणाम इत्युच्यते।

* चित्तपरिणामोक्तं रूपमन्यत्रातिदिशन्नाह।

† एतेन त्रिविधोक्तेन चित्तपरिणामेन भूतेषु स्थूलसूक्ष्मेषु इन्द्रियेषु बुद्धिकर्मलक्षणभेदेनावस्थितेषु धर्मलक्षणावस्थाभेदेन त्रिविधः परिणामो व्याख्यातोऽवगन्तव्यः। अवस्थितस्य धर्मिणः पूर्वधर्मनिवृत्तौ धर्मान्तरापत्तिर्धर्मपरिणामः। यथा मल्लक्षणस्य धर्मिणः पिण्डरूपधर्मपरित्यागेन घटरूपधर्मान्तरस्वीकारो धर्मपरिणाम इत्युच्यते। लक्षणपरिणामो यथा तस्यैव घटस्यानागताध्वपरित्यागेन वर्तमानाध्वस्वीकारस्तत्परित्यागेन चातीताध्वपरिग्रहः। अवस्थापरिणामो यथा तस्यैव घटस्य प्रथमद्वितीययोः सदृशयोः क्षणयोरन्वयित्वेन। यतश्चलं गुणवृत्तं नापरिणममानं क्षणमप्यस्ति।

* ननु कोऽयं धर्मीत्याशङ्क्य धर्मिणो लक्षणमाह।

of all" &c. [It will be clear from the following tenet of this Philosophy that "all things are eventually dissolved into nature—Prakriti; and consequently a jar can easily be denominated a cloth and conversely. So, in short, it can be said that all consists of all and hence they cannot be particularly named, as jar, cloth &c.]

By the word Dharma (property) is meant here a power itself limited, as being capable of doing a fixed action. (Thus) a Dharmí is that which follows upon (at different times) or has, being Anvayí (i.e. connected with them), all the three properties (just defined). As for example, gold in the form of a Ruchaka (chain) has a property in the shape of a chain and by quitting that property assumes another one in the shape Svastika (a particular kind of ornament). Then, though the properties (in question) differ from each other in some way, still the gold follows when it is commonly taken in the shape of Dharmí; but when it is particularly taken in the shape of Dharma (property) it appears then to follow as a distinct one, [because every body can easily perceive that a garland differs from the Svastika, though both of them are nothing but gold.]†

*a.* To remove the doubt how the same Dharmí is to undergo the various modifications, (he) declares (as follows).*

*(To be continued.)*

---

## SITA IN PRISON.

*(Continued from page 92.)*

'What still reluctant, cold, and coy!
Still loving grief and hating joy!
Hear, lady of the faultless brow,
Ravan ne'er stooped so low till now.
Down at thy perfect feet I kneel,
And pity beg for all I feel:
My heads beneath thy feet, I crave
Some mercy for thy loving slave.'

'My large-eyed Rama, dear to fame,
Of mighty arm and lion-frame,
And Lakshman, will not tarry long,
But slay thee though thy walls are strong.
Soon will he hurry on thy track,
And with thy life take Sita back.
Small aid 'gainst him thy hosts will bring,
Like snakes seized by the Feathered King,
Though they be terrible and fierce.
The arrows from his bow will pierce
Thy body through, from flank to flank,
As Ganga rends away the bank.
Though girt by hosts of demon shape,
Thou canst not from his hand escape.
Thou, when he holds thee with his eye,
Scorched with his shafts shalt fall and die.
He who can dry the mighty deep
May bid poor Sita moan and weep,
But the great sun shall cease to shine
Ere her pure soul to sin incline.
Repent, ere yet it be too late,
The crime thy death shall expiate,
Or soon shall seas of blood be spilt,
And widowed Lanka mourn thy guilt.
When Rama's shaft has laid thee low,
Far other words thy tongue shall know:
Thou scarcely then wilt boast in pride
That thou hast torn me from his side.
He comes; and 'neath his anger all,
Thyself, thy host, thy town shall fall.
I spurn thee: can the altar dight
With vessels for the sacred rite,
O'er which the priest his prayer has said,
Be sullied by an outcast's tread?
My body lies within thy power:
Torture it, chain it, kill, devour;
Ne'er will I meet thy base desire,
Or lay mine honour in the mire.'

With looks of fury Ravan cried:
'Come, Ogresses, and tame her pride;'
He spoke; and quicker than the word,
The coming of the Fiends was heard.
Shuddered the air as on they sped,
And the earth shook beneath their tread.
Before their lord they humbly bowed,
And pressed round Sita in a crowd.
'To the Asoka-garden bear
My prize,' he cried, 'and guard her there,
Until her stubborn pride be bent
By mingled threat and blandishment:
See that ye watch her well, and tame,
Like some wild thing, the haughty dame.'
They bore her to that garden, bright
With every flower that charms the sight,

---

† शान्ता ये कृतस्वस्वव्यापारा अतीतेऽध्वन्यनुप्रविष्टाः। उदिता ये ऽनागतमध्वानं परित्यज्य स्वंस्वं व्यापारं कुर्वन्ति। अव्यपदेश्या ये शक्तिरूपेण स्थिता व्यपदेष्टुं न शक्यन्ते यथा सर्वं सर्वात्मकमित्येवमादयः। नियतकार्यकरणरूपयोग्यतया ऽवच्छिन्ना शक्तिरेवेह धर्मशब्देनाभिधीयते तत्त्रिविधमपि धर्मं योऽनुपतत्यनुवर्तते ऽन्वयित्वेन स्वीकरोति स शान्तोदिताव्यपदेश्यधर्मानुपाती धर्मीत्युच्यते। यथा सुवर्णं रुचकरूपधर्मपरित्यागेन स्वस्तिकरूपधर्मान्तरपरिग्रहे सुवर्णरूपतयाऽनुवर्तमानं तेषु धर्मेषु कथञ्चित् भिन्नेषु धर्मिरूपतया सामान्यात्मना धर्मरूपतया विशेषात्मना स्थितमनुयायित्वेनावभासते।

* एकस्य धर्मिणः कथमनेके परिणामा इत्याशङ्कामपनेतुमाह।

Where sweet streams under branches flowed,
And fruit through all the seasons glowed.
Prostrate, before those fiendish eyes,
Like a poor trembling deer that lies
Beneath a tiger's paw, she lay
Thinking of Rama far away.

---

TO THE EDITOR OF THE PANDIT.

Sir,—In the Supplement to the Pandit for the current month, there is a Memorandum on the transliteration of Indian words in the Roman character, in which Bábu Śivaprasád criticises certain tables published in the *Government Gazette* of the North Western Provinces, for the 22nd of July last. As those tables, though printed anonymously in the *Gazette*, were originally compiled by me, and have since been adopted by the Asiatic Society of Bengal and the Government of India, I feel myself called upon to say a few words on the subject and therefore request the favor of your inserting the following remarks in your next issue.

In compiling the tables my only object was to secure uniformity in transliteration, partly by authority and partly by agreement; and to effect it I felt it was necessary to avoid discussion as much as possible by the adoption of an old and well-known system, instead of offering a new one. Accordingly, I selected Professor H. H. Wilson's scheme which appeared to me to be the best, as it was founded entirely upon the English alphabet, was remarkable for its simplicity and precision, had extensive currency both in India and Europe, and was more likely to be accepted by the public generally than any other. My part of the work was limited to arranging the tables in a convenient form; and this reply therefore will be confined to such parts of Bábu Śivaprasád's criticisims as relate to the few unimportant changes in the use of diacritical marks suggested by me. As the Bábu had written to me privately on the subject, and had my replies to his queries before him when he wrote his paper, much of what I have now to say will not be new to him.

The first objection raised by the Bábu refers to the representation of the letter (ع) in the Roman character. He says "in representing (ع) they have written (A'A â'a) which they seem to have meant to write (A ᴀ' â a') but which correctly would be written ('A' â) because ( ' ) only represents (ع) otherwise (واقي) would be transliterated Vákia'í instead of Váki'í, and the foot note of the third list of "Persian with its equivalents" will become meaningless. When however (â) is taken as the representative of (ع) it will of course be written, and written more correctly, Vákiâí." As far as I can understand the drift of this passage, the Bábu seems to think that (ع) would be correctly represented by an a with a circumflex accent over it and an apostrophe before it, and "more correctly" by an a with only the circumflex accent. How the former becomes "correct," and the latter "more" so, the Bábu does not explain. He is indifferent too as to whether (ع) is represented by an apostrophe only, or by an accented a, but he will not accept an apostrophized a on any account. As a matter of taste the Bábu is welcome to adopt any form of romanizing he chooses, but I deny his right to stigmatize as incorrect what he dislikes. The letter (ع) has no representative in the Roman alphabet, and therefore whatever is used in English to represent it must necessarily be arbitrary, and arbitrary signs can have no inherent claims to special accuracy. One may be more convenient, but not more accurate, than another. Professor Max Müller, the highest authority on the science of language in the present day, recommends an h with an apostrophe before it ('h) as the representative of the letter in question, and that cannot be said to be less correct than the one recommended by the Bábu. In English the apostrophe is used to mark the omission of a letter, and the Bábu wishes to take it as the representative of an unelided semi-vowel; but by what parity of reasoning a mark for an omitted letter is recommended to do duty for an unomitted one he does not tell. As an arbitrary sign it may be used for B or C or D just as well as for (ع).

Linguists are unanimously of opinion that (ع) by itself has the sound of a deep guttural a. As such it should be represented by an a with a mark of some kind to indicate its guttural character. Accordingly in India it has been generally represented by an (अ) with a dot under it (अ़), and this appears the most convenient form. In words like (رفع) and (دفع) the Romanized Raf'a and Daf'a are much more easily pronounced than raf' daf', and I can perceive no objection to their use, except the inconsistency of using the same form for the (ع) when a semi-vowel and final, as when it is associated with the short vowel a.

As to the sign which would be the most convenient, the circumflex accent recommended by Professor Wilson and accepted by Bábu Śivaprasád is now extensively used in Europe for the Sanskrit (आ,) and cannot be made to do duty for (ع) without causing confusion. The grave and the acute accents are equally objectionable, as they have their own special uses, and the only sign ready at hand and available in every printing office, is the apostrophe which has, besides, the special recommendation of being a fit symbol for (ع) when it loses its individuality by association with the vowels e, i o, &c., to which it imparts its guttural character. But whether we adopt the apostrophe or the circumflex accent, certain it is that the use of the two together on one letter for the indication of a single peculiarity would, to ordinary common sense, appear preposterous; but Bábu Śivaprasád says that (ع) "would be correctly written" (with both the marks thus) "'â." This opinion appears to me to be th-

more inconsistent as I find that he himself says with reference to (غ) that "when one letter can sufficiently answer our purpose what's the use of writing two?"

For (غ) Bábu Śivaprasád would have a dotted g. Professor Max Müller recommends an h with two apostrophes before it, thus" h. But Sir William Jones, Professor Wilson, Sir Charles Trevelyan, Mr. Shakespear, Dr. Forbes, Dr. Ewald, Dr. Eli Smith and a host of other oriental scholars prefer gh, and, with every deference to the opinion of Bábu Śivaprasád, I feel disposed to side with them. G alone, whether dotted or not, cannot convey to ordinary Englishmen the true idea of the sound of (غ) whereas gh does, and I cannot but take that as a conclusive argument in the case.

"For (ه) and (ह)" says Bábu Śivaprasád, "they have given (Ḥ H h ḥ) and for (ح) H. Ḥ h ḥ. This I cannot understand. It was simple enough to have given (H h) for (ه) and (Ḥ ḥ) for (ح), but they have left no distinction, and thus made the dot superfluous." The difficulty of understanding in this case is due to the Bábu's want of care in reading the tables on which he undertook to comment, for had he not been wanting in that respect he would have seen that there was a note attached to the first Table which says, "the alternative forms are not Wilson's. They are recommended as the diacritical marks attached to them can be produced with greater ease and saving of time; or are more convenient than those proposed by him:" and reading with the light of that note, he would have found that the compiler of the tables recommended a dotted ḥ for (ح) for which Wilson has an undotted h, and an undotted one for (ه) which Wilson represents by a dotted letter. The object was to economize the use of dots. (ح) occurs but rarely, whereas (ه) is an element in at least 25 per cent. of Urdu words, and the change suggested therefore is, in my humble opinion, a most desirable one. At any rate Bábu Śivaprasád is mistaken in supposing as shewn above, that the compiler of the tables had "left no distinction between (ح) and (ه) and given a dot superfluous."

Having all along cherished a high respect for Bábu Śivaprasád's knowledge of the Hindui language, it was not with ordinary surprise that I read the passage in his paper which says that "in Hindi when (H) (ह) is not followed by any vowel it is written (:)." Such a remark from such an author I was not at all prepared to meet. The merest tyro in Hindui can prove that it is utterly incorrect, and that by innumerable quotations even from the published writings of the Bábu himself. In a paper of questions on the subject of going to England lately published by him, and a copy of which he has kindly sent to me, I find such words as निगाह (nigáh) वह (vah) यह (yah) उहदा (uhdá) मुहताज (muhtáj) महसूल (mahsúl) पहचान (pahchán) &c., in all which h (ह) occurs without a following vowel, but no where has it been converted into a *visarga.* In the Bábu's *Bhúgol Hastámalak* there are many more instances of the same kind, but none in which that letter has been converted into a *visarga.* Indeed in the course of my reading of Hindui (which I must admit is limited) I doubt if I have ever met with a single instance of an h final having been so converted. In Sanskrit there is a rule which requires that s and r final should change into *visarga,* and it obtains also to a great extent in Hinduí and Bengali; and in Urdu and English the *visarga* is changed into an h; but there is no rule that I am aware of in the Sanskrit or the Hindui grammar which enjoins the conversion of an H into a *visarga.*

I think the Bábu is also wrong in supposing that the *visarga* and the *repha* "do not require different letters in the Roman Alphabet." The latter is a lingual semi-vowel, and is identical with the English r in "ornament" or "permanent," and the former, a sharp flatus (spiritus asper) equal to h, and it would be as reasonable to represent the two by the same symbol, as to represent B. and D. with the same letter. As to the difficulty about "h with two dots and h with no dot" which seems to trouble the Bábu much, the remedy lies in the foot-note which says "the alternative forms are not Wilson's," but which he has so sadly overlooked.

Professor Wilson uses a dotted ṛ for both (ऋ) and (ड़): for the sake of distinction, I recommended a dotted ṛ for the first letter, and an ṛ with a line under it for the second. Bábu Śivaprasád would reverse the order, and have a dotted ṛ for (ड़) and lined one for ऋ.) I fail to see the superior advantages of this arrangement for I can reckon them only at six on the one side and half a dozen on the other, but if it will please the learned Bábu I shall gladly accept the proposed alteration.

"The most urgent change," says Bábu Śivaprasád, "for "which I press is to have the same representative for (श) "and (ش) which have exactly a similar pronunciation. "It won't do to give for (ش) the same letter which re- "presents (ष) as they have done in the Gazette; (ष) has "a peculiar pronunciation. It is a cerebral." This short sentence involves three assumptions every one of which is wrong. The first is that (श) and (ش) have exactly similar pronunciation; this is not true. The Sanskrit (श) is a flatus that comes from the throat, and has a sharp hissing sound quite different from that of the Persian (ش) according to Professor Wilson, "the palatal S of the Nágari alphabet has no exact equivalent in English." The second assumption is that the Sanskrit (ष) "has a peculiar pronunciation" very different from that of the Persian (ش.) I shall not deny that (ष) has a peculiar sound, for every letter has its own characteristic peculiarity and ष cannot be without it;

but I cannot admit that peculiarity to be the way in which the letter is pronounced by some of my friends at Benares who take it for kh. "The sh of the Nagari alphabet," says Professor Wilson, "finds its exact representation in the English sh;" and "the main objection to the representation" of the (ष) by sh, he adds, "is its being confounded with the more genuine representation of sh in the Sanskrit cerebral, and in our "shore" "shun." The third assumption is that the Persian (ش) is not a cerebral; and therefore cannot be represented by the same symbol which stands for a Sanskrit cerebral. The fact, however, is that the Sanskrit (ष,) the Persian (ش,) and the English sh are all cerebrals, and exactly alike in sound, and therefore they are the best representatives of each other. Nor is this opinion peculiar to myself. If Bábu Śivaprasád will refer to European orientalists he will find that Wilkins, Jones, Wilson, Schlegel, Humboldt, Burnouf, Lassen, Pott, Brockhaus, Weber, Roth, Böhtlingk, Rawlinson, Trevelyan, Shakespear, Forbes, Max Müller, Ewald, Eli Smith, and a host of others use the sh for both (ष) and (ش). Halhed and Gilchrist are the only two men who have used sh for (ष,) but they have used the same letters for (श,) and therefore their opinion, not of much value at any time, can be of little avail in this instance. Bábu Śivaprasád may feel the change proposed by him "urgently" wanted, but in demanding it he has placed himself in opposition to the scholars named above, who think it neither proper nor expedient.

Bábu Śivaprasád accounts for the use of w for (و) by Bengali inability to pronounce the letter (व) (v). He says "as the Bengalies cannot pronounce (अ) (a) they cannot pronounce (व) and (و) *** and the English finding the Bengali pronunciation of (व) and (و) so closely coming up to their (w) at once began to use (w) promiscuously with (v) for (व) and (و)." This as a theory is ingenious enough, but it has, I am sorry to say, no substratum of truth to support it. The Sanskrit (व) (v) began, on the one hand, to harden into (ब) (B) and, on the other, to soften into u and o, and sometimes melted away altogether, leaving occasionally only a trace on its nearest neighbour, at a very early period in Indian history, and in places far away from Bengal. Nineteen hundred years ago a grammarian laid down a rule that in the vernacular of Benares, Magadha &c. the letter V optionally changed to B (वा वा) , and at his time, we find the Sanskrit words *dvara* (द्वार) changed to *duára* (दुआर) *dvitiya* (द्वितीय) to *duia* (दुइअ) *dvidhákrita* (द्वियाकृत) to *dohâia* (दोहाइअ) *Ísvara* (ईश्वर to Issara (इस्सर) and dhvaja (ध्वज) to dhao (धओ) in the same vernacular. These shew most clearly that the mutability of the letter V is due to some inherent peculiarity of its own, and not to any awkwardness of Bengali pronunciation. As a matter of fact, the Bengali organs of speech are more delicately formed, and are capable of producing a greater variety of nice shades of sounds, than any other in India, and, though as a Kanaujite by descent, I am sorry to admit it, it cannot be denied that the Hindus of Benares, Oudh, Agra and Delhi, have much more extensively corrupted the Sanskrit elements of the Indian vernaculars than the Bengalies. Least of all are they chargeable with the corruption of v or (و) into w.

Even in Sanskrit v when following a consonant has a very soft sound, considerably nearer that of w than of v, and in Hindui under the same circumstance it is sounded exactly like that letter. I am willing to submit to the dictum of Bábu Śivaprasád that (व) and (و) "have nothing to do with" w, but I cannot divest myself of the idea that were he to pronounce Ísvar or Dvárká with the full sound of v he would not be intelligible even to his own left rib. In the same way were he to pronounce the (نوروز) of Akbar as if written *navrozah* few Muhammadans would understand what he meant. The tendency of the Muhammadans throughout India is to soften their (و) into w, and not to harden it into a perfect v (و) and hence it is that Captain Holroyd at Lahore has adopted w for (و) in his scheme of romanizing. It is remarkable, however, that in the Tables published in the North West *Gazette* the v alone occurs for (و) and not w, and Bábu Śivaprasád has therefore created his giant to destroy it.

As regards the inability of the Bengalies to pronounce the letter (अ) I can only say that Bábu Śivaprasád is labouring under a huge mistake. No nation in India pronounce that letter more correctly than they do.

I have myself no objection to the use, suggested by Bábu Śivaprasád, of q instead of k for (ق,) as it obviates the necessity of using a diacritical mark, which I dislike; but I cannot help reminding him that since he accepts k to be the symbol of (क,) and does not deny (ق) to be only a guttural form of that letter, analogy would suggest that a modified k would be the most appropriate symbol for it.

In his concluding paragraph Bábu Śivaprasád comments on certain misprints in the Tables published in the *Gazette*, with which I have nothing to do, but I am surprised to find him say that "in the third list (Persian alphabet,) no dot or any diacritical mark has been used throughout except for (آ) and (ص)." In the copy of the *Gazette* now before me there are thirteen letters with diacritical marks.

I remain Sir

Yours faithfully

MANIKTOLLAH,
*Calcutta 20th Sept.* 1868. } RAJENDRALALA MITRA.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

# काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

# THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 30. Benares November 2nd, 1868. Vol. III.


## ॥ ईश्वरप्रत्यभिज्ञासूत्रविमर्शिन्याः ॥

क्रियाधिकारे तृतीयाह्निकस्य पूर्वाङ्कप्रक्रान्तस्य शेषांशो ऽवशिष्टान्तिमांशं चतुर्थमाह्निकं च ।

नन्वेवंभूतो यद्ययं प्रमाता तत्रैव तर्हि प्रमाणोपन्यासे प्रयतनीयं, न प्रमेये, यदाह "प्रधाने हि यत्नः फलवानिति" तदेतदाशङ्क्य प्रथमोपक्षिप्तमेव प्रमेयं स्मारयत्याचार्यः । तथाहि ।

"अजडात्मा निषेधं वा सिद्धिं वा विदधीत कः"

इति । यद् वस्तु, तदेवेदानीं ज्ञाते प्रमाणस्वरूपे परमेश्वरस्वरूपे च निर्वाहणार्हमेवंभूतं हि प्रमाणं, तदेवंभूते हि भगवति कथं क्रमतामिति, तदेतत् स्फुटयितुमाह ।

(१३) विश्ववैचित्र्यचित्रस्य समभित्तितलोपमे ।
विरुद्धाभावसंस्पर्शे परमार्थसतीश्वरे ॥
प्रमातरि पुराणे तु सर्वदा भातविग्रहे ।
किं प्रमाणं नवाभासः सर्वप्रमितिभागिनि ॥

*परिमितप्रमातृलग्नो नवनव आभासः प्रमेयोन्मुखः प्रमाणमित्युक्तं, तत्र प्रकाशवपुषि † प्रकाशमात्रस्वभावे पूर्वसिद्धे ... प्रमाणस्योपयोगः सम्भावना वा,तथा च पूर्वसिद्धे प्रमातरि सति तल्लग्नप्रकाशान्तर्भूतविमर्शमयीमभूतपूर्वां ‡ प्रमेयस्य सिद्धिं वितरति प्रमाणं, * प्रमातुश्चादिसिद्धस्य किं लग्ना सिद्धिरस्तु, विश्ववैचित्र्यं हि तत्र परमेश्वरे प्रकाशैकात्मनि सति भाति, यथा चित्रं भित्तौ, यदि हि नीलपीतादिकं पृथगेव परामृश्यते, तदा स्वात्मविश्रान्तेषु तेषु तथैवान्योन्यविषये जडान्धबधिरकल्पानि ज्ञानानि स्वविषयमात्रनिष्ठितानि विकल्पाश्च तदनुसारेण भवन्तस्तथैवेति चित्रमिदमिति कथंकारं प्रतिपत्तिः । एकत्र तु निम्नोन्नतादिरहिते भित्तितले रेखाविभक्तनिम्नोन्नतादिविभागजुषि गम्भीरनाभिरुन्नतस्तनीयमिति चित्रावभासो युक्तस्तद्वदेकप्रकाशभित्तिलग्नत्वेन वैचित्र्यात्मकभेदोपपत्तिरिति भावभेदग्रहणप्रकाशभित्तेरनपायिनीं स्वप्रकाशतामाह । तत्र स्वप्रकाशे किं प्रमाणेन, "अथोच्यते । पूर्वमस्य प्रकाशो न भवति," तर्हि स एव नास्तीति स्यात्प्रकाशमात्ररूपत्वात्तस्य, न चास्य नास्तीत्यभावेन स्पर्श उपपन्नो, यतो ह्यसावेव परमार्थतः सन्, प्रकाशस्यैवं सत्त्वात्, सतश्चासद्रूपत्वायोगात्, "अथोच्यते ईश्वरता तस्य अप्रमिता प्रमास्यते" तदपि न, यतो ह्यसौ प्रमातृत्वेन चेन्न चकास्यात्कस्यायमुद्भ्रमः, चकास्ति चेत्तर्हि प्रमातृतैवेश्वरता, तदाह"श्वरे प्रमातरि सर्वदा भातविग्रह इति" विशेषेण गृह्यत इति विग्रहो ऽसाधारणं स्वरूपमत एव स्वतन्त्रप्रकाशरूपत्वाद-

* परिच्छिन्नेत्यर्थः ।

† प्रकाशवपुषीत्यस्यैव विवृतिः प्रकाशमात्रस्वभाव इति ।

‡ अत एवानधिगताबाधितार्थविषयकं ज्ञानं प्रमा, तज्जनकं प्रमाणम् इत्युदयनाचार्याः । यत्र ज्ञाने सजातीयज्ञानोत्तरत्वनियमस्तद्भिन्नत्वमनधिगतार्थविषयकत्वम् । नैतदीश्वरज्ञाने संभवति ।

* ननु यथा भगवतः पूर्वसिद्धत्वात् प्रमाणं न क्रमेतेत्युद्भाव्यते, एवं विश्वस्मिन्नपि तत् कथं क्रमताम्, सर्वोऽपि भावराशिः प्रकाशान्तर्निमग्न इति पूर्वप्रदर्शितदिशा भगवत इव विश्वस्यापि पूर्वसिद्धत्वात् । मैवम् । यतः प्रकाशान्तर्निमग्नत्वे ऽपि विश्वजातस्य वह्नेर्विस्फुलिङ्ग इव ततो महाप्रकाशादहंविमर्शाख्यात् पृथक् कृतो नीलसुखादिः प्रकाशो वस्तुतस्तस्मादभिन्नोऽपि प्रमाणव्यापारेण मायामयेन विषयविषयिभावेण भेदसंबन्धेन यत् संबन्धी क्रियते, एषैव प्रमा नाम । तदेतद् भगवति न संभवितुमर्हतीति ।

भावस्पर्शायोग्ये अभावानुप्रवेशेन यः कालव्यवहारः सोत्र नास्तीति पुराणे इत्युक्तं, तत्र किं प्रमाणं, कुतः प्रयोजनात्प्रमाणं, कस्तत्र प्रमाणस्योपयोग इति, तत्र च किं प्रमाणं न किं चिदुपपत्त्या घटत इत्यर्थः । यतः प्रमाणं नामाभिनवाभासरूपं प्रमातरि प्रमितिलक्षणां विश्रान्तिं विदधत्प्रमाणं भवति, प्रमाता चाविच्छिन्नाभासः, सर्वाश्च प्रमितीः स्वात्मन्यन्तर्मुखरूपे भजते, तत्तस्मिन्कथमभिनव आभास,स्तत्प्रमितिश्च कुत्र विश्राम्यतु । तस्माद्देहप्राणपुर्यष्टकशून्यप्राय एव प्रमातरि प्रमाणमुच्यताम्, तत्रापि च वेद्यांशे यदि नाम, न तु कथंचित्संविदंशे, तत्रापि विषयोन्मुखे, तत एव संकुचितत्वादभिनवाभासे संकोचविहीनसत्यप्रमातृलग्नतापेतया कथ्यतां, स्वसंवेदनं प्रमाणम् । सौगतेनापि ममेदं ज्ञानमिति कल्पितप्रमातृलग्नमेव तदुपेत्यम्, न तु परमार्थप्रमातरि प्रमाणेन किंचित् । उक्तं च मयैव ।

यत्प्रमेयीकृतोस्मीति सर्वोप्यात्मनि लज्जते ।
कथं प्रमेयीकरणं सहतां तन्महेश्वरः ॥

"नन्वेवं यदि भगवति प्रमाणमनुपयोग्यनुपपत्ति च किमर्थं तद्विषयं शास्त्रं, तद्धि प्रमाणमेव, परार्थानुमानात्मकं हि शास्त्रम् । तत्र च प्रमाणादिषोडशपदार्थतत्त्वमयत्वमेव परमार्थः । "यत्तु सौगतैः पञ्चावयवत्वादि दूष्यते" तदाग्रहमात्रं, षोडशसु हि पदार्थेषु निरूप्यमाणेषु सम्यक्प्रतिपाद्यं परः प्रतिपद्यते, हिताहितप्राप्तिपरिहारयोरित्यादिना च यत्नेन परस्य किं प्रयोजनं तद्धि परस्य प्रतिपत्त्यै, सा च परार्थानुमाना,त्तत्र च प्रतिज्ञादेरुपयोग इति तत्परिपूर्णपरप्रतिपत्तिकारि परमार्थतः सकलमेव शास्त्रं परार्थानुमानमागमव्यतिरिक्तं न्यायनिर्माणवेधसा ऽक्षपादेन * निरूपितमिति" । अत्रापि पूर्वोक्तमेव † "किं तु मोहवशा"दिति स्मारयितुमाह ।

(१४) अप्रवर्त्तितपूर्वो ऽत्र केवलं मूढतावशात् ।
शक्तिप्रकाशेनेशादिव्यवहारः प्रवर्त्त्यते ॥

इह परमेश्वरस्येदमेव परं स्वातन्त्र्यं यदस्मादृशप्रख्यपशुदशाविशेषासम्भाव्यमानातिदुष्करवस्तुसंपादनं नाम, इतश्च किमतिदुष्करं भविष्यति, यत्प्रकाशात्मन्यखण्डिततादृूप्ये एव प्रकाशमाने प्रकाशननिषेधावभासः प्रकाशमानः । तस्मात्परमेश्वरस्येदं तत्परं स्वातन्त्र्यं यत्तथावभासनं पशुरूपतावभासनं नाम ग्राहकांशसमुत्थानं तद्द्वारेण च ग्राह्योल्लासनमपि । सैषा भगवतो मायाशक्तिरुच्यते । यथोक्तं "मायाविमोहिनीनामेति" । तदेवंभूतान्मायाशक्तिरूपात्स्वातन्त्र्याद्या मूढता विनष्टपूर्णचेतनता स्वात्मवर्त्तिन इच्छास्पन्दोदयस्फुटस्फुरितविश्वभावनिर्भरतात्मनः पूर्णत्वस्य स्मृत्यादिशक्त्यात्मनः स्वातन्त्र्यस्य देशकालसंकोचवैकल्यादयत्नसिद्धवैभवनित्यताधर्मस्य च प्रकाशमानस्यापि यदप्रकाशमानतया ऽभिमननं तस्या वशात्सामर्थ्यात् । पूर्वं यो न प्रवर्तितः समनन्तरश्लोकद्वयोक्तस्वरूपे प्रमातरि भगवति ईश्वरत्वादिना उक्तेनैव पूर्णत्वादिना व्यवहारो यः खल्वहमिति भाति स पूर्णः विभुः स्वतन्त्रो नित्य इत्येवमादिरूपः तं प्रवर्तयन्तु व्यवहारं लोका इत्येतेन शक्तीनामिच्छाज्ञानक्रियाणां प्रकाशकेन प्रत्यभिज्ञारूपेण व्यवहारसाधनपरार्थानुमानात्मना शास्त्रेण तं व्यवहारं प्रवर्त्तयतां तत्समर्थाचरणं क्रियते । प्रवर्त्त्यते इति द्वौ णिचौ, केवलमिति, न तु किं चिदपूर्वं क्रियते, नापि तत्त्वतो ऽप्रकाशमानं प्रकाश्यते, प्रकाशमान एव यन्न प्रकाशत इत्यभिमननं तदपसार्यते, * तदपसरणमेव हि परमेश्वरतालाभो मुक्ति,स्तदनपसरणमेव संसारः, अभिमननमात्रसारं ह्येतद् द्वयम्, † उभयमपि चेदं भगवद्विजृम्भितमेव । एतदुक्तं भवति । यथा ‡ भीतस्य भासमाने एवात्मन्यपहारितोहमिति मोहान्मन्यमानस्य मोहोपसार्यते, कः खलु त्वं यस्येदृशं वस्त्रं मुखमाकृशमिति चेत्य तदस्ति भवत इति पुनःपुनरभिदधता न चास्यापूर्वं किंचन रचितं, तथा पशुलोकस्य भासमान एवात्मनि नाहमीश्वर इत्यादिमोहादभिमन्वतो मोहो ऽपोह्यते, योहि ज्ञानक्रियास्वातन्त्र्ययुक्तः स ईश्वरो, यथा सिद्धान्तपुराणादिषु प्रसिद्धः, तथा च त्वमिति, यदि वा यस्मिन्यदायत्तं स तत्रेश्वरो, राजेव स्वमण्डले, तथा च त्वयि विश्वमितीश्वरताव्यवहारो नान्यनिमित्तक इति व्याप्तिः, यत्खलु यल्लग्नं भाति तत्तेन पूर्णं, निधानमिव मणिभिः, त्वल्लग्नं च विश्वमिति, यस्य यदन्तर्वर्ति भाति स तावति व्यापकः, समुद्र इव मणिषु, त्वयि च संविद्रूपेधरादिसदाशिवान्तं शास्त्रप्रक्रियोक्तं विश्वमिति, यस्मिन्स्थिते यदुदेति लीयते च तत्पूर्वापरभागव्यापि, यथा भूमावङ्कुरः, तथा च त्वयि प्रकाशे विश्वमिति । एवमन्येपि धर्माः सहस्रशोप्यागमादिसिद्धा योज्याः । तदेवं व्यपोहिते व्यामोहे स्थितेपि तत्संस्कारमात्रविधृते § शरीरादावनात्म-

---

* गौतमेन

† किं तु मोहवशादस्मिन् दृष्टे ऽप्यनुपलक्षिते ।
शक्त्याविष्करणेनेयं प्रत्यभिज्ञोपदर्श्यते ॥

* निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवदिति पातञ्जलसूत्रेण तद्भाष्यवार्त्तिकाभ्यां च स्फुटमेतदेव प्रतिपाद्यते । ज्ञानप्रक्रियावैलक्षण्यादृते न ततो ऽत्र किमपि वैलक्षण्यं लक्ष्यताम् ।

† मुक्तिसंसाररूपम् ।

‡ भूतग्रस्तस्य ।

§ आह चेश्वरकृष्णः ।

सम्यग् ज्ञानाधिगमाद् धर्मादीनामकारणप्राप्तौ ।
तिष्ठति संस्कारवशाच्चक्रभ्रमिवद्धृतशरीरः ॥

इति ।

ताभिमानपुरःसरे एवात्मताभिमाने घटादौ च प्रकाशमान एवानात्मताभिमाने ज्ञातेन्द्रजालतत्त्वस्य पश्यतोपीन्द्रजालं यथा न तत्त्वतो व्यामोहः, तथा प्रत्यभिज्ञातात्मस्वरूपस्य ततो निवृत्ते प्रयाणप्रापितपर्यन्ते देहे परमेश्वरतैव, अभ्यासभावनाबलेन तु शिवशासनोपदिष्टेन देहघटादावेव परमेश्वरतासमावेशमभिनिविश्य पश्यत इहैव शरीरे पारमेश्वर्यांशधर्मोद्गमः, न तु वस्तुतः पूर्णता, देहत्वस्यैव संकोचप्राणस्य गलने यथास्थितविश्वात्मकता * पत्तेः। यस्य तु व्यवहारसाधने हेतुकलापेप्यसिद्धताभिमानस्तस्य तत्रापि व्यवहारसाधनैरेव व्यामोहोपसार्यः†। यस्य तु सर्वथा नापसरति तत्रेश्वरशक्तिबलान्मूढतैव। तस्यापि कर्णपथगमनात्संस्कारपाकेनावश्यं कदाचिद्भविष्यत्येव लाभः ‡। तदेवं कर्तरीत्यादिश्लोकद्वयेन यदुक्तं तदेव विश्ववैचित्र्येत्यादिश्लोकत्रयेणोपस्कृत्य पुनर्निरूपितम्। एवंभूतं तावत्प्रमाणं तदेवंभूते भगवति कथमुपपद्यतां, ततश्च युक्तमुक्तं शास्त्रादाविति भङ्ग्यन्तरेणेदानीं तदेव निर्वाहितमिति शिवम् ॥ १७ ॥

॥ आदितः सूत्रश्लोकाः १२० व्याख्याताः ॥

इति श्रीमदाचार्याभिनवगुप्तविरचितायामीश्वरप्रत्यभिज्ञासूत्रविमर्शिन्यां क्रियाधिकारे मानतत्फलमेयनिरूपणं तृतीयमाह्निकम् ॥ ३ ॥

॥ इत्येकादशमाह्निकम् ॥

---

॥ श्रीः ॥

भावानाभासयन्कर्ता निर्मले स्वात्मदर्पणे ।
कार्यकारणभावं च यश्चित्रं तं स्तुमः शिवम् ॥

क्रियाशक्तिस्फारप्रायसंबन्धाभिधानप्रसङ्गाज्ज्ञाप्यज्ञापकभावस्य तत्त्वं प्रसाध्य कार्यकारणभावस्य तत्त्वं प्रसाधयितुं श्लोकैकविंशत्या ऽऽन्हिकान्तरमारभ्यते। "एष चे"त्यादि "एवमिच्छैव हेतुता कर्तृता क्रिये"त्यन्तं, तत्र श्लोकेन स्वमते कर्तृकर्मभाव एव कार्यकारणभाव इत्युपक्षिप्यते, ततः श्लोकत्रयेण जडस्य कारणत्वं पराक्रियते, ततः श्लोकषट्केन चेतनस्यैव कर्तृतारूपा कारणता प्रसाध्यते, ततः प्रसङ्गादनुमाने नियतिशक्तिरवश्योपजीव्येति श्लोकत्रयेणोच्यते, सौगतोक्तकार्यकारणभावपरमार्थो ऽप्यस्मत्पक्षमेवावलम्बते नोचेन्न किं चिदिति त्रिभिः श्लोकैः, सांख्योपदर्शितो ऽपि कार्यकारणभावो नोपपद्यते यद्यस्मदुक्तं चेतनस्य कर्तृत्वं नाङ्गीक्रियत इति त्रिभिः, चेतनस्याप्यनीश्वरतायां नैतद्घटत इति द्वाभ्यामिति संक्षेपार्थः ।

ग्रन्थार्थस्तु व्याख्यायते ॥

एवं क्रियाशक्तिमुखेन प्रमात्रेकरूपतां भगवति व्यवहर्तव्यां प्रसाध्य कर्तृरूपतापि तत एवायत्नसिद्धेति दर्शयितुमाह ।

(१) एष चानन्तशक्तित्वादेवमाभासयत्यमून् ।
भावानिच्छावशादेषा क्रिया निर्मातृता ऽस्य सा ॥

चोवधारणे, एष एव पुराणः प्रमाता ऽमून् भावानाभासितपूर्वान् आभासमानान् आभासयति अविच्छिन्नेन प्रबन्धेन कथमिच्छाया ईशितुरभिन्नाया अविकल्परूपाया अक्रमाया वशेन सामर्थ्येन, कुत्रास्य ते भावाः स्थिता, आह, अनन्तशक्तित्वादिति, विश्वे हि भावास्तस्यैव शक्तिरूपेण स्वरूपात्मत्वेन स्थिता इत्युक्तं "स्वामिनश्चात्मसंस्थस्ये"त्यत्र । यदेतदाभासनं या ऽसाविच्छा सा क्रिया ऽस्य भगवतो निर्मातृत्वम् ॥

ननु बीजादङ्कुर उद्भवन्दृश्यते, न चात्र कश्चिच्चेतनो ऽनुप्रविशन्दृष्टस्तत्कथमेतदुक्तमित्याशङ्क्याह ।

(२) जडस्य तु न सा शक्तिस्सत्ता यदसतस्सतः ।
कर्तृकर्मत्वतत्त्वैव कार्यकारणता ततः ॥

जडस्य बीजस्यैवंभूतं सामर्थ्यं नास्ति, यदसद्रूपं सद्रूपं वा ऽङ्कुरं परिदृश्यमानसत्तावन्तं करोति । बीजादङ्कुरो जायत इति नाङ्कुरस्य महिमा, असत्वात्, अङ्कुरो जायत इति च महिमा कथं बीजस्य, ततो ऽङ्कुरादन्यत्वात्, यत एवं तस्मात्कार्यं क्रियाशक्त्या ऽवभास्यमानं कर्मैवेति * कृत्येनैवाविष्कृतम् । कार्यते ऽनेन कर्त्ता तत्समर्थाचरणेनेति कारणमपि कर्तरि चेतने विश्राम्यति । असतः सत इत्यसद्रूपस्य सत इत्यर्थः । वार्थो वात्र गर्भीकृतः, असतो ऽङ्कुरस्य सतो वा बीजस्येति, अङ्कुरस्य सतो ऽसतो वेत्येवं वा ॥

---

* प्राप्तेः

† भवति चागमः ।

निष्कम्प आत्मसंवित्तौ जीवन्मुक्तो ऽभिधीयते ।
तत्त्वे विकल्पमानस्तु पिण्डपाताच्छिवं व्रजेत् ॥

इति ।

‡ स्वरूपस्य ।

* कृत्यप्रत्ययेन ण्यता ।

"नन्वेतच्चेतने ऽपि तुल्यम्, तथाहि, यदि सन्नेवाङ्कुरस्तर्हि कृतं चेतनेन, अथासंस्तर्हि जायत इत्येवं महिमा तस्यासत्त्वादेव न संभवितुमर्हति, चेतनस्येति चेत्, तस्यापि बीजवदङ्कुरादन्यत्वादेव नेति चेत्" न, सकलविश्वस्य चेतनान्तर्भुडितत्वनिरूपणेन दत्तोत्तरत्वात् । तथा च सूत्राणि ।

चिदात्मैव हि देवो ऽन्तः स्थितमिच्छावशाद् बहिः ।
योगीव निरुपादानमर्थजातं प्रकाशयेत् ॥

इत्यादीनि ।

* ननु जडस्य कथमेषा शक्तिर्न भवतीत्याह ।

(३) यदसत्तदसद्युक्ता नासतः सत्स्वरूपता ।
सतो ऽपि न पुनः सत्ता लाभेनार्थः ।

सद्वा कार्यमसद्वा सम्भाव्यते उभयात्मकमनुभयात्मकमनिर्वाच्यमिति तु स्ववाचैव विरुध्यते, तत्किमनेन, यद्यसन् घटस्तर्हि तस्यासद्रूपतैव परमार्थ इति कथं स्वरूपविरुद्धं सत्त्वमभ्युपगच्छेत्, नहि पादपतनशतैरपि नीलमात्मनि पीतिमानं मृष्यते, अथ सन्नेव घटस्तर्हि किमन्यदुपयाच्यते दण्डचक्रसूत्रात्, अभिव्यक्तिविषयत्वस्फुटत्वादयो ऽपि सदसद्रूपतया चिन्त्याः † ॥

नन्वेवं तूष्णीमास्यतां नैतदपि युक्तमित्याह ।

(४) अथ चोच्यते ॥
कार्यकारणतालोके ‡

तदवश्यसमर्थो ऽयमर्थ इति यावत् ॥

ततश्चेत्थमुपपद्यत इति दर्शयति ।

(५) सान्तर्विपरिवर्तिनः ।
उभयेन्द्रियवेद्यत्वं तस्य कस्यापि शक्तितः ॥

कुम्भकारहृदये ऽन्तर्मनोगोचरत्वात्पूर्वमपि स्वसंविदेकात्मतया विचित्रत्वेन विश्वस्य भेदाभेदात्मना परिवर्तमानस्य स्पन्दनेन स्फुरतो यदन्तःकरणबहिष्करणद्वयवेद्यत्वमाभास्यते एषैव सा कार्यकारणता, उभयग्रहणमुपलक्षणम् । यस्य यावति पूर्णार्थक्रियासमाप्तिरिति यावत् । सुखादीनामन्तःकरणैकवेद्यतापादानमेव निर्माणम् । न च कुम्भकारे प्राणपुर्यष्टकबुद्धिशून्यदेहप्राये तदेतत्स्थितं, तस्यापि जडत्वात् । ततः संविदेव विश्वमात्मनि भासयति, शक्तिवैचित्र्यात्, तस्य कस्यापीति पूर्वमुक्तस्याचिन्त्यापर्यनुयोज्यमहिम्न इत्यर्थः । न च वाच्यमुभयेन्द्रियवेद्यत्वमपि सदसद्वेति, यतो ऽयमत्र परमार्थः, यथा दर्पणान्तः कुम्भकारनिर्वर्त्यमानघटादिप्रतिबिम्बे दर्पणस्यैव तथावभासनमहिमा, तथा स्वप्नदर्शने संविदस्तथापि तन्महिम्नैव एतेनेदं बहिः स्फुटरूपं क्रियत इत्यभिमान उल्लसति' एवं संविन्महिम्ना कुम्भकृति दण्डचक्रादौ घटे ऽवस्थिते तन्महिम्नैवाभिमानो जायते, यथा मयेदं कृतमनेनेदंकृतं मम हृदये स्फुरितमस्य हृदये स्फुरितमिति । तत्र जडस्य मृदादेर्दूरापेतो ऽभिमान इति संवित्स्वभावे कर्तृत्वं व्यवस्थाप्यते । "ननु भावरूपमेवेत्थं भास्यतां किं द्वयेन्द्रियवेद्यत्वेन" उक्तमत्र स्फुटमर्थक्रियाक्षमं रूपमनेनोक्तमिति को विरोधः ॥

अनेन च विचारेण प्रकृतमपि क्रियास्वरूपं सिद्धं भवतीति दर्शयति ।

(६) एवमेका क्रिया सैषा सक्रमान्तर्बहिः स्थितिः ।
एकस्यैवोभयाकारसहिष्णोरुपपादिता ॥

सैषेति, यस्याः स्वरूपत आश्रयतश्च नोपपद्यत इत्युपालम्भः कृतः, सा उपपत्त्या स्थापिता । यतः संविद्रूपादान्तरात्प्रभृति इन्द्रियगोचरतया बहिष्पर्यन्ततया स्थितिराभासरूपा तत एव वेद्यात्मककर्मालिङ्गनेन सक्रमता तावदुपपन्ना कर्तृकर्मैकाश्रयतादात्म्याच्चैका सचैक आश्रयः संविद्रूपत्वेन स्वच्छत्वस्वतन्त्राभ्यामुभयमप्यन्तर्बहीरूपं सहत इति ॥

ननु भवतु घटादावेवं यत्र तु बीजाङ्कुरादौ चेतनानुप्रवेशो न दृश्यते तत्र कथं * बीजस्यैवाङ्कुरः कार्यो न भवतीत्याशङ्क्याह ।

(७) बहिस्तस्यैव तत्कार्यं यदन्तर्यदपेक्षया ।
प्रमात्रपेक्षया चोक्ता द्वयी बाह्यान्तरस्थितिः ॥
मातैव कारणं तेन स चाभासद्वयस्थितौ ।
कार्यस्य स्थित एवैकस्तदेकस्य क्रियोचिता ॥

अन्तराभासमानस्य तथारूपापरित्यागेनैव बहिराभासनं निर्माणं, ततश्च यद्वस्तु यमपेक्ष्यान्तरित्युक्तं तद्वस्तु तस्यैवान्तरवस्तुरूपविपरिवृत्तिमात्रस्य बहिष्करणार्हं भवति, संविद्रूपं च प्रमातारमपेक्ष्य अन्तराभासिनो भावास्तदपेक्षयैव बाह्याभासा इति तेनैव तेषां बहिष्करणावभासनं युक्तं, ततश्च प्रमातैव कारणं भवति, न जडः । ह्यर्थे चः । यस्मात्स प्रमाता कार्यस्यान्तर्बहिराभासनद्वयनिमित्ततया स्थित,स्तेन विना तदपेक्षस्याभासद्वयस्यानुपपत्तेः, तस्मादेकस्य प्रमातुरेव न तु कथं चिज्जडस्य उचिता प्रसाधितरूपा क्रिया निर्मातृता भवतीति ॥

(८) अत एवाङ्कुरे ऽपीष्टो निमित्तं परमेश्वरः ।
तदन्यस्यापि बीजादेर्हेतुता नोपपद्यते ॥

---

* जडैव प्रकृतिः कर्त्री, चेतनस्य कर्तृत्वे परिणामितापत्तेः, तथा च स्मर्यते ।

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहंकारविमूढात्मा कर्ता ऽहमिति मन्यते ॥

इति । इति कापिलास्तदनुसारी प्रत्यवतिष्ठते । नन्विति ।

† अभिव्यक्त्यादिकमपि घटादेः सदसद्वा । आद्ये पुनः कारणव्यापारवैयर्थ्यमेव । अन्त्ये च कथमसती घटादेरभिव्यक्तिः सती भवेत् । असतः सत्त्वानुपपत्तेः । तथात्वे किमपराद्धमसत एव घटादेः सत्त्वेन कणभक्षाक्षचरणोपगतेन, किमिति घटादेः सत्त्वमुपगम्यायास्यत इति भावः ।

‡ लोके हीदं कार्यमिदं कारणमिति प्रचुरं व्यवह्रियते, तत् प्रदर्शितदिशा कार्यस्य सदसद्भावविकल्पासहत्वे कथमुपपद्यत इत्यर्थः ।

* बीजमत्रोपलक्षणं कतिपयबीजावयवानां सन्निहितभूमिजलादेश्च, बीजस्य समवायिकारणत्वस्यासंभवात्, तस्यैव च वक्तव्यत्वेनाभिप्रेतत्वात्

यत एवं चेतन एव निर्माता, अत एव नैयायिकादिभिरङ्कुरादौ बुद्धिमानेव परमेश्वरो हेतुत्वेनेष्टः । "ननु तैर्निमित्तकारणता ऽस्याङ्गीकृता, क्रियाविभागादिक्रमायातपरमाणुवादिद्वारकतया समवायिकारणनिजावयवारम्भपरम्परया तु तत ईश्वरादन्यस्यापि बीजभूमिजलादेर्हेतुता कथिता" । सत्यं कथिता, सा तु नोपपद्यते, उक्तयुक्त्या जडस्य हेतुत्वायोगात् । ततश्चेश्वर एव बीजभूमिजलाभाससाहित्येनाङ्कुरात्मना भासत इतीयानत्र परमार्थः ॥

ननु परिदृष्टबीजादिव्यतिरिक्तबुद्धिमत्कारणकल्पनेन विना किमुपरुद्ध्यत इति परस्य भ्रान्तिं भिन्दन्नाह ।

(९) तथाहि कुम्भकारो ऽसावैश्वर्यैव व्यवस्थया ।
तत्तन्मृदादिसंस्कारक्रमेण जनयेद्घटम् ॥

तथाहीति निदर्शनोपक्रमेण व्याप्तिरेवंभूतैव दृष्टेति द्रढयति, जडा हेतवश्चेतनप्रेरिताः कार्यं कुर्वन्ति, मृदादयो यदि सन्निधिमात्रेण विदध्युः कुम्भकारेण किमत्र कृतम्, शिबिकस्तूपकादिपरम्परया ते जनयन्ति सा च कुम्भकारायत्तेति चेत्सिद्धं नः साध्यं, शिबिकसंपादने ऽपि ते चेतनप्रेरणामपेक्षन्त इति तज्जडकारणानां चेतनप्रेरणामन्तरेण न क्व चित्कार्यकारित्वम् । यदि हि स्यान्मृदादीनामपि स्यादित्येकान्त एषः । ततश्च यदचेतनं कार्यकारि तच्चेतनापेक्षं, मृदादय इव, तथा च बीजादीति स्वभावः । अचेतनकार्यकारित्वं हि कादाचित्कत्वात्सनिमित्तं, न चान्यदस्य निमित्तमुपपद्यते ऽनुपलम्भादिति, चेतनप्रेरणं यदि न निमित्तीकुर्याद्व्यापकविरुद्धमन्यनिमित्तकत्वं प्रसज्येत, न च युक्तं त,न्मृदादावपि तस्य प्रसङ्गादिति सिद्धा व्याप्तिः, अतश्च कुम्भकृदेव तत्रेश्वरः । तदेतदाह, ईश्वररूपा या व्यवस्था तया यः सस मृद्दण्डचक्रादीनां संस्कारः मृदो मर्दनं दण्डस्य प्रगुणत्वं चक्रस्य परिवर्तनमित्यादिस्तदारम्भो यः क्रमः शिबिकस्तूपकादिरूपः तेन घटं नियोगतो जनयति नान्यथेति, नियोगे लिङ् ।

किं च यदि न क्रुध्यते, वस्तुतः कुम्भकारो ऽपि ऐश्वर्यैव स्वतन्त्रविश्वात्मतारूपया व्यवस्थया मृदादिसंस्कारापेक्षया प्रदर्शितनियत्यभिधाननिजशक्तिविजृम्भातो घटं जनयेत्, अन्यथा ऽचेतना मृदादयः कथं कुम्भकारेच्छामनुरुध्येरन्, तन्तवो ऽपि वा घटसंपादनेच्छां किं नाश्रयेरन् । तदेतदप्युक्तमनेनैव सूत्रेण । तथाहीति ।

"नन्वेवं कुम्भकृतो नास्ति कर्तृत्वमिति समुत्सीदेद्* धर्माधर्मव्यवस्था" यदि प्रत्येषि युक्त्यागमयोस्तदेवमेव, तथापि समस्तेतरनिर्माणमध्य एवेदमपि परमेश्वरेणैव निर्मितं, यदविचलस्तस्य कुम्भकारपशोर्मिथ्याकर्तृत्वाभिमानः, प्रतिभुव इवाधमर्णताभिमानः, जडा हेतवो बीजभूमयश्चेतनप्रेरिता भवितुमर्हन्ति, कार्यारम्भकत्वात्, योयो जडः कार्यारम्भकस्सस चेतनप्रेरितः, यथा मृदादिः, तथा चैते मृदादयः कार्यारम्भकत्वाभिमानाः, यदि पुनरीश्वरस्येच्छैवेयमीदृशी मा ऽस्याभिमानो ऽयमुद्गमदिति तदा नासौ कर्ता कश्चित्, तदिदमप्युक्तं सूत्रेणैव, तथाहीति । कुम्भकारस्यापि मृदादिसंस्कारक्रमेण किं घटं जनयाम्युत न जनयामीति य एकपक्षनिश्चयाय संप्रश्नात्मा विचारः, स ईश्वरसबन्धिन एव विविधात्स्वरूपाच्छादनतत्त्वप्रकाशनरूपादवस्थानादिति, संप्रश्ने लिङ् । तस्माद्वस्तुत ईश्वर एव सर्वत्र कर्ता अहं च स एवेति न परिमिते कर्तापि तु सर्वत्र कर्तेत्येतावति सर्वथा हृदयेनावधातव्यमिति स्थितम् ॥

दृश्यते चास्य चेतनस्य स्वातन्त्र्यमेव सर्वत्र जृम्भमाणं, जडानपि यत्स्वात्मतामापादयति, न तु जडानां वस्त्वन्तराविष्करणे सामर्थ्यमिति यदुक्तं तत्सर्ववादिप्रसिद्धनिदर्शनेन द्रढयति ।

(१०) योगिनामपि मृद्बीजे विनैवेच्छावशेन तत् ।
घटादि जायते तत्तत्स्थिरस्वार्थक्रियाकरम् ॥

यदिह चेतनप्रेरितं कारणमिति प्रसिद्धं मृदादि, यच्च तदनपेक्षं बीजादि, घटादेरङ्कुरादेश्च जनकं, तदेव यदि परमार्थतः कारणं स्या,त्तत्तद्व्यतिरेकेण घटाङ्कुरादेः कथं योगीच्छामात्रेण जन्म स्यात्, अकारणत्वप्रसङ्गस्तेषां वा ऽकारणत्वापत्तेः । अथोच्यते "अन्ये एव ते घटाङ्कुरादयो मृद्बीजादिजन्याः, अन्ये एव च योगीच्छादिजन्याः, इति," तत्रापि प्रबोध्यसे, विमर्शाभेदात्तावदभेद इति पूर्वमेवोक्तं, तत्रापि योगी खल्वप्रतिहतेच्छस्तस्य चेच्छा तादृगेव घटो भवतु यो मृदादिकृतकुम्भसंभवभूयर्थक्रियाकरणचतुरवृत्तिरिति, तदेतदाह, तस्यतस्य स्थिरस्यार्थक्रियान्तरानुबन्धिनः कालान्तरानुबन्धिनश्च स्वस्यात्मीयस्यार्थक्रियाविशेषस्य करणे हेतुतच्छीलानुकूलरूपं घटादि जायते इति । "ये त्वाहुः, नोपादानं विना घटाद्युत्पत्तिर्योगी त्विच्छया परमाणून्पश्यन्संघट्टयतीति" । ते वाच्याः । यदि खल्वन्वयव्यतिरेकागमादिपरिदृष्टः कार्यकारणभावो योगिषु न विपर्येतीति हृदयमावर्जयति वः, तत्किं परमाणुग्रहेण, नो चेद्घटस्य कपालादिशरीरस्य स्वावयवाः तेषां निजंनिजं प्रसिद्धं तृणशस्तिलशो ऽप्यन्यथा भवनमसहमानं लौकिकमेव कारणमिति घटे मृद्दण्डचक्रादि देहे स्त्रीपुरुषसं-

* सुकृती स्वर्गं प्राप्नोति दुष्कृती च नरकमिति च व्यवस्था परमेश्वरस्य कर्तृत्वे न घटेत, यदि न किं चित् कुम्भकारादिना क्रियते तर्हि ज्योतिष्टोमब्रह्महत्यादिकर्मापि न केन चित् क्रियते, ऽपि तु परमेश्वरेणैव, तस्य च नित्यशुद्धबुद्धमुक्तस्वभावत्वेन स्वर्गनरकयोरसंभवाद् विधिप्रतिषेधात्मकशास्त्रस्यानर्थक्यापत्तिरिति भावः ।

एतदभ्युपगमसुखेन प्रतिक्षिपति । यदीत्यादिना ।

योगादि सर्वमपेत्यं परिदृष्टदीर्घतरकालपरिवासमिति योगी-
च्छया तु समनन्तरोदितघटदेहादिसम्भवो दुस्समर्थ एव * ।
चेतन एव तथातथा भवति भगवान्भूरिभर्गो महादेवो निय-
त्यनुवर्तनोल्लङ्घनघनतरस्वातन्त्र्य इत्यत्र पक्षे नियत्यनुवर्तिनि
लौकिके प्रसिद्धे कार्यकारणभावे स्वातन्त्र्यं तदुल्लङ्घनमाद्रिय
माणस्य तु योगिप्रायप्रसिद्धे लोकोत्तरे इति न कश्चिद्विरोधः,
इयांश्च लोक एव, परमार्थतस्तु सक्रमाक्रमरूपविश्वसृष्ट्यादि-
कृत्यपञ्चकप्रपञ्चस्वभावः प्रकाशते, चेतनो हि स्वात्मदर्पणे
भावान्प्रतिबिम्बवदाभासयतीति सिद्धान्तः यदाह पूर्वगुरुः ।

निरुपादानसंभारमभित्तावेव तन्वते ।

जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने ॥ इति ॥

ननु यदि प्रसिद्धकारणोल्लङ्घनेनापि तत्कारणजन्यकार्य-
विशेषतुल्यवृत्तान्येव कार्याणि जायन्ते, भग्नास्तर्ह्यनुमानकथाः,।
तथाहि, कथमन्यदन्यत्र नियमवद्भवेदित्याशङ्क्य प्रामाणिकतरं-
मन्यैस्तादात्म्यतदुत्पत्ती नियमनिदानमुपगते, नहि निःस्वभावं
वस्तु भवति, नापि भिन्नस्वभावं, स्वभावभेदेन भेदात्पर्यायश-
स्तत्स्वभावद्वयाभावे च निःस्वभावताप्रसङ्गात्, एवं निर्हेतुके
भिन्नहेतुके च कार्ये वाच्यम्, उभयत्रापि च हेतुकृतैव व्यवस्था
स्वहेतुत एव हि शिंशपा वृक्षस्वभावाव्यभिचारिणी जाता
स्वहेतुतश्च हुतभुग्धूमजननस्वभावः, तदिदानीं नियतप्रलम्बिनि
कार्यकारणभावे सर्वमिदं विघटेत, योगीच्छया हि शिंशपा-
प्यवृक्षस्वभावा भवेत्, धूमे तु द्विगुणं चोद्यम्, † अग्न्यादि-
सामग्री योगीच्छोद्भूता धूमं न जनयेद्योगीच्छा वा ऽनग्निकं
धूममिति न स्यादनुमाने, अस्ति च तल्लोक इत्याशङ्क्याह ।

(११) योगिनिर्माणताभावे प्रमाणान्तरनिश्चिते ।

कार्यं हेतुः स्वभावो वा ऽत एवोत्पत्तिमूलजः ॥

योगीच्छापि सर्वथा तादृशमेव न तु वृश्चिकगोमयादि-
सम्भूतवृश्चिकादिन्यायेन कथं चिद्रसवीर्यादिना भिन्नं कार्यं
जनयतीति यत्कथित,मत एवास्मादेव हेतोः कार्यं वा धूमा-
द्यग्न्यनुमाने शिंशपात्वादिस्वभावो वा वृक्षत्वाद्यनुमाने एवं
हेतुर्भवति, यदि प्रमाणान्तरेण लोकप्रसिद्ध्या योगिनिर्माणत्व-
स्याभावो निश्चितो भवति, नान्यथा । अत एवानुमाने ज-
न्मान्तराभ्यासलोकप्रसिद्ध्यादिकमवश्योपजीव्यं, "सा च श्रुता-
नुमानप्रज्ञयोर्बीजमिति च * ऋतम्भराविषयमुवाच पतञ्जलिः"।
"अन्ये च यौक्तिकाः योगिप्रत्यक्षकल्पसद्भावं समस्तग्रहणाय
कल्पितवन्तः," सांव्यवहारिके च प्रमाणे नास्माकं भरः, प्रकृतं
ह्यस्माकमीश्वरस्वरूपं तच्च स्वप्रकाशमेवा न्यप्रमेयोपरोधेपि
नोपरुध्यत इत्युक्तमसकृत् । ननु स्वभावहेतौ किमनया चि-
न्तया, आह, वृक्षत्वाव्यभिचारिण्याः शिंशपाया उत्पत्तेर्यन्मूलं
कारणं तत एव स तन्मात्रानुबन्धी स्वभावो जायत इति ।
ततश्च ।

एकसामग्र्यधीनस्य रूपादेरसतो गतिः ।

हेतुधर्मानुमानेन धूमेन्धनविकारवद् ॥

इति स्वभावहेतुर्न्यायः । "ननु च वृश्चिकादीनां कीटगो-
मयाद्यनेककारणकत्वं तावद्दृष्टं रसवीर्यादिभेदस्तु तत्रेत्यन्यदे-
तत्, तद्योगिजन्यत्वमवह्निकस्यापि धूमस्य सह्यं नाम, स्वभा-
वस्य तु कथं विपर्याससम्भावना, नहि नीलं सदेवानीलं योगी-
च्छया भवति इति कश्चित्प्रामाणिकः प्रतीयात्" उच्यते । इह
द्विविधो हि स्वभावहेतुरन्तर्लीनकार्यकारणभावस्तद्विपरीत-
श्च, वह्निमानयं पर्वतो धूमवत्त्वादिति, अनित्यो ऽयं कृतकत्वा-
दिति। तत्राद्यस्य तावत्कार्यकारणभाव एव मूलमिति किं तत्रो-
च्यते । अपरस्तु विचार्यते। यदि तावत्कृतकत्वस्य कारणायत्त-
त्वं नाम स्वभावः कथमभवनपरिच्छिन्नभवनस्वभावता नामा-
नित्यत्वं स्वभावः स्यात्, आभासभेदात्, अभेदे त्वाभासस्य
हेतुसिद्धावेव साध्यस्य सिद्धत्वात् । यदि परं व्यवहारः साध्य-
ते तरुरयं वृक्षत्वादिति न्यायेन, व्यवहारश्च ज्ञानाभिधानात्मा
कार्य एव, तत्रैव नियति शक्तिरङ्गीकृता भवता ऽपि । तस्मा-
त्सर्वेषु स्वभावहेतुष्वाभासभेदं विना व्यवहारमात्रसाधनमेव,
हेत्वाभासमयत्वादेवानधिको हि तत्र साध्याभासो, † व्यावृ-
त्तीनामेषैव वार्ता । सामान्यानामियमेव सरणिः । तस्मान्निय-
ति शक्त्या यतः शिंशपाभासवृक्षाभासयोः पूर्वनीत्या सामाना-
धिकरण्याभासो हेतुबलात्ततः स्वभावोयं हेतुहेतुमद्भावमूल

* स्पष्टमुपपादितं चैतद्योगीव निरुपादानमित्यस्य व्याख्यानावसरे तथा च योगी कुम्भं निर्मिमाणः कुम्भकार एव स्यादित्यादिना ग्रन्थसन्दर्भेण ।

† सामग्र्याः कार्योत्पत्तिव्याप्यत्वं धूमस्य वह्निव्याप्यत्वं च न घटेतेत्यर्थः । योगी यदि प्रसिद्धकारणोल्लङ्घनेन कार्यमुत्पादयेत् तर्हि विना ऽपि वह्निमुत्पादिते योगिना धूमे वर्त्तमाने ऽपि वह्नेरसत्त्वस्य संभावनाद् धूमे वह्निव्यभिचारित्वसंभावनया न तेन पामरपर्यन्तं प्रसिद्धं वह्न्यनुमानं घटेतेति भावः ।

एतच्च व्याप्यतावच्छेदकदले योगिनिर्मितेतरत्वविशेषणदानेन निराकरिष्यति ।

* निर्विचारवैशारद्ये जायमानायां योगिप्रज्ञाया ऋतंभरेति तान्त्रिकी परिभाषा । सा च शब्देनानुमानेन च जायमानं यज्ज्ञानम् (अर्थाच्छ्रवणमननदशायां यज्ज्ञानं) तद्व्यावृत्ता, शाब्दबोधस्यानुमितेश्च सामान्यविषयत्वाद् अस्याश्च निदिध्यासनजन्याया अशेषविशेषसाक्षात्काररूपत्वादिति प्रतिपादितम् ।

"ऋतंभरा तत्र प्रज्ञा ४८
सा पुनः श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात् ४९"

इति सूत्राभ्यां पतञ्जलिना । तद्भाष्ये च श्लोकः ।

आगमेनानुमानेन तथा ऽभ्यासरसेन च ।
त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तमम् ॥

इति । अत्र च पूर्वार्द्धे क्रमेण श्रवणमनननिदिध्यासनान्युक्तानि ।

† विशेषाणाम् ।

एव, तत एव सामान्येनेदमुक्तं द्रष्टव्यम् । सर्वः स्वभावहेतुरुत्पत्तिमूलज इति । आभासा एव च वस्त्विति च समर्थितं प्राक् । ततश्च शिंशपायामेकस्यामेव सृज्यमानायां शाखादिपदार्थान्तराणामसृष्टेर्वृक्षाभासस्य सामान्यात्मनः साध्यस्य नामापि नास्तीति संभाव्यत एव । यत्तु तदेकरूपं विशिष्टं वृक्षत्वं तत्खलु शिंशपात्वमेव' तच्च सिद्धमिति न साध्यं, कारणायत्तमिदमित्याभासेपि न स्यादनित्यताभासः । एवमर्थक्रियाकारित्वाभावेपि क्षणिकत्वाभासाभाव इति नियत्यपेक्षयैव सर्वे स्वभावहेतवो नान्यथेत्येकान्त एषः ॥

नन्वाभासवस्तुत्ववादैरनाभातस्याग्नेरवस्तुत्वमिति अनाभातेन कथं धूमो जन्यते, ततश्च धूमादग्नेः कारणस्य कथमनुमानमित्याशङ्क्य समर्थयितुमाह ।

(१२) भूयस्तत्तत्प्रमात्रेकवह्न्याभासादितो भवेत् ।
परोक्षादप्यधिपतेर्धूमाभासादि नूतनम् ॥
कार्यमव्यभिचार्यस्य लिङ्गम्

एकवारं तावन्महानसे प्रत्यक्षानुपलम्भबलेनाग्न्याभासधूमाभासयोः कार्यकारणभावो गृहीतः, तत्र विज्ञानवादिनो दर्शने प्रतिसंतानमन्यश्चान्यश्चाभासः इति स्वाभासयोरेव कार्यकारणता गृहीता, न तु संतानान्तरगतयो,स्तदीयवृत्तान्तस्यासंवेदनात् । ततश्चेदानीमनुमानं न भवेत् स्वसंतानगताद्धूमाभासात्क्रिमिसर्वज्ञादिप्रमातृसंतानान्तरनिष्ठस्याग्न्याभासस्येति निश्चयः । इह तु दर्शने व्याप्तिग्रहणावस्थायां यावन्तस्तद्देशसम्भाव्यमानसद्भावाः प्रमातारस्तावतामेको ऽसौ धूमाभासश्च वह्न्याभासश्च* बाह्यनये इव, तावति तेषां परमेश्वरेणैक्यं निर्मितमिति ह्युक्तं, ततः स्वपरसन्तानविशेषत्यागेन धूमाभासमात्रं वह्न्याभासमात्रस्य कार्यमिति व्याप्तौ गृहीतायां भूयो ऽपि पर्वते यो धूमाभासः सो ऽपि वह्न्याभासादेवेति व्याप्तिं स्मृत्वा अनुमिमीते अत्र पर्वते ऽग्न्याभास इति, तावति धूमाभासविशेषे प्रमात्रन्तरैः सहैकीभूय वह्न्याभाससामान्यांशे परोक्षरूपांशसहिते विशेषाभासान्तरविविक्ते प्रमात्रन्तरैस्साकमेकीभवतीति यावत् । भूय इति व्याप्तिं गृहीत्वा पुनरपि यो धूमाभास आदिग्रहणादङ्कुराभासादिर्गृह्यते सो ऽप्याभासो नूतनो ऽपूर्वो, न तु धूमजधूमवदप्रत्ययः, स चाधिपतेरसंचेत्यमानाद्वह्न्याभासाद्बीजाभासादेव वा भवेत्, तत एव जनितुं शक्नोति, नान्यतः, शकि लिङ् । स चाभासस्तेषुतेषु प्रमातृष्वेक एव, अनेकत्वे न तु युज्यत एवैतदित्याशयः । यतश्च स एको ऽधिपतिश्च वह्न्याभासो धूमकारणं, ततो धूमाभासो ऽस्येवाग्न्याभासस्याव्यभिचरितं कार्यं लिङ्गं, योगिकृतत्वाभावे निश्चिते सतीति, तस्मात्कार्यात्सो ऽनुमीयते यतः परोक्षो ऽसावधिपतित्वादेव ॥

नन्वेवं गोपालघटिकान्तरालचिरोषितनिर्गतादपिधूमाभासाद्वह्न्याभासानुमानमित्याशङ्क्याह ।

(१३) अन्यप्रमातृगात् ।
तदाभासस्तदाभासादेव त्वधिपतेः परः ॥

परो नूतनादन्यो यो धूमाभासस्स धूमाभासादेव प्रमात्रन्तरवर्तिनो ऽधिपतिरूपात्परोक्षादिति तथाभूताद्धूमाभासात्कथमकारणभूतो वह्न्याभासो ऽनुमीयतामित्यभिप्रायशेषः । कुशलाश्च लक्षयन्त्येव विवेकम् । अस्यार्थस्यानुमानिकबहुतरव्यवहारोपयोगिनो यत्नेन व्युत्पत्तिः कार्येत्याशयेन नूतनमिति यदेवसूचितं तदेव व्यवच्छेद्यद्वारेण स्फुटीकृतम् ॥

ननु चैवं धूमाभासो वह्न्याभासादित्यङ्गीकृतं चेत्तर्हि चेतनस्यैव कर्तृत्वमिति यदुक्तं तत्कथं, तथाहि, बीजे सत्यङ्कुरो भवतीति यदेतद्दृष्टं धूमाग्निवदेव तत्कथमनादरास्पदमित्याशङ्क्याह ।

(१४) अस्मिन्सतीदमस्तीति कार्यकारणतापि या ।
साप्यपेक्षाविहीनानां जडानां नोपपद्यते ॥

एक एव भावस्तावन्न कार्यकारणभावः, भावद्वयमपि च न युगपद्भावि कार्यकारणरूपं घटपटवत्, क्रमभाव्यपि ना ऽनियतक्रमं नीलपीतादिज्ञानवत्, नियतक्रमिकत्वेपि न पूर्वभावि कार्यमुत्तरकालभावि च कारणमित्येवं, नियतपूर्वभावं कारणं नियतपरभावं च कार्यमिति परस्य तावन्मतम् । तत्र स्वरूपादनधिका चेत्पूर्वता परता च तद्भावद्वयमात्रं स च स चेति, चार्थोपि वा न कश्चित्तस्याप्यपेक्षारूपत्वात्, सम इत्येव हि स्यात्, अथ पूर्वता नाम प्रयोजकसत्ताकत्वं, परता च प्रयोज्यसत्ताकत्वं, तर्हि बीजस्याङ्कुरप्रयोक्त्री सत्ता ऽङ्कुरविश्रान्ता अङ्कुरान्तर्भावमात्मन्यानयति, अङ्कुराभावे प्रयोक्तृत्वमात्रं स्यात्तदपि न किं चिदन्यापेक्षत्वात्तस्य, एवं प्रयोज्यसत्ताकेपि वक्तव्यम् । केवलं भावमात्रमेव कार्यकारणतेत्यादयः पक्षा नोपपन्नाः । यावदस्मिन्सतीति भूतविभक्त्या सप्तम्या प्रयोजकसत्ताकत्वमिदमस्तीति भाव्यमानविभक्त्या प्रयोज्यसत्ताकत्वमित्येवंरूपापि या कार्यकारणता सापि नोपपद्यते, प्रमाणेन न संभवति जडानाम् अन्योन्यापेक्षा ह्यत्र जीवितं, सा च जडानां न संभवति ॥

कथमिति चेदुच्यते ।

(१५) नहि स्वात्मैकनिष्ठानामनुसंधानवर्जिनाम् ।
सदसत्तापदेप्येष सप्तम्यर्थः प्रकल्प्यते ॥

* नैयायिकमते ।

जडाः किलान्योन्यरूपमनुसंधातुमप्रभविष्णवः, अन्योन्यानुसंधानरूपत्वं जडविरुद्धेन व्याप्तं चैतन्येन, अनुसंधानं चापेक्षा चैतन्यस्वरूपमेव, अन्यत्र तु सोपचरिता, एतोनुसंधानविहीनत्वाज्जडो भावः स्वात्ममात्रविश्रान्तिसंतोषसंकुचितशरीरः कथं परत्र प्रसरेत् । ततश्च यदि बीजं सदङ्कुरो ऽस,त्तथापि त्रिपर्ययः, उभयमपि वा सद्यदि वा ऽस,दथापि एकं सोपाख्यमन्यन्निरुपाख्यं, द्वयमपि वा * सोपाख्यं निरुपाख्यं वा, तथापि प्रातिपदिकार्थमात्रे धर्मान्तरेण समुच्चयादिनाप्यनालिङ्गितमवतिष्ठते, तस्य समस्तस्यापेक्षारूपत्वेन चैतन्यविश्रान्तत्वात् ॥

यस्मादचेतनेषु नापेक्षोपपद्यते ।

(१६) अत एव विभक्त्यर्थः प्रमात्रेकसमाश्रयः ।

क्रियाकारकभावाख्यो युक्तो भावसमन्वयः ॥

सप्तमीरूपाया विभक्तेरन्यस्या अपि वा योर्थः क्रियाकारकभावलक्षणः स एव तावद्भावानां समन्वयः, नान्यः शुष्कः कश्चित्, स च यदि स्वतन्त्रे चिद्रूपे भावद्वयं विश्राम्यति, तदोपपद्यते, अन्यथा तु न कथं चित् तथाहि, विकल्पेनाप्यसो व्यवह्रियमाणो न वस्तुनिष्ठतयोपपद्यते, वस्त्वनुसरणप्राणो हि विकल्पोनुभवानुसारितयैव भवति, सा चेह नास्ति, वस्तुप्रभवत्वेन वस्त्वनुसारी ह्यनुभावो, वस्तु च स्वात्मनिष्ठमित्युक्तम् । तस्माद्बीजे सत्यङ्कुरो वह्नौ सति धूम इति च स्वतन्त्रचिद्रूपप्रमातृविश्रान्तत्वे सर्वमेतद्युज्यते नान्यथेति ॥

शेष उत्तराङ्के

---

## ॥ अथ बालरामायणाख्यनाटकस्य ॥

॥ षष्ठोऽङ्कः ॥

अतः परं निर्दोषदशरथो भविष्यति ।

ततः प्रविशतः शूर्पणखामायामयौ ।

शूर्पणखा । अज्ज अहिण्णादं तए मादामहस्स तक्कालमन्तिदं जधा किल रामे सुबद्धवेरा सुप्पणहा कुलउत्तओ माआमओ ता दुवेवि एदे कज्जसिद्धीए कारणेत्ति णिउत्ता † ।

मायामयः । बुद्धिप्रकर्षं प्रति किमुपवर्ण्यंते तत्रभवतो माल्यवतः । किमभीष्टं चन्द्रमसः कुमुद्वतीवल्लभस्येति ।

नीतितन्त्रे द्वयं दृष्टं सिद्धये कृत्यवस्तुनः ।
समानः कार्ययोगश्च प्रभुशक्तिश्च निश्चला ॥ १ ॥

तदेहि दशाननमातामहमेवोपतिष्ठावहे ।

शूर्पणखा । एवं करह्म * । परिक्रम्यावलोकितकेन ।

मायामयः ।

नैर्ऋताधिपकार्याणामुपायोपायकर्मणि ।
आर्यो यन्माल्यवानास्तेऽव्यस्तलक्षेण चक्षुषा ॥ २ ॥

ततः प्रविशति माल्यवान् ।

माल्यवान् । स्मृतिमभिनीय शूर्पणखानिकारदर्शनसमुत्तेजितोऽपि दशकण्ठो रघुराजधानीयात्रातो निवर्तितस्तावदिदमुपदिश्य चारकैर्यद्दुत देवस्य वैदेह्या संदिष्टं यथा ।

स्वयं मया प्रेमपरीक्षणाय
प्रवर्तितः स्वाकृतियन्त्रयोगः ।
यथाहमेवागणितैरहोभि-
र्दशाननान्तं नियतं प्रवत्स्ये ॥ ३ ॥

विचिन्त्य ।

इत्थं मिथ्या विप्रलब्धोऽपि देव-
स्त्यक्तवाशंवे सोदरीवैकृतेऽपि ।
जातः सीतासङ्गमायत्तचित्तो
न्यक्कृत्यान्यज्जृम्भते मन्मथाज्ञा ॥ ४ ॥

स्मृतिनाटितकेन । न जाने किं वृत्तं वा कैकेयीदशरथयोः । उपसर्पितकेन ।

मायामयः । जयतिजयत्यार्यः ।

शूर्पणखा । जअदुजअदु कणिट्ठमादामहो † ।

माल्यवान् । अथ तत्र किं वृत्तम् ।

मायामयः । यथादिष्टमार्येण ।

माल्यवान् । सहर्षं तद्विस्तारतः कथ्यताम् ।

मायामयः । अथैकदा दयितस्नेहमय्या तया सममसुरानीकविजयाय पूरितसुहृन्मनोरथे दशरथे त्रिविष्टपतिलकभूतं पुरुहूतं प्रभाववति समुपस्थितवति तद्रूपधारिणौ कुवलयदलाभिरामं रामं सपदि छलयितुमयोध्यां शूर्पणखाऽहं च प्राप्तवन्तौ । विहितजनरञ्जनेन वृन्दारकबन्दिव्यञ्जनेन गीतसंस्मृतसहचरेण निशाचरेण ।

दैत्यग्रामं रणपरिगमे कुर्वता नामशेषं
येन न्यस्ता दिशिदिशि यशःकन्दलीनां प्ररोहाः ।
हासज्योत्स्नां सुरपतिवधूवक्त्रचन्द्राय दत्त्वा
सार्द्धं दारैर्दशरथनृपः स्वां पुरीं सोऽयमेति ॥ ५ ॥

माल्यवान् । ततस्ततः ।

---

* उपाख्या ऽभिधानसंबन्धः तया सहवर्त्तमानं सोपाख्यं, नामरूपयुतम्, अर्थक्रियाकारित्वलक्षणवर्तमानावस्था ऽवस्थितमिति यावत् । तद्भिन्नं निरुपाख्यम् ।

† आर्य अभिज्ञातं त्वया मातामहस्य तत्कालमन्त्रितं यथा किल रामे सुबद्धवैरा शूर्पणखा कुलपुत्रको मायामयो द्वावप्येतौ कार्यसिद्धेः कारणे इति नियुक्तौ ।

* एवं कुर्मः ।

† जयतुजयतु कनिष्ठमातामहः ।

शूर्पणखा । तदो तस्स वअणप्पसरणमाअण्णिअ सव्वदो वज्जन्तणिरवज्जतुरं गाअन्तगन्धव्वजणचुम्बिअणच्चन्तणटीसत्थं उब्भिज्जन्तविअडद्धअवडाआयुगं तोरणणिवज्झन्तचित्तवन्दणमालअं सच्छरत्थाचत्तरचउप्पहपइण्णपिट्ठातअचुण्णं तं पुरं चउद्दिसं आसि * ।

माल्यवान् । ततस्ततः ।

मायामयः । ततश्च यावत् मायाकैकेयी शूर्पणखा मायादशरथो मायामयश्च यथास्थानमुपविष्टो तावत्कैकेय्याः प्रियसखी मन्थरा नाम तद्रूपधारिणी शूर्पणखापरिचारिकेव तदा मामुपेत्योक्तवती ।

माल्यवान् । किम् ।

मायामयः । इदम् ।

यत्त्वयाऽस्या महाराज प्रतिपन्नं वरद्वयम् ।
व्योमयात्रासहचरी कैकेयी याचतेऽद्य तत् ॥ ६ ॥

यथाभिहितं किं तत् । उक्तं च मन्थरया ।

वरेणैकेन लभतां रघुराज्यं सुतो मम ।
चतुर्दश समा रामो वने वन्येन तिष्ठतु ॥ ७ ॥

माल्यवान् । सहर्षम् । ततस्ततः ।

शूर्पणखा । विहस्य सुदसच्चदसरहेण वि माआमएण तधा करुणं विरोइदुं पउत्तं जधा जदि णाम तरुणो परं ण रोवदिदा गावगण्ठीणं परं जदि ण दलइ हिअअम् † ॥

माल्यवान् । विहस्य भद्र मायामय त्वमेव शेषं कथय कविमुखादेव शृणुमः ।

मायामयः । विहस्य ।

तथा मया प्रस्तुतमार्य रोदितुं
निबद्धधाराप्रसरेण चक्षुषा ।
स्थिता यथा स्वर्गनदीव दक्षिणे
यथा च वामे यमुनेव चक्षुषि ॥ ८ ॥

माल्यवान् । किं हि दुष्करं स्वामिभक्ते किमसाध्यं वैदग्ध्यस्य ततस्ततः ।

मायामयः । तदिति प्रतिपन्नवता मया निर्वासितो राजपुत्रः प्रवृत्तश्च गन्तुं वनाय ।

शूर्पणखा । लक्खणजाणईमेत्तपरिवारस्स से किदा जत्ता‡ ।

मायामयः । आर्य किमपि द्विषतामुदात्तजनचरितमावर्जकं पश्य ।

क्रूरकर्म किमपि राक्षसजातिरेका
तत्रापि कार्यपरतेति मयि प्रकर्षः ।
रामेण तु प्रवसता पितुराज्ञयैव
बाष्पाम्भसामहमपीह कृतो रसज्ञः ॥ ९ ॥

अपिच । दशकण्ठमातामह ।

अप्युज्झतो निजगृहान् सुखसारबन्धून्
कान्तारवासमनसः पितृशासनेन ।
रामस्य सा स्थितवती मुखमेत्य लक्ष्मीः
पद्मस्य या शरदि या च निशाकरस्य ॥ १० ॥

शूर्पणखा । तदो अह्मे तं पविसाविअ सच्चदसरहागमणसङ्किणो दडिदि जणरूआ भविअ किं हविस्सदित्ति जाणिदुं तक्खणं तहिं जेव्व ठिआ अह तत्थ पउत्ता पोरलोअस्स हलहवुल्लावा जधा केहिं वि किरकेकईदसरहरूवधारीहिं छलिदो रामभद्दोत्ति * ।

माल्यवान् ततस्ततः ।

मायामयः । ततश्च वामदेवप्रभृतिभिर्यथावृत्तमभिधाय सपादोपग्रहं वारितोऽपि तदिदमभिधाय स्थितः ।

मया मूर्ध्नि प्रह्वे पितुरिति धृतं शासनमिदं
स यक्षो रक्षो वा भवतु भगवान् वा रघुपतिः ।
निवर्तिष्ये सोऽहं भरतकृतरक्षां निजपुरीं
समाः सम्यङ्नीत्वा वनभुवि चतस्रश्च दश च ॥ ११ ॥

कार्यशेषनिष्पत्तये यथोचितं मातामह एव जानातीति निष्क्रान्ताः । विष्कम्भकः ।

ततः प्रविशति मातलिसारथिना रथेन कैकेय्या सह दशरथः ।

दशरथः । आर्य मातले कियद्दूरमद्यापि रघुराजधानी ।

मातलिः । य एष दृश्यते सरयूसरितः स्रोतसा परिक्षिप्तप्राकारो धरणितलैकदेशः सात्वियमयोध्या । रथवेगनाटितकेन ।

कैकेयी । पणमामि भअवदिं सरऊं जा पुव्वं दीसमाणा णअणपेऊसगण्डूसकवलं करेन्ती आसि सा संपदं हलाहलकवडपडिरूआ पडिहाअदि किं पुण मे अओज्झादंसणे वि अकारणपज्जाउलं हिअअं ता जदि वच्छाणं रामभद्दभरदलक्खण-

---

* ततस्तस्य वचनप्रसरणमाकर्ण्य सर्वतो वाद्यच्चिरवद्यतूर्यं गायद्गन्धर्वजनचुम्बितनृत्यन्नटीसार्थं उद्भिद्यमानविकटध्वजपताकायुगं तोरणनिबध्यमानचित्रवन्दनमालकं स्वच्छरथ्याचत्वरचतुष्पथप्रकीर्णपिष्टातकचूर्णं तत् पुरं चतुर्दिशमासीत् ।

† श्रुतसत्यदशरथेनापि मायामयेन तथा करुणं प्ररोदितुं प्रवृत्तं यथा यदि नाम तरवः परं न रोदिताः । ग्रावपन्थीनां परं यदि न दलति हृदयम् ।

‡ लक्ष्मणजानकीमात्रपरिवारस्यास्य कृता यात्रा ।

* ततो वयं तं प्रवास्य सत्यदशरथागमनशङ्किनो झटिति जनरूपा भूत्वा किं भविष्यतीति ज्ञातुं तत्क्षणं तत्रैव स्थिताः । अथ तत्र प्रवृत्ताः पौरजनस्य मन्दोल्लापा यत् काभ्यामपि कृतकेकयीदशरथरूपधारिभ्यां छलितो रामभद्र इति ।

सत्तुग्घाणं वधूणं च सीदामण्डवीउम्मिलासुदकित्तीणं दंसणेण णिव्वासइस्सदि * ।

दशरथः । अयि कैकेयि ।

एतत्क्रान्तविचित्रचत्वरपथं विश्रान्तवैतालिक-
श्लाघाश्लोकमगुञ्जिमञ्जुमुरजं विध्वस्तगीतध्वनि ।
व्यावृत्ताध्ययनं निवृत्तसुकविक्रीडासमस्यं नम-
द्विद्वद्वादकथं कथं पुनरिदं मौनव्रते वर्त्तते ॥ १२ ॥

अवतरणनाटितकेन ।

मातलिः । मर्त्यमहाराज सम्भावयस्व सदनमहमपि नि-बिडौजसं बिडौजसमुपतिष्ठामीति निष्क्रान्तः ।

परिक्रामितकेन दशरथः । कः कोऽत्र भोः ।

नेपथ्ये अयमहं काम्पिल्लः सौविदल्लः ।

दशरथः । आहूय सुमन्त्रवामदेवौ ।

प्रविश्य वामदेवः । स्वस्ति महाराजदशरथाय देव सन्नि-हितोऽत्रसुमन्त्रः ।

दशरथः । अनाकर्णितकेन एतत्क्रान्तमित्यादि पठति ।

वामदेवः । सास्रं स्वगतं च ।

हे मद्वाणि निजां विमुञ्च वसतिं द्राग्देहि यात्रां बहिः राजानं प्रति ।

देव स्तम्भय चेतनावचनयोरप्येति शुष्काशनिः ।

दम्पती आकुलं नाटयतः ।

वामदेवः ।

त्वद्रूपाद्विपिनाय चीवरधरो धन्वी जटी शासनं
रामः प्राप्य गतः कुतश्चन वनं सौमित्रिसीतासखः ॥ १३ ॥

उभौ मूर्च्छतः ।

वामदेवः । देव समाश्वसिहिसमाश्वसिहि । देवि कैकेयि समाश्वसिहिसमाश्वसिहि ।

दशरथः । केन पुनः कारणेन ।

वामदेवः । येन केकयकुलस्योपरिदुर्यशःपांशुपातः ।

कैकेयी । ण हु जादभरदस्स दुच्चरिदं किंपि अथवा दस-रहणरिन्दो से पिदा † ।

वामदेवः । शान्तं क्व पुनः सुधादीधितिरुतपस्यन्दी ।

दशरथः । स्फुटं कथय पर्याकुलोऽस्मि ।

वामदेवः ।

केकयस्य सुतया वरयुग्मं
याचितोऽसि भवता च वितीर्णम् ।

दशरथः । किं तत् ।

वामदेवः ।

यत्किलास्तु भरतो युवराजः

कैकेयी । हा हदम्हि मन्दभाइणी * ।

दशरथः । किम् ।

वामदेवः ।

स प्रयातु वनमद्य च रामः ॥ १४ ॥

दशरथः । हाहा धिक्कष्टम् ।

नरेन्द्रो वृद्धः स्त्रीवश इति मयि न्यस्तमयशो
निषण्णा दौरात्म्येऽप्यवति मलिनिता केकयसुता ।
मतं तस्याप्यस्मिन्निति च भरते लक्ष्म लिखितं
न जाने वा कोऽस्मिन् रघुकुलकलङ्के कविरभूत् ॥ १५ ॥

क्व पुनस्तौ कैकेयीदशरथौ ।

वामदेवः । रामभद्रं प्रवास्यापसृतौ ।

कैकेयी । ता किंति ण वारिदो वच्छो मे रामभद्दो † ।

वामदेवः । निवेदितवृत्तान्तः सपादोपग्रहं वारितोऽपि तदिदमभिधाय स्थितः ।

मया मूर्ध्नि प्रह्वे पितुरिति धृतं शासनमिदं
स यद्वा रक्षो वा भवतु भगवान् वा रघुपतिः ।
निवर्तिष्ये सोऽहं भरतकृतरक्षां निजपुरीं
समाः सम्यङ्नीत्वा वनभुवि चतस्रश्च दश च ॥ १६ ॥

दशरथः । हाहा वत्स रामभद्र अति हि नामासाम्प्रति-कता यत्त्वापि गुरुजनाज्ञातिक्रमः । कैकेयि हा हताऽसि तीए दुज्जसदाई सुट्ठु चउत्थीचन्दो दिट्ठोत्ति ‡ ।

कैकेयी । सकरुणं भअवदि रामभद्दसासुए सीदाजणणि वसुन्धरे रन्धं देहि अअं पणइजणो मागादि रहुउलवधूसमागमे पडिक्खिदा ण जीविदुं पारिस्सं । हा जाद भरद अलिअदु-ज्जसकलङ्किदा कधं दे मुहं दंसइस्सं हा ताद संभाविदोऽसि दुक्खेण हा अम्ब विडम्बिदाऽसि हा कोसल्ले सल्लिदाऽसि हा सुमित्ते सरीरमेत्तीकदाऽसि § इति रोदिति ।

---

* प्रणमामि भवतीं सरयू या पूर्वं दृश्यमाना नयनपीयूषगण्डूषकवलं कुर्वन्ती आसीत् सा साम्प्रतं हालाहलकवलप्रतिरूपा प्रतिभाति । किं पुन-र्मेऽयोध्यादर्शनेऽप्यकारणपर्याकुलं हृदयं तत् यदि वत्सानां रामभद्रभरत-लक्ष्मणशत्रुघ्नानां वधूनां च सीतामाण्डव्यूर्मिलाश्रुतकीर्तीनां दर्शनेन निर्वा-सयिष्यति ।

† न खलु जातभरतस्य दुश्चरितं किमपि । अथवा दशरथनरेन्द्रोऽस्य पिता ।

* हा हतास्मि मन्दभागिनी ।

† तत् किमिति न वारितो वत्सो मे रामभद्रः ।

‡ त्वया दुर्यशदायी सुष्ठु चतुर्थी चन्द्रो दृष्ट इति ।

§ भगवति रामभद्रश्वश्रूः सीताजननि वसुन्धरे रन्ध्रं देहि अयं प्रण-यिजनो याचते । रघुकुलवधूसमागमे प्रतिक्षिप्ता न जीवितुं पारयिष्ये । हा जात भरत अलीकदुर्यशकलङ्किता कथं ते मुखं दर्शयिष्यामि । हा तात संभावितोऽसि दुःखेन । हा अम्ब विडम्बितासि । हा कौशल्ये शल्यितासि । हा सुमित्रे शरीरमात्रीकृतासि ।

ततः प्रविशतः कौशल्यासुमित्रे ।

कौशल्या । सहि सुमित्ते अलं संतप्पिदेण संपदं सो जाद-रामभद्दो दिणणाहस्स उले उप्पण्णो जेण मायागुरुअणस्स विसासणणिव्वाहणेण बालराहवेण भविअ जरापरिणदराहवाणं पच्छाकदं चरिदम् * ।

सुमित्रा । अइ अलिकावट्ठम्हसुत्थिदे किदं वाआवित्थरेण एहि पढमपलत्तदूसहमहादुक्खं महाराअं संभावेम्ह † इति परिक्रामतः ।

दशरथः । अवस्थोचितं परिक्रम्य अयि हृदय सात्तविलायं विलीयस्व कौशल्यासुमित्रे दृश्येते ।

कैकेयी । संमुखमुत्थाय अइ हिअअणिहितदूसहदुःखसल्ले कोसल्ले अइ रामाणुसरणसलक्खणलक्खणपवित्ते सुमित्ते एसा रामणिव्वासिणी भरधदुज्जससंपादिणी कैकेई सीददु ‡ इति सर्वा रुदन्ति ।

दशरथः । सखे वामदेव अथ तदाकर्ण्य किमभिहितं वत्सलक्ष्मणेन ।

वामदेवः । हृदयकरीषंकषं कथमपि लक्ष्मणवचनं देवादेश इति निवेद्यते ।

तातः प्रेम यतः करोत्यनुचितं त्याज्यः स पूज्योऽपि सन्
कैकेय्याः कुचरित्रमित्थमथचेत्तत्राऽस्मि कुण्ठक्रमः ।
आर्यश्चेद्दूरतो विकर्त्तनकुले कर्त्तुं कलङ्कं स्थितो
गुञ्जज्ज्यामुखरं धनुर्ननु मयाप्यद्यैव संभाव्यते ॥ १७॥

सुमित्रा । किं पुण अविदिदवुत्तन्तो मायामअसुप्पणहाणं वच्छलक्खणो § ।

दशरथः । रामभद्रेण किं प्रतिपन्नम् ।

वामदेवः । इदं कथ्यते ।

तातादेशात् कियदिदमहो यद्वनान्ते निवासो
यस्मिन् सेव्याः प्रशमनिधयो धाम निःश्रेयसानाम् ।
अप्येकाकी किमु पितृगिरा गाढगूढाचलेन्द्रै-
र्बद्ध्वा सेतुं लवणजलधौ हेलया संचरामि ॥ १८ ॥

दशरथः । प्रकृतिसुकुमारया तु जानक्या किमभिहितम् ।

---

* सखि सुमित्रे अलं संतापितेन साम्प्रतं स जातरामभद्रो दिननाथस्य कुले उत्पन्नो येन मायागुरुजनस्यापि शासननिर्वाहणेन बालराघवेण भूत्वा जरापरिणतराघवाणां पश्चात् कृतं चरितम् ।

† अयि अलीकावष्टम्भसुस्थिते कृतं वाचाविस्तरेण । एहि प्रथमपतत्दुःसहमहादुःखं महाराजं संभावयामः ।

‡ अयि हृदयनिहितदुःसहदुःखशल्ये कौशल्ये । अयि रामानुसरणसलक्षणलक्ष्मणपवित्रे सुमित्रे एषा रामनिर्वासिनी भरतदुर्यशःसंपादिनी कैकेयी सीदतु ।

§ किं पुनरविदितवृत्तान्तो मायामयशूर्पणखानां वत्सलक्ष्मणः ।

वामदेवः । वत्से जानकि पितृश्वशुरसंपादितस्वस्थस्थितिरिहस्थैव त्वं रामभद्रागमनं प्रतिपालय गर्भेश्वरीभिर्भवादृशीभिर्दुरतिक्रमणीया विन्ध्यमहीधरभुव इत्युभयक्रममहत्तरिकाभिरभिहिता यदुक्तवती सीता तदिह पत्रिकायामास्ते सा दृश्यतां कण्ठावरोधादवाचनीयान्यक्षराणि इति पत्रिकां क्षिपति ।

सुमित्रा । गृहीत्वा वाचयति ।

किं तादेण णरेन्दसेहरसिहालीढग्गपादेण मे
किं वा मे ससुरेण वासवसहासींहासणद्धासिणा ।
उद्देसा गिरिणो अ ते वणमही सा चेअ मे वल्लहा
कोसल्लातणअस्स जत्थ चलणे वन्दामि णन्दामि अ * ॥ १९॥

कौशल्या । संस्तभ्यात्मानम् ।

रामे वणाअ चलिदे पिदुसासणेण
तं लक्खणे अणुगदे सह जाणईए ।
आणन्दवाहसमए विहुरासुपूर-
मुज्झन्तएहिं णअणेहिं विडम्बिदह्मि † ॥ २० ॥

विचिन्त्य सकरुणप्रमोदम् ।

किं अण्णेण सुएण णाम जणणीतारुण्णणिव्वासिणा
एक्कं मण्णध जादमत्थ विमले रामं रहूणं कुले ।
रज्जं वज्जिअ तादसासणपरो को पत्थिदो काणणं
किं बुड्ढेण वि राहवेण चरिदं एदं किदं केण वि ‡ ॥ २१ ॥

दशरथः । क्व पुनस्तापसगृहस्थवेषयोर्विनिमयः कृतो वत्सेन ।

वामदेवः ।

क्षिप्त्वा दाम जटाकृतास्तव सुतस्यास्मिन्घनाः कुन्तलाः

दशरथः । हंहो हृदय किमद्यापि श्रोष्यसि ।

वामदेवः ।

क्षिप्त्वा चात्र दुकूलमत्र वसितं रामेण तद्वल्कलम् ।

कैकेयी । एस पोम्मराअमणिणो कंचणबन्धविद्धंसणेण वारिआक्खेवणपरिक्खेवो § ।

---

* किं तातेन नरेन्द्रशेखरशिखालीढाग्रपादेन मे
किं वा मे श्वशुरेण वासवसभासिंहासनार्द्धासिना ।
उद्देशा गिरयश्चते वनमही सा चैव मे वल्लभा
कौशल्यातनयस्य यत्र चरणौ वन्दे च नन्दामि च ॥

† रामे वनाय चलिते पितृशासनेन
तं लक्ष्मणेऽनुगते सह जानक्या ।
आनन्दवाष्पसमये विधुराश्रुपूर-
मुज्झन्त्यां नयनाभ्यां विडम्बितास्मि ॥

‡ किमन्येन सुतेन नाम जननीतारुण्यनिर्वासिना
एकं मन्यध्वं जातमत्र विमले रामं रघूणां कुले ।
राज्यं वर्जयित्वा तातशासनपरः कः प्रस्थितः काननं
किं वृद्धेनापि राघवेण चरितमिदं कृतं केनापि ॥

§ एष पद्मरागमणेः काञ्चनबन्धविध्वंसनेन वारिजाक्षेपणपरिक्षेपः ।

वामदेवः ।

भ्रातृस्वीकृतमन्त्रचानुविहितं सौमित्रिणाऽपि व्रतं

दशरथः । वत्स लक्ष्मण त्वच्चरितेनामुना विषीदति प्रसीदति च मे मनः ।

वामदेवः ।

भर्तुश्चानुगताविह क्षितिभुवा श्वश्रूजनो वन्दितः ॥२२॥

कैकेयी । सासूणं परं अहं मन्दभाइणी जा पवसन्तराम-भद्दवहूपादवन्दणेण वञ्चिदा * ।

वामदेवः । इयमपरा विषादहर्षयोरुत्कर्षसीमा ।

याः स्नेहाज्जनकेन वेणिरचनां नीताः स्वयं विभ्रमान्
मैत्रेय्या परिचुम्बिताः प्रणमने या याज्ञवल्क्येन च ।

कैकेयी । सोत्कम्पम् । ता किं ताणम् † ।

वामदेवः ।

ताः सीताप्यतिकान्तकुन्तलसटाः कर्तुं जटाः प्रस्तुता
पादौ मूर्ध्नि निधाय संभ्रमवशात् सौमित्रिणाऽस्मिन् धृताः ॥२३॥

कैकेयी । अम्मो पच्चुज्जीविदम्हि अज्ज वामएव वक्कलणिएसणपसारिदहत्थे रामभद्दे वहूए किं पडिवण्णं आसि ‡ ।

वामदेवः । देवि जनकजाता यत् प्रतिपद्यते । पश्य ।

सीताप्युपाहिततरुत्वचि रामभद्रे
वल्कांशुकं हृदयसीम्नि समर्पयन्ती ।
कौशल्यया चरणयोः प्रणिपत्य शीघ्र-
माघ्राय मूर्ध्नि विवृता शपथैश्च तैस्तैः ॥ २४ ॥

दशरथः । रामजननि महदुपकृतं यद्द्विधाभवद्धारितं हृदयं दशरथस्य ।

वामदेवः । किं नाम धारितं हृदयमद्यापि बहु श्रोतव्यमस्ति । पश्य ।

दयितमनुसरन्तीं मैथिलीमीक्षमाणा
गृहिणमनुयियासुर्जानकी सा कनिष्ठा ।
गुरुगुरुजनलज्जानम्रवक्राम्बुजेन
भ्रुकुटिपुटनिबन्धाद्वारिता लक्ष्मणेन ॥ २५ ॥

दशरथः । किमुच्यते सच्चरितेषु रामभद्रस्यान्तेवासी लक्ष्मणः । ततस्ततः ।

वामदेवः ।

निष्कर्णिकाऽस्तवलयोज्झितहारयष्टि-
र्निर्नूपुराप्यपहृताङ्गदमेखला च ।

---

* श्वश्रूणां परमहं मन्दभागिनी या प्रवस्यद्रामभद्रवधूपादवन्दनेन वञ्चिता ।

† तत् किं तासाम् ।

‡ अहो प्रत्युज्जीवितास्मि आर्य वामदेव वल्कलनिवेशनप्रसारितहस्ते रामभद्रे वध्वा किं प्रतिपन्नमासीत् ।

त्वत्कः प्रसाद इति केवलमेव वेणौ
चूडामणिं निदधती चलिता वधूस्ते ॥ २६ ॥

ततश्च ।

स्मर्तव्यासि चिरं चकोरदयिते दात्यूहि तुभ्यं नमो
दृष्टस्त्वं शितिकण्ठ संहर गिरो गच्छाम्यहं सारिके ।
हे लीलाशुक विस्मरिष्यसि न मामेकैकमत्यादरा-
दित्यामन्त्र्य तया विलासवयसां विश्वे वयं रोदिताः ॥२७॥

कैकेयी । पिअकेलिसउन्ता ज्जेव्व मे वच्छा * ।

वामदेवः ।

केलीहंसो गतिमनुसरन् कारितः पञ्जरे यत्
पश्चाल्लग्ना प्रमदहरिणी वारिता यत् सखीभिः ।
यद्वैदेह्या गृहशुकगिरो नादृताश्च व्रजन्त्या
तत्केनास्यां पुरि न रुदितं नोदितः साधुवादः ॥ २८ ॥

विचिन्त्य देव अयमपरः क्षते क्षारावसेको यदिदमपि राजपुत्रीवचनं निवेद्यते ।

तुभ्यं स्वस्ति विलासवापि भवतीं प्रेक्षे पुनर्दर्शनं
क्रीडाक्रीड विमुच्यसेऽद्य कथितं हे केलिदोले तव ।
वासागार नमोऽस्तु ते गुणनिकाः सर्वाः सुखं स्थीयता-
मेषा वः परिचारिका वनभुवं रामानुगा गच्छति ॥ २९ ॥

दशरथः । हा रघुकुलचन्द्र रामचन्द्र कोऽयं दिलीपकुले चरितविपर्यासः ।

वृद्धो दशरथः सोऽयमुपास्ते गृहमेधिताम् ।
त्वया तु चीरकण्ठेन वनवासो निषेव्यते ॥ ॥ ३० ॥

वामदेवः । सखे भूकाश्यप रामभद्रप्रवसनव्यसने तु पौराणां कथं कथ्यतां विक्लवता ।

गाढोरःस्थलताडनत्रुटिधृतैर्हारावलीमौक्तिकैः
संदिग्धीकृतबाष्पबिन्दुरुदितं पौराङ्गनाभिस्तथा ।
आमूलश्लथपक्षतिस्थितिनतग्रीवायतुण्डं यथा
वीथीपञ्जरवर्तिभिः शुककुलैरप्युत्कमुत्कूजितम् ॥ ३१ ॥

दशरथः ।

हे प्राणाः स गतो रामस्तदनु व्रजत द्रुतम् ।
जरसा जर्जरैरङ्गैः शक्तिर्दशरथस्य का ॥ ३२ ॥

संतापमभिनीय । अयि रामजननि कौशल्ये ।

शशिकान्तः कथं यावा भजते वह्निरत्नताम् ।
रामस्तु चन्दनं भूत्वा जातो मे दावपावकः ॥ ३३ ॥

वामदेवं प्रति सखे ततस्ततः ।

---

* प्रियकेलिशकुन्तेव मे वत्सा ।

वामदेवः । ततश्च कृतानुगमनाग्रहपर्यन्त्यमपि भरतं निज-पादुकाराधनाय नन्दिग्रामे निवेश्य पितृरहितराज्यरक्षणक्षमे शत्रुघ्नं स्वशपथैः संस्थाप्य मां च तच्चिन्तने नियुज्य सुमन्त्रमात्रपरिकरः प्रस्थितस्ते पुत्रः ।

ततः प्रविशति सुमन्त्रः ।

सुमन्त्रः । आर्यावर्तमतिक्रम्य दक्षिणां दिशं प्रवसता कुमाररामभद्रेण निर्वर्तितोऽस्मि द्राघीयसीं च तीर्थयात्रां कृत्वा पुनरयोध्यां प्राप्तस्तन्न जाने महाराजदशरथः स्वर्गनगरीतो निर्वर्तितो न वेति । राजप्रवेशितनाटितकेनावलोक्य कथमागत एव भगवतो मघोनः सखा । उपसृत्य स्वस्ति महाराजदशरथाय देव सुमन्त्रसंचारिताचरो दुस्तरकान्तारपथिको रामभद्रोऽभिवादयते ।

दशरथः । सवाक्स्तम्भम् । पूर्णवनवासव्रतो भवतु मे वत्सः ।

राज्ञ्यः । अवि कुसलं तस्स सकलत्तस्स रामभद्दस्स लक्खणस्स अ * ।

सुमन्त्रः । कथं न नाम कुशलं येषां चरितानि जनानामाशिषो भवन्ति ।

दशरथः । सखे सुमन्त्र निवेदय वैदेशिकत्वं गर्भरूपाणाम् ।

सुमन्त्रः । देवं रघुराजधानीत इदं निवेद्यते ।

सद्यः पुरीपरिसरेऽपि शिरीषमृद्वी
गत्वा जवात्त्रिचतुराणि पदानि सीता ।
गन्तव्यमस्ति कियदित्यसकृद्ब्रुवाणा
रामाश्रुणः कृतवती प्रथमावतारम् ॥ ३४ ॥

राज्ञ्यः । सास्रम् । वच्छे जाणइ लीलाभवणमणिकुट्टिमकेलिपरिक्कमणदुल्ललिआ भविअ पामरीजणजोग्गे णिवडिदासि † ।

दशरथः । अहह निष्करुणो विधिः । मालतीमुकुलैर्न कूलं कल्पयति । ततस्ततः ।

सुमन्त्रः । पुरीपरिसरत्यागे तु ।

लोष्ठोलपस्तृतवतीषु वसुन्धरासु
दाक्षिण्यतः प्रचलितामवलोक्य सीताम् ।
रामाशयेऽपि परिपन्थिनि यत्तदुक्त्या
सौमित्रिणाऽर्द्धपथ एव कृतो निवासः ॥ ३५ ॥

कैकेयी । सोम्ममुह जाद लक्खण अवसरमन्तणअ किं भणामि ‡ ।

सुमन्त्रः । तत्र च कुशशयने निशामतिवाह्य प्रत्यूष एव पुनः प्रवृत्ता गन्तुं तत्र च ।

* अपि कुशलं तस्य सकलत्रस्य रामभद्रस्य सलक्ष्मणस्य च ।

† वत्से जानकि लीलाभवनमणिकुट्टिमकेलिपरिक्रमणदुर्ललिता भूत्वा पामरीजनयोग्ये निपतितासि ।

‡ सौम्यमुख जात लक्ष्मण अवसरमन्त्रणक किं भणामि ।

मसृणचरणपातं गम्यतां भूः सदर्भा
विरचय सिचयान्तं मूर्ध्नि घर्मः कठोरः ।
तदिति जनकपुत्री लोचनैरश्रुगर्भैः
पथि पथिकवधूभिर्वीक्षिता शिक्षिता च ॥ ३६ ॥

कतितिथेऽपि च प्रयाणे भागीरथ्याः परं पारं निश्चित्य प्रचलिताः । संतताध्वपरिश्रान्तया च सीतया कलमगोपीजनः स्त्रीस्वभावसुलभेन विश्रम्भेण मार्गं पृष्टः । निवेदितं च तेन ।

पुरो भूः शालेयी कलमपरिपाकोत्सुकशुका
पुरः फुल्लाम्भोजा तिलकयति वो वर्त्म सरसी ।
अथाये सीमानो हलदलितमुस्तासुरभय-
स्ततोऽदूराद्दिव्या नयनविषयं यास्यति सरित् ॥ ३७ ॥

राज्ञ्यः । कधं जा सा अह्माणं पुराणससुरस्स भअवदो भगीरधस्स जसवडाआ गङ्गादेवी विद्धमहेसिमुहादो सुवन्ती आसि तस्सिं जाव संपत्तं राहवकुडुम्बं तदोतदो * ।

सुमन्त्रः । ततश्च त्रियामासमये समासाद्य त्रिस्रोतसं नावमारूढाः ।

कैकेयी । साकूतम् । भअवदि भाईरधि भईरधाराहणं सुमरिअ सुहुतारा होइ † ।

दशरथः । ससंभ्रमम् । अयि सुमन्त्र प्रस्थितकर्णधारा नौः ।

सुमन्त्रः । किमुच्यते लक्ष्मणमित्रं निषादाधिपतिर्गुहः कर्णधारः ।

कौशल्या । तदोतदो ‡ ।

सुमन्त्रः ।

शम्भोर्मौलौ शशितिलकिते क्लृप्तकेलिप्रचारा
स्रोतःसूत्रैः कृतविरचनां भूर्भुवःस्वस्त्रयस्य ।
तामुत्तीर्य त्रिदशसरितं लोचनैरश्रुगर्भै-
रन्तर्वेदीप्रवचनविदां ते पदं प्राप्तवन्तः ॥ ३८ ॥

राज्ञ्यः । अम्मो सुट्ठाणे ठिदा ते जणा तदोतदो § ।

सुमन्त्रः । ततश्च पश्चिमेन प्रयागं रात्रिमेकामतिवाह्य समुत्तीर्य कलिन्दनन्दिनीं नानाधातुविचित्रं चित्रकूटाचलं गताः ।

दशरथः । देवि दक्षिणकोशलाधिपतिपुत्रि सुकुमारा राजपुत्री दुःसञ्चारा चित्रकूटगिरेररण्यानी ।

सुमन्त्रः । तत्र च ।

* कथं या साऽस्माकं पुराणश्वशुरस्य भगवतो भगीरथस्य जयपताका गङ्गा देवी वृद्धमहर्षिमुखात् श्रूयमाणा आसीत् तस्यां तावत् सांप्रतं राघवकुटुम्बम् । ततस्ततः ।

† भगवति भागीरथि भगीरथाराधनं स्मृत्वा सुखोत्तारा भव ।

‡ ततस्ततः ।

§ अहो सुस्थाने स्थितास्ते जनाः ।

आर्द्रालपाक्कृप्तनवोटजानां
सौमित्रिणा नीतफलोदकानाम् ।
कथाप्रसङ्गस्मृतबान्धवानां
तेषामभूत्तत्र चिरं प्रवासः ॥ ३९ ॥

किञ्च ।

त्वक्कारवी निवसनं मृगचर्म शय्या
गेहं गुहा विपुलपत्रपुटा घनाश्च ।
मूलं दलं च कुसुमं च फलं च भोज्यं
पुत्रस्य जातमटवीगृहमेधिनस्ते ॥ ४० ॥

कौशल्या । अज्ज कधेसु कीदिसं पुण्णं वणवासिणीए सीदाए घरिणित्तणं * ।

सुमन्त्रः । इदं निवेद्यते ।

यदास्वाद्यं सीता वितरति तदग्रे स्वगृहिणे
सुमित्रापुत्राय प्रणिहितमशेषं च तदनु ।
यदामं वा नामं यदनतिरसं यच्च विरसं
फलं वा मूलं वा रचयति तु तेन स्वशमनम् ॥ ४१ ॥

कौशल्या । पुत्ति सीदे कहिं पुण महाराजराजजादाए भविअ णिसग्गदरिद्दघरिणित्तणं तए सिक्खिदम् † ।

दशरथः । देवि दैवं शिक्षयति ।

सुमन्त्रः । इदमपरमावेद्यते हृदयकरीषं वचो यदुताध्वखेदजनकेषु प्रयाणकेषु ।

उत्थाय संभ्रमवशस्खलितोत्तरीया
कृत्वा धनुर्निचुलके मृगयानिवृत्तौ ।
सीताऽञ्चलेन तरलेन समुल्लसन्ती
रामाननाच्छमितपक्ष्मरजः प्रमार्ष्टि ॥ ४२ ॥

दशरथः । ततस्ततः ।

सुमन्त्रः । ततश्च जानकीहरणकृतोद्यमविराधविध्वंसनेन सीतागात्रनिवेशितनखरोल्लेखस्य च धाराधरवायसस्य काणीकरणेन सुस्थान्याश्रमपदानि विधाय दक्षिणं महाकान्तारमधिकृत्य प्रस्थितास्ते ।

दशरथः । अयि सुमन्त्र नववधूटीलक्ष्मणयोः प्रथमपथिकता विक्लवयति ।

सुमन्त्रः । किं नाम विक्लवयति न पुनरानन्दयति ।

धरणितलनिषण्णं वत्सविश्रान्तिहेतो-
र्व्यजति जनकपुत्री वाससः पल्लवेन ।
अगणितनिजखेदः पादसंवाहनाभिः
परिचरति हृष्यं लक्ष्मणो रामभद्रम् ॥ ४३ ॥

* आर्य कथय कीदृशं पुण्यं वनवासिन्याः सीताया गृहिणीत्वम् ।

† पुत्रि सीते कुत्र पुनर्महाराजराजजातया भूत्वा निसर्गदरिद्रगृहिणीत्वं त्वया शिक्षितम् ।

राज्यः । हा देव कहिं उण गब्भेसरीहिं भविअ जाणईलक्खणेहिं पहिअजणजोग्गं गुरुसुस्सूसणं सिक्खिदम् * ।

सुमित्रा । उचिदकारित्तणे अस्सुदसिक्खिदाइं महाभाअजणचरित्ताइं † ।

दशरथः । जाने जानकीतोऽपि प्रसादवान् वत्सलक्ष्मणे रामभद्रः ।

सुमन्त्रः । यथादिष्टं देवेन ।

ताराप्रेङ्खणपीतबाष्पपयसो यत्नेन संचारिताः
सीतायाः सविधस्थितेषु च मृगद्वन्द्वेषु वीरुत्सु च ।
बाले वर्त्मकृते प्रवासिनि नवादुल्लङ्घ्य गम्भीरतां
सौमित्रौ निपतन्ति वत्सलतया पुत्रस्य ते दृष्टयः ॥ ४४ ॥

दशरथः । अपि शिवाः पन्थानो वत्सानां सुशकुनया सीतया ।

सुमन्त्रः । देव रामचन्द्रदर्शनमेव सर्वेषामपि सुशकुनम् । करुणाकौतुकाभ्यामागताभिर्वैखानसवधूभिर्हस्तचिबुकेन चिबुके चुम्बन्तीभिरभिहिता सीता पुत्रि पतिव्रते वैदेहि अप्रमत्तजनसंचारणीयानि गिरिकान्ताराणि तत्पादवेदनावत्यप्यनुरामभद्रं संचर किं न पश्यसि ।

वप्रे यूथं चरति करिणां कन्दरास्वच्छभल्लाः
कुञ्जे सिंहैः स्थितिरुपहिता द्वीपिभिर्मेखलासु ।
गोलाङ्गूलास्तरुषु सरणौ भ्रान्तिमन्तः पुलिन्दै-
र्विन्ध्ये सत्त्वं तदिह कतरद्यन्न हिंस्रं न रौद्रम् ॥ ४५ ॥

अपिच । सीरध्वजसुवासिनि ।

यावयन्त्यं परिहर पुरः कण्टकिन्यत्र वीरु-
द्गुल्मप्रान्तं दवदहनतः किञ्चिदुच्चैः कुरुष्व ।
शाखास्तिर्यग्विनमय शिरः पश्य वल्मीकरन्ध्रं
वंशस्तम्बे चरति च करी तत्स्थिरा तावदास्स्व ॥ ४६ ॥

सुमित्रा । अहह कधं णु क्खु कक्करोक्केरवक्कलणिविडासु गिरिवसुन्धरासु वसुन्धरापुत्ती णिसग्गसुकुमारा संचरदि ‡ ।

सुमन्त्रः । इदं कथ्यते यथा संचरति ।

मुञ्चत्यग्रे किसलयचयं लक्ष्मणो याति सीता
पादाम्भोजे विसृजदसृजी तत्र संचारयन्ती ।
रामो मार्गं दिशति च ततस्तेऽखिलेनाऽपि चाह्ना
शैलोत्सङ्गप्रणयिनि पथि क्रोशमेकं वहन्ति ॥ ४७ ॥

* हा देव क्व पुनर्गर्भेश्वराभ्यां भूत्वा जानकीलक्ष्मणाभ्यां पथिकजनयोग्यं गुरुशुश्रूषणं शिक्षितम् ।

† उचितकारित्वेऽश्रुतशिक्षितानि महाभागजनचरित्राणि ।

‡ अहह कथं नु खलु कर्करोत्करवल्कलनिबिडासु गिरिवसुन्धरासु वसुन्धरापुत्री निसर्गसुकुमारा संचरति ।

ततश्च ।

जरदजगरश्वासत्रासप्रनष्टमृगाङ्गनं
हरिनखमुखन्यासादस्तद्विपोज्झितचीत्कृतम् ।
शबरवनितोत्खातैः कन्दैः स्फुटस्थपुटान्तरं
तदनु सरितां बन्धुं विन्ध्यं गतास्त इमे गिरिम् ॥ ४८ ॥

कौशल्या । जा कविञ्जलकेलिजुज्झे वि बिब्भन्ती आसि सा कधं पुण वाणरमुक्कबुक्कारवसङ्किअपहिअं किराअजालभल्लाहअवेल्लमाणअच्छभल्लकीलालकवलणकेलिकोदूहलिल्लकेसरिकिसोरदीहज्जीहालिहिज्जन्तपोम्मराअखणिं विंझगिरिं पेक्खन्ती सुणा मे पदाइं धारइस्सदि हा हददेव्व सांतं केलिकदलीकन्दली मत्तकरिसुण्डावेढं सहावीअदि हंहो दिलीपकुलदेवदाओ सुरक्खिदं कुणध वणे रहवकुडुम्बम् * ।

दशरथः । किं करोतु वराकी क्व पुनर्मालतीकलिका दर्भगुणग्रथनाकदर्थनां क्षमते ।

सुमन्त्रः । शृणु यथा क्षमते ।

मूलेमूले पथि विटपिनां खेदिनी दीर्घमास्ते
शुष्यत्कण्ठी पिबति सलिलं निर्झरेनिर्झरे च ।
जातत्रासा निमिषति दृशं कन्दरेकन्दरे च
स्थानेस्थाने वहति च मतिं बद्धवासाभिलाषा ॥ ४९ ॥

निःश्वस्य देव इदं पुनरतिकष्टतरं श्रावयामि ।

विन्ध्याध्वानो विरलसलिलास्तर्षिणी तत्र सीता
यावन्मूर्छां कलयति किल व्याकुले रामभद्रे ।
द्राक्सौमित्रिः पुटककलशीं मालुधानीदलानां
तावत्प्राप्तो दधदतिभृतां वारिणा नैर्झरेण ॥ ५० ॥

सर्वे समुच्छ्वसन्ति ।

कौशल्या । लक्खणलक्खण उवणेहि चलणकमलाइं सीसेण ते धारइस्सं † ।

कैकेयी । सहि कोसल्ले उट्ठेहिउट्ठेहि कहिं एत्थ रामो लक्खणो वा अदिक्कन्तं क्खु भणीअदि ‡ ।

दशरथः । एष विषादहर्षयोरन्तरे वर्ते ।

कौशल्या । हा रामभद्द केण उण दिणअरकुलकुमारएण भविअ विंझगिरिवासदुःखं अणुभूदम् * ।

सुमित्रा । सहि कोसल्ले ण सव्वो रामभद्दो † ।

कैकेयी । णअरेणअरे कैकेयी ‡ ।

कौशल्या । तदोतदो § ।

सुमन्त्रः । ततश्च ।

विहितशयनोऽनेकन्यासैरनोकहपल्लवैः
कलितकलशीपाणिः कुम्भोदलैश्च पुटीकृतैः ।
अथ विरचितः किंचित्तालप्रभेऽह्नि सुतेन ते
परिसरसरिज्जम्बूकुञ्जे निकेतपरिग्रहः ॥ ५१ ॥

दशरथः । सविशेषकरुणम् । ततस्ततः ।

सुमन्त्रः । तदित्थं कतितिथे च प्रयाणे ।

गिरिषु जयपताका विन्ध्यशैलस्य पाणि-
द्विपकुलनिचिताम्भाः प्रेयसी पश्चिमाब्धेः ।
नयनपथमथागान्नर्मदा देव येषां
शिशिरितजलमिन्दोश्चन्द्रिकेव प्रसूता ॥ ५२ ॥

दशरथः । या किल भगवत्यार्यावर्त्तदक्षिणापथयोर्विभागरेखा ।

सुमन्त्रः । ततश्चाहमनुगमनकृताग्रहयन्त्रिरपि देव द्राहं निरुद्धता रामभद्रेण विनिवृत्तये स्थापितः । किञ्च देव ।

कृत्वा पाणी शिरसि जटिले पद्मकोशायमानौ
रामेण प्राक्प्रणतिविनयो देव विज्ञापितस्ते ।
बाष्पस्ताराततरलनयनस्तम्भितोप्युज्जिहानः
पश्चात् मुक्तः श्वसितविधुतो वन्दितेनाननेन ॥ ५३ ॥

कौशल्या । अज्ज तए विमुक्को रामभद्दो ‖ ।

सुमन्त्रः । देवि सर्वे वयं रामभद्रेण परित्यक्ताः ।

कौशल्या । तदोतदो ¶ ।

सुमन्त्रः । ततश्च ।

नीत्वा कालं तरुणतरणिं स्निग्धजम्बूनिकुञ्जे
धारादत्तोत्क्षमितसिकतासद्मनां क्रीडनेन ।
रेवां देव स्खलितचरणा पिच्छिलाभिः शिलाभि-
स्तामुत्तीर्णा पथिकतरलन्यस्तहाहा वधूस्ते ॥ ५४ ॥

सुमित्रा । तदोतदो ** ।

---

* या कपिञ्जलकेलियुद्धेऽपि विभ्यत्यासीत् सा कथं पुनर्वानरमुक्तबुक्कारवशङ्कितपथिकं किरातजालभल्लाहतवेल्लदच्छभल्लकीलालकवलनकेलिकौतूहलितकेसरिकिशोरदीर्घजिह्वालिह्यमानपद्मरागखनिं विन्ध्यगिरिं प्रेक्षमाणा सुषा मे पदानि धारयिष्यति । हा हत दैव शान्तं केलिकदलीकन्दली मत्तकरिशुण्डावेष्टनं सह्यते हंहो दिलीपकुलदेवताः सुरक्षितं कुरुत वने राघवकुटुम्बम् ।

† लक्ष्मणलक्ष्मण उपनय चरणकमले शीर्षेण ते धारयिष्यामि ।

‡ सखि कौशल्ये उत्तिष्ठोत्तिष्ठ क्वात्र रामो लक्ष्मणो वा अतिक्रान्तं खलु भण्यते ।

* हा रामभद्र केन पुनर्दिनकरकुलकुमारकेण भूत्वा विन्ध्यगिरिवासदुःखमनुभूतम् ।

† सखि कौशल्ये न सर्वो रामभद्रः ।

‡ नगरेनगरे कैकेयी ।

§ ततस्ततः ।

‖ आर्य त्वया विमुक्तो रामभद्रः ।

¶ ततस्ततः ।

** ततस्ततः ।

सुमन्त्रः। ततोऽहं तानवलोकयन्नर्वाक्कूल एव तां रजनीमुषितस्ते तु परपारे। अथान्येद्युः।

जित्वा बाष्पं किमपि कलया स्फारितैर्नेत्रपात्रै
रर्वाक्कूले विहितवसतिं वीक्षमाणाः क्षणं माम्।
ते दिग्भागं स्तिमितवचसो नर्मदायाः परस्ता-
ल्लोपामुद्रापतितिलकितं देव गन्तुं प्रवृत्ताः॥ ५५॥

दशरथः। वत्स रामभद्र मन्ये ममेव मलयाचलवासिनः प्रियवयस्यस्य जटायोरपि सर्वङ्कषो भविष्यसि।

ततः प्रविशति गगनार्द्धावतरणनाटितकेन सप्रहारव्यथो रत्नशिखण्डः।

चन्द्रहासप्रहारोत्थां जयन् मूर्च्छां नभोनिलैः।
अयोध्यामवतीर्णोऽस्मि कथंचित् क्षतपक्षतिः॥

विचिन्त्य एवं स्थितोऽपि।

एषोऽहं जलमयरत्नकामधेनुं
पक्षाभ्यां सपदि विघूर्ण्य ताम्रपर्णीम्।
द्राक्कृत्वा मलयतरून् द्रुताहिपाशा-
न्नादेशाद्दशरथमागतो जटायोः॥ ५६॥

तद्यावत्तत्रभवन्तं भूकाश्यपं पश्यामि गगनार्द्धक्रमेणावलोक्य। एष महाराजदशरथः। कः कोऽत्र भोः। निवेद्यतामजनन्दनाय नरेन्द्राय।

जटायोर्गृध्रराजस्य सुहृदस्तव शैशवात्।
दूतो रत्नशिखण्डोऽस्मि तन्निदेशादुपागतः॥ ५७॥

सुमन्त्रः। इतइतः।

रत्नशिखण्डः। अवतरणनाटितकेन स्वस्ति महाराजदशरथाय।

दशरथः। अपि कुशलं जटायोर्वयस्यस्य।

रत्नशिखण्डः। प्रियसुहृदुपयोगेन न पुनः शरीरेण।

दशरथः। भद्र समुपविश्य कथ्यतां व्याकुलोऽस्मि।

रत्नशिखण्डः। उपविश्य अद्य प्रगेतनप्रचारविनिर्गतैरन्वयशकुन्तिभिर्वान्तधाराश्रुविसरैरागत्य करुणं क्रन्दद्भिरावेदितं शकुन्तराजाय जटायवे यद्गुतोपासितप्रथमसन्ध्ये साकं जानक्या लक्ष्मणलक्ष्मण्युटजाङ्गणमधितिष्ठति सप्रमदमुद्रे रामभद्रे तत्प्रदेशवर्तिभिरुदघोषि।

संचारी रोहणाद्रिः किमयमविकलः केलिसंप्राप्तमूर्त्तिः
कोदण्डः पिण्डिताङ्गः किमुत सुरपतेर्जङ्गमत्वं गतोऽसौ।
चित्रं वा भूतधात्र्याः प्रकृतिबलमिदं कल्पयद्वाग्वितर्का
नित्यं वैखानसीनां तिलकितभुवनं भूतमभ्येति किञ्चित्॥५८॥

अभिहितं च रामभद्रेण जानकि कारय चक्षुषी पारणां प्रश्यपश्य।

श्रेणीपर्युप्तरत्नव्यतिकरकलनाचित्रिताङ्गः कुरङ्गः
कान्त्या दूरस्थितानामपि सलिलमुचां संदधच्चापचिह्नम्।
वेगेनान्वीतमार्गो मुनिबटुभिरलं कौतुकोत्तानिताक्षैः
र्भूयो भूसन्निवेशे चरति रचयति व्योम्नि किञ्चित्प्लुतानि॥५९॥

तदवलोकनकुतूहलिना चाभिहितं लक्ष्मणेन। आर्ये दृश्यतां द्रष्टव्यम्।

आपुच्छादाचतुण्डान्मरकतरचितां पृष्ठपीठीं दधानो
नीरन्ध्रासक्तमुक्ताफलपटलचयापाण्डुरां क्रोडपालीम्।
पादैर्बालप्रवालच्छदपुटघटितैरच्छवैडूर्यमय्या
दृष्ट्याऽयं दण्डकायां भुवि वनहरिणोऽभ्येति विस्मापयन्नः॥६०॥

कौशल्या। तदोयदो*।

रत्नशिखण्डः। ततश्च विचित्ररचनाकर्मणि तच्चर्मणि सीताकौतूहलिकतामवगत्य तद्ग्रहणार्थं लक्ष्मणमवस्थाप्य तमनुपृष्ठस्ततो रामभद्रः कियतीषु च कालकलासु गतासु किं तत्राद्भुतभूते भविष्यत्यार्यस्येति जाताशङ्कां वैखानसपत्नीनां समर्प्य जानकीं सौमित्रिरपिराममनुसृतः।

कौशल्या। किञ्चिदुत्थाय जाद लक्खण अलमलं माणिक्ककुरङ्गेण माक्खुमाक्खु एदाणिं जाणइं अटईकन्तारे परित्तअसु† इति धारयितुमिच्छति।

सुमन्त्रः। देवि अतिक्रान्तवर्णनायामलमलमतिसंमोहेन।

दशरथः। ततस्ततः।

रत्नशिखण्डः।

आकर्णाकृष्टचापार्पितविशिखभृतानुद्रुतश्चानणीयान्
माणिक्याङ्गः कुरङ्गः सपदि धृतजवो जानकीवल्लभेन।
सीतां चाधाय मध्येमणिवलभि बली रावणः पुष्पकेण
स्वां गन्तुं राजधानीं सकलसुरवधूचण्डवृतः प्रवृत्तः॥६१॥

दशरथः। धनुर्धनुः।

सुरेन्द्रवैरिशिरसां छेदविद्यापरीक्षिताः।
दशवक्त्रस्य वक्त्राणि लुनन्तु मम सायकाः॥ ६२॥

इत्युत्थातुमिच्छति।

सुमन्त्रः। देव तदिदमपक्रान्तोपवर्णनं कोयमायुधग्रहणकालः।

दशरथः। उपविश्य। हाहा धिक्कष्टमयमपूर्वो रघुराजकुलकलङ्कावतारः। विचिन्त्य तर्हि मायामयः।

मायामृगेण रामोऽपि हृत इत्यद्भुतं महत्।
मतिर्वा खर्वभाग्यानां पश्यन्त्यपि न पश्यति॥ ६३॥

* ततस्ततः।

† जात लक्ष्मण अलमलं माणिक्यकुरङ्गेण मा खलु मा खल्विदानीं जानकीमटवीकान्तारे परित्यज।

सुमित्रा । पुत्ति सीदे कवलितहालाहलस्स जणस्स एस संपदं सोत्रो । जा देसन्तरे वि रक्खसेण हीरसि * ।

कैकेयी । कैकेईदुव्जसमहाकन्दस्स एस दुदीत्रो कन्दलुब्भेत्रो † ।

दशरथः । उपविश्य सवैलक्ष्यम् । ततस्ततः ।

रत्नशिखण्डः । एतद्व्यतिकरमन्वयवयोवदनेभ्यः श्रुत्वा स ते सखा गृध्रकपोतैः परिवृतो दुःसहस्नुषापहारतिरस्कारो मलयाचलादुच्चलितः । अत्रान्तरे त्रिदशवक्रविमुच्यमानदृग्गोचरस्य रजनीचरभर्तुरग्रे मार्गं निरुध्य कृतवान् गगनावगाहमामूलविस्तृतपतत्रपुटो जटायुः ।

दशरथः । साधु वयस्य साधु ततस्ततः ।

रत्नशिखण्डः ।

यत्संवर्ते दिनमणिरयं वासरस्यैककर्ता
यद्विस्तारे भवति रजनीरञ्जितो जीवलोकः ।
ताभ्यां रुन्धत्तरुणतनयो रोदसी पक्षतिभ्यां
जातो योद्धुं त्रिभुवनरिपोरग्रतो रावणस्य ॥ ६४ ॥

दशरथः । किमुच्यते संपातिसहोदरो मन्मित्रमारुणिरसि । ततस्ततः ।

रत्नशिखण्डः । ततश्चाभिहितमभिमानोद्धुरं गृध्रराजेन ।

संप्राप्तोऽहं जटायुर्मलयगिरिगुहाकन्दरक्रोडनीड-
स्तद्वाः सीतापहारिन् विमुहि करचये केनचिच्चन्द्रहासम् ।
येन त्वत्कृत्स्नचूडारुणमणिनिकरं मत्कचण्डाग्रतुण्ड-
व्यापारैः स्रंसमानं सपदि शकुनयो मांसगर्धा ग्रसन्ताम् ॥ ३५ ॥

दशरथः । अहो निरुपममोजायितं वेगविजितवायोर्जटायोः ।

कौशल्या । भअवदि सङ्गामसिरि जई भोदु तत्तभवं जडाऊ । तदोतदो ‡ ।

रत्नशिखण्डः । तत्सर्वैरेवास्माभिररुणगरुडान्वयप्रसवैः शकुन्तिभिरन्तरितस्तातजटायुर्योद्धुं चारब्धं ततश्च ।

कर्णाभ्यर्णेष्वलिकफलकेष्वायते नेत्रतन्त्रे
नासावंशेष्वधरपुटकेष्वंसवक्षःस्थलीषु ।
योयो भागः सुरपतिरिपोः स्वामिनः स्पष्ट आसीत्
तंतं गृध्राः कवलकलितं लूनवन्तो नखाग्रैः ॥ ६६ ॥

ततश्च सकलैरेव शकुन्तिवीरैराकुलितेन राक्षसराजेन चन्द्रहासव्यापारेणास्याभिमुखं प्रवृत्तं हन्यमानेषु च महापतत्त्रिभटेषु जटायुना पुनः सर्वे वयमन्तरिताः । ततश्च ।

चित्रे तत्र पतन्निशाचररणे नाङ्गं जटायोरभू-
न्नो कृत्तं दशकन्धरेण कणशो यच्चन्द्रहासासिना ।
लङ्काभर्तुरपि प्रचण्डकुलिशव्यापारनीराजितं
यत्तुण्डेन न खण्डितं खगपतेर्यद्वा न लूनं नखैः ॥ ६७ ॥

कौशल्या । भअवदि सङ्गामसिरि मुच्चदु सीदां बन्दिग्गहादो * ।

दशरथः । ततस्ततः ।

रत्नशिखण्डः ।

तदनु दिवि जटायुश्चञ्चुसंदंशमुद्रा-
कवलनविधिवेगप्रस्खलच्चन्द्रहासः ।
दशभिरपि नखाग्रैर्दिग्गजेन्द्राङ्कुशाभैः
सपदि दशमुखानि प्राद्रवद्रावणस्य ॥ ६८ ॥

दशरथः । साधु गरुडाग्रज साधु साधु दिनमणिसारथे साधु जटायुना पुत्रेण ।

कौशल्या । तं कदं अज्ज जटाउणा जं सहिसुसाहरणे कीरदि तदोतदो † ।

रत्नशिखण्डः । ततश्च ।

द्राक्चन्द्रहासपरिखण्डितचञ्चुकोटि-
श्चञ्चुप्रहारपरिखण्डितचन्द्रहासः ।
नाडिन्धमे तडिति कण्ठतटे स तेन
कुन्तेन कुन्तनखरः प्रहतः शकुन्तः ॥ ६९ ॥

ततश्च तदिदमपश्चिमं तव कण्ठगतप्राणेन जटायुना संदिष्टम् ।

यत्संपातिसहोदरस्य सदृशं यच्चारुणेः साम्प्रतं
यच्चाधीननखायुधस्य च समं युक्तं च यद्रावणे ।
तन्मैत्रीमनुरुन्धता तव मया तत्सङ्गरांग्रे कृतं
न व्रीडां गमितोऽसि येन न पुनः स्यां संभवे येन च ॥ ७० ॥

दशरथः । हा अरुणकुलालङ्करण हा संपातिवल्लभ हा गरुडप्रसादवित्त कामवस्थां नीतोऽसि प्रियसुहृदा दशरथेन ।

कौशल्या । हा देव्व तए कदविलम्बं समत्थअं वणगदं राहवकुडुम्बम् ‡ ।

सुमित्रा । ण केवलं वणगदं भुवणगदं वि § ।

रत्नशिखण्डः । तत्प्रहिणोतु मां महाराजो निजकुलकुलायगमनाय ।

दशरथः । साधु एतु भवान् ।

रत्नशिखण्डः । परिक्रम्य निष्क्रान्तः ।

---

* पुत्रि सीते कवलितहालाहलस्य जनस्य एष साम्प्रतं शोको या त्वं देशान्तरेऽपि राक्षसेन ह्रियसे ।

† कैकेयीदुर्यशमहाकन्दस्य एष द्वितीयो कन्दलोद्भेदः ।

‡ भगवति संग्रामश्रीर्जयी भवतु जटायुः । ततस्ततः ।

* भगवति संग्रामश्रीः मुञ्चतु सीतां बन्दिगृहात् ।

† तत् कृतं जटायुना यत् सखीस्नुषाहरणे कीर्त्यते । ततस्ततः ।

‡ हा देव त्वया कृतविडम्बं समस्तं वनगतं राघवकुटुम्बम् ।

§ न केवलं वनगतं भुवनगतमपि ।

कैकेयी । उत्तरकोसलणरिन्द किमवसिदं रहुवंसस्स *। अत एवाऽहम् ।

यस्मिन्नापः सह परिणताः सूर्यपुत्रीपयोभि-
र्मन्दाकिन्याः कुमुदरुचयो मेचकेन्दीवराभैः ।
तीर्थे तस्मिन् मम विशदितं देवताभूय भूयः
स्वाङ्गत्यागात् स्पृहयति मनो वासवार्धासनाय ॥ ७१ ॥

इति परिक्रम्य सर्वे निष्क्रान्ताः ।

॥ निर्दोषदशरथो नाम षष्ठोऽङ्कः ॥

गोविन्ददेवशास्त्री ।

---

## THE APHORISMS
### OF THE
# YOGA PHILOSOPHY,
### OF
## PATAŃJALI.

( *Continued from page* 113. )

An indication of the various modifications of the same Dharmí.

क्रमान्यत्वं परिणामान्यत्वे हेतुः॥ १५॥

Aph. 15.—The altered state of the order (of the threefold modification just defined) is indicative of the variety of the modifications (which the same Dharmí is to undergo).

*b.* The apparent state, changeable in every moment, of the order (of the modifications) of the properties defined before, is indicative of the variety of the modifications. The meaning is this, that the apparent order (of the modifications of the properties) that a lump of clay (is produced) from the powder of earth, thence the several parts of the jar and then the jar, indicates the state of the variety of the modifications. By the same argument, the order of the modifications of the indication and position, is also to be understood indicative of the variety of the modifications of the same Dharmí (i. e. as a jar). (In this manner) all things appear to undergo a certain change according to a fixed order, and hence it is proved that the variety of the modifications (of the same Dharmí) is indicated by that of the order (just explained.) Some of the properties of the internal organ and all of its objects &c., are apprehended by perception (Pratyaksha) as happiness &c. and position and others (respectively) and some are understood only by inference (Anumána) as property, train of self-reproductive thought, the way not come in view &c. It is always to be observed that Dharmí differs and does not differ from itself † (accordingly as it is connected with the modifications of the position and the way not come in view—as the compound word Anágatádhvá means).

*a.* Now, in order to explain the Siddhis—Superhuman faculties—by showing (first) the particular circumstances of the before-mentioned Sańyama—restraint (i. e. the circumstances where Sańyama is to be used to attain to the Siddhis, he) declares (as follows).*

The superhuman faculty which consists in a knowledge of past and future events.

परिणामत्रयसंयमादतीतानागतज्ञानम् ॥ १६ ॥

Aph. 16.—A knowledge of past and future events (comes to an ascetic) from (his rendering) Sańyama—restraint—about the three modifications (just explained).

*b.* "From rendering Sańyama about the three modifications (just explained)" in the shape of property, indication and position (i.e. from acquiring control over them from rendering Sańyama regarding them) an ascetic knows well the past and future events. The true meaning is this that this (particular) property is in this Dharmí, this is the way which it belongs to, and this is the position it possesses. Moreover, on its coming from the Anágatádvá—the way not come in view—, it has performed its respective function in the present way and entered now the past way. When all this the ascetic (clearly perceives) by getting rid of the obstacles from Sańyama—restraint—, then he knows whatever is past and whatever is to come or arise (in future) because the capacity of the internal organ to comprehend all objects, on account of its consisting of the manifestation of the pure truth (Sattva) is taken away by (i. e. is hidden under) the obstacle ignorance (Avidyá) &c. and when these obstacles are removed by (adopting) special measures, then the capacity of holding all objects, is manifested in the internal organ (which then becomes) like a cleared mirror by the force of intentness on a single point (Ekágratá).†

GOVINDA DEVA ŚÁSTRI.

---

* उत्तरकोशलनरेन्द्र किमवसितं रघुवंशस्य ।

† धर्मलक्षणावस्थानां यः क्रमस्तस्य यत्प्रतिक्षणमन्यत्वं परिदृश्यमानमस्योक्तलक्षणस्यान्यत्वे नानाविधत्वे हेतुर्लिङ्गं ज्ञापकं भवति । अयमर्थः योऽयं नियतक्रमो मच्चूर्णान्मृत्पिण्डस्ततः कपालानि तेभ्यश्च घट इत्येवंरूपः परिदृश्यमानः परिणामस्यान्यत्वमावेदयति । तस्मिन्नेव धर्मिणि यो लक्षणपरिणामस्यावस्थापरिणामस्य च क्रमः सोऽप्यनेनैव न्यायेन परिणामान्यत्वे गमकोऽवगन्तव्यः । सर्व एव भावा नियतेनैव क्रमेण प्रतिक्षणं परिणममाना दृश्यन्ते । अतः सिद्धं क्रमान्यत्वात्परिणामान्यत्वम् । सर्वेषां चित्तविषयादीनां परिणममानानां केचिद्धर्माः प्रत्यक्षेणैवोपलभ्यन्ते यथा सुखादयः संस्थानादयश्च । केचिच्चैकान्तेनानुमानगम्याः । यथा धर्मसंस्कारशक्तिप्रभृतयः । धर्मिणश्च भिन्नाभिन्नरूपतया सर्वत्रानुगमः ।

* इदानीमुक्तस्य संयमस्य विषयप्रदर्शनद्वारेण सिद्धीः प्रतिपादयितुमाह ।

† धर्मलक्षणावस्थाभेदेन यत्परिणामत्रयमुक्तं तत्र संयमात् तस्मिन्विषये पूर्वोक्तस्य संयमस्य करणादतीतानागतज्ञानं योगिनः सम्यगाविर्भवति । इदमत्र तात्पर्यम् । अस्मिन् धर्मिण्ययं धर्म इदं लक्षणमियमवस्था चानागताध्वनः समेत्य वर्तमानेऽध्वनि स्वं व्यापारं विधायातीतमध्वानं प्रविशतीत्येवं परिहृतविक्षेपतया यदा संयमं करोति तदा यत्किञ्चिदतिक्रान्तमनुत्पन्नं वा तत्सर्वं योगी जानाति । यतश्चित्तस्य शुद्धसत्त्वप्रकाशरूपत्वात्सर्वार्थग्रहणसामर्थ्यमविद्यादिभिर्विक्षेपैरजस्रं परिह्रियते यदा तु तैस्तैरुपायैर्विक्षेपाः परिह्रियन्ते तदा निवृत्तमलस्येवादर्शस्य सर्वार्थग्रहणसामर्थ्यमेकाग्रतावलादाविर्भवति ।

## RÁMA IN THE SPRING.

*(Rámáyaṇa, III. 79.)*

*'I sought thee there,*
*And, mourning for my darling, scarce could bear*
*The sweet cool smell of lakes and pleasant showers,*
*The beauty and the perfume of the flowers,*
*And all delights of sight, and sound, and smell;*
*For, without Sita, Heaven itself were Hell.'*

*KALIDASA.*

'Look, brother, at that grove,' he cried,
'That lines sweet Pampá's shelving side.
Those trees of giant girth that rear
Their heads so high, like hills appear.
These are the pleasant days that fire
The youthful bosom with desire;
When soft winds, breathing balm, dispense
Wood odours that enthral the sense,
And pour a ceaseless rain of flowers
As drops the cloud his summer showers.
Look, even as I speak, my head
Is covered with the blooms they shed.
How soft the west wind moves along
To music of the wild bee's song;
His breath is of the woodland spring,
The sandal's odour lades his wing.
Look up, there hardly glimmers through
These arching trees one speck of blue.
Look there, the Cassia's bloom behold,
A giant clad in burning gold.
O happy spring, whom birds rejoice
To welcome with their gladdest voice!
O happy time, but not to me,
For I am wandering far from thee,
My darling of the large soft eye.
That Koïl with his loud shrill cry
Of joy and freedom and desire
That the first days of spring inspire,
Seems calling, as he cheers his mate,
To me all lone and desolate.
See, where the joyous mallard leads
His partner through that fringe of reeds.
Each happy bird, and none alone,
Hails the spring air with gladdest tone,
All revelling in bliss alike,
The swan, the hawk, the dove, the shrike.
Look, brother, in that shady glen
The peacock dances round his hen:
No Giant's hand has reft away
The mate with whom he loves to play.
There, round the Mango blossom, press
Wild bees, with lovers' eagerness.
But ah! the blissful life around,
Each lovely sight, each pleasant sound,
Pierces my very heart, and slays
With memory of perished days,
That flew in heavenly rapture by
With Sita of the roe-deer's eye!'

---

## TARA'S LAMENT.

*(Rámáyaṇa, IV. 22.)*

Tara, widowed of her spouse,
Kissed him on the cheek and brows;
O'er her fallen hero bent,
Called him with this wild lament:
'Still, my lord, without reply?
Is the earth more loved than I,
That thou choosest to recline
On her breast, forsaking mine?
Lord and keeper, good and brave,
Sage to guide and strong to save,
See, thy chiefs, a mournful ring,
Wait around their silent king.
Wilt thou still be stern and mute?
Must they miss thy kind salute?
Dearest, when the morning's red
Calls thee from thy royal bed,
'Tis thy wont to welcome each
With a gift or pleasant speech.
Must thy lords unheeded stay?
Will thou not arise to-day?
Wilt thou not awake from sleep
While thy friends around thee weep?
Look, thy child before thee stands;
Lifts to thee his little hands.
Wilt thou, silent yet, despise
That appeal of wistful eyes?

Ah! my love is dead, is dead.
Look ye, how his wounds have bled;
How the crimson torrents make
Round his limbs a rising lake.
Death, my child, has hurried hence
Him who was our sure defence.
Come, and look on him who thus
Slain in fight has gone from us.
Kiss thy sire and say farewell!'

Came the little child and fell
On his knees and fondly pressed
Those cold feet with arm and breast:
'Here is Angada,' he cried;
'Father, speak!' but none replied.

Weeping, as her child she viewed,
Tara thus her plaint renewed:
'Hast thou not a word—not one—
Father, for thy darling son?
Canst thou still and silent lie,
Hear him call, and not reply?
Husband, by thy bloody bed,
Thus I sit and mourn thee dead;
Like some mother of the herd,
By the lion undeterred,
Mourning in the grassy dell
Where her lord and leader fell.'

## INGRATITUDE.

*(Rámáyaṇa, III. 34.)*

O monarch, hear with mind and ear
The words that Brahma spake.
The thankless man lives under ban;
Who will, his life may take:
'Man for all sin may pardon win,
How deep soe'er the guilt;
Yea, for the stain of Brahman slain,
Whose blood must ne'er be spilt.
Slave to the bowl that kills the soul,
He turns and gains relief;
The liar yet may pardon get,
The perjured, and the thief.
But never can the thankless man
Be pardoned for his crime:
Disgrace and shame shall hunt his name
Through life and endless time.
When, reft of friends, his days he ends
In profitless remorse,
E'en beasts of prey shall turn away
And scorn his loathed corse.'

## NOTICES OF BOOKS.

*Dr. Haug on the word Brahma.**

This is an able and interesting article on the original meaning of the word 'brahma' or 'brahman,' which, as the author justly observes, is the most important word of Hindu theology and philosophy. 'Brahma,' says Dr. Haug, occurs twice in the *Nighanṭavas* as a name for 'food' (*Annanáma* 2. 7.), and for 'riches' (*dhananama* 2. 10). In Sáyaṇa's commentary on the Hymns of the Rig-veda it is sometimes explained with reference to this signification and sometimes in other ways, *ex. gr.* (a) food, in general; 1, 10, 4. *brahma cha no vaso sachendra yajnam cha vardhaya*, "Increase, O Vasu, our *brahma* and also our sacrifice, O Indra." Schol. *anna*, food, in general. More frequently, sacrificial food, as in 4, 22, 1. Schol. *brahma havirlakshaṇa puro ḍáśádikam annam* (b) Performance of the song of the Soma singers, 7, 35, 7. Sáy. *brahma stotram.* (c) Magic charm, spell, *mantra.* 2, 23, 1. *brahmaṇám brahmaṇaspate, i. e.* Lord of the *brahma*, of the *brahmas* (Brihaspati, later called *Ganeśa*) *Schol. brahmaṇám-mantráṇám.* (d) Ceremonies, having a song of praise as their characteristic, *Karmáṇi stuti-lakshanáṇi.* (e) Performance of song and sacrifice (both ideas expressed by one word *brahma*) 7, 23, 1. *Sáy. brahmáṇi stotráṇi havíṅsicha.* (f) The recitation of the Hotri-priests, *brahma stutaśastrátmakam.* (g) Great, 6, 23, 1. *Sáy. brahmaṇi brihati mahati.* These all seem to point to two principal meanings, namely "food," in particular "sacrificial food," and the performance of the song at the sacrifice.

The author proceeds to show that the meaning "devotion" given to the word *brahma* in the St. Petersburg lexicon is quite inapplicable, that feeling in our sense of the word being as foreign to the Veda as it is to modern Hinduism.

The root of the word is *brih* which in its simple form does not appear to be found in the Veda in the sense of to "increase." It is always there found compounded with propositions, as *udbrih, parivṛiḍha* &c. The original meaning of *vrih, brih*, which is to be considered as a mere modification of the root *vridh* "to increase," seems to have been "to raise oneself up." The idea of "devotion" cannot, without forcing, be arrived at from this signification.

In the language of the Zendavesta, so closely connected with the Veda, we find, as far as sound is concerned an absolutely identical word namely *baresman*. By it the Parsís understand a regularly cut bundle of twigs tied together with grass, and used at their Fire-ceremonies exactly as the little clipped bundle of Kuśa grass is used by Brahmans at the Soma-sacrifices. This latter is called *veda* (*Áśval. Śraut. Sútr.* 1, 11.) which passes later as a synonym of *brahma.* This bunch of grass, as well as the *baresman* of the Parsís, has a symbolical meaning. They both represent "growing" "increase," "prosperity." The original meaning of the word was "growth," "sprout" (cf Lat. *virga*). Hence came the meaning "prosperity," "success." As the success of the sacrifice entirely depended upon the holy texts, the chanting, the sacrificial forms and offerings, the word could be used for any one of these essentials. As the chanting of the hymns of praise was the most important of these the word was most frequently employed in this sense. As sacrifice with the Vedic Indians was the chief means to obtain all earthly and spiritual blessings, but was itself useless without the *brahma i. e.* success, the latter was at last regarded as the original cause of all being.

* *Ueber die ursprüngliche Bedeutung des Wortes brahma. Von Dr. Martin Haug, München*, 1868.

# BENARES,

# ANCIENT AND MEDIEVAL:

## A MONOGRAPH.

BY FITZEDWARD HALL, M.A., D.C.L., OXON.

---

*Reprinted by Permission.*

---

Alike as to limits and as to influence, the Indian kingdoms of former times were, with few exceptions, inconsiderable; such of them as lay conterminous were often at open feud; and their cities, or fortified towns, constituted, in fact, their only stable boundaries. It was, probably, with the dominion of the Kásis as it was with other seats of Hindu power. Deriving its origin from some city, as Pratishṭhána,[1] or Váráṇasí,[2] it must have acquired extent and consideration by very gradual development.

At least since a hundred and twenty years before our era, Váráṇasí, as denoting a city, has been a name familiar to Brahmanical literature.[3] The word is crudely referred, by modern inventiveness, to a combination of Varaná and Asi;[1] and all the other explanations which we have of its source are equally questionable.

[1] *Vide infra*, p. 139, col. 2, note 4.

[2] Also called Varáṇasí and Varaṇasí, according to the *Haima-koṡa* and the *Sabdaratnávali*, respectively. The latter of these vocabularies is of small authority.

A rational system of Romanized spelling would give us, instead of Benares, Banáras. The form बनारस was the work, perhaps, of the Muhammadans. It should appear that the metathesis of the semi-vowel and nasal of the original word must be later than the times of Fă Hian and Hiouen Tsang. *Vide infra*, p. 140, col. 2, note 5, p. 141, col. 1, note 1.

In the ordinary belief of the vulgar of Benares, the name of their city is connected with Raja Banár,—a mythical magnate whom we find legendarily associated with the reformer Kabír, of the beginning of the fifteenth century. *Asiatic Researches*, Vol. XVI., p. 57. "According to some of the Muhammadan accounts," says Mr. James Prinsep, but without naming his voucher for the statement, Benares "was governed by a Raja Banár, at the time of one of Mahmúd's invasions, or in A.D. 1017, when one of its generals penetrated to the Province, and defeated the Raja."—*Benares Illustrated*, p. 9. General Cunningham reports that Raja Banár is traditionally believed to have re-built Benares about eight hundred years ago. *Journal of the Asiatic Society of Bengal*, for 1863, Supplementary Number, p. xcvi.

[3] Váráṇasí is specified more than once in Patanjali's *Mahábháshya*. On the age of that work, see my edition of Professor Wilson's translation of the *Vishṇu-puráṇa*, Vol. II., p. 189, *ad calcem*.

[1] So allege the Pandits of the present day; repeating, no doubt, a long-current conceit of their predecessors: see the *Asiatic Researches*, Vol. III., pp. 409, 410. This notion, though it has found expression in the *Araish-i-mahfil* and other recent Muhammadan books, is, I believe, only implied in the Puráṇas. It is said, for instance, in the third chapter of the *Vámana-puráṇa*, that Váráṇasí lies between the Varaṇá and the Asi:

हरिरुवाच ।

महेश्वर शृणुष्वेमां मम वाचं कलस्वनाम् ।
ब्रह्महत्याक्षयकरीं शुभदां पुण्यवर्धिनीम् ॥
योऽसौ ब्रह्माण्डके पुण्ये मदंशप्रभवोऽव्ययः ।
प्रयागे वसते नित्यं योगशायीति विश्रुतः ॥
चरणाद्दक्षिणात्तस्य विनिर्गता सरिद्वरा ।
विश्रुता वरणेत्येव सर्वपापहरा शुभा ॥
सव्यादन्या द्वितीया च असिरित्येव विश्रुता ।
ते उभे च सरिच्छ्रेष्ठे लोकपूज्य बभूवतुः ॥
तयोर्मध्ये तु यो देशस्तत्क्षेत्रं योगशायिनः ।
त्रैलोक्यप्रवरतीर्थं सर्वपापप्रमोचनम् ॥
न तादृशं हि गगणे न भूम्यां न रसातले ।
तत्रास्ति नगरी पुण्या ख्याता वाराणसी शुभा ।
यस्यां हि भोगिनो नाशं प्रयान्ति भवतो लयम् ॥

There is a statement to the like effect in a section of the *Padma-puráṇa*, the *Káśí-máhátmya*, V., 58:

वाराणसीति यत्ख्यातं तन्मानं निगदामि वः ।
दक्षिणोत्तरयोर्नद्यौ वरणासिश्च पूर्वतः ॥

The same idea occurs more than once in a putative appendage to the *Skanda-puráṇa*, the *Káśí-khaṇḍa*. It will suffice to quote XXX., 20, 21:

दक्षिणोत्तरदिग्भागे कृत्वासिं वरणां सुराः ।
क्षेत्रस्य मोक्षनिक्षेपरक्षारिवृतिमाययुः ॥

Particular reference may, also, be made to stanzas 69 and 70 of the same chapter; and similar passages might be extracted from other Puráṇas.

The Asi—now known as the Así, and still trickling during the rainy season, despite Father Vivien de Saint-Martin's scepticism as to its existence,—has a niche in the *Haima-koṡa*, a work of the twelfth century. The Varuná (*si-*) and Así are named in the Calcutta edition of the *Mahábhárata*, *Bhíshma-parvan*, *śl.* 338. But, in my annotations on the English translation of the *Vishṇu-puráṇa*, Vol. II., p. 152, it is surmised that this stanza is an interpolation; and it may be added that is omitted from the text of the *Mahábhárata* as accepted by the commentator Nílakaṇṭha; while the scholiast Arjunamiśra reads, at least in my manuscript, Charuṇá and Asi.

Dr. Schwanbeck—*Megasthenis Indica*, p. 36, note,—is reminded, by Arrian's Ἐρέννεσις, of Váráṇasí. Hereupon, Professor Lassen—*Indische Alterthumskunde*, Vol. I., Appendix, p. LIV.,—precipitately took the two for one; and he still holds to this opinion; for, in the second edition of his great work, Vol. I., p. 161, note 1, (1867), he writes: "Des Megasthenes Erennesis ist die vereinigte Váráṇasí." This "conjunct Váráṇasí"—or, rather, what he unwarrantably calls its modern name, Baráṇaśí,—he compounds, incautiously, after Mr. Walter Hamilton, of two unknown streams, the Vará and the Naśí.

Convertible, in later usage, with Váráṇasí is the designation Káśi [1] or Káśí. [2] Whence it arose history has long forgotten; [1] but conjecture may, possibly, unravel its etymology. [2]

Among the descendants of Áyus[3] was Káśa, whose son is noticed under the patronyms[4] of Káśeya,[5] Káśíya,[6] and Káśi.[7] The regal successors of Káśi, and also their subjects, were called Káśis.[8] Though at first a masculine appellation, Káśi, as applied to the city so styled, is feminine.[9] An exact parallel to this hypothetical evolution is not far to seek. The name of King Champa, femininized, became that of the metropolis of Anga, Champá.[10]

The *Jábá'a-upanishad* places Avimukta—which is a Pauráṇik title of Benares,—between the Varaṇá and the Náśí or Nási; and the commentator, Śánkaránanda, disciple of Ánandátman, etymologizes the words. An anonymous expositor of the same Upanishad, whose work I consulted in India, reads *varaṇá* and *así*, explains them by *pingalá* and *idá*, and makes the result of their combination, *váráṇasí*, in some acceptation or other, to be equivalent to *sushumṇá*. One need not pause to expatiate on such trifling.

Something of the same sort is to be seen in the fifth chapter of the *Káśí-khaṇḍa*.

Father Vivien de Saint-Martin—the genesis of whose fictitious river I trace in note 2 to p. 12, *infra*,—began with being disposed to make the Así an affluent to the Varáṇá, with a Váráṇasí below their confluence, and the city Váráṇasí therefrom denominated. *Mémoires sur les Contrées Occidentales*, Vol. II., p. 361. Here "il serait très-possible que l'un de ces ruisseaux se fût nommé Así, et qu'après sa réunion à la Varáṇála petite rivière eût pris le nom composé de Váráṇasí qu'elle aurait communiqué à la ville." This, as speculation, will pass; but, to this writer, with his bias in favour of the ecclesiastical or mythopœic method of geographizing, what are, at first, only suggestions very soon ripen into indubitable certainties: "Cette rivière [the 'Ερέννεσις], la dernière de la liste d'Arrien, se reconnaît sans difficulté dans la Váránasí, petite rivière qui se jette dans la gauche du Gange à Bénarès, qui en a pris son nom (en sanscrit Váránási)." *Etude sur la Géographie Grecque et Latine de l'Inde*, p. 236.

This author more than inclines to see Váránásí in the words Erarasa (or Cragausa) metropolis, foisted into the Latin translation of Ptolemy. *Ibid.*, pp. 227, 351. Here, very much as above, having to do with a Latin interpolation, he sets out with describing it as such, and as offering "un reste de ressemblance qu'on entrevoit encore à travers la corruption du mot;" and, a little while afterwards, as if process of time necessarily stood for an accession of facts and reasons, persuades himself that he may speak of "une ville que Ptolémée énumère sous le nom altéré d'Erarasa," and that he finds, therein, "la trace bien reconnaissable de Váránási, forme sanscrite de notre Bénarès."

I have everywhere scrupulously reproduced the varieties of spelling indulged in by the writer just cited.

The final *á* and the initial *a* of two words coalescing into a compound might, possibly, yield *a*; and Varaná and Así would, therefore, combine into Varanasí. But this form seems to be the peculiar property of a single recent and very indifferent lexicographer; and, moreover, the name of the second stream is, correctly, Asi, not Así. In the *Káśí-khaṇḍa*, XXX., 1?, it is the subject of a pun, in connexion with *asi*, "a sword."

[1] This is the oldest form, and that recognized in the *Haima-kośa* and by Ujjwaladatta's commentary on the *Uṇádi-sútra*.

[2] Káśi is not so markedly feminine as the more usual Káśí, its derivative. Most Indian cities have feminine appellations.

Káśiká is found in the *Káśí-khaṇḍa*, XXX., 70, and elsewhere. Compare Avantiká, for Avanti, as in note 1 to p. 142, col. 2., *infra*.

[1] The vocabularists refer the word to *Káś*, "to shine." And herewith agrees the *Káśí-khaṇḍa*, XXVI., 67:

काशते ऽत्र यतो ज्योतिस्तदनाख्येयमीश्वर ।
अतो नामापरं चास्तु काशीति प्रथितं विभो ॥

In the stanza immediately preceding this, the city is called Muktikshetra. Kṛishṇa is speaking; and he says that the radiance of Káśí emanates from Śiva.

If, where they interpret Káśí by "splendid," Colonel Wilford and his numerous followers intend to take the word from the adjective *káśin*, they have forgotten that the feminine is not *káśí*, but *káśiní*. See the *Asiatic Researches*, Vol. III., p. 409.

[2] Professor Wilson has already written: "It seems probable* that the city [of Káśi] was founded, not by him [Kshattravṛiddha], but by his grandson or great-grandson, denomintated Káśa and Káśirája." Mr. James Prinsep's *Benares Illustrated*, p. 8. It is meant, here, I suppose, to hint a derivative connexion of Káśi with Káśa or Káśirája. The latter name Professor Willson everywhere puts, erroneously, for "King Káśi." See note 7 in the present page.

[3] See the English *Vishṇu-puráṇa*, Vol. IV., pp. 30–32.

[4] Compare Máṇḍúkeya, from Máṇḍúka; and Śwáphalki, from Śwaphalka.

[5] So reads the *Harivamśa*, *śl.* 1734, in the best MSS. accessible to me.

[6] *Gaṇa* on Páṇini, IV., II., 90; and the *Brahma-puraṇa*.

[7] *Bhágavata-puráṇa*, IX., XVII., 4. In the *Vishṇu-puráṇa*, he is called *Káśirája*; but the term, a compound, is there to be explained "Raja Káśí." Differently, *Káśirája*, *Káśipati*, ect., descriptive of Ajátaśatru, Divodása, Pratardana, and others, signify "Raja of the Káśis." That काशिराजः may be the same as काशिषु नृपः is clear from the *Mahábhárata*, *Anuśásana-parvan*, *śl.* 1949 and 1952.

[8] Káśi's successors were likewise known as Káśyas and as Káśikas. These terms are, all, actually employed. The last is, also, applied to persons or things pertaining to Káśi.

[9] Kunti, a woman, was so called from Kunti, a man.

Káśi, according to the *Vishṇu-puráṇa*,—see the English translation, Vol. IV., p. 159,—was the name of the wife of Bhímasena. The reading is, however, erroneous, most probably. I find, as a variant, Káśeyí. This like the corresponding Káśyá of the *Mahábhárata*, *Ádi-parvan*, *śl.* 3829, is a derivative of Káśi.

[10] See the English *Vishṇu-puráṇa*, Vol. IV., p. 125.

I am not unaware of the *gaṇa* on Páṇini, IV., II., 82.

The term Káśi, denominating, if not a city,[1] a people and its chieftains, occurs repeatedly in Sanskrit works of all but the highest antiquity.[2] Of Káśi, in whatever sense of the word, we cannot, however, collect, from indigenous records, materials from which to construct anything approaching a history. The kingdom of the Káśis, and its rulers, as is evinced by the frequency of reference to them, enjoyed, from distant ages, more or less of notoriety; and this is, substantially, all that the Hindu memorials teach us.

[1] "In the *Mahábhárata*, frequent mention of Káśi occurs," according to Professor Wilson, as quoted in *Benares Illustrated*, p. 8. I should be much surprised to find Káśi mentioned even once in the *Mahábhárata*.

Not till medieval times, it seems, do we read of the city of Káśi. To the authority, on this behalf, of the Puráṇas may be added that of an inscription which I have deciphered and published in the *Journal of the Asiatic Society of Bengal*, for 1862, pp. 14, 15. The document in question, a land-grant was issued by Vináyakapála, Raja of Mahodaya or Kanauj, about the middle of the eleventh century, it may be. Káśi is there indirectly described as in the *vishaya* of Váráṇasí, in the *bhukti* of Pratishṭhána. For Pratishṭhána, *vide infra*, col. 2, note 4.

It is, in my judgment, very doubtful indeed that Ptolemy's Κασσίδα metamorphoses Káśi, as has been confidently asserted by Colonel Wilford and very many others. See the *Asiatic Researches*, Vol. III., p. 410; Vol. IX., p. 73.

Fă Hian may have intended to reproduce *Káśirájya*, "kingdom of the Káśis," in his words rendered by "le royaume de *Kiachi*." *Víde infra*, p. 140, col. 2, note 5.

The expression काशिपुरीं वाराणसीं, in the *Daśa-kumára-charita*, means "Váráṇasí, a city of the Káśis." In the subjoined verse, from the *Rámáyaṇa*, *Uttara-káṇḍa*, XXXVIII., VI., 17, Váráṇasí is qualified by an expression meaning, the commentator says, "a city in the country of the Káśis:"

तद्भवानद्य काशेयपुरीं वाराणसीं व्रज ।

Finally, in the *Mahábhárata*, *Ádi-parvan*, *śl*. 4083, 4084, we read of the king of the Káśis as dwelling in the city of Váráṇasí.

[2] The oldest among them, probably, is Páṇini, IV., II., 116; with which compare IV., II., 113. Then come the *Śatapatha-bráhmaṇa*, the *Bṛihad-áraṇyaka* and *Kaushítaki-bráhmaṇa Upanishads*, etc., etc. In some of these works, the substantive is involved in the adjective Káśya. This word, like Káśika,—for which see the *Mahábhárata*, *Udyoga-parvan*, *śl.* 5907,—means, etymologically, Káśian. But scholiasts on old writings explain it, and rightly, to signify "king of the Káśis." Káśirája and Káśya are used of the same person in the *Bhagavad-gítá*, I., 5, 17.

The *Ṛigveda* affords no warrant for connecting with the Káśis any person whom it mentions. It speaks of Divodása, and it speaks of Pratardana; but only in later literature are they called father and son, and rulers of the Káśis; and, where Kátyáyana, in his *Ṛigvedánukramaṇiká*, characterizes the latter as *Káśirája*, he may have expressed himself metachronically, under the influence of a modern tradition which he and his contemporaries accepted. As to the former, we find, indeed, in post-vaidik books, two Divodásas; into whom a single personage seems to have been parted.

The Puráṇas specify but one dynasty of Káśi kings; a goodly catalogue, beginning, in the most authoritative of those works, with the son of Káśa.[1] To Káśa, after a lapse of perhaps two centuries, succeeded Divodása, in whose reign Buddhism seems to have been still acting on the aggressive.[2] In this synchronism there is no discernible improbability; and, with some likelihood, it embodies an historic fact. A reflexion of actual events may, likewise, be afforded in the story of the burning of Váráṇasí by the discus of Vishṇu.[3] Of the age of Ajátaśatru, as of other very early leaders of the Káśis, none but most vague indications have, as yet, been discovered. Some of these personages ruled, not at Benares, but at Pratishṭhána;[4] and, at the time of

One of them is son of Badhryaśwa, as in the *Ṛigveda*; but it is the other, the son of Bhímaratha, and father of Pratardana, that is called king of the Káśis. It may be added, that there is no ground for considering Badhryaśwa and Bhímaratha to be two names of one and the same person. See the English *Vishṇu-puráṇa*, Vol., IV., pp. 33, and 145, 146. Badhryaśwa, not Bahwaśwa, is the reading of the *Vishṇu-puráṇa*. Correct accordingly Professor Wilson's translation of the *Ṛigveda*, Vol. III., p. 504, note 1. See, further, the *Mahábhárata*, *Anuśásana-parvan*, Chapter XXX.

[1] A Káśa is named in the *gaṇa* on Páṇini, IV., I., 110.

According to my five wretched copies of the *Váyu-puráṇa*, Káśa was followed by Káśayya (??), Ráshṭra (??), Dírgha-tapas, Dharma, Dhanwantari, Ketumat, Bhímaratha, Divodása,

The *Brahmáṇḍa-puráṇa* has, in one place, Káśa and Káśiya, as sire and son, and, a little further on, in lieu thereof, Káśika and Káśeya. Káśika, as evolving Káśeya, must be considered as an optional elongation of Káśi.

[2] See the English *Vishṇu-puráṇa*, Vol. IV., pp. 30–40. We read, in the *Váyu-puráṇa*:

दिवोदास इति ख्यातो वाराणस्यधिपो ऽभवत् ।
एतस्मिन्नेव काले तु पुरीं वाराणसीं पुरा ।
शून्यां निवेशयामास क्षेमको नाम राक्षसः ॥

Then follows an account of the expulsion of Divodása from Váráṇasí. To all appearance, he was the only king of the Káśi family that had to do with that city.

[3] See the *Vishṇu-puráṇa*, Book V., Chapter XXXIV.

[4] Its site was near Allahabad. Púru's capital was Pratishṭhána, in the kingdom of the Káśis, according to the *Rámáyaṇa*, *Uttarakáṇḍa*, LIX., 18, 19:

त्रिदिवं स गतो राजा ययातिर्नहुषात्मजः ॥
पूरुश्चकार तद्राज्यं धर्मेण महतावृतः ।
प्रतिष्ठाने पुरवरे काशिराज्ये महायशाः ॥

Before Púru, his father, Yayáti, "lord of all the Káśis," reigned at Pratishṭhána. *Mahábhárata*, *Udyoga-parvan*, *śl.* 3905 and 3918.

Purúravas received Pratishṭhána in gift from his father Sudyumna. English *Vishṇu-puráṇa*, Vol. III., p. 237. Also see Burnouf's *Bhágavata-puráṇa*, Vol. III., Preface, pp. XCVII.-XCIX.

Pratishṭhána appears as a district of the kingdom of which Kanauj was the metropolis, in comparatively recent times *Vide supra*, col. 1, note 1.

the Muhammadan conquest, Benares and the surrounding country appertained to the throne of Kanauj.[1]

Flagrant as is the exaggeration of the Hindus, it is surpassed by that of the Buddhists. The Brahmadatta who figures so largely, in their sacred writtings, as king of Benares[2] very likely was not a myth;[3] but there is no ground for crediting that Gautama ever governed that city at all, notwithstanding that they represent him to have reigned there during nineteen several states of existence.[4] In a similar spirit, they assert, that, at the same capital ruled, in turn, eighty-four thousand monarchs descended from Aśoka.[5] From these specimens it is manifest that the Buddhist scriptures are little to be trusted for throwing light on the history of Benares. That Buddhism, or any Buddhism, or any Buddhist king, ever dominated there is altogether problematical.

Pratishṭhána is the name of a kingdom, or of part of one, in the *Kathá-sarit-ságara*, VI., 8.

[1] *Vide supra*, p. 139, col. 1, note 1. Several Sanskrit land-grants have been published,—two, among them, by myself,—from which it appears that the kings of the latest dynasty of Kanauj, from Madanapála to the unfortunate Jayachandra, were masters of Benares, like their predecessors; and that they were so is, further, to be inferred from the Muhammadan historians.

In the fifth volume of the *Asiatic Researches* is a professed transcript of a short inscription from a stone, now long disappeared from sight, which was exhumed near Benares, in 1794. We read, therein, of a king of Gauḍa, Mahípála, father of Sthirapála and Vasantapála; and, at the end, the date 1083. An easy credulity may accept these statements no longer possible of verification; but there still remains the question as to the era of the year 1083, whether Vikramáditya's, or Śáliváhana's—better Sátavábana's,—or Harsha's, or whose. Not only are the blunders in this inscription, as printed, so many and so gross that we are forbidden to suppose they were in the original; but they provoke the surmise that the interspersed patches of the record which read as if correct may be, to a large extent, equally products of ignorant mistake and misrepresentation. A good deal of weight has been allowed to this inscription; and it has been, from time to time, honoured as a piece of genuine historic evidence. Uncritically enough, I once followed the herd, myself, in this respect: see the *Journal of the Asiatic Society of Bengal*, for 1862, p. 8, first foot-note. It now appears to me rash to see, in it, proof that Benares was subordinate to Gauḍa, or anything else whatever claiming reliance.

[2] Burnouf's *Introduction à l' Histoire du Buddhisme Indien*, Vol. I., p. 140; and Mr. R. S. Hardy's *Manual of Buddhism*, p. 101.

[3] Two other kings of Benares, unknown to the Hindu chronicles, are spoken of by the Buddhists. Their names are Bhimaśukla and Brihanmanas (?). See *Der Buddhismus*, translated from the Russian of Professor Wassiljew, Part I., p. 54; and the *Foë Koue Ki*, p. 230.

[4] Mr. R. S. Hardy's *Manual of Budhism*, p. 134.

[5] So states the *Dípavaṃśa*. See the *Journal of the Asiatic Society of Bengal*, for 1838, p. 927.

Some relevant details, scant, but interesting as far as they go, are derivable from the itinerary of Hiouen Tsang,[1] a Buddhist pilgrim from China, who visited India in the first half of the seventh century. At that date, as he informs us the kingdom of Váráṇasí had a circuit of eight hundred miles,[2] while its capital measured nearly four miles by somewhat more than one. The inhabitants of the kingdom were, for the most part, Hindus. These were, mainly, worshippers of Śiva; and among them were two classes of ascetics.[3] Their temples amounted to a hundred, which gave lodgement to about ten thousand devotees.[4] The Buddhists, who are stated to have been much in the minority, kept up thirty religious houses, tenanted by three thousand inmates, all of the Sammatíya sect. In the capital[5] were twenty Hindu temples, and a latten statue of Śiva, a hundred feet in height. We are not apprised whether

[1] *Mémoires sur les Contrées Occidentales*, Vol. I., pp. 353, *et seq.*

[2] "About four thousand *lis*." On the length of the *li*, consult Father Vivien de Saint-Martin, in *Mémoires*, etc., Vol. II., pp. 356-259.

[3] On M. Julien's own showing, both in the *Mémoires* and in the *Méthode*, one of these classes, that of naked mendicants, has the name, in Chinese transplettering, of *ni-kien-t'o*, *i.e.*, *nigganthа*, or even *nigánth*,—a Prakrit word softened from the Sanskrit *nirgrantha*, which the French translation exhibits. Nowhere in his works does M. Julien acknowledge, what he must have known full well, that he constantly puts into the mouth of Hiouen Tsang Sanskrit vocables, where he really used Prakrit. But there was a theory to support; and facts must be fitted to it.

[4] In the first instance, M. Julien wrote: "On compte une centaine de temples des dieux (*Dévâ'ayas*) où habitent environ dix mille hérétiques, qui, la plupart, adorent le dieu *Ta-tseu-t'sâi-t'ien* (*Mahêçvara dêva*)." And there should seem to be no improvement in his subsequent rendering: "On voit une centaine de temples des Dieux. Il y a environ dix mille hérétiques qui, la plupart, révèrent le dieu *Tatseu-thsaï* (Mahêçvara Déva)."

The Chinese does not, to be sure, as the translator at first expressed it, literally quarter the aforesaid heretics in the temples, or, rather, monasteries; and yet its indefiniteness easily endures this interpretation. So I am informed by Professor Summers, my obligations to whom I shall presently acknowledge in connexion with a matter of graver import. And this construction alone quadrates with the previous context. For Hiouen Tsang makes Benares a large kingdom, and one in which the Hindus much outnumbered the Buddhists; and there must, then, have been many times ten thousand of the former.

One need do no more than collate M. Julien's two versions of Hiouen Tsang's short account of Benares, to be satisfied that the translator's notion of the sense of his original is, sometimes, of the vaguest.

[5] Its name is not specified. Fă Hian—of the beginning of the fifth century, and so an earlier traveller than Hiouen Tsang,—is translated as speaking of "la ville de *Pho lo naï*, dans le royaume de *Kia chi*." *Foë Koue Ki*, p. 304.

there were any sacred edifices of the pilgrim's fellow-religionists in the capital itself; and the obvious inference is, that there were none, or none worth commemorating. On the monasteries, towers, and reservoirs of the immediate vicinity,[1] hallowed by Buddhist associations, Hiouen Tsang dwells at great length, and with that lingering and minutiose reminiscence which marks a credulous and fervid piety.

[1] Two of these remembrancers of the Buddhist faith, towers at Śárnáth, beyond the Varaṇá or Burna, are still conspicuous landmarks. The larger of them is called, by the natives, Dhamekh,—a corruption, in all likelihood, of an old word involving *dharma* as its first factor.

On the word of M. Stanislas Julien, Hiouen Tsang locates a monument "au nord-est de la capitale, et à l'occident du fleuve de *Po-lo-ni-sse* (Váráṇaçí)," and tells of a certain monastery at the distance of "environ dix li au nord-est du fleuve de *Po-lo-ni-sse* (Váráṇaçí)." In a foot note, the phrase "à l'occident du fleuve de *Po-lo-ni-sse* (Váráṇaçí)" is explained to signify "à l'occident du Gange."

As the Chinese pilgrim again and again names the Ganges, it seemed to me unlikely that he should anywhere speak of it by a periphrasis like that of "the river of London." I had observed, too, that, instead of "environ," etc., M. Klaproth had written: "Au nord [*sic*] de la ville coule la rivière *Pho lo nă* (Varaṇá); sur son bord, à dix *li* de la ville," etc.; *Pho lo nă sse* being, as he says just before, Hiouen Tsang's name for Benares. Moreover, in M. Julien's "Liste des Mots Abrégés ou Corrompus," I noticed the entry "*Po-lo-naï*, faute pour *Po-lo-ni-sse* (Váráṇaçí);" and I was thereby, unavoidably misled to the conclusion that *Po-lo-naï*, the so-called shortened or depraved form of *Po-lo-ni-sse*, must be employed in the original, the passage or passages containing it being left undesignated by the translator.

No one can give much thought to the labours of M. Julien without detecting that they were never executed in contemplation of circumspect perusal. Warned by my past experience, and weighing the premisses just recited, I at once suspected management, issuing in the obliteration, in two places, of the river Varaṇá. I had recourse to Professor James Summers, a distinguished Sinologist; and my suspicion was changed into certitude.

Especially ought M. Julien to have abstained from mending his text here by guess,—above all unconfessedly,—inasmuch as, where the name *Po-lo-ni-sse* is first introduced there is, in the Chinese, a gloss,—delusively appropriated by the translator, as we have seen,—notifying that the kingdom so named had aforetime been called, by mistake, *Po-lo-naï;* the spelling, in passing, of the *Foĕ Kouĕ Ki*. It was not surely, to be expected, that, close to this notification, we should find—and not once only, but twice,—*Po-lo-nie* (Varaṇá), of *Po-lo-ni-sse* (Váráṇasi), had been intended. M. Julien, however, deemed otherwise; and he unavowedly took for granted, besides, that, in both these instances, *Po-lo-nie* was a corruption of the already corrupt *Po-lo-naï*.

Father Vivien de Saint-Martin, in his geographical commentary on M. Julien's translation, is pleased to substitute, or "fleuve de *Po-lo-ni-see* (Váráṇaçí)," "rivière *Po-lo-ni-ssĕ* Váráṇasí);" and he proceeds to suggest,—as I have shown above, in note 1 to p. 137, col. 2,—that the city of Benares borrowed its appellation from that of this imaginary stream, held, by him, to be identical with the 'Ερέννεσις of Arrian.

That, in very early days, Benares came short of prominent fame is a conclusion apparently indicated by all extant evidence. And so it was during the period of the Buddhists. So far as we know, these sectaries, unlike the Muhammadans, never assumed an attitude of vehement hostility as against the Hindus. Not only was the character of their religion pacific, but at no time during their presence in India[1] were they, however in the ascendant, beyond doubt a majority of the people. It was but natural for their founder, in the course of his mission, to take thought of the centres of population;

More than this, M. Julien, in one of his Indexes, writes "Váráṇaçí, rivière, aujourd'hui Bana, l'Erinésès des Grecs;" and the violence which Father Vivien de Saint-Martin does to his text has, thus, his implied acquiescence. So important an alteration of opinion as that herein involved certainly called for specific acknowledgment in his "Errata Alphabétique," a list which extends to seven pages.

In fine, M. Julien has no Sanskrit authority whatever for his "Váráṇaçí," *i.e.*, Váráṇaśí. *Po-lo-ni-sse* may, indeed, stand for Váráṇaśí, but—so indeterminate is the Chinese alphabet,—may just as well disguise Váráṇasí, Varáṇasí, Varaṇasí, Báránaśí and scores more of quadrisyllables. M. Julien allows us an option between *Po-la-na-sse*, *Po-lo-ni-sse Po-lo-ni-se* and *P'o-lo-ni-sse*, and between "Váráṇaçí" and "Váráṇaçí." It cannot be proved that Hiouen Tsang did not hear, and do his best to spell, as the names of the river and city, Barṇá—the very word now used,—and Baráṇas. Indeed, the balance of probability is overwhelmingly in favour of the position, that the Indian proper names translettered by Hiouen Tsang were Prakrit, not Sanskrit. Perhaps it is not strange that M. Julien, in drawing up his suicidal *Méthode*, and even earlier, chose to shut his eyes to this presumption. *Vide supra*, p. 140, col. 2, note 3.

"With M. Julien's method, mathematical certainty seems to have taken the place of learned conjectures." So we read, in the *Saturday Review*, Vol. XI., p. 247 (1861), in an article lately republished as Professor Max Müller's. Finding M. Julien's method to be much more precarious than it appears at first sight, I took occasion, some years ago, with ample exhibition of reasons, to reclaim against this heedless hyperbole of panegyric. Continued examination has multiplied my arguments of protest; and I am convinced that one will do well to use M Julien's volumes, valuable and instructive as they are, with constant caution.

That M. Julien, for all the self-complacent air of his *Méthode*, has truck out a single idea, save of detail that was unknown to M. Rémusat and the editors of the *Foĕ Kouĕ ki*, I have not succeeded in discovering.

*Memoires sur les Contrées Occidentales*, ect., Vol. I., p. 354; Vol. II., pp. 345, 360, 361, 479, 562: *Foĕ Kauĕ Ki*, p. 307: *Histoire de la Vie de Hiouen-Thsang*, ect., pp. 83, 132, 429, 464: *Chips from a German Workshop*, Vol. I., p. 296: *Journal of the Asiatic Society of Bengal*, for 1861, pp. 334-336.

[1] How the Buddhists came to leave India has not yet been shown satisfactorily. The *Śankara-digvijaya* of Mádhava—which professes to abridge an older work, but which, perhaps, has no better basis, for the most part, than oral tradition, eked out by romance,—bears witness, it is true, to a ferocious spirit of opposition to those religionists; and such a spirit, if entertained after they had become strangers to the country, may have been entertained while they were still face to face with Hindus. Nevertheless, we have no historical proof that India was ever the theatre of a Buddhist persecution. Few Sanskrit manuscripts exist that were copied more than four or five centuries ago, at which time Indian

and the spots which he and his disciples signalized by their teachings were reverently regarded, in after ages, as consecrated ground. These spots were, however, in the neighbourhood of cities,—as Gayá, Mathurá, Ayodhyá, and Benares, [1]—rather than in the cities themselves; and it was not till after Buddhism had passed its prime on Indian soil, that these towns acquired the special repute which now attaches to them. As for Benares, the attribution to it of peculiar sanctity seems to date from the period of the Puráṇas; [2] and some of these compositions may, unquestionably, claim a very respectable antiquity.

A diligent perusal of the copious inanity of the *Káśí-khaṇḍa* might lead to the discovery of its era,[3] and to other chronological determinations. In so recent a

Buddhists must have been very rare, if there were any at all. Neither among the Hindus nor among the Jainas has one ever observed anything like that liberality of literary curiosity which would be at much pains to perpetuate, by transcription, the holy writ of an antagonist creed; and the fact of a persecution of the Buddhists cannot, accordingly, be deduced from the fact that their books are now but very rarely met with in the possession of natives of India.

Considering the character of their respective beliefs, the Buddhists and the Hindus were under no obligation to be truculently inimical to each other. There is even reason to believe that there were medieval Indian kings who, from motives of policy, adiaphorized between the two great classes of the faithful into which their subjects were divided. For instance, a position of practical indifference in respect of the prevailing superstitions seems to be ascertained with reference to Harsha, king of Kanauj in the seventh century. Hiouen Tsang speaks of him much as if he were a Buddhist; and Báṇa, in the *Harsha-charita*, writes of him as if of a Hindu. Further, we find that monarch figuring as dedicatee of the *Nágánanda*, and also of the *Ratnávalí*, two dramas, severally Buddhist and Brahmanical.

For the *Harsha-charita*, and the *Nágánanda*,—of which I discovered copies, after these works had slumbered neglected for many generations,—see my *Vásavadattá*, Preface, pp. 12-18 and 50-54; and the *Journal of the Asiatic Society of Bengal*, for 1862, pp. 12, 13. See further, on the Buddhists in Southern India, Professor Wilson's *Mackenzie Collection*, Vol. I., Introduction, pp. lxiii.-lxvi.

[1] It is very true, that, all the way between Benares and the towers at Sárnáth, the fields are thickly strewed with bricks and other remains of former buildings. But I am not aware that Colonel Wilford has any authority for speaking of "the old city of Benares, north of the river Burna," which old city, he says, is sometimes called Śoṇitapura. *Asiatic Researches*, Vol. IX., p. 199.

[2] Professor Wilson asserts, characteristically, that Benares "has been, from all time, as it is at present, the high place of the Śaiva worship." Translation of the *Vishṇu-puráṇa*, Book V., Chapter XXXIV., last note.

In the twelfth century, as we learn from the *Haima-kośa*, Benares was already distinguished as Śivapurí, "the city of Śiva;" and we may thence gather that the worship of Śiva especially predominated there at that time.

[3] "There is every reason to believe the greater part of the contents of the *Káśí-khaṇḍa* anterior to the first attack upon Benares by Mahmúd of Ghazní." Thus pronounces Professor Wilson, in his translation of the *Vishṇu-puráṇa*, Vol. I., Preface, pp. LXXII., LXXIII. It would be interesting to be put in possession of even a single reason out of those to which the Professor alludes.

composition, and one having to do with real localities, there must, almost of necessity, be many facts interwoven with the fictions: the attempt to discriminate them would, perhaps, be remunerated. The Benares of the present day offers numerous and varied objects of interest[1] to the contemplation of the devout Hindu; and yet, a very few of them excepted, to speculate touching their age, in reliance on the data hitherto made available, would be much too perilous for prudence.

[1] Unless we are deceived by identity of names, scores of these are enumerated in the *Káśí-khaṇḍa*.

In the last chapter of that work, cycles of pilgrimages are prescribed, as means to particular ends, precisely as at this hour. Thus: there is one round to warrant the practitioner from liability to further metempsychosis; another, to secure the attainment of Rudrahood; a third, to ensure emancipation before death. These for samples.

Saints whose aspirations are less ambitious are promised store of good things in future for repeating the *Panchatírthiká* daily. This consists in: (1) ablution, without disrobing, in the pool of Chakrapushkariṇí, with a propitiation-service addressed to the gods, manes, Brahmans, and beggars; (2) reverential salutation to Áditya, Draupadí, Vishṇu, Daṇḍapáṇi, and Mheśwara; (3) visual contemplation of Ḍhuṇḍhivináyaka; (4) a dip of the fingers in the Jnánavápí well with adoration of Nandikeśa, Tárakeśa, and Mahákáleśwara and, finally, (5) a second visit to Daṇḍapáṇi.

Of seven pre-eminently holy places Káśí is named first; the others being Kántí, Máyá, Ayodhyá, Dwáravatí, Mathurá, and Avantiká:

काशी कान्ती च मायाख्या त्वयोध्या द्वारवत्यपि ।
मथुरावन्तिका चैताः सप्त पुर्यो ऽत्र मोक्षदाः ॥

VI., 68.

Máyá is Hurdwar. I am not sure whether or not Kántí is the same as Kánchí. The rest are well known. These places are, all, named in the *Ayeen Akbery*, in Mr. Gladwin's translation of which,—Vol. III., pp. 255, 256,—Mathurá and Avantiká are disguised as Mehtra and Ownitka.

At least thirty or forty epithetical designations of Benares are scattered through the *Káśí-khaṇḍa*. Half of that number, or thereabouts, from this or some other work or works, have been noted by native lexicographers. One of them, Panchanadatírtha, "the quinquamnian resort," refers to five rivers, the Kiraṇá, Dhútapápá, Saraswatí, Gangá, and Yamuná:

किरणा धूतपापा च पुण्यतोया सरस्वती ।
गंगा च यमुना चैव पञ्च नद्यो ऽत्र कीर्त्तिताः ॥
अतः पञ्चनदं नाम तीर्थं त्रैलोक्यविश्रुतम् ।

LIX., 114, 115.

Four of these streams, in small quantities, are believed to emerge into the Ganges, through subterraneous channels, just in front of the Panchagangá landing.

*(To be continued.)*

ADVERTISEMENT.

NOW READY.

PRASANNARAGHAVA a Sanskrit Drama, in 7 Acts, by JAYADEVA, carefully edited with Sanskrit renderings of the Prakrit passages, by PUNDIT GOVINDA DEVA SASTRI, Professor of Hindú Astronomy in the Benares Sanskrit College.

Price Rs. 1-12 excluding postage. To be had direct from the Editor of the book.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

# काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

# THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 31. Benares December 1st, 1868. Vol. III.


## ॥ ईश्वरप्रत्यभिज्ञासूत्रविमर्शिन्याः ॥

क्रियाधिकारस्यावशिष्टोंशः । आगमाधिकारस्यावशिष्टान्तिमांशमाह्निकद्वयं च ।

ननु प्रयोज्यप्रयोजकसत्ताकत्वलक्षणापेक्षा यदि स्वात्मैकनिष्ठत्वे नोपपद्यते, तर्हि कार्यकारणयोस्तादात्म्यवादिनां सांख्यानां मते सा संभवत्येव, तत्किं चैतन्यविजृम्भात्मककर्तृवादसमर्थनेनेत्याशङ्क्याह ।

(१७) परस्परस्वभावत्वे कार्यकारणयोरपि ।
एकत्वमेव भेदे हि नैवान्योन्यस्वरूपता ॥

यदि बीजस्याङ्कुरः स्वभावस्तर्ह्यङ्कुर एव न बीजं स्यात्किंचिद्विपर्ययो वा स्यादिति किं कारणं किं वा कार्यम्, अथान्यद्बीजमङ्कुरोन्यस्तर्हि न परस्परात्मकत्वं, भेदाभेदौ ह्येकदैकविषयौ विरुद्धावेव ॥

नन्वेकमपि बीजमङ्कुरादिविचित्रमवभातं दीर्घदीर्घपरामर्शशालिभिः स्रोतोवदविच्छिन्नस्वरूपमेव निर्बाधं प्रत्यवमृश्यते, तथा च क्व गतं बीजमिति प्रश्ने वक्तारो भवन्ति, न कुत्रचिद्गत,मङ्कुरात्मना वर्तते ऽङ्कुरीभूतमयमङ्कुरस्तदि,त्येवं प्रधानं महदादिधरान्तीभूतं यावद्वितततीभूतमनन्तसर्गप्रलयपरम्परात्मतां प्राप्तमिति विततयाहिणी प्रतीतिर्भागाभिनिवेशवशात्तु कार्यकारणतापरिकल्पनं तस्यैव भावस्य विशसनप्रायमित्याशङ्क्याह ।

(१८) एकात्मनो विभेदश्च क्रियाकालक्रमानुगा ।
तथा स्यात्कर्तृतैवैवं तथा परिणमत्तया ॥

इह दीर्घदर्शिनां प्रत्यक्षानुमानागमान्यतमप्रमाणमूलां प्रत्यभिज्ञामाश्रित्य तदेवेदं सुखदुःखमोहसाम्यमनन्तप्रकारवैषम्यावलम्बनेन विश्वीभूतमिति समर्थ्यते, तत्र प्रत्यभिज्ञाबलेन यदेकात्मकमेकस्वभावं तस्य यो भेदोन्यान्यरूपता इयमेव सा क्रियोच्यते, यतः काललक्षणेन क्रमेणानुगता, ते ह्यन्यान्यस्वभावा न युगपद्भान्ति, पूर्वापरीभूतरूपतैव च क्रियोच्यते, यत एवं क्रिया तथेति तेन प्रकारेण प्रधानादेः क्रियाविशेषलक्षणेन कर्तृतैव स्यात्, न तु शुष्कं कारणतामात्रम्, यतो हेतोस्तथेति तेनतेन महदादिप्रकारेण सततमेव क्रमिकां तथाभासनरूपां परिणामलक्षणां क्रियामाविशतः परिणमता किंचिद्रूपं परिवर्ज्यं त्यक्त्वा व्यावर्त्यमनुवर्तयितव्यं च व्यवस्थाप्य निर्वर्त्यमानतृतीयरूपं प्रहूता प्रधानादेस्तया हेतुभूतया ॥

ननु प्रधानं परिणामक्रियायां कर्तृरूपमियता समर्थितमिति को दोषः नहि पुरुषवदस्याः कर्तृत्वमिष्यते इत्याशङ्क्याह ।

(१९) न च युक्तं जडस्यैवं भेदाभेदविरोधतः ।
आभासभेदादेकत्र चिदात्मनि तु युज्यते ॥

एवमित्यभिन्नरूपस्य धर्मिणः सततप्रवहद्बहुतरधर्मभेदसद्भेदस्वातन्त्र्यलक्षणं परिणमनक्रियाकर्तृकत्वं यदुक्तं, तत्प्रधानादेर्न युक्तं, जडत्वात् । जडो हि नाम परिनिष्ठितस्वभावः प्रमेयपदपतितः, स च रूपभेदाद्भिन्नो व्यवस्थापनीयो नीलपीतादिव,देकस्वभावत्वाच्चाभिन्नो नीलवत्, न तु स एव स्वभावो भिन्नश्चाभिन्नश्च भवितुमर्हति, विधिनिषेधयोरेकत्रैकदा विरोधात् । कश्चित्स्वभावो भिन्नः कश्चित्त्वभिन्न इति चेत्, द्वौ तर्हीमौ स्वभावावेकस्य स्वभावस्य भवेताम्, न चैवं युक्तं, ।

भेदाभेदव्यवस्थैवमुच्छिन्ना सर्ववस्तुषु ।

इति न्यायात् । एवं जडस्येदमिति परिनिष्ठिताभासतया सर्वतः परिच्छिन्नरूपत्वेन प्रमेयपदपतितस्य नायं स्वभावभेद एकत्वे सत्युपपद्यते । यत्तु प्रमेयदशापतितं न भवति, किं तु चिद्रूपतया प्रकाशपरमार्थरूपं चिदेकस्वभावं स्वच्छं तत्र भेदाभेदरूपतोपलभ्यते, अनुभवादेव हि स्वच्छस्यादर्शादेरखण्डितस्वस्वभावस्यैव पर्वतमतङ्गजादिरूपसहस्रसंभिन्नं वपुरुपपद्यते, न च रजतद्विचन्द्रादि यथा शुक्तिकैकचन्द्रस्वरूपतिरोधानेन वर्तते तथा दर्पणे पर्वतादि, दर्पणस्य हि तथावभासे दर्पणतैव सुतरामुन्मीलति निर्मलोयमुत्कृष्टो ऽयं दर्पण इत्यभिमानात्, नहि पर्वतो बाह्यस्तत्र संक्रामति, स्वदेशत्यागप्रसङ्गादस्य, न चास्य पृष्ठे ऽसौ भाति, दर्पणानवभासप्रसङ्गात्, न च मध्ये, निबिडकठिनसप्रतिघस्वभावस्य तत्रानुप्रवेशसंभावनाभावात्, न पश्चात्,तत्रादर्शनात्, दूरतयैव भासनात्, न च तद्विपतनोत्फलितप्रत्यावृत्ताश्चाक्षुषा मयूखाः पर्वतमेव गृह्णन्ति, प्रतिबिम्बबिम्बयोरुभयोरपि पर्वतपार्श्वगतदर्पणावभासे ऽवलोकनात् । तस्मान्निर्मलतामाहात्म्यमेतद्, यदनन्तावभाससम्भेदश्चैकतानता च । गिरिशिखरोपरिवर्तिनश्च एकत्रैव बोधे नगरगतपदार्थसहस्राभास इति चिद्रूपस्यैव कर्तृत्वमुपपन्न,मभिन्नस्य भेदाविशेषसहिष्णुत्वेन क्रियाशक्त्यावेशसम्भवात् ॥

नन्वेतावता विज्ञानमेव ब्रह्मरूपमिमां विश्वरूपतावैचित्रीं परिगृह्णातु, किमीश्वरतापरिकल्पनयेत्याशङ्क्याह ।

(२०) वास्तवेपि चिदेकत्वे न स्यादाभासभिन्नयोः ।
चिकीर्षालक्षणैकत्वपरामर्शं विना क्रिया ॥

चिद्रूपस्यैकत्वं यदि वास्तवं, भेदः पुनरयमविद्योपप्लवादित्युच्यते, कस्यायमविद्योपप्लव इति न संगच्छेत । ब्रह्मणो हि विद्यैकरूपस्य कथमविद्यारूपता, न चान्यः कश्चिदस्ति वस्तुतो जीवादि,र्यस्याविद्या भवेत्, अनिर्वाच्येयमविद्येति चे,त्कस्यानिर्वाच्येति न विद्मः, स्वरूपेण भाति च न च निर्वाच्येति किमेतत्, युक्त्या नोपपद्यत इति चेत्, संवेदनतिरस्कारिणी का खलु युक्तिर्नाम । अनुपपत्तिश्च भासमानस्य कान्या भविष्यति, सद्रूपमेव ब्रह्माभिन्नं वक्तास्त्यविकल्पेन, विकल्पबलात्तु भेदोयमिति चे,त्कस्यायं विकल्पनव्यापारो नाम, ब्रह्मणश्चेद्विद्यायोगः, न चान्योस्ति, अविकल्पकं च सत्यं विकल्पकमसत्यमिति कुतो विभागः, भासमानत्वस्याविशेषात्, भासमानोपि भेदो बाधित इति चेदभेदोप्येवं, भेदभासनेन तस्य बाधात्, विपरीतसंवेदनोदय एव बाधो नान्यः कश्चित्, बाधो ऽपि च भासमानत्वादेव सन्नान्यत इति भेदोपि भासमानः कथमविद्या,-भ.सनमबधीर्यागमैकप्रमाणकोयमभेद इति चे,दागमोपि भेदात्मक एव वस्तुभूतः प्रमातृप्रमाणप्रमेयविभागश्चेति न किं चिदेतत् । तस्माद्वास्तवं चिदेकत्वमभ्युपगम्यापि तस्य कर्तृत्वलक्षणा भिन्नरूपसमावेशात्मिका क्रिया नोपपद्यते । परामर्शलक्षणं तु स्वातन्त्र्यं यदि भवति तदा उपपद्यते सर्वं, परामर्शो हि चिकीर्षारूपा इच्छा, तस्यां च सर्वमन्तर्भूतं निर्मातव्यमभेदकल्पेनास्तेत्युक्तं "स्वामिनश्चात्मसंस्थस्य"त्यत्र, तेन स्वात्मरूपमेव विश्वं सत्यरूपं प्रकाशात्मतापरमार्थमत्रुटितप्रकाशाभेदमेव सत्प्रकाशपरमार्थेनैव भेदेन प्रकाशयति महेश्वर इति तदेवास्यातिदुर्घटकारित्वलक्षणं स्वातन्त्र्यमैश्वर्यमुच्यते । आभासभिन्नयोरिति क्रियापेक्षा सम्बन्धसामान्ये षष्ठी, पश्चाद्यथोचितं विभज्यते, आभासेन भिन्नौ जडाभासौ जडो घटादिः कर्मरूपः, चिदाभासः कर्तृरूप, इति तयोः क्रिया एकस्य क्रियमाणत्वमपरस्य कर्तृत्वं न भवेत् चिकीर्षारूपेण निर्मातव्यभाववर्गाभेदपरामर्शात्मना विना, एका चासौ क्रिया कथं भिन्नयोस्स्वभावभूता भवेत्, कार्यकारणताप्रस्तावात् । कर्तृकर्मणी उक्ते, कारकान्तराण्यपि तु एककर्तृत्वानुप्रवेशीनि परमार्थतो ऽन्यथा करणादौ भिन्ने कारकजाते कथमभिन्ना सा, यद्वा आभासेन यौ भिन्नौ जडचेतनौ तयोर्या चिकीर्षा एकास्येप्सितता परस्येप्सितृता तत्स्वभावत्वमेकपरामर्शं विनेति, यद्वा आभासभिन्नयोरहमिदमिति यः परामर्श एकविश्रान्तिरूपश्चिकीर्षात्मा तं विनेति, आभासभिन्नयोरेकपरामर्शं विना चिकीर्षालक्षणा कथं क्रियेति वा । एवं क्रियां वा चिकीर्षां वा परामर्शं वा ऽपेक्ष्य षष्ठी, नित्यसापेक्षत्वात्समासः ॥

एतदुपसंहरति ।

(२१) इत्थं तथा घटपटाद्याभासजगदात्मना ।
तिष्ठासोरेवमिच्छैव हेतुता कर्तृता क्रिया ॥

यतो न जडस्य कारणता न कर्तृता, तथा ऽनीश्वरस्याचेतनस्यापि इत्यनेनैव प्रकारेणेदं जातं, य एव तथा चिकीर्षुस्तस्यैव सा चिकीर्षा बहिष्पर्य्यन्ततां प्राप्ता क्रियेत्यभिधीयते, सैव च कर्तृता तदेव हेतुत्वं, नान्यत्किं चित् । तेन घटस्तिष्ठतीत्ययमर्थः, घटात्मना तिष्ठासुः स्वातन्त्र्यात्स्थानमभ्युपगच्छन्तद्रूपमसहमानो यो महेश्वरः प्रकाशः स तिष्ठतीति, घटपटाद्याभासरूपजगत्तदात्मना यस्तथेति तेनतेन तज्जगत्तजन्मस्थित्यादिभावविकारतद्भेदक्रियासहस्रेण यः स्थातुमिच्छुः स्वतन्त्रस्तस्य या एवमिति विचित्ररूपा इच्छा सैव क्रियेति संबन्धः । तेन महेश्वर एव भगवान्विश्वकर्तेति शिवम् ॥ २१ ॥

॥ आदितः सूत्रश्लोकाः १४१ व्याख्याताः ॥

इति श्रीमदाचार्याभिनवगुप्तविरचितायामीश्वरप्रत्यभिज्ञासूत्रविमर्शिन्यां क्रियाधिकारे कार्यकारणतत्त्वनिरूपणं चतुर्थमाह्निकम् ॥ ४ ॥

॥ इति द्वादशमाह्निकम् ॥

॥ संपूर्णश्चायं क्रियाधिकारो द्वितीयो विमर्शः ॥

---

॥ श्रीः ॥

॥ अथागमाधिकारः ॥

यं प्राप्य सर्वागमसिन्धुसंघः
पूर्णत्वमभ्येति कृतार्थतां च ।
तं नौम्यहं शाम्भवतत्त्वचिन्ता-
रत्नौघसारं परमागमाब्धिम् ॥

शिवाच्छिन्मात्राख्यादतिसिततनोरागतमयो
शिवायास्तन्मूर्तेरनुवदनमामर्षवपुषः ।
मतं सद्भिस्सर्वैर्विमलमिह गाङ्गेयजलवद्
बहुस्रोतोयुक्तं परममिह शास्त्रं हृदि भजे ॥

श्रीमत्सदाशिवोदारप्रारम्भं वसुधान्तकम् ।
यदन्तर्भाति तत्त्वानां चक्रं तं संस्तुमः शिवम् ॥

एवमधिकारद्वयेन ज्ञानक्रियास्वरूपं वितत्य निर्णीतम्, अथेदं वक्तव्यं, क्रिया नाम विश्वपदार्थावभासनलक्षणेत्युक्तं समनन्तरमेव, के च ते विश्वे पदार्था इति, तत्राभासरूपा एव जडचेतनलक्षणाः पदार्थास्ते च क्रियता रूपेण संगृह्यन्ते, नहि प्रत्यक्षं मायाप्रमातुः सर्वत्र क्रमते, अनुमानमप्येवं, नहि यद्यदस्ति तत्तत्र लिङ्गव्याप्त्यादिग्रहणसंभवः, आगमस्त्वपरिच्छिन्नप्रकाशात्मकमाहेश्वरविमर्शपरमार्थः किं न पश्येदिति तदनुसारेण पदार्थनिर्णयं विश्वप्रमेयीकरणप्रतिलब्धं तद्विश्वोत्तीर्णप्रमातृपदहृदयङ्गमीकरणाभिप्रायेण निरूपयितुमाचार्य आगमाधिकारं तृतीयमारभते । तत्र श्लोकैकादशकेन "एवमन्तर्बहिर्वृत्ति"रित्यादिना "स्थूलसूक्ष्मत्वभेदत" इत्यन्तेनागमसिद्धं शिवादिधरणीप्रान्तमेकैकाभासरूपतात्मकं दर्शनान्तरे सामान्यमिति यद्व्यवहृतं यस्य सामानाधिकरण्ययोगादनन्तस्वलक्षणावभासनव्यूहविशेषपूर्वकः समस्तोयं शरीरभुवनादिविभवस्तं परमेश्वरागमसिद्धं युक्त्या ऽप्यनुगतं प्रतीकृतस्तत्त्वयामं दर्शयतीत्याह्निकतात्पर्यम् ॥

तत्राधिकारसंगतिं योजयन्पूर्वपक्षप्रतिक्षेपं चोपसंहरञ्शिवतत्त्वस्वरूपमेव दर्शयितुमाह ।

(१) एवमन्तर्बहिर्वृत्तिः क्रिया कालक्रमानुगा ।
मातुरेव तदन्योन्यावियुक्ते ज्ञानकर्मणी ॥

एवमिति, यतः परदर्शनोक्तः कार्यकारणभावो जडरूपप्रतिष्ठो न कथं चिदुपपन्नः, किं तु चिद्रूप एवान्तर्बहिरात्मना प्रकाशपरमार्थेनापि वपुषा तथा भासनरूपेण वर्तमानः कालक्रममाक्षिपन्क्रियाभिधीयते, तस्य प्रमातुरेव ज्ञानशक्तिवपुषो धर्मस्तदिति, तस्मादवियुक्तं ज्ञानं क्रिया च, ज्ञानं विमर्शानुप्राणितं विमर्श एव च क्रियेति, न च ज्ञानशक्तिविहीनस्य क्रियायोग इति, तदेतदवियुक्तज्ञानक्रियारूपं क्रियाद्वारेण सकलतत्त्वराशिगतसृष्टिसंहारशतसहस्रप्रतिबिम्बनसहिष्णु यत्तदुपदेशभावनादिषु तथा भासमानमनाभासरूपमपि वस्तुतः शिवतत्त्वमित्युक्तं भवति ॥

नन्वेवंभूतं शिवतत्त्वं चेत्तर्हि ततो ऽनतिरिच्यमानमिदं विश्वमिति किमन्यत्तत्त्वं स्यात्, एकचित्तत्त्वविश्रान्तौ च तत्त्वानां कथं क्रमो भवेद्देशकालाभेदादेवमेवैतत् ।

(२) किं त्वान्तरदशोद्रेकात्सादाख्यं तत्त्वमादितः ।
बहिर्भावपरत्वे तु परतः पारमेश्वरम् ॥

यद्यप्येकमेव शिवतत्त्वं, तथापि तदीयमेव स्वातन्त्र्यं स्वात्मनि स्वरूपभेदं तावत्प्रतिबिम्बकल्पनतया दर्शयति, स्वरूपवैचित्र्यमेव देशकालक्रमः, मूर्तिक्रियावैचित्र्यमयो ह्यसौ, ततश्चान्तरी ज्ञानरूपा या दशा तस्या उद्रेकावभासने सादाख्यं सदाख्यायां भवं, यतः प्रभृति सदिति प्रख्या, सदाख्यायाश्च सदाशिवशब्दरूपाया इदं वाच्यं तत्त्वं सृष्टिक्रमोपदेशादौ प्रथममुचितं तत्सादाख्यं तत्त्वं, बहिर्भावस्य क्रियाशक्तिमयस्य परत्वे उद्रेकाभासे सति पारमेश्वरं परमेश्वरशब्दवाच्यमीश्वरतत्त्वं नाम, ततश्च सादाख्यस्य पश्चादुचितावभासनम् । एतदुक्तं भवति, इह तस्य भावस्तत्त्वमिति भिन्नानां वर्गाणां वर्गीकरणनिमित्तं यदेकमविभक्तं भाति तत्त्वं, यथा गिरिवृक्षपुरप्रभृतीनां नदीसरःसागरादीनां च पृथिवीरूपत्वम् अब्रूपत्वं चेति, ततश्च शुद्धचैतन्यवर्गो यो मन्त्रमहेश्वराख्यस्तस्य प्रथमसृष्टावस्माकमन्तःकरणैकवेद्यमिव ध्यामलप्रायमुन्मीलितमात्रचित्रकल्पं यद्भावचक्रं संहारे च ध्वंसोन्मुखतया तथाभूतमेव चकास्ति प्रतिबिम्बप्रायतया तस्य चैतन्यवर्गस्य तादृशि भावराशौ तथा प्रथनं नाम यच्चिद्विशेषत्वं तत्सदाशिवतत्त्वम् । मन्त्रेश्वरादिरूपस्य तु चैतन्यराशेः स्फुटीभूतमस्मद्बहिष्करणसरणिसम्प्राप्रभाववर्गप्रतिबिम्बतया भाति तस्य तु तत्तथाप्रथनमीश्वरतत्त्वम् । यस्तु सदाशिवभट्टारक ईश्वरभट्टारकश्च ध्येयोपास्यादिरूपतया स ब्रह्मविष्णुरुद्रतुल्यः पृथगेव मन्तव्यो न तु नामसारूप्याद्भ्रमितव्यम् । यथाहुरेके, "ब्रह्मविष्णुरुद्रा अपि तत्त्वमध्ये किं न गणिता" इति ॥

नामधेयान्तरमप्यत्र तत्त्वद्वये दर्शयति ।

(३) ईश्वरो बहिरुन्मेषो निमेषान्तः सदाशिवः ।

यस्योन्मेषादुदयो जगत इत्यत्र ईश्वरतत्त्वमेवोन्मेषशब्देनोक्तं, विश्वस्य हि स्फुटत्वं बाह्यत्वमुन्मेषणं, निमेषणं त्वस्फुटत्वापादनम् अन्तारूपतोद्रेचनमिति निमेषः सदाशिवतत्त्वं, यतो जगतः प्रलय इति, शुद्धोयं स्पन्दः परमेश्वरस्याचलस्यापि अप्ररूढरूपान्तरापत्तिलक्षणः किंचिच्चलनात्मतया स्फुरद्रूपत्वात् । परमेश्वरस्य हि परमार्थत एताः शक्तयो यस्तत्त्वग्रामः का चित्तु शक्तिरन्यबहुतरशक्तिक्रोडीकारं कुर्वती निकटत्वादुपास्या घटस्येव घटत्वात्मिका, का चिदन्यापेक्षिणी स्वरूपमात्रनिष्ठा दूरा घटस्येव सत्तात्मिका । एवं निमेषोन्मेषशक्ती एव सदाशिवेश्वरौ, तयोस्त्वधिष्ठातृदेवते अपि तथा नाम ॥

अथ तदधिष्ठातृदेवताद्वयगतं करणं विद्यातत्त्वमाह ।

(४) सामानाधिकरण्यं च सद्विद्याहमिदंधियोः ।

प्रकाशस्य यदात्ममात्रविश्रमणमनन्योन्मुखस्वात्मप्रकाशताविश्रान्तिलक्षणो विमर्शः, सोहमित्युच्यते । यस्त्वन्योन्मुखः स इदमिति, स च स्वप्रकाशमात्रे पुनरप्यनन्योन्मुखरूपे विश्राम्यति परमार्थतः । तत्राद्ये विमर्शेपि शिवतत्त्वम्, द्वितीये विद्येशता, मध्यमे तु रूपे अहमिदमिति समधृततुलापुटन्यायेन यो विमर्शः स सदाशिवनाथे ईश्वरभट्टारके च, इदम्भावस्य ध्यामलाध्यामलताकृतो विशेषः । ये एते अहमिदमिति धियौ तयोर्मायाप्रमातरि पृथगधिकरणत्वमहमिति ग्राहके इदमिति च ग्राह्ये, तन्निरासेन एकस्मिन्नेवाधिकरणे यत्संगमनं सम्बन्धस्वरूपप्रथनं तत्सती शुद्धा विद्या ऽतो ऽशुद्धविद्यातो माया प्रमातृगता या अन्यैव तत्र यदाहमित्यस्य यदधिकरणं चिन्मात्ररूपं तत्रैवेदमंशमुल्लासयति तदा तस्यास्फुटत्वात्सदाशिवता अहमिदमिति इदमहमिति तु इदमित्यंशे स्फुटीभूते ऽधिकरणे यदाहमंशविमर्शं निषिञ्चति तदेश्वरता इति विभागः ॥

ननु कस्मादियं शुद्धा विद्येत्याह ।

(५) इदम्भावोपपन्नानां वेद्यभूमिमुपेयुषाम् ।
भावानां बोधसारत्वाद्यथावस्त्ववलोकनात् ॥

अवलोकनं प्रथनं, वेदनं विद्या, यथावस्तुत्वं वस्त्वनुसारित्वं च तस्याः शुद्धिः अविपरीतता, वेद्यदशां चोपगतवतामङ्गीकृतवतामत एव इदमित्येवंभूतेनोचितेन परामर्शेनोपपन्नानां परामृश्यमानानां भावानां बोध एव प्रकाशात्मा साररूपं वस्तु, प्रकाशश्चानन्योन्मुखविमर्शात्मा अहमिति । तदेषां यदेव पारमार्थिकं रूपं तत्रैव प्ररूढत्वादहमित्यस्य शुद्धवेदनरूपत्वम् ॥

अधिष्ठातृरूपाद्देवताद्वयात्तत्त्वद्वयं विभक्तमित्येतद्भङ्ग्या प्रतिपादयत्यागमव्यवहारेण ।

(६) अत्रापरत्वं भावानामनात्मत्वेन भासनात् ।
परताहंतयाच्छादात्परापरदशा हि सा ॥

परत्वं पूर्णत्वमनन्यापेक्षाहमिति, अपरत्वमपूर्णता ऽन्यापेक्षा इदमिति, अत्र च तत्त्वद्वये भावानां ध्यामलाध्यामलरूपाणामुभयांशस्पर्शात्परात्परत्वमिति, वेद्यभावनिष्ठा दशा तत्त्वस्वरूपा तदवभासयितृमन्त्रेश्वरादिशुद्धप्रमातृसंवेद्यवस्तुसारा, या तु तन्निष्ठसंवेदनदशा सा शुद्धा विद्या, तत्प्रमातृवर्गाधिष्ठातृत्वं श्रीसदाशिवेश्वरभट्टारकरूपतेति संक्षेपः ॥

एवमेकेषां मते अहमित्याच्छादको यो भागस्तत्प्रधाना शुद्धविद्या, अन्ये तु मन्यन्ते, योसाविदम्भाग आच्छादनीयस्तस्य यदवभासनं तत्प्रधाना शुद्धविद्या, अन्यथा हि स इदमंशः केन भास्यतां, मायायास्तत्राभावात्, द्वावे वा प्ररोहप्रसङ्गात्, अत एवेयं प्ररोहासहिष्णुं यत इदन्तां भासयति ततः शुद्धा, भासनाच्च विद्येति, तत एवाप्ररूढमायाकल्पत्वान्महामायेयं श्रीरौरवादिगुरुभिरुपदिष्टा, तदेतदाह ।

(७) भेदधीरेव भावेषु कर्तुर्बोधात्मनो ऽपि या ।
मायाशक्त्यैव सा विद्येत्यन्ये विद्येश्वरा यथा ॥

मायाप्रमातरि शून्यादिरूपेप्यनुल्लसिते चिन्मात्र एव प्रमातरि कर्तरि च सति चिदेकरूपेष्वपि भावेषु यदचिद्रूपतया तदप्रकाशनलक्षणं स्वातन्त्र्यं सा शुद्धविद्या, मायाशक्त्या तुल्या, वेद्यभागे भेदप्रकाशनात् । न च मायैव, ग्राहकस्य चिन्मात्रभागे तावदविपर्यासनात्, येन प्रकारेण विद्येश्वरा भगवन्तोनन्ताद्या वर्तन्ते, ते हि शुद्धचिन्मात्रगृहीताहम्भावाः, स्वतस्तु भिन्नं वेद्यं पश्यन्ति, यथा द्वैतवादिनामीश्वरः, एवं ग्राहके अंशतश्चैतन्यरूपात्परमार्थरूपे ग्राह्यविपर्यासनशक्तिः शुद्धविद्या विद्येश्वराणाम् ॥

परे प्राहुर्भगवतः परमशिवस्याप्ररूढभेदावभासनं सदाशिवेश्वरता, तत्रास्फुटत्वे इच्छाशक्तिरीश्वरस्य व्याप्रियते, स्फुटत्वे ज्ञानशक्तिः, प्ररूढे तु भेदे ग्राह्यविपर्यासेपि ग्राहकचिन्मात्रतायां विद्येश्वरेषु क्रियाशक्तिः, ग्राहकग्राह्यविपर्यासद्वयप्ररूढे तु मायाशक्तिः, सा च पशुप्रमातृषु ग्राहकग्राह्योभयविपर्याससंस्कारेत्वनिवृत्तेपि यदेतद्वस्तुपरमार्थप्रथनं तत्र विद्याशक्तिव्यापारो योगिज्ञानिप्रभृतिष्वपशुप्रमातृषु । तदेतद्दर्शयति ।

(८) तस्यैश्वर्यस्वभावस्य पशुभावे प्रकाशिका ।
विद्याशक्तिः

पशुभावे विपर्यासैकरसत्वलक्षणे पाशनीयत्वे अस्वतन्त्रत्वे दृश्यद्रष्टृदर्शनभेदे सत्यपि ज्ञाते पूर्वोक्तयुक्तिबलेन यदेतदैश्वर्यमुक्तं तस्य या प्रकाशिका परमेश्वरशक्तिर्यद्वशात्के चिदेव ता युक्तीराहृत्य तदाश्वस्तहृदयाः कृतिनो भवन्ति सा विद्याशक्तिः, अयमेव च षडर्धसारादिदृष्टोप्यस्याचार्यस्य हृदयमावर्जयति पक्षः, अन्ये इत्यनुक्तेः, एतदानन्तर्यौचित्येन च मायातत्त्वनिरूपणात् ॥

तदाह ।

(९) तिरोधानकरी मायाभिधा पुनः ॥

मायाशक्तिः पुनरचिद्रूपे शून्यादौ प्रमातृताभिमानं प्ररूढं दधती भावानपि चिन्मयाद्भेदेनाभिमानयन्ती सर्वथैव स्वरूपं तिरोधत्ते आवृणुते विमोहिनी सा तिरोधानमत्र न विलयरूपं मन्तव्यं यत्कृत्यपञ्चकमध्ये आगमेषु गण्यते । दीक्षितस्यापि गुरुमन्त्रादिनिन्दनप्रायमपि त्वावरणमेव ॥

तिरोधानमावरणरूपं स्फुटयति ।

(१०) भेदे त्वेकरसे भाते ऽहंतया ऽनात्मनीक्षिते ।
शून्ये बुद्धौ शरीरे वा मायाशक्तिर्विजृम्भते ॥

सुषुप्ते प्रलये नेत्यभावसमाधौ च तावच्छून्यमाकाशकल्पमनात्मरूपं वेद्याभावोचितमहमित्यात्मत्वेन वीक्ष्यते, उच्छ्वसननिःश्वसनादौ वा ऽहमुच्छ्वसामीति प्राणो वायुकल्पः, स्थावरजङ्गमजिघत्सामन्युप्रज्वलनादौ वा प्राण एव तेजःसमुपबृंहितः, स्वच्छोदकाशयकल्पा वेद्यप्रतिबिम्बनवती वा बुद्धिरभिनिविश्यते अन्तरहं वेद्मि दुःख्यहमिति चिन्ताद्यवस्थासु, शरीरमेव पृथिवीप्रायं कृशोहमित्यादिदशास्वहमित्यात्मतया भाति, सर्वं चैवेदं शून्यादि वस्तुतश्चिन्मात्रसारमेव माययैव तावदचिद्रूपतया भासितं तथाविधमेव तु सदहमिति संविद्रूपताभिनिवेशस्थानं संपादितमप्रशान्तजडभावमेवेति दुष्करतमवस्तुसम्पादनाऽप्रतीघातरूपा परमेश्वरस्य मायाशक्तिरित्येतद्विजृम्भते इत्यनेन दर्शितं, वाग्रहणेन वेद्यरूपाणां सुतधनदारादीनामप्यहन्ताभिनिवेशविषयत्वमसंख्यातं सूचयति ॥

नन्वचिद्रूपत्वादनात्मा यदि शून्यादिस्तदात्मतया ऽसावभिनिविश्यमानश्चिद्रूप एवेति सर्वज्ञत्वसर्वकर्तृत्वादिविशुद्धैश्वर्यधर्मैर्वस्यादित्याशङ्क्याह ।

(११) यश्च प्रमाता शून्यादिः प्रमेये व्यतिरेकिणि ।
माता स मेयः सन्कालादिकपञ्चकवेष्टितः ॥

स्यादैश्वर्यधर्मयोगः शून्यादेर्यद्यहमित्यभिनिविश्यमानोऽपि मेयतां जह्यात् । तथाहि सति प्रमेयमप्यस्य नीलादि व्यतिरिक्ततया नैव भासेत, यावता यः शून्यादिः प्रमाता कथितः स यावदेव स्वरूपाद्व्यतिरेकाभिमते नीलादौ प्रमेये माता तावदेव स्वयमपि मेयभूत एव सन्माता, मेयं हि मीयमानत्वादेव परिमितमिति तादृशादेव मेयान्तरादुपपन्नव्यतिरेकम् । नन्वेवं चिद्रूपमपरिमितत्वात् परिमितत्वं च शून्यादेरहम्भावस्य यत्तदेव कालादिपञ्चकम्, तथाहि कालः क्रममासूत्रयन् प्रमातरि विजृम्भमाणस्तदनुसारेण प्रमेयेपि प्रसरति, योहं कृशो ऽभवं स स्थूलो वर्ते भविष्यामि स्थूलतर इत्येवमात्मानं देहरूपं क्रमवन्तमिव परामृशन् तत्सहचारिणि प्रमेये ऽपि प्रसरति भूतादिरूपं क्रमं प्रकाशयति, अस्य शून्यादेर्जडस्य विद्या किंचिज्ज्ञत्वोन्मीलनरूपा बुद्धिदर्पणसंक्रान्तं भावराशिं नीलसुखादिं विविनक्ति, कला किंचित्कर्तृत्वोपोद्बलनमयी कार्यमुद्भावयति किं चिज्जानामि किं चित्करोमीति, अत्र चांशे तुल्ये किंचित्त्वे ऽकस्मादिदमेव किंचिदित्यत्रार्थेभिष्वङ्गरूपः प्रमातरि देहादौ प्रमेये च गुणारोपणमय इव रागो व्याप्रियते, न च तद्बुद्धिगतमवैराग्यमेव, तद्धि स्थूलं वृद्धस्य हि प्रमदायां न भवेत्, अपि रागस्तु भवत्येव, बुद्धिधर्माष्टकेपि च दृष्टोभिष्वङ्गः, अत्रैव कस्मादभिष्वङ्ग इत्ययमर्थो नियत्या नियम्यते, इत्येवं कालविद्याकलारागनियतिभिरोतप्रोतो माययापहृतैश्वर्यसर्वस्वः सन्पुनरपि प्रतिवितीर्णतत्सर्वस्वराशिमध्यगतभागमात्र एवंभूतोयं मितः प्रमाता भाति । इदानीमिदं किंचिज्जानान इदं कुर्वाणोत्र रक्तोत्रैव च यः सोहमिति । एषां च भिन्नविषयत्वमपि भवति कदाचित् । यथा अन्यत्र रक्तोपि नियत्यान्यत्कार्यते इति । एते च प्रमातृलग्नतयैव भान्तीति तस्यैव शक्तिरूपाः प्रतिप्रमातृभिन्ना एव, कदाचित्तु नटमल्लप्रेक्षादावीश्वरेच्छया एकीभवेयुरपि, नह्येषामीश्वरेच्छातिरिक्तं निजं किमपि जीवितमस्तीत्यसकृदुक्तं वक्ष्यते च ॥

यदुक्तमिदमित्यत्र प्रमेये व्यतिरेकिणि मातेति तत्र तत्प्रमेयं दर्शयति ।

(१२) त्रयोविंशतिधा मेयं यत्कार्यकरणात्मकम् ।
तस्याविभागरूप्येकं प्रधानं मूलकारणम् ॥

यत्कार्यकरणरूपं त्रयोविंशतिप्रकारं यच्च तस्य मूलभूतं कारणं सर्वकार्यकरणाविभागरूपं प्रधानं नाम तत्सर्वं मेयमिति संबन्धः, योगिमन्त्रतदीश्वरप्रभृतीनां हि भूततन्मात्रकरणप्रधानवशीकारयोगित्वात्सर्वमेव प्रमेयम् । संसारिणामपि अनुमानागमादिदिशा प्रमेयमेवेति इयत्प्रमेयम् । कालादयस्तु प्रमेया अपि प्रमातर्येव लग्ना इति प्रमातृशक्तिस्वभावत्वाच्च प्रमेयत्वेनेहावसरे मायाप्रमातृव्यतिरिक्तप्रमेयप्रस्तावात्मनि गणिताः ।

वस्तुतो ह्यत्र योयं प्रमातापि प्रमेय एव स तु प्रमात्रीक्रियमाण आच्छादितप्रमेयताक इहोच्यते ॥

नन्वत्र त्रयोविंशतौ किं कार्यं किं करणमित्याशङ्क्याह ।

(१३) त्रयोदशविधा चात्र बाह्यान्तःकरणावली ।
कार्यवर्गश्च दशधा स्थूलसूक्ष्मत्वभेदतः ॥

प्रमातुः पूर्वं करणोपयोग इत्यत्रादौ त्रयोदश करणानि, तत्र बुद्धिरध्यवसायसामान्यमात्ररूपा, ग्राह्यग्राहकाभिमानरूपोहंकारः, संकल्पादिकरणं मन, इत्यन्तःकरणं त्रिधा । बुद्धौ शब्दाद्यध्यवसायरूपायामुपयोगीनि बुद्धीन्द्रियाणि पञ्च, श्रोत्रं त्वक्चक्षुर्जिह्वा घ्राणमिति । कर्मण्युपयोगीनि पञ्च कर्मेन्द्रियाणि, तथाहि, त्यागो ग्रहणं द्वयमिति बहिर्विषयं यत्तत्र तु पाणिः पायुः पाद इति करणानि, एतदेवान्तःप्राणे येन क्रियते तद्वागिन्द्रियम्, तत्प्रक्षोभप्रशान्त्या विश्रान्तिक्रियोपयोग्युपस्थः, सर्वदेहव्यापकानि च कर्मेन्द्रियाण्यहंकारविशेषात्मकानि, तेन च्छिन्नहस्तो बाहुभ्यामाददानः पाणिनैवादत्ते, एवमन्यत्, केवलं तत्तत्स्फुटपूर्णवृत्तिलाभस्थानत्वात्पञ्चाङ्गुलिरूपमधिष्ठानमस्योच्यते, इत्येवं करणानि त्रयोदश । एषां च कार्यत्वेपि असाधारणेन करणत्वेन व्यपदेशः, स्थूलं कार्यं पृथिवी आपस्तेजो वायुर्नभ इति भूतानि पञ्च, सूक्ष्ममेषामेव रूपं गन्धो रसो रूपं स्पर्शः शब्द इति, तत्रैकैकगुणमाकाशादि एकैकवृद्धगुणं वेति दर्शनभेद इह न विवेचितो ऽनुपयोगात् । तत्र स्थूलं विभक्तमविभागस्यानुमापकमिति स्थूलोपक्रममुक्तम् । तत्र पृथिव्याद्याभासा एव मिश्रीभूय घटादिस्वलक्षणीभूताः कर्मेन्द्रियैरुपलक्षिताः बुद्धीन्द्रियैरालोचिताः अन्तःकरणेन संकल्पिताभिमतनिश्चितरूपा विद्यया विवेचिताः कालादिभिरनुरञ्जिताः प्रमातरि विश्राम्यन्तीति तात्पर्यम् । एतच्च विस्तरतः तत्प्रधानेषु तन्त्रालोकसारादिषु मया निर्णीतमितीहानुपयोगाच्च वितानितमिति शिवम् ॥ ११ ॥

॥ आदितः सूत्रश्लोकाः १५२ व्याख्याताः ॥

इति श्रीमदाचार्याभिनवगुप्तविरचितायामीश्वरप्रत्यभिज्ञासूत्रविमर्शिन्यामागमाधिकारे तत्त्वनिरूपणं नाम प्रथममाह्निकम् ॥ १ ॥

॥ इति त्रयोदशमाह्निकम् ॥

---

॥ श्रीः ॥

अखण्डितस्वभावोपि विचित्रां मातृकल्पनाम् ।
स्वहृन्मण्डलचक्रे यः प्रथयेत्तं स्तुमः शिवम् ॥

एवं तत्त्वराशौ निर्णीते एतदन्तर्भावेनोक्तमपि मुख्यतया निर्णेतव्यं प्रमातृतत्त्वं वितत्य निर्णेतुं "तत्रैतन्मातृतामात्रे" त्यादि "व्यानो विश्वात्मकः पर" इत्यन्तैर्विंशतिश्लोकैराह्निकान्तरं प्रस्तूयते । तथाहि प्रमातुरत्र स्वरूपप्रत्यभिज्ञानमुपदिश्यते शास्त्रे, स हि हेयमुपादेयं स्वं स्वभावं विद्वान्परमोपादेयरूपं शिवस्वभावं स्वात्मानमभेदेनाविशञ्जीवन्नेव मुक्तो भवतीति, तत्र श्लोकेन ब्रह्मादित्रयस्वरूपं ततोपि द्वयेन हेयोपादेयप्रमातृतत्त्वम्, ततस्तदुपयोगिमलस्वरूपं तत्कृतं च प्रमातृभेदं श्लोकसप्तकेन, द्वयेन समावेशस्वरूपं, श्लोकपञ्चकेन प्रमातुरेव सुषुप्ताद्यवस्थाः, त्रयेण तासां हेयोपादेयविभागं निरूपयतीत्याह्निकस्य तात्पर्यम् ॥

ग्रन्थार्थस्तु निरूप्यते ।

(१) तत्रैतन्मातृतामात्रस्थितौ रुद्रोधिदैवतम् ।
भिन्नप्रमेयप्रसरे ब्रह्मविष्णू व्यवस्थितौ ॥

तत्रेति, एवंभूते ऽस्मिन्नागमसिद्धे युक्त्यनुगते च तत्त्वस्वरूपे सति यदेतत्कालादिपञ्चकवेष्टितं प्रमातृतारूपं तदेव यस्यां शुद्धमुपसंहृतप्रमेयजातं भवति दशायां संहाराख्यायां तस्यामधिष्ठातृदेवतात्वं तद्दशासंपादनेन स्वोपासकलोकस्य तद्दशादानेन तद्दशाध्यानावेशसमापन्नस्य स्वाभिमुख्यसंपादनेन च भजमानो भट्टारक ईश्वर एव रुद्रो भगवान्यो मायापदेपि प्राणापानात्मकधर्माधर्मसूर्येन्दुदिननिशादिविमुक्तमध्यमज्योतीरूपप्रमातृस्वरूपस्पर्शादुन्मीलिततृतीयनेत्रो भिन्नस्य तु प्रमेयस्य प्रसरे सति सम्पादनेधिष्ठातृदेवतात्वं भजन् ब्रह्मा प्रसूते भिन्ने प्रमेये तत्सन्तानप्रवहणलक्षणे प्रसरेधिष्ठातृदेवता विष्णुः । अत एव तयोः प्रमेयप्रसररूपस्येदं नीलमित्येवं प्रकाशात्मनः प्राधान्यादहमिति प्रमातृदशावेशशून्यत्वान्न तृतीयनेत्रोन्मीलनम् । देवतैव च दैवतम् । प्रसर उत्पत्तिस्सन्तानश्च ॥

यदेतन्मातृतामात्रमुक्तं तस्य विभागमागमिकं च संज्ञाभेदं निरूपयति ।

(२) एष प्रमाता मायान्धः संसारी कर्मबन्धनः ।
विद्याभिज्ञापितैश्वर्यश्चिद्धनो मुक्त उच्यते ॥
स्वाङ्गरूपेषु भावेषु प्रमाता कथ्यते पतिः ।
मायातो भेदिषु क्लेशकर्मादिकलुषः पशुः ॥

मायया ऽन्धो विमोहितः, अत एव कर्माणि स्वात्मनो बन्धकान्यभिमन्यमानः, एष इति, कालादिवेष्टितः शून्यादिप्रमाता, संसरतीत्यतः संसारी' देहोपि हि स्वरूपसादृश्यं बाल्ययौवनादिष्वनुवर्तयन्संसरतीव, बुद्ध्यादेस्तु जन्मान्तरेपि संसरणं, विद्यया तु स्वरूपप्रकाशनशक्त्या प्रत्यभिज्ञापदं प्रापितमैश्वर्यं यस्यात एव शरीराद्यपि विश्वमपि संवेदनमेवाभिमन्यमानो ऽत एव चिदेकघनान्याचिद्रूपव्यामिश्रणशून्या यस्य

रूपं, स पुनर्जन्मबन्धविरहाद्देहेपि स्थिते मुक्त इति व्यपदेशयोग्यः, पतिते तु शिव एकघन इति कः कुतो मुक्तः, भूतपूर्वगत्या तु प्रमात्रन्तरापेक्षया मुक्तः शिव इति व्यवहारः, यश्चासौ मुक्तस्स भावान्स्वाङ्गवदभिमन्यमानः प्रमिमीत इति स तेषां स्वामी, स्वरूपपरमार्थसमर्पणाच्च पालक इति पतिरुपदिष्टः शास्त्रे, मायाशक्तिकृतभेदाद्व्यतिरिक्तानेव सतो यदा मिमीते तदा तैरेव मेयैः पाशरूपैः पाशित इति पशुरुक्तः, तथा वेद्यराशिवशादेवास्याविद्यास्मितारागद्वेषाभिनिवेशाद्यः क्लेशा, धर्माधर्मादिरूपाणि कर्माणि, आदिपदादाशयरूपा वासना, फलभोगरूपो विपाक इति कालुष्यमनन्तप्रकारं यतः पाशितत्वात्पशुरित्युक्तः ॥

यद्वैवैतत्पशुरूपं तदेवागमेषु त्रिविधं मलमित्याह ।

(३) स्वातन्त्र्यहानिर्बोधस्य स्वातन्त्र्यस्याप्यबोधता ।
द्विधाणवं मलमिदं स्वस्वरूपापहानितः ॥
भिन्नवेद्यप्रथाचैव मायाख्यं जन्मभोगदम् ।
कर्तर्यबोधे कार्मं तु मायाशक्त्यैव तत् त्रयम् ॥

इह ज्ञातृकर्तृरूपं तावच्चित्तत्वस्य स्वरूपं, तस्यापहारो नामाणवं मलं, येनासावणुः संकुचितो जातः, तत्र स्वरूपस्य निमीलनं संकोचः, तत्स्थिते बोधरूपे कर्तृत्वलक्षणस्य स्वातन्त्र्यात्मनः स्वरूपान्तरस्य निमीलनं विपर्ययो वेत्युभयथापि आणवं मलं स्वरूपापहानिरूपमेकमेवात्रैवेति हि सत्याणवे मले द्विप्रकारे स्वरूपसंकोचे वृत्ते भिन्नस्य यत्प्रथनं तस्य मायीयमिति संज्ञामात्रं, मायाकृतत्वेन हि मायीयता मलत्रयस्यापि, तत्र कर्तुरबोधरूपस्य देहादेर्भिन्नवेद्यप्रथने सति धर्माधर्मरूपं कार्मं मलं, यतो जन्म भोगश्च, स च नियतावधिक इति जात्यायुर्भोगफलं कर्मेत्युक्तं भवति ॥

अथैषां मलानां विविक्तविषयनिरूपणात्स्वरूपं स्फुटीकर्तुं स्वातन्त्र्यहानिर्बोधस्येत्यस्य भागस्य तावद्विषयमाह ।

(४) शुद्धबोधात्मकत्वे ऽपि येषां नोत्तमकर्तृता ।
निर्मिताः स्वात्मनो भिन्ना भर्त्रा ते कर्तृतात्ययात् ॥

एषां चिन्मात्रमेव परमार्थतो न त्वहमिति स्वात्मविश्रान्त्यानन्दरूपं परमं स्वातन्त्र्यं, ते परमेश्वरेण तथा निर्मिताः स्वात्मनः सकाशाद्व्यतिरिक्ताः । अत्र हेतुः कर्तृताया उत्तमस्वातन्त्र्यलक्षणाया अत्ययादभावात् । परमेश्वरस्यतूत्तमस्वातन्त्र्यावियुक्तबोधरूपत्वमित्यभिप्रायशेषः ॥

नन्वस्माद्धेतोर्भवतु परमेश्वरात्तेषां भिन्नत्वम्, अन्योन्यतस्तु कथं भेदः, बोधरूपस्य व्यापित्वनित्यत्वकृतस्य च देशकालाभेदस्य समानत्वादन्योन्यभेदाभावेपि च निर्मितास्ते इति कथं बहुवचनमित्याशङ्कां व्यपोहति ।

(५) बोधादिलक्षणैक्येपि तेषामन्योन्यभिन्नता ।
तथेश्वरेच्छाभेदेन ते च विज्ञानकेवलाः ॥

इह हि सर्वत्राप्रतिहतशक्तिः परमेश्वर एव हि तथा बुभूषुस्तयातथा भवति न त्वन्यः कश्चित्परमार्थतोस्तीति असकृदुक्तं ततश्च व्यापकनित्यबोधस्वभावोप्यहंभेदेन निर्भासे इत्येवंभूतेनेश्वरेच्छाविशेषेण तेषां शरीरादिशून्यान्तप्रमातृपदोत्तीर्णानां बोधत्वनित्यत्वविभुत्वादिधर्मजातस्यैक्येप्यन्योन्यं भेदः, ते च शास्त्रे विज्ञानकेवला उक्तास्तत्र विज्ञानकेवलो मलैकयुक्त इत्यादौ विज्ञानं बोधात्मकं रूपं केवलं स्वातन्त्र्यविरहितमेषामिति ॥

एवं "स्वातन्त्र्यहानिर्बोधस्ये"त्यस्य भागस्य विज्ञानाकलविषयतामुक्त्वा "स्वातन्त्र्यस्याप्यबोधता" इत्यमुमंशं विषयप्रदर्शनेन स्पष्टयति ।

(६) शून्याद्यबोधरूपास्तु कर्तारः प्रलयाकलाः ।
तेषां कार्मो मलोप्यस्ति मायीयस्तु विकल्पितः ॥

शून्ये जडत्वादबोधरूपे एव यदि वा प्राणे बुद्धौ वा येषामहमिति चमत्कारयोगात् कर्तृत्वं, ते प्रलयेन कृताः अकलाः, कलातत्त्वोपलक्षितकरणकार्यरहिताः अबोधरूपाः कर्तारश्च, प्रलयावधि हि ते तथाभूता, उत्तरकालं तु कार्यकारणसम्बद्धा एव भवन्ति यतस्तेषां न केवलमुक्तरूप आणव एव मलो यावत्कार्मोपि वासनासंस्काररूपो धर्माधर्मादिरूपो ऽस्त्येव "यद्येवं भिन्नवेद्यप्रथाप्येषां स्यात्"सत्यं, संवेद्यरूपे सुषुप्तपदे, अपवेद्ये तु न भवति, तेन मायीयो मल एषां विकल्पितो व्यवस्थितविषयत्वेन, तथाहि, केपि शून्यादिभागविश्रान्ता गाढनिद्राजडीकृताः अपवेद्यसुषुप्तपदभाजः अन्ये तु बुद्ध्यादिनिष्ठाः सुखदुःखावशेषसामान्यात्मकभिन्नवेद्यसंवेदनयोगिनः संवेद्यसौषुप्तपदलीनाः,स्थूलदेहेन्द्रियात्मककार्यकारणवियोगरूपत्वं प्रलयाकललक्षणं सर्वेषां तुल्यम् ॥

एवं "स्वातन्त्र्यस्याप्यबोधते"त्येवमंशः स्फुटीकृतः, प्रसंगाच्च कार्ममलस्य विषयोदर्शितः, मायामलस्य च पाक्षिकत्वमुक्तम्, अधुना पुनराणवकार्ममलद्वयाभावेपि शुद्धोस्ति मायाख्यस्य मलस्य विषय इति दर्शयति ।

(७) बोधानामपि कर्तृत्वजुषां कार्ममलक्षतौ ।
भिन्नवेद्यजुषां मायामलो विद्येश्वराश्चते ॥

ये चिन्मात्रमेवात्मतया पश्यन्ति अहमिति चमत्कारोल्लासात्कर्तारस्तत एव सर्वज्ञाः सर्वकर्तारश्च ते विद्येश्वराः, किं

तु तनुकरणभुवनादि यदेषां वेद्यतया कार्यतया च भाति तत्कुविन्दपटदृष्ट्या भिन्नमेव सदित्यस्ति विद्येश्वराणां मायाख्यमलयोगः ॥

अथ मलत्रयस्यापि योगपद्येन यो विषयस्तं दर्शयितुमाह ।

(८) देवादीनां च सर्वेषां भविनां त्रिविधं मलम् ।
तत्रापि कार्ममेवैकं मुख्यं संसारकारणम् ॥

इह विद्येश्वरविज्ञानाकलास्तावन्न भविनः मायान्ताध्वातिक्रमणात्, प्रलयाकला अपि कं चित्कालमविद्यमानभवाः, ये त्वेते मायातत्वान्तरालपरिवर्तिनो देवादयः स्थावरान्ताश्चतुर्दशधा शास्त्रेषु परिगणितास्ते सर्वे भविनः संसारिणः तेषां च त्रयोपि युगपन्मलाः । "ननु मलत्रयमध्ये कतमो मलः संसरणमेषां संपादयेत्" आह, तत्रापि तेषु त्रिष्वपि सत्सु कार्मं मलं मुख्यतया सन्निपत्य संसरणे कारणम् । यथोक्तम् ।

कर्मतस्तु शरीराणि विषयाः करणानि च ।

इति । तनुकरणविषयसंबन्ध एव वर्तमानोभविष्यंश्चेत्यनवरतं प्रबन्धतो वर्तमानः संसरणमुच्यते, आणवमायामलौ तु यद्यपि नन कारणं संसारे, तथापि कार्मेण विना तौ देहादिविचित्रभावाभिनिवर्तनशक्तिशून्यौ विज्ञानाकलादिष्विति मुख्यं कार्ममेव मलं संसारकारणं तत्रतत्र शास्त्रे गण्यते, अत एव तदुपक्षये वृत्ते दत्तस्तावदसंसरणसोपानपदबन्ध इत्याशयेन कर्मबन्धाभिमानपरिहानिरेव यत्नतः सांख्यपुराणभारतादिशास्त्रेषूपदिश्यते । एवं मलत्रयस्यैकैकभेदैस्त्रिभिर्द्विभेदैस्त्रिभिस्त्रिभेदेनैकेनेति सप्त प्रमातार उत्तिष्ठन्ति । तथा च शास्त्रे "शिवादिसकलान्ताश्च शक्तिमन्तः सप्त" त्युक्तं तत्राप्यावान्तरभेदेन गुणमुख्यताभेदेन विकल्पसमुच्चयतादिभेदेन चानन्तप्रकारत्वमिति ॥

अस्य च मलत्रयस्योद्भवतिरोभावभेदात्संसारिणां प्रकारद्वयमिति दर्शयति ।

(९) कलोद्वलितमेतच्च चितत्वं कर्तृतामयम् ।
अचिद्रूपस्य शून्यादेर्मितं गुणतया स्थितम् ॥
मुख्यत्वं कर्तृतायाश्च बोधस्य च चिदात्मनः ।
शून्यादौ तद्गुणे ज्ञानं तत्समावेशलक्षणम् ॥

एतच्चेति यच्चिदशादीनां भविनां चैतन्यं कर्तृतांशस्य प्राधान्यान्मलेन संविद्भागस्य निमज्जितत्वात्कर्तृतामयं चिद्रूपस्य तत्त्वं स्वातन्त्र्यं, कलाख्येन परमेश्वरशक्त्यात्मना तत्त्वेनोपोद्वलितमनुप्राणितं, मलेन न्यक्कृतं सदुद्बोधितं, शून्यादेर्देहपर्यन्तस्य मायाप्रमातुः सम्बन्धि,तद्गुणत्वेनाप्रधानत्वेन स्थितं, यतो मितमिदंतापन्नदेहादिशून्यान्तमप्रमेयभागनिमग्नत्वात् प्रमेयं, यो गौरो यः सुखी यस्तृषितो यः सर्वरूपरहितः सो ऽहमिति हीदंतैवान्तर्लीना ऽहम्भावासंसारिणां परिस्फुरति सेयं जाग्रत्स्वप्नसुषुप्तरूपा संसारावस्था । यदा तूक्तगुरूपदेशाभिमतेनैवाहम्भावेन स्वातन्त्र्यात्मना व्यापकत्वनित्यत्वादिधर्मपरामर्शात्मनि विदधता ततः शून्यादेः प्रमेयादुन्मज्ज्यैवास्यते तदा तुर्यातीतावस्था । यदापि परामृष्टतथाभूतवैभवनित्यैश्वर्यादिधर्मसम्भेदेनैवाहम्भावेन शून्यादिदेहधात्वन्तं सिद्धरसयोगेन विद्धते तदास्यां तुर्यदशायां तदपि प्रमेयतामुज्झतीव सेयं द्वय्यपि जीवन्मुक्तावस्था समावेश इत्युक्ता शास्त्रे, सम्यगावेशनमेव हि तत्रतत्र प्रधानं, तत्सिद्धये तूपदेशान्तराणि । यथा गीतं, "मय्यावेशमनो ये मा"मिति "अथावेशयितुं चित्तं न शक्नोमि" इत्यादि च, समावेशपल्लवा एव च प्रसिद्धदेहादिप्रमातृभागप्रह्वीभावनानुप्राणिताः परमेश्वरस्तुतिप्रणामपूजाध्यानसमाधिप्रभृतयः कर्मप्रपञ्चाः । यद्गीतमपि ।

"अभ्यासेप्यसमर्थः सन्मत्कर्मपरमो भव"

इति । देहपाते तु परमेश्वर एवैकरस इति कः कुत्र कथं समाविशेत् । तदेतदाह, यत्पुनः कर्तृताया मुख्यत्वं तन्नान्तरीयकश्च शून्यादेर्गुणभावस्तस्मिंश्चाचिद्रूपे गुणीभूते स्वातन्त्र्यस्याप्यबोधतेति मलव्यापारस्यापहस्तनाच्चितो यो ऽपरो ऽप्यात्मभागो बोधलक्षणो मलेन न्यक्कृतो ऽभूत्तस्याप्यधुनोन्मग्नत्वेन मुख्यत्वं, यच्च कर्तृताया मुख्यत्वमुन्मग्नता इदमेव ज्ञानमज्ञानात्मकमलप्रतिपक्षत्वात्, तदेतन्मुख्यत्वं समावेशस्य लक्षणं, येन देहस्थितो ऽपि पतिरिति मुक्त इति शास्त्रेपूक्तः ॥ १२ ॥

॥ शेष उत्तराङ्के ॥

## ॥ अथ बालरामायणाख्यनाटकस्य ॥

॥ सप्तमोऽङ्कः ॥

अतः परमसमपराक्रमो भविष्यति ।

ततः प्रविश्य वैतालिकः समन्तादवलोक्य नेपथ्यं प्रति भद्र चन्दनचण्ड परित्यज निद्रां मुद्रां विमुञ्च निजोदञ्चनाभ्यन्तरं प्रभातप्राया रजनी तथाहि ।

तारणां तगरत्विषां परिकरः संख्येयशेषः स्थितः
स्पर्धन्तेऽस्तरुचः प्रदीपकशिखाः सार्धं हरिद्राङ्कुरैः ।
मन्त्रस्तम्भितपारदद्रवजडो जातः प्रगे चन्द्रमाः
पौरस्त्यं च पुराणशीधुमधुरच्छायं नभो वर्तते ॥ १ ॥

नेपथ्ये । अज्ज कप्पूरचण्ड एसा मिट्ठा पभादनिद्दा ता सुविस्सं दाव * ।

* आर्य कर्पूरचण्ड एषा मिष्टा प्रभातनिद्रा तत् स्वप्स्यामि तावत् ।

कर्पूरचण्डः । अहो उत्साहशक्तिर्भवतोऽमन्त्रशीलो महीपतिरनपरप्रबन्धदर्शी कविरपाठरुचिश्च बन्दी न चिरं नन्दति ।

नेपथ्ये ता एत्थ सत्थरत्थिदो निमीलिदनयणो ज्जेव्व सुप्पभादं पढिस्सं * ।

कर्पूरचण्डः । एतदपि भवतो भूरि ।

नेपथ्ये । सच्चं पच्चक्खीकदसरस्सईपरिमलो बम्हो मुहुत्तो वट्टदि तधा अ ।

जा गब्भे वि घरस्स दीवअसिहा सा वि च्छविच्छुड्डिआ
जं दण्डाहिं वि खण्डिदं कुवलयं संमीलिदं तं वि अ ।
जं गोट्ठीचरिदं वि तं वि सहसा भासाए सव्वङ्गिदं
ता मण्णे ण चिरा भविस्सदि रई पुव्वादिसो मण्डणम् † ॥ २ ॥

कर्पूरचण्डः । तावदुपश्लोकयामो रामभद्रं परपरितोषोपपाद्यफलं हि वैतालिकव्रतं किञ्चिदुच्चैः ।

मार्तण्डैककुलप्रकाण्डतिलकस्त्रैलोक्यरत्नामणि-
र्विश्वामित्रमहामुनेर्निरुपधिः शिष्यो रघुग्रामणीः ।
रामस्ताडितताडकः किमपरं प्रत्यक्षनारायणः
कौशल्यानयनोत्सवो विजयतां भूकश्यपस्यात्मजः ॥ ३ ॥

नेपथ्ये ।

कन्दप्पुद्दामदप्पप्पसमणगुरुणो बह्मणो कालदण्डे
पाणिं देन्तस्स गङ्गातरलिदससिणो पव्वदीवल्लभस्स ।
चावं चण्डाहिसिञ्जारवभरिअणहं कड्ढणारुद्धमज्झं
जं भग्गं तस्स सद्दो णिसुणि तिहुयणे वित्थरन्तो न माइ ‡ ॥ ४ ॥

कर्पूरचण्डः ।

यो जम्भं जितवान् स येन विजितो देवः सुरग्रामणी-
र्ज्याबद्धं विदधे निशाचरपतिं तं कार्तवीर्यार्जुनः ।
तद्दोःखण्डदवानलो भृगुपतिर्निर्जित्य तं च त्वया
मालेयं जयसंपदो विरचिता स्वस्मादनग्रेसरी ॥ ५ ॥

नेपथ्ये ।

हेलासिञ्जिदसिञ्जिणीझणझणारावेण वीणाइदं
कोदण्डं तुह पाणिपीडनगदं जुज्झे णिअं ताखणम् ।

* तदत्र संस्तरस्थितो निमीलितनयन एव सुप्रभातं पठिष्यामि ।

† सत्यं प्रत्यक्षीकृतसरस्वतीपरिमलो ब्राह्मो मुहूर्तो वर्तते तथा च ।
या गर्भेऽपि गृहस्य दीपकशिखा साऽपि छविमुक्ता
यद् दण्डादपि खण्डितं कुवलयं संमीलितं तदपि च ।
यद् गोष्ठीचरितमपि तदपि सहसा भाषया सर्वाङ्गितं
तन्मन्ये न चिराद् भविष्यति रविः पूर्वदिशो मण्डनम् ॥

‡ कन्दर्पोद्दामदर्पप्रशमनगुरोर्ब्रह्मणः कालदण्डे
पाणिं दातुर्गङ्गातरलितशशिनः पार्वतीवल्लभस्य ।
चापं चण्डाहिसिञ्जारवभरितनभः कर्षणारुद्धमध्यं
यद् भग्नं तस्य शब्दो निशूयते त्रिभुवने विस्तरन् न माति ॥

ते सव्वे खरदूसणप्पभुदिणो जीवेहिं मुक्का पुरो
पच्छा भल्लपवेल्लिएहिं सहसा देहेहिं भूमिं गदा * ॥ ६ ॥

कर्पूरचण्डः ।

जात्यन्धत्वमधिष्ठितं सपदि तैर्दत्तं जलं तैर्दृशे
दृष्टिं सृष्टवतो विधेर्भगवतः क्लेशश्च तैर्भावितः ।
येषां ताडयितुं स्थिते त्वधिजवान्मारीचमायामृगं
द्रागदैवादनुपेयुषां द्विविपदां जाते वृथा चक्षुषी ॥ ७ ॥

अपिच ।

नाद्याप्यस्ति तदीययोर्नयनयोः संकोचदुःस्थं वपु-
स्तेषां गण्डतटे स्फुटत्पुलकता नाद्यापि विश्राम्यति ।
ते नाद्यापि वहन्ति हर्षणतया रिक्तं च चेतो निजं
ष्टं दृ देव कबन्धदैत्यनिधनं यैस्त्वत्कृतं कौतुकात् ॥ ८ ॥

नेपथ्ये ।

पुञ्जीभूदहरट्टहासजइणा रूपेण रुद्धं वरं
क्खीणं वालिजसं व दुन्दुभिमहाकङ्कालसेसं जहा
पेल्लन्तो चलणेण विंज्झगिरिणो हेलायिदं तं तुए
अम्हे एव्व दुवे परं ण हु गदा वेरी वि बन्दित्तणम् † ॥ ९ ॥

अवि अ ।

लीलामुक्केक्कबाणव्वणविवरगुहामज्झमुच्छन्तवाआ
जाआ जे सत्त ताला तिहुअणजइणो चावचारेण तुज्झ ।
णिच्चं गाअन्ति हेलाभरिदणहअलब्भन्तरं ताररावा
सत्तेहिं तेण तेहिं तुह जसपसरं सत्तलोअट्ठिदव्व ‡ ॥ १० ॥

कर्पूरचण्डः ।

पौलस्त्यस्यावमन्ता त्रिदशपतिसुतश्चक्रवर्ती कपीनां
कर्ता संध्यासमाधेर्जलनिधिषु चतुर्दिङ्निकुञ्जाश्रितेषु ।
किष्किन्धां राजधानीं भुजपरिघबलात्त्रायमाणस्त्वयाऽसौ
वाली हेमाब्जमाली गुणनिधिरिषुणा निर्मितो दक्षिणेर्मा ॥ ११ ॥

नेपथ्ये ।

* हेलासिञ्जितसिञ्जिनीझणझणारावेण वीणायितं
कोदण्डं तव पाणिपीडननतं युद्धे निजं तत्क्षणम् ।
ते सर्वे खरदूषणप्रभृतयो जीवैर्विमुक्ताः पुरः
पश्चात् भल्लप्रवेल्लितैः सहसा देहैर्भूमिं गताः ॥

† पुञ्जीभूतहराट्टहासजयिना रूपेण रुद्धं परं
क्षीणं वालियशश्च दुन्दुभिमहाकङ्कालशेषं यथा ।
प्रक्षिपता चरणेन विन्ध्यगिरेर्हेलायितं तत् त्वया
आवामेव द्वौ परं न खलु गतौ वैरिणाविव बन्दित्वम् ॥

‡ अपिच
लीलामुक्तैकबाणव्रणविवरगुहामध्यमूर्च्छद्वाता
जातास्ते सप्त तालास्त्रिभुवनजयिनश्चापचारेण तव ।
नित्यं गायन्ति हेलाभरितनभस्तलाभ्यन्तरं तारराचाः
सप्तभिस्तेन तैस्तव यशः प्रसरं सप्तलोकस्थितमिव ॥

जे केलासे कलिन्दे मलअमहिहरे मन्दरे मेरुसेले-
सह्ये विंझे महेन्दे तह अ हिमवहे पव्वदे वाणरेन्दा ।
सव्वे सुग्गीवपादप्पणादिपणइणो ते वि जं स प्पसादो
सेवातुट्टस्स सच्चं तुह जसजलधेर्भूलदावेल्लिदाणम् * ॥ १२ ॥

कर्पूरचण्डः ।

भीमं यज्जलधिं जवेन हनुमानुल्लङ्घ्य लङ्कां गतो
यच्चाशोकमहावनं दलितवानक्षं च यत्क्षुण्णवान् ।
सीताणायनमौलिरत्नसहितः प्राप्तश्च यत् त्वामसौ
तत्राप्येष भवत्प्रभावमहिमा निर्यन्त्रणः कारणम् ॥ १३ ॥

नेपथ्ये ।

किं अण्णेहिं विराधप्पहुदिविदरणाडंवरुग्घट्टणेहिं
एदं ते वण्णआमो जलनिधिसविधावासिदे जं तुमम्मि ।
वट्टन्ते रक्खसीणं तरलकरदलप्फारतुट्टन्तहारा
हारावक्कन्तकण्ठा णवणअणजलुप्पीलिणो विप्पलावा † ॥ १४ ॥

कर्पूरचण्डः ।

नानानिर्व्याजवीर्यस्तुतिशतसदृशं कुम्भकर्णानुजोय-
द्राग्देवेनाभिषिक्तो रजनिचरमहाराज्यलाभाय तेन ।
लङ्केन्द्रस्यापि जातान्यतिनिभृतसृतश्वासबन्धावधूत-
श्मश्रुश्रेणीनि चिन्तामुकुलितनयनस्रञ्जि सर्वाननानि ॥ १५ ॥

प्रविश्य । पटीक्षेपेण प्रतीहारः । रेरे अलीकवैतालिक कोऽयं कलकलः ।

कर्पूरचण्डः । आर्य रामदेवस्य शौर्यगुणभोगावली गीयते ।

प्रतीहारः । ननु रामदेवेन निषिद्धमात्मोपवर्णनमादशरथ-स्वर्गारोहणश्रुतेरादशकण्ठबन्धम् ।

कर्पूरचण्डः । विभीषणवैतालिको वैदेशिकोऽस्मि । तदेकवारं मर्षय एष त्यक्तो भोगावलीपाठः । सप्रश्रयम् । कथं पुनरधिगतपितृमरणशोकशङ्कुस्तत्रभवान् रामदेव एवंविधे समुद्योगकर्मणि प्रवर्तते

प्रतीहारः । विहस्य अप्यनभिज्ञोऽसि सच्चरितानाम् ।

वहन्ति शोकशङ्कुं च कुर्वन्ति च यथोचितम् ।
कोऽप्येष महतां हन्त गाम्भीर्यानुगुणो गुणः ॥ १६ ॥

बन्दी । आर्य कोपेनान्तरितोऽसि । कथय किं पुनः कुरुते रामभद्रः ।

प्रतीहारः । पुलिनोपरि रचितकुशप्रस्तरोपविष्ट उपोषितश्च भगवन्तं भागीरथीवल्लभमुपास्ते । तत्र च ।

सुग्रीवे प्रणयोल्लसाः शशधरे बद्धाभ्यसूयाश्चिरं
साश्चर्याः पवनात्मजे धृतरुषः पौलस्त्यवत्यां दिशि ।
सोत्साहाश्च शरासने जलनिधौ क्षुब्धाश्च कृत्स्नां निशां
रामस्याद्य नियन्तुमेव न गता नानारसा दृष्टयः ॥ १७ ॥

बन्दी । आर्य एवमपि समुद्रो न किञ्चित्प्रतिपद्यते ।

प्रतीहारी । जडराशिरसौ ।

बन्दी । तथाविधे उदन्वति किमाह रामदेवः ।

प्रतीहारः । इदं कथ्यते ।

रामे तटान्तवसतौ कुशतल्पशायि-
न्येवं तु नाम भवतो भगवन्ननास्था ।
स्मृत्वा तदेहि सगरं च भगीरथं च
दृष्ट्वाऽथ वा मम धनुश्च शिलीमुखांश्च ॥ १८ ॥

बन्दी । तर्हि लङ्घितो गोष्पदवत्समुद्रः ।

प्रतीहारः । समंतादवलोक्य भोभोः सकलप्लवङ्गमयूथपतयः समस्तगोलाङ्गूलसेना निःशेषाच्छभल्लचमूपरिवृढाश्च किमिदमवीरजनोचितमाचरितं यद्दूरात् परिहृतवेलावनालीनिवासकेलिभिः पराङ्मुखं पदात्पदमपक्रम्यते ।

कर्पूरचण्डः । विलोक्य कथमगणितनिजकुलक्रमाचारास्त्वद्वचनमप्यवधीरयन्तो मकराकरं दुस्तरमवलोक्य यथागतं प्रस्थिता एव ।

प्रतीहारः । भवतु संस्थापयामि ।

पीतोऽयं कलशोद्भवेन चुलुकं कृत्वैकमम्भोनिधि-
र्नो वेलामपि लङ्घते नियमितयासादयं वाडवात् ।
कल्पान्तेषु वहत्ययं च विपुलं श्वभ्रावशेषं वपु-
स्तत्पूर्वाकलितेप्यमुत्र भवतां कोऽयं विषादोदयः ॥ १९ ॥

किञ्च ।

अप्येकैके पिबत चुलुकं यद्यपां सैधवीनां
यद्येकैकं क्षिपथ जलधौ गण्डशैलोपलं वा ।
तेन श्वभ्रं भवति सकलोऽप्यम्बुराशिः स्थलं वा
तत्किं मिथ्या भजत विधुरं व्यस्ततन्द्राः कपीन्द्राः ॥ २० ॥

बन्दी । हंहो सुग्रीवप्रतिहार भवद्वचनमाकर्णयन्तः सर्वेऽप्येते यूथपतयो जलनिधिवेलावनालीषु विहितोत्साहं व्यवस्थिताः ।

प्रतीहारः । समन्तादवलोक्य ।

नीलेन सैन्यपतिना भुजताडनान्ते
मुक्तस्तथा किलकिलाध्वनिरेष रौद्रः ।

---

* ये कैलासे कलिन्दे मलयमहीधरे मन्दरे मेरुशैले
सह्ये विन्ध्ये महेन्द्रे तथा च हिमवहे पर्वते वानरेन्द्राः ।
सर्वे सुग्रीवपादप्रणतिप्रणयिनस्तेऽपि यत् स प्रसादः
सेवातुष्टस्य सत्यं तव यशोजलधेर्भूलतावेल्लितानाम् ॥

† किमन्यैर्विराधप्रभृतिविदरणाडम्बरोद्घाटने-
रेतत्ते वर्णयामो जलनिधिसविधावासिते यत् त्वयि ।
वर्तन्ते राक्षसीनां तरलकरतलस्फारत्रुट्यद्धारा
हारावाक्रान्तकण्ठा नवनयनजलोत्पीडिनो विप्रलापाः ॥

अष्टापि वाञ्छति विरिञ्चिरसौ श्रवांसि
शङ्के यथा करयुगेन मुधा पिधातुम् ॥ २१ ॥

धूम्रो विजृम्भणविदारितसृक्कदृष्ट-
दंष्ट्राङ्कुरक्रकचसंपुटवक्त्रयन्त्रम् ।
लाङ्गूलवेष्टितमयं मलयं महाद्रि-
मुपाट्य वाञ्छति निधौ पयसां निधातुम् ॥ २२ ॥

यावत्त्रिविक्रमतनुं न हरिर्जहाति
तावत्प्रदक्षिणपरिभ्रमणस्य कर्ता ।
आकर्ण्य संक्रमविधिक्रममम्बुराशा-
वृक्षाधिपः किमपि कुप्यति वार्धकाय ॥ २३ ॥

अप्यङ्गदः स्वनखदारितपाकपाण्डु-
कर्पूरगर्भरजसां पटलेन सद्यः ।
उद्धूलनं निजयशःपरिपाण्डुरेण
प्रस्वेदवारिशमनं कुरुते कुमारः ॥ २४ ॥

आमोदभाजि वनशालिनि केसराढ्ये
तारापतिस्फुरणतः प्रविजृम्भमाणे ।
लाङ्गूललम्बतरनालविशेषहृद्ये
दृष्टं न केन कुमुदे कुमुदस्य रूपम् ॥ २५ ॥

मैन्दः समुद्रपुलिनादयमश्विसूनु-
र्दृष्टो मनाङ्गकुलया द्विविदेन दृष्ट्या ।
आदाय दन्तिमकरद्वितयं कराभ्यां
युद्धाय योजयति सान्द्रमदार्द्रगण्डम् ॥ २६ ॥

वक्तीव वानरबलानि हसन् हनूमान्
मद्रोमवल्लिषु दृढं कुरुतावलम्बम् ।
येनैव सागरमहं लघु लङ्घयामि
श्यामाचरैश्च समरं सह योजयामि ॥ २७ ॥

तारास्तनत्रुटितचन्दनपङ्कलेप-
माबद्धकाञ्चनसरोजसहस्रमालम् ।
वक्षः प्लवङ्गपतिना विपुलं विलोक्य
संभावितश्चुलुकपेयपयाः पयोधिः ॥ २८ ॥

कर्पूरचण्डः । एवमेवैतत् । सचमत्कारं पुरोऽवलोक्य पश्य शबलीयमानजलमानुषमिथुनमत्यर्थकदर्थ्यमानशङ्खिनीयूथमितस्ततः पुनरुक्तायमानवाडवदहनडम्बरमम्बरोन्मुखतरङ्गताड्यमानमार्तण्डमण्डलमुच्चण्डतापविवशमुक्ताशुक्तिसंपुटप्रकटमुक्तमौक्तिकप्रकरमुच्छलदनच्छकच्छपमत्स्यं लोठमानपाठीनपृष्ठममन्दाक्रन्दितमकरमपसृतनक्रचक्रमुड्डीयमानसपक्षशिलोच्चयसंचयं तटावटप्रविष्टनष्टप्लवगं क्रन्दत्करिविमुच्यमानमदप्रवाहावगाहमम्भस्तम्भनिविष्टमहामुनिविधीयमानपावकप्रशमं विबुधसाध्यसिद्धविद्याधरजनविमुक्तोपरिगमनं नभसि समारुह्यावलोकितं तीरतरुकुलायललितैः शकुनिभिरपसृत्य दृष्टं कपिकुटुम्बकैर्निर्गत्य निरीक्षितं गर्भवासदुर्ललिताभिरसुरसुन्दरीभिरुत्थाय निभालितं मथनोद्गतशेषाभिरप्सरोभिः स्तुतचिरपरित्यागं मृगलाञ्छनैरावतपारिजातकौस्तुभप्रभृतिभिरुदन्वन्तं तत्किमयमेवंविधः । किञ्च ।

गूढस्फारस्फुलिङ्गोऽरुणमणिषु घनं लब्धधूमप्रबन्धो
नीलास्वश्मस्थलीषु स्फुटपिहितरुचिर्विद्रुमेषु द्रुमेषु ।
यत्सत्यं छन्नभस्मा गिरिपतिदलिते मण्डले मौक्तिकानां
दुःखेनोन्नीयतेऽग्निः सलिलवसतिभिः प्रज्वलन्नम्बुराशौ ॥२९॥

प्रतीहारः । सवितर्कम् ।

त्रैयक्षात्किंस्विदक्ष्णः क्षयसमयशिखी निर्गतश्चञ्चदर्चिः
किंस्विद्भित्त्वार्णवार्णांस्युपरि परिणतः सर्वतोऽप्यौर्ववह्निः ।
किंस्वित्कालाग्निरुद्रः स्थगयति जगतीमेष पातालमूला-
दाज्ञातं धाम्नि वारां रघुपतिविशिखाः प्रज्वलन्तः पतन्ति ॥३०॥

तदेह्युपस्थितमहासंरम्भं सुग्रीवबिभीषणसहितं रामदेवमनुवर्तावहे इति परिक्रम्य निष्क्रान्तौ । विष्कम्भकः ।

ततः प्रविशतो रामलक्ष्मणौ सुग्रीवबिभीषणौ हनूमांश्च ।

रामः । सशरसंधान एवाकाशे शिरसा प्रणम्य ।

यत्खातः सगरेण मर्त्यसरितं मन्दाकिनीं कुर्वता
पूर्णो यच्च भगीरथेन तदयं नः कीर्तनं सागरः ।
अप्यस्मिन् प्रतिकूलवर्तिनि मया कीर्णाः शरश्रेणयो
हे वृद्धाः प्रणतोऽस्मि मुञ्चत रुषं रामस्य कान्या गतिः ॥३१॥

बिभीषणः । सखे सुग्रीव अतिशशाङ्कशेखरमिदं चेष्टितं रामदेवस्य यदनेन ।

निर्वाणं जलपानपीडितजलैर्यस्मिन् युगान्तानले-
र्यस्याभाति कुकूलमुर्मुरमृदुः क्रोडे शिखी वाडवः ।
तस्याप्यस्य कृशानुसंक्रमकृतज्योतिःशिखण्डैः शरै-
र्दत्तश्चण्डदवाग्निडम्बरविधिर्देवस्य वारांनिधेः ॥ ३२ ॥

सुग्रीवः । सखे बिभीषण अदृष्टपूर्वमश्रुतचरं च रामभद्रचरितं कं न विस्मापयति । यज्जलान्यपि ज्वलन्ति ततश्च ।

अन्योन्याश्लेषरक्षाविधिवलितवपुर्यष्टितुष्टं भुजङ्ग-
द्वन्द्वैरुद्दामदाहस्तुतसलिलमहागर्भमश्चैर्य्यलायि ।
सर्वत्रावर्तमुद्रां विदधति जलधौ सायकैः पावकीये-
रुत्पाद्यादसां च त्रिजगदभिभवत्रिः स्तुतो विस्रगन्धः ॥३३॥

हनुमान् । साश्चर्यं पुरोऽवलोक्य प्रणम्य च ।

सेयं देव भ्रुकुटिरचना मुञ्चतु त्वल्ललाटं
ज्योतिश्चक्रस्तबकितशिखश्चापदण्डं च बाणः ।

वारां मध्यादयमुदयते पन्नगीगीतकीर्तिः
साधं दारैर्नदपरिवृतः साञ्जलिर्यत्समुद्रः ॥ ३४ ॥

सर्वे सकौतुकमवलोकयन्ति ।

रामः । तर्हि संहृतं चैत्रभानवमिदमस्त्रम् ।

लक्ष्मणः । आर्य एव संधानसंहाररहस्यवेदी ।

ततः प्रविशति सौपधिनिपेको बद्धव्रणपट्टश्च समुद्रो गङ्गायमुने च ।

गङ्गा । सखि सावित्रि न स्वैरं संचरणविधिपरिक्रमणक्षमस्तरङ्गिणीनाथः । पश्य ।

न क्षुण्णानि मुरारिशूकरखुरैर्यानि क्षमाकर्षणे
मन्थानाद्रिविघट्टनैरपि चिरं भग्ना न येषां त्वचः ।
शान्तं यत्र च वासुकेर्विषशिखाज्योतिर्भिरस्याम्बुधे-
स्तान्यङ्गानि रघूद्वहस्य विशिखैर्विद्धानि दग्धानि च ॥३५॥

सर्वे यथोचितं परिक्रामन्ति ।

समुद्रः । सखेदम् । देवि हैमवति प्रिये कालिन्दि कथमपराधी रामभद्रं द्रक्ष्यामि ।

गङ्गा । रत्नाकर स एव रामभद्रोऽपराधी येन सगरभगीरथयशोराशौ त्वय्यपकृतम् ।

यमुना । भाईरहीणाह किं णाम अवराहित्तणं जहिं तक्खणमणुवत्तणम् * ।

समुद्रः । तर्हि बालनारायणं रामदेवमुपसर्पामः । न हि राकामृगाङ्कमण्डलमन्तरेण चन्द्रमणेरानन्दजलस्यन्द इति सर्वे परिक्रामन्ति ।

यमुना । उपसृत्य दसरहणन्दण रामचन्द सअरभगीरहसरिसगोरवो दे समुद्दो संमुहो एस † ।

समुद्रः । साभ्यर्हणम् ।

इन्दुर्लक्ष्मीरमृतमदिरे कौस्तुभः पारिजातः
स्वर्मातङ्गः सुरयुवतयो देव धन्वन्तरिश्च ।
मन्थाम्रेडैः स्मरसि तदिदं पूर्वमेव त्वयात्तं
संप्रत्यब्धिः शृणु जलधनस्त्वां प्रपन्नः प्रशाधि ॥ ३६ ॥

रामः । सगौरवं भगवन् रत्नाकर नमस्ते नन्वहं प्रशास्यो भगवतः सागरस्य तदेकवारमविनयो नयो वा क्षम्यतां रामस्य ।

बिभीषणः । किमुच्यते । ननु निसर्गनिर्गलः पक्षपातो भवति भागीरथीनाथस्य ।

पीयूषाकर एष नित्यममुना धन्वन्तरिः सान्वयो
गङ्गावल्लभमस्य चेष्टितमयं शोभासुधादीधितिः ।
इत्यस्त्येव सतां मनःसु लिखिता सिन्धोः प्रशंसावलि-
र्नामात्रा भवतैव किं पुनरसौ लक्ष्मीगुरुः श्लाघ्यते ॥३७॥

* भागीरथीनाथ किं नामापराधित्वं यदि तत्क्षणमनुवर्तनम् ।

† दशरथनन्दन रामचन्द्र सगरभगीरथसदृशगौरवस्ते समुद्रः संमुख एषः ।

रामसमुद्रौ सलज्जमासाते ।

बिभीषणः । देव का पुनरसौ वर्णनावर्णिका यया रत्नाकरचरित्रमाविद्यते । पश्य ।

धत्ते यत्किलकिञ्चितैकगुरुतामेणीदृशां वारुणी
वैधुर्यं विदधाति दम्पतिरुषां यच्चन्द्रिकार्द्रं नमः ।
यत्पीयूषभुजां च मन्मथसुहृन्नित्यं वयः सम्पदां
यल्लक्ष्मीरधिदैवतं च जलधेस्तच्चित्रमाचेष्टितम् ॥३८॥

सुग्रीवः । ईदृश एव महिमा भगवतः सागरस्य । यतः ।

या स्त्रीणामधिदैवतं गिरिसुता तत्सोदरः सानुमान्
मैनाको रजताकरः सुतनयः शैलेश्वरो येन सः ।
पक्षच्छेदसमुद्यतेन्द्रकुलिशत्रासान्निलीय स्थितः
सोऽप्येतस्य करालकुक्षिकुहरे पातालजम्बालिनि ॥ ३९ ॥

अपिच ।

वहति भुवनश्रेणीं शेषः फणाफलकस्थितां
कमठपतिना मध्येपृष्ठं सदा स च धार्यते ।
तमपि कुरुते क्रोडाधीनं पयोधिरनादरा-
दहह महतां निःसीमानश्चरित्रविभूतयः ॥ ४० ॥

समुद्रः । सप्रणयासूयम् ।

मुञ्चद्भिरुग्रमनलं विशिखप्रकाण्डै-
र्मद्दाहडम्बरसमर्पणकेलिकाले ।
देव स्मृतं न कथमित्यपि यत्किलाहं
लक्ष्मीसखः क्व नु युगान्तशयः शयिष्ये ॥ ४१ ॥

रामः । अञ्जलिं बद्ध्वा मा पुनरविनयोद्घट्टनेन मां लज्जयतु नदीनाथः ।

समुद्रः । गङ्गायमुने प्रति ।

कमण्डलोर्ब्रह्मकराग्रभूषणा-
दियं प्रसूता भवमौलिभूषणम् ।
इयं च देव द्युमणेस्तरङ्गिणी
त्वदन्वयस्य प्रथमा सुवासिनी ॥ ४२ ॥

रामः । देवि अम्बिकापतिधृते मन्दाकिनि मातर्मार्तण्डनन्दिनि यमुने एष रामोऽभिवादयते ।

उभे । रविकुलालङ्करण राम अविरलं समरसंभारं वह ।

समुद्रः । रामं प्रति नियुज्यतामयं जनः ।

रामः । नन्वहं नियोज्यो भगवतः किं पुनः प्रकृते कर्मणि सहायमिच्छति रामः ।

समुद्रः । विशेषं श्रोतुमिच्छामि ।

गङ्गा । कृतं वाग्विस्तरेण ।

इहार्णवमहार्णस्सु पोतपात्रमिव स्थिरम् ।
द्रुतमारभ्यतां सेतुरखर्वैः पर्वतोत्तमैः ॥ ४३ ॥

सर्वे विस्मयन्ते ।

समुद्रः । यथाऽऽवेदितं त्रिस्रोतसा मणिमच्चक्रवालाचलमध्यमध्यासीनं वाडवदहनमुत्तरेणानन्तनागाङ्कपर्य्यङ्कशायिनं भगवन्तं दक्षिणेन योऽयं द्रुतेन्द्रनीलश्यामलः सलिलस्कन्धः स प्रदेशो निर्विबन्धः सेतुबन्धस्येति ।

रामः । विहस्य भगवन् किल ग्रावाणः कथं प्लवन्ते ।

समुद्रः । महामुनिवितीर्णवरस्य विश्वकर्मसूनोररातिवनदावानलस्य नलस्य करतलस्पर्शप्रभावेन ।

सर्वे महदाश्चर्यम् ।

नेपथ्ये । महान् कलकलः ।

समाकर्णितकेन हनुमान् । तदिदमत्रभगवतो मकरालयस्य वचनमुपश्रुत्य हृष्यतां कपिबलानामेष हराट्टहासमांसलः कलकलः ।

समुद्रः । रामभद्र किमपि वाञ्छन्तु वानरवीराः सकलकपिकुलानुग्राही पुनरयं मार्गो न सर्वे हनूमन्तस्तदमुं मलयतटीविटङ्कमधिरुह्य पश्यतु सेतुबन्धप्रदेशं रामः ।

रामः । यथाह धन्वन्तरेः प्रसविता । सप्रश्रयम् । अपार भगवन्नकूपार रामदुर्विनयसव्रणान्यङ्गानि तत्साधयतु निजं पातालनिलयं परमनुगृहीतोऽस्मि ।

समुद्रः । यथाह सप्तमो वैकुण्ठावतार इदं गम्यते गङ्गायमुनाभ्यां सह निष्क्रान्तः । सर्वे समारोहणं नाटयन्त्युपविशन्ति च ।

नेपथ्ये ।

भो नागनाथ हरिकच्छप दिव्यमत्स्य
स्वस्त्यस्तु वः क्षणमितः कुरुतापसर्पम् ।
अब्धावयं ननु रघूद्वहकीर्तिहेतुः
सेतुः प्रसर्पति दशाननधूमकेतुः ॥ ४४ ॥

अपिच ।

यादांसि हे चरत सङ्गतगोत्रतन्त्रं
वामेन चन्दनगिरेरुत दक्षिणेन ।
नोचेचिरन्तरधराधरसेतुसूति-
राकल्पमेव न विरंस्यति वो वियोगः ॥ ४५ ॥

सुग्रीवः । हनूमन् आदिश्यन्तां सेनापतयः पर्वतानयनाय ।

हनूमान् । यदादिशति स्वामी । सर्वतो निरूप्य ।

दृप्यद्विक्रमकेलयः कपिभटाः शृण्वन्तु सुग्रीवाज्ञा-
माज्ञां मौलिनिवेशिताञ्जलिपुटाः सेतोरिह व्यूहने ।
दोर्द्दण्डद्वयताडनश्लथधराबन्धोद्धृताभूधरा-
नानेतुं सकलाः प्रयात ककुभः किं नाम वो दुष्करम् ॥४६॥

सुग्रीवः ।

आनयन्तु कपयो महागिरी-
नङ्गदस्तु सपदि प्रतीच्छतु ।
त्वं नलः प्रबलबाहुविक्रमः
सेतुबन्धविधये नियोजय ॥ ४७ ॥

सर्वे समाकर्णितकेन ।

हनूमान् । विहस्य । आपद्विनीतः किमपि वर्तते वारिराशिः । यत्सेतुबन्धविहितये निजप्रतीहारशोणमुखेन शिक्षति जलचरमहासत्त्वानि ।

सुग्रीवः । सखे हनूमन् गच्छ आहूय वानरद्वयं यन्निवेदयति सेतुबन्धविधिं रामदेवाय ।

हनूमान् । निःसृत्य वानराभ्यां सह प्रविश्यैतौ कपित्थदधित्थौ निवेदयतः ।

कपित्थः । देव पेक्ख एसा वेलावणुम्मूलिदसए णिवेसिदपव्वदपब्भाराणं वाणराणं णिरन्तरा रिञ्छोली चदुद्दिसं गयणङ्गणे सेउबन्धविधिमासुत्तयन्ती विअरदि । *

रामः । अहो पराक्रमातिशयः शाखामृगाणामहो महिमा महार्णवस्य यदेतेऽपि वसुन्धराधरा उह्यन्ते यच्चानेनाप्येवं विधे भूयसि भारे दत्तः स्वहस्तः ।

दधित्थः । एष सेतुकन्दलैककन्दो भवत्पराक्रममहीरुहमहाकुसुमं सीताविरहविच्छेदसमारम्भस्वस्त्ययनं रत्नाकरलाञ्छनप्रथमावतारो निवेशितः शिलोच्चयोच्चयो नलेन ।

कपित्थः । णिव्वाविददावदहणडम्बरा णिद्धोददुद्धोत्तमदप्पहा पअट्टिदपज्जवण्णधातुद्दवा खणपडिचिअसअलकविकुला णिट्ठाविददुट्ठमइन्दविन्दा गयणङ्गणगदपवङ्गमपुङ्गवाणं पक्खेवणरएण णिव्वुदबुब्बुडा णलकरयलगतुलणतारिदा सञ्चरन्ति सेउसीमन्तम्मि धरणीधरा † ।

दधित्थः । एवमेवैतत् । यथा निवेदितं कपित्थेन ।

और्वस्यात्यशनं विधाय शिखिनः छत्वा च वारां निधे-
र्मर्यादास्खलनं नलप्रणिहिताः प्राप्तास्तलं रंहसा ।
उन्मज्जन्ति महावराहमलिनात् पातालजम्बालतो
वेदोद्धारितिमिङ्गिलैकवसतेर्द्राक्सर्वतः पर्वताः ॥ ४८ ॥

विमृश्य ।

* देव प्रेक्षस्व एषा वेलावनोन्मूलितशरा निवेशितपर्वतप्राग्भाराणां वानराणां निरन्तरा पङ्क्तिश्चतुर्दिशं गगनाङ्गणे सेतुबन्धविधिमासूत्रयन्ती विचरति ।

† निर्वापितदावदहनडम्बरा निर्धौतदुग्धोत्तमदर्पाः प्रकटितपज्ववर्णधातुद्रवाः क्षणपरिचितसकलकपिकुला निस्तापितदुष्टमृगेन्द्रवृन्दा गगनाङ्गणगतप्लवङ्गमपुङ्गवानां प्रक्षेपणरयेण निर्वृत्तबुद्बुदा नलकरतलापतुलनतारिताः संचरन्ति सेतुसीमन्ते धरणीधराः ।

उत्खातः कपिभिर्गिरिर्नभसि यः संभाव्यते विस्तरा-
देकोऽप्येष करोति सेतुघटनं नीरन्ध्रमब्धाविति ।
सोऽपि व्यञ्जितयोगनिद्रकपिलव्यापारपूतात्मसु
प्रक्षिप्तोऽप्सु सहस्रभागभरणोऽप्यस्य क्व नाम त्वमः ॥ ४९ ॥

कपित्थः । गुरुगुहाकुहरपइट्टदुट्ठमअरा तरुक्खन्धणिसण्ण-संखिणिलक्खका विसमसिलाअलफ्फुडिदसिप्पिसंपुटमुक्कमोत्ति-यकरम्बिदणिअम्बा तलप्परूढसेवालजडिलबन्धा जलणिवि-डपक्खपालिमन्दसंचरणा चिरवीसम्भपसविअकमलणाहमच्छ-कुलतिमिङ्गिलरुद्धकन्दरद्धन्ता उवरि णिवडन्तमहिहरपब्भारु-ल्लिडणभएण किंकिं ण कुणन्ति सिलुच्चयसंचया * ।

दधित्थः । सखे साधु निवेदितं राम देवाय । रामं प्रति ।

यस्मिन्वयं किलिकिलामुखरो विमर्दे-
स्तत्र ध्रुवं धृतमहीधरपातशङ्काः ।
दम्भोलिपातभयतः खमनुत्पतन्तः
सर्पन्त्यधो निभृतमद्रिमहाशकुन्ताः ॥ ५० ॥

हनूमान् ।

यं यं गिरिं क्षिपति वानरवर्ग एष
वारां निधौ निपतता ननु तेनतेन ।
द्राङ्मन्दराहतसुधाकवलामराणां
संस्थाप्यते मथनधीर्जलमानुषाणाम् ॥ ५१ ॥

लक्ष्मणः । साश्चर्यम् । आर्य कथापरम्परोपश्रुतानि प्रत्य-क्षय समुद्रयादांसि ।

क्षिप्तो गिरिः कच्छपपृष्ठपीठात्
संघट्टवेगोच्छलितोऽनुपाती ।
ग्रासीकृतोऽयं तिमिना किमन्यत्
सचापि लोलेन तिमिङ्गिलेन ॥ ५२ ॥

रामः । वत्स लक्ष्मण अत्यल्पमिदमुच्यते ।

अस्ति मत्स्यस्तिमिर्नाम तथा चास्ति तिमिङ्गिलः ।
तिमिङ्गिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति राघवः ॥ ५३ ॥

अपिच ।

क्षिप्तो गिरिर्जलधिबन्धविधौ नलेन
यात्येकतः शकुलशावविवर्तनाभिः ।
अप्यन्यतः कमठडिम्भनिशुम्भनेन
सेतुः कथञ्चिदिति सर्पति मध्यमब्धेः ॥ ५४ ॥

दधित्थः ।

---

* गुरुगुहाकुहरप्रविष्टदुष्टमकरास्तरुस्कन्धनिषण्णशङ्खिनीलक्षका वि-षमशिलातलोभ्भितस्फुटितशुक्तिसंपुटमुक्तमौक्तिककर्म्बितनितम्बास्तलप्र-रूढशैवालजटिलबन्धा जलनिबिडपक्षपालिमन्दसंचरणाश्चिरविश्रम्भप्रसू-तकमलनाभमत्स्यकुलतिमिङ्गिलारुद्धकन्दरध्वान्ता उपरिनिपतन्महीधर-प्राग्भारोल्लोडनभयेन किंकिं न कुर्वन्ति शिलोच्चयसंचयाः ।

यद्ग्रावाणः प्लवन्ते यदपि च जलधिर्बध्यते लोष्ठलीलां
बिभ्राणा यत्कपीन्द्रैः करतलतुलनादाह्रियन्ते महीन्द्राः ।
यच्चाष्टं दिव्ययोर्द्राक्कमठशकुलयोः पुत्रपौत्रप्रपौत्रै-
र्मार्गात्तद्द्वे सिन्धौ रजनिचरपतेर्नाशहेतुः स सेतुः ॥ ५५ ॥

सुग्रीवः । इदमपरमुपस्थितं सेतुबन्धे विघ्नान्तरम् ।

तावत्क्व नाम गिरयः श्रितसेतुबन्धा
रुन्धन्ति पाथसि समुत्थितपाञ्चजन्ये ।
यावत्तदुच्छलितदिव्यनदीसहस्रै-
रापूर्य दुस्तरतरः क्रियते समुद्रः ॥ ५६ ॥

विभीषणः । इदं चाद्भुततरम् ।

यावन्निपातरयकीर्णमशेषमर्णो
व्यावृत्य संलगति नो ककुभां मुखेभ्यः ।
तावत्स्वमुक्तमपि चित्रमपां निधाना-
दाकृष्य शैलमयमुत्पतितः प्लवङ्गः ॥ ५७ ॥

अपिच ।

और्वः शिखी वसति यत्र हरिश्च यत्र
यत्रासुराः शिखरिणश्च पतत्रभाजः ।
आमूलतोऽम्बुधिरयं प्रकटीकरोति
तत्तन्महाकपिविमुक्तमहीध्रकर्णः ॥ ५८ ॥

सुग्रीवः ।

ये गोत्रे सुरवारणस्य करिणो यः कौस्तुभीये कुले
कान्तो रत्नचयः श्रियश्च निभृता ये केचन ज्ञातयः ।
ये चन्द्रस्य च बान्धवाः किमपरं तानप्ययं दर्शये-
दद्युद्धृत्य हनूमताऽमरगिरिर्वेगादिहाऽऽक्षिप्यते ॥ ५९ ॥

रामः । सखे सुग्रीव मामेवं त्रयस्त्रिंशतो देवकोटीनां वासः स खल्वसौ ।

कपित्थः । एदे विन्दारअविन्दविलासवासा कुङ्कुमपङ्क-ल्लविअहूणतरुणीगणइपासच्छविणो मेरुमहीहरस्स एदे अट्ठ-णारीसरविसमसंणिवेसचरणपडिबिम्बचुम्बिअसिलाअलद्धन्ता णीहारणिवहणिविडणिवडणवित्तपण्डुरत्तणा गोरीगुरुणो गि-रिचक्कवट्टिस्स एदे सुराहूदसुधारसोक्करिसणिच्चतरुणतरुणो कोत्थुहमिअङ्कमइरासुरट्ठुमसिरिसमुप्पत्तिसक्खिणो मन्दरगि-रिन्दस्स एदे कुवेरमित्तत्तणकिअणिवासकित्तिवासणिव्विग्घम-हग्घिग्घअगुणा णित्यलिअजरठमियङ्कमण्डलच्छाआ केलासे-ल्लस्स एदे कंचणकमलघट्टवङ्गोट्ठिअमाणसा गन्धहरिणणाहि-सुगन्धिणो गन्धमादणस्स एते हणुमन्तवालभावचावलविलु-त्तलवलीकन्दलकडप्पा तक्कालपक्खालिअकेरलीकवोलकालक-न्तिणो अञ्जणधरित्तीहरस्स एदे मत्तगडमण्डलमगभङ्गकुदा-यिणो णम्मदाणईसोत्तसित्तसिहरसिहरणिडमण्डणा विञ्झधराह-

रस्स एदे विविहवण्णमणहरमणिप्पभाप्पसरविरइआखण्डल-कोअण्डदण्डमण्डला अगत्थिमुणिसीमन्तिणीमज्जणपवित्तिअतित्थवित्थारा रोहणाअलस्स एव्वमण्णस्स वि भुवणगब्भसंभवस्स गिरिणो साणुसंघाआ पवङ्गमपुङ्गवेहिं समोद्धरिआ सेउबन्धं विरअयन्ति * ।

दधित्थः । सहसा विलोक्य ।

पादोनवर्तिनि महोदधिसेतुबन्धे
पारे परे कपिबलैरवलोक्य लङ्काम् ।
अत्युल्लसत्किलिकिलारवमुत्प्लुतं च
यातं च सौधशिखरेषु निशाचरीभिः ॥ ६० ॥

नेपथ्ये महान् कलकलः । सर्वे समाकर्णितकेन ।

रामः । किं पुनरयं प्रलयकालोत्तालवैकुण्ठकालकण्ठकोलाहलकालः कलकलः ।

कपित्थः । पुरतोऽवलोक्य । देव सेउबन्धपडिबन्धणिमित्तं कीरन्तरअणरोहणमाणिक्कपादक्कस्स वित्थरन्तवाहिणीतरङ्गतुरङ्गमसंघट्टस्स ओत्थरन्तजङ्गमदुग्गमहामयंगअस्स पसरन्तजलहिजलवत्तरहवरस्स दोलन्तगअणकेलिकाणणधअवडायाडम्बरस्स कड्ढिज्जन्तजिम्भायमाणकयन्तवयणवाणासणस्स पडन्तसेणाविलासिणीकडक्खलक्खस्स समुज्जन्तरणलच्छिकङ्कणचक्कचक्कचक्कवालस्स उब्भिज्जन्तजयसिरिवेणिदण्डचण्डासिणो उवहिदस्स चउरङ्गस्स वि पढमक्खणप्पहाविदस्स रक्खसलोअस्स सुग्गीवसासणसमासादिदविचित्तहुंकारेहिं णिसग्गसंगअगिरिसिहरतरुप्पहरणपाणिजुअलेहिं वाणरेहिं पडिक्खलिज्जन्तस्स रक्खसाणीअस्स एस हलबोलो † ।

* एते वृन्दारकवृन्दविलासवासाः कुङ्कुमपङ्कचर्चितहूणतरुणीगण्डपार्श्वच्छवयो मेरुमहीधरस्य । एतेऽर्द्धनारीश्वरविषमनिवेशचरणप्रतिबिम्बचुम्बितशिलातलार्द्धान्ता नीहारनिवहनिबिडनिपतनवित्तपाण्डुरत्वा गौरीगुरोर्गिरिचक्रवर्तिनः । एते सुरानुभूतसुधारसोत्कर्षनित्यतरुणतराः कौस्तुभमणाङ्कमदिरासुरद्रुमश्रीसमुत्पत्तिसाक्षिणो मन्दरगिरीन्द्रस्य । एते कुबेरमित्रत्वकृतनिवासकृत्तिवासनिर्विघ्नमहर्घितगुणा निर्जितजरठमृगाङ्कमण्डलच्छायाः कैलासशैलस्य । एते काञ्चनकमलपत्रशोभितमानसा गन्धहरिणनाभिसुगन्धिनो गन्धमादनस्य । एते हनूमद्बालभावचापलविलुप्तलवलीकन्दलसमूहास्तत्कालप्रक्षालितकेरलीकपोलकालकान्तेरञ्जनधरित्रीधरस्य । एते मार्तण्डमण्डलमार्गैकभङ्गदायिनो नर्मदानदीस्रोतःसिक्तशिखरशिखण्डिमण्डना विन्ध्यधराधरस्य । एते विविधवर्णमनोहरमणिप्रभाप्रसरविरचिताखण्डलकोदण्डदण्डमण्डला अगस्त्यमुनिसीमन्तिनीमज्जनपवित्रिततीर्थविस्तारा रोहणाचलस्य । एवमन्यस्यापि भुवनगर्भसंभवस्य गिरेः सानुसंघाताः प्लवङ्गमपुङ्गवैः समुद्धृताः सेतुबन्धं विरचयन्ति ।

† सेतुबन्धप्रतिबन्धनिमित्तं कीर्यद्रत्नरोहणमाणिक्यपदातिकस्य विस्तीर्यद्वाहिनीतरङ्गतुरङ्गमसंघस्योद्यमानजङ्गमदुर्गमहामतङ्गजस्य प्रसरज्जलधिजलवद्रथवरस्य दोलायमानगगनकेलिकाननध्वजपताकाडम्बरस्य कृष्यमाणजृम्भायमाणकृतान्तवदनबाणासनस्य पतत्सेनाविलासिनीकटाक्षलक्षस्य समुद्यद्रणलक्ष्मीकङ्कणचक्रचक्रचक्रवालस्योपद्यमानजयश्रीवेणिदण्डचण्डासेरुपस्थितस्य चतुरङ्गस्यापि प्रथमक्षणप्रधावितस्य राक्षसलोकस्य सुग्रीवशासनसमासादितविचित्रहुंकारैर्निसर्गसंगतगिरिशिखरतरुप्रहरणपाणियुगलैर्वानरैः प्रतिक्रियमाणस्य राक्षसानीकस्यैष कलकलः ।

लक्ष्मणः । साधु लङ्केश्वर साधु षाड्गुण्योचितमुपक्रान्तं न पुनर्निरूपमाननिजसाहसोचितम् ।

सुग्रीवविभीषणौ । तदग्रतः किंचिदुपसृत्योपविशतु देवः ।

रामः । तथा करोति ।

कपित्थः । परिमिलिअवलीमुहपडिकवलिज्जन्ते णिसायरसेणे सुण्णीकइअ दिअन्तराइं समकालपधाविएहिं पवङ्गमेहिं पडिक्खदसिलुच्चआणं दससहस्सेहिं पूरिआ सा सेउखण्डी उत्तीण्णं अ संपुण्णं वाणराणीअं दिण्णो लङ्काउरीए सण्णाहपडहो वज्जियाइं पुरन्दरजआणीदाइं समरतूराइं पढिआ रावणरणभोगावली वन्दिविन्देहिं गीअं च केलासुद्धरणपमुहं चरिदुच्चयं चारणगणेहिं वाणरपडिपक्खभावेण अ सुणिज्जन्ति पयट्टहासाइं रक्खसीणं वअणाइं ता कुणह जहजह काअव्वम् * ।

लक्ष्मणः । भद्र विश्रब्धो भव नाद्याप्यायुधग्रहणकालो निर्दशाननानि निर्मेघनादानि च निःसृतानि बलानि ।

दधित्थः । सुभटसमाकृष्टकोदण्डदण्डं निहतवानराच्छभल्लभल्लं रभसनिक्षिप्तनिरन्तरभिन्दिपालमालं वेगप्रवर्तितचक्रचक्रं खण्डितविपक्षशक्ति शक्तिनिर्दारितपरशुकपरशुकं कुवलयवनभ्रमनिपातिसितशकुन्तकुन्तं परहृदयप्रकम्पनं द्विधाकृतकरीन्द्रकरालकरवालं समरप्रचारचतुराङ्गचतुरङ्गं निर्मर्यादप्रसृतमातङ्गमातङ्गं योधजयैकस्पन्दनस्यन्दनं समासादितविपत्तिनिर्भरं प्रवृत्तमेव व्रणितसकलानीकसमनीकम् । विभाव्य अये परस्परं संवलनादति तुमुलं वर्तते । विहस्यैकतो निरूप्य ।

अमी कबन्धैः प्लवगा रणाङ्गणे
शिरस्सु कण्ठात्पतितेषु रक्षसाम् ।
मिथो विरोधात् जनहासदायिनीं
सृजन्ति सृष्टिं कपिराक्षसात्मिकाम् ॥ ६१ ॥

अन्यतोऽवलोक्य ।

निशाचरोऽयं गमितः कबन्धतां
करीन्द्रवक्त्रे पतितेऽधिकन्धरम् ।
प्रवृत्तनृत्तक्रमभीमदर्शनैः
करोति हेरम्बवपुर्विडम्बनाम् ॥ ६२ ॥

अपरतोऽवलोक्य ।

अच्छभल्लकपयः स्वकबन्धै-
र्व्यत्ययादधिनिविष्टशिरस्कैः ।

* परिमिलितवलीमुखप्रतिकवलीयमाने निशाचरसैन्ये शून्यीकृत्य दिगन्तराणि समकालप्रधावितैः प्लवङ्गमैः प्रतिक्षिप्तशिलोच्चयानां दशसहस्रैः पूरिता सा सेतुखण्डी । उत्तीर्णं च संपूर्णं वानरानीकम् । दत्तो लङ्कापुर्यां सन्नाहपटहः । वादितानि पुरन्दरजयानीतानि समरतूर्याणि । पठिता रावणरणभोगावली बन्दिवृन्दैः । गीतश्च कैलासोद्धरणप्रमुखश्चरितोच्चयश्चारणैः । वानरप्रतिपक्षभावेन च श्रूयन्ते प्रकटहासानि राक्षसीनां वचनानि तत् कुरुत यथायथा कर्तव्यम् ।

मायया रचितचित्रशरीरा
राक्षसा इव विभान्ति मुहूर्तम् ॥ ६३ ॥

अन्यतोऽवलोक्य ।

गतं परप्रणतिपरायणं शिर-
स्समित्सुहृत्करयुगलं च तिष्ठति ।
इतीव हीं विकसितसंमदोत्सवं
प्रवर्तते किमपि कबन्धताण्डवम् ॥ ६४ ॥

कपित्थः । देव पेक्खदु अणवरअविप्पइण्णघुसिणचुण्णं विअ अम्बरं विरअअन्तं भुवणगब्भप्पसरिदं रअसमुद्दमट्ठमं विअ वित्थारअन्तं तिदिवदंसणदिण्णप्पआणं विअ धरणिमण्डलं दंसअन्तं विहिअवसुन्धराफंसभअं रवितुरङ्गाणं उच्छलियधूलिवलयतलिणीकअभूमिभारत्तणेण किअमहानुग्गहं भुअङ्गवइणो सेसस्स वीरजणदंसणणिवेसिअवेसविसेसपंसुलत्तणेण असूइयवित्थारं विज्जाहरीहिं पओसविसट्टणअणकन्दोट्टभरणणिवारणदिण्णपाणिपिहिदवयणत्तणेण जुउच्छिअं अच्छराहिं घण्टाटङ्कारसुणिज्जन्तकरिन्दं कणअकिङ्किणीझणक्कारजाणिज्जन्तसन्दणं हेसारवसूइज्जन्ततुरङ्गं कठ्ठिअगुणणिविडणमन्ताटणिमुक्ककडक्कारकलिज्जन्तधाणुक्कं अङ्गपरिफंसपडिजाणिज्जन्तरिक्खरक्खसवाणरं चउरङ्गवलचडुलचरणक्खोहसमुत्तम्भिअरेणुविरइअणीरन्धान्धआरं समरङ्गणं वट्टइ * ।

दधित्थः । देव यथाऽऽवेदितं कपित्थेन अति हि निर्भरो भूपरागप्रसरः । तथाहि ।

हेलाचण्डचलच्चमूपरिकरक्षुण्णक्षमाजन्मभिः
पक्वैलाफलगर्भचूर्णरुचिभिः कीर्णेऽम्बरे रेणुभिः ।
एतस्मिन् समराङ्गणे गुणनिधिर्विश्वप्रदीपोऽप्ययं
तूर्णात्तानितकांस्यतालकरणिर्जातो दिनानां पतिः ॥ ६५ ॥

अपिच ।

युद्धोत्थे रजसामुदञ्चति चये द्वाभ्यां दवीयोऽन्तरान्
पाणिभ्यां युगपच्च लोचनपुटानष्टौ पिधातुं क्षमः ।
एकैकं दलमुन्नमय्य गमयन् वासाम्बुजं कोशतां
धाताप्यावरणाकुलः स्थित इतः स्वाध्यायवन्ध्याननः ॥ ६६ ॥

कपित्थः । विहस्य णिरन्तरपसरन्तसरलक्खपुङ्खविकिरणेण विअडधअपडाआवेल्लिरपल्लवपेल्लणेण दंसणागअसुरसुन्दरीचक्कविमुक्कगरिल्लमल्लवेल्लणेण पढमं तणुईकदं रणरेणुचक्कवालं णिट्ठुरप्पहारकयकबन्धकन्धरारन्धणीसरन्तरुहिरधाराधोरणीहिं करिकरखेलावल्लिअसीअरासारप्पसरेण अ णिल्लूणमेव मूलदो धूलिमण्डलम् * ।

दधित्थः । प्रशान्तरेणुनि रणाङ्गणे पुनः संसक्तमेव यशोधनमायोधनं शूराणाम् । विभाव्य । अये महाप्रभावः समराङ्गणप्राणपरित्यागो वीरवर्गस्य यदप्सरसोऽपि स्वयंवरेणोपतिष्ठन्ते । यद्दुत ।

चण्डासिच्छेदलीलायितहृतशिरसो दिव्यतां संदधाना
न्यञ्चद्भिः कण्ठकाण्डैः समरवशदृशः पूर्वसंस्कारशक्त्या ।
द्राग्दृष्ट्वा नाथमाद्यं सपदि विदधतः फालदानं विमानाद्
दूरोत्स्वःसुन्दरीभिः किमिदमिति धृता बन्धुरैर्बाहुबन्धैः ॥ ६७ ॥

सुग्रीवः । यथैव निवेदितमति हि नामाश्चर्यवितरणैकमुष्टियोगः समरसंरम्भो वर्तते । तथाहि ।

वीराश्चण्डासिदण्डप्रहरणसुहृदः संमुखं संपतन्तो
ये जाताः पात्रमाजिप्वनिमिषसुमनोदामदानोत्सवस्य ।
पश्य प्रेङ्खत्तुरप्रप्रहतिभिरमरीभूय तैरेव भूयः
शेषाणां मूर्ध्नि मुक्ताः सुरकुसुममहावृष्टयः पुष्ठभृङ्गाः ॥ ६८ ॥

बिभीषणः । देव इतोऽपि दृश्यतां द्रष्टव्यम् ।

वीरैर्वैमानिकत्वं समरमरणतो लम्भितैः सङ्गरायं
दृष्ट्वा स्वस्वामिबाधाप्रहरणविरहात्सर्वतः सूत्रितोऽयम् ।
दारैः पाशप्रकाशैः सपदि वलयकैश्चक्रवत्संपतद्भिः
स्वर्णापीडैः स्वमुक्तैर्घणकरणिभिर्नूतनो युद्धमार्गः ॥ ६९ ॥

कपित्थः । णिविडपडन्तकरिकरङ्कसंकडं फारफेक्कारफुल्लिअगल्लसिवासेविआसवं रुहिरपाणपीडणुद्दामरडाइणीमुक्कडक्कारडामरं रत्तमत्तवेआलविलासिणीकेलिकलिअकिलिकिलाकोलाहलकाहलं समरसंभारसंभाविअपवलवलीमुहवलक्कन्तं रक्खसरीणं लङ्काभिमुहं पअट्टइ † ।

हनूमान् । विहस्य देव विजितमस्माभिर्यत्प्रमुख एव विमुखं राक्षसबलम् ।

* देव प्रेक्षतामनवरतविप्रकीर्णघुसृणचूर्णं वियदन्तरं विरचयन्तं भुवनगर्भप्रसृतं रजःसमुद्रमष्टममिव विस्तारयन्तं त्रिदिवदर्शनदत्तपर्याणमिव धरणिमण्डलं दर्शयन्तं विहितवसुन्धरास्पर्शभयं रवितुरङ्गाणां उच्छलितधूलिवलयतलिनीकृतभूमिभारत्वेन कृतमहानुग्रहं भुजङ्गपतेः शेषस्य वीरजननिर्वेशितवेशविशेषपांशुलत्वेनासूयितविस्तारं विद्याधरीभिः प्रदोषविकसितनयनकमलभरणनिवारणदत्तपाणिपिहितवदनत्वेन जुगुप्सितमप्सरोभिः घण्टाटङ्कारश्रूयमाणकरीन्द्रं कनककिङ्किणीझणत्कारज्ञायमानस्यन्दनं हेषारवसूच्यमानतुरङ्गं कृष्टगुणनिविडनमदटनिमुक्तकटत्कारकल्यमानधानुष्कं अङ्गपरिस्पर्शप्रत्यभिज्ञायमानर्क्षराक्षसवानरं चतुरङ्गबलचटुलचरणक्षोभसमुत्तम्भितरेणुविरचितनीरन्ध्रान्धकारं समराङ्गणं वर्तते ।

* निरन्तरप्रसरच्छरलक्षपुङ्खविकिरणेन विकटध्वजपताकाचञ्चलपल्लवप्रेरणेन दर्शनागतसुरसुन्दरीचक्रविमुक्तश्रेष्ठमाल्यपोक्षणेन प्रथमं तनूकीकृतं रणरेणुचक्रवालं निष्ठुरप्रहारकृतकबन्धकन्धरारन्ध्रनिःसरद्रुधिरधाराधोरणीभिः करिकरखेलाप्रेरितसीकरासारप्रसरेण च निर्लूनमेव मूलतो धूलिमण्डलम् ।

† निबिडपतत्करिकरङ्कसंकुलं स्फारफेत्कारफुल्लगल्लशिवासेविताऽसवं रुधिरपानपीडनोद्दामडाकिनीमुक्तडात्कारडामरं रक्तमत्तवेतालविलासिनीकेलिकलितकिलिकिलाकोलाहलसंकुलं समरसंभारसंभावितप्रबलवलीमुखबलाक्रान्तं राक्षससैन्यं लङ्काभिमुखं वर्तते ।

रामः । प्रवृत्ते रणकर्मणि सेनयोः सारणापसरणानि गणशो भवन्ति कस्तत्र जयः पराजयो वा ।

हनूमान् । देव नैवं यत्किल प्रमुखविमुखं बलं द्वादशवर्षाणि न संमुखीभवतीति प्रायोवादः ।

रामः । विहस्य भद्र हनूमन् किमनेन विमुखेन संमुखेन वा यदिह न धूर्जटिधराधरोद्धारेप्यकुण्ठो दशकण्ठो नापि विनिर्जितमघवा मेघनादः । पुरोऽवलोक्य कथं लङ्काप्रतोलीमतिक्रम्य राक्षसबलं वर्तते । ऊर्ध्वमवलोक्य सकौतुकम् ।

कोऽयं दिव्ये विमाने ।

हनूमान् ।

रजनिचरपतिः ।

लक्ष्मण, ।

साधु पौलस्त्य साधु ।

द्राक् चण्डं चन्द्रहासं कलय सविधगे नास्त्यरातौ तितिक्षा ।

रामः ।

सीताप्यत्रैव तस्याश्चटुषु कृतरतिः सैष भोः कार्मुकं मे

सुग्रीवः ।

शान्तं बाणाः सरन्तो न खलु जनकजां रावणं वा विदन्ति ॥ ७० ॥

नेपथ्ये ।

भोः पश्य राम मम पार्श्वगतां च सीतां

त्वच्च प्रदर्शय निजं जितवालि वीर्यम् ।

अस्याः स एष ननु मूर्धनि चन्द्रहासो

रम्भाप्रकाण्डदलनोद्यममातनोति ॥ ७१ ॥

रामः । विहस्य हंहो रावण संवृणु जनितजनहासं चन्द्रहासं कः शक्तिमानपि मृगाङ्कमूर्तिं शिलापट्टके पिनष्टि ।

लक्ष्मणः । सविषादम् ।

यावत्करोति न धनुः सशरं ममार्यो

यावच्च सूत्रयति विक्रमणं हनूमान् ।

आर्याशिरो दशमुखेन विलूय तावत्

क्षिप्तं च कल्पितमदर्शनमम्बरे च ॥ ७२ ॥

रामः । ससंभ्रमं कथमिदं दशकण्ठेन विलूय क्षिप्तं सीताशिरः शर्करायां भुवि पतति तत्सत्वरमुपसृत्य स्तनतटपरिपीडनपरिचितस्पर्शे प्रसारितकरयुगजनितेऽञ्जलौ प्रतीच्छामि । तथा कृत्वाऽवलोक्य च हा वैदेहि शिरःशेषा वर्तसे सकरुणं विभाव्य ।

तरुणभुजगलीला सैव वेणी तदेव

श्रवणयुगमनङ्गन्यस्तडोलाद्वयाभम् ।

स्मरकुवलयबाणावीक्षणे ते च तस्या-

स्तदयमलकलक्ष्मा वक्त्रचन्द्रः स एव ॥ ७३ ॥

हा प्रिये वैदेहि ।

इन्दोः संप्रति कान्तिरस्तु विमला दीर्घा मृगीणां दृशः

स्वादिष्ठा कलकण्ठिवाक्किसलयान्येकान्तरक्तानि च ।

यातायां त्वयि तस्य राक्षसपतेर्दुस्संचरं गोचरं

यद्वा तस्य गभीरमास्यकुहरं दुर्मेधसो वेधसः ॥ ७४ ॥

सविशेषकरुणम् ।

देव्याः शिरो मम पुरो यदिदं विलूनं

दृष्टं छलाद्दशमुखो यदसौ प्रणष्टः ।

धिङ्निष्फलं हनुमतः प्लवनं तदब्धौ

धिङ्निष्फलः स च ममाचलसेतुबन्धः ॥ ७५ ॥

सर्वे विषादं नाटयन्ति ।

लक्ष्मणः । सक्रोधम् । अरे रे समरकुण्ठ दशकण्ठ ।

छद्मात्मना जनकजानिधनेन्धनेन

यो दीपितः सपदि नो हृदि शोकवह्निः ।

निर्वापयिष्यति पतिस्तमसौ रघूणां

त्वत्कामिनीजनविलोचनवारिपूरैः ॥ ७६ ॥

रामः । अवस्थोचितं स्मित्वा सखे सुग्रीव वयस्य विभीषण रावणवधे विहितप्रतिज्ञाः कृता वयं वत्सेन ।

लक्ष्मणः । आश्चर्यमाश्चर्यम् । निलूनमप्यार्याशिरः समुल्लपति तत्सविधवर्तिनो भूत्वा शृणुमः । सर्वे समुपसर्पन्ति ।

लक्ष्मणः । कथं स्फुटाक्षरमिदमभिधत्ते ।

सूत्रधारचलद्दारुगात्रेयं यन्त्रजानकी ।

कण्ठस्थशारिकालापा कृता लङ्केशकेलये ॥ ७७ ॥

तच्छिरस्यैव निर्याता साऽचाऽहं राम शारिका ।

सच्चरित्ररसप्रीत्या त्वां बोधयितुमास्थिता ॥ ७८ ॥

तेन तेऽग्रेऽभिनीताऽस्याः शिरःखण्डननाटिका ।

मृता सीतेति येन त्वं गृजान् प्रति निवर्तसे ॥ ७९ ॥

सर्वे हर्षं नाटयन्ति ।

रामः । स्वस्ति वभत्यै प्रियकारिण्ये तत्समीहितसिद्धये साधय विहस्य अहो शौर्य इव छलप्रपञ्चेऽपि चातुर्यं रावणस्य ।

लक्ष्मणः । आर्य सुवेलाचलमेखलासु तावदावसन्तु कपियूथपतयः प्रातर्लङ्कादुर्गमभियोक्ष्यते ।

रामः । यदि न प्रकृत्यमर्षणो रावणः संप्रत्येव प्रत्यभियुङ्क्ते ।

नेपथ्ये । महान् कलकलः ।

लक्ष्मणः । किं पुनरयं भैरवाकारशङ्करकृतफेत्कारविकरालः कलकलः ।

बिभीषणः । पुरोऽवलोक्य ।

किञ्चिन्मृगाधिपमुखाय करीन्द्रवक्त्रं
कुप्यन्नुलायवदनाय च वाजितुण्डम् ।
आसेधयत् सपदि रात्रिचराननेन
पर्येत्ययं दशभुजो ननु सिंहनादः ॥ ८० ॥

कथय कोऽयं सिंहनादो नाम ।

बिभीषणः । देव मान्दोदरेयो मेघनादावरजश्च समरसीमानमवतरति तेनायमन्ति मांसलः कलकलः ।

रामः । विहस्य तदयमर्धं रावणस्य ।

बिभीषण, । अत्रयवसंख्यानेन पराक्रमेण पुनर्द्विगुणो यतः ।

दोर्दण्डोदञ्च्यमानाचलचलितभवस्तम्भनारम्भमज्ज-
द्बुध्नप्राग्भारभाराविजभुजविपिनं कुर्वतो न्यञ्चदुच्चैः ।
लङ्कानाथस्य नन्दिप्रभृतिषु दलयत्स्वङ्गमङ्गं महास्त्रे-
रेकं वेगादनेकेष्वपि रचितरणं सिंहनादं स्मरामि ॥ ८१ ॥

ततः प्रविशति यथानिर्दिष्टः सिंहनादः ।

सिंहनादः । पुरोऽवलोक्य कथमन्तरिततापसं वानरसेनापतिभिरभिमुखीभूतम् ।

रामः । किं पुनरयं पुरतोऽन्धकार इव ।

कपित्थः । देव देवादेसमन्तरेणवि जम्बवन्तमुक्कवुक्कारवाइं हणुमन्तमन्तपरिसरिआइं विप्फुरिअभीमभुअदण्डाइं वित्थरन्ततारतारगलगज्जिदाइं छाआणिज्जिअपरिपिक्कफणसफलपणसपिसङ्गिअगअणङ्गणाइं सुसेणाहिट्ठिअसेणाणिवेसाइं णीलप्पहाणीलिअदसदिसन्तराइं वलीमुहकिलिकिलारअभरिददरीमुहाइं णलप्पहावाणलदुज्जाआइं समुल्लसियकुमुदकन्तिकुमुअकित्तिसन्ताणाइं सिंहणादसंमुहमोत्थरिआइं णीसेसाइं वि वाणरवलाइं * ।

दधित्थः । अथ युगपत् क्षुभितानि दशार्धसंख्यान्यपि सिंहनादमुखानि ततश्च ।

धूत्कारध्वनितं मृगेन्द्रवदनाद्वन्त्याननाद् बृंहितं
बंहिष्ठं च लुलायतुण्डकुहरक्रोडाज्जरद्राह्नतम् ।
जातं चार्वणवक्त्रकन्दरदरादेतस्य हेषारुतं
संख्ये कस्य भयोदयाय न वचो निर्यच्च रक्षोमुखात् ॥ ८२ ॥

कपित्थः । तदो देव णिविडभुअदण्डपीडणाविसदट्टङ्कारं कदुअ कोदण्डं तह वरिसिदुं पउत्तो वाणविट्ठिं वाणरविन्दे जह ण सुरसुन्दरीविमुक्को कुसुमुक्केरो सुभटेसु णिवडइ ण समरङ्गणगअं रेणुचक्कमक्कमइ दिअन्तरालाइं ण दिणअरकिरणावावारपअट्टोवि गयणमाणिक्कस्स पसरइ रहो * ।

सिंहनादः । पुरोऽवलोक्य साट्टहासम् ।

रेरे क्षत्त्वाः प्लवगपशवः किं भवद्भिर्भवद्भिः
संग्रामाये मम रणरसो लम्भितः सर्वभावम् ।
यस्मिन् कस्मिंच खलु समरे रोचकी सिंहनाद-
स्तन्मे रामं कथयत स हि श्रूयते वीरसिंहः ॥ ८३ ॥

कपित्थः । वाणवरिसपीडिअं विअ वाणरवलं पज्जाउलं जंबुद्दीवाहिमुहं वट्टइ † ।

सिंहनादः । भूयो विलोक्य क्रिमेताभिर्विजिताभिरपि वानरकीटकोटिभिः । हस्तानुद्दिश्य ।

हे पाणयो बिभृत पञ्च महाधनूंषि
पञ्चापि येन युगपत्प्रतियोधयामि ।
सुग्रीवमत्तदमनं च सहाङ्गदेन
रामं च रामजयिनं सह लक्ष्मणेन ॥ ८३ ॥

भूयः पुरो विलोक्य साट्टहासं कथं तेऽपि महावीरवानरसेनापतयोऽपि नश्यन्ति किञ्चिदुच्चैः ।

सुग्रीवाङ्गदमैन्दनीलकुमुदप्रह्लादतारादयः
किं मुग्धाः स्थ निजाग्रहान्प्रति यथा दृष्टेन याताध्वना ।
पातालार्पितशैलजालरचनारम्यक्रमोत्तम्भितो
नन्वास्ते विपुलः स वो जलनिधावद्यापि सेतुः स्थिरः ॥ ८५ ॥

रामः । वत्स लक्ष्मण किमेतत् ।

लक्ष्मणः । सगर्वमयतो भूत्वा रेरे विकृताकार दुराचार नृमांसकवलनदक्ष राक्षसापसद किमिदमतिप्रगल्भमाभाषसे नन्वदृष्टवीरप्रकाण्डचरितचण्डिमाऽसि ।

सिंहनादः । अनाकर्णितकेन वानरताडनं नाटयित्वा रेरे क्षत्त्वाः प्लवगपशव इत्यादि पठति ।

रामः । साधु सिंहनाद साधु न क्लेपितस्त्वया वीरवर्गवरिष्ठो दशकण्ठः ।

सिंहनादः ।

रामराम मयि मुञ्च सायकान्
प्राक्प्रहारुचिरेष रावणिः ।
येन ते चरममाशुदर्शये-
च्छस्त्रतन्त्रमयमेतदम्बरे ॥ ८६ ॥

रामः । सधैर्यमवलोक्य विहस्य च ।

---

* देवादेशमन्तरेणापि जाम्बवन्मुक्तबुक्कारखाणि हनूमन्मन्त्रप्रसृतानि विस्फुरितभीमभुजदण्डानि निस्तीर्यमाणतारतारगलगर्जितानि छायानिर्जितपरिपक्वपनसफलपनसपिशङ्गितगगनाङ्गणानि सुषेणाधिष्ठितसेनानिवेशानि नीलप्रभानीलितदशदिगन्तराणि वलीमुखकिलिकिलारवभरितदरीमुखानि नलप्रभावानलदुर्जयानि समुल्लसितकुमुदकान्तिकुमुदकीर्तिसंतानानि सिंहनादसंमुखमवतीर्णानि निःशेषाण्येव वानरबलानि ।

* ततो देव निबिडभुजदण्डपीडनाविशदटङ्कारं कृत्वा कोदण्डं तथा वर्षितुं प्रवृत्तो बाणवर्षं वानरवृन्दे यथा न सुरसुन्दरीविमुक्तः कुसुमोत्करः सुभटेषु निपतति । न समराङ्गणगतं रेणुचक्रमाक्रामति दिगन्तराणि । न दिनकरकिरणव्यापारप्रकटोऽपि गगनमाणिक्यस्य प्रसरति रथः ।

† बाणवर्षपीडितमिव वानरबलं पर्याकुलं जम्बुद्वीपाभिमुखं वर्तते ।

धिग्धिङ्निशाचरपतिं शुकसारणौ धि-
ग्धिङ्मेघनादमथ धिग्दश राजपुत्रान् ।
यैस्त्वं विचित्रवपुषा चिरमीक्षणीयः
क्रूराशयैरुपहृतो रणदैवत.यै ॥ ८७ ॥

सिंहनादः । राघव अति हि नाम दृप्यसि किं पुनर्दर्प्पकारणं किञ्च न ते चरितेषु व्रीडिताः स्मः ।

स्त्रीमात्रं ननु ताटका भृगुभवो रामश्च विप्रः शुचि-
र्मारीचो मृग एष भीतिभवनं वाली पुनर्वानरः ।
भोः काकुत्स्थ विकत्थसे कथय किं वीरो जितः कस्त्वया
दोर्दर्प्यस्तु तथापि ते यदि ततः कोदण्डमारोपय ॥ ८८ ॥

लक्ष्मणः । विहस्य ।

स्त्री ताटकास्तु परं गुर्वाज्ञा गुरुकारणम् ।
मारीचोऽप्यस्तु स मृगः क्षात्रं हि मृगयारसम् ॥ ८९ ॥

परशुरामब्राह्मणदमने शृणु सूक्तं वैतालिकस्य येजम्भं जितवानित्यादि पठति वालिविजये पुनरुपालभ्यसे ।

रामः ।

वाली वलीमुख इति ब्रुवता त्वयैव
लङ्कापतेर्मलिनितो यशसां प्ररोहः ।
न्यूनाज्जयो यदिह

लक्ष्मणः ।

स चापि तेन
दोर्मूलपञ्जरशुको विहितः पिता ते ॥ ९० ॥

सिंहनादः । सक्रोधम् । रेरे कुलत्रिय तातमधिक्षिपसि तदेव शितमुखैः शिलीमुखैरवकीर्यसे ।

रामः । धनुरुद्यम्य रेरे राक्षसपोत त्वमपि प्रत्यवकीर्यसे किन्तु लङ्कापुरीगोपुरपरिसरवसुन्धरासु शरविक्षेपाद्विद्रुतपौरजना उद्विजिता भवन्ति तत् किञ्चिदुपसृत्य समरसंरम्भमारभामहे ।

इति निष्क्रान्ताः सर्वे ॥

॥ असमपराक्रमो नाम सप्तमोऽङ्कः ॥

गोविन्ददेवशास्त्री ।

---

## THE APHORISMS
OF THE
## YOGA PHILOSOPHY,
OF
PATAÑJALI.

( *Continued from page 134.* )

*a* (He) declares (now) another Siddhi*

The superhuman faculty which consists in a knowledge of the speech of all living beings.

शब्दार्थप्रत्ययानामितरेतराध्यासात्संकरस्तत्प्रविभागसंयमात्सर्वभूतरुतज्ञानम् ॥१७॥

* सिद्ध्यन्तरमाह ।

Aph. 17.—A confusedness of Śabda (an uttered sound or a word) Artha i.e. (class, quality, action &c.) and Pratyaya (knowledge) arises from comprehending these three indiscriminately. (But when an ascetic views these separately by performing Sañyama—restraint—with regard to them, a knowledge (is produced in him) of the speech of all living beings (i.e. he has a power of understanding their speech.)

*b.* "Śabda" is that (uttered sound) which is cognizable by the organ of hearing; it consists of letters whose order is fixed and it is productive of knowledge of a fixed object. [This definition of Śabda is given here according to the technicality of the Nyáya Philosophy, and according to that of the gramarians it is as follows] Śabda is (that sound in the utterance of which) no order of its constituent letters is to be conceivable and (hence) which is Sphotátmá (i.e. from which, class, quality, action &c. become plain at once) and which can (only) be understood by a mind cultivated by science. According to both of these technicalities, it (Śabda) consists of term and sentence, because these two can indicate their own fixed objects.

"Artha" (means literally sense, but here it means) class, quality, action &c., "Pratyaya, (means) knowledge i.e. a modification of the internal organ, in the form of an object. A confusedness (arises) by forming the same notion of them or supposing the Śabda, Artha and Pratyaya (just expounded) to be indentical though they are different from each other, in their use. An illustration of this is as follows. (Suppose) when a person is asked to bring a cow, he then comprehends indiscriminately these three, i.e. the material substance indicated by the term cow, possessed of the dewlap &c., and possessing the characteristic implied by the term cow: its indicatory term cow and the knowledge by which the material substance is conceived: but he does not perceive them so discriminately that the term cow, is indicatory of this (material substance); that this is to be declared by the term cow, and that this is the knowledge by which the two former are conceived. Thus, when he is asked what is this substance, what is this term and what is this knowledge, he then, gives the same answer "cow" to all these questions. If he does not conceive the identity of these three, how does he give the same answer to all these questions? In this state, he who, having made this distinction that indicativeness is the essential nature of Śabda (term), that the state of having to be declared is the essential nature of Artha (before defined), and that luminousness is the essential nature of Jñána (knowledge), performs Sañyama—restraint—; acquires the knowledge of

or understands the speech or language of all living beings i.e. of animals wild and domestic, birds, reptiles &c., that is whatever cry or whatever word (is uttered) he knows it all, viz., that the sound was uttered with such and such a motive.*

*a* (He) mentions another Siddhi †

The superhuman faculty which consists in a knowledge of the class &c. experienced in the former birth.

संस्कारसाक्षात्करणात् पूर्वजातिज्ञानम् ॥१८॥

Aph. 18.—A knowledge of the class (&c., experienced) in a former birth (arises) from presenting to our mind (Sákshátkaraṇa)—the trains of self-reproductive thought —Sanskáras (of the internal organ.)

*b.* Sanskáras—the trains of self-reproductive thought which consist of the present consciousness of past perceptions of the internal organ are twofold. Some of these produce only a memory (of the events formerly experienced) and others are the causes of the modifications in the shape of class, age, and experience of pleasure and distress as they are called virtue and vice. When (an ascetic) performs Sañyama—restraint—with regard to the Sanskáras (just illustrated); that is, when he remembers only through an abstract meditation and without any exciting cause, all that is past, reflecting that he has experienced such and such thing—this is the result of the former set of the Sanskáras—and that he has performed such and such action, then he clearly sees the class &c., experienced in the former birth when the trains of self-reproductive thought are thus gradually awakened.‡

*a.* (He) explains (now) another Siddhi.*

The superhuman faculty which consists in the penetration of the mind of other persons.

प्रत्ययस्य परचित्तज्ञानम् ॥ १९ ॥

Aph. 19.—The mind of other persons becomes known to (an ascetic when he performs Sañyama—restraint) with regard to the Pratyaya—knowledge—(contained in it i. e. in the mind of other persons.)

*b.* When (an ascetic) performs Sañyama with regard to the Pratyaya—knowledge—obtained by any characteristic such as complexion of the face; then he knows the mind of another person that is, (he) knows even the qualities which have entered into the mind of others, whether their mind is impassioned (Sarága) or dispassionate (Virága.)†

*a.* (He now) declares a peculiarity of this same knowledge of the mind of other persons.‡

The mind of other persons is comprehended without its object.

न तत्सालम्बनं तस्याविषयीभूतत्वात् ॥ २० ॥

Aph. 20.—It i.e. (the mind of other persons) is not comprehended with its Álambana—support i. e. object (to an ascetic) because it was not the object (of Sañyama which he, the ascetic, made use of in comprehending the mind.)

*b.* The mind of other persons cannot be understood together with its Álambana—support—i.e. object, because it is not recognized by any characteristic. For by the characteristic the mind only of others is understood, but it is not known what is its object and whether it be blue or yellow. It cannot be known what that object is because Sañyama cannot be performed with regard to it since it is not recognized. Hence the mind of others is not comprehended together with its Álambana, object—as it is not recognized. But the properties of the internal organ—chitta i.e. mind—are comprehended. When an ascetic performs Praṇidhána, i.e. Sañyama with a view of discovering what mind has for its object, then a knowledge of that object also arises in him by that Sañyama (restraint.) §

---

* शब्दः श्रोत्रेन्द्रियग्राह्यो नियतक्रमवर्णात्मा नियतैकार्थप्रतिपत्त्यवच्छिन्नः । यदि वा क्रमरहितः स्फोटात्मा शास्त्रसंस्कृतबुद्धिग्राह्यः । उभयथापि पदरूपो वाक्यरूपश्च तयोरेकार्थप्रतिपत्तौ सामर्थ्यात् । अर्थो जातिगुणक्रियादिः प्रत्ययो ज्ञानं विषयाकारा बुद्धिवृत्तिः । एषां शब्दार्थज्ञानानां व्यवहारे इतरेतराध्यासाद्भिन्नानामपि बुद्ध्येकरूपतासंपादनात्संकीर्णत्वम् । तथाहि गामानयेत्युक्ते कश्चिद्गोलक्षणमर्थं गोत्वजात्यवच्छिन्नं सास्नादिमत्पिण्डरूपं शब्दं च तद्वाचकं ज्ञानं च तद्ग्राहकमभेदेनैवाध्यवस्यति न त्वस्य गोशब्दो वाचकोऽयं गोशब्दस्य वाच्यस्तयोरिदं ग्राहकं ज्ञानमिति भेदेन व्यवहरति । तथाहि कोऽयमर्थः कोऽयं शब्दः किमिदं ज्ञानमिति पृष्टः सर्वत्रैकरूपमेवोत्तरं ददाति गौरिति स यद्येकरूपतां न प्रतिपद्यते कथमेकमेवोत्तरं प्रयच्छति । एतस्मिन् स्थिते योऽयं प्रविभाग इदं शब्दस्य तत्त्वं यद्वाचकत्वं नाम । इदमर्थस्य यद्वाच्यत्वम् । इदं ज्ञानस्य यत्प्रकाशकत्वमिति प्रविभागं विधाय तस्मिन् प्रविभागे यः संयमं करोति तस्य सर्वेषां भूतानां मृगपशुपक्षिसरीसृपादीनां यद्रुतं यः शब्दस्तत्रज्ञानमुत्पद्यतेऽनेनाभिप्रायेणैतेनायं शब्दः समुच्चारित इति सर्वं जानाति ।

† सिद्ध्यन्तरमाह ।

‡ द्विविधाश्चित्तस्य वासनारूपाः संस्काराः केचित् स्मृतिमात्रोत्पादनफलाः के चिज्जात्यायुर्भोगलक्षणविपाकहेतवो यथा धर्माधर्माख्याः । तेषु संस्कारेषु यदा संयमं करोति एवं मया सोऽर्थोऽनुभूत एवं मया सा क्रिया निष्पादितेति पूर्ववृत्तं सर्वमनुसंदधानो भावनयैवावबोधकमन्तरेणोद्बुद्धसंस्कारः सर्वमतीतं स्मरति क्रमेण साक्षात्कृतेषु बुद्धेषु संस्कारेषु पूर्वजन्मानुभूतानपि जात्यादीन् प्रत्यक्षेण पश्यति ।

* सिद्ध्यन्तरमाह ।

† प्रत्ययस्य केन चित् मुखरागादिना लिङ्गेन गृहीतस्य यदा संयमं करोति तदा परकीयस्य चित्तस्य ज्ञानमुत्पद्यते । सरागमस्य चित्तं विरागं वेति परचित्तगतानपि धर्मान् जानातीत्यर्थः ।

‡ अस्यैव परचित्तस्य विशेषमाह ।

§ तस्य परस्य यच्चित्तं तत्सालम्बनं स्वकीयालम्बनेन सहितं न शक्यते ज्ञातुमालम्बनस्य केन चिल्लिङ्गेनाविषयीकृतत्वात् । लिङ्गाच्चित्तमात्रं परस्यावगतं न तु नीलविषयमस्य चित्तं पीतविषयमिति वा । यच्च न गृहीतं तत्र संयमस्य कर्तुमशक्यत्वात् न भवति परचित्तस्य यो विषयस्तत्र ज्ञानं तस्मात् परकीयं चित्तं नालम्बनसहितं गृह्यते तस्यालम्बनस्यागृहीतत्वात् । चित्तधर्माः पुनर्गृह्यन्त एव यदा किमनेनालम्बितमिति प्रणिधानं करोति तदा तत्संयमात् तद्विषयमपि ज्ञानमुत्पद्यत एव ।

*a.* (He now) states another Siddhi.*

The superhuman faculty which consists in the disappearing of an ascetic.

कायरूपसंयमाद् ग्राह्यशक्तिस्तम्भे चक्षुःप्रकाशासंयोगेऽन्तर्धानम् ॥ २१ ॥

Aph. 21.—By performing Sañyama—restraint—about form (the property) of body (defined in Aph. 11. See the Nyáya Philosophy p. 16). Its power of being apprehended (by the organ of sight) being checked, and luminousness, the property of the organ of sight having no connection (with its object i. e. the form, the result) is the disappearance of the ascetic.

*b.* The form (Rúpa) of the body (Káya) is a property to be apprehended by the organ of sight. By performing Sañyama with the reflection "Form consists in this body" (and no-where else) the power belonging to that form of being apprehended by the organ of sight is arrested through being subjected to that notion. On the cessation of the connection of the organ of sight with luminousness, luminousness being a property of *Sattva,* [that is to say] when there is no function of apprehending that [form], the disappearance of the ascetic takes place i. e. he is not seen by any body.†

*Govinda Deva Śástri.*

*(To be continued.)*

## NOTICES OF BOOKS.

### KÁVYAPRAKÁŚIKÁ.*

We have pleasure in acknowledging the receipt of the 4th fasciculus of an intended collection of Sanskrit poems and dramas, accompanied with notes and Bengali versions, entitled Kávya-Prakáśiká. If we may allow ourselves to judge from the specimens before us, we think the undertaking deserves every encouragement, as it promises not only to supply us with neat and handy editions of standard poetical works in Sanskrit, but, by chaste and idiomatic translations to contribute to the progress of Bengali literature.

### SANSKRITA-PRATHAMAŚIKSHÁPUSTAKAM *

We can say nothing in favour of this little Reading Book. The lessons it contains are inaccurate, inelegant, and to a Hindu unintelligible translations of extracts from the Pentateuch, the Book of Job, the Psalms, the Sermon on the Mount &c. Better Sanskrit and equally good morality might have been offered to the beginner from the Hitopadeśa or the Mahábhárata. For instance, in what we suppose is meant for a translation of the Tenth Commandment the reader is forbidden to covet the house, wife, ox, or ass *of the man who lives near him* (samípavásimánushasya. The laws of Sandhi and all grammar are ignored and the book concludes appropriately with this monstrous blunder "Samápto'-*yam* Prathamaśikshápustakam."

* सिद्ध्यन्तरमाह ।

† कायः शरीरं तस्य रूपं चक्षुर्ग्राह्यो गुणस्तस्मिन्नस्मिन् काये रूपमिति संयमात् तस्य रूपस्य चक्षुर्ग्राह्यत्वरूपा या शक्तिस्तस्याः स्तम्भे भावनावशात्प्रतिबन्धे चक्षुःप्रकाशासंयोगे चक्षुषः प्रकाशः सत्त्वधर्मस्तस्यासंयोगे तद्ग्रहणस्य व्यापाराभावे योगिनोऽन्तर्धानं भवति । न केन चिदसौ दृश्यत इत्यर्थः ।

* Moozumdár's Series. Kávyaprakáśiká Part IV. Sakuntalá and Kumára-Sambhava with notes and Bengali translations. By Varadáprasád Moozumdár, Calcutta.

* The first Reading Book in Sanskrit, Compleid by the Rev. B. C. Chuckerbutty, Calcutta.

# BENARES, ANCIENT AND MEDIEVAL: A MONOGRAPH.

BY FITZEDWARD HALL, M.A., D.C.L., OXON.

*Reprinted by Permission.*

*(Concluded from page 142.)*

To the early Arab and Persian travellers Gangetic India was an unexplored tract.[1] Albirúní, who wrote about A.D. 1000, had, however, heard of the holy fame of Benares, which he compares, not inaptly, to Mecca.[2] Mahmúd of Ghazní is said, by a late writer, to have advanced as far as Benares, and to have made a few converts there, during his ninth incursion.[3] In 1194, Shihábuddín, after defeating the Kanaujan monarch, Jayachandra, marched on that city, where he is reported to have demolished near a thousand Hindu temples.[4] The subsequent history of the place, for many centuries, is well-nigh a blank. Its religious character was not, in the eyes of its Islamite masters, a thing to recommend it; and commercial or political importance it had none.[5] Even Akbar, with all his toleration of Hinduism, and occasional partiality to it, did nothing to prop the sinking fortunes of Benares. Its decline was uninterrupted; and, under Aurangzeb, who

[1] "La partie de l' Inde avec laquelle les Arabes avaient le moins de rapports était l' Hindostan proprement dit, c'est-à-dire la contrée baignée par la Djomna et le Gange, depuis le Pendjab jusqu'au fond du golfe du Bengale. Le grand rôle joué jadis par les rois de Canoge, près du confluent du Gange et de la Djomna, avait retenti jusqu'à eux; mais ils n'avaient qu'une idée confuse de ces belles et riches contrées, et il paraít que telle était la politique ombrageuse des radjas et des brahmanes que, jusqu'au commencement du XI^e siécle de notre ére, lors des conquétes de Mahmoud le Gaznévide, aucun Arabe n'avait pu pénétrer dans ces régions."—*Relation des Voyages,* etc., by M. Langlès and Father Reinaud, Vol. I., Preliminary Dissertation, pp. XLVIII., XLIX.

[2] "Benarès était aussi, suivant Albyrouny, un lieu réputé pour sa sainteté, et où les personnes pieuses venaient des provinces les plus lointaines pour se livrer à des exercices de religion, à peu prés comme les musulmans étaient dans l'usage de se rendre à la Mekke, auprès de la Kaaba. La plus grande ambition des Indiens était de pouvoir mourir dans cette ville. En effet, dit Albyrouny, tout criminal qui parvenait à mettre les pieds dans cette enceinte, était à l'abri de toute poursuite; à plus forte raison, les personnes qui y mouraient n'avaient plus de crainte à concevoir, de la part de Dieu, pour leurs fautes passées."—Father Reinaud's *Mémoire Géographique, Historique et Scientifique sur l'Inde,* etc., p. 288.

[3] English *Ayeen Akbery,* Vol. II., p. 35.

[4] Major Stewart's *History of Bengal,* p. 36. Elsewhere we read, that, "having broken the idols in above a thousand temples, he purified and consecrated the latter to the worship of the true God." Colonel Briggs's translation from Farishta, Vol. I., p. 179.

[5] Fiscally, too, it had come, in the days of Akbar, to be of very secondary note. See the *Ayeen Akbery,* Vol. II., Appendix, p. 28.

changed its name to Muhammadábád,[1] it reached, at last, the depth of its abasement. At the command of that harsh bigot, its principal temples were laid in ruins,[2] and mosques, constructed from their materials, were reared on their half-destroyed foundations. The Observatory, built by Mánasimha[3] about A. D. 1600, is, probably, the only noteworthy Hindu edifice of the city, still entire, of so great antiquity. For almost all that is striking in its architectural embellishment, Benares is beholden to the Marathas; and the recent resuscitation of its former celebrity, in the decadence of Hinduism is due, in large measure, to the zeal and enterprise of the same energetic race. As to the rest, there is no ground whatever for believing that Benares, in comparison of what we now find it, with its thousand temples,[4] and their thronging concomitants of holy harpies and willing victims, can ever have boasted a larger population, a more potent prestige, or more affluent prosperity.

India Office, London,
July, 1868.

[1] I have met with this substitute for Benares in an Urdú book written within the last hundred years. It was originally meant, of course, as a poignant insult. Deservedly, it never obtained, it is believed, any currency.

The Muhammadan names of Dehli, Agra, and Patna are of every-day use. Less familiar are Jahángírábád, Mustafa'-ábád, Islámábád, and Múminábád, for Dacca, Rampoor, Chittagong, and Brindabun.

[2] Captain Orlich, in the tenth letter of his *Reise in Ostindien*, says that Akbar entertained the project of establishing a mosque over the Jnánavápí well. No one at all acquainted with Akbar's character could give this silly legend the least credence. The story looks like an appendix to the tale, that, when Aurangzeb threw down the old temple of Viśweśwara, its phallus cast itself, unassisted, into the Jnánavápí.

[3] Raja of Ambherí. One of his descendants, Jayasimha II., who flourished rather more than a century after him, provided the Observatory with astronomical instruments. From Raja Mánasimha the building was called, from the first, Mánamandira, now corrupted into Mánmandil.

Bishop Heber uninquiringly states that the Observatory was "founded before the Musalmán conquest." Captain Orlich says it was founded by Jayasimha: he does not distinguish which Jayasimha. But it would be endless to point out the unweighed assertions of incautious travellers.

Even Mr. James Prinsep,—*Benares Illustrated*, Second Series,—from consulting Tavernier with insufficient attention refers the conversion of the Mánmandil into an Observatory to Jayasimha I.

An excellent account of the Benares Observatory, by the learned Pandit Bápú Deva Śástrin, is given in the *Transactions of the Benares Institute for the Session* 1864-65, pp. 191-196.

[4] Such was Mr. James Prinsep's estimate in 1828-1829. As to the extent of the city, "the measured length along the banks of the river, by survey, is barely three miles; and the average depth does not exceed one mile." *Benares Illustrated*, p. 12. Hiouen Tsang found Benares, in the seventh century, of not far from the same dimensions. *Vide supra*, p. 140.

---

*Paris, le 3rd November* 1868.

Sir,

My brother-in-law, Mr. Goubaux, Professor of Anatomy in the Veterinary School at Alfort, is very desirous to get precise informations concerning a question now discussed about among the Anatomists, and I esteem I cannot direct him better than to you, Sir, who are surrounded with so many men possessing of so various kinds of knowledge.

The question is the following one :—

Many Naturalists, likely desirous to ground upon a sample their theory about the plurality of human races, say, that there are also many races, two at least, among the *horses*, distinguished between each other by the number of the vertebræ belonging to the loins: the first, originating from Africa, and introduced in the various countries of the West of Europe by the Arabs, has seven of those vertebræ; the second, indigenous in Asia, and imported into Europe by the Aryas themselves, possesses only six or five vertebries in the loins. Mr. Goubaux, who slaughtered in his life many hundred horses, has found those numbers of vertebræ in the loins varying from one individual to another without any variation of origin, and thinks consequently that the character invoked by the naturalists is not fit to establish a distinction of race.

But, the horses in Europe, according to the theory quoted above, being produced by mingling the African race with the Asiatic one, it might be that the indiference with which the numbers observed by my brother-in-law were obtained, be occasioned by that mingling. Therefore, in order to get rid of the matter, Mr. Goubaux wishes to know if horses living in the original countries of the supposed races show the character in question constantly, or, as the horses in Europe do, accidentally. For that purpose, he would be very satisfied to get the following informations, which you are able, I imagine, to procure him by the learned men meeting at Benares; viz:

1st—If there is in India, perhaps in the mountains of Himálaya or Ghondwana or even of Malaya (the Ghâts) *a peculiar race of horses, differing by any character soever* from the races known *in Europe*.

2nd—*How many vertebræ* that peculiar race of horses possesses *in the loins*; whether *seven* or *six*; whether *constantly* or *accidentally* the first or the second of those numbers.

Questions of that description being of a general interest, you would most conveniently, without trouble for you, give the answer in your most valuable Journal, "The Pandit," of which I am an assiduous reader.

It is useless to add that my brother-in-law fixes no time to have those informations: the sooner, the better; but within the limits of secure observation.

I take the liberty to say that, for my particular, I would be very glad to possess, for the imperial Library at Paris, a copy, printed or in hand writing, of the treatise in Sanskrit concerning the Veterinary, like the Aśwáyurveda, the treaty about the diseases of the elephant existing at Berlin, something concerning the humped Ox, or Śiva-Ox, and generally every kind of beasts, in order to procure to my brother-in-law the indigenous observations about those animals.

Give me leave, Sir, to tell me your most devoted servant and admirator of your most learned journal.

LÉON RODET,
*Ingénieur des Manufactures de l'Etat,*
*Service des Tabacs à Paris.*

---

PRINTED AND PUBLISHED BY E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

# काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

# THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 32. Benares January 1st, 1869. Vol. III.


## ॥ ईश्वरप्रत्यभिज्ञासूत्रविमर्शिन्याः ॥

आगमाधिकारे पूर्वप्रक्रान्तद्वितीयाह्निकस्यान्तिमो भागः,तृतीयं च चरमम् ।

नन्वेवं पत्युः समावेशात्मिका तुर्यतदतीतरूपा भवतु दशा, पशोस्तु कथं सुषुप्तस्वप्नजाग्रद्दशाभेद आगमेषूक्त इत्याशङ्क्य सुषुप्तस्वरूपमेव तावदाचष्टे श्लोकत्रयेण ।

(१०) शून्ये बुद्ध्याद्यभावात्मन्यहन्ताकर्तृतापदे ।
अस्फुटारूपसंस्कारमात्रिणि ज्ञेयशून्यता ॥
सा ऽन्तःप्राणामान्तरी वृत्तिः प्राणादिप्रेरिका मता ।
जीवनाख्या ऽथ वा प्राणे ऽहंता पुर्यष्टकात्मिका ॥
तावन्मात्रस्थितौ प्रोक्तं सौषुप्तं प्रलयोपमम् ।
सवेद्यमपवेद्यं च मायामलयुतायुतम् ॥

इह चित्तत्वं स्वस्वरूपमाच्छादयज्ज्ञेयरूपेण बुद्ध्यादिना देहान्तेन घटादिना वा भासते, एकमेव चेदं स्वातन्त्र्यविजृम्भितं, न तत्र वास्तवः क्रमो वा भेदो वा, तत्रापि तु स्वातन्त्र्यात् क्रमभेदश्चाभासते, तदेवं स्थिते यश्चित्तत्त्वस्य स्वरूपाच्छादनभागः स एवोत्तरभागान्तरासंकीर्णो यदा विश्राम्यति तदनुदयाद्वा तत्प्रध्वंसाद्वा प्रलये इव तदनादरणाद्वा निद्रासमाधिमूर्छादाविव तत्रैव चाहंतारूपं कर्तृतायाः पदं परामर्शो ऽस्फुटत्वादरूपात्मना संस्कारेण शुद्धेन वेद्यपदवीमप्राप्तेन युक्तो भवति तदा सैवावस्था नेत्येव परामर्शशेषा ऽनपेक्षितनिषेध्यबुद्ध्यादिविषयसुस्पष्टपरामर्शसम्भेदापि अवश्यंभाविनिषेध्ययोगादकिंचनोऽहमित्येवंभूतपरामर्शवत्स्वीकृतसामान्याकारनिषेध्या ऽत एव संस्कारशेषीकृतज्ञेयरूपा शून्य इत्युच्यते, तथाविधे बुद्ध्यादीनां देहादिनीलान्तानामभावरूपे शून्यत्वमुच्यते, यतस्तत्र ज्ञेयानां शून्यता ऽभावरूपता संस्कारशेषता, इयमेव हि सर्वत्राभावो न तु सतां सर्वात्मना विनाशः, तत्रैव शून्ये प्रमातरि समवेता प्राणापानसमानोदानव्यानात्मके वायुचक्रे प्रेरणात्मिका शक्तिः,सा च विद्याकलयोः प्रपञ्चभूतौ यौ क्रमेण बुद्धीन्द्रियकर्मेन्द्रियवर्गौ तयोरान्तरी वृत्तिर्बाह्या हि तयोः शब्दाद्यालोचनशब्दाभिव्यक्तिस्थानाभिहननादिका वृत्तिः । तदुक्तम् ।

सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च ।

इति । एवं शून्ये एवाहंता ऽन्तश्चक्रोपोद्बलिता जीवनमिति स शून्य एव जीवः संसरति, यदि वा इन्द्रियशक्तीनामेव या आन्तरी साधारणप्राणनात्मिका प्राणशब्दवाच्या प्राणादिमारुतविशेषप्रेरणामयी सैवाहमित्यधिशयाना जीवनं, तदा प्राण एव जीवः संसारी स एव शून्यः, प्राणश्च पुर्यष्टकशब्दवाच्यः, यतो ऽत्रेति शेषः, प्राणादिपञ्चकं बुद्धीन्द्रियवर्गः कर्मेन्द्रियगणो निश्चयात्मिका च यतो धीर्व्यज्यते तन्मात्रपञ्चकं मनोहंबुद्ध्य इत्यन्ये तन्मात्रोदयरूपेण मनोहंबुद्धीति भूमिराप इति च वदन्तः, एवं यदुभयात्मकं पुर्यष्टकं तावत्येव शुद्धे या विश्रान्तिस्तस्यां सत्यां यदहंतायाः सुषुप्तायाबोधलक्षणं भावरूपं कर्म च क्रियास्वभावं तत्सौषुप्तं, मलेन हि प्रमाता सुप्तः कलया त्वसुप्त इवात्र तन्निमज्जनेन सुष्ठु सुप्तस्तस्य भावः कर्म वेति । तत्र शून्यसुषुप्ते न किं चिद्व्यतिरिक्तं वेद्यमिति मायीयमलाभावादपवेद्यं तत् । प्राणसुषुप्ते तु स्पर्शकृतस्य सुखदुःखादेर्भावाद् मायाख्यमस्ति मलमिति स-

वेद्यं तद्। एवं गाढागाढसुषुप्तद्वितयवत्प्रलयोपि मन्तव्यः। स परं देहादिप्रध्वंसानुदयकृतः, चिरतरकालश्च, सुषुप्तं तु देहाद्यनादरकृतमचिरकालं चेति विशेषः। तत्रापि श्रमकृतं निद्रा, धातुदोषकृतं मूर्छा, द्रव्यकृतं मदोन्मादादि,स्वातन्त्र्यकृतं समाधि,रित्याद्यवान्तरभेदाः। के चित्तु समाधिरूपं संवेद्यमन्यदपवेद्यमिति प्रपन्नाः॥

नन्वेवं स्फुटवेद्यपदविनिर्मुक्ता सुषुप्तावस्था ऽस्तु स्वप्नजाग्रद्दशयोस्तु स्फुटवेद्यावभासयोगिन्योः को भेद इत्याशङ्क्य श्लोकद्वयेन भेदमाह।

(११) मनोमात्रपथेप्यक्षिविषयत्वेन विभ्रमात्।
स्पष्टावभासा भावानां सृष्टिः स्वप्नपदं मतम्॥
सर्वाक्षगोचरत्वेन या तु बाह्यतया स्थिरा।
सृष्टिः साधारणी सर्वप्रमातॄणां स जागरः॥

बाह्येन्द्रियाधिष्ठानानि चक्षुर्गोलकादीनि निमीलितानि निद्रायमाणस्य लक्ष्यन्ते, न च तेषु निमीलितेषु बाह्येन्द्रियग्रहणव्यापारो दृष्टः, तेन शुद्ध एव मनोमार्गे रूपस्पर्शादयो भावा अक्षग्रहणसमुचितेन स्पष्टेन वपुषा भासनयोग्याः परमेश्वरेण सृज्यन्ते न त्वणुना, ऽनिष्टस्यैव दर्शनादिष्टस्यापि देशकालान्तरादियोगेन, अत एव मनोमात्रस्थितत्वादेव न प्रमात्रन्तरसाधारणीयं सृष्टिः। यत्तु तत्र बाह्येन्द्रियविषयत्वं प्रमात्रन्तरसाधारण्यं चकास्ति, तद्यद्यपि यावद्भाति तावत्तथैव, तथाप्युत्तरकालं प्रबुद्धस्य न तथेति परामर्शेन तद्रूपं निर्मूलत्वेनावभातीति भ्रान्तम्। यानि हि प्रमात्रन्तराणि स्वप्ने स्वेन्द्रियाणि च भान्ति, एतानि प्रबोधकालभाविभिरेव च तैरभिन्नानीति निश्चयः। प्रबोधकाले च न तथेति निश्चयानुवृत्तिरपहृतैव। तेनोभयमपि भ्रान्तमुच्यते भ्रान्तत्वमेव चास्थैर्यम्। एवमिन्द्रियाविषयत्वेनैवासाधारणत्वमाक्षिप्तं विभ्रमेणैव चास्थैर्यमिति स्वकण्ठेन तज्जाग्रत्प्रतियोगिधर्मनिरूपणावसरेपि न दर्शितम्। एवंभूता या सृष्टिः सा पशोः स्वप्नसमये भावात्स्वप्नपदं स्वप्नकाले विषय इति तथाभूतविषयं प्रमातृत्वं पशोः स्वप्नावस्थेति यावत्। अक्षिग्रहणं बाह्येन्द्रियदशकस्योपलक्षणम्। यत्र त्वबाह्याक्षविषयं सर्वप्रमातृसाधारणत्वं च निश्चयानुवृत्त्या बाधारहितया परमार्थत्वेन चकास्ति तत एव स्थैर्यं विषयस्य सा सृष्टिः पशोर्जागरः, तद्विषयप्रमातृत्वं जागरावस्थेति यावत्। यावच्चानुवृत्तिस्थैर्यं निश्चयस्य चकास्ति तावज्जागरः, तन्मध्य एव निश्चयानुवृत्तिनिर्मूलनात्स्वप्न इत्यवभाससारत्वाद्वस्तूनां स्वप्नेपि दीर्घे यत्र स्वप्नान्तरं सतदपेक्षया जाग्रदेव, जाग्रदभिमतमपि वा दीर्घे कालान्तरे निश्चयानुवृत्तिनिरोधाज्जाग्रदन्तरापेक्षया स्वप्न एवेति मन्तव्यम्॥

आसां तिसृणां हेयत्वप्रदर्शनेन तुर्यावस्यातः प्रभृति उपादेयत्वं सूचयति।

(१२) हेया त्रयीयं प्राणादेः प्राधान्यात्कर्तृता गुणे।
तद्धानोपचयप्रायसुखदुःखादियोगतः॥

यत्रायं प्रमाता त्यागोपादानतदिच्छाप्रयत्नादिकं परिक्लेशं पश्यति तदेवास्य हेयतया भाति, स चास्य सुखदुःखयोगवैचित्र्येणैव कृतः, तच्चैतदवस्थात्रये संभवति, यतः कर्तृतारूपं स्वात्मविश्रान्त्यनन्योन्मुख्यलक्षणमानन्दैकघनं यच्चिन्मयं वपुस्तद्यदा प्राणादिवृत्तिशून्यपुर्यष्टकदेहादिभूमिषु गुणतामभ्येति तदा तस्मिन्गुणीभूते प्राणादेः प्राधान्यं स्फुरति, तथा च तस्य चिद्रूपस्य यथायथा हानिः तथातथा दुःखोपचयः, यथायथा किं चिदुन्मज्जनं तथातथा सुखोपचयः, तथाहि बुभुक्षाकाले प्राणस्यैवोद्रेकाद्दुःखं, तृप्तौ तस्य न्यग्भावादहंतोद्रेके सुखम्, एवं श्रान्तस्य मर्दने देहप्राधान्याप्राधान्ये मन्तव्ये, यस्तु समावेशतत्त्वज्ञस्तस्य तत्काले दुःखानुदय एव। यदाह।

दुर्बलोपि तदाक्रम्य यतः कार्ये प्रवर्तते।
आच्छादयेद्बुभुक्षां च तथा योतिबुभुक्षितः॥

इति। एवं प्राणादेः प्राधान्ये कर्तृताया गुणभावे सुखदुःखवैचित्र्यशतयोगः प्रयासभूमिरिति जाग्रत्स्वप्नसुषुप्ते प्राणादिप्राधान्यं कर्तृता न्यग्भावश्चास्तीति तत्त्रयमेव हेयं, कर्तृताप्राधान्योन्मेषात्तु तुर्यरूपात्प्रभृति तत्स्थैर्यात्मकतुर्यातीतदशान्तमुपादेयमेकरसानन्दघनस्वभावलाभे उपादित्सा जिहासा वैवश्यपरिश्रमप्रशमादिति तात्पर्यम्॥

ननु प्राणादिप्राधान्यं हेयतायां कारणमुक्तं तच्चेज्जाग्रदादित्रये एव तर्हि तुर्यादौ तदभावात्तत्समावेशे व्युत्थानानुपपत्तिरिति श्लोकद्वयेन शङ्कां परिहरति।

(१३) प्राणापानमयः प्राणः प्रत्येकं सुप्तजाग्रतोः।
तच्छेदात्मा समानाख्यः सौषुप्ते विषुवत्स्विव॥
मध्योर्ध्वगाशुदानाख्यस्तुर्यगो हुतभुङ्मयः।
विज्ञानाकलमन्त्रेशो व्यानो विश्वात्मकः परः॥

प्राण इति प्राणनरूपा जीवनस्वभावा येयं चिद्रूपस्य स्थितिः सा तावत्सामान्यपरिस्पन्दरूपा देहप्राणादेरचेतनस्य चेतनायमानतासंपादनात्मिका ऽहमिति स्वातन्त्र्यारोपसारा सती विकल्परूपपरामर्शमयी सैव प्राणादिविशेषात्मना पञ्चरूपतां भजते। तत्र किं चिज्जहती क्व चित्पतन्ती च प्रश्वासनिःश्वासरूपा क्रमेण प्राणत्वमपानत्वं च विशेषं दर्शयति,

तदिदं विशेषद्वयं जायति तावत्स्फुटमेव, देहात्प्रसृत्य विषये विश्रान्तेः ततो ऽपि देहे स्मृत्यादौ आभ्यन्तरे बाह्ये विश्रान्तः प्राणापानयोः सुस्पष्टत्वात् । स्वप्ने ऽपि तद्द्वयमस्त्येव स्वपतो ऽपि हि प्राणापानौ निर्गमप्रवेशात्मानौ स्फुटमेवापरेण लक्ष्येते। स्वयमेव च वेद्यसंवेदनात्यागोपादानरूपा स्थितिः संवेद्यते एव, तेन प्राणना प्राणापानविशेषद्वयमयी जायति तथा स्वप्ने सुप्तं स्वप्नः, तदेव तु यदा सुतरां पुष्टं भवति तदा सुषुप्तः प्रमाता तस्येदं सौषुप्तं पदं तद्द्विविधमपि समानरूपं विशेषं प्राणीयं स्वीकरोति, सवेद्ये तावत्सुषुप्ते यद्यपि प्राणापानस्पन्दो लक्ष्यते तथापि तयोर्मध्ये या विश्रान्तिर्हृदयसदने निरिन्द्रियप्रदेशे तदेव मुख्यतः सौषुप्तमिति तत्र प्राणापानयोर्यश्छेदो विश्रान्तिः कं चित्कालं तदात्मा सकलरसादिवर्गस्योर्ध्वाधरतिर्यक्तु समानीकरणव्यापारात्मा तत एव हृत्पद्मविकासदानाद्भुक्तपीतजरणकारी समानो दिनरात्रिरूपयोः प्राणापानयोः कं चित्कालं साम्याद्विच्छेदनाच्च विषुवत्कालतुल्यः, विश्वं व्याप्तिं समानीकरणमर्हतीति तदर्हमिति वतिः, उपमाने वतेरेव चाव्ययत्वमुद्वतो निवत इति प्रयोगात्, तद्धि न्यायसिद्धं न वाचनिकं, विशेषं वा दिनरात्रितदूनाधिकत्वलक्षणं सुवति प्रेरयत्यविरतमिति शतरि विषुवत् तत्र च विषुवति विच्छिद्यमानस्य प्राणापानस्य संस्काररूपतया सद्भावः सैव हि विच्छेदो न तु सर्वात्मना नाशो ऽस्ति इत्युक्तमसकृत् । ततश्च हानादानयोर्बीजरूपता सुषुप्ते इयति च सर्वः प्रलयाकलान्तः पशुवर्गः । यदा तु सा प्राणनावृत्तिर्वामदक्षिणमार्गौ खिलीभावयन्ती मध्यरूपेणोर्ध्वेन प्रवहति तदा तत्प्रवहणं सकलस्य भेदस्याभेदसारतादानलक्षणं विलापनमाश्यानस्येव सर्पिषो विदधती उदानवृत्तिर्विज्ञानकलादारभ्य सदाशिवान्तं सा च तुर्यात्मिका दशा, मायोर्ध्वे हि विज्ञानाकला इति । ततः प्रभृति भेदगलनं प्रवर्तते । विलीने तु भेदे सर्ववेद्यराशिरूपतत्त्वभूतभुवनवर्गात्मकदेहव्यापाररूपणप्राणवृत्तिर्व्यानरूपा विश्वात्मकपरशिवोचिता तुर्यातीतरूपा, प्राण एव प्रमाता प्राणापानरूपः समानरूप उदानरूपो व्यानरूपश्चेति सामानाधिकरण्यात्, विज्ञानाकलश्चासौ मन्त्रश्चासौ वर्गापेक्षया ईशश्च सदाशिवेश्वररूपो यो ऽसाविति उदानः । एतदुक्तं भवति । यद्यपि तुर्यतदतीतयोरप्यस्ति प्राणना ऽन्यथा जीवत्वस्य व्युत्थानस्य चानुपपत्तेस्तथापि भेदोपसंहारेणाभेदविश्रान्तिप्राधान्यादनयोर्दशयोः सुखदुःखादिवैचित्र्यायोगादेकघनस्वात्मविश्रान्त्यात्मकपरमानन्दमयत्वे नोपादेयतैव, सुषुप्तादौ तु संस्काररूपत्वात्स्फुटवेद्योल्लासस्फुटवेद्यावभासरूपस्य भेदस्य विद्यमानत्वादस्ति सुखदुःखादिवैचित्र्यमिति हेयतैवेति युक्तमुक्तं हेया त्रयीयमित्यादि, भगवतश्च विश्वशरीरस्य प्राणापानसमानोदानव्यानरूपतयैव सकलगतोल्लासप्रवेशप्रलयाकलविज्ञानाकलादिवर्गसदाशिवरूपता इत्यप्यनेन दर्शितम् । यथोक्तम् ।

षट्त्रिंशदात्मकं विश्वं शम्भोः प्राणादिशक्तयः ।

इति ॥ २० ॥

॥ आदितः सूत्रश्लोकाः १८३ व्याख्याताः ॥

इति श्रीमदाचार्याभिनवगुप्तविरचितायामीश्वरप्रत्यभिज्ञासूत्रविमर्शिन्यामागमाधिकारे तत्त्वनिरूपणं द्वितीयमान्हिकम् ॥ २ ॥

॥ इति चतुर्दशमाह्निकम् ॥

---

## श्रीः

अनन्तमानमेयादिवैचित्र्याभेदशालिनम् ।
आत्मानं यः प्रथयते भक्तानां तं स्तुमः शिवम् ॥

एवं स्वसंवेदनोपपत्त्यागमसिद्धं महेश्वररूपमात्मस्वरूपं यदधिकारत्रयेण वितत्य निर्णीतं तदेव संक्षेपेण शिष्यबुद्धिषु निवेशयितुमागमार्थसंग्रहं श्लोकाष्टादशकेन दर्शयति, "स्वात्मैव सर्वजन्तूना" मित्यादिना"त्पलेनोपपादित"त्यन्तेनैकेनान्हिकेन, तत्र श्लोकेन पारमार्थिकं स्वरूपमुक्त्वा श्लोकनवकेन बन्धस्वरूपं प्रमातृप्रमेयतत्त्वदर्शनदिशा, सप्तकेन प्रत्यभिज्ञानात्मकं मोक्षतत्त्वं श्लोकेनोपसंहारं दर्शयतीति तात्पर्यम्॥

ग्रन्थार्थस्तु निरूप्यते ।

(१) स्वात्मैव सर्वजन्तूनामेक एव महेश्वरः ।
विश्वरूपो ऽहमिदमित्यखण्डामर्शबृंहितः ॥

इह जडास्तावच्चेतननिमग्ना एव भान्ति, इदमिति हि जडपरामर्शो ऽहमिति संवित्परामर्श एव विश्राम्यति, ततश्च जडा निरात्मान इति जन्तव एव जीवाः सात्मान,स्तेषां च महेश्वर एव स्वात्मा, स एव महेश्वरो न त्वन्यः कश्चि,द्यतः संवित्स्वभावो ऽसौ, संविदश्च न देशेन न कालेन न स्वरूपेण को ऽपि भेदः, कामं देहप्राणादयो भिद्यन्तां, ते तु जडत्वाश्चेतननिमग्ना एवेत्येक एव चिदात्मा स्वातन्त्र्येण स्वात्मनियतो वैश्वरूप्यं भासयति, ततो महेश्वरो ऽन्तर्नीतामिदंतां कृत्वा परानुन्मुखस्वात्मविश्रान्तिरूपाहंविमर्शपरिपूर्णः, अत एव सर्वज्ञत्वसर्वकर्तृत्त्वे नास्य यत्नोपपाद्ये, विचित्रबुद्धिकर्मेन्द्रियविषयें हि यथा ज्ञातृत्वकर्तृत्वे एकस्यैवात्मनस्तथा इन्द्रियस्थानीयरुद्रक्षेत्रज्ञसहस्रविषयस्य भावराशेर्यज्ज्ञानं करणं च तदेकत्र चिदात्मनीति ॥

ननु यद्येक एवायं महेश्वररूप आत्मा कस्तर्हि बन्धो यदवमोचनायायमुद्यम इत्याशङ्क्याह ।

(२) तत्र स्वसृष्टेदंभागे बुद्ध्यादिग्राहकात्मना ।
अहंकारपरामर्शपदं नीतमनेन तत् ॥

तत्रैवं स्वात्मनि महेश्वरे स्थिते तस्मिन्नेव प्रकाशरूपे स्वात्मदर्पणे तेनैव परमेश्वरेण स्वातन्त्र्यात्तावत्सृष्टः संकोचपुरस्सर इदंभागस्तन्मध्ये यदेतद्बुद्धिप्राणदेहरूपमिदंतया वेद्यं तद्भिन्नस्य वेद्यस्य ग्राहकतया समुचितमिदं भवाभिभवाप्रभवित्वात्कृतकेनापूर्णेनाहंभावेन परामर्शेन भासमानं चकास्ति, अहं देवदत्तो ऽहं चैत्र इति ॥

नन्वेवमप्यस्तु तथापि कस्य बन्धः; ईश्वरव्यतिरिक्तो हि को ऽन्यो ऽस्ति, तदेतत्परिहर्तुमाह ।

(३) स्वस्वरूपापरिज्ञानमयो ऽनेकः पुमान्मतः ।
तत्र सृष्टौ क्रियानन्दौ भोगो दुःखसुखात्मकः ॥

सत्यं, परमार्थतो न कश्चिद्बन्धः, केवलं स्वस्मादनुत्तरात्स्वातन्त्र्याद्यदा स्वात्मानं संकुचितमवभासयति स एव तदा स्वस्य पूर्णस्य रूपस्य यदपरिज्ञानं भासमानत्वे ऽप्यपरामर्शरूपं तदेव कारणत्वेन प्रकृतं यस्य स पूर्णत्वाख्यातिमात्रतत्त्वः पुरुष इत्युच्यते, अत एवानेकः, तत्तद्देहप्राणबुद्धिविशेषेण संकोचग्रहणात्, स च पुमान्भोक्ता संवन्धं भोगलक्षणमनुभवति, भोगश्च नाम तस्य यौ कल्पितौ क्रियानन्दौ, कल्पिता क्रिया दुःखं, रजो हि प्रकाशाप्रकाशचाञ्चल्यरूपं दुःखमुच्यते, प्रकाशरूपं च सत्त्वं सुखं, तमस्त्वप्रकाशरूपो मध्ये विश्रमः प्रलयस्थानीयः ॥

ननु सृष्टावित्यनेन किं व्यवच्छेद्यं किं च संग्राह्यमित्याह ।

(४) स्वाङ्गरूपेषु भावेषु पत्युर्ज्ञानं क्रिया च या ।
मायातृतीये ते एव पशोः सत्त्वं रजस्तमः ॥

विश्वरूपस्य भगवतः स्वरूपभूत एव विश्वत्र यः प्रकाशो यश्च विमर्शस्ते तावज्ज्ञानक्रिये स्वरूपपरामर्शापरित्यागेनैव तु यद्भिन्नतयापि विमर्शनं स्वरूपपरामर्श एव विश्रान्तमहमिदमिति सदाशिवेश्वरपरमार्थं सा भगवतो मायाशक्तिः,* ता एतास्तिस्रः शक्तयो भगवति नैसर्गिक्यो दृष्टाः, स्वरूपापरिज्ञाने तु भिन्नेषु भावेषु ज्ञानं क्रिया,शुद्धमेव भिन्नत्वं प्रकाशविमर्शशून्यमिति पशोः प्रकाशः, प्रकाशाप्रकाशौ, अप्रकाश, श्चेति क्रमेण सुखदुःखमोहलक्षणानि प्रकाशक्रियानियमनशीलानि सत्त्वरजस्तमांसि ॥

ननु चैवं सति यथा परमेश्वरस्य ज्ञानक्रियामाया अव्यतिरेकिण्यः शक्तय इत्युच्यन्ते तद्वत्पशोः सत्त्वरजस्तमांसि प्रसज्यन्ते, व्यतिरिक्तानि च तानि पुंस्तत्त्वाद्गण्यन्ते तदेतत्कथमिति संशयं शमयति ।

(५) भेदस्थितेः शक्तिमतः शक्तित्वं नापदिश्यते ।
एषां गुणानां करणकार्यत्वपरिणामिनाम् ॥

सत्यमेवं स्याद्यदि भेदग्रहो न भवेत्, भेदव्यवहारस्त्वयं विचार्यते, तत्र संकुचितचिन्मात्रस्वभावः पुरुषो, नास्य नैसर्गिकं भावविषयप्रकाशनादिरूपं, सर्वदा तत्प्रसङ्गाद्, अपि त्वन्यसंबन्धकृतम्, ततश्च तस्मात्पशोः शक्तिमत्त्वेन शङ्क्यमानाद्भेदेन यत एतानि सत्त्वादीनि ततः शक्तयो व्यतिरेकमुक्ता इति नोच्यन्ते किं तूपकरणत्वाद्गुणा इत्युच्यन्ते ।

ननु पुरुषात्किमिति ते भेदेनोच्यन्ते, उच्यते, सुखदुःखमोहपरिणामरूपमेतत्करणत्रयोदशकं कार्यदशकं च सुखादिस्वभावत्वेनानुभूयत इति सुखदुःखमोहाः करणकार्यवर्गतादात्म्यवृत्तयो यदि पुरुषव्यापि तादात्म्यं भजेरंस्तर्हि पुरुषः कार्यकारणपर्यन्तसृष्टिमयः संपन्नः परिणामश्च दूषित इति स्वातन्त्र्यशक्त्या पुरुषो विश्वरूप इत्यायातं, तथा च न कश्चित्पुरुष ईश्वर एव तस्मादप्रत्यभिज्ञानमयपुरुषस्वरूपविचारे सत्त्वादयो भिन्ना एवेति स्थितम् ॥

ननु ज्ञानादीनि कथं सत्त्वादिरूपाणि पशुं प्रतीत्याह ।

(६) सत्तानन्दः क्रिया पत्युस्तदभावोपि सा पशोः ।
द्वयात्मा तद्रजो दुःखं श्लेषसत्त्वतमोमयम् ॥

इह तावत्पतिर्विश्वस्यावभासमानवैचित्र्यलक्षणेन सृष्ट्यादिना पालयिता स्वप्रकाशस्वभावस्तस्य विश्वपतेर्या सत्ता भवनकर्तृता स्फुरत्तारूपा पूर्वं व्याख्याता, सा स्फुरत्ता महासत्तेत्यत्र सैव प्रकाशस्य विमर्शाव्यतिरेकाद्विमर्शात्मकचमत्काररूपा सती क्रियाशक्तिरुच्यते । परोन्मुख्यत्यागेन स्वात्मविश्रान्तिरूपत्वाच्च सैवानन्दः । तदेवं भगवतश्चिदात्मतयैवेयद्रूपता, पशोस्तु सत्ता तदभावश्चानन्दश्च, तदभावश्च संकुचितचिद्रूपत्वात्, तेन यो ऽसौ सत्तानन्दभागस्तत्प्रकाशसुखवृत्तिसत्त्वम्, यस्तदभावस्तदावरणमोहरूपं तमः, एते च ते सत्त्वतमसी नीलानीलवत्परस्परपरिहारेण यद्यपि वर्तेते कार्यत्वकारणत्ववत्तथाप्येकपरामर्शगोचरीकार्यधर्म्यपेक्षया चित्रपतङ्गसङ्गतनीलानीलात्मकरूपन्यायेनान्यो मिश्रतयापि भातः । अतो यो ऽयं द्वयात्मा मिश्रस्वभावस्तद्रजोगुणः, अत एव प्रकाशाप्रकाशस्वरूपयोः सत्त्वतमसोरत्र श्लेषेणावस्थानमिति दुःखत्वम्, प्रियपुत्रादेरेकघन एव हि प्रकाशः सुखम्, एकघन एवाप्रकाशो मोहः, यस्तु कथं चित् प्रकाशो यथा सव्याधिकदेहरूपतया ऽनभिमतया कथं चिच्चाप्रकाशो यथागतगदकल्याणधर्मयोगितयाभिमतया तदेव दुःखतत्त्वम् । अयमेव च पूर्वापरीभावसारः क्रियापरमार्थः । अत्रानुभयरूपं तु नास्ति प्रतीतौ कस्यां चित्कल्पिताकल्पितरूपायामननुप्रवेशात्तस्य, तथा

हि, नीलं तावदकल्पितायां धियि भाति, नीलाभावस्तुच्छोपि कल्पनाकल्पितो ऽभासमानत्वात्तावद् व्यवहारपरमार्थः, तदुभयव्यामिश्रणात्तु नीलानीलं भातु नाम, यत्तु अनुभयरूपं तन्नीलप्रतीत्या तावदकल्पितया न विपर्यीकृतं चेत्तत्कल्पितामनीलधियमनुधावेत्, अथ तां कल्पितां धियं नाविशत्यकल्पितया विपर्यीकृतं नीलमेव स्यादिति न पशोश्चतुर्थो ऽस्ति गुणः। अपिश्चार्थे, पशोः सा सत्ता सत्त्वं तदभावस्तमो द्वयात्म रजश्चेति संबन्धः ॥

एवं तावत्पतिपशुरूपप्रमातृतत्त्वं संक्षेपेण निर्णीतमथ प्रमेयतत्त्वं निर्णेतुं पत्यौ तावदित्थमिदं प्रमेयतत्त्वमिति निर्णेतुमाह।

(७) ये ऽप्यसामयिकेदंतापरामर्शभुवः प्रभोः ।
ते विमिश्रा विभिन्नाश्च यथा चित्रावभासिनः ॥

इहाभासा एव तावदर्था इत्युक्तम्,ते च परामर्शैक्येन कदाचिन्मिश्रीक्रियन्ते, यदा विशेषरूपता, कदाचिदमिश्रा एव परामृश्यन्ते, यदा सामान्यरूपता, त एते उभयात्मानो ऽपि असामयिकेनाकल्पितेन इदंभावेन सहजभेदपरामर्शरूपेणाङ्गुलिनिर्देशादिप्रख्येन गोचरीकार्याः, प्रभोरपि, न केवलं सद्योजातबालादेर्यावदीश्वरस्यापि तथा तेन सामान्यविशेषप्रकारेण चित्रतयावभासन्ते, चित्रत्वं हि तयोर्यन्मिश्रत्वममिश्रत्वं च युगपदेकाहंताविश्रान्तं भातीति ईश्वरदशायां भावोल्लासनान्तरीयकत्वेन संवित्संकोचरूपं निषेध्यानुपरक्तनञर्थमात्ररूपं शून्यं संवित्प्रकाशेनैव प्रकाशमानमहंतानिषेधरूपामसामयिकीमिदंतामुल्लासयति ॥

एवं तावदीश्वररूपस्य पत्युरित्थं प्रमेयतत्त्वं परमशिवे तु भगवति प्रमेयकथैव कथमुत्तिष्ठति, प्रमेयकथोत्थापकत्वमेव भगवतः सदाशिवेश्वरत्वमतो ऽधुना पशुं प्रति कीदृक्प्रमेयवृत्तान्त इति संदेहमपोहति श्लोकत्रयेण।

(८) ते तु भिन्नावभासार्थाः प्रकल्प्याः प्रत्यगात्मनः ।
तत्तद्विभिन्नसंज्ञाभिः स्मृत्युत्प्रेक्षादिगोचरे ॥
तस्यासाधारणी सृष्टिरीशसृष्ट्युपजीविनी ।
सैषाप्यज्ञतया सत्यैवेशशक्त्या तदात्मनः ॥
स्वविश्रान्त्युपरोधाय चलया प्राणरूपया ।
विकल्पक्रियया तत्तद्वर्णवैचित्र्यरूपया ॥

तुर्विशेषं द्योतयति, प्रत्यगात्मनस्तु इत्थं प्रमेयरूपा अर्था न त्वीश्वरवदुक्तनयेनेति, भिन्न इति, मिश्रामिश्रतया भिद्यमान आभासो येषामर्थानां ते विशेषसामान्यात्मानो ऽर्थाः प्रत्यगात्मनः प्रतिपुरुषमव्यामिश्रस्वसंवेदनावगमरूपस्यासंकीर्णाहंप्रकाशात्मनः प्रकल्प्या विकल्पनीयाः प्रतिप्राणि स्ववासनानुसारेण विभिन्नाभिः संज्ञाभिः प्रियो ऽयं शत्रुरयमित्यादिकाभिर्भावनाविशेषानुसारेण तत्तद्विचित्रसुखदुःखाद्युपयुक्ताभिः स्मरणे उत्प्रेक्षणे संकल्पने अन्यत्रान्यत्र च विकल्पयोगे। एतदुक्तं भवति। ईश्वरस्य विकल्पात्मकतामन्तरेण शुद्धविमर्शविषयीभाव्या अर्थाः, पशोस्त्वन्योन्यापोहन * हेवाकिनि विकल्पे समारूढास्ते अर्थाः भवन्ति सांसारिकहानादानादिव्यवहारोपयोगादिति। नन्वविकल्प्यत्वे यावानेवार्थस्तावानेव यदि विकल्प्यत्वे तत्को विशेषः प्रमेयस्य पतिपशुरूपतायाम्। उच्यते, तस्येति पशुकर्तृका सृष्टिस्तेषामर्थानामीश्वरसृष्टानामुपरि वर्तिनी अत एव तामीश्वरसृष्टिमुपजीवन्ती असाधारणी प्रतिप्रमातृनियता, तद्यथा, इदं हृद्यमिति येन सृष्टं तत्तस्यैव तदा नान्यस्य। ननु यदि पशोरपि सृष्टिशक्तिरस्ति तर्हीश्वर एव, सत्यमीश्वर एवासौ, नन्वेवं साधारणत्वं कस्मात्सृष्टेर्न भवति, भवेद्यदि स्वशक्तिं परिजानीयाद्, यावता सा तस्यापरिज्ञाता परवशस्येव सतो विकल्पक्रिया विकल्पनशक्तिरुदेति, ननु केन सा तस्योत्थाप्यते, आह, ईश्वरस्य परामर्शरूपतया शब्दराशिलक्षणस्य या शक्तिः स्वरूपविश्रान्तिलक्षणपारमैश्वर्योपरोधप्रयोजना ब्राह्म्यादिदेवताचक्रमयी तैस्तैः ककारादिवर्णवैचित्र्यैर्विचित्रा, तया यासौ विकल्पक्रिया तस्य पशोरेकत्र निरूढभावाच्चञ्चला, तेन मित्रमयं शत्रुरयमित्यादिवर्णवैचित्र्यानुविद्धतया विकल्पनक्रियया तदात्मन ईश्वरस्वभावस्यैव पशोरसाधारणी सृष्टिः, ।

पञ्चवक्त्रश्चतुर्दन्तो हस्ती नभसि धावति ।

इत्यपि विमिश्रतया विकल्पसृष्टिस्तानाभासानीश्वरसृष्टानेवोपजीवयतीति सर्वा पाशवी प्रत्ययसृष्टिरीश्वरसृष्ट्युपजीविनीत्युक्तम् ॥

नन्वेवं यदि पाशवी सृष्टिः संसाररूपा तर्हि पारमेश्वरी सृष्टिः पशोः किं कुर्यादिति निर्णीयते।

(९) साधारणो ऽन्यथा चेशः सर्गः स्पष्टावभासनात् ।
विकल्पहानेनैकाग्र्यात्क्रमेणैश्वरतापदम् ॥

ऐश्वरः सर्गो द्विधा, साधारणश्च घटादि,रसाधारणश्चान्यथेति निर्दिष्टो द्विचन्द्रादिः, तस्य च सामान्यलक्षणं स्पष्टावभासनं नाम, सो ऽयं सर्गो यदा विकल्पहानक्रमेण तस्मिन्निर्विकल्पकपरिगृहीत एव स्पष्टाभे ऽर्थे एकाग्रत्वमवलम्ब्याहमिदमित्यैश्वर्यपरामर्शपदं भवति, तदान्तर्लक्ष्यबहिर्दृष्टिर्निमेषोन्मेषपरिहारोपदेशदिशा क्रमेणाभ्यासतारतम्येन पशोः पशुत्वं प्रतिहन्तीश्वरत्वं च दर्शयति, किं च यो ऽयं विकल्पसर्गः पाशव उक्तस्सो ऽपि यद्यन्यथेति पूर्वोक्तरूपवैपरीत्येन

* हेवाको हठः।

परिज्ञातयेशशक्त्या परिज्ञाततादात्म्यस्य भवति तदा सो ऽपि साधारण एव आप्यायनाभिचरणशान्त्यादिविकल्प इव न्यस्तमन्त्रस्य भावितान्तःकरणस्य ॥

एवं विकल्पनिर्ह्रासेन निर्विकल्परूपमात्मीभावे विश्वात्मसाक्षात्कारलक्षणः स्वप्रत्यक्ष एव मोक्षो दर्शितः, अधुना विकल्पनिर्ह्रासाभावे ऽपि तं दर्शयति ।

(१०) सर्वो ममायं विभव इत्येवं परिजानतः ।
विश्वात्मनो विकल्पानां प्रसरे ऽपि महेशता ॥

नहि शक्यं प्रत्यगात्मा नाम पशुः कश्चिदन्यो ऽहमपि तु परिगृहीतग्राह्यग्राहकप्रकाशैकघनः परो यः स एवाहं स चाहमेव न त्वन्यः कश्चिद्, अतो विकल्पसृष्टिरपि मम स्वातन्त्र्यलक्षणो विभव इति, एवं विमर्शे दृढीभूते सत्यपरिक्षीणविकल्पो ऽपि जीवन्नेव मुक्तः । यथोक्तम् ।

शङ्का ऽपि न विशङ्केत निःशङ्कत्वमिदं स्फुटम् ।

इति ॥

नन्वेवं बद्धमुक्तयोः प्रमेयं प्रति को भेदः, उच्यते ।

(११) मेयं साधारणं मुक्तः स्वात्मा भेदेन मन्यते ।
महेश्वरो यथा बद्धः पुनरत्यन्तभेदवत् ॥

श्रीमत्सदाशिवेश्वरपदादारभ्य क्रिमिपर्यन्तप्रमातृवर्गाधिष्ठातृ यदहमिति रूपं तदेवात्मतयाभिनिविशते मुक्तः, ततश्च विश्वस्यापि प्रमेयं ममापि, मम प्रमेयं विश्वस्यापि, प्रमेयं चेदं ममैवाङ्गभूतं प्रमेयान्तरमपि तथेत्यनेन क्रमेण प्रमेयं परस्परतश्च प्रमातृवर्गाच्चाव्यावृत्तमिति एकरसाभेदविश्रान्तितत्त्वमस्य सर्वं परामर्शपदमुपैति, बद्धस्य तु सर्वमेतद्विपरीतमित्येकरसभेदविश्रान्त एवासौ ॥

ननु सदाशिवेश्वरभुवि जीवन्मुक्तिपदे बद्धरूपपशुप्रमातृविषये प्रमेयवृत्तान्तः परीक्षितः, परमशिवे तु कथमसावित्याशङ्क्याह ।

(१२) सर्वथा त्वन्तरालीनानन्ततत्त्वौघनिर्भरः ।
शिवश्चिदानन्दघनः परमाक्षरविग्रहः ॥

न खलु भगवति श्रीपरमशिवे प्रमेयकथा का चिदस्ति, तत्त्वौघस्य सर्वथा तत्र चिद्रूपतामात्रविश्रान्तत्वेन लीनत्वात्, ततश्च सावस्था संवित्स्वभावेन स्वात्मविश्रान्त्यानन्देनाकृत्रिमनैसर्गिकपरामर्शात्मकस्वात्मचमत्कारलक्षणेन एकघना अविच्छिन्नरूपा परमाक्षरेण विग्रहवती भगवतो विश्वमयस्यानवच्छिन्नानुत्तरधाम्नो गलितप्रमेयकथा सर्वोत्तीर्णा व्यपदिश्यते ॥

एवमधिकारचतुष्टयोक्तं यद्वस्तु तत्फलमाह ।

(१३) एवमात्मानमेतस्य सम्यग् ज्ञानक्रिये तथा ।
जानन्यथेप्सितान्पश्यन् जानाति च करोति च ॥

एवमितीश्वररूपमात्मानं, तस्य च स्वाव्यतिरिक्ते स्वातन्त्र्यमात्ररूपे ज्ञानक्रिये जान,न्नेवंभूतो ऽयमात्मा, न तु काणादादिदर्शितः, इत्थं च ज्ञानक्रिये न तु तस्य व्यतिरिक्ते चनेति परामृशन् यद्यदिच्छति तत्तज्जानाति करोति च समावेशाभ्यासपरो ऽनेनैव शरीरेण, अतत्परस्तु सति देहे जीवन्मुक्तस्तत्पाते परमेश्वर एवेति ॥

अस्यार्थस्य स्वप्रत्ययसिद्धस्यापि गुरुपरम्परोपदेश उपोद्बलको वक्तव्यः, शास्त्रदृष्टिर्हि दर्शिता आगमाधिकारेण, एवं गुरुतः शास्त्रतः स्वत एतद्दृढीकृतं भवतीत्यभिप्रायेण गुरुपारंपर्यं दर्शयति ।

(१४) इति प्रकटितो मया सुघट एष मार्गो नवो
महागुरुभिरुच्यते स्म शिवदृष्टिशास्त्रे यथा ।
तदत्र निदधत्पदं भुवनकर्तृतामात्मनो
विभाव्य शिवतामयीमनिशमाविशन्सिद्ध्यति ॥

अस्मत्परमेष्ठिभट्टारकश्रीसोमानन्दपादैः शिवदृष्टिशास्त्रे ऽयमभिनवः सर्वरहस्यशास्त्रान्तर्गतः सन्निगूढत्वादप्रसिद्धो बाह्यान्तरचर्याप्राणायामादिक्लेशप्रयासकलाविरहात्सुघटस्ताव · दुक्तः, स एवात्र प्रकटतां परवादकलङ्काशङ्कापसारेण नीतः, यत एवं शास्त्रगुरुस्वप्रत्ययसिद्धो ऽयमर्थस्तदिति तस्मादत्र प्रमेये पदं परामर्शं विश्रमयन् विश्वकर्तृत्वलक्षणमैश्वर्यमात्मनो विभाव्य दार्ढ्येन यदा परामृशति तर्हि तत् परामर्शमात्रादेव तावज्जीवन्मुक्तो भगवान् शिव एव । यथोक्तं परमेष्ठिपादैः ।

ज्ञाते शिवत्वे सर्वस्थे प्रतिपत्त्या दृढात्मना ।
करणेन नास्ति कृत्यं क्वापि भावनया ऽपि वा ॥
सकृज्ज्ञाते सुवर्णे किं भावनाकरणादिना ।
सर्वथा पितृमात्रादितुल्यदार्ढ्येन सत्यता ॥

इत्यादि । तां विभाव्य यद्यनिशमाविशति शरीरप्राणबुद्धिशून्येभ्यो ऽन्यतमं द्वयं सर्वं वा तत्रैव निमज्जयत्यनवरतं तत्तां विभूतिं परविभूतिपर्यन्तां लभते ।

"ननु यद्यात्माख्यं वस्तु तदेव, तर्हि तस्य प्रत्यभिज्ञानाप्रत्यभिज्ञानयोरविशेषः, नहि बीजमप्रत्यभिज्ञातं सति सहकारिसाकल्ये नाङ्कुरं जनयति, तत्क आत्मप्रत्यभिज्ञाने निर्बन्धः" उच्यते, द्विविधा ऽर्थक्रियास्ति, बाह्या चाङ्कुरादिका, प्रमातृविश्रान्तिचमत्कारसारा च प्रीत्यादिरूपा, तत्राद्या सत्यं प्रत्यभिज्ञानं नापेक्षते, द्वितीया तु तदपेक्षते एव, इह चाहं महेश्वर इत्येवंभूतचमत्कारसारा परापरसिद्धिलक्षणा जीवन्मुक्तिविभूतियोगमय्यर्थक्रियेतीश्वरप्रत्यभिज्ञानमत्रावश्यापेक्षणीयम् ॥

ननु प्रमातृविश्रान्तिसारार्थक्रिया प्रत्यभिज्ञानेन विना न दृष्टा, सति तत्र दृष्टेति क्वैतदुपलब्धमित्याशङ्क्याह ।

(९५) तैस्तैरप्युपयाचितैरुपनतस्तन्व्याः स्थिते ऽप्यन्तिके
कान्तो लोकसमान एवमपरिज्ञातो न रन्तुं यथा ।
लोकस्यैष तथानवेक्षितगुणः स्वात्मापि विश्वेश्वरो
नैवालं निजवैभवाय तदियं तत्प्रत्यभिज्ञोदिता ॥

यदा नायकगुणसंश्रवणप्रवृद्धानुरागा कामिनी तद्दर्शनमेव परममुपादेयमाकाङ्क्षन्ती दिवानिशमवशहृदया दयितोपयाचितानि दूतीसंप्रेषणानि मदनलेखक्रद्वारकात्मावस्थानिवेदनानि कुर्वाणा विरहक्षामीभवद्गात्रलतिका तिष्ठति, तदा तदुपयाचितवशादशङ्कितमेव सविधवर्तिनि प्रियतमे ऽवलोकिते तैस्तैरुत्कर्षविशेषैः परामर्शपदवीमगच्छद्भिर्जनसाधारणतामापादिते संपन्नमपि तत्प्रियतमावलोकनं न हृदयं पूर्णीकरोति, तथा स्वात्मनि विश्वेश्वरे सततं निर्भासमाने ऽपि तन्निर्भासनं न हृदयस्य पूर्णतामाधत्ते, यतः सो ऽपि स्वात्मा विश्वज्ञत्वकर्तृत्वाद्यप्रतिहतस्वशक्तिलक्षणपारमेश्वर्यात्कर्षयोगेन न परामृष्ट इति भासमानघटादितुल्यवृत्तान्तो जातः, यदा तु दूतीवचनाद्वा तल्लक्षणाभिज्ञानाद्वोपायान्तराद्वा तानुत्कर्षान्हृदयंगमीकरणेनामृशति, तदा तत्क्षणमुद्भूतफुल्लन्यायेनैव तावत्कामपि पूर्णतामभ्येति, परिभोगाभ्यासरसे तु विश्रान्त्यन्तराण्यपि लभते, तद्वदात्मनि गुरुवचनाज्ज्ञानक्रियालक्षणशक्त्यभिज्ञानादेर्वा यदा पारमेश्वर्योत्कर्षहृदयंगमीभावो जायते, तदा तत्क्षणमेव पूर्णतात्मिका जीवन्मुक्तिः, समावेशाभ्यासरसे तु विभूतिलाभ, इति तस्य प्रत्यभिज्ञैव परापरसिद्धिप्रदायिनी भवति ॥

सर्वोपकारकं महाफलमिदं शास्त्रं प्रसिद्धान्वययोगेन नामधेयप्रसिद्ध्या च तदुत्कर्षस्मरणद्वारजनितसंभावनाप्रत्ययलक्षणप्रवर्तकसंवेदनया जनं प्रवर्तयितुं पितुर्नाम्ना स्वनाम्ना चोपसंहारं दर्शयति ।

(९६) जनस्यायत्नसिद्ध्यर्थमुदयाकरसूनुना ।
ईश्वरप्रत्यभिज्ञेयमुत्पलेनोपपादिता ॥

यस्य कस्य चिज्जन्तोरिति नात्र जात्याद्यपेक्षा का चिदिति सर्वोपकारित्वमुक्तम्, अयत्नेन सिद्धिः परापररूपा यया स्यादिति महाफलत्वम्, उदयाकरपुत्रः श्रीमानुत्पलदेवो ऽस्मत्परमगुरुरिदं शास्त्रमकार्षीदिति तत्प्रसिद्ध्या जनः प्रवर्तते इति प्रवर्तनाद्वारेण सो ऽनुगृहीतो भवतीत्युभयनामनिर्देशः, इयमिति हृदयंगमतामुपपत्तिशतैरानीतेति शिवम् ॥ १९ ॥

आदितः सूत्रश्लोकाः १९२ व्याख्याताः ।

इति श्रीमन्महामाहेश्वरश्रीमदाचार्याभिनवगुप्तविरचितायामीश्वरप्रत्यभिज्ञासूत्रविमर्शिन्यामागमाधिकारे तत्त्वार्थसंग्रहस्तृतीयमाह्निकम् ॥

॥ इति पञ्चदशमाह्निकम् ॥

॥ संपूर्णो ऽयमागमाधिकारस्तृतीयो विमर्शः ॥

एषा ऽभिनवगुप्तेन सूत्रार्थप्रविमर्शिनी ।
रचिता प्रत्यभिज्ञायां लघ्वी वृत्तिरभङ्गुरा ॥
वाक्यप्रमाणपदतत्त्वसदागमार्याः
स्वात्मोपयोगमुपयान्त्यमुतः सुशास्त्रात् ।
भीमान् रसाज्जलमयांश्च न सस्यपुष्टो
मुक्त्वा ऽर्कमेकमिह योजयितुं क्षमो ऽन्यः ॥
आत्मानमनभिज्ञाय विवेक्तुं यो ऽन्यदिच्छति ।
तेन भीतेन किं वाच्यं प्रश्ने ऽस्मिन् को भवानिति ॥

श्रीसदाशिवभट्टारकाय नमः ।

॥ संपूर्णो ऽयमीश्वरप्रत्यभिज्ञासूत्रविमर्शिनीनामधेयो निबन्धः ॥

---

॥ श्रीः ॥

॥ ईश्वरप्रत्यभिज्ञासूत्रविमर्शिन्युपसंहरणम् ॥

तदिदं निबन्धरत्नं दशभिरङ्कैः काशीविद्यासुधानिधिना प्रकाश्यमानं बुद्धिमन्मानसानन्दोत्पादनेन सफलयतु शोधनटिप्पणप्रभृतीन् मामकप्रयत्नानिति सविनयं परमशिवं प्रार्थये ।

अथैतद्विस्तृतनिबन्धावलोकनासमर्थरसिकजनमनःकुतूहलाय संक्षेपतो ऽस्य प्रतिपाद्यं संगृह्यते ।

इह खलु घटमहमन्वभवमभ्यजानामित्यादिसंविदस्त्रीण्यालम्बनानि प्रसिध्यन्ति । ज्ञानं ज्ञेयं ज्ञाता चेति । तत्र ज्ञानं विषयप्रकाशलक्षणभृते विषयवैचित्र्यान्न स्वात्मनि किं चिद्वैचित्र्यमादधाति । तथाहि । घटज्ञानात्पटज्ञाने को ऽन्यो विशेषो भवितुमर्हति, विना घटपटाभ्याम् । घटादिरूपो विशेषश्च स्वात्मनि वैलक्षण्यमादधदपि प्रकाशपरमार्थे ज्ञाने किं वैलक्षण्यमादधीत । आहितमपि तदौपाधिकं भवेन्न तु वास्तवमिति वस्तुतः प्रकाशस्यैकरूप्यलक्षणमेकत्वमेव ।

ज्ञेयञ्च तावद् ज्ञानादतिरिक्तं सिध्यति । अतिरिक्तविषयं विना ऽनुपपद्यमानेन हि तेन प्रकाशेनातिरिक्तो विषयः साध्यः । तस्य च स्वप्नभ्रममदादौ विना ऽप्यतिरिक्तज्ञेयं सर्वानुभवसिद्धतया ऽनुपपद्यमानत्वाभावात् । "अथासत्यतिरिक्ते ज्ञेये घटादिज्ञानेषु पटादिज्ञानेभ्यः को विशेष उच्यताम्, पामरपर्यन्तं प्रसिद्धो हि तयोर्भेदः, सर्व एव हि माता घटव्यवसायोत्तरं घटमन्वभवं न पटमित्यनुव्यवस्यति, नहि तत्र प्रकाशांशे क-

श्चन विशेषो यस्तादृशीं संविदं व्यवच्छिन्द्यात्" । उच्यते । अतिरिक्तत्ववादिनैवोच्यताम्, किं स्वाप्नप्रभृतिसंवित्सु घटं विषयीकुर्वाणासु पटं विषयीकुर्वन्त्याः संविदो व्यावृत्तं रूपमस्ति, अथोच्येत पूर्वानुभूतघटादेः स्मरणरूपा एव स्वप्नादिसंविद इत्यनुभूयमानघटादिरेव व्यवच्छेदक इति, तथाप्यतीतघटादिविषयकसंविदतीतपटादिविषयकसंविदो भेदकं किं कल्पनीयम्, घटादेरत्ययेन भेदकत्वासंभवात्, अथ कापिलनयमनुसृत्यातीतावस्थं घटमुपगम्य समाधीयते, तत्रापि प्रतिवदामो नरविषाणगगनकुसुमस्वशिरश्छेदादिज्ञानेषु को ऽनुभूतो विषयः परिकल्पयितुं शक्यते । अथ सांख्यप्रवचननयमनुसृत्यैव बुद्धिपरिकल्पितो विषयः परिच्छेदक उपेयते । तर्हि हन्त भोः स्वाप्नादिसंविदामनुभवत्वमेवोपगम्यतां, किं स्मरणत्वाभ्युपगमेन । अथ तदपीष्टमेव समापन्नमित्युच्यते, तर्हि आयातं मार्गेण, स्वाप्नानुसारेण बाह्यसंविदोपि बोद्धृनैव विषयेण सविषयकत्वमास्तां ततश्च सिद्धमनतिरिक्तत्वं विषयस्य, बोद्धा हि विषयः प्रकाशस्यैव कल्पिताकारविशेषो वस्तुतः प्रकाशादनतिरिक्त एव, अपि च योगिना क्षणमात्रादेव निर्मीयमाणं विचित्रपुरसेनादिकमवश्यं योगिसंविदात्म वाच्यम् । अन्यथा सामग्रीसंघटनपुरःसरं घटं घटयन् योगी कुम्भकारव्यावृत्तां कामीशितां स्वस्मिन्समपादयत्, प्रसिद्धकार्यकारणव्यवहारानुल्लङ्घनायैव हि किल योगिनिर्माणस्य सामग्रीसमर्जनपूर्वकत्वं वाच्यम्, तत् खलु क्षणमात्रेण योगिनिर्मिते घटे न्यग्रोधे षोडशवर्षपुरुषशरीरे वा न संभवितुमर्हतीति योगीच्छामात्रेण झटिति पुञ्जभावमापन्नाः परमाणव एवारम्भका वाच्याः, न खलु लोके परमाणूनां घटारम्भकत्वं प्रसिद्ध्यति, किन्तु द्व्यणुकप्रभृतिकपालपर्यन्तं क्रमेण घटमानानामवयविनां तत्रापि नियतसहकारिसमवहितानां, नापि न्यग्रोधधाना अह्नायैव निपीतमार्तण्डमण्डलं सुविस्तीर्णशाखाकाण्डमण्डितं न्यग्रोधतरुमारभन्ते, अपि त्वङ्कुरादिक्रमेण, एवं पुरुषशरीरारम्भकशुक्रशोणितयोरपि चिन्त्यम् । इत्थं च योगिनिर्माणस्थले लोकप्रसिद्ध्युल्लङ्घनस्यावश्यकतया ऽलं बाह्योपादानसमवधानचिन्तया, योगिसंविदेव नानाविधवस्तुवैचित्र्यावभासस्वातन्त्र्यं स्वस्मिन् समाधत्ताम्, तथा च संविद एव विचित्रावभासलक्षणैश्वर्यस्य सिद्धौ विश्वजातमपि माहेश्वरसंविदेव स्वान्तर्निमग्नमीशितृत्वलक्षणस्वातन्त्र्यवशादेवावभासयतीति संतुष्यत । तदुक्तमुत्पलदेवेन ।

चिदात्मैव हि देवोन्तःस्थितमिच्छावशाद् बहिः ।
योगीव निरुपादानमर्थजातं प्रकाशयेद् ॥

इति । इत्थं च विषयः प्रकाशात्मनो ज्ञानान्नातिरिक्त इति सिद्धम् ।

ज्ञाता तावदन्तर्मुखविमर्शात्मा प्रकाशस्वभावः सकलसंविदां प्रतिष्ठाभूतो निम्नगानामिव सागरः । तस्य स्वप्रकाशत्वादेव न साधनापेक्षा, प्रमाणं हि अप्रकाशमानस्य प्रकाशनायापेक्ष्यते, स यदि स्वयमप्रकाशमानः प्रमाणप्रकाश्यः स्यात्तर्हि घटादितुल्ययोगक्षेमो जड इति नात्मा, अथ चेदलुप्तचिद्रूपः स्वप्रकाशस्तर्हि स सिद्ध एवेति का ऽस्य सिद्धिः साधनैः कर्त्तव्यत्वेनावशिष्यते । स चायं नानाविधस्वातन्त्र्यपूर्णो ऽहमित्याकारो विमर्शस्तैस्तैर्वस्तुभिर्विषयविधया ऽवच्छेदकविधया वा परिच्छिन्नेभ्यः प्रकाशेभ्यः परमार्थतो ऽभिन्न एव । इत्थं च चैत्रीयः प्रकाशः कतिपयवस्तूनि विषयीकरोति मैत्रीयः कतिपयानीत्येवंक्रमेण सकलप्रकाशः सर्वविषयकः प्रकाशसमष्टिरेव चाहंविमर्शः प्रमातेत्यनायासतः प्रमातुः सार्वज्ञ्यमपि सिद्धम् ।

अथायं प्रमाता यद्येवं प्रमाणातीतस्तर्हि किं शास्त्रेण, परार्थानुमानात्मकं हि तदिति चेद्, उच्यते, यैषा भगवतो विमोहिनी नाम मायाशक्तिस्तत्कृतं यत् पूर्णत्वस्वातन्त्र्यादेः प्रकाशमानस्याप्यप्रकाशमानतया ऽभिमननं मौढ्यापरपर्यायं तदुन्मूलनसाधनं यत्सोहमित्याकारकं प्रत्यभिज्ञानं तन्मननोपायभूतयुक्तिशतोपपादनमुखेन हृदयंगमीभावं प्राप्यते ऽनेन शास्त्रेणेति परमपुरुषार्थसाधनं शास्त्रं महाफलमेव ।

अस्य चानवरतजननमरणपीडितजनमात्रमधिकारि, समस्तसंपत्समवाप्तिलक्षणः परमपुरुषार्थः प्रयोजनम्, ईश्वरप्रत्यभिज्ञानं च विषय, इत्यनुबन्धाः प्रथमसूत्रेण सुव्यक्तमुक्ताः ।

अथैतद्दर्शनानुसारेण संक्षेपतो विश्वं निरूप्यते । सर्वेषु तावन्मुख्यं प्रकाशपरमार्थमहमित्याकारकविमर्शात्म स्मृतिज्ञानापोहनशक्तिभिः क्रियाशक्त्या चावियुक्तं शिवतत्त्वं स एव महेश्वर इत्युच्यते । येयं तस्योन्मेषशक्तिर्यतो जगत उदयो या च निमेषशक्तिर्यतो जगतस्तिरोभावस्ते द्वे क्रमेणेश्वरतत्त्वसदाशिवतत्त्वे । तदधिष्ठातृदेवते अपि तन्नामिके । यदेतद्योगिप्रभृत्यपशुप्रमातृषु पारमार्थिकं प्रथनं तत्प्रयोजिका विद्याशक्तिः । या खलु पशुप्रमातॄणां शून्ये बुद्धौ शरीरे वा प्रमातृताभिमानमुद्रेचयति भावांश्च चितो भेदेनाभिमानयति सा विमोहिनी नाम मायाशक्तिः । इदमित्याकारको यो बहिर्मुखो विमर्शस्तदात्मकमेव मेयं, तच्चतुर्विंशतिधा । तथाहि । कार्यकरणवर्गस्य यन्मूलभूतं कारणं तत् प्रधानं नाम । ततो ऽध्यवसायव्यापारं महत्तत्त्वं बुद्धिर्नाम प्रादुर्भवति । ततश्चाभिमानात्मा ऽहंकारः । तस्माच्च सात्विकात् संकल्पकं मनः, राजसाच्च दशेन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थानि, सर्वाणि चैतान्यतीन्द्रियाणि, तामसाच्चाहंकारात् शब्दस्पर्शरूपरसगन्धतन्मात्राणि । तेभ्यश्च क्रमेणैकैकवृद्ध्या गगनपवनानलसलि-

लवसुन्धराभिधानि पञ्च भूतानीत्येवं चतुर्विंशतिधा मेयम् । तदेतत्प्रपञ्चजातं यस्मादुदेति यत्र च लीयते सो ऽन्तर्मुखविमर्शात्मा महेश्वरस्तत्प्रत्यभिज्ञया च भवति जनस्य परमपुरुषार्थो ऽपवर्ग इति शम् ॥

सांख्य० बालशास्त्री

॥ श्रीः ॥

॥ अथ बालरामायणाख्यनाटकस्याष्टमोऽङ्कः ॥

अतः परं वीरविलासो भविष्यति ।

ततः प्रविशतो राक्षसौ ।

एकः । सखे दुर्मुख किमपि महान् सत्त्वभ्रंशो रावणस्य यत्कुमारसिंहनादवधमप्याकर्ण्य न शोकः कृतो नाप्यमर्षः केवलमेकं तुलाद्यूतं प्रवर्त्तितं तत्र च लङ्काधिपत्यं सीतापहारिता न पुनरर्पिता ।

दुर्मुखः । अज्ज सुमुह सामिणीए तिअडाए समादिडं जह गच्छह अङ्गदणरन्तयाणं एक्कतुलं पेक्खह जेण तुह्ममुहादो सुणिअ सीदादेवीए णिवेदइस्सं ता दुवे वि अह्मे गदत्ति एत्तिअ महं जाणामि ण उण कारणं ता कहीअदु जहा पडिवण्णम् * ।

सुमुखः । परं लङ्केश्वरेण शुकसारणौ प्रहितौ दाशरथिमभिधातुमभिहितं च ताभ्याम् ।

वक्त्राम्भोजार्चनाभिः फलमभिलषितं हेलया यस्य लिप्सोः
सोत्कण्ठं कण्ठकाण्डेष्वहमहमिकया खड्गधारायणेषु ।
स्त्रीति त्यक्तप्रणामप्रकुपितगिरिजाकृष्टवामार्धपाणि-
स्तोषोदस्तान्यहस्ता झटिति न घटिता शाम्भवी ताललीला ॥१॥

स निशाचरचक्रवर्ती त्वामाह यदुत किमखिलवानरराक्षसक्षयकरेण संग्रामेण तदेकं तुलाद्यूतं प्रवर्तयावः । तत्र च ।

त्वत्काङ्कारविजये तव राम लङ्का
सीता च ते पुनरियं भवतो ऽस्तु दाराः ।
मत्काङ्कारविजये तु ममाधिपत्यं
तस्यां च ते पुरि कलत्रजने च तत्र ॥ २ ॥

दुर्मुखः । तदोतदो † ।

सुमुखः । ततश्च हासलवलाञ्छिताधरमुद्रेण रामभद्रेणाभिहितं यदाह द्रुहिणप्रणप्ता । किं पुनरावयोरङ्कारत्वमुचितं ययोरन्तरङ्गो ऽभियोगः ।

दुर्मुखः । तदोतदो * ।

सुमुखः । ततश्च निरुपमानरामपराक्रमशङ्किताभ्यामुक्तं शुकसारणाभ्यां यदुत महानायकयोर्नायं क्रम इति कुम्भकर्णाग्रजस्त्वामिदमाह ।

दुर्मुखः । तदोतदो † ।

सुमुखः । ततश्च सौमित्रिसुग्रीवविभीषणजाम्बवदाञ्जनेयप्रभृतिभिर्निषिद्धेनापि तथेत्यभ्युपगम्याङ्कारीकृतः कुमारो ऽङ्गदो रघूद्वहेन निजपुत्रो नरान्तकस्तु लङ्केश्वरेण ।

दुर्मुखः । भो: किं पुण णिअभुअदण्डमण्डलीपरक्कमे आणासंसा देवस्स जेण णरन्तअवाहुसु समारोविअं लङ्कारज्जम् ‡ ।

सुमुखः । असमञ्जसकारितायां किमुच्यते स्वामी । किञ्च ।

मृत्युं यदैव गमितो युधि सिंहनादः
शक्तिर्यदैव च वृथा भरतायनेऽभूत् ।
सीतार्पणं नृपसुताय तदैव युक्तं
मोहस्तु तत्र रजनीचरकालरात्रिः ॥ ३ ॥

दुर्मुखः । जुवराअमेहणादस्स उण का वत्ता § ।

सुमुखः ।

यद्बद्धो नागपाशैः प्रचुरतमतमःश्यामले रात्रिमध्ये
यद्युद्धं यच्चभस्तः शरपतनविधिर्मायया छन्नमूर्तेः ।
यद्भक्तिर्मन्त्रजिव्हे प्रसरति च रथं नित्यजैत्रं सुवाने
तन्मन्ये मेघनादोऽप्यनुभवति भयं राघवाद्दृप्रमत्तः ॥४॥

अपिच ।

लङ्का दुर्गं जलधिपरिखादुर्गमं राक्षसेन्द्र-
स्तस्याः स्वामी सुरजनवधूचामरैर्वीज्यमानः ।
रामः शाखामृगपरिगतो मानुषस्तद्विपक्ष-
स्तत्रैतस्मिन् जयविधिरिति व्रीडया नः कलङ्कः ॥ ५ ॥

दुर्मुखः । जं णिम्मलमदिचक्खुणो पेक्खन्ति तं दिडं अज्जसुमुहेण ‖ ।

सुमुखः । अलममुना राक्षसविरुद्धकथानुबन्धेन यथादिष्टमेव कुर्वः । उभौ परिक्रामतः ।

* आर्य सुमुख स्वामिन्या त्रिजटया समादिष्टं यथा गच्छतं अङ्गदनरान्तकयोरेकतुलां प्रेक्षेथां येन युष्मन्मुखात् श्रुत्वा सीतादेव्यै निवेदयिष्यामि तद्द्वावप्यावां च गतावित्येतावदहं जानामि न पुनः कारणं तत् कथ्यतां यथा प्रतिपन्नम् ।

† ततस्ततः ।

* ततस्ततः ।

† ततस्ततः ।

‡ किं पुनर्निजभुजमण्डलीपराक्रमे नाशंसा देवस्य येन नरान्तकबाहुषु समारोपितं लङ्काराज्यम् ।

§ युवराजमेघनादस्य पुनः का वार्ता ।

‖ यन्निर्मलमतिचक्षुषः पश्यन्ति तद् दृष्टमार्यसुमुखेन ।

दुर्मुखः । एसा सामिणी तिअडा अह्मे पडिवालअन्ती चिठ्ठइ ता एहि उवसप्पह्म * तथा कुरुतः ।

ततः प्रविशति त्रिजटा ।

त्रिजटा । सैात्सुक्यमालोक्य हंहो दुम्मुह सुमुह तुरिअं उवसप्पह णिवेदेह जुज्झउत्तन्तम् † उभैा प्रणम्योपविशतः ।

सुमुखः । स्वामिनि त्रिजटे लङ्कापुरीं पूर्वेण सुवेलाचलं च पार्श्वमेन उभयतो मञ्चः परिमितप्राकारपरिष्कृतः स्तोकसमुन्नतः समुन्नतसमस्तजनप्रेक्षणीयो रत्नाक्षवाटे कारितो राक्षसराजेन तत्र च प्राच्यमञ्चाधिरूढे ससैामित्रिसुग्रीवविभीषणे रामे नीलाधिष्ठिते च वानरबले प्रतीच्यमञ्चाधिरूढे च सशुकसारणे दशकण्ठे प्रहस्ताधिष्ठिते च राक्षसबले गगनाङ्गणगतासु च वीरजनचरितकुतूहलिनीषु सुरसुन्दरीषु ताडितमल्लभटीतूर्यैा माङ्गल्यकलशानुगतैा निशितकृपाणपाणी प्रविष्टावङ्कारैा । ततश्च ।

रत्नत्रिकङ्कणविभूषितदोःप्रकाण्डं
श्रीखण्डपाण्डुरितदेहभरं च रूपम् ।
युद्धाङ्गणेङ्गदनरान्तकयोर्निरीक्ष्य
चक्षुर्निमेषविमुखं स्तुतमप्सरोभिः ॥ ६ ॥

त्रिजटा । तदोतदो ‡ ।

दुर्मुखः । तदो अ समोत्तीरिअ मञ्चादो णीलपहत्थेहिं सेणावईहिं कट्टिएसु अन्तरदण्डेसु णिरइआलीढपाआ दोवि संमुहं संठिआ अङ्कआए पउत्ता अ रणमण्डले मण्डलीए भमिउं § ।

त्रिजटा । तदोतदो ‖ ।

दुर्मुखः । तदो अ ताणं विविहं वगन्ताणं उपरि ताडणे णमन्ताणं तलताडणे उप्पयताणं अणवरअपहारपरम्परं पेसअंताणं पेसिअं पडिच्छन्ताणं दिट्ठिं वञ्चअन्ताणं अरक्खिअमग्गं रक्खिन्ताणं अण्णदो दंसिअ अण्णदो पहरन्ताणं संभरिआसेसधीरत्तणेण वंसविसेसं छुरिआजुअलं उज्झिअ अण्णुण्णमाहरन्ताणं पयट्टं तं जुज्झ ¶ ।

त्रिजटा । तदोतदो * ।

सुमुखः ।

चारी सुचित्रपदता स्थिरता च दृष्टेः
क्रान्तिर्भुवः प्रकृतियोजनवञ्चनेन ।
सर्वाङ्कक्कारणकर्मणि मात्रिकेय-
मुत्कीर्य तत्र समये कथितेव ताभ्याम् ॥ ७ ॥

अपिच ।

यथायथा प्रहरति वालिनन्दन-
स्तथातथा हरिहरिभिः स्थितं मुदा ।
यथायथा प्रहरति रावणात्मज-
स्तथातथा किलिकिलितं च राक्षसैः ॥ ८ ॥

त्रिजटा । तदोतदो † ।

दुर्मुखः । तदो अ ताणं णिब्भरं पअट्टे समरसंघट्टे चरणेण चरणमप्फलिअ दरणमन्तस्स णरन्तअस्स रोमञ्चणिविडरअणङ्गदेण कन्धराकण्डबुद्धबन्धे खित्ता छुरिआ । उडिदो अ खेडासंखोहो वाणरबले जायाइं अ मउलन्तकमलमण्डलच्छायाइं रावणवयणाइं वञ्चिअणिसाअरलोअलोअणं परोप्परदिण्णहत्थआलं च पहसिआऊं अच्छराऊं खरसमीरणुम्मूलिअफुल्लपालिभद्दुदुम्मो विअ पहारविवसो समं णिसाअरीणअणिन्दीवरणीरन्धणीरधाराहिं धरणिं गऊ रावणङ्कारो ‡ ।

त्रिजटा । हा वच्छ कहिं मि देहि मे पडिवअणं भद्द कहेसु कीदिसी उअ णरन्तअवहे देवाणं मुहच्छाआ आसि § ।

सुमुखः । यादृशी प्रतिपक्षपराभवे सति भवति स्वामिनि त्रिजटे कथं कथ्यते देवतापक्षपातः क्षत्रियकुमारे विजेतरि तत्र यद्वा को नाम धर्मविनयिनि जने न ख्रिद्यति यतः ।

हर्षोदेकं नयनमुशना नेत्रयुग्मानि देवा-
स्त्रीण्यक्षीणि त्रिपुरविजयी पद्मसद्मा ऽष्टदृष्टीः ।
चक्षुःषट्कं द्विगुणगुणितं शाङ्करिर्दृक्सहस्रं
नीत्वोल्लासं स च सुरपतिर्दृष्टवान् वालिपुत्रम् ॥ ९ ॥

---

* एषा स्वामिनी त्रिजटाऽऽवां प्रतिपालयन्ती तिष्ठति तदेह्युपसर्पावः ।

† हंहो दुर्मुख सुमुख त्वरितमुपसर्पतं निवेदयतं युद्धवृत्तान्तम् ।

‡ ततस्ततः ।

§ ततश्च समुत्तीर्य मञ्चात् नीलप्रहस्ताभ्यां सेनापतिभ्यां कृष्टयोरन्तरदण्डयोर्निरचितालीढपादो द्वावपि संमुखं संस्थितावङ्कारैा प्रवृत्तैा च रणमण्डले मण्डल्या भ्रमितुम् ।

‖ ततस्ततः ।

¶ ततश्च तयोर्विविधं वल्गतोरुपरि ताडने नमतोस्तलताडन उत्पततोरनवरतप्रहारपरम्परां प्रेषयतोः प्रेषितं प्रतीच्छतोर्दृष्टिं वञ्चयतोररक्षितमङ्गं रक्षतोरन्यतो दर्शयित्वाऽन्यतः प्रहरतोः संभृताशेषधीरत्वेन वंशविशेषं छुरिकायुगलमुत्क्षिप्यान्योन्यमाहरतोः प्रवृत्तं तद् युद्धम् ।

* ततस्ततः ।

† ततस्ततः ।

‡ ततश्च तयोर्निर्भरं प्रवृत्ते समरसंघट्टे चरणेन चरणमास्फाल्य दरनमतो नरान्तकस्य रोमाञ्चनिविडरत्नाङ्गदेन कन्धराकाण्डबुध्नबन्धे क्षिप्ता छुरिका । उत्थितश्च क्ष्वेडासंक्षोभो वानरबले । जातानि च मुकुलायमानकमलमण्डलच्छायानि रावणवदनानि । वञ्चितनिशाचरलोकलोचनं परस्परदत्तहस्ततालं च प्रहसिता अप्सरसः । खरसमीरणोन्मूलितफुल्लपारिभद्रद्रुम इव प्रहारविवशः समं निशाचरीनयनेन्दीवरनीरन्ध्रनीरधाराभिर्धरणीं गतो रावणाङ्कारः ।

§ हा वत्स क्वासि देहि मे प्रतिवचनं भद्र कथय कीदृशी पुनर्नरान्तकवधे देवानां मुखच्छायाऽऽसीत् ।

त्रिजटा । तदो तदो अज्जदसकण्ठेण किं पडिवण्णं * ।

सुमुखः । इदमभिहितम् ।

मा भङ्गसङ्गमवयच्छ नरान्तकस्य
जातः पराङ्मुखगतिर्न पुरा सुरेशः ।
तत्सांप्रतं भवतु तत् पुनराजिकर्म
साधारणं यदिह वानरराक्षसानाम् ॥ १० ॥

त्रिजटा । कहं अज्जेण दिण्णो जलञ्जली लज्जादेवीए तदो तदो † ॥

सुमुखः । ततश्च सबिभीषणहस्ततालं हसति रामदेवे कुम्भकर्णप्रबोधनाय निकुम्भिलानिर्गतस्य च मेघनादस्य समाह्वानाय शुकसारणौ प्रेष्य लङ्कामेव प्रविष्टो देवः ।

त्रिजटा । ता गच्छह वुत्तन्तरं उअलहिउं अहं वि सीआदेवीए पिअणिवेदिआ भविस्सम् ‡ । इति निष्क्रान्ताः । मिश्रविष्कम्भः ।

ततः प्रविशति सुप्रोत्थितो रावणः । पार्श्वयोर्द्वौ द्वौ परिचारराक्षसौ प्रतीहारी च ।

प्रतीहारी । स्वगतमहो अवत्थादिरेओ दशकण्ठदेवस्य जेण इमस्सिं एव्व केलिविमाणाहिट्ठाणे रअणट्टालए पओसाहिपच्चूसं जाव रअणीरणं वेक्खिअ वासरसमरसंरम्भदंसणसुवत्तणेण ट्ठिदोवि इसि णिद्दामुद्दिअणअणन्दीवरवणो किंवि किंवि चिन्तअन्तो चिट्ठइ § ।

रावणः । भद्रे वेत्रवति यो यत्र परमभिज्ञः स तेन सुतरामावर्ज्यते यद्विभावरीसमरसंमर्दव्यतिकरेण वयमपि विस्मायिताः । विशेषस्मृतिनाटितकेन ।

प्रेयान् मे दन्तिदन्तप्रवसदसुरयं वल्लभो मे विपक्षं
कुन्तप्रोतोऽपि योऽयं सरति मम रुचिस्ताण्डवी यत्कबन्धः ।
अत्रास्मत्प्रेमबद्धभ्रुकुटिमुखमिदं यस्य लूनेऽपि कण्ठे
स्वःस्त्रीणां नक्तमाजाविति वरवरणे तोषिताः के न वाग्भिः ॥११॥

ऊर्ध्वमवलोक्य किमयमतिसत्वरः सुरजनसमाजः । शङ्के कतिपययातुधानवधात्तापसं प्रति संप्रति प्रीयते । सक्रोधम् ।

हर्षोत्कर्षः किमयममराः क्षुद्ररक्षोवधाद्व-
स्तन्मे दोष्णां विजितजगतां विक्रमं विस्मृताः स्थ ।
किञ्चाद्यैव प्रियरणरसो बोध्यते कुम्भकर्ण-
स्तूर्णं जेता स च दिविषदां बोध्यते मेघनादः ॥१२॥

प्रतीहारी । अवसरसंतोसणिज्जो सामिजणोत्ति चिन्तअन्ता उच्चावचसंचारिणो सुरसंघादा देवं एव्व सेवन्ति * ।

नेपथ्ये । हंहो लङ्काउरीपाआरपालआ अदिक्कन्तजामिणीजुज्झजणिअं बलीमुहबलविद्धसणं पडिकरेह उत्तम्भेह विहिदुम्मूलुणाइं तोरणाइं अगाहीकरेह रिक्खरक्खसवाणरकरङ्कसंछाइअं परिहं समीकरेह विहडि अकंचणसिलालिओ पओलिओ पुण णवीकरेह मन्दुक्किअं कटक्कियं सज्जेह भग्गं पाआरखण्डिमग्गं एअं पि किं ण पेक्खह डालिअं अट्टालिअं विहडिअं अरण्डिआपखण्डं जज्जरिअं जन्तसंताणं णिउंचिआओ कंचणीयाओ ताव परिकरेह खेवणिआइं सज्जह मज्जवसातेल्लाइं आणेध आव ट्टिअपरिक्खेवणिज्जओ आणेह सिज्जरससित्थजदुजादीओ णिअडेह पवेसपज्जोलणिज्जइं खोमसणकप्पासपट्टसुततसरतन्तुसंताणाइं विरएह कीलिआकड्ढणपाडणिज्जं गोउरदुवारं ढोएह विविहपहरणसण्णाहदससहस्साइं † ।

रावणः । आकर्ण्य विहस्य च अये किमयमलीकः संरम्भो मनुष्यबुद्धिदुर्गं दुर्गं कथयन्ति । ततश्च ।

सति सर्वामरोच्चण्डे मम दोर्दण्डमण्डले ।
शङ्के प्राकारविभवो लङ्काऽलङ्कारकारणम् ॥ १३ ॥

राक्षसान् प्रति साक्षेपं रेरे करङ्कक रेरे कङ्कालक विबोधयतं कुम्भकर्णं ज्येष्ठक्षत्रियतापससंरम्भाय ।

उभौ पदान्तरे भवतः ।

करङ्ककः । जनान्तिकं सखे कङ्कालक देवः कुम्भकर्णं प्रबोधयति न पुनरात्मानं किं च प्रयत्नप्रबोधितोऽप्यसौ रामेण दीर्घं शाययितव्य एव ।

कङ्कालकः । कण्णे विभीषणं वज्जिअ सव्वस्स एसा गइ ।

करङ्ककः । तथैव ।

धिक् शौण्डीर्यमदोद्धतं भुजवनं धिक् चन्द्रहासं च ते
धिग्वक्त्राणि निकृत्तकण्ठवलयप्रीतेन्दुमौलीनि च ।

* तत आर्य दशकण्ठेन किं प्रतिपन्नम् ।

† आर्येण दत्तो जलाञ्जलिर्लज्जादेव्यै । ततस्ततः ।

‡ तद् गच्छतं वृत्तान्तरमुपलब्धुम् । अहमपि सीतादेव्यै प्रियनिवेदिका भविष्यामि ।

§ अहो अवस्थातिरेको दशकण्ठदेवस्य येनास्मिन्नेव केलिविमानाधिष्ठाने रत्नाट्टालके प्रदोषाधिप्रत्यूषं यावत् रजनीरणं प्रेक्ष्य वासरसमरसंरम्भदर्शनोत्सुकत्वेन स्थितोऽपीषन्निद्रामुद्रितनयनेन्दीवरवनः किमपि किमपि चिन्तयन् तिष्ठति ।

* अवसरसंतोषणीयः स्वामिजन इति चिन्तयन्त उच्चावचसंचारिणः सुरसंघाता देवमेव सेवन्ते ।

† हंहो लङ्कापुरोप्राकारपालका अतिक्रान्तयामिनीयुद्धजनितं बलीमुखबलविध्वंसनं प्रतिकुरुत । उत्तम्भयत विहितोन्मूलनानि । तोरणानि । अगाधीकुरुत ऋक्षराक्षसवानरकरङ्कसंछादितां परिखां । समीकुरुतविघटितकाञ्चनशिलालीः प्रतोलीः । पुनर्नवीकुरुत मन्दीकृतं कण्टकिद्वारं सज्जयत भग्नं प्राकारखण्डीमार्गम् । एतत् किं न पश्यथ । दोलितं अट्टालिकं विघटितं वरण्डिकाप्रखण्डं जर्जरितं यन्त्रसंतानं निकुञ्चिताः काञ्चनिकाः तावत् परिकुरुत क्षेपणीयानि सज्जयत मज्जावसातैलानि आनयतावर्त्तितपरिक्षेपणीयाः सर्जरससिक्थजतुजातीः निकटयत प्रवेशप्रज्वलनीयानि क्षौमशणकार्पासपट्टसूत्रतसरतन्तुसन्तानानि विरचयत कीलिकाकर्षणपातनीयं गोपुरद्वारं वहत विविधप्रहरणसन्नाहशतसहस्राणि ।

निद्रालावतिघस्मरे प्रतिदिनं स्वापान्महामेदुरे
प्रत्याशा चिरविस्मृतायुधविधौ यत् कुम्भकर्णे स्थिता ॥ १४ ॥

रावणः । सुमुखदुर्मुखौ निकुम्भिलानिर्यायिनः कुमारमेघनादस्य कनिष्ठतापसेन सह समरसंरम्भं निवेदयतं ।

उभौ प्रणम्य यदान्तरे भवतः ।

सुमुखः । जनान्तिकं सखे दुर्मुख किमपि शौर्यातिरेको रामानुजस्य यदमुना निकुम्भिलां प्रति प्रस्थितस्य कुमारमेघनादस्य संदिष्टं यदुत ।

यावन्नैव निकुम्भिलायजनतः सिद्धे हविर्ल्लिहिनि
प्राप्तस्यन्दनचापकाण्डकवचं स्वं मन्यसे दुर्जयम् ।
वैदेहीविरहव्यथाविधुरितेऽप्यार्ये विधाय क्रुधो
वन्ध्यास्तावदयं सशक्रविजयिं स्त्वां लक्ष्मणो जेष्यति ॥ १५ ॥

दुर्मुखः । तह एव्व किं भणीअदु विराहविद्धंसणस्स कणिट्ठभादा लक्खणो क्खु एसो मिअङ्कमण्डलेण समं जादस्स तत्तो ण परिहीअन्ति गुणा पेऊसस्स * ।

सुमुखः । सवीरगोष्टीषु पुनरिदमभिहितम् ।

स्मर्तव्यस्मितमाननं विरचितं येनामरीणां रणा-
च्चित्यं भोगवती कृता निपतितद्वारार्गला येन च ।
धिग्धिग्भीमनिकुम्भिलागुरुगुहागर्तैकसाध्ये स्थितं
तत्संप्रत्यभिचारकर्मणि महावीरस्य शौर्यव्रतम् ॥ १६ ॥

करङ्कः पुरोऽवलोक्य ।

सोऽयं पुरः शयनसद्मनि कुम्भकर्णः
संसेवितस्त्रिदशयामिककामिनीभिः ।
श्वासोत्तरं स्वपिति जर्जरकङ्कणौघै-
स्तत्पाणिभिस्ताडिति ताडितपादभागः ॥ १७ ॥

कङ्कालकः । सुट्ठु क्खु परिचिअं भणासि णिबिडणिद्दाणन्दट्ठिओ कुमारो कुम्भकण्णो † ।

रावणः । यत्सत्यं भगवतः कमलसंभवाद्वरीयसापि तपसा निद्रानन्दमेव वृतवान् मे वत्सः कुम्भकर्णः ।

सुमुखः । कर्णे ।

यात्यैरावणवारणे रणभुवो भग्ने तरौ डिण्डिमो
यः क्रुष्टश्च कृतश्च सङ्गरविधावाघोषणाद्दुन्दुभिः ।
यस्तस्यैष रवो रयेण विदधद्दिक्पालशून्यादिशः
कामं क्रामति रोदसि स्वयमयं तन्मेघनादः पुरः ॥ १८ ॥

पुनराकर्ण्य ।

यद्भैरवाकृतिकरालकपालपाणि-
फेट्कारडामरतरो निनदानुबन्धः ।
तन्नूनमत्र हनुमान् समराय पत्रं
सौमित्रिणा विरचितोऽयमखर्वगर्वः ॥ १९ ॥

दुर्मुखः । हंहो देव कहं तुए संदेहदोलअमधिरोविदाइं मत्तण्डपुलत्थाणं कुलाइं * ।

रावणः ।

वामानि पश्यत समेत्य मुखानि पञ्च
रामं सहास्सदनुजेन रणे चरन्तम् ।
रामानुजं च सह शक्रजिता हसन्ति
हे दक्षिणानि दशकण्ठनियोग एषः ॥ २० ॥

कङ्कालकः । ता कीरउ विबोहविडम्बणाडम्बरो कुमारकुम्भकण्णस्स † ।

करङ्कः कथं पुनर्विबोधयितव्यः ।

कङ्कालकः । समन्तादवलोक्य । अअं अट्ठारहकुलविभेअविहिण्णो सेवासमागओ भुअङ्गमवग्गो ता इमस्सिं केवि गरिट्ठवरिट्ठे समादिस ‡ ।

करङ्कः । साधु सखे साधु महाभोगभोगयष्टिभिः संवेष्ट्य विबोधयितारः खल्वेते किञ्चिदुच्चैः ।

वक्षस्तक्षक ताड्यतां फणशतैस्त्वं वासुके नासिका-
रन्ध्रे रुन्धि निषेवतां श्रवणयोः कर्कोटकिः कोटरे ।
कालः कालियपन्नगश्च कुरुतां कण्ठे कठोराञ्छनं
लङ्केन्द्रानुज एष येन विहरेद्विद्राणनिद्रारसः ॥ २१ ॥

रावणः । विहस्य किमेभिर्मृणालकोमलकायकाण्डैः प्रचण्डैरपि फणावद्भिर्वत्सस्य क्रियते ।

कङ्कालकः । अमहाभाअजणमणोरहा विअ वंझीभूदा फणिन्दा § ।

दक्षिणतो नेपथ्ये ।

यन्मातामहतो मयात्परिगतं मायारहस्यं मया
तत्सर्वं रचितं गतं विफलतामासाद्य तौ तापसौ ।
यः शिष्येण सता नु चापनिगमो लब्धः पितुस्तोषिता-
दाचार्याद्दशकण्ठतः किमपरं तस्यैष जातः क्षणः ॥ २२ ॥

रावणः । वत्स किं स्विद्यसे करुणामयस्य मायामयास्ते केलयो निष्करुणे पुनः कर्मणि वीराणां प्रथमोऽसि ।

---

* तथैव किं भण्यतां विराधविध्वंसनस्य कनिष्ठभ्राता लक्ष्मणः खल्वेषः । मृगाङ्कमण्डलेन समं जातस्य ततो न परिहीयन्ते गुणाः पीयूषस्य ।

† सुष्ठु खलु परिचितं भणसि निबिडनिद्रानन्दस्थितः कुमारः कुम्भकर्णः ।

* हंहो देव कथं त्वया संदेहदोलकमधिरोपितानि मार्तण्डपुलस्त्ययोः कुलानि ।

† तत् क्रियतां विबोधविडम्बनाडम्बरः कुमारकुम्भकर्णस्य ।

‡ अयमष्टादशकुलविभेदविभिन्नः सेवासमागतो भुजङ्गमवर्गः । तदस्मिन् कानपि गरिष्ठवरिष्ठान् समादिश ।

§ अमहाभागमनोरथा इव वन्ध्यीभूताः फणीन्द्राः ।

दुर्मुखः । देव किलिकिलाइअहणुमन्तविमाणो सज्जीकिदचण्डकोअण्डमण्डिअ पाणी कणिट्ठतावसो मेहणादस्स पुरदो भविअ वत्तुकामो वट्टइ *।

वामतः । कङ्कालकः । ता इमस्सिं केलिविमाणरअणट्टालअपेरन्तचरे गिरिन्दसंदोहे दसाणणदेवस्स अण्णा णिवेसीअदु †।

करङ्कः ।

संवाह्यौ सह्य पादौ तव तुहिनगिरे कर्म मर्मप्रबाधि
विन्ध्याद्रे रुन्धि रक्षो वलयतु मलयः पर्वतः सर्वतोऽङ्गम् ।
त्वं नेत्रे पारियात्राचल वलये करौ सज्जतां मन्दराद्रि-
र्निर्निद्रामुद्र एष प्रसरति समरे येन भोः कुम्भकर्णः ॥ २३ ॥

रावणः । विहस्य वत्सस्य कठोरे वपुषि पतितोत्पतिता अतिगरीयांसो गिरयः कन्दुकायन्ते ।

कङ्कालकः । अविद्धे विअ मोत्तिए तन्तुणा अकिअकज्जेण कुमारे बाहिरदो लुट्ठिअं महिहरचक्केण ‡।

दक्षिणतो नेपथ्ये ।

मायां मुञ्च गृहाण कौतुकरसं वीरप्रशस्ये रणे
स्वर्नारीजन एष नूतनपतिप्राप्त्या ऽस्तु बद्धोत्सवः ।
मद्बाणाः खरदूषणत्रिशिरसां सैन्योपमर्दादमी
रक्षःशोणितपानलम्पटमुखास्त्वत्तोऽपि वाञ्छन्त्यसृक् ॥ २४ ॥

रावणः । अये कुमारमेघनादोचितवचनदुर्मुखो लक्ष्मणः । तदेनं वत्स, एव शिक्षयिता ।

पुनर्नेपथ्ये । सुमित्रापुत्र स्वशस्त्रकथामारभसे कः पुनस्तव शस्त्रग्रहणे ऽधिकारः ।

धीमान्हनुमानयमिति स्तुवता जनेन
न्यासीकृता ननु सनिर्वृति यत्र दाराः ।
तस्यच्छलादपि परापहृतेषु तेषु
कुक्षत्रियप्रहरणानि विडम्बनाय ॥ २५ ॥

सुमुखः । नेपथ्याभिमुखमवलोकितकेन किमाह लक्ष्मणः । रेरे ब्रह्मराक्षस वीरजनमर्यादानभिज्ञोऽसि यदप्रतीकारे कर्मणि प्रहरणानि विडम्बनाय विपरीते पुनर्मण्डनाय ।

रावणः । अहो धृष्टता मानुषस्य यत्कुमारमेघनादेन सह वीरव्रतचर्यायामुक्तिप्रत्युक्तिभिर्भाषिता ।

* देव किलिकिलायितहनूमद्विमानः सज्जीकृतकोदण्डपाणिः कनिष्ठतापसो मेघनादस्य पुरतो भूत्वा वक्तुकामो वर्तते ।

† तदस्मिन् केलिविमानरत्नाट्टालकपर्यन्तचरे गिरीन्द्रसंदोहे दशाननदेवस्याज्ञा निवेश्यताम् ।

‡ अविद्ध इव मौक्तिके तन्तुनाऽकृतकार्येण कुमारे बहिस्तो लुलितं महीधरचक्रेण ।

कङ्कालकः । अन्यतोऽवलोक्य । एदे गुरुगलन्तदाणवारिपक्खालिअगण्डमण्डला गलगुहाकुहरणिरग्गलणिग्गलन्तगुलुगुलारवा दिक्करिणो ता इमे समादिस *।

करङ्कः ।

वप्रक्रियाक्रमकरालकरप्रहार-
पादावमर्दरहसोल्लिखनादि कर्म ।
दिग्दन्तिनः किमपि यद्गुणितं भवद्भि-
स्तत्कुम्भकर्णपरिबोधविधावुपाध्वम् ॥ २६ ॥

रावणः । युक्तमेवैतत् । जङ्गमानि दुर्गाणि दिक्करिणः ।

करङ्कः । देव दृश्यतां द्रष्टव्यम् ।

निस्तन्द्रैर्दिग्द्विपेन्द्रैर्युगपदधिगतैर्बोधनायाधिवक्षः
प्रारब्धे द्वन्द्वयुद्धे प्रचुरमदचयोच्चण्डगण्डैश्चतुर्धा ।
निद्रामुद्रां न मुञ्चत्यपि च घुरुघुराघोषगर्भोरुघोणा-
घूत्कारैर्घोरतारैः स्वपिति पिहितदृग्निर्भरं कुम्भकर्णः ॥ २७ ॥

कङ्कालकः । विहस्य तं कदं कुमारकुम्भकण्णे दिक्करिचक्कवालेण जं जम्माबहिरे पञ्चमतरङ्गुग्गारेहिं कीरइ †।

दक्षिणतो नेपथ्ये रेरे दुर्मुख मुखर लक्ष्मण ।

तं रामं कथयन्ति विक्रमधनं तन्मे मनाक्प्रीतये
तस्मिन् सङ्गरकेलिकर्म यदयं वीरप्रियो रावणिः ।
भ्रातृत्वेन तु तस्य लक्ष्मण कथं धैर्योद्धुरं चेष्टसे
दायादाश्च च रिक्थवत्क्व चन भो शौर्यक्रिया क्रामति ॥ २८ ॥

पुनस्तत्रैव ।

लङ्केश्वरेण यदि शङ्करपादमूले
लूत्वा शिरांसि भुवनाधिपतित्वमाप्तम् ।
तन्मेघनाद यदि किं तव सूर्यभक्तो
भास्वन्मणिर्ज्वलति किं स्फटिकोपलस्य ॥ २९ ॥

पुनस्तत्रैव रेरे विनोचनकुलपांसन केरलीसुत लक्ष्मल रणप्रवणं रावणयुवराजं इन्द्रजितमपि मां न जानासि तदेव ज्ञाप्यसे ।

पुनस्तत्रैव रेरे पुलस्त्यकुलकलङ्क सहोढासुत रामचन्द्रानुचरं लक्ष्मणमपि मां न जानासि तदेव ज्ञाप्यसे ।

सुमुखः । देव लङ्काधिपते तदित्यमन्योन्यमाक्षिपद्भ्यां पुलस्त्यककुत्स्थकुलकुमाराभ्याम् ।

उच्चालनीलनलिनानि नभोह्रदस्य
दूताः समित्परिगमाय चमूकटाक्षाः ।

* एते गुरुगलद्दानवारिप्रक्षालितगण्डमण्डला गलगुहाकुहरनिरर्गलनिर्गलद्गुलुगुलारवा दिक्करिणस्तदिमान् समादिश ।

† तत् कृतं कुमारकुम्भकर्णे दिक्करिचक्रवालेन यज्जन्मबधिरे पञ्चमतरङ्गोद्गारैः क्रियते ।

आभ्यां परस्परमपि प्रहिताः कृतान्त-
केलीशकुन्तय इमे विशिखाः सहस्रम् ॥ ३० ॥

वामतः । कङ्कालकः । करङ्कं प्रति ता अण्ण केवि समादिस * ।

करङ्कः । भवतु रावणावरजविबोधनाय भगवन्तं सपरिवारं भर्गमभ्यर्थये । सप्रश्रयम् ।

हेरम्बः कण्ठगर्जं रचयतु मुरजानादृतो हन्तु नन्दी
चण्डी चण्डाट्टहासं किरतु डमरुकं ताडयत्विन्दुमौलिः ।
येनाकाण्डप्रबोधप्रभवगुरुतरक्रोधदीप्तारुणाक्षः
संग्रामग्रामलुण्ठोद्भटभुजपरिघो जायते कुम्भकर्णः ॥ ३१ ॥

रावणः । साधु भोः साधु सुषुप्तस्यापि महाविनदः प्रतिबोधहेतुः किं पुनर्विबोधोपचारा वत्से सावित्रे महसीव सर्वतेजांसि प्रलीयन्ते ।

कङ्कालकः । स्वगतम् । विबोहीअइ कुमारो जइ सलिले सिलाहिं उत्तरीअइ अलाबूहिं वा णिमज्जीअइ † ।

दक्षिणतो दुर्मुखः । देव लङ्कापरमेसर कुमारमेहणाअं लक्खणं अ अणुवदन्ताणं रक्खसवाणखलाणं भीसणभीसणं वट्टइ ‡ ।

सुमुखः । देव सुभीषणमेव वर्त्तते । पश्य ।

युद्धोर्वीप्लवदृष्टमग्नैः कुवलयसरसां सूत्रिता पत्रिभिः श्री-
र्नाराचैः पाशबन्धागतभुजगभयं लम्भिता वानरेन्द्राः ।
भल्लैस्तिर्यक्पतद्भिश्चलितचिमर्चयिनो दर्शिताः सादिमार्गाः
प्राप्ताश्च द्राक् तुरग्रैर्वियति नखतुला वीरवक्त्राब्जलावैः ॥ ३२ ॥

दुर्मुखः । देव पेक्ख ।

कोअण्डचक्ककरवालकिवाणधेसु
मल्लत्तणक्कमणिवेसिदसङ्गरेसु ।
वीरेसु पेक्ख णिवडन्ति समं पहारा
वेएणादिव्वतरुणीणअफुल्लमाला § ॥ ३३ ॥

वामतः । कङ्कालकः । सविषादं कहं पुण एअं भविस्सदि ‖ ।

करङ्कः ।

हे कामिन्यः कनककलशीपीवराभ्यां स्तनाभ्यां
गाढाश्लिष्टं रचयत लसद्दोर्लताः कुम्भकर्णम् ।
कामक्रीडानिबिडरचितः सेवितः स्वर्वधूभि-
र्जेयेतायं त्रिभुवनजयी येन निद्रादरिद्रः ॥ ३४ ॥

रावणः । विलोक्य सहर्षं कथं विबुद्धो मे वत्सः ।

करङ्कः । विबुद्धः कुम्भकर्णो यातश्च तापसाभ्यर्णम् ।

दुर्मुखः ।

एक्केहिं चण्डखग्गावडणविहडिदुट्टङ्कसीसावमुक्के
हुंकारे रोसहेलावलिअभडचमूलोअणिब्भच्छिएहिम् ।
अण्णेहिं दिव्वणारीणिबिडभुअलयाबद्धकण्ठेहिं देहिं
देहेहिं पेक्खजाआ समरमरणिणो तक्खणं वीरलक्खा * ॥ ३५ ॥

करङ्कः । वामतो नेपथ्याभिमुखमवलोक्य विबुद्धः कुम्भकर्णः परिजनादुपलब्धवृत्तान्तः किमाह ।

सूते नान्य जगति जननी तादृशं पुत्ररत्नं
रामो यादृग्लवणजलधौ सेतुसीमन्तकारः ।
शङ्के शङ्कां वहति च ततो राक्षसेन्द्रोप्यकाण्डे
निद्राभङ्गः कथमितरथा कारितः किङ्करैर्मे ॥ ३६ ॥

विचिन्त्य । तदश्रुतमेवैतत् प्रकृतिरोपणेन रावणेन वचनमास्तां मा कदा चन बिभीषणवृत्तान्तः स्यात् । प्रकाशम् । किमाह कुम्भकर्णः ।

आस्तां धनुः किमपि नापरतो भुशुण्डी-
चक्रैरलं भवतु पट्टिशमुद्गरौघैः ।
धावत्प्लवङ्गपृतनाकवलक्रमेण
प्राप्स्याम्यहं सुहिततां च रिपुक्षयं च ॥ ३७ ॥

रावणः । साधु वत्स साधु सत्यं मदनुजोऽसि ।

दुर्मुखः । देव उप्पडिओ कुमारमेहणादस्स रहो † ।

सुमुखः ।

निश्चक्रचीत्कृतिरलब्धमहीतलत्वात्
क्षुण्णाम्बुदोदरपयोमयगर्भसारः ।
धूस्तुण्डघट्टनविवर्त्तितऋक्षलक्षः
पुत्रस्य ते गगनमुत्पतितो रथोऽयम् ॥ ३८ ॥

दुर्मुखः । पभञ्जणणन्दणोवि वाणरिन्दो अणुप्पडिओ मेहणादस्स रहवरं ‡ ।

सुमुखः ।

मेघोदरद्रुतपरिप्लुतमोचिताम्भाः
संस्तभ्यसप्रतुरगानरुणेन दृष्टः ।

---

* तदन्यान्कानपि समादिश ।

† विबोध्यते कुमारो यदि सलिले शिलाभिरुत्तीर्यतेऽलाबूभिर्वा निमज्ज्यते ।

‡ देव लङ्कापरमेश्वर कुमारमेघनादं लक्ष्मणं चानुवर्तमानानां राक्षसवानरखलानां भीषणभीषणं वर्तते ।

§ देव पश्य ।
कोदण्डचक्रकरवालकृपाणधेषु
मल्लत्वकर्मनिर्वेशितसङ्गरेषु ।
वीरेषु पश्य निपतन्ति समं प्रहारा
वेगेन दिव्यतरुणीनवफुल्लमाला ॥

‖ कथं पुनरेतद् भविष्यति ।

* एकैश्चण्डखड्गापतनविघटितोट्टङ्कशीर्षावमुक्ते
हुङ्कारे रोषहेलावलितभटचमूलोकनिर्भर्त्सितैः ।
अन्यैर्दिव्यनारीनिबिडभुजलताबद्धकण्ठैर्द्वयैः
देहैः पश्य जाताः समरमरणिनस्तत्क्षणं वीरलक्षाः ।

† देव उत्पतितः कुमारमेघनादस्य रथः ।

‡ प्रभञ्जननन्दनोऽपि वानरेन्द्रोऽनूत्पतितो मेघनादस्य रथवरम् ।

वैमानिकैः स्तुत इतः चणमुक्तमार्गः
सौमित्रिणा सह खमुत्पतितो हनूमान् ॥ ३९ ॥

वामतः करङ्कः ।

दिग्मातङ्गैः कमठपतिना भोगिभर्त्रा च शङ्के
कृत्वा रुद्धां कथमपि धृता दूरतन्वी धरित्री ।
स्वप्राग्भागस्थगितगगने कुम्भकर्णे विनिर्या-
त्युच्चैर्नीतो दिनमणिरथस्त्रस्यता चारुणेन ॥ ४० ॥

नेपथ्ये । कः कोऽत्र भोः विज्ञाप्यतां देवो दशकण्ठस्तदिदं तवानुजः प्रतिजानीते ।

सीताप्रियं च दलितेश्वरकार्मुकं च
वालिद्रुहं च रचिताम्बुधिबन्धनं च ।
रक्षोहणं च विजिगीषुविभीषणं च
रामं निहत्य चरणौ तव वन्दिताहे ॥ ४१ ॥

रावणः । साधु वत्स कुम्भकर्ण साधु कथमन्यथा समरसीमनि रावणस्त्वत्प्रवणः ।

दक्षिणतो नेपथ्ये । सुमुखः । देव दृश्यतां क्षत्रियतापसव्यवसायः ।

पौलोमीकुचसिचयं हठेन हृत्वा
यः क्लृप्तो नृहरिसटौघचामराङ्कः ।
त्वत्सूनोः शिखिरथकेतने च तस्मिन्
सौमित्रेः सपदि पतन्ति बाणदण्डाः ॥ ४२ ॥

पुनरवलोक्य । साधु भोः कुमारमेघनाद साधु साधु संक्रान्तकार्मुकोपनिषदाचार्याद्दशकण्ठतोऽसि ।
देव पुलस्त्यनन्दन ।

यन्मङ्गले स्नपितमञ्जनयाऽऽर्द्रनेत्र्या
यन्मारुतश्च परिचुम्बति कौतुकेन ।
न्यस्तः शरः शिरसि तत्र हनूमतोऽस्य
पुत्रेण ते रभसलङ्घितसागरस्य ॥ ४३ ॥

रावणः । तर्हि प्रतिकृतो लङ्कादाहपरिभवः कुमाराक्षवधपरिभवश्च वत्समेघनादेन ।

सुमुखः ।

यावूर्मिलापतिरयं च तवात्मजश्च
बाणोत्करान् विकिरितो रचितान्धकारान् ।
तेऽन्योन्यखण्डनवशाद्विफलीभवन्ति
रत्युत्सवे बधिरयोरिव कण्ठनादाः ॥ ४४ ॥

वामतः कङ्कालकः । किं पुण एस विडम्बिअहेरम्बगलगुञ्जारवो विणिज्जिदसङ्करकरप्फालिअगड्डुमरडमरुअकोलाहलो कुण्ठिअवेउण्ठसूयरघोरघक्कारप्पसरो णिउञ्जिअणरसिंहमुक्कपुक्कलवुक्कारवइअरो असेससद्दसंमद्दो सुणी अइ * ।

करङ्ककः । कर्णौ पिधाय देव यथाऽभिहितं कङ्कालकेन ।

कुर्वंचुत्कर्णतालान् दिशिदिशि करिणो धौर्जटीनां जटानां
बन्धाहिग्रन्थिमुद्रां सपदि शिथिलयन् खण्डितोपेन्द्रनिद्रः ।
कुन्दानो नन्दिवाद्यं मुरजमुखरतं भुग्नविश्वप्रमोदो
रोदोरन्ध्रं निरुद्धं प्रसरति किमिदं निष्ठुरज्यानिनादः ॥ ४५ ॥

रावणः । जाने वत्सस्य साम्मुख्यं भजता ज्याबन्धबन्धुरितं धनुरास्फालितं ज्येष्ठतापसेन ।

दक्षिणतो नेपथ्ये । सुमुखः । गगनाङ्गणचारिणोरुभयोरपि सायकैर्विचित्रमाचेष्टितं तथाहि ।

अमी पुरोऽभ्राणि विभिद्य पत्रिणः
प्रयान्ति धारासलिलैः सह क्षितिम् ।
वहन्त्यथैतानि च पश्य विश्वतः
पृषत्करन्ध्रैः स्थितयोरनुक्रियाम् ॥ ४६ ॥

अपि च । अत्रान्तरिक्षकुक्षौ निरन्तरे शरव्यतिकरे ।

अन्तर्धाय परिक्रमन्ति सभियः सिद्धाः प्रसिद्धा अमी
नात्यर्थं च सुधाभुजो वयमिति त्रस्यन्ति नाकौकसः ।
दारानन्तरयद्भिरात्मवपुषा नष्टं च विद्याधरै-
रभ्यस्यन्ति च काण्डवारणकरां विद्यां गणश्रेणयः ॥ ४७ ॥

वामतः कङ्कालकः । कहं परिअणसमप्पिअं प्पहरणसंदोहमवमण्णिअ पसरिओ कुम्भकण्णो † ।

करङ्कः । किमाह कुम्भकर्णः । आस्तां धनुरित्यादि पठति ।

रावणः । साधु वत्स साधु सत्यं मदनुजोसि तदुद्धृतं रावणहृदयशल्यम् ।

दुर्मुखः । हाहा किं एअं वट्टइ जदो सव्वदो सदसहस्सलक्खसंखा पज्जलन्ति हुयवहा जहं अ अञ्जणगिरिकुडविअडो पसरइ धूमुप्पीडो मेरुसिहरदीहरसिहाघट्टाविसट्टन्ति जालाओ सञ्झारविमण्डलपज्जलङ्गाविप्फुरन्तिप्फुलिङ्गा ‡ ।

रावणः ।

अनेन लङ्का यदकारि मत्पुरी
हनूमतो गात्रगतेन भस्मसात् ।

* किं पुनरेष विडम्बितहेरम्बगलगुञ्जारवो विनिर्जितशङ्करकरास्फालितोड्डामरडमरुककोलाहलः कुण्ठितवैकुण्ठसूकरघोरघूत्कारप्रसरो निकुञ्जितनरसिंहमुक्तपुष्कलबुक्कारव्यतिकरोऽशेषशब्दसंमर्दः श्रूयते ।

† कथं परिजनसमर्पितं प्रहरणसंदोहमवमत्य प्रसृतः कुम्भकर्णः ।

‡ हाहा किमेतद् वर्तते । यतः सर्वतः शतसहस्रलक्षसङ्ख्याः प्रज्वलन्ति हुतवहा यच चाञ्जनगिरिकूटविकटः प्रसरति धूमोत्पीडो मेरुशिखरदीर्घशिखासंघा विसर्पन्ति ज्वालाः संध्यारविमण्डलप्रज्वलाङ्गा विस्फुरन्ति स्फुलिङ्गाः ।

निजापराधप्रशमाय तद् ध्रुवं
निषेवितुं मामयमेति पावकः ॥ ४८ ॥

सुमुखः । देव पदातिलवस्तु सुमुखो ऽभिमन्यते लक्ष्मणद्विधत्तया कुमारमेघनादेन प्रहितमाग्नेयमस्त्रं तत एष भुवनाप्लोषः । अङ्गुल्या निर्दिशन् ।

सद्यः सिञ्चति विष्टराम्बुजमयं देवः श्रुतीनां कवि-
स्तारान्तःपुरवानुपैति गगनाच्चन्द्रो जलार्द्रावृतः ।
गङ्गा च द्युमणेः सुता च सरितावन्योन्यमाश्लिष्यतः
किंचास्त्रानलडम्बरे करिमुखः क्षीराब्धिमाधावति ॥ ४९ ॥

अपिच ।

दुग्धाब्धेः क्वथनाविलं तत इतो धत्ते पयः पिण्डतां
शैलेन्द्रः प्रविलीनकृत्स्नतुहिनः पाषाणशेषः स्थितः ।
सान्द्राभिः करकाश्मवृष्टिभिरमी गर्भं क्षरन्त्यम्बुदाः
प्लोषार्तिं च समश्नुते रविरपि स्वाहापतेः पत्रिभिः ॥ ५० ॥

वामतः कङ्कालकः । देव पेक्ख दाव दावसभुवदण्डकोअण्डप्फालणाणन्तरं परिहरिअ पहरणाइं रहसुम्मुलिदतमालमालं सहत्थब्भामिदपहरणसज्जसज्जं समुहागदहिन्तालतालं दूरुल्लासिदकुसुमपाडलपाडलं गअणन्दोलिदविसालसालं रहसुच्छलिदपडन्तकेसरकेसरं गहिदसव्वङ्गसरलसरलं लोलिदकुसुमसंदणसंदणं पअट्टुध्धरिद सव्वंसव्वंसं पअण्डकरकलिदपलासपलासं करजुअलबन्धरअवसपउन्तपीपलपीपलं णिसग्गकठिणकक्करकक्करं णहप्पहारुक्खाअपत्थरपत्थरं पहरणीकदपडन्तगण्डगण्डसेल्लं सम्मुहोच्छुलिदं प्पहाप्पबलं वाणरबलम् * ।

रावणः । का पुनरमीभिर्गणना शलभायन्ते कुम्भकर्णे वानरबलानि ।

दक्षिणतो दुर्मुखः । किं पुण एदं दसदिसापसरिदचउस्समुद्दं विअ जलअन्ताअन्तगिरिन्दसंदोहं विअ सलिलीभूदगअणवलअं विअ वारिसिद्धिमेत्तपअट्टप्पआवइवावारं विअ भुवअणब्भन्तरं वट्टदि † ।

सुमुखः । एवमेवैतत् ।

* देव प्रेक्षस्व तावत् तापसभुजदण्डकोदण्डास्फालनानन्तरं परिहृत्य प्रहरणानि रभसोन्मूलिततमालमालं स्वहस्तभ्रामितप्रहरणसज्जसर्जं संमुखागतहिन्तालतालं दूरोल्लासितकुसुमपाटलपाटलं गगनान्दोलितविशालशालं रभसोच्छलितपतत्केसरकेसरं गृहीतसर्वाङ्गसरलसरलं लोलितकुसुमस्यन्दनस्यन्दनं प्रयत्नोद्धृतसर्वांशवंशं प्रचण्डकरकलितपलाशपलाशं करयुगलबन्धरयवशपतत्पिप्पलपिप्पलं निसर्गकठिनकर्करकर्करं नखप्रहारोत्खातप्रस्तरप्रस्तरं प्रहरणीकृतपतद्गण्डगण्डशैलं संमुखोच्छलितं प्रहारप्रबलं वानरबलम् ।

† किं पुनरेतद् दशदिशाप्रसृतचतुःसमुद्रमिव जलयन्त्रायमाणगिरीन्द्रसंदोहमिव सलिलीभूतगगनवलयमिव वारिसिद्धिमात्रप्रवृत्तप्रजापतिव्यापारमिव भुवनाभ्यन्तरं वर्तते ।

न्यस्यत्कान्तिं हुतवह इव स्वर्गपद्माकराणां
ज्वालाधौतान्यपि विशदयन्नभ्रशैलांशुकानि ।
रिक्ताभ्राणां भरणकरणं स्थान एव स्थितानां
किं नामायं प्लवयति पुरो रोदसी वारिपूरः ॥ ५१ ॥

रावणः । विचिन्त्य सेयमनभ्रवृष्टिः । विमृश्य भवतु ज्ञातम् ।

लक्षीकरोमि वरुणं न शरावलीनां
वार्यन्त्रतां व्रणशतैर्यदयं बिभर्ति ।
मोक्तुर्महाकरुणयेत्युपकारिणो मे
सीतावियोगदवथुं स हि मार्ष्टि वृष्ट्या ॥ ५२ ॥

सुमुखः । अहं पुनर्जाने चैत्रभानवमस्त्रमवजेतुं वारुणबाणप्रवणो लक्ष्मणः ।

कङ्कालकः । अध तत्थ केवि कइणो कुम्भअण्णस्स चण्डिलणहसिहरेहिं खण्डिदकआ वराहा विअ पाएसु पडन्ति उपणिमन्तिणोव्व जङ्घासु लग्गन्ति पुरिसकडिलग्गपडव्व ऊरूसु भव्वन्ति अस्सवारकरवालव्व णिअम्बबिम्बे दोलन्ति सुअणव्व मज्झत्था होन्ति विहुरकुडुम्बव्व पासेसु चिट्ठन्ति तरुणीथणव्व वच्छत्थले वित्थरन्ति वेणिदण्डव्व पुट्ठिट्ठाणे घोलन्ति चिरमिलिअबन्धवव्व कण्ठे लग्गन्ति कवोलगलिअजलबिन्दुव्व चिवुअग्गे ललन्ति चुम्बणरसिअव्व अहरं पीडअन्ति सुरहिपरिमलव्व जहिच्छं णासाविवरेसु सञ्चरन्ति सुहासिअव्व कण्णेसु पइसन्ति सिविणअव्व अच्छीसु लम्बन्ति प्पट्ठाणतिलअव्व भाले विप्फुरन्ति णीचव्व समालम्बिदा सीसे समारुहन्ति भुअङ्गाव्व केसग्गाहे अहिरमन्ति * ।

रावणः । अथ प्लवङ्गयूथपतिषु किं कुरुते कुम्भकर्णः ।

कङ्कालकः । तदो तेण ताणं मज्झे केवि हदा पादेहिं कुप्परिदा कुप्परपहारेहिं कीलिदा कीलेहिं सक्करीकदा करसंपुडुप्पीडणेण अप्फालिदा तलप्फालेहिं चप्पडिदा चवेडाहिं णिव्वाविदा मुट्ठीहिं वथिदा अ चलणेहि † ।

कङ्कालकः । एवमेवैतत् ।

* अथ तत्र केऽपि कपयः कुम्भकर्णस्य चण्डिलनखशिखरैः खण्डितकचा वराहा इव पादयोः पतन्ति उपनिमन्त्रिता इव जङ्घासु लगन्ति पुरुषकटिलग्नपटा इवोर्वोर्भवन्ति अश्ववारकरवाला इव नितम्बबिम्बे दोलन्ति सुजना इव मध्यस्था भवन्ति विधुरकुटुम्बा इव पार्श्वयोस्तिष्ठन्ति तरुणीस्तना इव वक्षस्थले विस्तरन्ति वेणीदण्डा इव पृष्ठस्थाने घूर्णन्ति चिरमिलितबन्धव इव कण्ठे लगन्ति कपोलगलितजलबिन्दव इव चुबुकाग्रे ललन्ति चुम्बनरसिका इवाधरं पीडयन्ति सुरभिपरिमला इव यथेच्छं नासाविवरयोः संचरन्ति सुभाषितमिव कर्णयोः प्रविशन्ति स्वप्ना इवाक्ष्णोर्लम्बन्ते प्रस्थानतिलका इव भाले विस्फुरन्ति नीचा इव समालम्बिताः शीर्षं समारोहन्ति भुजङ्गा इव केशग्रहे ऽभिरमन्ते ।

† ततस्तेन तेषां मध्ये केऽपि हताः पद्भ्यां कूर्परिताः कूर्परप्रहारैः कीलिताः कीलैः शर्करीकृताः करसंपुटोत्पीडनैरास्फालितास्तलास्फालैश्चिपिटीकृताश्चपेटाभिर्निर्वापिता मुष्टीभिर्व्यथिताश्च चरणाभ्याम् ।

मुष्ट्या पिनष्टि सुदृढैश्च तलैस्तृणेढि
पद्भ्यां निशुम्भति करेण च हन्त हन्ति ।
तूर्णं च कर्णमतिकुर्प्यति कूर्प्पराभ्या-
मस्त्रायितावयव एष तवानुजन्मा ॥ ५३ ॥

सुमुखः । जलपीडापगममभिनीय देव दिष्ट्या युगपत्स्वपरबलविनाशशङ्कितेन सौमित्रिणा संहृतं वारुणमस्त्रं तथाहि ।

ज्वालापल्लवितो भवत्यतितरां नाद्याप्ययं पावकः
संवृत्तो रणरेणुधूसरवपुः स्नात्वा रविर्भास्वरम् ।
शान्तः स्थाणुविलोचने च विषमच्छात्कारनादो महान्
प्रक्षाल्याम्बरमुर्वरां च विरते दिव्यास्त्रजे वारिणि ॥ ५४॥

वामतः करङ्कः ।

नासारन्ध्रनिरोधतः श्रवणयोश्छिद्रद्वयाच्छादना-
च्चक्षुःसंपुटघट्टनान्मुखमहाव्यादानसंकोचनात् ।
दोर्मूलद्वयपीडनाच्च कुरुते क्रुद्धस्तवात्रानुजो
दिङ्नातङ्गपराक्रमानपि कपीन् हाहारवस्यास्पदम् ॥५५॥

अपि च लङ्कापते पौलस्त्य ।

धुतानां भवतो भ्रात्रा कपीनां तनुकम्पतः ।
रोमावलम्बनभ्रष्टा विनष्टाः पञ्च कोटयः ॥ ५६ ॥

दक्षिणतो दुर्मुखः सत्रासं । किं पुण बहलतेल्लकज्जलविदकज्जलविल्लिदं विश्र तरुणताविच्छरिच्छोलिच्छणं विश्र ससलिलजलश्रजालमालिदं विश्र सिदिकण्ठकण्ठप्पहापिहिदं विश्र अवणुण्णनाराअणकन्तिसव्वस्सं विश्र जममहिसविसाणेहिं क्खिण्णं विश्र हेरम्बदाणकद्दमकरम्बिश्रं विश्र भुवणङ्गणं वट्टदि * ।

रावणः । ननु क्व पुनस्तमस्काण्डैकचण्डो मार्तण्डो वर्तते । विचिन्त्य विहस्य च ।

आराममपलक्ष्मणं भुवनमद्य निर्वानरं
विधाय शरवीथिभिर्नियतमिन्द्रजिद्रोपितः ।
जिघांस्यति स मां गुरुं रघुभुवामितीव क्वचि-
द्भिया दिनकरे गते त्रिजगदेतदन्धं स्थितम् ॥ ५७ ॥

भूयो विहस्य तदहो दिनकरः क्व न दृश्यते वत्समेघनादस्य ।

दक्षिणतः सुमुखः। देव पदातिलवस्तु सुमुखो मन्यते। रणाङ्गणचारिणो वैरिणोऽन्धीकरणकारणतामिस्रमस्त्रमवतारितं युवराजेन्द्रजिता यतः ।

चक्रद्वन्द्वैर्विरहकलनाकातरैर्दीनदृष्टो
दत्तोत्सुक्यः कुवलयदृशां साभिसारव्रतानाम् ।

* किं पुनर्बहलतैलमिश्रितकज्जलविलिप्तमिव तरुणतापिच्छकान्तिच्छन्नमिव ससलिलजलदजालमालितमिव शितिकण्ठकण्ठप्रभापिहितमिवावनुन्नारायणकान्तिसर्वस्वमिव यममहिषविषाणाभ्यां कीर्णमिव हेरम्बदानकर्दमकरम्बितमिव भुवनाङ्गणं वर्तते ।

दृग्दैर्घ्यं विदधदधिकं हस्तहार्यान्धकारो
राजावर्तद्रुतिविरचितां क्ष्मां च खं चातनोति ॥ ५८ ॥

वामतः कङ्कालकः । तधा श्र दृढदहिज्जन्तकलेवरं जज्जरिज्जन्तमवलोइश्र पवङ्गवग्गं पधाविदो समं दलिदञ्जणणीलेण णीलेण रहसुग्गीवो सुग्गीवो किदा श्र सरलीकदभुश्रदण्डमण्डले सुवेलसेलमूलादो उप्पाडिश्र णिज्झरजम्बालपिच्छिला सिला * ।

करङ्कः । यथाऽभिहितं कङ्कालेन ।

अन्धीनितम्बफलकस्य नरोत्तमानां
वक्षःस्थलस्य च दधत्युपमानमुद्राम् ।
भ्रातुस्तवात्र हृदि साहसकेलितल्पे
प्रक्षिप्यते हरिनरेण शिलेयमुर्वी ॥ ५९ ॥

रावणः । विहस्य तदिदं मृणालकाण्डेन गण्डशैलताडनम् ।

करङ्कः । कथं क्षिप्तैव । रावणमुद्दिश्य ।

संग्रामभीषणबिभीषणपूर्वजस्य
मुष्ट्या दृढं शकलिताद्य तथा शिलेयम् ।
खण्डं यथा पतति मेदुरमुर्वरायां
दृष्टं तदम्बुजपरागकणप्रमाणम् ॥ ६० ॥

रावणः । विहस्य त एवं वर्ण्यन्ते येभ्यः कुप्यति कुमारकुम्भकर्णः ।

दक्षिणतो दुर्मुखः । अच्छरिश्रं किं पुण एदे णासन्तणीरन्धन्धश्रारा प्फुरन्तससिकन्तमणिणो विसट्टन्तकन्दोट्टवलश्रा संप्फुडिदपुडइणीकुसुमा सरसाश्रमाणपाणगोट्ठिणो णिट्ठविज्जन्तमाणंसिणीमाणा निसिज्जन्तवम्महसिलीमुहा भमन्तमअणुमत्तकामिणीसत्था दिउणरोवाविदविरहिणीणश्रणा तिउणहरिसाविदवल्लहसङ्गदङ्गणा चउग्गुणपच्छाविदपरिहरिश्रपिश्रप्पसाश्रणप्पणामा पञ्चउणपश्रदाविदसुरश्रमोहिदमिहुणा श्र समन्तदो मिश्रङ्का वट्टन्ति † ।

रावणः । सोल्लासमाकाशे। भोः सेवाविदग्ध सुधादीधिते जानासि लङ्केश्वरमाराधयितुम् ।

सदा दिगन्तस्थितसान्द्रचन्द्रिकाः
सुखाय नक्तञ्चरचक्रवर्तिनः ।

* तथा च दृढदह्यमानकलेवरं जर्जरितमवलोक्य प्लवङ्गवर्गं प्रधावितः समं दलिताञ्जननीलेन नीलेन रभसोद्ग्रीवः सुग्रीवः कृता च सरलीकृतभुजदण्डमण्डले सुवेलशैलमूलादुत्पाट्य निर्झरजम्बालपिच्छिला शिला ।

† आश्चर्यं किं पुनरेते नाशितनीरन्ध्रान्धकाराः स्फुरच्छशिकान्तमणयो विकसत्कमलवलयाः संस्फुटितकमलिनीकुसुमाः सरसायमानपानगोष्ठ्यो निस्तापितमनस्विनीमाना निषिध्यमानमन्मथशिलीमुखा भ्रमन्मदनोन्मत्तकामिनीसार्था द्विगुणरोदितविरहिणीनयनाः त्रिगुणहर्षितवल्लभसंगताङ्गनाश्चतुर्गुणप्रच्छादितपरिहृतप्रियप्रसादनप्रणामाः पञ्चगुणप्रकटितसुरतमोहितमिथुनाश्च समन्ततो मृगाङ्का वर्तन्ते ।

इति स्थितोऽयं बहुभिः स्वमूर्तिभि-
र्दिवाऽपि मां शीतरुचिर्निषेवितुम् ॥ ६१ ॥

सुमुखः । देव चिन्तयामि तामिस्रमस्त्रं तिरयितुं चान्द्रमसमायुधमाहूतं सुमित्रापुत्रेण यतः ।

कन्दर्पस्य प्रथमसुहृदः चीबयन्तोऽम्बुराशीन्
शेफालीनां धुतसुमनसो लीढभासश्चकोरैः ।
निर्यान्त्येते विशिखमुखतः पश्य राकामृगाङ्काः
पङ्कश्यामं तिमिरशिबिरं दूरमुत्सारयन्तः ॥ ६२ ॥

करङ्कः । देव शिलोद्दलनवैलक्ष्ये ।

उद्वेल्लितोरगजनोज्झितचन्दनेन
कर्पूरपादपसरद्रसनिर्भरेण ।
खण्डेन देव मलयस्य वलीमुखेन्द्रो
हेलोद्धृतेन निजिघांसति कुम्भकर्णम् ॥ ६३ ॥

रावणः । अहो मर्कटकीटस्याध्यवसायः ।

दक्षिणतो दुर्मुखः । रक्खसेसर पेक्ख णिअगहणसंकासङ्कुडन्तविम्बचन्दरविणो बहुराहुदंसणचमक्कन्तकामिणीदिण्णविसरणच्छिविच्छोहभग्गपल्लत्थङ्गुलीकिसलअसमुप्पोसिदा अप्पसरणवअणरन्तीसूइदा चमक्किदचन्दंतेउरवित्थरन्तविविहबहुबह्मघोसा भुवणुद्देसा दीसंति * ।

रावणः । सविमर्शम् ।

ममासुरस्य त्रिदशाः परं द्विषो
विबाधयिष्ये दशकन्धरेण तान् ।
इहेति मां राहुरयं सबान्धवो
रणेऽद्य पूर्वापचिकीर्षुरागतः ॥ ६४ ॥

आकाशे । स्वर्भानो मा भैषीः शरणार्थिनामभयकारणं रावणः ।

सुमुखः । शङ्के श्वैतांशवमायुधं बाधितुं राहवीयमस्त्रमिद्रमुदीरितं देवयुवराजेन यतः ।

रयचलितविमानैः स्वर्गिभिर्मुक्तमार्गा
ग्रहचरितविदां च व्यञ्जितातङ्कमुद्राः ।
ग्रहणशतसहस्रोल्लासनासूत्रधाराः
प्रतिशशि शितदंष्ट्रा राहवः संपतन्ति ॥ ६५ ॥

वामतः करङ्कः ।

अत्रान्तरे त्वदनुजेन धनुर्विधूय
संधानकर्मणि कृतश्च समीरबाणः ।

* राक्षसेश्वर प्रेक्षस्व निजग्रहणशङ्कासङ्कुचद्बिम्बचन्द्ररवयो बहुराहुदर्शनचमत्कृतकामिनीदत्तविसर्जितविक्षोभभग्नपर्य्यस्ताङ्गुलीकिसलयसमुत्पोषिता अप्रसन्नवदनरात्रिसूचिताश्चमत्कृतचन्द्रान्तःपुरविस्तरद्विविधबहुब्रह्मघोषा भुवनोद्देशा दृश्यन्ते ।

सार्धं महीध्रशकलेन सुवेलमूला-
द्दूरां निधौ निपतितः कपिचक्रवर्ती ॥ ६६ ॥

रावणः । सहर्षक्रोधं तर्हि सलिलेन्धने वह्नावाहुतीभूतः ।

करङ्कः ।

यावन्न पाणिमपि संवृणुते ऽनुजस्ते
यावन्न शाम्यति च धिक्करणं सुराणाम् ।
तावन्नियोद्धुमुदधेः प्रथमः कपीना-
मस्य स्थितस्तडिति ताडितदोः पुरस्तात् ॥ ६७ ॥

रावणः । स्वगतम् । वेगवत्तया वालिनमप्यतिशेते । विचिन्त्य प्रकाशम् । प्लुतिप्रधानैव वानरजातिः ।

दक्षिणतो दुर्मुखः । लङ्कापरमेसर पेक्खपेक्ख कोत्थुहमणिणिवेसलंच्छिदवच्छत्थलवणमालापालम्बचुम्बणागदद्दिव्वमहुअरमञ्जुगञ्जारवविकिण्णकण्णा गरुडप्पहापुञ्जपिञ्जरिदरोदसीगब्भवित्थारा णिज्जिददलिदिन्दीवरदामकन्तिणो आकण्णाकड्ढिअसारङ्गधारिणो मुरारिणो संचरन्ति * ।

रावणः । ससंमदम् ।

अयं हि सेव.ह्यचिताद्रमानसो
न वक्षसो मे कमलां हरिष्यति ।
इति स्वशक्त्या कृतमूर्तिविस्तरै-
रहोऽपि मां रञ्जयितुं समागतः ॥ ६८ ॥

आकाशे हंहो नारायण न प्रणतदारापहारी दशकण्ठः ।

सुमुखः । देव संभावयामि सैंहिकेयहेतिविहतये वैष्णवं प्रहरणमिदं विस्तारितं लक्ष्मणेन यतः ।

लक्ष्मीकण्ठग्रहणरसिकाः संचरत्पाञ्चजन्य-
ध्वानश्रेणीभरितककुभो दोर्भिरुच्चैश्चतुर्भिः ।
क्रामन्त्यन्तर्भुवनभवनं विष्णवो जिष्णवोऽमी
श्यामाश्चक्रग्रहरणनमद्राहुसंहारकाराः ॥ ६९ ॥

वामतः कङ्कालकः । पुरो भूदेण मग्गवत्तिणा वाणरवीरेण तक्खणसज्जिज्जंतकुम्भअण्णबाणा णामक्खिविअ खित्तं धरणिपिठ्ठे रोसभरविभत्तमञ्जिट्ठाए दिठ्ठीए दठ्ठूण देवकणिठ्ठेण मुक्का चक्कावली पअदिदा पट्टिसा पेसिदा दंसिदमारणवेअट्टी भुसुण्डी खित्ता णीसङ्कं सङ्कुमाला आक्खित्तं मोग्गरोम्मिणं उप्फेरिदपुलअफारपअक्कमेण कम्पाविदो करग्गलग्गो खग्गो वाणरचक्कवट्टिणा वि. परिहरिआउहक्कड्ढप्पेण णिउब्भं अब्भुवसिअ अप्फोडिद्दो भुअडण्डो किलिकिलिदं अ सद्दसंदोहभरिअभुअ-

* लंकापरमेश्वर प्रेक्षस्वप्रेक्षस्व कौस्तुभमणिनिवेशलाञ्छितवक्षःस्थलवनमालाप्रालम्बचुम्बनागतदिव्यमधुकरमञ्जुगुञ्जारवविकीर्णकर्णा गरुडप्रभापुञ्जपिञ्जरितरोदसीगर्भविस्तारा निर्जितदलितेन्दीवरदामकान्तय आकर्णाकृष्टशार्ङ्गधारिणो मुरारयः संचरन्ति ।

णन्तरं प्पधाविदाओ संदंसणकोदूहलफुल्लगल्लफलआओ सुरसुन्दरीओ समारूढो लङ्काउरीपाआरसिहरेसु णिसाअरजणो वसुधाणिवेसिदसिलासंघादेण वाणरलोएण पाससंठाविदविविहाउहेण अ रक्खसवग्गेण अ अङ्गीकदमुदासीणत्तणं तदो दो वि समं वणिअअलीणा मल्लजुज्झेण तहिं अ गाढअरं हत्थगाहं मग्गन्ति सिरेण सिरणिवेसिणो हुडुक्कविक्कमेण परिक्कमन्ति कक्खाबन्धविणिहितहत्था उच्छलन्ति भुअदण्डसंदंसेण कन्धरां धरन्ति जङ्घन्तरं कत्तरीहिं पीडन्ति कुक्कुडफ्फडप्पेहिं मिल्लन्ति डुक्करेहिं डुक्कन्ति अप्फोडतिरिच्छपाअप्पक्खेवेण केवलं करिसन्ति केसेसु ण णअणाइं हणन्ति ण णासावंसे पहरन्ति ण दलन्ति दन्तेहिं ण खण्डन्ति नखेहिं एदाणं च पडणुप्पडणेसु उप्पडन्ति सत्तसाअरा गलन्तगण्डसेला होन्ति कुलसेला दिक्करिकादरत्तणप्पमुक्कचिक्कारपूरिदा घुण्णदि वसुन्दरा पडिखो हणणमन्तधरित्तीभारवक्किदखन्धरो कम्पदि महाकुम्मो ता जुज्जदि देवस्स धणुग्गहो *।

रावणः । विहस्य का पुनरेषा द्वन्द्वयुद्धमर्यादा ।

दक्षिणतो दुर्मुखः । एदे पअट्टिदतरुणीविब्भमणच्चा सुसद्दीकदकादम्बरीपाणविहिदुम्मादा जुवदीकदजरदीजणा उपणीदकुसुमबाणप्पअरा विरहिणीकण्ठबड्ढिदपञ्चमतरङ्गा मिअङ्कबालमित्ता दूदीकददक्खिणसमीरणा सव्वदो संचरन्ति मदणा †।

रावणः । सहर्षम् ।

> यावन्ति लोकहृदयानि जगत्त्रये ऽत्र
> तावद्भिरनुगतो मदनैर्मनोभूः ।
> शम्भोर्भिया भगवतः शरणाय शङ्के
> मां रावणं समरचण्डभुजं प्रपन्नः ॥ ७० ॥

आकाशे । हे मकरध्वज मदनुग्रहेण मत्परिग्रहेण च न त्वां देवदेवोऽपि बाधिष्यते ।

सुमुखः । जाने वैष्णवमस्त्रं स्तम्भयितुं पौष्पकेतनमायुधमातन्यते मन्दोदरीनन्दनेन यतः ।

> चिह्नोत्सङ्गस्फुरितमकराः पुष्पधन्वान एते
> द्राक् तन्वन्तो मधुसहचरं पञ्चमं रागराजम् ।
> लक्ष्मीलीलाललितचरितैरच्युतान् वञ्चयित्वा
> श्वेतद्वीपं रतिरतिकृतो मन्मथाः प्रापयन्ति ॥ ७१ ॥

वामतः कङ्कालकः । सव्वङ्गसंङ्गदणिबिडणिपीडणापरव्वसगात्तपडन्तभुअबलेण गअणङ्गणे अन्दोलिअ कुमारकुम्भअण्णेण धरणिवट्ठे तडित्ति ताडिदो सुग्गीवो *।

रावणः । सहर्षम् । तर्हि मत्तकरेणुकरगतस्य कदलीकन्दस्य दशां लम्भितः ।

करङ्कः ।

> कक्षापञ्जरदात्यूहं कपीनां चक्रवर्तिनम् ।
> कृत्वा त्वदनुजो ऽभ्येति दिष्ट्या त्वं देव वर्धसे ॥ ७२ ॥

रावणः । स्वगतम् ।

> यदर्थितं प्राज्यबलेन वालिना
> विधाय दोर्मूलवशं दशाननम् ।
> तदुद्धृतं शल्यमनेन मानिना
> विधाय कक्षाकुहरे हरीश्वरम् ॥ ७३ ॥

कङ्कालकः । कुम्भअण्णकक्खन्तरगदं सुग्गीवमवलोइअ रहसभ्भणक्किअरसणाणेउरकेऊरं नच्चिदुं पडत्ताओ सअलविंदारअविन्दबन्दिसुन्दरीओ ता पेक्खदु देवो †।

रावणः । सहर्षम् ।

> किं शच्या परतो रतिर्धनपतेर्दूरे भवन्तु स्त्रिय-
> श्चन्द्रान्तःपुरमेतदस्तु च पृथक्कौबेरिणीपूत्सवः ।
> साकं शक्रजितः कलत्रनिवहैः सार्धं च दारैर्मम
> प्रीत्युल्लासितपाणिपल्लवयुगं मन्दोदरी नृत्यतु ॥ ७४ ॥

दक्षिणतो दुर्मुखः । किं पुण एदे ते पेक्खोल्लितखट्टङ्गा व्वहलपअट्टट्टहासा प्पसहमुक्कडक्कारडामरा णच्चन्तरहस्सुत्तालवेआला चमक्कंतसुरासुरपुरन्धिणो ललन्तच्चूडामणिचन्दखण्डा खलखलन्तवेल्लिदामरकल्लोलिणीपवाहा तडतडितिताडिडुडुमरडमरुअरवरोद्दा खणखणितिदाहिणमुहकुहरगम्भनिबिडमिलिद-

---

* पुरोभूतेन मार्गवर्तिना वानरवीरेण तत्क्षणसज्ज्यमानकुम्भकर्णबाणासनमाक्षिप्य क्षिप्तं धरणीपृष्ठे । रोषभरमञ्जिष्ठया दृष्ट्या दृष्ट्वा देवकनिष्ठेन मुक्ता चक्रावली प्रवर्तिताः पट्टिशाः प्रेषिता दंशितमारणपेशला भुशुण्डी क्षिप्ता निःशङ्कं शङ्कुमाला आक्षिप्तं मुद्गरोद्दार्णम् उत्प्रेरितपुलकस्फारपदक्रमेण कम्पितः कराग्रलग्नः खड्गः । वानरचक्रवर्तिनाऽपि परिहृतायुधकलापेन नियुद्धमध्यवस्यास्फोटितो भुजदण्डः किलकिलितं च शब्दसन्दोहभरितभुवनान्तरं प्रधाविताः सन्दर्शनकौतूहलफुल्लगल्लफलकाः सुरसुन्दर्यः समारूढो लङ्कापुरीप्राकारशिखरेषु निशाचरजनो वसुधानिवेशितशिलासंघातेन वानरलोकेन पार्श्वसंस्थापितविविधायुधेन राक्षसवर्गेण चाङ्गीकृतमुदासीनत्वम् । ततो द्वावपि समं वलितकनीनौ मल्लयुद्धेन तदा च गाढतरं हस्तग्राहं मार्गेते शिरसा शिरोनिर्वेशिनौ हुडुकविक्रमैः परिक्रामतः । कक्षाबन्धविनिहितहस्तावुच्छलतः । भुजदण्डसंदंशेन कन्धरां धरतः । जङ्घान्तरकर्त्तरीभ्यां पीडयतः । कुक्कुटस्पर्शैर्मिलतः । डुत्कारैर्डुत्कुरुतः । आस्फोटतिर्यक्पादप्रक्षेपेण न केवलं कर्षतः केशेषु । न नयने घ्नतः । न नासावंशे प्रहरतः । न दलतो दन्तैः । न खण्डयतो नखैः । एतयोश्च पतनोत्पतनेषूत्प्लवन्ति । गलद्गण्डशैला भवन्ति कुलशैलाः । दिक्करिकातरत्वप्रमुक्तचीत्कारपूरिता घूर्णति वसुन्धरा । प्रतिक्षोभणनमद्धरित्रीभारवक्रितकन्धरः कम्पते महाकूर्मः । तद्युज्यते देवस्य धनुर्ग्रहः ।

† एते प्रकटितनर्तकीविभ्रमनृत्याः सुस्वादीकृतकादम्बरीपानविहितोन्मादा युवतीकृतजरतीजना उपनीतकुसुमबाणप्रकरा विरहिणीकण्ठवर्द्धितपञ्चमतरङ्गा मृगाङ्कबालमित्रा दूतीकृतदक्षिणसमीरणाः सर्वतः संचरन्ति मदनाः ।

* सर्वाङ्गसङ्गतनिबिडनिपीडनापरवशगतः प्रचण्डभुजबलेन गगनाङ्गणे आन्दोल्य कुमारकुम्भकर्णेन धरणीपृष्ठे तडिति ताडितः सुग्रीवः ।

† कुम्भकर्णकक्षान्तरगतं सुग्रीवमवलोक्य रभसभ्रणत्कृतरशनानूपुरकेयूरं नर्त्तितुं प्रवृत्ताः सकलवृन्दारकवृन्दवन्दिसुन्दर्यः । तत्प्रेक्षतां देवः ।

जरठदाढा रोसफुक्कारपुल्लिदफणाभारहाराहिहारिणो पअण्ड-रूअधारिणो चण्डीसा संचरन्दि * ।

रावणः । सहर्षम् ।

मह्यं तदा धृतमुदा शशिशेखरेण
दत्तो वरो न शिरसां सदृशश्छिदा यः ।
तत्सांप्रतं स भगवान् कृतभूरिमूर्ति-
रभ्यागतः पुनरनुग्रहवाञ्छया माम् ॥ ७५ ॥

सुमुखः । देव संभावयामि कन्दर्पबाणविहतये खण्डपरशु-वमस्त्रमातन्यते तृतीयेन दाशरथिना यतः ।

ऊर्ध्वाचिक्रोडकुण्डोल्लसितहुतवहज्योतिरुन्मम्भणाभिः
कुर्वन्तो देहदाहं पुरमथनमनोन्माथिनां मन्मथानाम् ।
चूडाबद्धार्धचन्द्राश्चलसुरसरितो भूषिताः पन्नगेन्द्रैः
श्रीकण्ठाः श्यामकण्ठाः प्रणतसुरशताः साट्टहासाश्चरन्ति॥७६॥

रावणः। भगवन् भर्ग स्वल्पकण्ठवनच्छेदसाहसमनल्पःप्रसादः।

वामतो नेपथ्ये करङ्कः ।

वेगोत्खातान्त्रतन्त्रीचयचलचरणः सञ्चरद्दन्तयन्त्र-
प्रान्तग्रस्तोरुनासासरणिररुणदृक् क्षुभ्यतः कुम्भकर्णात् ।
लूनव्याकीर्णकर्णः खरनखशिखरैरेष शाखामृगेन्द्र-
स्त्वङ्गल्लाङ्गूलयष्ट्या तडतडिति शिरस्ताडयन् खं प्रपन्नः॥७७॥

रावणः । सविषादम् । अहो प्रमादः छलप्रहारित्वं वान-राणां नावधारितं वत्सेन ।

कङ्कालकः । एस सुग्गीवो कुमारकुम्भअण्णं विच्छिन्नम-वकरिअ गअणं उप्पअन्तो गदो ज्जेव्व तावससआसम् † ।

करङ्कः । कपिचक्रवर्तिचापलकोपितश्च मध्यमपौलस्त्यः समरसमारम्भमिव शरणं मन्यमानो लङ्कापुरीगोपुरादुपावृत्तः सं-मुखीभूतश्चास्य सकलवाहिनीपरिवृतः स्वयमेव तापसः ।

कङ्कालकः । पुरदो ऽवसरिअ चउद्दिसंपरिवुदो वानरसेणाव-दीहिं तस्स पुरदो जम्बवन्तमणिमन्तमहामुहदुस्सहप्पहुदिणो दीदा रिक्खाहिवा गअगवअगवक्खकडक्खपुरस्सरा पच्छादो गोलाङ्गुलबलाधिवा दहिमुहदरीमुहदुम्मुहपहाणा वामदो स-

* किं पुनरेते ते प्रेङ्खोलितखट्वाङ्गा बहलप्रकटाट्टहासाः प्रसभमुक्त-डात्कारडामरा नृत्यद्भसोत्तालवेतालास्त्रस्तसुरपुरन्ध्रयो ललच्चूडामणिच-न्द्रखण्डाः खलखलायमानवेल्लितामरकल्लोलिनीप्रवाहास्तडतडितितडि-ताड्डमरडमरुकरवरौद्राः खणखणितिदक्षिणमुखकुहरगर्भनिविडमिलज्जर-ठदंष्ट्रा रोषफूत्कारफुल्लितफणाभारहाराहिधारिणः प्रचण्डरूपधारिणश्च-ण्डीशा संचरन्ति ।

† एष सुग्रीवः कुमारकुम्भकर्णं विच्छिन्नमवकृत्य गगनमुत्पतन् गत एव तापससकाशम् ।

रभकेसरिकिसोरप्पमुहा पदक्खिणदो हविअ वलिदुं पउत्ता * ।

रावणः । सोऽयं पिपीलिकापक्षन्यायः ।

कङ्कालकः । तदो अ मोग्गरपहारपरम्पराहिं मुच्छाविअ-अतिरिक्कच्छभल्लो णिरग्गलगिलिदगोलंगूलवग्गो चुण्णिअवाण-रवाहिणीसंणिवेसो पअदो तावसाभिमुखं समासादितमुच्छा-विदेहिं च तेहिं चउद्दिसं अक्कामिज्जन्तो णीरन्धरोसन्धआ-रन्धदाए समं पासस्सरिदेण णिअपरिअणेण विविहबलीमुहाणं कवलकेलिकम्मणि पअट्टो † ।

नेपथ्ये । देव दाशरथे त्वर्यतां वानरपरित्राणाय ।

दिङ्मातङ्गशिरस्तटीचिपिटितं प्रेतप्रभोः सैरिभे
भूयो दर्शितशृङ्गभङ्गविपदं बिभ्रन्महामुद्गरम् ।
येणाशोणितसारणीकवलनक्षीबो ऽमरप्रेयसी-
हासः स्वांश्च परांश्च खादति रणे नक्तंचरेन्द्रानुजः॥७८॥

रावणः । अहो अतृप्तिः अध्यवसायश्च वत्सस्य ।

करङ्कः । देव दोर्बन्ध्यबन्धुरितधनुर्दाशरथिरभ्यर्णो वर्तते-कुम्भकर्णस्य कुम्भकर्णेनापि गुरुमुद्गरचूडामणिः पाणिरनणीया-नुत्तम्भितस्तापसवधाय ।

रावणः । अभङ्गुरः सङ्गरः सदा मे वत्सस्य ।

काकः । हाहा धिक्कष्टम् ।

हस्तः स्थितो नभसि शत्रुजिघांसयैव
मत्ताङ्गनातिलकदानविधानदक्षः ।
उद्दामरामशरखण्डनतः प्रकोष्ठात्
पृष्ठे भुवो निपतितः सह मुद्गरेण ॥ ७९ ॥

कङ्कालकः । देव पाणी विअ बाहुदण्डो वि से खण्डिओ ‡।

रावणः । सास्रम् ।

मुर्च्छानमत्प्लवगपुङ्गवरक्तसिक्तः
स्वर्दन्तिदन्तवलयैः कृतकङ्कणश्रीः ।
आमूलतो मदनुजस्य भुजो भुजङ्ग-
भीमाकृतिर्झटिति हा नृशरेण लूनः ॥ ८० ॥

इति मूर्च्छति ।

* पुरतोऽपसृत्य चतुर्दिशं परिवृतो वानरसेनापतिभिः । तस्य पुरतो जाम्बवन्मणिमन्महामुखदुःसहप्रभृतयः स्थिता ऋक्षाधिपाः । गयगवयगवाक्षकटाक्षपुरःसराः पश्चद् गोलाङ्गूलबलाधिपाः । दधिमुखदरिमुखदुर्मुखप्रधाना वामतः । शरभकेसरिकिशोरप्रमुखाः प्रदक्षिणतो भूत्वा वलितुं प्रवृत्ताः ।

† ततश्च मुद्गरप्रहारपरंपराभिर्मूर्छायितातिऋक्षाच्छभल्लो निरर्गलगिलितगोलाङ्गूलवर्गश्चूर्णितवाहिनीसंनिवेशः प्रवृत्तस्तापसाभिमुखं समासादितमुर्छाविच्छेदैश्च तैश्चतुर्दिशमाक्रम्यमाणो नीरन्ध्ररोषान्धकारान्धतया समं पार्श्वसरितेन निजपरिजनेन विविधवलीमुखानां कवलकेलिकर्मणि प्रवृत्तः ।

‡ देव पाणिरिव बाहुदण्डोऽप्यस्य खण्डितः ।

करङ्कः । समाश्वसितु देवो वामपाणिप्रणीतमुद्गरः किमपि दुर्मदो राममाक्रामति तवानुजः ।

रावणः । किञ्चिदुत्थायावलोकयति ।

नेपथ्ये ।

एतद्विलूननिपुणाऽर्धविधूपमेन
लङ्केश्वरानुजशिरो दशनार्दितोष्ठम् ।
संस्कारसंकलितकोपकषायगण्डं
चण्डाञ्चितभ्रु पतति स्थिरदृष्टि रामे ॥ ८१ ॥

सर्वे क्षोभं नाटयन्ति ।

पुनर्नेपथ्ये ।

सद्यो राक्षसमल्लभल्लदलितग्रीवाप्रकाण्डं पत-
च्चिद्रालोद्द्रुहिणप्रणप्तुरशदृग्दंष्ट्राकरालं शिरः ।
द्राक् शाखामृगचक्रचूर्णनभयादादाय तारापथात्
प्रक्षिप्तं च महार्णवे हनुमता दृष्टं च गत्वासुरैः ॥ ८२ ॥

रावणः । हा वत्स कां दशां दशकण्ठेन नीतोऽसि ।

नेपथ्ये ।

देवाः सर्वे विमानान्यपनयत रविस्यन्दनो यातु दूरे
विश्वे शाखामृगेन्द्राः परिहरतरणप्राङ्गणं राक्षसाश्च ।
वेगस्रस्ताञ्जनाद्रिप्रतिनिधिरवधिः सर्वविस्मापकानां
लङ्कातङ्कैकहेतुर्निपतति वियतः कौम्भकर्णः कबन्धः ॥ ८३ ॥

रावणः । शोकनाटितकेन ।

शेषः सोढाऽपि शङ्कां त्यजति न भवता कण्ठसूत्रार्धकृष्टो
गौरीसिंहेन्द्रदन्तिद्वितयरणवधिं त्वत्प्रणीतं स्मरामि ।
तच्चास्ते त्वच्चरित्रं लिखितमिव पुरो मद्दृशां यत्सुमेरु-
र्वत्सेनोदस्यमानो रचितचटुशतं मोचितः स्वर्गिवर्गैः ॥ ८४ ॥

इति रोदिति ।

दक्षिणतः सुमुखः । अयमपरः क्षते क्षारावसेकः ।

आकर्णाकृष्टचापोन्मुखविशिखशिखाशेखरः शूलपाणि-
र्बिभ्राणो भैरवत्वं बहलकहकहारावरौद्राट्टहासः ।
ध्यातः सौमित्रिणाऽथ प्रसरदुरुतरोत्तालवेतालमाल-
स्तद्गुल्कादुद्भवद्भिः समजनि शिखिभिर्भस्मसादिन्द्रजिच्च ॥ ८५ ॥

रावणः मूर्च्छति. सर्वे यथोचितमुपचरन्ति ।

रावणः । मूर्च्छाविच्छेदनाटितकेन ।

शेतां संप्रति वासवश्चिरभवच्चिद्रानडैर्लोचनै-
र्नीयन्तां विबुधोपयोग्यकुसुमाः सर्वेऽपि दिव्यद्रुमाः ।
बन्धाःस्वर्गसदां च सन्त्वकनिगडाः प्राप्तोऽसि तं गोचरं
मद्दुःखैरपि वत्स नाम दशभिर्वक्तुं न यः शक्यते ॥ ८६ ॥

साक्रन्दं रुदित्वा । हंहो किङ्करा मन्दोदरीं द्रष्टुमिच्छामि
इति परिक्रम्य सर्वे निष्क्रान्ताः ।

इति वीरविलासो नामाष्टमोऽङ्कः ॥

THE

# VAISESHIKA APHORISMS

OF

# KAṆÁDA.

## FIRST BOOK. FIRST DAILY LESSON.

INTRODUCTION. [1] All students who wish to shun tne multitude of pains engendered in this world by birth, old age, death and the like, learn from revelation, tradition, the epics, the Puráṇas and other sources, that the means of escaping them is investigation of the real nature of soul. Now, certain disciples who had in the prescribed manner studied the Vedas and their subordinate sciences, unenvious, and attentive hearers, in quest of knowledge reverentially approached the great and holy sage Kaṇáda. The sage full of compassion taught them a treatise in ten sections. Enunciation, Definition, Investigation [of the adequacy of definitions],—such is the threefold method of this system. Division is a particular kind of enunciation; hence there is no addition [to be made.] Although description of the Categories is the chief subject of this treatise, yet from the importance of Merit as the instrumental cause of real knowledge of the Categories, he in the first place promises a description of that. *Vivṛiti.*

*Procemium.* अथातो धर्मं व्याख्यास्यामः ॥ १ ॥

*Aph.* 1. Now, then, we will explain [what] Merit [is.]

[2] "'Now,' means after being requested by his disciples. 'Then', since pupils quick in hearing &c., and unenvious have approached. Or else the word 'Now' *(atha)* has an auspicious sense. Thus it is said, "The syllable *Om* and the word *atha*, these two cleft of old the throat of Brahmá and issued forth; therefore both are of happy omen." *Upaskára.*

*Merit defined.* यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः ॥ २ ॥

*Aph.* 2. Merit is that from which [results] attainment of Elevation and of the Highest Good.

---

1 इह खलु जन्मजरामरणादिजनिततापकलापं जिहासवः सर्व एवान्तेवासिनस्तद्धानिनिदानमात्मतत्त्वदर्शनमाकर्णयन्ति श्रुतिस्मृतीतिहासपुराणादिषु । अथ केचिदन्तेवासिनो विधिवदधीतवेदवेदाङ्गा अनसूयकाः सम्यक्श्रवणा मननार्थं भगवन्तं कणादमहर्षिं विधिवदुपसेदुः । ततः परमकारुणिकः स मुनिर्दशाध्यायीतन्त्रं तानुपदिदेश । उद्देशो लक्षणं परीक्षा चेति त्रिविधाऽस्य शास्त्रस्य प्रवृत्तिः विभागस्तु विशेषोद्देश एवेति नाधिक्यम् । यद्यप्यत्र तन्त्रे पदार्थनिरूपणस्यैव प्राचुर्यं तथापि पदार्थतत्त्वज्ञाननिदानतया धर्मस्यैव प्राधान्यात् तन्निरूपणमेव प्रथमं प्रतिजानीते ॥

2 अथेति शिष्याकाङ्क्षानन्तर्यमाह । अत इति । यतः श्रवणादिपटवोऽनसूयकाश्चान्तेवासिन उपसेदुरित्यर्थः । यद्वा अथशब्दो मङ्गलार्थः । तदुक्तम् ।

ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभौ ॥ इति ॥

[1] It might be objected that because Merit is not productive of any result, a description of it is useless. Hence he states its characteristic, shewing that to Merit belongs the attainment of the highest object of man. Exaltation is paradise; the Highest Good is emancipation; that cause from which [results] the attainment,—production—, of these is Merit: and therefore it is fitting that Merit should be explained, inasmuch as, by reason of its effecting the highest object of man which consists of paradise and liberation [of the soul], it is to be acquired by those who are desirous of enjoyment and of emancipation. V.

[2] Exaltation is knowledge of the truth, the Highest Good is final cessation of pain, that from which both [result] is Merit. The Highest Good is [attained] by means of Exaltation. If this be the meaning the compound [*abhyudaya-nihśreyasa*] has an ellipse of a central member or is a Tat-purusha ablatively dependent, and Merit is implied to be characterised by Cessation [of pain]; but if Merit to be attained by practices such as devout meditation &c., and [synonymous with] the result of good actions done in a former state of being, then the compound is regular in form. U.

*Note.* Exaltation according to the Upaskára means either knowledge of the truth *(tatva-jnána)* or the result of good works done in a former birth *(adrishṭa)*. If it signify knowledge of the truth, the aphorism must be translated, 'That is Merit from which [results] the Highest Good by means of Exaltation.' If the result of actions done in a former life be intended by Exaltation, the aphorism is to be rendered as above.

[3] The attainment of paradise by Merit is with visible means, while the attainment of liberation is by means of knowledge of the truth; consequently there is a distinction. V.

1 ननु धर्मस्याकिञ्चित्करत्वेन तन्निरूपणं व्यर्थमतो धर्मस्य परमपुरुषार्थसाधनत्वं दर्शयन् तल्लक्षणमाह । अभ्युदयः स्वर्गः निःश्रेयसं मोक्षस्तयोः सिद्धिरुत्पत्तिर्यतः कारणात् स धर्मः तया च स्वर्गापवर्गरूपपरमपुरुषार्थसाधनतया बुभुक्षूणां मुमुक्षूणाञ्चोपादेयत्वाद्धर्मस्य व्याख्यानं युक्तमेव ॥

2 अभ्युदयस्तत्त्वज्ञानं निःश्रेयसमात्यन्तिकी दुःखनिवृत्तिः तदुभयं यतः स धर्मः अभ्युदयद्वारकं निःश्रेयसमिति मध्यपदलोपी समासः पञ्चमीतत्पुरुषो वा स च धर्मो निवृत्तिलक्षणो वक्ष्यते यदि तु निदिध्यासनादियोगसाध्यो धर्मो ऽदृष्टमेव तदा विधिरूपः ॥

3 धर्मस्य स्वर्गसाधनता साक्षादेव अपवर्गसाधनता तु तत्त्वज्ञानद्वारेति दृतेयः ॥

[1] He proceeds to remove the doubt, "What proof is there of [the existence of] Merit and of its being the means of attaining to knowledge of the truth &c. If [you say], the Veda, [we reply] not so, for the authority of that is doubted, and accordingly an aphorism of Aksha-charaṇa says, That [Veda] is unauthoritative being vitiated by falsity, self-contradictoriness, and repetition." V.

# INDRA
## AS REPRESENTED IN THE HYMNS OF THE RIGVEDA.
### A METRICAL SKETCH.

By J. MUIR, Esq. D. C. L.

In the following verses I have endeavoured to combine in one picture the most salient and characteristic points in the representations of the god Indra, the Jupiter Pluvius, or Thunderer, of the oldest Indian mythology, which are contained in the hymns of the Rigveda. Some part of my sketch are translations, nearly literal, of verses occurring in those hymns; other portions are condensed summaries of epithets, or descriptions, which are by far too numerous and too similar to each other to be all reproduced in detail; while a third class of passages contains an amplification, and not an approximate rendering, of the texts of the original on which they are founded.

The reader who is not familiarly acquainted with the hymns of the Veda, either in the original or by translations, may think that he perceives an incompatibility between the conceptions of the god, which he will find in different parts of this sketch. And, strictly speaking, there is an incompatibility. The naïve familiarity with which Indra is treated in some places seems irreconcileable with the lofty ideas of his greatness, which other portions express. And more particularly the sensual character, which is generally attributed to the god, seems to be in opposition to the moral perfection which is elsewhere described as an essential feature of his nature. But however incompatible, according to our ideas, both of these sets of representations occur side by side in the same hymns; and we must account for their co-existence and juxtaposition by supposing that the ancient Indian poets regarded the deity who was the object of their adoration, as anthropopathically partaking in a higher degree of the elements, sensuous as well as intellectual and moral, which, on the evidence of their own consciousness, they knew to be equally constituent parts of their own nature.

1 ननु धर्मे तस्य तत्त्वज्ञानादिसाधनत्वे च किं मानं वेद एव मानमिति चेत् न तत्प्रामाण्यस्यापि सन्दिग्धत्वात् तथा चाक्षचरणसूत्रं तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्य इतीत्याशङ्कां निरस्यति ॥

I.—*Invitation of Indra to the Sacrifice.*

Hear, Indra, mighty Thunderer, hear,
Bright regent of the middle sphere;
List while we sweetly sing thy praise,
In new, and well-constructed, lays;
Hymns deftly framed by poet skilled,
As artizans a chariot build.
Come, Indra, come, thou much-invoked,
Our potent hymn thy steeds has yoked;
Thy golden car already waits
Thy pleasure at thy palace-gates:
Friend Indra, from the sky descend,
Thy course propitious hither bend;
Come straight, and let no rival priest
Prevail to draw thee from our feast.
All is prepared; the Soma draught
Is sweet as thou hast ever quaffed;
And we will feed with corn, and tend,
Thy coursers at their journey's end.
But, Indra, though of us thou thinkest,
And our libations gladly drinkest,
We, mortal men, can only share
A humble portion of thy care.
We know how many potent ties
Enchain thee in thy paradise.
Thou hast at home a lovely wife,
The charm and solace of thy life;
Thou hast a ceaseless round of joys,
Which all thy circling hours employs—
Joys such as gods immortal know,
Unguessed by mortals here below.
But, brother Indra, come, benign,
Accept our gifts, thou friend divine.
Come, hear our sweet and grateful song;
Come, we will not detain thee long.

II.—*Indra's birth.*

Hear, Indra, while thy birth we sing,
The deeds, thy greatness, glorious king.
Old father Sky* and mother Earth
Both quaked, confounded at thy birth.
The Sky exclaimed, at that great sight,
"Thy father was a stalwart wight;
Of most consummate skill was he,
The god whose genius fashioned thee."
This infant of unrivalled force
Sprang forth from a transcendent source.
A blessed mother bore the child,
And fondly on her offspring smiled,
Foretelling then, with pride and joy,
The might and glory of the boy.
He needed not a tedious length
Of autumns to mature his strength;
His force he felt as soon as born,
And viewed all hostile powers with scorn.
Grasping his deadly shafts, in pride
Of prowess, thus the infant cried:—
"Where, mother, dwell those warriors fierce
Whose haughty hearts these bolts must pierce?"
And when thy father proved thy foe,
Thy fury, Indra, laid him low.
Who vainly sought thy life to take,
When thou didst sleep, when thou didst wake?
Who, Indra, in his vengeful mood,
Thy mother doomed to widowhood?
What god stood by, thy wrath to fire,
When, seizing by the foot thy sire,
Thou smot'st him dead, in youthful ire?

III.—*Indra's arrival.*

Fulfilling now our ardent prayer,
The god aproaches through the air.
On, on, he comes, majestic, bright,
Our longed-for friend appears in sight.
His brilliant form, beheld afar,
Towers stately on his golden car.
Fair sunlike lustre, godlike grace,
And martial fire illume his face.
Yet not one from alone he bears,
But various shapes of glory wears,
His aspects changing at his will,
Transmuted yet resplendent still.
In warlike semblance see him stand,
Red lightnings wielding in his hand.
The heavenly steeds, his shining team,
With all the peacock's colours gleam.
Resistless, snorting, on they fly,
As swift as thought, across the sky;
And soon bring nigh their mighty lord,
To us, his friends, a friend adored.
Now Indra from the sky descends;
Yes, yes, to us his way he wends.
Although we see him not, we know
He now is present here below.
Within our hallowed precincts placed,
He longs our grateful feast to taste.

IV.—*Indra invited to drink the Soma draught.*

Thou, Indra, oft of old hast quaffed
With keen delight our Soma draught.
All gods the luscious Soma love,
But thou all other gods above.
Thy mother knew how well this juice
Was fitted for her infant's use.
Into a cup she crushed the sap,
Which thou didst sip upon her lap.

* Dyaus = Ζεύς.

Yes, Indra, on thy natal morn,
The very hour that thou wast born,
Thou didst those jovial tastes display
Which still survive in strength to-day,
And once, thou prince of genial souls,
Men say thou drainedst thirty bowls.
Our cup is foaming to the brim
With Soma pressed to sound of hymn.
Come, drink, until thou hast enough,
Like thirsty deer from water-trough.
Indulge thy taste, and quaff at will;
Drink, drink again, profusely swill,
Drink, thy capacious stomach fill.

V.—*Praise of Soma.*

This Soma is a god;* he cures
The sharpest ills that man endures,
He heals the sick, the sad he cheers,
He nerves the weak, dispels their fears,
The faint with martial ardour fires,
With lofty thoughts the bard inspires,
The soul from earth to heaven he lifts;—
So great and wondrous are his gifts.
Men feel the god within their veins,
And cry in loud exulting strains:
"We've quaffed the Soma bright,
"And are immortal grown;
"We've entered into light,
"And all the gods have known,
"What mortal now can harm,
"Or foeman vex us more?
"Through thee beyond alarm
"Immortal god we soar."*
The gods themselves with pleasure feel
King Soma's influence o'er them steal;
And Indra once, as bards have told,
Thus sang in merry mood of old:—

*(To be continued.)*

## REVIEW.

The Árya-vidyá-sudhákara by Pandit Yajneśvara Śarman of Surat presents us with a brief summary of the literature, religious, political, and philosophical, of the Áryans of India. The aim of the author, as an orthodox Hindu, is to provide native students, whose time is much occupied in the study of modern science, with a short review of the revelation, tradition, and philosophy of their ancestors. This he accomplishes in the compass of some two hundred and fifty octavo pages. The first section of the work treats of the creation of the world, the origin of the Áryas and of the four castes, the antiquity of the arts of civil life and especially of that of writing. Here the writer undertakes to vindicate Hindu orthodoxy against modern objections. Next follows an account of the Vedic literature, and, in the second section, of the Vedic ritual. The third division treats of the civil and religious duties prescribed by the Smṛiti, and the fourth exhibits a lucid analysis of the philosophical systems orthodox and unorthodox. The fifth has a practical scope. Systems differ, but it is generally agreed that righteousness leads to knowledge and knowledge to emancipation of the soul. The old paths are the way of safety.

येनास्य पितरो याता येन याताः पितामहाः ।
तेन यायात् सतां मार्गं तेन गच्छन् न रिष्यते ॥ Manu IV. 178.

The author's style is every where methodical, easy, and perspicuous, and his only failure is the attempt to disprove or to reconcile with religious dogmas, adverse facts relating to the early Áryans, which we owe to the free research of European scholars. Thus we are told that all other races of men being, as Manu teaches, sprung from the four castes, whose original seat was Kuru-kshetra and other parts of India, their languages resemble Sanskṛit by retaining some of its words in a corrupt form. Of course it is well known that languages other than Sanskṛit belonging to the Indo-European group exhibit occasionally grammatical forms more organic than those of Sanskṛit, as, for instance, in the case of nouns of agency and relationship and of the substantive verb. Yáska's interpretation of the phrase पञ्च जनाः, is an inadequate reply to the mass of evidence respecting the origin of caste collected in Dr. Muir's Sanskṛit Texts. It is not likely that any one will suppose the earliest Áryans to have been destitute of skill in science and art and merely brutish. (विद्याशिल्पादिकुशलत्वहीनाः केवलं पशुकल्पाः P. 12.)

That they were acquainted with the arts of agriculture &c., even before the Vedic period is established by the testimony of the various Áryan languages. The answer (p. 19) to Prof. Max Müller's statement that writing was unknown before the Sútra period of Vedic literature appears equally unsatisfactory with the author's objections to other modern inductions. But while such objections arising from strong religious feeling are seldom stated, the work as a whole will be valued by those who know the assistance of such summaries as this in the appropriation or in the mental arrangement of large masses of facts. With a few modifications a translation of the work, and especially of the philosophical portion, would be of great service to English students of Sanskṛit.

A. E. G.

* He bears, as the reader will perceive, a certain analogy to the Greek Dionysus.

* These two verses are a nearly literal translation of Rigveda, viii 48, 3.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

# काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

# THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 33. Benares February 1st, 1869. Vol. III.


॥ श्रीपरमेश्वराय नमः ॥

## ॥ उपदेशसहस्रीप्रस्तावना ॥

तत्र भवान् भगवान् परमकारुणिकः श्री ६ शंकराचार्यो विस्तरेण ब्रह्ममीमांसां व्याख्याय निबन्धविस्तरदर्शनसंजातालस्यमात्रतस्तत्तत्पठनादावधिकारिणो ऽप्यप्रवर्त्तमानान् धीमतः समनुग्रहीतुकामो वेदान्तशास्त्रमहोदधेः सारसुधां समुद्धृत्य पाययन्निव वेदान्तनिबन्धानां शिरोभूषणमुपदेशसहस्रीसमाख्यं निबन्धमुपनिबबन्ध। तस्मिंश्च श्रोतृबुद्धिसमवधानाय प्रथमतो गद्यप्रबन्धेन संक्षेपतः प्रतिपाद्यं संगृह्य पुनः पद्यप्रबन्धेन तदेव नानाविधप्रमाणोपन्यासपुरःसरं विशदीचकार। अथ च तस्य स्थानेस्थाने गम्भीरार्थतया दुरवगमत्वं समीक्ष्य श्रीमान् रामतीर्थनामा विबुधो व्यक्तार्थामत्यक्तव्याख्येयभागां पदयोजनिकां नाम टीकां रचयामास। तस्य चास्य निबन्धस्य टीकासहितस्य जीर्णमेकं पुस्तकं कस्य चिन्महाराष्ट्रस्य पुस्तकालये ऽहमुपलभ्य प्राचीनप्रौढनिबन्धदर्शनरसिकजनान् मोदयितुकाम एतत्पत्रद्वारा टीकासहितमेतन्निबन्धं प्रकाशयितुमुत्सहे। अवश्यं चायं निबन्धो रसिकानां हृदयंगमीभावमापन्नस्तान् प्रमोदयेत् सफलयेच्च तेन मामकं परिश्रममिति निर्भरेणाशासे। नमस्यामि चैतदारम्भे मङ्गलाय श्रीपरमेश्वरं भगवत्पादं शङ्कराचार्यं च बद्धाञ्जलिपुटः परमादरपुरस्सरमिति शम् ॥

सांख्य॰बालशास्त्री

## ॥ उपदेशसहस्र्या गद्यप्रबन्धः ॥

॥ श्रीगणेशाय नमः ॥

॥ समस्तब्रह्मविद्यासंप्रदायप्रवर्त्तकाचार्येभ्यो नमः ॥

॥ ओंनमो भगवते सर्वात्मने वासुदेवाय नमः ॥

प्रणम्य रामाभिधमात्मधीपदं
जगत्प्रसूतिस्थितिसंयमायनम् ।
तदात्मकाङ्कंकरपूर्वकान् गुरून्
मयोपदेशार्थविभाग उच्यते ॥

इह भगवत्पादाभिधो भगवान् भाष्यकारः सर्वोपनिषदर्थसारसंग्राहिकामुपदेशसहस्रीं गद्यपद्यविभागयन्त्ररचनया प्रकटीकुर्वन्नादौ गद्यबन्धमारभमाणः प्रारिप्सितपरिसमाप्तिप्रचयगमनादिप्रयोजनं शिष्टाचारविशेषपरिप्राप्तं मङ्गलमाचरति। अथेति।

(१) अथ मोक्षसाधनज्ञानोपदेशविधिं व्याख्यास्यामो मुमुक्षूणां श्रद्दधानानामर्थिनामर्थाय, तदिदं मोक्षज्ञानं साधनसाध्यादनित्यात्सर्वस्माद्विरक्ताय त्यक्तपुत्रवित्तलोकैषणाय प्रतिपन्नपरमहंसपारिव्राज्याय शमदमदयादियुक्ताय शास्त्रप्रसिद्धशिष्यगुणसंपन्नाय शुचये ब्राह्मणाय विधिवदुपसन्नाय शिष्याय जातिकर्मवृत्तविद्याभिजनैः परीक्षिताय ब्रूयात् पुनःपुनर्यावद्ग्रहणं दृढीभवति ॥

ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥

इति स्मृतावथशब्दस्य माङ्गलिकत्वावगमाद्, अथ वा आनन्तर्यार्थ एवायमथशब्द उच्चारणमात्रेण मङ्गलप्रयोजनो ऽपि भवति, अन्यार्थं क्रियमाणमृदङ्गादिध्वनिश्रवणादिवत् । किमानन्तर्यार्थतेति चेद्, विस्तरेणानेकशास्त्रार्थनिबन्धनिर्माणानन्तर्यार्थतेति वदामः । प्रश्नप्रतिवचनाक्षेपसमाधानप्रकारैरनेकप्रमाणयुक्तिविशेषैर्निपुणतरमवधारिते समस्तोपनिषच्छास्त्रार्थे ऽनेकवाक्ययुक्त्यनुसन्धानव्यवधानमन्तरेण साक्षादनुभवोदयाय संग्रहनिरूपणप्रवृत्त्युपपत्तेरिति । अत्र चिकीर्षितं प्रतिजानानः प्रवृत्त्यङ्गतया शास्त्रीयानुबन्धजातं संगृह्णाति मोक्षसाधनेति । अर्थविस्तरेण शास्त्रार्थनिरूपणानन्तरं मोक्षो निष्प्रपञ्चब्रह्मात्मताविर्भावस्तस्य साधनमौपनिषदाद्वितीयात्मतत्त्वज्ञानं तस्योपदेशः उपदेशनमुपदेशस्तदर्थवाक्यानामर्थविभागेन शिष्यं प्रति प्रतिपादनं तस्य विधिः प्रकारविशेषस्तैर्विस्पष्टमाख्यास्यामः कथयिष्यामः । मोक्षशब्देन प्रत्यक्तत्त्वं ब्रह्म विषयो निर्दिष्टः । साधनशब्देन तत्त्वज्ञानस्योक्तत्वात् तत्साध्याज्ञानादिबन्धनिवृत्तिः प्रयोजनं सूचितम् । उपदेशविधिशब्देन संबन्धो बोध्यबोधकलक्षणः शास्त्रविषयो दर्शितः । इदानीमधिकारिणमाह । मुमुक्षूणामिति । मुमुक्षूणां मोक्षमात्रमिच्छतामित्यनेनैहिकामुष्मिकार्थतृष्णालेशवतामप्यत्रानधिकार इति सूचितं, श्रद्दधानानामस्मिन्नुपदेशशास्त्रार्थे विश्वासवतामित्यनेन मुमुक्षवो ऽपि सन्तो ये कर्मस्वन्यशास्त्रेष्वपि वा श्रद्दधते तेषामिहानधिकारः सूच्यते, अर्थिनामेतच्छास्त्रार्थज्ञानार्थिनामित्यनेन श्रद्दधाना अपि ये पाण्डित्यविस्तरप्रवणमतयस्तेषामिहानधिकारो ध्वनितः । तथा चैवंविधानामधिकारिणामर्थायोपकाराय व्याख्यास्याम इत्यन्वयः । संग्रहेणोक्तमर्थं विवृणोति । तदिदमिति । तदिदं मोक्षसाधनं ज्ञानं विधिवदुपसन्नाय शिष्याय ब्रूयादित्यन्वयः, तद् ग्रन्थान्तरेषु विस्तरेण प्रतिपादितमिदमिदानीमिह वक्ष्यमाणमित्यर्थः, किं तद्, मोक्षसाधनं सहेतुबन्धनिवृत्त्या ब्रह्मात्माविर्भावस्य निमित्तं यदुक्तं तदिदं ज्ञानं वक्ष्यमाणमित्यर्थः । मोक्षसाधनपदं व्याख्यातमुपदेशविधिपदमग्रे शिष्याचार्यप्रश्नादिपरंपरया व्याख्यास्यन्मुमुक्षूणामित्याद्युक्तमधिकारिणं व्याचष्टे । साधनेत्यादिना । संग्रहे ऽधिकारिबहुत्वनिर्देशः प्रदर्शनार्थो न तु विवक्षितो ऽत एव विवरणे एकवचनम्, एकात्मवादे बहूनां निरपेक्षाणां मुमुक्षूणामसंभवादिति ।

"नाविरक्ताय संसारान्नानिरस्तैषणायच" ।

इत्यादिशास्त्रमुररीकृत्याह । साधनसाध्यादिति । साधनैर्दृष्टादृष्टार्थैः कृष्यादियागादिभिः साध्यादैहिकादामुष्मिकाच्च भोग्यजातादत एवानित्यादशाश्वतात्सर्वस्माद्ब्रह्मलोकान्तादपि विरक्ताय विगतरागाय निवृत्ताभिलाषायेत्यर्थः । कथमवगम्यते ऽयं विरक्त इत्यपेक्षायां विशेषणान्तरेण विरक्तचिह्नमाह । त्यक्तेति । अत्रैषणाशब्देन कामापरपर्यायेण तत्प्रयुक्ता प्रवृत्तिर्लक्ष्यते । तत्र पुत्रार्थं दारसंग्रहे प्रवृत्तिः पुत्रैषणा, कर्माद्यनुष्ठानार्थमपरविद्यागवादिरूपोभयविधवित्तपरिग्रहो वित्तैषणा, पुत्रकर्मापरविद्यासाध्यैतल्लोकपितृलोकदेवलोकफलैषणा लोकैषणा, एता एषणास्त्यक्ता येन तस्मै साधनेषु प्रवृत्त्यौत्सुक्यत्यागादेव साध्याभिलाषशून्यता गम्यत इत्यर्थः । तथा च श्रुतिः ।

"न कर्मणा न प्रजया न धनेन त्यागेनैकेनामृतत्वमानशुः" ।

इति । इदानीम् "एतमेव प्रव्राजिनो लोकमीप्सन्तः प्रव्रजन्ति" "तानि वा एतान्यवराणि तपांसि न्यास एवात्यरेचयद्" इत्यादि शास्त्रमनुरुध्याह । प्रतिपन्नेति । परमहंसविशेषणं कुटीचकादिस्मार्त्तसंन्यासिव्यावृत्त्यर्थं, नहि द्वैताद्वैतवादिनामद्वितीयात्मतत्त्वोपदेशग्रहणाधिकार इति भावः । एतावता मुमुक्षुपदं व्याख्यातम् । अत्राप्याश्रमधर्ममात्रनिष्ठस्याधिकारो नास्तीति विवक्षन् पुनर्विशिनष्टि । शमदमदयादियुक्तायेति । शमो ऽन्तःकरणस्यानात्मविषयेभ्यो व्यावृत्तिः, दमो बाह्येन्द्रियाणां, दया भूतेष्वद्रोहः, आदिपदेनोपरतितितिक्षासमाधानश्रद्धाः संगृह्यन्ते । एतेन श्रद्दधानानामित्येतद् व्याख्यातम् ।

"अमान्यमत्सरो दक्षो निर्ममो दृढसौहृदः ।
असत्त्वरो ऽर्थजिज्ञासुरनसूयुरमोघवाग्" ॥

इत्यादिवचनमनुसृत्य पुनर्विशिनष्टि । शास्त्रप्रसिद्धेति । एतेनार्थिनामिति व्याख्यातम् । "नाशुचिर्ब्रह्म कीर्त्तयेत्" "त्रिसंध्यादौ स्नानमाचरेद्" इत्यादिशास्त्रमाश्रित्याह । शुचय इति । सबाह्याभ्यन्तरशौचसंपन्नायेत्यर्थः । "ब्राह्मणो निर्वेदमायाद्" "एतद्ध स्म वै तत्सर्वे ब्राह्मणा अनूचाना विद्वांसः प्रजा न कामयन्ते" "एतं वै तमात्मानं विदित्वा ब्राह्मण" इत्यादिशास्त्राण्यनुसृत्याह । ब्राह्मणायेति । विविदिषवो ऽपि क्षत्रियादयो न पारमहंस्ये संन्यासधर्मे ऽधिक्रियन्त इति भावः । अत एवोत्पन्नज्ञाना अपि जनकादयो न गार्हस्थ्यं परित्यक्तवन्त इति श्रूयते । इदं च शास्त्रं यथोक्तसंन्यासाधिकारिकमेव नाश्रमान्तराधिकारिकम् । आश्रमान्तरस्य प्रवृत्तिधर्मपरत्वेन तदत्यागे तद्विरुद्धनिवृत्तिनिष्ठापरत्वायोगात्, त्यागे चाश्रमान्तरत्वानुपपत्तेः । वक्ष्यति च भगवान् भाष्यकारः ।

अहं ब्रह्मा ऽस्मि कर्त्ता च भोक्ता चास्मीति ये विदुः ।
ते नष्टा ज्ञानकर्मभ्यां नास्तिकाः स्युर्न संशयः ॥

इति ।

संन्यासिभ्यः प्रवक्तव्यः शान्तेभ्यः शिष्टबुद्धिना ।

इति च । अतः पारिव्राज्यविशेषणं नित्याधिकारित्वख्यापनार्थं नाश्रमान्तरव्यावृत्त्यर्थमिति केषांचिद्व्याख्यानं चिन्त्यं, "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियम्" इत्यादिश्रुतिमाश्रित्याह । विधिवदुपसन्नायेति । विद्याग्रहणार्थं गुरुपादग्रहणपूर्वकम् "अधीहि भगव" इत्यादिमन्त्रोच्चारणेनाभिसंवादनमुपसत्तिस्तां कृतवत इत्यर्थः । शिष्याय शासनार्हाय पूर्वश्रुतत्वादिनिमित्तौद्धत्यरहिताय विनययुक्तायेत्यर्थः । "किंगोत्रो नु सोम्यासि तान् ह स ऋषिरुवाच । भूय एव तपसा श्रद्धया ब्रह्मचर्येण संवत्सरं संवत्स्यथ नासंवत्सरवासिने प्रब्रूयाद्" इति श्रौतलिङ्गमवष्टभ्याह । जातिकर्मेत्यादिना । जातिपरीक्षणं कुण्डगोलकक्षत्रियादिव्यावृत्त्यर्थं, कर्मपरीक्षणं पतितत्वाभिशस्तत्वादिराहित्येन शिष्टताज्ञानाय, वृत्तमाचारः शीलं वा तत्परीक्षणं विद्याग्रहणोत्तरकालमपि तत्परिपालनयोग्यताज्ञानार्थं, विद्या पूर्वाधीतवेदशास्त्रादिरूपा उपास्यदेवतादिविशेषविषया वा सापि परीक्षणीया उक्तार्थग्रहणधारणादियोग्यत्वायोग्यत्वनिश्चयाय, । तथा च श्रुतिः ।

"नाप्रशान्ताय दातव्यं नापुत्रायाशिष्याय वा पुनः"

इति । अभिजनः कुलं जन्मस्थानं तदपि परीक्षणीयं मातापितृभ्यां गुरुभिश्च शिक्षितत्वाशिक्षितत्वज्ञानार्थं,"यथा मातृमान् पितृमानाचार्यवान् ब्रूयाद्" इति श्रौतलिङ्गाद् । एवं विशिष्टाय शिष्याय ब्रूयादित्याचार्यं शिक्षयति । उपदेशस्य दृष्टार्थतामभिप्रेत्याह । पुनःपुनरिति । अवधिमाह । यावद्ग्रहणं दृढीभवतीति । शिष्यस्येतिशेषः ॥ १ ॥

एवमुक्तविशेषणेन शिष्येण गुरूपसत्तिः कार्या गुरुश्च तमुपदिशेद्विद्यामित्युक्तेऽर्थे श्रुतिमुदाहरति । श्रुतिश्चेति ।

(२) श्रुतिश्च, परीक्ष्य तत्त्वतो ब्रह्मविद्यामिति, दृढगृहीता हि विद्या ऽऽत्मनः श्रेयसे संतत्यै च भवति, विद्यासंततिश्च प्राण्यनुग्रहाय भवति नौरिव नदीं तितीर्षोः, शास्त्रं च, यद्यप्यस्मा इमामद्भिः परिगृहीतां धनस्य पूर्णां दद्यादेतदेव ततो भूय इति ॥

"परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायाद्" इत्युपक्रम्य ।

"येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्"

इत्यन्तेन ग्रन्थेनोक्तो ऽर्थो निरूपित इत्यर्थः । शिष्यस्य दृढग्रहणपर्यन्तं गुरुणा पुनःपुनर्विद्योपदेष्टव्येत्यत्र हेतुमाह । दृढगृहीता हीति । आत्मनः श्रेयो ऽविद्यादिदोषसंसारनिवृत्तिः संततिः शिष्यप्रशिष्यादिसंचारेण विद्याया अविच्छेदः । विद्यासंततेः क्वोपयोग इत्यत्राह । विद्येति । यथा नदीतरणाय तत्र प्रविष्टस्यागाधे निमज्जतो नरस्य पारं प्रापयितुं नौरुप' स्थाप्यते कृपालुना, तथा संसारसागरे निमज्जतः प्राणिन उद्धरणेन तत्पारं विष्णोः परमं पदं प्रापयितुं विद्यासंतानसंरक्षणमित्यर्थः । पूर्वोक्तशिष्यगुणसंपन्नाय परीक्षिताय विधिवदुपसन्नायैव विद्या देया न यथाकथंचित्प्राप्ताय धनादिलाभाद्धेति गुरोर्नियमार्थं श्रुतिशासनमुदाहरति । शास्त्रं चेति । नियामकं शास्त्रं चात्रास्तीत्यर्थः । तदेवाह । यद्यपीति । इमां पृथिवीमद्भिः परिगृहीतां समुद्रपरिवेष्टितां धनस्य पूर्णां वित्तेनोपचितां दद्यात्कश्चिद्यद्यपि तथापि नैतद्दर्शनं तस्मै दद्यादत एतत्ततो वित्तपूर्णपृथिवीदानादपि भूयोधिकतरमिति योजना । नह्याकाशादिसमस्तभूतभौतिकाधिष्ठानस्य ततोप्यधिकतरस्यापरिच्छिन्नस्य ब्रह्मणो दानस्येदमनुरूपमिति भावः । तथा च श्रुतिः ।

"पादोस्य विश्वाभूतानि त्रिपादस्यामृतं दिवि" ।

इति । तदेवमाचार्येण परीक्षिताय शिष्याय कृपयैव विद्या वक्तव्येत्युक्तम् ॥ २ ॥

तत्र किमाचार्योपगमेन कार्यं, स्वयमेव जिज्ञासोर्न्यायाद्यनुसरणतो विद्योदयसंभवादिति शङ्कायामाहान्यथेति । यद्वा किमित्येवं संकटमवष्टभ्याचार्येण विद्या देया, शिष्यः स्वयमेव तां किं न संपादयेदित्यत आह । अन्यथा चेति ।

(३) अन्यथा च ज्ञानप्राप्त्यभावादाचार्यवान् पुरुषो वेदाचार्याद्धैव विद्याचार्यप्राविता सम्यग्ज्ञानं प्लव इहोच्यते इत्यादिश्रुतिभ्यः, उपदेक्ष्यन्ति ते ज्ञानमित्यादिस्मृतेश्च ॥

तत्र श्रुतिस्मृती प्रमाणयत्याचार्यवानित्यादिना । आचार्याद्धैव विद्या विदिता साभीष्टं प्रापयतीति वाक्यशेषः । आदिपदात्

"तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः,, ॥

इत्यादिवचनं गृह्यते । तथा चातिसूक्ष्मपरमार्थनिर्णयस्य स्वबुद्धिसामर्थ्यमात्रेण संपादयितुमशक्यत्वमेतैर्वाक्यैर्गम्यत इत्यर्थः ॥ ३ ॥

ननु जिज्ञासोरुक्तविशेषणस्य शिष्यस्य सकृदुपदेशग्रहणादेव विद्यादार्ढ्योपपत्तेः किमिति पुनःपुनरुपदेशः कार्य इत्युक्तमत आह । शिष्यस्येति ।

(४) शिष्यस्य ज्ञानाग्रहणं च लिङ्गैर्बुध्वा ऽग्रहणे हेतून् अधर्मलौकिकप्रमादनित्यानित्यवस्तुविवेकविषयासंजातदृढपूर्वश्रुतत्वलोकचिन्तावेक्षणजात्याद्यभिमानादींस्तत्प्रतिपक्षैः श्रुतिस्मृतिविहितैरपनयेदक्रोधादिभिरहिंसादिभिश्च यमैर्ज्ञानाविरुद्धैश्च नियमैरमानित्वादिगुणं च ज्ञानोपायं सम्यग् ग्राहयेत् ॥

शिष्यस्य ज्ञानाग्रहणं चकाराद्विपर्ययग्रहणं च मुखादिचेष्टावचनव्यक्त्यादिलिङ्गैर्बुध्वा ऽग्रहणादिहेतूंस्तत्प्रतिपक्षैस्तन्निवर्त्तकैः श्रुतिस्मृतिविहितैरपनयेदिति संबन्धः । तानेवाहाधर्मेत्यादिना । अधर्मः संचितः, लौकिक इदानींतनः, प्रमादः कामचारवादभक्षणादिः, तत्र सूर्यादिदेवतोपासनादिनियमोपदेशेनाधर्मक्षपणं कारणीयं, वर्ज्यावर्ज्यादियतिधर्मशास्त्रेण प्रमादनिरासः, नित्यानित्यविवेकस्य यो विषयश्चेतनाचेतनरूपस्तस्मिन्नसंजातं तत्पर्यन्तं न प्रसृतं यद्दृढपूर्वश्रुतत्वं तद्युक्तिविशेषाद्युपन्यासेनापनीयविवेकपर्यन्ततां नयेदित्यर्थः । लोकचिन्तावेक्षणं लोकानां व्यवहारसाधुत्वासाधुत्वविचारलक्षणं, लोकेभ्यः पूजासन्मानाद्यपेक्षया तत्संसर्गोपरोधेन व्यवहरणं वा । एतच्च वक्ष्यमाणामानित्वमदम्भित्त्वमित्यादिशास्त्रोक्तनिष्ठोपदेशेनापनेतव्यम् । जात्यादीत्यादिपदात्कुलविद्यादिः गृह्यते । त्वंपदार्थपरिशोधनोपदेशेन जात्याद्यभिमानं त्याजयेदित्यर्थः । अभिमानादीनित्यादिपदेन तत्प्रयुक्तो व्यवहारोऽन्यधिक्करणादिर्गृह्यते । अक्रोधादिभिरित्यत्रादिपदेनाकामादयो गृह्यन्ते । अहिंसादिभिश्चेत्यादिपदात्सत्यास्तेयब्रह्मचर्यापरिग्रहा गृह्यन्ते । अक्रोधादीनामहिंसादीनामुपायोपेयभावेनोपदेशो बोद्धव्यः । शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमा उच्यन्ते । तेषां ज्ञानाविरुद्धैरिति विशेषणेन तीर्थयात्राचान्द्रायणोपवासादिकर्मकाण्डपरायणबाह्यसाधनक्रियाप्रधानेश्वरपूजानिष्ठादि च यज्ज्ञाननिष्ठाविक्षेपकरं तस्यानादरणीयतां दर्शयति । यमनियमोपदेशस्तु सर्वदोषनिरासस‍ाधारणोपाय इति द्रष्टव्यम् । एवं ज्ञानग्रहणप्रतिबन्धकनिवर्त्तकमुपदिश्य ज्ञानोदयहेतुजातमुपदिशति । अमानित्वादिगुणमिति । आदिपदाददम्भित्वादितत्त्वज्ञानार्थदर्शनान्तं गृह्यते । यद्वा ऽमानित्वेनादम्भित्वादिकं सह पठितत्वेनोपलक्ष्यादिपदेनाद्वेष्टा सर्वभूतानामित्यादिनोक्ता अद्वेष्टृत्वादयो धर्मा ग्राह्याः । अत्र सम्यक्पदमेतन्निष्ठसर्वदोषपरिहारेणायत्नलभ्यं ज्ञानदार्ढ्यमिति दर्शयितुम् । अयं भावः । नहि सकृद्ग्रहणमात्राद्विद्या दृढोत्पद्यते, आवृत्तिरसकृदुपदेशादिति न्यायात्, श्रवणोत्तरकालं मननादिविधानसामर्थ्याच्च । दृढत्वं हि फलपर्यन्तत्वं विद्याया विवक्षित,मतः फलानुकूलतया यावन्निर्विचिकित्सं तत्संजायते तावद्गुरुणा शिष्यं कृतार्थं कर्तुं प्रवृत्तेन विद्योपयोगार्थं वा प्रवृत्तेनोपदेशः कार्य एवेति ॥ ४ ॥

एवमाचार्यकृत्यमुक्त्वा तस्य लक्षणमाह । आचार्यस्त्विति ।

(५) आचार्यस्तूहापोहग्रहणधारणशमदमदयानुग्रहादिसंपन्नो बद्धागमो दृष्टादृष्टभोगेष्वनासक्तः त्यक्तसर्वकर्मसाधनो ब्रह्मविद्ब्रह्मणिस्थितो ऽभिन्नवृत्तो दम्भदर्पकुहकशाठ्यमायामात्सर्यानृताहङ्कारममत्वादिदोषविवर्जितः केवलपरानुग्रहप्रयोजनो विद्योपयोगार्थी पूर्वमुपदिशेत् ॥

एतच्च तत्त्वजिज्ञासुनाऽधिकारिणा एवंविध आचार्य उपगन्तव्यो नान्यादृश इति दर्शयितुं, न त्वाचार्येणैवंविधगुणेन भवितव्यमिति नियोगः क्रियते, तस्य कृतार्थत्वादिति द्रष्टव्यम् । शिष्येणानुक्तस्याप्यूहनमूहः, उपदेशसमसमयं शिष्यप्रतिपत्त्यनुकूलाऽपूर्वयुक्तिकल्पनं वा । शिष्यस्य मिथ्याग्रहणापाकरणसामर्थ्यमपोहः, सिद्धान्तप्रतिपक्षनिराकरणसामर्थ्यं वा । शिष्यकृतप्रश्नाश्रयवाक्यार्थानां सद्योवधारणसामर्थ्यं ग्रहणं, गृहीतानां तेषां सारासारावधारणपूर्वकं प्रत्युक्तिसमये स्मरणयोग्यतापादनं धारणं, शमदमौ व्याख्यातौ, दया दुःखिनं प्रत्यनुजिघृक्षा, तदनन्तरं दुःखिनो दुःखापाकरणे प्रवृत्तिरनुग्रहः । आदिशब्दादुपसन्नस्य विनीतस्यानुगृहीतस्यापरित्यागो गृह्यते । यस्तु हिंसानुग्रहयोरनारम्भीति गौतमेन संन्यासिधर्मो दर्शितो, यच्च न व्याख्यानपरो यतिरित्यादिवचनं, तत्ख्यातिलाभपूजापाण्डित्यवृद्ध्यादिहेतुप्रवृत्तिविषयमित्यदोषः । संपन्न इति पूर्वोक्तगुणैराढ्यतोच्यते, लब्धागमः स्वगुरुभ्यः प्राप्तविद्योपदेशः, अनेन विशेषणेन गुरोः साम्प्रदायिकत्वमपि शिष्येणान्वेषणीयमिति सूचयति । दृष्टा भोगा ऐहिकाः, अदृष्टाः पारलौकिकास्तेष्वनासक्तस्तत्साधनलोकाराधनतपोयज्ञादिप्रवृत्तिशून्य इत्यर्थः । यतस्त्यक्तानि सर्वकर्मणां साधनानि धनदारसंग्रहशिखायज्ञोपवीतादीनि येन स तथा, अतो भोगानासक्त इति विदित इत्यर्थः । ब्रह्मविद् महावाक्यार्थप्रत्यगात्मतत्त्वज्ञानवानित्यर्थः । तत्किं परोक्षतयैव, नेत्याह । ब्रह्मणि स्थित इति । ब्रह्मणि स्थितिर्नाम नित्यापरोक्षं ब्रह्मैवाहमस्मीति स्फुटानुभावेनावस्थानम् । एवंविधो ऽपि न यथेष्टचेष्टावानित्याहाभिन्नवृत्त इति । न भिन्नं नोल्लङ्घितं वृत्तमाचारो येन स तथा शिष्टविगर्हितो न भवतीत्यर्थः । दम्भो धर्मध्वजित्वमात्मनो लोके धार्मिकत्वख्यापनमिति यावत् । कुहकं परप्रतारणं, शाठ्यं नैष्ठुर्यं, माया परव्यामोहनं, मात्सर्यं गुणेषु दोषख्यापनम्, अनृतं मिथ्याभाषणम्, अहंकारो देहा-

भिमानः, ममत्वं पुत्रशिष्यादिषु स्वत्वाभिमान, एतैर्दम्भादिभिर्दोषैर्वर्ज्जित इत्यर्थः । एवंविधस्य किमित्यस्योपदेशे प्रवृत्तिरित्यत आह । केवलेति । परस्य संसारसागरान्निर्विण्णस्य यः परमपदपारप्रापणरूपो ऽनुग्रहस्तदेव प्रयोजनं यस्य स तथा, केवलविशेषणेनानुषङ्गिकमपि प्रयोजनान्तरं प्रवृत्तिहेतुं वारयति । तर्हि किं निर्निमित्तमेव परानुग्रहे ऽस्य प्रवृत्तिरुन्मत्तप्रवृत्तिवद्यादृच्छिकी, नेत्याह । विद्योपयोगार्थीति । उपयोगो विनियोगः, चात्वाले कृष्णविषाणां प्रास्यतीत्यादिवत् ।

त्यज धर्ममधर्मं च उभे सत्यानृते त्यज ।
उभे सत्यानृते त्यक्त्वा येन त्यजसि तत्त्यज ॥

इत्यत्र येन ज्ञानेन धर्मादिषु प्रवृत्तिनिरोधेन तानि परित्यजसि तज्ज्ञानं परित्यजेत्युक्ते ज्ञानस्यामूर्त्तत्वात्स्वरूपेण त्यागायोगाद्विशिष्टे शिष्ये प्रतिपादनं प्रतिपत्तिकर्म क्रियते, तच्च वस्तुमहिम्ना परानुग्रहतां प्रतिपद्यत इति भावः ॥ ५ ॥

एवंविध आचार्यः पूर्वमुपदिशेदित्युक्तं तत्रोपदेशक्रमं दर्शयति । प्रथमं किमुपदिशेदित्यपेक्षायामात्मैकत्वप्रतिपादकवाक्यान्युपदिशेदिति वाक्यानि पठति । सदेवेत्यादिना ।

(६) सदेव सोम्येदमग्र आसी, देकमेवाद्वितीयं, यत्र नान्यत्पश्यति, आत्मैवेदं सर्वं, ब्रह्मैवेदं सर्वम्, आत्मा वा इदमेक एवाग्र आसीत्, सर्वं खल्विदं ब्रह्मेत्याद्या आत्मैक्यप्रतिपादनपराः श्रुतीरुपदिश्य च ग्राहयेद् ब्रह्मणो लक्षणं, य आत्मापहतपाप्मा यत्साक्षादपरोक्षाद्ब्रह्मयोशनायापिपासे, नेति नेति अस्थूलमनणु स एष नेति नेति, अदृष्टं द्रष्टृ विज्ञानमानन्दं, सत्यं ज्ञानमनन्त, मदृश्ये नात्म्ये, स वा एषो महाज आत्मा ऽप्राणो ह्यमनाः स बाह्याभ्यन्तरो ह्यजो विज्ञानघन एवानन्तरमाबाह्यमन्यदेव तद्विदितादथो विदितात् ॥

इत्यात्मैकत्वप्रतिपादनपराः श्रुतीः पूर्वमुपदिशेदिति संबन्धः । यत्र नान्यत्पश्यतीत्यत्र नान्यच्छृणोति नान्यद्विजानाति स भूमेति वाक्यशेषः । ब्रह्मैवेदं विश्वमिदं वरिष्ठमिति शेषः । अत्र सद्भूमात्मब्रह्मशब्दाः पर्यायाः । अनेकशाखादिगतवाक्योदाहरणं गतिसामान्यादिति न्यायेनाविरोधतः स्वार्थपरत्वख्यापनार्थम् । किं तद्ब्रह्मादिशब्दैर्वस्तूच्यते, कथं च तदद्वितीयमवगम्यत इत्यपेक्षायामाह । उपदिश्य च ग्राहयेद् ब्रह्मणो लक्षणमिति । योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येतीति शेषः । आनन्दमनन्तमित्युभयत्र ब्रह्मेति वाक्यशेषः । एवं सर्वत्र वाक्येषु शेषाक्षराणि श्रुतिपरिचयेन पूरणीयानि, ग्रन्थभूयस्त्वान्न सर्वत्र प्रदर्श्यन्ते । य आत्मापहतपाप्मेत्यादिप्राजापत्यवाक्येन जाग्रदाद्यवस्थासु द्रष्टृत्वेनानुगतः अवस्थाधर्मरहितो ऽशरीरः प्रियाप्रियाभ्यामसंस्पृष्टः प्रत्यगात्मैव परं ज्योतिः परं ब्रह्म उपास्यं ज्ञेयं चेति प्रकरणार्थोपन्यासेन प्रत्यग्ब्रह्मैक्यमुपलक्षयेदित्यर्थः । य आत्मा सर्वान्तरो दृष्टेर्बुद्धिवृत्तिलक्षणाया द्रष्टा प्राणनादिव्यापारोपलक्षितः स एवाशनायादिप्राणान्तःकरणशरीरधर्मातीतः साक्षादपरोक्षाद्ब्रह्मेति द्वितीयवाक्यार्थः । नेतिनेत्यादिवाक्यानां सकलदृश्यप्रविलापनेनाद्वितीयात्मतत्त्वोपलक्षणपरत्वम् । अदृष्टं द्रष्टृ इत्यादिना नान्यदतोऽस्ति द्रष्ट्रित्यादिवाक्यैः सह सर्वसाक्षिप्रत्यगात्मैवाक्षरं यस्मिन्नव्याकृताकाशादिधरित्र्यन्तं जगदोतं च प्रोतं चेत्युपलक्षितं तत्त्वमित्यर्थः । विज्ञानमानन्दं ब्रह्मेति ।

कोऽन्वेनं जनयेत्युनः ।
मर्त्यः सन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति ॥

इति पृष्टस्य जगन्मूलकारणत्वेनोपलक्षितस्य स्वरूपं विज्ञानानन्दलक्षणमिति तत्पदार्थतत्त्वमुपलक्षितमित्यर्थः । एवं "ब्रह्मविदाप्नोति पर"मिति प्रकृतस्य ब्रह्मणः "सत्यं ज्ञानमनन्तं ब्रह्मेति" स्वरूपं निर्दिश्य "तस्माद्वा एतस्मादात्मन आकाशः संभूत" इत्यादिना जगत्कारणत्वेनोपलक्ष्य तस्यैव सृष्टेषु कार्यकारणसंघातेषु प्रवेशं दर्शयित्वा "अदृश्येनात्म्ये निरुक्त" इत्यादिना प्रपञ्चापवादेन सर्वाधारं सर्वसाक्षिणमात्मानमानन्दरूपं "ब्रह्मपुच्छं प्रतिष्ठेति", "अथ सो ऽभयं गतो भवति" "स यश्चायं पुरुषे यश्चासावादित्ये स एक" इति च तत्त्वमुपलक्षयेदित्यर्थः । "स वा एष महानज आत्मा यो ऽयं विज्ञानमयः प्राणेषु य एषो ऽन्तर्हृदय आकाशस्तस्मिञ्छेते स सर्वस्य वशी"त्यादिना जाग्रदाद्यवस्थाधर्मैरनन्वागतस्यासङ्गस्य कामाकामाभ्यां संसारमोक्षावनुभवतो बुद्ध्यादिसाक्षिणश्चिदात्मनो ऽन्तर्हृदये आकाशशब्दवाच्याजरामराभयादिलक्षणब्रह्माभेद इति तत्त्वमुपलक्षितमित्यर्थः ।

"दिव्यो ह्यमूर्त्तः पुरुषः स बाह्योभ्यन्तरो ह्यजः ।
अप्राणो ह्यमनाः शुभ्रो ऽक्षरात्परतः परः" ॥

इति । "अथ परा यया तदक्षरमधिगम्यते यत्तददृश्य"मित्यादिना ग्राह्यग्राहकाद्यनेकोपाधिप्रतिषेधेनोपलक्षितस्य सर्वभूतयोनित्वेन च संभावितस्य सर्वज्ञस्य सर्वविदोग्निविस्फुलिङ्गादिवज्जीवरूपेण विभक्तत्वोक्त्या प्राप्तपरिच्छेदशङ्कानिराकरणेन प्रत्यक्त्वमुपलक्षितं "ब्रह्मैवेदं विश्वमिदं वरिष्ठ"मित्यन्तेनेत्यर्थः । "इदं सर्वं यदयमात्मे"ति सर्वस्य दृश्यस्यात्मव्यतिरेकेण स्वरूपाभावमुक्तं दुन्दुभ्यादिदृष्टान्तैरुपपाद्य किं तदात्मनः स्वरूपमित्यपेक्षायां महद्भूतमनन्तमपारं विज्ञानघन

एवेति तत्त्वमुपदिष्टमित्यर्थः । "तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्ममयमात्मा ब्रह्म सर्वानुभू"रिति तत्त्वं पदार्थपरिशोधनपूर्वकं वाक्यार्थो दर्शितः । तत्रापूर्वमित्यादिना कार्यकारणत्वादिधर्मरहितत्वेन तत्पदार्थ उपलक्षितः, सर्वानुभूरिति सर्वसाक्षितया त्वंपदार्थः, अयमात्मा ब्रह्मेति वाक्यार्थ, इति विभागः । मनःप्राणादिषु प्रकाशकत्वेन प्रेरकत्वेन चोपलक्षितमात्मतत्त्वं ब्रह्म, विदिताविदिताभ्यां कार्यकारणाभ्यामन्यदिति तत्स्वरूपं निवेद्यते "ऽन्यदेव तद्विदितादथो अविदितादधी"त्यनेनेत्यर्थः ॥ ६ ॥

क्व चिदाकाशशब्देनापि ब्रह्म लक्ष्यत इत्याह । आकाशो वै नामेति ।

(७) आकाशो वै नामेत्यादिश्रुतिभिः, स्मृतिभिश्च, "न जायते म्रियते" "नादत्ते कस्य चित्पापं" "यथा ऽऽकाशः स्थितो नित्यं" "क्षेत्रज्ञं चापि मां विद्धि" "न सत्तन्नासदुच्यते" "अनादित्वान्निर्गुणत्वात्" "समं सर्वेषु भूतेषु" "उत्तमः पुरुष" इत्यादिभिः श्रुत्युक्तलक्षणाविरुद्धाभिः परमात्मासंसारित्वप्रतिपादनपराभिस्तस्य सर्वेणानन्यत्वप्रतिपादनपराभिश्च ॥

नामरूपयोर्जगद्बीजभूतयोरव्याकृतयोर्यो निर्वहिता व्याकर्त्ता ते नामरूपे यदन्तरा यस्य मध्ये वर्त्तेते न ततः पृथक् स्वतन्त्रे तद्ब्रह्म तदमृतं स आत्मेति वाक्यशेषाद्दहरोस्मिन्नन्तराकाश इत्यत्राकाशशब्देनापि ब्रह्म लक्ष्यत इत्यर्थः । आदिपदा"त्प्राणोस्मि प्रज्ञात्मा प्राण इति होवाचे,,त्याद्याः श्रुतयो गृह्यन्ते । न केवलं श्रुतिभिरेव ब्रह्मणो लक्षणं ग्राहयेदपि तु स्मृतिभिश्चेत्याह । स्मृतिभिश्चेति, श्रुत्युक्तलक्षणाविरुद्धाभिरिति स्मृतिविशेषणं, श्रुत्युक्तेर्थे स्मृत्युदाहरणं प्रतिपत्तिदार्ढ्यार्थं, न श्रुतेः प्रामाण्यसिध्यर्थं, विशेषणं च सांख्यादिस्मृतावतिप्रसङ्गव्यावृत्त्यर्थमिति च द्रष्टव्यं, परमात्मासंसारित्वप्रतिपादनपराभिरित्यादिविशेषणद्वयं श्रुतिस्मृत्योः साधारणं, परमश्चासावात्मा च परमात्मा, परमत्वं चास्याविद्यातत्कार्यसंघाततदवस्थासाक्षितया ऽव्यभिचार्यलुप्तप्रकाशस्वभावत्वं, तस्यासंसारित्वप्रतिपादनं संघातादवस्थात्रयोपाधेः सम्यग्विवेचनं तत्पराभिरित्यर्थः । तस्य शोधितस्य त्वंपदार्थस्य सर्वेण सर्वमस्मिंश्चितिं सर्वं सर्वाधिष्ठानं ब्रह्म तेनानन्यत्वं तदेकात्मत्वं तत्प्रतिपादनपराभिरित्यर्थः । न्यायानुगृहीताभिश्चेत्यस्मिन्नर्थे चकारः ॥ ७ ॥

एवं वाक्योपदेशेन तदर्थोपलक्षणपरश्रुतिस्मृतिव्याख्यानेन च प्रतिबोधितं शिष्यमज्ञानसंशयविपर्यासापोहेनोपदिष्टार्थे मतिनैश्चल्याय पुनः पृच्छेदाचार्य इत्याचार्यकृत्यमाह । एवं श्रुतिस्मृतिभिश्चेति ।

(८) एवं श्रुतिस्मृतिभिर्गृहीतपरमात्मलक्षणं शिष्यं संसारसागरादुत्तितीर्षुं पृच्छेत्, कस्त्वमसि सोम्येति, स यदि ब्रूयाद्, ब्राह्मणपुत्रो ऽदोन्वयो ब्रह्मचार्यासं गृहस्थो वेदानीमस्मि परमहंसपरिव्राट् संसारसागराज्जन्ममृत्युमहाग्राहादुत्तितीर्षुरि,त्याचार्यो ब्रूया,दिहैव ते सोम्य मृतस्य शरीरं वयोभिरद्यते मृद्भावं चापद्यते तत्र कथं संसारादुद्धर्तुमिच्छसीति, नहि नद्याः अवरे कूले भस्मीभूतो नद्याः पारं तरिष्यतीति, स यदि ब्रूयाद्, अन्यो ऽहं शरीरात् ॥

तथा च शिष्यप्रतिपत्तिपरीक्षणार्था श्रुतिर्भवति "यदि मन्यसे सुवेदेति दहरमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूप" मित्याद्या । हे सोम्य प्रियदर्शन कस्त्वं किमात्मक इति गुरुणा पृष्टो यदि शिष्यो ऽप्रतिपत्त्यादिदोषप्रतिबन्धवशाद् ब्रूयाद्ब्राह्मणपुत्र इत्यादि, तदाचार्यो ब्रूयादिति संबन्धः । असावन्वयो वंशो यस्य सोहमदोन्वयः, अमुकदीक्षितवंश्यो ऽहमित्यर्थः, महाग्राहो नक्रः तिमिङ्गिलो वा, अहो ऽयमद्यापि देहाभिमानप्रतिबद्धज्ञानोदय इति तं त्याजयत्याचार्यः । इहैव तव इत्यादिना । वयोभिः पक्षिभिर्गृध्रादिभिरित्यर्थः । एवं स्थूलदेहाभिमाने त्याजिते ततो विविक्तमात्मानं मन्यमानः सन्स यदि शिष्यो ब्रूयादन्यो ऽहं शरीरादित्यादि तदा इत्याचार्यो ब्रूयादित्युत्तरेणान्वयः ॥ ८ ॥

कथं शरीरादन्यत्वमवगतमित्यत आह । शरीरं तु जायत इत्यादिना ।

(९) शरीरं तु जायते म्रियते वयोभिरद्यते मृद्भावमापद्यते शस्त्राग्न्यादिभिश्च विनाश्यते व्याधिभिश्च प्रयुज्यते, तस्मिन्नहं सुकृतधर्माधर्मवशात्पक्षीव नीडमिव प्रविष्टः पुनःपुनः शरीरविनाशे धर्माधर्मवशाच्छरीरान्तरं यास्यामि पूर्वनीडविनाशे पक्षीव नीडान्तरम्, एवमेवाहमनादौ संसारे देवमनुष्यतिर्यङ्निरयस्थानेषु स्वकर्मवशादुपात्तमुपात्तं शरीरं त्यजन्नवंनवं चान्यदुपाददानो जन्ममरणप्रबन्धचक्रे घटीयन्त्रवत्स्वकर्मणा भ्राम्यमाणः क्रमेणेदं शरीरमासाद्य संसारचक्रभ्रमणादस्मान्निर्विण्णो भगवन्तमुपसन्नो ऽस्मि संसारचक्रभ्रमणप्रशमायेति, तस्मान्नित्य एवाहं शरीरादन्यः, शरीराण्यागच्छन्त्यपगच्छन्ति च वासांसीव पुरुषस्येति । इत्याचार्यो ब्रूया,त्साध्ववादीः सम्यक् पश्यसि ॥

शरीरावस्थाद्रष्टृत्वाद्दृश्याद्विकारिणो ऽहं द्रष्टा ऽविकार्यन्य इत्यर्थः। कथं तर्हि देहादन्यस्य तव देहाभिमानपूर्वको व्यवहार इति चे,दविद्याप्रयुक्तकामप्रवर्त्तितधर्माधर्मवशादित्याह। तस्मिन्नहमिति। सुकृतविशेषणेनाहंकारपूर्वकत्वद्योतनादहंकारस्य चाविद्यां विना केवले आत्मन्यसंभवादविद्याप्रयुक्ताभिमानमूलत्वं धर्माधर्मयोरिति भावः। यद्येवं जानासि मा तर्हि कर्म कार्षीरिति चे,त्पूर्वकृतकर्मवासनापरवशतयोत्तरोत्तरकर्मप्रवृत्तेर्न शक्नोम्यहं निरोद्धुमित्यभिप्रेत्याह। अनादाविति। ह्रियमाणकालनद्याः क्वचित्तरति क्वचिन्नेत्यादिन्यायेनाह। क्रमेणेदं शरीरमासाद्येति। बहूनां कर्मणां संचितत्वे ऽपि क्रमेणैव फलारम्भो न युगपदित्यैकभविकत्ववादः क्रमशब्देन निरस्यते। एतेन नित्यानित्यविवेक आत्मनो जात इति फलितमाह। तस्मान्नित्य एवेति। आचार्यस्तु विवेकोक्तिं प्रशंसन्नभ्यनुजानाति, साध्ववादीरिति ॥ ९ ॥

एवं विवेकवतस्तव वर्णाश्रमाद्यभिमानो भ्रान्तिमूल एवेत्याह। कथं मृषावादीरिति।

(१०) कथं मृषावादी,ब्राह्मणपुत्रो ऽदोन्वयो ब्रह्मचार्यासं गृहस्थो वेदानीमस्मि परमहंसपरिव्राडिति, स यदि ब्रूयाद् भगवन्कथमहं मृषावादिषमिति, तं प्रति ब्रूयादाचार्यो, यतस्त्वं भिन्नजात्यन्वयसंस्कारं शरीरं जात्यन्वयसंस्कारवर्जितस्यात्मनः प्रत्यभ्यज्ञासीर्ब्राह्मणपुत्रो ऽदोन्वय इत्यादिना वाक्येनेति, स यदि पृच्छेत्कथं भिन्नजात्यन्वयसंस्कारं शरीरं, कथं वा जात्यन्वयसंस्कारवर्जित इत्या,चार्यो ब्रूयाद्, शृणु सोम्य, यथेदं शरीरं त्वत्तो भिन्नं भिन्नजात्यन्वयसंस्कारं त्वं च जात्यन्वयसंस्कारवर्जित इत्युक्त्वा, तं स्मारये,त्स्मर्तुमर्हसि सोम्य परमात्मानं सर्वात्मानं यथोक्तलक्षणं श्रावितो ऽसि, "सदेव सोम्येद"मित्यादिभिः श्रुतिभिः स्मृतिभिश्च लक्षणं च तस्य श्रुतिभिः स्मृतिभिश्च ॥

कथं भ्रान्तिर्ममेति पृष्टवन्तमाचार्यो ब्रूयादित्याह। तमिति। किं ब्रूयादित्येतदाह। यतस्त्वमित्यादिना। जातिर्जन्म, अन्वयः पित्रादिः, संस्कारो जातकर्मादिरुपनयनादिश्च, भिन्ना अनात्मभूता जात्यन्वयसंस्कारा यस्य शरीरस्य तत्तथा जात्यन्वयसंस्कारवर्जितस्यात्मनः कूटस्थस्य स्वरूपमिवाहमित्युल्लिखन् शरीरं प्रति ज्ञातवान् ब्राह्मणपुत्र इत्यादिना वाक्येन, अतो विपर्ययदर्शित्वान्मृषावादीरित्यर्थः। उक्तमर्थं विशदीकर्तुं शिष्यप्रश्नमुत्थापयति। स यदीति। गुरोरुत्तरदानाय प्रवृत्तिमाहाचार्यइति। वक्तव्यस्यार्थस्यातिसूक्ष्मदृष्टिगम्यत्वात्सावधानो भवेत्याह। शृणु सोम्येति। यथेदमित्यादि वर्जित इत्यन्तं शिष्योक्त्यनुवादवाक्यमुक्त्वा तं शिष्यं पूर्वोक्तं परमात्मलक्षणं स्मारयेदिति योजना। यस्मात् सदेवेत्यादिश्रुतिभिस्तदर्थानुकूलाभिः स्मृतिभिश्च यथोक्तलक्षणं परमात्मानं सर्वात्मानं श्रावितो ऽसि तस्मात्स्मर्तुमर्हसि सोम्येति योजनीयो ग्रन्थः। "य आत्मापहतपाप्मे"त्यादिभिः श्रुतिभि"र्न जायत" इत्यादिस्मृतिभिश्च। पूर्वोक्तं ब्रह्मोपलक्षणं च तस्यात्मनः स्मर्तुमर्हसीत्यन्वयः ॥ १० ॥

---

॥ श्रीः ॥

## ॥ अथ बालरामायणाख्यनाटकस्य ॥

॥ नवमोऽङ्कः ॥

अतः परं रावणवधो भविष्यति।

ततः प्रविशति यमपुरुषः तत्रभवतो लुलायलक्ष्मणः सकलप्राणभृतां विहितविनाशस्य कीनाशस्य किमपि विश्वातिशायिनी प्रभविष्णुता। यतः।

नित्यस्मिताम्बुरुहविष्टरसंनिविष्टः
स्वेच्छाविनिर्मितचतुर्दशलोक एकः।
ब्रह्मेति यः किमपरं कविता श्रुतीनां
तस्यापि निःश्वसितसंहृति न्यक्कृतान्तात् ॥ १ ॥

परिक्रम्य पार्श्वे विलोक्य च। अहो नक्तंचरचक्रवर्त्तिनो वीरकचूडामणेः किमपि निष्प्रतीपमाज्ञातं यद्देपोऽस्मि तेनापि भगवता भूर्भुवःस्वस्त्रयविहितनियमेन यमेन विजनेऽपि श्रवसि समादिष्टः यथाज्ञापितोऽस्मि पुरुहूतेन यदुत विनतानन्दनः स्पन्दनरूपतामारोप्यास्माभिः परिकल्पितमातलिसूतसुनीतः सारथिर्दाशरथेः समरसीम्नि जैत्रं पत्रं कृतः संप्रति तु तादृशस्य रामभद्रस्य तादृशेन रावणेन सह द्वन्द्वयुद्धमनुमन्यामहे दिदृक्षामहे च तदुद्धृतनिजाक्षपटलपटलीभ्यो लङ्कालोकलेखमानमयेन जानीमः।

कदा केषां च केभ्यश्च क्षयो लङ्कानिवासिनां।
रामात्तु दशकण्ठस्य किंविधो भविता वधः ॥ २ ॥

येन तत्रैव क्षणे चारणोपदिश्यमानमहावीरप्रकाण्डप्रचाराः पुत्रदर्शनकुतूहलिना दिव्यरूपेण परमसुहृदा दशरथेन सह संग्रामसीमानमवतराम इति तद्वद्रमुख महाक्षपटलिकं मद्वचनाच्चित्रगुप्तमादिश येन लङ्कालेख्यकमुद्धृत्य समर्पयति पुरंदरश्रावणाय तद्यावच्चित्रगुप्तमेवोपसर्पामि परिक्रामितकेन विचिन्त्य अहो दशाननः सर्वेषामुपरि पराक्रमेण तथाहि।

यत्र दृष्टे हरेरक्ष्णां सहस्रं कुड्मलायते ।
कृतान्तदण्डः सोऽप्यस्य कण्ठे किमपि कुण्ठितः ॥ ३ ॥

अपिच ।

अवतरति विधाय ब्रह्मदण्डं प्रचण्डं
सकलजननभाजां कल्पितान्ते कृतान्ते ।
समरशिरसि यस्य प्राप भङ्गं धुताङ्गः
खुरदलितधरित्रीचित्रकायो लुलायः ॥ ४ ॥

कथमयं चित्रगुप्तः ।

ततः प्रविशति चित्रगुप्तः अङ्गभङ्गनाटितकेन ।

दिवानिशं राक्षसमण्डलस्य
प्रचण्डरामानुचरैर्जितस्य ।
निबध्नतो मे निधनप्रपञ्चं
स्थितः करः खेदजडाङ्गुलीकः ॥ ५ ॥

पुरुहूतः । उपसृत्य कर्णे एवमेवं ।

चित्रगुप्तः यदादिशति स्वामी इदमर्प्यते निबन्धोद्धरणनाटितकेन न खलु कश्चिदिह प्रच्छन्नो वा मत्तो वा योऽपि मन्त्रं निर्भेदयेत् साक्षात्करणाय तत् प्रतिवाचय । पुरुषो वाचयति ।

अतिक्रान्ते कृते काले प्राप्ते त्रेतादिवत्सरे ।
कृष्णकार्तिकपक्षाद्यदिवसोदययोगिनि ॥ ६ ॥
रामैकरतसुग्रीवप्लवङ्गमबलैर्बलात् ।
लङ्काऽलङ्कारतां बिभ्रत्युपरुद्धा महोदधेः ॥ ७ ॥
धूम्राक्षं क्रोधधूम्राक्षमकम्पनमकम्पनं ।
हनवानञ्जनाजन्मा भिन्नाञ्जनसमप्रभं ॥ ८ ॥
प्रहस्तो दीर्घहस्तेन नीलेनाशु निमीलितः ।
द्वितीयेऽह्नि द्विधा चक्रे कुम्भकर्णो रघूद्वहः ॥ ९ ॥
नरान्तकस्यान्तकोऽभूदङ्गदो रुचिराङ्गदः ।
नीतौ देवान्तकश्चान्तं त्रिशिराश्च हनूमता ॥ १० ॥
ऋषभेण महापार्श्वः पार्श्वपीडनतो हतः ।
चक्रेऽतिकायं निष्कायं तृतीयेऽह्नि च लक्ष्मणः ॥ ११ ॥
कुम्भकर्णाद्भवौ कुम्भनिकुम्भौ दम्भपण्डितौ ।
हरिराजहनूमद्भ्यां चक्राते यमसेवकौ ॥ १२ ॥
मकराक्षं सरोजाक्षः खरपुत्रं खरान्तकः ।
रामो गुणद्रुमारामो निजघान घनौजसं ॥ १३ ॥
मेघनादं महानादं सायकैर्हतनायकैः ।
लक्ष्मणः सिंहलक्ष्माणं बबाध प्रियबान्धवः ॥ १४ ॥
महोदरो विरूपाक्षो विरूपाक्षो महोदरः ।
चतुरेण चतुर्थेऽह्नि सुग्रीवेण रणे हतौ ॥ १५ ॥
संग्रामे वीरसंग्रामे राजितः समराजितः ।
चक्रे रणमहाचक्रे मार्गणैर्मर्ममार्गणैः ॥ १६ ॥
दशकण्ठो धृतोत्कण्ठो राघवादस्त्रलाघवात् ।
पञ्चमेऽहनि पञ्चत्वं प्रयासेन प्रयास्यति ॥ १७ ॥

युगलकं । चित्रगुप्तः । तदपरिहीणकालं भगवन्तमुपतिष्ठ येन पुरंदरादेशमनुतिष्ठति स्वामी ।

इति निष्क्रान्तौ विष्कम्भकः ।

ततः प्रविशतः पुरंदरदशरथौ चारणमिथुनं च । चारणः । आर्य मातले सकलदानवेश्वरपराक्रमणं सौत्रामणं अतिदृक्कुतूहलोत्तानितलोकलोचनपक्ष्माणमैरावणलक्ष्माणं गगनाङ्गणसंचरणवेगतरलितमाणिक्यं किंकिणीनिनदनिःस्यन्दनं स्यन्दनमितः कुरु अयमसावतिसुरासुरसंगरनिवेशो रामरावणयोः समरसंरम्भोद्देशः । सर्वे रथवेगं नाटयन्ति ।

दशरथः । भगवन् गीर्वाणनाथ इतः प्रसादं विधाय निधीयन्तां दृष्टयः ।

अयमनुकृतवल्लीफुल्लतापिच्छगुच्छो
रणभुवमवतीर्णः कार्मुकी रामभद्रः ।
अयमपि दशकण्ठः कुण्ठिताम्भोदशोभः
परिकलयति बाणं भ्रान्तकोदण्डदण्डः ॥ १८ ॥

कर्णं दत्त्वा आकाशे । किमाह रभसोल्लासितहृदयामोदमुद्रो रामभद्रः ।

भो लङ्केश्वर दीयतां जनकजा रामः स्वयं याचते
कोऽयं ते मतिविभ्रमः स्मर नयं नाद्यापि किंचिद्गतं ।
नैवं चेत् खरदूषणत्रिशिरसां कण्ठासृजा पङ्किलः
पत्री नैष सहिष्यते मम धनुर्ज्याबन्धबन्धूकृतः ॥ १९ ॥

पुरंदरः । सखे भूकाश्यप कतिहायनः पुनरयं वत्सो रामभद्रः, येनेदृशान्यतिपरिणतप्रणेयानि च वचांसि वक्तुं शिक्षितः ।

दशरथः । सविनयं । देव भवदनुग्रहस्यैष प्रभावः स खल्वयस्कान्तमणेरनुभावो यदयो द्रवति । आकाशे कर्णं दत्त्वा । किमाह राक्षसराजः रेरे रावण दोर्दण्डचण्डिमाहृतराम त्वत्पूर्वपुरुषस्यापि प्रहरणैर्नैव सोढमासीत् तथाहि । स मया ।

भृङ्गः स्तम्बेरमेणेव मदलम्पटचेष्टितः ।
अनरण्यो वरेण्यश्रीश्चपेटो चिपिटीकृतः ॥ २० ॥

किंच रे अनरण्यकुलकुमार ।

चक्रे चक्रं मुरारेर्मयि कुपितवधूकुण्डलक्षेपलीलामस्मिन्नंसे विभिन्नस्तडिति बिसलता काण्डवत् कालदण्डः ।
वक्षस्यूर्जस्वि वज्रं गतमिह च तुलां स्त्रैणहारप्रहारैर्यत् सत्यं पत्रिणस्ते मम वपुषि घने मन्मथास्त्रीभवन्ति ॥ २१ ॥

पुरंदरः । विचिन्त्य । अहो महदन्तरं रामरावणयोर्वचनचातुर्यं प्रति यद्वा मतिः परिणमन्ती पुरुषमुदात्तयति न वयः ।

चारणः । कर्णं दत्त्वा आकाशे । किमाह रामभद्रः तर्हि सज्जतामयमनङ्गबाणोपमानो बाणः ।

चारणी । ससंभ्रमं प्रणम्य । भअवं पुरंदर णिवेसीअंतु विसदकंदोदकाणणमणोहरा इदोइदो अच्छिविच्छोहा । जदो पढमं कोदंडमंडलादो पलअकेउदंडप्पमाणो बाणो पच्छा कोसलणरिंदणंदणस्स वअणादो वाणी णिग्गता भअवं इंदाणीवल्लह अस्सुदपुव्वं अदिट्ठपुव्वं च रामचंदचरिदं जं दाणिं दसाणणस्स मंदोदरीचडुलचुंबणविलुत्ततिलअबंधे णिडालवट्टे जअधअदंडत्तणमुवणीदो बाणो * ।

चारणः । सुगेहिनि सुदृष्टिरसि ।

यस्मिन्नम्बकमम्बिकापतिरसौ देवस्तृतीयं च हत्
पाद्मं यत्र च रोचनाम्बुतिलकं न्यस्यन्ति पृथ्वीभुजः ।
क्रोधेऽष्टुं भ्रुकुटीपुटेन घटते यच्च त्रिभङ्गात्मना
तत्रैव त्रिदिवद्रुहः प्रथमतो रामेण बाणोऽर्पितः ॥ २२ ॥

चारणी । सविषाद । हध्धीहध्धी हदासदसकन्धरेण विणिब्भरदलदिंदीवरवजाहिरामस्स रामस्स गिरिसिलाविसालं वच्छत्थलमुद्दिसिअ कअंतदाढाजरठो सरो सन्धिदो † ।

दशरथः । कः कोऽत्र धनुर्धनुः पुरंदरप्रसादीकृतसखिभावे सति दशरथे कथमिव रावणो रामभद्रं प्रहरतु ।

पुरंदरः । सखे दशरथ द्वन्द्वयुद्धमनुचितं क्षत्रधर्मस्य दिव्यभावस्य च यदद्वन्द्ववृत्तिरपि शस्त्रं गृह्णाति ।

दशरथः । तत् कथयतु वत्सः किमत्र सांप्रतं ।

पुरंदरः । यदत्र सांप्रतमसांप्रतं वा राघवधुरंधरो रामदेव एव तद्वेद ।

चारणः ।

यन्मैथिलीमदनतल्पतलं यदात्त-
मारीचरत्नमृगचर्मशिलाघनं च ।
रामस्य वक्षसि चिरोज्झितहारदाम्नि
तस्मिन्नयं दशमुखेन शरो निखातः ॥ २३ ॥

दशरथः । कथं रावण निपुणोऽसि यदेकेन बाणेन हृदये द्वयं ताडितं रामो दशरथश्च ।

चारणः ।

मन्दोदरीस्तनविसूत्रितकुङ्कुमं य-
द्वज्रघातकणचूर्णविकीर्णहारं ।
लङ्केश्वरस्य हृदि तत्र भवद्रुवाऽपि
मारीचरक्तपिहितो निहितः पृषत्कः ॥ २४ ॥

चारणी । सचमत्कारं आअण्णापादिदकोदंडमंडलनिग्गलंतसरधोरणीणीरंधणिरुध्धभुअणकंदरो सुठ्ठु खु रामरावणाणं णिब्भरो समरसंरंभो अहह का वि लक्खणजेठ्ठस्स दसरहणंदणस्स धाणुक्कदा जेण अदिक्कमिअ रधवरखेउदण्डं सरप्पदा पअट्टंति * ।

पुरंदरः । सखे महीमहाराज अमुना रामशरविद्यावैशारद्येन देवं त्रिपुरान्तकरं शंकरमनुस्मारितोऽस्मि ।

दशरथः । रावणावलोकनाटितकेन कथं रामभद्रचरितप्रमोदवते भगवते महेन्द्रायापि कुप्यति दशास्यः कर्णं दत्त्वा आकाशे । किमाह रावणः ।

स्मर्तुं युक्तः स तव समयः संयतं त्वां विमोक्तुं
शच्या यस्मिन्नहमतिशुचा याचितो भर्तृभिक्षाम् ।
यद्वा क्षुद्रो जन इव कथं कथ्यतां राक्षसेन्द्रः
पाणौ यस्य स्मयगरजुषामौषधं चन्द्रहासः ॥ २५ ॥

अपिच रे कपिललोमशवाहो अहल्याजार ।

बाणान् स्यन्दनकेतुयष्टिसुहृदो रामस्य नामाङ्कितान्
दृष्ट्वा वासव किं दृशां दशशती निःशल्यमुत्फुल्लति ।
सद्यस्तापसकामिनोऽस्य विमतेराजौ तु कृत्वा शिरस्त्वां कारागृहदत्तगाढनिगडं कर्ता प्रगे रावणः ॥ २६ ॥

दशरथः । भूय आकाशे कर्णं दत्त्वा । किमाह वत्सो मे रामभद्रः अहो वालिवालवयस्य पौलस्त्य भवादृशेभ्यो वीरवरपरिभाषाः प्रवर्तन्ते तत् किमिदं नाम यदन्यः प्रतिपक्षोऽन्यस्मै कुप्यते तदेहि मामेव योधय । यद्दुर्म्मार्गमार्गणादपि दाशरथिना क्षत्रियेण भवान् विनेय एव । विचिन्त्य, । किमाह रावणः रेरे मानुषीपुत्रायमसावक्षत्रियो रावणः स भवान् क्षत्रियो रामः तद् दृश्यतां कतरो विनेयः कतरो विनेतेति, किमाह रामभद्रः हंहो अमानुषीपुत्र अयमसौ क्षत्रियो रामः स भवानक्षत्रियो रावणस्तदत्र दृश्यतां कतरो विनेयः कतरो विनेतेति ।

चारणः । विलोक्य । कथममर्षेण दर्पिताभ्यां रामरावणाभ्यां परस्परं प्रत्युपक्रान्तमिषुवर्षाद्वैतं ।

---

* भगवन् पुरन्दर निवेश्यन्तां विशदकमलकाननमनोहरा इतइतोऽक्षिविक्षेपाः । यतः प्रथमं कोदण्डमण्डलात् प्रलयकेतुदण्डप्रमाणो बाणः पश्चात् कोशलनरेन्द्रनन्दनस्य वदनाद्वाणी निष्क्रान्ता । भगवन्निन्द्राणीवल्लभ अश्रुतपूर्वमदृष्टपूर्वं च रामचन्द्रचरितं यदिदानीं दशाननस्य मन्दोदरीचटुलचुम्बनविलुप्ततिलकबन्धे ललाटपट्टे जयध्वजदण्डत्वमुपनीतो बाणः ।

† हाधिक्हाधिक् हताशदशकन्धरेणापि निर्भरदलदिन्दीवरवजाभिरामस्य रामस्य गिरिशिलाविशालं वक्षस्थलमुद्दिश्य कृतान्तदंष्ट्राजरठः शरः संहितः ।

* आकर्णाकृष्टकोदण्डमण्डलनिर्गलच्छरधोरणीनीरन्ध्रनिरुद्धभुवनकन्दरः सुष्ठु खलु रामरावणयोर्निर्भरः समरसंरम्भः । अहह कापि लक्ष्मणज्येष्ठस्य दशरथनन्दनस्य धानुष्कता येनातिक्रम्य रथवरकेतुदण्डं शरच्छटाः प्रवर्त्तन्ते ।

चारणी । ससंभ्रमं । सुरपरमेसर भीसणं वट्टदि । जदो णिविडपाडिदपडाआवडा विधुरिदबंधुरधुरावंधा तक्खणद्दो खंडिदरुक्खदंडा तारणभंगिभंगुरिदपगाहपरिगाहा णिगिहीदगमणपवलचक्कचंकमणा उद्दाउदलिददीहकूवरपवरा इमाणं अगमणपवलचक्कचंकमणा परिप्फुरंति दीहप्पमाणा बाणा । अविअ पडिक्खलिदजरढपक्का भग्गचारणसंचरणा मंथरिदणिरवज्जविज्जाहरविहारा रभसुंमूलिदसुरासुरप्पसरा वित्तपणायणद्धिअपवत्तविवडविच्छारा णिट्ठुरणिट्ठाविदगंधव्वगव्वा पअडविध्धंसिदसिध्धसिध्धा गअणंगणुत्तासिदसउत्तसंताणा कहिं दाणिं पुण इमाणं ण पसरिदा सरसंघाआ * ।

चारणः । सम्यग्विभाव्य । अति हि सुदूरमन्तरं कार्मुककर्मणि विरञ्चिविरोचनकुलतिलकयोरनयोर्हस्तलाघवस्य तथाहि ।

रघुपतिवदनेन्दौ कार्मुकैः पङ्क्तिसंख्ये-
र्दश विकिरति बाणान् यातुधानप्रधानः ।
दशभिरपि च काण्डैरेककोदण्डवाही
प्रहरति दशवक्त्रीं राघवो रावणस्य ॥ २७ ॥

अपिच । सुरचक्रवर्तिन् इह हि कामिनामनुरागपरिग्रहो गुणलवलाभलोभेन दोषप्रमोषमावहति तथाहि ।

रामक्षिप्तान् प्रतीच्छत्ययमिह विशिखान् वक्षसा राक्षसेन्द्रः
सीताहस्ताम्बुजार्पितमलयभवस्यासकान्तर्वनेषु ।
सोल्लासं हारवल्लीकवचपरिचिते ते तु तस्मिन् विशन्तः
स्वेदाम्भः प्रारभन्ते पुलकमुपनयन्त्युद्धतं चार्पयन्ति ॥ २८ ॥

आकाशे कर्णं दत्त्वा । किमाह सविचिकित्सक्रोधं ।

रामः । न केवलममुना समबाणवर्षेण रावणप्रमार आरभ्यते अपित्वेतस्य जानकीकरतलस्पर्शकेलिसंभावनोपा गात्रेषु पत्त्रिषु रोमाञ्चकञ्चुकं यावदामोच्यते तद्भवतु विश्वामित्रोपदिष्टमन्त्रैर्दिव्यास्त्ररमुमायोधयामि ।

चारणी ! सचमत्कारं किं उण एदं आमूलफलिदफुलिंगजडिलजालावलीविलीणतुहिणसरणिसारणीपूडिज्जमाणमंदाइणीचंदभाआपहुदिनदीसत्थमंथरिदवित्थारो सअलकुलसेलचक्कवदी कुवेराधिठिदं दिसमधिवसंतो हिमवंतो संतवणुत्तरलसिलाजटुणीसंदणिज्जरट्टुइभंतवरणंवंकमणक्कंदिअकरिंदपवेससमूससंतसेत्तसलिलमदप्फालिदतडंतणिवतंडपच्छरविच्छारपअदसद्दसंदोहभरिदगंभीरगुरुगुहाकुहरम्मसे विंझो सिमिसिमाअंतसंततसिरिखंडमंडलीतह्रपणट्ठभुअइंदभोअभरिज्जंतत्तंबवणीसोत्तसंत्तासिदसिप्पिसंपुडमुहपलोट्टमोताहलकरंबिदतंरखणीपवणविच्छिण्णणिअंवडंबरालंकिददरिकणमहीवलओ मतओ डाहकुविदकुंभसंभवमहामुणिगेहिणीदिन्नविवणदिट्ठिच्छडाकउप्पसंकोडिदवडुलजालुधीउपीडापरिहरिज्जमाणमाणिक्कचक्कवालवेल्लिअलदाभवणगब्भसंभाविदहदवहुच्छेदमुहुत्तसुहपसुत्तविज्जाहरमिहुणजणिदमणमोहणोरोहणो * ।

पुरंदरः । ध्रुवं शस्त्रमाग्नेयमामन्त्रितं पौलस्त्यदमनविधावस्ततन्द्रेण रामचन्द्रेण । यतः ।

रामनर्तितमहाधनुर्मुखा-
द्यत्रयत्र निपतन्ति सायकाः ।
तत्रतत्र जलधेर्जलोच्चये
कार्यतो विरचयन्ति वाडवं ॥ २९ ॥

अपिच ।

सद्यः कल्पद्रुमाणां मणिकुसुमवतां वर्त्तते दावदाहः
क्रन्दन्त्युत्तप्तधारास्रुतिकृतकरकावृष्टयस्तोयवाहाः ।
रामस्योच्चण्डचापप्रणिहितहुतभुङ्मार्गणार्चिःप्रपञ्चै-
स्तूर्णात्तीर्णः समुद्रं सरति च विसरो मेरुहेमद्रवस्य ॥ ३० ॥

चारणः । आकाशे कर्णं दत्त्वा । किमाह रावणः कथं दिव्यास्त्रसमरंसमारम्भी रामस्तदहमपि समारभे । यद्वा ।

आग्नेयास्त्रं हृदयदवथुर्वारुणं हन्त शास्त्रं
धारावाष्पं पवनशरतां यान्ति च श्वासदण्डाः ।
तज्जानक्या किमिव न कृतं रक्षसां स्वामिनो मे
दिव्यैरस्त्रैर्यदयमपरं तापसः कर्तुकामः ॥ ३१ ॥

चारणी । आमूलुद्दूलिअपारिआअतरुराअरादणो उक्कंपिदाणप्पकप्पपादवा विसुतिदसंताणअतरुसंताणा विमद्दिदामंदमंदारुदुमाणिदलिदणंदणवणहारिअंदणा इमे आसुतिदसत्तभुअ-

---

* सुरपरमेश्वर भीषणं वर्तते यतो निबिडपाटितपताकापटा विधुरितबन्धुरधुराबन्धास्तत्क्षणतः खण्डिताक्षदण्डास्ताडनभङ्गिभङ्गुरितप्रग्रहपरिग्रहा निगृहीतगमनप्रबलचक्रचङ्क्रमणा उद्दामदलितदीर्घकूबरप्रवरा अनयोरसमानाः परिस्फुरन्ति दीर्घप्रमाणा बाणाः । अपिच परिस्खलितजरठपक्षा भग्नचारणसंचरणा मन्थरितनिरवद्यविद्याधरविहारा रभसोन्मूलितसुरप्रसरा विपणणप्रपन्नगप्रपञ्चविवरविस्तारा निष्ठुरनिष्ठापितगन्धर्वगर्वाः प्रकटविध्वंसितसिद्धसिद्धा गगनाङ्गणोत्त्रासितशकुन्तसन्तानाः क्वेदानीं पुनरेतयोर्न प्रसृताः शरसङ्घाताः ।

* किं पुनरिदमामूलफलितस्फुलिङ्गजटिलज्वालावलीविलीनतुहिनसरणिसारणीपूर्यमाणमन्दाकिनीचन्द्रभागाप्रभृतिनदीसार्थमन्थरितविस्तारः सकलकुलशैलचक्रपतिः कुबेराधिष्ठितां दिशमधिवसन् हिमवान् सन्तपनोत्तरलशिलाजतुनिस्यन्दनिर्झरदह्यमानचरणचङ्क्रमानाक्रन्दितकरीन्द्रप्रवेशसमुच्छ्वसत्स्रोतःसलिलस्फालिततटान्तनिपतत्प्रस्तरविस्तारप्रवृत्तशब्दसन्दोहभरितगम्भीरगुरुगुहाकुहरमध्यो विंध्यः सिमसिमायमानसन्ततश्रीखण्डमण्डलीभ्रष्टभुजगेन्द्रभोगभ्रियमाणताम्रपर्णीस्रोतस्सन्त्रासितशुक्तिसंपुटमुखपतितमुक्ताफलकरम्बिततास्रपर्णीपवनविच्छिन्ननितम्बडम्बरालंकृतदक्षिणमहीवलयो मलयो दाहकुपितकुम्भसंभवमहामुनिगेहिनीदत्तविवर्णदृष्टिच्छटाकलापसंकोटितचटुलजलौसीडपरिह्रियमाणमाणिक्यचक्रवालवेल्लितलताभवनगर्भसंभावितहुतवहोच्छेदमुहूर्तसुखसुप्तविद्याधरमिथुनजनितमनोमोहनो रोहणः ।

णावसाणा ववमाणा पवट्टंति * ।

पुरंदरः । नूनमात्मनि कार्शानवमस्त्रमसमर्थं समर्थयता त्रिभुवनाभोगभङ्गनिमित्तमग्निमारुतसंयोग इति सामीरणमासूत्रितं राक्षसराजेन तथाहि ।

दिव्यानां पानपङ्क्तीर्दिशिदिशि विकिरन् भग्नचिह्नोरुदण्डः
पञ्चानां स्वर्द्रुमाणाममरमधुलिहां रुग्णशाखाप्रकाण्डः ।
भञ्जन् बर्हावतंसं हरसुतशिखिनः पिच्छविच्छेदनाभि-
र्वायुर्वात्येष चण्डो जलधितटरुहां मर्दनो विद्रुमाणां ॥ ३२ ॥

चारणी । किं पुण मसिणवट्टिदराअवट्टसिणिद्धसुद्धमुद्धेण हामलच्छाएण विच्छाइज्जइ ठाअणं दुद्दिणेण आवज्जिज्जइ कलकलरवुक्कंठाविसंठुलकंठाहिं तंडवाडंबरो सिहिडिमंडलीहिं णिविडिइ मिणालदंडपंडुराहिं मंडिदवम्हंडकंदडहराहिं जलधाराधोरणीहिं गज्जिज्जइ णिविदुल्लासिअवंसकरिकरिल्लविदुरिल्लेहिं फारफालिदगंभीरभेरीभीसणेहिं जलहरेहिं † ।

पुरंदरः । मन्ये पवनोद्दीपितदहनास्त्रशान्तये जलधरास्त्रमिदमाहूतं रामभद्रेण तथाहि ।

तैलस्निग्धान्ध्रनारीचिकुरविरचनामेचकाः शक्रचाप-
ज्योतिर्लक्ष्माण एते निचुलपरिचिताश्चातकाचान्तवारः ।
न्यस्यन्तः केतकीनां मुकुलपरिकरं केकिनां नृत्तकारा-
स्तारावर्त्मोन्नमन्तः कमलकवलनाः पूरयन्त्यम्बुवाहाः ॥३३॥

ततश्च ।

रोदसीकन्दराभोगमानयष्टिसमक्रमैः ।
क्रियतेऽर्णवमग्नेव धाराम्भोभिर्जगत्त्रयी ॥ ३४ ॥

चारणी । पेक्खदु देवो अण्णोण्णजुभ्झंतजलहत्थिसच्छा कल्लोलकोलिणिलुक्कंतगिरिपक्खिणो लक्खिज्जंततिअसिंदसिंधुरबंधवा समुल्लसंतपोऊससेसा दीसंतदेवदुमवादवालवाला अवलोइज्जंतणाराअणसूअरसमुध्धरिदधरणिवेढणिलुक्कणट्ठाणा विच्छरंतकोत्थुहसगोत्तमणिकरंविदपाआलजंवाला उक्कंतलच्छीवालविलासुद्देसा सप्पवंचपंचजणजणणीसंखिणीसणाहा ससंभमभमंतकच्छवडिंभगब्भा पअडिज्जंतदामोदरणिद्दाविमद्दसअणिज्जसेसरमणिज्जा माहवमहातिमिगोत्तगिलिज्जंततिमिंगिला णिब्भरं भरंति भुअणाइं इमे समुद्दा * ।

पुरंदरः । नूनमात्मनि वारुणास्त्रमप्यतन्त्रं मन्यमानेन त्रिभुवनाभोगगर्भमहाकन्दरप्लावनाय जलं जलसंपृक्तं महाजलाय कल्पत इत्यौदन्वतमस्त्रमाहूतं पौलस्त्येन तथाहि ।

कुर्वन्तो वाडवाग्नेर्द्रुतकरिमकरग्रासमर्चिःप्रकारं
दैत्यस्त्रीमुक्तहाहारवचकितबलच्छक्तिनिर्मुक्तमुक्ताः ।
पक्षोत्क्षेपेण चण्डाडुमरितपयसः पक्षिणां क्ष्माधराणां
त्रीन् लोकान् प्लावयन्ति प्रसभविरचितावर्तमुद्राः समुद्राः ॥३५॥

चारणी । भअवं दससदक्ख पेक्ख पेक्ख कलिदकलिकालकवलणा सत्तसाअरपाणप्पवीणा णिव्वाणणअरराअमग्गा धम्मदुममहारामा कोधपाअवप्पसरपरसुणो णिविडिदजडाजूटबंधा कमंडलुमंडिदहत्था पअडिदणिप्पद जोअपट्टा वंभसुत्तपवित्तिदखंधबंधा भअवंतो अगत्थिमहेसिणोऽलक्खसंखा संचरंति † ।

पुरंदरः । मन्ये त्रिभुवनपरिप्लावनपयःपाननिमित्तमगस्त्योपदिष्टमगस्त्यास्त्रं धनुषि संहितं रघुकुलराजपुत्रेण तथाहि ।

लोपामुद्रानिबद्धोपचरणविधयो धौतवल्कोत्तरीया
रक्षानामाधिराज्ये विरचितरतयो ब्रह्मसूत्राञ्चितांसाः ।
एते निर्यान्त्यगस्त्याश्चलचुलुकपुराचान्तसप्ताब्धिवारो
रुद्राक्षाक्षावलीभिर्द्विगुणवलयिता बिभ्रतः कर्णपालीः ॥३६॥

चारणः । सविस्मयं नमुचिमथनमन्यरितमन्यो शतमन्यो दिव्येनास्त्रजातेन दिव्यमस्त्रजातं विजित्य तत् किमपि कृतं रक्षोलक्ष्मीविरामेण रामेण यदनिशं विमृशतोऽपि मे न चेतः प्रत्येति न वाच उच्चरन्ति निरङ्कुशा दशाननस्याज्ञा विभाव्य सावष्टम्भं । यद्विदं निवेद्यते ।

विश्वाज्ञादानदक्षाक्षरमुखरमुखं चन्द्रहासोपपाद्य-
च्छेदक्रीडारसज्ञं तदिदमनवधिक्रोधहुंकारधारि ।
सार्धं शुद्धान्तनारीनयनजपयसा सूचितं देवदारै-
राकण्ठाद्दाशकण्ठं भुवि पतति शिरो रामभल्लायलूनं ॥३७॥

---

* आमूलोद्वलितपारिजाततरुराजा उत्कम्पितानल्पकल्पपादपाविसूत्रितसंतानतरुसंताना विमर्द्दितामन्दमन्दारद्रुमा निर्गलितनन्दनवनहरिचन्दना इमे आसूतसप्तभुवनावसानाः पवमानाः प्रवर्त्तन्ते ।

† किं पुनर्मसृणवर्त्तितराजपट्टस्निग्धमुग्धेन श्यामलच्छायेनापि छाद्यते गगनाङ्गणं दुर्दिनेन । आवर्ज्यते कलकलरवोत्कण्ठाविसंष्ठुलकण्ठाभिस्ताण्डवाडम्बरः शिखण्डिमण्डलीभिः । निबिडायते मृणालदण्डपाण्डुराभिर्मण्डितब्रह्माण्डकन्दराभिर्जलधाराधोरणीभिः । गर्ज्यते निबिडोल्लासितवंशकरिकरीन्द्रसदृशैः स्फारोत्स्फारितगम्भीरभेरीभीषणैर्जलधरैः ।

* प्रेक्षतां देवः अन्योन्ययुध्यमानजलहस्तिसार्थाः कल्लोलकेलिनिरुत्क्रान्तगिरिपक्षिणो लक्ष्यमाणत्रिदशेन्द्रसिन्धुरबान्धवाः समुल्लसत्पीयूषशेषा दृश्यमानदेवद्रुमपादपालवाला अवलोक्यमाननारायणसूकरसमुद्धृतधरणिपृष्ठनिलयनस्थाना विस्तार्यमाणकौस्तुभसगोत्रमणिकरम्बितपातालजम्बाला उत्क्रान्तलक्ष्मीबालविलासोद्देशा सप्रपञ्चपञ्चजनजननीशङ्खिनीसनाथाः ससंभ्रमभ्रमत्कृष्णकच्छपडिम्भगर्भाः प्रकटायमानदामोदरनिद्राविमर्दशयनीयशेषरमणीया माधवमहातिमिगोत्रगिल्यमानतिमिंगिला निर्भरं भरन्ति भुवनानीमे समुद्राः ।

† भगवन् दशशताक्ष प्रेक्षस्वप्रेक्षस्व कलितकलिकालकवलनाः सप्तसागरपानप्रवीणा निर्वाणनगरराजमार्गा धर्मद्रुममहारामाः क्रोधपादपप्रसरपरशवो निबिडितजटाजूटबन्धाः कमण्डलुमण्डितहस्ताः प्रकटितयोग ट्टा ब्रह्मसूत्रपवित्रितस्कन्धबन्धा भगवन्तोऽगस्त्यमहर्षयोऽलक्ष्यसंख्याः संचरन्ति ।

पुरंदरः । हंहो ऐन्दुमतेय अतिदुष्करं कृतं रामभद्रेण यतः ।

शम्भोरग्रेनिजकरचरच्चन्द्रहासप्रसूतां
लङ्कानाथः किमपि सुबहोर्विस्मरन्नेव कालात् ।
धाराज्योतिस्तरलितशिखैः सांप्रतं रामबाणैः
कण्ठच्छेदव्यतिकररुजं लम्भितः स्मारितश्च ॥ ३८ ॥

दशरथः । शौर्यगाम्भीर्ये त्रिभुवनातिशायिनी राक्षसराजस्य यदित्थं गते ऽपि न चलितं प्राचाहंकारेण तथाहि ।

एतल्लूनं दशमुखशिरः स्रंसते कण्ठपीठा-
त्त्वत्तुर्धत्ते धनुषि सशरे चैतदुग्राट्टहासं ।
एतद्रामं प्रति च कुरुते धिक्कृशतं क्रोधवाचा-
मेतल्लङ्कामभि च भवति स्त्रीजनाश्वासनाय ॥ ३९ ॥

चारणी । विहस्य । ता अज्जपहुदि दसाणणं णवाणणं वाहरिस्सामो * ।

चारणः । प्रिये मञ्जुवादिनि जानाम्यद्यैव निराननमप्यभिधास्यसि नन्वयमोंकारो रावणशिरोमण्डलच्छेदविद्यायाः ।

दशरथः । प्रतिगृहीता प्रतिभेदयिनी दिव्यवाक् बद्धो वाससि ग्रन्थिः ।

चारणः । कर्णं दत्त्वा आकाशे । किमाह रामभद्रः रेरे राक्षसीपुत्र ।

यद्गौरीचरणाब्जयोः प्रथमतस्त्यक्तप्रणामक्रियं
प्रेमार्द्रेण सविभ्रमेण च पुरा येनेक्षिता जानकी ।
लूनं ते तदिदं च राक्षसमशिरोजातं च शान्तं मनः
शेषच्छेदविधिस्तु संप्रति परं स्वर्वन्दिमोक्षाय मे ॥ ४० ॥

पुनः कर्णं दत्त्वा आकाशे । किमाह रावणः रेरे क्षत्त्रियापुत्र सुलभविभ्रमचर्मचक्षुरसि तदवलोकय कतमदत्र लूनं शिरः ।

दशरथः । विमृश्य । सप्रणामं सकलभूर्भुवःस्वस्त्रयैकवीर शुनासीर मायाविनिर्मितलङ्केश्वरशिरोदर्शनेन विलक्षं क्रुद्धो रामः शितकाण्डमण्डलीभिरकाण्डचण्डाभिरन्तरितमार्तण्डमण्डलाभिरखण्डोड्डमरितत्रिभुवनाभोगाभिर्भाभिरभिवर्षितुं प्रवृत्तः ।

चारणी । देव पेक्खपेक्ख णिविडभिउडीकोडिकुडिललडालवट्टाइं जरठदाढदंडवरणिट्ठुरदुट्ठाहरुट्ठाणाइं रहसणीसरंतदीहहुंकारदारुणणासावंसविवरंतराइं रामसरधाराघोरणीहिं चउद्दिसं स्सहुत्ति णिवडंति छिण्णविवण्णाइं लंकेसरसिराइं † ।

दशरथः । चमत्कृत्य ।

यस्यांयस्यां ककुभि रभसस्पष्टदंष्ट्राकरालं
लङ्काभर्तुर्निपतति शिरो भल्लनिर्लूनकण्ठं ।
तस्यास्तस्यास्तरलितदृशा स्वर्गिवर्गेण नष्टं
प्राक्संस्कारक्रमभयवता योजनानां शतानि ॥ ४१ ॥

सहसावलोक्य । अहो मायाविता राक्षसस्य ।

रामबाणकृतः पातो न यावदवधार्यते ।
क्रियते तावदुद्भेदो मूर्ध्नो रावणमायया ॥ ४२ ॥

अतश्च ।

लङ्कावीरस्य मायाचयचतुरमतेर्मैथिलीनाथचाप-
व्यापारोद्भ्रान्तबाणव्रणनधृतरुषः स्वां प्रतिज्ञां विवक्षोः ।
ग्रीवागर्भप्रणालीसरणिसमुचितैकैकवर्णक्रमेण-
च्छिन्नैर्द्विन्नैर्मुखाब्जैः कथमपि हि गिरामिति पङ्क्तिः समाप्तिं ॥ ४३ ॥

कर्णं दत्त्वा आकाशे । किमाह रामभद्रः प्रतिकूलं हि दैवं स्वारब्धमपि कार्यं विपर्यासयति तथाहि ।

शत्रुध्वंसः किल जनकजासंगमस्यैकहेतु-
स्तेनारब्धं दशमुखवधाडम्बरं राघवेण ।
छिन्नंछिन्नं पतति च शिरो जायते चान्यदन्य-
ल्लङ्काभर्तुस्तदिह करवै हा कथं मन्दभाग्यः ॥ ४४ ॥

पुनराकाशे । किमाह रावणः हंहो राम किमलीकशिरःखण्डनाडम्बरेण विडम्बयस्यात्मानं, क्व पुनः स्वेच्छाजन्मनां रावणावयवानां विच्छेदः, पुनराकाशे । किमाह रामः रावण अयं मे प्रीतये भवज्जम्भकभावः तथाहि ।

यन्मूलतो दशशिरांसि भवन्ति यच्च
छेदेषु तानि शतशोऽथ सहस्रशश्च ।
तत् साधु राक्षसपते कथमन्यथाऽय-
मुत्सृज्यतां जनकजाहरणापवादः ॥ ४५ ॥

पुनराकाशे । किमाह रावणः आः क्षत्त्रियखेट कापटिकतापस धनुरारोपणसमयप्रथमगृहीतां सीतामभिलषन्नुपपतिरिव शीर्षच्छेद्योऽसि पुनराकाशे । किमाह रामः रेरे पिशाचापसद ।

रम्भोपभोगरभसेन निरर्गलोऽसि
नो मैथिलीहरणनामसहोऽपि रामः ।
नन्वस्मि भास्करकुलप्रभवो द्युभूपा
पूषा स एव हि निजान्वयकर्मसाक्षी ॥ ४६ ॥

तदित्थमभिदधानमपवित्रं वक्त्रमितो निर्विशतु ते शुद्धिम् ।

चारणः । विभाव्य संत्रस्य च । किमपि निरुपमानं राघवकोदण्डपाण्डित्यमसदृशाकारश्च पौलस्त्यपुरुषकारः यतः ।

---

* तदद्यप्रभृति दशाननं नवाननं व्याहरिष्यामः ।

† देव प्रेक्षस्व प्रेक्षस्व निबिडभ्रुकुटीकोटिकुटिलललाटपट्टानि जरठदंष्ट्रादण्डकरनिष्ठुरदंष्ट्राधरोष्ठानि रभसनिस्सरद्दीर्घहुंकारदारुणनासावंशविवरान्तराणि रामशरधाराधोरणीभिश्चतुर्दिशं झटिति निपतन्तिच्छिन्नविवर्णानि लङ्केश्वरशिरांसि ।

छिन्नं शिरो निपतदन्तरतस्तदेत-
दादाय देव निजमेव दशाननेन ।
मुक्तं च वक्षसि ककुत्स्थकुलध्वजस्य
जातश्च कुड्मलितपङ्कजचारुचक्षुः ॥ ४७ ॥

दशरथः । हा वत्स रामभद्र कतरदिदं प्रहरणं यदमुनापि मूर्छितोऽसि ।

पुरंदरः । सखे दशरथ रामभद्रं प्रति कृतं करुणावाणीभिः नन्वेष सकलवीरप्रकाण्डचन्द्रचूडकोदण्डस्य दलयिता ।

चारणः । कर्णं दत्त्वा आकाशे । किमाह रामः तदवयवान्तरच्छेदपुरःसरं शिरःखण्डनकर्म विरचयामि मा कश्चन नियतप्रतिबन्धो मायाविधिः स्यात् ।

चारणः । न केवलमभिहितमनुष्ठितं च । पुनराकाशे कर्णं दत्त्वा । किमाह रामः ।

छिन्नोद्गतो वहति कार्मुकमस्य मुष्टि-
र्लूनोदितः शरवरं च करो बिभर्ति ।
कृत्तोत्थितं च मुखमर्पितदृष्टि लक्ष्ये
धिक् तन्ममैष विफलोऽम्बुधिसेतुबन्धः ॥ ४८ ॥

दशरथः । सद्यश्छिद्यमानमुण्डमण्डलीमायाप्रपञ्चवञ्चितराघवशरलाघवमनच्छमवगच्छन्नेष विंशत्यर्धकन्धरो दुर्धरधनुर्धरोऽत्युच्चण्डचित्रकवचसज्जनिजशरीर सहस्रनिर्माणच्छद्मकर्मणि परां प्रवीणतामुपदर्शयति तन्न विद्मः किमत्र प्रतिपत्स्यते रामभद्रः ।

पुरंदरः । यत् कुलाचलसंदोहदहनकर्मणि भगवान् कालाग्निरुद्रः ।

चारणः । ससंभ्रमं । यदादिशति त्रिदशचक्रवर्ती पश्य ।

यावन्तो भुवि चाम्बरे च ककुभां कोणोपकोणेषु च
व्यावल्गन्ति धनुर्धराः कवचिनो मायामया रावणाः ।
रामः स्वर्गजनाशिषां पदमसावेकोऽपि कोपोद्धत-
स्ता वद्दाप्रतिवक्त्रयोजितशरश्रेणीभिरालक्ष्यते ॥ ४९ ॥

दशरथः । अद्य फलितं मे पुरंदरप्रसादेन यत् समरसीमनि वत्सरामभद्रं दशाननादुत्कर्षवन्तं पश्यामि ।

चारणः । कर्णं दत्त्वा आकाशे । किमाह रामः भवतु भगवतः कुशिकनन्दनाज्जृम्भकास्त्रप्रदानप्रसंगोपात्तं मायाहरमस्त्रं संदधामि ।

चारणः । सम्यगवलोक्य । दशरथं प्रति । महाराज कारय चक्षुषी पारणं दृश्यतां द्रष्टव्यं ।

मायाहरशरन्यासादेष नक्तंचरेश्वरः
एकशेषशिराः संप्रत्येकशेषो रथे स्थितः ॥ ५० ॥

सर्वतोऽवलोक्य । रावणभयशरणागतसमयनाकिनि पिनाकिनि त्रिभुवनस्वस्त्ययननिमित्तमुदाहृतब्रह्मणि ब्रह्मणि निरन्तरचिन्तानिश्चेतसि प्रचेतसि संभावितजगन्नाशे कीनाशे समुपालब्धविधौ भगवति विधौ परिस्नायति रिपुग्रामनिधनदे धनदे दूरोत्क्षिप्तप्रणे समीरणे विगलितवसौ विभावसौ दुरपत्यजननिन्दितपुलस्त्येऽगस्त्ये कल्याणमनुध्यायति ध्यानचक्षुषि मुनिवरिष्ठे वशिष्ठे गायति सामविश्वाम्बुजविकाशमित्रे विश्वामित्रे भयालापस्फुरिताधरे विद्याधरे निर्वारणोद्यतचारणहाहारवमुखरवृन्दारकवृन्दं भुवनाभोगं विदधता जीवितनिरपेक्षेण राक्षसराजेन निजस्यन्दन सविधीकृत्य समुद्भ्रान्तसारथिर्दाशरथिरथः सपदि दोर्दण्डमण्डलेन धूर्बन्धे विधृतो भ्रामितश्च ।

दशरथः । साकूतं प्रणम्य । भगवत्यो रघुकुलदेवता दशरथमनुगृह्णीत भगवन्निन्द्र गृहाण दम्भोलिमम्भोधरलाञ्छनं धनुर्वा नन्वेष कवलीक्रियते रामचन्द्रो रावणराहुणेति मूर्छति ।

पुरंदरः । प्रियवयस्य किमाकुलोऽसि कियत्कालं जलदतिरस्कारिणी मार्त्तण्डमण्डलमन्तरयति ।

दशरथः । ससंभ्रममवलोकयन् हस्तमुद्यम्य समरसुन्दर पुरंदर पश्यपश्य ।

वत्सस्य साश्वः साक्षश्च सचक्रध्वजधूर्युगः ।
व्योम्नि भ्रमरकभ्रामं भ्राम्यतेऽनेन हा रथः ॥ ५१ ॥

इति पतति ।

पुरन्दरः । अये किमपि महाबलपराक्रमो राक्षसराजः ।

चारणः । कियद्वा वर्णनमर्णवस्यायं मकरालय इति ।

वेल्लद्विद्युल्लतालीच्छुरितपरिकरैरम्बुदैर्वान्तवार्भि-
र्दिव्यानां व्योमयानैर्भयचकितवधूवक्त्रमुक्तार्तनादे ।
लङ्केन्द्रेणायहस्तभ्रमितरथपथप्रस्थितैस्तारकाणा-
मुत्तालैश्चक्रवालैरिव च विरचिता वक्त्रनीराजनश्रीः ॥ ५२ ॥

नेपथ्ये कलकलानन्तरं ।

यद्रक्षाणां दशानामिव दश ककुभः शासितुं सृष्टिरासी-
द्विंशत्या यश्च दोर्भिर्दशगुणितमिव प्राप्तवान् वीरधर्मं ।
लङ्केन्द्रः संयतेन्द्रो रणभुवि दशभिर्मैथिलीवल्लभेन
ज्योतिर्दीप्रैः क्षुरप्रैः स खलु विरचितो निर्विबन्धः कबन्धः ॥ ५३ ॥

दशरथः । आकर्ण्य । कः पुनरयमकारणबन्धुः श्रवणामृतवर्षिणा वचनेनास्मानाश्वासयति ।

चारणः । नेयमाश्वासना किं पुनर्बिभीषणप्रियकरणाय लङ्कावैतालिक एष निवेदयति ।

दशरथः । तत् किमिव नेदं सहस्रचक्षुषापि भगवता नयनाञ्जलिपुटपेयीकृतं ।

चारणः । शृणु यथा ।

यावल्लीलाक्षचक्रध्वजहरितरलालातचक्रायमाणं
भूगोलास्फालहेतोर्भ्रमयति नभसि स्यन्दनं राक्षसेन्द्रः ।
दोर्दण्डैश्चण्डवेगोद्धृतहरगिरिभिः

दशरथः । किंचिदुत्थाय सुप्रपाता रावणकरान्दोलितस्यन्दनभ्रमणभङ्गिः तद्वारय तद्वारय वत्सं ।

चारणः । सहर्षं । द्राक् तुरङ्गेण तावत् ।
तस्यैवाकर्ण्य वाणीं दशममपि शिरश्छिन्नवान् नाम रामः ।

पुरंदरः । विहस्य शङ्के भवत एव शब्दवेधित्वं शिक्षितमभ्यस्तं च रामभद्रेण किं पुनरुपाध्यायादधिकः संवृत्तः, विमृश्य तदेतदुद्दामरामस्तुरप्रवेशिनो ब्रह्मास्त्रस्य भूर्भुवःस्वस्तितयडामरं सूदितदशकन्धरमदं भद्रमाजृम्भितं ।

दशरथः । तत् प्रियं नः ।

चारणी । ता किंच पडुपडहझल्लरीविड्डुरिल्लं संवसकंसतालमिस्सं णिस्संखसंखं भूरिभेरीविपंचीपवंचभंकारझंकारभंगिगब्भिणीकुसुमवरिसपुव्वं ऋणवच्छिन्नमप्फालिदो देवदाहिं विजअदुंदुहा * ।

चारणः । शृणु यथा ।

हेलाखण्डितचण्डहेमहरिणैर्बाणैः कुलं रक्षसां
शेषीभूतविभीषणं गुणनिधौ कृत्वापि रामे स्थिते ।
प्रत्युज्जीवनशङ्कया यमजितो लङ्कापतेः कातरै-
र्नो मुक्ताः कुसुमस्रजो न च सुरैरास्फालितो दुन्दुभिः ॥

नेपथ्ये ।

बाणैर्लाञ्छितकेतुयष्टिशिखरो मूर्च्छानमत्सारथि-
मांसास्वादनलुब्धगृध्रविहगश्रेणीभिरासेवितः ।
रक्षोनाथमहाकबन्धपतनक्षुण्णाक्षदण्डो हयै-
र्हर्षित्वा स्मृतमन्दुरास्थितिहृतैर्लङ्कां रथो नीयते ॥

पुरंदरः । सखे दशरथ अयमनन्यसदृशाकारो रामभद्रपुरुषकारः, अतश्च ।

निर्दग्धत्रिपुरेन्धनोऽस्तु गिरिशः क्रौञ्चाचलच्छेदने
पाण्डित्यं विदितं गुहस्य किमुतावज्ञातयुद्धोत्सवो
लूत्वा पङ्क्तिगलावमाननवनं चैतस्य लङ्कापते-
र्वीराणां चरिताद्भुतस्य परमे रामः स्थितः सीमनि ॥

चारणः । विहस्य । अवगतदशकन्धरवधैर्विबुधैरिदानीं सत्वरैर्दाशरथौ हर्षपुष्पवर्षमारभ्यते । नेपथ्ये ।

सर्वा गीर्वाणवन्द्या व्रजत निजगृहान् बन्धुमाधोरण द्राक्
स्वर्गेभस्तम्भशालां नय सुरकरिणं यामिका यात देवाः ।
भूयो दिव्यद्रुमाणां ननु भवतु वने नन्दने संनिवेशो
द्वारि क्षिप्रं यदैन्द्रे दशवदनशिरः किंकरैरंतकस्य ॥

चारणः । नाकनरलोकनायकौ दिष्ट्या वर्धेथे पुरंदरप्रतीहारवचनेन अपरिक्षतेन च रामशरीरसौन्दर्येण । तथाहि ।

रणरमिकसुरस्त्रीमुक्तमन्दारदामा
स्वयमयमवतीर्णो लक्ष्मणान्यस्तहस्तः ·
विरचितजयशब्दो वन्दिभिः स्यन्दनाङ्का-
द्दिनकरकुललक्ष्मीवल्लभो रामचन्द्रः ॥

इति निष्क्रान्ताः सर्वे रावणवधो नाम नवमोऽङ्कः ॥

* तत् किमिति न पटुपटहझल्लरीमिश्रं सवंशकांस्यतालमिश्रं निःशङ्कशङ्खं भूरिभेरीविपञ्चीप्रपञ्चभाङ्कारझङ्कारभङ्गिगर्भिणीकुसुमवर्षपूर्वमनवच्छिन्नमास्फालितो देवताभिर्विजयदुन्दुभिः ।

THE

# VAIŚESHIKA APHORISMS
# KAṆĀDA.

## FIRST BOOK FIRST DAILY LESSON.

(Continued from page 185.)

The Veda is authoritative. तद्वचनादाम्नायस्य प्रामाण्यम् ॥ ३ ॥

Aph. 3. Authoritativeness belongs to revelation because it was declared by Him.

[1] The word He (*tat*) signifies God though He has not been previously mentioned, it being inferred from His being universally known, just as in the aphorism of Gautama, 'That is unauthoritative being vitiated by falsity, self-contradictoriness and repetition,' by the word 'That' the Veda is signified though not previously mentioned. Accordingly authoritativeness belongs to revelation—the Veda—, because it was declared by Him—revealed by God. Or else 'That' signifies the contiguous [word] Merit, and accordingly authoritativeness belongs to revelation—the Veda—because it declares—expounds—Merit: for whatever statement expounds a matter held to be authoritative is an authority. U.

[2] By the word 'That' expressive of something already known God is signified, though not previously mentioned. And accordingly the sense is that the authoritativeness of the Veda must necessarily be admitted since it was declared by an everlasting, all-wise, and all holy Spirit. V.

Means of attaining the highest good. धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम् ॥ ४ ॥

Aph. 4. The Highest Good [results] from knowledge of the truth which springs from particular Merit [and is obtained] by means of the similarity and dissimilarity of the Categories, Substance, Attribute, Action, Generality, Particularity, and Inhesion.

[1] तदित्यनुपक्रान्तमपि प्रसिद्धिसिद्धतयेश्वरं परामृशति यथा तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्य इति गौतमीयसूत्रे तच्छब्देनानुपक्रान्तोऽपि वेदः परामृश्यते । तथा च तद्वचनात् तेनेश्वरेण प्रणयनादाम्नायस्य वेदस्य प्रामाण्यं यद्वा तदिति सन्निहितं धर्ममेव परामृशति तथा च धर्मस्य वचनात् प्रतिपादनात् आम्नायस्य वेदस्य प्रामाण्यं यद्धि वाक्यं प्रामाणिकमर्थं प्रतिपादयति तत्प्रमाणमेव यत इत्यर्थः ॥

[2] ईश्वरस्याप्रक्रान्तत्वेऽपि प्रसिद्धार्थकेन तच्छब्देन परामर्शो भवत्येव तथाच नित्यसर्वज्ञनिर्दोषपुरुषप्रणीतत्वात् वेदस्य प्रामाण्यमवश्यमेवाभ्युपेयमित्यर्थः ॥

[1] Such knowlege of the truth depends upon the Vaiśeshika system, hence even causation of the Highest Good belongs to that [system.] Between the system and the Highest Good the connection of relation of cause to effect, between the system and knowledge of the truth the connection of relation of agency to the agent, between the Highest Good and knowledge of the truth the connection of relation of effect to cause, between the Categories Substance &c. and the system the connection of relation of matter expounded to exposition, is understood to exist. It is from knowledge of these connections that in this world seekers of the Highest Good apply themselves to this system. The Highest Good is final cessation of pain. Finality of cessation of pain is non-simultaneity with antecedent non-existence (potential existence) of pain in the common substratum, or simultaneity with subsequent non-existence (destruction) of all particular qualities of soul which are produced at the same time and have a common substratum. Or emancipation [of the soul] is potential existence of pain terminated by cessation of all particular qualities [of the soul.] In the second aphorism of Gautama it is stated that on the successive removal of pain, birth, activity, vice, and false knowledge, and on their consequent non-existence emancipation ensues. Here the argument from non-existence of cause to non-existence of effect proves emancipation to be characterised by antecedent non-existence of pain, for with respect to the removal of activity, consequent upon the removal of vice, the removal of birth on the removal of activity and the removal of pain on the removal of birth, such removal is not subsequent non-existence but non-production, and non-production is antecedent non-existence. 'From knowledge of the truth which springs from particular merit,—such is the special character of that [knowledge], and accordingly particular Merit is Merit differentiated by finality: but if by knowledge of the truth the [Vaiśeshika] system be intended (the truth being known by means of that system), then particular Merit must be explained as characterised by the ordinance and grace of God, for it is a tradition that the great saint Kaṇáda revealed the system in consequence of having obtained the ordinance and grace of God. U.

[1] Particular merit is particular good works done either in this life or in a former state of existence. By particular good works knowledge of the truth is produced by means of the similarity and dissimilarity of Substance and the other Categories. Next meditation on the soul is produced, next, by means of meditation, a [mental] representation of the soul is produced, and after that, by means of destruction of false knowledge &c., Emancipation ensues. In this place there is mention of six Categories spoken of as existing, but in reality Non-existence is also implied by the sage as another Category. Accordingly there is no discrepancy in such aphorisms as the following, in the second daily lesson. 'From non-existence of cause is non-existence of effect', and in the ninth book, ['An effect has no antecedent existence] because of the non-existence of ascription to it of actions and attributes.' V.

Division of Substance.

पृथिव्यापस्तेजो वायुराकाशं कालो दिगात्मा मन इति द्रव्याणि ॥ ५ ॥

Aph. 5.—Earth, Water, Light, Air, Ether, Time, Space, Soul, and the Internal Organ,—are the Substances.

[2] The particle *iti* is expressive of limitation, therefore the meaning is that there are nine Substances, neither more nor less. If it be objected, What is the use of the particle *iti* when the exclusion of a lesser or greater number [of Substances] is effected by the mere force of the division? this is to be determined, that it is by reason of the use of the particle *iti* after the mere enunciation [of Substances] in the construction of

[1] एतादृशं तत्त्वज्ञानं वैशेषिकशास्त्राधीनमिति तस्यापि निःश्रेयसहेतुत्वं दण्डापूपायितम् शास्त्रनिःश्रेयसयोर्हेतुहेतुमद्भावः शास्त्रतत्त्वज्ञानयोर्व्यापारव्यापारिभावः निःश्रेयसतत्त्वज्ञानयोः कार्यकारणभावः द्रव्यादिपदार्थशास्त्रयोः प्रतिपाद्यप्रतिपादकभावः सम्बन्धो ऽवगम्यते एतेषाञ्च सम्बन्धानां ज्ञानान्निःश्रेयसार्थिनामिह शास्त्रे प्रवृत्तिः । निःश्रेयसमात्यन्तिकी दुःखनिवृत्तिः । दुःखनिवृत्तेश्चात्यन्तिकत्वं समानाधिकरणदुःखप्रागभावासमानकालीनत्वं युगपदुत्पन्नसमानाधिकरणसर्वात्मविशेषगुणध्वंससमानकालीनत्वं वा । अशेषविशेषगुणध्वंसावधिकदुःखप्रागभावो वा मुक्तिः । गौतमीयद्वितीयसूत्रे दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्ग इत्यत्र कारणाभावात् कार्याभावाभिधानं दुःखप्रागभावरूपामेव मुक्तिं द्रढयति नहि दोषापाये प्रवृत्त्यपायः प्रवृत्त्यपाये जन्मापायः जन्मापाये दुःखापाय इत्यपायो ध्वंसः किन्त्वनुत्पत्तिः सा च प्रागभाव एव । धर्मविशेषप्रसूतादिति तत्त्वज्ञानादित्यस्य विशेषणं तत्र धर्मविशेषो निवृत्तिलक्षणो धर्मः यदि तु तत्त्वं ज्ञायते ऽनेनेति तत्त्वज्ञानं शास्त्रमुच्यते तदा धर्मविशेष ईश्वरनियोगप्रसादरूपो वक्तव्यः श्रूयते हीश्वरनियोगप्रसादावधिगम्य कणादो महर्षिः शास्त्रं प्रणीतवानिति ॥

[1] धर्मविशेषः ऐहिको जन्मान्तरीयो वा सुकृतविशेषः । सुकृतविशेषेण द्रव्यादिपदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानं जायते तत आत्ममननं अनन्तरं निदिध्यासनेनात्मसाक्षात्कारो जायते तदनन्तरं मिथ्याज्ञानादिनाशक्रमेण मोक्षो भवतीत्यर्थः । अत्र षट्पदार्थकीर्त्तनं भावाभिप्रायेण वस्तुतो ऽभावो ऽपि पदार्थान्तरतया मुनेरभिप्रेतः । अत एव द्वितीयाह्निके कारणाभावात् कार्याभाव इति सूत्रस्य नवमाध्याये क्रियागुणव्यपदेशाभावात् इत्यादि सूत्राणाञ्च नासङ्गतिः ॥

[2] इतिकारो ऽवधारणार्थः तेन नवैव द्रव्याणि नाधिकानि न न्यूनानीत्यर्थः । ननु विभागबलादेव न्यूनाधिकसङ्ख्याव्यवच्छेदसिद्धौ किमितिकारेणेति चेत् उद्देशमात्रपरतया ऽपि सूत्रसम्भवे विभागतात्पर्यस्फोरणार्थमेवेतिकाराभिधानात् सुवर्णादीनामीश्वरस्य चात्रैवान्तर्भावात् अन्धकारस्य चाधिकत्वेनाशङ्क्यमानस्याभावत्वव्युत्पादनादेतदध्यवसेयम् । असमासकरणं तु सर्वेषां प्राधान्यप्रदर्शनाय लक्षणमेतेषां तु वैधर्म्यावसरे सूत्रकृदेव दर्शयिष्यति ॥

the aphorism, in amplifying the sense of the division, since gold &c., and God are included in this [enumeration], and since it is explained [in V. 2,19] that darkness suspected [by some] of being additional is a non-existence. The construction without the use of compound words is to shew the importance of all [the Substances]; and the author of the aphorisms himself will point out their differentiæ when treating of their dissimilarities. U.

*Note.—Cp.* the Muktávalí on Bháshá-parichchheda 3. [1] If it be objected, "There is a tenth substance, Darkness; why is it not enumerated? for it is cognised by preception; and substantiality belongs to it because it is possessed of colour and action; and, because devoid of odour, it is not Earth; and, because it possesses dark colour, it is not water &c.; and the eye deprived of light is the organ [used] in perceiving it." [We reply that] it is not so, because it is illogical to imagine another Substance, when it is necessarily produced by non-existence of light. The notion that it is possessed of colour is erroneous. The notion that it possesses action is also an error occasioned by the departure of light. It will be declared how it is that gold is included in light.'

Darkness was affirmed to be a substance by the Sánkhyas, Gold by the Mímánsakas.

[2] The construction without [the use of] compound words is designed to shew that all [the Substances] independently of one another produce particular effects, or is intended to teach that they all equally produce effects which inhere in them. Among these nine divisions of Substance, Ether, Time, and Space do not form any class since they have only a single existence, but the rest form classes. V.

*A. E. Gough.*

---

[1] ननु दशमं द्रव्यं तमः कुतो नोक्तं । तद्धि प्रत्यक्षेण गृह्यते । तस्य च रूपवत्त्वात् कर्मवत्त्वाच्च द्रव्यत्वम् । तच्च गन्धशून्यत्वात् न पृथिवी । नीलरूपवत्त्वाच्च न जलादिकम् । तत्प्रत्यक्षे चालोकनिरपेक्षं चक्षुः करणमिति चेत् । न । आवश्यकतेजोऽभावेनोपपत्तौ द्रव्यान्तरकल्पनाया अन्यायत्वात् । रूपवत्ताप्रतीतिस्तु भ्रमरूपा । कर्मवत्त्वप्रतीतिरपि आलोकापसारणौपाधिकी भ्रान्तिरेव । स्वर्णस्य यथा तेजस्यन्तर्भावस्तथा वक्ष्यते ॥

[2] असमासकरणं तु सर्वेषामितरनैरपेक्ष्येण कार्यविशेषोत्पादकताप्रदर्शनार्थं स्वसमवेतकार्यजनने सर्वेषां तुल्यताज्ञापनार्थं वा । अत्र नवसु द्रव्यविभाजकेषु गगनत्वकालत्वदिक्त्वानामेकैकमात्रवृत्तित्वाच्च जातित्वं शेषाणां पुनर् जातित्वमेवेति ॥

## SCENES FROM THE RAMAYANA.

### TIDINGS OF SITA.

'As on the breezy hill I stood,
That rises o'er the pathless wood,
High o'er me flew a monstrous form,
Dark as the cloud that heralds storm.
I saw the giant's flashing eye;
I heard a woman's piteous cry.
A voice from out the still air came
Of weeping mixt with Rama's name.
A dove, whom eagle talons grasp,
She struggled in the giant's clasp.
I heard again a wilder shriek:
She saw me on the mountain peak.
An anklet from her foot she drew,
And with it cast her garland too.
The token I have guarded well
Some tidings of thy love may tell.'
Quick to the mountain cave he went,
And brought the treasured ornament.
Then burst the tear from Rama's eyes
As, gazing on the well-known prize,
'O Sita, O my love!' he said;
Then swooned and fell as fall the dead.

### RAVAN'S PALACE.

Then sweetly to his ear were borne
The blended notes of drum and horn,
Cymbal and tabour, deep and loud,
Like thunder from a distant cloud.
Awhile he stood, then nearer drew,
Till flashed upon his startled view
The car of Ravan, long and wide,
A measured league from side to side:
The car that flew o'er flood and hill
Obedient to the master's will.
Its jewelled arches high o'erhead
An ever-changing lustre shed
From ruby, pearl, and every gem,
On golden pillars under them.
Delicious came the tempered air
That breathed a heavenly summer there,
Stealing through bloomy trees that bore
Each pleasant fruit in endless store:
Enclosed within that pearly bound,
The wondering chief a palace found,
Of vast extent and stately height
With doors of gold and lazulite,
And decked with every lovely thing,
The mansion of the Giant King.
No check was there from jealous guard,
No door was fast, no portal barred.

Only a sweet air breathed to meet
The stranger, as a host should greet
A wanderer of his kith and kin
And woo his weary steps within.
He stood within a spacious hall
With fretted roof and painted wall,
The giant Ravan's boast and pride,
Loved even as a lovely bride.
'Twere long to tell each marvel there,
The crystal floor, the jewelled stair,
The gold, the silver, and the shine
Of chrysolite and almandine.
There breathed the fairest blooms of spring,
There flashed the proud swan's silver wing,
The splendour of whose feathers broke
Through fragrant wreaths of aloe smoke.
'Tis Indra's heaven,' the chieftain cried,
Gazing in joy from side to side:
'The home of all the Gods is this:
The mansion of eternal bliss!'
There were the softest carpets spread,
Delightful to the sight and tread,
Where troops of fairest women lay
O'ercome by sleep, fatigued with play.
The cup no longer cheered the feast;
The sound of revelry had ceased;
The tinkling feet no longer stirred;
No chiming of a zone was heard.
So when each bird has sought her nest,
And swans are mute and wild bees rest,
Sleep the fair daughters of the lake
Till the sun's kiss shall bid them wake.
Like the calm field of autumn's sky
Which stars unnumbered glorify,
So shone the tyrant's sumptuous room
With living stars that chased the gloom.
'These are the stars,' the chieftain cried,
'In summer nights that earthward glide;
In brighter form they re-appear.
To shine in matchless lustre here,'
With wondering eyes awhile he viewed
Each graceful form and attitude.
One lady's head was backward thrown,
Bare was her arm and loosed her zone.
The garland that her brow had graced
Hung closely round another's waist.
Here gleamed two little feet, all bare
Of anklets that had sparkled there.
Here lay a queenly dame at rest
In all her glorious garments dressed.
There slept another whose small hand
Had loosened every tie and band.
In careless grace another lay
With gems and jewels cast away,
Like a young creeper when the tread
Of the wild elephant has spread
Destruction and confusion round,
And hurled it flowerless to the ground.
Here lay a slumberer still as death,
Save only that her balmy breath
Raised ever and anon the lace
That floated o'er her sleeping face.
There, sunk in sleep, an amorous maid
Her sweet head on a mirror laid,
Like a fair lily bending till
Her petals float upon the rill.
Another black-eyed damsel pressed
Her lute upon her heaving breast,
As though her happy arms were twined
Round him for whom she long had pined.
Another pretty sleeper round
A silver vase her arms had wound,
That seemed—so fresh and fair and young—
A wreath of flowers that o'er it hung.
In sweet disorder lay a throng
Weary of dance and play and song:
Where heedless girls had sunk to rest,
One pillowed on another's breast,
Her tender cheek scarce seen beneath
Red roses of the falling wreath,
The while her long soft hair concealed
The beauties that her friend revealed.
With limbs at random interlaced
Round arm and leg and throat and waist,
That wreath of women lay asleep
Like blossoms in a careless heap.

## THE DESCENT OF GANGA.

He stood upon the lofty crest
That crowns the Lord of Snow,
And bade the river of the Blest
Descend on earth below.

Himalaya's child, adored of all,
The haughty mandate heard,
And her proud bosom at the call
With furious wrath was stirred.

Down from her channel in the skies
With awful might she sped,
In a giant's rush, in a giant's size,
On Siva's holy head.

'He calls me,' in her wrath she cried
And all my flood shall sweep

And whirl him in its whelming tide
To hell's profoundest deep!'
He held the river on his head,
And kept her wandering where,
Dense as Himalaya's woods, were spread
The tangles of his hair.
No way to earth she found, ashamed,
Though long and sore she strove,
Condemned, until her pride were tamed,
Amid his locks to rove.
At length when many a year had past
He bade her wanderings end;
Bade the delighted flood at last
Upon the earth descend.
With deafening roar upon the rock
Down sped the heavenly tide,
And earth, who trembled at the shock,
With hollow voice replied.
On countless glittering scales the beam
Of rosy morning flashed,
Where fish and dolphins in the stream,
Fallen and falling, flashed.
Then Bards who chant celestial lays,
And Nymphs of heavenly birth,
Flocked round upon the flood to gaze
That streamed from sky to earth.
The Gods themselves from every sphere,
Incomparably bright,
Borne in their golden cars drew near
To see the wondrous sight.
The cloudless sky was all aflame
With the light of a hundred suns,
Where'er the shining chariots came
That bore those holy ones.
So flashed the air with crested snakes
And fish of every hue,
As when the lightning's glory breaks
Through fields of summer blue.
And white foam-clouds and silver spray
Were wildly tossed on high,
Like swans that urge their homeward way
Across the autumn sky.
Now flowed the river calm and clear
With current deep and strong,
Now slowly broadened to a mere,
Or scarcely moved along.
Now o'er a length of sandy plain
Her tranquil course she held:
Now rose her waves and sank again
By refluent waves repelled.

# INDRA
## AS REPRESENTED IN THE HYMNS OF THE RIGVEDA.
## A METRICAL SKETCH.

BY J. MUIR, ESQ. D. C. L.

(*Concluded from page* 188.)

### VI.—*Indra's Drinking Song.*

"Yes, yes, I will be generous now,
"And grant the bard a horse and cow:
"I've quaffed the Soma-draught.
"These draughts impel me with the force
"Of blasts that sweep in furious course:
"I've quaffed the Soma-draught.
"They drive me like a car that speeds,
"When whirled along by flying steeds.
"These hymns approach me fondly now,
"As hastes to calf the mother-cow.
"I turn them over as I muse,
"As carpenter the log he hews.
"The tribes of men, the nations all,
"I count as something very small.
"Both worlds, how vast soe'er they be,
"Don't equal even the half of me.
"The heaven in greatness I surpass,
"And this broad earth, though vast her mass.
"Come, let me as a plaything seize,
"And toss her wheresoe'er I please.
"Come, let me smite with vigorous blow,
"And send her flying to and fro.
"My half is in the heavenly sphere,
"I've drawn the other half down here.
"How great my glory and my power!
"Aloft into the skies I tower.
"I'm ready now to mount in air,
"Oblations to the gods to bear:
"I've quaffed the Soma-draught.*

### VII.—*Indra drinks the libation.*

And not in vain the mortal prays,
For nothing loth the god obeys,
The proffered bowl he takes;
Well trained the generous juice to drain,
He quaffs it once, he quaffs again,
Till all his thirst he slakes.
And soon its power the Soma shows,
Through Indra's veins the influence flows;
With fervour flushed he stands;
His forehead glows, his eyes are fired,
His mighty frame with force inspired,
His towering form expands.
He straightway calls his brave allies,
To valorous deeds exhorts, and cries—
"Stride, Vishnu, forward stride;
Come, Maruts, forth with me to war,
See yonder Vrittra stands afar,

* This "drinking Song" is a translation, nearly literal, of the 119th hymn of the 10th Book of the Rigveda.

And waits the coming of my car;
We soon shall crush his pride."

### VIII.—*Indra, attended by the Maruts, sets out to encounter Vrittra.*

Amid the plaudits, long and loud,
Which burst from all the heavenly crowd,
Charmed by the sweet and magic sound
Of hymns pronounced by bards renowned,
Viewed by admiring troops of friends,
The valiant god his car ascends.
Swept by his fervid bounding steed,
Athwart the sky the hero speeds.
The Marut-hosts his escort form,
Impetuous spirits of the storm.
On flashing lightning cars they ride,
And gleam in warlike pomp and pride:
Each head a golden helmet crests,
And glittering mail adorns their breasts;
Spears on their shoulders rest, their hands
Bear arrows, bows, and lightning-brands.
Bright tinkling anklets deck their feet,
And thought than they is not more fleet;
Like lions' roar their voice of doom;
With iron force their teeth consume.
The hills, the earth itself they shake,
All creatures at their coming quake;
Their headlong fury none can stay,
All obstacles are swept away.
The forest's leafy monarchs tall
Before their onset crashing fall,
As when in fierce destructive mood
Wild elephants invade a wood.

### IX.—*Indra's conflict with Vrittra.*

Who is it that, without alarm,
Defies the might of Indra's arm;
That stands and sees without dismay
The approaching Maruts' dread array;
That does not shun, in wild affright,
The terrors of the deadly fight?
'Tis Vrittra,* he whose magic powers
From earth withhold the genial showers,
Of mortal men the foe malign,
And rival of the race divine,
Whose demon hosts from age to age
With Indra war unceasing wage,
Who, times unnumbered, crushed and slain,
Is ever newly born again,
And evermore renews the strife,
In which again he forfeits life.
Perched on a steep aerial height,
Shone Vrittra's stately fortress bright.
Upon the wall, in martial mood,
The bold gigantic demon stood,
Confiding in his magic arts,
And armed with store of fiery darts.
And then was seen a dreadful sight,
When god and demon met in fight.
His sharpest missiles Vrittra shot,
His thunderbolts and lightnings hot
He hurled as thick as rain.
The god his fiercest rage defied,
His blunted weapons glanced aside,
At Indra launched in vain.
When thus he long had vainly toiled,
When all his weapons had recoiled,
His final efforts had been foiled,
And all his force consumed,—
In gloomy and despairing mood
The baffled demon helpless stood,
And knew his end was doomed.
The lightnings then began to flash,
The direful thunderbolts to crash,
By Indra proudly hurled;
The gods themselves with awe were stilled
And stood aghast, and terror filled
The universal world.
Even Tvashtri sage, whose master-hand
Had forged the bolts his art had planned,
Who well their temper knew,—
Quailed when he heard the dreadful clang
That o'er the quivering welkin rang,
As through the sky they flew.
And who the arrowy shower could stand,
Discharged by Indra's red right hand,—
The thunderbolts with hundred joints,
The iron shafts with thousand points,
Which blaze and hiss athwart the sky,
Swift to their mark unerring fly,
And lay the proudest foemen low,
With sudden and resistless blow,
Whose very sound can put to flight
The fools who dare the Thunderer's might?
And soon the knell of Vrittra's doom
Was sounded by the clang and boom
Of Indra's iron shower;
Pierced, cloven, crushed, with horrid yell
The dying demon headlong fell
Down from his cloud-built tower.
Now bound by Sushna's spell no more,
The clouds discharge their liquid store;
And, long by torrid sunbeams baked,
The plains by copious showers are slaked;
The rivers swell, and sea-ward sweep
Their turbid torrents broad and deep.
The peasant views, with deep delight
And thankful heart, the auspicious sight.
His leafless fields, so sere and sad,
Will soon with waving crops be clad,
And mother Earth, now brown and bare,
A robe of brilliant green will wear.
And now the clouds disperse, the blue
Of heaven once more comes forth to view.
The sun shines out, all nature smiles,
Redeemed from Vrittra's power and wiles;
The gods, with gratulations meet,
And loud acclaim, the victor greet;
While Indra's mortal votaries sing
The praises of their friend and king.
The frogs, too, dormant long, awake,
And floating on the brimming lake,
In loud responsive croak unite,
And swell the chorus of delight.

### X.—*Indra's greatness.*

What poet now, what sage of old,
The greatness of that god hath told,

* The demon who personifies drought, and is also called Sushna and Ahi.

Who from his body vast gave birth
To father Sky and mother Earth,
Who hung the heavens in empty space,
And gave the earth a stable base,
Who framed and lighted up the sun,
And made a path for him to run?
In greatness who with Him can vie,
Who fills the earth, the air, the sky,
Whose presence unperceived extends
Beyond the world's remotest ends?
A hundred earths, if such there be,
A hundred skies fall short of thee;
A thousand suns would not outshine
The effulgence of thy light divine.
The worlds, which mortals boundless deem,
To thee but as a handful seem.
Thou, Indra, art without a peer
On earth, or yonder heavenly sphere.
Thee, god, such matchless powers adorn,
That thou without a foe wast born.
Thou art the universal lord,
By gods revered, by men adored.
Should all the other gods conspire,
They could not frustrate thy desire.
The circling years, which wear away
All else, to thee bring no decay;
Thou bloomest on in youthful force,
While countless ages run their course.
Unvexed by cares, or fears, or strife,
In bliss serene flows on thy life.

XI.—*Indra's relations to his worshippers.*

Thou, Indra, art a friend, a brother,
A kinsman dear, a father, mother.
Though thou hast troops of friends. yet we
Can boast no other friend but thee.
With this our hymn thy skirt we grasp,
As boys their father's garments clasp.
Our ardent prayers thy form embrace,
As women's arms their lords enlace;
They round thee cling with gentle force,
Like saddle-girth around a horse.
With faith we claim thine aid divine,
For thou art ours, and we are thine.
And be not like a lazy priest,
Who battens at the dainty feast,
Sits still in self-indulgent ease,
And only cares himself to please.
Come, dole not out with niggard hand
The abundant boons at thy command.
If I were thou, and thou wert I,
My suppliant should not vainly cry.
Wert thou a mortal, I divine,
In want I ne'er would let thee pine.
Had I, like thee, unbounded power,
I wealth on all my friends would shower.
Thy strong right hand, great god, we hold
With eager grasp, imploring gold.
Thou canst our longings all fulfil,
All hangs on thy resistless will.
Abundant aids shoot forth from thee,
As leafy boughs from vigorous tree.
To wifeless men thou givest wives,
And joyful mak'st their joyless lives.
Thou givest sons, courageous, strong,
To guard their aged sires from wrong.
Lands, jewels, horses, herds of kine,—
All kinds of wealth are gifts of thine.
Thy friend is never slain; his might
Is never worsted in the fight.
Yes, those who in the battle's shock,
Thine aid, victorious god, invoke,
With force inspired, with deafening shout
Of triumph, put their foes to rout.
Thou blessest those thy praise who sing,
And plenteous gifts devoutly bring:
But thou chastisest all the proud,
The niggard, and the faithless crowd,
Who thine existence doubt, and cry
In scorn, "No Indra rules on high."
The rich can ne'er thy favourites be,
The rich who never think of thee.
When storms are lulled, and skies are bright,
Wine-swillers treat thee with despite.
When clouds collect and thunders roar,
The scoffers tremble and adore.
No deed is done but thou dost see;
No word is said unheard by thee.
The fates of mortals thou dost wield;
To thy decree the strongest yield.
Thou dost the high and fierce abase,
The lowly raisest in their place.
Thine own true friends secure repose,
By thee redeemed from all their woes,
From straits brought forth to ample room,
To glorious light from thickest gloom.
And thou dost view with special grace,
The fair-complexioned Aryan race,
Who own the gods, their laws obey,
And pious homage duly pay.
Thou giv'st us horses, cattle, gold,
As thou didst give our sires of old.
Thou sweep'st away the dark-skinned brood,
Inhuman, lawless, senseless, rude,
Who know not Indra, hate his friends,
And spoil the race which he defends.
Chase, far away the robbers chase,
Slay those barbarians black and base,
And save us, Indra, from the spite
Of sprites that haunt us in the night,
Our rites disturb by contact vile,
Our sacred offerings defile.
Preserve us, friend, dispel our fears,
And let us live a hundred years,
And when our earthly course we've run,
And gain'd the region of the Sun,
Then let us live in ceaseless glee,
Sweet nectar quaffing there with thee.

*Communications of a literary nature should be addressed to the* EDITOR: *all letters on business, to the Proprietors,* MESSRS. E. J. LAZARUS & Co., *to whom Drafts should be made payable.* ADVERTISEMENTS *will be inserted at four annas per line.*

The PANDIT may be ordered of the Publishers, or through MESSRS. TRÜBNER and Co., LONDON.

*Annual subscription, in advance, including postage, Rs.* 12.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

# काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

# THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 34. Benares March 1st, 1869. Vol. III.


## ॥ उपदेशसहस्र्या गद्यप्रबन्धः ॥

एवमुक्तं स्वरूपं स्मारयित्वा शरीरस्य भिन्नजात्यन्वयसंस्कारत्वज्ञापनाय तदुत्पत्तिप्रकारमुपदिशेदित्याह । लब्धपरमात्मेति ।

(११) लब्धपरमात्मलक्षणस्मृतये ब्रूयाद्योऽसावाकाशनामा नामरूपाभ्यामर्थान्तरभूतोऽशरीरोऽस्थूलादिलक्षणोऽपहतपाप्मादिलक्षणश्च सर्वैः संसारधर्मैरनागन्धितः ॥

लब्धपरमात्मलक्षणविषया स्मृतिरनुसंधानं येन तस्मै शिष्याय ब्रूयादित्यर्थः । उपलक्षणत्वेनोक्तवाक्यार्थमेव प्रकटयन्नात्मनः सकाशात्संघातोत्पत्तिप्रकारमाह । योऽसावित्यादिना । यः शाखान्तरे प्रकरणान्तरे चात्मादिशब्दैः प्रसिद्धो “ऽसावाकाशो वै नामरूपयोर्निर्वहिता ते यदन्तरे” त्यत्र छान्दोग्ये निर्दिष्ट आकाशनामा स्वात्मविलक्षणयोर्नामरूपयोर्व्याकर्त्ता स सर्वस्यात्मेत्यन्वयः । आकाशनामेत्युक्ते भूताकाशशङ्का स्यात्तामाकाशोऽर्थान्तरत्वादिव्यपदेशादिति न्यायेन परिहरति । नामरूपाभ्यामर्थान्तरभूत इति । भूताकाशस्य नामरूपान्तःपातित्वात्तयोराधारभूत आत्मा आधेयादाकाशादेरन्य इत्यर्थः । असङ्गत्वादिभिराकाशसाम्यात्परमात्माप्याकाशशब्देन श्रुतिषु क्वचिन्निर्दिश्यते गौण्यावृत्त्येति द्रष्टव्यम् । अत एवाशरीरो मूर्त्तिवर्जितः । अशरीरपदमनिन्द्रियत्वादेरप्युपलक्षणमित्यभिप्रेत्य विशिनष्टि स्थूलादिलक्षण इति । अथ वा अशरीरः शरीरादिसंघातरहित इत्यत्र प्रमाणं सूचयत्यस्थूलादिलक्षण इति । यतः शरीरेन्द्रियमनःप्राणादिरहितोऽत एवापहतपाप्मादिलक्षणोऽभिमन्यमानस्याभावेऽभिमानाभावादित्यर्थः । चशब्देन स्वतो विकाररराहित्यं समुच्चीयते । सर्वैर्विशेषणैः सिद्धमर्थमाह । सर्वैरिति । अनागन्धितो असंश्लिष्ट इत्यर्थः ॥ ११ ॥

नन्वेवं परमात्मनोऽशरीरादिलक्षणत्वेऽपि जीवः शरीरादिलक्षण एव स्यादित्याशङ्क्य तस्य तेनानन्यत्वश्रवणान्मैवमित्यभिप्रेत्याह । यत्साक्षादित्यादिना ।

(१२) यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरोऽदृष्टो द्रष्टाऽश्रुतः श्रोताऽमतो मन्ताऽविज्ञातो विज्ञाता नित्यविज्ञानस्वरूपोऽनन्तरोऽबाह्यो विज्ञानघन एव परिपूर्ण आकाशवदनन्तशक्तिरात्मा सर्वस्याशनायादिवर्ज्जित आविर्भावतिरोभाववर्ज्जितश्च स्वात्मविलक्षणयोर्नामरूपयोर्जगद्बीजभूतयोः स्वात्मस्थयोस्तत्त्वान्यत्वाभ्यामनिर्वचनीययोः स्वसंवेद्ययोः सद्भावमात्रेणाचिन्त्यशक्तित्वाद्व्याकर्त्ताऽव्याकृतयोः ॥

विज्ञातेत्युक्ते प्राप्तं विज्ञानकर्तृत्वं वारयति । नित्यविज्ञानस्वरूप इति । तत्र प्रमाणमाहानन्तर इत्यादिना । आकाशवत्परिपूर्ण इत्यन्वयः । पूर्ण इति निष्ठाप्रत्ययो न कर्मणि, किंतु कर्त्तरि, परिच्छेदाभावद्योतीत्याकाशदृष्टान्तः, कथमेवंलक्षणस्य द्रष्टृत्वादिकमुक्तमित्यत आहानन्तशक्तिरिति । “इन्द्रो मायाभिः पुरुरूप ईयत” इति श्रुतेः । अनन्ता अनवच्छिन्ना दुर्लक्ष्या मायावस्यारूपाः शक्तय उपाधयो यस्य सोऽनन्तशक्तिर्मायाकार्यान्तःकरणेन्द्रियोपाधिभिर्द्रष्टृत्वादिव्यपदेशभाग्भवतीत्यर्थः । सर्वस्य स्थावरजङ्गमरूपस्य प्रपञ्चस्यात्मा स्वरूपमित्यर्थः । तस्य नित्यमसंसारित्वं स्वाभाविकमाहाशना-

याद्रीति । आविर्भावतिरोभावसाक्षित्वादेव तद्विवर्जित इत्यर्थः । एवमात्मस्वभावमुक्त्वा नामरूपात्मकानात्मस्वभावं प्रपञ्चयति । स्वात्मविलक्षणयोरित्यादिना । अचेतनयोरित्यर्थः । जगद्बीजभूतयोरित्युपादानत्वमुच्यते । कथं तर्ह्यात्मोपादानत्वश्रुतिरित्यत आह । स्वात्मस्थयोरिति । उपादानाधारतामात्रेण कथमुपादानत्वसिद्धिरित्यत आह । सद्भावमात्रेणेति । सद्भावो नाम सत्त्वं आत्मसत्तामात्रेणैवात्मनि स्थितयोर्न पृथक्सतोरात्मनिष्ठयोरित्यर्थः । तथा च स्वात्मैकतां गतयोर्नामरूपयोर्व्याकर्त्ता स्वात्मन एव व्याकर्त्तृत्युपादानत्वसिद्धिरात्मन इत्यभिप्रायः । कुत एवं चिद्रूपस्यात्मनो ऽचिद्रूपेण स्वात्मव्याकरणमित्यत आह । अचिन्त्यशक्तित्वादिति । अव्याकृतयोरनभिव्यक्तयोरित्यर्थः । अनभिव्यक्ततया स्थितं हि व्यक्तीक्रियते न प्रागसदतिप्रसङ्गादिति भावः ॥ १२ ॥

उक्तलक्षणयोर्नामरूपयोर्यदासौ निष्पादयिता तदा किमात्मके ते प्रथमं निष्पाद्येते इति, तदाह । ते नाम रूपे इत्यादिना ।

(१३) ते नामरूपे अव्याकृती व्याक्रियमाणे तस्मादेतस्मादात्मन आकाशनामाकृती संवृत्ते, तच्चाकाशाख्यं भूतमनेन प्रकारेण परमात्मनः संभूतं, प्रसन्नादिव सलिलान्मलमिव फेनं, न सलिलं न च सलिलादत्यन्तभिन्नं, फेनस्य सलिलव्यतिरेकेणादर्शनात्सलिलं तु स्वच्छमन्यत्फेनान्मलरूपादेवं परमात्मा नामरूपाभ्यामन्यः फेनस्थानीयाभ्यां शुद्धः प्रसन्नस्तद्विलक्षणस्ते नामरूपे अव्याकृते सतो व्याक्रियमाणे फेनस्थानीये आकाशनामाकृती संवृत्ते ॥

तस्मादपहतपाप्मत्वादिलक्षणादेतस्मादचिन्त्यशक्तेः सर्वज्ञादाकाश इति नाम वाचकः शब्द आकृतिर्वाच्याकार इत्येवमाकारे संवृत्ते एवं व्यवहारयोग्ये अभूतामित्यर्थः । वाच्यवाचकाकारेण सदात्मकं ब्रह्मैव मायावशादभिव्यक्तमाकाशादिशब्दार्थात्मकमिति तात्पर्यार्थः । ननु कथं चिदात्मनो ऽचिद्रात्मकाकाशात्मना निष्पत्तिरिति शङ्कां दृष्टान्तेन प्रत्याचष्टे । तच्चाकाशाख्यमित्यादिना । दृष्टान्तं विवृण्वन्नात्मनः परिणामित्वशङ्कां वारयति । न सलिलमित्यादिना । सलिलव्यतिरेकेण स्वरूपतः पृथगनुपलम्भादित्यर्थः । फेनस्य सलिलाद्भेदाभावे सलिलस्यापि न ततो भेद इत्यत आह । सलिलं त्विति । अतो न सलिलमेव फेनं नापि ततो भिन्नं किं त्वनिर्वचनीयमित्यर्थः । तथा च श्रुतिः "वाचारम्भणं विकारो नामधेय" मिति । दार्ष्टान्तिकमाह । एवं परमात्मेति । निरूपितामाकाशोत्पत्तिं निगमयति । ते नामरूपे इति ॥ १३ ॥

इदानीं ततो वाय्वाद्युत्पत्तिं प्रतिपादयति । ततोपीत्यादिना ।

(१४) ततोपि स्थूलभावमापद्यमाने नामरूपे व्याक्रियमाणे वायुभावमापद्येते, ततोप्यग्निभाव,मग्नेरब्भावं, ततः पृथ्वीभाव,मित्येवं क्रमेण पूर्वपूर्वोत्तरोत्तरानुप्रवेशेन पञ्च महाभूतानि पृथिव्यन्तान्युत्पन्नानि, ततः पञ्चमहाभूतगुणविशिष्टा पृथ्वी, पृथिव्याश्च पञ्चात्मक्यो व्रीहियवाद्या ओषधयो जायन्ते, ताभ्यो भक्षिताभ्यो लोहितं शुक्रं च स्त्रीपुंसशरीरसंबन्धि जायते, तदुभयमृतुकाले ऽविद्याप्रयुक्तकामखजनिर्मथनोद्धृतं मन्त्रसंस्कृतं गर्भाशये निषिच्यते, तत्स्वयोनिरसानुप्रवेशेन विवर्द्धमानं गर्भीभूतं नवमे दशमे वा मासि संजायते ॥

आकाशात्मना स्थिते नामरूपे तदनुगतेनात्मना व्याक्रियमाणे ततोप्याकाशादपि स्थूलभावमापद्यमाने सती वायुभावमापद्येते इति योजना । स्थूलभावः स्पर्शगुणेनोपचयः, ये नामरूपे आकाशात्मतां प्राप्ते ते एव व्याक्रियमाणे वायुभावमापद्येते इति वदन् विकारस्य विकारान्तरोपादानत्वं वारयति । एवमुत्तरत्रापि द्रष्टव्यं । तदेवं भूतोत्पत्तिमुक्त्वा तेभ्यः संघातस्य स्थूलस्योत्पत्तिप्रकारमाह । पृथिव्याश्चेति । पञ्चात्मक्य इति पञ्चीकृतपञ्चभूतनिर्वर्त्तिता इत्यर्थः । तदुभयं, स्त्रियाः लोहितं पुंसः शुक्रं चेत्यर्थः । काम एव खजो विलोडको मन्थास्तेन निर्मथनोद्धृतमित्यर्थः । "गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वती"त्यादिगर्भाधानमन्त्रैः संस्कृतमित्यर्थः॥१४॥

एवं शरीरोत्पत्तिमुपोद्घाततयोपदिश्य तस्य भिन्नजात्यन्वयसंस्कारं पृष्टं प्रतिपादयति । तज्जातमित्यादिना ।

(१५) तज्जातं लब्धनामाकृतिकं जातकर्मादिभिर्मन्त्रसंस्कृतं पुनरुपनयनसंस्कारयोगेन ब्रह्मचारिसंज्ञं भवति, तदेव शरीरं पत्नीयोगसंस्कारयोगेन गृहस्थसंज्ञं भवति, तदेव वनस्थसंस्कारेण तापससंज्ञं भवति, तदेव क्रियाविनिवृत्तिनिमित्तसंस्कारेण परिव्राट्संज्ञं भवति, इत्येवं त्वत्तोभिन्नं भिन्नजात्यन्वयसंस्कारशरीरं मनश्चेन्द्रियाणि च नामरूपात्मकान्येवा"न्नमयं हि सोम्य मन" इत्यादिश्रुतिभ्यः । कथं चाहं भिन्नजात्यन्वयसंस्कारवर्जित इत्येतच्छृणु, यो ऽसौ नामरूपयोर्व्याकर्त्ता नामरूपधर्मविलक्षणः स एव नामरूपे व्याकुर्वन् सृष्ट्वेदं शरीरं स्वयं संस्कारधर्मवर्जितो नामरूपे इह प्रविष्टः ॥

जातमित्यस्य व्याख्या लब्धनामाकृतिकमिति। भूतोपादानकत्वेन पित्रादिनिमित्तकत्वेन च भिन्नजात्यन्वयौ शरीरस्योक्तौ। इदानीं संस्कारमाह। जातकर्मादिभिरिति। एवं स्थूलशरीराभिमानाच्छिष्यं व्युत्थाप्य सूक्ष्मशरीराभिमानमपि तस्य त्याजयंस्तस्यापि भौतिकत्वमाह। मनश्चेत्यादिना। नामरूपात्मकान्येव भौतिकान्येवेत्यर्थः। तत्र प्रमाणमाहान्नमयमिति। अतो मनआदिसूक्ष्मसंघातो ऽपि नात्मा भौतिकत्वात् स्थूलवदित्यर्थः। कथं भिन्नजात्यन्वयसंस्कारं शरीरमित्यस्य प्रश्नस्योत्तरमभिधाय, कथं चाहं जात्यन्वयसंस्कारवर्जित इति शिष्योक्तिमनूद्योत्तरमाह। कथं चेत्यादिना, यस्तु नामरूपविलक्षणः पूर्वोक्तविलक्षणो नामरूपात्मकस्य सर्वस्य स्रष्टा जात्यन्वयसंस्कारवर्जितः स एवाविकृतः सृष्टेषु कार्यकरणसंघातेषु प्रविष्टो जीवात्मेति श्रुतिस्मृतिप्रसिद्धत्वान्न तस्य जात्यन्वयसंस्कारसंबन्ध इति प्रतिपादयन्नाह। योसावित्यादिना ॥ १५॥

ननु परमात्मैव चेदिह प्रविष्टः पक्षीव नीडं तर्हि कथं स सर्वैर्नोपलभ्यत इति तत्राह। अन्यैरदृष्ट इति।

(१६) अन्यैरदृष्टः स्वयं पश्यंस्तथा ऽश्रुतः शृण्वन्नमतो मन्वानो ऽविज्ञातो विजानन्, सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वा ऽभिवदन्यदास्ते, इत्यस्मिन्नर्थे श्रुतयः सहस्रशः, तत्सृष्ट्वा तदेवानुप्राविशत्, अन्तः प्रविष्टः शास्ता जनानां, स एष इह प्रविष्टः, एष त आत्मा स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत, एष सर्वेषु भूतेषु गूढोत्मा सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता, इत्याद्याः श्रुतयः। स्मृतयो ऽपि, आत्मैव देवताः सर्वाः, नवद्वारे पुरे देही, क्षेत्रज्ञं चापि मां विद्धि, समः सर्वेषु भूतेषु, उपद्रष्टा ऽनुमन्ता च, उत्तमः पुरुषस्त्वन्यो, ऽशरीरं शरीरेष्वित्याद्याः तस्माज्जात्यन्वयसंस्कारवर्जितस्त्वमिति सिद्धम् ॥

अदृष्टो द्रष्टेत्यादिश्रुतिरिहार्थतो दर्शिता। सर्वस्य यो विज्ञाता सर्वावभासकत्वान्नान्यैरवभास्यते सोस्त्येवेह प्रविष्ट इति भावः। अत्र मन्त्रमुदाहरति। सर्वाणीति। रूपाणि शरीराणि विचित्य विरचय्य धीरो धीमान्सर्वज्ञस्तत्र प्रविश्य नामानि कृत्वा देवोहं मनुष्योहमित्यभिवादनादिव्यापारं कुर्वन् यदास्ते यो वर्त्तते तं वेदाहमेतमिति पूर्वार्द्धेनान्वयः। अस्मिन्नर्थे इति। स्रष्टुरेव जीवरूपेण प्रवेश इत्यत्रेत्यर्थः। ब्राह्मणवाक्यान्यप्यत्रोदाहरति। तत्सृष्ट्वेत्यादिना। एष त आत्मा अन्तर्याम्यमृत इति वाक्यशेषः। स ईक्षणपूर्वकं जगत्स्रष्टा एतमेव प्रसिद्धं सीमानं शिरःकपालसंधिं विदार्य भित्त्वा एतया ब्रह्मरन्ध्रवाच्यया द्वारा छिद्रेण प्रापद्यत देहमध्ये प्रविष्ट इत्यर्थः। अन्तः प्रविष्टं कर्त्तारमेतं, भर्त्ता सन् भ्रियमाणो विभर्त्ति, एको देवो बहुधा निविष्टः, ।

"इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् ।
एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः" ॥

इत्यादिमन्त्रब्राह्मणवादानप्यत्र सूचयन्तीत्याद्याः श्रुतय इति। परमात्मैव क्षेत्रज्ञ इति श्रुत्युक्तेर्थे स्मृतीरप्युदाहरन्ति। स्मृतयोपीति। शरीरे वर्त्तमानस्यापि शरीरधर्मासंस्पर्शित्वे श्रुतिं प्रमाणयत्यशरीरं शरीरेषु इति।

"स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम्"

इत्यादिश्रुतय आदिशब्दार्थः। यस्मादेवं श्रुतिस्मृतिन्यायैरात्मादेहादेर्भिन्नो ऽसङ्गस्तद्धर्मासंस्पृष्टश्च तस्मादिति प्रकृतमुपसंहरति। तस्मादिति ॥ १६ ॥

एवं परमात्माभेदोपदेशेन जीवस्य जात्यन्वयसंस्काररहित्यमुक्तमवधार्य तत्र स्वानुभवविरोधं शङ्कते। स यदीति।

(१७) स यदि ब्रूयादन्य एवाहमज्ञः सुखी दुःखी बद्धः संसार्यन्योसौ मद्विलक्षणो ऽसंसारी देवस्तमहं बल्युपहारनमस्कारादिभिर्वर्णाश्रमकर्मभिश्चाराध्य संसारसागरादुत्तितीर्षुरस्मि, कथमहं स एवेत्याचार्यो ब्रूयान्नैवं सोम्य प्रतिपत्तुमर्हसि प्रतिषिद्धत्वाद्भेदप्रतिपत्तेः, कथं प्रतिषिद्धा भेदप्रतिपत्तिरित्यत आह, अन्यो ऽसावन्यो ऽहमस्मीति न स वेद, ब्रह्म तं परादाद्यो ऽन्यत्रात्मनो ब्रह्म वेद, मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति, इत्येवमाद्याः ॥

अज्ञत्वादेः स्वात्मन्यनुभवसिद्धत्वात्तद्विलक्षणेश्वरात्मत्वं श्रुत्यादिभिरुक्तमपि न संभावयामि, किं तु भिन्नमेव तमहं मन्ये, उत्कृष्टमीश्वरं निकृष्टसंसार्यात्मना पश्यतः प्रत्यवायापत्ते,रतस्तं देवं स्वकर्मणा भक्त्या चाराध्य तत्प्रसादान्मुक्तसंसारो भविष्यामीति मे मतिरिति शिष्याभिप्राय इत्यर्थः। मैवं वादीः, भेददर्शन एव प्रत्यवायश्रवणादिति गुरुः परिहरति। नैवं सोम्येति। संग्रहवाक्यमाक्षेपसमाधानाभ्यां विवृणोति। कथमित्यादिना। प्रत्यक्षसिद्धस्य भेदस्य कथं तद्विरुद्धप्रमाणान्तरेण प्रतिषेध इत्याक्षेपार्थः। असंसारीश्वरस्या ऽप्रत्यक्षत्वात्तद्भेदस्य स्वात्मनि प्रत्यक्षत्वाभावात्सुखित्वाद्यनुभवस्य भ्रान्त्याप्युपपत्तेस्तद्बलाद्भेदाध्यवसायायोगादनन्यथासिद्धार्थश्रुतिनिषिद्धो भेदो न मानमर्हतीति समाधानाभिप्रायः ॥ १७ ॥

उदाहृताः श्रुतयो न भेददर्शनमात्रं निषेधन्ति, किं तु भेददर्शिनः प्रत्यवायमप्यनर्थप्राप्तिरूपमावेदयन्तीत्याह। एता एवेति।

(१८) एता एव श्रुतयो भेदप्रतिपत्तेः संसारगमनं दर्शयन्त्यभेदप्रतिपत्तेश्च मोक्षं दर्शयन्ति सहस्रशः स आत्मा तत्त्वमसीति परमात्मभावं विधायाचार्यवान्पुरुषो वेदेत्युक्त्वा तस्य तावदेव चिरमिति मोक्षं दर्शयन्त्यभेदविज्ञानादेव, सत्यसंधस्यातस्करस्येव दाहाद्यभाववत्संसाराभावं दर्शयन्ति दृष्टान्तेन, भेददर्शनादसत्याभिसंधस्य संसारगमनं दर्शयन्ति तस्करस्येव दाहादिदृष्टान्तेन ॥

तथाहि अन्योऽसौ परमेश्वरो मद्विलक्षणो ऽन्योऽहं तद्विलक्षणः संसार्येवेति योऽन्यां देवतामुपास्ते तात्पर्येण पश्यति न स वेद तत्त्वमिति भेददर्शनस्याविद्यामूलत्वमुक्त्वा यथा पशुरेवं स देवानामिति देवपशुत्वप्राप्तिं तस्य दर्शयन्ति । नहि पराधीनात्मत्वतो ऽन्यद्दैन्यं कष्टं वा वर्त्तत इति । तथा योऽन्यत्रान्यद्वेदेदमित्यात्मनः पृथगेव ब्रह्म ब्राह्मणजातिं वेद तं तदेव ब्रह्म ब्राह्मणत्वजातिः परादात्पराकुर्यात् तत्त्वविमुखं कुर्यादात्मरूपं मामनात्मतया पश्यतीति द्वेष्येव न तु हितमावहतीत्यर्थः । एवं क्षत्रं तं परादादित्यादि सर्वं तं परादादित्यन्तमुदाहरणं द्रष्टव्यम् । इहात्मनि यो नानेव पश्यति इवशब्दो नानात्वदर्शनस्याभासत्वद्योतनार्थः, स मृत्योर्मृत्युं संसारात्संसारमनर्थपरंपरामेवाप्नोतीत्यर्थः । इत्येवमाद्या इति । नेह नानास्ति किं चन, उदरमन्तरं कुरुते अथ तस्य भयं भवतीत्याद्याः श्रुतयो गृह्यन्ते । भेददृष्टिं निन्दित्वा ऽभेददृष्टिं फलवत्तया प्रशंसंस्तस्या एवोपादेयतां दर्शयति । अभेदप्रतिपत्तेश्चेति । तत्र श्रुत्येकदेशमुदाहृत्य व्याचष्टे । स आत्मेत्यादिना । तत्रैवान्वयव्यतिरेकोपपत्तिपरश्रुत्यर्थमुदाहरन्नुक्तमर्थं द्रढयति । अभेदविज्ञानादेवेति । पुरुष सौम्येति हस्तं गृहीतमानयन्तीति खण्डे इममर्थं दर्शयतीत्यर्थः ॥ १८ ॥

सुषुप्तौ परमात्मन्यभेदसंपत्तावपि तथाज्ञानाभावापराधादेव पुनरपि व्याघ्रादिभावेनोत्थितानां संसाराविच्छेदं दर्शयन्ती श्रुतिः परमात्माभेदेनात्मज्ञानमेव मोक्षहेतुरिति सूचयतीत्यभिप्रेत्याह । तइह व्याघ्रो वेत्यादिना चेति ।

(१९) तइह व्याघ्रो वेत्यादिना चाऽभेददर्शनात्स स्वराड्भवतीत्युक्त्वा तद्विपरीतेन भेददर्शनेन संसारगमनं दर्शयन्त्यथ ये ऽन्यथातो विदुरन्यराजानस्ते क्षय्यलोका भवन्तीति प्रतिशाखं, तस्मान्मृषैवैवमवादीर्ब्राह्मणपुत्रो ऽदोऽन्यः संसारी परमात्मविलक्षण इति, । तस्मात्प्रतिषिद्धत्वाद्भेददर्शनस्य भेदविषयत्वाच्च कर्मोपादानस्य कर्मसाधनत्वाच्च यज्ञोपवीतादेः कर्मसाधनोपादानस्य परमात्माभेदप्रतिपत्त्या प्रतिषेधः कृतो वेदितव्यः ॥

अत्रैवोदाहरणान्तरमाह । भेददर्शनात्स स्वराडित्यादिना । यदा ह्येवैष एतस्मिन्नदृश्ये ऽनात्म्ये ऽनिरुक्ते ऽनिलयने ऽभयं प्रतिष्ठां विन्दते अथ सो ऽभयं गतो भवति यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवतीत्याद्याः श्रुतयो ऽप्युदाहर्त्तव्या इत्याह । इति प्रतिशाखमिति । यस्मादेवं भेददर्शननिन्दया ऽभेददर्शनस्तुत्या च जीवस्य ब्रह्माभेदो ऽवधारितो ऽतो ब्राह्मणत्वाद्यभिमानस्यात्मनि मिथ्यादृष्टित्वं सिद्धमिति प्रकृतमुपसंहरति । तस्मादिति । यदुक्तं तमहं बल्युपहारनमस्कारादिभिर्वर्णाश्रमकर्मभिश्चाराध्येति सापि दृष्टिर्भेददर्शनापवादादेव न सम्यग् दृष्टिरित्याह । तस्मात्प्रतिषिद्धत्वादिति । भेदविषयत्वाच्च कर्मोपादानस्येति । क्रियाकारकफलभेदाश्रयमन्तरेण कर्मणः स्वरूपासिद्धिरित्यर्थः । यज्ञोपवीत्येवाधीयीत याजयेद्यजेत वेति श्रुतेर्यज्ञोपवीतधारणादेः कर्मसाधनत्वावगमात्साध्यकर्माभावे तत्साधनपरिग्रहो निरर्थक इत्यभिप्रेत्याह । कर्मसाधनत्वाच्च यज्ञोपवीतादेरिति । कर्मसाधनयोरुपादानं कर्मसाधनोपादानं तस्येति विग्रहः ॥१९॥

कथमभेदप्रतिपत्तिमात्रेण कर्मतत्साधनप्रतिषेधसिद्धिः, कर्मण्यप्यभेदप्रतिपत्तिसंभवादित्याशङ्क्याह । कर्मणामिति ।

(२०) कर्मणां तत्साधनानां च यज्ञोपवीतादीनां परमात्माभेदप्रतिपत्तिविरुद्धत्वा,त्संसारिणो हि कर्माणि विधीयन्ते, तत्साधनानि च यज्ञोपवीतादीनि न परमात्मनो ऽभेददर्शिनः, भेददर्शनमात्रेण च ततोन्यत्वं, यदि कर्माणि कर्त्तव्यानि न निविवर्त्तयिषितानि कर्मसाधनाऽसंबन्धिनः कर्मनिमित्तजात्याश्रमाद्यसंबन्धिनश्च परमात्मनश्च आत्मनैवाभेदप्रतिपत्तिं नावक्ष्य,त्स आत्मा तत्त्वमसीत्येवमादिभिर्निश्चितरूपैर्वाक्यैर्भेदप्रतिपत्तिनिन्दां च नाभ्यधास्यदेष नित्यो महिमा ब्राह्मणस्यानन्वागतं पुण्येनानन्वागतं पापेनात्र स्तेनोऽस्तेन इत्यादिना ॥

ब्रह्माहं कर्त्ता चाहमिति विरुद्धप्रतिपत्त्योरेकस्मिन्पुरुषे समुच्चयायोगादित्यर्थः । तर्ह्यधिकार्यभावान्निरालम्बनं कर्मकाण्डमप्रमाणं स्यादिति, नेत्याह । संसारिणो हीति । संसारिणो जात्याद्यभिमानवत इत्यर्थः । न परमात्मनो ऽभेददर्शिन इत्यर्थः । संसारिणोपि परमात्मानन्यत्वात्कथं तस्य कर्मविधिरित्यत आह । भेददर्शनमात्रेण च ततोन्यत्वमिति । न वस्तुवृत्त्या भेदापेक्षा कर्मविधेरिति भावः । यदुक्तं ब्रह्मात्मैक्यप्रतिपत्त्या कर्मणां तत्साधनानां च श्रुत्या प्रतिषेधः कृत इति, तद्व्यतिरेकमुखेन साधयति । यदि कर्माणीत्यादिना । परमात्मनश्चेति चकारादात्मनो ब्रह्मणैवाभेदप्रतिपत्तिमिति योज्यम् ।

एवमादिभिरित्यहं ब्रह्मास्मीत्यादिवाक्यं गृह्यते । निश्चितरूपैर्वाक्यैरिति । संवादिविसंवादिप्रमाणान्तरासिद्धविषयत्वे सत्यनन्यशेषतया च स्वार्थैकपरत्वेन निर्णीतस्वभावैरित्यर्थः । भेदप्रतिपत्तिनिन्दामिति । मृत्योः स मृत्युमित्यादिभिर्वाक्यैरिति शेषः । ब्राह्मणस्य ब्रह्मविदः स हि मुख्यो ब्राह्मणः स ब्राह्मणः इति श्रुतेरित्यर्थः ॥ २० ॥

उदाहृतवाक्यानां क्रमेण तात्पर्यमाह । कर्मासंबन्धीत्यादिना ।

(२१) कर्माऽसंबन्धिस्वरूपत्वं, कर्मनिमित्तवर्णाद्यसंबन्धतां च नाभ्यधास्यत्कर्माणि च कर्मसाधनानि च यज्ञोपवीतादीनि यद्यपरितित्याजयिषितानि, तस्मात्ससाधनं कर्म परित्यक्तव्यं मुमुक्षुणा, परमात्माभेददर्शनविरोधादात्मा चापर एवेति प्रतिपत्तव्यो यथाश्रुत्युक्तलक्षणः । स यदि ब्रूयाद्भगवन्दह्यमाने छिद्यमाने वा देहे प्रत्यक्षा वेदना ऽशनायादिनिमित्तं च प्रत्यक्षं दुःखं मम परश्चात्मा ऽयमात्मापहतपाप्मा विरजो विमृत्युर्विशोको ऽविजिघत्सो ऽपिपासः सर्वसंसारधर्मवर्जितः श्रूयते सर्वश्रुतिषु स्मृतिषु च, कथं तद्विलक्षणो ऽनेकसंसारधर्मसंयुक्तः परमात्मानमात्मत्वेन च मां संसारिणं परमात्मत्वेनाग्निमिव शीतत्वेन प्रतिसंपद्येयं, संसारी च सन् सर्वाभ्युदयनिःश्रेयससाधने ऽधिकृतो ऽभ्युदयनिःश्रेयससाधनानि कर्माणि तत्साधनानि च यज्ञोपवीतादीनि कथं परित्यजेयमिति । तं प्रतिब्रूयाद्यदवोचो दह्यमाने छिद्यमाने वा देहे प्रत्यक्षा वेदनोपलभ्यते ममेति ॥

यदि कर्मादीनि न परितित्याजयिषितानि, तर्ह्येवमुक्तं सर्वं नाभ्यधास्यदिति संबन्धः । अभिधत्ते तु श्रुतिस्तंतमर्थमतो ब्रह्मात्मज्ञानमिच्छता कर्मादीनि परित्याज्यानीत्याह । तस्मादिति । तदेवमागमावष्टम्भेन निरूपितं ब्रह्मात्मैक्यं युक्त्यापि व्यवस्थापयितुमुत्तरो ग्रन्थः । तत्राक्षेप्ता शिष्यो जीवपरमात्मानौ वस्तुतो भिन्नौ विरुद्धधर्मसंसर्गित्वाच्छीतोष्णवदित्यनुमानेन प्रत्यवतिष्ठत इत्याह । स यदि इत्यादिना । एवं विरुद्धधर्मवत्त्वहेतुमुपपाद्यानुमानमाह । कथं तद्विलक्षण इति । एवं सति भेदस्य तात्त्विकत्वेन कर्मतत्साधनपरित्यागात्मकस्य संन्यासस्य नास्त्यवसर इत्याह । संसारी चेति । तत्रानुमाने तावद्धेत्वसिद्धिं दर्शयितुमुपक्रमते । तं प्रतिब्रूयादित्यादिना ॥ २१ ॥

जीवपरमात्मानाविति । किमुपाधिभेदविशिष्टं वस्तु यथा प्रतिपत्तिर्निर्दिश्यते, किं वा चैतन्यमात्राकारम्, आद्ये बाधव्यभिचारौ, आकाशभेदवदौपाधिकस्य भेदस्यावास्तवत्वाद्भेदमात्रसाधने सिद्धसाधनत्वाच्चेत्यभिप्रेत्य द्वितीये ऽसिद्धिमुक्त्वा तामुपपादयति । तदसत्कस्मादित्यादिना ।

(२२) तदसत्कस्माद्दह्यमाने छिद्यमान इव वृक्ष उपलब्धुरुपलभ्यमाने कर्मणि शरीरे दाहच्छेदवेदनाया उपलभ्यमानत्वाद्दाहादिसमानाश्रयैव वेदना, यत्र हि दाहश्छेदो वा क्रियते तत्रैव व्यपदिशति दाहादिवेदनां लोको न वेदनादाहाद्युपलब्धरीति, कथं, क्व ते वेदनेति पृष्टः शिरसि मे वेदनोरस्युदर इति वा यत्र दाहादिस्तत्रैव व्यपदिशति, न तूपलब्धरि इति, यद्युपलब्धरि वेदना स्याद् वेदनानिमित्तं वा दाहच्छेदादि वेदनाश्रयत्वेनोपदिशेद्दाहाद्याश्रयवत् ॥

वृक्ष इव दह्यमाने छिद्यमाने शरीरे दाहच्छेदवेदनाया उपलभ्यमानत्वाद् दाहादिसमानाश्रयैव दाहच्छेदादिवेदनेति योजना । शरीरस्यैव तदुपलब्धृत्वशङ्कां वारयितुं तद्विशिनष्टि । कर्मणीति । कर्मत्वं साधयत्युपलब्धुरुपलभ्यमान इति । उक्तमर्थं लोकप्रसिद्ध्या द्रढयति । यत्र हीति । तत्रैवानुभवमपि प्रश्नपूर्वकमभिनयति । कथमित्यादिना । पुनस्तदेव व्यतिरेकमुखेनोपपादयति । यद्युपलब्धरीति । उपदिशेदित्यस्मात्पूर्वमुपलब्धारमित्यध्याहारः,यद्युपलब्धरि वेदना स्यात्तदा दाहाद्याश्रयदेहदेशवद्वेदनानिमित्तं दाहच्छेदादिजवेदनाश्रयत्वेनोपलब्धारमुपदिशेल्लोको, नैवमुपदिशन्नुपलभ्यते, अतो दाहच्छेदादिसमानाश्रयैव वेदनेति योजना ॥ २२ ॥

तत्रैव युक्त्यन्तरमाह । स्वयं चेति ।

(२३) स्वयं च नोपलभ्येत चक्षुर्गतरूपवत्तत्तस्माद्दाहच्छेदादिसमानाश्रयत्वेनोपलभ्यमानत्वाद्दाहादिवत् कर्मभूतैव वेदना भावरूपत्वाच्च साश्रया तण्डुलपाकवद्वेदनासमानाश्रय एव तत्संस्कारः स्मृतिसमानकाल एवोपलभ्यमानत्वाद्वेदनाविषयस्तन्निमित्तविषयश्च द्वेषोऽपि संस्कारसमानाश्रय एव, तथाचोक्तम् ।

रूपसंस्कारतुल्याधी रागद्वेषौ भयं च यत् ।
गृह्यते धीश्रयं तस्माज् ज्ञाता शुद्धो ऽभयः सदा ॥

किमाश्रयाः पुनः रूपादिसंस्कारादय इत्युच्यते यत्र कामादयः, क्व पुनस्ते कामादयः, कामः संकल्पो विचिकित्सेत्यादिश्रुतेर्बुद्धावेव ॥

यथा चक्षुर्गतं रूपं न चक्षुषा गृह्यते तथात्मगता वेदनात्मना न गृह्यते कर्मकर्तृत्वविरोधादित्यर्थः । आत्मनो वेदनाश्रयत्वनिराकरणमुपसंहरति । तस्मादिति । ननु वेदना नाम दुःखं, न तदचेतने देहे संभवति, सुखदुःखादिधर्माणां चेतनाश्रयत्वनियमात् । यदि पुनश्चेतनोप्यात्मा न वेदनाश्रयस्तदा शरीरमप्यचेतनं न तदाश्रय इत्यनाश्रयैव वेदनास्तु, बौद्धैरपि तथाभ्युपगमादित्यत आह । भावरूपत्वाच्चेति । भावरूपत्वं कार्यत्वं, वेदना साश्रया कार्यत्वात्तण्डुलपाकादिवद् इत्यर्थः । हेतोरप्रयोजकतामाशङ्क्य विपक्षे बाधकमाह । वेदनासमानाश्रयइति । वेदनाया निराश्रयत्वे तन्नाशे संस्काराभावात्कालान्तरे स्मरणं न स्यादित्यर्थः । यद्वा हेत्वसिद्धिं परिहरति । वेदनासमानाश्रय एव तत्संस्कार इति वेदनाया अकार्यत्वे तत्संस्कारस्मृत्योरसंभवात्कालान्तरे पादे मे वेदनाभूदित्यादिव्यवहारो न स्यादित्यभिप्रायः । अथ वा साश्रया यदि वेदना तर्ह्यात्माश्रयैव स्यादात्मन्येव तत्संस्कारस्मृत्यादेरुपलम्भादित्याशङ्क्याह । वेदनासमानाश्रय एव तत्संस्कार इति । यत्स्था वेदनोपलभ्यते तत्स्थ एव तज्जन्यसंस्कारादिः, वेदनातत्संस्कारस्मृतीनामेकाश्रयत्वनियमाद्वेदनायाश्चोपलब्धिकर्मनिष्ठत्वोपपादनाच्चोपलब्धर्यात्मनि तत्संस्कारादीत्यर्थः । तदेवानुमानेन साधयति । स्मृतिसमानकाल एवेति । स्मृतेर्यः कालो जाग्रत्स्वप्नावस्थारूपस्तत्रैवोपलभ्यमानत्वात्सुषुप्त्यादावनुपलभ्यमानत्वाद्वेदनाविषयो वेदनासमानविषयः समानाश्रय एव तत्संस्कार इति अक्षरार्थः । तथा चायं प्रयोगः । वेदनादिरनात्माश्रयो ऽनात्मप्रत्ययकाल एवोपलब्धिगोचरत्वाद्देहकार्श्यादिवद् इति । इतोप्यनात्माश्रय एव वेदनादिरित्याह । तन्निमित्तविषयश्चेति । तत्तस्या वेदनाया यन्निमित्तं दाहच्छेदादि तद्विषयो द्वेषो ऽपि संस्कारतुल्याश्रयो ऽनात्माश्रय इत्यर्थः । अयमिह प्रघट्टकाभिप्रायः । देहे छिद्यमाने दह्यमाने चाहं छिन्नो दग्ध इति च देहाभिन्नमात्मानं मन्यमानः संतप्यते जनस्तन्निमित्तकवेदनातत्संस्कारस्मृतिद्वेषांश्च देहाभिन्न एवात्मन्युपलभते, न देहाभिमानहीनावस्थायां देहश्चोपलभ्यमानत्वादुपलब्धिकर्मैव नोपलब्ध्याश्रय इति संघातस्यैव वेदनादि नासंहतस्य साक्षिण आत्मन इति नित्यशुद्ध एवात्मेति । एवं निरूपितेर्थे वृद्धसंमतिमाह । तथा चोक्तं रूपेति । रूपं नीलपीतादिविषयस्तस्य संस्कारः सूक्ष्मावस्था तदनुभवसंस्कारो वा स्मृतिहेतुः स रूपसंस्कारस्तेन सह तुल्यः समान आधिरुपाधिराश्रयोययो रागद्वेषयोस्तौ रूपसंस्कारतुल्याधी यच्च भयं त्रासस्तदपि रूपसंस्कारतुल्याधीत्यर्थः । किमाश्रयत्वमेषामित्यत आह । गृह्यते धीश्रयमिति । गृह्यते तच्चयमेतदिति शेषः । संकल्पविचिकित्सादेरप्युपलक्षणमेतत् । यद्यस्माद् रूपादिसंस्कारः तज्जन्यरागादि सर्वं धीसंश्रितमेवोपलभ्यते न तत्साक्षिसंश्रितं तत्तस्माज् ज्ञाता आत्मा सदा शुद्धो रागद्वेषरहितो ऽभयश्च संसाररहित इत्यर्थः । युक्त्या संमत्या चोपपादितं वेदनादीनामप्यनात्मधर्मत्वं पुनः प्रश्नपूर्वकं श्रुत्या प्रतिपादयंस्तदाश्रयविशेषं निर्द्धारयति । किमाश्रया इत्यादिना । इत्यादिश्रुतेरेतत्सर्वं मन एवेत्यवधारणान्मनोबुद्ध्योश्चान्तःकरणात्मनैकत्वाद्बुद्धावेव कामादयो नात्मनीत्यवधारितमित्यर्थः ॥ २३ ॥

कामादेर्बुद्ध्याश्रयत्वेपि कथं रूपादिसंस्कारसमानाश्रयत्वसिद्धिरित्याशङ्क्य रूपादेरपि बुद्ध्याश्रयत्वे श्रुतिमाह । तत्रैवेत्यादिना ।

(२४) तत्रैव रूपादिसंस्कारादयोपि कस्मिन् रूपाणि प्रतिष्ठितानीति हृदय इति श्रुतेः कामा येस्य हृदि श्रितास्तीर्णो हि तदा सर्वान् शोकान् हृदयस्यासङ्गो ह्ययं, तद्वा अस्यैतदतिच्छन्दा, इत्यादिश्रुतिशतेभ्यो ऽविकार्योयमुच्यते, अनादित्वान्निर्गुणत्वादित्यादि इच्छाद्वेषादि च क्षेत्रस्यैव विषयस्य धर्मो नात्मन इति स्मृतिभ्यश्च कर्मस्थैवाशुद्धिर्नात्मस्थेति ॥

कामादेरन्तःकरणनिष्ठत्वे वाक्यान्तरं पठति । कामा येस्येति । तीर्णो हि तदा सर्वाञ्छोकान् हृदयस्येत्युक्तेः सनिदानानामेव तेषां हृदाश्रयत्वं गम्यते, तस्माच्छोकनिमित्तरूपादिसंस्काराणामपि बुद्ध्याश्रयत्वमुक्तमेव । अन्यथा सर्वविशेषणानुपपत्तेरित्यर्थः । इदानीमात्मनो वेदनाकामद्वेषाद्यसंस्पृष्टत्वे श्रुतिस्मृती पठति । असङ्गो हीत्यादिना । अतिच्छन्दा इति छान्दसं रूपविशेषणत्वादतिच्छन्दः छन्दः कामो ऽतिगतकाममसंस्पृष्टकामादिदोषमेतदात्मरूपमित्यर्थः । निर्गुणत्वादित्यादिस्मृतिभ्यश्चेति संबन्धः । इदानीं सिंहावलोकनेन कामादेरनात्मधर्मत्वे श्रुत्युक्ते स्मृतिमाह । इच्छाद्वेषादिचेति ।

इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः ।
एतद् क्षेत्रं समासेन सविकारमुदाहृतम् ॥

इत्यादिस्मृतिभ्यश्चेच्छादिः क्षेत्रस्यैव धर्मो नात्मन इति योजना । क्षेत्रस्यानात्मत्वं द्योतयितुं विषयस्येति विशेषणं, श्रुतिस्मृतिसिद्धमर्थमुपसंहरति । कर्मस्थैवाशुद्धिर्नात्मस्थेति इति सिद्धमिति शेषः ॥ २४ ॥

परमप्रकृतमुपसंहरति । अतो रूपादीति ।

(२५) अतो रूपादिसंस्काराद्यशुद्धिसंबन्धाभावान्न परस्मादात्मनो विलक्षणस्त्वमिति प्रत्यक्षादिविरोधाभावाद्युक्तं पर एवात्माहमिति प्रतिपत्तुं तदात्मानमेवावेदहं ब्रह्मास्मि एकधैवानुद्रष्टव्यमहमेवाधस्तादात्मैवाधस्तात्सर्वमात्मानं पश्येद्यत्र त्वस्य सर्वमात्मैवेदं सर्वं यदयमात्मा ॥

रूपादिसंस्काराद्यशुद्धिसंबन्धाभावादेव प्रत्यक्षादिविरोधाभावान्न परस्मादात्मनो विलक्षणस्त्वमिति हेतोः पर एवात्माहमिति प्रतिपत्तुं युक्तमिति योजना । आत्माभेदेनैव ब्रह्म प्रतिपत्तव्यमित्युक्तेर्थे श्रुतिवाक्यान्युदाहरति । तदात्मानमेवेत्यादिना । आत्मानं प्रत्यञ्चमेवाहं ब्रह्मास्मीत्यवेदवगतवान्तद्ब्रह्मेत्यर्थः । एकधैवैकस्वरूपेणैव न तु विषयत्वेन भेदेन वानुद्रष्टव्यमित्याचार्योपदेशानन्तरमनुसंधेयमेतदप्रमेयं ध्रुवमिति वाक्यशेषः । स एवाधस्तादित्यादिना भूमानं परमात्मानं सर्वाधिष्ठानमुपक्रम्य तस्य ताटस्थ्यशङ्कानिवृत्तये अहंकारात्मत्वमुपदिश्य पुनरहमुपरागकृतपरिच्छेदादिनिवृत्तये तत्साक्षिप्रत्यगेकरसतां तस्य निर्दिशति छान्दोग्यश्रुतिरित्याहाहमेवाधस्तादिति । शमादिसाधनसंपन्नः सन् सर्वमात्मानं पश्येदिति निर्दिष्टेर्थे हेतुमिव वचनान्तरमाह । यत्र त्वस्य सर्वमात्मैवेति । अभूत्तत्केन कं पश्येदित्यादिर्वाक्यशेषः । इदं सर्वं यद्भोक्तृभोग्यादिलक्षणं विश्व तत्सर्वमयमात्मा नातोन्यद्वस्तुतोस्तीत्यर्थः ॥ २५ ॥

स एष इति ।

(२६) स एषो ऽकलो, ऽनन्तरमबाह्यं, सबाह्याभ्यन्तरो ह्यजो, ब्रह्मैवेद,मेतया द्वारा प्रापद्यत प्रज्ञानस्य नामधेयानि, सत्यं ज्ञानमनन्तं ब्रह्म, तस्माद्वा, तत्सृष्ट्वा तदेवानुप्राविश,देको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वम् ॥

स एषो ऽकलो ऽमृत इति प्रश्नोपनिषद्गतं वाक्यं, स एष प्रत्यगात्मा कलाशब्दवाच्यप्राणाद्युपाधिभिर्वियुक्तो ऽमृतो ऽमृतं ब्रह्मैवेति तस्यार्थः । तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्मेति वाक्यं बृहदारण्यकमुदाहरत्यनन्तरमबाह्यमिति । मुण्डकवाक्यं च तत्समानार्थमाह । स बाह्येति । अमूर्त्तः पुरुष एव स बाह्याभ्यन्तरः सर्वस्य सह बाह्याभ्यन्तररूपेण वर्त्तते नान्यो ऽजो न जायते इत्यजः जन्मादिविक्रियारहित इत्यर्थः । ब्रह्मैवेदममृतं पुरस्तादित्यादि चात्रोदाहर्त्तव्यमित्याह । ब्रह्मेवेदमेवेति । इदं सर्वं ब्रह्मैवेत्यर्थः । एवं ब्रह्माद्वयात्मप्रतिपादकानि वाक्यान्युदाहृत्य ब्रह्मण एव जीवात्मना कार्यप्रवेशवादिवाक्यानि च जीवस्य ब्रह्माभेदप्रतिपत्त्यर्थमुदाहरति । एतया द्वारेत्यादिना । स एवमेव सीमानं विदार्यैतया द्वारा प्रापद्यतेति शिरःकपालयोः संधिगतच्छिद्रेण देहे प्रवेशं स्रष्टुरीश्वरस्य दर्शयत्यैतरेयकवाक्यमित्यर्थः । तत्र प्रविष्टस्य स्वरूपनिर्द्धारणपरं वाक्यं येन वा पश्यतीत्यादिप्रज्ञानस्य नामधेयानि भवन्तीत्यन्तं प्रज्ञप्तिमात्रं तत्स्वरूपं प्रज्ञानं ब्रह्मेति तस्य ब्रह्मात्मत्वं च तत्रोक्तमित्यभिप्रेत्याह । प्रज्ञानस्य नामधेयानीति । स्रष्टुरेव सृष्टे कार्ये जीवरूपेण प्रवेश इत्येतदेव तैत्तिरीयकवाक्येन द्रढयति । सत्यं ज्ञानमनन्तमित्यादिना । परमात्मैव सर्वसाक्षी सर्वभूतान्तरात्मेत्यत्र श्वेताश्वतरीयमन्त्रमुदाहरति । एको देव इति ॥ २६ ॥

शरीरादिसंसृष्टतया प्रतीयमानस्यापि आत्मनस्तद्धर्मसंसर्गाभावेन ब्रह्मात्मनो ज्ञेयत्वे काठकवाक्यद्वयमुदाहरति । अशरीरं शरीरेषु न जायते म्रियते वा विपश्चिदिति च ।

(२७) अशरीरं शरीरेषु, न जायते म्रियते, स्वप्नान्तं जागरितान्तं, स मे आत्मेति विद्यात्, यस्तु सर्वाणि भूतानि, तदेजति तन्नेजति, वेनस्तत्पश्यन्, तदेवाग्नि,रहं मनुरभवं सूर्यश्चा,न्तःप्रविष्टः शास्ता जनानां, सदेव सोम्य, तत्सत्यं स आत्मा तत्त्वमसीत्यादिश्रुतिभ्यः स्मृतिभ्यश्च, पूः प्राणिनो गुहाशयस्य, आत्मैव देवताः, नवद्वारे पुरे, समं सर्वेषु भूतेषु, विद्याविनयसंपन्ने,ऽविभक्तं विभक्तेषु, वासुदेवः सर्वमित्यादिभ्य एक एवात्मा परं ब्रह्म सर्वसंसारधर्मविनिर्मुक्तस्त्वमिति सिद्धम् ॥

अवस्थासाक्षिण आत्मनो ऽवस्थाधर्मास्पर्शित्वेन ब्रह्मत्वप्रतिपत्तौ काठकवाक्यमाह । स्वप्नान्तं जागरितान्तमिति । नेम्यारनाभिचक्रनिदर्शनेन दृश्यदर्शनतत्साधनभूतसर्वजगदाश्रयरूपं प्राणशब्दितं ब्रह्मैव समे म आत्मेति प्रवृत्तं कौषीतकेयोपनिषद्वाक्यमुदाहरति । स मे आत्मेति विद्यादिति । यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति, तदेजति तन्नेजतीति च मन्त्रद्वयमीशावास्यगतमुदाहृतं तत्राद्यो मन्त्रः स्पष्टार्थः । द्वितीयः परोपाधिनिबन्धनं चलनादिप्रतिभानं, स्वतस्तु निर्विकारः शुद्ध एवात्मेति दर्शयितुमित्यर्थः । "वेनस्तत्पश्यन्विश्वा वनानि भुविद्वान्यत्र विश्वं भवत्येकनीड" मिति मन्त्रं तैत्तिरीया आमनन्ति, तस्यार्थः । यत्र यस्मिन्सर्वात्मके सर्वोपादाने पूर्वोत्तरमन्त्रनिर्दिष्टे वस्तुनि विश्वं समस्तमेकनीडं भवति एकायनं भवति तदेव विश्वा भुवनानि सर्वाणि भुवनानि न ततः पृथक् किमप्यस्तीति पश्यन् श्रुत्या ऽऽचार्यप्रसादादनुभवन्विद्वान् ज्ञानी वेनो भवति विनतेः कान्तिकर्मणो वनतेर्वा संभजनीयार्थस्य धातोरिदं रूपं वेनः कान्तिमान्

संभजनीयो वा भवतीश्वर एव भवतीति । पुनरपि विदुषः सर्वात्मत्वे मन्त्रद्वयं पठति । तद्देवाग्निस्तदादित्य इत्यादिरेकः, "अहं मनुरभवं सूर्यश्चेति वामदेववाक्यरूपो ऽपरश्चेति । "अन्तःप्रविष्टः शास्ता जनानामेकः सन्बहुधा विचार इति तैत्तिरीयश्रुतिरेकस्यैवान्तर्यामिणो बहुधा विचरणं संसारव्यवहारं वदन्ती जीवपरयोरभेदं सूचयतीत्यर्थः । तत्रैव सोपक्रमं छान्दोग्यवाक्यं पठति । सदेवेति । श्रुत्युक्ते ऽर्थे स्मृतीरप्याह । स्मृतिभ्यश्चेति । सर्वप्राणिनो गुहाशयस्यैकस्यैवात्मनः पूः पुराणि शरीराणि न प्रतिशरीरमात्मभेद इत्यर्थः । उदाहृतश्रुतिस्मृत्यर्थं संकलय्य प्रकरणार्थमुपसंहरति । एक एवेति ॥ २७ ॥

---

॥ श्रीः ॥

## ॥ अथ बालरामायणाख्यनाटकस्य ॥

॥ दशमोऽङ्कः ॥

अतः परं राघवानन्दो भविता ।

ततः प्रविशति सशोका लङ्का ।

लङ्का । हा दुद्धरतवविसेसपरितोसिदारविन्दासण तिहुअणेक्कमल्ल दसकण्ठ हा हेलाबन्दीकदमहिन्द मेहणाद हा समरसंरम्भसुप्पसण्ण कुम्भअण्ण क्कहिंसि देहि मे पडिवअणम् * ।

प्रविश्य सत्वरा अलका पुरोऽवलोक्य कथमियं लङ्काऽस्तमितेऽपि सच्चरितकुण्ठे दशकण्ठे दुःखिता । विमृश्य । परिपालनाद्धि भृत्यान् स्वामिनः स्मारयति न गुणग्रामः । प्रकाशम् । सखि लङ्के वलीमुखबलबलात्कारमाकर्ण्य निखिलनाकतलतिलकायमानयाऽमरावत्या मर्त्यमण्डलशौण्डया चोज्जयिन्या रसातलभोगभङ्गिभूतया च भोगवत्या तदनुचरेण च त्रिभुवनवासिनाऽपि पुरीचक्रेण कुशलप्रश्नाय भवतीं प्रति प्रहिता । अहं च सखीस्नेहादागतास्मि ।

> छिन्ना न दिव्यतरवस्तव काचिदारात्
> कच्चिद् भृता न परिखाः कनकाम्बुजिन्यः ।
> प्लुष्टानि कच्चन न रत्नमहागृहाणि
> कच्चिन्न काञ्चनमयो दलितश्च सालः ॥ १ ॥

लङ्का । सवाक्स्तम्भम् । सहि केलासुच्छङ्गवासिणि कुबेरसच्चरिदे देवणिलये अलए किं णाम न संपण्णं तधा अ तेण केसरिकलत्तसंभवेण समीरसंभूदेण वाणरेण सुउमारकामिनीकरअलकोमलेहिं किसलयेहिं लाडललणाहरोट्ठमञ्जिट्ठेक्कसुभअकुसुमत्थवएहिं बन्दीकदसुरसुन्दरीचरणप्पहारदोहलअसंकन्तालत्तअलंछिदेहिं उक्खबन्धेहिं लीलामन्दिरं मअरध्धअस्स कुलभवणं मलअमग्गपअट्टिणो दक्खिणसमीरणस्स विस्सामट्ठाणं हिअअस्स पढमणिलओ णिच्चं वसन्तस्स पेरन्तनिवेसिदकप्पपाअवप्पहुदिपंचविहदेवद्दुमा असोअवणिया सव्वा संचुण्णिआ पाआलपरिचुंबी परिहापरिक्खेवोवि त्थलत्थिदिं लंभिदो अविच्छिण्णसंचरणचदुरेणवि मत्तण्डमण्डलेण अलङ्घणिज्जं कणअपाआरचक्कं सुमरणसेसं संपादिदं मणिभवणविध्धंसणदंसणे उण णिक्करुणस्स वि जणस्स किं भणिअदि असुधाराधोरणी किं पुण सिणेहमइं पिअसहिं समासइअ प्पाणपरिच्चअणववसाएहिं विरइदह्मि * ।

अलका । सखि धर्मजेतरि भीषणबिभीषणे बिभीषणे विनेतरि तत्रभवती किं सशोकशङ्कुरेव तन्निधिनाथपूर्ववल्लभे लङ्के विरमन्तु मध्यस्थगितैकावलीकल्पा बाष्पजलकणश्रेणयः । विरज्यतु च जरठकाञ्चनारकुड्मलकोटिपाटला दृष्टिः । धौतमाञ्जिष्टपटच्चरदीनाधरमुद्रा समासादयतु स्वां लक्ष्मीं लघूभवन्तु च प्रमाणानुक्तमृणालदण्डाः श्वासदण्डाः ।

लङ्का । जं तिणेत्तमित्तस्स णअरी भणदि † ।

नेपथ्ये ।

> रुद्राणि लक्ष्मि वरुणानि सरस्वति द्यौः
> सावित्रि धात्रि सकलाः कुलदेवताश्च ।
> शुध्यायिनी विशति शुष्मणि रामरामा
> तत्संनिधत्त सहसा सह लोकपालैः ॥ २ ॥

लङ्का । आकर्णितकेन किं उण विसुद्धिकारणम् ‡ ।

अलका । राक्षसगृहवासः किल । विचिन्त्य । विहस्य च ।

> कालुष्यहेतु वैदेह्या न राक्षसगृहस्थितिः ।
> ध्वान्तबन्दीकृताऽपीन्दोर्न कला जातु नीलति ॥ ३ ॥

लङ्का । ता एहि गदुअ पेक्खह्म § ।

अलका । कुबेरप्रसादादिहस्थैव दिव्येन चक्षुषा पश्यामि ।

---

* हा दुर्धरतपोविशेषपरितोषितारविन्दासन त्रिभुवनैकमल्ल दशकण्ठ हा हेलाबन्दीकृतमहेन्द्र मेघनाद हा समरसंरम्भसुप्रसन्न कुम्भकर्ण क्वासि देहि मे प्रतिवचनम् ।

* सखि कैलासोत्सङ्गवासिनि कुबेरसच्चरिते देवनिलयेऽलके किं नाम न संपन्नं तथा च तेन केसरिकलत्रसंभवेन समीरसंभूतेन वानरेण सुकुमारकामिनीकरतलकोमलैः किसलयैर्लाटललनाधरोष्ठमञ्जिष्ठैकसुभगस्तबकैर्बन्दीकृतसुरसुन्दरीचरणप्रहारदोहदकसंक्रान्तालक्तकलाञ्छितैर्वृक्षबन्धैर्लीलामन्दिरं मकरध्वजस्य कुलभवनं मलयमार्गप्रवर्तिनो दक्षिणसमीरणस्य विश्रामस्थानं हृदयस्य प्रथमनिलयो नित्यं वसन्तस्य पर्यन्तनिवेशितकल्पपादपप्रभृतिपञ्चविधदेवद्रुमाऽशोकवनिका सर्वा संचूर्णिता पातालपरिचुम्बी परिखाप्रतिक्षेपोऽपि स्थलस्थितिं लम्भितोऽविच्छिन्नसंचरणचतुरेणापि मार्तण्डमण्डलेनालङ्घनीयं कनकप्राकारचक्रं स्मरणशेषं संपादितं मणिभवनविध्वंसनदर्शने पुनर्निष्करुणस्यापि जनस्य किं भण्यतेऽश्रुधाराधोरणी । किं पुनः स्नेहमयीं प्रियसखीं समासाद्य प्राणपरित्यजनव्यवसायैर्विरतास्मि ।

† यत् त्रिनेत्रमित्रस्य नगरी भणति ।

‡ किं पुनर्विशुद्धिकारणम् ।

§ तदेहि गत्वा प्रेक्षामहे ।

लङ्का । ता ममावि पिअसही णिवेदेदु * ।

अलका । इयं रामराणी स्वाहावल्लभे भगवत्यात्मानमाहुतीकुर्वाणा कुररीव करुणक्रेङ्कारकातरया गिरा देवीवाचमभिसंधाय स्तौति विशुद्धिकारणं च ब्रूते ।

लङ्का । किं विअ सुणावेदु † ।

अलका ।

यद्गीर्वाणाः क्रतुबलिलिहो यत्स्मरश्चित्तजन्मा
सीमोन्मायी न च यदुदधिर्जुव्हते यच्च विप्राः ।
यः कृत्स्नस्य प्रलयदिवसो ये च ये च प्रकाशाः
कृत्स्नः सोऽयं जयति महिमा पावकः पावकस्य ॥ ४ ॥

किञ्च ।

मित्रं मन्त्री गुरुः शिष्यः स्वामी भृत्यश्च मे सदा ।
राम एव यथा नान्यस्तथा मां पातु पावकः ॥ ५ ॥

लङ्कां प्रति नातः परमवज्रहृदयैः श्रोतुं द्रष्टुं च शक्यते ।

लङ्का । तं भणिअं जणअणन्दिणीए जेण रावणप्पदीणं वि दलिआइं हिअआइं गअणङ्गणादो वि बाहबिन्दुसंदोहा णिवडन्ति । तदोतदो ‡ ।

अलका । ततश्च ।

वन्हिर्ज्वालाः सृजति कियतीर्जानकी किं विधत्ते
कीदृक् छाया रघुपतिमुखे कर्म किं लक्ष्मणस्य ।
इत्थं यावद्विमृशति जनः कौतुकोत्तानिताच-
स्तावच्छन्नं गगनमखिलं द्योतमानैर्विमानैः ॥ ६ ॥

ततश्च ।

सीतामुदीक्ष्य सुमुखीं शिखिनः प्रवेशे
मुक्तास्तथा सुमनसः सुरसुन्दरीभिः ।
स्वविक्रयः सकलखेचरमालिकानां
जातो यथा चिरतरं त्रिदिवे महार्घः ॥ ७ ॥

ततश्च । प्रोद्घुष्टमरुन्धतीप्रभृतिभिरन्तर्हिताभिः पतिव्रताभिः ।

यत्पौलस्त्यगृहोषिता प्रविशति त्वां देव शुद्ध्यर्थिनी
सीतेयं प्रथमा सतीषु कुरु तज्ज्योतिर्जलार्द्रोजडम् ।
धर्मम्लानमृणालकाण्डमृदुलान्यङ्गानि दग्धानि चे-
देतस्याः क नु शोधकोऽपि भगवन् संशुद्धये यास्यसि ॥ ८ ॥

लङ्का । अहो देवदाणं वि सीदापक्खवादो अधवा सव्वो गुणेसु रज्जदि ण सरीरेसु * ।

अलका । अहो खलु भोः पतिव्रतामयं ज्योतिरनभिभवनीयं ज्योतिरन्तरैः । यतः ।

प्रविशन्त्या चितावह्निं जानक्या परिशुद्धये ।
भेदः कोऽपि न निर्णीतः पयसः पावकस्य वा ॥ ९ ॥

हाहा किमपि निष्करुणचेता हिरण्यरेताः ।

विशुद्धये प्रविष्टाऽसौ वैदेही हव्यवाहनम् ।
अभ्रंलिहानां ज्वालानां चक्रेण च तिरोहिता ॥ १० ॥

लङ्का । कंकेल्लिकेलिकाणणदहणो णिक्करुणाणं पढमोदाहरणं हुदवहो । अलकां प्रति तदोतदो † ।

अलका । सखि लङ्के अतिक्रान्तासु च कतिपयीषु कालकलासु ।

वह्नेः शुद्धिविधायिनो भगवतस्तेजोभिरत्युद्गतै-
रम्लानामनसूयया विरचितां मौलिस्रजं बिभ्रती ।
पादाङ्गुष्ठनखाग्रदत्तनयना नीरन्ध्रविन्यासत-
स्तोकालक्ष्यमुखी चितावलयतो द्राङ् मैथिली निर्गता ॥ ११ ॥

नादौ न मध्ये नान्ते च सीताया हव्यलेहिनि ।
शुद्धस्येव सुवर्णस्य जातो वर्णविपर्ययः ॥ १२ ॥

लङ्का । अणुचिदआरी हुदवहो जं जणअतणआसुद्धिकारणं भोदि ‡ ।

अलका । सखि सर्वाङ्गहिरण्मयि यथा ।

शुध्धायाः क इवात्र शोधनविधिः स्वःसैन्धवीनामपां
पूतानां परिपूतये किमपरं तत्ते सखी मन्यते ।
लावण्यामृतसारणीसरणिभिर्निर्वाणरोचिर्लतो
निर्दग्धुं कलयाऽपि हन्त न शिखी शक्तोऽभवन्मैथिलीम् ॥ १३ ॥

नेपथ्ये ।

योगीन्द्रश्च नरेन्द्रश्च यस्याः स जनकः पिता ।

लङ्का । ता किं तिस्सा § ।

नेपथ्ये ।

सा शुद्धा रामगृहिणी वह्नौ दशरथस्नुषा ॥ १४ ॥

ततश्च ।

बद्धः सेतुर्लवणजलधौ क्रोधवह्नेः समित्त्वं
नीतं रक्षःकुलमधिगताः शुद्धिमन्तश्च दाराः ।

* तन्ममापि प्रियसखी निवेदयतु ।

† किमिव श्रावयतु ।

‡ तद् भणितं जनकनन्दिन्या येन रावणपत्नीनामपि दलितानि हृदयानि । गगनाङ्गणादपि बाष्पबिन्दुसंदोहा निपतन्ति ततस्ततः ।

* अहो देवतानामपि सीतापक्षपातोऽथवा सर्वो गुणेषु रज्यते न शरीरेषु ।

† कङ्केलिकेलिकाननदहनो निष्करुणानां प्रथमोदाहरणं हुतवहः ततस्ततः ।

‡ अनुचितकारी हुतवहो यज्जनकतनयाशुद्धिकारणं भवति ।

§ तत् किं तस्याः ।

तेनेदानीं विपिनवसतावेष पूर्णप्रतिज्ञो
दिष्ट्याऽयोध्यां व्रजति दयिताप्रीतये पुष्पकेण ॥ १५ ॥

तद्भोः प्लवङ्गयूथपतयः सर्वे गोलाङ्गूलसेनानायका निःशेषाच्छभल्लचमूपालकाश्च महाराजसुग्रीवो वः समाज्ञापयति यदुत सज्जीभवन्तु भवन्तस्त्रिभुवनैकमङ्गलकलशेन रघुवंशमुक्तामणिना क्षात्त्रधर्मरक्षाविधिसिद्धमन्त्रेण रामदेवेन सममयोध्यां गन्तुम् ।

संप्रेषितश्च हनुमान् भरतस्य पार्श्वं
लङ्काङ्गनाचकितनेत्रनिरीक्षितश्रीः ।
यात्येष वारिनिधिलङ्घनदृष्टसारो
राज्याभिषेकसमयोचितकार्यसिद्ध्यै ॥ १६ ॥

अलका । तदावामपि रामभद्रदर्शनसुखमनुभवाव इति निष्क्रान्ते । विष्कम्भः ।

ततः प्रविशतो विमानयानेन रामलक्ष्मणौ सीतात्रिजटे सुग्रीवविभीषणौ च ।

रामः । सीतां प्रति ।

यत्सख्युः शशिशेखरस्य धनदाल्लङ्केश्वरेणाहृतं
तन्मन्याच्च विभीषणे परिहृतं दत्तं च तेनाऽपि नः ।
किञ्चिन्त्यञ्चितकन्धरेण शिरसा धृत्वा प्रसन्नां दृशं
तद्भक्त्या ललिताङ्गि पुष्पकमिदं वन्दस्व मोदस्व च॥१७॥

सीता वन्दते ।

रामः । पश्चादवलोक्य ।

यस्यामजर्जरितचन्द्रिकमर्कपादै-
स्त्रासान्निशाचरपतेरुषसि व्यभासि ।
व्यावर्त्य वक्त्रकमलं कमलाक्षि पश्य
लङ्केति तां नवविभीषणराजधानीम् ॥ १८ ॥

सीता । अवलोक्य । एसा सा विणआणन्दणसमाणीदमेरुमहाजम्बूसाहासमुप्पण्णा सुणीअदि * ।

रामः । आम् । मैथिलि एवं पुराविद आचक्षते । पुरो दर्शयन् ।

अग्रे विलोकय कृशाङ्गि कुतूहलेन
दत्त्वा दृशं तरुणकेतकपत्त्रदीर्घाम् ।
नानास्त्रमन्त्रपरं कपिराक्षसानां
युद्धं क्वचाक्वचि तलातलि च प्रवृत्तम् ॥ १९ ॥

अन्यतो दर्शयन् ।

अत्रासीत्फणिपाशबन्धनविधिः शक्त्या भवद्देवरे
गाढं वक्षसि ताडिते हनुमता द्रोणाद्रिरत्राहृतः ।
दिव्यैरिन्द्रजिदत्र लक्ष्मणशरैर्लोकान्तरं लम्भितः
केनाप्यत्र मृगाक्षि राक्षसपतेः कृत्ता च कण्ठाटवी॥२०॥

सीता विहस्य अज्जउत्तो जाणादि को उण एसो * ।

रामो लज्जते । सर्वे स्मयन्ते ।

सुग्रीवः ।

लङ्केन्द्रानुज एष मैथिलि महान् योऽयं कबन्धः पुरो
वारां भर्त्तरि शैलसेतुरपरः प्रोतो यथा राजते ।
निद्रालोरतितुन्दिलस्य खलतेः क्षीबस्य घोणासृजा-
मोघेनास्य भयस्पृशोऽपि निभृतं स्वर्वासिनो हासिताः॥२१॥

सीता । अज्जउत्तेण देवा वि पहसणणट्टं पेक्खाविदा † ।

रामः । किञ्चित्स्मित्वा पुष्पकं प्रति हंहो विमानराज विमुच्य वसुधासविधवर्तिनीं गतिं किञ्चिदुच्चैर्भव कुतूहलिनी जानकी दिव्यदर्शनव्यतिकरस्य ।

ऊर्ध्वगतिनाटितकेन ।

रामः ।

यथायथा रोहति बद्धवेगं
व्योम्नः शिखां पुष्पकमानताङ्गि ।
महाम्बुधीनां वलयैर्विशालै-
स्तथातथा संकुचतीव पृथ्वी ॥ २२ ॥

सीतां प्रति सुरचारणकिन्नरविद्याधरसंकुलं गगनमार्गमीक्षतां मैथिली ।

प्रविश्य विद्याधरः । रामभद्र महेन्द्रादेशादेष रत्नशेखरो विद्याधरकुमारस्ते दिव्यचरितं व्यनक्ति ।

रामभद्रः । अहो महान् प्रसादोऽस्मासु देवराजस्य ।

रत्नशेखरः । सीतां प्रति ।

बन्धे वारिनिधेः कृतेऽपि गिरिभिः सोढः शिरोमण्डल-
च्छेदो राक्षसपुङ्गवेन समरे यस्याः किमन्यत्स्तुते ।
कीदृक् सा जनकात्मजेति रभसाद्विद्याधरैर्वृन्दशः
पाणिच्छत्त्रनिवारितार्ककिरणैस्त्वं कौतुकाद् दृश्यसे ॥२३॥

सीता । अपवार्य ।

विद्याधराः सहचरीचतुरोक्तिमार्गे
रागस्पृशो गगनगर्भयथेष्टचेष्टाः ।
निस्तल्पमल्पसमयं निबिडाभ्रखण्ड-
कुञ्जान्तरेष्विह रताद्भुतमाद्रियन्ते ॥ २४ ॥

रामः । प्रिये पृथ्वीपुत्रि नीरन्ध्रबन्धमपि वारिवाहव्यूहं द्विधा विधाय पुष्पकं प्रवर्तते विलोक्य विहस्य ।

* एषा सा विनतानन्दनसमानीतमेरुमहाजम्बूशाखासमुत्पन्ना श्रूयते ।

* आर्यपुत्रो जानाति कः पुनरेषः ।

† आर्यपुत्रेण देवा अपि प्रहसननृत्यं प्रेक्षयिताः ।

क्षिप्तं त्वया काञ्चनकान्तिदाम
यन्मत्तवारणमुपेत्य कुतूहलिन्या ।
तेनामुना जलधरोऽयमरालकेशि
सद्यस्तडिद्वलयवानिव पश्य जातः ॥ २५ ॥

अपिच ।

हस्ते त्वया हारिणि हारयष्टिभि-
र्विमानवातायनतः कुतूहलात् ।
कृते विदध्यात्सदृशीं प्रतिक्रिया-
मितीव धाराम्बु घनो निरस्यति ॥ २६ ॥

सीता । अज्जउत्त किं उण एदं करिदन्तच्छेदपण्डुरं पुव्वपच्छिमसिन्धुबन्धोभअपेरन्तं तदुत्तरदिसाकुहरपूरणधुरन्धरं दीसदि * ।

रत्नशेखरः । जनकनन्दिनि किमत्र रावणारिणा रत्नशेखरं पृच्छ हिमालयः खल्वयम् ।

सीता । किं जो सो विन्दारअविन्दवन्दिदरुद्दचरणपडिबिम्बचुंबिदसिलुच्छङ्गो गङ्गासोत्तसीमन्तिदणिअंबो हेरम्बदन्तमुसलुल्लिहिदमेहलाबन्धो णिवडिदहरवुसहवरखुरखण्डिदधरणिवट्टो चित्तसिहण्डिमण्डलावचिदमन्दारकुसुमप्पसरो गोरीगुरुत्ति णिव्विघ्घमहग्घिदो सुणीअदि † ।

रत्नशेखरः । स एवायम् ।

श्रीकण्ठश्वशुरः स एष भगवान् मेनापतिः पर्वतः
पुत्रीवानुमया पुरः किमपरं हेरम्बमातामहः ।
यस्यायं महिमा यदत्र शमिनः श्यामाकमुष्टिंपचाः
स्वास्वेवाश्रमभूषु दिव्यवपुषः क्रीडन्ति कामाज्ञया ॥२७॥

अपिच ।

स्त्रीणां जन्ममहातरोः किमपरं सौभाग्यलाभोत्सव-
स्तत्प्राप्तेरधिदैवतं गिरिसुता साप्यस्य कुञ्जान्तरे ।
एकाङ्गुष्ठनिपीडितक्षितिति तपस्तप्त्वा सहस्रं समा-
श्चन्द्रापीडशरीरसंविभजनप्रेमाणमापद्यत ॥ २८ ॥

सीता । अज्जउत्त इधज्जेव अध्धनारीसरो हरो संवुत्तो ‡ ।

रत्नशेखरः । आं वासुन्धरेयि ।

अत्रोढायां गिरिदुहितरि प्रीतिमानिन्दुमौलिः
प्रेमावेशाझ्झटिति भगवानर्धनारीश्वरः सन् ।
मन्दं देवैः प्रणतचरणः प्रत्यभिज्ञानलेशा-
द्वामे पाणौ तदितरकरं ताडयित्वा जहास ॥ २९ ॥

रामः । किमुच्यते सर्वाश्चर्यनिधानं हि नीहारमहागिरिः ।

रत्नशेखरः । यथाज्ञातं विराधविध्वंसनेन ।

अस्मिन्नूढा मृडानी द्युसरिदिह धृता दन्तिदैत्योऽत्र भिन्न-
श्छिन्नं ब्राह्मं शिरोऽस्मिन्निह गुरुनिधने निर्मिता मातरश्च ।
दृक्श्रोत्रप्रीतिपेयं दलितसुरपुरीदुर्गमद्वारमुद्रं
सिद्धानां पूर्वसिद्धेरिति हरचरितं वर्ण्यते चित्रमत्र ॥ ३० ॥

सीता । इह हिमवन्तमहीहरे चन्दसेहराहिं मअरध्धअणिद्दहणं रहुउलमहत्तरीआओ पसंसंतीओ आसि ता कहिं उण तम् * ।

रत्नशेखरः । यदिदं निर्मितमिव मरकतमणिमरीचिवीचिभिराच्छादितमिव वंशकरीरनीलकान्तिभिः परिकल्पितमिवानूरुसारथिरथतुरङ्गमरोमराजिभिरुत्पादितमिव शितिकण्ठकण्ठमण्डलीमेचकरुचिसंचयैस्तरुभिराश्रमपदं भगवतो वृषभध्वजस्य ।

एतत्सुन्दरि देवदारुविपिनं शैलस्य गौरीगुरो-
रस्मिन् वासवशासनेन रहयन् सद्यः समाधिक्रियाम् ।
प्रत्यक्षं गिरिजन्मनः सुरजने स्तोत्राय सज्जाञ्जलौ
रुद्रस्याम्बकपावकेन मदनो वेगादनङ्गीकृतः ॥ ३१ ॥

सीता । परमेसरसरीरपरिक्खित्ततिक्खविसिहस्स मअरध्धअस्स कदमो उण णिवेसो † ।

रत्नशेखरः ।

एतन्मैथिलि मन्मथाश्रमपदं रत्या स्वयं वर्धितै-
र्लीलाशाखिभिरञ्चितान्तिकमितः केलीशकुन्ताश्रयैः ।
शृङ्गारश्च रसो मधुश्च समयो देवश्च ताराधिपो
रागः पञ्चमसंज्ञकश्च ललितैस्ते यत्र सिद्धा व्रतैः ॥ ३२ ॥

सीता । सकौतुकम् । पुञ्जीकदअज्जउत्तकित्तिसंताणाणुआरी रासीभूदहरट्टहाससरिसनिवेसो पलआणलपिण्डीकदक्खीरसमुद्ददुद्धक्करपडिरूवो कदरो उण एस महिहरो ‡ ।

रामः । रुद्रावासः कैलास इति मे तर्कः ।

रत्नशेखरः । यथावगतं ताडकाताडनेन ।

* आर्यपुत्र किं पुनरिदं करिदन्तच्छेदपाण्डुरं पूर्वपश्चिमसिन्धुबन्धोभयपर्यन्तं तदुत्तरदिशाकुहरपूरणधुरन्धरं दृश्यते ।

† किं य एष वृन्दारकवृन्दवन्दितरुद्रचरणप्रतिबिम्बचुम्बितशिलोत्सङ्गो गङ्गास्रोतःसीमन्तितनितम्बो हेरम्बदन्तमुसलोल्लिखितमेखलाबन्धो निपतितहरवृषभवरखुरखण्डितधरणिपृष्ठश्चित्रशिखण्डिमण्डलावचितमन्दारकुसुमप्रसरो गौरीगुरुरिति निर्विघ्नमहार्घितः श्रूयते ।

‡ आर्यपुत्र । इहैवार्धनारीश्वरो हरः संवृत्तः ।

* इह हिमवन्महीधरे चन्द्रशेखरान्मकरध्वजनिर्दहनं रघुकुलमहत्तरिकाः प्रशंसन्त्य आसन् तत् क्व पुनस्तत् ।

† परमेश्वरशरीरपरीक्षिततीक्ष्णविशिखस्य मकरध्वजस्य कतमः पुनर्निवेशः ।

‡ पुञ्जीकृतार्यपुत्रकीर्तिसन्तानानुकारी राशीभूतहराट्टहाससदृशनिवेशः प्रलयानलपिण्डीभूतक्षीरसमुद्रदुग्धोत्करप्रतिरूपः कतरः पुनरेष महीधरः ।

कैलासः स्फटिकाद्रिरेष भगवानेनं भवानीसखः
सख्यादैलबिलस्य भक्तिजनितान्नित्यं शिवः सेवते ।
क्रिस्त्वास्मिन्ननुमेखलं नखमुखच्छेदैः समावेद्यते
हेलोत्पाटनपूर्वकालनिहितैर्लङ्कापतेर्विक्रमः ॥ ३३ ॥

अत्र च ।

कैलासाचलकर्णिकेयमलका नेत्रैकपेया पुरी
देवस्य द्रविणप्रभोः किमपरं शृङ्गारसारस्य भूः ।
यस्यामस्तमिते ऽद्य राक्षसपतौ यक्षाङ्गनानाममी
वर्तन्ते प्रतिचत्वरं प्रतिगृहं प्रत्यापणं चोत्सवाः ॥ ३४ ॥

रामः । पुरो ऽवलोक्य कः पुनरस्तमिताखिलककुद्बन्धः सलिलस्कन्धः ।

रत्नशेखरः । उत्पत्तिसदनं कलहंसवयसामाकरः कनकारविन्दानां विलासदीर्घिका देवदेवस्य समवगाढतटान्तरसमदमहोष्मणा हेरम्बेण रभसाचान्तवीतवीचिभङ्गं गगनाङ्गणपरिभ्रामिणा चन्द्रहरिणेन लीलालीढसीकरकणं कूलकुलायकारिणा कुमारमयूरेण प्रसारितकराकृष्यमाणार्णस्कं करिमकरत्रासादैरावतेभसेवितशाद्वलोपकण्ठं नीलकण्ठवृषेण समध्यासितपरिसरं संतानकारण्ये नारायणवराहेण वर्णितविभवं वैकुण्ठकमठेनाभिलषितगर्भं पद्मनाभमहामत्स्येन नीतनीरं त्रिसन्ध्यमरुन्धतीकराकलितकमलिनीपत्रपात्रैरानन्दितपुरन्दरमानसं मानसं नाम दिव्यं सरः । सीतां प्रति ।

एतन्मानिनि मानसं सुरसरो निर्लूनहेमाम्बुजं
पार्वत्या प्रियपूजनार्थममुतो गङ्गा सरिन्निर्गता ।
अस्माच्चित्रशिखण्डिभिश्च परमे पर्वण्युपादीयते
स्नानोत्तीर्णवृषाङ्कभस्मरजसां सङ्गात्पवित्रं पयः ॥ ३५ ॥

सीता । को उण एसो णिच्चतरुणतरुमण्डलीचुम्बिदमहाणिअम्बनिवेसो मत्तण्डचण्डेक्करहचक्कचुम्बणमसिणसुवण्णसिहरो महीहरो दीसदि * ।

रत्नशेखरः ।

नेत्रं वासुकिरत्र केशवभुजैः संदानितो ऽयं पुरा
चक्रुर्वल्लवतां परिश्रमविधावेतस्य देवासुराः ।
मन्थाः सो ऽयमभूत्समुद्रकलशे तन्वीयतां कौतुका
देव श्रोत्रपरम्परापरिचितो दृग्गोचरं मन्दरः ॥ ३६ ॥

* कः पुनरेष नित्यतरुणतरुमण्डलीपरिचुम्बितमहानितम्बसन्निवेशो मार्तण्डचण्डैकरथचक्रचुम्बनमसृणसुवर्णशिखरो महीधरो दृश्यते ।

THE

# VAIŚESHIKA APHORISMS

OF

# KAṆĀDA.

## FIRST BOOK, FIRST DAILY LESSON.

*(Continued from page 204.)*

Qualities enumerated.

रूपरसगन्धस्पर्शाः सङ्ख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नाश्च गुणाः ॥ ६ ॥

Aph. 6. Colour, Taste, Smell and Touch, Numbers, Extensions, Individuality, Conjunction and Disjunction, Priority and Posteriority, Conceptions, Pleasure and Pain, Desire and Aversion, and Volitions are Qualities.

[1] By the particle *cha* he implies in addition to these Gravity, Fluidity, Viscidity, Self-restitution, Merit, Demerit, and Sound; for those being well known to be Qualities are not expressly mentioned. He will explain in the proper place from their characteristic and from their form that these are qualities. The compound 'Colour, Taste, Smell, and Touch,' is intended to point out that there is no common substratum of contemporaneous Colours, Tastes, Smells and Touches. Numbers and Extensions are not made a compound word and are named in the plural number, the design being to indicate that contemporaneous Numbers and Extensions have a common substratum. Although the common substra-

[1] चकारेण गुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दान् समुच्चिनोति ते हि प्रसिद्धगुणभावा एवेति कण्ठतो नोक्ताः । गुणत्वञ्चामीषां यथास्थानं लक्षणतः स्वरूपतश्च वक्ष्यति रूपरसगन्धस्पर्शानां समानकालीनरूपरसगन्धस्पर्शसामानाधिकरण्यं नास्तीति सूचनार्थं समासः । संख्यापरिमाणयोस्तु समानकालीनसंख्यापरिमाणसामानाधिकरण्यसूचनायासमासो बहुवचननिर्देशश्च यद्यप्येकत्वसमानाधिकरणं नैकत्वान्तरं न वा महत्त्वदीर्घत्वसमानाधिकरणं महत्त्वदीर्घत्वान्तरं तथापि द्वित्वादीनामन्योन्यं सामानाधिकरण्यं महत्त्वदीर्घत्वादीनाञ्च विजातीयपरिमाणयोः सामानाधिकरण्यमस्त्येव । पृथक्त्वञ्च यद्यपि द्विपृथक्त्वादिसमानाधिकरणं तेन संख्यावद्बहुत्वेनैव निर्देष्टुमर्हति तथाप्यवधिव्यङ्ग्यत्वलक्षणं संख्यातो वैधर्म्यं सूचयितुमेकवचननिर्देशः । संयोगविभागयोर्द्वयोरप्येककर्मजन्यत्वसूचनाय द्विवचनं परत्वापरत्वयोरन्योन्याश्रयनिरूप्यतया दिक्काललिङ्गत्वाविशेषसूचनाय च द्विवचनं बुद्धीनां विद्यादिभेदेन सांख्याभिमतैकमात्रबुद्धिनिराकरणसूचनाय बहुवचनं सुखदुःखयोर्द्वयोरपि भोगत्वावच्छेद्यैककार्यजनकत्वमविशेषेण चादृष्टोन्नायकत्वं सुखस्यापि दुःखेनापि भावनञ्च ख्यापयितुं द्विवचनं इच्छाद्वेषयोर्द्वयोरपि प्रवृत्तिं प्रति कारणत्वसूचनाय द्विवचनं प्रयत्नानां विहितनिषिद्धगोचराणां दशविधानां पुण्यहेतुत्वं दशविधानाञ्च पापहेतुत्वमभिसन्धाय बहुवचनमित्युन्नेयम् । यद्वा रूपरसगन्धस्पर्शानां भौतिकेन्द्रियव्यवस्थाहेतुत्वज्ञापनार्थं पाकजप्रक्रियाव्यवस्थापनार्थं वा ते समस्योक्ताः संख्यायां द्वित्वबहुत्वादौ विप्रतिपत्तिरिति तन्निराकरणसूचनार्थं बहुत्वेनाभिधानं पृथक्त्वे तु संख्याबहुत्वेनैवास्यापि बहुत्वमिति सूचनाय विधिज्ञानव्यञ्जनीयत्वं संख्यातो वैधर्म्यमिति सूचनाय च पृथगभिधानं परिमाणे तु दीर्घत्वह्रस्वत्वादिविप्रतिपत्तिनिरासाय बहुवचनं संयोगविभागयोरन्योन्यविरोधज्ञापनाय द्विवचनं ॥

tum of unity is not another unity, and the common substratum of greatness and length, is not another greatness and length, yet duality &c. are the common substratum of each other, and greatness, length &c., form a common substratum for extensions of a different kind. Although Individuality is the common substratum for the Individuality of two &c., and should accordingly be specified in the plural like Numbers, yet the singular is employed to indicate its difference from Numbers on account of its being characterised by the implying of limitation. Conjunction and Disjunction are expressed by [one word in] the dual to indicate that though two they are produced by one Action [or Motion.] Priority and Posteriority are expressed in the dual to imply that they are relative to one another, and to imply that they are indifferently properties of Space and Time. The plural 'Conceptions' is intended to imply an objection to the doctrine of the Sánkhyas that Conception [Intelligence] is one only, on the grounds of their division into Knowledge &c. The dual word Pleasure and Pain is used to establish [the doctrine] that they, though two, produce one effect to be distinguished as fruition, that they indifferently bring to pass the consequences of actions done in a former state, and that even Pleasure must be accounted Pain. Desire and Aversion are in the dual to indicate that both are causes of activity. The plural form of Volitions implies that they are the cause of merit from ten kinds of lawful and prohibited objects, and the cause of sin from ten kinds of objects. "Or else Colour, Taste, Smell, and Touch are mentioned in a compound word to teach that they are the cause of the relation between the elements and the organs of sense, or else to establish the effects which are produced by heat. "There is a contrariety in Number which consists of duality, plurality &c.," it is to imply the denial of this that [Number] is mentioned in the plural. Individuality is enumerated separately to denote that it is manifold by reason of the plurality of Numbers, and to imply that its difference from number consists in revealing the knowledge of a limit. In the case of Extension the plural is used to deny that there is any contrariety between length, breadth, &c. Conjunction and Disjunction are in the dual to denote their mutual opposition. U.

Enumeration of Actions.

उत्क्षेपणमवक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्माणि ॥ ७ ॥

Aph. 7. Throwing upwards, Throwing downwards, Contracting, Expanding, and Going are the Actions.

[1] Actions by reason of their production by Substances and by Qualities, and from their Inhesion in Substances possessed of Colour, are known by perception. Accordingly after the enumeration of Substances and Qualities [Kaṇáda] declared the enunciation and division of Actions. U.

[1] *Iti* as before expresses limitation. Action as a class is cognised by perception, so also are Throwing upwards &c., according to the author of the Muktávalí. Going is a particular class comprising revolution, evacuation, dropping, flaming upwards, bending up and down &c., V.

Common element in Substance, Quality, and Action.

सदनित्यं द्रव्यवत् कार्यं कारणं सामान्यविशेषवदिति द्रव्यगुणकर्मणामविशेषः॥८॥

Aph. 8. Existence, transitoriness, inhesion in substance, effect, cause and possession of generality and particularity are the not particular [common element] of Substances, Qualities, and Actions.

[2] After *iti* the word *pratyaya* is to be supplied. The general is existence, the particular is substantiality. The notion 'existence' &c., is applicable to Quality and Action as well as to Substance, in this there is no particularity. Therefore existence, opposition to subsequent non-existence [or to destruction], the possession of Substance as a cause of inhesion, opposition to antecedent non-existence, causality, and the constituting of a class contained in existence, are that which is similar in Substances, Qualities, and Actions. Although transitoriness, inhesion in substance, effect, and cause, are not comprehended in an eternal Substance or Quality, or causality in an atom, yet it is here meant that transitoriness is a condition of such members of the categories as exist in virtue of a being opposed to subsequent non-existence, inhesion in Substance is a condition of such members of the categories as exist in virtue of Substance as the cause of inhesion, the being an effect is a condition of such members of the categories as exist in virtue of a being opposed to antecedent non-existence, and causality is a condition of such members of the categories as exist as inherent or non-inherent causes. V.

---

[1] कर्मणां द्रव्यजन्यतया गुणजन्यतया च रूपवद्द्रव्यसमवायाच्च प्रत्यक्षतेति द्रव्यगुणाभिधानानन्तरं कर्मोद्देशविभागावाह ॥

[1] इतिः पूर्ववदवधारणपरः । कर्मत्वजातिः प्रत्यक्षसिद्धा एवमुत्क्षेपणत्वादिकमपीति मुक्तावलीकारः । गमनत्वञ्च जातिविशेषो भ्रमणरेचनस्यन्दनोर्ध्वज्वलननमनोन्नमनादिष्वपि ॥

[2] इतीत्यनन्तरं प्रत्यय इत्यध्याहार्यं सामान्यं सद्विशेषो द्रव्यत्वादि तद्वत् । सदित्यादिप्रत्ययो यथा द्रव्ये तथा गुणकर्मणोरपि तत्र न कश्चिद्विशेषः । तथा च सत्तावत्त्वं ध्वंसप्रतियोगित्वं द्रव्यसमवायिकारणत्वं प्रागभावप्रतियोगित्वं कारणत्वं सत्ताव्याप्यजातिमत्त्वञ्च द्रव्यगुणकर्मणां साधर्म्यमिति भावः । यद्यप्यनित्यत्वादित्रिकं नित्ये द्रव्ये गुणे चाव्याप्तं कारणत्वञ्च पारिमाण्डल्यादौ तथापि ध्वंसप्रतियोगिभाववृत्तिपदार्थविभाजकोपाधिमत्त्वं द्रव्यवत्त्वं प्रागभावप्रतियोगिभाववृत्तिपदार्थविभाजकोपाधिमत्त्वं कार्यत्वं समवाय्यसमवाय्यन्यतरकारणवृत्तिपदार्थविभाजकोपाधिमत्त्वं कारणत्वं द्रव्यादीनां साधर्म्यमित्यत्र तात्पर्यम् ॥

Common element in Substances and Qualities.

द्रव्यगुणयोः सजातीयारम्भकत्वं साधर्म्यम् ॥ ९ ॥

Aph. 9. The common property of Substance and Quality is that they originate things of the same class.

[1] Terrene atoms originate a terrene aggregate of two atoms, blue colour and the like in an atom produce blue colour and the like in an aggregate of two atoms. Such is the origination by Substance and Quality of things of the same class. Although this cannot be predicated of Ether &c., and of simple Substances, and of the Qualities of these, yet the meaning is that there is a similarity in the conditions of the divisions of the Categories existing by reason of the origination of homogeneous things. V.

Cp. Muktávalí on Bháshá-parichchheda 14, [2] That which is of the extent of an atom is not the cause of anything, for that would originate an Extension of Substance commencing by dependence on the extent of the atom itself. But this is impossible, for one Extension is productive of another Extension exceeding that which belongs to things of its own class, as from a great thing a greater is originated, and so consequently that which would be produced from an atom would be smaller than an atom. The same is to be understood to be the case with respect to infinitely great Extension, and Generality transcending sense, and Particularity.

Explanation of the foregoing Aphorism.

द्रव्याणि द्रव्यान्तरमारभन्ते गुणाश्च गुणान्तरम् ॥ १० ॥

Aph. 10. Substances originate another Substance, and Qualities another Quality.

[3] He elucidates what was said before. [The sense is] obvious. V.

Actions do not originate Actions.

कर्म कर्मसाध्यं न विद्यते ॥ ११ ॥

Aph. 11. An Action cannot be effected by [another] Action.

[1] The meaning is that there is no proof that one Action can be effected by another, as there is that Substances and Qualities are produced by things of the same class. It is here intended to be said that if one Action produced another, it would produce it after being itself produced, as in the case of Sound. Now, as the former Action produced a Disjunction from conjunct Substances, from what would the second Action produce a Disjunction? For Disjunction is preceded by Conjunction, and there is not another Conjunction produced in the same Substratum; but if [by the subsequent Action] there is no production of Disjunction, the definition of Action is violated. U.

The characteristic of Action is that it is the immediate cause of Conjunction and Disjunction.

A. E. G.

## WIDOW-MARRIAGE.

A great social reform has found a new advocate in Vishnu Parasu-rám Śástrí Pandit of Bombay, who has recently furnished a reply to the Punarudváha-pratishedha a treatise in which the Benares Pandits undertook to refute the arguments of Pandit Iśvar-chandra Vidyáságar and others in favour of the marriage of Hindu widows. The writer of this reply, which is intitled Vidhavodváha-viveka, maintains that the present restrictions on the marriage of Hindu widows may be unexceptionally removed consistently with the strictest orthodoxy. To prove this he quotes a number of authorities, who all sanction the practice under certain conditions; and maintains the plain and literal interpretation of these as opposed to the traditional. The texts cited allow the giving in marriage of a daughter or ward more than once under certain conditions. Such are the cases of a wife being left a virgin widow, being abandoned by her husband, where the marriage has been contracted under false pretences on the part of the bridegroom, when the husband loses his caste, and the like. One text only appears to give an explicit and unconditional sanction to the marriage of widows. This is a śloka of the Nárada-smriti which may have existed in a former and more complete form of the Mánava-dharma-śástra, and occurs in the Bṛihat-paráśara-smṛiti:

नष्टे मते प्रव्रजिते क्लीवे च पतिते पतौ ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥

[1] पार्थिवाः परमाणवः पार्थिवद्व्यणुकमारभन्ते परमाणुनीलरूपादिकञ्च द्व्यणुकादिगतं नीलरूपादिकमारभते इति द्रव्यगुणयोः सजातीयारम्भकत्वं यद्यपि गगनादावन्त्यवयविनि तद्गुणे चाव्याप्तिस्तथापि सजातीयारम्भकवृत्तिपदार्थविभाजकोपाधिमत्त्वस्य साधर्म्यत्वे तात्पर्यम् ॥

[2] अणुपरिमाणं न तु कस्यापि कारणम् । तद्धि स्वाश्रयारब्धद्रव्यपरिमाणारम्भकं भवेत् । तच्च न सम्भवति । परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वात् । महदारब्धस्य महत्तरत्ववत् । अणुजन्यस्याणुतरत्वप्रसङ्गाच्च । एवं परममहत्परिमाणमतीन्द्रियसामान्यं विशेषाश्चेति बोध्यम् ॥

[3] पूर्वोक्तमेव स्पष्टयति । सुगमम् ॥

[1] सजातीयारब्धद्रव्यगुणयोरिव कर्मसाध्ये कर्मणि प्रमाणं नास्तीत्यर्थः । इदमत्राकूतम् । कर्म यदि कर्म जनयेत् स्वोत्पत्त्यनन्तरमेव जनयेत् शब्दवत् । तथा च पूर्वकर्मणैव यावत् संयोगिद्रव्येभ्यो विभागे जनिते द्वितीयं कर्म येन सह विभागं जनयेत् विभागस्य संयोगपूर्वकत्वात् संयोगान्तरस्य च तत्राधिकरणे ऽनुत्पन्नत्वात् विभागाजनने तु कर्मलक्षणक्षतेः ॥

In examining the application of the words नष्टे मते it is only fair to consider the Hindu conception of marriage and its duties as set forth everywhere in the later Sanskṛit literature. A woman is to be always in a state of pupilage. The *patria potestas* passes from her father to her husband, and upon the death of her husband devolves upon her sons. While her husband lives she is to obey and worship him as her deity, looking forward to reunion with him in a future state as the reward of her devotion. It is by becoming her husband's partner in another life that she may expect a higher place hereafter. After his death she is to lead a religious life, protected by and subject to her sons, cherishing her husband's memory, and not so much as mentioning the name of any other. There is no provision made for her ceasing to live as a *brahma-chárinị́*, and for her being given in marriage by her sons.

बाल्ये पितुर्वशे तिष्ठेत् पाणिग्राहस्य यौवने ।
पुत्राणां भर्तरि प्रेते न भजेत् स्त्री स्वतन्त्रताम् ॥ Manu v. 148.
कामं तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः ।
न तु नामापि गृह्णीयात् पत्यौ प्रेते परस्य च ॥ v. 157.
आसीतामरणात् क्षान्ता नियता ब्रह्मचारिणी ।
यो धर्म एकः पत्नीनां काङ्क्षन्ती तमनुत्तमम् ॥ v. 158.

From the time when such became the general, and consequently the legal, conception of women's duties, the marriage of widows must at least have been discouraged. If a more express prohibition of the practice is not found, perhaps the want of one was not anticipated by the various writers, after once prescribing the widow's rule of life. There can be little doubt that the spirit of the later Sanskṛit literature is altogether opposed to widow-marriage. A few texts of doubtful interpretation cannot have been intended to affirm the legality of anything inconsistent with duties already clearly defined. Those, then, who seek a reformation in this as in other matters must appeal elswhere than to the later religious books. Not only the interpretation but the authority of these must be freely questioned, and they must be studied from a critical instead of a religious point of view. It is hardly reasonable to innovate upon a religion of authority in one point, and to submit to it without question on every other. A really free inquirer will be able to satisfy himself, from the Veda and the residuum of history in the legends of the epics, that the early Aryas thought and acted differently in this and other matters from their descendants of the present day.

A. E. G.

# RAMAYANA,

## BOOK I. CANTO I.

### THE ARGUMENT.

To sainted Narad, crown of those
Whose lore in sweetest language flows,
Whose chief delight from youth to age
Was rite austere and Scripture's page,
Valmiki, of earth's saints the best,
These words of questioning addressed:

'In all this world, I pray thee, who
Is virtuous and just and true:
Brave, grateful, pure in act and mind,
To every creature good and kind:
Firm, prudent, bounteous, lofty-souled,
With passions checked and wrath controlled;
To slanderous tale who lends no ear;
Whose wrath the gods in battle fear;
For whom the task were not too hard
The triple world from ill to guard?
Who is the best of princes, he
Who loves his people's good to see?
The store of bliss, the living mine
Where brightest joys and virtues shine:
Queen Fortune's best and dearest friend
Whose steps her choicest gifts attend.
Who may with sun and moon compare,
With Indra, Vishnu, Fire and Air?
Grant, Saint divine, the boon I ask—
For thee, I ween, an easy task,
To whom the power is given to know
If such a man breathe here below.'

Then Narad, open to whose eye
The present, past and future lie,
Made ready answer: 'Hermit, where
May virtues dwell so high and rare?
Yet listen, and my tongue shall tell
In whom alone these virtues dwell.

From old Ikshvaku's line he came,
Known to the world by Rama's name:
Wise, brave, in Scripture deeply read,
Obedient, pure, his foemen's dread.
Well trained to think and act and speak,
He slays the proud and spares the weak.
Tall and broad-shouldered, strong of limb
Fortune has set her seal on him.

Graced, like a shell, with triple line,
His neck displays the auspicious sign.
His chest is broad, his steps are free;
His strong arms reach below his knee.
All fairest graces join to deck
His head, his brow, his stately neck,
And limbs in fair proportion set—
The manliest form e'er fashioned yet.
Graced with each high imperial mark.
His skin is beautifully dark.
Large are his eyes that sweetly shine
With majesty almost divine.
His plighted word he ne'er forgets;
On erring sense a watch he sets.
By nature wise, his teacher's skill
Has trained him to subdue his will.
Good, resolute and strong to bear,
His glory is to save and spare;
And lend his aid, and ne'er in vain,
The cause of justice to maintain.
Well has he studied o'er and o'er
The Vedas and their kindred lore.
Well skilled is he the bow to draw;
Well trained in arts and versed in law;
High-souled and meet for happy fate;
Most tender and compassionate;
The noblest of all lordly givers,
Whom good men follow, as the rivers
Follow their own dear lord, the Sea—
So liberal, so just is he.
The joy of Queen Kausalya's heart,
In every virtue he has part:
Firm as Himalaya's snowy steep,
Unfathomed like the mighty deep;
The peer of Vishnu's power and might,
Yet lovely as the Lord of Night;
Patient as Earth, but, roused to ire,
Fierce as the world-destroying fire;
In bounty like the Lord of Gold,
And Justice' self in human mould.

With him, his best and eldest son,
By all his princely virtues won
King Dasaratha willed to share
His kingdom, as the Regent Heir.
But when Kaikeyi, youngest queen,
With eyes of envious hate had seen
The solemn pomp and regal state
Prepared the Prince to consecrate,
She bade the hapless king bestow
Two gifts he promised long ago,—
That Rama to the woods should flee,
And that her child the heir should be.
By chains of duty firmly tied,
The wretched king perforce complied.
Rama, to please Kaikeyi, went
Obedient forth to banishment.
Then Lakshman's truth was nobly shown;
Then were his love and courage known,
When for his brother's sake he dared
All perils, and his exile shared.
And Sita, Rama's darling wife,
The close companion of his life,
Whom happy signs conspired to bless—
A miracle of loveliness,—
Followed her husband, like the light
Attendant on the Lord of Night.
The king and people, sad of mood,
The hero's car awhile pursued.
But when Prince Rama lighted down
At Sringavera's pleasant town,
Where Ganga's gentle waters flow,
He bade his driver turn and go.
King Guha there no aid denied,
And bore him to the farther side.
Then on from wood to wood they strayed,
O'er many a stream, through sun and shade,
As Bharadvaja bade them, till
They came to Chitrakuta's hill.
And Rama there, with Lakshman's aid,
A pleasant little cottage made,
And spent his days with Sita, dressed
In coat of bark and deer-skin vest.
And Chitrakuta grew to be
As bright with those illustrious three
As Meru's sacred peaks that shine
With glory, when the Gods recline
Beneath them—Siva's self between
The Lord of Gold and Beauty's Queen.

The aged king for Rama pined,
And for the skies the earth resigned.
Bharat, his son, refused to reign,
Though urged by all the priestly train.
Forth to the woods he fared to meet
His brother, fell before his feet,
And cried: 'Thy claim all men allow:
O come, our lord and king be thou.'
But Rama nobly chose to be
Observant of his sire's decree.
He gave the sandals that he wore—
A pledge that he would come once more—
And bade his brother turn again.
Then Bharat, finding prayer was vain,

The sandals took and went away;
Nor in Ayodhya would he stay,
But went to Nandigrama, where
He ruled the realm with watchful care,
Still longing eagerly to learn
Tidings of Rama's safe return.

Then lest the people should repeat
Their visit to his calm retreat,
Away from Chitrakuta's hill
Fared Rama ever onward till
Beneath the shady trees he stood
Of Dandak's vast primeval wood.
Viradha, giant fiend, he slew,
And then Agastya's friendship knew,
Counselled by him he gained the sword
And bow of Indra, heavenly lord:
A pair of quivers too, that bore
Of arrows an exhaustless store.
While there he dwelt in greenwood shade,
The trembling hermits sought his aid,
And bade him with his sword and bow
Destroy the fiends who worked them woe.
And Rama's falchion left its trace
Deep cut on Surpanakha's face—
A hideous giantess who came
Burning for him with lawless flame.
Their sister's cries the giants heard,
And vengeance in each bosom stirred:
The monster of the triple head,
And Dushan to the contest sped.
But they and myriad fiends beside
Beneath the might of Rama died.

When Ravan, mighty warrior, knew
The slaughter of his giant crew—
Ravan, the King, whose name of fear
Earth, Hell, and Heaven all shook to hear—
He bade the fiend Maricha aid
The vengeful plot his fury laid.
In vain the wise Maricha tried
To turn him from his course aside:
Not Ravan's self, he said, might hope
With Rama and his strength to cope.
Impelled by fate and blind with rage
He came to Rama's hermitage.
There, by Maricha's magic art,
He wiled the princely youths apart,
The vulture slew, and bore away
The wife of Rama as his prey.
The son of Raghu came and found
The vulture slain upon the ground.
He rushed within his leaf-built cot;
He sought his wife, and found her not.
Then, then the hero's senses failed,
In mad despair he wept and wailed.
Then on the pile that bird he laid,
And still in quest of Sita strayed.
A hideous giant then he saw,
Kabandha named, a shape of awe.
The monstrous fiend he smote and slew,
And in the flame the body threw;
When straight from out the funeral flame
In lovely form Kabandha came,
And bade him seek in his distress
A wise and holy hermitess.
By counsel of this saintly dame
To Pampa's gentle stream he came,
And there the steadfast friendship won
Of Hanuman the Wind-God's son.
Counselled by him he told his grief
To great Sugriva, Vanar chief,
Who, warned of all the tale, before
The sacred flame alliance swore.
Sugriva to his new-found friend
Told his own story to the end:
His hate of Bali for the wrong
And insult he had borne so long.
And Rama lent a willing ear
And promised to allay his fear.
Sugriva warned him of the might
Of Bali, matchless in the fight,
And credence for his tale to gain,
Showed the huge foe himself had slain.
The prostrate corse of mountain size
Seemed nothing in the hero's eyes:
He lightly kicked it, as it lay,
And cast it twenty miles away.
To prove his might his arrows through
Seven trees in line, uninjured, flew.
He cleft a mighty hill apart,
And down to hell he hurled his dart.
Then high Sugriva's spirit rose,
Assured of conquest o'er his foes.
With his new champion by his side
To vast Kishkindha's cave he hied.
Then, summoned by his awful shout,
King Bali came in fury out.
One shaft from Rama's deadly bow
The monarch in the dust laid low.
Then Rama bade Sugriva reign
In place of Bali justly slain.
Then speedy envoys hurried forth
Eastward and westward, south and north.

Commanded by the grateful king
Tidings of Rama's spouse to bring.

Then by Sampati's counsel led,
Brave Hanuman who mocked at dread,
Sprang at one wild tremendous leap
A hundred leagues across the deep.
To Lanka's town he urged his way,
Where Ravan held his royal sway.
There pensive 'neath Asoka boughs
He found poor Sita, Rama's spouse.
He gave the hapless girl a ring,
A token from her lord and king.
A pledge from her fair hand he bore;
Then battered down the garden door.
Five captains of the host he slew,
And seven great chieftains overthrew;
Left Aksha dead upon the field,
Then to his captors chose to yield.
Soon from their bonds his limbs were free,
But honouring the high decree
Which Brahma had pronounced of yore
He calmly all their insults bore.
The town he burnt with hostile flame,
And spoke again with Rama's dame,
Then swiftly back to Rama flew
With tidings of the interview.

Then with Sugriva for his guide,
Came Rama to the Ocean side.
He smote the sea with shafts as bright
As sunbeams in their summer height,
And quick appeared the Rivers' King
Obedient to the summoning.
A bridge was thrown by Nala o'er
The narrow sea from shore to shore.
They crossed to Lanka's golden town,
Where Rama's hand smote Ravan down.
Vibhishan there was left to reign
Over his brother's wide domain.
To meet her husband Sita came;
But Rama stung with ire and shame,
With bitter words his wife addressed
Before the crowd that round her pressed.
But Sita, touched with noble ire,
Gave her fair body to the fire.
Then straight the God of Wind appeared,
And words from heaven her honour cleared.
And Rama clasped his wife again,
Uninjured, pure from spot or stain,
Obedient to the Lord of Fire
And the high mandate of his sire.
Led by the Lord who rules the sky,
The Gods and heavenly Saints drew nigh,
And honoured him with worthy meed
Rejoicing in each glorious deed.
His task achieved, his foe removed,
He triumphed, by the Gods approved.
By grace of Heaven he raised to life
The chieftains slain in mortal strife;
Then in the magic chariot through
The clouds to Nandigrama flew.
Met by his faithful brothers there
He loosed his votive coil of hair;
Thence fair Ayodhya's town he gained,
And o'er his father's kingdom reigned.
Disease or famine ne'er oppressed
His happy people, richly blest
With all the joys of ample wealth,
Of sweet content and perfect health.
No widow mourned her well-loved mate,
No sire his son's untimely fate.
They feared not storm or robber's hand:
No fire or flood laid waste the land:
The Golden age seemed come again
To bless the days of Rama's reign.

From him, the great and glorious king,
Shall many a princely scion spring.
He, when ten thousand years are past,
To Brahma's world shall go at last.'

## BOOK VI. CANTO 76.

Fierce as he who rules the dead,
Ravan forth to battle sped;
Chieftains of his giant band
Followed close on either hand.
Scarce the city gates were past
When the sun was overcast:
Darkness fell on all around,
Roared the clouds and shook the ground.
Startled coursers fled amain
Mid a shower of bloody rain.
Vultures, with ill-omened wing,
Smote the banner of the king;
And the Jackal's hungry cry
Echoed as the car flew by.
Throbbing eye and aching arm
Struck him with a wild alarm:
Pallor sat upon his cheek,
And his voice grew low and weak.
Terrible with flash and flame
Down a hissing meteor came.
Birds that haunt the carnage field

Round the head of Ravan wheeled ;
And his steeds, as on they swept
To the brunt of battle, wept.
Still the maddened king in spite
Of all omens rushed to fight ;
Still by Yama's hand impelled
Toward his fate his course he held.
Earth beneath his chariot shook,
Hill and forest, cave and brook.

## BOOK VI. CANTO 93.

Soon as they saw their mighty leader dead,
The giant legions turned and broke and fled ;
Some to the mountain height, the wood, the cave,
Some wildly leapt into the ocean wave.
Some with sad fears for wife and children's fate
Ran to their home through Lanka's golden gate.
Sad welcome there in women's weeping eyes,
The groans of age, and tender children's cries.
Behind the routed warriors, fierce and strong
As lordly lions pressed the victor throng :
From street to street in eager quest they strayed,
And all the marvels of the town surveyed :
Eight ample gates that blazed with gems and gold,
Eight mighty walls that girt the giant's hold ;
And glittering domes and spires that flashed on high
Like clouds sun-tinted in the autumn sky.

But sad Vibhishan with a brother's grief
Wept o'er the body of the giant chief :
'O glorious hero, bold and brave !' he cried,
'Skilled in all arms, in many a battle tried !
Spoiled of thy crown, with mighty limbs outspread,
Why dost thou lie upon this gory bed ?
Why wilt thou sleep upon the earth's cold breast,
When silken couches woo their lord to rest ?
Ah me, my brother ! over bold,
Thine is the fate my heart foretold ;
But love and pride forbade to hear
The friend who blamed thy wild career.
Fallen is our sun that shone so bright ;
Our lordly moon is veiled in night :
Our beacon fire is dead and cold ;
A hundred waves have o'er it rolled.
What could his light and fire avail
Against Lord Rama's arrowy hail ?
Woe for the giants' royal tree,
Whose stately height was fair to see !
His buds were deeds of kingly grace ;
His bloom, the sons who decked his race.
His penance was the glorious fruit,
And his own noble soul the root.
With rifled bloom and mangled bough
The royal tree lies prostrate now !'

'Nay, idly mourn not,' Rama cried,
'The warrior chief has nobly died.
Intrepid hero, firm through all,
So fell he as the brave should fall ;
And ill beseems it men like us
To weep for those who perish thus.
Be firm : thy causeless grief restrain,
And pay the dues that yet remain.'

Again the sad Vibhishan spoke :
'His was the hero's arm that broke
Embattled Gods and Indra's might,
Unconquered ere to-day in fight.
He rushed against thee, strove, and fell,
As Ocean, when his waters swell,
Hurling his might against the rock,
Falls spent and shattered by the shock.
Woe for our chief's untimely end,
The generous lord, the trusty friend.
The cup of bliss he loved to drain,
And wealth upon his friends to rain.
Our sure defence when fear arose,
A bitter scourge to stubborn foes.
In Holy Scripture deeply read,
The sacred flame he duly fed,
Of ready hand, of fearless heart,
In sternest penance bore his part.
O, let the foe thy hand has slain
The honours of the dead obtain.'
Then Rama answered : 'Hatred dies
When low in dust the foeman lies.
Now triumph bids our contest cease,
And knits us in the bonds of peace.
Let funeral rites be duly paid,
And be it mine thy toil to aid.'

# RAGHUVANSA.

## CANTO VIII.

### SPRING.

Now lovely Spring, descending gently, rests
Mid his dear woods that wave their shady crests.
Softly he comes—at first the floweret's birth
Proclaims his advent to the longing earth ;
Then burst the tendrils from the leafy trees,
Then comes the Koïl, then the song of bees.
See, as the gentle breeze from MALAYA blows,
Loaded with flowers the scented Mango throws

Her boughs about in play—a sight to steal
Hearts dead to earth, that love nor hate can feel!
The rich Asoka, with its glorious dyes,
Enthrals the spirit as it charms the eyes;
And to the lover every spray is dear
That lends new beauty to his darling's ear.
To deck the forests, Spring delights to choose
The lovely crimson of the Amaranth's hues,
Fair tree, beloved by labouring bees that throng
Round its sweet blossoms with their ceaseless song,
Or cling upon the Vakul's buds, and sip
Flowers fed with nectar from a woman's lip.
Now is the time when maidens love to pull
That glorious flower, so bright, so beautiful,
That decks in Spring the waving woods, and wear
Its golden blossoms twisted in their hair.
Now, like a lovely bride, 'tis sweet to see
The creeping jasmin clasp her husband tree,
As a sweet smile of wifelike transport plays
Over her teeth of flowers, her lips of sprays.
Robes like the morn when first the sun appears—
Bright barley drooping o'er the maiden's ears—
The Koïl's music from the Mango bough—
These are love's weapons, and resistless now.
The golden pollen, wafted by the breeze,
Brightens the Tíla's spray all dark with bees,
Til each young bud, and every blossom there
Shines like the pearls that deck a maiden's hair.
Faint, far away, through woods in blossom floats
The music of the Koïl's earliest notes,
As when some modest maiden sweetly tries
To tell the love that sparkles in her eyes.
The woods are all alive; the busy throng
Of bees at labour charm the ears with song.
Like women's flashing teeth, the trees display
Boughs rich with blossoms pure and white as they,
And wave their leaves, like taper hands, in glee,
Moving in concert with the melody.

The laughing maiden in the flying swing
Keeps with delight the Festival of Spring,
Yet slow to seize in her soft hand the cord,
And leave the rest her lover's arms afford.
Both dames and maidens listen, and rejoice,
While comes sweet counsel in the Koïl's voice:—
"Resist no more!" it says, or seems to say—
"Youth lasts not ever, love ye while ye may!"

## THE HUNT.

In hunter's garb the glorious King is drest,
His bow hangs ready on his sturdy breast;
And, as he goes, thick clouds of dust arise
Beneath his horses' feet, and veil the skies.
A leafy wreath upon his head he wears,
Green, like the trees around, the shield he bears;
The only glitter, when his ear-ring shakes
At every step his prancing courser takes.

First, with their mouths still full of holy grass,
The hunter sees a flock of wild-goats pass;
The male in triumph proudly leads the way,
The thirsty kids each mother oft delay.
Straight to the mark the hunter's arrow flies;
Their ranks are broken, and their tremulous eyes
Peer through the trees, as, when a gale has blown,
Shine lotus-leaves upon the waters thrown.
Now gainst a noble buck he bends his bow,
But moved by pity for the gentle doe
That comes herself between, his tender heart
Forbids his hand to send the ready dart.
In vain he aims at many a startled deer,
Their large eyes quickly trembling in their fear
Recal the maiden's timid look, and how,
With these sweet memories, can he slay them now?

While angry boars in wild confusion fly
From the cool marshes where they love to lie
Their dripping feet and trodden grass betray
To the keen hunter's eye their secret way.

The huge rhinoceros is forced to mourn,
Cut by the hunter's shaft, his mighty horn,
The King delights to check the haughty foe,
So spares his life, but brings his glory low.
Spotted like broken boughs, fierce tigers spring
From their dark caverns towards the fearless King;
One moment, and his hand by practice skilled
Their mouths, like quivers, with his shafts has filled.
Loud as the rushing wind, his bow-string's sound
Wakes lions slumbering on the shady ground;
Their royal dignity and matchless might
The rival Monarch's jealous rage excite.
Foes of the elephant, their claws are red
With blood-stained pearls torn from his mangled head:
He, his avenger, now delights to pay
The service rendered in the doubtful fray.

Now towards a herd of bulls he turns his horse,
And shoots swift arrows in his rapid course;
Like trembling Princes when the conqueror's nigh,
In wild confusion through the wood they fly;
He checks the chase and spares their lives, content
With their broad tails, their boasted ornament.

*(To be continued.)*

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

# काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

# THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 35. Benares April 1st, 1869. Vol. III.


## ॥ उपदेशसहस्र्या गद्यप्रबन्धः ॥

तदेवं श्रुतिस्मृतिन्यायसिद्धे ब्रह्मात्मैकत्वे ऽभिहिते लौकिकवैदिकव्यवहारविरोधं शङ्कते । स यदीति ।

(२८) स यदि ब्रूयाद्, यदि भगवन्ननन्तरो ऽबाह्यः स बाह्याभ्यन्तरो ह्यजः कृत्स्नः प्रज्ञानघन एव सैन्धवघनवदात्मा सर्वमूर्त्तिभेदवर्जित आकाशवदेकरसः, किमिदं दृश्यते श्रूयते वा साध्यं साधनं वा साधकश्चेति श्रुतिस्मृतिलोकप्रसिद्धं वादिशतविप्रतिपत्तिविषय इति ॥

गृहक्षेत्रदेशकोशादिकं साध्यमैहिकं लौकिकं दृश्यते, तत्साधनं वा प्रतिग्रहसेवाविजययुद्धादि, तत्साधकश्च तदर्थिवर्गो ब्राह्मणादिर्दृश्यते, तथा यागादि साधनं, स्वर्गादि साध्यं, तत्कामश्च साधक, इति पारलौकिकमपि त्रिकं श्रूयते स्वर्गकामो यजेतेत्येवमादीत्यर्थः । कुत्र दृश्यते श्रूयत इत्याकाङ्क्षायामाह । श्रुतिस्मृतिलोकप्रसिद्धमिति । लोक इति व्यवहर्तृजन उच्यते । देहात्मप्रसिद्धिवल्लोकप्रसिद्धेरतन्त्रत्वशङ्कायामाह । वादिशतेति । वादिशतविप्रतिपत्तीनां विषयो विषयत्वं यस्मिन्नुक्तत्रितये तत्तथोक्तम् ॥ २८ ॥

व्यवहारस्याविद्याविषयत्वाच्च तेन पारमार्थिकब्रह्मात्मैक्यं विरुध्यत इति समाधत्ते । आचार्यो ब्रूयादित्यादिना ।

(२९) आचार्यो ब्रूयाद्, अविद्याकृतमेतद्यदिदं दृश्यते श्रूयते वा, परमार्थतस्त्वेक एवात्मा, ऽविद्यादृष्टेरनेकवदाभासते, तिमिरदृष्ट्या ऽनेकचन्द्रवत्, यत्र वान्यदिव स्याद्यत्र हि द्वैतमिव भवति, तदितर इतरं पश्यति, मृत्योः स मृत्युमाप्नोति, अथ यत्रान्यत्पश्यति अन्यच्छृणोति अन्यद्विजानाति तदल्पम्, अथ यदल्पं तन्मर्त्यमिति, वाचारम्भणं विकारो नामधेय, मनृतमन्यो ऽसावन्योहमिति भेददर्शननिन्दोपपत्तेरविद्याकृतं द्वैतमेकमेवाद्वितीयं यत्र त्वस्य को मोहः कः शोक इत्याद्येकत्वविधिश्रुतिभ्यश्चेति । यद्येवं भगवन्किमर्थं श्रुत्या साध्यसाधनादिभेद उच्यते उत्पत्तिः प्रलयश्चेति ॥

स्पष्टो ऽस्यार्थः । उक्तेर्थे श्रुतीरुदाहरति । यत्र वा इत्यादिना । इवशब्दो ऽन्यदर्शनस्याभासत्वं द्योतयति । स्वप्नावस्याद्रष्टान्तार्थो वेवशब्दः । यत्र यदा ऽविद्यावस्थायां द्वैताभावे ऽपि द्वैतमिव द्रष्टृदृश्यदर्शनभेदवद्भवति तत्तदा इतरो द्रष्टा इतरं स्वव्यावृत्तं कर्मभूतं विषयमितरेण चक्षुषा करणेनेत्यर्थात्पश्यतीवेत्यर्थः । यच्च भेददर्शनोपलब्धं तदल्पं परिच्छिन्नं, यच्च परिच्छिन्नं तन्मर्त्यं विनाशि, यच्च विनाशि न तत्सत् "नासतो विद्यते भाव" इति वचनादित्यर्थः । द्वैतस्याविद्याकृतत्वे श्रुतीरुपन्यस्य ब्रह्मात्माद्वयस्य परमार्थत्वे श्रुतीरुपन्यस्यति । एकमेवेत्यादिना । ननु साध्यसाधनभेदश्चेदविद्याविषयस्तर्हि मिथ्यार्थगोचरत्वात्कर्मकाण्डमप्रमाणं स्यादिति शिष्यः शङ्कते । यद्येवमिति । न केवलं कर्मकाण्डाप्रामाण्यापत्तिर्द्वैतमिथ्यात्वे, ऽपि तु ज्ञानकाण्डे ऽपि सृष्ट्यादिवाक्यानां निर्विषयतया प्रामाण्यहानिप्रसङ्ग इत्यभिप्रेत्याह । उत्पत्तिः प्रलयश्चेति । श्रुत्या किमर्थमुच्यत इत्यनुषङ्गः ॥ २९ ॥

तत्र वेदान्तवाक्यजनितब्रह्मात्मविज्ञानात्प्राक् कर्मकाण्डाप्रामाण्यापत्तिः शङ्क्यते तदूर्ध्वं वेति विकल्प्याद्यं प्रत्याह । अत्रोच्यत इति ।

(३०) अत्रोच्यते, ऽविद्यावत उपात्तशरीरादिभेदस्येष्टानिष्टयोगिनमात्मानं मन्यमानस्य साधनैरेवेष्टानिष्टप्राप्तिपरिहारोपायविवेकमजानत इष्टप्राप्तिं चानिष्टपरिहारं चेच्छतः शनैस्तद्विषयमज्ञानं निवर्त्तयितुं शास्त्रम् ॥

अविद्यावत उपात्तेति । अप्राप्ते शास्त्रमर्थवदिति न्यायात्कर्तृसाधनफलभेदस्वरूपस्य शास्त्रज्ञानशून्यानामपि प्रसिद्धेस्तत्र वेदस्यातात्पर्याद्यथाप्रसिद्धं भेदमादाय पुंसः पुरुषार्थसाधनमविज्ञातं बोधयतः शास्त्रस्य नाप्रामाण्यशङ्केत्यभिप्रेत्य संगृहीतमर्थं विवृणोति । शरीरादिभेदस्येत्यादिना । साधनैरेवेष्टप्राप्तिं चानिष्टपरिहारं चेच्छत इष्टानिष्टप्राप्तिपरिहारोपायविवेकमजानतः शनैस्तद्विषयमज्ञानं निवर्त्तयितुं शास्त्रमित्यन्वयः । साधनैरेवेष्टानिष्टप्राप्तिपरिहारेच्छायां निमित्तं विशेषणान्तरेण द्योतयन्नाह । शरीरेति । शरीरादिभेदस्य शरीरेन्द्रियादिसङ्घातविशेषस्य संबन्धिनी ये इष्टानिष्टे तद्युक्तमात्मानं मन्यमानस्येति योजना । अयं भावः । अनाद्यविद्यावृतनिजस्वभावस्य शरीरेन्द्रियमनोबुद्धिप्राणेष्वध्यस्तात्मभावस्य परिच्छिन्नमात्मानं मन्यमानस्य स्वातिरिक्तविषयसंबन्धाधीनमेव पुरुषार्थमिच्छतस्तदुपायं पर्येषमाणस्य साक्षात्पुरुषार्थमात्मतत्त्वं बोद्धुमसमर्थत्वात्प्रथमं तदभिलषितस्वर्गादिसुखादिसाधनं मानान्तरादविज्ञातं बोधयच्छास्त्रं तं विधिनिषेधयोर्व्यवस्थापयति, ततो विहितानुष्ठानान्निषिद्धपरिवर्ज्जनाच्चाहरहरेधमानात्मशुद्धेरनुपचीयमानपाप्मनो निषिद्धफलमिव काम्यफलमप्यनित्याशुचिदुःखरूपं संसार एवेति काम्यकर्मपरित्यागेनावश्यकमेव कर्मेश्वराराधनरूपमनुतिष्ठतो ऽतितरां शुद्धान्तःकरणस्य सूक्ष्मवस्तुतत्त्वप्रतिपत्तियोग्यायामिदानीं जात इति आत्मतत्त्वज्ञानमज्ञातं परमपुरुषार्थसाधनमुत्पादयेदनया प्रणालिकया ऽज्ञातार्थबोधनेनाज्ञानं पुंसो निवर्त्तयितुं शास्त्रं प्रवृत्तमित्येतदभिप्रेत्य शनैरित्युक्तमिति ॥ ३० ॥

ननु किमित्येवं तात्पर्यं वर्ण्यते प्रतीयमानसाध्यसाधनभेदस्वरूपस्यापि शब्दशक्तितात्पर्यगोचरता किं न स्यादित्याशङ्क्योभयपरत्वे वाक्यभेदापत्तेर्नैवमित्याह । न साध्येति ।

(३१) न साध्यसाधनादिभेदं विद्यते, ऽनिष्टरूपः संसारो हि स इति तद्भेददृष्टिमेवाविद्यां संसारमूलमुन्मूलयत्युत्पत्तिप्रलयाद्येकत्वोपपत्तिप्रदर्शनेनाविद्यायामुन्मूलितायां श्रुतिस्मृतिन्यायेभ्यो ऽनन्तरमबाह्यं स बाह्याभ्यन्तरो ह्यजः सैन्धवघनवत्प्रज्ञानघन एवैकरस आत्मा ऽऽकाशवत्परिपूर्ण इत्यचैवैका प्रज्ञाप्रतिष्ठा परमार्थदर्शिनो भवति, न साध्यसाधनोत्पत्तिप्रलयादिभेदेनाशुद्धिगन्धोऽप्युपपद्यते ॥

कस्मादन्यपरत्वेपि वस्तुसत्त्वपरत्वं नेष्यते इत्याशङ्क्यापुरुषार्थे तात्पर्यायोगादित्यभिप्रेत्याहानिष्टरूपः संसारो हि स इति । एवं कर्मकाण्डस्याज्ञातार्थावबोधने तात्पर्यं न भेदस्य वस्तुत्वबोधने इत्यप्रामाण्यशङ्कां तस्यापाकृत्य सृष्ट्यादिवाक्यस्य साक्षादद्वैतवस्तुप्रतिपत्तिपरत्वान्नाप्रामाण्यशङ्केत्याह । तद्भेददृष्टिमिति । उत्पत्तिप्रलयादेरित्यादिपदात् स्थितिप्रवेशनियमनानि गृह्यन्ते । उत्पत्तिप्रलयादेरेकत्वोपपत्तिदर्शनेनाद्वैते युक्तिदर्शनद्वारेण संसारमूलमविद्यामेवोन्मूलयति सृष्ट्यादिवाक्यमित्यध्याहारेण योजना । अविद्यायाः संसारमूलत्वं द्योतयितुं तां विशिनष्टि । तद्भेददृष्टिमिति । तस्य साध्यसाधनसाधकरूपस्य भेदस्य दृष्टिः प्रतिभासो यस्याः सा तथोक्ता तामित्यर्थः । अविद्योन्मूलने च किं स्यादित्यत आह । अविद्यायामुन्मीलितायामित्यादिना । एवं प्रतिष्ठितप्रज्ञस्य परमार्थदर्शिनः साध्यसाधनविशेषबुद्ध्यजनकत्वात्तदा कर्मकाण्डस्येव स्वरूपतो ऽप्रतीतेरप्रामाण्यमिष्टमेवेति विकल्पान्तरपरिहार उक्तो वेदितव्यः ॥ ३१ ॥

एवं सति यदुक्तं प्राग् "यद्येवं संसारी च सन्नित्यादि" तदप्यज्ञानविलसितं, मुमुक्षायामुत्पन्नायां कर्मतत्साधनापरित्यागे हेत्वभावादित्यभिप्रेत्याह । तच्चैतदिति ।

(३२) तच्चैतत्परमार्थदर्शनं प्रतिपत्तुमिच्छता वर्णाश्रमाद्यभिमानकृतपाङ्क्तरूपपुत्त्रवित्तलोकैषणादिभ्यो व्युत्थानं कर्त्तव्यं सम्यक्प्रत्ययविरोधात्तदभिमानस्य भेददर्शनप्रतिषेधार्थोपपत्तिश्चोपपद्यते, नह्येकस्मिन्नात्मन्यसंसारित्वबुद्धौ शास्त्रन्यायोत्पादितायां तद्विपरीता बुद्धिर्भवति, नह्यग्नौ शीतत्वबुद्धिः शरीरे वा ऽजरामरणबुद्धिः, तस्मादविद्याकार्यत्वात्सर्वकर्मणां तत्साधनानां च यज्ञोपवीतादीनां परमार्थदर्शननिष्ठेन त्यागः कर्त्तव्यः ॥

॥ इति शिष्यप्रतिबोधनविधिः ॥

पाङ्क्तरूपेति । पञ्चप्रकारेत्यर्थः । यजमानपत्नीपुत्त्रवित्तद्वयसाध्यकर्मफलभूतैतल्लोकपितृलोकदेवलोकैषणाभ्यो व्युत्थानं वैपरीत्येनोत्थानं तत्र निःस्पृहतया तत्साधनसर्वकर्मतदुपकरणसंन्यासरूपं पारिव्राज्यं कर्त्तव्यमित्यर्थः । आपाततः परोक्षतो वा ऽधिगतब्रह्मात्मभावस्य तदा ऽपरोक्षोन्मुखस्य ब्राह्मण्यादिदेहाद्यध्यासनिबन्धनकर्माधिकारित्वाभिमानशैथिल्यात्त

स्योद्देश्यविरोधाच्च त्याज्यमेव ससाधनं कर्मेत्युक्ते ऽर्थे हेतुमाह । सम्यगिति । अभेददर्शनमेव सम्यग् ज्ञानं तदिच्छता च तद्विरुद्धाभिमानतदास्पदं सर्वं त्याज्यमित्यत्रैव श्रुतार्थापत्तिमाह । भेददर्शनेति । "मृत्योः स मृत्युमाप्नोति, य इह नानेव पश्यति" "उदरमन्तरं कुरुते अथ तस्य भयं भवति"इत्यादिभेददर्शनप्रतिषेधरूपो यो ऽर्थस्तस्योपपत्तिरुपपादनं चोपपद्यते इत्यक्षरार्थः । भेदस्य तत्प्रयुक्ताभिमानस्य च प्रामाणिकत्वे श्रुत्या तन्निषेधो न घटेत, नहि प्रमाणसिद्धस्य प्रमाणेन प्रतिषेधः संभवति, न च प्रतिषेधश्रुतेर्विषयान्तरमुत्प्रेक्ष्यते, अतः प्रतिषेधकवाक्यानां भेदापवादपरत्वाभावे तदाम्नानमनर्थकं स्यात्तच्चानिष्टमध्ययनविधिविरोधादिति भावः । ननु सम्यग्ज्ञानस्य कर्मसमुच्चितस्यैव मोक्षसाधनत्वान्न विहितकर्मत्यागो युक्त इत्यत आह । नहीति । विरोधादेव समुच्चयस्यानुष्ठानमशक्यत्वात्तद्विधानासंभवात्कर्मजन्यस्य चानित्यत्वान्मोक्षत्वानुपपत्तेर्न ज्ञानकर्मसमुच्चयो मोक्षसाधनमिति भावः । यद्वोक्तमेव विरोधं दृष्टान्तोक्त्या द्रढयति । नहीत्यादिना । निरूपितमर्थसारमुपसंहरति । तस्मादिति ॥ ३२ ॥

॥ इति शिष्यप्रतिबोधनविधिर्नाम प्रकरणं विवृतम् ॥

---

तदेवं शिष्यस्य देहद्वयाभिमानापोहेन ब्रह्मरूपत्वमुपदिश्य, तस्यामवस्थायां कर्मतत्साधनसंन्यासो न्यायत उपपादितो ब्रह्मस्वभावविपरीतं चाविद्याकृतमित्युपक्षिप्तं, तदिदानीमब्रह्मरूपत्वस्याविद्यात्मकत्वमात्मनः कूटस्थतया स्वाभाविकं ब्रह्मरूपत्वं चोपपादयितुं प्रकरणान्तरमारभमाणः कृतसंन्यासस्य मुमुक्षोः कृत्यं श्रवणं विधितः सूचयन् शिष्यप्रश्नमवतारयति । सुखमिति ॥

(३३) सुखमासीनं ब्राह्मणं ब्रह्मनिष्ठं कश्चिद्ब्रह्मचारी जन्ममरणलक्षणात्संसारान्निर्विण्णो मुमुक्षुर्विधिवदुपसन्नः पप्रच्छ, भगवन् कथमहं संसारान्मोक्षिष्ये, ॥

सुखमासीनमित्यनेनाविक्षिप्तचित्ततया प्रसन्नतोक्ता, व्यावहारिकदृष्ट्या ब्राह्मणमित्युक्त्या ऽनापदि ब्राह्मणेतरवर्णान्नोपदेशो ग्राह्य इति सूचयति । परमार्थतो ब्रह्मनिष्ठमित्युक्त्या शिष्यप्रतिबोधनसामर्थ्यं सूच्यते । कश्चिदिति । प्रागुक्तगुणगणाढ्यः सुपरीक्षितः शिष्य उक्तस्तस्योपदेशग्रहणकाले एकाकित्वं सूचयितुं कश्चिदित्युक्तं, तस्य विशेषणानि ब्रह्मचारीत्यादीनि । ब्रह्मणि प्रत्यक्त्वे चरितुं विचरितुं शीलमस्यास्तीति ब्रह्मचारी ब्रह्मविचारतत्पर इत्यर्थः । अनेन नित्यानित्यवस्तुविवेको दर्शितः । विशेषणान्तरेण वैराग्यमुक्तम् । विवेकवैराग्ययुक्तस्य शान्त्यादिरर्थप्राप्त इति मत्वा चरमं विशेषणमाह । मुमुक्षुरिति । तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् । समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमित्यादि शास्त्रमनुसरन्नाह । विधिवदुपसन्न इति । प्रश्नप्रकारमेवाह । भगवन्नित्यादिना, नैमित्तिक इत्यन्तेन ग्रन्थेन । संसारमोक्षविषय एकः प्रश्नो, दुःखानुभवस्यात्मस्वभावत्वविषयो ऽपरः किमयमित्यादिप्रश्न इति विवेकः ॥ ३३ ॥

प्रथमप्रश्नस्य निमित्तमाह । शरीरेति ।

(३४) शरीरेन्द्रियविषयवेदनावान् जागरिते दुःखमनुभवामि तथा स्वप्ने ऽनुभवामि च पुनःपुनः सुषुप्तिप्रतिपत्त्या विश्रम्यविश्रम्य किमयमेव मम स्वभावः किं वा ऽन्यस्वभावस्य सतो नैमित्तिक इति । यदि स्वभावो, न मे मोक्षाशा स्वभावस्यावर्ज्जनीयत्वा,दथ नैमित्तिको, निमित्तपरिहारे स्यान्मोक्षोपपत्तिः । तं गुरुरुवाच । शृणु वत्स, न तवायं स्वभावो, नैमित्तिक इत्युक्तः । शिष्य उवाच । किं निमित्तं, किं वा तस्य निवर्त्तकं, को वा मम स्वभावो यस्मिन्निमित्ते निवर्त्तिते नैमित्तिकाभावः रोगनिमित्तनिवृत्ताविव रोगी स्वभावं प्रपद्येयमिति ॥

शरीरेन्द्रियविषयनिमित्तवेदनानुभवो हि संसारस्तद्वान्सन्नहं कथं संसारान्मोक्षिष्य इति जागरित इति द्वितीयप्रश्नस्य बीजमुक्तं, जाग्रत्स्वप्नयोर्दुःखानुभवात्सुषुप्ते चात्मनि तदननुभवात्संशयोत्थानमित्यर्थः । नैमित्तिक इति च पप्रच्छेत्यन्वयः । उभयत्र फलमाह । यदि स्वभाव इत्यादिना । अस्वभावपक्षमवलम्ब्य गुरुरुत्तरं वदन्न भेतव्यं त्वयेति शिष्यमाश्वासयतीत्याह ग्रन्थकारस्तं गुरुरिति । किं त्विति मध्ये ऽध्याहारः कर्त्तव्यः । कृताऽऽश्वासः शिष्य उवाच । किं निमित्तमिति । निमित्तनिवृत्तिमन्तरेण नैमित्तिकस्यात्यन्तिकनिवृत्त्यनुपपत्तेस्तत्स्वरूपमविदित्वा तत्परिहारायोगात्तस्य प्रश्नः कृतः, निवर्त्तकप्रश्नस्तु तत्स्वभावपरिज्ञानेन तदवलम्बनार्थः, सुखदुःखादिमत्त्वस्यास्वभावत्वोक्तौ तर्हि किं स्वभाव आत्मेति निःस्वभावं वस्तु नास्तीति मन्वानः पृच्छति । को वेति । यस्मिन्निमित्ते निवर्त्तिते नैमित्तिकाभावस्तत्किं निमित्तं किं वा तस्य निवर्त्तकमित्यन्वयः, इवशब्दो यथाशब्दार्थः । रोगी रोगनिमित्तनिवृत्तौ यथा स्वभावं प्रतिपद्यते तथा दुःखनिमित्तनिवृत्तौ यं स्वभावमहं प्रतिपद्येयं स को वा मम स्वभावः इति योजना । इति शिष्य उवाचेति संबन्धः ॥ ३४ ॥

पृष्टवस्तुस्वरूपकथनेनोत्तरं गुरुरुवाचाविद्येत्यादिना ।

(३५) गुरुरुवाच । अविद्यानिमित्तं, विद्या तस्या निवर्त्तिका, ऽविद्यायां निवृत्तायां तन्निमित्ताभावान्मोक्ष्यसे जन्ममरणलक्षणात्संसारात्, स्वप्नजाग्रद्दुःखं च नानुभविष्यसीति । शिष्य उवाच । का सा ऽविद्या किंविषया वा, विद्या च का ऽविद्यानिवर्त्तिका, यया स्वभावं प्रतिपद्येयेति । गुरुरुवाच । त्वं परमात्मानं सन्तमसंसारिणं संसार्यहमस्मि इति विपरीतं प्रतिपद्यसे, ऽकर्त्तारं सन्तं कर्त्तेति, अभोक्तारं सन्तं भोक्तेति, विद्यमानं चाविद्यमानमिति, इयमविद्या ॥

सा ऽविद्या निमित्तं निदानं यस्य स संसारस्तन्निमित्तस्तस्याभावादिति विग्रहः । तदा स्वप्नजागरितदुःखं चात्मधर्मत्वेन नानुभविष्यसीत्यर्थः । स्वरूपतो ऽवगतपदार्थानां विशेषबुभुत्सया विनेयः पृच्छतीत्याह । शिष्य उवाचेति । वाशब्दश्चार्थे, किमाश्रया च सेत्यर्थः । स्वभावं प्रतिपद्येय जाग्रदादावपि दुःखाद्यनुभवहीनमात्मतत्त्वमुपसंपद्येयेत्यर्थः । तव स्वरूपावरणविपर्ययाध्यासलक्षणा त्वत्स्वरूपाश्रयविषया ऽविद्येति प्रथमप्रश्नस्योत्तरं गुरुरुवाचेत्याह । गुरुरिति । परमात्मानं परिपूर्णस्वरूपं विपरीतं परिच्छिन्नस्वरूपमहमस्मीति त्वं प्रतिपद्यसे इति प्रतिद्वन्द्वं योज्यं, यन्निमित्तमेवं संसार्याद्यात्मतामेव प्रतिपद्यसे, परिपूर्णत्वाद्यात्मत्वं विद्यमानमपि न प्रतिपद्यसे, सेयमविद्या त्वदाश्रया त्वद्विषया चेति त्वदनुभवसिद्धा, त्वं तु चिदानन्दैकरसः कूटस्थ इत्यभिप्रायः । विद्यमानं चाविद्यमानमिति नित्यं सन्तमनित्यमित्यर्थः ॥३५॥

शिष्यस्त्वात्मनो नित्यत्वमुक्तमङ्गीकृत्यासंसार्याद्यात्मत्वमुक्तमाक्षिपतीत्याह ।

(३६) शिष्य उवाच । यद्यप्यहं विद्यमानस्तथापि न परमात्मा, कर्तृत्वभोक्तृत्वलक्षणः संसारो मम स्वभावः, प्रत्यक्षादिभिः प्रमाणैरनुभूयमानत्वा,न्नाविद्यानिमित्तो, ऽविद्यायाः स्वात्मविषयत्वानुपपत्ते,रविद्या नामान्यस्मिन्नन्यधर्माध्यारोपणा, यथा प्रसिद्धं रजतं प्रसिद्धायां शुक्तिकायां, यथा प्रसिद्धं पुरुषं स्थाणावध्यारोपयति, प्रसिद्धं वा स्थाणुं पुरुषे, नाप्रसिद्धं प्रसिद्धे प्रसिद्धं चाप्रसिद्धे, न चात्मन्यनात्मानमध्यारोपयत्यात्मनो ऽप्रसिद्धत्वात्तथात्मा-रमनात्मन्यात्मनो ऽप्रसिद्धत्वादेव ॥

शिष्य उवाचेति । प्रत्यक्षमहं कर्तेत्यादिप्रत्ययः, कर्तृत्वादिः साश्रयो धर्मत्वाद्रूपादिवदिति साश्रयत्वे सिद्धे नाचेतने सुखदुःखं पापाद्यादौ तददर्शनात्परिशेषाच्चेतनाश्रयत्वसिद्धिरनुमानम् । "गुणान्वयो यः फलकर्मकर्त्ता कृतस्य तस्यैव स चोपभोक्ता" ।

"परावसुप्तेषु जागर्त्ति कामंकामं पुरुषो निर्मिमाणः" ।

इत्यादिरागमश्चादिशब्दार्थः । विपक्षे बाधिकां युक्तिं संगृह्णाति । अविद्यायाश्चात्मविषयत्वानुपपत्तेरिति । अविद्यास्वरूपोपन्यासपूर्वकं संगृहीतमर्थं विवृणोति । अविद्या नामेत्यादिना । मिथ्या ज्ञानमेवाविद्योक्तेति मन्वानस्यायमुपन्यासः शुक्तिकायामध्यारोपयतीति वक्ष्यमाणस्यानुषङ्गः । एवमुत्तरत्राप्यनुषङ्गो द्रष्टव्यः । कस्मिंश्चिद्विषयभूते ऽर्थे ऽन्यतः प्रसिद्धस्य विषयान्तरस्याध्यारोपो ह्यविद्येति प्रसिद्धि,स्तत्रात्मा यदि प्रसिद्ध एव स्यात् तदा तस्याध्यासविरोधिप्रकाशात्मकत्वान्न तस्मिन्नतद्धर्मप्रतिभासः स्याद्, यद्यप्रसिद्धस्तदा विषयास्फुरणात्कुतस्तद्धर्मप्रतिभासो भवेत्तया च कर्तृत्वादेरात्मन्याविद्यकत्वानुपपत्तिरतः स्वाभाविक एवात्मनः कर्तृत्वादिलक्षणो धर्म इत्यभिप्रायः ॥ ३६ ॥

तत्राधिष्ठानाध्यस्यमानयोः पृथक् प्रसिद्धिमन्तरेणाध्यासानुपपत्तिरिति ते मतं किं वा प्रसिद्धिमात्रं विनेति विकल्प्य नान्त्यः प्रसिद्धिमात्रस्याङ्गीकारादित्यभिप्रेत्याद्यं निराकरोति ॥

(३७) तं गुरुराह । न, व्यभिचाराद्, नहि वत्स प्रसिद्धं प्रसिद्ध एवाध्यारोपयतीति नियन्तुं शक्यमात्मन्यध्यारोपणदर्शनाद्, गौरो ऽहं कृष्णो ऽहमिति देहधर्मस्याहंप्रत्ययविषये आत्मनि, अहंप्रत्ययविषयस्य च देहे ऽहमयमस्मीति । शिष्य आह । प्रसिद्ध एव तर्ह्यात्मा ऽहंप्रत्ययविषयतया देहश्चायमिति । तत्रैवं सति प्रसिद्धयोरेव देहात्मनोरितरेतराध्यारोपणात्स्थाणुपुरुषयोः शुक्तिकारजतयोरिव तत्र कं विशेषमाश्रित्य भगवतोक्तं प्रसिद्धयोरितरेतराध्यारोपणेति नियन्तुं न शक्यत इति । गुरुराह । शृणु, सत्यं प्रसिद्धौ देहात्मानौ न तु, स्थाणुपुरुषाविव विविक्तप्रत्ययविषयतया सर्वलोकप्रसिद्धौ ॥

गुरुराह न व्यभिचारादिति । सुषुप्त्यादावात्मन्यवभासमाने ऽपि कर्तृत्वाद्याकारस्यानवभासाद्विशिष्टात्मविषयत्वमेव प्रत्यक्षानुमानागमानामित्यविद्यात्मत्वाबाधकत्वमिति द्रष्टव्यं, हे वत्सेति संबोधयन्नद्यापि त्वं बाल एव न न्यायमार्गे व्युत्पन्न इति दर्शयति । अन्यत्र पृथक् प्रसिद्धमेवान्यत्र प्रसिद्धे ऽध्यारोपयतीति नहि नियन्तुं शक्यते व्यभिचारादित्यन्वयः । कुत्र व्यभिचार इति तत्राहात्मनीति । संग्रहं विवृणोति । गौरो ऽहमिति । देहातिरिक्तात्मवादिभिः कृशो ऽहमित्यादिर्देहधर्मावभास आत्मन्यहंप्रत्ययविषये तस्य च देहे मनुष्यो ऽहं

जानामीत्यवभासो ऽप्यध्यासो ऽङ्गीक्रियते, नहि देहात्मनोः पृथक् प्रसिद्धिरस्ति, अतस्त्वत्रोक्तनियमभङ्ग इत्यर्थः । यथा स्थाणुपुरुषयोः प्रसिद्धयोरन्योन्यस्मिंश्चाध्यासस्तथा देहात्मनोरपीन्द्रियविषयत्वेनाहंप्रत्ययविषयत्वेन च प्रसिद्धयोरेवेतरस्मिन्नितराध्यासे विशेषाभावाच्च व्यभिचार इति शङ्कते । शिष्य आहेति । तथा चाहंकर्तृचिदात्मनोः पृथगवभासाभावाच्चेतरेतराध्यास इति दार्ष्टान्तिकासिद्धिरिति भावः । आचार्यस्तु देहात्मनोः प्रसिद्धत्वे ऽपि त्वदभिमतनियमस्तत्र नास्तीत्यभिप्रेत्य व्यभिचारं द्रढयतीत्याह । गुरुरिति । सत्यं प्रसिद्धौ देहात्मानौ तत्र शृणु विशेषमिति योजना, विशेषमेवाह नन्विति ॥ ३७ ॥

अविविक्तप्रत्ययविषयतया प्रसिद्धमेवाभिनयति ।

(३८) कथं तर्हि नित्यमेव निरन्तराविविक्तप्रत्ययविषयतया नह्ययं देहो ऽयमात्मेति विविक्ताभ्यां प्रत्ययाभ्यां देहात्मानौ गृह्णाति यतः कश्चि,दत एव हि मोमुह्यते लोक आत्मानात्मविषये एवमात्मा नैवमात्मेति, इमं विशेषमाश्रित्यावोचं नैवं नियन्तुं शक्यमिति, नन्वविद्याध्यारोपितं यच्च यत्तदसत्तच्च दृष्टं यथा रजतं शुक्तिकायां स्थाणौ पुरुषो रज्ज्वां सर्प आकाशे तलमलिनत्वमित्यादि तथा देहात्मनोरपि नित्यमेव निरन्तराविविक्तप्रत्ययतया नेतरेतराध्यारोपणा कृता स्यात् ॥

नह्ययमित्यादिना । तत्र लिङ्गमाहात एव हि मोमुह्यते लोक इति । मोहातिशयमेवाभिनयत्येवमात्मेति । देह आत्मा इन्द्रियाण्यात्मा कर्त्तात्मा अकर्त्तात्मा व्यापकः परिच्छिन्नः सगुणो निर्गुण इति लोकवादिविप्रतिपत्तेः सर्वो लोको मोमुह्यमानो दृश्यते, विविक्ततयोपलम्भे त्विदं न स्यादित्यस्ति विशेष इत्युपसंहरतीमं विशेषमिति । तस्मादेकज्ञानोपरक्ततयोपलम्भ एवाध्यस्यमानाधिष्ठानयोः सिद्धिरध्यासे ऽपेक्ष्यते, न पृथक् सिद्धि,रित्यतो ऽहं कर्त्ता भोक्तेत्यस्याप्यहं मनुष्य इतिवत् तद्धाकारप्रतिभासादध्यारोपत्वसिद्धिरिति भावः । नन्वात्मानात्मनोरुभयोरपि यद्यध्यासगोचरता तदा ऽध्यस्तस्य मिथ्यात्वादात्मनः सत्यत्वानुपपत्तिप्रसङ्ग इति शिष्यः शङ्कते । नन्विति । यद्यदविद्याध्यारोपितं तत्तदसद्दृष्टं यथा शुक्तिकादौ रजतादीति व्याप्तिमुक्त्वा पक्षधर्मतामाह । तथा देहात्मनोरपीति ॥ ३८ ॥

अनुमानं प्रयुङ्क्ते ।

(३९) तदितरेतरयोर्नित्यमेवासत्त्वं स्याद्यथा शुक्तिकादिष्वविद्याध्यारोपितानां रजतादीनां नित्यमेवात्यन्तासत्त्वं तद्विपरीतानां च विपरीतेषु तद्वद्देहात्मनोरविद्ययैवेतरेतराध्यारोपणा कृता स्यात्तच्चैवं सति देहात्मनोरसत्त्वं प्रसज्येत, तच्चानिष्टं, वैनाशिकपक्षत्वादयं तद्विपर्ययेण देह आत्मन्यविद्यया ऽध्यारोपितो देहस्यात्मनि सति असत्त्वं प्रसज्येत, तच्चानिष्टं, प्रत्यक्षादिविरोधात्, तस्माद्देहात्मानौ नाविद्ययेतरेतरस्मिन्नध्यारोपितौ ॥

तदितरेतरयोरित्यादिना तत्र व्याप्तिपक्षधर्मत्वसिद्धौ सत्यामिति यावत् । आत्मन्यनात्मा अनात्मनि चात्मा नित्यमेवासन् भवितुमर्हति, नित्यमेवेतरेतरत्राध्यस्तत्वात्, शुक्तिकादौ रजतादिवद्रजतादौ शुक्त्यादिवच्चेत्यवयवत्रयमभिधायोपनयनिगमने निर्दिशति । तद्वद्देहात्मनोरिति । सिद्धसाध्यत्वाशङ्कां निराकरोति । तच्चानिष्टमिति । ननु नेतरेतराध्यासोऽङ्गीक्रियते येनात्मनो ऽप्यसत्त्वप्रसङ्गः स्यात्,किं त्वन्यतराध्यास एवान्यत्राङ्गीक्रियत इत्याशङ्कते । गुरुरथेति । तद्विपर्ययेणानात्माधिष्ठानविपर्ययेणेत्यर्थः । तदेव स्पष्टयति । देह इति । शिष्यो निराकरोति । देहस्यात्मनि सतीति । यथा शुक्तिकादौ सत्येव नेदं रजतमित्यादिना तदसत्त्वं प्रतीयते तथा ऽऽत्मन्यहमवभासे सत्येव देहस्यासत्त्वमनुभूयेत, नह्यनुभूयते,अनुभूयत एवेत्यभ्युपगमः प्रमाणविरोधादयुक्त इत्यर्थः । यस्मादेवं युक्तिं न सहते तस्मान्नाध्यास इत्युपसंहरति । तस्मादिति ॥ ३९ ॥

कथं तर्ह्यहं मनुष्य इत्यादिव्यवहारो लोकस्येति गुरुः शङ्कते ।

(४०) कथं तर्हि,वंशस्तम्भवन्नित्यसंयुक्तौ, नानित्यत्वं परार्थत्वप्रसङ्गात्संहतत्वात्परार्थत्वमनित्यत्वं च वंशस्तम्भादिवदेव, किं च यस्तु परैर्देहेन संहतः कल्पित आत्मा स संहतत्वात्परार्थस्तेनासंहतः परो ऽन्यो नित्यसिद्धस्तावत्तस्यासंहतस्य ॥

तर्हि कथमिति । शिष्यो मीमांसकादिमतमाश्रित्य संयोगसंबन्धादिति सदृष्टान्तमाह । वंशस्तम्भवदिति । यथा वंशानां स्तम्भानामाधाराधेयभावेन परस्परं संयोगविशेषे सति गृहमित्येकशब्दप्रत्ययगोचरत्वमेवं देहात्मनोरपि संयोगविशेषादहं मनुष्य इत्यादिसामानाधिकरण्यव्यवहारगोचरत्वमित्यर्थः । सिद्धान्ती परिशेषेणेतरेतराध्यासं साधयितुमुक्तसंबन्धं प्रत्याचष्टे । नानित्यत्वेति । यत्संहतं तदनित्यं परार्थं च दृष्टं यथा वंशस्तम्भादि तथा यद्यात्मापि देहादिभिः संहत एव स्यात् तदा सो ऽप्यनित्यः परार्थश्च स्या,त्तच्चानिष्ट,मनित्यत्वे संघातात्मवादापत्तेः, परार्थत्वे चाचेतनत्वापत्तेरित्य-

र्थः । एवं परपक्षनिराकरणेनार्थान्नित्यः स्वार्थश्चात्माभ्युपेय इत्युक्तं तदेवानूद्यास्तिकैः सुदूरमपि गत्वा सो ऽभ्युपगन्तव्य इत्यभिप्रेत्य स्वपक्षं साधयति । किं चेति । तेन परार्थेनानित्येन संघातेन लिङ्गेन परः संघातादन्यो विलक्षणस्तावदात्मा नित्यः सिद्ध इति योजना । विमतः स्वविलक्षणशेषः संहतत्वाद्गृहवदित्यर्थः । ननु सत्यं संघातादचेतनादन्य आत्मा, तस्य संघातासंबन्धे अहं मनुष्य इति व्यवहारानुपपत्तेस्तत्संबन्धो वाच्यः, तत्र संयोगविशेषस्यानङ्गीकारे तादात्म्याध्यासः संबन्ध इत्यायातं, तथा च निरात्मवादापत्तिरिति प्रागुक्तं शिष्यः स्मारयति । तस्यासंहतस्य संघातसाक्षिणो देहे स्वस्मिन्नध्यस्ते इति योज्यं, देहस्य स्वातन्त्र्येण सिध्यनङ्गीकारादित्यर्थः ॥ ४० ॥

(४१) देहे देहमात्रतयाध्यारोपितत्वेनासत्त्वानित्यत्वादिदोषप्रसङ्गो भवति तत्र निरात्मको देह इति वैनाशिकपक्षप्राप्तिदोषः स्याद् न स्वत एवात्मन आकाशस्येवासंहतत्वाभ्युपगमात्सर्वेणासंहतः स चात्मेति न निरात्मको देहादिः सर्वः स्यात् ॥

तथा च तादृशे देहे ऽध्यारोपितत्वेन हेतुना आत्मनो देहमात्रतयासत्त्व नित्यत्वादिदोषप्रसङ्गो भवति, तत्र, एवं परस्पराध्यासाभ्युपगमे सतीति यावद् । अध्यस्तस्य मिथ्यात्वनियमान्निरात्मको देहो निर्देहकश्चात्मेति शून्यवादप्रसङ्ग इत्यर्थः । किं शून्यवादप्रसङ्गात्तादात्म्यावभासस्याध्यासनिबन्धनत्वं नेष्यते भवता, किं वाऽऽधाराधेयभावादिसंबन्धस्य प्रामाणिकस्य तद्धेतोः सत्त्वादिति विकल्प्याद्यं निराकरोति गुरुः । न स्वत एवेति । अयमर्थः । देहादिर्हि रूपादिमत्त्वात्सावयवत्वाद्वा घटादिवज्जडो ऽपि संहताद्विलक्षणश्चेतनात्मतयोपलभ्यते, ततश्च तप्तायःपिण्डवत्तस्य चेतनसंश्लेषो वक्तव्यः, तथात्मनः संघातसाक्षिणश्चैतन्यमात्रस्वभावस्य निरवयवस्याकाशवत्स्वतः परिच्छेदशुध्यादिधर्मयोगासंभवाद् देहसंश्लेषकृतस्तस्मिंस्तत्प्रतिभास इति वक्तव्यं तथा चेतरेतरधर्मसंसर्गितयोभयोरितरेतराध्यासे ऽनुभवानुसारेणैव सिद्धे निरधिष्ठानस्यारोपस्यादृष्टचरत्वादारोपज्ञाने स्फुरतोर्मध्ये यदन्योपरागमन्तरेण कदापि स्वातन्त्र्येण न स्फुरति तत्स्वरूपेणैवारोपितं भवति, यथा गगनोपरक्ततया स्फुरन्मालिन्यादि, यत्तु तद्विपरीतं तदितरस्मिन्न स्वरूपेणारोपितं भवति, किं तु संसृष्टरूपेणैव, यथा शुक्तीदमंशादि रूप्यादौ, न चात्मनो देहाद्युपरागं विनापि सुषुप्त्यादौ स्वतः स्फुरणात्तस्य संघाते स्वरूपेण नाध्यासः, किं तु संसृष्टत्वेनैव देहादेस्तद्विपरीतत्वात्स्वरूपेणैवेति नानित्यत्वादिदोषप्रसङ्गश्चिदात्मनो नापि देहादेर्निरात्मकत्वप्रसङ्ग इति न शून्यवादशङ्कावकाशः, देहस्य तु चैतन्याध्यासव्याप्ततया चिद्धर्माध्यारोपाधिष्ठानत्वमुपचर्यत इति न परस्पराध्यासपक्षे कश्चिद्दोष इति, स्वतो ऽसंहतस्यात्मनः सर्वत्र सर्वदा विद्यमानत्वान्न संघातो निरात्मकः स्यान्नाप्यात्मानित्यत्वादिदोषवान्स्यादित्यर्थः ॥

आकाशस्येवेत्युक्तं दृष्टान्तं विवृणोति ।

(४२) यथा चाकाशं सर्वेणासंहतमिति सर्वं न निराकाशं भवत्येवं तस्मान्न वैनाशिकपक्षप्राप्तिदोषः स्या,द्यत्पुनरुक्तं देहस्यात्मन्यसत्त्वे प्रत्यक्षादिविरोधः स्यादिति, तन्न, प्रत्यक्षादिभिरात्मनि देहस्य सत्त्वानुपलब्धे,र्नह्यात्मनि कुण्डे बदरं क्षीरे सर्पिस्तिले तैलं भित्तौ चित्रमिव च प्रत्यक्षादिभिर्देह उपलभ्यते, तस्मान्न प्रत्यक्षादिविरोधः । कथं तर्हि प्रत्यक्षाद्यप्रसिद्धात्मनि देहाध्यारोपणा देहे चात्मारोपणा ॥

यथा चाकाशमिति । स्वपक्षदूषणोद्धारमुपसंहरति । तस्मादिति । तदेवं दूषणोद्धारेणेतरेतराध्यासतादात्म्यव्यवहारहेतुं ग्राहयित्वा आद्यं विकल्पं निराकार्षीदिदानीं परमते दूषणमापादयितुं द्वितीयमुत्थापयति । यत्पुनरुक्तमिति । निराकरोति । तन्नेति । आत्मनि देहो ऽस्तीत्येवं प्रत्यक्षं तावन्न संभवति, चक्षुःस्पर्शनाभ्यां देहस्य गृहीतत्व ऽप्यात्मनस्ताभ्यामगृहीतत्वाद्ग्रहणाभावे च तत्रेदमिति ग्रहणानुपपत्तेः, "पराञ्चि खानि" इति श्रुतेश्च । नात्मेन्द्रियविषयो ऽतो न तस्मिन् देहसंबन्धः प्रत्यक्षः । अत एव नानुमानादिगोचरत्वमपीत्यभिप्रेत्यानुपलब्धिं व्यतिरेकदृष्टान्तैर्विवृणोति । नहीत्यादिना । आद्यः प्रत्यक्षस्य द्वितीयो ऽनुमानस्य तृतीयो ऽर्थापत्तेः, नहि कुण्डे बदरवद्देहात्मानावेकदेशसंलग्नावुपलभ्येते इत्युक्ते भित्तिचित्रयोर्भेदेनानुपलम्भा ऽपि यथाधाराधेयभावस्तथा ऽत्रापीत्याशङ्क्याह । भित्तौ चित्रमिवेति । चित्राङ्किताया भित्तेरुपलम्भवद्देहाकाराङ्कित आत्मा नोपलभ्यते, तथा सति मयि मनुष्यो देहो ऽयमस्तीति व्यवहारः स्या,न्न तु मनुष्यो ऽहं स्थूलो ऽहमित्यादिरिति समुदायार्थः । ननु सामान्यतो गृहीते विशेषतश्चागृहीते विषये विषयान्तराध्यासो दृष्टः, तदिहात्मनः प्रत्यक्षाद्यविषयत्वे कथं तत्रानात्माध्यारोपो ऽनात्मनि वा कथमात्माध्यारोपस्तस्यात्यन्तासत्त्वे इत्यभिप्रेत्य शिष्यः शङ्कते । कथं तर्हीति ॥ ४२ ॥

किमात्मनः स्फुरणाभावात्तत्राध्यासो न संभवतीत्युच्यते, किं वाविषयत्वात्स्फुरणाभावाद् गृहीतसामान्यांशागृह्यमाणविशेषांशाभावाद्वा, तत्र नाद्य इत्याह ।

(४३) नायं दोषः, स्वभावप्रसिद्धत्वादात्मनो, नहि कादाचित्कसिद्धावेवाध्यारोपणा न नित्यसिद्धाविति नियन्तुं शक्य,माकाशे तलमलाद्यध्यारोपणदर्शना,त्किं भगवन्देहात्मनोरितरेतराध्यारोपणा देहादिसंघातकृता ऽथवात्मकृतेति । गुरुरुवाच । यदि देहादिसंघातकृता यदि वात्मकृता किं तव स्या,दित्युक्तः ।

नायं दोषः स्वभावप्रसिद्धत्वादात्मन इति । स्वप्रकाशस्यात्मनः स्वमहिम्नैव स्फुरणादित्यर्थः । न द्वितीय इत्याह । नहीति । आकाशे अप्रत्यक्षे ऽपीति शेषः । अनैन्द्रियके ऽप्याकाश ऐन्द्रियकभ्रमदर्शनादविषये ऽपि स्वतः स्फुरत्यात्मनि विषयाध्यासो नासंभावित इत्यर्थः । न चरमो, बहिरर्थेषु विद्यमानयोरपि सामान्यविशेषांशयोरग्निपैङ्गल्यादिवद्भमादावध्यासं प्रत्यतन्त्रत्वात्स्वरूपमात्रेण स्फुरणमध्यासविरोधाकारेणास्फुरणं चाधिष्ठानस्याध्यासे ऽपेक्ष्यते तदिहात्मनः स्वरूपतः स्फुरणे ऽप्यनृतजडदुःखान्तवत्त्वानात्मव्यावृत्ताकारेण वेदान्तजनितज्ञाने ऽध्यासविरोधिनि स्फुरणाभावादध्यासोपपत्तेर्न कश्चिद्दोष इति द्रष्टव्यम् । नन्वध्यासज्ञानाकारपरिणामः किमात्मन उतानात्मनः किं वोभयोः । नाद्यः । तस्य विकारित्वापत्तेरनित्यत्वादिदोषप्रसङ्गा,च्च द्वितीयो, ऽचेतनस्य तदनुपपत्ते,रत एव न तृतीय, इत्यभिप्रेत्य शिष्यः पृच्छति । किं भगवन्निति । शिष्याभिप्रायं श्रोतुकामो गुरुः कस्मिन् सति किं स्यादिति पृच्छति । यदीति । किं तव स्यात्तवेति शेषः । स्वाभिप्रायं शिष्यः प्रकटयतीत्याह । इत्युक्त इति ॥ ४३ ॥

अनात्मनः स्वरूपेणाध्यस्तत्वान्निःस्वभावस्य तस्याध्यासकर्तृतानुपपत्तेरात्मैव तत्कर्त्तेति स्वयमूहमानो ऽहमवभासस्यात्मप्रत्ययत्वात्संघाते च तद्दर्शनात्स चाहमन्यो वा ऽध्यासकर्त्तेत्युभयत्र दोषमुपन्यस्यति ।

(४४) शिष्य आह । यद्यहं देहादिसंघातमात्रस्ततो ममाचेतनत्वात्परार्थत्वमिति न मत्कृता देहात्मनोरितरेतराध्यारोपणा, ऽथाहमात्मा परो ऽन्यः संघाताच्चितिमत्त्वात्स्वार्थ इति मयैव चितिमता ऽऽत्मन्यध्यारोपणा क्रियते सर्वानर्थबीजभूतेत्युक्तो गुरुरुवाच । अनर्थबीजभूतां चेन्मिथ्याध्यारोपणां जानीषे माकार्षीस्तर्हि, नैव भगवन् शक्नोमि न कर्तुमन्येन केन चित्प्रयुक्तो ऽहं न स्वतन्त्र इति ॥

शिष्य आह । यद्यहमित्यादिना । आद्ये पक्षे अध्यासकर्तुरभावात्संसारदर्शनं न स्यादिति भावः । द्वितीये स्वयमेव स्वानर्थार्थं प्रवृत्तत्वादनिमोक्षत्वापत्तिरिति भावः । चिन्मात्राश्रयविषयानाद्यनिर्वचनीयाविद्यावेशवशाच्चिदात्मैवाविद्यापरिकल्पिताहंकारादिस्थूलशरीरान्तमात्मत्वेनाभिमन्यमानो मिथ्यैवाध्यासकर्त्तेति प्रसिद्धमुपगतः, परमार्थतस्तु कूटस्थ एवा,त्माविद्यानिवृत्त्या च संसारनिवृत्तिर्निद्रानिवृत्त्यैव स्वप्ननिवृत्तिरिति नानुपपन्नं किं चिदित्यभिप्रेत्य शनैःशनैरुक्तार्थं शिष्यबुद्धिमारोहयति गुरुरित्याह । इत्युक्तो गुरुरित्यादिना । देहाद्यात्मभावनामनर्थार्थां चेदवगच्छसि किमिति तर्हि तां न मुञ्चसि स्वतन्त्रत्वात्त्वमेवेति तावत्संघातविलक्षणतां तस्य सूचयत्यनर्थबीजभूतामिति । साक्षिणः कूटस्थत्वान्नानर्थसंबन्धः परमार्थत इत्युक्ताभिप्रायमनवबुध्यमानः शिष्यः प्राह । नैव भगवन्निति । हे भगवन्न कर्त्तुं नैव शक्नोमीत्यन्वयः । अनिच्छतो ऽपि मे निवृत्त्यभावान्नाहं स्वतन्त्रो ऽन्येन केन चित्प्रेर्यमाण एवेति मन्ये इत्यर्थः ॥ ४४ ॥

यद्येवं मन्यसे तदा चितिमत्त्वात्स्वार्थ इति मयैवेत्यादिनोक्तं मृषेति गुरुः स्वाभिप्रायं प्रकटयति ।

(४५) न तर्ह्यचितिमत्त्वात्स्वार्थस्त्वं येन प्रयुक्तो ऽस्वतन्त्रः प्रवर्त्तसे स चितिमान् स्वार्थः संघात एव त्वं, यद्यचेतनो ऽहं कथं सुखदुःखवेदनां भवदुक्तं च जानामि । गुरुरुवाच । किं सुखदुःखवेदनाया मदुक्ताच्चान्यस्त्वं किं वा ऽनन्य एवेति । शिष्य उवाच । नाहं तावदनन्यः, कस्माद्, यस्मात्तदुभयं कर्मभूतं घटादिकमिव जानामि, यद्यनन्यो ऽहं तेन तदुभयं न जानीयां, किं तु जानामि, तस्मादन्यः सुखदुःखवेदना विक्रिया च स्वार्थैव प्राप्नोति त्वदुक्तं चानन्यत्वे ॥

न तर्हि अचितिमत्त्वादिति । ननु कथमहं संघातो ज्ञातृत्वादिति शिष्य आह । यद्यचेतन इति । भवदुक्तमिति संघात एव त्वमित्यादीत्यर्थः । मिथ्याध्यासप्रयुक्तकर्तृत्वाद्यवभासस्य देहेन्द्रियान्तःकरणगतचिदाभासाविविक्ततया तद्विशिष्टात्मविषयत्वात्तस्य चाविवेकविवेकाभ्यामात्मनः परतन्त्रत्वस्वतन्त्रत्वप्रतिभासगोचरत्वादविवेकनिराकरणेनास्य स्वरूपप्रतिष्ठाबुद्धिः संपाद्येत्यभिप्रेत्याचार्यः पृच्छतीत्याह । गुरुः किमित्यादिना । शिष्यः पुनः स्वानुभवमनुस्मरन्नुत्तरमाहेति दर्शयति । शिष्य इति । नाहं संघातानन्यस्तद्द्रष्टृत्वाद्यो यद्द्रष्टा न स तदनन्यो यथा घटद्रष्टेत्यर्थः । हेतोरप्रयोजकताशङ्कामनवकाशयति । यदीति । तेनेत्यनन्यत्वेन हेतुनेत्यर्थः । नहि स्वयं स्ववेद्यं किमपि भवति स्वात्मनि वृत्तिविरोधाज्जडस्य च स्वप्रकाशतानुपपत्तेः । स्वान्यद्रष्टृविषयत्वाभावे तदसिद्धिप्रसङ्गात्तद्व्यवहारलोपः प्रसज्येतेति भावः । उपनयनिगमने दर्श-

यति । किं तु जानामि तस्मादन्य इति । अनन्यत्वे विषयत्वानुपपत्तिरूपं बाधकमभिधाय स्वेतराभावात्संघातस्य स्वशेषित्वापत्तिं बाधकान्तरमाह । सुखदुःखेति । विक्रिया कर्तृत्वादिलक्षणेत्यर्थः । त्वदुक्तं चेति । असत्त्वानित्यत्वादिपूर्वोक्तदोषश्च प्राप्नोतीत्यर्थः ॥ ४५ ॥

---

## ॥ अथ बालरामायणाख्यनाटकम् ॥

रामं प्रति इतो विषनिष्यन्दिनीं विद्वेषिषु प्रसादामृतवीचिमालिनीं सुहृत्सु निवेशय दृशम् ।

क्षीराम्भः परितोऽयमर्णवपतिर्जातं मृगाङ्कादिकं
पीयूषावधि रत्नजातममुतः किं चास्य तीरान्तरे ।
मुक्त्वा कल्पभृतः स्वयंवरसुरान् सौभाग्यदानायणी-
र्लक्ष्म्याऽस्मिन् कुसुमावली वरयितुं वैकुण्ठकण्ठेऽर्पिता ॥ ३७॥

रामचन्द्र इतइतोपि दृश्यतां द्रष्टव्यम् ।

यं नित्यं भगवान् प्रदक्षिणयति भ्राम्यत्प्रभाग्रेसर-
ध्वान्तश्रेणिविभक्तवासरनिशाविन्यासरेखं रविः ।
धत्ते कां चन काञ्चनश्रियमसौ मेरुर्गिरीणां गुरु-
र्देवैः सार्द्धमधित्यकामधिवसत्यस्यामरग्रामणीः ॥ ३८॥

सीतां प्रति ।

एतां यश्य पुरः सुमेरुशिखरे दम्भोलिपाणेः पुरीं
त्वत्कालोकनकौतुकोत्तरलितैर्व्यग्रां पुरन्ध्रीजनैः ।
यस्यास्तोरणगोपुरप्रणयिभिर्नामाङ्कितैर्मार्गणैः
पौलस्त्यस्य विनापि वर्णरचनां न्यस्ता प्रशस्तिः स्थिरा ॥ ३९॥

रामः । हंहो पुष्पक इतोऽपि किञ्चिदुच्चैर्भव न तृष्यति चेतो दिव्यदर्शनकुतूहलस्य सर्वे विमानोर्ध्वगतिं नाटयन्ति ।

सीता । केअईकेसरपराअपडिरूवो पिक्कघणसारपंसुपसरसरिच्छछवी मुत्ताहलविसदसोहासण्णिवेसो णिवेसिदाणंदकंदो हिअअस्स कुदो उण एतावंतो जोण्हावित्थरो * ।

रामः । मन्ये चन्द्रलोकसमीपे वर्तामहे ।

रत्नशेखरः । यथाह मारीचहरिणारिः ।

सद्यश्चन्दनपङ्कपिच्छिलमिव व्योमाङ्गणं कल्पयन्
पश्यैरावतकान्तदन्तमुशलच्छेदोपमेयाकृतिः ।
उन्मीलत्ययमच्छमौक्तिकलताप्रालम्बलम्बैः करैः
कान्तानां स्मरलेखवाचनकलाकेलिप्रदीपः शशी ॥ ४०॥

सीतां प्रति ।

गौराङ्गीवदनोपमापरिचितस्ताराङ्गनावल्लभः
सद्यो मार्जितदाक्षिणात्यतरुणीदन्तावदातद्युतिः ।
चन्द्रः सुन्दरि दृश्यतामयमसौ चण्डीशचूडामणिः
संबन्धी रघुभूभुजां मनसिजव्यापारदीक्षागुरुः ॥ ४१॥

अतः परमगम्या अस्मादृशां भुवः स च ब्रह्मलोक इति श्रूयते तत्र च किल ब्रह्मर्षिपरिषत्परिवादी परमेष्ठी गरिष्ठं तपस्तप्यते ।

रामः ।

लक्ष्मीं वक्षसि कौस्तुभस्तबकिनि प्रेम्णा करोत्यच्युतो
देहार्धे वहति त्रिविष्टपगुरुर्गौरीं स्वयं शङ्करः ।
शङ्के पङ्कजसंभवस्तु भगवानद्यापि बाल्यावधेः
सर्वाङ्गप्रणयां प्रियां कलयितुं दीर्घं तपस्तप्यते ॥ ४२॥

सर्वे स्मयन्ते ।

सीता । भअवं गअणपुप्फ पुप्फअ संपदं परिणमिअ अंबुरासिलंबी भव जेण त्थिरं जलणिहिजाणपत्तं सीमंतरेहं वारुणीतरुणीए अज्जउत्तप्पआवप्पसरपढममग्गं महासेउबंधं पेक्खह्म * । विमानावतरणनाटितकेन ।

रत्नशेखरः । स्वस्ति रामभद्राय साधयामि सम्प्रति इति निष्क्रान्तः ।

त्रिजटा । सीतां प्रति । णीलमणिकुट्टिमं विअ वरुणभवणंगणस्स णिग्गममग्गं विअ पाआलतलतिमिरचक्कवालस्स आलवालं विअ भुअणमहामहीरुहस्स गोट्ठिट्ठाणं विअ दिसाविलासिणीणं दप्पणं विअ गअणाभोअस्स महोअहिं पिअसहि पसदूयमाणयसारिअच्छी पेक्ख † ।

लक्ष्मणः ।

यत्खातः सगरेण मर्त्यसरितं मन्दाकिनीं कुर्वता
पूर्णो यच्च भगीरथेन गिरिभिर्बद्धो यदार्येण च ।
तत्ते चित्रविचेष्टितं श्वशुरयोर्भर्तुश्च वारां निधिं
वीक्षस्वैनमधो निधाय नलिनच्छायामुषी चक्षुषी ॥ ४३॥

सीता । आदिकंदं लच्छीलदाकंदलीए उदयद्दिं हरचूडाचंदस्स वारीवंधमेरावणस्स महाकलसं पेऊसस्स पणमामि भअवंतमुद्दचंतम् ‡ ।

---

* केतकीकेसरपरागप्रतिरूपः पक्वघनसारपांसुप्रसरसदृशच्छविर्मुक्ताफलविशदशोभासंनिवेशो निर्वेशितानन्दकन्दो हृदयस्य कुतः पुनरेतावान् ज्योत्स्नाप्रसरः ।

* भगवन् गगनाङ्गणपुष्प पुष्पक साम्प्रतं परिणम्याम्बुराशिलम्बी भव येन स्थिरं जलनिधियानपत्रं सीमन्तरेखां वारुणीतरुण्या आर्यपुत्रप्रतापप्रसरप्रथममार्गं महासेतुबन्धं पश्यामः ।

† नीलमणिकुट्टिममिव वरुणभवनाङ्गणस्य निर्गममार्गमिव पातालतिमिरचक्रवालस्यालवालमिव भुवनमहामहीरुहस्य गोष्ठीस्थानमिव दिशाविलासिनीनां दर्पणमिव गगनाभोगस्य महोदधिं प्रियसखि प्रसतीयमानप्रसारिताक्षी पश्य ।

‡ आदिकन्दं लक्ष्मीलताकन्दल्या उदयाद्रिं हरचूडाचन्द्रस्य वारिबन्धमैरावणस्य महाकलशं पीयूषस्य प्रणमामि भगवन्तमुदन्वन्तम् ।

रामः ।

धत्ते यत्किलकिञ्चितैकगुरुतामेणीदृशां वारुणी
वैधुर्यं विदधाति दम्पतिरुषां यच्चन्द्रिकार्द्रं नभः ।
यत्पीयूषभुजां च मन्मथसुहृन्नित्यं वयः संपदां
यल्लक्ष्मीरधिदैवतं जलनिधेस्तच्चित्रमाचेष्टितम् ॥ ४४ ॥

लक्ष्मणः ।

वह्निं योऽम्भःसमिद्भिर्ज्वलयति जगतीद्वीपखण्डानि यस्य
स्वादिष्ठा यत्प्रसूतिस्त्रिदशयुवतयः श्रीः सुधा वारुणी च ।
सोऽपि व्युड्डीनलीनैः शरपतनभयादद्रिभिः क्षुण्णपादै-
र्देवि त्वद्भर्तुराज्ञामिव वहति महाशैलसेतुच्छलेन ॥ ४५ ॥

सुग्रीवः । देवि मैथिलि किमपि महिमातिरेकस्त्रिभुवन-
जयपताकायते भगवतो भागीरथीवल्लभस्य ।

या स्त्रीणामधिदैवतं गिरिसुता तत्सोदरः सानुमान्
मैनाको रजताकरः सुतनयः शैलेश्वरो येन सः ।
पक्षच्छेदसमुद्यतेन्द्रकुलिशत्रासान्निलीय स्थितः
सोऽप्येतस्य करालकुक्षिकुहरे पातालजम्बालिनि ॥ ४६ ॥

विभीषणः ।

हैरम्बमज्जनविधाविह दानगन्धा-
द्द्वार्दन्तिनो धुतकरालकरं पतन्तः ।
पश्चादुपेत्य सपदि प्रमथैर्ध्रियन्ते
रुद्राङ्कुशैर्विरचिताङ्कुशकेलयोऽमी ॥ ४७ ॥

तिर्यग्विमानगतिनाटितकेन ।

सीता । अखण्डिताखण्डलकोअंडमंडलपडिरूवो कदरो
उण एसुद्देसो * ।

विभीषणः ।

पश्यस्यग्रे जलधिपरिखं मण्डलं सिंहलानां
चित्रोत्तंसं मणिमयभुवा रोहणेनाचलेन ।
दूर्वाकाण्डच्छविषु चतुरं मण्डनं यद्वधूनां
गात्रेष्वम्भो भवति गमितं रत्नतां शुक्तिगर्भैः ॥ ४८ ॥

किञ्च ।

जनश्च वाक्सुधासूतिर्मणिसूतिश्च रोहणः ।
नान्यत्र सिंहलद्वीपान्मुक्तासूतिश्च सागरः ॥ ४९ ॥

सीता । इह किल भअवं अगत्थिमहेसी णिवसदि † ।

रामः । इदं हि भगवतो रत्नाधिपतेरधित्यकायामाश्रमपदं
धर्माश्रमपदं पुनरग्रे ।

सुग्रीवः ।

क्रान्त्वा स्फुटस्फुटितशुक्तिविमुक्तमुक्त-
मम्भोनिधिं विधुतदिक्प्रविभागमेतत् ।
प्राप्ता वयं नवरसाञ्जनपुञ्जनीलं
कूलं कुलायगशकुन्ततमालमालि ॥ ५० ॥

सीतां प्रति ।

चटुचटुलनिमीलस्पर्शलीलातिमील-
न्नयनयुगमतन्द्रारब्धनिद्राविनोदम् ।
शुकहरितनितम्बं पश्य वंशीवनान्तै-
रचलमखिलपृथ्वीमाल्यवन्माल्यवन्तम्

सीता । जहिं किल तुम्हाणं वासारत्तो अदिक्कंतो * ।

रामः ।

आं वैदेहि ।

द्युतिजितकरवालः सूतवंशीप्रवालः
स्फुटितकुटजमालः स्पष्टनीलत्तमालः ।
इह हि गतमरालः केतकालीकरालः
शिखरिणि मम कालः सोऽभवन्मघकालः ॥ ५२ ॥

पुरो दर्शयन् ।

अयं स ते चण्डि शिखण्डिपुत्रको
गिरेस्तटात्तत्क्षणमूर्द्धकन्धरः ।
निरीक्ष्य नौ स्नेहरसार्द्रया दृशा
प्रियां पुरस्कृत्य करोति ताण्डवम् ॥ ५३ ॥

सीता । पुत्त एहि उड्डिऊण विमानसिहरं समारुह † ।

रामः । अतिसुमुखा जानकी ।

सुग्रीवः । सीतां प्रति ।

गुणवति फणिवीरुत्पट्टपूगप्रकाण्डः
प्रचुरमरिचवल्लीवल्लरीकः पुरस्तात् ।
मलय इह महाद्रिर्नन्दनश्चन्दनाना-
मयमधिलुठदेलाश्लिष्टकक्कोलयष्टिः ॥ ५४ ॥

सीता । रणरणअकारणं कामिमिहुणाणं माणिणीमाण-
गण्ठिणिट्ठवणो जत्तो किल समीरणो पअट्टदि ‡ ।

रामः । देवि यथा श्रुतवत्यसि ।

ये दोलाकेलिदानव्यतिकरगुरवो ये लतागर्भकाराः
कोदण्डाभ्यासविद्याविधिषु विजयिनो ये स्मरस्वेदवाराम् ।
तन्वन्तश्चैत्रमैत्रं मलयशिखरिणस्ते विनिर्यान्त्यमुष्मादा-
कैलासं समीराः सुरतमहमहासाक्षिणो दाक्षिणात्याः ॥ ५५ ॥

* अखण्डिताखण्डलकोदण्डमण्डलप्रतिरूपः कतरः पुनरेष उद्देशः ।

† इह किल भगवानगस्त्यमहर्षिर्निवसति ।

* यत्र किल युष्माकं वर्षर्तुरतिक्रान्तः ।

† पुत्र एहि उड्डीय विमानशिखरं समारोह ।

‡ रणरणककारणं कामिमिथुनानां कामिनीमानग्रन्थिनिष्टपनो यतः किल समीरणः प्रवर्तते ।

अपि च पुनः पश्य ।

रत्नप्रसूरिति समस्ततरङ्गिणीषु
वारां निधेर्भगवतः सुभगं कलत्रम् ।
अस्मिन्निरन्तरनितम्बिनि ताम्रपर्णी
चतुःपथं व्रजतु मौक्तिककामधेनुः ॥ ५६ ॥

अस्यां पुनरिदं सौभाग्यकारणम् ।

रोधोरेखे चन्द्रनारण्यरूपे
वारि स्वाद्यं नारिकेलाम्भसोऽपि ।
यच्चैवान्यः संभवो मौक्तिकानां
तेनाम्भोधेर्वल्लभा ताम्रपर्णी ॥ ५७ ॥

विमानवेगनाटितकेन रामः । पुरोऽवलोक्य ।

दन्तोलूखलिभिः शिलोञ्छिभिरियं कन्दाशनैः फेनपैः
पर्णप्राशनिभिः कुटीचरकुलैः काले च पक्वाशिभिः ।
नीवारप्रसृतिंपचैश्च परितः पूतं मुनेराश्रमं
पश्यन्ती भव पावना भगवतः पातुर्निधेरम्भसाम् ॥ ५८ ॥

हस्तमुन्नम्य ।

हंहो पुष्पक वायुवेग मुनिना धूमः पुरः पीयते
छायां मा कुरु कोऽप्ययं दिनमणावेकाग्रदृष्टिः स्थितः ।
दूरादत्र भव प्रदक्षिणगतिः स्थाणोरिदं मन्दिरं
किञ्चित्तिष्ठ तपस्विनस्तव पुरो यावत्प्रयान्त्यन्यतः ॥ ५९ ॥

सीता । अज्जउत्त होमोहिज्जंतहुदवहा विवरिज्जंतकथमुत्ता पठिज्जन्तबटुचरणा वक्खिज्जन्तधम्मसास्त्रा उअदिसिज्जंतसमाधिमग्गा वरिवसिज्जंतअदिहिवग्गा पण्णसालासण्णिवेसं अम्हारीसाणं संसारगंथिठणिट्ठवणा * ।

रामः । प्रकृष्टं हि तपः किमपि कामदुघम् । अग्रतो दर्शयन् ।

एते व्योमनि शोषयन्ति हरिणत्रासाच्चिरं चीवरं
संध्याचामविधौ कमण्डलुमिमं पश्यन्ति रिक्तं क्षतम् ।
भिक्षन्ते च फलान्यमी करपुटीपात्रे वनानोकहा-
नेषामर्घविधौ च सविधिगताः पुष्यन्त्यकाण्डे लताः ॥ ६० ॥

समंतादवलोक्य कारय चक्षुषी पारणमवलोकय कुम्भसंभवमुनेराश्रमतरून् ।

स्वाध्यायान्ते बटुपरिषदां येषु विश्रान्तिसौख्यं
लोपामुद्राकरपुटजलैः प्रत्यहं येऽवसिक्ताः ।
आगस्त्येऽस्मिन् विधुतरजसामाश्रमे पादपानां
केऽप्युत्कर्षो यदतिथिकृते सर्वकालं फलन्ति ॥ ६१ ॥

लक्ष्मणः । अति हि तपस्विसंकटं भुवः ।

रामः । हंहो विमानराज कस्मिंश्चिदेकदेशमलङ्कुरु यावदहमग्निमारुतसंभवं मुनिमनुवर्ते । सर्वे विमानावरोहणं नाटयन्ति ।

सुग्रीवबिभीषणौ । देव त्वर्य्यतामेष मैत्रावरुणो विकङ्कततरुतले भगवत्या लोपामुद्रया सममस्मान् वीक्षमाणस्तिष्ठति ।

ततः प्रविशत्यगस्त्यो लोपामुद्रा च ।

अगस्त्यः । भवति धर्मसुते लोपामुद्रे ।

प्रीतिस्निग्धैः खेचरैरर्च्यमानो
बिभ्रद्व्योम्नः सीम्नि वैमानिकत्वम् ।
सेतोर्बन्धाद्राक्षसानां निरोधा-
द्दिष्ट्या रामो दृश्यते पूर्णकामः ॥ ६२ ॥

रामः । उपसृत्य सपादोपग्रहम् ।

काशपुष्पप्रतीकाश वन्हिमारुतसंभव ।
मित्रावरुणयोः पुत्र कुम्भयोने नमोऽस्तु ते ॥ ६३ ॥

सर्वे प्रणमन्ति ।

अगस्त्यः ।

का दीयतां तव रघूद्वह सम्यगाशी-
र्निष्कण्टकानि विहितानि जगन्ति येन ।
आशास्महे ननु तथापि सह स्ववीरै-
र्भूकाश्यपोपमसुतद्वितया वधूः स्तात् ॥ ६४ ॥

रामः । परमनुगृहीतं रघुकुलम् ।

लोपामुद्रा ।

एह्येहि वत्स रघुनन्दन रामचन्द्र
चुम्बामि तेऽद्य वदनं करचूचुकेन ।
सोढाः कथं कथय ते दशकण्ठबाणा-
श्छिन्नानि रावणशिरांसि कथं च तानि ॥ ६५ ॥

रामो लज्जते । अङ्ग महानुभावापि लोपामुद्रा स्त्रीस्वभावसुलभं ब्रूते ।

लोपामुद्रा । रामं शिरसि स्पृष्ट्वा ।

अभ्युद्धृतैर्गिरिभिरम्बुधिसेतुहेतोः
श्वश्रूरियं भगवती कुपिता किमुर्वी ।
कुम्भोद्भवस्य कथितं न पुनः किमस्य
जाता यदेकचुलुके न चतुःसमुद्री ॥ ६६ ॥

अगस्त्यः । सुतपस्विनि लोपामुद्रे वसिष्ठप्रतिष्ठितो राज्याभिषेकसमयो नातिदूरवर्ती तद्विसर्ज्जय रामभद्रम् ।

लोपामुद्रा । गच्छ रामचन्द्र गच्छ सगरभगीरथसदृशो भव ।

सर्वे समुत्थाय विमानावरोहं नाटयन्ति ।

* होमोह्यमानहुतवहा विव्रियमाणकथामुक्ताः पठ्यमानबटुचरणा वर्ण्यमानधर्मशास्त्रा उपदिश्यमानसमाधिमार्गा वरिवस्यमानातिथिवर्गाः पर्णशालासंनिवेशमस्मादृशानामपि संसारग्रन्थिनिष्टपनाः ।

सीता । दिट्ठिआ संपदं वसुमदी दीसदि * ।

रामः । तत्रापि द्रविडाः ।

पर्णं नागरखण्डमार्द्रसुभगं पूगीफलैलास्तथा
कर्पूरस्य च यत्र कोऽपि चतुरस्ताम्बूलयोगक्रमः ।
देशः केरल एष केलिसदनं देवस्य शृङ्गारिण-
स्तद्दृष्ट्वा कुरु कोमलाङ्गि सफले द्राघीयसी लोचने॥६७॥

किञ्च ।

नेत्रयात्राशरत्तेपैस्त्र्यम्बकस्यापि ताडनी ।
भ्रूलता द्रविडस्त्रीणां द्वितीयं कामकार्मुकम् ॥ ६८ ॥

सुग्रीवः । दक्षिणतो दर्शयन् देवं सप्तगोदावरीतिरे भीमो भगवान् भर्गः । प्रणम्यतामयम् ।

रामः ।

नमो नागावलीवद्धमहाधवलमूर्तये ।
जटापल्लवकम्माय हरचन्दनशाखिने ॥ ६९ ॥

सर्वे प्रणमन्ति ।

रामः ।

वाक्सत्त्वाङ्गसमुद्भवैरभिनयैश्चित्यं रसोल्लासतो
वामाङ्गः प्रणयन्ति यत्र मदनक्रीडामहानाटकम् ।
अत्रान्धास्तव दक्षिणेन त इमे गोदावरीस्रोतसां
सप्तानामपि वार्निधिप्रणयिनां द्वीपान्तराणि श्रिताः॥७०॥

किं वा ।

हरनेत्राग्निदग्धस्य केतौ मकरलक्ष्मणः ।
दृष्टिरन्ध्रपुरन्ध्रीणां सज्जः संजीवनौषधिः ॥ ७१ ॥

बिभीषणः । उभयकूलप्ररूढनारिकेलनिकरक्रमुककुलपालीचिप्ता कावेरी सरिदियम् ।

रामः ।

कावेरी कबरीव भामिनि भुवो देव्याः पुरो दृश्यतां
पूगैर्नागलताश्रितैरुपदिशत्याश्लेषविद्यामिव ।
कर्णाटीजनमज्जनेषु जघनैर्यस्याः पयः प्लावितं
पीत्वा नाभिगुहाभिरात्तरुचिभिः प्राचीं दिशं नीयते ॥७२॥

किञ्च ।

कर्णाट्यो यत्रयत्रैव विक्षिपन्ति दृशो दिशि ।
विक्षेपायेसरः कामस्तत्रतत्रैव धावति ॥ ७३ ॥

सुग्रीवः । भरतायजायमये महाराष्ट्रविषयः ।

रामः ।

यत् क्षेमं त्रिदिवाय वर्त्म निगमस्याङ्गं च यत्सप्तमं
स्वादिष्ठं च यदैक्षवादपि रसाच्चक्तुश्च यद्वाङ्मयम् ।
तद्यस्मिन् मधुरं प्रसादि रसवत् कान्तं च काव्यामृतं
सोऽयं सुभ्रु पुरो विदर्भविषयः सारस्वतीजन्मभूः ॥ ७४ ॥

किञ्च ।

रतविद्याविदग्धानां विभ्रमोल्लेखलम्पटः ।
नित्यं कुन्तलकान्तानां किङ्करो मकरध्वजः ॥ ७५ ॥

सीता । जहिं उप्पणा मे पिदामहससुरस्स घरिणी इंदुमदी * ।

त्रिजटा । संस्कृतमाश्रित्य ।

कीदृक्केलिकलस्य किल भवति सखी सुखधाम ।
का च सुता शशितिलकस्य विन्ध्यमहीधरधाम ॥

सीता । संस्कृतमाश्रित्य । नर्मदा ।

त्रिजटा । इयं णम्मदा दीसदि † ।

सीता । इदो अम्हाणं अज्जसुमंतो णिवुत्तो ‡ ।

रामः । अपवार्य ।

अय्यस्मदग्रकरयन्त्रनिपीडितानां
धाराम्भसां स्मरसि मज्जनकेलिकाले ।
सुभ्रु त्वया निजकुचावरणैकयोग्य-
मत्राब्जवल्लिदलमावरणाय दत्तम् ॥ ७६ ॥

किञ्च ।

तदिह कलहकेलौ सैकते नर्मदायाः
स्मरसि सुतनु कच्चिन्नौ पराधीनसुप्तम् ।
उपसजलसमीरप्रेङ्खणाचार्यकार्यं
तदनु मदनमुद्रां तच्च गाढोपगूढम् ॥ ७७ ॥

बिभीषणः । वामतो दर्शयन् अयमसावितो विश्वम्भराशिरःशेखर इव लाटदेशः ।

रामः ।

यद्योनिः किल संस्कृतस्य सुदृशां जिव्हासु यन्मोदते
यत्र श्रोत्रपथावतारिणि कटुर्भाषाक्षराणां रसः ।
गद्यं चूर्णपदं पदं रतिपतेस्तत्प्राकृतं यद्वच-
स्ताल्लाटाल्ललिताङ्गि पश्य नुदती दृष्टेर्निमेषव्रतम् ॥७८॥

किञ्च ।

लक्षीकर्तुं प्रवृत्तोऽपि लाटीलडहवीक्षितैः ।
लक्षीभवति कन्दर्पः स्वेषामेवात्र पत्रिणाम् ॥ ७९ ॥

सुग्रीवः । अयमुज्जयिनीनिवासो भगवान् महाकालनाथः ।

रामः । अञ्जलिं बद्ध्वा ।

* दिष्ट्या साम्प्रतं वसुमती दृश्यते ।

* यत्रोत्पन्ना मे पितामहश्वशुरस्य गृहिणीन्दुमती ।

† इयं नर्मदा दृश्यते ।

‡ इतोऽस्माकमार्यसुमन्त्रो निवृत्तः ।

यन्मनस्ताडनाद्वक्रः कामकेतकसायकः ।
स्थितः शशिच्छलेनैव मौलौ स जयतीश्वरः ॥ ८० ॥

सीतां प्रति ।

खेले संचरितुं तरङ्गतरलभ्रूलेखमालोकितुं
रम्यं स्थातुमनादरार्पितमनोमुग्धं च संभाषितुम् ।
सन्त्यज्योज्जयिनीजनीर्विवदितुं हृद्यं च हे जानकि
प्रत्यङ्गार्पणसुन्दरं च न जनो जानाति रन्तुं परः ॥ ८१ ॥

किञ्च ।

चकोर्य एव चतुराश्चन्द्रिकाचामकर्मणि ।
आवन्त्य एव निपुणाः सुदृशो रतकर्म्मणि ॥ ८२ ॥

सीता । संस्कृतमाश्रित्य ।

प्रावृषेण्यं हि सस्यानां किं समुत्पत्तिकारणम् ।

त्रिजटा । प्रतिसंस्कृतेन । मालवाः ।

सीता ।

दृश्यन्ते लोचनानन्दहेतवस्त इमे जनाः ॥ ८३ ॥

रामः ।

एतन्मालवमण्डलं विजयते सौजन्यरत्नाकरैः
सम्यग्विभ्रमधामभिः किमपरं शृङ्गारसारैर्जनैः ।
यत्रारुह्य विचित्ररत्नवलभीर्नानाशिलासद्मनां
नीयन्ते जलदोदयेषु दिवसाः कान्तासखैः कामिभिः ॥ ८४ ॥

सीता । वेणिलट्ठिव्व वसुंधरापुरंधीए णीसंदपंकव्व गअ-णस्स इंदणीलकंठिअव्व उत्तरदिसाए पुरदो कालिंदी दीसदि* ।

रामः ।

सेयं सुभ्रु पुरः कलिन्दतनया गीर्वाणसिन्धोः सखी
वासः कालियपन्नगस्य यमुना दृग्गोचरे वर्तते ।
वन्दस्वार्यमणीमिमां दुहितरं वैवस्वतस्यानुजां
यस्याः स्वर्णपरीक्षणक्षमदृषत्तापी स्वसा सोदरी ॥ ८५ ॥

सीताप्रणमति ।

लक्ष्मणः । आर्यादूरवर्तिनी भगवत्ययोध्या । इमेऽन्तर्वे-दीभूषणं पञ्चालाः ।

रामः । सीतां प्रति ।

यत्रार्ये न तथानुरज्यति कविर्ग्रामीणगीर्गुम्फने
शास्त्रीयासु च लौकिकीषु च यथा भव्यासु नव्योक्तिषु ।
पञ्चालास्तव पश्चिमेन त इमे वामा गिरां भाजना-
स्त्वद्दृष्टेरतिथीभवन्तु यमुनां त्रिस्रोतसं चान्तरा ॥ ८६ ॥

किञ्च ।

प्रपञ्चितकलातन्त्रे पाञ्चालीकेलिकर्मणि ।
सर्वास्त्रमोक्षं लभते युगपत् कुसुमायुधः ॥ ८७ ॥

लक्ष्मणः । इदं पुनस्ततोऽपि मन्दाकिनीपरिक्षिप्तं महोदयं नाम नगरं दृश्यते ।

रामः ।

शश्वत्सुधामवसुधामहितं द्विषद्वि-
नो गाहितं भवति गाधिपुरं पुरस्तात् ।
वैदेहि देहि शफरीसदृशं दृशं त-
दस्मिन्नितम्बिनि नितम्बवहद्युसिन्धौ ॥ ८८ ॥

इदं द्वयं सर्वमहार्घपवित्रं
परस्परालङ्करणैकहेतुः ।
पुरं च हे जानकि कान्यकुब्जं
सरिच्च गौरीपतिमौलिमाला ॥ ८९ ॥

अपि च ।

यो मार्गः परिधानकर्मणि गिरां यः सूक्तिमुद्राक्रमो
भङ्गिर्या कबरीचयेषु रचनं यद्भूषणालीषु च ।
दृष्टं सुन्दरि कान्यकुब्जललनालोकैरिहान्यच्च य-
च्छिक्षन्ते सकलासु दिक्षु तरसा तत्कौतुकिन्यः स्त्रियः॥९०॥

विमानवेगनाटितकेन लक्ष्मणः । आर्य दिव्यसरितोर्गङ्गायमुनयोरयमग्रे सङ्गमः ।

रामः । सीतां प्रति ।

न्यग्रोधोऽयं वन्द्यतां श्यामनामा
शम्भोर्भ्रष्टा शेखराज्जाह्नवीयम् ।
कालिन्दी च प्लाविता तत्पयोभि-
स्तीर्थं ह्येतत् स्वर्गमार्गः प्रयागः ॥ ९१ ॥

सर्वे वन्दन्ते ।

लक्ष्मणः । पूर्वतो दर्शयन् इयमितो भगवतो भर्गस्य केलिवासो वाराणसी ।

यद्वाचंयमवृत्तयः किमपरं नीवारमुष्टिंपचाः
सत्यं ज्योतिरुपासते सुकृतिनो द्राक् संवदन्ते च नः ।
नित्यासक्ततयात्र खण्डपरशोर्वाराणसीवासिनः
संभोगैरपि सुभ्रुवां तदजरं विन्दन्ति नन्दन्ति च ॥ ९२ ॥

सीता । दसकंठसूदन वाराणसीसंकित्तणेण सुमराविदम्हि अक्खिआणन्दं जणणीभूदं मिहिलं महाणअरिं * ।

रामः । भगवन् विमानराज दर्शय सीतायै तत्र भवतो जनकस्य राजधानीम् ।

---

* वेणियष्टिरिव वसुन्धरापुरन्ध्या निस्यन्दपङ्कमिव गगनस्येन्द्रनीलकण्ठिकेवोत्तरदिशः पुरतः कालिन्दी दृश्यते ।

* दशकण्ठसूदन वाराणसीसंकीर्तनेन स्मारितास्मि अक्ष्यानन्दां जननीभूतां मिथिलां महानगरीम् ।

किञ्चिद्दूर्द्ध्वगतिनाटितकेन रामः ।

अन्तेवासी यदधिवसति स्वर्मणेर्याज्ञवल्क्यो
यच्चायन्ते निमिकुलभुवः प्रत्यहं भूमिपालाः ।
तत्ते चतुर्विंशतु मिथिलामण्डलं जन्मभूमिं
यत्रोढासि त्रिनयनधनुःखण्डनाडम्बरेण ॥ ९३ ॥

सीता । भअवदि मिहिलाणअरि समं गुरुअणेण एसा पणमिज्जसि * ।

बिभीषणः । इह किल रामदेवेन चत्रियान्तकरणस्य भङ्गो भार्गवमुनेर्दत्तः । सुग्रीवः ।

अपां फेनेन तृप्तोऽसौ खातश्चन्द्रिकयाऽपि सः ।
यदप्रसूतकौशल्यं चत्रं चपितवान्मुनिः ॥ ९४ ॥

रामः । लज्जमानः सीतां प्रति ।

यत्रार्थातिशयोऽपि सूत्रितजगन्मर्यादया मोदते
संदर्भश्च समासमासलवदप्रस्तारविस्तारितः ।
उक्तिर्योगपरंपरापरिचिता काव्येषु चतुष्मतां
सा रम्या नवचम्पकाङ्गि भवतु त्वत्चेत्रयोः प्रीतये ॥ ९५ ॥

सीता । दूरादवलोकनं नाटयित्वा लंघिदसाअरादो हणुमंतादो वि दूरदेसदंसिणी दिट्ठी सिग्घत्ति पडिहाअदि † ।

ततः प्रविशति हनूमान् ।

हनूमान् । प्रणम्य देव मत्तः शुतवृत्तान्तो वसिष्ठः समं भरतशत्रुघ्नाभ्यामन्याभिश्च प्रकृतिभिस्त्वदभिषेकसज्जस्तिष्ठति । सर्वे परिक्रामन्ति ।

रामः । पुरोऽवलोक्य प्रणम्य च ।

सज्ञां रवेः प्रभवतां कुलराजधानी-
मालोकयामरपुरीप्रतिमामयोध्याम् ।
वार्भिः शरच्छशिकरद्युतिभिः सरय्वां
या पूर्वपार्थिवयशोभिरिवावभाति ॥ ९६ ॥

सर्वे प्रणमन्ति ।

रामः । पुरोऽवलोक्य विमानराज वसिष्ठादयोऽपि मां प्रत्युद्यातुकामास्तच्चनु नरेन्द्रराजकुलेऽस्मिन्नवतरामः । सर्वे ऽवतरणं नाटयन्ति ।

ततः प्रविशति वसिष्ठो भरतशत्रुघ्नौ च ।

वसिष्ठः । वत्स भरत शत्रुघ्न ।

शिष्ये शम्भोर्व्यधित यदयं यच्च धातुः प्रपौत्रे
कस्तेनास्मिन् जगति न जनो विस्मितः सस्मितश्च ।
अभ्युत्यातुं वयमपि ततो रामभद्रं प्रवृत्ता
दिष्ट्या दृष्टं दशरथकुलं श्वेतमानैर्यशोभिः ॥ ९७ ॥

सर्वे परिक्रामन्ति ।

रामः । सविनयमुपसृत्य सपादोपग्रहम् ।

इक्ष्वाकूणां कूलगुरुं प्रेष्ठं चित्रशिखण्डिनाम् ।
अरुन्धतीपतिमृषिं राम एषोऽभिवन्दते ॥ ९८ ॥

वसिष्ठः । का दीयतां तवेत्यादि पठति ।

रामः । आर्षं हि वचनं विभिन्नवक्तृक्रमपि न विसंवदति यदगस्त्यवाचा भगवान् वसिष्ठोऽपि ब्रूते ।

सीता प्रणमति ।

वसिष्ठः । जनकराजपुत्रि रामाशिषैवाशीस्ते । किञ्च ।

अन्ययोगव्यवच्छेदादुपास्ते यदरुन्धती ।
संविभक्तं त्वया पुत्रि तत्संप्रति सतीव्रतम् ॥ ९९ ॥

लक्ष्मणः । काकुत्स्यकुलगुरो मैत्रावरुणे लक्ष्मणोऽभिवादयते ।

वसिष्ठः । वत्स लक्ष्मण जितेन्द्रजितस्तव किमाशास्महे ।

भरतः । आर्य रावणविद्रावण एष भरतोऽभिवादयते ।

रामः । बाहू प्रसार्य एह्येहि वत्स भरत ।

परिष्वजामि सोत्कण्ठो मां प्रतीपं परिष्वज ।
आलिङ्गिते भ्रातृगात्रे कवोष्णः सोऽपि चन्द्रमाः ॥ १०० ॥

भरतः । सीतां वन्दते ।

सीता । वच्छ भरध उट्ठावीअदु वअणेंदू भोदु दे आणंदमंदपरिप्फंदा दिट्ठी * ।

शत्रुघ्नः । आर्यपादसेवाविसंवादी शत्रुघ्नः प्रणमति ।

रामः । शत्रुघ्नमुत्थाप्यावलोक्य च दिष्ट्या द्वितीयलक्ष्मणो दृश्यते ।

शत्रुघ्नः । सीतां प्रणमति ।

सीता । वच्छ सत्तुहण चिरं णंद जणणीजणो दे कहिं † ।

शत्रुघ्नः । माङ्गलिक्यपाणिरन्तःपुरवीथ्यां तिष्ठति ।

लक्ष्मणो भरतं वन्दते ।

भरतः ।

हे लक्ष्मण सलक्ष्मीक परिष्वज महाभुज ।
आर्यसेवापवित्राणि गात्राणि सुखयन्तु माम् ॥ १०१ ॥

---

* भगवति मिथिलानगरि समं गुरुजनेनैषा प्रणम्यसे ।

† लङ्घितसागराद्धनुमतोऽपि दूरदेशदर्शिनी दृष्टिः शीघ्रेति प्रतिभाति ।

* वत्स भरत उत्थाप्यतां वदनेन्दुर्भवतु ते आनन्दमन्दपरिस्पन्दा दृष्टिः ।

† वत्स शत्रुघ्न चिरं नन्द जननीजनस्ते क्व ।

शत्रुघ्नः । लक्ष्मणं परिष्वज्य निर्विघ्ननिर्वाहितरामदेवादेशे त्वयि द्विगुणं खिद्यति मनः ।

रामः । भगवन्मैत्रावरुणे किष्किन्धापतिरेष सुग्रीवो भास्करिरयं च लङ्कापरमेश्वरो बिभीषणः पौलस्त्योऽभिवन्दते ।

वसिष्ठः । दीर्घप्रशस्तिस्तम्भाविमौ भवतां भवतः ।

रामः । भरत परिष्वजस्वेतौ सीतादेवरौ ।

भरतसुग्रीवबिभीषणाः परस्परं परिष्वजन्ते ।

वसिष्ठः ।

रामो दान्तदशाननः किमपरं सीता सतीष्वग्रणीः
सौमित्रिः सदृशोऽस्तु कस्य समरे येनेन्द्रजिन्निर्जितः ।
किं ब्रूमो भरतं च रामविरहे तत्पादुकाराधकं
शत्रुघ्नः कथितोऽयमस्य च गुणैर्वन्द्यं कुटुम्बं रघोः ॥ १०२ ॥

रामं प्रति वत्स दाशरथे रामचन्द्र प्रशस्तो मुहूर्तो वर्तते तदध्यास्व पित्र्यं सिंहासनमेवोऽभिषिच्यसे ।

रामः । तथा कुरुते ।

वसिष्ठवर्ज्जं सर्व्वे साष्टाङ्गं प्रणमन्ति । नेपथ्ये मङ्गलगीतध्वनिर्नान्दीवाद्यं च । आकाशे ।

आराधितो रघुकुलोद्वह पुष्पकं प्राक्
पालं चिरादिदमदत्त पतिः पशूनाम् ।
तस्य प्रभुस्त्वमिह संप्रति तत्प्रयच्छ
त्वां याचते धनद एष वृषाङ्कमित्रम् ॥ १०३ ॥

वसिष्ठः । वत्स रामभद्र धन्योऽसि यस्य ते तत्रभवाचाम कुबेरोऽर्थी ।

रामः । विमानराज भगवता धनदेन प्रार्थ्यसे समर्प्यसे च । ऊर्द्ध्वमवलोक्य कथं धनदमुपस्थातुं विमानराजः प्रतिष्ठते ।

वसिष्ठः । रामं प्रति किं ते भूयः प्रियमुपकरोमि ।

रामः । अतः परमपि प्रियमस्ति ।

रुग्णं चाजगवं नचापि कुपितो भर्गस्सुरग्रामणीः
सेतुश्च ग्रथितः प्रसन्नमधुरो दृष्टश्च वारां निधिः ।
पौलस्त्यश्च हतः स्थितश्च भगवान् प्रीतः श्रुतीनां कविः
प्राप्तं यानमिदं च याचितवते दत्तं कुबेराय च ॥ १०४ ॥

तथापीदमस्तु ।

सम्यक्संसारविद्याविपदमुपनिषद्भूतमर्थाद्भुतानां
ग्रथ्नन्तु ग्रन्थिबन्धं वचनमनुपतत्सूक्तिमुक्ताःसुयुक्ताः ।
सन्तः संतर्पितान्तःकरणमनुगुणं ब्रह्मणः काव्यमूर्तेस्तत्तत्वं सात्विकैश्च प्रथमपिशुनितं भावयन्तोऽर्चयन्तु ॥ १०५ ॥

इति निष्क्रान्ताः सर्वे ।

॥ राघवानन्दो नाम दशमोऽङ्कः ॥

समाप्तमेतत्किल बालरामायणं महानाटकमत्र गद्यैः ।
पद्यैः सुधास्वादुभिराद्यविष्णो रामाभिधस्य ग्रथितं चरित्रम् ॥ १ ॥
पाणिग्रहान्मैथिलराजपुत्र्या यावत्पदं पित्र्यमवाप रामः ।
यायावराणां कुलदीपकेन राज्ञां शिखण्डेन कवीश्वरेण ॥ २ ॥
परं पदं काव्यसुधारसस्य ज्ञात्वा समग्रं परिशोध्य सम्यक् ।
प्रकाशितं मुद्रणतस्तदेतद् गोविन्ददेवेन कवीन्द्रतुष्ट्यै ॥ ३ ॥

---

THE

# VAIŚESHIKA APHORISMS

OF

# KAṆĀDA.

## FIRST BOOK, FIRST DAILY LESSON.

---

*(Continued from page 222.)*

Difference of Substances, Qualities, and Actions. न द्रव्यं कार्यं कारणञ्च बधति ॥ १२ ॥

Aph. 12. A Substance is not destroyed either by its effect or by its cause.

[1] The meaning is that between two Substances which have entered into the relation of effect and cause there is not the relation of destroyed and destroyer, inasmuch as the destruction of a Substance is due to the destruction of its substratum, and the destruction of its originative Conjunction. U.

Continued. उभयथा गुणाः ॥ १३ ॥

Aph. 13. Qualities [are destroyed] in both [the above] manners.

[2] [Qualities] are destroyed by their effects, and are destroyed by their causes. First Sounds &c., [in a series] are destroyed by their effects, but the last is destroyed by its cause, for the last sound but one destroys the last. U.

Continued. कार्यविरोधि कर्म ॥ १४ ॥

Aph. 14. An action is opposed to its effect.

---

[1] कार्यकारणभावापन्नयोर्द्रव्ययोर्वध्यघातकभावो नास्तीत्यर्थः । आश्रयनाशारम्भकसंयोगनाशाभ्यामेव द्रव्यनाशादिति भावः ॥

[2] कार्यवध्याः कारणवध्याश्चेत्यर्थः । आद्यशब्दादीनां कार्यवध्यत्वं चरमस्य तु कारणवध्यत्वमुपान्त्येन शब्देन अन्त्यस्य नाशात् ॥

[1] He declares that an Action is destroyed by its own effect. The sense is that an Action is subject to opposition, i. e. destruction, wrought by its effect which consists of a subsequent Conjunction. V.

Characteristic of Substance.

क्रियागुणवत् समवायिकारणमिति द्रव्यलक्षणम् ॥ १५ ॥

Aph. 15. The characteristic of Substance is that it is possessed of Actions and Qualities, and is an inherent cause.

[2] 'Possessed of Actions and Qualities because Actions and Qualities exist in it. In this place the word Characteristic *(lakshana)* denotes a sign and a particular distinctive property excluding objects of the same and of different classes, according to the force of the etymology, "It is discerned *(lakshyate)* by means of this." Accordingly by means of Action it is discerned that such and such a thing is a Substance, and by the possession of qualities Substance is discerned as excluded from things of the same and of different classes. The five [Categories], Quality &c., [Quality, Action, Generality, Particularity, and Inhesion] belong to the same class by reason of the notion of Existence, while Non-existence is of a different class. Substance, then, is different from Quality &c., because it possesses Qualities. That which is not different from Quality &c., does not possess Qualities, as Quality &c. And although there is not possession of Qualities in a compound Substance during its first moment, yet opposition to absolute Non-existence of Qualities is meant to be stated, for absolute Non-existence of Qualities is opposed also to antecedent and subsequent Non-existence of Qualities. In like manner the being an inherent cause is a characteristic of the category Substance, distinguishing it from the [other] six Categories. U.

Characteristic of Quality.

द्रव्याश्रय्यगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम् ॥ १६ ॥

Aph. 16. That it has Substance as a substratum, that it is without Qualities, and that it is not a cause of Conjunctions and Disjunctions being unconcerned with them, is the characteristic of Quality.

[1] Having Substance as a Substratum, because its character is to inhere in Substance. But this would apply to Substances also, accordingly it is said to be without Qualities. But this is predicable also of Action, therefore it is stated not to be a cause of Conjunctions and Disjunctions. U.

Characteristic of Action.

एकद्रव्यमगुणं संयोगविभागेष्वनपेक्षकारणमिति कर्मलक्षणम् ॥ १७ ॥

Aph. 17. That it abides in one Substance, is without Qualities, and is the unconcerned cause of Conjunctions and Disjunctions, is the characteristic of Action.

[2] That which has one Substance for its substratum abides in one Substance. No Action has more than one substratum, as compound Substances and Conjunctions and other Qualities have more than one substratum. V.

Similarity of the first three Categories.

द्रव्यगुणकर्मणां द्रव्यं कारणं सामान्यम् ॥ १८ ॥

Aph. 18. Substance is the common cause of Substance, Quality, and Actions.

[3] The meaning is that Substance, Quality and Action exist in one Substance as their inherent cause. A common property of the three is their forming a class existing in Substance as an inherent cause. U.

Continued.

तथा गुणः ॥ १९ ॥

Aph. 19. Likewise Quality (is the common cause of Substances, Qualities, and Actions).

[4] A common property of the three is their forming a class existing in Quality as a non-inherent cause. Of Substances the non-inherent cause is Conjunction. Of Qualities which are effects such as Colour, Taste, Smell, Touch, Number, Extension, Individuality &c., the non-inherent cause is homogeneous causative Qualities. Of the Qualities of the Soul such as Conceptions &c., the

[1] स्वकार्यमेव कर्मणो नाशकमित्याह । कार्येणोत्तरसंयोगरूपेण कृतो यो विरोधो नाशस्तद्वत् कर्मेत्यर्थः ॥

[2] क्रियाश्च गुणाश्च विद्यन्ते ऽस्मिन्निति क्रियागुणवत् अत्र लक्षणशब्दश्चिन्हवचनः समानासमानजातीयव्यवच्छेदकव्यतिरेकिलिङ्गविशेषवचनश्च लक्ष्यते ऽनेनेति व्युत्पत्तिबलात् तत्र क्रियया कर्मणा द्रव्यमिदमिति लक्ष्यते गुणवत्त्वेन च समानासमानजतीयेभ्यो व्यावृत्तं द्रव्यं लक्ष्यते तत्र समानजातीया भावत्वेन गुणादयः पञ्च असमानजातीयस्त्वभावः तेन द्रव्यं गुणादिभ्यो भिन्नं गुणवत्त्वात् यन्न गुणादिभ्यो भिद्यते तन्न गुणवत् यथा गुणदीति । गुणवत्त्वं यद्यप्याद्यक्षणे ऽवयविनि नास्ति तथापि गुणात्यन्ताभावविरोधिमत्त्वं विवक्षितं गुणप्रागभावप्रध्वंसयोरपि गुणात्यन्ताभावविरोधित्वात् एवं समवायिकारणत्वमपि षट्पदार्थभेदकमेव द्रव्यपदार्थस्य लक्षणम् ॥

[1] द्रव्यमाश्रयितुं शीलमस्येति द्रव्याश्रयी एतच्च द्रव्ये ऽपि गतमत आह अगुणवानिति तथापि कर्मण्यतिव्याप्तिरित्यत आह संयोगविभागेष्वकारणम् ॥

[2] एकं द्रव्यमाश्रयो यस्य तदेकद्रव्यं संयोगादिगुणाश्चानेकाश्रिताः तथा किमपि कर्म नानेकाश्रितम् ॥

[3] एकस्मिन्नेव द्रव्ये समवायिकारणे द्रव्यगुणकर्माणि वर्तन्ते इत्यर्थः द्रव्यसमवायिकारणकवृत्तिजातिमत्त्वं त्रयाणां साधर्म्यम् ॥

[4] गुणासमवायिकारणकवृत्तिजातिमत्त्वं त्रितयसाधर्म्यं द्रव्याणां संयोगो ऽसमवायिकारणं कार्यगुणानां रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वादीनां सजातीयकारणगुणासमवायिकारणकत्वं बुद्ध्यादीनामात्मगुणानां मनःसंयोगासमवायिकारणकत्वं पार्थिवपरमाणुगुणानामग्निसंयोगासमवायिकारणकत्वं कर्मणां तु वह्न्यादिनोदनाभिघातगुरुत्वद्रवत्वसंस्कारादृष्टवदात्मसंयोगप्रयत्नवदात्मसंयोगाद्यसमवायिकारणकत्वं यथायथं स्वयमूहनीयम् । क्वचिदेकस्यापि गुणस्य त्रयाणां द्रव्यगुणकर्मणामारम्भकत्वं तद्यथा वेगवत्तूलपिण्डसंयोगस्तूलपिण्डान्तरे कर्म करोति द्वितूलकञ्च द्रव्यमारभते तत्परिमाणञ्च । क्वचिदेको गुणो द्रव्यगुणावारभते यथा तूलपिण्डसंयोग एव वेगानपेक्षप्रचयाख्यो द्वितूलकं द्रव्यं तत्परिमाणञ्चारभते ॥

non-inherent cause is Conjunction with the Internal Organ. The non-inherent cause of the Qualities of terrene atoms is Conjunction with fire. The non-inherent cause of Actions is slight contact with fire, a blow, Gravity, Fluidity, Self-restitution, Conjunction with Soul influenced by actions done in a former state, Conjunction with Soul exerting Volition, &c. Sometimes even a single Quality originates the three, Substance, Quality, and Action, as, for instance, Conjunction with a ball of cotton possessed of Impetus produces Action [i. e. motion] in another ball of cotton, and originates a Substance consisting of an aggregate of two balls of cotton and the extension of that aggregate. Sometimes a single Quality originates a Substance and a Quality, e. g. Conjunction, which may be described as aggregation independant of Impetus, with a ball of cotton originates a Substance consisting of an aggregate of two balls of cotton and the Extension of that Substance. U.

Effects of Action. संयोगविभागवेगानां कर्म समानम् ॥ २० ॥

Aph. 20. Action is the common [cause] of Conjunctions, Disjunctions, and Impetus.

[1] The Action [motion] which is produced in a bow &c., produces disjunction of the arrow from the bow, and Conjunction elsewhere and Impetus in the arrow. V.

Dissimilarity between Action and Substance. न द्रव्याणां कर्म ॥ २१ ॥

Aph. 21. Action is not [a cause] of Substances.

Continued. व्यतिरेकात् ॥ २२ ॥

Aph. 22. Because it is excluded [from them.]

[2] 'Because it is excluded'—because of the Non-existence of Action at the time of the production of Substance. The Action which produces an originative Conjunction of constituent parts is destroyed at the time of the production of the Substance [constituted by those parts] subsequent to Conjunction, for Conjunction is destructive to Disjunction. Nor can it be maintained that Action, though non-existent at the time of its effect, from having existed the previous moment is the cause [of the Substance so constituted.] For after the destruction of a large piece of cloth there is Non-existence of Action in the constituent parts at the moment previous to the production of fragments of cloth. In reality Action is not the cause even of a Substance depending on an originative Conjunction produced by Action, for it is to be considered that [the Substance] is produced otherwise, [viz.] by Conjunction. V.

Continued. द्रव्याणां द्रव्यं कार्यं सामान्यम् ॥ २३ ॥

Aph. 23. Substance is the common effect of Substances.

[1] Having stated that many things may originate one, [Kaṇáda] now declares that one effect may be originated by many. 'Of Substances,' i.e. of two or more Substances. Thus by two threads a piece of cloth consisting of two threads, and similarly by many threads one piece of cloth, is originated. If it be objected that cloth may be seen which is made of one thread, in which the woof and the warp are made of one and the same thread, we reply that it is not so, for there can be no cloth produced in this case, there being no non-inherent cause, for there can be no Conjunction of a single object. U.

Continued. गुणवैधर्म्यान्न कर्मणां कर्म ॥ २४ ॥

Aph. 24. Action because of its dissimilarity from Quality is not [an effect] of Actions.

It has been stated that the similarity between Substance and Quality is that they originate things of the same class. Also it has been denied that Actions are productive of Actions, in the Aphorism 'An Action is not effected by another Action.' This is here repeated. U.

द्वित्वप्रभृतयः सख्याः पृथक्त्वसंयोगविभागाश्च ॥ २५ ॥

Aph. 25. Numbers from duality upwards, Individuality, Conjunction, and Disjunction [are originated by more than one Substance.]

[2] He states that certain Qualities also are originated by more than one Substance. Here the word Individuality means the Individuality of two or more objects. Accordingly the sense is that Numbers, from duality to the highest, Individuality of two or more objects, Conjunctions, and Disjunctions are originated by more than one Substance. V.

---

[1] व्यतिरेकात् द्रव्योत्पत्तिसमये कर्मणो ऽभावात् यत् कर्मावयवारम्भकसंयोगं जनयति संयोगस्य तन्नाशकत्वेन संयोगोत्तरं द्रव्योत्पत्तिकाले तस्य नाशात् न च कर्मणः कार्यकाले ऽसत्त्वं ऽपि तत्पूर्वक्षणवृत्तित्वात् कारणत्वं निराबाधमिति वाच्यं महापटनाशानन्तरं खण्डपटाद्युत्पत्तेः पूर्वक्षणे ऽपि तदवयवेषु कर्मणो ऽभावात् वस्तुतः कर्मजनितारम्भकसंयोगाधीनद्रव्ये ऽपि न कर्म कारणं संयोगेनान्यथासिद्धत्वादिति ध्येयम् ॥

[2] बहूनामेकस्यारम्भकत्वमुक्त्वा इदानीमेकस्मिन् कार्ये बहूनामारम्भकत्वमाह। द्रव्ये च द्रव्याणि चेति द्रव्याणि तेषां द्रव्याणां । तत्र द्वाभ्यां तन्तुभ्यां द्वितन्तुकः पटो बहुभिरपि तन्तुभिरेकः पट आरभ्यते । नन्वेकतन्तुको ऽपि पटो दृश्यते यत्रैकेनैव तन्तुना तानप्रतितन्त्वौ भवत इति चेन्न तत्रैकस्य संयोगाभावेनासमवायिकारणाभावात् पटानुत्पत्तेः ॥

[1] द्रव्यगुणयोः सजातीयारम्भकत्वं साधर्म्यमुक्तं तत्र कर्म कर्मसाध्यं न विद्यते इति सूत्रे कर्मणां कर्मजनकत्वं प्रतिषिद्धमेव तदिहानुद्यते इति भावः ॥

[2] केषाञ्चित् गुणानामप्यनेकद्रव्यारब्धत्वमित्याह । अत्र पृथक्त्वपदं द्विपृथक्त्वादिपरं तथा च द्वित्वादिपरार्द्धपर्यन्ताः संख्या द्विपृथक्त्वादीनि संयोगविभागाश्च अनेकद्रव्यारब्धा इत्यर्थः ॥

अस॒मवायात् सामान्यकार्यं कर्म न विद्यते ॥ २६ ॥

Aph. 26. Action is not the common effect [of several Substances] because it does not inhere [in more than one Substance.]

[1] Action is not a common effect originated by more than one, because it does not inhere in two or more. It is established by experience that Action is different in different Substances. V.

संयोगानां द्रव्यम् ॥ २७ ॥

Aph. 27. Substance is the effect of Conjunctions [more than one.]

[2] One Substance consisting of a piece of cloth &c., is the effect of many Conjunctions of threads &c. V.

[3] This is to be understood with the exception of the Conjunctions of impalpable Substances, of those of final wholes, and of those of Substances of a different class. V.

रूपाणां रूपम् ॥ २८ ॥

Aph. 28. A Colour is the effect of Colours [more than one.]

[4] The word Colour in both places implies also Taste, Smell, Touch, Viscidity, essential Fluidity, Unity, Individuality of units, Extension, Velocity, Elasticity and Gravity. One Colour &c., then, becoming a complex whole is produced by many Colours &c. having become its inherent cause. V.

गुरुत्वप्रयत्नसंयोगानामुत्क्षेपणम् ॥ २९ ॥

Aph. 29. Throwing upwards [is the effect] of Gravity, Volition, and Conjunction.

[5] Here Gravity existing in the hand, a clod of earth &c., is the instrumental cause; Conjunction of soul possessing Volition is the non-inherent cause of the Throwing upwards of the hand; throwing out of the hand is the non-inherent cause of the Throwing upwards of the clod. Here also the term Throwing upwards is applicable to Throwing downwards &c. U.

[1] Gravity in that which is to be thrown upwards, Volition in the thrower, and expulsion from the hand of the thrown,—there are these three causes of Throwing upwards. Hence in the case of Action also the existence of more than one cause must be admitted. V.

संयोगविभागाश्च कर्मणाम् ॥ ३० ॥

Aph. 30. Conjunctions and Disjunctions [are the effects] of Actions.

[2] It might be asked, 'By means of what property is there an inference of supersensual objects such as the courses of the sun, the moon, &c., as there is in inference of fire and other causes from smoke and other effects, for an Action has no effects?' He therefore recalls to mind the previously mentioned effects of Actions. The word 'and' implies in addition [to Conjunctions and Disjunctions] Impetus and Elasticity. V.

कारणसामान्ये द्रव्यकर्मणां कर्माकारणमुक्तम् ॥ ३१ ॥

Aph. 31. In [treating of] causes in general Action is said not to be a cause of Substances and Actions.

[3] By the term 'causes in general,' the treatment of them is implied; therefore in the section treating of causes in general the non-causality of Action with regard to Substance and Action is affirmed, but it is not meant that Action is in no way a cause so that the Aphorism, 'Conjunctions and Disjunctions [are the effects] of Actions' should be set aside. U.

*To be continued.*

---

TO THE EDITOR OF THE PANDIT.

Sir,

I have read with interest in your paper of the 1st October, Babu Rajendralal Mitra's valued and learned remarks on my Memorandum on the transliteration of Indian words in the Roman character, published in the Supplement to the Pandit for the month of September. My great object in thrusting myself thus forward with the Memorandum was simply to see accomplished what the Babu Sahib has so laudably undertaken to initiate. He says in his letter that "in compiling the tables" his "only object was to secure uniformity in transliteration, partly by authority and partly by agreement." I say in my Memo: "what I urge and ask for is the unanimity of all European scholars in

---

[1] असमवायात् द्वयोर्बहुषु च समवायेन कर्मणोऽभावात् सामान्यकार्यम् अनेकारब्धंकर्म न विद्यते नास्तीत्यर्थः तया च प्रतिद्रव्यं भिन्नं भिन्नं कर्म अनुभवसिद्धम् ॥

[2] बहूनां तन्त्वादिसंयोगानां पटादिरूपमेकं द्रव्यं कार्यमित्यर्थः ॥

[3] निःस्पर्शानां द्रव्याणाम् अन्त्यावयविनां विजातीयद्रव्याणाञ्च ये संयोगास्तान् विहायेति द्रष्टव्यम् ॥

[4] रूपपदे रसगन्धस्पर्शस्नेहसांसिद्धिकद्रवत्वैकत्वैकपृथक्त्वपरिमाणवेगस्थितिस्थापकगुरुत्वानामप्युपलक्षके तथा च समवायिकारणगतैर्बहुभी रूपादिभिरवयविगतमेकं जायते इत्यर्थः ॥

[5] अत्र गुरुत्वस्य हस्तलोष्टादिवर्तिनो निमित्तकारणत्वं प्रयत्नवदात्मसंयोगस्यासमवायिकारणत्वं हस्तनिष्ठोत्क्षेपणस्य तु हस्तनोदनमसमवायिकारणम् अत्राप्युत्क्षेपणपदमवक्षेपणादावपि लाक्षणिकम् ॥

[1] उत्क्षेप्यस्य गुरुत्वम् उत्क्षेप्तुः प्रयत्नः उत्क्षेप्यहस्तनोदनञ्च एते त्रय एवोत्क्षपणहेतवः अतः कर्मण्यप्यनेककारणकत्वं निराबाधमिति भावः ॥

[2] ननु यथा धूमादिरूपकार्येण वह्न्यादिकारणानामनुमानं तया ऽतीन्द्रियाणां चन्द्रसूर्यादिगतीनां केन लिङ्गेनानुमानं कर्मणः कार्याभावादित्यतः पूर्वोक्तानि कर्मकार्याणि स्मारयति ॥

[3] कारणसामान्यपदेन तत्प्रकरणमुपलक्ष्यते तेन कारणसामान्याभिधानप्रकरणे द्रव्यकर्मणी प्रति कर्मणोऽकारणत्वमुक्तं न तु सर्वथाप्यकारणमेव कर्मेति विवक्षितं येन संयोगविभागाश्च कर्मणामिति सूत्रं व्याहन्येतेति भावः ॥

following some one system of transliteration, and the enforcement of it throughout India by the Government." I need not repeat here what I have already said in the Memorandum; suffice it to add that in writing the Memorandum, I drew attention to "a few letters" which had "crept in" (in the Supplementary Government Gazette, North-Western Provinces, of the 22nd January 1868) "with such carelessness that," as I said, I was "afraid they, instead of making our work easy, might complicate it still further;" and at the same time did not lose the opportunity to throw out a few suggestions which I thought might be of use to those who are trying to reach the same goal with us:—uniformity in transliteration.

I waited so long only to see some abler pen employed in the matter, but, no body coming forward, I take up mine to say a few words with the sole intent of removing the misapprehension into which the Babu Sahib seems to have inadvertently fallen.

He has taken about a couple of columns for ع, understanding as it appears that I "think ع would be correctly represented by an *a* with a circumflex accent over it, and an apostrophe before it:" that I "will not accept an apostrophized *a* on any account:" that I wish to take the apostrophe "as the representation of an unelided semi-vowel:" and that I say, ع would be correctly written (with both the marks thus) ('â)". No such thing at all. As far as ع is concerned, I simply wanted to point out "for instance" a misprint in the Gazette. I have clearly said in the Memo., that "in representing ع they have written (A' A â a') which they seem to have meant to write (Â A' â a')". In fact seeing in all other places large and small letters representing each other, the one being the counterpart of the other, and here the diacritical marks of the small, (a circumflex accent over one and an apostrophe after the other) not agreeing with those of the large letters, I took it for granted that the small ones were what the Compiler of the table meant, and introduced, though hesitatingly, the same marks for the large ones, that is I added a circumflex accent over the first (A) and removed the apostrophe, which preceded the second (A), to follow it, to make them correspond with (â) and (a') of the Gazette. The Babu Sahib's quotations in the 3rd para. of his letter are wrong. He quotes: "in representing ع they have written (A' A â' a) which they seem to have meant to write (A A' â a'), but which correctly would be written ('A' â)." Now if the Babu Sahib will be pleased to look at my Memo. with a little more care, he will find there his quotations stand thus in the original: "in representing ع they have written (A' A â a') which they seem to have meant to write (Â A' â a') but which correctly would be written ('Â' â)." I said "correctly and more correctly" only following the Compiler of the table; because his foot note plainly says that ع is "to be indicated by the vowel with which it may be associated, with an apostrophe placed before it," that is the vowel is to represent the vowel "with which it may be associated" and the "apostrophe" left to represent the ع. Understanding thus that "the apostrophe" only was meant by the Compiler of the table to represent ع, I said it would have been "correct" to give it so in the Gazette, that is, only an apostrophe without any a, but as "in English the apostrophe is used to mark the omission of a letter" and the Compiler of the table seemed "to take it as the representative of an unelided semi-vowel," I accepted the other form given by the Compiler of the table and "recommended by Professor Wilson," that is (A) with a circumflex accent (Â â) as "more correct," so it will be seen that I do not raise any "objection" and am ready to accept any representative for ع which the Bâbu Sahib may point out distinctly and correctly and without any "inconsistency of using the same form for the ع when a semi-vowel and final, as when it is associated with the short vowel a." I suppose the best way to remove all doubts and avoid further discussion would be for me to give here a table, showing how ع will stand after and before all the vowels and a consonant, represented by the apostrophe and the circumflexed (A) of the Gazette; and to leave a column in it for the Babu Sahib to correct the mistakes, if there be any, into which I may have fallen through misapprehending the meaning of the Compiler of the table. The Babu Sahib has only to put it in the correct form and I accept it.

| ع in Arabi. | ع represented by an apostrophe. | ع represented by an (A) with a circumflex accent. | Corrections of Babu Rajendralál Mitra. |
|---|---|---|---|
| مقنَع | Miḳna'. | Miḳnaâ. | |
| مانِع | Máni'. | Mániâ. | |
| تضرُّع | Tazarru'. | Tazarruâ. | |
| مقنَعه | Miḳna'a. | Miḳnaâ. | |
| فاعِل | Fá'il. | Fáâil. | |
| مفعُول | Maf'úl. | Mafâúl. | |
| منْع | Man'. | Manâ. | |
| فعْل | Fi'l. | Fiâl. | |

For غ notwithstanding the Babu Sahib's host of Oriental scholars preferiug (gh) I would still have a dotted (g) alone. (G) whether with (H) or all the (Hs) of the world "cannot convey to ordinary Englishmen the true idea of the sound of غ." However I shall prefer them

to pronounce (غم) (غیر) (غول) (غبار) (غش) (gam) (gair) (gol) (gubár) (gaś) &c., rather (gam गम) (gair गैर) (gol गोल) (gubár गुबार) (gaś गश), as many Indians, unacquainted with Persian pronunciation, do, than (gham घम) (ghair घैर) (ghol घोल) (ghubár घुबार) (ghaś घश) &c., though after all it may be a mere matter of taste.

For (ﻫ) and (ह) I simply wanted to have the Compiler's (H h) only in the Gazette, and not Professor Wilson's (Ḥ ḥ) associated with it, because it only confuses the matter already too much confused.

About *visarga* and *repha*, I am sorry to find, I was not clear enough when I wrote my Memo. The want of perspicuity in my writing caused by brevity of expression has called forth deserving remonstrance from the Babu Sahib. I wrote: "in Hindí when (H) (ह) is not followed by any vowel, it is written ( : )." By this I do not mean any thing else except that in Hindí the *visarga* is taken and pronounced as (ह) not followed by any vowel. I wrote "(:) and (ᶜ) do not require different letters in the Roman Alphabet." I ought to have written, what I had meant, that (:) and (ᶜ) do not require different letters or letters with any diacritical marks but (h) and (r) alone. However I was right in asking "why (H) with two dots and (h) with no dot?" because in (Ḥ h) for (:) (h) cannot be an alternative form of (Ḥ) as the Babu Sahib wishes now to make it. Had it been printed in the Gazette, (Ḥ H ḥ h) I of course would have taken (H h) as alternative forms, and saved the Babu Sahib the trouble of explaining it. Now that the Babu Sahib points out the requirement of Sanscrit for having a distinct representative of *visarga* in (Ḥ ḥ) and acknowledges to have given (H h) as alternatives for it, I give in, and cancel Para. 6 of my Memo.

I am glad to learn that the Babu Sahib is prepared to accept the proposed alteration in the representatives of (ऋ) and (ड़) that is to have (R̲i̲ r̲i̲) for (ऋ) and (Ṛ ṛ) for (ड़).

I had said in my Memo. that "the most urgent change for which I press is to have the same representative for (श) and (ش) which have an exactly similar pronunciation. It won't do to give for (ش) the same letter which represents (ष), as they have done in the Gazette; (ष) has a peculiar pronunciation. It is a cerebral. What I ask is simply this, "if you give (Sh) for one of these two letters, namely (श) and (ش) give the same to the other; if you give (Ś or ṣ) for one, give the same to the other also." The learned Babu Sahib says: "this short sentence involves three assumptions, every one of which is wrong." No one will be more ready than myself to acknowledge them wrong if the Babu Sahib will only be pleased to favour me with a more convincing proof than he has adduced hitherto. He says my first assumption that "(श) and (ش) have exactly similar pronunciation;" "is not true," because the Sanskrit (श) has a quite different sound from that of the Persian (ش) because the palatal (S) of the Nagari Alphabet has no exact equivalent in English. Strange reasoning! If the "palatal (S) of the Nagari Alphabet has no exact equivalent in English," why it has none in Persian I cannot understand; and I shall feel obliged by Babu Sahib's clearing the point. He says my second assumption that the Sanskrit (ष) has a peculiar pronunciation very different from that of the Persian (ش) is not true because the (S h) of the Nagari Alphabet finds its exact representation in the English (S h)! I plead the same "not guilty" as I have pleaded for my second assumption; and lastly, he says my third assumption that the Persian, (ش) is not a cerebral, and therefore cannot be represented by the same symbol which stands for a Sanskrit cerebral is not true, because the Sanskrit (ष), the Persian (ش), and the English (Sh), are all cerebrals and exactly like in sound, because the European Orientalists use the (Sh) for both (ष) and (ش)! Now I may be pardoned for assuring the Babu Sahib that the dictum of the whole host of European Orientalists (no matter what deep respect and profound regard I have for them) named by him, and which the Directories of Europe may contain, is no authority for us Indians, in the matter of the pronunciation of our own language. Let the Babu Sahib consult our Pandits and Maulvís, and prove to me, that (ش) is cerebral, and not palatal, and I shall give in, and plead guilty.

The Babu Sahib in the course of argument, I see, mentions that his friends at Benares take (ष) for (Kh). To be sure, by "friends" he means his Bengali friends at Benares; otherwise our Maharashtra Pandits are famous throughout India for their genuine pronunciation.

Leaving the claims of (q) and (k) at the disposal of the Babu Sahib and acknowledging that the Babu Sahib has been lucky in obtaining a more correct copy of the Gazette than mine in which no dot or any diacritical mark has been used throughout in the third list (Persian Alphabet), except for (آ) and (ص), there remains now only the question of (V) and (W) to be settled.

The hardening of the Sanskrit (व V) into (ब B), and its softening into (U) and (O), and its melting away altogether, and laying down of rules such as रल योर्डलयोश्वेवशसयोर्बवयो स्तथा &c. [Letters (र) (ड) (श) and (ब) optionally change to (ल) (ल) (स) and (व) respectively] by grammarians in the formation of languages, does not bear on the issue of the case before us. Our concern is with transliteration, not the formation of any language. I simply say if you have to transliterate द्वार write *dvára*, and if you have to transliterate

दुआर write *duára;* but I cannot tolerate द्वार to be transli- terated, if any body be disposed to do so, into *duár.* What I mean is this, let (व) and (,) be represen ed by (V) and when (व) and (,) change into (ब) (उ) or (ओ) in the originally written language, let them be repre sented by (B) (U) or (O) respectively in the transliteration. The Babu Sahib says: "Were" I "to pronounce *Íśvara* or *Dvárka* with the full sound of (V)" I "would not be intelligible even to" my "own left rib." But I may be allowed the liberty to assure the Babu Sahib, that those who do not pronounce *Íśvara* and *Dváraka* with the full sound of (V) would be taken certainly for Barbarians by our good Pandits, as those who could not pronounce (R) were taken for Asuras in the days of yore. अरयः is put अलयः in their month in the Vedas "हेलवों हेलवो" &c. The case with (ﮦﺯﻭﺭﻭﺯ) is quite differ- ent. (و) in Persian is used as well for a vowel as for a con- sonant; in like manner (W) and (Y) are used in English. In نو (و) coming after (a) and not followed by any vowel it does the work of the vowel (U) but still has nothing to do with (W); نو will be properly transliterated *nau* and not *naw.* It is true that in the two last Tables "(V) alone occurs for (و)" and (व) but (W) has been bracketed with (V) in the first table (Roman Alphabet) and therefore I have not created my "giant to destroy it." My object is to have only one letter to represent (و) and (व), and that is all.

The Babu Sahib is very angry with me for my hinting at the "awkwardness of Bengali pronunciation;" however I can sincerely assure the Babu Sahib with thousands of apo- logies, that I am quite ready to proclaim to the world, that the Bengalís have the best pronunciation, if he thinks the world is ready to receive it as a fact; but I will not envy by any means the Bengali organs of speech if they "are more delicately formed, and are capable of producing a greater variety of nice shades of sounds, than any other in India." The Babu Sahib claims to be "a Kanaujite by descent" but so all the Bengalis can claim to be Caucasians by descent; I do not quarrel for that point. But as the Babu Sahib remarks about the inability of the Bengalis to pronounce the letter (अ A), that I am labouring under a "huge mis- take," and that no "nation in India pronounce that letter more correctly than they do," I may take the liberty to ask the Babu Sahib, was it not the Bengali pronunciation of Kalyánapur which misled Mr. Hunter to take it the other day in his Dictionary as having something to do with Kols (Coles). As for "the awkwardness of Bengali pronunciation" and their corruption of the Sanskrit elements, suffice it to give here a few Bengali names as they are printed in the *English- man* of the 2nd instant just lying before me, or I may say as they are pronounced by those Bengalis whose names they are. The article is headed "Convocation of the Calcutta Univer- sity." I challenge the whole host of the Babu Sahib's Euro- pean Orientalists if they can make out the names inserted in the 1st Column to be the same as they are shown in the second without referring to it.

| Names as printed in the *Englishman.* | What they are meant for. | |
|---|---|---|
| * Kristo. | कृष्ण | Krishṇa. |
| † Joy. | जय | Jaya. |
| ‡ Mohendro. | महेन्द्र | Mahendra. |
| Mothura. | मथुरा | Mathura. |
| Koylash. | कैलाश | Kailása. |
| Jogut. | जगत | Jagat. |
| § Troylokho. | त्रैलोक्य | Trailokya. |
| Roghubansa. | रघुवंश | Raghubanśa. |
| Shoshee. | शशि | Śaśi. |
| Bhobani. | भवानी | Bhavání. |
| Prosunno. | प्रसन्न | Prasanna. |
| Nobin. | नवीन | Navín. |
| Doss. | दास | Dás. |
| Prosad. | प्रसाद | Prasád. |
| ‖ Nilmoney. | नीलमणि | Nílmaṇi. |
| Protap. | प्रताप | Pratáp. |
| Choytono. | चैतन्य | Chaitanya. |
| Hori. | हरि | Hari. |
| Jodoo. | जदु | Jadu. |
| Boroda. | वरदा | Baradá. |
| Mohima. | महिमा | Mahima. |
| ¶ Romesh. | रमेश | Rameś. |
| Komola. | कमला | Kamalá. |
| Brojo. | व्रज | Braja. |
| Kopali. | कपाली | Kapálí. |
| Podo. | पद | Pada. |
| Nobo. | नव | Nava. |

But how far am I to go on? I suppose I have shown enough for the Bengali pronunciation of (अ A) and tired the patience of my reader: so adieu for the present.

CAMP BADSHAPUR: 14*th March*, 1869. } I remain Sir, yours faithfully,

ŚIVAPRASÁD.

* It has nothing to do with Christ or ख्रिष्ट as many may be led to believe.

† Not English word for happiness.

‡ It does not mean इन्द्र of मोह it is meant for महा इन्द्र

§ He is not an inhabitant of ancient Troy.

‖ It is not a compound English word Nil-money.

¶ Remember he is not Lord of Rome.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

# काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

# THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 36. Benares May 1st, 1869. Vol. III.


## ॥ उपदेशसहस्र्या गद्यप्रबन्धः ॥

भवतु स्वार्थतेत्याशङ्क्य विषयस्य स्वार्थत्वाभावं दृष्टान्तेनोपपादयति ।

(४६) न च तयोः स्वार्थता युक्ता, नहि चन्दनकण्टककृते सुखदुःखे चन्दनकण्टकार्थे, घटोपयोगो वा घटार्थे,स्तस्मात् तद्विज्ञातुर्मम चन्दनादिकृतो ऽर्थो ऽहं हि ततो ऽन्यः समस्तमर्थं जानामि बुद्ध्यारूढम् । तं गुरुरुवाच । एवं तर्हि स्वार्थस्त्वं चितिमत्त्वान्न परेण प्रयुज्यसे, नहि चितिमान् परतन्त्रः परेण प्रयुज्यते, चितिमतश्चितिमदर्थत्वानुपपत्तेः समत्वात्प्रकाशयोरिव, नाप्यचितिमदर्थत्वं चितिमतो भवति, अचितिमतो ऽचितिमत्त्वादेव स्वार्थसंबन्धानुपपत्तेः,नाप्यचितिमतोरन्योन्यार्थत्वं दृष्टं, नहि काष्ठकुड्ये अन्योन्यार्थं कुर्वाते ॥

न च तयोरिति । सुखदुःखवेदनाविक्रिययोरित्यर्थः । द्रष्टुरात्मनो दृश्यादन्यत्वं शेषित्वं चोपपादितमुपसंहरति । तस्मादिति । ज्ञातुर्ज्ञेयसंबन्धमाह । बुद्ध्यारूढमिति । यद्येवं प्रतिबुद्धो ऽसि वत्स न तर्हि परप्रयुक्तता तवेति तत्त्वमवबोधयत्याचार्य इत्याह । तं गुरुरिति । ननु चितिमतो ऽपि परार्थत्वं किं न स्यादिति चे,त्तत्र वक्तव्यं, किं चितिमांश्चितिमदर्थः किं वा ऽचितिमदर्थ इति, आद्ये ऽपि स्वयमेव स्वार्थश्चितिमदन्तरार्थो वा, नाद्य एकस्मिन्नुपकार्योपकारकभावलक्षणस्यार्थार्थित्वस्यायोगादित्यभिप्रेत्य द्वितीयं प्रत्याह । चितिमत इति । समत्वादन्योन्यस्मिन्नन्योन्यकृतातिशयाभावादित्यर्थः । द्वितीयं दूषयति । नापीति । अचितिमदर्थत्वं चितिमत इति पूर्वेणानुषङ्गः । अचितिमतो जडस्य जडत्वादेव शेषित्वानुपपत्तेरिति हेत्वर्थः । मा भूत्तर्ह्यचेतनानामपि चितिमच्छेषत्वं तेषामन्योन्यार्थता किमिति न भवेदतः किमिति चेतनो ऽध्यक्षः स्वार्थः कल्पत इत्याशङ्क्य दृष्टविरोधान्नैवमित्याह । नाप्यचितिमतोरिति ॥ ४६ ॥

यदुक्तं चितिमतश्चितिमदर्थत्वं नोपपद्यते समत्वादिति तत्र व्यभिचारं शङ्कते ।

(४७) ननु चितिमत्त्वे समे ऽपि भृत्यस्वामिनोरन्योन्यार्थत्वं दृष्टं, नैव,मग्नेरुष्णप्रकाशवत्तव चितिमत्त्वस्य विवक्षितत्वा,त्प्रदर्शितश्च दृष्टान्तः प्रदीपप्रकाशयोरिवेति, तच्चैवं सति स्वबुध्यारूढमेव सर्वमुपलभसे ऽग्न्युष्णप्रकाशतुल्येन कूटस्थनित्यचैतन्यस्वरूपेण, यदि चैवमात्मनः सर्वदा निर्विशेषत्वमुपगच्छसि किमित्यूचिवान् सुषुप्ते विश्रम्य विश्रम्य जाग्रत्स्वप्नयोः दुःखमनुभवामि, किमयमेव मम स्वभावः किं वा नैमित्तिक इति च, किमसौ व्यामोहो ऽपगतः किं वा नेति —

नन्विति । स्वामिचैतन्यस्य भृत्यदेह एवाचेतनभाग उपकरोति न तन्निरपेक्षं चिन्मात्रं, तथा भृत्यचैतन्यस्य स्वामिदेह एवाचेतनभाग उपकरोति न चैतन्यमात्रं, तथा ऽदर्शनादित्यभिप्रेत्य परिहरति । नैवमग्नेरिति । तदेवं चेतनस्यानन्यशेषत्वे सति तस्येश्वरात्मत्वं सिद्धमतः कूटस्थ एवात्मेत्युपसं-

हरति । तत्रैवं सतीति । चितिमतः स्वार्थत्वमेव न परार्थत्वं सर्वदेति स्थिते सतीत्यर्थः । स्वबुद्ध्यारूढमेव स्वाध्यस्तान्तःकरणवृत्तिकवलितमेव सर्वमध्यात्माधिभूतादिलक्षणं संघातमन्युष्णप्रकाशवत्स्वरूपभूतेन निर्विकारनित्यचैतन्यस्वभावेनोपलभसे त्वमतो नित्यमुक्तो ऽहं न संघाताध्यासकर्त्ता न मे संघातधर्मसंसर्गो ऽस्तीति स्वस्थो भवेत्यर्थः । ओमिति चेत्स ब्रूयात् तदा गुरुरेवं ब्रूयादित्याह । यदि चैवमिति । मोहादेवाब्रुवमिति चेत्स ब्रूयात्तदा तं प्रति गुरुणा वक्तव्यमाह । किमसावित्ति ॥ ४७ ॥

ननु संसार्यहं दुःखी नित्यमुक्तस्वभावादीश्वरादन्य इत्यादिभ्रमहेतुर्यो व्यामोहो ऽविवेकलक्षण आसीन्मम स इदानीं त्वत्प्रसादान्निवृत्तः परं तु कूटस्थचैतन्यस्वरूपेणेति यदिदं मम कूटस्थत्वमूचिवान् भवान् तत्र प्रतिविषयं ज्ञानकर्तृत्वात्कथं कूटस्थचित्स्वभावतेति संशयो जायत इति शिष्यप्रश्नमुत्थापयति ।

(४८) इत्युक्तः शिष्य उवाच । भगवन्नपगतो व्यामोहस्त्वत्प्रसादात्, किं तु मम कूटस्थतायां संशयः, कथं, शब्दादीनां स्वतः सिद्धिर्नास्ति, अचेतनत्वाद्, शब्दाद्याकारप्रत्ययोत्पत्तेस्तु तेषां, प्रत्ययानामितरेतरव्यावृत्तविशेषणानां नीलपीताद्याकारवत्तायाः स्वतः सिद्ध्यसंभवात्, तस्माद्बाह्याकारनिमित्तत्वं गम्यत इति बाह्याकारत्ववद् शब्दाद्याकारत्वसिद्धिः ॥

इत्युक्तः शिष्य उवाचेति । अपगतो मोह इत्यनुषङ्गः, संघातसाक्षिणो निर्विकारस्योक्तत्वात्कथं संशय इति तन्मुखेनैव कूटस्थतामवगमयितुं गुरुः पृच्छति । कथमिति । संशय इत्यनुषङ्गः । शिष्यः स्वविदितमर्थं निवेदयति । शब्दादीनामिति । शब्दस्पर्शरूपरसगन्धास्तावद्विषयाः प्रसिद्धास्तेषामचिद्रूपत्वात्स्वतः स्फुरणं नास्तीत्यविवादं, कथं तर्हि तेषां स्फूर्त्तिरिति तदाह । शब्दाद्याकारप्रत्ययोत्पत्तेस्तु तेषामिति । सिद्धिरित्यनुषङ्गः । शब्दाद्याकाराणां प्रत्ययरूपत्वान्न स्वातिरिक्तग्राह्यतेति विज्ञानवादिमतमाशङ्क्य मध्ये निराकरोति । प्रत्ययानामित्यारभ्यसिद्धिरित्यन्तेन । इतरेतरव्यावृत्तानि विशेषणानि शब्दाद्याकाररूपाणि येषां ते तथा हेतुगर्भविशेषणं, प्रकाशस्वभावत्वात्प्रत्ययानां स्वत एव परोपरागं विना नीलपीताद्याकारवत्ताया असंभवान्न प्रत्ययमात्रस्वरूपाः शब्दादय इत्यध्याहारेण योजना । परमतनिराकरणमुपसंहरति । तस्मादिति । बाह्य आकारः शब्दादिरूप इन्द्रियसंसृष्टो ऽर्थो निमित्तं येषां प्रत्ययानां तेषां भावो बाह्याकारनिमित्तत्वमिति विग्रहः । इति यतस्तस्मात्प्रत्ययानां बाह्याकारवच्छब्दाद्याकारत्वसिद्धिरित्यन्वयः । चैतन्यात्पृथगाकारवन्तो ये शब्दादयः पराग्व्यवहारयोग्यास्तत्कृताकारत्वसिद्धिः प्रत्ययानां न स्वत इत्यर्थः ॥ ४८ ॥

एवं शब्दादीनां विषयाणां स्वव्यतिरिक्तप्रत्ययग्राह्यत्वं चेदध्यवस्यसि तर्हि प्रत्ययस्वरूपे विशेषाभावसिद्धेः कूटस्थत्वसिद्धिरित्याशङ्क्याह ।

(४९) तथा प्रत्ययानामप्यहंप्रत्ययालम्बनवस्तुभेदानां संहतत्वादचैतन्योपपत्तेः स्वार्थत्वासंभवात्स्वरूपव्यतिरिक्तग्राहकग्राह्यत्वेन सिद्धिः शब्दादिवदेवासंहतत्वे सति चैतन्यात्मकत्वात्स्वार्थो ऽप्यहंप्रत्ययानां नीलपीताद्याकाराणामुपलब्धेति विक्रियावानेव कूटस्थ इति संशयः । तं गुरुरुवाच । न युक्तस्तव संशयः ॥

तथा प्रत्ययानामपीति । नहि विषयसंसृष्टतया भासमाना विषयाकाराः प्रत्ययाः स्वप्रकाशचैतन्यरूपा भवन्त्यागमापायित्वात्किं त्वन्यसाक्षिका एवेत्यभिप्रेत्य तत्स्वरूपविशेषं विशेषणनिर्देशेन कथयत्यहंप्रत्ययालम्बनवस्तुभेदानामिति । अहंप्रत्ययालम्बनं वस्त्वहंकरणं तस्य भेदा वृत्तिविशेषास्तदात्मकानामित्यर्थः । विमताः प्रत्यया न चित्स्वभावाः संहतत्वात्संहतत्वं चागमापायित्वाद् शब्दादिवद्देहादिवद्वा तथा विमताः स्वातिरिक्तग्राहकग्राह्या अचेतनत्वाच्छब्दादिवदेवेत्यर्थः । अतः परमाकाराभावात्प्रत्ययोत्पत्त्याद्यवस्यासाक्षी निर्विशेषश्चिदात्मा सिद्ध एवेति कुतः कूटस्थतायां संशय इति न वाच्यमित्याहासंहतत्वे सतीति । यद्यपि संघातादन्यश्चैतन्यस्वभावः स्वार्थ एवात्मा तथाप्यहंप्रत्ययानामन्तःकरणवृत्तीनां नीलपीताद्याकाराणामुपलब्धोपलब्धिकर्त्ता इति हेतोर्विक्रियावानेवायं कथं कूटस्थ इति मे संशय इत्यर्थः । एवं चेद्दृश्यदर्शने विवेचयसि न तर्हि ते संशयावकाश इति परिहरति । तं गुरुरुवाच न युक्त इत्यादिना ॥ ४९ ॥

संशयायोगे हेतुमाह ।

(५०) यतस्तेषां प्रत्ययानां नियमेनाशेषत उपलब्धेरेवापरिणामित्वात्कूटस्थत्वसिद्धौ निश्चयहेतुमेवाशेषचित्तप्रचारोपलब्धिं संशयहेतुमात्थ, यदि हि तव परिणामित्वं स्यादशेषस्वविषयचित्तप्रचारोपलब्धिर्न स्याच्चित्तस्येव स्वविषये यथा चेन्द्रियाणां स्वविषयेषु न च तथात्मनस्तव स्वविषयैकदेशोपलब्धिरतः कूटस्थतैव तवेति । तत्राहोपलब्धिर्नाम धात्वर्थो विक्रियैवोपलब्धुः कूटस्थात्मता चे-

ति विरुद्धं, न धात्वर्थविक्रियायामुपलब्ध उपचाराद्यो हि बौद्धः प्रत्ययः स धात्वर्थो विक्रियात्मकः ॥

यत इति । यः परिणामी वित्तादिस्तस्य क्रमेण स्वविषयग्राहकत्वमकृत्स्नग्राहकत्वं सकलस्वविषयावस्थाग्राहकत्वं च दृष्टं तद्व्यापकमात्मनः प्रत्ययसाक्षिणः सकाशाद्व्यावर्त्तमानं स्वव्याप्य परिणामित्वमपि तस्य व्यावर्त्तयतीति व्यापकविरुद्धोपलब्धेः कूटस्थत्वसिद्धौ निश्चय एव युक्तो न संशय इत्यर्थः । उक्तमेवार्थं व्यतिरेकव्याप्तिं विवृण्वन्नुपपादयति । यद्धीति । इदानीं प्रकृतिप्रत्ययार्थपर्यालोचनयोपलब्धा कूटस्थ इति विरुद्धमिति शिष्यः शङ्कामुद्भावयति । तत्राहेति । उपोपसर्गस्य लभतेर्धातोः कर्त्तरि तृचो विधानाद्धात्वर्थस्य च क्रियात्वात्क्रियायाश्चोत्पत्तिविनाशवत्त्वात्तत्कर्त्तरि कथं विक्रियाराहित्यमित्यर्थः । क्रियैव हि प्रकृतिभूतधात्वर्थः कर्त्तैव च प्रत्ययार्थः सर्वत्र मुख्य इति नास्ति नियमो गडिवदनैकदेशे सविता प्रकाशते सविता प्रकाशयतीत्यत्र व्यभिचारादित्यभिप्रेत्य प्रकृते धात्वर्थतत्कर्तृवचनस्योपलब्धिशब्दस्य गौणार्थत्वमेव युक्तमित्याह । गुरुर्न धात्वर्थेति । संग्रहं विवृणोति । यो हि बौद्ध इति । बौद्धो बुद्धिपरिणामः स प्रतिविषयमयति गच्छतीति प्रत्ययः । ननु बुद्धेरन्तःकरणस्य द्रव्यत्वात्तत्परिणामस्य च मृत्परिणामघटादिवद् द्रव्यत्वोपपत्तेः कथं क्रियात्वमिति तत्राह । स धात्वर्थो विक्रियात्मक इति । विशिष्टक्रियात्मक इत्यर्थः । नहि मृदादिवत्स्वाकारतिरोधानेनान्तःकरणपरिणाम इष्यते, किं तु जलौकावदालोकवद्वा संकोचविकाशरूपेण, तादृशस्तु परिणामः परिणामिचेष्टारूपत्वात्तत्क्रियेति वक्तुं युक्त इत्यभिप्रायः ॥ ५० ॥

तस्याः क्रियाया उपलब्धिशब्दोपचारे निमित्तमाह ।

(५१) आत्मन उपलब्ध्याभासफलावसान इत्युपलब्धिशब्देनोपचर्यते, यथा छिदिक्रिया द्वैधीभावफलावसानेति धात्वर्थेनोपचर्यते तद्वदित्युक्तः शिष्य आह । ननु भगवन्ममोक्तकूटस्थत्वप्रतिपादनं प्रत्यसमर्थो दृष्टान्तः । कथम् ॥

आत्मन इति । आत्मनः स्वरूपभूता योपलब्धिः सत्यज्ञानं विज्ञानघन एवेत्यादिश्रुतिसिद्धा तस्या आभासो वह्निव्याप्तायःपिण्डस्य वह्न्याकारत्ववच्चिदात्मव्याप्ततया चिच्छायापत्तिः तदेव फलं तदवसानस्तत्पर्यन्त इति कृत्वोपलब्धिशब्देनोपचर्यते इत्यर्थः । तत्रानुकूलं दृष्टान्तमाह । यथेति । अयं भावः । अर्थप्रकाशो ह्युपलब्धिशब्दार्थः प्रसिद्धः, स नार्थधर्मोऽर्थानां जडत्वादित्युक्तं, नाप्यन्तःकरणधर्मः, तस्यापि करणत्वाच्चैतन्यप्रकाशाश्रयत्वायोगात्, तथापि स्वयंप्रकाशमाननित्यचैतन्यात्मन्यव्यवधानेनाहंतयैवाध्यासात्स्वसत्तायां प्रकाशाव्यतिरेकादात्मचैतन्यव्याप्तास्तत्तदर्थाकारा वृत्तीः कुर्वदन्तःकरणमुपलब्धा कर्त्ता प्रमाता भोक्तेति च प्रमातृत्वकर्तृत्वभोक्तृत्वानुभवितृत्वव्यपदेशास्पदं भवति, यथा ऽयःपिण्डो दहति प्रकाशयतीति तद्वद्, आत्मा चाकाशवदविक्रियत्वात्कूटस्थो ऽपि संस्तादृगन्तःकरणगतस्वाभासाविवेकात्तद्धर्मैस्तदवस्थाभिश्च मिथ्यैव व्यपदिश्यते, चतुष्कोणो वर्त्तुलः कृशः स्थूलो जातो नष्टो ऽग्निरिति यथा ऽयःपिण्डगताभासाविवेकादग्निर्व्यपदिश्यते तद्वत् । तस्मादन्तःकरणस्य विकारिणः कर्तृत्वे ऽप्युपलब्धेः क्रियमाणत्वाभावादुपलब्धिस्वरूपस्यात्मनः सिद्धं कूटस्थत्वमिति । तत्रोक्तमर्थं विशदीकर्त्तुं दृष्टान्तस्य दार्ष्टान्तिकाननुरूपत्वं शङ्कयतीत्युक्तः शिष्य आह नन्विति । उभयत्र प्रकृतिप्रत्ययार्थयोरौपचारिकत्वस्योक्तत्वात्कथं दृष्टान्तासामर्थ्यमिति गुरुराह । कथमिति ॥ ५१ ॥

उपचरितत्वे ऽप्युपलब्धुर्विक्रिया दुर्वारा यतः छिदिक्रियासाध्यद्वैधीभावाख्यं फलं विक्रियैवमुपलब्धिफलस्यापि फलत्वाविशेषात्साध्यतया विक्रियात्त्वोपपत्तेः कथमुपलब्धा कूटस्थः स्यादिति शिष्यो दृष्टान्तासामर्थ्यमुपपादयति ।

(५२) छिदिः छेद्यविक्रियावसानोपचर्यते यथा धात्वर्थेन, तथोपलब्धिशब्दोपचरितो ऽपि धात्वर्थो बौद्धप्रत्यय आत्मोपलब्धिविक्रियावसानश्चेन्नात्मनः कूटस्थतां प्रतिपादयितुं समर्थः । गुरुरुवाच । सत्यमेवं स्याद्यद्युपलब्ध्युपलब्ध्रोर्विशेषो, नित्योपलब्धिमात्र एव ह्युपलब्धा न तु तार्किकसमय इवान्योपलब्धिरन्य उपलब्धा । ननूपलब्धिफलावसानो धात्वर्थः कथमित्युच्यते ॥

छिदिः छेद्येत्यादिना । छिदिक्रियायाः छेद्यविक्रियावसानत्ववद् बौद्धो धात्वर्थ उपलब्धिशब्दोपचरितो ऽपि आत्मोपलब्धिविक्रियावसानश्चेदिति योजना । छिदिक्रियायाः छेत्तृकृतद्वैधीभावपर्यन्तत्ववदात्मकृतोपलब्धिविकारपर्यन्त उपलब्धिर्धात्वर्थश्चेदित्यर्थः । उपलब्धेः स्वरूपेणैव फलत्वं विवक्षित्वा दृष्टान्ताननुगुणत्वमध्यवस्यसि किं वोपाधिवशादिति विकल्प्याद्यं दूषयति । सत्यमेवमिति । विशेषो भेदः, नित्यशब्देन बौद्धमताद्व्यावृत्तिः । मात्रपदेन भेदाभेदमतात् । प्रज्ञानघन एव प्रज्ञानं ब्रह्मेत्यादिश्रुतिप्रसिद्धिहेतुमाह । हीति । एवकारव्यावर्त्यमाह । न तु तार्किकेति । यद्येवमात्मतत्त्वं कथं तर्हि धात्वर्थफलत्ववचनमिति शिष्यः शङ्कते । नन्विति ॥ ५२ ॥

उपाधिवशात्फलत्वोपचार उपलब्धेर्न स्वरूपत इत्युक्तं स्मारयन् पक्षान्तरमविरुद्धमित्याह गुरुः ।

(५३) शृणु, उपलब्ध्याभासफलावसान इत्युक्तं किं न श्रुतं तत् त्वया, न त्वात्मा विक्रियोत्पादनावसान इति मयोक्तम् । शिष्य उवाच । कथं तर्हि कूटस्थे मय्यशेषस्वविषयचित्तप्रचारोपलब्धृत्वमित्यात्थ । तं गुरुरुवाच । सत्यमवोचं तेनैव कूटस्थतामब्रवं तव ॥

शृण्विति । अन्तःकरणवृत्तीनामाविर्भावतिरोभावधर्मवत्त्वात्तद्विशिष्टतया स्फुरणमङ्गीकृत्य विषयस्यचैतन्याभेदेन प्रकाशमानवृत्तितत्स्याभासाश्रयतया भासमान आत्मा प्रमातेत्युच्यते, कर्मेन्द्रियाण्यधिष्ठाय क्रियावत्प्राणप्रधानान्तःकरणलिङ्गगताभासाविवेकात्कर्त्तेति चोच्यते, शुभाशुभकर्मोपस्थापितान्तःकरणपरिणामविशेषं तदविवेकात्स्वगतमिव पश्यन्नात्मा भोक्तेत्युच्यते, एतां सर्वामेव चित्तविलासावस्थां स्वरूपचैतन्यानुगममात्रेण साक्षादवभासयन्निव भासमानो ऽलुप्तप्रकाशो ऽसंदिग्धो ऽविपर्यस्तो ऽविषयः साक्षी उपलब्धा ज्ञातेति च व्यपदिश्यते, वृत्तिविनाशात्तद्गतचिदाभासस्यापि विलयात्तत्संस्कारसंभवे सति समयान्तरे पूर्वावगतविषयाकारस्मृतिवृत्त्युदये तद्गताभासद्वारा स एव स्मर्त्तेति व्यपदिश्यते, स एव तु चिदात्मा समस्तकार्यकारणप्रपञ्चोपलक्षितस्तदनुवृत्तसत्ताभेदेन सर्वाधिष्ठानमित्युच्यते, कारणोपाध्यविवेकेनालुप्तज्ञानशक्तितया चान्तर्यामिशब्दवाच्यो ऽपि भवति । तस्मात्केन चिदुपाधिना क्व चित्तथातथा व्यवहारास्पदत्वेनाविद्यावशाद्भासमानोप्यात्मा स्वरूपतो निर्विकारो निर्द्धर्मको ऽसङ्गः कूटस्थ एवेत्येतत्सर्वमभिप्रेत्योक्तमर्थं प्रश्नमुत्थाप्योपसंहरति । शिष्यः कथं तर्हि इत्यारभ्य तवेत्यन्तेन । तेनैवाशेषस्वविषयचित्तप्रचारोपलब्धृत्वेनेत्यर्थः । अतः कुतस्तत्र तवानाश्वासो जायत इत्यभिप्रायः ॥ ५३ ॥

आत्मनो नित्यनिवृत्ताशेषस्वगतविशेषतया कूटस्थत्वे ऽवबोधिते ऽवबुद्धस्वरूपः शिष्यः स्वभ्रान्तिबीजमपश्यन् पृच्छति ।

(५४) यद्येवं भगवन् कूटस्थनित्योपलब्धिस्वरूपे मयि शब्दाद्याकारबौद्धप्रत्ययेषु च मत्स्वरूपोपलब्ध्याभासफलावसानवत्सूत्पद्यमानेषु कस्तवपराधो मम, सत्यं नास्त्यपराधः, किं त्वविद्यामात्रस्त्वपराध इति प्रागेवावोचं, यदि भगवन् सुषुप्त इव मम विक्रिया नास्ति कथं स्वप्नजागरिते, तं गुरुरुवाच । किं त्वनुभूयेते त्वया सततं, बाढमनुभवामि, किं तु विच्छिद्यविच्छिद्य न तु सततं, तं गुरुरुवाच । तर्ह्यागन्तुके त्वेते न तवात्मभूते ॥

यद्येवमिति । अथ वा बौद्धप्रत्ययाश्चेदुपलब्ध्याभासफलावसाना जायन्ते तदा तानात्मनि नित्यं पश्यतो मम को ऽपराध इत्याक्षिपति । यद्येवमिति । प्रश्नस्योत्तरमाह । सत्यं नास्त्यपराध इति । कथं तर्हि किं न श्रुतं त्वयेति मामात्थेति शङ्कते । किं त्विति । जिज्ञासोस्तव प्रैत्तावत उक्तार्थानवधानं नागन्तुकदोषनिमित्तकं संभाव्यत इत्यभिप्रेत्य मयोक्तमिति परिहरत्यविद्येति । यद्वा ऽऽक्षेपं परिहरति । सत्यमिति । नास्त्यपराधस्तव स्वानुभवाप्रच्छादकत्वात्कथं तर्हि त्वयोक्तं ममानाश्वासो जात इति पृच्छति । किं त्विति । अन्यो ऽस्त्वपराध इत्युत्तरमाहाविद्येति । तदेवं यथावदात्मनः स्वरूपानवभासाविज्ञानिबन्धन एव संसारित्वमधिकृतत्वमित्याद्यतद्धर्मावभासो न परमार्थो ऽस्तीत्युपपत्तितो ऽवगतमात्मनः कूटस्थनित्यत्वमिदानीमवस्थात्रयसाक्षितया ऽवस्थाधर्मास्पर्शित्वेन पुनः कूटस्थतां प्रतिपादयितुमाक्षेपमुत्थापयति । यदि भगवन्निति । स्वप्नजागरिते ममेति शेषः । त्वच्चैतन्यप्रकाश्यत्वात्त्र तव स्वभावभूते ते अवस्थे इति परिहरति । तं गुरुराहेति । सततमिति । यदा ते भवतस्तदा नाननुभूयमाने भवत इत्यर्थः । अनुभूयमानत्वमङ्गीकृत्य सततानुभवशब्दार्थमजानानः शिष्य आह । बाढमिति । तं गुरुराह । आगन्तुके त्वेते इति । सुषुप्तावात्मस्वरूपे भासमाने ऽपि तयोरनवभासाचात्मनः स्वरूपभूते ते अवस्थे अतो विच्छिद्यविच्छिद्यानुभूयेते त्वया ते इत्यर्थः ॥ ५४ ॥

विमते अनात्मभूते व्यभिचारित्वाद्वस्त्रादिवदित्युक्त्वा व्यतिरेकेणैतदेव द्रढयति ।

(५५) यदि तवात्मभूते चैतन्यस्वरूपवत्स्वतः सिद्धे संतते एव स्यातां, नहि यस्य यत्स्वरूपं तत्तद्व्यभिचारि दृष्टं, स्वप्नजागरिते तु चैतन्यमात्रत्वाद्व्यभिचरतः, सुषुप्ते चेत्स्वरूपं व्यभिचरेत्तन्नष्टं नास्तीति बाध्यमेव स्यादागन्तुकानामतद्धर्माणामुभयात्मकत्वदर्शनाद् । यथा धनवस्त्रादीनां नाशो दृष्टः स्वप्नभ्रान्तिलब्धानां त्वभावो दृष्टः । नन्वेवं भगवन् चैतन्यस्वरूपमप्यागन्तुकं प्राप्तं स्वप्नजागरितयोरिव सुषुप्ते ऽनुपलब्धेरचैतन्यस्वरूपो वा स्यामहं, न, पश्य तदनुपपत्ते,श्चैतन्यस्वरूपं चेदागन्तुकं पश्यसि, पश्य नैतद्वर्षशतेनाप्युपपत्त्याकलयितुं शक्नुमो वयमन्यो वा ऽचेतन्यो ऽपि ॥

यदीत्यादिना । चैतन्यमात्रत्वादिति । चित्स्वभावादित्यर्थः । यत्र यदनुभवगोचरस्तत्रैव चेत्तन्नानुभूयते तदा तस्य ध्वंसो बाधो वा स्यादुभयथापि तस्य नाधिष्ठानधर्मत्वमिति

सदृष्टान्तमुपपादयति । सुषुप्ते चेदित्यादिना । नाशो ध्वंसः अभावो बाधः तत्र शिष्यो ऽतिप्रसङ्गं शङ्कते । नन्वेवमिति । दृष्टिश्रुतिमतिविज्ञातिलक्षणे हि स्वप्नजागरिते दृष्ट्यादिमच्चैतन्यमेव, अतो यदि सुषुप्तौ स्वप्नजागरिते नोपलभ्यते इति तत्र ते न स्तस्तदा चैतन्यमेव सुषुप्तौ नास्तीत्यात्मा आगन्तुकचैतन्यो वा स्यादचैतन्यस्वरूपो वा गत्यन्तराभावादित्यर्थः । गुरुः परिहरति । नेति । नैवं वक्तुमुचितमित्यर्थः । कथमिति चेत्तत्राह । पश्येति । पर्यालोचयेत्यर्थः । वस्तुस्वभावे आलोच्यमाने चैतन्यस्यागन्तुकत्वानुपपत्तेर्नैवं वक्तुमुचितमिति वाक्यार्थः । ननु सुषुप्ते दृष्ट्यादिरूपस्य चैतन्यस्यादर्शनाज्जाग्रदादौ दर्शनादागन्तुकमेव चैतन्यं पर्यालोचयामीति चे,त्तत्र वक्तव्यं, किं निरुपाधिचित्स्वरूपमेवागन्तुकं पश्यसि किं वा नयनादिद्वारकबुद्धिवृत्त्युपहितमिति विकल्प्याद्यं प्रत्याह । चैतन्यस्वरूपं चेदिति । अलौकिकप्रज्ञस्त्वं चेच्चैतन्यस्वरूपमागन्तुकं पश्यसि तर्हि पश्य, वयं तु न्यायप्रमाणकुशला अपि तच्चैतन्यस्वरूपमागन्तुकं द्रष्टुं घटयितुं वा न वर्षशतेनापि शक्नुमो ऽन्यो वा कश्चिदचैतन्यो ऽपि मूढो ऽपि न शक्नुयादित्यर्थः । अयं भावः । चैतन्यस्यागन्तुकत्वं चैतन्येन गृह्यते किं वा ऽचैतन्येन, नाद्यः, स्वग्राह्यत्वे स्ववृत्तिविरोधाद्, नह्यङ्गुल्यग्रेण तदेव स्पृश्यते ऽसिधारया वा ऽसिधारा छिद्यते, नाप्यन्यचैतन्येनान्यचैतन्यस्यागन्तुकत्वं ग्राह्यमन्यत्वस्याद्याप्यसिद्धेः । न द्वितीयो, जडस्य चिदधीनप्रकाशतया चित्प्रकाशकत्वायोगादतश्चैतन्यं नागन्तुकमिति । श्रुतिश्च भवति, यद्वै तन्न पश्यति पश्यन् वै तन्न पश्यति नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते ऽविनाशित्वान्न तु तद् द्वितीयमस्ति ततो ऽन्यद्विभक्तं यः पश्येदित्याद्या ॥ ५५ ॥

एवमाद्यं कल्पमनुपपत्त्या निराकृत्य द्वितीयमचैतन्यापादनेन निराकरोति ।

(५६) संहतत्वात्पारार्थ्यमनेकत्वान्नाशित्वं च न केन चिदुपपत्त्या वारयितुं शक्यमस्वार्थस्य स्वतः सिद्ध्यभावादित्यवोचाम । चैतन्यस्वरूपस्य त्वात्मनः स्वतः सिद्धेरन्यानपेक्षत्वं न केन चिद्वारयितुं शक्यमव्यभिचारात् । ननु व्यभिचारो दर्शितो मया सुषुप्ते न पश्यामीति, न, व्याहतत्वा,त्कथं व्याघातः, पश्यतस्तव न पश्यामीति व्याहतं वचनं, नहि कदा चिद्भगवन् सुषुप्ते मया चैतन्यमन्यद्वा किं चिद्दृष्टं, पश्यंस्तर्हि सुषुप्ते त्वं, यस्माद्दृष्टमेव प्रतिषेधसि, न दृष्टिं, या तव दृष्टिस्तच्चैतन्यमिति मयोक्तं, यया त्वं विद्यमानया न किं चिद्दृष्टमिति प्रतिषेधसि सा दृष्टिस्त्वच्चैतन्यं, तर्हि सर्वत्राव्यभिचारात्कूटस्थनित्यत्वं सिद्धं स्वत एव, न प्रमाणापेक्षम् ॥

संहतत्वादिति । नयनादिद्वारकबुद्धिवृत्त्युपाधिग्रस्तस्य तु संहतत्वात्परार्थत्वादिकं पूर्वमेवोपपादितमिति नेदानीमुपपत्तिर्वक्तव्येत्याह । इत्यवोचामेति । अत्रापि श्रुतिर्भवति । न दृष्टेर्द्रष्टारं पश्येन्न श्रुतेः श्रोतारं शृणुयान्न मतेर्मन्तारं मन्वीथा न विज्ञातेर्विज्ञातारं विजानीया इत्याद्या । अस्मिंस्तु श्रुतिवाक्ये पञ्चम्यन्तशब्दवाच्यदृष्ट्यादेरन्यद्रष्टृव्याप्यतया ऽचैतन्यस्वभावत्वोक्तेस्तदन्यो दृष्ट्यादिस्वरूपप्रकाशकत्वेन द्रष्ट्रादिशब्दनिर्दिष्टः साक्षी नित्यचैतन्यस्वभावः सिद्ध इत्युपसंहरति । चैतन्यस्वरूपस्य त्विति । उक्तमेवार्थं युक्त्यन्तरेणोपपादयितुं शङ्कामुद्भावयति । नन्विति । उत्तरं संग्रहेणाह । न व्याहतत्वादिति । व्याहतत्वमेव प्रश्नपूर्वकं विवृणोति । कथमित्यादिना । न किं चिदिति पुनः शिष्यप्रश्नः । पश्यंस्तर्हीति गुरोरुक्तिः । पश्यन् द्रष्टा दृष्टिमानेव त्वं सुषुप्त इत्यर्थः । यस्मादित्यादिस्तदुपपादनपरो ग्रन्थः स्पष्टार्थः । सुषुप्ते मया किं चिन्न दृष्टमित्युत्थितस्य परामर्शानुपपत्त्या सौषुप्तानुभवस्यावश्यंभावात्तदाकारेणोपसंहारादागन्तुकानुभवासंभवात्स्वरूपचैतन्यमनागन्तुकं कूटस्थात्मस्वरूपं सिद्धमित्युपसंहरति । यथेत्यादिना ॥ ५६ ॥

चैतन्यस्य स्वतः सिद्धिमुपपादयति ।

(५७) स्वतः सिद्धस्य हि प्रमातुरन्यस्य प्रमेयस्य परिच्छित्तिं प्रति प्रमाणापेक्षा, या त्वन्या नित्या परिच्छित्तिरपेक्ष्यते अन्यस्यापरिच्छित्तिरूपस्य परिच्छेदाय सा हि नित्यैव कूटस्था स्वयंज्योतिःस्वभावात्मनि प्रमाणत्वे प्रमातृत्वे वा न तां प्रति प्रमाणापेक्षा तत्स्वभावत्वाद्, यथा प्रकाशनमुष्णत्वं वा लोहोदकादिषु परतो ऽपेक्ष्यते ऽग्न्यादित्यादिभ्यो ऽतत्स्वभावत्वान्नाग्न्यादित्यादीनां तदपेक्षा सर्वदा तत्स्वभावत्वात् ॥

स्वतः सिद्धस्य हि प्रमातुरिति । हिशब्दो लोकानुभवप्रसिद्धिद्योतनार्थः, स्वतः सिद्धः, प्रमाणनिरपेक्षत्वेनैव सिद्धः, प्रमाणप्रवृत्तेः प्रागेव प्रकाशमान इति यावद्, एवंविधस्य प्रमातुर्यदन्यत्प्रमेयं दृश्यं तस्य परिच्छित्तिं स्फूर्त्तिं प्रति प्रमाणापेक्षा न प्रमातृस्वरूपपरिच्छित्तिं प्रति प्रमाणापेक्षेत्यर्थः । या त्वन्यस्यापरिच्छित्तिरूपस्याचेतनस्य परिच्छेदायावभासनाय नित्या स्वतः सिद्धा चान्या परिच्छित्तिः संविदपेक्ष्यते, सा हि कूटस्थैव, यतो नित्या स्वयंज्योतिःस्वभावा चेति योजना । तां प्रति स्वरूपकूटस्थनित्यसंविदं प्रति आत्मनि संविद्रूपे विषये प्रमाणत्वे तत्सत्तानिश्चयफलव्यापारात्मत्वे प्रमातृत्वे वा न-

द्व्यापाराश्रयत्वे वा न प्रमाणापेक्षा प्रमात्रपेक्षा वास्तीत्यर्थः । अयं भावः । अन्तःकरणवृत्तिप्रतिबिम्बितं हि चैतन्यं प्रमाणमिष्यते, वृत्तिमदन्तःकरणप्रतिबिम्बितं प्रमातृ, तदुभयं प्रमेयावभाससमये नानवभासमानं भवति, तथा सति प्रमेयस्यैव स्वतःस्फुरणशङ्कापातादिदोषप्रसङ्गात्तदवभासश्च न प्रमात्रन्तरात्प्रमाणान्तराद्वा भवति अनवस्थाप्रसङ्गादनुपपत्तेश्चेत्यतः स्वप्रकाशतयैव प्रमातृप्रमाणप्रमेयानामवभासकस्यात्मनः सिद्धिरिति तस्य सिद्धा नित्यस्वप्रकाशकूटस्थचिदात्मतेति । अप्रकाशस्वभावस्यैव प्रकाशकान्तरापेक्षा न प्रकाशस्वभावस्येत्युक्तमर्थं दृष्टान्तोक्त्या बुद्धिमारोहयति। यथा प्रकाशनमिति ॥ ५७॥

ननु संविदः प्रमाणफलत्वप्रसिद्धौ कथं नित्यत्वमित्याक्षिपति ।

(५८) अनित्यत्व एव प्रमा स्यान्न नित्यत्व इति चेन्नावगतेर्नित्यत्वानित्यत्वयोर्विशेषानुपपत्तेः, नह्यवगतेः प्रमात्वे ऽनित्यावगतिः प्रमा न नित्येति विशेषो ऽवगम्यते, नित्यायां प्रमातुरपेक्षाभावो ऽनित्यायां तु यत्नान्तरितत्वादवगतिरपेक्ष्यत इति विशेषः स्यादिति चे,त्सिद्धा तर्ह्यात्मनः प्रमातुः स्वतः सिद्धिः प्रमाणनिरपेक्षतयैवेत्यभावे ऽपि अपेक्षाभावो नित्यत्वादिति चेन्नावगतेरेवात्मनि सद्भावादिति परिहृतमेतत् ॥

अनित्यत्व एवेति । अर्थावगतिर्हि प्रमा न तस्याः स्वरूपत एवानित्यत्वे कल्पकमस्तीति समाधत्ते । नावगतेरिति । संग्रहं विवृणोति । नहीति । चक्षुरादिद्वारकबुद्धिवृत्तिव्यक्ताया अवगतेः प्रमात्वे सति नित्यायाः प्रमात्वं न भवत्यनित्यायास्तु भवतीति विशेषो नहि गम्यते विनिगमनाभावादित्यर्थः । तत्र विनिगमनाभावो ऽसिद्ध इति शिष्यः शङ्कते । नित्यायामिति । अवगतेर्नित्यत्वे कारकव्यापारवैयर्थ्यं स्यादित्येवं विशेष इत्यर्थः । प्रमातुः स्वावगतेर्नित्यत्वे प्रमाणव्यापारवैयर्थ्यमापद्यते किं वा विषयावगतेर्नित्यत्वे, नाद्यः, इष्टापत्तेरित्याह । सिद्धा तर्हीति । नित्यावगतिपक्षे प्रमाणनैरपेक्ष्यं चेत्त्वया ऽनुमंस्यते तर्हि प्रमातुरात्मनः स्वरूपस्य स्वतः सिद्धिः स्वप्रकाशता प्रमाणनिरपेक्षतयैव सिद्धेत्यर्थः । अनित्यस्यास्वप्रकाशस्य च जडत्वादात्मत्वानुपपत्तेरित्यभिप्रायः । नन्वात्मप्रमाया नित्यत्वाद्यदि प्रमाणानपेक्षा तर्हि प्रमाभावस्यैव तत्र नित्यत्वात्प्रमाणानपेक्षा किं न स्यादिति शङ्कते । अभावे ऽपीति । प्रमाभावे ऽपीत्यर्थः । परिहरति । नावगतेरिति । अवगतेरात्मनि सद्भावादेव प्रमाणानपेक्षा नह्यवगत्यभावशङ्कावकाशो ऽसंहतस्य संघातसाक्षिणश्चितिमत्त्वोपपादनादित्यर्थः । अथ वा आत्मसिद्धिः प्रमाणं नापेक्षते इति वदता प्रमाणाभावमपेक्षत इत्युक्तं स्यादिति मत्वा तदपेक्षापि तव नोपपद्यते ऽनन्यसिद्धिर्नित्यत्वादेवेति शङ्कते । अभावे ऽपीति । स्वतः सिद्धिप्रमाणनैरपेक्ष्यशब्दाभ्यां सर्वानपेक्षप्रकाशमानात्मस्वरूपस्यैव विवक्षितत्वाच्चात्र शङ्कावकाश इति परिहरति । नावगतेरिति ॥ ५८ ॥

इदानीं प्रमातुः स्वसिद्धिर्निरपेक्षैवेत्येतद्विपक्षबाधकोपन्यासेन साधयन्नित्याया अपि प्रमाया विषयावगतित्वसिद्धये विषयस्यत्वं संपादयितुं प्रमाणव्यापारापेक्षास्तीति सूचयन् पक्षान्तरमपाकरोति ।

(५९) प्रमातुश्चेत्प्रमाणापेक्षा सिद्धिः कस्य प्रमित्सा स्या,द्यस्य प्रमित्सा स एव प्रमाता ऽभ्युपगम्यते, तदीया च प्रमित्सा प्रमेयविषयैव न प्रमातृविषया प्रमातृविषयत्वे ऽनवस्थाप्रसङ्गात् प्रमातुस्तदिच्छायाश्च तस्याप्यन्यः प्रमाता तस्याप्यन्य इत्येवमेव इच्छायाः प्रमातृविषयत्वे प्रमातुरात्मनो ऽव्यवहितत्वाच्च प्रमेयत्वानुपपत्तिः, लोके हि प्रमेयं नाम प्रमातुरिच्छास्मृतिप्रयत्नप्रमाणजन्मव्यवहितं सिध्यति ॥

प्रमातुश्चेत्यादिना । अयमर्थः । सर्वं वस्तु ज्ञाततया ऽज्ञाततया वा साक्षिचैतन्यस्य विषय एवेति स्थिते कदा चिदज्ञातत्वेन निर्विकल्पकसाक्ष्यवगतस्य ज्ञातत्वव्यवहारसिद्धये यस्य प्रमित्सोपपद्यते स एव तदा प्रमाता प्रमाणव्यापाराश्रय इत्युच्यते' तत्र प्रमातुः स्वरूपसिद्धिश्चेत्प्रमाणापेक्षा स्यात्तदा कस्य प्रमित्सा स्यात् तस्यैवान्यस्य वा प्रमातुमिच्छा च स्वविषयान्यविषया वा सर्वथापि नोपपद्यते इति । तत्रेच्छाश्रयस्येच्छागोचरत्वं निराकुर्वन्स्वप्रमातृकत्वमात्मनो निराकरोति । तदीया चेति । कर्मविषया न कर्तृविषयेत्यर्थः । कर्त्तैव कर्मापि किं न स्यादित्याशङ्क्यैकस्यां क्रियायामेकस्यैव गुणप्रधानभावेन कर्तृकर्मतया वैरूप्यप्रसङ्गान्नैवमित्यभिप्रेत्यान्यप्रमातृकत्वे स्वयमसिद्धस्यान्यसाधकत्वानुपपत्तेरकरणस्य च निलीनतया साधकत्वासंभवात्तस्यापि सिद्धावन्यापेक्षायां तस्यापि तथात्वमित्यनवस्थामाह । प्रमातृविषयत्व इति । प्रमातुरनवस्थामभिनयत्यप्यन्य इति । उक्तामनवस्थामिच्छायामतिदिशति । एवमेवेति । आत्मनो ऽप्रमेयत्वे हेत्वन्तरमाह । प्रमातुरिति । एतदेव स्पष्टयति । लोके हीति । इच्छाजन्मव्यवहितमिष्यमाणं भवति स्मृतिजन्मव्यवहितं स्मर्तव्यं प्रयत्नजन्मव्यवहितं च क्रियासाध्यं प्रयतितव्यं प्रमाकरणव्यापारोत्पत्तिव्यवहितं प्रमेयमिति हि लोकप्रसिद्धमित्यर्थः । सिद्ध्यतीति निष्पत्तिप्रकाशयोर्निर्देशः ॥ ५९ ॥

अन्वयमुक्त्वा व्यतिरेकमाह ।

(६०) नान्यथा, ऽवगतिः प्रमेयविषया दृष्टा, न च प्रमातुः प्रमाता स्वस्य स्वयमेव केन चिद्व्यवहितः कल्पयितुं शक्य इच्छादीनामन्यतमेनापि स्मृतिश्च स्मर्त्तव्यविषया न स्मर्तृविषया तथेच्छाया इष्टविषयत्वमेव नेच्छावद्विषयत्वं स्मर्त्रिच्छावद्विषयत्वे ह्युभयोरनवस्था पूर्ववदपरिहार्या स्याद्, ननु प्रमातृविषयावगत्यनुत्पत्तावनवगत एव प्रमाता स्यादिति चे,न्नावगन्तुरवगतेरवगन्तव्यविषयत्वादवगन्तृविषयत्वे चानवस्था पूर्ववत्स्यात् ॥

नान्ययेति । अवगतिशब्दश्च प्रकाशप्राप्त्योः साधारणः, सुषुप्तस्यापि प्रमेयसिद्धिप्रसङ्गादिति भावः । तर्हि प्रमातुरपि सिद्धिरिच्छादिजन्मव्यवहितैव भवतु, नेत्याह । न चेति । स्वयमेव प्रमाता स्वस्यैव प्रमातुरिच्छादीनामन्यतमेनापि व्यवहितं कल्पयितुं न च केन चिच्छक्य इत्यन्वयः । तत्र हेतुमाह । स्मृतिश्चेत्यादिना । स्मृतीच्छयोः स्वाश्रयविषयकत्वे बाधकमाह । स्मर्त्रिच्छावद्विषयत्वे हीति । स्मर्त्ता च इच्छावांश्च स्मर्त्रिच्छावन्तौ स्मर्त्रिच्छाविषयौ ययोस्तयोर्भावः स्मर्त्रिच्छावद्विषयत्वं तस्मिन्निति विग्रहः उभयोः स्मृतीच्छयोरित्यर्थः । स्मर्तुः स्ववृत्तिव्याप्यत्वायोगात्स्मर्त्रन्तरस्मृतिविषयता वक्तव्या तथा चैकस्मिन्नात्मनि स्मर्त्रितराभ्युपगमे तस्यापि पूर्वसमानयोगक्षेमतया स्मृत्यनवस्था स्यादित्यर्थः । तुल्यमिच्छायाः प्रयत्नस्येति च द्रष्टव्यं, तदेवमात्मनि न प्रमाणव्यापारापेक्षा प्रमातुः स्वविषयप्रमाणक्रियाश्रयत्वायोगात्प्रमात्रन्तरकल्पनायामनवस्थानादप्रमेय एवात्मा सिध्यति, तस्य च बाह्यविषयावच्छेदाय प्रमाणव्यापारापेक्षासंभवाच्च तद्वैयर्थ्यमिति चोक्त्यावगतेः स्वतो नित्यत्वं साधितमिदानीं प्रकारान्तरेण तदेव साधयितुं पूर्वपक्षयति । प्रमातृविषयेति । यद्विषया ऽवगतिरुत्पद्यते सो ऽवगतः सिद्ध इति चोच्यते प्रमातुश्चावगत्यनुत्पत्तौ प्रमाता सुषुप्त एव सदा स्यादित्यर्थः । तत्र किं सुषुप्तसाम्यपरिहारायात्मनो ऽवगतिविषयत्वं वक्तव्यमित्यभिप्रायः किं वा सुषुप्तसाम्यपरिहारमात्रं वक्तव्यमिति तत्र नाद्य इत्याह । नावगन्तुरिति । अवगन्तुरवगतिविषयत्वे स्वाश्रयावगतिव्याप्यत्वायोगादवगन्त्रन्तरावगतिविषयत्वं वाच्यं तथा चानवस्था पूर्ववत्स्मृतीच्छाविषयत्ववत्स्यादित्यर्थः ॥ ६० ॥

द्वितीयं प्रत्याह ।

(६१) अवगतिश्चात्मनि कूटस्थनित्यात्मज्योतिरन्यतो ऽनपेक्षैव सिद्धाग्न्यादित्याद्युष्णप्रकाशवदिति पूर्वमेव प्रसाधितमवगतेश्चैतन्यात्मज्योतिषः स्वात्मन्यनित्यत्वे आत्मनः स्वार्थतानुपपत्तिः कार्यकारणसंघातवत्संहतत्वात्पारार्थ्यं दोषवत्वं चावोचाम, कथं, चैतन्यात्मज्योतिषः स्वात्मन्यनित्यत्वे स्मृत्यादिव्यवधानात्सान्तरत्वं ततश्च तस्य चैतन्यज्योतिषः प्रागुत्पत्तेः प्रध्वंसाच्चोर्ध्वमात्मन्येवाभावाच्चक्षुरादीनामिव संहतत्वात्पारार्थ्यं स्याद्यदा च तदुत्पन्नमात्मनि विद्यते न तदात्मनः स्वार्थत्वं तद्भावाभावापेक्षा ह्यात्मानात्मनोः स्वार्थत्वपरार्थत्वसिद्धिस्तस्मादात्मनो ऽन्यनिरपेक्षमेव नित्यचैतन्यज्योतिष्ट्वं सिद्धम् ॥

अवगतिश्चेति । "अत्रायं पुरुषः स्वयंज्योतिरात्मैवास्य ज्योतिरेषो ऽस्य परमो लोको न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते,, इत्यादिश्रुतेरात्मनो नित्यप्रकाशस्वभावत्वावगमादग्न्युष्णप्रकाशवदलुप्तावगतिरूपे ऽवगत्युत्पत्त्यपेक्षाभावाच्च सुषुप्ततुल्यता तस्येति भावः । विपक्षे चोक्तं दोषं स्मारयत्यवगतेश्चैतन्यात्मज्योतिष इति । उक्तामेवानुपपत्तिं प्रश्नपूर्वकमुपन्यस्यति । कथमित्यादिना । स्मृत्यादेः स्मृतीच्छादिरूपाव्यवधानाद्विच्छेदाच्चैतन्यज्योतिषः सान्तरत्वमिच्छादिवृत्त्यन्तरपूर्वकत्वमित्यर्थः । किं तत्र स्यात्तदाह । ततश्चेति । आत्मा यद्यागन्तुकचित्प्रकाशविषयः स्यात्तदा संहतः परार्थश्च स्यादिन्द्रियान्तःकरणप्राणादिवदिति फलितमाह । यदा चेति । चैतन्यज्योतिस्तच्छब्दार्थः । यदा चात्मनि तदुत्पन्नं विद्यते तदा नैवात्मनः स्वार्थत्वं संभवतीत्यन्वयः । तत्र हेतुमाह । तद्भावेति । तस्य संहतत्वस्य भावाभावौ तदपेक्षा हीति योजना । आगन्तुकचित्प्रकाशगम्यस्यानात्मत्वनियमात्तस्य च पारार्थ्यात्तद्विलक्षण आत्मा नित्यचैतन्यस्वरूप एव सन् सदैवावभासते इत्युपसंहरति । तस्मादिति ॥ ६१ ॥

इदानीं नित्यचैतन्यस्वरूपत्वे प्रमातृत्वानुपपत्तिं शङ्कते ।

(६२) नन्वेवं सत्यसति प्रमाश्रयत्वे कथं प्रमातुः प्रमातृत्वमुच्यते, प्रमाया नित्यत्वे ऽनित्यत्वे च रूपविशेषाभावादवगतिर्हि प्रमा तस्याः स्मृतीच्छादिपूर्विकाया अनित्यायाः कूटस्थनित्याया वा न स्वरूपविशेषो विद्यते, यथा धात्वर्थस्य तिष्ठत्यादेः फलस्य गत्यादिपूर्वकस्यानित्यस्यापूर्वस्य नित्यस्य वा रूपविशेषो नास्तीति तुल्यो व्यपदेशो दृष्टस्तिष्ठन्ति मनुष्यास्तिष्ठन्ति पर्वता इत्यादि, तथा नित्यावगतिस्वरूपे ऽपि प्रमातरि प्रमातृत्वव्यपदेशो न विरुध्यते फलसामान्यादिति, अत्राह शिष्यो, नित्या-

वगतिस्वरूपस्यात्मनो ऽविक्रियत्वात्कार्यकरणैरसंहत्य तक्षादीनामिव वास्यादिभिः कर्तृत्वं नोपपद्यते, असंहतस्वभावस्य च कार्यकारणोपादाने अनवस्था प्रसज्यते ॥

नन्विति । जन्यप्रमाश्रयत्वाभावे ऽपि प्रमातृत्वव्यपदेश उपपद्यते इति परिहरति । उच्यते इत्यादिना । रूपविशेषः स्वरूपविशेषः । संग्रहं विवृणोति । अवगतिर्हीति । तत्र दृष्टान्तमाह । यथेति । तिष्ठतिर्ह्यचलत्वे ऽर्थे प्रयुज्यते तत्र किं चिद्गतिपूर्वकमेवाचलं भवति यथा जङ्गमजातं किं चित्त्वचलमेव सदा यथा स्थावरजातमुभयत्र तिष्ठतिव्यपदेशे न कश्चिद्विशेषो ऽवगम्यते तथा प्रमातेति नित्यप्रमाश्रयत्वे ऽपि व्यपदेशो न विरुध्यत इत्यर्थः । फलसामान्यादिति । फलस्वरूपे प्रमायां विशेषाभावादित्यर्थः । अयमाशयः । प्रमाणफलं हि प्रमा, सा च चित्प्रकाशरूपा प्रमातृगतैव वक्तव्या, अन्यथा विषयगतत्वे मयेदं विदितमिति स्वात्मनि ज्ञानज्ञेयसंबन्धानुभवानुपपत्तेः । जडस्य चान्तःकरणादेर्व्यापाराश्रयत्वे ऽपि चिदाश्रयत्वायोगात् प्रमात्वानुपपत्तेः, चिदात्मनस्तु कूटस्थत्वाद्व्यापारवत्त्वायोगात्प्रमां प्रति कर्तृत्वानुपपत्तेः, मुख्यया वृत्त्या जडाजडयोरुभयोरपि प्रमातृत्वव्यपदेशायोग्यत्वात्परस्पराध्यासेन व्यवहारप्रवृत्तेर्मिथ्यैवात्मनो बाह्यविषये ऽपि प्रमातृत्वमिति स्थितौ स्वात्मनि स्वयंप्रकाशस्वभावे कुतः प्रमातृत्वशङ्कावकाशः कुतस्तरामनवभासप्रसङ्गः कुतस्तमां च प्रमाणापेक्षेति । एवं कूटस्थनित्यचैतन्यज्योतिषो ऽन्तःकरणोपाधिसंबन्धप्राप्तमौपाधिकं प्रमातृत्वमुपपाद्येदानीं कर्तृत्वमपि तथैवेति प्रतिपादयितुं चोद्यमुद्भावयत्यत्राहेति । तक्षादीनामिवेति व्यतिरेकदृष्टान्तः, तक्षा काष्ठवर्द्धकः, वासी तदायुधविशेषः, कस्माचोपपद्यत इत्यत आहासंहतस्वभावस्येति ॥ ६२ ॥

---

## ॥ श्रीगणेशाय नमः ॥

॥ अथ वृषभानुजानामनाटिकाप्रस्तावः ॥

विगलितविषयान्तरं हृदन्तः-
परिगतमम्बुदमञ्चितं तडिद्भिः ।
अविरतममृतानि वर्षयन्तं
सकलजनोदयकारिणं श्रयेऽहम् ॥ १ ॥

अथेदानीमहमेषु दिवसेषु सत्कविविरचितानां सहृदयहृदयाह्लादकानां विरलप्रचाराणां निबन्धानां प्रचुरतरं प्रचिचारयिषयानुदिनं तादृङ्निबन्धान्वेषणैकप्रवणमना निश्चितधियां विपश्चितां नितान्तं चेतोविनोदसमर्थामष्टादशविधोपरूपकेषु प्रथमतामुपगतां कदाचिदप्यनवलोकितचरीमश्रुतचरीमनन्यसदृशीं सत्कविसारस्वतद्विजाग्र्यश्रीमल्लक्ष्मीनारायणाभिधप्रियसुहृदा सुप्रयत्य सुधामिवाम्बुधिमध्यादाविर्भावितां वृषभानुजानामिकां सन्नाटिकामुपलभ्य नैकविबुधजनास्वाद्यमानविविधविद्यासुधारसे श्रीमति काशीविद्यासुधानिधौ युक्तयोगां विशेषेणाकलय्यान्तर्वर्तिप्राकृतभाषोद्धारभूताभिः सुटिप्पणीभिर्विभूषितां विधायैकामपि प्रायोऽतिविशुद्धतया पुस्तकान्तरनिरपेक्षामादितः सम्यगवलोक्य शोधनादिना सुजातां विरचय्य काशीविद्यासुधानिधौ रसिकजननयनपथमुपनेतुं प्रकाशयितुमीहे ।

इयं च चतुरङ्किका, नायको ऽत्र निखिलनृपतिमाननीयो नायकप्रकरशेखररत्नभूतो ऽद्भुतप्रभावो भगवान् नन्दनन्दनः, नायिका च सकलनायिकाचूडामणिरननुभूतोपयमना कन्यारत्नं श्रीमद्वृषभानुनामधेयव्रजमण्डलनृपतितनया नवानुरागा राधिकाभिधाना, इति नाटिकालक्षणं साहित्यदर्पणोक्तं सम्यगन्वेति, तद्यथा,

"अथोपरूपकाणि, तत्र,

नाटिका क्लृप्तवृत्ता स्यात् स्त्रीप्राया चतुरङ्किका ।
प्रख्यातो धीरललितस्तत्र स्यान्नायको नृपः ॥
स्यादन्तःपुरसंबद्धा संगीतव्यापृताथवा ।
नवानुरागा कन्यात्र नायिका नृपवंशजा" ॥

इति ।

अथच रुचिरतरनामधेया नाटिकेयं गङ्गायमुनातीरान्तरालवर्तिमध्यदेशशेखरीभूतसुवर्णशेखरनामकनगरसमवाप्तजन्मना कायस्थकुलावतंसेन मथुरादासाभिधानेन सत्कविना स्वयं निरमायि, इदं चातीव विदुषां मनःसु चमत्कृतिविततिविभवविधायि, यत् श्रीमन्नृपवरसकलविद्याविनोदैकरसिकगुणिगणसंमानैकनिदानसत्कीर्तिविराजमानभोजराजराज्यादनन्तरमपि जात्यन्तरेष्वपि ग्रन्थाकारा आसन्निति ।

तथास्य सुवर्णशेखरनामनगरस्य संप्रति कथमपि चिह्नानामनुपलक्ष्यमाणतया नाममात्रावशेषस्यातिप्राचीनकालिकतयानुमीयमानस्यावकलनादेवात्रोपलब्धजनुषः प्रोक्तचराभिधानस्य कायस्थान्वयशिरोमणेरतिप्राचीनत्वमवसीयते, अत एव च समयसहस्ररश्मिनिपीतप्रचारसुधारसाया अस्या नाटिकाया अपि प्राचीनत्वमवगम्यत एव ।

अथ चेयं विविधविद्वज्जनदृग्गोचरीभूय स्वप्रचारातिशयेनाधिगतजननसाफल्या परमां मुदमादधातु विद्वज्जनानामित्यायासो ममापि निष्पन्नपातलेशमखिलजनानुकम्पनपरपरमेश्वरकृपया सफलीभवेदित्यनवरतमीश्वरमाशंस इति शिवम् ।

॥ सांख्यशास्त्राध्यापको वेचनरामशर्मा ॥

## ॥ श्रीराधावल्लभो जयति ॥

॥ अथ वृषभानुजा नाम नाटिका ॥

कपोले पत्रालीं पुलकिनि विधातुं व्यवसितः
स्वयं श्रीराधायाः करकलितवर्तिर्मधुरिपुः ।
अभूद्वक्रैन्दौ यन्निहितनयनः कम्पितभुज-
स्तदेतत् सामर्थ्यं तदभिनवरूपस्य जयति ॥ १ ॥

अपिच,

सुधाधाम्नः कान्तिस्तव वदनपङ्केरुहगुणै-
र्जितेव म्लानत्वं व्रजति सहसा प्राणदयिते ।
वदत्येवं कान्ते दिवसविरहातङ्कचकिता
तदङ्के संलग्ना तव दिशतु राधा प्रियशतम् ॥ २ ॥

अपिच,

वामांसस्थलचुम्बिकुण्डलरुचा जातोत्तरीयच्छविं
वंशीगीतिभवत्त्रिभङ्गवपुषं भ्रूलास्यलीलापरम् ।
किंचित्स्रस्तशिखण्डशेखरमतिस्निग्धालिनीलालकं
राधादिप्रमदाशतावृतमहं वन्दे किशोराकृतिम् ॥ ३ ॥

अपिच,

नीलाम्भोरुहकोशकोमलतनुं स्मेराननं मालिनं
सुस्निग्धं दधतं दुकूलयुगलं वाग्वैभवस्यास्पदम् ।
स्वीयानामुदितामृतेन हृदयं संतर्पयन्तं सदा
राधाकेलिकथासु संततरतं ध्यायामि कृष्णाभिधम् ॥ ४ ॥

नान्द्यन्ते[1] सूत्रधारः । अलमतिव्याहृतेन, अद्य खलु वल्लवविलासिनीभिर्विनिद्रारविन्दवदनाभिः पद्मिनीभिरिव विलोभ्यमानमानसहंसस्य श्रीमद्वृषभानुनन्दिनीपादपद्मरजोरञ्जितोपान्तेन मयूरमुकुटेनालंकृतमौलेरुन्मदकलहंसकामिनीकुलकोलाहलेन पुलिनवलयेन मुखरमेखलया परिगतनितम्बबिम्बेनेव विराजितायास्तपनतनयायास्तीरान्तचलितलतामण्डपेषु समारब्धकन्दर्पकेलिकलाकलापस्य यशोदानन्दयोर्नयनानन्दजननस्य त्रिभुवनविलोभनीयाभिनवकिशोरवयसः श्रीराधामोहनस्य वृन्दारण्यान्तर्गतानां विहारवनस्थलीनामवलोकनसुखमनुभवितुमनेकदेशान्तरादुपस्थितेन साधुजनवृन्देन समाहूय सादरमभिहितोऽस्मि । यथा,

अस्मत्प्रियसुहृदातिप्रबलया भगवद्भक्त्या कायस्थकुलावतंसतामुपगतेन जह्नुकन्यकाकालिन्दीतीरावलग्नमध्यदेशशिरःशेखरीभूते सुवर्णशेखरनाम्नि नगरे समवाप्तपरार्धजन्मना श्रीमथुरादासेन या विरचिता विदग्धजनहृदयकुमुदानन्दैककौमुदी वृषभानुजा नामापूर्वनाटिका सा भवताभिनेतव्या, यावन्नेपथ्यविधानं रचयित्वा यथासमीहितं समाचरामि । परितोऽवलोक्य । सानन्दम् । अये सुहृद्भूयिष्ठेयं परिषत् कौतुकापहृतचित्तवृत्तिर्लक्ष्यते, तदुपतिष्ठे ।

अञ्जलिं बद्ध्वा । भो व्रजेन्द्रनन्दनलीलामृतरसाविष्टचित्तचञ्चरीकाः क्षणं दत्तावधाना भवत, सोऽहं रङ्गतरङ्गनामधेयो नटस्तेन कविना कृतामभ्यर्थनामुदाहर्तुंकामः ।

प्रणिपत्य ।

प्रयोगबन्धः सरसः कवीनां
दृष्टो भवद्भिर्बहुशः सुकान्तः ।
गुणेन शून्योऽपि मम प्रबन्धः
कृष्णप्रसङ्गादवलोकनीयः ॥ ५ ॥

सर्वतो निर्वर्ण्य । सशङ्कम् । ननु तद्धर्मानभिज्ञः कश्चिदिह न भवेत् । विचिन्त्य, भवतु,

ये वाञ्छन्ति भवच्छिदच्छमतयो ज्ञानं परं मुक्तये
ते सायुज्यपदं व्रजन्ति सुतरां श्रान्ताः स्वविस्मारकम् ।
ये वैकुण्ठपतेश्च वासवसतौ स्निग्धाः स तैः सेव्यता-
मेते तत्सुहृदो जयन्ति रसिका राधाधवाराधने ॥ ६ ॥

तदिदानीं गृहं गत्वा जायामाहूय रङ्गमङ्गलानि संपादयामि । परिक्रम्य । नेपथ्याभिमुखमवलोक्य च । आर्ये इतस्तावत् ।

प्रविश्य नटी । अज्जउत्त इअ म्हि, आणवेदु अज्जो, को णिओओ अणुचिट्ठीअदु त्ति[1] ।

सूत्रधारः । आर्ये वृषभानुजाप्रयोगाभिनयविलोकनाय कुतूहलिनः पारिषदाः, हृतहृदयोऽस्मि सहजसुहृदामेतेषां प्रीतिप्रकर्षेण प्रेमपुरःसरेण च सततमेवंप्रायेणालापेन,

कदा वृन्दारण्ये नवघननिभं नन्दतनयं
परीतं गोपीभिः क्षणरुचिमनोज्ञाभिरभितः ।
गमिष्यामस्तोषं नयनविषयीकृत्य कृतिनो
वयं प्रेमोद्रेकस्खलितगतयो वेपथुभृतः ॥ ७ ॥

---

[1] इयं च पद्यपादान् पदानि मत्वाभिनवगुप्ताचार्यमते चतुरस्रतालानुगता षोडशपदा नान्दी सिध्यति, यतः,

" देवद्विजनृपादीनामाशीर्वचनपूर्विका ।
नन्दन्त्यस्यां सुरा यस्मात् तस्मान्नान्दीति कीर्त्यते ॥
सूत्रधारः पठेन्नान्दीं मध्यमं स्वरमाश्रितः ।
नान्दी पदैर्द्वादशभिरष्टभिर्वाप्यलंकृता ॥ "

इति भरतवचनव्याख्यावसरे " अनेन त्र्यस्रतालानुगता त्रिपदा षट्पदा द्वादशपदेति, चतुरस्रतालानुगता चतुष्पदाष्टपदा षोडशपदा चेति पृथक् त्रिविधैव, नातः परमपि भूयस्त्वादादृता, पदानि श्लोकावयवभूतानि सुबन्तानि, तिङन्तानि वा, श्लोकतुरीयांशभूतानि वा, अवान्तरवाक्यरूपाणि वा, एतदभिप्रायेण नाट्यप्रदीपे,

श्लोकपादं पदं केचित् सुप्तिङन्तमथापरे ।
परेऽवान्तरवाक्यं च पदमाहुर्मनीषिणः ॥ "

इत्यादिना ग्रन्थेनाभिनवगुप्ताचार्येण तथाभिधानात् ।

[1] आर्यपुत्र इयमस्मि, आज्ञापयत्वार्यः, को नियोगोऽनुष्ठीयतामिति ।

तेन हि सत्वरमारभ्यतां संगीतकमहोत्सवः ।

नटी । साश्चर्यम् । अज्जउत्त देसंतरादो आअदेहिं एदेहिं सह पढमदंसणेण जेव्व कुदो दे ईरिसी पीई संवुत्ता, जं अज्ज भोअणादिअं वि ण अहिणंदसि[1] ।

सूत्रधारः । आर्ये कुत ईदृशी प्रीतिः संवृत्तेत्यलमाशङ्कितेन । यतः,

हेतुर्नैसर्गिकः कोऽपि प्रीतेर्यद्धि न वर्तते ।
मालती मधुरास्तीति मधुपः केन शिक्ष्यते ॥ ८ ॥

नेपथ्ये ।

साधु भरताधिराज साधु, सत्यमेवैतत्, कः संशयः ।
'हेतुर्नैसर्गिकः कोऽपि, इति पठति ।

सूत्रधारः । समाकर्ण्य । नेपथ्याभिमुखमवलोक्य च । आर्ये किमत्र कालातिपातेन, नन्वेष विरचितवृन्दावेषः समागत एव ममान्तेवासी मधुरप्रियः, गृहीतवनरत्तिकाभूमिकश्च सखा मे रङ्गमङ्गलः, तदावामपि गत्वा रङ्गप्रवेशाय संनद्धौ भवावः । इति निष्क्रान्तौ । प्रस्तावना ।

ततः प्रविशति यथा निर्दिष्टा वृन्दा वनरत्तिका च,

वृन्दा । सत्यमेवैतत्, कः संशयः । 'हेतुर्नैसर्गिकः कोऽपि, इति पुनः पठति, अन्यथा राधाकृष्णयोः कुमुदिनीकुमुदबान्धवयोरिव कथं तादृशी प्रीतिः ।

क्षणं विमृश्य । सखि वनरत्तिके मयाप्यस्मिन् व्यतिकरे किंचिदिव साधु विहितम् ।

वनरत्तिका । आवेदेदु भअवदी कधं विअ[2] ।

वृन्दा । सखि समाकर्ण्यताम्, गता यदृच्छयाहं वृषभानुगोपनिकेतनम्, तत्तनयां राधां सुमृष्टमणिकुट्टिमे प्राङ्गणैकप्रदेशे कन्यकासहस्रमध्यवर्तिनीं कुमारीभावोचितानेकलीलारसमनुभवन्तीं परिस्फुरन्त्या निजाङ्गकान्त्या काञ्चनमयीमिव कुर्वतीं स्वपरिसरभुवं विदूरादेवावलोक्य मनसि कृतवत्यस्मि ।

वनरत्तिका । तदो तदो[3] ।

वृन्दा । इयं हि,

आत्मानुरूपरमणीयगुणेन तन्वी
सौदामिनीव रुचिरेण नवाम्बुदेन ।
नन्दात्मजेन सह येन लभेत योगं
यत्नः स एव निपुणोऽत्र मया विधेयः ॥ ९ ॥

[1] आर्यपुत्र देशान्तरादागतैरेतैः सह प्रथमदर्शनेनैव कुतस्त ईदृशी प्रीतिः संवृत्ता, यदद्य भोजनादिकमपि नाभिनन्दसि ।

[2] आवेदयतु भगवती कथमिव ।

[3] ततस्ततः ।

वनरत्तिका । भअवदि तुह मुहचन्दादो विणिग्गदं इमं राहामोहणमिहुणस्स अण्णोण्णव्वइअरकधासुधारसं सुदिसुत्तिआएहिं समापिबन्तिं आमूलादो आकण्णेदुं तुवरेदि मं तुवाणुराअजणिदो मणोरहो[1] ।

वृन्दा ।

अत्रान्तरे स वृषभानुरुपाजगाम
श्रुत्वा ममागमनमाशु तयानुयातः ।
वत्से समानय करौ सबहुप्रणामं
तामित्यभाषत ततश्च मया स उक्तः ॥ १० ॥

महाभाग किमायासयसि महानुभावामिमाम् । यतः,

इयमतिललिताङ्गी रोचिषामग्र्यभूमिः
कुसुमशरजयश्रीरूपसीमान्तलेखा ।
समगुणवरयोगात् प्रेमपात्रीभवित्री
व्रजपतिरिव कृष्णं पालय त्वं तदेनाम् ॥ ११ ॥

वनरत्तिका । भअवदि सा महाणुभावा राहिआ एदं आकण्णिअ तदो कीरिसी संवुत्ता[2] ।

वृन्दा । मुग्धतया स्नेहरसानभिज्ञापि सा मदभिहितमुपश्रुत्य मुहुः श्रुतिपरिसरं प्रियवचनमाकर्णयितुमिवोपगतेन तिर्यगपाङ्गेन चक्षुषा मामवलोकयन्ती तत्कालोपजातलज्जयेव किंचिदवनतमुखी स्थिता ।

वनरत्तिका । अध गोउलेंदणंदणस्स वि अणुराओ केण विहिणा समुल्लासिदो भअवदीए[3] ।

वृन्दा । सखि श्रूयताम्, तदाहमिति चिन्तितवती, यदेनां महाभागां स्पृशतीव लज्जादिभावः, कृतकृत्याहं संप्रति गोकुलं गत्वा वल्लवेन्द्रनन्दनस्यापि कर्णपथमुपनयाम्यप्रतिममाधुरीं दधानं राधाभिधानं केनचित् प्रसङ्गेन ।

वनरत्तिका । तदो तदो[4] ।

वृन्दा । ततो मुहूर्तादिव गोकुलमुपगत्य कलरुतैरुन्मत्तमधुकरकुलैरभ्यर्थ्यमानमकरन्दस्योपवनसहकारस्य वेदिकायां क्षणं स्थिता सविस्मयं तस्य प्रदेशस्य रमणीयतां निरूपितवत्यस्मि ।

तथाहि,

[1] भगवति तव मुखचन्द्राद्विनिर्गतमिमं राधामोहनमिथुनस्यान्योन्यव्यतिकरकथासुधारसं श्रुतिशुक्तिकाभ्यां समापिबन्तीमामूलादाकर्णयितुं त्वरयति मां तवानुरागजनितो मनोरथः ।

[2] भगवति सा महानुभावा राधिकैतदाकर्ण्य तदा कीदृशी संवृत्ता ।

[3] अथ गोकुलेन्द्रनन्दनस्याप्यनुरागः केन विधिना समुल्लासितो भगवत्या ।

[4] ततस्ततः ।

प्रतानैर्दूर्वाणां क्वचिदमलनीलोपलरुचं
क्वचित् सद्यः सूतैस्तरुकिसलयैर्विद्रुमरुचिम् ।
क्वचिन्मुक्ताकान्तिं सितमुकुलकैर्यत्परिसरे
हरत्येषा भूमिर्नयनसुभगं गोकुलमिदम् ॥ १२ ॥

अपिच,

यस्योपान्ते तपनतनयातीरमासाद्य वत्सा
वीताशङ्कैः सह खगमृगैर्मन्दमन्दं चरन्ति ।
गोशालानां ततिभिरभितः कल्पितानां किलोच्चैः
प्राकारस्य श्रियमविरलां यच्च कामं बिभर्ति ॥ १३ ॥

धन्यास्ते खलु ये ऽत्र सततं नन्दसूनोर्मुखपङ्कजमापिबन्तो निवसन्ति ।

वनरक्षिका । तदो तदो[1] ।

वृन्दा । एवमादिकं चिन्तयन्त्यामेव मयि परिजनादुपलभ्य मदागमनं गोपाधिपतिर्नन्दः सत्वरमुपागतः । सबहुमानं च मामितस्ततः संचरद्युवतिजनसहस्रमणिनूपुररवाहूतानां गृहदीर्घिकाकलहंससारसानां निनादैर्मनोहरं प्रस्फुरत्पताकाकोटिविलिखितनभस्तलाभिरायामिनीभिरुच्चैर्मणिस्तम्भसहस्रमुद्वहन्तीभिरतितुङ्गशालाभिरभिभूषितं देहलीवलयविनिर्मितनीलरत्नकिरणान् प्रमृष्टमणिकुट्टिमे प्राङ्गणे निपतितान् प्रत्ययदूर्वाप्रतानशङ्कया सलीलमालिहद्भिश्चटुलबालवत्सशतैः समुपशोभितं कैश्चिद्रत्नभित्तिषु संक्रान्तात्मप्रतिबिम्बकान्युद्वीक्ष्योद्वीक्ष्य कदाचित् समालिङ्गितुमायासितबाहुभिः कदाचिदन्तःशून्यं मुधामुकुलीकृताङ्गुलिदलं करकमलकं गृह्यतामेतदिति संज्ञया प्रहितमनन्तरमाकृष्योपहसद्भिः कदाचित् स्वयमुपरचितमुखभङ्गिविकारतयात्मानं विडम्ब्यमानमधिगम्य समुपजाताभिषङ्गमङ्गुल्या तर्जयद्भिः कदाचिच्च रत्नमालिकालंकृतानि संभाव्य ससंभ्रमं निजकण्ठदेशं स्पृशद्भिः कैश्चिदनुसृतभवनमृगशावकैः कैश्चिन्मुक्ताफलशकलप्रदानानन्दितकलहंसपोतकैः कैश्चिद्वनचरोपनीतदाडिमीफलप्रणयिभिरनेकलीलामनोहारिभिर्गोपकुमारकैर्विराजितं समुन्नतस्तनतटप्रेङ्खोलितस्थूलमुक्ताफलदामभिः प्रचलत्कनकवलयानुविद्धविविधरत्नोन्मुखमयूखैर्नखत्विषा विभिन्नैर्व्योमाभोगं सेन्द्रायुधमिव कुर्वतीभिः सरसान्दोलनसंक्षोभोत्सर्पितैर्बिन्दुविसरैर्दुर्दिनतामिवोत्पादयन्तीभिर्गोपवधूभिर्निर्मथ्यमानदधिसमुज्जृम्भितेन तासां च जघनतटास्फालनरणितमणिकिङ्किणीझङ्काररवपीवरेण मङ्गलगीतिस्निग्धगम्भीरसप्रस्वरोपबृंहितेन वियद्व्यापिना निर्घोषेण जलदसंपदमुत्प्रेक्ष्य ससंभ्रममुन्मुक्तकेकानां कलापिकदम्बकानां प्रमोदनर्तितैरलंकृतमनेकशुकसारिकाभिरुद्घुष्यमाणकृष्णाद्भुतचरित्रमेकदेशविनिहितैरनेकरसपूर्णैः सुवर्णरजतादिभाजनसहस्रैरुद्भासितमेकदेशे च मनोहारिणा क्रीडापर्वतकेन विराजमानमेकदेशे च हुताशनमुपर्युपरि स्थापिताभिः पयःपरिपूरितपात्रपङ्क्तिभिर्दिवसे ऽपि भुवि विस्फूर्जिततारकावलीभिरिव संशोभमानं सर्वसिद्धीनामुत्पत्तिस्थानभूतं स्वभवनं नीतवान् ।

1 ततस्ततः ।

वनरक्षिका । स्वगतम् । अहो ससिरिअत्तणं णन्दगेहस्स, अहवा सअललोअणिवासो भअवं वासुदेवो सयं जत्थ पडिवसइ तत्थ किं अच्चरिअं[1] । प्रकाशम् । तदो तदो[2] ।

वृन्दा । तस्यैवंविधस्याङ्गणमध्यभागे ऽशेषभुवनश्रियः प्रासादस्येव पारिजातस्याधस्तादलंकृतपद्मरागवेदिकां प्रस्फुरन्तीभिर्निजाभरणप्रभाभिरावृतविग्रहां वनगमनकामं सुतं प्रहर्षगर्भस्निग्धमधुरैर्वचोभिर्लालयन्तीं तत्रभवतीं यशोदाम्, इति वागसमाप्तावेव ।

वनरक्षिका । प्रेमावेशेन बाष्पपूरोपरुद्धकण्ठा कथं कथमपि । भअवदि ताए महाभाआए सिणिद्धमहुरवअणस्सवणत्थं सवणाइं मे आउलाइं होन्ति, ता वण्णेदु भअवदी[3] ।

वृन्दा । तद्यथा,

त्वन्मुखाम्बुजविलोकनं विना
नो मुहूर्तमपि नेतुमुत्सहे ।
त्वां कथं हि विपिने ऽनुवासरं
प्रेष्य तात बत धारयाम्यसून् ॥ १४ ॥

वनरक्षिका । सविस्मयमात्मगतम् । हन्त पआसिदो एत्थ महं पेम्मसंवलिदवच्छलरसो[4] । प्रकाशम् । तदो तदो[5] ।

वृन्दा । विलोक्य । भक्तिप्रवणेन मनसा प्रणामं गतवत्यस्मि ।

वनरक्षिका । तदो केण प्पसंगेण समक्खं पिदिरीणं कण्हस्स कण्णावदंसीकिदं राहाअभिधाणत्तबअं भअवदीए[6] ।

वृन्दा । ततश्च समुचितातिथिसत्कारसंभारैरुपकल्पितोपचारां मां व्रजेश्वरः सप्रश्रयं 'कच्चित् कमुद्दिश्यमनुगृह्येहागमनं भगवत्याः', इत्यपृच्छत्, ततश्चावनतकन्धराहं तदा तं प्रति भग-

1 अहो सश्रीकत्वं नन्दगेहस्य, अथवा सकललोकनिवासो भगवान् वासुदेवः स्वयं यत्र प्रतिवसति तत्र किमाश्चर्यम् ।

2 ततस्ततः ।

3 भगवति तस्या महाभागायाः स्निग्धमधुरवचनश्रवणार्थं श्रवणौ मे आकुलौ भवतः, तद्वर्णयतु भगवती ।

4 हन्त प्रकाशितो ऽत्र महान् प्रेमसंवलितवत्सलरसः ।

5 ततस्ततः ।

6 तदा केन प्रसङ्गेन समक्षं पित्रोः कृष्णस्य कर्णावतंसीकृतं राधाभिधानस्तबकं भगवत्या ।

वनस्मिन् व्रजमण्डले कौतुकेन संचरमाणाहं राधाभिधां वृषभानुगोपतनयामतिशयशीलरूपसंपन्नां सर्वलक्षणोपेततयातिधीरप्रकृतितया च विडम्बयन्तीमिव श्रियं विलोक्य रूपमाधुर्यवयःसदृशतया तव सूनुं स्मरन्ती समुपजाततद्दर्शनकुतूहलायाता, इत्यवदम् ।

वनरक्षिका । तदो तदो[1] ।

वृन्दा । अस्मिंश्चान्तरे समुदपादि महान् कलकलः, तमाकर्ण्येति चिन्तितं मया, यदेष आपूर्यमाणशङ्खसहस्रवापूरितदिक्चक्रवालं समभिहन्यमानभेरीमृदङ्गकाहलानकमन्द्रमाङ्गलिकनिध्वानमधुरमिदमाग्रहतामिदमानीयतामित एवागम्यतामेवंप्रायैर्गोपकुमाराणां ससंभ्रमालापैर्मुखरितरथ्यामुखं समुल्लसति कोलाहलः, तत् तर्कयामि, वनमभि प्रस्थितः कृष्णः ।

वनरक्षिका । तदो तदो[2] ।

वृन्दा । तदा च परिक्रम्यावलोक्य, तं निर्व्याजसुन्दरं मनस्येवं विचारितवत्यस्मि ।

> भूषाविभूषणमपि स्फुरदङ्गकान्त्या
> मङ्गल्यमेतदिति यं जननी यशोदा ।
> प्रायः प्रसाधितवती ननु दीप्तिबुद्ध्या
> सोऽयं सुहृत्परिवृतः समुपैति कृष्णः ॥ १५ ॥

वनरक्षिका । सप्रेमातिशयं तत्पादयोः पतति ।

वृन्दा । पादावाक्षिप्य । सखि इदानीं गत्वा कार्यान्तरमनुतिष्ठावः ।

इति निष्क्रान्ते । विष्कम्भकः ।

ततः प्रविशति श्रीकृष्णः प्रियालापश्च ।

कृष्णः । स्वगतम् । हन्त यस्या अभिधानमात्राकर्णनादेवाकुलीभूतं चेतः परवशतामुपैति, दुर्लभदर्शनां तामनालोक्य कथमात्मानं विनोदयिष्ये तावत्, भवत्वेवम् । प्रकाशम् । सखे प्रियालाप,

प्रियालापः । आणवेदु भवं[3] ।

कृष्णः ।

> संरुद्धा न भवेदियं समुदितैर्यावत् सुहृन्मण्डलैर्
> वृन्दारण्यविहारभूमिरभितस्तावत् पुरस्ताद्वयम् ।
> वीक्ष्यैनां सफलप्रसूनसुभगां भृङ्गाङ्गनानिःस्वनां
> नृत्यासक्तशिखण्डिमण्डिततरुं तृप्तिं व्रजामो मुदा ॥१६॥

प्रियालापः । साहु भणिदं पिअवअस्सेण अण्णो वि को वि अधिअदररमणिज्जो कोदुअविसेसो तस्सिं पदेसे संभावीअदि त्ति[1] ।

कृष्णः । साभिलाषम् । क इव ।

प्रियालापः । सुदं क्खु मए, एदेसु महुवासरेसु विसहाणुपुरादो भाणुणंदिणीमज्जणव्ववदेसेण मअणमहूसवं माणेदुं पभादे पभादे राहापमुहो कुमारिआअणो वुंदाडईणिउंजवीहिआसंणिवेसं आअच्छदि[2] ।

कृष्णः । सस्पृहम् । ततस्ततः ।

प्रियालापः । तहिं उण बालतमालविडवमूले पड़िट्ठाविदकुसुमाउहस्स णिव्वत्तिदपूआसक्कारो विविहसुउमारकुसुमेहिं अत्ताणं मण्डिअ जहासुहं लीलारसं च णिव्विसिअ अलंकरेदि सघरमग्गं[3] ।

कृष्णः । सपुलकमात्मगतम् । श्रुतं तथा तावद्भगवती वृन्दामुखादयमप्येवं वदति, निवेदयति च निमित्तं किंचिदुच्छ्वसितेन मम बाहुः, इति सत्वरमनुसरामि ।

प्रियालापः । कृष्णं किंचिदन्यादृशमालोक्यात्मगतम् । गाढं उक्कण्ठिदो लक्खीअदि एसो, होदु एव्वं दाव[4] । प्रकाशम् । भो वअस्स कधं दाणिं मं उवेक्खिअ तुन्हीभूदो सि तुमं[5] ।

कृष्णः । किमपि चिन्तयता मया न संभावितोऽसि ।

प्रियालापः । विहस्य । सुदिमग्गेण हिअए पविट्ठं विसहाणुकुमारिअं जेव्व किं ण भणासि[6] ।

कृष्णः । स्वगतम् । लक्षितोऽस्मि धूर्तेन बटुना । स्मित्वा । प्रकाशम् । तदविलम्बेनैवादेशय वृन्दाटवीमार्गम्,

प्रियालापः । परिक्रम्य । एदु एदु पिअवअस्सो एदं क्खु णादिदूरे रमणिज्जं वुंदावणं[7] ।

कृष्णः । परिक्रामन् पुरोऽवलोक्य । सहर्षम् । अहो अभिरामता वृन्दारण्यस्य, वयस्य पश्य पश्य,

---

[1] ततस्ततः ।

[2] ततस्ततः ।

[3] आज्ञापयतु भवान् ।

[1] साधु भणितं प्रियवयस्येन, अन्योऽपि कोऽप्यधिकतररमणीयः कौतुकविशेषस्तस्मिन् प्रदेशे संभाव्यत इति ।

[2] श्रुतं खलु मया, एतेषु मधुवासरेषु वृषभानुपुराद्भानुनन्दिनीमज्जनव्यपदेशेन मदनमहोत्सवं मानयितुं प्रभाते प्रभाते राधाप्रमुखः कुमारिकाजनो वृन्दाटवीनिकुञ्जवीथिकासंनिवेशमागच्छति ।

[3] तत्र पुनर्बालतमालविटपमूले प्रतिष्ठापितकुसुमायुधस्य निर्वर्तितपूजासत्कारो विविधसुकुमारकुसुमैरात्मानं मण्डयित्वा यथासुखं लीलारसं च निर्विश्यालंकरोति स्वगृहमार्गम् ।

[4] गाढमुत्कण्ठितो लक्ष्यत एषः, भवत्वेवं तावत् ।

[5] भो वयस्य कथमिदानीं मामुपेक्ष्य तूष्णीं भूतस्त्वम् ।

[6] श्रुतिमार्गेण हृदये प्रविष्टां वृषभानुकुमारिकामेव किं न भणसि ।

[7] आगच्छत्वागच्छतु प्रियवयस्यो नातिदूरे रमणीयं वृन्दावनम् ।

इदं मधुरगीतिभिर्मधुकराङ्गनानां सखे
कलापिकुलनर्तितैः पिककदम्बकोलाहलैः ।
लतानववधूलसत्किसलयानुरागोद्गमै-
र्ममागमनमङ्गलं परितनोति मन्ये वनम् ॥ १७ ॥

अपिच,

भृङ्गालीनयनैर्निमेषविमुखं दूरात् समालोक्य मा-
मानन्दाश्रुजलं स्रवन्ति विगलन्माध्वीकबिन्दुच्छलात् ।
आह्वानं मलयानिलप्रचलितैः शाखाग्रहस्तैश्च मे
सप्रेम प्रथयन्त्युपायनफलैर्नम्राः किलैते द्रुमाः ॥ १८ ॥

तद्वृन्दारण्यनिवासिनां मनोरथसिद्धये त्वरिततरमुपगच्छावः ।

प्रियालापः । सस्मितम् । कधं अत्तणो वि मणोरहसिद्धी फुडं ण कहीअदि [1] ।

कृष्णः । स्मित्वा । अलं परिहासेन गच्छावतः ।

प्रियालापः । नाट्येन तथा करोति ।

कृष्णः । परिक्रम्य । समन्ततो निरूप्य । सखे प्रियालाप परिश्रान्तोऽस्मि, मुहूर्तकमेतेषु मधुमासकुसुमसमृद्धिमधुपानमत्तमधुकरनिकरमधुरझङ्कारमुखरेषु मज्जदङ्गनाजनकदम्बनयनाञ्जनप्रसरसंपर्कतयातितरां श्यामायमानैः संसर्पितसीमन्तसिन्दूरप्रवाहलोहितीकृतैः स्तनतटावगलितनवकुङ्कुमपङ्कपुञ्जपिञ्जरितैरतिविमलतया प्रतिमागतैरम्बरतलोल्लसितैरिवेन्द्रायुधशतैस्तरङ्गलेखानिवहैः संशोभिते यमुनाम्भसि समुन्मिषत्कुवलयकह्लारमकरन्दबिन्दुनिकुरम्बकरम्बितानतिशिशिर - सीकरानुद्वहता लुलितपल्लवाङ्गुलिलतालास्यलीलोपदेशदक्षेण दक्षिणानिलेन संसेवितेषु लतानिकुञ्जेषु परिश्रममपनयावस्तावत् ।

प्रियालापः । अपवार्य । कुदो तस्सिं कण्णारअणे समुप्पण्णाणुराअस्स दे परिस्समावणाअणं [2] । प्रकाशम् । जं भवं आणवेदि [3] ।

उभौ परिक्रम्योपविशतः ।

नेपथ्ये, चंपअलदे उवहर कुसुमाइं [4] ।

प्रियालापः । पुरः कर्णं दत्त्वा । किंचिदिव परिवर्तितकन्धरो नातिप्रकाशम् । तुवरदु तुवरदु पिअवअस्सो, इमस्सिं माहवीमण्डवे मुद्धकण्णआणं मिदुसद्दो सुणीअदि [5] ।

---

[1] कथमात्मनोऽपि मनोरथसिद्धिः स्फुटं न कथ्यते ।

[2] कुतस्तस्मिन् कन्यारत्ने समुत्पन्नानुरागस्य ते परिश्रमापनयनम् ।

[3] यद्भवानाज्ञापयति ।

[4] चम्पकलते उपहर कुसुमानि ।

[5] त्वरयतु त्वरयतु प्रियवयस्यः, अस्मिन् माधवीमण्डपे मुग्धकन्यकानां मृदुशब्दः श्रूयते ।

कृष्णः । समुपसृत्य । लतारन्ध्रे किंचिदाकुञ्चितचक्षुः सहर्षकौतुकं स्थितो विलोकयति ।

ततः प्रविशति ससखीजना राधा ।

राधा । हला तमालिए कुसुमावचअणिमित्तं गदा मे पिअसही चंपअलदा अज्ज वि ण पडिणिउत्ता [1] ।

प्रविश्य पुष्पपूर्णपर्णपुटहस्ता सस्मिता चम्पकलता । पिअसहि राहे दिट्ठिआ वड्ढसे, कुसुमिदा दाणिं णो मणोरहलदा [2] ।

राधा । ससम्भ्रमम् । अइ केरिसो मणोरहो [3] ।

चम्पकलता । जइ कुदूहलं तदो अवहिदं सुणादु पिअसही, अज्ज णिसावसाणे दिट्ठो को वि सिविणो मए, विसुमरिदो आसि [4] ।

राधा । सकौतुकम् । तदो तदो [5] ।

चम्पकलता । संपदं कुसुमावचअकिदे परिक्कमन्तीए मए का वि सुवण्णजूहिआ तमालसंगदा पुलोइदा [6] ।

राधा । सलज्जमिव । स्मेरमुखी तमालिकां सस्नेहं विलोकयति ।

चित्तज्ञा तमालिका चम्पकलतां प्रति । सहि तदो किम् [7] ।

चम्पकलता । सरिसदंसणेण मे सिमिदिपहं आरोहिदो त्ति [8] ।

प्रियालापः । स्वगतम् । दिढं विमुद्धो क्खु एसो राहारूवलावण्णविब्भमेहिं एत्थ, भोदु एव्वं [9] ।

समीपतरमागत्योत्सर्पितमुखः साकूतम् ।

भो वअस्स चिरं इह ट्ठिदेण तुए जं एव्वं पुलोईअदि, इन्दीवरकोमलं लोअणजुअलं दे अलसत्तणं णो वअच्छदि [10] ।

कृष्णः । मुखं कथंचिद्विवर्त्याव्यक्तमिव । सखे, ब्रवीमि भूतार्थम्,

---

[1] हे तमालिके कुसुमावचयनिमित्तं गता मे प्रियसखी चम्पकलताद्यापि न प्रतिनिवृत्ता ।

[2] प्रियसखि राधे दिष्ट्या वर्धसे, कुसुमितेदानीं नो मनोरथलता ।

[3] अयि कीदृशो मनोरथः ।

[4] यदि कुतूहलं तदावहितं शृणोतु प्रियसखी, अद्य निशावसाने दृष्टः कोऽपि स्वप्नो मया, विस्मृत आसीत् ।

[5] ततस्ततः ।

[6] सांप्रतं कुसुमावचयकृते परिक्रामन्त्या मया कापि सुवर्णयूथिका तमालसंगता विलोकिता ।

[7] सखि तदा किम् ।

[8] सदृशदर्शनेन मे स्मृतिपथमारूढ इति ।

[9] दृढं विमुग्धः खल्वेष राधारूपलावण्यविभ्रमैरत्र, भवत्वेवम् ।

[10] भो वयस्य चिरमिह स्थितेन त्वया यदेवं विलोक्यते, इन्दीवरकोमलं लोचनयुगलं तेऽलसत्वं नोपगच्छति ।

गच्छति न तृप्तिमेतत् सुललितमस्याः समापिबद्रूपम् ।
नयनयुगं मम नूनं संप्रति समुपैति सफलतां चैवम् ॥१९॥

प्रियालापः । किंचिद्विवर्णतामापद्यमानं तन्मुखं निर्वर्ण्योपजातकारुण्य इवात्मगतम् । हन्त लक्खीकिदो दाणिं लद्धावसरेण कुसुमाउहेण राहारूवस्स अत्तणो अमोघप्पहरणस्स कोमलङ्गओ एसो[1] । प्रकाशम् । अध सुदं सव्वं इमाणं मंतिदं[2] ।

कृष्णः । सखे मधुरमासां मन्त्रितम्, अन्यदपि श्रोतुमिच्छामि तावत् ।

राधा । आत्मगतम् । अवि णाम वदेदि इअं तं जेव्व दुल्लहजणं मं अहिकदुअ, जो भअवदीए वुन्दाए तदो तादस्स समीवे पसङ्गेण अभिहिदो आसि[3] । दक्षिणेतराक्षिस्फुरणं नाटयित्वा । होदु पुच्छेमि दाव[4] । प्रकाशम् । कधं विअ[5] ।

चम्पकलता । मनाग्भावानुविद्धं तदाकारं विभाव्य साकूतम् । सहि फलेण जेव्व जाणिस्ससि पुणरुत्तेण किं[6] । विचिन्त्य । अहवा कधइस्सं, सुणाहि इमस्सिं जेव्व अदिमुत्तलदामण्डवपरिसरे तुमं किल कस्स वि अणुरूववल्लहस्स समीवे णवजलहरस्स विज्जुल्लदा विअ जह तमालविडवसंगदा सुवण्णजूहिआ लदा सोहमाणा सुहं कीलन्ती चिट्ठसि त्ति[7] ।

कृष्णः । आत्मागतम् । कष्टं भोः कष्टम्, मम हि,

स्वप्नेनोदीरितं सख्याः श्रुत्वा श्रुतिसुखावहम् ।
आशाबन्धेन सौत्सुक्यं किंचिदुच्छ्वसितं मनः ॥ २० ॥
तथाप्येषाभिधानेन धन्यं कमभिधास्यति ।
इति संशयमापन्नं धृतिं न प्रतिपद्यते ॥ २१ ॥

प्रियालापः । सहर्षोद्वेगमात्मगतम् । जं एदीए उदाहिदं जअ वि तं अणण्णसाहारणं पिअवअस्सस्स जेव्व सरूवं तह वि जइ से मुहादो अभिधाणं फुडं कधिदं भवे[8] । उपसृत्य । किंचित्प्रकाशम् । भो वअस्स दिट्ठिआ वड्ढसे, सुदं पिअवअस्सेण से वअणं, तक्केमि, भवं जेव्व वल्लहो त्ति[1] ।

कृष्णः । सोच्छ्वासं नीचैः ।

प्रसन्नस्ते तर्को यदपि मम चेतोऽपि नितरा
तमेवार्थं सत्यं कलयति सखेऽतीव मधुरम् ।
तथाप्यस्या अङ्गं निरुपममथो मे वपुरिदं
न किंचित् सादृश्यं लभत इति कृत्वास्मि विधुरः ॥ २२ ॥

प्रियालापः । विहस्य, अदो क्खु तुए अणण्णव्वदं समारद्धं[2] ।

राधा । सप्रणयकोपम् । सहि जा लदा तुए सिविणे तह पुलोइदा, सा चंपअलदा, ण उण सुवण्णजूहिआ, तुमं क्खु अत्तणो मणोगदं सिविणे वि पेक्खसि त्ति अलं अलीओवहासेण, उवणेहि पूआउवअरणाइं तमालमूले[3] ।

नेपथ्ये,

आणत्तम्हि महादेवीए, जह हं जेव्व, सुमदिए वच्छं मे राहिअं सिग्घं गदुअ मम सआसं आणेहि, ता कहिं दाणिं पेक्खिस्सं तं भट्टदारिअं[4] ।

राधा । समाकर्ण्य । नेपथ्याभिमुखमवलोक्य च । हला चंपअलदे एसा दुट्ठचेड़ी वसुमदिआ समाअदा, उट्ठेहि अम्बासमीवे गदुअ तुरिदं जेव्व मअणपूआत्थं आअमिस्सम्ह[5] । इति सखीभिः परिक्रामति ।

कृष्णः । सदुःखातिशयम् । सखे प्रियालाप तावदावामपि गत्वा गोकुलपरिसरादायान्तं गोव्रजं परिपालयावः ।

प्रियालापः । अध इं[6] ।

कृष्णः । लतारन्ध्रे विलोक्य । सोच्छ्वासम् ।

गच्छन्ती स्वनिकेतं मनसिजभवनप्रदीपिकेवैषा ।
हरति ममेन्द्रियवृत्तिं शरदिव हंसावलीं प्रसभम् ॥२३॥

इति निष्क्रान्ताः सर्वे ॥

इति श्रीमथुरादासेन विरचितायां श्रीवृषभानुजानामनाटिकायां प्रथमोऽङ्कः ॥ १ ॥

---

[1] हन्त लक्ष्यीकृत इदानीं लब्धावसरेण कुसुमायुधेन राधारूपस्यात्मनोऽमोघप्रहरणस्य कोमलाङ्ग एषः ।

[2] अथ श्रुतं सर्वमासां मन्त्रितम् ।

[3] अपि नाम वदेदियं तमेव दुर्लभजनं मामधिकृत्य, यो भगवत्या वृन्दया तदा तातस्य समीपे प्रसङ्गेनाभिहित आसीत् ।

[4] भवतु प्रक्ष्यामि तावत् ।

[5] कथमिव ।

[6] सखि फलेनैव ज्ञास्यसि पुनरुक्तेन किम् ।

[7] अथवा कथयिष्ये, अस्मिन्नेवातिमुक्तलतामण्डपपरिसरे त्वं किल कस्याप्यनुरूपवल्लभस्य समीपे नवजलधरस्य विद्युल्लतेव यथा तमालविटपसंगता सुवर्णयूथिका लता शोभमाना सुखं क्रीडन्ती तिष्ठसीति ।

[8] यदेतयोदाहृतं यदपि तदनन्यसाधारणं प्रियवयस्यस्यैव स्वरूपं तथापि यद्यस्या मुखतोऽभिधानं स्फुटं कथितं भवेत् ।

[1] भो वयस्य दिष्ट्या वर्धसे, श्रुतं प्रियवयस्येनास्या वचनम्, तर्कयामि, भवानेव वल्लभ इति ।

[2] अतः खलु त्वयानन्यव्रतं समारब्धम् ।

[3] सखि या लता त्वया स्वप्ने तथा विलोकिता, सा चम्पकलता, न पुनः सुवर्णयूथिका, त्वं खल्वात्मनो मनोगतं स्वप्नेऽपि प्रेक्षस इत्यलमलीकोपहासेन, उपनय पूजोपकरणानि तमालमूले ।

[4] आज्ञप्तास्मि महादेव्या, यथाहमेव, सुमतिके वत्सां मे राधिकां शीघ्रं गत्वा मम सकाशमानय, तत् कुत्रेदानीं प्रेक्षिष्ये तां भर्तृदारिकाम् ।

[5] हे चम्पकलते एषा दुष्टचेटी वसुमंतिका समागता, उत्तिष्ठाम्बासमीपे गत्वा त्वरितमेव मदनपूजार्थमागमिष्यामः ।

[6] अथ किम् ।

॥ श्रीगणेशाय नमः ॥

॥ विधवोद्वाहविवेकमधिकृत्य किं चिदुच्यते ॥

कश्चिद्दक्षिणदेशीयो भट्टविष्णुशास्त्र्यभिधानोऽस्मद्गुरुवरश्रीध्र राजारामशास्त्रिनिर्मितविधवोद्वाहशङ्कासमाधिसमाख्यनिबन्धखण्डनदुरभिनिवेशपिशाचावेशदूषितचित्तो "यत्तु" "तत्र" "बालिशोक्तिः" "स्वीयापाटवं प्रकाशयांचक्रुः" इत्यादयः प्रलापा एव परमतखण्डनसाधनमित्यभिसंदधानो महताडम्बरेण विधवोद्वाहविवेकं रचयामास। तमिमं समीक्ष्य कथमयमात्मानमपरिज्ञाय साहसिकः पर्वतोत्तोलने मशक इव प्रवृत्त इति संजातविस्मयाः पुरा यत्र सकलभारतवर्षालङ्करणभूता व्युत्पन्ना आसंस्तस्येदानीं दक्षिणदेशस्येदृशी दुर्दशा यत्त्रैवंविधा अव्युत्पन्ना निःशङ्कं खेलन्ति निर्भया निर्व्रीडाश्च प्रलपन्तीति समुत्पन्नखेदास्तद्व्युत्पत्तिं प्रकाशयितुमुद्यतामहे। यद्यप्येतादृशस्य महात्मनः स्वत एव प्रकाशमानतया नास्ति तद्व्युत्पत्तिप्रकाशने परव्यापारापेक्षा तथापि रसिकजनमनःकुतूहलाय द्वित्रस्थलीयतत्पाटवं प्रदर्श्यते।

अत्रायमुपक्रमग्रन्थो विधवोद्वाहशङ्कासमाधेः।

"स्वत्वान्तरमिव विवाहप्रयोज्यं स्वत्वं पतिनिष्ठेन क्लीबत्वादिना दोषेण न विनश्यति, न वा नोत्पद्यते, इति। क्लीबत्वपातित्ययोर्दायनिमित्तस्वत्वातिरिक्तस्वत्वनाशकत्वे तथाविधस्वत्वोत्पत्तिप्रतिबन्धकत्वे च मानाभावाद्"। इति।

अत्र विधवोद्वाहविवेकः।

स्वत्वान्तरमिव विवाहप्रयोज्यं स्वत्वं पतिनिष्ठक्लीबत्वपातित्यादिस्मृत्युक्तदोषमूलकान्यविवाहजन्यस्वत्वोत्पत्त्यव्यवहितपूर्वक्षणे विनश्यति, न वा उत्पद्यते, तादृशदोषाणां वचनबलाद्दायनिष्ठस्वत्वनाशकत्वतदुत्पत्तिप्रतिबन्धकत्ववद् विवाहविधिवाक्योक्तदोषमूलकवैधविवाहस्यापि पूर्वविवाहप्रयोज्यस्वत्वनाशकत्वकल्पनाया दोषाणां तदुत्पत्तिप्रतिबन्धकत्वकल्पनायाश्च स्वरसत एवौचित्यम्। पतिदोषमूलकपुनर्विवाहविधायकमन्वादिवचनेभ्यस्तथैव प्रतीतेः। यथा क्लीबपतितादीनां दाये स्वत्वानुत्पत्तौ तेषां दायनियामकवाक्येषु वर्ज्यत्वेन परिगणनं प्रमाणं तथा विवाहविधिवाक्येष्वपि कतिपयदोषविशिष्टानां वराणां वर्ज्यत्वेन परिगणनमेव तेषां स्वत्वनाशे तदनुत्पत्तौ च प्रमाणम्। इति।

अत्रेदं विभाव्यताम्। यद्यपि पुनर्विवाहप्रापकत्वेन भवदभिमतानां वचनानां नास्ति विधवोद्वाहप्रापकत्वमिति स्पष्टं निरूपितं विधवोद्वाहशङ्कासमाधौ, निरूपयिष्यते च विस्तरेणास्माभिरपि विधवोद्वाहविवेकपरीक्षायां तथापि तेषां वचनानां तत्प्रापकत्वमभ्युपेत्यापि वदामः, प्रथमविवाहकालावच्छिन्नानां पातित्यादीनां दोषाणामेव स्वत्वोत्पत्तिं प्रति प्रतिबन्धकत्वं पूर्वविवाहजनितस्वत्वनाशकत्वं तु दोषमूलकपुनर्विवाहस्येति वैषम्यं कुतः प्रतीतम्। का वा भवतां साध्यसिद्धिक्षतिर्दोषाणामेव स्वत्वनाशकत्वकल्पनायां येन दोषमूलकद्वितीयविवाहस्य स्वत्वनाशकत्वं कल्प्यते। महांश्चात्र स्वरसो यद् दृष्टान्ते दोषाणामेव स्वत्वनाशकत्वं दार्ष्टान्तिके च दोषमूलकविवाहान्तरस्य तदुत्प्रेक्ष्यते। इदं चात्यन्तोपहासास्पदं यदस्मदीयनिबन्धस्थितं स्वत्वान्तरमिवेत्येतदविचार्यैव स्वयमपि लिख्यते। किं चान्यत् स्वत्वं द्वितीयविवाहविनाश्यं संभाव्यते यद् दृष्टान्तभूतं सत् स्वत्वान्तरमिवेति प्रयोक्तारं भवन्तमिक्ष्वाकूणामस्माकूणामित्यादिन्यायविषयपरिहासात् समुद्धरेत्। अस्माकं तु क्रयादिनिमित्तकं स्वत्वं दृष्टान्तभूतं भवितुमर्हतीति नानुपपत्तिः। किं च "न वोत्पद्यते" इत्यन्तोल्लेख्यप्रतिज्ञाया हेतोः प्रदर्शनं "स्वरसत एवौचित्य" मित्यन्तेन, तथा च तस्य प्रथमान्तत्वमयुक्तम्। यत इतिप्रभृतिपदाध्याहारेण योजयितुं शक्यत इति चेदध्याहारेण लक्षणया वा किंकिं न योजयितुं शक्यते। किं च "यथेत्यादिना प्रमाण" मित्यन्तेन पूर्ववाक्यप्रतिपादितादधिकं किं प्रतिपादितमिति निरूप्यताम्।

विधवोद्वाहशङ्कासमाधिः।

"लोके क्रयप्रतिग्रहादिभिः क्लीबपतितयोरपि स्वत्वोत्पत्तिदर्शनात्"

अत्र विधवोद्वाहविवेचकस्याक्षेपः।

"तथा स्वत्वोत्पत्तौ क्लीबपतितादीनां मन्वाद्युक्तमनंशित्वमपि न स्यात्। अस्मन्मते त्ववैधक्रयप्रतिग्रहाद्युत्पन्नस्वत्वस्याप्यवैधत्वेन तस्य विवाहादिप्रयोज्यस्वत्वेन तौल्याभावेनादोषाद्" इति।

अत्रोच्यते। "क्लीबोथ पतितस्तज्ज" इतिप्रभृतिवचनैः पुत्त्रत्वादेर्दायस्वत्त्वनिमित्तता तत्तद्वचनैर्बाध्यमाना क्लैब्यादिदोषाभावविशिष्टपुत्त्रत्वादौ निर्धार्यते, पुत्त्रत्वादिना दाये स्वत्वोत्पत्तौ दोषाभावस्य सहकारित्वं वा प्रतिपाद्यते। क्रयादिना स्वत्वोत्पत्तौ तु नैवं, मानाभावात्। नहि यत्किंचित्स्वत्वस्य कारणतावच्छेदकं सहकारिकारणं वा स्वत्वमात्रस्य भवितुमर्हति। तथासति दुहितृत्वनिष्ठस्वत्वकारणताया अवच्छेदकस्य तादृशस्वत्वकारणस्य वा पत्यभावस्य पुत्त्रत्वनिष्ठकारणतावच्छेदकत्वस्य पुत्त्रत्वजन्यस्वत्वं प्रति कारणत्वस्य वाऽऽपत्तेः। तस्माद् यस्य यादृशस्वत्वं प्रति निमित्तत्वं प्रमाणप्रमितं तदेव तत् प्रति निमित्तं क्लैब्याद्यभावस्य च क्रयादिनिमित्तकस्वत्वं

प्रति कारणत्वं कारणतावच्छेदकत्वं वा न प्रमाणप्रमितमिति न क्रयादिनिमित्तकस्वत्वं प्रति स्वत्वसामान्यं प्रति वा तस्य कारणत्वं तदवच्छेदकत्वं वा वक्तुं शक्यते । इत्थं च दायनिमित्तकस्वत्ववृत्त्यसाधारणो धर्म एव क्लैब्याद्यभावावच्छिन्ना क्लैब्याद्यभावनिष्ठा वा या कारणता तन्निरूपितकार्यताया अवच्छेदकस्तस्य च वैवाहिके स्वत्वे ऽभावादेव न तत्र क्लैब्याद्यभावस्यापेक्षा। एवं स्थिते क्लैब्याद्यप्रतिबध्यत्वाविनाश्यत्वाभ्यां तुल्यमेव वैवाहिकं स्वत्वं क्रयादिनिमित्तकेन स्वत्वेन । यत्तु वैधत्वावैधत्वाभ्यां भेदो वैवाहिकस्वत्वक्रयादिनिमित्तकस्वत्वयोरित्युच्यते, तत्र वैधत्वं विधेयत्वं विहितजन्यत्वं वा, नाद्यः । वैवाहिकेऽपि तदसंभवात् । नान्त्यः । उद्वहेदितिवत् क्रीणीयात् प्रतिगृह्णीयादितिप्रभृतिविधिबोधितनिमित्तकत्वस्य क्रयादिनिमित्तकस्वत्वेऽप्यविशिष्टत्वात्। अस्तु वा कथं चित्तयोर्विशेषस्तथापि क्लैब्याद्यनाश्यत्वादौ को विशेषः । न च नष्टे मृते इत्यादिना वैवाहिकस्वत्वस्य क्लैब्यादिप्रतिबध्यत्वादस्ति विशेषः। दायलाभादिषु वित्तागमेषु विवाहस्य पृथगनिर्देशेन प्रतिग्रहक्रयादिष्वेव विवाहस्याप्यन्तर्भावेण वस्त्वन्तरनिष्ठक्रयादिनिमित्तकस्वत्वं प्रति क्लृप्तसामग्र्यैव वैवाहिकस्वत्वस्याप्युपपत्तौ क्लैब्याद्यभावादेस्तत्सामग्रीघटकत्वकल्पने गौरवात् नष्टे मृतइत्यादेर्वरदोषस्यानुशयहेतोर्बाधकत्वेनैवोपक्षयस्योपपादितत्वात् ।

यत्तु कन्यादानं न पितृस्वत्वनिवर्तकमिति प्रतिज्ञाय तन्नोपोद्बलकतया कन्यादानवाक्ये कन्यां॰ इत्यादि संप्रददे इत्युत्तरं न ममेति त्यागोच्चारणाभाव इति केचिदित्युक्तं प्रयोगरत्नकृता, दौहित्रस्यानपत्यमातामहरिक्थाधिकारः पुत्रिकाधर्मश्च संगच्छते, इत्युक्तं, तदत्यन्तमसमञ्जसम् । दाधातुनैव संप्रोपसृष्टेन दातृस्वत्वनिवृत्तेर्लाभेन न ममेत्युच्चारणे पौनरुक्त्यप्रसङ्गात् तन्नोच्चारणीयमित्याशयेन कैश्चित्तत्प्रयोगस्य प्रतिषेधात् । न ममेतिवाक्ये संबन्ध्यन्तरसमर्पकपदापेक्षायां पूर्वप्रक्रान्तकन्यापदस्यैवावश्ययोजनीयतया सनिरूपकार्थकसमभिव्याहृतषष्ठ्या आकाङ्क्ष्यमाणसंबन्धेतरसंबन्धबोधकताया अस्वारसिकतया कन्यात्वे दातृनिरूपितत्वाभाव एव नञा स्वरसतः प्रतीयेतेत्यभिप्रायेण तत्प्रतिषेधाद्वा । रिक्थाधिकारे स्वत्वस्य तु कथमप्युपयोगो न संभाव्यते इति मातामहरिक्थाधिकारमात्रेण का ऽऽशा स्वत्वस्य। एवं हि रिक्थाधिकारिणो पितुर्गुरो राज्ञश्चापि निर्देशात्तेष्वपि स्वत्वमापद्येतेति साधु धर्मशास्त्रे व्युत्पत्तिं समपादयद् भवान् ।

एवं पितुः स्वत्वनिवृत्तावपि दुहितरि दौहित्रे वा पुत्रिकाधर्मस्य पुत्रत्वसंपादकत्वे का ऽसंगतिः । नहि पुत्रत्वं स्वत्वव्याप्यं येन स्वत्वमाक्षिपेत् । गर्भदासादौ स्वत्वाभावे ऽपि पुत्रत्वदर्शनेन व्यभिचारात् ।

इदं महदाश्चर्यं, यद्

"विधवा या भवेत्कन्या निर्दोषा भर्तृवर्ज्जिता ।
तस्या वासः पितुर्वेश्म सलज्जा चैव सर्वदा ,, ॥

इति वदता पराशरेण विधवायाः पितृवेश्मनि वासविधानात् पितुः स्वत्वमाक्षिप्यते, पितृस्वत्वनाशे तु तदसंगतिरिति चोच्यते,, नहि कस्य चिद्गृहे वासविधानेन तस्य स्वत्वं कल्पयितुं युक्तं, नहि यो यस्य स्वं स एव तस्य गृहे वसतीति नियमः । नहि पथिकब्राह्मणस्य कुलालगृहे वासस्य विहितत्वे ऽपि कुलालस्वत्वं तस्मिन् भवादृशाद्व्युत्पन्नादृते कश्चिदुत्प्रेक्षेत ।

यदपि दानजन्यस्वत्वस्य संबन्धतया समवायातिरिक्तसंबन्धसामान्यस्य चानित्यतया स्वत्वसंबन्धस्याप्यनित्यत्वेनान्यविवाहस्वत्वोत्पत्तिपूर्वक्षणे तन्नाश एवेति स्वीयतार्किकत्वप्रदर्शनायोक्तं,

तेन चातीव नैयायिकधुरीणत्वं प्रकाशितम् । क्व वयं स्वत्वस्य नित्यतां वदामो यन्नैतावान् भवतः स्वत्वस्यानित्यत्वोपपादने फटाटोपः, विवाहनिमित्तकस्वत्वस्य क्लैब्याद्यनाश्यत्वं परं वदामस्तत्रानित्यत्वोपपादनेनापि किम्। नह्यनित्यं स्वत्वमित्येतावता भवदभिमतक्षणविशेषे तन्नाश उचितः। समवायातिरिक्तसंबन्धमात्रस्यानित्यत्त्वकथनं तु महतः पदार्थपरिचयपरिपाकस्य फलम् । गगने कालभेदस्य यः संबन्धो भेदे च कालस्य यः संबन्धो भेदे चाखण्डोपाधेरभावत्वस्य च यः संबन्धस्ते किमनित्या अथ च किं समवायातिरिक्ता न भवन्तीति न किं चिदेतत् ।

विधवोद्वाहशङ्कासमाधिः ।

न चैवं सति क्लीबाय वाग्दत्ताया अन्यस्मै दानमसंगतं स्यादिति वाच्यम् । नहि तत्रान्यस्मै दानं क्लीबादिस्वत्वोत्पत्त्यभावात्, किं तु दात्रनुशयजन्यप्रतिग्रहीतृस्वत्वनाशात्। यथा क्रीतानुशयादौ"

दुष्टाय दाने सम्प्रपद्युत्तरं तु न दात्रनुशयः । तत्र देवानां दातृत्वात्" इति ।

अत्र विधवोद्वाहविवेचकः ।

यत्तु मनुष्यकर्तृकवाग्दाने दात्रनुशयस्य सत्त्वात्तदुत्तरं दोषदर्शनेन तादृशदाननिवृत्तावपि देवानां सर्वज्ञत्वात्तत्कर्तृकदाने ऽनुशयासंभवान्न तद्दानोत्तरं विवाहसंस्कारनिवृत्तिरित्यूचुस्तत्र । मनुष्यकर्तृकदानवद्देवकर्तृकदाने ऽपि मनुष्यानुशय-

स्यावश्यकत्वात् । अन्यथा तद्दानोत्तरं कुत्रापि दोषनिश्चयज्ञाने देवानां सर्वज्ञत्वभङ्गापत्तिः” इति प्रलपति ।

तत्रायमेतस्य महान् दुर्विनयो यदयमनुक्तमेवानुवदति, आर्यचरणैस्तु दानानुशयेन प्रतिग्रहीतृस्वत्वनाश उच्यते, सप्तपद्युत्तरं तु प्रतिग्रहीतृस्वत्वनाशको दानानुशयो न संभवतीत्युच्यते, तत्रायं “दाननिवृत्तावपि” इति “न विवाहसंस्कारनिवृत्ति”रिति चानुवदति । क्व कृते भवतो दानस्येच्छारूपस्यानुशयशतेनाप्यनिवर्तनीयस्य तेन निवृत्तिं वदेत् । तस्यैव च व्युत्पन्नशिरोमणेर्भवत एव “मनुष्यानुशये स्वकर्तृकदानजन्यस्वत्वनिवर्तकत्वस्येव दैवकर्तृकदानजन्यस्वत्वनिवर्तकत्वस्याप्यवश्यवक्तव्यत्वाद्” इत्येतदर्थतात्पर्येण “मनुष्यकर्तृकदानवद्दैवकर्तृकदाने ऽपि मनुष्यानुशयस्यावश्यकत्त्वाद्” इति लेखः शोभते। दाने कथमप्यनुशयस्यावश्यकताया वक्तुमशक्यत्वात् । यदि च “दाने” इत्यस्य लक्षणया “दानजन्यस्वत्वनिवृत्तौ” इत्यर्थो ऽभिप्रेयते, तर्हि चैत्रो मूर्ख इत्युक्त्वा चैत्रीयपर्यनुयोगकाले चैत्रपदेन लक्षणया चैत्रशत्रुरभिप्रेत इति व्याचक्षाणो ऽप्यप्रतिवक्तव्यः स्यात् । सर्वस्यापि वाक्यजातस्यैवं क्रमेण विपरीतार्थकत्वसंभावनया सर्वस्यैव वाग्व्यवहारस्य लेखव्यवहारस्य च समुच्छेदप्रसङ्गः स्यात् । अत एवोक्तं शिरोमणिभिः “वादिवाक्ये न लक्षणा” इति । तस्मात् स्पष्टमेवैतस्य दानपदार्थानुशयादिपदार्थाज्ञानं निश्चीयते । एवं कासां चित् स्त्रीणां दुरदृष्टानां तद्विपाकाय बुद्धिपूर्वमेव दैवैर्दुष्टाय दानस्य संभाव्यमानत्वेन सप्तपद्युत्तरं दोषनिश्चये कथं देवानां सर्वज्ञत्वभङ्गप्रसङ्ग इत्यादि सुधियो विदांकुर्वन्तु ॥ शम् ।

तदित्थं स्थालीपुलाकन्यायेन किं चित् पुनरुद्वाहविवेचकव्युत्पत्तिपाटवं प्रकटीकृतम् । इतः स्वल्पेनैव कालेन तदीयशङ्काभासानां सर्वेषां निराकरणं सङ्क्षेपत उपनिबध्य काशीविद्यासुधानिधिचकोरविचारगोचरीकरिष्यते ॥

काशीस्थराजकीयपाठालये
सांख्यशास्त्राध्यापकेन बालशास्त्रिणा

# THE VAIŚESHIKA APHORISMS OF KAṆĀDA.

## FIRST BOOK, SECOND DAILY LESSON.

(*Continued from page 245.*)

Causation. कारणाभावात् कार्याभावः ॥ १ ॥

Aph. 1. From Non-existence of cause is Non-existence of effect.

[1] It may be said, "In the foregoing daily lesson similarity [between the Categories, Substance, Quality, and Action], as constituted by the notion of effect and the notion of cause, has been explained. How is this possible? for while the relation between effect and cause is not demonstrated it is like [talking about] the horn of a hare." To obviate this [Kaṇáda] establishes the relation between effect and cause. V.

[2] For it is seen that even when earth, a potter's wheel, water, a potter, thread &c., are brought together, from Non-existence of a potter's staff there is Non-existence of the pot, and though earth, water &c., be brought together, from Non-existence of a seed there is Non-existence of a shoot. This [relation] between the potter's staff and the pot, and between the seed and the shoot, is impossible without the relation of cause and effect; for otherwise there would be Non-existence of the pot also in the case of Non-existence of a loom, and Non-existence of the shoot even in the case of Non-existence of fragment of stone &c. Moreover it is observed that a pot, a piece of cloth, and the like exist only from time to time. This too would be impossible without the relation between cause and effect; for existence from time to time of things which are, which consists in their being at one time and not being at another, is impossible without connexion with a cause. For in this case [were there no connexion with a cause] a thing might be or not be but could not be from time to time, since an existing thing is not Non-existent, nor does it come into existence without a cause, nor does it come into existence fortuitously, nor does it come into existence from anything unreal such as the horn of a hare, but from a really existing limit such as a staff or a loom, as is seen in effects such as a pot or a piece of cloth. Now the limit is the cause. Moreover were there no relation of cause and effect there would no activity or inactivity, for in

[1] ननु पूर्वाह्निके कार्यत्वघटितं कारणत्वघटितञ्च साधर्म्यमुक्तं तत्कथं सङ्गच्छते कार्यकारणभावस्यासिद्धत्वेन शशविषाणसमानत्वादित्यतः कार्यकारणभावमेव व्यवस्थापयति ॥

[2] दृश्यते हि मृच्चक्रसलिलकुलालसूत्रादौ समवहिते ऽपि दण्डाभावाद्घटाभावः भूसलिलादौ समवहिते ऽपि बीजाभावादङ्कुराभावः स च दण्डघटयोर्बीजाङ्कुरयोर्वा कार्यकारणभावमन्तरेणानुपपन्नः । अन्यथा वेमाद्यभावे ऽपि घटाभावः शिलाशकलाद्यभावे ऽप्यङ्कुराभावः स्यात् किञ्च घटपटादीनां कादाचित्कत्वमनुभूयते तदपि हेतुफलभावमन्तरेणानुपपन्नं न हि किञ्चित्कालासत्त्वे सति किञ्चित्कालसत्त्वरूपं कादाचित्कत्वं भावानां कारणापेक्षामन्तरेण सम्भवति तदा हि स्यादेव न स्यादेव वा न तु कदाचित् स्यात् न हि भावो न भवत्येव नाप्यहेतोर्भवति नाप्यकस्मादेव भवति न वा निरुपाख्यादेव शशविषाणादेर्भवति किन्तु दण्डवेमादेः सोपाख्यस्यावधेर्घटपटादौ कार्ये दर्शनादवधिस्तु कारणमेव एवं कार्यकारणभावाभावे प्रवृत्तिनिवृत्ती न स्यातां तथा च निरीहं जगज्जायेत न हीष्टसाधनताज्ञानमन्तरेण प्रवृत्तिरनिष्टसाधनताज्ञानमन्तरेण निवृत्तिः ॥

such a case the universe would be desireless, since without a knowledge of the means of attaining that which is desired there would be no such thing as activity, and without the knowledge of the means of avoiding that which is undesired there would be no such thing as inactivity. U.

Continued. न तु कार्याभावात् कारणाभावः ॥ २ ॥

Aph. 2. But there is not from Non-existence of effect Non-existence of cause.

[1] If there were not a restriction in the relation between cause and effect, it would follow also that if the effect should not exist, the cause would not exist. The rule is not that Non-existence of effect results in Non-existence of cause, but that Non-existence of cause results in Non-existence of effect. Therefore the practical application of this introductory section of two aphorisms is that persons desirous of emancipation are concerned in Non-existence of birth for the sake of Non-existence of pain, in Non-existence of activity for the sake of Non-existence of birth, in Non-existence of faults for the sake of Non-existence of activity, in the cessation of false knowledge for the sake of Non-existence of faults, and in forming a mental representation of the soul for the sake of cessation of false knowledge. U.

Generality and Particularity. सामान्यं विशेष इति बुद्ध्यपेक्षम् ॥ ३ ॥

Aph. 3. Generality and Particularity both depend upon Conception.

[2] After the enunciation and definition of the [first] three Categories he now states the definition (characteristic) of the Category Generality [formerly] enunciated. Generality is twofold, highest and not highest. The highest is being, the not-highest is substantiality &c., included under being. The distinguishing property of Generality and Particularity is Conception. Extensive concept on is that of Generality, exclusive Conception is that of Particularity.

---

[1] यदि कार्यकारणभावनियमो न भवति तदा कार्याभावादपि कारणाभावः स्यात् कार्याभावः कारणाभावं प्रत्यतन्त्रं कारणाभावस्तु कार्यभावं प्रति तन्त्रं तेन दुःखाभावार्थं जन्माभावे जन्माभावार्थं प्रवृत्त्यभावे तदर्थञ्च दोषाभावे तदर्थं मिथ्याज्ञाननिवृत्तये तदर्थञ्चात्मसाक्षात्काराय मुमुक्षूणां प्रवृत्तिः प्रयोजनमौपोद्घातिकस्यास्य द्विसूत्रप्रकरणस्य ॥

[2] पदार्थत्रयोद्देशलक्षणानन्तरमिदानीमुद्दिष्टस्य सामान्यपदार्थस्य लक्षणमाह । सामान्यं द्विविधं परमपरञ्च तत्र परं सत्ता अपरं सत्ताव्याप्यं द्रव्यत्वादि तत्र सामान्यस्य तद्विशेषस्य च लक्षणं बुद्धिरेव । अनुवृत्तबुद्धिः सामान्यस्य व्यावृत्तबुद्धिर्विशेषस्य ॥

[1] Generality is the highest, and Particularity the not-highest, Generality. Accordingly there are two [kinds of Generality.] That is dependant upon Conception which has Conception for its chracteristic. Generality then, is twofold, highest and not-highest. The highest Generality is being, the not-highest Generality is Substantiality &c. The distinguishing property of the highest and not-highest kinds of Generality is Conception, the Conception of extensiveness being the characteristic of Generality (i. e. of highest Generality) and the Conception of non-extensiveness the characteristic of Particularity (i. e. of not-highest Generality). Extensiveness is existence in many places, non-extensiveness is existence in few places. Being, therefore, is the highest because it exists in more places than any other Generality, and the classes Substantiality &c., are not-highest because they exist in fewer places than being, but are also highest because they exist in more places than the notion of earth &c., so that, Generality or the highest and Particularity or the not-highest are not absolute but dependant on (i. e. relative to) Conception. The following hindrances to [the formation of] classes are enumerated by the Nyáya teachers, 'Indivisibility of the individual, identity confusion, infinite regression, loss of form, and absence of connection are the aggregate of things preventing classes.' Thus the notion of Ether is not a class because it exists only as one individual. The notions of a pitcher and a water-pot are not two classes because there are neither more nor less individuals [included in either]. The notions of substance and form are not a class because of the confusion pervading the one individual by reason of two common substrata of absolute mutual Non-existence. Generality is not a class, for were it so, there would be a regress to infinity. The notion of Particularity is prevented from being a class by loss of form, for

---

[1] सामान्यं परं विशेषः अपरं सामान्यम् इति द्वयं बुद्ध्यपेक्षं बुद्धिरपेक्षा लक्षणं यस्य तत् तथा च सामान्यं द्विविधं परमपरञ्च तत्र परसामान्यं सत्ता द्रव्यत्वादिकन्त्वपरसामान्यं तत्र सामान्यविशेषयोः परापरयोर्लक्षणं बुद्धिरेव अनुवृत्तत्वबुद्धिः सामान्यस्य व्यावृत्तत्वबुद्धिर्विशेषस्य लक्षणम् अनुवृत्तत्वम् अधिकदेशवृत्तित्वं व्यावृत्तत्वमल्पदेशवृत्तित्वं तथा च सत्तायाः सर्वसामान्यापेक्षया ऽधिकदेशवृत्तित्वात् परत्वमेव द्रव्यत्वादिजातेस्तु सत्तापेक्षया न्यूनदेशवृत्तित्वादपरत्वं पृथिवीत्वाद्यपेक्षया ऽधिकदेशवृत्तित्वात् परत्वमपीति परत्वरूपं सामान्यत्वम् अपरत्वरूपं विशेषत्वञ्च न नियतं किन्तु बुद्ध्यपेक्षमिति । जातिबाधका उक्ता न्यायाचार्यैः व्यक्तेरभेदस्तुल्यत्वं सङ्करो ऽथानवस्थितिः । रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रह इति । तत्रैकव्यक्तिकत्वादाकाशत्वं न जातिः अन्यूनानतिरिक्तव्यक्तिकत्वाद् घटत्वं कलशत्वञ्च न जातिद्वयं परस्परात्यन्ताभावसमानाधिकरणयोरेकव्यक्तिसमावेशेन सङ्करेण भूतत्व मूर्तत्वञ्च न जातिः अनवस्थाभयात् सामान्यत्वं न जातिः विशेषत्वं व्यावृत्तस्वभावस्य रूपहानिर्विशेषत्वजातिबाधिका समवायसम्बन्धाभावात् समवायत्वं न जातिः समवाये समवायान्तरस्वीकारे ऽनवस्थाप्रसङ्गात् ॥

particularity is naturally exclusive...... The notion of Inhesion is not a class, because of the Non-existence of connection by Inhesion, for from the assumption that Inhesion inheres in anything else a regression to infinity would follow. V.

Cp. The Muktávalí on Bháshá-parichchheda, 8. [1]'The characteristic of Generality is Inhesion in more than one, together with eternity. It is said, 'Together with eternity', because Inhesion in more than one belongs also to Conjunction &c. It is said 'In more than one,' because Inhesion together with eternity belongs also to Ether, to Extension, and the like.

A. E. G.

*To be continued.*

## RAMAYANA

### BOOK I. CANTO II.

The wondrous tale Valmiki heard,
And treasured in his heart each word.
To him whose fame the lay rehearsed
He paid his mental worship first;
Then with his pupil humbly bent
Before the saint most eloquent.
Thus honoured and dismissed the seer
Rose upward to his heavenly sphere.
Valmiki bent his footsteps where
The Tamasa flows cool and fair.
He stood and saw the ripples roll
Pellucid o'er a pebbly shoal.
To Bharadvaja by his side
He turned in ecstasy, and cried:
'See, pupil dear, this lovely sight,
The liquid crystal pure and bright
With not a speck or shade to mar,
And clear as good men's bosoms are.
Here on the brink thy pitcher lay,
And bring my zone of bark, I pray.
Here will I bathe: the rill has not,
For men to bathe, a fairer spot.
Do quickly as I bid, nor waste
The precious time; away, and haste.'

Obedient to his master's hest
Quick from the cot he brought the vest;
The hermit took it from his hand,
And tightened round his waist the band;
Then duly dipped and bathed him there,
And muttered low his secret prayer.
To spirits and to gods he made
Libation of the stream, and strayed
Viewing the forest deep and wide
That spread its shade on every side.
Close by the stream he saw a pair
Of curlews sporting fearless there.
But suddenly with evil mind
An outcast fowler stole behind,
And, with an aim too sure and true,
The male bird near the hermit slew.
The wretched hen in wild despair
With fluttering pinions beat the air,
And shrieked a long and bitter cry
When low on earth she saw him lie,
Her loved companion, quivering, dead,
His dear wings with his lifeblood red;
And for her golden-crested mate
She mourned, and was disconsolate.

The hermit saw the slaughtered bird,
And all his heart with ruth was stirred.
The fowler's impious deed distressed
His gentle sympathetic breast,
And while the curlew's sad cries rang
Within his ears, the hermit sang:
'No fame be thine for endless time,
Because, base outcast, of thy crime,
Whose cruel hand was fain to slay
One of this gentle pair at play!'
E'en as he spoke his bosom wrought
And laboured with the wondering thought
What was the speech his ready tongue
Had uttered when his heart was wrung.
He pondered long upon the speech,
Recalled the words and measured each,
And thus to Bharadvaja cried,
Aye ready by his master's side:
'With equal lines of even feet,
With rhythm and time and tone complete,
The measured form of words I spoke
In shock of grief be termed a sloke.'
And Bharadvaja, nothing slow
His faithful love and zeal to show,
Answered those words of wisdom: 'Be
The name, my lord, as pleases thee.'

Still on this thing the hermit's thought
Kept brooding, as his home he sought;
And Bharadvaja paced behind,
A pupil sage of lowly mind,
And in his hand a vase he bore
With pure fresh water brimming o'er.
Soon as they reached their calm retreat
The holy hermit took his seat;

---

[1] सामान्यमिति । तल्लक्षणन्तु नित्यत्वे सत्यनेकसमवेतत्वम् । अनेकसमवेतत्वं संयोगादीनामप्यस्त्यत उक्तम् । नित्यत्वे सतीति । नित्यत्वे सति समवेतत्वं गगनपरिमाणादीनामप्यस्त्यत उक्तम् अनेकेति ॥

His mind from worldly cares recalled,
And mused in deepest thought enthralled.

Then glorious Brahmá, Lord Most High,
Creator of the earth and sky,
The four-faced God, to see the sage
Came to that humble hermitage.
Soon as the mighty God he saw,
Up sprang the saint in wondering awe.
Mute, with clasped hands, his head he bent,
And stood before him reverent.
With greeting as beseems such guest
He spoke, and prayed the God to rest;
Gave water for his blessed feet,
Brought offerings, and prepared a seat.
In honoured place the God Most High
Sat down, and bade the saint sit nigh.
There sat before Valmiki's eyes
The Father of the earth and skies;
But still the hermit's thoughts were bent
On one thing only, all intent
On that poor hen bird's mournful fate
Lamenting for her slaughtered mate;
And still his lips in absent mood,
The verse that told his grief, renewed:
'Woe to the fowler's impious hand
That did the deed that folly planned;
That could to needless death devote
The curlew of the tuneful throat!'

The heavenly Father smiled in glee,
And said, 'O best of hermits, see,
A verse, unconscious, thou hast made;
No longer be the task delayed.
The tuneful lines thy lips rehearsed
Spontaneous from thy bosom burst.
Then come, O best of seers, relate
The tale of Rama good and great.
The tale thou hast from Narad heard:
Anew compose it, and reword.
Of all the deeds his arm has done
Upon this earth, omit not one,
And thus the glorious life record
Of that wise, brave, and virtuous lord.
His every act to day displayed,
His secret life to none betrayed:
What Lakshman, what the Giants wrought,
Both high emprise and hidden thought:
And all that Janak's child befell
Where all could see, where none could tell:
The whole of this shall truly be
Made known, O best of saints, to thee.
In all thy poem, by my grace,
No word of falsehood shall have place.
Begin the story, and rehearse
The tale divine in charming verse.
As long as in this firm-set land
The streams shall flow, the mountains stand,
So long in all the world, be sure,
The great Ramayan shall endure.
And while the poem made by thee
Thus famous on the earth shall be,
To higher spheres shalt thou arise
And dwell with me above the skies.'

He spoke, and vanished into air,
And left Valmiki wondering there.
The pupils of the holy man,
Moved by their love of him, began
To chant that verse, and ever more
They marvelled as they sang it o'er.
And thus the four-lined balanced rime,
Repeated over many a time,
In words that from the hermit broke
In shock of grief, became the sloke.
This measure now Valmiki chose
In which his story to compose.
In hundreds of such verses, sweet
With equal lines and even feet,
The saintly poet, might-souled,
The glorious deeds of Rama told.

## NOTICES OF BOOKS.

*Damayantí, A Tale in Sanskrit Prose, rendered from the Mahábhárata by Rámagati Nyáyaratna.* We are glad to recommend to Sanskrit students this useful little school-book, a simple but generally elegant paraphrase of the first part of that charming episode of the Mahábhárata, the Nalopákhyána. The work does credit to the author's scholarship, reflecting, as it does, no faint glimmering of the beauty of the original.

*Kávyaprakáśiká, Part VI, Sakuntalá and Kumára-Sambhava; Part VII, Mṛichchhakatiká,—with notes and Bengali Translation.* This serial publication maintains its credit for the manner in which both the edition and version of the Sanskrit classics are being executed. The translations, faithful and often in the style of explanation, will be a help to the Bengali youth in understanding the original, and written as they are in neat and idiomatic language, they will be valuable acquisitions to Bengali literature.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

# INDEX TO VOL IV.


| | Page. |
|---|---|
| Ancient Indian History, ... ... ... ... | 92 |
| Bála-bhárata, ... ... ... ... ... ... | 79, 103, 127, 149, 171, 191, 213, 238, 260 |
| Bálabhárata-kávya-bhúmiká, ... ... ... ... | 77 |
| Bhars, the, by the Rev. M. A. Sherring, L. L. B. ... | 160 |
| Indian morality, ... ... ... ... ... | 62 |
| Max Müller's Translation of the Rig-veda, ... ... | 110 |
| Nishpakshapáta-vivechaka-sabhyá vijnápyante, ... | 109 |
| Notices of Books, ... ... ... ... ... ... | 96 |
| Pandit, letters to the editor of the, ... ... ... | 16, 43, 94, 184 |
| Rámáyana, the, ... ... ... ... ... | 14, 34, 63, 89, 138, 157, 178, 208, 276 |
| Rig-veda, letter to the editor on the, ... ... | 157 |
| Śákuntalánuvádaparámarśa, ... ... ... ... | 272 |
| Srímat-Sáyanáchárya-kṛita-bháshyasyásvárasikatvam-manyamánán prati kinchid auckyate, ... ... | 114 |
| Upadeśa-sáhasryágadya-prabandha, ... ... ... | 1 |
| Upadeśa-sáhasryáh padya-prabandha, ... | 5, 21, 45, 71, 97, 119, 141, 165, 185, 205, 231, 253 |
| Ushas, the Indian Aurora, ... ... ... ... | 118 |
| Vaiśeshika Aphorisms of Kaṇáda, the, ... ... | 13, 31, 59, 86, 115, 135, 158, 225, 248, 273 |
| Varuṇa according to the Rig and Atharva Vedas, ... | 229 |
| Vṛishabhánujá-náṭiká, ... ... ... ... | 8, 28, 52 |
| Vṛishabhánujá-náṭikopasanhára, ... ... ... | 59 |
| Yoga philosophy, Aphorisms of the, continued from Dr. Ballantyne's work, ... ... ... ... | 202, 225 |


Supplement.


| | |
|---|---|
| Rájakíya-váráṇasí-vidyámandira-sarasvatí bhavana-varti-pustakánam súchi-pattram, ... ... | Nos. 37, 38, 39, 40, 41, 42, 43, 44, 45, 46, 47 |

# काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

# THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 37. Benares June 1st, 1869. Vol. IV.

## ॥ उपदेशसहस्त्र्या गद्यप्रबन्धः ॥

तन्त्वादिदृष्टान्तं विवृणोति ।

(६३) तन्त्वादीनां तु कार्यकारणैर्नित्यमेव संहतत्वमिति वास्याद्युपादानेनानवस्था स्यादिति । इह तु असंहतस्वभावस्य करणानुपादाने कर्तृत्वं नोपपद्यत इति करणमुपादेयं तदुपादानमपि विक्रियैवेति तत्कर्तृत्वे करणान्तरमुपादेयं तदुपादाने ऽप्यन्यदिति प्रमातुः स्वातन्त्र्ये ऽनवस्था ऽपरिहार्या स्यादिति, न च क्रियैवात्मानं कारयति, अनिर्वर्तितायाः स्वरूपाभावात् ॥

तन्त्वादीनां त्विति । अनवस्था न स्यादिति संबन्धः, इतिशब्दः शङ्कासमाप्त्यर्थः । असंहतस्य कर्तृत्वादर्शनादात्मनोपि संहतत्वं सिसाधयिषितं किं वा वस्तुतस्तस्य कर्तृत्वाभाव इति वक्तव्यं, तत्राद्यः पक्ष आत्मनः कूटस्थत्वसाधनेनैवापोहितत्वादनवसरदुःस्थ इति मत्वा द्वितीयमङ्गीकरोत्यसंहतस्वभावस्य करणानुपादान इति । स्वातन्त्र्ये, कर्तृत्वे सतीत्यर्थः । अयं भावः । कर्तृत्वं क चित्करणोपादानसाध्यं क चित्तु स्वसान्निध्यमात्रनिबन्धनं तत्र करणोपादानसाध्ये कर्तृत्वे वस्तुत आत्मनः करणोपादानासंभवात्कर्तृत्वाभावः पारमार्थिकः तथापि लौकिकमायाविवत् तैजसवच्चात्मनः कर्तृत्वप्रतिभासो मायाप्रत्युपस्थापितान्तःकरणविकाराविवेकादुपपद्यते, द्वितीयं तु तन्त्वाद्यात्मनः स्वहस्तादिव्यापारयितृत्वरूपे कर्तृत्वे स्वसान्निध्यातिरिक्तस्य कारणादेरभावादात्मनो ऽपि सकलकरणसाक्षितया सान्निध्यमात्रेणैव कर्तृत्वव्यपदेश उपपद्यत इति परमार्थतो ऽकर्तृत्वमुपाध्यविवेकात् कर्तृत्वव्यपदेशश्चेति न किं चनावद्यमिति । तथा च पारमर्षं सूत्रद्वयं "कर्ता शास्त्रार्थवत्वात्" । "यथा च तक्षोभयथा" इति च । तर्ह्यस्वतन्त्र एव करिष्यत्यात्मेति कर्ममीमांसकमतमाशङ्क्य प्रत्याह । न च क्रियेति । क्रियाशब्दः किं प्रयत्नवचनस्तद्व्याप्यधात्वर्थवचनो वा तत्साध्यापूर्ववचनो वेति विकल्प्याद्यौ प्रत्याहानिर्वर्तिताया इति । नहि स्वयमसिद्धः परं साधयतीति न्यायादित्यर्थः ॥ ६३ ॥

तृतीयो ऽपि किं तन्निष्पाद्यं नियोगाख्यमपूर्वं विवक्षितमुत पूर्वनिर्वृत्तं धर्माधर्माख्यं, नाद्यः पूर्वोक्तदूषणानतिवृत्तेः, न च लिङादिश्रवणसमनन्तरं प्रतीयमानाकारं प्रवर्त्तयत्यात्मानमिति वाच्यं, प्रतीतिकाले यद्यस्तीति बुद्धिस्तदा सिद्धत्वप्रतीतेर्न कारयितृत्वं, नास्तीति प्रतीतौ वन्ध्यासुतवन्न कारयितृत्वं, साधारणप्रतीतौ च पक्षे निवृत्तिसंभवान्न प्रेरकत्वसिद्धिरित्यभिप्रेत्य द्वितीयमुत्थापयति ।

(६४) अथान्यदात्मानमुपेत्य क्रियां कारयतीति चेन्नान्यस्य स्वतः सिद्धत्वाविषयत्वाद्यनुपपत्तेर्नह्यात्मनो ऽन्यदचेतनं वस्तु स्वप्रमाणकं दृष्टं शब्दादि सर्वमेवावगतिफलावसानप्रत्ययप्रमितं सिद्धं स्यादवगतिश्चेदात्मनो ऽन्यस्य स्यात्सो ऽप्यात्मैवासंहतः स्वार्थः स्यान्न परार्थः ॥

अथेति । यदप्यन्यत्पूर्वसिद्धं तदचेतनं चेतनं वा, आद्ये न प्रेरकत्वसंभव इत्याह । नेत्यादिना । आदिशब्दात्प्रेरकत्वग्रहः । तथा चात्मनः कर्तृत्वे सति लब्धस्वरूपस्यादृष्टस्य प्रेरकत्वसिद्धिः तत्सिद्धावन्यासिद्धिरित्यन्योन्याश्रय इति भावः ।

द्वितीयं प्रत्याह । नहीति । अदृष्टमचेतनमात्मान्यत्वाच्छब्दादिवदित्यर्थः । स्वप्रमाणकं स्वतः सिद्धमिति यावद्, अतः स्वसत्तास्फूर्त्योरात्मसापेक्षस्य कुतस्तत्प्रेरकत्वसंभव इति भावः । शब्दादीनामात्मसापेक्षसिद्धिकत्वं पूर्वोक्तं स्मारयति । शब्दादि सर्वमेवेति । एवं मीमांसकशङ्का निराकृता, एवं क्षेत्रज्ञातिरिक्तो ऽपीश्वरो ऽवगत्याश्रयः प्रेरकश्चास्तीति नैयायिकशङ्कामपाकुर्वन्नात्मान्यस्याचेतनत्वानुमाने व्यभिचारप्रसक्तिं वारयत्यवगतिश्चेदिति । ईश्वरो वस्तुत आत्माभिन्नो न भवति अवगत्याश्रयत्वात्प्रत्यगात्मवदित्यनुमानानुगृहीताया अयमात्मा ब्रह्मेत्यादिश्रुतेरात्मनो ऽन्यो न चेतनो ऽस्ति । स चात्मभूत ईश्वरो हेदादिभिरसंहतः स्वार्थः स्वतन्त्रो न परतन्त्र इति न क्रियाशेषो ऽत आत्मनः कर्तृत्वं विभ्रममात्रसिद्धमित्यर्थः । ईश्वरात्मनो जगत्कर्तृत्वमपि मायाद्वारकमेवेति न क्वापि कर्तृत्वं परमार्थमिति भावः ॥ ६४ ॥

नन्ववगत्याश्रयत्वात्कथमसंहतत्वादिर्यतो देहादेः संहतस्याप्यवगत्याश्रयत्वमस्तीति लोकायतमतमाशङ्क्याह ।

(६५) न च देहेन्द्रियविषयाणां स्वार्थतामवगन्तुं शक्नुमो ऽवगत्यवसानप्रत्ययापेक्षसिद्धिदर्शनाद् । ननु देहस्यावगतौ न कश्चित्प्रत्यक्षादिप्रत्ययान्तरमपेक्षते, बाढं जायत्येवं स्या,न्मृतिसुषुप्त्योस्तु देहस्यापि प्रत्यक्षादिप्रमाणापेक्षैव सिद्धिस्तथैवेन्द्रियाणां, बाह्या एव हि शब्दादयो देहेन्द्रियाकारपरिणता इति प्रत्यक्षादिप्रमाणापेक्षैव हि सिद्धिरिति च प्रमाणफलमवगतिमवोचाम, सा चावगतिः कूटस्था स्वयंसिद्धात्मज्योतिःस्वरूपेति चा, चाह चोदको ऽवगतिः प्रमाणानां फलं कूटस्थनित्यात्मज्योतिःस्वरूपेति च विप्रतिषिद्धमित्युक्तवन्तमाह । न विप्रतिषिद्धम् ॥

न चेति । देहादिर्नावगत्याश्रयो ऽवगम्यमानत्वाद् घटादिवदित्यर्थः । ननु कथं देहादेरवगत्यवसानप्रत्ययापेक्षसिद्धिकत्वं यावता मनुष्यो ऽहं पश्यामि जानामीति स्वसंवेद्यत्वमनुभूयत इति शङ्कते । नन्विति । अनुभवमात्रमङ्गीकरोति । बाढमिति । नायमनुभवः स्वनिबन्धनः किं तु देहात्मनोरविवेकनिबन्धन इति प्रत्याययति । जायत्येवं स्यादित्यादिना । यदि देहः स्वयंप्रकाशस्वभावः स्यात्तदा स्वसत्तायां प्रमाणनिरपेक्षस्वभावत्वात्सुषुप्तिमरणावस्थस्यापि प्रमाणानपेक्षसिद्धिकत्वं स्या,च्च चैवमस्ति, तस्मादचेतनो देह इत्यर्थः । देहे उक्तन्यायमिन्द्रियादावतिदिशति । तथेन्द्रियाणामिति । तथा देहवत्प्रमाणापेक्षैव सिद्धिरित्यर्थः । किं च देहादिरनात्मा भौतिकत्वाद्बाह्यवदित्याह । बाह्या एव हीति । भूतान्येव ग्राह्यग्राहककरणतदायतनत्वेन परिणमन्ते उपकार्योपकारकभावेन मिथः संहतानां समानयोनित्वनियमादिति भावः । ननु सिद्धिरिति निष्पत्तिरुच्यते सा न प्रत्यक्षाद्यपेक्षेति तत्राह । सिद्धिरिति चेति । देहाकारपरिणतेषु भूतेषु मदशक्तिवदवगतिरुत्पद्यत इति तस्यापि भौतिकत्वमविशिष्टमिति लौकायतिकशङ्कामपाकुर्वन्नवगतिस्वरूपमाह । सा चेति । इति चावोचामेत्यनुषङ्गः । अवगतेः कूटस्थत्वे तस्याः फलत्वप्रसिद्धिविरोधं शङ्कते । अत्राहेति । अकार्यरूपाया अप्यवगतेः कार्यत्वं कूपाकाशकार्यत्ववदुपचर्यत इति न फलत्वप्रसिद्धिविरोध इति परिहरति । इत्युक्तवन्तमाह, न विप्रतिषिद्धमिति ॥ ६५ ॥

उपचारनिमित्तं पृच्छति ।

(६६) कथं तर्हि, कूटस्था नित्यापि सती प्रत्यक्षादिप्रत्ययान्ते लक्ष्यते तादर्थ्यात्प्रत्यक्षादिप्रत्ययस्य नित्यत्वे अनित्येव भवति, तेन प्रमाणानां फलमित्युपचर्यते, यद्येवं भगवन् कूटस्थनित्यावगतिरात्मज्योतिःस्वरूपैव, स्वयंसिद्धात्मनि प्रमाणनिरपेक्षत्वात्, ततो ऽन्यदचेतनं संहत्य कारित्वात्परार्थं येन च सुखदुःखमोहप्रत्ययावगतिरूपेण परार्थत्वेनैव स्वरूपेणात्मनो ऽस्तित्वं नान्येन रूपान्तरेणातो नास्तित्वमेव परमार्थतः ॥

कथं तर्हीति । उत्तरमाह । कूटस्थेति । तादर्थ्यादिति प्रत्यक्षादिप्रत्ययस्य बुद्धिवृत्तेर्विषयसंसृष्टतया ऽवगत्यभिव्यक्त्यर्थत्वादित्यर्थः । तदेवं कूटस्थावगतिरूपे आत्मनि प्रमातृत्वं कर्तृत्वं फलत्वं च कल्पनामात्रमित्युपपादितं संहतस्य देहादेर्विषयपर्यन्तस्य पारार्थ्यं जाड्यं पराधीनसिद्धिकत्वं चोक्तमिदानीमेवमात्मानात्मनोरवगमितं तत्त्वमवगम्य शिष्यः स्वावगतमर्थं गुरुं प्रति निवेदयन्नद्वैतत्वमात्मनः संभावयितुं द्वैतस्य मृषात्वं प्रकटयति । यद्येवं भगवन्नित्यादिना । हे भगवन् यद्येवं प्रत्यगात्मतत्त्वं कूटस्थत्वादिविशेषेणावगत्यात्मकं तर्हि न प्रमातृत्वादिधर्मकं यतो ऽतः प्रमाणनिरपेक्षत्वात्परमार्थतः प्रमातुरभावे प्रमाणस्याप्यभावात्तन्निरपेक्षसिद्धिकं ततः प्रत्यगात्मनो ऽन्यदचेतनं परस्परोपकार्योपकारकभावेन संहत्य व्यवहारप्रवर्त्तकत्वात्परार्थं चेतनार्थं चैतन्यप्रतिभासमात्रं सिद्धं स्वप्नदृष्टवदनृतमित्यर्थः । ननु सुखदुःखमोहान्वयित्वेन दृश्यस्य सत्त्वरजस्तमोरूपप्रकृतिकार्यत्वावगमात्कथमनृतत्वमिति सांख्यशङ्कामपाकरोति । येन चेति । येन दृश्यमानाकारेण सुखदुःखमोहहेतुप्रत्ययावगतिरूपेण जडं परार्थं भोक्तृशेषवत्प्रतीयते तेनैवं रूपेणात्मनः स्वस्य दृश्यस्येति यावद्, अस्तित्वं

सद्भावो नान्येन सत्त्वाद्यात्मना रूपान्तरेण तत्र प्रमाणाभावादतः परमार्थतो नास्तित्वमेव दृश्यस्येत्यर्थः ॥ ६६ ॥

किं च विमतं जाग्रत्स्वप्नावस्थं दृश्यं नावगतिव्यतिरेकेण क्व चिदपि परमार्थसद्, दृश्यत्वाज्जडत्वाद्वा, रज्जुसर्पादिवदित्याह ।

(६७) यथा हि लोके रज्जुसर्पमरीच्युदकादीनां तदवगतिव्यतिरेकेणाभावो दृष्टः एवं जाग्रत्स्वप्नद्वैतभावस्यापि तदवगतिव्यतिरेकेणाभावो युक्तः, एवमेव परमार्थतः भगवन्नवगतेरात्मज्योतिषो नैरन्तर्यभावात् कूटस्थनित्यताऽद्वैतभावश्च सर्वप्रत्ययभेदेष्वव्यभिचारात्प्रत्ययभेदाश्चावगतिं व्यभिचरन्ति, यथा स्वप्ने नीलपीताद्याकारभेदरूपाः प्रत्ययास्तदवगतिस्वरूपं व्यभिचरन्तः परमार्थतो न सन्तीत्युच्यन्ते, एवं जाग्रत्यपि, नीलपीतादिप्रत्ययभेदास्तु स्वामेवावगतिं व्यभिचरन्तोऽसत्यरूपा भवितुमर्हन्ति ॥

यथा हीति । एवं दृश्यस्य सापेक्षत्वेन मायामयत्वे संभाविते द्रष्टृतत्त्वमद्वैतमनुभवारूढं मम संवृत्तमित्याह । एवमेवेति । एवं सतीत्यर्थः । नैरन्तर्यभावादेवेत्येवकारो योज्यः । अथ वा यथा द्वैतस्य दृश्यस्य तेन रूपेण परमार्थतोऽसत्त्वमनुभूयते मया एवमेव भगवन्नवगत्यात्मकस्य प्रत्यक्प्रकाशस्य कूटस्थनित्यताऽद्वैतभावश्च मयानुभूयत इत्यध्याहारः । कूटस्थनित्यतायां हेतुर्नैरन्तर्यभावादिति, उत्पत्त्यादिसाक्षिण उत्पत्त्यादिविकारस्यान्तरायस्यासंभवादित्यर्थः । अद्वैतभावे हेतुमाह । सर्वप्रत्ययेति । व्यावर्त्तमानेषु प्रत्ययेष्वव्यावृत्तेरित्यर्थः । ननु कुसुमेषु सूत्रवदव्यावृत्तावप्यवगत्यात्मनो नाद्वैतत्वसिद्धिः प्रत्ययानां कुसुमवदवस्थितत्वादित्याशङ्क्यावगतिव्यावृत्तानामज्ञातसत्त्वे मानाभावान्नैवमित्यभिप्रेत्याह । प्रत्ययभेदास्त्विति । विमता जाग्रत्प्रत्ययाः परमार्थतो न विद्यन्ते, चैतन्यप्रकाशव्यभिचारित्वाद्य एवं ते एवं, यथा स्वप्नप्रत्ययास्तथा चेमे तस्मात्तथेति समुदायार्थः ॥ ६७ ॥

द्वैतस्य मिथ्यात्वे तस्य दृश्यत्वं व्यभिचारित्वं च कारणमुक्तं तच्चैतन्यस्वरूप आत्मनि नास्तीत्यात्मनः सत्यत्वं कूटस्थत्वं नित्यत्वं स्वप्रकाशत्वं च सिद्धमित्याह ।

(६८) तस्याश्चावगतेरन्योऽवगन्ता नास्तीति न स्वेन स्वरूपेण स्वयमुपादातुं हातुं वा शक्यते,ऽन्यस्य चाभावात्तथैवेत्येषाऽविद्या यन्निमित्तः संसारो जाग्रत्स्वप्नलक्षणस्तस्या अविद्याया विद्या निवर्तिका, इत्येवं त्वमभयं प्राप्नोषि, नातः परं जाग्रत्स्वप्नदुःखमनुभविष्यसि, संसारदुःखान्मुक्तोऽसीत्योमिति ॥

॥ अवगतिः समाप्ता ॥

तस्याश्चावगतेरिति । योऽवगन्ता स एवात्मेति स्थितेऽवगन्तुरवगम्यमानत्वाभावादवगम्यमानस्य चानात्मत्वादात्मा स्वतः परतो वा नोपादेयो न हेयश्चान्यस्य चाभावात्पूर्णोऽहं त्वत्प्रसादादिदानीमस्मीति शेषः । एवं शिष्येणोक्तं गुरुरनुजानाति । तथैवेति । प्रकरणोपक्रमे पृष्टं विद्याऽविद्यास्वरूपं तद्विभागं सप्रपञ्चमुपपादितमुपसंहरति । एषाविद्येत्यादिना । यन्निमित्तः संसारो जाग्रत्स्वप्नलक्षण एषाऽविद्येत्यन्वयः । विद्या वेदान्तमहावाक्यजन्यप्रत्ययाभिव्यक्तकूटस्थात्मप्रकाशरूपेत्यर्थः । एषा च विद्या तवेदानीं संवृत्तेति कृतकृत्यत्वमिति शिष्यं प्रत्याह । गुरुरित्येवमिति । गुरुणोक्तं शिष्योऽप्यनुमनुते । ओमितीति । इतिशब्दः प्रकरणसमाप्तिद्योतनार्थः ॥ ६८ ॥

॥ इति कूटस्थाद्वयात्मबोधनामकं प्रकरणं विवृतम् ॥

यथोक्तविद्यावतः कृतकृत्यत्वान्न किं चिद्विधितोऽनुष्ठेयमस्तीत्युपपादितं, तत्र यद्येवं विज्ञानवतामपि केषां चिद्भेददर्शनवासनावशान्निर्वातस्थप्रदीपवन्निश्चलं विज्ञानं न भवति तदा तेषां ज्ञानदार्ढ्याय परिसंख्यानं नाम वक्ष्यमाणमनुचिन्तनमनुष्ठेयमुपदेष्टुमारभते ।

(६९) मुमुक्षूणामुपात्तपुण्यापुण्यक्षपणपराणामपूर्वानुपचयार्थिनां परिसंख्यानमिदमुच्यते,ऽविद्याहेतवो दोषा वाङ्मनःकायप्रवृत्तिहेतवः प्रवृत्तेश्चेष्टानिष्टमिश्रफलानि कर्माण्युपचीयन्ते इति तन्मोक्षार्थं, तत्र शब्दस्पर्शरूपरसगन्धानां विषयाणां श्रोत्रादिग्राह्यत्वात् स्वात्मनि परेषु वा विज्ञानाभावस्तेषामेव परिणतानां यथा लोष्टादीनां श्रोत्रादिद्वारैश्च ज्ञायन्ते ॥

मुमुक्षूणामित्यादिना । मुमुक्षूणां परममुपशममिच्छतामित्यर्थः । अविद्यामूलकत्वात्कर्मणां तन्निवृत्तिमन्तरेणात्यन्तिकनिवृत्त्यसंभवात्पूर्वोपार्जितकर्मोच्छेदोऽपूर्वकर्मानुपजनिश्चाविद्यानिवृत्त्यैवोपपद्यत इत्यविद्यानिवृत्तिद्वारा तदुभयमिच्छतामित्युत्तरविशेषणद्वयस्यार्थः । परिसंख्यानानुष्ठानप्रयोजनमाहाविद्याहेतव इति । अविद्या हेतुर्निदानं येषां ते तथा, दोषा रागद्वेषादयस्ते च वागादीनां व्यापारोत्पत्तिहेतवस्त-

द्व्यापाराच्च द्विविधं कर्मजातं शास्त्रीयं स्वाभाविकं च देवतिर्यङ्मनुष्यत्वप्रापकमुपचीयत इति यतो ऽतस्तन्मोक्षार्थमविद्यारागादिनिबन्धनकर्मतत्फलसङ्गनिवृत्त्यर्थं परिसंख्यानं कार्यमित्यर्थः । परिसंख्यानप्रकारं सोपस्करं निरूपयति । तत्रेत्यादिना । तत्र प्रथममात्मानमनात्मभ्यो विविच्यानुसंदधीतेत्युपदिशंस्तद्विवेकप्रकारमाह । शब्दस्पर्शेत्यादिना । विषयत्वहेतुः श्रोत्रादिग्राह्यत्वादिति । स्वात्मनि शब्दादिस्वरूपे परेषु वा घटादिषु विज्ञानाभावो विज्ञातृत्वाभावश्चैतन्याभावो वा निश्चितो यथा लोष्टादीनां विषयाणां तथा तेषामेव शब्दादीनां भूतसूक्ष्माणां परिणतानां देहाद्याकारतामापन्नानां यथोक्तविज्ञानाभावो निश्चीयत इति योजना, विमता देहादयो न चेतनावन्तो विज्ञानकर्मत्वाद् लोष्टादिवदित्यर्थः । हेत्वसिद्धिं परिहरति । श्रोत्रादीति । ज्ञायन्ते देहाद्याकारपरिणताः शब्दादय इति शेषः ॥ ६९ ॥

एवं देहेन्द्रियमनोबुद्धिप्राणाहंकारपर्यन्तस्य साक्ष्यस्यानात्मतया हेयत्वमुपदिश्यावशिष्टमहेयमनुपादेयं च साक्षिणमात्मानं दर्शयति ।

(७०) येन च ज्ञायन्ते स ज्ञातृत्वादतज्जातीयस्ते हि शब्दादयो ऽन्योन्यसंसर्गित्वाज्जन्मवृद्धिविपरिणामापक्षयनाशसंयोगवियोगाविर्भावतिरोभावविकारविकारिक्षेत्रबीजाद्यनेकधर्माणः सामान्येन च सुखदुःखाद्यनेककर्माणः तद्विज्ञातृत्वादेव तद्विज्ञाता सर्वशब्दादिधर्मविलक्षणः ॥

येन चेति । अतज्जातीयो भूतसंघातविलक्षणस्वभाव इत्यर्थः । विलक्षणस्वभावत्वमेव प्रकटयितुं विषयस्वभावमुपन्यस्यति । ते हीत्यादिना । जन्मग्रहणादेव तदनन्तरास्तित्वं गृहीतं द्रष्टव्यं, जन्मादयः षड् भावानां स्वरूपनिबन्धना विकाराः संयोगविभागौ पुत्राद्यनुबन्धनिबन्धना आविर्भावतिरोभावशब्दावागन्तुकप्रकाशविषयतया जडत्वद्योतकौ दर्शनादर्शने आविर्भावादिशब्दार्थः । विकारविकारीति । व्रणगण्डविस्फोटकाद्यवस्थोच्यते । क्षेत्रबीजेति स्त्रीपुम्प्रकृत्यात्मकपरिणामभेद उक्तः आदिपदादनुक्तावान्तरभेदग्रहः । एवंविधानेकधर्मवन्त इत्यर्थः । सामान्येनेति । शब्दाद्यनुभवे सति सुखदुःखमोहरागाद्युत्पत्तिः प्रसिद्धेत्यर्थः । कर्मशब्दः कार्यवचनः । शब्दादिविषयतदवस्थासाक्षिणस्तद्विलक्षणस्वभावत्वमाह । तद्विज्ञातृत्वादेवेति ॥ ७० ॥

एवं साक्षिसाक्ष्यान्वयव्यतिरेकाभ्यामात्मानात्मानौ विविच्यात्मानमेव शुद्धमहं ब्रह्मास्मीत्यनवरतमनुचिन्तयतो यदान्यप्रयुक्तशब्दाद्युपलम्भनिमित्तविक्षेप उपस्थितो भवति तदा कृपानैष्ठुर्यादिविकारोद्भवपरिहारायानुचिन्तनीयमुपदिशति ।

(७१) तत्र शब्दादिभिरुपलभ्यमानैः पीड्यमानो विद्वानेवं परिसंचक्षीत, शब्दस्तु ध्वनिसामान्यमात्रेण विशेषधर्मैर्वा षड्जादिभिः प्रियैः स्तुत्यादिभिरिष्टैरनिष्टैश्चासत्यबीभत्सपरिभवाक्रोशादिभिर्वचनैर्मां दृक्स्वभावमसंसर्गिणमविक्रियमचलमनिधनमभयमत्यन्तसूक्ष्ममविषयं गोचरीकृत्य स्प्रष्टुं नैवार्हति । असंसर्गित्वादेव मा,मत एव न शब्दनिमित्ता हानिर्वृद्धिर्वा ऽतो मां किं करिष्यति स्तुतिनिन्दादिप्रियाप्रियत्वलक्षणः शब्दो ऽविवेकिनं हि शब्दमात्मत्वेन गतं प्रियशब्दो वर्द्धयेदप्रियश्च क्षपयेदविवेकित्वाद्, न तु मम विवेकिनो बालाग्रमात्रमपि कर्तुमुत्सहते, इत्येवमेव स्पर्शसामान्येन तद्विशेषैश्च शीतोष्णमृदुकर्कशादिज्वरोदरशूलादिलक्षणैश्चाप्रियैः प्रियैश्च कैश्चिच्छरीरसमवायिभिर्बाह्यागन्तुकनिमित्तैश्च न मम काचिद्विक्रिया वृद्धिहानिलक्षणा अस्पर्शत्वात्क्रियते, व्योम्न इव मुष्टिघातादिभिः, तथा रूपसामान्येन तद्विशेषैश्च प्रियाप्रियैः स्त्रीव्यञ्जनादिलक्षणैररूपत्वान्न मम काचिद्धानिर्वृद्धिर्वा क्रियते, तथा रससामान्येन तद्विशेषैश्च प्रियाप्रियैर्मधुराम्ललवणकटुतिक्तकषायैर्मूढबुद्धिभिः परिगृहीतैररसात्मकस्य मम न काचिद्धानिर्वृद्धिर्वा क्रियते, तथा गन्धसामान्येन तद्विशेषैः प्रियाप्रियैः पुष्पाद्यनुलेपनादिलक्षणैरगन्धात्मकस्य न मम काचिद्धानिर्वृद्धिर्वा क्रियते ।

“अशब्दमस्पर्शमरूपमव्ययं तथा रसं नित्यमगन्धवच्च यत्तद्”

इति श्रुतेः ॥

तत्र शब्दादिभिरिति। उक्तमेव विषयं विभज्य व्युत्पादयति। शब्दस्त्विति। ध्वनिरव्यक्तवर्णविशेषो नादमात्र इत्यर्थः। विशेषधर्मैरित्यस्य व्याख्या षड्जादिभिरित्यादि, मां दृक्स्वभावमित्यस्य विवरणार्थानि विशेषणान्यसंसर्गिणमित्यादीनि । उत्सहत इतीत्यत्र परिसंचक्षीतेत्यनुषङ्गः । किं च य एवेत्यतः प्राक्तनो ग्रन्थः स्पष्टार्थः ॥ ७१ ॥

एवं तावच्छब्दस्पर्शरूपरसगन्धैः सामान्यविशेषरूपैर्न हानिर्वृद्धिर्वा ममेति तैरनभिभवमनुचिन्तनीयमभिधायेदानीं शब्दाद्यनुभवमनुचिन्तनीयं दर्शयति ।

(७२) किं च य एव बाह्याः शब्दादयः ते शरीराकारेण संस्थिताः तद्ग्राहकैश्च श्रोत्राद्याकारैरन्तःकरणद्व-

यतद्विषयाकारेण चान्योन्यसंसर्गित्वात्संहतत्वाच्च सर्वक्रियासु तत्र एवं सति विदुषो न मम कश्चिच्छत्रुर्मित्रमुदासीनो वास्ति, तत्र यदि कश्चिद् मिथ्याज्ञानाभिमानेन प्रियमप्रियं वा प्रयुयुक्षेत क्रियाफललक्षणं तन्मृषैव प्रयुयुक्षते सः । तस्याविषयत्वान्मम अव्यक्तो ऽयमचिन्त्यो ऽयमिति श्रुतेः । तथा सर्वेषां पञ्चानामपि भूतानामविकार्यो ऽविषयत्वादच्छेद्यो ऽयमदाह्यो ऽयमिति स्मृतेर्यापि शरीरेन्द्रियसंस्थानमात्रमुपलभ्य मद्भक्तानां विपरीतानां च क्रियाऽक्रियादिप्रयुयुक्षा, तज्जा च धर्म्माधर्मादिप्राप्तिः सा तेषामेव, न तु मय्यजरे ऽमृते ऽभये ॥

किं च य एवेति । य एव शरीरेन्द्रियाकारैः परिणम्य संस्थितास्त एवान्तःकरणद्वयतद्विषयसुखदुःखाद्यात्मना च परिणमन्त इत्यध्याहारः, तत्र हेतुद्वयमाहान्योन्येति । सर्वक्रियासु संहतत्वात्संभूयकारित्वादित्यर्थः । ततः किमित्यत आह । तत्रैवं सतीति । भूतभौतिकानामेव सक्रियत्वे सति विदुषो मम सर्वविकारविकारिसंघातसाक्षिणो निर्विकारस्य न कश्चिच्छब्दादिर्विद्यत इति चिन्तयेद्, यदि कश्चिन्मिथ्याज्ञाननिमित्ताद्देहाभिमानान्मम प्रियमप्रियं वा क्रियाफललक्षणं प्रयुयुक्षेत प्रयोक्तुमिच्छेत्स तन्मृषैव प्रयुयुक्षते तस्याविषयत्वात्प्रियाद्यगोचरत्वान्ममेति चिन्तयेदिति योजना, । प्रियाद्यविषयत्वे मानमाहाव्यक्तोयमिति । अविकारित्वं चात्मनश्चिन्तयेदिति सप्रमाणमाह । तथा सर्वेषामिति । नन्वेवमनाधेयातिशयश्चेदात्मा कथं तर्हि तमुद्दिश्यान्येषामुपकाराद्यर्थे प्रवृत्तिस्तत्राह । यापीति । शरीरसंस्थानमेव ते पश्यन्ति नात्मानं, शरीरे च ममाभिमानाभावादात्मनश्च सङ्गादिविलक्षणत्वान्न मयि तत्कृतोतिशयः, किं तु तेषामेव यथाक्रियं फललाभ इत्यर्थः ॥ ७२ ॥

स्वस्यानाधेयातिशयत्वे प्रमाणमाह ।

(७३) नैनं कृताकृते तपतो न कर्मणा वर्द्धते नो कनीयान्, स बाह्याभ्यन्तरो ह्यजो, न लिप्यते लोकदुःखेन बाह्य, इत्यादिश्रुतिस्मृतिभ्यो ऽनात्मवस्तुनश्चासत्त्वादिति परमो हेतुरात्मनश्चाद्वयत्वविषयाणि द्वयस्यासत्त्वाद्यानि सर्वाण्युपनिषद्वाक्यानि विस्तरशः समीक्षितव्यानिसमीक्षितव्यानि ॥

इति श्रीमच्छङ्करभगवत्पादकृतौ उपदेशसहस्र्यां गद्यबन्धः समाप्तः ॥

नैनमित्यादिना । किं च यद्यनात्मा नाम स्यात्तदा तत्कृतं प्रियमप्रियं वा भवेन्न तन्ममास्ति सर्वात्मत्वान्ममेति चिन्तयेदित्याहानात्मवस्तुनश्चेति । कुतस्तस्यासत्त्वमित्यत्र हेतुमाहात्मनश्चेति । आत्मनश्चाद्वयत्वे प्रामाणिके सति तद्विरुद्धस्य द्वयस्यासत्त्वादित्यर्थः । उक्तार्थसाधकं प्रमाणमप्यनुशीलनीयमित्याह । यानीति । ब्रह्मविद्याप्रतिपादकानि सर्वाणि वेदान्तवाक्यानि विस्तरशो बहुशाखोपसंहारेण पुनःपुनरालोचनीयानीत्यर्थः । द्विरुक्तिर्गद्यबन्धसमाप्तिद्योतनार्था ॥ ७३ ॥

उपदेशसहस्र्यास्सद्गद्यबन्धो यथामति ।
व्याख्यातो रामतीर्थेन भक्त्या स्वज्ञानसिद्धये ॥

॥ संपूर्णः सव्याख्य उपदेशसहस्र्या गद्यप्रबन्धः ॥

---

## ॥ उपदेशसहस्र्याः पद्यप्रबन्धः ॥

॥ ओं नमः श्रीमहागणपतये ॥

यत्राध्यस्तमिदं सर्वं मेयमात्राद्यविद्यया ।
भाति नोभाति यज्ज्ञानात्तदस्मि ब्रह्म चित्सुखम् ॥ १ ॥

तदेवं सर्वोपनिषदर्थसारसंग्रहं गद्यबन्धप्रबन्धेन संक्षेपतो युक्त्योपदिश्य पुनरप्युक्तमेवार्थजातं पद्यबन्धप्रबन्धेन सोपस्करं विस्तरेणोपदेष्टुकामो भगवान्भाष्यकारः पद्यग्रन्थारम्भे ग्रन्थप्रतिपाद्यपरदेवतानमस्काररूपं मङ्गलं कृतं शिष्यशिक्षार्थं श्लोकेनोपनिबध्नाति ।

॥ श्रीगणेशाय नमः ॥

(१) चैतन्यं सर्वगं सर्वं सर्वभूतगुहाशयम् ।
यत्सर्वविषयातीतं तस्मै सर्वविदे नमः ॥ १ ॥

चैतन्यमिति । तस्मै सामान्यतः प्रसिद्धाय नमः प्रह्वीभावो भूयादित्यर्थः । तस्य विशेषजिज्ञासायां लक्षणमाह । सर्वविद इति । सर्वं वेत्तीति सर्ववित् तस्मै सर्वशब्देन भूतभवद्भविष्यदित्येतदात्मकं जगदुच्यते तत्सर्वं सर्वावस्थं सर्वदा सवितृवत्संनिधिसत्तामात्रेण प्रकाशयत् सर्ववित् नहीदं जडं स्वसत्तास्फूर्त्योः स्वतन्त्रं भवति, अतो यदधीनसत्तास्फूर्त्तिमदिदं तदस्ति सर्वज्ञं सर्ववित्सर्वाश्रय इति तटस्थलक्षणं सिद्धं भवतीति भावः । एवं जगत्प्रवृत्तिस्थितिसंहारनियामकत्वेन सन्मात्रतया ताटस्थ्येन लक्षितस्य स्वरूपलक्षणं वदन् सर्वविषयवेदनाश्रयतया सर्ववित्त्वमिति वैशेषिकादिमताशङ्कां वारयति । चैतन्यमिति । यच्चैतन्यं चितिस्वभावं ज्ञानस्वरूपं तस्मै इति यत्तच्छब्दयोः संबन्धः, "विज्ञानमानन्दं ब्रह्म" "सत्यं ज्ञानमनन्तं ब्रह्मे"त्यादिश्रुतिभ्यः नह्यचित्स्वभावस्य चिद्धर्मकता युज्यते, न ह्यनुष्णस्वभावकं जलमुष्णत्वधर्मकं

भवतीति भावः। चिदेकरसस्यापि सर्वज्ञत्वं मायोपाधिकं व्यावहारिकमित्यनवद्यम्। ननु चेतनोऽणुपरिमाण इत्येकदेशिनो, मध्यमपरिमाण इति दिगम्बरा मन्यन्ते, अतस्तस्य सर्वविषयसंसर्गाभावे कथं सर्वज्ञत्वं, प्रकाशो हि सावित्रादिः स्वसंसृष्ट एव प्रकाशव्यवहारहेतुर्नासंसृष्टे विषय इत्यत आह। सर्वगमिति। नित्यं विभुं सर्वगत, माकाशवत्सर्वगतश्च नित्यः, स पर्यगाच्छुक्र, मित्यादिश्रुतिविरोधादणुपरिमाणत्वादिकल्पनानवकाश इति। उत्क्रान्त्यादेर्लिङ्गोपाधिकत्वश्रवणाच्च तेन स्वाभाविकविभुत्वार्थकश्रुतिबाध इति दिक्। ननु सर्वगमित्युक्ते सर्वमन्यत्तद्गतं च ब्रह्मान्यदिति तस्य वस्तुपरिच्छेदप्रतिभासात्सांख्यादिवादिमतवत्सजातीयविजातीयभेदवत्वं प्राप्तमित्यत आह। सर्वमिति। सर्वं खल्विदं ब्रह्म, इदं सर्वं यदयमात्मा, आत्मैवेदं सर्व, मित्यादिश्रुतेरित्यर्थः। अनेन सर्वोपादानत्वमुक्तम्, उपादानं हि स्वकार्यं सर्वं व्याप्नुवद्व्यापकं भवति नानुपादानं, तन्तुदेकदेशेन संसृज्यमानमव्यापकमेव भवतीत्यतः सर्वोपादानत्वात्सर्वमित्यभिप्रायः। सर्वात्मकमपि ब्रह्म जीवाद्व्यावृत्तं जीवस्य ब्रह्मणोऽभिन्नत्वाद्ब्रह्मसंसारिसंसारिभावेन विरुद्धधर्मवतोरैक्यं संभवति दहनतुहिनवदित्यत आह। सर्वभूतगुहाशयमिति। सर्वभूतानां स्थावरजङ्गमानां गुहासु बुद्धिषु शेत इति सर्वभूतगुहाशयं गूढा अस्यां ज्ञानज्ञेयज्ञातृपदार्था इति गुहा बुद्धिर्गूहतेः संवरणार्थस्य धातोरिदं रूपं, सर्वप्राणिबुद्ध्यन्तःसाक्षितया निर्विकारं वर्त्तत इत्यर्थः। तथा च श्रुतिः। "यो वेद निहितं गुहायां परमे व्योमन्" "हृद्यन्तर्ज्योतिः पुरुषः" "स वा एष आत्मा हृदि तस्यैतदेव निरुक्तं हृदयमित्याद्या, तथा च तत्सृष्ट्वा तदेवानुप्राविशदित्यादिना स्रष्टुरेव ब्रह्मणो जीवरूपेण प्रवेशश्रवणादयमात्मा ब्रह्मेत्यादितादात्म्यश्रुतेश्च न ब्रह्मणोऽन्यो जीव इत्यवधीयते, विरुद्धधर्मसंसर्गप्रतिभासस्तूपाधिनिबन्धनो न स्वरूपनिबन्धन इति भावः। एतेन जीवो नाम ब्रह्मणोंऽशो विकारो वा स्वतन्त्र एव वेति भेदाभेदवादिपक्षा निराकृता वेदितव्याः। ननु सर्वभूतगुहाशयत्वे ब्रह्मणो मानसवेद्यत्वं स्यात्तथा सर्वात्मत्वे प्रपञ्चात्मत्वप्राप्तिरिति शङ्कायामाह। यत् सर्वविषयातीतमिति। सर्वमविद्यातत्कार्यात्मकं विषयमतीत्यावस्थितमित्यक्षरार्थः।

"मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्"

इत्यादिश्रुतेः परमेश्वराधिष्ठितमायाविवर्त्तत्वावगमात्सर्वस्य मायायाश्चानिर्वचनीयत्वाच्च परमार्थतः किमपि ब्रह्मणो भिन्नं वस्त्वस्ति, तथा तत्सर्वान्तःकरणतत्प्रचारसाक्षिणो न मानसवेद्यत्वं संभाव्यते, नहि मिथ्यादृष्टिगृहीतेन मरीच्युदकादिना भूम्याद्युदकादिमत्परमार्थतो भवति, न वा काष्ठेनाग्निः प्रकाश्यते दह्यते वा, अतो युक्तं सर्वविषयातीतत्वमिति भावः। तथा च श्रुतिः। "नेह नानास्ति किं चन" "यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सहे"त्याद्या, अत्र चैतन्यमित्यादिविशेषणत्रयं तत्त्वंपदार्थसाधारणं, सर्वभूतगुहाशयमिति च बुद्ध्यादिसाक्षी त्वंपदार्थ उक्तः, सर्ववित्पदेन तत्पदवाच्यं ब्रह्मोच्यते, सर्वविषयातीतमिति तत्पदलक्ष्यमुक्तं, यत्तच्छब्दयोः सामानाधिकरण्यादेकार्थवृत्तित्वे सति तत्त्वंपदार्थयोरैक्यमखण्डवाक्यार्थस्तात्पर्यवृत्त्या प्रतिपादितो भवति। तदेवं मङ्गलाचरणव्याजेन वेदान्तशास्त्रीयविषयाद्यनुबन्धो ऽप्यत्र प्रपञ्चितो, ऽस्य तत्प्रकरणत्वद्योतनाय। तथाहि, उक्तवाक्यार्थो विषय,श्चैतन्यं सर्वविषयातीतमिति च चिदात्मनः सर्वानर्थसंस्पर्शित्वाभावोक्तेरशेषानर्थनिवृत्त्युपलक्षितं निरतिशयानन्दाविर्भावात्मकं ब्रह्मैव प्रयोजनमुक्तमर्थात्तत्कामो ऽधिकारी सूचित एव भवति। उक्तविशेषणानां वेदान्तेष्वेव प्रसिद्धेः, शास्त्रब्रह्मणोः प्रतिपाद्यप्रतिपादकभावः संबन्धो ध्वनितः॥१॥

एवं देवतानमस्कारव्याजेन वेदान्तप्रतिपाद्यपरदेवतातत्त्वमुपक्षिप्तमिदानीं वेदानां तत्परत्वं प्रतिपादयितुं कर्मकाण्डनिर्वृत्तमर्थमनूद्य तेन ज्ञानकाण्डाख्यवेदान्तानां सङ्गतिमभिदधानस्तेषामगतार्थत्वमनन्यशेषत्वं च तावदाह।

(२) समाप्य क्रियाः सर्वा दाराग्न्याधानपूर्विकाः।
ब्रह्मविद्यामथेदानीं वक्तुं वेदः प्रचक्रमे॥ २॥

समाप्येति। वेद इदानीं ब्रह्मविद्यां वक्तुं प्रचक्रम इत्यन्वयः। इदानीमिति जिज्ञासोरुपस्थितिसमय उक्तः। अथेति जिज्ञासाप्रवृत्तिप्रयोजकहेतुसाधनचतुष्टयसंपत्त्यानन्तर्यमुच्यते। तथा च विवेकवैराग्यशमादिसाधनसंपन्नस्य मुमुक्षोर्मोक्षसाधनब्रह्मविद्यां साक्षात्प्रतिपादयितुं ज्ञानकाण्डात्मको वेदः प्रवर्त्तत इत्यर्थः। कुतो ऽस्य साधनसंपत्तिरित्यपेक्षायां कर्मकाण्डोक्तकर्मानुष्ठानजनितबुद्धिशुद्धित इत्यभिप्रेत्याह। समाप्येत्यर्द्धेन। दाराग्न्याधानपूर्विका इति विहितक्रियामात्रोपलक्षणं नित्यनैमित्तिकप्रायश्चित्तोपासनारूपाः सर्वाश्रमप्रयुक्ता विधिविहिताः सर्वाः क्रियाः समाप्य समाप्तिं प्रापय्य कर्मकाण्डात्मना अनुष्ठेयकर्माणि प्रतिपाद्य स्थितो वेद इति संबन्धः। अयं भावः। वेदो हि स्वतः प्रमाणभूतः सर्वार्थप्रकाशको नित्यनिरतिशयपुरुषार्थमर्थयमानस्य तदुपायं मृगयतः सर्वोत्साहं प्रयतमानस्यापि तमलभमानस्य तादृक् पुरुषार्थसाधनं प्रत्यक्षादिभिरनवगम्यमानमुपदेष्टुं प्रवर्त्तते नित्यनिरतिशयपुरुषार्थश्च मोक्ष एव नान्य इति मोक्षोपायप्रतिपादने वेदतात्पर्यमवगम्यते, श्रुतिस्मृती चात्र भवतः "सर्वे वेदा

यत्पदमामनन्ति" "सर्वे वेदा यत्रैकीभवन्ति स मानसीन आत्मा जनाना"मिति । वेदैश्च सर्वैरहमेव वेद्य इति च । मोक्षसाधनं च साक्षादात्मतत्त्वज्ञानमेव"तमेव विदित्वाति-मृत्युमेति नान्यः पन्था विद्यते ऽयनाये"ति श्रुतेस्तच्च नाशुद्धान्तःकरणस्योपदेष्टुं युक्तं तस्य तद्ग्रहणसामर्थ्याभावात् श्रुतिश्च भवति ।

"नाविरतो दुश्चरितान्नाशान्तो नासमाहितः ।
नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयाद्" ॥

इति। अतस्तस्य ज्ञानोत्पत्तिप्रतिबन्धकदुरितक्षयार्थानि नित्यानि कर्माणि प्रथमं विद्यन्ते तानि च संयोगरूपचोदनासमाख्यानामविशेषेण सर्वशाखाप्रत्ययन्यायेनेतिकर्त्तव्याङ्गकलापपरिमाणाधिकारिविशेषोक्तिपूर्वकमनुष्ठापयति"धर्मेण पापमपनुदति""न कर्म लिप्यते नरे""अविद्यया मृत्युं तीर्त्वे"त्यादिश्रुतेर्दुरितक्षय एव धर्मानुष्ठानस्य परं प्रयोजनं परंपरया परमपुरुषार्थोपयोगित्वान्न तु कर्मणा पितृलोक इत्याद्युक्तः पितृलोकादिः, प्रयोजनान्तरस्य क्षयादिदोषदुष्टतया हेयत्वात्, आनुषङ्गिकं हि तत्कर्मफलं भवति, भवदपि नेदं चित्तशुद्धिप्रतिबन्धकं, तदुक्तं सुरेश्वराचार्यैः ।

नित्येषु शुद्धिः प्राधान्याद्भोगोप्यप्रतिवन्धकः ।
भोगं भङ्गुरमीत्यन्ते बुद्धिशुद्धिस्तु रोचते ॥

इति । काम्याभिचारादिकर्मविधानं तु पुरुषवशीकरणेन स्वाभाविकप्रवृत्तिनिवारणार्थमित्येषा दिक् । तथा च चित्तशुद्धेः प्रथमापेक्षितत्वात्तदर्थं कर्मविधानं प्रथमं प्रवर्त्तते पश्चाच्च ज्ञानोपदेश इति कर्मज्ञानकाण्डयोरर्थद्वारा हेतुहेतुमद्भावेन पौर्वापर्यसंबन्ध उक्तो ज्ञानकाण्डस्य साक्षात्फलार्थविषयत्वात्कर्मभिरनपेक्षितार्थत्वाच्चागतार्थत्वमनन्यशेषत्वं च तस्य सिद्धमिति ॥ २ ॥

ननु कर्माणि कृतानि कर्त्तुः फलप्रदानि लोके दृष्टानि, यथा पित्रादिभिरुपदिष्टविषयाणि दृष्टफलानि, तैर्निषिद्धविषयाण्यनिष्टफलानि, तदुदास्तविषयाणि दैवाधीनतयोभयार्थानि, तथा वेदविहितानि कर्माणीष्टफलानि, निषिद्धान्यनिष्टफलानि, विहितप्रतिषिद्धव्यामिश्रकर्माणीष्टानिष्टव्यामिश्रफलानि भवन्ति । तथा च शास्त्रम् ।

अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् ।

इति । एवं च कर्मणां फलाव्यभिचारान्मोक्षस्य च फलविशेषत्वात्कर्मविशेषसाध्यत्वोपपत्तेः न विद्यया कृत्यमस्तीति न तदर्थानि ज्ञानकाण्डानि मुमुक्षुणा विचारणीयानि, किं तु कर्माण्येव कानि चिच्चातुर्मास्यादीन्यक्षयफलार्थान्यनुष्ठेयानीति कर्म जडानां प्रत्यवस्थानमाशङ्क्याह ।

(३) कर्माणि देहयोगार्थं देहयोगे प्रियाप्रिये ।
ध्रुवे स्यातां ततो रागो द्वेषश्चैव ततः क्रियाः ॥ ३ ॥

कर्माणीति द्वाभ्याम्। कर्मफलं हि जात्यायुर्भोगलक्षणं तच्च देहसंबन्धं विना नोपपद्यत इति कर्माणि देहयोगार्थमेवेत्यर्थः । देहयोगे च संसारो दुर्वार इत्याह । देहयोग इति । देहसंबन्धे सति प्रियाप्रिये सुखदुःखे ध्रुवे स्यातां भवेतामेव "न वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ती"ति श्रुतेः । ततः सुखदुःखयोस्तत्साधनयोश्च यथासंख्यं रागद्वेषौ वासनारूपौ स्यातां ततो रागद्वेषाख्यान्निमित्तात्क्रियाः वाङ्मनःकायचेष्टाः स्युरित्यर्थः ॥ ३ ॥

(४) धर्माधर्मौ ततो ऽज्ञस्य देहयोगस्तथा पुनः ।
एवं नित्यप्रवृत्तोयं संसारश्चक्रवद्भृशम् ॥ ४ ॥

अज्ञस्य प्रत्यगात्मतत्त्वं ब्रह्माजानतो ऽहंकारपरवशस्य ततः क्रियाभ्यो विहितप्रतिषिद्धरूपाभ्यो धर्माधर्मौ पुनर्भवेतां पुनस्ततो देहयोगस्ततः प्रियाप्रिये इत्येवं संसारो जन्ममरणकर्मकरणतत्फलभोगलक्षणः कुलालचक्रवद्भृशमत्यर्थमविश्रमं यथा स्यात्तथा नित्यप्रवृत्तो ऽनादिकालमारभ्य प्रवर्त्तते अयं प्रत्यक्ष इत्यर्थः । तस्मादैहिकार्थानां कर्मणामनित्यफलत्वस्य लोके दृष्टत्वादामुष्मिकफलार्थानामपि कर्मत्वादनित्यफलत्वानुमाना"त्तद्यथेह कर्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षीयते" इति वस्तुबलावलम्बिश्रुतेश्चाक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतमित्याद्यर्थवादश्रुत्यवलम्बनेन कर्मफलस्य नित्यत्वाशा न कार्येति भावः ॥ ४ ॥

नन्वेवमपि न मोक्षार्थिनो ज्ञानेन प्रयोजनमस्ति कृतकर्मणां संसारनिमित्तानां फलभोगानन्तरं नाशे सति निमित्ताभावान्नैमित्तिकाभाव इति न्यायादयत्नलभ्यत्वान्मोक्षस्येत्याशङ्क्याज्ञानमूलत्वात्कर्मणस्तस्मिन्सति तदनुपरमान्नैवमिति आहाज्ञानमिति । यद्वाज्ञस्य कर्मप्रवृत्त्यविरमात्संसाराविरमः कृतकर्मफलभोगसमयेपि कर्मप्रवृत्त्यवश्यंभावात्पुनर्भोगसंतानाविच्छेदश्चेत्कथं तर्हि कर्मनिवृत्त्या मोक्षसिद्धिरिति वीक्षायामाह ।

(५) अज्ञानं तस्य मूलं स्यादिति तद्धानमिष्यते ।
ब्रह्मविद्यात आरब्धा ततो निःश्रेयसं भवेत् ॥ ५ ॥

अज्ञानमिति । अयमर्थः ।
नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति ।
एकः शत्रुर्न द्वितीयोस्ति शत्रु-
रज्ञानतुल्यः पुरुषस्य राजन् ।

येनाविष्टः कुरुते कार्यते च
घोराणि कर्माणि सुदारुणानि ॥

इत्यादिश्रुतिस्मृतिभ्यो ऽज्ञानं तस्य पूर्वोक्तस्य कर्मतत्फललक्षणस्य संसारस्य मूलं स्यादिति हेतोस्तस्याज्ञानस्य हानमात्यन्तिकोपरम इष्यते यत्नेन संपादनीयतयाभिप्रेयते मूलोन्मूलनमन्तरेण प्ररोहाविच्छेदादित्यर्थः । "तरति शोकमात्मवित्" ।

यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः ।
तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति ॥
ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ।
तेषामादित्यवज् ज्ञानं प्रकाशयति तत्परम् ॥

इत्यादिश्रुतिस्मृतिभ्यो यतो विद्यैवाज्ञानहानहेतुरवगतो ऽतो ब्रह्मविद्यारब्धा, ततो ब्रह्मविद्यया निःश्रेयसं कैवल्यं भवेत्तदुदये नान्तरीयकतया ऽज्ञाननिवृत्तौ केवलात्मस्वरूपावस्थानरूपो मोक्षो लब्ध इव भवेदित्यर्थः ॥ ५ ॥

ननु कर्मणां विचित्रशक्तित्वा"द्धिरण्यदा अमृतत्वं भजन्त" इत्यादिश्रुतेश्च ।

कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।

इत्यादिस्मृतेश्च कर्मभिरेव मोक्षसिद्धेः कृतं ब्रह्मविद्ययेति शङ्कामपाकुर्वन्ननन्तरोक्तमर्थमुपपादयति द्वाभ्याम् ।

(६) विद्यैवाज्ञानहानाय न कर्माप्रतिकूलतः ।
नाज्ञानस्याप्रहाणे हि रागद्वेषक्षयो भवेत् ॥ ६ ॥

विद्यैवेति । संसारमूलाज्ञानहानाय विद्यैव समर्थेत्यध्याहारः । एवकारार्थमाह । न कर्मेति । तत्र हेतुरप्रतिकूलत इत्यविरोधादित्यर्थः । विद्यैव प्रकाशरूपत्वादप्रकाशरूपामविद्यां तत्कार्यं च निवर्त्तयति, यथा रज्ज्वावरणाविद्यां तमसि तत्कल्पितसर्पाद्याकारं च रज्जुतत्त्वज्ञानप्रदीपो निवर्त्तयतः, स्वभावविरोधात्, कर्म तु नाज्ञानतमोनिवर्त्तकं तदविरोधित्वादप्रकाशात्मकत्वाद्वा नीहारस्तोमवदित्याद्यनुमानै"र्नान्यः पन्था" इत्यादिश्रुतिभिश्च विरोधा"द्धिरण्यदा" इत्यादावापेक्षिकममृतत्वं पर्यवस्यति. कर्मणैव हीति स्मृतिः "न कर्मणा न प्रजये"ति श्रुतिविरोधे ऽन्यपरेत्यतो न तद्बलात्कर्मभिरज्ञानहानशङ्केत्यभिप्रायः । विद्यां विना ऽज्ञानक्षयाभावश्चेदज्ञानक्षयार्थमेव विद्यान्विष्यतां, तत्कार्यस्य तु परमार्थत्वाद्विद्यया नाशानुपपत्तेस्तन्नाशे हेत्वन्तरमन्वेषणीयमित्यत आह । नाज्ञानस्येति । अज्ञानस्याप्रहाणे रागादिक्षयो न भवेदविवेकपूर्वकत्वस्य रागादावन्वयव्यतिरेकसिद्धत्वादज्ञानमया रागादयो न परमार्था इत्यज्ञाननिवृत्त्यैव निवर्त्तन्ते इति न तत्र हेत्वन्तरान्वेषणेत्यर्थः ॥ ६ ॥

रागाद्यनिवृत्तौ का हानिरिति तत्राह ।

(७) रागद्वेषक्षयाभावे कर्म दोषोद्भवं ध्रुवम् ।
तस्मान्निःश्रेयसार्थाय विद्यैवात्र विधीयते ॥ ७ ॥

रागद्वेषेति । दोषाः रागद्वेषमोहास्तदुद्भवं तद्धेतुकं कर्म ध्रुवं पुनः स्यादेवेति पुनः संसारो दुर्वार इत्यर्थः । उपपादितमर्थमुपसंहरति । तस्मादिति । अत्रेति । वेदान्तोक्तिः विधीयते प्रकाश्यत इत्यर्थः ॥ ७ ॥

## ॥ अथ वृषभानुजानाटिकायाः ॥

### ॥ द्वितीयोऽङ्कः ॥

ततः प्रविशति सवनरक्षिका वृन्दा ।

वृन्दा । समन्तादवलोक्य । स्वगतम् ।

कुसुमपरिमलेनामोदितालिर्लतानां
वलितकिसलयानां लास्यलीलोपदेष्टा ।
लुलितकमलवृन्दः शीकरासारवोढा
मृदुमलयसमीरो वाति वैभातिकोऽयम् ॥ २४ ॥

ऊर्ध्वमवलोक्य ।

मञ्जिष्ठारुणदीधितिर्मधुकरैर्मङ्गल्यगीतिस्तुतः
कोकाह्लादपटुः सरोरुहवनं प्रीत्या समुज्जृम्भयन् ।
लोकालोककरः करैश्च तमसां स्तोमं समुत्सारय-
न्नारोहत्युदयाचलं रविरयं बन्धूकगुच्छच्छविः ॥ २५ ॥

मुहूर्तकमिव स्थित्वा । सखि वनरक्षिके दूरोदितो भगवान् सहस्रदीधितिः, किं नागतो गोचारणाय गोकुलेन्द्रनन्दनः ।

वनरक्षिका । भअवदि जह अदूरे को वि मन्तेदि तह तक्केमि, कण्हो संणिहिदो भविस्सदि, त्ति वणरक्खाए गच्छम्ह[1] ।

इति निष्क्रान्ते । प्रवेशकः ।

ततः प्रविशति सप्रियालापः श्रीकृष्णः ।

प्रियालापः । भो वअस्स माहवीमण्डवसमीवे पुणो वि महुरालावो सुणीअदि, तक्केमि मअणपूआत्थं आअच्छदि रहिआ, एहि इमिणा लदावीहिआमग्गेण सिग्घं गदुअ तस्सिं तमालमूले अंतरिदा भविअ चिट्ठम्ह[2] ।

कृष्णः । ततः किम् ।

[1] भगवति यथा अदूरे कोऽपि मन्त्रयति तथा तर्कयामि, कृष्णः संनिहितो भविष्यति, इति वनरक्षायै गच्छावः ।

[2] भो वयस्य माधवीमण्डपसविधे पुनरपि मधुरालापः श्रूयते, तर्कयामि मदनपूजार्थमागच्छति राधिका, एहि अनेन लतावीथिकामार्गेण शीघ्रं गत्वा तस्मिंस्तमालमूले अन्तरितौ भूत्वा तिष्ठावः ।

प्रियालापः । तहिं किल उवहसिदमत्र्अणसहस्सो भवं पूआबलिप्पणई भोदु, एक्का तु ममाब्भत्थणा[१] ।

कृष्णः । किंचित् स्मित्वा । कथयतु भवान् ।

प्रियालापः । गोवद्धणपूआबलिं विअ सव्वं भच्छइस्ससि, बुभुक्खिदं मं वि सुमिरिस्ससि[२] ।

कृष्णः । विहस्य । नायं परिहाससमयः, विशायतः ।

प्रियालापः । तथा कृत्वा सभयं प्रतिनिवृत्य कृष्णमालिङ्गति ।

कृष्णः । प्रियालाप प्रियालाप किमिति कातरोऽसि ।

प्रियालापः । णिबिड़ान्धआरा क्खु एसा लदावीहिआ, ण सक्कुणोमि अग्गे गमिदुं, अणेअसूरसमद्दुदी तुमं अहं विअ विअदभओ भविअ अग्गदो होहि[३] ।

कृष्णः । सस्मितम् । धिङ्मूर्ख, आत्मगतं भयं मयि निरूपयसि ।

इति परिक्रामन् पुरो निभाल्य । सोऽयं तमालद्रुमो य एषः ।

लतासमालिङ्गितविग्रहो दधत्
स्फुरत्प्रसूनैः स्फुटरोमविक्रियाम् ।
द्रवन्मधुस्वेदलवैर्विभूषितो
व्यनक्ति कामं किल कामिनः श्रियम् ॥ २६ ॥

यावदस्य मूले निलीय परिपालयावस्तत्समागमम् । तथा कुरुतः ।

कृष्णः । सविषादम् । सखे प्रियालाप,

अदूरे खलु वासन्तीमण्डपः स इति स्फुटम् ।
न जाने प्रणयिन्या मे विलम्बः कथमादृतः ॥ २७ ॥

प्रियालापः । तेण हि किंपि अग्गे णिगदुअ णिरूवइस्सं[४] ।

कृष्णः । यद्भवतेऽभिरोचते ।

प्रियालापः । नाट्येन तथा कृत्वा । पुनः प्रविश्य । परिहासेन विषादमूक इव नमितमुखस्तिष्ठति ।

कृष्णः । सशङ्कम् । सखे किमित्यवनतमुखस्तूष्णीं स्थितोऽसि ।

प्रियालापः । ण मे जीहा एत्थ पड़िवअणं आमन्तिदुं फुड़इ[५] ।

कृष्णः । सनिःश्वासम् ।

दर्शनपदमुपयाता यदवधि मदिरायतेक्षणा सहसा ।
तदवधि हृदयेनाहं मदनेषुभयादिवोन्मुक्तः ॥ २८ ॥

इति मनसिजपीडां रूपयति ।

प्रियालापः । सव्यथमिवात्मगतम् । गरुआहिलासेण पीड़िदो क्खु एसो, अलं दाणिं परिहासक्कीलाए[१] । विहस्य । पिअवअस्स मुंचेहि विसादं, माहवीमण्डवादो पत्थिदा क्खु सा इध जेव्व आअच्छदि, एसो हं पुणो वि अण्णेसिदुं गच्छम्हि[२] ।

कृष्णः । दूराद्विसर्पन्तं मधुरध्वनिमाकर्ण्य सवितर्कमात्मगतम् ।

वासन्तीमधुपानमत्तमधुपध्वानः किमुज्जृम्भते
किंवा हंसकदम्बकूजितमिदं दूरात् समुत्सर्पति ।
आं ज्ञातं, मणिनूपुरध्वनिरयं मद्वल्लभायाः स्फुटं
दृश्यन्ते हि दिशस्तदङ्गरुचा हेमाम्बुसिक्ता इव ॥ २९ ॥

प्रियालापः । कृष्णस्य मुखं निरीक्ष्य सत्वरं निष्क्रान्तः ।

ततः प्रविशति सखीभिः परिवारिता राधा ।

राधा । हला चंपअलदे अज्ज वि ण संणिहिदो भोदि सो तमालओ[३] ।

चम्पकलता । अग्गदो एव्व एसो, किं ण आलोअदि भोदी[४] ।

राधा । विलोक्य । परिक्रामन्ती तदालवालपरिसरे स्थिता ।

प्रियालापः । प्रविश्य । कृष्णं चालयति । भो वअस्स दिट्ठिआ पात्थिदसिद्धीए वड्ढसे[५] । अङ्गुल्या दर्शयन् । पेक्ख दाव णं[६] । उभौ निलीय स्थितौ विलोकयतः ।

चम्पकलता । तमालं राधां चावलोक्य । साकूतम् । सहि काणिं तमालमूले सुवण्णजूहिआलदा विअ पड़िहादि[७] ।

कृष्णः । स्वगतम् । युक्तमुक्तं चम्पकलतया । सस्पृहमुद्वीक्ष्य ।

धन्यस्त्वमसि तमाल स्पृष्टस्तन्व्या लतावदनया यत् ।
अद्य स्थावरजन्मा जातस्त्वं जङ्गमादधिकः ॥ ३० ॥

राधा । सभ्रूभङ्गम् । हला सहि पच्चक्खेण चम्पअलदा तुमं अलीओवमाए मं विडम्बअन्ती ण लज्जसि[८] ।

चम्पकलता । सहि जो जहिं जुज्जदि सो एव्व तहिं उवमं लहेदि त्ति[९] ।

---

[१] तत्र किलोपहसितमदनसहस्रो भवान् पूजाबलिप्रणयो भवतु, एका तु ममाभ्यर्थना ।

[२] गोवर्धनपूजाबलिमिव सर्वं भक्षयिष्यसि बुभुक्षितं मामपि स्मरिष्यसि ।

[३] निबिड़ान्धकारा खल्वेषा लतावीथिका, न शक्नोम्यग्रे गन्तुम्, अनेकसूर्यसमद्युतिस्त्वमहमिव विगतभयो भूत्वाऽग्रतो भव ।

[४] तेन हि किमप्यग्रे निर्गत्य निरूपयिष्ये ।

[५] न मे जिह्वात्र प्रतिवचनमामन्त्रितुं स्फुरति ।

[१] गुरुकाभिलाषेण पीडितः खल्वेषः, अलमिदानीं परिहासक्रीडया ।

[२] प्रियवयस्य मुञ्च विषादम्, माधवीमण्डपात् प्रस्थिता खलु सा इत एवागच्छति, एषोऽहं पुनरप्यन्वेष्टुं गच्छामि ।

[३] हे चम्पकलते अद्यापि न संनिहितो भवति स तमालकः ।

[४] अग्रत एवैषः, किं नालोकते भवती ।

[५] भो वयस्य दिष्ट्या प्रार्थितसिद्ध्या वर्धसे ।

[६] प्रेक्षस्व तावदेनाम् ।

[७] सखि केदानीं तमालमूले सुवर्णयूथिकालतेव प्रतिभाति ।

[८] हे सखि प्रत्यक्षेण चम्पकलता त्वमलीकोपमया मां विडम्बयन्ती न लज्जसे ।

[९] सखि यो यत्र युज्यते स एव तत्रोपमां लभत इति ।

प्रियालापः । सहर्षम् । पिअवअस्स दिट्ठिआ लद्धफलोऽसि, किं अज्ज वि दे संसओ [1] ।

कृष्णः । सखे अभिनन्दनीयं ते वचस्तथापि तद्दुर्लभतामाकलय्य दुराशंसि मनः प्रत्ययं न समुपगच्छतीति ।

संनिहितेऽपि दुरापे वस्तुनि मनसोऽनवाप्तविषयस्य ।
भवति न संशयनाशो बहुशोऽप्याश्वास्यमानस्य ॥ ३१ ॥

प्रियालापः । सप्रणयकोपम् । किं अदिट्ठपुव्वस्स दे सज्जातले आअच्छिअ उववसदि, अलं परिदेविदेण, जह तुए पुलोइदा सा, जइ सकिदपि पुलोअइस्सदि तुमं [2] ।

कृष्णः । स्मित्वा । ततः किम् ।

प्रियालापः । तदो क्खु सफलप्पत्थणो भविअ मम तक्किदं सुमिरिस्ससि [3] ।

कृष्णः । विहस्य । अत एव त्वं प्रियालापः ।

चम्पकलता । हला राहे कधं णिउत्तरा चिट्ठसि [4] ।

राधा । अनाकर्णितकेनैव सखीभिरुपनीतैर्गन्धपुष्पादिभिः कुसुमायुधं समभ्यर्चयति ।

सर्वाः । सप्रणाममञ्जलिं बध्वा । भअवं कुसुमाउह सिग्घं जेव्व वरं देहि णो पिअसहीए [5] ।

कृष्णः । सखे पश्चादागमिष्यति भवान्, अहं तावदात्मानं दर्शयामि । परिक्रम्योपसृत्य च । कात्र वरं प्रार्थयते ।

सर्वाः । ससंभ्रमम् । अज्ज ण का वि, एदाए णो पिअसहीए अच्चीअदि भअवं मणोहवो [6] । इति राधां सस्मितं दर्शयन्ति ।

राधा । तिर्यगपाङ्गेन चक्षुषा तन्मुखमालोकयन्ती । स्वगतम् । जह अस्स दंसणादो अणीसम्हि सहिअअस्स तह तक्केमि, इमिणा तेण दुल्लहजणेण होदव्वं [7] ।

कृष्णः । राधामुपेत्य । अयि कीदृगवसरेऽभिलाषो वर्तते ।

राधा । शृङ्गारलज्जामभिनीय ससाध्वसमधोमुखी तिष्ठति ।

चम्पकलता । तथाभूतां तां कृष्णं चावलोक्य । जनान्तिकम् । हला तमालिए को वि इमो सिहिसिहंडसेहरो मणिकण्णपूरंसुजालेण दुदिएण विअ सपल्लवविविहकुसुमत्तवआवदंसेण पडिफलिदकवोलफलओ आअदविलोअणेहिं दमिदप्पवरइंदीवरप्पहो सहजारुणेण अहरबिम्बेण अहरीकिदं विद्दुमलदं लज्जाए विअ अण्णवे णिमण्णं हिअए अवहारिअ विअ किदमहुरस्सिदो अदित्थूलमुत्ताहलहारलदाए अलंकिदउरोदेसो हिरण्णदुदिपीदकोसेअअंसुअं वसाणो लीलारबिन्देण सणाहीकिददक्खणकरकमलो रूवसमुच्चएण मम्महसदस्स वि विमोहणो मुहचंदादो महुसंमिदाइं महुराहिजादक्खराइं उच्चारअन्तो अहिणवकिसोरदिव्वाकिदी अङ्गलावण्णप्पहापूरेण कालिन्दीजलसङ्कं समुप्पाअअन्तो जह इमाए पिअसहीए मणोमीणं बलेण आअढ़्दिव्व तह तक्केमि, सो कण्हा एसो, अण्णहा से मणोहरणे को अण्णो समत्थो, जेण इमं पेक्खिअ मणोहवसरपढमप्पहारपीड़ाए विअ जणिदसीक्कारा उम्मिसन्तसेदविन्दुइन्दुसुन्दरमुही णिरन्तरणिपड़िदसरणिवहेण विअ समुग्गदेण रोमञ्चजालेण आचिदतणूलदा अविरलोच्छसिदसमीरणेण पओहरवेपहुमुप्पादअन्तेण असकिदअवणिज्जंतअंसुअपल्लवा सद्धसेण वेवमाणकरकमला लज्जाए वत्तुमसक्का लक्खीअदि एसा, तह जेव्व एसो वि विअदणिमेसं इमं पिअसहिं पुलोअअंतो आलिहितो विअ चिट्ठदि [1] ।

तमालिका । सहि अहं वि एव्वं विभावेमि [2] ।

चम्पकलता । कृष्णमुपेत्य । अज्ज भवदो दंसणेण जेव्व उवलद्धो वरो, को उण अवरो वरो हुविस्सदि [3] ।

राधा । सप्रणयकोपम् । हला सहि जाणेमि, किंपि वक्कं मंतेसि, ता इदो गमिस्सं, [4] इति गन्तुमिच्छति ।

नेपथ्ये । महान् कलकलः ।

अद्य भोः कृष्णमनालोकयद्भिर्गोसमूहैरसकृदुच्चैराहूयमानैरपि पदे पदे स्थित्वा स्थित्वा मुहुः पश्चान्मुहुः पुरतोऽर्पितदीनदृष्टिभिरनुपजातपरिचर्यैरिवातिव्याकुलतामुपनीता वयम्,

---

[1] प्रियवयस्य दिष्ट्या लब्धफलोऽसि, किमद्यापि ते संशयः ।

[2] किमदृष्टपूर्वस्य ते शय्यातले आगत्योपविशति, अलं परिदेवितेन, यथा त्वया विलोकिता सा, यदि सकृदपि विलोकयिष्यति त्वाम् ।

[3] तदा खलु सफलप्रार्थनो भूत्वा मम तर्कितं स्मरिष्यसि ।

[4] सखि राधे कथं निरुत्तरा तिष्ठसि ।

[5] भगवन् कुसुमायुध शीघ्रमेव वरं देहि नः प्रियसख्यै ।

[6] आर्य न कापि, एतया नः प्रियसख्यार्च्यते भगवान् मनोभवः ।

[7] यथास्य दर्शनादनीशास्मि स्वहृदयस्य तथा तर्कयामि, अनेन तेन दुर्लभजनेन भवितव्यम् ।

[1] हे तमालिके कोऽप्ययं शिखिशिखण्डशेखरो मणिकर्णपूरांशुजालेन द्वितीयेनेव सपल्लवविविधकुसुमस्तबकावतंसेन प्रतिफलितकपोलफलक आयतविलोचनाभ्यां दमितप्रवरेन्दीवरप्रभः सहजारुणेनाधरबिम्बेनाधरीकृतां विद्रुमलतां लज्जयेवार्णवे निमग्नां हृदयेऽवधार्यैव कृतमधुरस्मितोऽतिस्थूलमुक्ताफलहारलतया अलंकृतोरोदेशो हिरण्यद्युतिपीतकौशेयांशुकं वसानो लीलारविन्देन सनाथीकृतदक्षिणकरकमलो रूपसमुच्चयेन मन्मथशतस्यापि विमोहनो मुखचन्द्रान्मधुसंमितानि मधुराभिजाताक्षराण्युच्चारयन्नभिनवकिशोरदिव्याकृतिरङ्गलावण्यप्रभापूरेण कालिन्दीजलशङ्कां समुत्पादयन् यथास्याः प्रियसख्या मनोमीनं बलेनाकर्षतीव तथा तर्कयामि स कृष्ण एषः, अन्यथास्या मनोहरणे कोऽन्यः समर्थः, येनेमं प्रेक्ष्य मनोभवशरप्रथमप्रहारपीड़येव जनितसीत्कारा उन्मिषत्स्वेदबिन्द्विन्दुसुन्दरमुखी निरन्तरनिपतितशरनिवहेनेव समुद्गतेन रोमाञ्चजालेनाचिततनूलता अविरलोच्छ्वसितसमीरणेन पयोधरवेपथुमुत्पादयताऽसकृदपनीतांशुकपल्लवा साध्वसेन वेपमानकरकमला लज्जया वक्तुमशक्ता लक्ष्यत एषा, तथैवैषोऽपि विगतनिमेषमिमां प्रियसखीं विलोकयन्नालिखित इव तिष्ठति ।

[2] सखि अहमप्येवं विभावयामि ।

[3] आर्य भवतो दर्शनेनैवोपलब्धो वरः, कः पुनरपरो वरो भविष्यति ।

[4] हे सखि जानामि, किमपि वक्रं मन्त्रयसि, तदितो गमिष्यामि ।

यावदस्मिन्नपि लतामण्डपे प्रियालापद्वितीयं तं प्रियवयस्यमन्वेषयामः ।

सर्वाः । ससंभ्रममाकर्णयन्ति ।

कृष्णः । स्वगतम् । हन्त एते गोपाला नूनं मदन्वेषणाय समागताः । उच्चैः । सखे प्रियालाप अग्रतो भूत्वा निवर्तयैतान् ।

प्रियालापः । तह,[१] इति नाट्येन निष्क्रान्तः ।

चम्पकलता । अज्ज एदिणा कोलाहलेण अम्हाणं हिअए संभमो संवुत्तो, आणावेदु भवं णो घरगमणत्थं[२] ।

कृष्णः । सुनिःश्वस्य । यद्येवमभिरोचते भवतीभ्यस्तत् सुखेन गम्यतां पुनः समागमाय ।

सर्वाः । परिक्रामन्ति ।

राधा । गमनभङ्गमभिनयन्ती परावृत्य स्थिता । हला चंपअलदे णिपड़िदो एत्थ मम हारलदामज्झदो महाणीलमणी, अण्णेसेहि दाव णं[३] ।

कृष्णः । स्वगतम् ।

उपकृतं सखि हारलते त्वया
यदनया मदिरेक्षणया वयम् ।
स्मितसुधावलितैर्नयनाञ्चलै-
श्चलितया परिवृत्य निरूपिताः ॥ ३२ ॥

चम्पकलता । कृष्णं राधां चावलोक्य तयान्वेषयन्ती । साकूतम् । सहि एहि गच्छम्ह, दुल्लहो दाणिं सो णीलमणी,[४] इति कृष्णं भूयोऽवलोक्य स्मितं करोति ।

राधा । अनालोकितकेनैव विमनस्केव तिष्ठति ।

चम्पकलता । हारं निरूप्य । सहि दोसो तुज्झ हिअअस्स जेव्व[५] ।

राधा । कधं[६] ।

चम्पकलता । जं सोक्कण्ठेण इमिणा इमो मणी हारमज्झे ण विभावीअदि त्ति[७] ।

राधा । अइ असंवद्धजंपिणि कहिं[८] ।

चम्पकलता । सोत्प्रासम् । घरं पड़ि[९] ।

१ तथा ।

२ आर्य एतेन कोलाहलेनास्माकं हृदये संभ्रमः संवृत्तः. आज्ञापयतु भवान् नो गृहगमनार्थम् ।

३ हे चम्पकलते निपतितोऽत्र मम हारलतामध्यतो महानीलमणिः, अन्वेषय तावदेनम् ।

४ सखि एहि गच्छावः, दुर्लभ इदानीं स नीलमणिः ।

५ सखि दोषस्तव हृदयस्यैव ।

६ कथम् ।

७ यत् सोत्कण्ठेनैतेनायं मणिर्हारमध्ये न विभाव्यते ।

८ अयि असंवद्धजल्पिनि कुत्र ।

९ गृहं प्रति ।

राधा । सभ्रूभङ्गम् । हला जाणेमि दे वक्कभणिदाइं, ता गमिस्सं ।[१] इति कृष्णं सस्पृहं पश्यन्ती सोच्छ्वासं सह सखीभिर्निष्क्रान्ता ।

कृष्णः । सवियोगदुःखम् । स्वगतम् ।

भूयोऽपि मे नयनयोः पथि सुन्दरी सा
यास्यत्यशेषभुवनश्रियमादधाना ।
लज्जां विजित्य किमहो न धृता पटान्ते
पूर्वं मया तदधुनालमतिप्रलापैः ॥ ३३ ॥

सुनिःश्वस्य । य एकः प्रियालापो मे मनोविनोदनायाभूत्, सोऽपि न जाने कथं विलम्बते ।

ततः प्रविशति प्रमुदितः प्रियालापः ।

प्रियालापः । ही ही भोः किदं क्खु मए जं पिअवअस्सेण आणत्तं, दाणिं उण सिग्घं गदुअ तं पेक्खिस्सं[२] । परिक्रामन् पुरोऽवलोक्य । दिट्ठिआ इध जेव्व आअच्छदि एसो पिअवअस्सो, जाव उवसप्पामि णं[३] । ईषद्विदूरादेव निरूप्यात्मगतम् । एसो पभादचन्दविपाण्डुरं मुहाणणं दधाणो ओणदत्थिमिददिट्ठी अलसबलिदसरीरो हिअएण सह किंपि मंतअन्तो विअ मणसो मे हरिसं विसादं च उप्पादेदि, तक्केमि ताए विसहाणुकुमारिआए अवहरिदं से मणोरअणं । सुण्णहिअओ जेण संजातो[४] ।

समुपसृत्य । जेदु जेदु पिअवअस्सो[५] ।

कृष्णः । उद्वीक्ष्य । किं प्रियालापः, सखे एह्येहि चिरविरहितं मां परिष्वजस्व ।

प्रियालापः । जं आणवेदि भवं[६] । नाट्येन तथा कुर्वन् ससंभ्रममपसृत्य । पिअवअस्स ससिसहस्ससीअलो वि भवं संपदि किं मम जेव्व अण्णस्स कस्स वि वा विरहेण अदिमेत्तं संदावं उव्वहदि, अहवा विणिज्जिदरइविब्भमा जा विसहाणुकुमारिआ तुअ लोअणपहं पउत्ता तं उद्दिसिअ, तुव उण अङ्गलावण्णेहिं अवहीरिदो समुप्पण्णाणुसओ विअ कुसुमाउ-

१ हे जानामि ते वक्रभणितानि, तद्गमिष्यामि ।

२ ही ही भोः कृतं खलु मया यत् प्रियवयस्येनाज्ञप्तम्, इदानीं पुनः शीघ्रं गत्वा तं प्रेक्षिष्ये ।

३ दिष्ट्या इत एवागच्छत्येष प्रियवयस्यः, यावदुपसर्पाम्येनम् ।

४ एष प्रभातचन्द्रविपाण्डुरं मुखाननं दधानोऽवनतस्तिमितदृष्टिरलसवलितशरीरो हृदयेन सह किमपि मन्त्रयन्निव मनसो मे हर्षं विषादं चोत्पादयति, तर्कयामि तया वृषभानुकुमारिकयाऽपहृतमस्य मनोरत्नम्, शून्यहृदयो येन संजातः ।

५ जयतु जयतु प्रियवयस्यः ।

६ यदाज्ञापयति भवान् ।

हो तुमं णिद्दहदि[1] ।

कृष्णः । अवनतमुखस्तिष्ठति ।

प्रियालापः । भो अलं लज्जाए, इमस्स मन्दमारुदन्दोलणपइरणमहुसीअरसुरहिसीअलपरिसररत्तासोअविडवस्स वेदिआए उवरि खणं उवविसिअ परिस्समवणएदु भवं, अहं एत्थ पडीआरं चिन्तेमि[2] । उभौ परिक्रम्योपविशतः ।

प्रियालापः । हस्ताभ्यां शिरः पिधाय निमीलितलोचनश्चिन्तां नाटयति ।

नेपथ्ये । कलकलः ।

प्रियालापः । कर्णं दत्त्वा । पिअवअस्स एदे गोवाला पुणो वि समाअच्छन्दि, उट्ठेहि अत्तणो सुभदंसणेण अमिओवमेण महुरालावेण अ इमाणं परिस्समं अवणेहि[3] ।

कृष्णः । ससंभ्रममुत्थाय । क्वेते क्वेते ।

नेपथ्ये । श्रुतिमभिनीय । वयस्य श्रूयताम् ।

मन्ये मदन्वेषणतत्पराणां
गोपालकानां ध्वनिराविरास्ते ।
गोमण्डलीनामपि मद्विनायं
हंभारवः शंसति कातरत्वम् ॥ ३४ ॥

तेन हि भवता मद्वचनात् समाश्वासनीयाः यथा भवन्तोऽस्मिन् रमणीये प्रदेशे क्रीडारसमनुभवन्तु, अहं तावदस्यां माधवीमण्डपपरिसरभुवि किमपि कार्यान्तरमतिवाह्य शीघ्रमागमिष्यामि ।

प्रियालापः । जं भवं आणवेदि,[4] । इति निष्क्रान्तः ।

कृष्णः । राधागतोत्कलिकावेशं नाटयन् । सनिःश्वासमात्मगतम् । चिरयति मे वयस्यः प्रियालापः । तावद्गत्वा तत्रैव माधवीमण्डपपरिसरे मनो विनोदयामि । इति परिक्रामति ।

प्रविश्य प्रियालापः ।

कहिं दाणिं पत्थिज्जइ पिअवअस्सेण[5] ।

कृष्णः । सखे तामेव प्रियासंचारैरतिपवित्रीभूतां भूमिमभिगम्य तत्पादपल्लवादिचिह्नैर्दृशौ विलोभयामि तावत् ।

[1] प्रियवयस्य शशिसहस्रशीतलोऽपि भवान् संप्रति किं ममैव अन्यस्य कस्यापि वा विरहेणातिमात्रं संतापमुद्वहति, अथवा विनिर्जितरतिविभ्रमा या वृषभानुकुमारिका तव लोचनपथं प्रवृत्ता तामुद्दिश्य, तव पुनरङ्गलावण्येनावधीरितः समुत्पन्नानुशय इव कुसुमायुधस्त्वां निर्दहति ।

[2] भो अलं लज्जया, अस्य मन्दमारुतान्दोलनप्रकीर्णमधुसीकरसुरभिशीतलपरिसररक्ताशोकविटपस्य वेदिकाया उपरि क्षणमुपविश्य परिश्रममपनयतु भवान्, अहमत्र प्रतीकारं चिन्तयामि ।

[3] प्रियवयस्य एते गोपालाः पुनरपि समागच्छन्ति, उत्तिष्ठात्मनः शुभदर्शनेनामृतोपमेन मधुरालापेन चैषां परिश्रममपनय ।

[4] यद्भवानाज्ञापयति ।

[5] कुत्रेदानीं प्रार्थ्यते प्रियवयस्येन ।

प्रियालापः । जं रुच्चइ पिअवअस्साअ[1] ।

कृष्णः । परिक्रम्यायतो नीचैर्निरूपयन् सरोमोद्भेदम् । सखे पश्य पश्य ।

पदसंततिस्तदीया स्फुटमिह मध्ये गतालिपदवीनाम् ।
परिवर्तितायभागैः कथयति मयि साभिलाषतां तस्याः ॥ ३५ ॥

प्रियालापः । भो वअस्स लीलाविणोदे जह पढमं दे मणो आसि, दाणिं तह ण दीसइ, तक्केमि धण्णाए ताए उवरि अदिमेत्तं दे पेम्मं[2] ।

कृष्णः । सुनिःश्वस्य ।

कुतः प्रेमलवोऽप्यस्ति खले मे हृदये खलु ।
सुन्दरीं तामनालोक्य यदहं प्राणिमि प्रिय ॥ ३६ ॥

प्रियालापः । तं जेव्व सुन्दरं क्खु जं भवदो विमोहं उप्पादेदि[3] ।

उभावुपविशतः ।

कृष्णः । सस्पृहम् । सखे प्रियालाप चिन्तितः प्रतीकारो भवता ।

प्रियालापः । साटोपं कर्णौ । चिन्तिदो चिन्तिदो । किंपि पारितोसिअं गेह्निअ कधइस्सं[4] ।

कृष्णः । विहस्याङ्गुलीयकं दातुमुद्यतः ।

प्रियालापः । स्मितं कृत्वा । सुणादु पिअवअस्सो, असेसलोअसुन्दरीहिअअहारी भवं जाए लोअणमग्गं गदो, विरहपज्जुस्सुआए ताए किं मुहुत्तअं वि आसासो । समसुहदुक्खाओ सहीओ अ ण चिन्तअन्ति किं तत्थ पडीआरं, मा उत्तम्म, मम्महो जेव्व दे वक्खवादी[5] ।

कृष्णः । स्मित्वा । प्रियालापं समालिङ्ग्य । सखे, असंशयं प्रियालापोऽसि ।

प्रियालापः । पिअवअस्स का एत्थ पिआलावदा । ण केवलं एव्वं भणीअदि मए, किंपि आकण्णिदं वि[6] ।

कृष्णः । सौत्सुक्यस्मितम् । आवेदयतु वयस्यः ।

[1] यद्रोचते प्रियवयस्याय ।

[2] भो वयस्य लीलाविनोदे यथा प्रथमं ते मन आसीत्, इदानीं तथा न दृश्यते, तर्कयामि धन्यायास्तस्या उपर्यतिमात्रं ते प्रेम ।

[3] तदेव सुन्दरं खलु यद्भवतो विमोहमुत्पादयति ।

[4] चिन्तितश्चिन्तितः, किमपि पारितोषिकं गृहीत्वा कथयिष्ये ।

[5] शृणोतु प्रियवयस्य, अशेषलोकसुन्दरीहृदयहारी भवान् यस्या लोचनमार्गं गतः, विरहपर्युत्सुकायास्तस्याः किं मुहूर्तकमप्याश्वासः, समसुखदुःखाः सख्यश्च न चिन्तयन्ति किं तत्र प्रतीकारम्, मा उत्ताम्य, मन्मथ एव ते पक्षपाती ।

[6] प्रियवयस्य कात्र प्रियालापता, न केवलमेवं भण्यते मया, किमप्याकर्णितमपि ।

प्रियालापः । तदो किल तुमं पेक्खिअ घरं गदा सा कुसुमाउहवाहाए असुत्था संजादा[1] ।

कृष्णः । सव्ययमिव स्वगतम् ।

हा हन्त सुन्दरि कथं कुसुमायुधस्य
त्वं पुष्पकोमलतरं वपुरुद्वहन्ती ।
सोढासि वज्रविशिखानतिदुर्विषह्यान्
दुःखं ममात्र सुभगे द्विगुणत्वमेति ॥ ३० ॥

प्रकाशम् । ततस्ततः ।

प्रियालापः । तदो सहीर्हिं कामअमाणावत्थं तं उवलक्खिअ इहाणेदुं उवकप्पिदो उवाओ[2] ।

कृष्णः । सप्रत्याशम् । ततस्ततः ।

प्रियालापः । ता मा विसीद, अविलम्बेण जेव्व सा हिअअंगमा इह आअमिस्सदि, त्ति इमस्स रत्तासोअपाअवस्स मूलं समस्सिअ अलक्खिदसरीरा होम[3] ।

प्रविश्य सुबलः । भो वअस्स गोसमूहो तुमं विणा जलं ण अभिणन्ददि, गोट्ठगमणस्स वि संणिहिदो क्खु कालो, ता आअच्छदु भवं[4] ।

कृष्णः । सनिःश्वासम् । प्रियालापं प्रत्यपवार्य ।

सा सौन्दर्यनिधिर्विलासभवनं मीनध्वजस्यापि वा
कान्तीनामधिदेवताधिकरणं माधुर्यसारस्य वा ।
तामुद्वीक्ष्य सखे तदादि गतवान् सर्वेन्द्रियाणामहं
सार्धं तद्गतमानसेन गलितोत्साहः किलानीशताम् ॥ ३८ ॥

प्रियालापः । तह वि जह तह गमणिज्जं[5] ।

इति निष्क्रान्ताः सर्वे ॥

इति श्रीमथुरादासेन विरचितायां श्रीवृषभानुजानामनाटिकायां द्वितीयोऽङ्कः ॥ २ ॥

---

[1] तदा किल त्वां प्रेक्ष्य गृहं गता सा कुसुमायुधबाधयाऽस्वस्था संजाता ।

[2] तदा सखीभिः कामयमानावस्थां तामुपलक्ष्येहानेतुमुपकल्पित उपायः ।

[3] तन्मा विषीद, अविलम्बेनैव सा हृदयंगमा इहागमिष्यति, इत्यस्य रक्ताशोकपादपस्य मूलं समाश्रित्यालक्षितशरीरौ भवावः ।

[4] भोवयस्य गोसमूहस्त्वां विना जलं नाभिनन्दति, गोष्ठगमनस्यापि संनिहितः खलु कालः, तदागच्छतु भवान् ।

[5] तथापि तथा तथा गमनीयम् ।

THE
# VAIŚESHIKA APHORISMS
OF
# KAṆĀDA.
## FIRST BOOK, SECOND DAILY LESSON.

*(Continued from page 267.)*

Existence is universal. भावो ऽनुवृत्तेरेव हेतुत्वात् सामान्यमेव ॥ ४ ॥

Aph. 4. Existence is general only, for it is a cause of extensive conception.

[1] Existence—being—[is general] because it is a cause of extensive conception—of the notion of existing in many places, the word 'only, (*eva*) excludes the notion of existence in few places. V.

द्रव्यत्वं गुणत्वं कर्मत्वञ्च सामान्यानि विशेषाश्च ॥ ५ ॥

Aph. 5. The notions of Substance, Quality, and Action, are general and particular.

[2] The particle 'and' (*cha*) implies in addition the notions of Earth &c., the classes contained in Substance the notions of Colour &c., the classes contained in Quality, and the notions of Throwing upwards &c., the classes contained in Action. U.

अन्यत्रान्त्येभ्यो विशेषेभ्यः ॥ ६ ॥

Aph. 6. With the exception of the ultimate particulars.

[3] The words 'general and particular' [in the preceding aphorism] are to be understood with the exception of those particulars that are said to exist as eternal Substances. According to the teachers [of this system] they are ultimate because they exist in the end or conclusion [of the division of a compound Substance], and there is [then] nothing further which causes non-extensive conception. According to the authors of the Vṛitti they are ultimate because they exist at the end or conclusion of production and destruction, and are ultimate particulars because they exist in eternal Substances. For those particulars only are causes of non-extensive conception and are not at the same time general in their character. U.

---

[1] भावः सत्ता अनुवृत्तिरधिकदेशवृत्तित्वबुद्धेर्हेतुत्वात् एवकारेणाल्पदेशवृत्तित्वबुद्धिव्यवच्छेदः ॥

[2] चकारः पृथिवीत्वादीनि द्रव्यगतजातीः रूपत्वादीनि गुणगतजातीः उत्क्षेपणत्वादीनि कर्मगतजातीः समुच्चिनोति ॥

[3] अन्त्या विशेषा नित्यद्रव्यवृत्तयो ये ऽभिहिताः तान् वर्जयित्वा सामान्यविशेषाभिधानमित्यर्थः । अन्ते ऽवसाने भवन्तीत्यन्त्या यतो न व्यावर्तकान्तरमस्तीत्याचार्याः उत्पादविनाशयोरन्ते ऽवसाने भवन्तीत्यन्त्या नित्यद्रव्याणि तेषु भवन्तीत्यन्त्या विशेषा इति वृत्तिकृतः । ते हि विशेषा एव व्यावृत्तिबुद्धिहेतवो न तु सामान्यरूपा अपीति ॥

सदिति यतो द्रव्यगुणकर्मसु सा सत्ता ॥ ७ ॥

Aph. 7. That is Existence from which [there arises the conviction] with respect to Substances, Qualities, and Actions, that [this is] existent.

Existence is not identical with Substance &c.

द्रव्यगुणकर्मभ्यो ऽर्थान्तरं सत्ता ॥ ८ ॥

Aph. 8. Existence is something different from, Substances, Qualities, and Actions.

[1] It might be said, 'Existence is not apprehended by means of its being something distinct from Substance, Quality, and Action. Therefore Existence is one or other of those three. For whatever is different from anything else is apprehended by means of its difference from it, as a water-pot [by means of its difference] from a piece of cloth, whereas Existence is not apprehended by means of its difference from them. Consequently it is identical with them.' For this reason [Kaṇáda] proclaimed [the above aphorism] Substance &c., are not extensive, Existence is extensive. Accordingly its difference from them may be established by the consideration of their opposite properties characterised by extensiveness and non-extensiveness. U.

Continued.

गुणकर्मसु च भावान्न कर्म न गुणः ॥ ९ ॥

Aph. 9. Existence is neither an Action nor a Quality, because it exists in Qualities and Actions.

[2] When it is said 'neither an Action nor a Quality' the proposition negatively implies that neither is it a Substance. For an Action does not exist in Actions, nor a Quality in Qualities, nor a Substance in Quality or Action. But Existence is in Quality and Action. Existence, then, is different from them, for it differs in property from Substance, Quality, and Action. U.

Continued.

सामान्यविशेषाभावेन च ॥ १० ॥

Aph. 10. And by reason of the Non-existence [in Existence] of Generality and Particularity.

[3] Substance &c., have been previously stated to be general and particular. Therefore from the Non-existence in it of Substance &c., Existence is not identical with Substance &c. V.

[1] ननु द्रव्यगुणकर्मभ्यः पृथग्भावेन सत्ता नानुभूयते ऽतो द्रव्याद्यन्यतममेव सत्ता यतो हि यद्भिन्नं भवति तत्ततो भेदेनानुभूयते यथा घटः पटात् न च सत्ता तेभ्यो भेदेनानुभूयत इति तदात्मिकैवेत्यत आह ॥ द्रव्यादयो ऽननुगताः सत्ता चानुगता। तथा च अनुगतत्वाननुगतत्वलक्षणविरुद्धधर्माध्यासेन तेभ्यो भेदस्य सिद्धत्वात् ॥

[2] न गुणो न कर्मेति वक्तव्ये व्यत्ययेनाभिधानं न द्रव्यत्वमित्यपि सूचयति न हि कर्म कर्मसु वर्त्तते न वा गुणो गुणेषु न वा द्रव्यं गुणे कर्मणि वा सत्ता तु गुणे कर्मणि च वर्त्तते तेन द्रव्यगुणकर्मवैधर्म्यात् तेभ्यो भिन्नैव सत्ता ॥

[3] सामान्यविशेषाः पूर्वोक्ताः द्रव्यत्वादयः तथा च द्रव्यत्वाद्यभावात् सत्ता न द्रव्यात्मिकेत्यर्थः ॥

The notion of Substance not identical with Substance &c.

अनेकद्रव्यवत्त्वेन द्रव्यत्वमुक्तम् ॥ ११ ॥

Aph. 11. The notion of Substance is explained by means of its inherence in many Substances.

[1] He states that the notion of Substance [or Substantiality] also is not identical with Substances &c., [i. e. with Substances, Qualities, and Actions]. Inherence in many Substances is inferred from connexion with Inhesion, and Eternity from Generality. Accordingly Substantiality as well as existence, is explained to be different from Substance &c., on the grounds of its Inhesion in many Substances and of its eternity. V.

Continued.

सामान्यविशेषाभावेन च ॥ १२ ॥

Aph. 12. And by reason of the Non-existence [in the notion of Substance] of Generality and Particularity.

[2] If the notion of Substance were a class identical with Substance &c., the general and particular notions of Earth, Water, Light, and the like would exist in that class. U.

[3] The notion of Substance is not identical with Substance &c., because of the Non-existence [in that notion] of the notions of Substance, Quality, Action, Earth, Water, Light, and theke. V.

*(To be continued.)*

## THE RAMAYANA.

### III.

The hermit thus with watchful heed
Received the poem's pregnant seed,
And looked with eager thoughts around
If fuller knowledge might be found.
His lips with water first bedewed,
He sate in reverent attitude
On holy grass, the points all bent
Together towards the Orient;
And thus in meditation he
Entered the path of poesy.
Then clearly, through his virtue's might,
All lay discovered to his sight,
Whate'er befell, through all their life,
Ráma, his brother, and his wife:
And Daśaratha and each queen
At every time, in every scene:

[1] द्रव्यत्वमपि न द्रव्याद्यात्मकमित्याह। अनेकद्रव्यवत्त्वं समवेतत्वसम्बन्धेन नित्यत्वन्तु सामान्यत्वादेव प्राप्तं तथा च द्रव्यत्वमनेकद्रव्यसमवेतत्वेन नित्यत्वेन च द्रव्यादिभिन्नतया सत्तावदेव व्याख्यातमित्यर्थः ॥

[2] यदि द्रव्यत्व जातिर्द्रव्याद्यात्मिकैव स्यात् यदा तस्यां पृथिवीत्वजलत्वतेजस्त्वादयः सामान्यविशेषाः स्युरित्यर्थः ॥

[3] द्रव्यत्वगुणत्वकर्मत्वपृथिवीत्वजलत्वतेजस्त्वाद्यभावात् द्रव्यत्वं न द्रव्याद्यात्मकमित्यर्थः ॥

His people too, of every sort;
The nobles of his princely court:
Whate'er was said, whate'er was wrought,
Each time they sate, each time they thought.
By fervour of abstraction, he
Could present, past, and future see,
And with his mental eye could grasp,
Like fruit within his fingers' clasp,
The life of Ráma great and good
Roaming with Sítá in the wood.
He told, with this before his eyes,
The tale of Ráma's high emprise,
Each listening ear that shall entice;
A sea of pearls of highest price.
Thus did Válmíki, sage divine,
Record the tale of Raghu's line,
As Nárad, heavenly saint, before,
Had traced the story's outlines o'er.
He told of Ráma's princely birth,
His kindness and heroic worth;
His love for all, his patient youth,
His gentleness and constant truth.
And many a tale and legend old
By aged Viswámitra told.
How Janak's child he wooed and won,
And broke the bow that bent to none.
How he with every virtue fraught
His namesake Ráma met and fought.
The choice of Ráma for the throne,
The malice by Kaikeyí shown,
Whose evil counsel marred the plan
And drove him forth a banisht man.
How the king grieved and groaned, and cried,
And swooned away and pining died.
The subjects' woe when thus bereft;
And how the following crowds he left;
With Guha talked, and firmly stern
Ordered his driver to return.
How Gangá's farther shore he gained:
By Bharadvája entertained,
By his command he journeyed till
He looked on Chitrakúṭa's hill.
How there he dwelt and built a cot:
How Bharat journeyed to the spot.
How Ráma's wrath aside was laid,
Drink-offerings to their sire were paid;
The sandals given by Ráma's hand
As emblems of his right, to stand:
How from his presence Bharat went
And years in Nandigráma spent.
How Ráma entered Daudak's wood
And fierce Sutíkshṇa there withstood.
The favour Anasúyá showed,
The wondrous balsam she bestowed.
How Śarabhanga's dwelling-place
They sought; saw Indra face to face;
The meeting with Agastya; so
The present of the heavenly bow.
How Ráma with Virádha met;
Their home in Panchavaṭa set.
How Śúrpanakhá underwent
The mockery and disfigurement.
Of Triśirá's and Khara's fall,
Of Rávaṇ roused at vengeance' call.
Marícha doomed, without escape;
The fair Videhan lady's rape
How Ráma wept and raved in vain,
And how the vulture-king was slain.
How Ráma fierce Kabandha slew;
How Pampá charmed them with the view.
How Hanumán he came to see,
And first encountered Śavarí.
How Raghu's son, the lofty-souled,
On Pampá's bank wept uncontrolled,
Then journeyed, Rishyamúk to reach,
And of Sugríva then had speech.
The friendship made, which both had sought:
How Báli and Sugríva fought.
How Báli in the strife was slain,
And how Sugríva came to reign
The treaty, Tárá's wild lament;
The rainy night in watching spent.
The wrath of Raghu's lion son,
The gathering of the hosts in one.
The sending of the spies about,
And all the regions pointed out.
The ring by Ráma's hand bestowed,
The cave wherein the bear abode.
The fast proposed, their lives to end;
Sampáti gained to be their friend.
The scaling of the hill, the leap
Of Hanumán across the deep.
Ocean's command, that bade them seek
Maináka of the lofty peak.
The death of Sinhiká, the sight
Of Lanká with her palace bright.
How Hanumán stole in at eve;
His plan the Giants to deceive.
How through the square he made his way
To chambers where the women lay:
Within the Aśoka garden came,
And their found Ráma's captive dame.
His colloquy with her he sought,
And giving of the ring he brought.

How Sítá gave a gem o'erjoyed:
How Hanumán the grove destroyed.
How Giantesses trembling fled,
And servant fiends were smitten dead.
How Hanumán was seized: their ire
When Lanká blazed with hostile fire.
His leap across the sea once more,
The eating of the honey store.

*(To be continued.)*

TO THE EDITOR OF THE PANDIT.

SIR,—I request the favor of your inserting, in the next issue of the *Pandit*, the following remarks on Bábu Śivaprasád's reply to my letter of the 20th September last.

The Bábu's reply is dated the 14th ultimo, so he had nearly six months to think over the subject, but I am sorry to find that, notwithstanding this long gestation, he has confined himself to mere quibbles and verbal criticisms, instead of throwing any new light on the questions under discussion.

The first subject the Bábu notices is the omission of a diacritical mark in a passage quoted by me from his memo. of August last. But I look upon it as of no consequence at all. Of all things diacritical marks on Roman letters are the most puzzling to compositors; and it is rarely that they set them rightly unless urged thereto by repeated corrections in proof by the author. It is not remarkable, therefore, that an accent should be accidentally omitted in a quotation which the author had no opportunity to correct in proof. But it cannot under any circumstances justify the solecism of calling a thing "correct" in one form, and "more correct" in another. That which is correct cannot by any amount of explanation from the Bábu be more so by being modified in some particular way of his own. I shall not, however, quarrel with him for indulging in the solecism.

The main question at issue as regards ع is what is its exact equivalent in the Roman alphabet? And if it has none, for purposes of transliteration and to give to Englishmen some idea of what it is like, what is its nearest equivalent? And in reply I have no hesitation in saying that when the letter is unassociated with a vowel it sounds nearly like an a. According to Arabic Grammarians "its sound is similar to that of an *Alif Mutaharrik*," that is like an a accented, "distinguished in utterance by a very strong compression of the throat," or in other words by being made deeply guttural. Such being the case, I claim that the letter a with a mark of some kind to distinguish it from the simple vowel a, is its best representative. I am also of opinion that to use an apostrophe for the ع instead of an a is to defeat the very object for which romanising is needed. That object, as I take it, is to represent oriental alphabets by certain fixed Roman letters, and no other, so as to be easily and uniformly pronounced by Englishmen. And if I am right in this it must follow that to represent the unelided ع by an apostrophe which is an emblem of elision and not by itself a letter of the Roman alphabet, is to do that which cannot possibly be right. A Roman letter is what is wanted and not an arbitrary mark, for if a mark would suffice, why not use in English the ع itself instead of a symbol for it, both being equally unintelligible to Englishmen?

No doubt the objection of using a vowel to represent a semi-vowel is of weight, but when the character of that vowel is changed by a diacritical mark, it vanishes altogether, particularly in a language where the same letters are sometimes recognised to be vowels and at others, without any change of form, consonants. Nor am I singular in entertaining this opinion. In 1857, even Bábu Śivaprasád adopted it without the slightest modification, and in his Hindi *Varnamálá* (P. 21) recommended ऋ = a as the most appropriate symbol of ع. In 1861 his opinion remained unchanged, and in a pamphlet entitled "Roman Characters," a portion of the preface to which he has reproduced, without acknowledgment,* in his "Memo." of the 1st August, published in the *Pandit* of September last, he used â as the representative of that letter. No doubt he now thinks differently, and it is possible that mature deliberation and accession of new light may have brought on the change; but since he has nowhere avowed the fact, I cannot account for the altered position he has now assumed without thinking of the forgetfulness which is sometimes engendered by the heat of discussion or a spirit of contradiction.

As regards the table of Persian words which Bábu Śivaprasád has offered me to correct, it would be a waste of space to reproduce it here. If the Bábu will supply the place of the ع when it occurs alone or joined to an a, with an a preceded by an apostrophe, and use the apostrophe only for the ع when it occurs along with á, i, e, o or u, the vowels being represented by their respective equivalents, he will carry out completely the plan adopted by me in persuance of the scheme of Professor Wilson.

"For غ," says Bábu Śivaprasád, "notwithstanding the Bábu Sáhib's host of Oriental scholars preferring (gh) I would still have a dotted (g) alone." He admits, however, that it is "a mere matter of taste;" and as such I must say he has full right to indulge in it to any extent he likes. Only he must not expect others to subscribe to his dictum merely to gratify his taste. Agreement and uniformity can be secured only by mutual concessions, and not by an obstinate adherence to one's whims and caprices. Lord Dundreary may "thee a thea thewpent thwimming in the wide open thea" to the top of his bent, but he never gets the public at large to follow him.

* I am sure you would accuse me of an attempt at imposition, if I sent you for publication, as new, or ostensibly so, an article, the bulk of which was under a different name published many years ago.

The remarks made in my last letter regarding the letters ة, ح ' and : have induced Bábu Śivaprasád to cancel the 6th para. of his Memo. It would have given me great pleasure, and obviated an unpleasant discussion if he had treated in the same way his para. about ش; but unfortunately he seems to entertain very strong opinions on the subject. What is more to be regretted, he has even condescended to avail himself of the aid of a garbled extract to maintain them, and to convict me of an absurdity. Advertiug to a remark of mine he observes: "He (Bábu Rájendralála Mitra) says my first assumption that श and ش have exactly similar pronunciation "is not true" because the Sanskrit श has a quite different sound from that of the Persian ش because the palatal S of the Nágari alphabet has no exact equivalent in English, strange reasoning. If the "palatal S of the Nágari alphabet has no exact equivalent in English, why it has none in Persian I cannot understand." This, as a piece of argument, is no doubt quite overwhelming, but unhappily for the Bábu it is built on sand. If any of your readers will refer to p. 115 of the *Pandit* he will find that immediately after the words "it is not true" occurs the sentence: "The Sanskrit श is a flatus that comes from the throat, and has a sharp hissing sound quite different from that of the Persian ش." The Bábu has quietly, but very disingenuously, suppressed that sentence and linked the phrase "it is not true," with the substance of the subsequent sentence in which I said "according to Professor Wilson the palatal S of the Nágari alphabet has no exact equivalent in English." Setting aside this garbling, my reason for believing the Bábu's assumption of the श and ش having exactly a similar pronunciation," being unsound, remains untouched. To overthrow it, the Bábu should shew that the श is not a flatus; that it does not come from the throat; and that it has not a sharp hissing sound different from that of ش; and if he cannot, he should, I think, in common fairness give in.

Referring to the remark in which I had said the second assumption of the Bábu that "the Sanskrit श has a peculiar pronunciation very different from that of the Persian, ش is not true because the sh of the Nágari alphabet finds its exact representation in the English sh," the Bábu says, "I plead the same not guilty" as I have pleaded for my second (qry. first ?) assumption." He then repudiates the authorities I had quoted by the petulant remark "the whole host of European Orientalists (no matter what deep respect and profound regard I have for them) named by him and which the Directories of Europe may contain is no authority for us Indians, in the matter of the pronunciation of our own language. Let the Bábu Sáhib consult our Pandits and Maulvis and prove to me, that ش is a cerebral and not palatal and I shall give in and plead guilty." Now, as the question at issue is what are the English and the Sanskrit equivalents of the Persian ش and Sanskrit श I fail to perceive how the Pandits of the country who know neither Persian nor English can be of the least use in solving it. The Maulavis know the Persian and the Arabic languages, but, generally speaking, they are totally ignorant of the vernacular of England, and under no circumstance can their knowledge of it be of a character to justify our accepting them as better guides than the profound European scholars whom I named in my last letter.

It is undeniable that men like Max Müller and Weber and Böthlingk are better Sanskrit Scholars than most of our living Pandits, and Ewald and Shakespear and Forbes are second to very few Maulavis of India. It is equally beyond all question certain that they possess, in addition to their knowledge of Oriental literature, a mastery over the languages of Europe, both modern and ancient, which no Indian scholar can pretend to. It must follow, therefore, that in questions requiring a knowledge of both the Oriental and the occidental languages for their solution, the opinions of Pandits and Maulvis can count as nothing against those of European Orientalists. Even in questions involving the pronunciation of our own language, the Bábu will find that European scholars, uninfluenced as they are by local peculiarities, prejudices and bias, are much more reliable than the indigenous expounders of our Shasters, or of the Koran of Muhammad. I shall not, however, ask Bábu Sívaprasád to rely on them in solving the question under discussion. If he will repeat the experiments which professor Helmholtz tried some time ago with a laryngoscope, he will have an ocular demonstration before him of the English *sh* being produced behind a "barrier in the mouth formed by drawing the tongue back, and giving it a more or less concave (retroussé) shape, so that we can distinctly see its lower surface brought in position towards the back of the upper teeth or the palate (*Science of Language p.* 133). If he will next turn to Saunaka's Prátiśákhya, he will find that "of the linguals (commonly but wrongly called cerebrals) the tip of the tongue rolled back is the producing organ (मूर्धन्यानां जिह्वाग्रं प्रतिवेष्टितम् Chap. I Sutra 22) He will also see in the same work that the term *múrdhan* does not mean the 'head" but "the dome of the palate," "which is the highest point in the head which the tongue is capable of reaching" that is the *sthána* or place of production of the class *múrdhanya*. In a subsequent Sutra he will further learn that "of the lingual or cerebral ष, the trough shaped tongue is the producing organ." षकारस्य द्रोणिका (C. I. S. 23) Now if he will compare this description of old Saunaka, written over 2,500 years ago, with that of the European philologer of the present century quoted above, he will find that no language could make the English sh and the Sanskrit ष more alike. The similiarity of the words used by scholars of two such different ages to indicate the producing organs and their position is indeed surprising, and

they leave no doubt whatever of the perfect identity of the sh and the ष sounds. As to ش I have failed to perceive any difference between its sound and that of sh in "shine," "shore," "sash" &c., and Bábu Śivaprasád himself admits that its most appropriate representative in the Roman alphabet is *sh*. It must necessarily follow that ष, ش and sh are the same, for I am sure the Bábu will not deny the trite axiom that "things which are equal to the same thing are equal to one another."

I am free to confess that the Maulavis who know the technical terms of the English or the Sanskrit Grammar use the word "palatal" or "Tálavya" to characterise their ش but I cannot help believing that they misuse the terms. A palatal to be so called must be produced in some part of the mouth in front of the Uvula. According to Helmboltz's experiments the middle of the tongue should swell up to the roof of the palate just where the hard palate begins, to modulate the letters of the palatal class, and the Prátiśákhyas fully bear this out by saying that those letters are formed on the palate by the middle of the tongue. तालव्यानां मध्यजिह्वम् Saunaka C. I. S. 21) The *Shajariyyah* letters of the Arabs, however, do not come from the same part of the mouth. According to the *Muntahal Arab* they are located far away from the palate and quite behind the uvula. Thus it says:—

"The *Shajariyyah* letters. They are three, which are contained in the mnemotechnical word شضج [*i.e.*, ض, ش, ج] and *Shajr* means the slit of the mouth (behind), or the part which is between the two maxillary bones, or the part behind them; or the edge of the mouth, or that part which recedes from the place where the mouth sticks together; or the place where the two swellings meet which are under the soft part (lobe) of the ear."

(*Muntahal Arab*, II, p. 1313.)

The place here indicated is the same which is usually assigned to the gutturals क-k, ख.kh, ग-g &c., which are described by Panini as *Kanṭhyas*, but which in the Prátiśákhyas are called *jihvámúlíya*. Thus Saunaka in the Atharva Prátiśákhya says. "Of the letters which have the root of the tongue for their place of origin the base or root i. e. the back part of the jaw is the producing organ." (जिह्वामूलीयानाँ हनुमूलम् C.I.S. 20.) The use of the words which have been translated "behind the maxillary bones" in the Arabic quotation, appear so much like a translation of the Sanskrit *hanumúla* "root of the jaw" that no doubt can remain as to the identity of the localities indicated by the two authors. It follows also that the *shajariyyahs* of the Arabs are not palatals, and consequently the ش of the Arabs is not equal to the ष of the Bráhmaṇs. I am bound to admit that the ش described in the *Mantah al Arab* is a guttural, but since in India it has not that character even in the opinion of Bábu Śivaprasád, we must take it as we find it in the mouths of the people of the country.

When under the rules of *al Furu' al Mustahsanna* ش assumes the sound of j (ج) as in آشدق *ashdak* pronounced nearly as if written آجدق *ajdak*, or of z (ز) as in اشرب *ishrab* pronounced as ازرب izrab, very much in the same way as in English s becomes z in "rise" or "praise," its place of origin must necessarily be different. Local peculiarities also may cause a change as in the case of ष sh pronounced as ख kh in Benares and other parts of the North-Western Provinces. * But they are not at all material to the question at issue.

Bábu Śivaprasád denies that the Sanskrit ष-sh is pronounced like ख-kh, but the language he uses is so vague that I cannot be certain as to what he really means. He says; "The Bábu Sáhib, in the course of argument, I see, mentions that his friends at Benares take ष for kh. To be sure by "friends" he means his Bengali friends at Benares, otherwise our Maháráshṭra Pandits are famous throughout India for their genuine pronunciation." Now, I have the pleasure to reckon among my friends at Benares many native gentlemen who are neither Bengalis nor Maháráshṭra Pandits, such as the much respected Bábu himself, and it was to them that I alluded, and not to my Bengali friends at Benares, who rarely write Hindi and learn barely so much of it as will suffice to carry on their ordinary occupations, and the assertion that "Maháráshṭra Pandits" (who are as much our to Bengalis as to the people of Benares) "are famous for their genuine pronunciation" does not, therefore, at all controvert the truth of my statement. Indeed I am forced very much against my wish to charge the Bábu with want of sincerity in trying indirectly to deny that ष (sh) is pronounced like ख (kh) by a majority of the people of the North-Western Provinces, when he knew perfectly well the contrary to be the fact. It may be that the Bábu has not seen Faizi's Persian translation of the Mahábhárata from which it appears that that great scholar was taught by his Teacher, a Benares Pandit, to write *Rikhi* for *Rishi* "a sage;" Nor the Persian translation of the Upanishads commonly known as that of Dárashekoh, but which, according to Elphinstone, was prepared by several Pandits of Benares, and in which the word *Upanishad* is written "*Upanikhat*;" it is also possible, though not very probable, that he has not read Colonel Tod's History of the Rajputs in which a fac-simile of a royal edict of Jaya Sinha of Mewar has the words *doya lásh* (दोयलाष) for *do lakh* (दोलाख two lacs of Rupees); but it is impossible to believe that, as a Hindi scholar, he has not met with innumerable instances of the use of ष for ख. In a Hindi version of the Hitopadeśa, a book in common use all over India and perhaps read by many boys in the scholars now under the superintendence of the Bábu, I find the following sentence in which ष (sh) is used four times for ख (kh).

* Occasionally ष-sh is pronounced like छ chh at Benares and elsewhere; as in *chhaṭṭi* for *shashṭi* "the sixth day's ceremony after birth."

कौनैं एकै रूंष परि कागू अरु कागनि रहै सु वा व्रष के षोहर मै एक कालो सांप रहै सुवा कागु के बालकन कों षावो हि करै ।

In the *Úshá Charitra* of Parasuráma, as printed in De Tassy's *Chrestomathie Hindui*, there are at least a hundred instances in which ष has been used for kh: a single sloka quoted at foot * affords four instances of this misuse of the letter.

Again in a Ms. of the Poems of Chand which the Bábu has read and quoted to illustrate his lecture on the Hindui language, and which he has been kind enough to lend me, I find at least a thousand instances of the use of ष (sh) for ख (kh); another Ms. one of the *Taittiríya Bráhmana*—also lent me by the Bábu—has a number of instances of the same kind. Certainly those are not unknown to him.

It is likely that Bábu Śivaprasád will account for the instances I have alluded to above by attributing them to the ignorance of stupid copyists, but that will be a bare assertion without a proof; for proofs in such cases are to be had 1st in old MSS. which are almost uniformly in my favor, and 2nd in Dictionaries of which the Hindui has none of any value of native Indian origin, the great Hindui scholars and warm advocates of vernacular education having as yet failed to produce any to settle the spelling of the Hindi. It is true there are some 4 or 5 Hindi Dictionaries by Europeans, but in matters relating to his own language the Bábu will probably not allow me to quote foreign authorities.

As regards, و and व Bábu Śivaprasád says, his "object is to have only one letter to represent them both." This is, however, impracticable. The و in Arabic, Persian and Urdu has at least half a dozen different powers, and for almost every one of them we have to use a separate roman letter if we at all wish to be accurate. Again, in Arabia and Africa generally the natural sound of و is like that of w, and in Arabic words it is often a mistake to use v instead of w in the place, of و. Baron Silvestre de Sacy, then whom France has not produced a greater Arabic scholar and who learnt his Arabic in the heart of Arabia recommends w for و. In Persia and Turkey, I believe, the v sound of و is preferred to W; and in India usage oscillates between v and w.

The case is very nearly the same with the Sanskrit व (v). Under different circumstances and in the mouths of different races or castes it sounds very differently and therefore what may be very exact in one part of India is harsh, uncouth, or pedantic in another. Bábu Śivaprasád will, however tolerate nothing that is not consonant to his own ideas. He wishes not only to insist on the use of v for و and व under all circumstances, but to force the world to believe in the dicta (most gravely put forth in his Memo:) that "Hindi and Persian have no equivalent for w;" that "व and و have nothing to do with" it; and that the w sound of و was due to the "awkwardness of Bengali pronunciation." As philologically and historically these assumptions were totally wrong, I deemed it proper, while defending the position assumed by me in my "key," to point out by historical evidence that the English w had its exact equivalent in the Hindui and the Persian, that the Sanskrit व began to change long before the Bengalis had formed themselves into a nation; and that mutability was inherent in the nature of a liquid semi-vowel like v. Had Bábu Śivaprasád been at all disposed to be candid, he should have either refuted my evidence or acknowledged his error. But he seems no way inclined to adopt either of these two courses; and in his last letter has attempted to evade the subject by saying that my historical proofs refer to the formation of languages" and do "not bear upon the issue of the case before us." This evasion, to say the least, is not fair; for the Bábu knows well—be himself having raised it— that one of the issues before us is, did the Bengalis first corrupt و into w? and to come to a correct decision on it, we must have recourse to the evidence of history.

With reference to the existence of an equivalent of w in the Hindi, I said that "were the Bábu to pronounce ईश्वर and द्वारका as Íśvara and Dváraká (and not Íśwar and Dwáraká) he would be unintelligible even to his own left rib." This assertion was perhaps not very cautious in me, for by it I placed myself entirely at the mercy of my critic who could have most easily and authoritatively refuted me. He has, however, attempted nothing of the kind and sought shelter under an evasion by assuring me in reply, that those who do not pronounce Íśvara and Dvarká with the full sound of (v) would be taken certainly for Barbarians by good Pandits." The questions which this reply suggests are not pleasant, and though much tempted, I shall forbear to put them to the Bábu. It is of course certain the "good pundits" alluded to by him are not his left ribs, and by putting them forth when he was referred to the practice of women, the Bábu has, I must say, attempted to shirk his responsibility. All I maintain is that the Hindi as it is spoken by the people at large of Benares,—as it circulates in the mouths of men, women and children,—as it is current in the *bálákhána* of the rich, in the humble homestead of the poor, and at the market-place,—prefers the w to the v sound of व and the learned Bábu has as yet produced nothing to prove the contrary to be true. I remember well that when I last had the honor of paying my respects to the Bábu at his house, a venerable looking gentleman, a relation of the Bábu, in my presence called him Seuparsád, and not Śivaprasád, and feel pretty sure that others of his relatives do the same. I may add from even my limited experience of the

* महल अनूप बन्या अति भारी । सषी चतुरि राषी रषुवारी ॥ असी सहस जोध्या रषवारे । अति सुजान नृप राज दुलारे ॥

people of Benares, that at least 95 per cent. of them pronounce the words Śivaprasáda, Visvanátha, Dasáswamedha &c., as Seuparsád, Viswanáth, Dasáswamedh, &c., without any regard for the v sound of व. Even Pandits, when not engaged in teaching, are prone to the same failing, and those that are not, run the risk of being thought pedantic. I shall be glad to have some convincing proof from Bábu Śivaprasád that my experience is fallacious.

Adverting to my remark on the word نوروز which offers a remarkable instance in which the Persian و has the sound of the English w, Bábu Śivaprasád says "in (نو) (و) coming after (a) and not followed by any vowel, it does the work of the vowel (v); but still it has nothing to do with (w); نو will be properly transliterated *nau* and not *naw*." This would no doubt be very satisfactory if it could be shewn that و can do the duty of a vowel by itself without association with one of the three vowel points or *Harkát*, but this, I feel certain cannot be done. According to Arabic and Persian Grammarians letters without vowel points are called *sákin* i. e. "quiescent" or inert "and they can never coalesce with other letters or be the medium of connexion between two letters. Even *Alif* becomes inert and useless as a vowel without the aid of the *Harkát*. Indeed it would be a matter of no ordinary surprise to a Maulavi to hear that a *sákin* letter was a vowel. In the case of نو the Burhán Káti'a, gives the spelling thus; "first consonant *n* with the vowel point *Foteh*; second consonant *waw* quiescent: بفتح اول و سکون ثاني. That the *waw* in نو is a consonant may be further proved by reference to the derivatives of that word, in which the quiescent wáw with a following vowel appears in the full character of a w; thus the abstract noun of naw نو is نوي *nawi* and not نوئی *nau-i* as it no doubt would be had the و been a vowel. Similarly the Arabic أَوْ "or" when followed by an article as الاسلام is not pronounced *au alsilám* but *awilislám*.

The consonantal character of the letter و in نو *naw* may also be proved by appeal to the history of the word. In its oldest form we find it in the Vedic Sanskrit as नव *nava*, and it would not be unnatural to infer that in the Aryan language, the parent of the Sanskrit, it had the same or very nearly the same form, for we find it reproduced in a sister language of the Sanskrit, the Latin, as *novus*. From the Latin we have in Italian *nuovo*—; in Spanish *nuevo*; in French *neuf*; In the Saxon *nava* becomes *neow* and in English *new*; retaining everywhere a fair representative of the second consonantal element of its composition. In Zend *nava* is retained in its original form, and in the language of the cuneiform inscriptions it becomes *nawa*. We may naturally expect therefore that in the modern Persian, a language derived from the Zend, it should still retain its final consonant in some shape or other.

Even if I were to admit that the و in the word under notice has the sound of u, still it would not contradict its consonantal character, for it would amount to a phonic change and no more.

Bábu Śivaprasád seems to be very much amused at my calling myself "a Kanaujite by descent, and wishes to raise a humorous laugh by saying, "so all Bengalis can claim to be Caucasians by descent." I am glad of this little bit of banter, it assures me that the Bábu is not at heart vexed with me. If I had been certain that I could afford him any satisfaction by withdrawing my claim to a Kanauj ancestry (though it be a historical fact which cannot possibly be gainsaid) I would do so; but in the meantime may I ask, can all the Bengalis really claim to be Caucasians by descent! I always thought that half the population of Bengal were of Turanian extraction, in the same way as one half of the people over the tract from Benares to Bombay including the Jains, the Aswáls, the Hindus and those who profess the many undescribed forms of religion current among the Coles and the Bheels, were Turanians.

I am afraid this letter has already grown much longer than what you would like to print in the *Pandit*, I shall not therefore notice here the Bábu's remarks about Bengali pronunciation. Suffice it to say that the long list of erroneous spelling quoted by the Bábu is not the result of "Bengali awkwardness of pronunciation," but of the slovenliness of early European transliteration, which the Bengalis have, through regard for their foreign rulers, learnt to copy, following in this respect the example of the Hindus of the North West who converted their Vaidyanátha and Prasáda and Báránási into Baijnáth and Persád and Benares in imitation of their Muhammadan Masters. A notable instance of this spirit of imitation occurs in the use of the words *Sáhib* and *salám* among the higher classes in the North-Western Provinces. Among Hindus who have their own national terms of civility and respect they appear quite out of place and uncouth. Sáhib used after Rájá in the vocative case may be translated "O king Mr.!" and in other positions it is equally absurd and unmeaning.

Yours faithfully,

CALCUTTA:
*26th April* 1869.

RÁJENDRALÁLA MITRA.

*** We cannot find room for the prolongation of this discussion which must stop here:—EDITOR, *Pandit*.

PRINTED AND PUBLISHED BY THE PROPRIETORS. E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

# काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

# THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 38. Benares July 1st, 1869. Vol. IV.


## ॥ उपदेशसहस्र्याः पद्यप्रबन्धः ॥

तदेवमज्ञानमूलत्वात्संसारस्य ज्ञानमेव तन्निवर्त्तकं मोक्षहेतुर्न कर्मेत्युक्तं, तत्र यदि कर्मणां स्वातन्त्र्येण मोक्षहेतुता न संभवेत्तर्हि ज्ञानेन समुच्चये सति तद्धेतुता स्यादिति समुच्चयवादिमतमुत्थापयति ।

(८) ननु कर्म तथा नित्यं कर्तव्यं जीवने सति ।
विद्यायाः सहकारित्वं मोक्षं प्रति हि तद्व्रजेत् ॥ ८ ॥

ननु कर्मेति ।

नहि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत् ।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥

इति स्मृत्युक्तन्यायेनावशेनापि जीवता पुरुषेण कर्म कर्त्तव्यमेव, विद्या यथा तथा नित्यं कर्मावश्यं कर्त्तव्यं यावज्जीवमित्यादिश्रुतिविहितत्वादित्यर्थः । उपयोगाभावान्मुमुक्षुणा नित्यं कर्म न कर्त्तव्यमित्यत आह । विद्याया इति । विद्याया मोक्षं प्रति कारणभूतायाः सहकारित्वमिति कर्त्तव्यभावं हि यस्मात्तत्कर्म व्रजेत्प्राप्नुयादतस्तत्कार्यं मुमुक्षुणेत्यर्थः । "विद्यया ऽमृतमश्नुत" इति तृतीयया ज्ञानस्य मोक्षकरणत्वावगमात्करणस्य चेतिकर्त्तव्यतासापेक्षत्वादन्यस्य चेतिकर्त्तव्यस्यात्राभावात्कर्मभिरेव प्रयाजादिभिर्दर्शादीव फलोपकार्याङ्गैर्ज्ञानं समुच्चीयत इति भावः ॥ ८ ॥

कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते ।
तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः ॥

इत्यादिस्मृतेर्मुमुक्षुभिः कर्म न कर्त्तव्यमेवेति चेत्तत्राह ।

(९) यथा विद्या तथा कर्म चोदितत्वाविशेषतः ।
प्रत्यवायस्मृतेश्चैव कार्यं कर्म मुमुक्षुभिः ॥ ९ ॥

यथा विद्येति । यथा विद्या मुमुक्षुभिः कार्या तथा कर्मापि कर्त्तव्यं, कुतः ।

"विद्यां चाविद्यां च यस्तद्वेदोभयं सह"

इति समुच्चयविधिना ऽविशेषेण चोदितत्वादित्यर्थः । किं च ।

अकुर्वन्विहितं कर्म निन्दितं च समाचरन् ।
प्रसज्जंश्चेन्द्रियार्थेषु नरः पतनमृच्छति ॥

इत्यननुष्ठाने प्रत्यवायस्मृतेश्च कर्म कार्यमित्यर्थः । तथा चोदाहृतश्रुतिस्मृतिविरोधे "तस्मात्कर्म न कुर्वन्ति यतय" इति इयमपस्मृतिर्ज्ञानप्रशंसार्था वा भविष्यतीति भावः ॥ ९ ॥

अत्र सिद्धान्ती विद्यायाः सहकार्यपेक्षित्वमुक्तमाक्षिपति ।

(१०) ननु ध्रुवफला विद्या नान्यत्किंचिदपेक्षते ।
नाग्निष्टोमो यथैवान्यद् ध्रुवकार्योप्यपेक्षते ॥ १० ॥
तथा ध्रुवफला विद्या कर्म नित्यमपेक्षते ।

नन्विति। ब्रह्मविद्या सहकारिनिरपेक्षा ध्रुवफलत्वाद्रूटादिज्ञानवदित्यर्थः । पूर्ववादी व्यभिचारेण परिहरति । नेति । अवश्यंभाविफलोप्यग्निष्टोमो यथोद्गीथशस्त्रादितद्गतदेवताज्ञानसहकारि कर्मापेक्षते तथा विद्यापीत्यर्थः ॥ १० ॥

पूर्वपक्षमुपसंहरति ।

(११) इत्येवं केचिदिच्छन्ति न कर्म प्रतिकूलतः ॥११॥
विद्यायाः प्रतिकूलं हि कर्म स्यात्साभिमानतः ।

इत्येवं के चिदिच्छन्तीति । सिद्धान्तं वक्तुमुपक्रमते । नेत्यादिना । विद्या स्वकार्ये न कर्मापेक्षते तत्प्रतिकूलत्वात्तद्विरोधित्वादिति यावत् । नहि स्वप्रतिकूलः स्वसहायो भवति, मा भूत्तिमिरं तेजसः सहायभूतमित्यर्थः । कर्मणो विद्याप्रतिकूलत्वमुक्तं साधयति । विद्याया इत्यर्द्धेन । हिशब्दः प्रसिद्धवद् द्योतकः । साभिमानत इति ब्राह्मणत्वाद्यभिमानसहितपुरुषनिर्वर्त्त्यत्वात्कर्मणो विद्यायाश्च कूटस्थात्माकारतया जात्याद्यभिमानहीननिष्ठत्वात्प्रसिद्धो विद्याकर्मणोर्विरोध इत्यर्थः ॥ ११ ॥

हिशब्दद्योतितां प्रसिद्धिमुपपादयति ।

(१२) निर्विकारात्मबुद्धिश्च विद्येतीह प्रकीर्त्तिता ॥१२॥
अहं कर्ता ममेदं स्यादिति कर्म प्रवर्त्तते ।

निर्विकारेति । नाहं कर्त्ता भोक्ता किं तु कूटस्थं ब्रह्मैवास्मीत्येवमात्माकारान्तःकरणवृत्तिर्विद्येतीह वेदान्तेषु विद्वद्भिः प्रकर्षेणोक्तेत्यर्थः । कर्म त्वहं ब्राह्मणः स्वकर्मणः कर्त्ता ममेदं कर्मसाध्यं फलं भविष्यतीत्यभिमानपूर्वकं प्रवर्त्तते इति प्रत्यक्षमतः स्फुटो विरोध इत्यर्थः ॥ १२ ॥

ज्ञानकर्मणोरन्तर्मुखत्वबहिर्मुखत्वाभ्यां प्रवृत्तितो विरोधमुक्त्वोत्पत्तितोपि विरोधमाह ।

(१३) वस्त्वधीना भवेद्विद्या कर्त्रधीनो भवेद्विधिः ॥१३॥
कारकाण्युपमृद्गाति विद्या बुद्धिमिवोषरे ।
इति तत्सत्यमादाय कर्म कर्तुं व्यवस्यति ॥ १४ ॥

वस्त्वधीनेति । प्रमाणवस्त्वधीना विद्या यथाप्रमाणं यथावस्तु च जायते न तत्र पुरुषस्वातन्त्र्यं संभवतीत्यर्थः । विधिर्विधेयं कर्म कर्त्रधीनं पुरुषेण कर्तुमकर्तुमन्यथा वा कर्तुं शक्यमतः पुरुषस्वातन्त्र्यास्वातन्त्र्यरूपविरुद्धहेतुजन्यत्वाच्च कर्मज्ञानयोः समुच्चय इत्यर्थः । किं च विद्यायां सत्यां कर्मणो निराश्रयतया स्वरूपालाभ.च ज्ञानसहकारितेति विधान्तरेण विरोधमाह । कारकाणीति । ऊषरदेशे जातामुदकबुद्धिं यथोषरस्वभावावलम्बिनी विद्योपमृद्गाति तथात्मन्यविद्याध्यस्तकारकबुद्धिमात्मस्वभावावलम्बिनी विद्योपमृद्गात्येवेत्यर्थः । इति तत्सत्यमित्यर्द्धश्लोकः पूर्वेणैवान्वेति । उपमृद्गाति इति यतो ऽतस्तत्कारकजातं सत्यमादाय कर्म कर्तुं ज्ञानी कथं व्यवस्यतीति कथंशब्दाध्याहारेणायं योजनीयः ॥ १३ ॥

विरुद्धत्वकृतं समुच्चयासंभवं फलितमाह ।

(१४) विरुद्धत्वादतः शक्यं कर्म कर्तुं न विद्यया ।
सहैव विदुषा तस्मात्कर्म हेयं मुमुक्षुणा ॥ १५ ॥

विरुद्धत्वादिति । अतो विरुद्धत्वादिति सामानाधिकरण्यं विद्यया सह कर्म कर्तुं विदुषा न शक्यमेवेत्यन्वयः । समुच्चयनिराकरणफलमाह । तस्मादिति ॥ १४ ॥

ननु ज्ञात्वा कर्म समाचरेदित्यादिवचनात्स्वर्गकामादिविध्यन्यथानुपपत्तेश्च देहादिव्यतिरिक्तात्मज्ञानवतः कर्माधिकाराज्ज्ञानकर्मणोर्विरोधे च तदयोगादधिकार्यभावेन कर्मकाण्डस्याप्रामाण्यं प्राप्नमित्याशङ्क्य कर्मस्वरूपभेदाङ्गविशेषप्रयुक्तिक्रमाधिकारादिविशेषज्ञानस्य देहादिव्यतिरेकात्मज्ञानस्य च कर्मविशेषाधिकारिण्यपेक्षितत्वे ऽपि न परमात्मतत्त्वज्ञानं तत्रापेक्ष्यते ऽनुपयोगादधिकारविरोधाच्चेत्यभिप्रेत्य समाधत्ते ।

(१५) देहाद्यैरविशेषेण देहिनो ग्रहणं निजम् ।
प्राणिनां तदविद्योत्थं तावत्कर्मविधिर्भवेत् ॥ १६ ॥

देहाद्यैरिति । यद्वा यद्यौपनिषदं ज्ञानं कर्मकारकभेदोपमर्दकं स्यात्तदा ज्ञानकाण्डेन कर्मकाण्डस्य निर्विषयीकरणाद्बाधितविषयं कर्मकाण्डमप्रमाणं स्या,त्तच्चानिष्टं, स्वाध्यायाध्ययनविधिविरोधा,दित्याशङ्क्य किमात्मतत्त्वज्ञानात् प्रागूर्द्ध्वं वा तदप्रामाण्यापत्तिरिति विकल्प्याद्यं निराकरोति । देहाद्यैरिति । देहिन आत्मनो देहाद्यैर्देहेन्द्रियमनोबुद्धिप्राणतद्धर्मैरविशेषेणाविवेकेन ग्रहणं तद्विशिष्टतयैवात्माभिमानरूपं निजं स्वाभाविकं न योषिदादावग्न्यादिभावबुद्धिवद्विध्यधीनं यदेवंविधं प्राणिनामात्मज्ञानं तदविद्योत्थमनाद्यज्ञानतत्प्रान्तिसंस्कारोत्थं सर्वसाधारणत्वाद्यावदेवं ब्राह्मणोहं गृहस्थोहं सकलेन्द्रियवानहं सकामो बलवानित्यादिज्ञानमनुवर्त्तते तावत्कर्मविधिः कर्मकाण्डं प्रमाणं भवेदित्यर्थः । प्रमितिजनकं हि प्रमाणं भवति । अधिकारिणश्च प्रमितिजनको वेदो नानधिकारिण इति स्थिते कर्मप्रवृत्तिपर्यन्तं प्रमितिजनकस्य विधिकाण्डस्योक्ताधिकारिलाभाच्च ब्रह्मात्मतत्त्वविद्योदयात्प्रागप्रामाण्यप्रमितिरिति नाध्ययनविधिविरोध इति भावः ॥ १५ ॥

द्वितीयं विकल्पमिष्टापत्त्या प्रत्याचष्टे ।

(१६) नेतिनेतीति देहादीनपोह्यात्मावशेषितः ।
अविशेषात्मबोधार्थं तेनाविद्या निवर्त्तिता ॥ १७ ॥

नेतीति । नेतिनेतीतिवीप्सार्थया श्रुत्या देहादीन्मिथ्याद्रष्टात्मात्मीयभावेन गृहीतानशेषानपोह्य प्रतिषिध्य प्रतिषेधावधिभूत आत्मावशेषितः सत्यस्य सत्यमित्यादौ किमर्थमित्यत आहाविशेषात्मबोधार्थमिति । अविशेषश्चासावात्मा चेति तथा तस्य बोधो निर्विशेषचित्सदानन्दस्वभावाविर्भावस्तदर्थमित्यर्थः । परागर्थेष्वपोहितेषु तदवधित्वेन प्रत्य-

गर्थं एवावशिष्यत इति प्रत्यक्तत्त्वबोधार्थमित्युक्तं भवति । बोधे सति किं स्यात्तदाह । तेनेति । यन्निबन्धनो देहादावात्माभिमानः कर्माधिकारहेतुः सा ऽविद्या तेन बोधेन निवर्त्तिता बाधितेत्यर्थः । अतो निमित्ताभावात् नैमित्तिकाभाव इति न्यायेनात्मतत्त्वज्ञानवतो न कर्मविधिप्रतिपत्तिरिति तं प्रति फलवद्विज्ञानजनकत्वाभावात्कर्मकाण्डस्य तदानीमप्रामाण्यमिष्टमेव । निवृत्ततीव्रक्रोधं प्रत्यभिचारविधिशास्त्रवदिति सर्वमनवद्यम् ॥ १६ ॥

ननु निर्विशेषात्मबोधेन सकृन्निवृत्ताप्यविद्या पुनरुद्भविष्यति, ततः कर्माधिकारहेतुसंभवात्कर्मविधिः स्याच्छुक्तितत्त्वावगमात्तदज्ञाननिवृत्तावपि पुनस्तत्र समयान्तरे रजतभ्रमोदयोपलम्भादित्याशङ्क्याह ।

(१७) निवृत्ता सा कथं भूयः प्रसूयेत प्रमाणतः ।
असत्ये वा विशेषे ऽपि प्रत्यगात्मनि केवले ॥ १८ ॥

निवृत्तेति । प्रमाणतो निवृत्ता प्रमाणाग्निना दग्धा सा ऽविद्या भूयः पुनः कथं प्रसूयेत जायेत, नहि मृता दग्धा च भार्या पुनः प्रसवायोद्भवति, तद्वदित्यर्थः । अविद्यान्तरं जायेतेति चे,त्तत्र वक्तव्यं, किं निर्निमित्तं जायेत निमित्ताद्वा, नाद्यो, ऽकारणकार्योत्पत्तावतिप्रसङ्गाद्, द्वितीये किमात्मा निमित्तमनात्मा वा, नाद्य इत्याहासत्ये वेति । अविशेषे केवले इत्यनयोर्व्याख्यानव्याख्येयभावः । यद्वा ऽविशेष इत्युक्ते मूर्त्यादिकतिपयविशेषाभावे ऽपि विशेषान्तरशङ्का स्यादत उक्तं केवल इति, तावत्युक्ते एकाकिनो ऽप्यात्मनः प्रयत्नादिगुणयोगित्वविशेषशङ्का स्यात्तन्निवृत्तये ऽविशेष इत्युक्तं, तथा चाविशेषे केवले प्रत्यगात्मनि सर्वान्तरे परमार्थवस्तुनि सा ऽविद्या ऽसती एव न सत्तां लभते, असहायस्यात्मनः कूटस्थस्य कर्तृत्वानुपपत्तेः । अविद्यान्तरसहायाभ्युपगमे चान्योन्याश्रयो ऽनवस्था वा प्रसज्येतेत्यर्थः । अपिशब्देन पक्षान्तरं निरस्यते । अनात्मन्यप्यसत्येव सा अविद्या कार्यस्यानात्मनो ऽविद्याहेतुत्वानुपपत्तेरित्यर्थः । शुक्तिकादौ तु रजतादिविक्षेपोपादानांशस्यैवाविद्याशक्तिभेदस्य ज्ञानेन निवृत्त्यभ्युपगमान्मूलाज्ञानस्य तादृगनन्तशक्तिमतो विद्यमानत्वात्तद्वशात्पुनर्भ्रान्त्युदयोपपत्तेर्दृष्टान्तो विषम इति द्रष्टव्यः ॥ १७ ॥

अविद्यायाः पुनरनुद्भवसाधनफलमाह ।

(१८) न चेद्भूयः प्रसूयेत कर्त्ता भोक्तेति धीः कथम् ।
सदस्मीति च विज्ञाने तस्माद्विद्या ऽसहायिका ॥ १९ ॥

न चेदिति । पादत्रयेण सदेव ब्रह्मैवाहमस्मीति विज्ञाने विशिष्टज्ञाने अपरोक्षानुभवे सति भूयः पश्चाच्च चेदविद्या प्रसूयेत कर्त्ता भोक्तेति धीः कर्माधिकारनिमित्तभूता कथं स्यात्तस्मादेवेत्यर्थः । चकारः कर्तृत्वादेः पारमार्थिकत्वशङ्कानिवृत्त्यर्थः । कर्तृत्वादेः पारमार्थिकत्वे ऽविद्यानिवर्त्यत्वायोगादनिर्मोक्षप्रसङ्ग इति भावः । ज्ञानकर्मसमुच्चयनिराकरणमुपसंहरति । तस्मादिति । यस्माद्विद्यायामुत्पन्नायां कर्मासंभवः सिद्धस्तस्मादसहाया केवलैव विद्या कैवल्यहेतुरित्यर्थः ॥ १८ ॥

विद्यायाः सहकारिनिरपेक्षत्वेनैव मोक्षहेतुत्वमिति युक्त्योक्तेर्थे श्रौतलिङ्गमुपोद्बलयति ।

(१९) अत्यरेचयदित्युक्तो न्यासः श्रुत्या ऽत एव हि ।
कर्मभ्यो मानसान्तेभ्य एतावदिति वाजिनाम् ॥ २० ॥
अमृतत्वं श्रुतं तस्मात्त्याज्यं कर्म मुमुक्षुभिः ।

अत्यरेचयदिति । तैत्तिरीयोपनिषत्सु सत्यं परं परं सत्यमित्युपक्रम्य सत्यतपआदिमानसान्तानि कर्माणि श्रेयःसाधनत्वेन निर्दिश्य तानि वा एतान्यवराणि तपांसीति तेषां फलाफलत्वेन निन्दामभिधाय न्यास इति ब्रह्मेत्युक्तो न्यास एवात्यरेचयदिति तत्त्वज्ञानान्तरङ्गभूतः संन्यासः स्तूयते तस्मान्निन्दितस्यानुपादेयत्वात् स्तुतस्य चोपादेयत्वात्कर्मसापेक्षत्वे मोक्षस्य संन्यासविधानानुपपत्तेः ससंन्यासमात्मज्ञानमेव मोक्षसाधनं गम्यत इत्यर्थः । अत एव हीति । ज्ञानस्य स्वफले कर्मनिरपेक्षत्वादेवेत्यर्थः । लिङ्गान्तरमाह । एतावदिति । वाजिनाममृतत्वं श्रुतमिति वाजसनेयिनामुपनिषत्सु आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितमित्युपक्रम्याद्वयमात्मतत्त्वं दुन्दुभ्यादिदृष्टान्तप्रबन्धेनोपपाद्योक्तानुशासनासि मैत्रेय्येतावदरे खल्वमृतत्वमिति ज्ञानस्यैवामृतत्वसाधनत्वावधारणं श्रुतं तस्य कर्मानपेक्षायां लिङ्गमन्यथैतावदरे इत्यवधारणार्थवचनानुपपत्तेरित्यर्थः । अमृतत्वस्य तु नाशास्ति वित्तेनेति च तत्रोक्तो वित्तसाध्यस्य कर्मणो ऽमृतत्वसाधनत्वाभावे लिङ्गमनुसंधेयम् । न च विद्यां चाविद्यां चेति समुच्चयविधानविरोधः, तस्य देवतोपासनज्ञानकर्मसमुच्चयविषयत्वादन्यथा हिरण्मयेन पात्रेणाग्ने नय सुपथेति च मार्गयाचनाद्यनुपपत्तेरिति सर्वमनवद्यम् ।

“न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः”
त्याग एव हि सर्वेषां मोक्षसाधनमुत्तमम् ।
त्यजतैव हि तज् ज्ञेयं त्यक्तुः प्रत्यक् परं पदम् ॥

इत्यादिशास्त्राद्यस्मात्त्यागोपलक्षितमात्मज्ञानमेव मुक्तिसाधनं तस्मादिति प्रकृतार्थमुपसंहरति । तस्मात्त्याज्यं कर्म मुमुक्षुभिः साधनचतुष्टयसंपन्नैरात्मतत्त्वजिज्ञासुभिरित्यर्थः । विविदिषोरपि नास्ति कर्मावसरः कुतो विदुष इत्यभिप्रायः । अत्रार्द्धश्लोकोधिकः प्रागुक्ताधिकार्द्धेन संख्येयः ॥ १९ ॥

तदेवं मुमुक्षुणा सर्वकर्मसंन्यासपूर्वकं ज्ञाननिष्ठेन भवितव्यमिति न्यायेनोपपाद्येदानीं परोक्तं दृष्टान्तमनूद्य दूषयति।

(२०) अग्निष्टोमवदित्युक्तं तत्रेदमभिधीयते ॥ २१ ॥

अग्निष्टोमवदिति। अर्द्धश्लोकेन दूषणमुच्यत इति प्रतिज्ञाय श्लोकेन दूषणमाह।

(२१) नैककारकसाध्यत्वात्फलान्यत्वाच्च कर्मणः।
विद्या तद्विपरीता ऽतो दृष्टान्तो विषमो भवेत् ॥ २२ ॥

नैकेति। कर्मणो ऽग्निष्टोमादेरनेककारकसाध्यत्वान्नियतद्रव्यमन्त्रतन्त्रप्रयोगसाध्यत्वादिति यावत्। तथा फलान्यत्वात्फलभेदवत्वाद्यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति श्रुतेर्विद्याद्वारा वीर्यवत्तरफलविशेषसंभवाच्च युक्ता सहकार्यपेक्षेत्यर्थः। नैवं विद्याया इत्याह। विद्येति। तद्विपरीता कर्मस्वभावविपरीतस्वभावेति यावत्। यथा वस्त्वधीनप्रमाणनिबन्धनाया निरतिशयमोक्षैकफलाया विद्याया न सहकार्यपेक्षा युक्तेत्यर्थः। यत एवं स्वभावभेदः कर्मविद्ययोरतोऽग्निष्टोमदृष्टान्तो विषमो दार्ष्टान्तिकाननुरूपो भवेदित्यर्थः ॥ २१ ॥

वैषम्यमेवोपपादयति।

(२२) कृष्यादिवत्फलार्थित्वादन्यकर्मोपबृंहणम्।
अग्निष्टोमस्त्वपेक्षेत विद्यान्यत्किमपेक्षते ॥ २३ ॥

कृष्यादिवदिति। अग्निष्टोमः सातिशयः साध्यफलार्थत्वादन्यकर्मोपबृंहणमन्यैः कर्मभिः सहकारिभिर्विहितोद्गीथाद्यङ्गसंश्रितोपासनादिरूपैरुपचयमपेक्षेतेति योजना। तत्र दृष्टान्तः, कृष्यादिवदिति। कृषिवाणिज्यादौ फलोपचयार्थसाधनविशेषोपचयः प्रसिद्ध इत्यर्थः। विद्या तु निरतिशयफलत्वादन्यत्सहकारिभूतं किं वस्त्वपेक्षते न किमपीत्यर्थः ॥ २२ ॥

यदुक्तमकुर्वन्विहितं कर्मेति प्रत्यवायस्मृतेश्चेति तत्राह।

(२३) प्रत्यवायस्तु तस्यैव यस्याहंकार इष्यते।
अहंकारफलार्थित्वे विद्येते नात्मवेदिनः ॥ २४ ॥

प्रत्यवायस्त्विति। अस्य कर्मणोऽहं कर्ता एतत्कृत्वेदं फलं भोक्ष्य इति यस्याहंकार इष्यते दृष्टो भवति स्वाभाविको वर्त्तत इति यावत्तस्याधिकृतस्य विहिताकरणप्रत्यवायो भवेदित्यर्थः। आत्मवेदिनः आत्मतत्त्वज्ञाननिष्ठस्य तु अहंकारफलार्थित्वे न विद्येते विषयाभावादतो निमित्ताभावाच्च प्रत्यवायस्तस्येत्यर्थः ॥ २३ ॥

विद्यैवाज्ञानहानाय न कर्माप्रतिकूलं त इत्युपक्रम्येयता ग्रन्थेन कर्मणः स्वातन्त्र्येण वा ज्ञानसहकारितया वा सर्वथा न साक्षान्मोक्षहेतुत्वमस्तीत्युपपाद्य ब्रह्मविद्यामथेदानीं वक्तुं वेदः प्रचक्रम इति परमप्रकृतमुपसंहरति।

(२४) तस्मादज्ञानहानाय संसारविनिवृत्तये।
ब्रह्मविद्याविधानाय प्रारब्धोपनिषत्त्वियम् ॥ २५ ॥

तस्मादिति। विद्यायाः कर्मनिरपेक्षत्वं तच्छब्दार्थः अज्ञानहानायानाद्यज्ञाननिराससिद्धये ऽपेक्षितब्रह्मविद्यां विधातुं संपादयितुमियं परोपनिषद्वेदान्तभागः प्रारब्धेति योजना अज्ञानहानस्य विशेषणं संसारविनिवृत्तय इति संसारस्य विनिवृत्तिः सम्यङ्निवृत्तिर्यस्मादिति विग्रहः अक्लीबत्वमार्षमत्रोपनिषच्छब्दः लक्षणया वेदान्तग्रन्थेषु प्रयुक्तः ॥ २४ ॥

तर्हि कोऽस्य मुख्योऽर्थ इति वीक्षायां ब्रह्मविद्यायां शब्दसामर्थ्यं दर्शयन्नुपनिषच्छब्दव्युत्पादनेनापि स्वतन्त्रैव विद्या मोक्षहेतुरिति सूचयति।

(२५) सदेरुपनिपूर्वस्य क्विपि चोपनिषद्भवेत्।
मन्दीकरणभावाच्च गर्भादेः शातनात्तथा ॥ २६ ॥

॥ इति चैतन्यप्रकरणम् ॥ १ ॥

सदेरिति षद्लृविशरणगत्यवसादनेष्विति धातोरुपनीत्युपसर्गद्वयपूर्वकस्य क्विप्प्रत्ययान्तस्योपनिषदिति रूपमस्त्यत्र धात्वर्थत्रयम्। तथाहि, ये मन्दब्रह्मविदस्तेषां गर्भजन्मजरादिकमुपनिषादयति शिथिलीकरोतीत्युपनिषदित्येकोऽर्थः। जिज्ञासोश्चोप समीपे निश्चयेन ब्रह्म गमयतीति द्वितीयः। तत्त्वविदां तु गर्भादि नाशयत्येवेति तृतीयः। एवं सम्यग्धात्वर्थयोगाद् विद्यैवोपनिषच्छब्दवाच्या तादर्थ्याद्ग्रन्थोप्युपनिषदुच्यते लाङ्गलं जीवनमितिवदित्यर्थः ॥ २५ ॥

इत्युपोद्घातप्रकरणं प्रथमं विवृतम्। चैतन्यप्रकरणमिति टीकान्तरे ॥ १ ॥

तदेवं मुमुक्षोर्मोक्षसाधनब्रह्मात्मविद्याप्रतिपत्तये वेदान्तारम्भ उपपद्यत इति स्थिते पुनराशङ्क्यते। "ननु विद्योदयाय वेदान्तारम्भस्तदोपपद्यते यदि विद्योदयः संभाव्येत, स इहात्मनि संसारित्वग्राहकप्रत्यक्षादिविरोधाद्वाक्यशतेनापि नोत्पादयितुं शक्यते, असंजातविरोधितया प्रत्यक्षादेर्बलवत्वात्तदुपजीविनश्चागमस्य दुर्बलत्वात्कथं चिदुत्पन्नापि विद्या यदि प्रमाणसिद्धं संसारं बाधेत तर्हि प्रत्यगात्मनोपि ब्रह्मरूपत्वं कथं प्रत्यक्षानुभवो न बाधेतेति"। अत उत्तरं वदति।

(१) प्रतिषेद्धुमशक्यत्वान्नेतिनेतीति शेषितम्।
इदं नाहमिदं नाहमित्यद्धा प्रतिपद्यते ॥ २७ ॥

प्रतिषेद्धुमित्यादिना। नेतिनेतीतिवीप्सया सकलदृश्यप्रतिषेधे शेषितमुर्वरितं यदात्मतत्त्वं तत्प्रतिषेधावधित्वेन प्रति-

षेद्धुः स्वरूपत्वेन प्रतिषेधसाक्षितया अवशिष्यते यतो ऽतः प्रतिषेद्धुमशक्यत्वादद्धा साक्षात्प्रतिपद्यते निःसंदिग्धमुपलभ्यत इति योजना । उपलम्भप्रकारमभिनयति । इदमिति । इदं देहरूपं नाहमात्मा इदमिन्द्रियजातं मनोबुद्धिप्राणतदुपादानाचेतनपर्यन्तं नाहं किं त्वेषां प्रकाशकमव्यभिचारि स्वयंप्रकाशं कूटस्थमक्षरं यस्मिन्सर्वजगदाश्रयो ऽव्याकृताकाश ओतश्च प्रोतश्च तदेवाहं परममक्षरमिति प्रतिपद्यत इत्यर्थः । अनेन विद्या नोदेतीत्येषा शङ्का निराकृता । प्रतिषेद्धुमशक्यत्वादित्यनेन तु यथाव्याख्यातेन बाधायोग्यत्वं दर्शितमिति विवेक्तव्यम् ॥ १ ॥

नन्वहं ब्रह्मेति ज्ञानमुक्तविधयोत्पन्नमपि न प्रतिष्ठां लभते देहेन्द्रियाद्यभिमानस्यानवरतमनुवृत्तेरित्याशङ्क्य तस्य प्रमाणमूलत्वाभावाद्बाधितानुवृत्तिमात्रस्वभावत्वाच्च विद्याप्रतिपक्षत्वमित्यभिप्रेत्य वाक्योत्थज्ञानस्य प्राबल्यमुपपादयति ।

(२) इदंधीरिदमात्मोत्था वाचारम्भणगोचरा ।
निषिद्धात्मोद्भवत्वात्सा न पुनर्मानतां व्रजेत् ॥ २८ ॥

इदंधीरिति । देहादावनात्मन्यात्मबुद्धिरहंधीरित्युच्यते, सा अहंकर्तुरिदमंशात्पूर्वपूर्वाहंकारवासनावासितान्तःकरणरूपादिदमात्मनः सकाशादुत्थिताध्यासात्मिकेत्यर्थः । स्वरूपतोऽस्या दौर्बल्यमुक्त्वा विषयभेदादपि तदाह । वाचारम्भणगोचरेति । निरूप्यमाणे स्वतः सत्ताहीनमपि यदपरोक्षव्यवहारगोचरतया गम्यते तद्वाचारम्भणमनृतजडानात्मकरूपं तदेव गोचरो विषयो यस्याः सा तथा, यत एवमतो नेतिनेतीति शास्त्रेण निषिद्धो बाधित आत्मा स्वरूपमुद्भवः कारणं च यस्याः सा निषिद्धात्मोद्भवा तस्या भावो निषिद्धात्मोद्भवत्वं तस्मादिति विग्रहः, सा पुनरिदंधीरात्मयाथात्म्यज्ञानानन्तरं मानतां प्रमाणत्वं न व्रजेन्न लभेत, अवस्तुत्वादवस्तुजत्वादवस्तुविषयत्वाच्च स्वप्नावस्थविशेषज्ञानवदित्यर्थः । अतो वाक्योत्थमेव ज्ञानं प्रबलं नेतरदिति भावः ॥ २ ॥

इदानीं पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवदिति न्यायेन प्रथमोत्पन्नाया अपि कर्त्ता भोक्तेत्यादिधिय उत्तरेण ब्रह्मात्मज्ञानेन बाध्यत्वमुपपादयति ।

(३) पूर्वबुद्धिमबाधित्वा नोत्तरा जायते मतिः ।
दृशिरेकः स्वयं सिद्धः फलत्वात्स न बाध्यते ॥ २९ ॥

पूर्वबुद्धिमिति । नहि शुक्त्यज्ञानजन्यां रजतबुद्धिमबाधित्वा शुक्तिधीरुत्तरोत्पद्यते, एवं कर्त्रादिबुद्धिमबाधित्वा नात्मतत्त्वज्ञानमुत्तरमुत्पद्यते, अतः प्रसक्तप्रतिषेधात्मकत्वाद्बाधस्य पूर्वसमय उत्तरप्रसक्त्यभावाच्च पूर्वेणोत्तरस्य बाधः, किं तु परेण पूर्वस्य प्रसक्तस्य बाध इत्यनवद्यम् । पदार्थबोधे शब्दस्य मानान्तरसापेक्षत्वेपि न वाक्यार्थबोधे तदपेक्षा, पदार्थबोधेपि व्यवहारमात्रस्यैवापेक्षणात् पूर्वबुद्धेर्व्यवहाराङ्गत्वांशस्योत्तरेणात्मज्ञानेनाबाधनाच्च नोपजीव्यविरोधश्चेति द्रष्टव्यम् । किं चौपनिषदात्मज्ञानमेव तत्त्वावेदकमत्यन्ताबाध्यार्थत्वादित्याह । दृशिरिति । ब्रह्मात्माकारान्तःकरणवृत्तिप्रतिफलितापरोक्षस्फूर्त्तिर्दृशिरित्युच्यते । स चैकः पराभावेनोपलक्षितो ऽद्वितीय इति यावत्, स्वयंसिद्धः परनिरपेक्षसत्तास्फूर्त्तिकः स न बाध्यते, उक्तैर्विशेषणैर्बाधायोग्यत्वावगमात्फलत्वाच्च, नहि फलं बाध्यते, तस्य सर्वज्ञानसाधारणत्वात्सर्वव्यवहारहेतुप्रकाशत्वाच्चेत्यर्थः । नित्यसिद्धस्याप्यस्य फलत्वं विषयाकारवृत्तिव्यक्तत्वापेक्षयोपचर्यत इति भावः ॥ ३ ॥

एवं ब्रह्मात्मज्ञानस्य वाक्यादनुत्पत्तिशङ्कामुत्पन्नस्य च प्राबल्योपपादनेन पूर्वप्रवृत्तप्रत्यक्षादिभिर्बाध्यार्थत्वशङ्कां चोन्मथ्येदानीं कथमिदमुत्पद्यतामिति वीक्षायां पदार्थपरिशोधनेनेति श्रौतदृष्टान्तेनोपपादयति ।

(४) इदं वनमतिक्रम्य शोकमोहादिदूषितम् ।
वनाद्गान्धारको यद्वत्स्वात्मानं प्रतिपद्यते ॥ ३० ॥

॥ इति प्रतिषेधप्रकरणम् ॥ २ ॥

इदं वनमिति । इदं शरीरमेव वनमिव वनं रागद्वेषशोकमोहादिभिर्व्याघ्रतस्करादिस्थानीयैर्दूषितमाक्रान्तमतिक्रम्य दृङ्मात्रमाचार्यादवगम्यान्वयव्यतिरेकालोचनया पदार्थशोधनेन देहादिकमनात्मभूतत्वात्त्यक्त्वा स्वमात्मानं सर्वानुस्यूतमनपोह्यं प्रपद्यते ऽहं ब्रह्मास्मीत्यौपनिषदं पुरुषमवगच्छतीत्यर्थः । यथा गान्धारको गन्धारदेशवासी पुरुषो बद्धचक्षुरेव तस्करैरानीय महावने निक्षिप्तः सबन्धमोक्षार्थी तत्राक्रोशं कुर्वन्केनचित्कारुणिकेनोपलब्धस्तेन मोचितबन्धो दर्शितस्वदेशमार्गो ग्रामाद्ग्रामं पृच्छन् पण्डितो मेधावी वनात्स्वं देशं प्रतिपद्यते तथायमपि संसारी अविद्यारागादितस्करैर्मिथ्याज्ञानपटेन विवेकदृष्टिमाच्छाद्य स्वदेशाद्देहारण्यं प्रवेशितो बन्धमोक्षार्थी कदाचित्केन चित्कारुणिकेनाचार्येण ब्रह्मविदा त्याजितमिथ्यादृष्टिपटः प्रतिबोधितस्वदेशब्रह्ममार्गोन्वयव्यतिरेकाभ्यां स्वयमूहमानः स्वमात्मानमभिगच्छतीत्यर्थः ॥ ४ ॥

आत्मज्ञानोत्पत्तिविधिप्रकरणं द्वितीयं विवृतं, प्रतिषेधप्रकरणमित्यन्यत्र ॥ २ ॥

येयं ब्रह्मविद्या प्रतिपादिता तस्यां प्रकाशमानं ब्रह्म किं प्रत्यगात्मनो भेदेन प्रत्येतव्यं तदभेदेन वेति द्वासुपर्णासयुजेत्यत्र भेदश्रवणादयमात्मा ब्रह्मेत्यभेदश्रवणाच्च सन्देहे निर्णयकारणं श्रौतं दर्शयन्वाक्यविषयमर्थं स्पष्टयति ।

(१) ईश्वरश्चेदनात्मा स्यान्नासावस्मीति धारयेत् ।
आत्मा चेदीश्वरोस्मीति विद्या सा ऽन्यनिवर्तिका ॥ ३१ ॥

ईश्वर इत्यादिना । ईश्वरो जगत्कारणत्वेनोपलक्षितः परमात्मा सत्यज्ञानानन्तानन्दरूपः, स चेदात्मभिन्नो मेर्वादिवद्विषयभूतः परोक्षो वा स्यात्तदा असावीश्वरो ऽहमस्मीति मुमुक्षुर्न धारयेदात्मानं तत्त्वतो न प्रतिपद्येत, ततस्तत्त्वमस्यादिवचनविरोधः स्यात् । आत्मेति तूपगच्छन्ति ग्राहयन्ति चेतिन्यायविरोधश्च स्यादित्यर्थः । ईश्वर एवात्माहमस्मि नान्य इति चेद्धारयेद्विजानीयात्तदा न श्रुतिन्यायविरोध इति योज्यं,सा विद्या तिरोहितभेदाकारप्रत्यग्ब्रह्मैक्यावलम्बिनी अन्यस्या अविद्याया निवर्त्तिका समूलसंसारनिवर्त्तिकेत्यर्थः । "ब्रह्म वेद ब्रह्मैव भवति, ब्रह्मैव सन् ब्रह्माप्येती" त्यादिश्रुतौ ब्रह्मज्ञानस्य ब्रह्मभावफलश्रवणादन्यत्वपक्षे स्थितस्य नष्टस्य वान्यस्यान्यथा वानुपपत्तेरैक्यज्ञानमेव फलवदिति तत्रैव शास्त्रतात्पर्यं न भेदे, तत्त्वज्ञानस्याफलत्वादन्योसावन्योहमस्मीति न स वेदेति भेददर्शनस्य निन्दितत्वाच्च, भेदश्रुतेस्त्वनाद्यविद्याकल्पितभेदानुवादपरत्वाच्च स्वार्थे तात्पर्यमिति भावः ॥ १ ॥

इतश्चाभेदे वेदतात्पर्यमित्याह ।

(२) आत्मनोन्यस्य चेद्धर्मा अस्थूलत्वादयो मताः ।
अज्ञेयत्वे ऽस्य किं तैः स्यादात्मत्वे ह्यन्यधीह्नुतिः ॥ ३२ ॥

आत्मन इति । अस्थूलत्वादयो धर्माः प्रत्यगात्मनोन्यस्य भिन्नस्येश्वरस्य चेन्मता इष्टाः स्युः तदास्येश्वरस्यानात्मभूतत्वादज्ञेयत्वे सति मुमुक्षोरस्थूलत्वादिभिः श्रौतैर्धर्मैः किं स्यान्न किमपि स्थूलोहं कृशोहमित्यादिस्वगतभ्रान्त्यनिवृत्तेरित्यर्थः । यदा त्वस्थूलत्त्वादिधर्मक ईश्वरोहमस्मीति ज्ञायते तस्याप्यात्मत्वे सति प्रतीचोन्यधीह्नुतिः स्वात्मन्येव गृहीतायाः कृशस्थूलत्वादिधियो मोहमूलाया बाधसिद्धिः फलं स्यादित्यर्थः॥२॥

कस्मिन्नाकाश ओतश्च प्रोतश्चेति कार्यकारणात्मकजगदाश्रयप्रश्नोत्तरत्वेनाक्षरस्योपक्रमादेतस्य वा अक्षरस्य प्रशासने गार्गीति जगदीश्वरतया मध्ये परामर्शाददृष्टं द्रष्ट्रित्यादिना तत्स्वभावकथनपूर्वकमन्ते चैतस्मिन्नु खलु अक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेत्युपसंहारादीश्वरपरता ब्रह्मवाक्यस्याशेषस्यावधारिता । तत्र नान्यदतोस्ति द्रष्टृ श्रोतृ मन्तृ विज्ञात्रिति च द्रष्टृत्वाद्युपलक्षितस्य प्रत्यगात्मनोक्षरब्रह्माभेदश्चावधारित इतीश्वरात्मनोरभेद एव शास्त्रार्थो यतस्तस्मात्प्रत्यगात्मन्यध्यस्तस्थूलत्वादिप्रतिषेधपरमिदं वाक्यमास्थेयमित्यभिप्रेत्याह ।

(३) मिथ्याध्यासनिषेधार्थं ततोस्थूलादि गृह्यताम् ।
परत्र चेन्निषेधार्थं शून्यतावर्णनं हि तत् ॥ ३३ ॥

मिथ्येति । ततस्तस्माद् मिथ्याध्यासस्याज्ञानमूलस्य निषेधार्थं निवृत्त्यर्थमस्थूलादिप्रत्यगात्मविशेषणत्वेन गृह्यताम् । विपक्षे दोषमाह । परत्रेति । अस्थूलादिवाक्यं परत्र प्रत्यगात्मनोन्यत्र स्थूलत्वादिनिषेधार्थं चेत्स्यात्तदा हि निश्चितं शून्यतावर्णनमेव तत् स्यादात्मनोन्यस्य जडत्वात्तस्य च स्थौल्यादिधर्मयोगान्निषेध्यान्तःपातित्वे सतीश्वरस्येश्वरत्वायोगान्निषेधमात्रपरमेव वाक्यं स्यादित्यर्थः । तस्मादस्थूलादिधर्मकस्यानात्मत्वायोगादीश्वरमभ्युपगच्छतात्मैव सोभ्युपगन्तव्य इति भावः ॥ ३ ॥

किं च प्रत्यगात्मनोन्यत्र स्थूलत्वादिप्रतिषेधे चाप्राप्तप्रतिषेधो निष्फलश्चापद्येतेति दोषान्तरमाह ।

(४) बुभुत्सोर्यदि चान्यत्र प्रत्यगात्मन इष्यते ।
अप्राणो ह्यमनाः शुभ्र इति चानर्थकं वचः ॥ ३४ ॥

॥ इतीश्वरप्रकरणं तृतीयम् ॥ ३ ॥

बुभुत्सोरिति । यदि प्रत्यगात्मनो बुभुत्सोरात्मतत्त्वं बोद्धुमिच्छोः संसारित्वेनाभिमतादात्मन इति यावत् तदन्यत्र देहेन्द्रियप्राणमनस्तद्धर्मनिषेध इष्यते तदा अप्राण इत्यादिवचनमनर्थकं निर्विषयं स्यादन्यत्र प्राणादिप्रसक्त्यभावात्प्रतिषेधस्य च दृष्टार्थत्वादित्यर्थः ॥ ४ ॥

इतीश्वरात्मप्रकरणं तृतीयं विवृतम् ॥ ३ ॥

ननु यदिदमीश्वराभेदेनात्मनो ज्ञानं मोक्षसाधनमुक्तं तन्नोपपद्यते, संचितानेककर्मसद्भावात्कर्मणां च फलावश्यंभावनियमात्तैः प्रतिबन्धसंभवादिति तत्राह ।

(१) अहंप्रत्ययबीजं यदहंप्रत्ययवत्स्थितम् ।
नाहंप्रत्ययवन्ह्युष्टं कथं कर्म प्ररोहति ॥ ३५ ॥

अहंप्रत्ययेति । अहमिति प्रत्ययोहंकारो ऽनात्मन्यात्माभिमानलक्षणः स बीजं कारणं यस्य कर्मणस्तदहंप्रत्ययबीजम्, अहमिति प्रतीयते आत्मा यस्मिन्नन्तःकरणे साभासे तदहंप्रत्ययवत्तस्मिन्नहंप्रत्ययवति स्थितं संचितं यत्कर्मजातं तन्नाहं कर्त्ता भोक्ता किं तु ब्रह्मैवाहमस्मीति यः प्रमाणजनितः प्रत्ययः स एव वह्निस्तेनोष्टं दग्धं कथं पुनः प्ररोहति फलोन्मुखं जायेतेतियोजना । तथा च श्रुतिस्मृती ।

क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥

इति । ज्ञानोदये नान्तरीयकतया मूलाज्ञानस्य विरोधादेव निवृत्तिसंभवात्तदा तत्कार्यान्तःकरणस्यापि निवृत्तेराश्रयाभावे

कर्मस्थित्ययोगात्कुतस्तेन मोक्षप्रतिबन्धशङ्केत्यभिप्रायः ॥ १ ॥

ननु यथा ज्ञानवतोपि भिक्षाटनादिकर्म सफलमुपलभ्यते तथा तस्यादृष्टफलमपि कर्म सफलं स्यादिति कल्प्यत इति शङ्कते ।

(२) दृष्टवच्चेत्प्ररोहः स्यान्नान्यकर्मा स इष्यते ।
तन्निरोधः कथं चेत्स्यात्पृच्छामो वस्तदुच्यताम् ॥ ३६ ॥

दृष्टवच्चेत्प्ररोहः स्यादिति । परिहरति । नान्यकर्मा स इष्यते इति । नेति निषेधार्थः । स भिक्षाटनादिर्विदुषो व्यापारोन्यकर्मा अन्यत्प्रवृत्तफलं कर्म कारणं यस्य सोन्यकर्मा इष्यते, ज्ञानाविरोधिप्रारब्धफलकर्मनिबन्धनं हि भिक्षाटनादि, नैवं विधिलक्षणं, तस्य ज्ञानविरोधित्वादित्यर्थः । ननु ज्ञानादज्ञाननिवृत्त्या तन्मूलाहंकारनिवृत्तिद्वारेण तदाश्रयकर्मनिवृत्तौ कथमारब्धमपि कर्म सिद्ध्येद्यन्निमित्ता विदुषो भिक्षाटनादिकर्मप्रवृत्तिरिति पृच्छति पूर्ववादी । तन्निरोध इति । कर्माश्रयः प्रथमतच्छब्दार्थः । कर्म द्वितीयतच्छब्दार्थः ॥ २ ॥

उत्तरमाह ।

(३) देहाद्यारम्भसामर्थ्याज्ज्ञानं सद्विषयं त्वयि ।
अभिभूय फलं कुर्यात्कर्मान्ते ज्ञानमुद्भवेत् ॥ ३७ ॥

देहादीति । सद्विषयं प्रमाणजनितत्वेन तत्प्रबलमपि ब्रह्मात्मविषयं ज्ञानमभिभूय विदेहकैवल्यरूपात्फलात्प्रच्याव्य कर्म प्रारब्धफललक्षणं स्वफलं देहाभासजगदाभासरूपं त्वयि ज्ञानवत्यपि कुर्यादेव, कुतः, देहाद्यारम्भप्रतिसमर्थत्वादन्ते प्रारब्धकर्मफलभोगावसाने सति ज्ञानं प्रतिबन्धरहितं समुद्भवेदुद्भूतं भवति वर्त्तमानकार्यसंपादकाविद्यालेशमप्यपबाध्य विद्वांसं स्वाराज्ये स्थापयतीत्यर्थः ॥ ३ ॥

ननु प्रारब्धकर्मवशाज्ज्ञानिनोपि भोगः स्यात्त्वनारब्धकर्मतत्फलयोस्तस्मिन्नवस्थितिरिति कथमुपपद्येताज्ञानकार्यत्वाविशेषात्सर्वस्य, अज्ञाननिवृत्तौ च पुनराश्रयाभावेनावस्थानाभावस्य समत्वादित्याशङ्क्य विशेषमाह ।

(४) आरब्धस्य फले ह्येते भोगो ज्ञानं च कर्मणः ।
अविरोधस्तयोर्युक्तो वैधर्म्यं चेतरस्य तु ॥ ३८ ॥

आरब्धस्येति । भोगो ज्ञानं चेत्येते हि यस्मादारब्धस्य कर्मणः फले ऽतस्तयोरविरोधो युक्तः, इतरस्य त्वनारब्धफलस्य संचितस्य क्रियमाणस्य वा कर्मणो वैधर्म्यं वैपरीत्यं विरोध एवेत्यक्षरार्थः । अयं भावः । ज्ञानं हि स्वकारणाज्जायमानं शरीरादिसापेक्षमेव जायते, अशरीरस्यागन्तुकज्ञानासंभवात्, शरीरादि तु न ज्ञानकारणादुत्पद्यते, अन्यकारणस्यान्यहेतुत्वायोगा, दतः कैश्चित्कर्मविशेषैः शरीरविशेषे ज्ञानोत्पत्तियोग्ये स्वफलदानायारब्धे सति तमाश्रित्य ज्ञानहेतुकर्माणि ज्ञानमारभन्त इत्यभ्युपगन्तव्यं, तथा चारब्धे देहे तद्भोगस्यावश्यंभावित्वाद्भोगप्रदकर्मारब्धशरीरमाश्रित्य स्वहेतुं समासादितं ज्ञानं स्वफलमज्ञाननिवृत्तिं कुर्वदपि न सद्यो भोगैकनाश्यदेहारम्भककर्माक्षिप्ताविद्यालेशं निवर्त्तयेदित्युपजीव्यविरोधित्वाभावादिति नारब्धफलकर्मज्ञानयोर्विरोधो ऽनारब्धफलानां तु कर्मणामकर्त्रात्मतत्त्वज्ञानोदये विरोधादेव कर्तृस्वभावनिवृत्तावाश्रयाभावादभावोपपत्तेर्न ज्ञानेन सहावस्थानमुपपद्यते इत्यस्ति विशेष इति ॥ ४ ॥

ननु ज्ञानिनोपि चेद्भोगो देहारम्भककर्मनिबन्धनोस्ति तर्हि तस्य कदा चिद्देहात्माभिमानसंभवात्तदुद्भूतदुरितप्रतिबन्धवशान्मोक्षानुपपत्तिरिति चेन्नेत्याह ।

(५) देहात्मज्ञानवज्ज्ञानं देहात्मज्ञानबाधकम् ।
आत्मन्येव भवेद्यस्य स नेच्छन्नपि मुच्यते ॥ ३९ ॥

देहात्मज्ञानवदिति । यथा विवेकविलक्षणस्य लौकिकस्य देहे मनुष्योहमित्यात्मज्ञानं निःसन्दिग्धमुपलब्धं तथा मुख्यात्मन्येव देहाद्यहंकारपर्यन्तसाक्षिणि आत्मन्येव यस्य देहात्मज्ञानबाधकमहमस्मि परं ब्रह्मेत्येवं रूपं निःसंदिग्धं ज्ञानं भवेत्स यथोक्तज्ञानबलादनर्थराशेरपनीतत्वान्मुक्तिमनिच्छन्नपि बलान्मुच्यत एवेत्यर्थः । तथा चाविर्भूतात्मतत्त्वस्य पुनर्देहाभिमानहेत्वभावान्न मोक्षे को ऽपि प्रतिबन्ध इति भावः । तथा च श्रुतिः ।

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥

इत्याद्याः । तथा स्मृतयो ऽपि ।

बीजान्यग्न्युपदग्धानि न रोहन्ति यथा पुनः ।
ज्ञानदग्धैस्तथा क्लेशैर्नात्मा संबध्यते पुनः ॥
यथा पर्वतमादीप्तं नाश्रयन्ति मृगद्विजाः ।
तद्वद्ब्रह्मविदो दोषा नाश्रयन्ते कदा चन ॥
मन्त्रौषधबलैर्यद्वज्जीर्यते भक्षितं विषम् ।
तद्वत्सर्वाणि कर्माणि जीर्यन्ते ज्ञानिनः क्षणात् ॥

इति ॥ ५ ॥

ज्ञानिनः कर्मणा प्रतिबन्धाभावमुपपादितमुपसंहरति । तत इत्यर्द्धश्लोकेन ।

(६) ततः सर्वमिदं सिद्धं प्रयोगो ऽस्माभिरीरितः ।

॥ इत्यहंप्रत्ययप्रकरणम् ॥ ४ ॥

सर्वमिदमिति । प्रारब्धकर्माविरोधित्वोक्तिः, सिद्धं श्रुत्यादिप्रमाणसिद्धमित्यर्थः । प्रयोग उपपत्तिः ॥ ६ ॥

तत्त्वज्ञानस्वभावप्रकरणं च ऽ यै विद्त्त,महंप्रत्ययप्रकरणमित्यन्यत्र ॥ ४ ॥

## ॥ अथ वृषभानुजानामनाटिकायाः ॥

॥ तृतीयोऽङ्कः ॥

ततः प्रविशति मदनवेदनां नाटयन्ती ससखीजना राधा।

चम्पकलता। तन्मुखात् स्वेदबिन्दूनपमृज्य, साकूतम्। हला कधं सहसज्जेव्व एदाणं संभवो[१]।

राधा। गमणपरिस्समेण[२]।

चम्पकलता। सस्मितम्। संपदं ण दे परिस्समो हुविस्सदि, जदो संणिहिदो क्खु तुव वीसामहेदुओ सो तमालरुक्खओ जहिं पच्चक्खीभूदो दे तिलोईमोहणो सो[३]।

राधा। सभ्रूभङ्गम्। अइ सो को[४]।

चम्पकलता। कोवणे मा अण्णहा संकेहि कामरूबो[५]।

राधा। सप्रणयकोपम्। हला दाणिं ण दे वअणं सुणिस्सं[६]। इति कतिपयपदानि गच्छति।

चम्पकलता। पुरस्तमालं विलोक्य, राधां प्रति। हला मुहुत्तअं इह वीसमिअ अदूरे जा एसा पच्छाअसीअला कन्हस्स पुप्फवाड़िआ, णं अलंकरिअ पुप्पपल्लवेहिं मणो विणोदेहि[७]।

राधा। जं रुच्चइ सहीए[८]। इति सह सखीजनेन परिक्रामति।

ततः प्रविशति सप्रियालापः श्रीकृष्णः।

सर्वाः। ससंभ्रमं विलोकयन्ति।

राधा। निभृतं निर्वर्ण्यात्मगतम्। हिअअ समस्सस समस्सस, दाणिं मणोरहपहं वि अदिक्कामदि दे चिन्तिदं[९]।

प्रियालापः। भोदि चंपअलदे कीस णिच्चं इमाए वाड़िआए पुप्पाइं दीहिआए अ पंअजाइं चोरिअ तुम्हेहिं अप्पा अलंकरीअदि[१०]।

कृष्णः। सखे अलमनेनोपालम्भेन, यतः पुष्पेषु रतिर्नवयौवनशालिनीनामासां केनापि निवारयितुं न शक्यते।

[१] हे कथं सहसैवैतेषां संभवः।

[२] गमनपरिश्रमेण।

[३] सांप्रतं न ते परिश्रमो भविष्यति, यतः संनिहितः खलु तव विश्रामहेतुकः स तमालवृक्षकः, यत्र प्रत्यक्षीभूतस्ते त्रिलोकीमोहनः सः।

[४] अयि स कः।

[५] कोपने माऽन्यथा शङ्कय कामरूपम्।

[६] हे इदानीं न ते वचनं श्रोष्यामि।

[७] हे मुहूर्तकमिह विश्रम्यादूरे यैषा प्रच्छायशीतला कृष्णस्य पुष्पवाटिका एनामलंकृत्य पुष्पपल्लवैर्मनो विनोदय।

[८] यद्रोचते सख्यै।

[९] हृदय समाश्वसिहि समाश्वसिहि, इदानीं मनोरथपथमप्यतिक्रामति ते चिन्तितम्।

[१०] भवति चम्पकलते कस्मान्नित्यमस्या वाटिकायाः पुष्पाणि दीर्घिकायाश्च पङ्कजानि चोरयित्वा युष्माभिरात्मालंक्रियते।

चम्पकलता। कृष्णस्य वक्रोक्तिमवधार्य, प्रियालापं प्रति। अज्ज जइ इमिणा तुव वअस्सेण गोउले वल्लवविलासिणीणं[१]। इत्यर्धोक्ते सलज्जमिव तिष्ठति।

कृष्णः। अयि उन्मत्ते किम्।

चम्पकलता। विहस्य। तुम्हेहिं सह घरं घरं हिण्डिअ दहि दुद्धं चोरिदं तह अवरं वि जाणेसि[२]।

कृष्णः। साश्चर्यमात्मगतम्। कथमन्यतोऽनया धूर्तया नीतः स्वीयो वाग्विलासः।

प्रियालापः। जइ इमाए तत्तभोदीए संगोइदाइं पुप्पपंअजाइं दीसंदि तदो किं[३]।

चम्पकलता। तदो सअं जेव्व चोरिआ हुविस्सदि[४]।

राधा। सभ्रूभेदम्। सख्या मुखमालोकते।

कृष्णः। अयि सुतनु कथं कुप्यसि, नन्वेतानि तवाङ्गान्येव चौर्यं स्फुटं कथयन्ति। यतः।

तवाननं सुन्दरि फुल्लपङ्कजं स्फुटं जपापुष्पमसौ तवाधरः।<br>
विनिद्रपद्मं तव लोचनद्वयं तवाङ्गमन्यत् किल पुष्पसंचयः॥४०॥

राधा। लज्जामभिनीयससाध्वसमधोमुखी तिष्ठति।

कृष्णः। स्वगतम्। अहो साध्वसेऽप्यस्याः परमा शोभा। तथाहि।

अधीरोद्वीक्षितं तन्व्याः स्फुरिताधरमाननम्।<br>
पुष्णात्येव परां शोभां मण्डनं किं न सुभ्रुवाम्॥४१॥

नेपथ्ये। कहिं पेक्खिस्सं पिअसहिं राहिअं भोणत्था तं पड़िच्छदि महादेई[५]।

चम्पकलता। समाकर्ण्य। हला तमालिए एसा णाअरिआ त्ति तक्केमि[६]।

तमालिका। एव्वं णेदं[७]।

कृष्णः। सोद्वेगमपसृत्य मदनवेदनां नाटयन् प्रियालापं प्रति।

तां यावद्विनयोपचारमधुरैस्तैस्तैर्वचोभिः सखे<br>
तद्भावं च सखीजनस्य हृदयं ज्ञात्वा करोम्युन्मुखीम्।<br>
तावन्नागरिकासमागमवशाद्दृष्टेर्यथावग्रहः<br>
संजातः प्रतिबन्धको विधिकृतः कोऽयं हहा प्रक्रमः॥४२॥

[१] आर्य यद्येतेन तव वयस्येन गोकुले वल्लवविलासिनीनाम्।

[२] युष्माभिः सह गृहं गृहं हिण्डित्वा दधि दुग्धं चोरितं तथाऽपरमपि जानासि।

[३] यद्यनया तत्रभवत्या संगोपितानि पुष्पपङ्कजानि दर्शयामि तदा किम्।

[४] तदा स्वयमेव चोरिका भविष्यति।

[५] कुत्र प्रेक्षिष्ये प्रियसखीं राधिकां भवनस्था तां प्रतीक्षते महादेवी।

[६] हे तमालिके एषा नागरिकेति तर्कयामि।

[७] एवं न्विदम्।

पुनः सपरितापम् ।

मधुपे मालतीपुष्पं सतृष्णं यातुमुद्यते ।
हन्त दैवादुपागम्योपात्तमारण्यकेन तत् ॥ ४३ ॥

प्रियालापः । पिअवअस्स अदिमेत्तं तवइ भअवं सहसरस्सी, मुहुत्तअं अस्सिं तमालखण्डन्तरे उवविसम्ह [१] ।

कृष्णः । ऊर्ध्वमवलोक्य । सत्यमर्धत्वं गतो दिवसः । यतः ।

उत्तप्रोऽयमुरंगमः शिखितलच्छायां समालम्बते
वैरं साहजिकं विहाय च शिखी मूलं तरोर्गच्छति ।
याचन्ते च जलं निकुञ्जभवने तृष्णातुराः सारिका-
स्तप्ते वारिणि पङ्कजानि मधुपास्त्यक्त्वा श्रयन्ते लताः॥४४॥

उभौ परिक्रम्योपविशतः ।

कृष्णः । सखे इदानीं केन व्यापारेण दिवसमतिवाहयेयम् ।

प्रियालापः । विहस्य । लोअणाइं णिमीलिअ ताए पणिधाणेण, अहवा रूवं आलिहिअ दंसणसुहेण [२] ।

कृष्णः । नन्विह न संनिहितानि लेखोपकरणानि ।

प्रियालापः । अत्थि जेव्व तमालवत्तं केसरकुसुमरसो अ [३] ।

कृष्णः । नाट्येन गृहीत्वा । यद्यपि वेपते मेऽग्रहस्तस्तथापि कथंचिल्लिखामि । इति लिखित्वा विलोकयन् सास्रम् ।

मूर्तिर्मयात्र लिखिता दयिते तवेयं
रूपं यथा तव तथा च यथाकथंचित् ।
आलिख्यते कथमपाङ्गविलासलीला-
लावण्यमङ्गवलनं च सविभ्रमं ते ॥ ४५ ॥

प्रियालापः । भो वअस्स आलिहिदा तुए एसा, कधं दाणिं अस्सूजलेण दूसएसि णं [४] । हस्तादपकृष्य स्वकक्षान्तरे निवेशयति ।

कृष्णः । परितो निर्वर्ण्य । किं परिणतो दिवसः । यतः ।

आवासोत्सुकपक्षिणः कलरुतं क्रामन्ति वृक्षालयान्
कान्ताभाविवियोगभीरुरधिकं क्रन्दत्ययं कातरः ।
चक्राह्वो मधुपाः सरोजगहनं धावन्त्युलूको मुदं
धत्ते चारुणतां गतो रविरसावस्ताचलं चुम्बति ॥ ४६ ॥

प्रियालापः । भो वअस्स मा कविदागव्वं उव्वह, अहं वि इमं वासवासावहूघरादो णिक्कमन्तं मिअलच्छणं वण्णइस्सं [५] ।

[१] प्रियवयस्य अतिमात्रं तपति भगवान् सहस्ररश्मिः, मुहूर्तकमस्मिंस्तमालखण्डान्तरे उपविशावः ।

[२] लोचनानि निमील्य तस्याः प्रणिधानेन, अथवा रूपमालिख्य दर्शनसुखेन ।

[३] अस्त्येव तमालपत्रं केसरकुसुमरसश्च ।

[४] भो वयस्य आलिखिता त्वयैषा, कथमिदानीमश्रुजलेन दूषयस्येनाम् ।

[५] भो वयस्य मा कवितागर्वमुद्वह, अहमपीमं वासवाशावधूगृहान्निष्क्रामन्तं मृगलाञ्छनं वर्णयिष्ये ।

कृष्णः । सस्मितं । यद्भवतेऽभिरोचते ।

प्रियालापः । संस्कृतेन ।

सुधारश्मिः सद्यस्तिमिरनिकरान्तं विरचय-
न्नलिन्देभ्यः स्यन्दं शशिमणिसमुत्थं च वितरन् ।
उदेत्यादौ रक्ताम्बुजसमरुचिः कैरववने
प्रमोदं तन्वानो मधुपवनितागीतिमधुरम् ॥ ४७ ॥

कृष्णः । स्मित्वा । साधु वर्णितं वयस्येन, इदानीं गवां गोष्ठसंचारणाय गच्छावः । इति निष्क्रान्तौ ।

ततः प्रविशति नागरिका ।

नागरिका । राधामुखमालोक्य, जनान्तिकम् । हला चंपअलदे कधं उम्मणाअदि एसा पिअसही [१] ।

चम्पकलता । स्वगतम् । तक्किदो चउराए इमाए वि से हिअअवुत्तन्तो, किं दाणिं एत्थ कधइस्सं, होदु एव्वं [२] । प्रकाशम् । अपवार्य, संस्कृतेन ।

आलीजनेषु सुतनुः सखि संप्रवृत्ते
कर्णं ददाति रतिकेलिकथाप्रसङ्गे ।
बालाजनेन पुरतोऽपि वितन्यमाने
क्रीडाविधौ च न पुरेव, ददाति चित्तम् ॥ ४८ ॥

नागरिका । सहि णूणं से हिअए भअवदा कुसुमाउहेण वासो किदो, जं दुदीआ मिअङ्कलेहा विअ अदिकिसदाए लावण्णमेत्तसेसङ्गजट्ठी सिदकेदअणिभेहिं सपुलअकवोलफलएहिं आपाण्डुरं मिलाअमाणपंकजं विअ आणणं उव्वहन्ती फन्दमाणाहरपल्लवा अदिपिअदंसणा पड़िहादि [३] । प्रकाशम्, हला राहे किंपि दुम्मणा भोदी त्ति अवहारिअ वेवइ मे हिअअं, कहेहि पिअसहि किं एत्थ कारणं [४] ।

चम्पकलता । सहि णाअरिए मअरद्धुजपूआप्पसङ्गेण एदाए अदिअपुव्वो अच्चरिअरूवो [५] । इत्यर्धोक्ते ।

राधा । स्वगतम् । णूणं एसा तं हिअअदइदं जणं वदिस्सदि [६] । इत्यङ्गुलीदलसंज्ञया वारयति ।

[१] हे चम्पकलते कथमुन्मनायते एषा प्रियसखी ।

[२] तर्कितश्चतुरयानयाप्यस्या हृदयवृत्तान्तः, किमिदानीमत्र कथयिष्ये, भवत्वेवम् ।

[३] सखि नूनमस्या हृदये भगवता कुसुमायुधेन वासः कृतः, यद्द्वितीया मृगाङ्कलेखेवातिकृशतया लावण्यमात्रशेषाङ्गयष्टिः सितकेतकनिभाभ्यां सपुलककपोलफलकाभ्यामापाण्डुरं म्लायत्पङ्कजमिवाननमुद्वहन्ती स्पन्दमानाधरपल्लवाऽतिप्रियदर्शना प्रतिभाति ।

[४] हे राधे किमपि दुर्मना भवतीत्यवधार्य वेपते मे हृदयम्, कथय प्रियसखि किमत्र कारणम् ।

[५] सखि नागरिके मकरध्वजपूजाप्रसङ्गेनैतयात्यपूर्व आश्चर्यरूपः ।

[६] नूनमेषा तं हृदयदयितं जनं वदिष्यति ।

चम्पकलता । तमालरुक्खत्र्रो दिट्ठो, तदो आरहित्र्र अदिचइदा क्खु एसा[१] ।

राधा । सानन्दमात्मगतम् । अदिणिउणत्तणेण पसंगंतरं उवणीदा इमाए अत्तणो सरस्सई[२] ।

नागरिका । हला वण्णेहि तम्[३] ।

चम्पकलता । संस्कृतमाश्रित्य ।

उत्फुल्लपङ्कजनिपक्तलसद्विरेफः
किंचिद्विनिद्रकुमुदोत्करसंभृतश्रीः ।
आमूलनद्धविविधाद्भुतमाल्यमाल-
श्चित्रं न कस्य तनुते ललितस्तमालः ॥ ४९ ॥

राधा । सविषादमात्मगतम् । हन्त णिवारिदाए वि एदाए तमालच्छलेण कधिदं जेव्व । अदिणिउणा उण णाअरिआ सव्वं अवअच्छदि[४] ।

नागरिका । स्वगतम् । णिअदं को वि तमालसामलंगच्छवी सिमिदसुहासंभिदउप्फुल्लपुण्डरीअमुद्धाणणो विविहप्पसूणसंचअसंकुलाए पाआलम्बिणीए वेजअन्तीए मअणकरिकणअसंखलाए विअ अलंकिदो अलिविब्भमणवोप्पलविलासेहिं विलोअणेहिं मणोहरो मम्महसंआसो से लोअणपहं पउत्तो । अहवा एदेहिं गुणेहिं अलंकिदो णन्दणन्दणो जेव्व जणाणणादो सुणीअदि । कदा वि सो एत्थ इमाए दिट्ठिगोअरं गदो भवे[५] । प्रकाशम् । हला सहि मं वि दंसेहि तं तमालअं[६] ।

चम्पकलता । ईषदुपदर्शितस्मिता राधामुखं पश्यति ।

राधा । विचिन्त्यात्मगतम् । अदूरे भविस्सदि सो दुल्लहजणो, परिहाससीला क्खु एसा चंपअलदा, कदा वि णाअरिआदिट्ठिपहं करेदि तं[७] । नागरिकामग्रहस्ते गृहीत्वा । हला अम्बा मं विणा दुक्खमणुभोदि ता घरं गमिस्सं[८] । इति सखीभिः सह निष्क्रान्ता ।

प्रविश्य सत्वरा विद्रुमलता । परिक्रम्यावलोक्य च । आकाशे । मुणालिए अदिअसुत्या पिअसही राहिआ, ताए किदे दीहिआदो विसिणीवत्ताइं आणेदुं गदा पिअसही कअलिआ दिट्ठा तुए[१] । श्रुतिमभिनीय । किं वदसि । चिरेण कालेण गेन्हिअ गदा । अहं वि आणत्तम्हि भअवदीए वुन्दाए, जह वच्छे विद्दुमलदे गच्छ सिग्घं, कन्हस्स गोउलादो गोधूलिं अध केसितित्थादो जल उसीरादिअं अ समाहर । ता तहिं गच्छम्हि । तुमं उण एदं कप्पूरं विलेवणं अ गेन्हिअ पत्थिदासि, ता तुरिददरं गच्छ[२] ।

इति निष्क्रान्ते ।

ततः प्रविशति विरहपर्याकुलः कृष्णः ।

कृष्णः । सखे प्रियालाप ।

तस्याः किं मुखपङ्कजं स्मितरुचा चन्द्रद्युतेर्निन्दकं
किं वा नेत्रयुगं कटाक्षचतुरं किं भ्रूलताविभ्रमम् ।
किंच स्निग्धमवेक्षितं मयि पुनर्यान्त्या सखीनां पुरः
किं किं संप्रति चिन्तयामि हृदये कामेन लक्ष्यीकृते ॥ ५० ॥

अपिच ।

तां हेमचम्पकरुचिं मृगशावकाक्षीं
पार्श्वे स्थितां च पुरतः परिवर्तमानाम् ।
पश्चात् तथा दशदिशासु परिस्फुरन्तीं
पश्यामि तन्मयमहो भुवनं किमेतत् ॥ ५१ ॥

प्रियालापः । अच्चरिअं अच्चरिअं, जं पेक्खिअ भवं वि एव्वं विम्हिदो, ता चउद्दहलोए सुरगन्धव्वकिंणरणाअकण्णआणं मज्झे ण का वि तादिसी त्ति तक्केमि[३] ।

कृष्णः । सखे एवमेतत् । न खलु सा वेधसः सृष्टिः । यतः ।

अमृतं तदधरबिम्बे वचनेष्वमृतं विलोकनेऽप्यमृतं ।
अमृतभृतौ कुचकुम्भौ सत्यं सा सृष्टिरपरैव ॥ ५२ ॥

मदनबाधां रूपयन् दीर्घमुष्णं च निःश्वस्य ।

भवनेत्रभवो वह्निरद्यापि त्वयि मन्मथ ।
ज्वलतीवान्यथा किं ते विशिखास्तत्कणा इव ॥ ५३ ॥

---

[१] तमालवृक्षको दृष्टः, तत आरभ्यातिचकिता खल्वेषा ।

[२] अतिनिपुणत्वेन प्रसङ्गान्तरमुपनीताऽनयात्मनः सरस्वती ।

[३] हे सखि वर्णयतम् ।

[४] हन्त निवारितयाप्येतया तमालच्छलेन कथितमेव, अतिनिपुणा पुनर्नागरिका सर्वमवगच्छति ।

[५] नियतं कोऽपि तमालश्यामलाङ्गच्छविः स्मितसुधासंभृतोत्फुल्लपुण्डरीकमुग्धाननो विविधप्रसूनसंचयसंकुलया पादालम्बिन्या वैजयन्त्या मदनकरिकनकशृङ्खलयेवालंकृतोऽलिविभ्रमनवोत्पलविलासाभ्यां विलोचनाभ्यां मनोहरो मन्मथसंकाशोऽस्या लोचनपथं प्रवृत्तः, अथवैतैर्गुणैरलंकृतो नन्दनन्दन एव जनाननात् श्रूयते, कदापि सोऽत्रास्या दृष्टिगोचरं गतो भवेत् ।

[६] हे सखि मामपि दर्शय तं तमालकम् ।

[७] अदूरे भविष्यति स दुर्लभजनः, परिहासशीला खल्वेषा चम्पकलता, कदापि नागरिकादृष्टिपथं करोति तम् ।

[८] हे सखि अम्बा मां विना दुःखमनुभवति तद्गृहं गमिष्यामि ।

[१] मृणालिके अत्यस्वस्था प्रियसखी राधिका, तस्याः कृते दीर्घिकातो बिसिनीपत्राण्यानेतुं गता प्रियसखी कदलिका दृष्टा त्वया ।

[२] किं वदसि, चिरेण कालेन गृहीत्वा गता, अहमप्याज्ञप्तास्मि भगवत्या वृन्दया, यथा वत्से विद्रुमलते गच्छ शीघ्रम्, कृष्णस्य गोकुलतो गोधूलिम्, अथ केशितीर्थतो जलमुशीरादिकं च समाहर, तत् गच्छामि, त्वं पुनरिदं कर्पूरं विलेपनं च गृहीत्वा प्रस्थितासि, तत् त्वरिततरं गच्छ ।

[३] आश्चर्यमाश्चर्यम्, यां प्रेक्ष्य भवानप्येवं विस्मितः, तच्चतुर्दशलोके सुरगन्धर्वकिंनरनागकन्यकानां मध्ये न कापि तादृशीति तर्कयामि ।

प्रियालापः । समस्सदु समस्सदु पिअवअस्सो[1] । हस्तेन वेत्रलतामुद्यम्य सक्रोधं तमालमूले प्रतिष्ठितं कुसुमायुधं ताडयितुमभिसरन् । रे वराअ कुसुमाउह तुमं जेव्व मम पिअवअस्सं एव्वं संदावेसि, ता गेह्ण इमं मम हत्थदो सुदिढप्पहारं[2] ।

कृष्णः । सस्मितं तद्बाहुमाकृष्य सखे तत्प्रतिनिधिं परिकल्प्य पूज्यते नतु साक्षादयम् ।

प्रियालापः । परावृत्य । एव्वं, भो अलं दाणिं पलविदेण, इमस्सिं माहवीमंडवे मुहुत्तअं उपविसिअ मणो विणोदेतु भवं[3] ।

कृष्णः । यदभिरुचितं वयस्याय, उभावुपविशतः ।

प्रविश्य सत्वरं श्रीदामा । पिअवअस्स तुमं पेक्खिदुं अदिउस्सुओ गोगणो ता दंसेहि अत्ताणं[4] ।

कृष्णः । सरभसं प्रवर्तते गन्तुम् ।

प्रियालापः । अग्रतोऽवलोक्य, सकौतुकम्, कृष्णस्य कर्णे । पिअवअस्स भमरेहिं चुंविअमाणं एदं मिलाअमाणणीलोप्पलं दे पेअसीए कण्णादो णिपड़िदं तक्केमि[5] । गृहीत्वा हस्तेऽर्पयति ।

कृष्णः । तत्क्षणं हृदये निधाय सोच्छ्वासं, स्वगतम् ।

मन्ये तल्लोचनापाङ्गैः श्रुतिसीम्नि समागतैः ।
असूययेव खल्वेतत् प्रसभेन निपातितम् ॥ ५४ ॥

अपिच ।

स्थाने म्लानत्वमेतस्य श्रुतेर्निपतितं यतः ।
पुनस्तत् पदमारोढुं स्वाङ्गं शोषयतीव तत् ॥ ५५ ॥

इति निष्क्रान्ताः सर्वे ॥

इति श्रीमथुरादासेन विरचितायां श्रीवृषभानुजानामनाटिकायां तृतीयोऽङ्कः ॥ ३ ॥

---

[1] समाश्वसितु समाश्वसितु प्रियवयस्यः ।

[2] रे वराक कुसुमायुध त्वमेव मम प्रियवयस्यमेवं संतापयसि, तद्गृहाणेमं मम हस्ततः सुदृढप्रहारम् ।

[3] एवम्, भो अलमिदानीं प्रलपितेन, अस्मिन्माधवीमण्डपे मुहूर्तकमुपविश्य मनो विनोदयतु भवान् ।

[4] प्रियवयस्य त्वां प्रेक्षितुमत्युत्सुको गोगणः, तद्दर्शयात्मानम् ।

[5] प्रियवयस्य भ्रमरैश्चुम्ब्यमानमेतन्म्लायन्नीलोत्पलं ते प्रेयस्याः कर्णतो निपतितं तर्कयामि ।

# THE VAIŚESHIKA APHORISMS OF KAṆĀDA.

## FIRST BOOK, SECOND DAILY LESSON.

(*Continued from page 14.*)

The notion of Quality. तथा गुणेषु भावाद्गुणत्वमुक्तम् ॥ १३ ॥

Aph. 13. In like manner the notion of Quality is explained from its existence in Qualities.

[1] He explains the notion of Quality. The notion of Quality, like existence, is declared to be distinct from Substances, Qualities, and Actions on account of its existence or Inhesion in Qualities only. U.

सामान्यविशेषाभावेन च ॥ १४ ॥

Aph. 14. Also by the Non-existence [in it] of Generality and Particularity.

[2] He states another distinction. If the notion of Quality were not something over and above Substances, Qualities, and Actions, it would then be apprehended as constituting a class contained in one or other of the notions of Substance, Quality, or Action. U.

The notion of Action. कर्मसु भावात् कर्मत्वमुक्तम् ॥ १५ ॥

Aph. 15. The notion of Action is explained from its existence in Actions.

[3] He states the distinction of the notion of Action from Substances, Qualities, and Actions. The notion of Action is also explained, like existence, to be another class distinct from Substances, Qualities, and Actions, on account of its existence or Inhesion in Actions only. U.

सामान्यविशेषाभावेन च ॥ १६ ॥

Aph. 16. Also by the Non-existence [in it] of Generality and Particularity.

[4] If the notion of Action were identical with Substances &c., the Generality and Particularity of Substances

---

[1] गुणत्वमाह । गुणेष्वेव भावात् समवायात् गुणत्वं द्रव्यकर्मभ्यो भिन्नं सत्तावदेवोक्तमित्यर्थः ॥

[2] भेदकान्तरमाह । यदि द्रव्यगुणकर्मभ्यो गुणत्वमतिरिक्तं न भवेत्तदा द्रव्यत्वगुणत्वकर्मत्वतदवान्तरजातिमत्तया उपलभ्येतेत्यर्थः ॥

[3] द्रव्यगुणकर्मभ्यो भेदकं कर्मत्वस्याह । कर्मस्वेव भावात् समवायात् कर्मत्वमपि जात्यन्तरं द्रव्यगुणकर्मभ्यो भिन्नमुक्तं सत्तावदित्यर्थः ॥

[4] कर्मत्वं यदि द्रव्याद्यात्मकं भवेत्तदा द्रव्यत्वादिसामान्यविशेषस्तत्र समवेयादित्यर्थः । सेयमेकाकारा चतुःसूत्री सत्ताद्रव्यत्वगुणत्वकर्मत्वानां चतसृणां जातीनां द्रव्यगुणकर्मभेदप्रतिपादनाय एकप्रकरणेनोक्तेत्यवधेयम् ॥

&c., would inhere in it. It is to be understood that these four Aphorisms identical in form [viz. 10, 12, 14, 16,] are stated in one section to explain the distinction from Substances, Qualities, and Actions, of the four classes existence, notion of Substance, notion of Quality, and notion of Action. U.

Existence is one. सदिति लिङ्गाविशेषाद्विशेषलिङ्गाभावाच्चैको भावः ॥ १७ ॥

Aph. 17. Because of the non-particular property of being and of the Non-existence of a particular property there is [only] one existence.

[1] A conception in the form of being or the applicability of that word is the property of existence. This conception is common, without distinction in regard to Substances, Qualities, and Actions. Hence existence or being abides in them as only one. For otherwise either being would not exist, or they would not exist, for Existence is in the same number of individuals as Substance &c. 'Because of the Non-existence of a particular property.' The meaning of this is that from the non-existence of a property or ground of inference in Particularity or distinction, there is no distinction. For there is no particular property in existence, like the particular property or distinction of extension of length and shortness in the case of the judgment. 'That is the lamp.' U.

## SECOND BOOK, FIRST DAILY LESSON.

Qualities of Earth. रूपरसगन्धस्पर्शवती पृथिवी ॥ १ ॥

Aph. 1. Earth is possessed of Colour, Taste, Smell and Feel.

[2] The Colour of the Earth is of many kinds, blue, yellow &c. Hence the characteristic of constituting a class contained in the notion of Substance and being the general substratum of blue colour. So also there is in the Earth Taste of various kinds, pungent, astringent &c. Hence the characteristic of constituting a class contained in the notion of Existence and being the general substratum of pungent Taste. In like manner by the substitution of the words 'astringent' &c., other characteristics are to be inferred. Smell is of two kinds, fragrant and unfragrant. Hence the characteristic of constituting a class contained in the notion of Substance and being the general substratum of Smell. Thus too it will be seen that the notion of Substance is a substratum of classes which are substrata not general of Qualities which are substrata general or not general of odour. It must not be objected that as Smell and Taste are not observed in a stone &c., both these Qualities are not invariably present. For even though Smell and Taste accidentally be not observed in it, they are observed in its ashes. The self-same particles which were originally constituent of the stone are also originally constituent of its ashes. Therefore the presence of these attributes is not merely occasional. [If it be asked] 'How then is a breeze fragrant, and water mixed with Káravella [a kind of gourd] bitter'? [This] is no [objection], for the Taste and Smell of those are conditions produced by the Earth. There is a Feel in the Earth, neither hot nor cold, but temperate. Hence the characteristic of constituting a class contained in the notion of Substance and being the general substratum of the feeling of temperate warmth. Temperate warmth may be clearly explained by another description, viz., that it is the Feel of the Earth; another description is clearer, viz., that it is a species of Feel residing in the flowers of the Śiríśa, Lavangí &c. U.

Qualities of Water. रूपरसस्पर्शवत्य आपो द्रवाः स्निग्धाः ॥२॥

Aph. 2. Water is possessed of Colour, Taste, and Feel, and is fluid and viscid.

[1] In Water the Colour is white, the Taste sweet, the Touch cold, the Fluidity natural. Thus in the apho-

---

[1] सदित्याकारकं ज्ञानं शब्दप्रयोगो वा सत्ताया लिङ्गं तच्च द्रव्यगुणकर्मसु समानमविशिष्टं तेन भावः सत्ता एकैव तेषु वर्तते अन्यथा द्रव्यत्वादिभिस्तुल्यव्यक्तिकतया सत्ता वा न स्यात् तानि वा न स्युः विशेषलिङ्गाभावाच्चेति विशेषो भेदस्तत्र यल्लिङ्गमनुमानं तदभावाच्च न भेद इत्यर्थः। भवति हि स एवायं दीप इत्यनुगमस्तत्र यथा विशेषलिङ्गं दीर्घह्रस्वत्वादिपरिमाणभेदस्तथात्र विशेषलिङ्गं नास्तीति भावः ॥

[2] रूपं नीलपीताद्यनेकप्रकारं पृथिव्या एव। तथा च नीलरूपसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं लक्षणम् एव रसः कटुकषायाद्यनेकप्रकारकः पृथिव्यामेव तथा च कटुरससमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं लक्षणम् एवं कषायादिपदप्रक्षेपेण लक्षणान्यूहनीयानि। गन्धो द्विविधः सुरभिरसुरभिश्च तथा च गन्धसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं लक्षणं तथा गन्धसमानाधिकरणगन्धासमानाधिकरणगुणासमानाधिकरणजात्यधिकरणद्रव्यत्वं द्रष्टव्यम्। न च पाषाणादौ गन्धरसयोरननुभवात् तत्राव्यापकमिदमुभयमपीति वाच्यं तत्रापाततो गन्धरसयोरननुभवेऽपि तदीयभस्मसु तदुपलम्भात् य एवावयवाः पाषाणारम्भकास्त एव तद्भस्मारम्भका अपीति नाव्याप्तिः कथं तर्हि सुरभिः समीरणः तिक्तं कारवेल्लजलमिति प्रतीतिरिति चेन्न पार्थिवोपाधिकत्वात् तयोर्गन्धरसयोः स्पर्शोऽप्यनुष्णाशीतः पाकजः पृथिव्यामेव तथा च पाकजस्पर्शसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं लक्षणम् पाकजत्वञ्च विशेषान्तरव्यङ्ग्यं पृथिवीस्पर्श एव विशेषान्तरञ्च शिरीशलवङ्गीकुसुमादौ स्पर्शविशेषे स्फुटतरम् ॥

[1] जले रूपं शुक्लं रसो मधुरः स्पर्शः शीतः द्रवत्वं सांसिद्धिकं तथा च जलसूत्रे पञ्चानां गुणानामुपादानात् पञ्चैव जललक्षणानि मुनेरभिप्रेतानि। तथा च नीलसमानाधिकरणभास्वरशुक्लासमानाधिकरणरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं तिक्तावृत्तिमधुरवृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं शीतस्पर्शवत्त्वं सांसिद्धिकद्रवत्ववत्त्वं स्नेहवत्त्वमित्येतानि लक्षणानि जलस्येति भावः। हिमकरकादौ यदि न सांसिद्धिकद्रवत्वं तदा सांसिद्धिकद्रवत्ववद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं विवक्षणीयम्। लवणाद-

rism on Water by the enumeration of five Qualities, five characteristics of Water are implied by the sage. The characteristics of Water are, that it is a class perceptibly contained in the notion of Substance and existing in possession of Colour not the general substratum of bright and white but the general substratum of blue Colour. It is a class perceptibly contained in the notion of Substance existing as something sweet and not existing as something bitter. It is possessed of cold Touch, of natural Fluidity and of Viscidity. If there is no natural Fluidity in ice, hail, &c., it must be understood that they belong to a class included in the notion of Substance and existing in the possession of natural Fluidity. The observation of blue Colour in the sea, the water of the Kálindí (Yamuná) &c., is an illusion produced by the conditions of the substratum, for if it is tossed into the air it is perceived to be white. Though no Taste be perceived in Water, yet after eating astringent Substances such as yellow myrobalan sweetness is observed in Water for it is distinguished by that [Taste.] The hot Touch which appears in Water through Conjunction with the sun's rays &c. belongs properly to the sun's rays &c. Though it might be asked, inasmuch as Fluidity is not perceived in ice, hail &c., how it is possible that it should be contained in Water, yet when the ice, hail &c., are melted with heat it is proved sensibly to be Water. The author of the Muktávalí maintains that its Fluidity is not derived from Conjunction with celestial fire, but the appearance of solidity is in those cases an illusion. But some contend that through Conjunction with celestial fire there are produced in ice &c., successively from aqueous atoms an aggregate of two atoms, an aggregate of three atoms and so forth, and that such aggregates of two or more atoms are destitute of Fluidity, and solid, and that accordingly the appearance of solidity is not an illusion. There is also Viscidity in Water, and that of clarified butter and the like is the Viscidity of the Water which is one of the ingredients. It is through the excess of this that clarified butter &c., are highly inflammable. That kind of conjunction which is called agglomeration and which consists in meal, sand &c., becoming globular is caused by Viscidity accompanied with Fluidity. Were it caused by Fluidity alone it would be produced from the Fluidity of glass, gold &c. Nor is it produced by Viscidity alone, for then it would follow that it would be produced also by thickened clarified butter &c. V.

Qualities of Light. **तेजो रूपस्पर्शवत् ॥ ३ ॥**

Aph. 3. Light has Colour and Touch.

[1] Light [or heat] is possessed of luminous Colour and hot Feel. If it be objected, 'Luminousness is the giving of light to other bodies, and such Colour is not found in heat or in Light as it exists in gold, in a frying-pan, or in water. White Colour is nowhere found in these, nor is a hot Feel found in moonlight or gold. How then is this so'? We reply that it may be inferred that luminous Colour exists in heat &c., because they are Light. If it be said, 'The notion of Light is not proved to exist in these by their own Colour,' we reply it is inferred from their possessing a hot Feel. If it be asked, 'How is the notion of Light [proved to exist in gold'?] We reply that it will be explained that it is because it is inferred to be Light from its being a distinctive substratum of Fluidity which is produced but not destroyed by the closest Conjunction with fire; and that the existence of Light in a frying-pan &c., is inferred from the possession of the feeling of heat. For Light is of four kinds: that in which Colour and Feel predominate, as sunlight; that in which Colour predominates and Feel does not, as moonlight; that in which neither Colour nor Feel predominates, as the eye; that in which Colour does not but Feel does predominate, as the hot season, and Light as existing in water, a frying-pan and the like. U.

With respect to the relation between light and heat,

कालिन्दीजलादौ या नीलोपलब्धिः सा आश्रयोपाधिकी भ्रान्तिरेव वियति विक्षेपे तस्यैव धवलिमोपलब्धेः यद्यपि जले कोऽपि रसो नानुभूयते तथापि हरीतक्यादिकषायद्रव्यभक्षणानन्तरं जलमाधुर्यमनुभूयत एव तस्य तद्व्यञ्जकत्वात् । सूरकरादिसंयोगाज्जले यदुष्णस्पर्शः प्रतीयते सोऽपि सूरकरादेरेव यद्यपि हिमकरकादौ द्रवत्वं नानुभूयते इति कथं तस्य जले ऽन्तर्भावः सम्भवति तथापि उष्मणा विलीने तत्र जलत्वं प्रत्यक्षसिद्धमेव दिव्यतेजःसंयोगात्तु तत्र द्रवत्वप्रतिरोधः काठिन्यप्रतीतिस्तु तत्र भ्रान्तिरेवेति मुक्तावलीकारः । केचित्तु दिव्यतेजःसंयोगात् जलपरमाणुभ्यां द्व्यणुकं तैश्च त्रसरेण्वादिकं क्रमेण हिमादौ जायते तादृशद्व्यणुकादिकञ्च द्रवत्वरहितं कठिनमेवेति हिमादौ काठिन्यप्रतीतिर्न भ्रान्तिरित्याहुः । स्नेहस्तु जलएव घृतादावपि तदुपस्तम्भकजलस्यैव स्नेहः तत्प्रकर्षाच्च घृतादेर्दहनानुकूलत्वं सक्तुसिकतादौ पिण्डीभावरूपः सङ्ग्रहनामकः संयोगविशेषो द्रवत्वसहितस्नेहकारित एव द्रवत्वमात्रकारितत्वे काचकाञ्चनद्रवत्वादितो ऽपि तदुत्पत्तेः नापि स्नेहमात्रकारितः घनीभूतघृतादिभिरपि तदुत्पत्तिप्रसङ्गात् ॥

[1] रूपं भास्वरं स्पर्शश्चोष्णस्तद्वत्तेज इत्यर्थः । ननु भास्वरत्वं परप्रकाशकत्वं तादृशञ्च रूपं नोष्मणि न वा चामीकरस्थे भर्ज्जनकपालस्थे वारिस्थे वा तेजसि । शुक्लञ्च रूपमुक्तेषु न क्वापि उष्णश्च स्पर्शो न चान्द्रे न वा चामीकरे तत् कथमेतदिति चेन्न उष्मादौ तेजस्त्वेन भास्वररूपानुमानात् । तेजस्त्वमेव तत्र स्वरूपासिद्धमिति चेन्न उष्णस्पर्शवत्त्वेन तदनुमानात् चामीकरे कथमिति चेत् तत्र भास्वरस्वभावे ऽपि अत्यन्तानलसंयोगेनानुच्छिद्यमानजन्यद्रवत्वाधिकरणत्वेन व्यतिरेकिणा तेजस्त्वानुमानादिति वक्ष्यमाणत्वात् भर्ज्जनकपालादिनिष्ठे चोष्णस्पर्शवत्त्वेन तेजस्त्वानुमानात् । चतुर्विधं हि तेजः किञ्चिदुद्भूतरूपस्पर्शं यथा सौरादि किञ्चिदुद्भूतरूपमनुद्भूतस्पर्शं यथा चान्द्रम् किञ्चिदनुद्भूतरूपस्पर्शं यथा नयनम् किञ्चिदनुद्भूतरूपमुद्भूतस्पर्शं यथा नैदाघं वारिभर्ज्जनकपालादिगतञ्च तेजः ॥

cp. Muktávalí on Bháshá-parichchheda, v. 40. [1] Heat is a particular class existing in Feel, and is known by perception. So also the notion of Light is distinguished [from all others] by its being the inherent cause of the feeling of generated heat. It is not to be maintained that the possession [by Light] of a hot Feel cannot be predicated of the rays of the moon &c., for heat exists there too but is not recognised because it is overpowered by the Feel of the Water which they contain. In like manner it is not recognised in the brilliance of a gem because it is overpowered by an earthy Feel; nor in the eye &c., because it does not there predominate.

*( To be Continued. )*

## RÁMÁYAṆA, BOOK I.

(SCHLEGEL'S EDITION.)

III.

*(Continued from page 16.)*

How Ráma he consoled, and how
He showed the gem from Sítá's brow.
With Ocean, Ráma's interview;
The bridge that Nala o'er it threw.
The crossing, and the sitting down
At night round Lanká's royal town.
The treaty with Vibhíshaṇ made,
The plan for Rávaṇ's slaughter laid.
How Kumbhakarṇa in his pride
And Meghanáda fought and died.
How Rávaṇ in the fight was slain,
And captive Sítá brought again.
Vibhíshaṇ set upon the throne;
The flying chariot Pushpak shown.
How Brahmá and the Gods appeared,
And Sítá's doubted honour cleared.
How in the flying car they rode
To Bharadvája's calm abode.
The Wind-God's son sent on afar:
How Bharat met the flying car.
How Ráma then the throne regained,
The army their discharge obtained.
How Ráma cast his queen away:
The people's love that grew each day.
Thus did the saint Valmíki tell
Whate'er in Ráma's life befell;
And in his later poem all
That yet to come will once befall.

IV.

When to its close the tale was brought,
Rose in the sage's mind the thought:
'Now who throughout this earth will go,
And tell it forth that all may know?'
As thus he mused with anxious breast,
Behold, in hermit's raiment dressed,
Kuśa and Lava came to greet
Their master and embrace his feet.
The twins he saw, that princely pair
Sweet-voiced, who dwelt beside him there.
None for the task could be more fit,
For skilled were they in Holy Writ;
And so the great Rámáyan, fraught
With lore divine, to these he taught:
The lay whose verses sweet and clear
Take with delight the listening ear,
When Sítá's noble life they tell,
And how the stubborn Rávaṇ fell.
Great joy to all who hear they bring,
Sweet to recite and sweet to sing.
For music's sevenfold notes are there,
And triple measure, wrought with care,
With melody and tone and time,
And Flavours that enhance the rime:
Heroic might has ample place,
And Loathing of the false and base,
With Anger, Mirth, and Terror, blent
With Tenderness, Surprise, Content.
When, half the hermit's grace to gain,
And half because they loved the strain,
The youths within their hearts had stored
The poem that his lips outpoured,
Válmíki kissed them on the head,
As at his feet they bowed, and said:
'Recite ye this heroic song
In tranquil shades where sages throng:
Recite it where the good resort,
In lowly home and royal court.'
The hermit ceased. The tuneful pair,
Like Heavenly Minstrels sweet and fair,
In music's art divinely skilled,
Their saintly Master's word fulfilled.
Like Ráma's self, from whom they came,
They showed their sire in face and frame,
As though from some fair sculptured stone
Two selfsame images had grown.

[1] उष्णत्वं स्पर्शनिष्ठो जातिविशेषः प्रत्यक्षसिद्धम् । इत्थञ्च जन्योष्णस्पर्शसमवायिकारणतावच्छेदकं तेजस्त्वं जातिविशेषः । न चोष्णस्पर्शवत्त्वं चन्द्रकिरणादावव्याप्तमिति वाच्यम् । तत्रापि श्रोष्णस्य सत्त्वात् । किन्तु तदन्तःपातिजलस्पर्शेनाभिभवाच्चक्षुरादौ चानुद्भूतत्वादवग्रहः ॥

Sometimes the pair rose up to sing,
Surrounded by a holy ring,
Where seated on the grass had met
Full many a musing anchoret.
Then tears bedimmed those saintly eyes,
As transport took them and surprise,
And as they listened every one
Cried in delight, Well done! Well done!
Those sages versed in holy lore
Praised the sweet minstrels more and more:
And wondered at the singers' skill,
And the bard's verses sweeter still,
Which laid so clear before the eye
The glorious deeds of days gone by.
Thus by the virtuous hermits praised,
Inspirited their voice they raised.
Pleased with the song this holy man
Would give the youths a water-can;
One gave a goodly barken dress,
Or sweet fruit from the wilderness.
One Saint a black deer's hide would bring,
And one a sacrificial string:
One, a clay pitcher from his hoard,
And one, a twisted munja cord.
One in his joy an axe would find,
One, braid, their plaited locks to bind.
One gave a sacrificial cup,
One rope to tie their fagots up;
While fuel at their feet was laid,
Or hermit's stool of fig-tree made.
All gave, or if they gave not, none
Forgot at least a benison.

Some Saints, delighted with their lays,
Would promise health and length of days:
Others with surest words would add
Some boon to make their spirit glad.
In such degree of honour then
That song was held by holy men:
That living song which life can give,
By which shall many a minstrel live.

In seat of kings, in crowded hall,
They sang the poem, praised of all.
And Ráma chanced to hear their lay,
While he the votive steed would slay,
And sent fit messengers to bring
The minstrel pair before the king.

They came, and found the monarch high
Enthroned in gold, his brothers nigh;
While many a minister below,
And noble, sat in lengthened row.
The youthful pair awhile he viewed
Graceful in modest attitude,
And then in words like these addressed
His brother Lakshmaṇ and the rest:
'Come, listen to the wondrous strain
Recited by these godlike twain,
Sweet singers of a story fraught
With melody and lofty thought.'

The pair with voices sweet and strong
Rolled the full tide of noble song,
With tone and accent deftly blent
To suit the changing argument.
Mid that assembly loud and clear
Rang forth that lay so sweet to hear,
That universal rapture stole
Through each man's frame and heart and soul.
'These minstrels, blest with every sign
That marks a high and princely line,
In holy shades who dwell,
Enshrined in Saint Válmíki's lay,
A monument to live for aye,
My deeds in song shall tell.'
King Ráma's words their bosom fired,
And the great tale, as if inspired,
The youths began to sing,
While every breast with transport swelled,
And mute and rapt attention held
The concourse and the king.

V.

'Ikshváku's sons from days of old
Were ever brave and mighty-souled.
The land their arm had made their own
Was bounded by the sea alone.
Their holy works have won them praise,
Through countless years, from Manu's days.
Their ancient sire was Sagar, he
Whose mighty arm dug out the sea:
With sixty thousand sons to throng
Around him as he marched along.
From them this glorious tale proceeds:
The great Rámáyaṇ tells their deeds.
This noble song whose lines contain
Lessons of Duty, Love, and Gain,
We two will now at length recite,
While good men listen with delight.
On Sarju's bank, of ample size,
The happy realm of Kośal lies,
With fertile length of fair champaign
And flocks and herds and wealth of grain.
There famous in its old renown,

Ayodhyá stands, the royal town,
In bygone ages built and planned
By sainted Manu's princely hand.
Imperial town! her walls extend
Twelve measured leagues from end to end,
And three from side to side, most fair
With many a broad and open square.
Her doors at even distance stand;
Her ample roads are wisely planned.
Right glorious is her royal street
Where streams allay the dust and heat.
On level ground in even row
Her houses stand in goodly show:
Terrace and palace, arch and gate
The queenly city decorate.
High are her ramparts, strong and vast,
By ways at even distance passed,
With circling moat, both deep and wide,
And store of weapons fortified.

King Daśaratha, lofty-souled,
That city guarded and controlled,
As royal Indra, throned on high,
Rules his fair city in the sky.
With towering Sál trees belted round,
And many a grove and pleasure ground,
She seems a painted city, fair
With chess-board line and even square.
And cool boughs shade the lovely lake
Where weary men their thirst may slake.
There gilded chariots gleam and shine,
And stately piles the Gods enshrine.
There gay sleek people ever throng
To festival and dance and song.
A mine is she of gems and sheen,
The darling home of Fortune's Queen.
With noblest sort of drink and meat,
The fairest rice and golden wheat,
And fragrant with the chaplet's scent
With holy oil and incense blent.
With many an elephant and steed,
And wains for draught and cars for speed.
With envoys sent by distant kings,
And merchants with their precious things.
With banners o'er her roofs that play,
And weapons that a hundred slay;
All warlike engines framed by man,
And every class of artisan.
A city rich beyond compare
With bards and minstrels gathered there.
And men and damsels who entrance
The soul with play and song and dance.
In every street is heard the lute,
The drum, the tabret, and the flute,
The Veda chanted soft and low,
The ringing of the archer's bow.
With bands of godlike heroes skilled
In every warlike weapon, filled,
And kept by warriors from the foe,
As Serpents guard their home below.
There wisest Bráhmans evermore
The flame of worship feed,
And versed in all the Vedas' lore,
Their lives of virtue lead.
By penance truth and charity
They keep each sense controlled.
And with their offerings large and free
Match the pure Saints of old.

## VI.

There reigned a king of high renown,
Beloved of all in field and town,
Great Daśaratha, good and sage,
Well read in Scripture's holy page:
Upon his kingdom's weal intent,
Mighty and brave and provident;
The pride of old Ikshváku's seed
For lofty thought and righteous deed.
Peer of the Saints, for virtues famed,
For foes subdued and passions tamed;
A rival in his wealth untold
Of Indra and the Lord of Gold.
Like Manu first of kings, he reigned,
And worthily his state maintained.
For firm and just and ever true
Love, Duty, Gain he kept in view,
And ruled his city rich and free,
Like Indra's Amarávatí.
And worthy of so fair a place
There dwelt a just and happy race
With troops of children blest.
Each man contented sought no more,
Nor longed with envy for the store
By richer friends possessed.
For poverty was there unknown,
And each man counted as his own
Kine, steeds, and gold, and grain.
All dressed in raiment bright and clean,
And none was there but might be seen
With earrings, wreath, or chain.
None deigned to feed on broken fare,
And none was false or stingy there.
A piece of gold, as poorest pay,
Was earned by labour for a day.
On every arm were bracelets worn,

And none was faithless or forsworn,
  A braggart or unkind.
None lived upon another's wealth,
None pined with dread or broken health,
  Or dark disease of mind.
High-souled were all. The slanderous word,
The boastful lie, were never heard.
Each man was constant to his vows,
And clave through life to one dear spouse.
No other love his fancy knew,
And she was tender, kind, and true.
Her dames were fair of form and face
With charm of wit and gentle grace,
With modest raiment simply neat,
And winning manners soft and sweet.
The Twice-born sages, whose delight
Was Scripture's page and holy rite,
Their calm and settled course pursued
Nor sought the menial multitude.
In many a Scripture each was versed,
And each the flame of worship nursed,
  And gave with lavish hand.
Each paid to Heaven the offerings due,
And none was godless or untrue
  In all that holy band.
To Bráhmans, as the laws ordain,
The Warrior caste were ever fain
  Due reverence to pay:
And these the Vaiśyas' peaceful crowd,
Who trade and toil for gain, were proud
  To honour and obey.
And all were by the Śúdras served
Who never from their duty swerved.
Their proper worship all addressed
To Bráhman, Spirit, God, and guest.
Pure and unmixt their rites remained,
Their race's honour ne'er was stained.
Cheered by his grandsons, sons, and wife.
Each passed a long and happy life.
Thus was that famous city held
By one who all his race excelled,
  Blest in his gentle reign,
As the whole land aforetime swayed
By Manu, Prince of men, obeyed
  Her king from main to main.
And heroes kept her, strong and brave,
As lions guard their mountain cave:
Fierce as devouring flame they burned,
And fought till death, but never turned.
Horses had she of noblest breed,
Like Indra's for their form and speed,
From Vahli's hills and Sindhu's sand,
Vanáyu and Kamboja's land.
With elephants that once had strayed
Through Vindhyan and Himálayan shade,
Gigantic in their bulk and height,
Yet gentle in their matchless might,
They rivalled well the world-spread fame
Of the great stock from which they came,
  Of Váman, vast of size,
Of Mahápadma's glorious line,
Thine, Anjan, and, Airávat thine,
  Upholders of the skies.
With those, enrolled in fourfold class,
Who all their mighty kin surpass,
  Whom men Matangas name,
And Mrigas spotted black and white,
And Bhadras of unwearied might,
  And Mandras hard to tame.*
Thus, worthy of the name she bore,
Ayodhyá for a league or more
  Cast a bright glory round,
Where Daśaratha wise and great
Governed his fair ancestral state,
  With every virtue crowned.
Like Indra in the skies he reigned
In that good town whose wall contained
  High domes and turrets proud,
With gates and arcs of triumph decked,
And sturdy barriers to protect
  Her gay and countless crowd.

VII.

Two sages, holy Saints had he,
His ministers and priests to be:
Vaśishṭha, faithful to advise,
And Vámadeva, Scripture-wise.
Eight other lords around him stood,
All skilled to counsel, wise and good:
Jayanta, Vijay, Dhrishṭi bold
In fight, affairs of war controlled:
Siddhárth and Arthasádak knew
To watch expense and revenue.
And Dharmapál and wise Aśok
Of right and law and justice spoke.
With these the sage Sumantra, skilled
To urge the car, high station filled.
  All these in knowledge duly trained
Each passion and each sense restrained:

* "There are four kinds of elephants. 1 *Bhaddar*. It is well proportioned, has an erect head, a broad chest, large ears, a long tail, and is bold, and can bear fatigue. 2. *Mand*. It is black, has yellow eyes, a uniformly sized body, and is wild and ungovernable. 3 *Mirg*. It has a whitish skin, with black spots. 4 *Mir*. It has a small head, and obeys readily. It gets frightened when it thunders." Aín-i-Akbari Translated by H. Blochmann. Aín 41. The Imperial Elephant stables.

With modest manners, nobly bred,
Each plan and nod and look they read,
Upon their neighbours' good intent,
Most active and benevolent:
As sit the Vasus round their king,
They sat around him counselling.

They ne'er in virtue's loftier pride
Another's lowly gifts decried.
In fair and seemly garb arrayed,
No weak uncertain plans they made.
Well skilled in business, fair and just,
They gained the people's love and trust,
And thus without oppression stored
The swelling treasury of their lord.

Bound in sweet friendship each to each,
They spoke kind thoughts in gentle speech.
They looked alike with equal eye
On every caste, on low and high.
Devoted to their king, they sought,
Ere his tongue spoke, to learn his thought,
And knew, as each occasion rose,
To hide their counsel or disclose.
In foreign lands or in their own
Whatever passed, to them was known.
By secret spies they timely knew
What men were doing or would do.
Skilled in the grounds of war and peace
They saw the monarch's state increase,
Watching his weal with conquering eye
That never let occasion by,
While nature lent her aid to bless
Their labours with unbought success.

Never for anger, lust, or gain,
Would they their lips with falsehood stain.
Inclined to mercy they could scan
The weakness and the strength of man.
They fairly judged both high and low,
And ne'er would wrong a guiltless foe;
Yet if a fault were proved, each one
Would punish e'en his own dear son.
But there and in the kingdom's bound
No thief or man impure was found:
None of loose life or evil fame,
No tempter of another's dame.
Contented with their lot each caste
Calm days in blissful quiet passed;
And, all in fitting tasks employed,
Country and town deep rest enjoyed.
With these wise lords around his throne
The monarch justly reigned,
And making every heart his own
The love of all men gained.
With trusty agents, as beseems,
Each distant realm he scanned,
As the sun visits with his beams
Each corner of the land.
Ne'er would he on a mightier foe
With hostile troops advance,
Nor at an equal strike a blow
In war's delusive chance.
These lords in council bore their part
With ready brain and faithful heart,
With skill and knowledge, sense and tact,
Good to advise and bold to act.
And high and endless fame he won
With these to guide his schemes,
As, risen in his might, the sun
Wins glory with his beams.

## VIII.

But splendid, just, and great of mind,
The childless king for offspring pined.
No son had he his name to grace,
Transmitter of his royal race.
Long had his anxious bosom wrought,
And as he pondered rose the thought:
'A votive steed 'twere good to slay,
So might a son the gift repay.'
Before his lords his plan he laid,
And bade them with their wisdom aid;
Then with these words Sumantra, best
Of royal counsellors, addressed:
'Hither, Vaśishṭha at their head,
Let all my priestly guides be led.'
To him Sumantra made reply:
'Hear, Sire, a tale of days gone-by.
To many a sage in time of old,
Sanatkumár, the Saint, foretold
How from thine ancient line, O king,
A son when years came round should spring.
'Here dwells,' 'twas thus the seer began,
'Of Kaśyap's race a holy man,
Vibháṇḍak named: to him shall spring
A son, the famous Rishyaśring.
Bred with the deer that round him roam,
The wood shall be that hermit's home.
To him no mortal shall be known
Except his holy sire alone.
Still by those laws shall he abide
Which lives of youthful Bráhmans guide,
Obedient to the strictest rule

That forms the young ascetic's school ;
And all the wondering world shall hear
Of his stern life and penance drear,
Living to nurse the holy fire
And do the bidding of his sire.
Then seated on the Angas' throne
Shall Lomapád to fame be known.
But folly wrought by that great king
A plague upon the land shall bring ;
No rain for many a year shall fall
And grievous drought shall ruin all.
The troubled king with many a prayer
Shall bid the priests some cure declare:
'The lore of Heaven 'tis yours to know,
Nor are ye blind to things below :
Declare, O holy men, the way
This plague to expiate and stay.'
Those best of Bráhmans shall reply :
'By every art, O monarch, try
Hither to bring Vibháṇḍak's child,
Persuaded, captured, or beguiled.
And when the boy is hither led
To him thy daughter duly wed.'

But how to bring that youth so strong
The troubled king will ponder long ;
And hopeless to achieve the task
The counsel of his lords will ask.
And bid his priests and servants bring
With honour saintly Rishyaśring.
But when they hear the monarch's speech,
All these their master will beseech,
With troubled hearts and looks of woe,
To spare them, for they fear to go.
And many a plan will they declare
And crafty plots will frame,
And promise fair to show him there,
Unforced, with none to blame.
On every word his lords shall say,
The king will meditate,
And on the third returning day
Recall them to debate.
Then this shall be the plan agreed,
That damsels shall be sent
Attired in holy hermit's weed,
And skilled in blandishment,
That they the hermit may beguile
With every art and amorous wile
Whose use they know so well,
And by their witcheries seduce
The unsuspecting young recluse
To leave his father's cell.
Then when the boy with willing feet
Shall wander from his calm retreat
And in that city stand,
The troubles of the king shall end,
And streams of blessed rain descend
Upon the thirsty land.
Thus shall the holy Rishyaśring
To Lomapád, the mighty king,
By wedlock be allied ;
For Śántá, fairest of the fair,
In mind and grace beyond compare,
Shall be his royal bride.
He, at the Offering of the Steed,
The flames with holy oil shall feed,
And for King Daśaratha gain
Sons whom his prayers have begged in vain.'
'I have repeated, Sire, thus far,
The words of old Sanatkumár,
In order as he spoke them then
Amid the crowd of holy men.'
Then Daśaratha cried with joy,
'Say how they brought the hermit boy.'

## IX.

The wise Sumantra, thus addressed,
Unfolded at the king's behest
The plan the lords in council laid
To draw the hermit from the shade :
'The priest, amid the lordly crowd,
To Lomapád thus spoke aloud :
'Hear, King, the plot our thoughts have framed,
A harmless trick by all unblamed.
Far from the world that hermit's child
Lives lonely in the distant wild ;
A stranger to the joys of sense,
His bliss is pain and abstinence ;
And all unknown are women yet
To him, a holy anchoret.
The gentle passions we will wake
That with resistless influence shake
The hearts of men ; and he,
Drawn by enchantment strong and sweet
Shall follow from his lone retreat,
And come and visit thee.
Let ships be formed with utmost care
That artificial trees may bear,
And sweet fruit deftly made :
Let goodly raiment, rich and rare,
And flowers, and many a bird be there
Beneath the leafy shade.

Upon the ships thus decked a band
Of young and lovely girls shall stand,
Rich in each charm that wakes desire,
And eyes that burn with amorous fire;
Well skilled to sing, and play, and dance,
And ply their trade with smile and glance.
Let these, attired in hermits' dress,
Betake them to the wilderness,
And bring the boy of life austere
A voluntary captive here.'
He ended; and the king agreed,
By the priest's counsel won.
And all the ministers took heed
To see his bidding done.
In ships with wondrous art prepared
Away the lovely women fared,
And soon beneath the shade they stood
Of the wild, lonely, dreary wood.
And there the leafy cot they found
Where dwelt the devotee,
And looked with eager eyes around
The hermit's son to see.
Still, of Vibháṇḍak sore afraid,
They hid behind the creepers' shade.
But when by careful watch they knew
The elder Saint was far from view,
With bolder steps they ventured nigh
To catch the youthful hermit's eye.
Then the young damsels, blithe and gay.
At various games began to play.
They tossed the flying ball about
With dance and song and merry shout,
And moved in mazy motion round,
Their scented hair with chaplets bound.
Some damsels, as if love-possest,
Sank to the earth in feigned unrest,
Up starting quickly to pursue
Their intermitted game anew.
It was a lovely sight to see
Those fair ones, as they played,
While fragrant robes were floating free,
And bracelets clashing in their glee
A pleasant tinkling made.
The anklet's chime, the Koil's cry,
With music filled the grove,
As 'twere some city in the sky
Where Heavenly Minstrels rove.
With arch of brow, with beck and smile,
With every passion-waking wile
Of glance and lotus hand,
With all enticements that excite
The longing for unknown delight
Which men in vain withstand.
Forth came the hermit's son to view
The wondrous sight to him so new,
And gazed in rapt surprise,
For from his natal hour till then
On woman or the sons of men
He ne'er had cast his eyes.
He saw them with their waists so slim,
With fairest shape and faultless limb,
In variegated robes arrayed,
And sweetly singing as they played.
Near and more near the hermit drew,
And watched them at their game,
And stronger still the impulse grew
To question whence they came.
They marked the young ascetic gaze
With curious eye and wild amaze,
And sweet the long-eyed damsels sang,
And shrill their merry laughter rang.
Then came they nearer to his side,
And languishing with passion cried:
'Whose son, O youth, and who art thou,
Come suddenly to join us now?
And why dost thou all lonely dwell
In the wild wood? We pray thee, tell.
We wish to know thee, gentle youth;
Come, tell us, if thou wilt, the truth.'
He gazed upon that sight he ne'er
Had seen before, of girls so fair,
And out of love a longing rose
His sire and lineage to disclose:
'My father,' thus he made reply,
Is Kaśyap's son, a Saint most high,
Vibháṇḍak called; from him I came,
And Rishyaśring he calls my name.
Our hermit cot is near this place:
Come thither, O ye fair of face;
There be it mine, with honour due,
Ye gentle youths, to welcome you.'
They heard his speech, and gave consent,
And gladly to his cottage went.
Vibháṇḍak's son received them well
Beneath the shelter of his cell
With guest-gift, water for their feet,
And woodland fruit and roots to eat.
They smiled, and spoke sweet words like these,
Delighted with his courtesies:
'We too have goodly fruit in store,
Grown on the trees that shade our door;
Come, if thou wilt, kind hermit, haste
The produce of our grove to taste;
And let, O good ascetic, first

This holy water quench thy thirst.'
They spoke, and gave him comfits sweet
Prepared ripe fruits to counterfeit;
And many a dainty cate beside,
And luscious mead their stores supplied.
The seeming fruit, in taste and look,
The unsuspecting hermit took,
For strange to him, their form beguiled
The dweller in the lonely wild.
Then round his neck fair arms were flung,
And there the laughing damsels clung,
And pressing nearer and more near
With sweet lips whispered at his ear;
While rounded limb and swelling breast
The youthful hermit softly pressed.
The pleasing charm of that strange bowl,
  The touch of a tender limb,
Over his yielding spirit stole
  And vanquished even him.
But vows, they said, must now be paid;
  They bade the boy farewell,
And, of the aged Saint afraid,
  Prepared to leave the cell.
With ready guile they told him where
  Their hermit dwelling lay;
Then, lest the sire should find them there,
  Sped by wild paths away.
They fled and left him there alone
  By longing love possessed;
And with a heart no more his own
  He roamed about distressed.
The aged Saint came home, to find
  The hermit boy distraught,
Revolving in his troubled mind
  One solitary thought.
'Why dost thou not, my son' he cried,
  'Thy due obeisance pay?
Why do I see thee in the tide
  Of whelming thought to-day?
A devotee should never wear
  A mien so sad and strange.
Come, quickly, dearest child, declare
  The reason of the change.'
And Rishyaśring, when questioned thus,
  Made answer in this wise:
'O sire, there came to visit us
  Some men with lovely eyes.
About my neck soft arms they wound
  And kept me tightly held
To tender breasts so soft and round,
  That strangely heaved and swelled.
They sing more sweetly as they dance
  Than e'er I heard till now,
And play with many a sidelong glance
  And arching of the brow.'
'My son,' said he, 'thus giants roam
  Where holy hermits are,
And wander round their peaceful home
  Their rites austere to mar.
I charge thee, thou must never lay
  Thy trust in them, dear boy:
They seek thee only to betray,
  And woo but to destroy.'
Thus having warned him of his foes
  That night at home he spent,
And when the morrow's sun arose
Forth to the forest went.
But Rishyaśring with eager pace
Sped forth and hurried to the place
Where he those visitants had seen
Of dainty waist and charming mien.
When from afar they saw the son
Of Saint Vibháṇḍak toward them run,
To meet the hermit boy they hied,
And hailed him with a smile, and cried:
'O come, we pray, dear lord, behold
Our lovely home of which we told:
Due honour there to thee we'll pay,
And speed thee on thy homeward way.'
Pleased with the gracious words they said,
He followed where the damsels led.
As with his guides his steps he bent,
  That Bráhman high of worth,
A flood of rain from heaven was sent
  That gladdened all the earth.
  Vibháṇḍak took his homeward road,
And wearied by the heavy load
Of roots and woodland fruit he bore
Entered at last his cottage door.
Fain for his son he looked around,
But desolate the cell he found.
He stayed not then to bathe his feet
Though fainting with the toil and heat,
But hurried forth and roamed about
Calling the boy with cry and shout.
He searched the wood, but all in vain;
Nor tidings of his son could gain.

  One day beyond the forest's bound
The wandering Saint a village found,
And asked the swains and neatherds there
Who owned the land so rich and fair,
With all the hamlets of the plain,

With herds of kine and fields of grain.
They listened to the hermit's words,
And all the guardians of the herds,
With suppliant hands together pressed,
This answer to the Saint addressed:
'The Angas' lord who bears the name
Of Lomapád, renowned by fame,
Bestowed these hamlets with their kine
And all their riches, as a sign
Of grace, on Rishyaśring; and he
Vibhándak's son is said to be.'
The hermit with exulting breast
The mighty will of fate confessed,
By meditation's eye discerned,
And cheerful to his home returned.

A noble ship, at early morn,
The hermit's son away had borne.
Loud roared the clouds, as on he sped,
The sky grew blacker overhead;
Till, as he reached the royal town,
A mighty flood of rain came down.
By the great rain the monarch's mind
The coming of his guest divined.
To meet the honoured youth he went,
And low to earth his head he bent.
With his own priest to lead the train
He gave the gift high guests obtain,
And sought, with all who dwelt within
The city's walls, his grace to win.
He fed him with the daintiest fare,
He served him with unceasing care,
And ministered with anxious eyes
Lest anger in his breast should rise.
And gave to be the Bráhman's bride
His own fair daughter, lotus-eyed.

Thus loved and honoured by the king,
The glorious Bráhman Rishyaśring,
Passed in that royal town his life
With Śántá his beloved wife.'

## X.

'Again, O best of kings, give ear:
My saving words attentive hear,
And listen to the tale of old
By that illustrious Bráhman told.
'Of old Ikshváku's line shall spring
('Twas thus he spoke) a pious king,
Named Daśaratha good and great,
True to his word and fortunate.
He with the Angas' mighty lord
Shall ever live in sweet accord,
And his a daughter fair shall be,
Śántá of happy destiny.
But Lomapád, the Angas' chief,
Still pining in his childless grief,
To Daśaratha thus shall say:
'Give me thy daughter, friend, I pray,
Thy Śántá of the tranquil mind,
The noblest one of womankind.'

The father, swift to feel for woe,
Shall on his friend his child bestow;
And he shall take her and depart
To his own town with joyous heart.
The maiden home in truimph led,
To Rishyaśring the king shall wed.
And he with loving joy and pride
Shall take her for his honoured bride.
And Daśaratha to a rite
That best of Bráhmans shall invite
With supplicating prayer,
To celebrate the sacrifice
To win him sons and Paradise,
That he will fain prepare.
From him the Lord of men at length
The boon he seeks shall gain,
And see four sons of boundless strength
His royal line maintain.'
'Thus did the godlike Saint of old
The will of fate declare,
And all that should befall unfold
Amid the sages there.
O Tiger among men, go thou,
Consult thy holy guide,
And win, to aid thee in thy vow,
This Bráhman to thy side.'
Sumantra's counsel, wise and good,
King Daśaratha heard,
Then by Vaśishtha's side he stood
And thus with him conferred:
'Sumantra counsels thus: do thou,
My priestly guide, the plan allow.'
Vaśishtha gave his glad consent,
And forth the happy monarch went
With lords and servants on the road
That led to Rishyaśring's abode.
Forests and rivers duly passed,
He reached the distant town at last
Of Lomapád the Angas' king,
And entered it with welcoming.

*(To be continued.)*

TO THE EDITOR OF THE PANDIT.

Sir,—I beg to send herewith a fac-simile of an inscription, reduced in size, with its transliteration in Devanágarí characters. The Pillar which bears this inscription was brought up from Ghazeepore District in the time of the late Mr. Thomason (Lieut.-Governor, N. W. P.) and erected North of the Benares College-building. It is by rough measurement 24 cubits high and is estimated to be 900 Mans in weight. For the letters obliterated in the inscription blank circles are left in the fac-simile, but the late Hiranand Chaube, Pandit of the College, fills them up thus :—

विपुलविजयकीर्त्तिः क्षत्त्रसद्धर्मपालः ।
सततदयितपार्त्थः पार्थिवानीकपालः ॥
विनिहितपितृनाकः शस्तसामन्तपालः ।
विहितइवविधात्रोपक्रमाद्धर्मपालः ॥

*( Translation. )*

"One who is famous for his conquests, who protects the good laws of the Kshatriyas, who is always kind to the kings (or who is always a beloved king), who protects the hosts of kings, who has placed his ancestors in the Heavens (or who has supported his ancestors and the Heavens) and protects his good neighbours, such a king Providence created Dharmapála even from the beginning."

Below are mentioned four names, 1 Traividyánuchitra, 2 Traividyánuvidhán, 3 Ativáruṇá (or Satíváruṇá) and 4 Nátreyí. The Pandit thought by Dharmapála Yudhishṭhira of the Mahábhárat was meant, and by Pártha (in the inscription Párttha) his brother Arjuna, but this is preposterous. The pillar though it does not bear any Samvat year, is no doubt much more modern than the Vikrama era. The Rájá Dharmapála, or of some other name ending with Pál, belongs in my opinion to the family of the Pál Rájás of Benares, who are thought to have been Buddhists. I have not the Asiatic Society's books just now with me for reference, but if my memory does not fail there is some mention of these Rájás in them, and also perhaps in Lassen's Indische Alterthumskunde. The letters in which the four names are inscribed seem to differ from those of the Śloka, and in all probability have been added subsequently.

The most curious of all is the undeciphered portion of the inscription at the foot of the fac-simile like a representation of snakes, shells, birds, &c., but I am convince it is a fifth name and most probably in old trans-Himalayan Bhotiyá or Chinese characters. Who knows if it may not be the name of Fa Hian or his follower fellow-countryman? In the Society's books I have seen several old inscriptions accompanied with such characters at their foot or side (see No. 9, plate XXXV, page 676, and No. 16, plate LVI, page 968, in Vol. VI of the Bengal Asiatic Society's Journal). But to my great astonishment I have seen them written in durable black ink, now unknown, on the roofs of caverns, beyond the ordinary reach of the human hand, in the Valley of the Sutlej, near Dattanagar, in Bisaher territory; and at Achhar Paṭáchhar in Bhujje (a small principality near Simla). There is a similar inscription on a rock by the side of the little rivulet in the small village Kálká at the foot of the Hills on which the Kussoulee Cantonment stands.

Yours faithfully,

ŚIVAPRASÁD.

Benares :
11*th June*, 1869.

*(Advertisement.)*

TO THE EDITOR OF THE PANDIT.

Sir,—I see in your issue of the 1st Instant that you say "the discussion" (about transliteration) "must stop here." No doubt we have encroached too much on your indulgence; but your readers, I am confident, are thankful to me for having led to the emanation of such an elaborate and valuable article on Philology, Ethnology, Laringoscopology &c., &c., extending back to the deep researches of far beyond 2500 years, from my most learned and esteemed friend Babu Rajendralal Mittra. I have no need of "prolongation." However my arguments stand on their legs not a bit weaker but rather with additional strength, the judgment of which I entirely leave to your readers.

Suffice it to say that I still use "â as the representative of ع" and do not think "differently" and am right glad to see the Babu* now agree with me that "the letter a with a mark.........is its best representative." As far as the apostrophe is concerned, according to "the plan adopted by" the Babu, تسع and تسعة both will be written in the same way tis'a, though one means nine women, and the other nine men ! This plan I object to and will object. Not only I but many oriental scholars, some of whom I can readily cite would write tis' and tis'a for تسع and تسعة.

As for غ I am not singular in indulging in the "taste" for g, but men like Mír Ġulám 'Alí Sáhib, whose Ḳhulásai Tavárikh-i-Siyar-ul-Mutaakhkhirín in Roman characters was handed over to me as a model of transliteration by Sir Charles Trevelyan, are with me.

* I have left out the word Sáhib not because I am a whit cooler in the sense of my profound respect, but because it seems "quite out of place and uncouth" and "absurd and unmeaning" to my friend the Babu.

The Babu wishes to lay the onus probandi upon me that श has no "sound different from that of ش," but as Páṇini, the greatest authority in these matters, has said almost in the first page of his celebrated Grammar "इचुयशानांतालु। ऋटुरषाणांमूर्धा (श is palatal and ष is cerebral) and as the "Saunaka's" Prátisákhya, quoted by the Babu, still maintains them to be palatal and cerebral, "तालव्य" and मूर्धन्य" respectively, no matter what shapes the tongue assumes in producing the different palatals and the different cerebrals—and as the Babu does not "doubt...the perfect identity of the sh and the ष sounds," I may be allowed to leave it to him to prove and say in plain terms, either that ष is not cerebral and Páṇini is to be corrected; or that ش is cerebral and is to be pronounced like ष. Until this is done, I cannot approve of having one representative for both, whether it is sh or any other letter or letters. If ش is not cerebral if it sounds more like श than any other letter, if it is represented universally in the Nágarí by श and represents in the same way the Nágarí श in the Persian, which drove the translator of the Upanishads to seek the representation of ष in kh rather than to confuse it with ش, let us have one Roman letter representing both, namely श and ش, and not two. If it be thought convenient to give sh for श and ش, which for a long time has been done, I shall have no objection to accept sh with some mark, as many are doing, for ष.

The Babu challanges me to prove that श and ش are palatal and not different in sound. Is it not strange that after this he, though unconsciously, proves it himself and leaves nothing for me? The Babu's Muntahal-irab (not Muntahal Arab), according to the Babu's acknowledgment, assigns the same location and the same producing organ to ش as to ج; now our Páṇini does the same for श and ज (palate). May I ask if the Babu is prepared to say that ज is different from ج, or that one does not represent the other, or that both are not represented by the same letter join the Roman Alphabet? If not, why does he forget here his "trite axiom" that "things which are equal to the same thing are equal to one another?" And be it remembered I do not recollect to have ever admitted that sh is the "most appropriate representative" of ش.

I am surprized to find a scholar of the Babu's vast knowledge so prone to call in all the misprints, the mis-writings and the mispronunciations to establish a certain ideal theory of his own. I have no room here to explain how the Sanskrit ष changes into ख and छ in Bháshá, sometimes only in pronunciation and sometimes in writing too; and how the common people are apt to write ष for ख. However we should not form rules for pronunciation and writing by following the drowsy copyists and careless engravers, or the devils of the press, or the half educated and illiterate masses.

Till the Babu gives us a rule to denote in which words व and و are to be represented by v, and in which by w, I am not disposed to confuse the matter by writing the same word in one place with v and in another with w as now under the Babu's dictum is done. If the Babu is averse to use the single letter v and wishes to give its place to the double letter w (double u) throughout, I shall not much object to eject the condemned v from the transliteration-Roman-alphabet; but certainly I cannot tolerate such an anomaly and confusion as now exists by sanctioning the use of both indiscriminately, or making one the alternative of the other. If the Babu is fond of "oscillation" I must say "he has full right to indulge in it to any extent he likes." The Arabs have taken their و from the Hebrews and the Hebrew (váv) I find has all along been represented by v and not w. As for instance יהוה would be written Yehovah in Roman characters and not Yehowah. Is the Babu prepared, at the recommendation of Baron Silvestre de Sacy to write all words like Vizier, Vizierate, Vizierial, Wizier, Wisierate, Wizierial?

About نوروز and نو the Burhán ḳátiâ does not alter the case. The diphthong au is represented in Persian by حرف علت (semi-vowel) و preceded by fatha or zabar (a); thus Hindí सो (hundred) will be written in Persian سو (sau) in the very words of Burhán ḳátiâ بفتح اول و سكون ثاني, and yet सवां (hundredth) will be written and pronounced سوان savá̱n, like the نوي of the Babu.

I am only sorry for your stopping the discussion for one reason, namely, I shall not have now the opportunity to satisfy my curiosity to know how the v of the Zend *nava* has become w in the cuneiform inscription *nawa*. Is it proved that the third letter of the cuneiform *nawa* is not the same or a representative of the same which is used in its place in the Zend *nava*, or has the Babu heard it pronounced like w from the cuneiform-letter-writers?

However as you have stopped the discussion I request the favour of your giving this a place as an advertisement; and this is the reason why I write so briefly.

Yours faithfully,

BENARES: 15*th June* 1869. } ŚIVAPRASÁD.

*Communications of a literary nature should be addressed to the* EDITOR: *all letters on business, to the Proprietors,* MESSRS. E. J. LAZARUS & Co., *to whom Drafts should be made payable.* ADVERTISEMENTS *will be inserted at four annas per line.*

The PANDIT may be ordered of the Publishers, or through MESSRS. TRÜBNER and Co., LONDON.

*Annual subscription, in advance, including postage, Rs.* 12.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

ह वि पु ल वि ज य की र्ति : क्ष त्र स द्ध र्म पा ल :



स त त द यि त पा र्थ्य : पा र्थि वा नी क पा ल : वि नि हि



ना क : वि हि त ह व वि धा लो प क्र मा

त्रै वि द्या नु चि त्र  ना ग्रै यै  त्रै वि द्या नु वि धा न

स्र ती वा रु णा



# काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

# THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 39. Benares August 2, 1869. Vol. IV.


## ॥ उपदेशसहस्त्याः पद्यप्रबन्धः ॥

यदि प्रागुक्तरीत्या ब्रह्मात्मज्ञानममृतत्वं गमयेत्किमिति तर्हि सर्वैरहं ब्रह्मास्मीत्यात्मरूपं न गृह्यते, निसर्गत एव सर्वेषां परमपुरुषार्थार्थित्वादिति तत्राह ।

(१) मूत्राशङ्को यथोदङ्को नाग्रहीदमृतं यथा ॥ ४० ॥
कर्मनाशभयाज्जन्तोरात्मज्ञानाग्रहस्तथा ।

मूत्राशङ्क इति । "अत्रेयमाख्यायिका । उदङ्को नाम कश्चिदृषिर्भगवन्तं महाविष्णुं तपसा तोषयित्वा देवरक्षितममृतं प्रार्थितवान्, तदा भगवता देवेन्द्रं प्रत्युक्तममृतमस्मै दीयतामिति, इन्द्रस्तु विष्णोराज्ञां पालयन्नमृतकलशं नीत्वा मातङ्गवेषमास्थाय स्ववस्तिदेशे तं कलशमुपनिधायोदङ्काय दातुमारेभे ऽसूयया मा भवत्वस्यामृतपानमितिमन्यमान,-स्तदुदङ्कोपि चण्डालमूत्रशङ्कया न जग्राहेति" । उदङ्को मूत्राशङ्कः सन् यथा यथाभूतमेव प्रत्यक्षोपलब्धमप्यमृतं यथा नाग्रहीन्मदभिलषितममृतमिदमिति न गृहीतवान् जातिनाशभयादिति योजना । तथा जन्तोर्लोकस्य वर्णाश्रमोपाधिविहितकर्मनाशभयादात्मज्ञानस्य यथोक्तस्याग्रहस्तस्मिन्ननादर इत्युत्तरार्द्धयोजना । पदार्थस्वरूपापरिज्ञानं विपरीतज्ञानं च श्रुत्युक्तात्मस्वरूपाग्रहणकारणमिति भावः ॥ १ ॥

ननु दृष्टान्ते देवेन्द्रस्य वेषान्यत्वममृतकलशस्य च मूत्राशयस्थाननिवेशनं च जात्यन्तरमूत्रभ्रमोत्पादनेनामृताग्रहणकारणमासीन्न तथा ऽऽत्मनो ब्रह्मभूतस्य भ्रमकारणमस्तीत्यत आह ।

(२) बुद्धिस्थश्चलतीवात्मा ध्यायतीव च दृश्यते ॥ ४१ ॥
नौगतस्य यथा वृक्षास्तद्वत्संसारविभ्रमः ।

बुद्धिस्थ इति । अनाद्यविद्यया स्वात्मन्यध्यस्तबुद्धौ लिङ्गशरीरे ऽभिमानित्वेन स्थित आत्मा तस्यां बुद्धौ चलन्त्यां चलतीव दृश्यते, न वस्तुतश्चलत्यविक्रियत्वात्, तथा तस्यां ध्यायन्त्यां निश्चलीभूतायां च ध्यायतीव निश्चल इव दृश्यते प्रतिभासते, न वस्तुतो ध्यायति चलनाभावे तत्प्रतियोगिकस्य नैश्चल्यस्याप्यभावादित्यर्थः । विकारवद्बुद्ध्यविवेकादादावेव संसार्यहमस्मीति विपरीतनिश्चयदोषाच्छ्रुत्यादिभिरीर्यमाणमप्यात्मनो ब्रह्मत्वं न गृह्णाति लोक इत्यभिप्रायः । अविवेकादन्यथा प्रतिपत्तौ दृष्टान्तमाह । नौगतस्येति । तद्वदिति दार्ष्टान्तिकोक्तिः ॥ २ ॥

उक्तमेव प्रपञ्चयति ।

(३) नौस्थस्य प्रातिलोम्येन नगानां गमनं यथा ॥ ४२ ॥
आत्मनः संसृतिस्तद्वद्ध्यायतीवेति हि श्रुतिः ।

नौस्थस्येति । जलस्थायां चलन्त्यां नावि स्थितस्य जनस्य यथा नौगतिदिग्वैपरीत्येन जलाशयतीरस्थानां नगानां वृक्षादीनां गमनं विभाव्यते उपाध्यविवेकात्तद्वदसंसारिणो ऽप्यात्मनः संसृतिरनुभूयत इत्यर्थः । उक्तार्थानुवादिनीं श्रुतिं पठति । ध्यायतीवेति हि श्रुतिरिति "स समानः सन्नुभौ लोकावनुसंचरति ध्यायतीव लेलायतीवे"ति श्रूयत इत्यर्थः ॥ ३ ॥

प्रपञ्चितदृष्टान्तानुगुण्येन दार्ष्टान्तिकं प्रपञ्चयन्नुदाहृतश्रुत्यर्थमाह ।

(४) चैतन्यप्रतिबिम्बेन व्याप्तो बोधो हि जायते ॥ ४३ ॥

बुद्धः शब्दादिभिर्भासस्तेन मोमुह्यते जगत् ।

चैतन्यप्रतिबिम्बेनेति। चैतन्यप्रतिबिम्बश्चिदाभासस्तेन व्याप्ता हि यस्माद्बुद्धेर्बोधो विषयाकारा वृत्तिर्जायते अतः स्वाभासाविवेकाच्छब्दादिभिर्बुद्धिवृत्तिव्याप्तविषयैरित्थं भावे तृतीया, विषयभूतदेहाद्यात्मना भासो भासनं स्फुरणमात्मनो भवतीति शेषः । यदि शब्दादिनिर्भास इति पाठो लभ्यते तदा बोधविशेषणं शब्दादेर्विषयस्य निर्भासो यस्मिन् तथेति सुगमं, येनैवमेकस्यां बुद्धिवृत्तौ देहादिविषयचैतन्ययोः संश्लेष इव भवति तेनान्योन्याविवेकनिमित्तेन जगद् जनो ऽतिशयेन मुह्यतीत्यर्थः। यथा नौस्थः पुरुषो नावश्चलनं नानुभवति अचलत्सु च वृक्षेषु चलनमनुभवत्युपाधिसामर्थ्या,देवं बुद्धिस्थदेहाद्यात्मभावमिवापन्न आत्मा तदीयं व्यापारं न पृथगनुभवति तदाभासाविवेकात्तु चिदात्मनि विकारमारोपयन्ननुभवति मृषैवेत्येतद्ध्यायतीवेत्यादिश्रुत्योच्यते अत उपाधिसामर्थ्यात्संसारित्वविभ्रम इत्यभिप्रायः ॥ ४ ॥

एवमविवेकाधीने संसाराध्यासे विविक्तपदार्थस्य वाक्यादहं ब्रह्मास्मीति बुद्धिवृत्त्युदये मुक्तिः फलिष्यत्यतः पदार्थविवेकवता भाव्यं मुमुक्षुणेत्यभिप्रेत्याह ।

( ५ ) चैतन्यभास्यताहमस्तादर्थ्यं च तदस्य यत् ॥ ४४ ॥
इदमंशप्रहाणेन परः सो ऽनुभवो भवेत् ।

॥ इति मूत्राशङ्काप्रकरणम् ॥ ५ ॥

चैतन्यभास्यतेति । अहमो ऽहंकारस्य चिदचिद्ग्रन्थिरूपस्य यच्चैतन्यभास्यता दृश्यता, यच्च तादर्थ्यं चिदात्मनो विषयोपस्थापकत्वेन, तच्छेषत्वमस्ति, तदुभयमस्याहंकारस्य संबन्धि तस्मिन्निदमंशस्य प्रहाणे विवेके सति न भवेद् न स्यादिति योजना। तत्र यो ऽनुभवः साक्षी परिशिष्टः स परः परमात्मा वाक्यार्थभूतो भवेदित्यर्थः । यद्वा अस्याहमो ऽहंकारस्य चैतन्यभास्यता जडता तादर्थ्यं च तच्छेषत्वं च यद्यस्मादस्ति तत्तस्मादयमहंकारो नात्मेति वेद्यांशप्रहाणेन तस्मिन्नस्मदर्थाभिमानत्यागेन योनुभवः स पर आत्मेति निश्चयवान् भवेदिति योजना । अथ वा स वाक्यार्थविषयः परः सर्वान्तरोनुभवो ऽहमोहंकारस्येदमंशप्रहाणेन पृथक्करणेन भवेदिति संबन्धः । इदमनिदमात्मकस्याहंकारस्य संबन्धी य इदमंशस्तस्य साक्षिसाक्ष्यान्वयव्यतिरेकागमापायितदवध्यन्वयव्यतिरेकालोचनरूपेण मननेनापबाधे सति अवशिष्टांशो ऽनपोह्य आत्मेत्यनुभवो भवेदित्यर्थः। नन्वहमित्यवभासे इदमंश एव न चकास्ति यस्य प्रहाणेन परोनुभवो भवेदित्याशङ्कायामाह। चैतन्यभास्यतेति। तादर्थ्यं चेति च, सुषुप्त्यादावात्मनि भासमानेपि अहंकारस्यानवभासादनात्मत्वे निश्चिते सति जागरितादावागन्तुकत्वाच्चैतन्यभासता तस्य सिद्धा, अतः प्रतिभासत इदमंशाभावेपि चैतन्यभास्यत्वेन लक्षणेनास्तीदमाकारतेत्यर्थः। तथा तादर्थ्यमप्यस्ति, आत्मनि कर्तृत्वभोक्तृत्वादिव्यवहारनिर्वाहकतया आत्मशेषत्वमस्ति, यद्यस्मादेवं तत्तस्मादप्यनात्मत्वलक्षण इदमंशो विद्यते अतस्तत्प्रहाणेन ब्रह्मात्मानुभवो भवेदिति सर्वं समञ्जसम् ॥ ५ ॥

बुद्ध्यपराधप्रकरणं पञ्चमं विवृतं, मूत्राशङ्काप्रकरणमित्यन्यत्र ॥ ५ ॥

पदार्थविवेकवतो वाक्यादहं ब्रह्मेति विज्ञानं भवतीत्युक्तं, तत्राहमित्यत्रेदमंशप्रहाणेन साक्षितत्त्वस्य शोधनप्रकारः सूक्ष्मोपायो निर्दिष्ट,स्तत्रासमर्थं प्रति स्थूलोपायेन पदार्थशोधनप्रकारमुपदेष्टुं प्रकरणमारभते। तत्र यत्स्वरूपप्रहाणमन्तरेण हातुं न शक्यते यथाग्नेरौष्ण्यं तस्य स्वरूपत्वादेव न विशेषणता यद्यपि तथापि तथाविधस्य क्व चिद्विशेषणत्वव्यवहारः कल्पितभेदमाश्रित्येति स्थिते, आत्मनि सति सत्ताचैतन्यानन्दानामनपायाच्च तेषां विशेषणत्वं किं तु स्वरूपत्वमेव, कृशः स्थूलः कृष्णो गौरो ऽहं मनुष्यः श्रोता द्रष्टा वक्ता कामी क्रोधी ज्ञानी कर्त्ता भोक्ता सुखी दुःखीत्येवंविधानि विशेषणानि नात्मनः सत्तादिवत्स्वरूपभूतानि, सत्यप्यात्मनि सुषुप्त्यादौ तेषामभावादित्येवमात्मनः पृथगुद्धृत्य तस्य कूटस्थता ऽवधेयेत्यभिप्रेत्य पृथग्भूतस्य विशेषणत्वाभावे दृष्टान्तमाह ।

( १ ) छित्त्वा त्यक्तेन हस्तेन स्वयं नात्मा विशेष्यते॥ ४५॥
तथा शिष्टेन सर्वेण येनयेन विशेष्यते ।

छित्त्वा त्यक्तेनेति । यथा ऽयं दृष्टान्तस्तथा येनयेन मनुष्यत्वादिना विशेष्यते तेनतेन सर्वेण शिष्टेन त्यक्तहस्तातिरिक्तेन पादादिना वा स्वयमात्मानं विशेष्यते, यथा हस्तच्छेदानन्तरं हस्तवानहमिति न विशिष्टप्रत्ययः क्रियते एवमेव पादादिमान्मनुष्यो ऽहमित्यादिविशिष्टप्रत्ययो न कार्य इत्यर्थः ॥ १ ॥

देहद्वयसमवायिधर्माणामात्मनि व्यभिचारात्तैरात्मा विशिष्य न प्रत्येतव्य इत्युक्तमनूद्य फलितमाह ।

( २ ) तस्मात्त्यक्तेन हस्तेन तुल्यं सर्वविशेषणम् ॥ ४६ ॥
अनात्मत्वेन तस्माद् ज्ञो मुक्तः सर्वविशेषणैः ।

तस्मादिति । अनात्मत्वेन त्यक्तेन हस्तेनेति संबन्धः। विमतानि विशेषणानि नात्मस्वभावभूतानि, विशेषणत्वाद्, छित्त्वा त्यक्तहस्तवदित्यर्थः । यस्मादेवं तस्माद् ज्ञो ज्ञानवान्विवेकज्ञानवान्सर्वविशेषणैर्मुक्तश्चित्सदानन्दमात्रात्मक एवावशिष्यत इत्यर्थः ॥ २ ॥

उक्तन्यायेन विशेषणानामनात्मत्वे ऽपि नात्मनस्तद्वियोगो ऽस्ति आगमापायाभ्यां संबन्धनैरन्तर्य्यादित्याशङ्क्याह ।

(३) विशेषणमिदं सर्वं साध्वलङ्करणं यथा ॥ ४७ ॥
अविद्याध्यस्तः सर्वं ज्ञात आत्मन्यसद्भवेत् ।

विशेषणमिदं सर्वमिति । इदं सर्वं विशेषणं यथालङ्करणमलङ्कार्यसंबन्धे ऽपि न तत्तादात्म्यतद्धर्मत्वबुद्धिविषयस्तथा साधु शोभनं युक्तमिति यावद्, इतरथा आगमापायानुपपत्तेरित्यर्थः । तर्हि कुतो मनुष्यो ऽहमित्यादौ तादात्म्यावभासस्तत्राहाविद्याध्यस्त इति । मोहादेव तथावभास इत्यर्थः । यस्मादविद्ययाध्यस्तमेवात्मनीदं सर्वं विशेषणमतो ज्ञाते आत्मन्यविद्यानिवृत्तावसद्बाधितं कालत्रये ऽप्यविद्यमानं भवेत्तथा निश्चितं भवेदिति योजना ॥ ३ ॥

ज्ञात आत्मनीत्युक्ते ज्ञेयत्वमात्मन उक्तमिति शङ्का स्याद्, ज्ञेयत्वे च विशेषणादिवदनात्मत्वप्रसङ्गादित्याशङ्क्याह ।

(४) ज्ञातैवात्मा सदा ग्राह्यो ज्ञेयमुत्सृज्य केवलः ॥४८॥
अहमित्यपि यद्ग्राह्यं व्यपेताङ्गसमं हि तत् ।

ज्ञातैवेति । ज्ञेयमुत्सृज्य दृश्यांशापोहं कृत्वा यो ज्ञाता सदा सर्वस्य स एवात्मा न ग्राह्यांश इति, ग्राह्यो ऽध्यवसेयः किंलक्षणः केवलो ज्ञातृत्वविशेषणेनापि रहित इत्यर्थः । ज्ञातृत्वाद्युपलक्षितं चिन्मात्रमलुप्तप्रकाशस्वभावतया सर्वानुस्यूतवस्त्वात्मेति विवेकवतो निश्चितप्रत्ययो भवेदिति भावः । अहमित्यनुभूयमानत्वात्कथं ज्ञातैवात्मेत्युच्यत इत्यत आहाहमित्यपीति । यद्यपीदमहमिति ग्राह्यमात्मरूपं मन्यसे तद्व्यपेताङ्गसमं छिन्नहस्ततुल्यं हि एव तत्सुषुप्त्यादावात्मन्यवभासमाने ऽप्यहमित्यनवभासनादहमो व्यभिचारित्वे सत्यात्मदृश्यतया ऽऽत्मत्वायोगादित्यर्थः ॥ ४ ॥

आत्मनो ऽहंप्रत्ययग्राह्यत्वाभावे चक्षुरादेरप्यविषयस्य कुतः सिद्धिरिति मुग्धशङ्कां दृष्टान्तेनापाकुर्वन्नात्मनो ऽन्यनिरपेक्षां स्वतः सिद्धिं साधयति ।

(५) यावान्स्यादिदमंशीयः स स्वतो ऽन्यो विशेषणम् ॥ ४९ ॥
विशेषप्रक्षयो यत्र सिद्धो ज्ञश्चित्रगुर्यथा ।

यावानिति । अहमित्यत्र यावांश्चिदवभास्यत्वलक्षणेनेदमंशो यो ऽहंकारादिर्यत्र विशेषणं स्याद्यस्मिन्स्वानुगतप्रतिभासे प्रत्यगात्मनि विशेषव्यवहारहेतुः स्यात्स प्रत्यगात्मा ऽन्यो विशेषणत्वेनाभिमतात्तदहंकारादेः परो विशेषप्रक्षयश्च सर्वेषां विशेषाणां प्रक्षयो व्यावृत्तिर्यस्मिन्निति व्युत्पत्तेर्निर्विशेषश्च, एवंरूपः स्वतःसिद्धो ऽन्यनिरपेक्ष एव सिद्धः स्फुरन्वर्त्तत इति पदयोजना । यथा देवदत्तो विशेषणभूतायाश्चित्राया गोरन्यस्तत्संबन्धात्प्रागेव सिद्धो न चित्राया गोः संबन्धं स्वसिद्धिं प्रत्यपेक्षते तथा ऽऽत्माप्यहंकारादिसंबन्धात्प्रागेव स्वमहिम्ना सिद्धो नाहंकारादिकं स्वसिद्धावपेक्षत इति दृष्टान्तदार्ष्टान्तिकसङ्गतो ऽर्थः ॥ ५ ॥

नन्वहमो ऽनात्मत्वे कथमहं ब्रह्मेति तादात्म्यश्रुतिरुपपद्येतेत्याशङ्क्याध्यस्ताहंकारस्य मूलनिवृत्त्या निवृत्त्यर्था श्रुतिर्नाहंकारस्यात्मत्वप्रतिपत्त्यर्थेति परिहरति ।

(६) इदमंशोहमित्यत्र त्याज्यो नात्मेति पण्डितैः ॥ ५० ॥
अहं ब्रह्मेति शिष्टांशो भूतपूर्वगतेर्भवेत् ।

॥ इति छित्त्वाप्रकरणम् ॥ ६ ॥

इदमंशोहमिति । अहमित्यत्राहंकारावभासे य इदमंशः स नात्मा दृश्यत्वादिति निश्चित्य पण्डितैस्त्याज्यस्तस्मिन्नात्माभिमानो न कार्य इत्यर्थः । तर्हि कथं श्रुतिनिर्देशस्तत्राह । अहमिति । अहं ब्रह्मेति वाक्यार्थनिष्ठायां यो ऽहंकारांश उल्लिख्यते स भूतपूर्वगतेर्हेतोर्भवेद् भूता संजाता पूर्वगतिः प्राप्तिस्तस्या इतिविग्रहः, अहंकारलक्ष्यं वस्तु तत्साक्षिरूपमहमिति श्रुत्योल्लिख्यत इत्यर्थः ॥ ६ ॥

इति विशेषापोहप्रकरणं षष्ठं विवृतं, छित्त्वाप्रकरणमिति वा ॥ ६ ॥

एवं कृतान्वयव्यतिरेकस्य परिशोधितपदार्थतत्त्वस्य वाक्यादेव वाक्यार्थज्ञानमुत्पद्यत इत्युपपत्त्या निर्द्धारितमर्थं स्वानुभवावष्टम्भेन स्पष्टीकर्त्तुं प्रकरणान्तरमारभते ।

(१) बुद्ध्यारूढं सदा सर्वं दृश्यते यत्र तत्र वा ॥ ५१ ॥
मया तस्मात्परं ब्रह्म सर्वज्ञश्चास्मि सर्वगः ।

बुद्ध्यारूढमित्यादिना । यस्मान्मया सर्वमध्यात्ममधिदैवमित्यादिलक्षणं यत्र तत्र वा जाग्रत्स्वप्नयोरिहलोकपरलोकयोर्वा स्थितं प्रत्यक्षादितः शास्त्रतो वा यदुपलभ्यमस्ति तत्सर्वं बुद्ध्यारूढं बुद्धिवृत्तिक्रोडीकृतं सदा दृश्यते प्रकाश्यते तस्मादहं सर्वदृश्यविलक्षणत्वात्परं प्रपञ्चातीतं ब्रह्मास्मि सर्वज्ञः सर्वार्थप्रकाशकः सर्वगोपरिच्छिन्नश्चास्मीत्यर्थः ॥ १ ॥

ननु कथमेतावता सर्वज्ञत्वं, पुरुषान्तरबुद्ध्यारूढेर्थे पुरुषान्तरस्यानुभवस्मरणयोरसंभवा,देकस्यात्मनः सर्वार्थप्रकाशकत्वासिद्धेरित्यत आह ।

(२) यथात्मबुद्धिचाराणां साक्षी तद्वत्परेष्वपि ॥ ५२ ॥
नैवापोढुं न वा ऽऽदातुं शक्यस्तस्मात्परो ह्यहम् ।

यथात्मेति । आत्मनि सर्वव्यवहारप्रवर्त्तकतया आत्मसंबन्धिनी बुद्धिरात्मबुद्धिस्तस्याश्चारः प्रचारो येषु ते आत्मबुद्धिचारा अध्यात्माधिदैवस्थूलसूक्ष्मदेहात्मकास्तेषां साक्षी स्फोरकोहं

यथा तद्वत्तथा परेषु परकीयबुद्धिचारेष्वप्यहं साक्षी साक्षिभेदे प्रमाणाभावाद् ।

"मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् ।
मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहम्" ॥

इत्यादिश्रुतेर्मय्येवैकस्मिंश्चिदेकरस आत्मनि सर्वप्रमातृतद्बुद्धितत्प्रचारगोचरस्य प्रपञ्चस्य कल्पितत्त्वावगमाच्च युक्तं मम सर्वज्ञत्वादीत्यर्थः । यस्मादेवमहं सर्वसाक्षित्वेन सर्वाधिष्ठानत्वेन च सर्वज्ञः सर्वगश्च तस्मादपोढुमयमस्य द्रष्टा न भवत्यत्र नास्तीति वा निराकर्त्तुं नैव शक्यः केन चित्र चैवादातुं ज्ञानेन क्रियया वा प्रकाशयितुमुत्पादयितुमाक्रष्टुं वा शक्यो हि यस्मादहं ग्राह्यग्राहकादिप्रपञ्चविलक्षणस्तस्मात्परः परमात्मैवेत्युपसंहारः ॥ २ ॥

ननु बुद्ध्यारूढं चेत्सर्वं प्रकाश्यते क्षेत्रज्ञेन तदा दर्शनक्रियाकर्तृत्वाद्विकारित्वादिदोषप्राप्तेस्तस्यानात्मत्वप्रसङ्ग इति शङ्कां निरस्यति ।

(३) विकारित्वमशुद्धत्वं भौतिकत्वं न चात्मनः ॥ ५३ ॥
अशेषबुद्धिसाक्षित्वाद् बुद्धिवच्चाल्पवेदना ।

विकारित्वमिति । आत्मनो न विकारित्वं, बुद्धिवत्सावयवत्वाभावात्सर्वविकारसाक्षित्वाच्च, तत एव नात्मनो ऽशुद्धत्वं क्रियागुणयोगित्वमस्ति, सकलगुणक्रियावद्वस्तुसाक्षित्वाच्च, नापि भौतिकत्वमात्मनो, रूपादिहीनत्वात्, किं च नात्मनो बुद्धिवदल्पवेदना, यथा बुद्धेर्बुद्धितत्संसर्गादिविषया वेदनास्ति नैवमात्मनो, ऽशेषबुद्धिसाक्षित्वा,त्सर्वबुद्धिस्वरूपतद्विकारादिसाक्षित्वादित्यर्थः ॥ ३ ॥

यदि निर्विकार एवात्मा कथं तर्हि स सर्वार्थप्रकाशक इत्युच्यते इत्याशङ्क्य लोकप्रसिद्धदृष्टान्तेन निर्विकारस्यैव प्रकाशकत्वमुपपादयति ।

(४) मणौ प्रकाश्यते यद्वद्रक्ताद्याकारतातपे ॥ ५४ ॥
मयि संदृश्यते सर्वमातपेनेव तन्मया ।

मणाविति । मणौ स्फटिकादिलक्षणे जपाकुसुमादिरूपा रक्ताद्याकारता आतपे सूर्यालोके सत्येव प्रकाश्यते गृह्यते यद्व,त्तथा मयि क्षेत्रज्ञे आदित्यस्थानीये विद्यमान एव स्फटिकादिस्थानीयायां बुद्धौ जपाकुसुमादिरक्ततादिस्थानीयं सर्वं विषयजातं संदृश्यते, तत्तस्मादातपेनेव निष्प्रकम्पेन मया सर्वं प्रकाश्यते, न बुद्धिवद्विकारवता, नापि बुद्धिरेव द्रष्ट्री । न चैवं सति बुद्धेरनुपयोग एव, चैतन्यस्य विषयविशेषाकारत्वापादनाय तदुपयोगादिति ॥ ४ ॥

इदानीं प्रत्यगात्मनो ऽद्वितीयत्वमुपपादयंस्तस्य च शुद्धत्वं स्पष्टयति ।

(५) बुद्धौ दृश्यं भवेद्बुद्धौ सत्यां नास्ति विपर्यये ॥ ५५ ॥
द्रष्टा यस्मात्सदा द्रष्टा तस्माद् द्वैतं न विद्यते ।

बुद्धाविति । जाग्रदादौ बुद्धौ सत्यां स्वाविद्ययाध्यस्तायां बुद्धौ समारूढं सद् दृश्यं द्वैतं भवेद्भवेत्, नास्ति विपर्यये, बुद्धावसत्यां स्वापादौ दृश्यं नास्ति, जडस्याज्ञातसत्त्वे प्रमाणाभावादित्यर्थः । द्रष्टा तु साक्षी सदा सर्वास्वप्यवस्थासु द्रष्टैव, न दृश्यवत्स्वसत्तां व्यभिचरति, यस्मादेवं सतः प्रकाशमानत्वाव्यभिचारस्तद्व्यभिचारिणश्च सत्त्वानुपपत्तिस्तस्माद् द्वैतं न विद्यत इति नित्यशुद्ध एव प्रत्यगात्मेत्यर्थः ॥ ५ ॥

यद्यपि द्वैतसंसर्गकृतमशुद्धत्वमात्मनो नास्ति द्वैतस्याभावात्तथापि विद्याविद्याभ्यां संबन्धादशुद्धिर्भविष्यतीत्याशङ्क्य बुद्धेरेव विद्याविद्ये नात्मनस्तत्संसर्ग इति शुद्ध एवात्मेत्याह ।

(६) अविवेकात्पराभावं यथा बुद्धिरवेत्तथा ॥ ५६ ॥
विवेकात्तु परादन्यः स्वयं चापि न विद्यते ॥ ५७ ॥

॥ बुद्ध्यारूढप्रकरणम् ॥ ७ ॥

अविवेकादिति । न विद्यते विवेको भेदो भासमानतया यस्मिन्सो ऽविवेको देहादावात्मबुद्धिर्विपर्ययज्ञानमिति यावत्तस्मादविवेकात्परस्यासंसारिणः सर्वसाक्षितया विविक्तस्याभावमविद्यमानतां यथा बुद्धिरवेद्विदितवती, अत्र बुद्ध्यध्यासादेव चिदात्मनोपि भ्रान्तियोगात्साभासा बुद्धिरेवाज्ञानविपर्यासाश्रय इत्यङ्गीकृत्य यथा बुद्धिरवेदित्युक्तमिति द्रष्टव्यं, तथा विवेकात्तु अनात्मापवादेनात्मनः स्वभावनिर्द्धारणं विवेकस्तस्माद्विवेकादूर्ध्वं परादसंसारिणः परमात्मनो ऽन्यो जीवः संसारी न विद्यते स्वयं चापि साभासबुद्धिरपि सनिदाना न विद्यते तदा प्रत्यग्ब्रह्मभूतत्वात्सर्वस्येत्यर्थः, तथा च भ्रान्तिसम्यग्ज्ञानयोर्विद्याविद्यारूपयोरपि बुद्धितन्त्रत्वान्नात्मनो ऽशुद्धिगन्धोपीति भावः ॥ ६ ॥

इति बुद्ध्यारूढप्रकरणं सप्तमं विवृतम् ॥ ७ ॥

ननु विद्याविद्ययोर्यदि बुद्धिगतत्वं तर्हि सांख्यसिद्धान्तप्रसङ्गस्ते हि बुद्धिरेव पुरुषस्यापवर्गार्थं भोगार्थं च ज्ञानाज्ञानरूपतामाचरतीति वदन्तीत्याशङ्कामपनुदन् पूर्वं स्वानुभवानुरोधेन साधितमेव ब्रह्मात्मज्ञानमात्ममनःसंवादात्मकेन प्रकरणान्तरेण द्रढयति ।

(१) चितिस्वरूपं स्वत एव मे मते
रसादियोगस्तव मोहकारितः ।
अतो न किं चित्तव चेष्टितेन मे
फलं भवेत्सर्वविशेषहानतः ॥ ५८ ॥

चितिस्वरूपमिति । रसादियोगो रागादिनिबन्धनो भोक्तृत्वादिसंबन्धः मोहो ऽविवेकः फलितमाहातो नेति ॥ १ ॥

यस्मात्सर्वविशेषराहित्यात्तव चेष्टितेन मे ममानाधेयातिशयस्य किमपि फलं नास्ति तस्मात्तवोपशम एव युक्त इत्याह ।

(२) विमुच्य मायामयकार्यतामिह
प्रशान्तिमायाह्यसदीहितात् सदा ।
अहं परं ब्रह्म सदा विमुक्तवत्
तथा ऽजमेकं द्वयवर्जितं पुनः ॥ ५६ ॥

विमुच्येति । मायामयकार्यतां मिथ्याचेष्टितं विमुच्यासदीहिताचिरर्थकप्रयासात्प्रशान्तिं प्रशममिह मयि प्रत्यगात्मनि आयाहि प्राप्नुहि, अत्र मायामयचेष्टितासदीहितशब्दाभ्यामविद्यानिबन्धनत्वस्य सूचितत्वात्सांख्यमतशङ्का निरवकाशीकृता वेदितव्या, ननु किमिति प्रत्यगात्मनि मनसो लय उच्यते, सत्यज्ञानादिलक्षणे ब्रह्मण्येव कस्माचोच्यते इत्याशङ्क्याह । अहं परं ब्रह्मेति । यतः सदैवाहं ब्रह्मैव तथा सति सदा विमुक्तवन्मुक्त इवास्मि न तु मे मुक्तिर्बन्धाभावादिति योजना । अजत्वविशेषणं जन्मादिसमस्तविकारप्रतिषेधार्थम्, अत एकं सदैकरूपमित्यर्थः, सजातीयभेदरहितमिति वा, द्वयवर्जितं विजातीयभेदहीनमित्यर्थः । अतो यन्मय्येकीभूतं ब्रह्मण्येव तदेकीभूतमिति स्थिते न "परे ऽव्यये सर्व एकीभवन्ती"ति श्रुतिविरोध इति भावः ।

अपरा योजना । हे मते असत्सु स्वतःस्वरूपशून्येषु देहेन्द्रियविषयेषु यदीहितमभिलषितं दृष्टमदृष्टं वा फलं तस्मादसदीहितात्सदा सर्वदा जाग्रद्दशायामपि प्रशान्तिं प्रशममायाहि तदर्थव्यापारं परित्यजेत्यर्थः । उपशान्तापि त्व मय्येवात्मानं धारयेत्याह । विमुच्येति । कार्यतां बुद्धिरूपकार्यात्मतां विमुच्य विहाय मायां कारणरूपमायाम् अय गच्छ तदात्मिका भव, तर्हि तद्रूपेण स्थित्वा पुनरुद्भविष्यामीति चेत्तत्राह । इहेति । 'इह मत्स्वरूप एवान्तरय प्रविश कार्यकारणरूपतां विहाय तप्तायःपीतोदकबिन्दुवन्मद्रूपयस्ता भवेत्यर्थः, कथमहं मुखान्तःकवलीकृतब्रह्माण्डकोटिर्मयेतस्ततश्चाल्यमानेन त्वया ग्रस्ता स्यामिति चेन्नाहं कदापि चालयितुं त्वया शक्यस्त्वद्भ्रान्तिमात्रमेतदित्यभिप्रेत्याह । अहं परं ब्रह्मेति । यतोहं सदा परं ब्रह्म अयमात्मा ब्रह्मेति श्रुतेरिति योज्यं, विमुक्तवदिति ब्रह्मविशेषणं, स्वार्थे तद्धितः, । विमुक्तं नित्यमुक्तमेवेत्यर्थः, । तथा, यथा श्रुत्युक्तं तथेत्यर्थः । व्याख्यातमन्यत् ॥ २ ॥

नन्वजत्वादिप्रतिपादकशास्त्राद्ब्रह्मणो निर्विशेषतया नित्यमुक्तत्वेपि कथमात्मनो देहादिष्वन्वितस्य निर्विशेषतया ब्रह्मरूपतासंभव इत्यत आह ।

(३) सदा च भूतेषु समोस्मि केवलो
यथा च खं सर्वगमक्षरं शिवम् ।
निरन्तरं निष्कलमक्रियं परं
ततो न मेस्तीह फलं तवेहितैः ॥ ६० ॥

सदा च भूतेष्विति । चशब्दो ऽवधारणार्थः । अहं केवलो ऽविद्यातत्कार्यरूपविशेषणरहितः सर्वेषु भूतेषु सम एवास्मि, उपाधिपरामर्शमन्तरेण मयि विशेषोल्लेखाभावादित्यर्थः । सर्वानुस्यूतस्याप्यसङ्गस्वभावतया निर्विशेषत्वे दृष्टान्तमाह । यथा च खमिति । आकाशस्यासङ्गत्वादेः प्रसिद्धत्वाच तस्मिञ्छङ्का कार्येति चशब्दार्थः । सर्वगमित्यादीनि विशेषणानि ब्रह्माकाशयोः समानि, यतः आकाशवत्केवलोहं सर्वभूतेषु समो ऽत आकाशस्वभावोपमितं सर्वगमित्यादिविशेषणं परं ब्रह्मैवास्मीति योज्यम्, उपपादिते ब्रह्मात्मैक्ये फलितमाह, तत इति ॥ ३ ॥

ब्रह्मभूतस्य तव मदीहितैः फलाभावेपि कथं चिन्मच्चेष्टया त्वत्संबन्धिनस्त्वां प्रति गुणभूतस्य प्रधानभूतस्य वा कस्य चिदर्थस्य क्व चिदुपयोगो भविष्यतीत्याशङ्क्य सोपि मयि दुःसंपाद इत्याह ।

(४) अहं ममैको न तदन्यदिष्यते
तथा न कस्याप्यहमस्म्यसङ्गतः ।
असङ्गरूपोहमतो न मे त्वया
कृतेन कार्यं तव चाद्वयत्वतः ॥ ६१ ॥

अहं ममैक इति । एक एवाहं चित्स्वरूपस्य मम परमार्थतः सजातीयविजातीयस्वगतभेदे मानाभावा,त्ततो न मम गुणभूतं किं चिन्मत्तो ऽन्यदिष्यते मृग्यते, तथा कस्यापि प्रधानभूतस्याहं गुणभूतो नास्मि, कुतः, असङ्गतो ऽनाधेयातिशयत्वादित्यर्थः । यतोहमसङ्गरूपो ऽतो न मे त्वया कृतेन किमपि प्रयोजनमस्ति, किं च त्वमेव नासि कुतस्तवेहितं तत्फलं चेत्याशयेनाह । तव चेति । मत्स्वरूपाज्ञानकल्पितायास्तवाधिष्ठानभूतमत्स्वरूपव्यतिरेकाभावादभेदे चोपकार्योपकारकत्वासंभवादलं विकल्पनया प्रशान्तैव भवेरित्यर्थः ॥ ४ ॥

इदानीं कृतार्थस्याप्याचार्यस्य स्वानुभवसिद्धार्थाविष्कारकप्रकरणनिर्माणप्रवृत्तौ निमित्तं दुःखिजनदर्शनसंजातकरुणैव न ख्यात्यादीत्यभिप्रेत्याह ।

(५) फले च हेतौ च जनो विषक्तवा-
निति प्रचिन्त्याहमतो विमोचणे ।
जनस्य संवादमिमं प्रकृप्रवा-
न्स्वरूपतत्त्वार्थविबोधकारणम् ॥ ६२ ॥

फले चेति । अयं जनो हेतुफलात्मके संसारे विशेषेणासक्तवानिति प्रचिन्त्य विमृश्य तादृग्जनस्य लोकस्यातः संसाराद्विमोचणे मोक्षार्थमहमिमं मत्यात्मसंवादरूपं यन्थं प्रयुक्तवान्प्रणीतवानस्मि, किमनेन संवादयन्थेनेन जनस्य भवेदिति तदर्थतो विशिनष्टि । स्वरूपेति । स्वस्यात्मनो रूपं नित्यचैतन्यस्वभावस्तस्य तत्त्वार्थो ब्रह्मत्वं तस्य विस्पष्टबोधकारणमित्यर्थः ॥ ५ ॥

यत एवंविधो ऽयं संवादस्तस्मात्साध्यसाधनपर्यावर्त्तलक्षणात्संसारान्मुमुक्षुभिरयमनुचिन्तनीय इत्यभिप्रेत्याह ।

(६) संवादमेतं यदि चिन्तयेन्नरो
विमुच्यते ऽज्ञानमहाभयागमात् ।
विमुक्तकामश्च तथा जनः सदा
चरत्यशोकः सम आत्मवित्सुखी ॥ ६३ ॥

॥ इति चितिप्रकरणम् ॥ ८ ॥

संवादमेतमिति । अज्ञानकृतान्महाभयात्संसारादित्यर्थः । यद्वा महाभयस्यागमो यस्मात्तन्महाभयागममज्ञानं च तन्महाभयागमं चेत्यज्ञानमहाभयागमं तस्मादिति विग्रहः । भयहेत्वज्ञानाद्विमुच्यत इत्यर्थः । कारणनिवृत्त्या कार्यनिवृत्तिमाह । विमुक्तकामश्चेत्यादि । चरति जीवन्नेव बन्धप्रतिभासरहितः सन् ब्रह्मण्येव विचरति कृतकृत्यो भवतीत्यर्थः । सुगममन्यत् ॥

मतिविलापनप्रकरणमष्टमं विवृतं, चितिस्वरूपप्रकरणमिति वा ॥ ८ ॥

यस्य प्रत्यग्ब्रह्मणो वाक्योत्थज्ञानेनाज्ञाननिवृत्त्या मुक्तिरुक्ता तस्य सर्वान्तरत्वेन निरतिशयसूक्ष्मत्वं व्यापित्वं च यथा च ख्रमित्यत्र सूचितमुपपादयितुं प्रकरणान्तरमारभते ।

(१) सूक्ष्मताव्यापिते ज्ञेये गन्धादेरुत्तरोत्तरम् ।
प्रत्यगात्मावसानेषु पूर्वपूर्वप्रहाणतः ॥ ६४ ॥

सूक्ष्मतेत्यादिना । गन्धशब्दः पृथिवीशब्दार्थः, पृथिव्यवादिलक्षणात्कार्यात् पूर्वस्मात्पूर्वस्मादुत्तरोत्तरकारणतया स्थितेषु प्रत्यगात्मावसानेषु सर्वान्तरात्मपर्यन्तेषु पदार्थेषु यथाक्रमं पूर्वपूर्वप्रहाणतः कार्याकारायोहेन सूक्ष्मता व्यापिता च विज्ञातव्या, कार्यकारणान्वयव्यतिरेकालोचनया संभावनीये इत्यर्थः । कार्येषु विद्यमानमपि कारणस्वरूपं तत्तत्कार्याकारतिरोहिततया न स्वरूपेणावभासते इति सूक्ष्ममुच्यते, न पुनः कार्यपरिमाणान्न्यूनपरिमाणयोगात्तथा सकलस्वविकारानुगतस्वैवोपादानकारणत्वात्कार्यापेक्षयाधिकदेशवृत्तित्वेन व्यापित्वं च कारणस्य, तथाहि, चतुर्विधभूतग्रामोपादानरूपा पृथिवी तावच्च भूतयामेषु गृह्यमाणेषु गृह्यते, तत्र तच्छब्दप्रत्ययव्यवहारादर्शनाल्लोकस्य, अतस्तदपेक्षया सूक्ष्मा तदव्याप्तदेशवर्त्तित्वाद्व्यापिका च । न च तत्तत्कार्योपादानभूताः पृथिव्यंशा भिन्ना इति नोपादानस्य व्यापकतेति वाच्यं, कार्याकारभेदव्यतिरेकेण मृत्स्वरूपभेदे प्रमाणानिरूपणा,दन्यथा घटाकान्तःस्थमृन्निमित्तकुसूलस्य गृहाङ्गणदेशे मृदात्मना विलयाभावप्रसङ्गा,दुपादानादन्यत्र कार्यलयानुपपत्ते,स्तस्मात्स्वकार्यापेक्षया पृथिवी तावत्सूक्ष्मा व्यापिका च सिद्धा । तथा ऽद्भिर्व्याप्ता पृथिवी "तद्यदपां शर आसीत्तत्समहन्यत सा पृथिव्यभव"दिति श्रुतौ जलपरिणामविशेषस्य शरशब्दवाच्यस्य दधिमण्डाकारस्य पृथिव्यात्मत्वश्रवणात्स्वेदप्रस्रवणादेः पर्वताग्रशिलायामन्तर्भूमौ च सर्वत्रोपलम्भाद्, रसस्य च सलिलासाधारणगुणस्य पृथिव्यां सर्वत्रोपलम्भात्, तस्यैकत्वे ऽपि कटुतीक्ष्णत्वादिभेदः परिणामविशेषोपाधिनिबन्धन इति । तस्माज्जलव्याप्ता पृथिवी सपरिणामेति जलं पृथिव्या व्यापकं सूक्ष्मं च प्रागुक्तयुक्त्या सिद्धं, तथा सपृथिवीजलं तेजसा स्वकारणेन व्याप्तं, सर्वत्रोष्मोपलम्भात्, तप्तायोगोलकादौ सूर्यकिरणेषु चोदकस्य लयदर्शनाच्च, तथा चैवं तेजसो जलाव्यापकत्वं सूक्ष्मत्वं च प्रसिद्धं, तदपि वायुना ग्रस्तं, "यतश्चोदेति सूर्यो ऽस्तं यत्र च गच्छतीति प्राणाद्वा एष उदेति प्राणे ऽस्तमेति" इति श्रुतेः प्राणशब्दवाच्ये वायौ लयश्रवणाद् ज्वालारूपस्य च वह्नेर्वाय्वधीनप्रवृत्तिनिवृत्तिदर्शनाच्च, वायुस्त्वाकाशेन ग्रस्त इति प्रसिद्धमेवैतत्,सूक्ष्मत्वं तु व्याख्यातमेव, सर्वत्र एतत्सर्वं सत्तास्फूर्त्तिभ्यां व्याप्तमेवानुभूयत इति सच्चिन्मात्रं सर्वस्योपादानं, तस्य चार्थान्तरेणानुगमादर्शनाच्चिरूपादानकत्वे सिद्धे निरपेक्षव्यापकत्वं प्रागुक्तपरिपाट्या निरतिशयसूक्ष्मत्वं च सिध्यति । तदनेन सच्चिन्मात्रेण सर्वस्य दृश्यराशेर्ग्रस्तत्वान्न ततः पृथक् किमपि वस्तु विद्यत इति तस्य परमसूक्ष्मताव्यापिते निश्चित्य सो ऽहमसङ्गकूटस्थाद्वयात्मेति सदा भावयेदिति नान्यथा ॥ १ ॥

ननु नैतावता ऽऽत्मन उक्तरूपत्वज्ञानसिद्धिरध्यात्माधिदैवतयोः पृथिव्यादेर्भेदेन प्रथमानत्वादित्यत आह ।

(२) शारीरा पृथिवी तावद्यावद्बाह्या प्रमाणतः ।
अबादीनि च तत्त्वानि तावज्ज्ञेयानि कृत्स्नशः ॥ ६५ ॥

शारीरेति । यावद्बाह्या पृथिवी प्रमाणतः परिमाणतो भवति तावत्तावत्प्रमाणा शारीरा पृथिवी ज्ञेयेति संबन्धः, तथा ऽबादीनि चत्वारि भूतानि कृत्स्नशो निरवशेषतया तावत्तावत्प्रमाणानि ज्ञेयानि यावच्छारीरा बाह्या च पृथिवीति योजना । एतदुक्तं भवति, अध्यात्माधिभूताधिदैवात्मना विभक्तानां पृथिव्यादीनामेकाज्ञानविजृम्भितत्वादेकप्रयत्नेन प्रविलापनोपपत्तेः सर्वत्र प्रत्यक्त्त्वानुगमात्प्रत्यगात्मावसानमेवाध्यात्मादिरूपं तेन व्याप्तं न ततः पृथगस्तीति प्रत्यक्तत्त्वे ऽवधार्यमाणे बाह्याध्यात्मिकादिभेदस्फूर्त्तेरनवकाशात्प्रत्यगात्मब्रह्म तावन्मात्रमेव सर्वमवशिष्यत इति भवेदेव प्रागुक्तात्मतत्त्वज्ञानसिद्धिरिति ॥ २ ॥

नन्वेवं पराग्र्थस्यासत्त्वे कथमात्मनः प्रत्यक्त्वं सर्वगतत्वमित्याद्युपपद्यते, तस्य पराचीनविकारापेक्षत्वादतः कथं पराचां प्रत्यगात्मावसानत्वमित्याशङ्क्य चिन्मात्रस्वरूपस्यैवापूर्वादिलक्षणस्य प्रत्यगादिशब्दैर्लक्ष्यत्वाल्लक्ष्यमाणदशायामारोपितपरागर्थापेक्षायामपि स्वरूपस्यान्यानपेक्षत्वाद्युक्तं सर्वस्य प्रत्यगात्मावसानत्वावधारणमिति दृष्टान्तेनोपपादयति ।

(३) वाय्वादीनां यथोत्पत्तेः पूर्वं खं सर्वगं तथा ।
अहमेकः सदा सर्वश्चिन्मात्रः सर्वगो ऽद्वयः ॥ ६६ ॥

वाय्वादीनामिति । स्पष्टार्थः ॥ ३ ॥

ननु कथमाकाशवदेक एवात्मा सर्वात्मा भवेद्, ब्रह्मादिभेदेनात्मनामनेकत्वस्य विभाव्यमानत्त्वात्, तथा चैतन्यमात्रत्वं चानुपपन्नं, रागादिदोषसंसर्गोपलब्धेरित्याशङ्क्याह ।

(४) ब्रह्माद्याः स्थावरान्ता ये प्राणिनो मम पूः स्मृताः ।
कामक्रोधादयो दोषा जायेरन्मे कुतोऽन्यतः ॥ ६७ ॥

ब्रह्माद्या इति । ममैव चिदात्मनः सर्वप्राणिनः पूः पुरं शरीरभूताः स्मृताः निर्णीता इत्यर्थः । तथा कामक्रोधादयो दोषा आत्मनो मे न स्वाभाविका व्यभिचारित्वात्परतो ऽपि ते न संभवन्तीत्याह । जायेरन्मे कुतो ऽन्यत इति । अन्यस्याभावादेवेत्यर्थः ॥ ४ ॥

प्रत्यगात्मनो निर्दोषत्वमसिद्धं, संसारदोषस्य प्रत्यक्षत्वादित्याशङ्क्याकाशकार्ण्यप्रत्यक्षवदात्मनि दोषदृष्टेर्भ्रमत्वान्मैवमित्याह ।

(५) भूतदोषैः सदास्पृष्टं सर्वभूतस्थमीश्वरम् ।
नीलं व्योम यथा बालो दुष्टं मां वीक्षते जनः ॥ ६८ ॥

भूतदोषैरिति । अस्पृष्टमिति च्छेदः, सर्वभूतेषु स्थितस्यापि तद्दोषैरस्पृष्टत्वमीश्वरत्वादिति हेत्वर्थविशेषणमीश्वरमिति । सर्वस्येशितारं कारणमिति यावद्, नहि कारणं कार्यधर्मैः संस्पृश्यत इत्यर्थः । स्पष्टमन्यत् ॥ ५ ॥

यदुक्तं ब्रह्माद्याः स्थावरान्ताः प्राणिन एकस्याप्यात्मनः शरीरभूता इति तत्कथमित्यत आह ।

(६) मच्चैतन्यावभास्यत्वात्सर्वप्राणिधियां सदा ।
पूर्वमप्राणिनः सर्वे सर्वज्ञस्य विपाप्मनः ॥ ६९ ॥

मच्चैतन्येति । सर्वज्ञस्य सर्वावभासकस्यात एव विपाप्मनो दृश्यदोषसंसर्गरहितस्य ममात्मनः सर्वे प्राणिनः पूः शरीरं, कुतः, सर्वप्राणिधियां सदा मच्चैतन्यावभास्यत्वादिति योजना । "योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुष" इति श्रुतेः बुद्ध्यन्तःसाक्षितया प्रकाशमानस्य चैतन्यज्योतिष एव सर्वप्राणिष्वात्मत्वावगमात्, तस्य च बुद्धितत्स्थाभासभेदमन्तरेण स्वरूपतो भेदानिरूपणात्, सवितुरिवोदकमात्रतत्स्थाभासाव्यतिरेकेणेति सिद्धमेकस्यात्मनः सर्वाणि भूतानि शरीरमिति भावः । तथा च श्रुतिः "यस्य सर्वाणि भूतानि शरीरं यः सर्वाणि भूतान्यन्तरो यमयत्येष त आत्मान्तर्याम्यमृत" इति ॥ ६ ॥

तर्हि भास्यप्राणितद्बुद्धीनां सत्त्वादद्वैतक्षतिरिति तत्राह ।

(७) जनिमज्ज्ञानविज्ञेयं स्वप्नज्ञानवदिष्यते ।
नित्यं निर्विषयं ज्ञानं तस्माद् द्वैतं न विद्यते ॥ ७० ॥

जनिमदिति । यज्जनिमद्यच्च ज्ञानविज्ञेयं यत्कार्यं जडं च तन्मिथ्येष्यते, यथा स्वप्नज्ञानं तथा जाग्रदपि कार्यं दृश्यं चेति मिथ्येति, द्वैतं न विद्यते यस्मात्तस्माज्ज्ञेयस्यासत्त्वाज् ज्ञानं नित्यं सदा निर्विषयं विषयनिरूप्यं न भवति, यद्वा नित्यमविनाशि सर्वविनाशसाक्षित्वादिति योजना । नह्यध्यारोपितेन द्वैतेन परमार्थमद्वैतं विहन्यते, न खल्वारोपितेन तोयादिना तदाधारभूम्यादि सद्वितीयं दृष्टमिति भावः ॥ ७ ॥

स्वरूपज्ञानस्य निर्विषयत्वं नित्यत्वं चोक्तं श्रुत्योपपादयति ।

(८) ज्ञातुर्ज्ञातिर्हि नित्योक्ता सुषुप्ते त्वन्यशून्यतः ।
जाग्रज्ज्ञातिस्त्वविद्यातस्तद्ग्राह्यं चासदिष्यताम् ॥ ७१ ॥

ज्ञातुर्ज्ञातिरिति । सुषुप्ते त्वन्यस्य ज्ञेयस्यासत्त्वप्रदर्शनपूर्वकं ज्ञातुरात्मनो ज्ञातिः स्वरूपभूता ज्ञप्तिर्नित्येति श्रुत्योच्यते हीत्यर्थः । तथा च श्रुतिः "यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति, नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते ऽविनाशित्वात्, न तु तद्द्वितीयमस्ति, ततोऽन्यद्विभक्तं यत्पश्ये"दित्यादिका । यद्यपि सुषुप्ते निर्विषयज्ञानं विषयाभावात्स्वरूपतो नाशशीलत्वाभावाच्च नित्यं श्रुतिसिद्धं, तथाप्यवस्थान्तरे सविषयमुपलभ्यत इति ज्ञातुर्ज्ञातिरनित्या स्यादित्यत आह । जाग्रदिति । यतः श्रुतिसिद्धं नित्यं निर्विषयं ज्ञानमतः कारणाद् जाग्रज्ज्ञातिर्विषयदर्शनात्मिका ऽविद्या भ्रान्तिरेवात्मनो निर्विकारतया ज्ञानकर्तृत्वायोगादन्तःकरणस्य च जडत्वादेव ज्ञानाश्रयत्वानुप-

पत्तेरध्यस्तमेव सविषयं ज्ञानं तद्ग्राह्यं च विषयजातमसदपरमार्थमिथ्यतां स्वीक्रियतामित्यर्थः। जागरितादौ विषयाकारबुद्धिवृत्तीनां स्फुरणावगुण्ठितत्वात्सर्ववृत्त्युत्पत्तिस्थितिविनाशसाक्षितया स्फुरणस्यैकस्य नित्यस्यान्यस्यावश्याश्रयणीयत्वाज्जाग्रत्यप्यात्मचैतन्यं नित्यमेव, तथा विषयाणां वृत्तिसमकालमेव स्फुरणाद्विषयव्यभिचारेऽपि स्फुरणाव्यभिचारात्तस्य विषयानिरूप्यत्वान्निर्विषयत्वं च सिद्धमिति भावः ॥ ८ ॥

"नन्वात्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य" इति श्रुत्यैवात्मनो दर्शनादिकर्मत्वोक्तेर्दृश्यत्वाद्दर्शनाभुजङ्गादिवदसत्त्वप्राप्तिरित्याशङ्क्य ।

"अशब्दमस्पर्शमरूपमव्ययं
तथाऽरसं नित्यमगन्धवच्च यत् ।
न चक्षुषा गृह्यते नापि वाचा
नान्यैर्देवैस्तपसा कर्मणा वा" ॥

इत्यादिश्रुतिविरोधाद्रूपादिहीनस्य दर्शनाद्यविषयत्वाद् द्रष्टव्य इत्यादिश्रुतिरर्हार्थेन तव्येन योगाद्दर्शनाद्यर्हत्वोपदेशमुखेनानात्मप्रवणता त्याजनार्थेत्याह ।

(९) रूपवत्त्वाद्यसत्त्वान्न दृष्ट्यादेः कर्मता यथा ।
एवं विज्ञानकर्मत्वं भूम्नो नास्तीति गम्यते ॥ १२ ॥

॥ इति सूक्ष्मताप्रकरणं नवमम् ॥ ९ ॥

रूपवत्त्वादीति । यथा द्रष्टव्य इत्यादिवशान्न ज्ञानकर्मत्वमेवं "यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमे"त्यत्रापि प्रागुपन्यस्तश्रुतिविरोधाद्यत्रान्यन्न पश्यत्यात्मानमेव पश्यतीति स्वात्मदर्शनविधिपरत्वकल्पनायोगाद् भूम्नो ब्रह्मणो विज्ञानकर्मत्वं नास्तीति गम्यते निश्चीयत इत्यर्थः ॥ ९ ॥

॥ सूक्ष्मताव्यापिताप्रकरणं नवमं विवृतम् ॥ ९ ॥

---

## ॥ अथ वृषभानुजानामनाटिकायाः ॥

॥ चतुर्थोऽङ्कः ॥

ततः प्रविशति विषण्णा चम्पकलता ।

चम्पकलता । स्वगतम् । अवि कहिं भविस्सदि मे पिअसही तमालिआ [१] । पुरोऽवलोक्य । दिट्ठिआ इध जेव्व अहिवट्टदि एसा [२] ।

ततः प्रविशति तमालिका ।

तमालिका । चम्पकलतामुखं दृष्ट्वा सविषादं संस्कृतेन ।

[१] अपि कुत्र भविष्यति मे प्रियसखी तमालिका ।

[२] दिष्ट्या इत एवाभिवर्तते एषा ।

उत्पादयत्यलमिदं मनसो विषादं
सीदत्सरोरुहनिभं वदनं त्वदीयम् ।
ज्ञात्वा निदानमहमत्र समानदुःखा
प्राणैरपि प्रियतमे भवितुं समीहे ॥ ५५ ॥

चम्पकलता । हला सहि सुट्ठु लक्खिदं तुए । अवहिदं सुणाहि [१] ।

तमालिका । अवहिदम्हि कहेहि [२] ।

चम्पकलता । जदो पहुदि पिअसहि राहिआए सो रूवविहवेण अदिसइदकुसुमाउहसहस्सो कण्हो पुलोइदो तदो आरहिअ कुविदस्स विअ मम्महस्स पव्वसो ण कुदो वि वीसामं पडिवज्जदि । सबहुविणअं पत्थिज्जमाणा वि ण मज्जणादिदिवसव्वावारे रुइं उव्वहदि । एदं क्खु अहिगतं जेव्व तुए [३] ।

तमालिका । अत्थि मम हिअए वि सल्लं क्खु एदं, तदो तदो [४] ।

चम्पकलता । विसेसदो अज्ज सव्वणिसामज्झे खणं वि णिद्दासुहं ण पाविदं, अन्तरा अन्तरा अ आमीलिअ लोअणाइं एवमादिअं असंबद्धं पलविदं [५] ।

तमालिका । सरभसम् । तदो तदो [६] ।

चम्पकलता । तद्यथा ।

कार्यं मे नहि किंचिदस्ति कमलोत्तंसेन सख्यः कथं
मुग्धां मां प्रसभं रुणद्धि सभयं व्याक्रोशमानामपि ।
धूर्तोऽयं करपङ्कजेन शिरसि व्याघट्टमानो हसन्नात्मानं बहु मन्यते स्वमुकुटप्रान्तेन पादौ स्पृशन् ॥ ५६ ॥

तमालिका । सविस्मयमात्मगतम् । जादो क्खु सअलजीवलोअस्स णिदंसणं ताए पेम्मावेसो [७] । प्रकाशम् । तदो तदो [८] ।

चम्पकलता । तदो देईए पुच्छिदा अहं, जह वच्छे चंपअलदे अवि जाणेसि से उव्वेअआरणं [९] ।

[१] हे सखि सुष्ठु लक्षितं त्वया, अवहितं शृणु ।

[२] अवहितास्मि कथय ।

[३] यदाप्रभृति प्रियसखि राधिकया स रूपविभवेनातिशयितकुसुमायुधसहस्रः कृष्णो विलोकितस्तदारभ्य कुपितस्येव मन्मथस्य परवशा न कुतोऽपि विश्रामं प्रतिपद्यते, सबहुविनयं प्रार्थ्यमानापि न मज्जनादिदिवसव्यापारे रुचिमुद्वहति, एतत् खल्वधिगतमेव त्वया ।

[४] अस्ति मम हृदयेऽपि शल्यं खल्वेतत्, ततस्ततः ।

[५] विशेषतोऽद्य सर्वनिशामध्ये क्षणमपि निद्रासुखं न प्राप्तम्, अन्तरान्तरा चामील्य लोचने एवमादिकमसंबद्धं प्रलपितम् ।

[६] ततस्ततः ।

[७] जातः खलु सकलजीवलोकस्य निदर्शनं तस्याः प्रेमावेशः ।

[८] ततस्ततः ।

[९] तदा देव्या पृष्टाहम्, यथा वत्से चम्पकलते अपि जानास्यस्या उद्वेगकारणम् ।

तमालिका । तदो तदो[1] ।

चम्पकलता । तदो कण्हस्स विरहं फुडं जाणंतीए वि मए एव्वं पड़िबोधिदा देई[2] ।

तमालिका । तदो तदो[3] ।

चम्पकलता । सुणादु पिअसही[4] । संस्कृतमाश्रित्य ।

गतेयं कल्याणी तपनतनयां मज्जनविधिं
विधातुं तत्तीरे किमपि कमनीयं सकुतुकम् ।
विलोक्यान्तर्बाधामभजत तदारभ्य सहसा
शमं नेतव्यं तद्बलिविरचनैर्देविकमिदम् ॥ ५७ ॥

तमालिका । सहर्षस्मितम् । संस्कृतेन ।

कस्यान्यस्येदृशो बुद्धेर्विभवो वर्तते सखि ।
यो बलिव्यपदेशेन देवीं बोधयितुं क्षमः ॥ ५८ ॥

तमालिका । तदो तदो[5] ।

चम्पकलता । तदो आणत्तं देवीए, जह जीविदसव्वस्सं वच्छा मे राहिआ पइदिमावज्जदि तह करेहि[6] ।

तमालिका । हला सहि सुविहिदं तुए, सिग्घं णेदव्वा सा पिअसही दाणिं तत्थ[7] । इत्युभे निष्क्रान्ते ।

ततः प्रविशति विद्रुमलतयानुगम्यमाना मदनवेदनां नाटयन्ती राधा ।

राधा । सनिःश्वासमात्मगतम् । अम्महे अदिदूसहा समुप्पण्णा हिअए मे वेअणा[8] । प्रकाशम् । हञ्जे विद्रुमलदे अज्ज वि ण संणिहिदाओ मम पिअसहीओ चंपअलदातमालिआओ, ता गदुअ अण्णेसेहि[9] ।

विद्रुमलता । तह[10] । इति निष्क्रान्ता ।

ततः प्रविशति तमालिका चम्पकलता च ।

तमालिका । राधामवलोक्य चम्पकलतां प्रति संस्कृतेन ।

नव्याम्भोधरमम्बरे सुविलसत्सौदामिनीसंगतं
सेर्ष्यं पश्यति बर्हिणां च विरुतिं श्रुत्वा सरोमोद्गमम् ।
कम्पं चम्पकदामकोमलरुचो स्वेदं च धत्ते तनौ
मन्ये मन्मथकोटिमोहनवपुः कृष्णोऽनया स्मर्यते ॥ ५९ ॥

चम्पकलता । साकूतं । संस्कृतेन ।

श्वासास्ते सखि सूचयन्त्यविरताः संतापबाधां परं
विद्मस्तत्र न कारणं वयमिति स्वान्तेऽतिचिन्ताभरः ।
किंवा घर्मनिपीडिता तव तनूवल्ली निकामं प्रिये
पुष्पादप्यतिकोमला मलिनतां याता मृणाली यथा ॥ ६० ॥

राधा । वैक्लव्यं रूपयति ।

तमालिका । सकरुणातिशयम् । हला राहे उम्मीलेहि लोअणाइं, कधं अणक्खरासि संजादा[1] ।

चम्पकलता । साकूतम् । हला राहिए एहि दे आदवपीड़ोवसमत्थं तं जेव्व लदावलअप्पदेसं गच्छम्ह[2] । इति बलादिव राधामादाय परिक्रामति ।

तमालिका । पुरोऽवलोक्य । सहि एसो कण्हस्स विहारत्थलो सो लदावलअप्पदेसो[3] ।

राधा । मूर्च्छां नाटयति ।

तमालिका । हद्धी, हद्धी, पवलवेअणं अणुभोदि एसा पिअसही[4] ।

चम्पकलता । राधां प्रति । सहि समस्सस समस्सस[5] ।

राधा । चेतनां नाटयति ।

तमालिका । सविषादम् । अइ लज्जालुए कहेहि अत्तणो हिअअवेअणाए णिदाणं, अहवा किं कहिदेण, कण्हस्स दंसणं जेव्व एत्थ णिदाणं[6] ।

राधा । किं तुम्हारिसीसु पिअसहीसु गोवइस्सं[7] । संस्कृतेन ।

किं स्वप्नः किमु जागरः किमथवा रात्रिः किमासीद्दिनं
मोहावस्थितया मया न किमपि ज्ञातं किमेतत् सखि ।
यन्नामश्रवणादनन्तरमिदं वृत्तं तमेव प्रियं
चेतो दुर्लभमप्यपास्तसकलव्यापारमाकाङ्क्षति ॥ ६१ ॥

अपिच ।

स्वप्नान्तरे प्रतिदिनं समुपेत्य धूर्तो
धत्ते मुखं मम मुखोपरि चाटुकारः ।

[1] ततस्ततः ।
[2] तदा कृष्णस्य विरहं स्फुटं जानन्त्या मयैवं प्रतिबोधिता देवी ।
[3] ततस्ततः ।
[4] शृणोतु प्रियसखी ।
[5] ततस्ततः ।
[6] तदा आज्ञप्तं देव्या, यथा जीवितसर्वस्वं वत्सा मे राधिका प्रकृतिमापद्यते तथा कुरु ।
[7] हे सखि सुविहितं त्वया, शीघ्रं नेतव्या सा प्रियसखीदानीं तत्र ।
[8] आश्चर्यमतिदुःसहा समुत्पन्ना हृदये मे वेदना ।
[9] हे विद्रुमलतेऽद्यापि न संनिहिते मम प्रियसख्यौ चम्पकलतातमालिके, तद्गत्वान्वेषय ।
[10] तथास्तु ।

[1] हे राधे उन्मीलय लोचने, कथमनक्षरासि संजाता ।
[2] हे राधे एहि ते आतपपीडोपशमार्थं तमेव लतावलयप्रदेशं गच्छामः ।
[3] सखि एष कृष्णस्य विहारस्थलं लतावलयप्रदेशः ।
[4] हा धिक्, हा धिक्, प्रबलवेदनामनुभवत्येषा प्रियसखी ।
[5] सखि समाश्वसिहि समाश्वसिहि ।
[6] अयि लज्जालुके कथयात्मनो हृदयवेदनाया निदानम्, अथवा किं कथितेन, कृष्णस्य दर्शनमेवात्र निदानम् ।
[7] किं त्वादृशीषु प्रियसखीषु गोपयिष्यामि ।

पादावलक्तकरसेन च रञ्जयित्वा
कर्णे शिरीषकुसुमं प्रसभं दधाति ॥ ६२ ॥

चम्पकलता । जनान्तिकम् । हला तमालिए कामं अणुभोदि मणोहववेअणं एसा, दाणिं क्खु उवेक्खणीआ ण भोदि, तुरिदं जेव्व कप्पणिज्जो कामलेहो[1] ।

तमालिका । जुत्तं मन्तेसि[2] ।

चम्पकलता । राधां प्रति । हला सहि सलाहणिज्जो दे अहिलासो, जेण तं लोआभिरामं वज्जिअ कुदो भवारिसीणं हिअअप्पउत्ती, ता मा विसीद, अहुणा णिउणं जाणिअ चिंतीअदि पडीआरो अम्हेहिं[3] । इत्युपविशन्ति ।

चम्पकलता । हला तमालिए एसो महाणीलमणी अदिरमणिज्जो तह वि संपदं इमं धारेदुं असमत्था एसा किसंगी, ता अत्तणो अंसुअअञ्चले रक्खिस्सं[4] ।

तमालिका । अणुमदं क्खु मे[5] ।

चम्पकलता । तथा करोति ।

तमालिका । सहि दाणिं लिहलिज्जो कामलेहो[6] ।

चम्पकलता । तथेति नाट्येन भूर्यपत्रमादाय राधाहस्ते समर्पयन्ती । सहि पिअदमसआसं अणुप्पेसिदुं किंपि सुउमारप्पओअं सअं विचिन्तिअ इह समालिह[7] ।

राधा । क्षणं चिन्तयित्वा सपुलकम् । संस्कृतमाश्रित्य धातुरसेन लिखति ।

यतः प्रभृति ते कान्तं मुखमालोकितं मया ।
कामः कामं ममाङ्गानि व्यथयत्यभितः शरैः ॥ ६३ ॥

सख्यौ । निर्वर्ण्य, सविस्मयम् । अहो से विअड्ढदा[8] ।

चम्पकलता । साश्चर्यम् । संस्कृतमालम्ब्य ।

क्रीडन्ती निजमन्दिरेषु निभृतं बाल्यात् सखीभिः समं
नित्यं कृत्रिमपुत्रिकादिषु रता भावानभिज्ञा हि या ।
पित्रा पुत्रवतापि वत्सलतयोत्सङ्गे परं लालिता
सख्यः पश्यत चातुरीषु सहसा सैषातिभूमिं गता ॥ ६४ ॥

तमालिका । सहि चंपअलदे, अवि जाणीअदि कण्हो कहिं दाणिं हुविस्सदि[1] ।

चम्पकलता । ण क्खु अवअच्छम्हि[2] ।

ततः । प्रविशति कृष्णः प्रियालापश्च ।

प्रियालापः । पिअवअस्स अदूरे कुमारीकण्ठद्धुणी सुणीअदि, अस्सिं अदिमुत्तलदामण्डवे चिट्ठ दाव[3] ।

कृष्णः । नाट्येन स्थित्वा, वंशीं ध्वनयति ।

सर्वाः समाकर्ण्य विस्मयं नाटयन्ति ।

राधा । सनिःश्वासमात्मगतम् । अम्महे वाढं उम्मादिदम्हि कामस्स मोहणमन्तरूवेण इमिणा केण वि रवेण[4] ।

चम्पकलता । साकूतम् । हला राहे अवि उप्पादेदि किंपि सुदिसुहं एस दे कण्हस्स वंसीरवो[5] ।

राधा । स्वगतम् । किं तस्स जेव्व हिअअचोरस्स इमो वंसीरवो[6] । निःश्वस्य । प्रकाशम् । संस्कृतेन ।

संयोगेऽमृतसंकाशो वियोगे विषसंनिभः ।
नादोऽयं सखि हेतुर्मे जीवनेऽजीवनेऽपि च ॥ ६५ ॥

सख्यौ । सास्रं समाश्वासयतः ।

चम्पकलता । हला तमालिए जह एदे मिअविसेसा पक्खिणो अ आहारादिअं उज्झिअ अमिआदो वि अदिमहुरं इमं वंसीधुणिं णिच्चलसवणपुडएण समापिअंतो माहवीमण्डवसंमुहे पुलोअअन्ति, तह कण्हो तत्थेति तक्केमि, दाणिं इमो कामलेहो तहिं णेदव्वो[7] ।

तमालिका । एव्वं करणिज्जं[8] ।

चम्पकलता । नाट्येन कृष्णान्तिके प्रक्षिपति ।

प्रियालापः । तं निर्वर्ण्य, किंचिदुपसृत्य, हस्तेन गृहीत्वा, भो वअस्स पेक्ख दाव, किं एदं[9] ।

कृष्णः । गृहीत्वा, विलोकयन्, सनिःश्वासम् । सखे नूनमयं

---

[1] हे तमालिके काममनुभवति मनोभववेदनामेषा, इदानीं खलूपेक्षणीया न भवति, त्वरितमेव कल्पनीयः कामलेखः ।

[2] युक्तं मन्त्रयसि ।

[3] हे सखि श्लाघनीयस्तेऽभिलाषः, येन तं लोकाभिरामं वर्जयित्वा कुतो भवादृशीनां हृदयप्रवृत्तिः, तन्मा विषीद, अधुना निपुणं ज्ञात्वा चिन्त्यते प्रतीकारोऽस्माभिः ।

[4] हे तमालिके एष महानीलमणिरतिरमणीयस्तथापि सांप्रतमिमं धारयितुमसमर्थैषा कृशाङ्गी, तदात्मनोंऽशुकाञ्चले रक्षिष्यामि ।

[5] अनुमतं खलु मे ।

[6] सखि इदानीं लेखनीयः कामलेखः ।

[7] सखि प्रियतमसकाशमनुप्रेषितुं किमपि सुकुमारप्रयोगं स्वयं विचिन्त्येह समालिख ।

[8] अहो अस्या विदग्धता ।

[1] सखि चम्पकलते, अपि ज्ञायते कृष्णः कुत्रेदानीं भविष्यति ।

[2] न खल्ववगच्छामि ।

[3] प्रियवयस्यादूरे कुमारीकण्ठध्वनिः श्रूयते, अस्मिन्नतिमुक्तलतामण्डपे तिष्ठ तावत् ।

[4] आश्चर्यं वाढमुन्मादितास्मि कामस्य मोहनमन्त्ररूपेणानेन केनापि रवेण ।

[5] हे राधे, अप्युत्पादयति किमपि श्रुतिसुखमेष ते कृष्णस्य वंशीरवः ।

[6] किं तस्यैव हृदयचौरस्यायं वंशीरवः ।

[7] हे तमालिके यथैते मृगविशेषाः पक्षिणश्चाहारादिकमुज्झित्वाऽमृततोऽप्यतिमधुरमिमं वंशीध्वनिं निश्चलश्रवणपुटकेन समापिबन्तो माधवीमण्डपसंमुखे विलोकयन्ति, तथा कृष्णस्तत्रेति तर्कयामि, इदानीमयं कामलेखस्तत्र नेतव्यः ।

[8] एवं करणीयम् ।

[9] भो वयस्य प्रेक्षस्व तावत्, किमेतत् ।

कामपीडितया कयाचित् प्रियया कस्मैचित् प्रियतमाय प्रेषितः कामलेखः ।

प्रियालापः । सविनयम् । णिवेदेदु पिअवअस्सो, किं एत्थ आलिहिदं[1] ।

कृष्णः । वाचयति । यथा,

"यतः प्रभृति ते कान्त मुखमालोकितं मया ।
कामः कामं ममाङ्गानि व्यथयत्यभितः शरैः" ॥ ६६ ॥

प्रियालापः । आत्मगतम् । आं बलिअं बाधिदा हदकन्दप्पेण राहा तवस्सिणी[2] । प्रकाशम् । पिअवअस्स सुमरेहि जं पुरा मए कधिदं आसि, जह मम्महो जेव्व दे वक्खवादी हुविस्सदि[3] ।

कृष्णः । सखे किं मत्प्रिययैव प्रेषितोऽयं कामलेखः ।

प्रियालापः । अध इं[4] ।

कृष्णः । सहर्षनिःश्वासम् ।

आनन्दं जनयत्यलं सुललितैस्तस्याः स्वहस्ताक्षरै-
र्यद्यप्येष मनोजलेख इह मे तत्संगमाकाङ्क्षिणः ।
कामेनाप्यय पीडितोऽहमधुना बध्नामि चित्ते धृतिं
तद्दुःखेन सखे तयापि सुतरां दुःखैकपात्रीकृतः ॥ ६७ ॥

तेन हि वंशीगीतेन क्षणं मनो विनोदयामि । तथा करोति ।

राधा । निशम्यात्मगतम् । किं पुणो वि वसीअरणमन्तो पढीअदि तेण[5] ।

इति मूर्च्छति ।

चम्पकलता । ससंभ्रममुत्थाय । हला तमालिए उववीजअ तमालवत्तेण पिअसहिं, णिधेहि से हिअए समुणालाइं सरसकमलिणीदलाइं, सिञ्चेहि पिअसहअरिं घणसारमिस्सेण मलअअरसेण, कअलिए विरचेहि सेणीअं पंकअपलासबहुलेहिं कअलीदलेहिं[6] ।

प्रियालापः । आकर्ण्य । भो किं एत्थ अरण्णरुइएण, वाडिआपरिसरे मुद्धाणं करुणालावो विसप्पदि[7] ।

कृष्णः । एहि तावद्विटपान्तरितौ भूत्वा शृणुवस्तावदासां विस्रम्भजल्पितानि, तथा करोति ।

राधा । लोचने उन्मील्य । किं त्ति इमं जणं अवराहिणं करिअ अत्ताणं आआसअंति सहीओ[1] ।

संस्कृतेन ।

कलयति मम चेतस्तल्पमङ्गारकल्पं
ज्वलयति मम गात्रं चन्दनं चन्द्रकश्च ।
तिरयति मम नेत्रे मोहजन्मान्धकारो
विकृतबहुविकारं मन्मथो मां दुनोति ॥ ६८ ॥

इति वैवश्यमुपगच्छति ।

कृष्णः । स्वगतम् ।

मनोजन्मा तवाङ्गानि दहत्यत्र न संशयः ।
मन्ये मम हृदिस्था त्वं तप्यसे जीवितेश्वरि ॥ ६९ ॥

चम्पकलता । सविषादमात्मगतम् । अम्मो णीसासाणुमेअजीविदा पड़िहादि एसा पिअसही,[2] इति समुत्पन्नकारुण्यया तमालिकां प्रति, हला तमालिए दुल्लहे तस्सिं गोउलेन्दकुमारे सुदूरं गदो इमाए अहिणिवेसो, को एत्थ दाणिं उवाओ, जेण से सरीरसंधारणं भोदि[3] ।

तमालिका । अवि णाम भवे सो वि अस्सिं सिणिद्धजणे साणुराअहिअओ[4] ।

चम्पकलता । मा दे संदेहो होदु, सो वि दंसणादो पहुदि मणोहववेअणं असहमाणो उज्झिदअण्णव्वावारो इमाए पिअसहीए पड़िछन्देण अत्ताणं विणोदेदि त्ति किं वदन्ती सुणीअदि[5] ।

कृष्णः । सत्यमीदृगवस्थोऽस्मि ।

तमालिका । सहर्षातिशयम् ।

जइ एव्वं, ता जीविदा वअं, सुप्पसण्णो मम्महो, उवकिदं पिअसहीए रूपलावण्णजोव्वणगुणेहिं, जाव तेण सह संगमो होदि, ताव इमाए पिअसहीए असुसंरक्खणात्थ तं वि आलिहिअ से दंसणपहं करेम्ह[6] ।

---

१ निवेदयतु प्रियवयस्यः, किमत्रालिखितम् ।

२ आं बलवद्बाधिता हतकन्दर्पेण राधा तपस्विनी ।

३ प्रियवयस्य स्मर यत् पुरा मया कथितमासीत्, यथा मन्मथ एव ते पक्षपाती भविष्यति ।

४ अथ किम् ।

५ किं पुनरपि वशीकरणमन्त्रः पठ्यते तेन ।

६ हे तमालिके उपवीजय तमालपत्रेण प्रियसखीं, निधेह्यस्या हृदये समृणालानि सरसकमलिनीदलानि, सिञ्च प्रियसहचरीं घनसारमिश्रेण मलयजरसेन, कदलिके विरचय शयनीयं पङ्कजपलाशबहुलैः कदलीदलैः ।

७ भो किमत्रारण्यरुदितेन, वाटिकापरिसरे मुग्धानां करुणालापो विसर्पति ।

१ लोचने उन्मील्य । किमितीमं जनमपराधिनं कृत्वा आत्मानमायासयन्ति सख्यः ।

२ आश्चर्यं निश्वासानुमेयजीविता प्रतिभात्येषा प्रियसखी ।

३ हे तमालिके दुर्लभे तस्मिन् गोकुलेन्द्रकुमारे सुदूरं गतोऽस्या अभिनिवेशः, कोऽत्रेदानीमुपायः, येनास्याः शरीरसंधारणं भवति ।

४ अपि नाम भवेत् सोऽप्यस्मिन् स्निग्धजने सानुरागहृदयः ।

५ मा ते संदेहो भवतु, सोऽपि दर्शनात् प्रभृति मनोभववेदनामसहमान उज्झितान्यव्यापारोऽस्याः प्रियसख्याः प्रतिच्छन्देनात्मानं विनोदयतीति किंवदन्ती श्रूयते ।

६ यद्येवम्, तज्जीविता वयम्, सुप्रसन्नो मन्मथः, उपकृतं प्रियसख्या रूपलावण्ययौवनगुणैः, यावत् तेन सह संगमो भवति, तावदस्याः प्रियसख्या असुसंरक्षणाय तमप्यालिख्यास्या दर्शनपथं कुर्मः ।

चम्पकलता । सोहणो क्खु उवाओ[१] ।

तमालिका । तथा लिखितवती ।

चम्पकलता । निरूप्य सानन्दम् । सहि सव्वधा आलेह-विचक्खणासि, दंसेहि दाव पिअसहीए एदं चित्तफलअं[२] ।

तमालिका । नाट्येन राधाभिमुखमुपनीय । हला सहि इमं मणोरहप्पिअदमं पेक्खमाणा विरहपज्जाउलं अत्तणो हिअअं विणोदेहि दाव[३] ।

राधा । चक्षुरुन्मील्य, सनिःश्वासम् । संस्कृतेन ।

मन्ये स दुर्लभजनो मम नेत्रवीथीं
जन्मान्तरे सुमुखि चित्रपटान्तरे वा ।
एष्यत्यनेकरमणीहृदि संप्रविष्टो
जातं निराशमथ तस्य कृते मनो मे ॥ ७० ॥

कृष्णः । समाकर्ण्य स्वगतम् ।

त्वदायत्तं शरीरं मे जीवितं च सुमध्यमे ।
मत्कृते मा कृथास्तन्वि संकल्पं मनसीदृशम् ॥ ७१ ॥

प्रियालापः । सप्रणयकोपम् । पिअवअस्स णिक्करुणोऽसि तुमं, जं अज्ज वि तुए विलंबीअदि[४] । इति समाकर्षति ।

कृष्णः । उपसृत्य स्थितः ।

सर्वाः । हर्षं नाटयन्ति ।

प्रियालापः । किं भोदीहिं पुणो वि चोरिदाइं कुसुमाइं[५] ।

चम्पकलता । सप्रणयकोपम् । कण्हमित्तस्स दे चोरत्तणं जेव्व रुच्चइ[६] ।

तमालिका । चम्पलतामपवार्य । हला चंपअलदे इमं मणिं पिआलावस्स वसणे केण वि छलेण णिवेसेहि[७] ।

चम्पकलता । तथा कृत्वा कृष्णमुपेत्य । वअस्स इमाए णो पिअसहीए हारमज्झदो णिपड़िदो महाणीलमणी, एत्थ लद्धो इमिणा तुअ वअस्सेण, दंसेहि से सव्ववसणाइं[८] ।

कृष्णः । विहस्य । सखे विश्रब्धं दर्शय ।

प्रियालापः । नाट्येन तथा करोति । भूमौ निपतितं मणिं विलोक्य सर्वे हासं रूपयन्ति ।

---

[१] शोभनः खलूपायः ।

[२] सखि सर्वथा आलेख्यविचक्षणासि, दर्शय तावत् प्रियसख्यै एतच्चित्रफलकम् ।

[३] सखि इमं मनोरथप्रियतमं प्रेक्षमाणा विरहपर्याकुलमात्मनो हृदयं विनोदय तावत् ।

[४] प्रियवयस्य निष्करुणोऽसि त्वम्, यदद्यापि त्वया विलम्ब्यते ।

[५] किं भवतीभिः पुनरपि चोरितानि कुसुमानि ।

[६] कृष्णमित्रस्य ते चोरत्वमेव रोचते ।

[७] हे चम्पकलते इमं मणिं प्रियालापस्य वसने केनापि छलेन निवेशय ।

[८] वयस्यास्या नः प्रियसख्या हारमध्यतो निपतितो महानीलमणिः, अत्र लब्धोऽनेन तव वयस्येन, दर्शयास्याः सर्ववसनानि ।

प्रियालापः । सविस्मयम्, वैलक्ष्यं नाटयति ।

तमालिका । वअस्स एस मणी सहिए चंपअलदाए परिहासेण पिआलावस्स वसणे णिउत्तो आसि[१] ।

प्रियालापः । सरोषम् । दासीए पुत्तिए चंपअलदे भोदु सुमिरिस्ससि अत्तणो किदं[२] ।

चम्पकलता । मणिं गृहीत्वा राधामुपसृत्य साकूतस्मितम् ।

यस्यार्थे त्वं मुकुलितमुखम्लानतामावहन्ती
त्यक्त्वा सर्वं विषयरसमुन्मूल्य लीलोपभोगम् ।
शून्याऽऽयाता सकलभुवने दुर्लभोऽनर्घ्यरूपः
सोऽयं प्रेयान् प्रियसखि सुखेनैव दिष्ट्यात्र लब्धः ॥ ७२ ॥

राधा । सेर्ष्यमेनां पश्यति ।

चम्पकलता ।

संभाव्यैनं निरुपममयो नीलरूपं सुजातं
शून्यं स्वीयं हृदयममुना भूषयन्ती सुखेन ।
क्रीडोत्साहं भजतु भवती मूकतां संत्यजन्ती
स्यादस्माकं तव सुखमिदं वीक्ष्य नेत्रोत्सवश्च ॥ ७३ ॥

इति मणिं दातुमिच्छति ।

राधा । हला सहि जाणेमि जं उद्दिसिअ मंतेसि[३] । इति मुखं परिवर्तयन्ती ससाध्वसं कृष्णमवलोक्य । गदसत्त हिअअ अज्ज वि ण दे पच्चओ[४] । संस्कृतेन ।

नित्यं मनोरथस्यापि सखि दुर्गम एव यः ।
अभवत् सांप्रतं कामं प्रत्यक्षेण विभाति सः ॥ ७४ ॥

अपिच ।

धैर्यमाधाय लज्जां च व्यपनीय विलासिनम् ।
संभावयसि किं नैनं दिष्ट्या स्वयमुपस्थितम् ॥ ७५ ॥

नीचैर्विलोक्य, भूयोऽपि लज्जते ।

कृष्णः । तद्गतचित्ततां रूपयन् मुरलीस्खलनं नाटयति ।

प्रियालापः । दृष्ट्वा ससंभ्रमम् । कधं पिअवअस्सस्स मुरली[५] । सुचिरं निर्वर्ण्य, सवितर्कमात्मगतम् । णूणं असेसभोणसुन्दरीणं पच्चादेसभूदाए इमाए तत्त भोदीए रूवविलासेहिं विमोहिदेण एदिणा अदिप्पिअदमा वि एसा अङ्कदो णिपड़िदा ण विण्णादा, भोदु एव्वं,[६] । इति चम्पकलतायाः पटाञ्चले गूढं

---

[१] वयस्य एष मणिः सख्या चम्पकलतया परिहासेन प्रियालापस्य वसने नियुक्त आसीत् ।

[२] दासीपुत्रिके चम्पकलते स्मरिष्यस्यात्मनः कृतम् ।

[३] हे सखि जानामि यमुद्दिश्य मन्त्रयसि ।

[४] गतसत्त्व हृदय अद्यापि न ते प्रत्ययः ।

[५] कथं प्रियवयस्यस्य मुरली ।

[६] नूनमशेषभुवनसुन्दरीणां प्रत्यादेशभूताया अस्यास्तत्र भवत्या रूपविलासैर्मोहितेनैतेनातिप्रियतमाप्येषाऽङ्कतो निपतिता न विज्ञाता, भवत्वेवम् ।

निबध्य । भो वअस्स कधं चिरेण अणक्खरो चिट्ठसि णं अत्तणो मुरलीणिणादेण मणोहारिणा इमाए तत्त भोदीए कण्णाइं किं ण सुहावेसि[१] ।

कृष्णः । कथमपहृता केनापि मे मुरली ।

प्रियालापः । एदाए चंपअलदाए हत्थे पुलोइदा मए[२] । इति दर्शयति ।

सर्वे । हासं रूपयन्ति ।

प्रियालापः । अपवार्य । दुव्विणीदे सुमिरेहि दाणिं अत्तणो किदं[३] ।

चम्पकलता । हला तमालिए दिट्ठं तुए से दुट्ठत्तणं, ता इदो गमिस्सं[४] ।

तमालिका । जुज्जइ[५] । उभे निष्क्रान्ते ।

प्रियालापः । आः दासीए पुत्तिए चंपअलदे कहं गमिस्ससि[६] । इति साटोपं निष्क्रान्तः ।

राधा । इतस्ततो विलोक्य । कहं गदो मे सहीअणो[७] ।

कृष्णः । अयि मुग्धे किमिह सखीजनेन, मामेवाज्ञापय ।

किं ते निसर्गरुचिरैा चरणैा कराभ्यां
संवाहयामि नयने च तवाञ्जनेन ।
किं रञ्जयामि किमु ते स्तनयोर्विचित्रां
पत्रावलीं विरचयाम्यचिरेण तन्वि ॥ ७६ ॥

राधा । लज्जते ।

कृष्णः । साकूतम् । अथवा नातिदूरवर्तिनि लताकुञ्जभवने प्रतिपालयता सखीजनेन स्वयमात्मना भवतीमाशु संयोजयामि । इति निष्क्रान्तैा ।

ततः प्रविशति तमालिका ।

तमालिका । स्वगतम् । कहिं हुविस्सदि मे पिअसही चंपअलदा[८] ।

ततः प्रविशति तमालिकामन्वेषयन्ती चम्पकलता ।

तमालिका । विलोक्य । हला सहि जाणेसि कहिं पिअसही राहिआ कण्हो अ[९] ।

[१] भो वयस्य कथं चिरेणानक्षरस्तिष्ठसि, नन्वात्मनो मुरलीनिनादेन मनोहारिणास्यास्तत्र भवत्याः कर्णैा किं न सुखयसि ।

[२] एतस्याश्चम्पकलताया हस्ते विलोकिता मया ।

[३] दुर्विनीते स्मरेदानीमात्मनः कृतम् ।

[४] हे तमालिके दृष्टं त्वयास्य दुष्टत्वम्, तदितो गमिष्यामि ।

[५] युज्यते ।

[६] आः दास्याः पुत्रिके चम्पकलते कथं गमिष्यसि ।

[७] कथं गतो मे सखीजनः ।

[८] कुत्र भविष्यति मे प्रियसखी चम्पकलता ।

[९] हे सखि जानासि कुत्र प्रियसखी राधिका कृष्णश्च ।

चम्पकलता । जाव सकवड़कोवं अहिद्दवंतेण पिआलावेण समं तुमं परिहासगुट्ठीए लग्गा, ताव पुरदो गदाए मए लदागहणन्तरिददेहाए कुञ्जभुअणमज्झम्हि कण्हो पुलोइदो राहिआ अ, ताणं पेम्मवुत्तन्तो वि सुणिदो[१] ।

तमालिका । सपादपतनम् । सहि कहेहि केरिसो से[२] ।

चम्पकलता । तदो राहिआए चइदं चइदं इदो तदो पुलोइदं[३] ।

तमालिका । तदो तदो[४] ।

चम्पकलता । तदो कण्हेण एव्वं अभिहिदा[५] । अयि मुग्धे अलं भीरुतया, नन्वनेककन्यकाजनस्य गान्धर्वविवाहो जात इति प्रसिद्धम् ।

तमालिका । तदो तदो[६] ।

चम्पकलता । तदो लज्जादिसअवसेण ओणदमुहीं राहिअं साणुणअं अणेअसुउमारउवआरेहिं कहं विअ अहिमुहीकरिअ महुरविरुदीहिं महुअरणिअरेहिं अहमहमिआए अणुबज्झमाणं सहत्थावचिदेहिं दिव्वकुसुमेहिं मालं णिम्मिअ ताए कण्ठम्हि णिहिदा, कवोलजुअले संजोअसुहाहिलासेण अहिणवजवंकुरणिअरो कण्णावदंसत्तणं णीदो, कहं कहं विअ त्थणजुअम्हि कत्थूरिआए विचित्तपत्तलदा आलिहिदा, तदो णवपल्लवेहिं कुसुमणिअरेहिं अत्तणो जेव्व सअणीअं उवकप्पिअ तस्सिं साणुणअं कहं कहं विअ पियसही उववेसिदा, ताए केसवासो अ सहत्थावचिदेहिं कुसुमेहिं गुम्फिअ भणिदं[७] ।

वेणीं ते प्रसमीक्ष्य चित्रकुसुमैरुद्भासितां बर्हिणो
लज्जन्ते निजबर्हवृन्दमधिकं भारं विदित्वा प्रिये ।
निर्याताः शनकैरिति स्वनिलयाद्दूरे निलीय स्थिताः
पश्यैतानपि लज्जयेव मधुपान् वल्लीर्विहायोद्गतान् ॥ ७७ ॥

तमालिका । हला सहि एव्वं अदिभूमिं गदो ताणं पेम्मा-

[१] यावत् सकपटकोपमभिद्रवता प्रियालापेन समं त्वं परिहासगोष्ठ्यां लग्ना, तावत् पुरो गतया मया लतागहनान्तरितदेहया कुञ्जभवनमध्ये कृष्णो विलोकितो राधिका च, तयोः प्रेमवृत्तान्तोऽपि श्रुतः ।

[२] सखि कथय कीदृशः सः ।

[३] तदा राधिकया चकितं चकितमितस्ततो विलोकितम् ।

[४] ततस्ततः ।

[५] ततः कृष्णेनैवमभिहिता ।

[६] ततस्ततः ।

[७] तदा लज्जातिशयवशेनावनतमुखीं राधिकां सानुनयमनेकसुकुमारोपचारैः कथमप्यभिमुखीकृत्य मधुरविरुतिभिर्मधुकरनिकरैरहमहमिकयानुबध्यमानां स्वहस्तावचितैर्दिव्यकुसुमैर्मालां निर्माय तस्याः कण्ठे निहिता, कपोलयुगले संयोगसुखाभिलाषेणाभिनवयवाङ्कुरनिकरः कर्णावतंसत्वं नीतः, कथं कथमिव स्तनयुगे कस्तूरिकया विचित्रपत्रलताऽऽलिखिता, ततो नवपल्लवैः कुसुमनिकरैरात्मनैव शयनीयमुपकल्प्य तस्मिन् सानुनयं कथं कथमिव प्रियसख्युपवेशिता, तस्याः केशपाशश्च स्वहस्तावचितैः कुसुमैर्गुम्फित्वा भणितम् ।

वेसो, कहिं दाणिं गोवणिज्जो भवे[1]।

चम्पकलता। अइ मुद्धे किं दाणिं वि दे संगोअणप्पआसेण[2]।

तमालिका। कधं[3]।

चम्पकलता। सुदं क्खु मए वणरक्खिआए मुहादो, जह भअवदी वुन्दा विसहाणुपुरे देईसआसं गदा आसि[4]।

तमालिका। तदो तदो[5]।

चम्पकलता। तदो देईए पणमिअ राहिआए संदावउवसमउपाअकिदे पुच्छिदा, तदो भअवदीए खणं लोअणाइं णिमीलिअ एदं रहस्सं संगोइदुं एव्वं अभिहिदं, महादेइ कदा वि कीलत्थं वणे गदा राहिआ किंपि पेक्खिअ संकिदा, ता णिच्चं जइ तस्सिं जेव्व वणे गदुअ विअदभअं खणं किलिस्सदि तदो क्खु पइदिं गमिस्सदि[6]।

तमालिका। तदो तदो[7]।

चम्पकलता। तदा देईए सबहुपाअप्पणामं एव्वं विण्णविदं, भअवदि एदिणा तुव अणुग्गहेण जीविदा अहं, दाणिं एव्वं करिस्सं[8]।

तमालिका। सहर्षातिशयम्। अहो पहावसंवलिदकोसलत्तणं भअवदीए[9]।

ततः प्रविशति सवनरक्षिका वृन्दा।

वृन्दा। अयि वनरक्षिके क्व पुनरत्र राधामुखेन्दुचन्द्रिकास्वादुनिपुणचकोरायतलोचनो भगवान् नन्दनन्दनो द्रष्टव्यः।

वनरक्षिका। णादिदूरे एदाअेा राहासहीअेा, ता पुच्छेम्हि[10]। उभे परिक्रामतः।

चम्पकलता। विलोक्य। हला तमालिए एसा भअवदी वुन्दा इध जेव्व आअच्छदि, ता एहि उवसप्पम्ह[11]। उभे उपसृत्य। भअवदि पणमामो[1]।

वृन्दा। सादरम्। पुत्रि चम्पकलते कथमत्र राधालंकृतं कृष्णं विहाय भवत्यैा।

चम्पकलता। सस्मितम्। संणिहिदो जेव्व सो[2]।

ततः प्रविशति राधा कृष्णश्च।

वृन्दा। उपसर्पति।

कृष्णः। विलोक्य। भगवति प्रणमामि।

वृन्दा। नागर एवमेव राधया सह रहः केलिभाजनं भूयाः।

कृष्णः। लज्जया नमितमुखस्तिष्ठति।

वृन्दा। सखि वनरक्षिके एहि, इदानीं कार्यान्तरमनुवर्तयावः। इति निष्क्रान्ते।

तमालिका। राधां निर्वर्ण्य, चम्पकलतां प्रत्यपवार्य। हला सहि तक्केमि, इमाए पिअसहीए कण्हेण सह गन्धव्वविआहो संवुत्तो[3]।

चम्पकलता। को एत्थ संसअेा तह वि पुच्छेमि। अपवार्य। हला राहे अत्थि मे तस्स सिविणस्स को वि फलविसेसो[4]।

राधा। लज्जते।

कृष्णः। स्वगतम्। कथं विलम्बते सखा मे प्रियालापः।

प्रविश्य प्रियालापः।

भो वअस्स मए अवचिदाइं सुउमारकुसुमाइं गेन्ह[5]। इत्यर्पयति।

कृष्णः। स्रजं निर्माति।

प्रियालापः। भो वअस्स गेन्ह एदं चित्तफलअं, अहं पुणो वि कुसुमाइं अवचिणिस्सं[6]।

कृष्णः। गृह्णाति।

राधा। विदूरादेवावलोक्यात्मगतम्। हन्त इत्थिआ का वि एत्थ आलिहिदा[7]।

इति मैानमालम्बते।

कृष्णः। निरीक्ष्य, सविषादमात्मगतम्।

सान्द्रस्नेहरसेन सार्द्रहृदया संक्रीडमानाधुना
सोद्वेगेव विलोक्यते वरतनुस्तत् किं न जानीमहे।

---

[1] हे सख्येवमतिभूमिं गतस्तयोः प्रेमावेशः, कुत्रेदानीं गोपनीयो भवेत्।

[2] अयि मुग्धे किमिदानीमपि ते संगोपनप्रयासेन।

[3] कथम्।

[4] श्रुतं खलु मया वनरक्षिकाया मुखात्, यथा भगवती वृन्दा वृषभानुपुरे देवीसकाशं गताऽऽसीत्।

[5] ततस्ततः।

[6] तदा देव्या प्रणम्य राधिकायाः संतापोपशमोपायकृते पृष्टा, तदा भगवत्या क्षणं लोचने निमील्यैतद्रहस्यं संगोपितुमेवमभिहितम्, महादेवि कदापि क्रीडार्थं वने गता राधिका किमपि प्रेक्ष्य शङ्किता, तन्नित्यं यदि तस्मिन्नेव वने गत्वा विगतभयं क्षणं क्रीडिष्यति तदा खलु प्रकृतिं गमिष्यति।

[7] ततस्ततः।

[8] तदा देव्या सबहुपादप्रणाममेवं विज्ञापितम्, भगवति एतेन तवानुग्रहेण जीविताऽहम्, इदानीमेवं करिष्ये।

[9] अहो प्रभावसंवलितकैाशलं भगवत्याः।

[10] नातिदूरे गता राधासख्यः, तत् पृच्छामि।

[11] हे तमालिके एषा भगवती वृन्दा इत एवागच्छति, तदेहुपसर्पामः।

[1] भगवति प्रणमामः।

[2] संनिहित एव सः।

[3] हे सखि तर्कयामि, अस्याः प्रियसख्याः कृष्णेन सह गान्धर्वविवाहः संवृत्तः।

[4] कोऽत्र संशयस्तथापि पृच्छामि। सखि राधे अस्ति मे तस्य स्वप्नस्य कोऽपि फलविशेषः।

[5] भो वयस्य मयावचितानि सुकुमारकुसुमानि गृहाण।

[6] भो वयस्य गृहाणैतच्चित्रफलकम्, अहं पुनरपि कुसुमान्यवचेष्ये।

[7] हन्त स्त्री काप्यत्रालिखिता।

वारं वारमिति स्वचेतसि मया नैपुण्यतश्चिन्तितं
न ज्ञातं स्खलितं तथापि किमहो संजातमापाततः ॥ ७८ ॥

प्रकाशम् । पादयोर्निपत्य । प्रिये न जाने किमपराद्धं मया-त्यजनेन वा,येन कुसुमकोमला त्वमीदृशीमवस्थां समापन्ना, तत् प्रसीद दयिते, विसृज मनसि निगूढमकाण्डकोपक्रमम् ।

राधा । तथैव नमितानना तिष्ठति ।

कृष्णः । सनिःश्वासम् । चम्पकलतामुखं पश्यति ।

चम्पकलता । हला राहे पच्चासीदइ दे हिअअदइदो, मुञ्चेहि कोवं, कहेहि माणस्स कारणं, एस दे वल्लहस्स पास्सवत्ती पिआलावो वि विण्णवेदि, जह मए अवचिदेहिं कुसुमेहिं पिअवअस्सेण विरइदा इअं माला, जइ अणुग्गहो ममोवरि ता खणं तत्त भोदीए कण्ठसोहं उप्पादेदु [1] ।

राधा । अपवार्य, सरोषम् । अइ सरले तुमं वि एव्वं भणासि,ण पुलोइदं तुए, जं इमिणा जेव्व पिआलावेण आणीदं तं तमालवत्तं, तत्थ आलिहिदा से पिअवअस्सस्स वल्लहा का वि सुन्दरी, ताए कण्ठसोहं उप्पादेदु सा कुसुममाला [2] ।

प्रियालापः । निशम्य, साट्टहासम् । भो वअस्स जिदं अम्हेहिं, सुदं दाणिं तत्त भोदीए माणस्स णिदाणं, तुरिदं जेव्व णिधेहि तं चित्तफलअं तत्त भोदीए अग्गे [3] ।

कृष्णः । सानन्दं तथा करोति ।

राधा । सवैलक्ष्यमात्मगतम् । अहो पमादो, अआरणे आआसिदो मूढाए मए एसो पिअदमो [4] ।

इति कृष्णं सप्रणयं पश्यति ।

कृष्णः । सानन्दं तस्याः कण्ठे मालामर्पयित्वा । प्रिये सर्वथा तवामुना रूपमाधुर्यसौहार्दगुणेन विधेयीकृतोऽस्मि, तदनुज्ञापय किं किं ते प्रियं समाचरामि ।

राधा । सवैलक्ष्यं चम्पकलतामुखं पश्यति ।

चम्पकलता । कृष्णं प्रति संस्कृतेन । नागर यदि प्रसन्नो भवांस्तर्हि किमतः परमस्ति । तथाप्येतदस्तु ।

सदा गच्छत्वेवं रतिरिव मनोजेन सुमुखी
सखी नः संयोगं प्रकृतिरमणीयेन भवता ।
भवत्वस्माकं चाव्यवहिततया लोचनसुखं
विलोक्यान्योन्यस्य व्यतिकरमतिश्लाघ्यमनघम् ॥ ७९ ॥

इति निष्क्रान्ताः सर्वे ॥

इति श्रीमथुरादासेन विरचितायां श्रीवृषभानुजानामनाटिकायां चतुर्थोऽङ्कः ॥ ४ ॥

---

## ॥ अथ वृषभानुजानामनाटिकोपसंहारः ॥

इयं सांप्रतं नाटिका सर्वलोके
प्रसिद्धिं परामाप्य भूयात् फलाढ्या ।
परेशं कृपासागरं तं प्रणम्य
सदैवेममेवार्थमभ्यर्थयेऽहम् ॥ १ ॥

इत्थं संप्रति मुद्रितेयमभवत् संशोधिता नाटिका
वीक्ष्यैनां मुदमाप्नुवन्तु सुधियः कृत्वा कृपामन्वहम् ।
कृष्णस्यात्र चरित्रमित्यवगमाद्, यद्वा प्रसादादिकान्
विज्ञायात्र गुणान् कथं कथमपि क्षाम्यन्तु मन्तुं मम ॥ २ ॥

सांख्यशास्त्रप्रधानाध्यापको वेचनरामशर्मा ।

---

THE

# VAIŚESHIKA APHORISMS

OF

# KAṆĀDA.

## FIRST BOOK, SECOND DAILY LESSON.

*(Continued from page 34.)*

Quality of Air. स्पर्शवान् वायुः ॥ ४ ॥

Aph. 4. Air is possessed of Feel. [1]

[1] We are here to understand a Feel that is neither temperate, nor hot, nor cold. A Feel of a different class belonging to the Air is understood. The possession of such a heterogeneous Feel is the characteristic of Air, and the heterogeneousness of the Feel of the Air is known by perception. V.

Ether. त आकाशे न विद्यन्ते ॥ ५ ॥

Aph. 5. Those [Qualities] do not exist in Ether.

---

[1] हे राधे प्रत्यासीदति ते हृदयदयितः, मुञ्च कोपम्, कथय मानस्य कारणम्, एष ते वल्लभस्य पार्श्ववर्ती प्रियालापोऽपि विज्ञापयति, यथा मयावचितैः कुसुमैः प्रियवयस्येन विरचितेयं माला, यद्यनुग्रहो ममोपरि तत् क्षणं तत्र भवत्याः कण्ठशोभामुत्पादयतु ।

[2] अयि सरले त्वमप्येवं भणसि, न विलोकितं त्वया,यदेतेनैव प्रियालापेनानीतं तत् तमालपत्रम्, तत्रालिखितास्य प्रियवयस्यस्य वल्लभा कापि सुन्दरी, तस्याः कण्ठशोभामुत्पादयतु सा कुसुममाला ।

[3] भो वयस्य जितमस्माभिः, श्रुतमिदानीं तत्र भवत्या मानस्य निदानम्, त्वरितमेव निधेहि तच्चित्रफलकं तत्र भवत्या अग्रे ।

[4] अहो प्रमादः, अकारणे आयासितो मूढया मयैष प्रियतमः ।

[1] अत्र स्पर्शो ऽपाकजो ऽनुष्णाशीतो ग्राह्यः तेन वायवीयो विजातीयस्पर्शो लभ्यते तथा च तादृशविजातीयस्पर्शत्वमेव वायुलक्षणं वैजात्यं तु वायुस्पर्शे प्रत्यक्षसिद्धमिति ॥

[1] Those [Qualities] Colour, Taste, Smell, and Feel do not exist in Ether. The appearance in Ether of whiteness like that of coagulated milk is an illusion caused by the whiteness of the rays of the sun. The appearance also of blueness in the sky is an illusion occasioned by the blueness of the sapphire peak situated on the south side of mount Meru. Some maintain that this appearance is occasioned by the blueness of the pupil of the eye, from the eye's falling upon its own pupil after travelling to a distance and returning. This is not the case, for those whose eyes are tawny have the same perception. V.

सर्पिर्जतुमधूच्छिष्टानामग्निसंयोगाद्द्रवत्व-
मद्भिः सामान्यम् ॥ ६ ॥

Aph. 6. The Fluidity, through Conjunction with fire, of clarified butter, lac, and wax, is common to them and Water.

[2] The Fluidity which belongs to clarified butter &c., is due to a special cause, the Conjunction of them with fire, and is not natural. Such [i. e. natural] Fluidity is the characteristic of Water. Only Fluidity is common to Earth and Water, not natural Fluidity. Hence there is not too much asserted. U.

[3] The Fluidity of clarified butter &c., which is due to a special cause, is like the natural Fluidity existing in Water, because the class constituted by the notion of Fluidity exists in both, but there is in clarified butter &c., no possession of natural Fluidity. The word 'fluid' in the aphorism on Water (II. 1. 2.) has the special meaning of natural Fluidity. Accordingly there is no discrepancy. V.

त्रपुसीसलोहरजतसुवर्णानामग्निसंयोगाद्द्र-
ववत्त्वमद्भिः सामान्यम् ॥ ७ ॥

Aph. 7. The Fluidity, through Conjunction with fire, of tin, lead, iron, silver, and gold is common to them and Water.

[1] By the use of the plural number of the word 'gold' (*súvarṇa*), white copper, copper, brass, quicksilver &c., are implied. The explanation of this aphorism is to be understood as similar to that of the former. V.

विषाणी ककुद्मान् प्रान्तेबालधिः सास्ना-
वान् इति गोत्वे दृष्टं लिङ्गम् ॥ ८ ॥

Aph. 8. That she has horns, a hump, a tail hairy at the extremity, and a dewlap is the received mark of being a cow,

[2] As in the case of the idea of a cow the marks of possessing horns &c, are generally received or universally assumed means of proof, so with respect to Air the marks of Feel &c., are also means of proof. This is the recondite meaning of this and the following aphorism. In the former of these aphorisms in the mention of the cow's having horns the verb 'to be' is implied. Accordingly a particular kind of horn, not common to the buffalo, is understood, and this is a mark of being a cow, as also is the possession of a hump. That it has a tail hairy at the extremity,'—according to the derivation 'the hair is situated at the extremity in this,' a peculiarity of the body constituted by the tail is asserted. That is a particular cow with a tail hairy at the extremity whose tail is hairy and particularly so at the extremity. With respect to the tail of the sheep &c., there is not hairiness at the extremity, for the whole tail is hairy. As there is nothing remarkable on account of pendulousness &c., in the tail of the buffalo &c., a peculiarity in the tail is a mark of being a cow. The dewlap is a particular formation in the neck, the possession of which is a mark of being a cow. By the word '*iti*' is pointed out the distinctive attribute of being an object commonly known by the possession of horns &c. The practical application is, This is a cow because it possesses of horns, a hump, a particular kind of tail, or a dewlap, as was the case with particular cows formerly observed. V.

---

[1] ते रूपरसगन्धस्पर्शाः आकाशे न सन्तीत्यर्थः। दधिधवलिमाकाश-मिति प्रतीतिस्तु सूरकरधवलिमोपाधिको भ्रान्तिरेव नीलं नभ इति प्रतीतिरपि सुमेरोर्दक्षिणदिगवस्थितस्येन्द्रनीलमयशिखरस्य नीलिमविषयिणी भ्रान्तिरेव केचित्तु सुदूरगतस्य परावर्तमानस्य चक्षुषः स्वगोलकस्थकनीनिकापतनात् तद्गतनीलरूपविषयिणी तादृशप्रतीतिरित्याहुस्तन्न पिङ्गलसारनयनानामपि तथोपलम्भादिति सङ्क्षेपः ॥

[2] सर्पिरादीनां यद्द्रवत्वमस्ति तदग्निसंयोगान्निमित्तात् नतु सांसिद्धिकं तादृशञ्चापां लक्षणं द्रवत्वमात्रन्तु पृथिव्या अद्भिः सामान्यं न तु सांसिद्धिकं द्रवत्वमपीति नातिव्याप्तिरित्यर्थः ॥

[3] घृतादीनां यन्नैमित्तिकं द्रवत्वं तज्जलगतसांसिद्धिकद्रवत्वतुल्यं द्रवत्वजातेरुभयत्र सत्वात् सांसिद्धिकद्रवत्वं तु घृतादिषु नास्ति जलसूत्रोक्तद्रवपदं सांसिद्धिकद्रवत्वविशिष्टपरमिति नासङ्गतिरिति भावः ॥

[1] सुवर्णानामिति बहुवचनेन कांस्यताम्रपित्तलपारदादीनामप्युपग्रहः। व्याख्यानञ्चास्य सूत्रस्य पूर्ववदेव बोध्यम् ॥

[2] यथा गोत्वे विषाणित्वादीनि लिङ्गानि सामान्यतो दृष्टानि लोकसिद्धानि प्रमाणानि तथा अतीन्द्रिये वायौ स्पर्शादीनि लिङ्गान्यपि प्रमाणानीति सूत्रद्वयनिगूढार्थः। तत्र प्रथमसूत्रे विषाणीति प्रशंसायामस्त्यर्थः प्रत्ययः तेन च महिषादिव्यावृत्तो विषाणविशेषो लभ्यते स च गोत्वे लिङ्गम् एवं ककुद्वत्तापि। प्रान्तेबालधिरिति अन्ते बाला आधीयन्ते ऽस्मिन्निति व्युत्पत्त्या पुच्छरूपाङ्गविशेष उच्यते प्रकृष्टो ऽन्ते बालधिर्यस्य स प्रान्तेबालधिर्गोपिण्डः मेषादिपुच्छे तु सामस्त्येन बालमयत्वान्नान्तेबालधित्वं महिषादिपुच्छे प्रलम्बत्वादिरूपप्रकर्षाभावात् पुच्छविशेषो गोत्वे लिङ्गम् सास्ना गलकम्बलं तद्वत्ता गोत्वे लिङ्गम् विषाणीत्यादिव्यवहारविषयतावच्छेदकम् इति शब्देन परामृश्यते तत्रायं प्रयोगः अयं गौर्विषाणविशेषवत्त्वात् ककुद्वत्वात् पुच्छविशेषवत्त्वात् सास्नावत्त्वाद्वा पूर्वानुभूतगोपिण्डवदिति ॥

[1] As with respect to the notion of a cow, the horns &c, are properties [marks] recognised as predicable of the whole class [known to pervade it], so also the properties [marks] of Air and the other five supersensual Substances recognised generally come to be a means of proof. U.

[2] The Substances transcending sense are Air, Ether, Time, Space, Soul, and the Internal Organ. They are known by means of that kind of inference (called *sámányato dṛishṭam*) which is drawn from relations other than those of cause and effect. This is also the doctrine of the Sánkhya School. Cp. Sánkhya-káriká, 6. Acquaintance with things transcending the sense is obtained by inference drawn generally or from generic properties.

Existence of Air proved. स्पर्शश्च वायोः ॥ ९ ॥

Aph. 9. Also Touch is [a mark] of Air.

[3] Having stated the validity of [this form of] inference which effects the requirements of common life, he proves by it the existence of Air. [The word] 'mark is to be supplied. The particle 'and' implies also Sound, wafting, and agitating. The sense [of the aphorism] is therefore that [the existence of the] Air is inferred from a heterogeneous Touch, from the rustling of leaves &c., from the wafting aloft of grass, cotton, &c., and from the agitation of branches &c. V.

Its properties invisible. न च दृष्टानां स्पर्श इत्यदृष्टलिङ्गो वायुः ॥ १० ॥

Aph. 10. And it is not the Touch which belongs to visible things, therefore Air has an invisible mark.

[4] This Touch which is made the ground of the inference does not belong to Earth, Water, and Light which are visible, for it is unaccompanied with Colour. Accordingly since it must be inferred that this Touch has some substratum, it has an invisible mark or a mark that is observed generally, and is ascertained [to exist] from the force of the properties of the ground of the inference. U.

---

[1] यथा गोत्वं प्रति विषाणादीनि लिङ्गानि गृहीतव्याप्तिकानि तथा ऽतीन्द्रियवाय्वादिद्रव्यपञ्चकलिङ्गान्यपि सामान्यतो दृष्टानि प्रमाणभावमासादयन्तीति भावः ॥

[2] सामान्यदृष्टादतीन्द्रियाणां प्रतीतिरनुमानात् ॥

[3] एवं लोकयात्रानिर्वाहकस्यानुमानस्य प्रामाण्यमुक्त्वा ऽनुमानेन वायुं साधयति । लिङ्गमित्यनुषज्यते चकारः शब्दधृतिकम्पान् समुच्चिनोति तथा च विजातीयस्पर्शेन पर्णादिशब्देन नभसि तृणतूलादीनां धृत्या शाखादीनां कम्पेन च वायुरनुमीयते इति भावः ॥

[4] अयं स्पर्शो यः पक्षः क्रियते स दृष्टानां पृथिव्यप्तेजसां न भवति रूपासहचरत्वात् तथा चायं स्पर्शः क्वचिदाश्रित इत्यनुमेयमित्यदृष्टलिङ्गः सामान्यतो दृष्टलिङ्गो ऽपि वायुः पक्षधर्मताबलादायात इत्यर्थः ॥

[1] That Touch from which, as being its Substratum, Air is inferred [to exist], does not belong to visible things, viz., Earth, Water, and Light. For this reason Air has an invisible mark. It has a mark, which is not visible, by reason of being a substratum. The complete sense is that Air has for its mark Touch which does not exist in visible things. V.

Air a Substance. अद्रव्यवत्त्वेन द्रव्यम् ॥ ११ ॥

Aph. 11. It is a Substance because of its not inhering in any Substance.

[2] That of which a Substance is the substratum is said to inhere in that Substance, that of which a Substance is not the substratum does not inhere in a Substance. The sense is that [Air] is not inherent in any Substance. Accordingly the Substance Air has like Ether, an atomic characteristic. For all other Categories inhere in Substance, and inherence belongs to all except the eternal Substances, for according to this explanation, since a combination of two atoms is originated by primary atoms, the material cause of the origin of a large complex whole is a succession of combinations of two or more atoms. U.

Continued. क्रियावत्त्वाद्गुणवत्त्वाच्च ॥ १२ ॥

Aph. 12. Also [Air is a Substance] from its possessing Actions and Qualities.

[3] The words 'the aerial atom is a Substance' are to be supplied. It must be admitted that there exist in the primary atom the possession of Qualities such as Conjunction originative of combinations of two atoms &c., and the possession of action in conformity with those [Qualities.] This is not a doubtful and undemonstrated assertion, but the means of establishing the existence of primary atoms are a mote in a sunbeam and the like, which [mote] is composed of parts because it is a Substance that may be seen with the eye, like a water pot. The portions of a mote are like a potsherd, since they are small portions composed also themselves of parts. Therefore as in

---

[1] येन स्पर्शेन वायुरधिकरणतया ऽनुमीयते स स्पर्शो न दृष्टानां पृथिव्यप्तेजसाम् इति हेतोः वायुरदृष्टलिङ्गः नास्ति दृष्टमधिकरणतया यस्य तादृशं लिङ्गं यस्य स दृष्टावृत्तिस्पर्शलिङ्गको वायुरिति फलितार्थः ॥

[2] द्रव्यमाश्रयभूतमस्यास्तीति द्रव्यवत् न द्रव्यवत् अद्रव्यवत् द्रव्यानाश्रितमित्यर्थः तथा चाकाशवत् परमाणुलक्षणो वायुर्द्रव्यम् अन्येषां पदार्थानां द्रव्याश्रितत्वात् आश्रितत्वञ्चान्यत्र नित्यद्रव्येभ्य इत्यभिधानात् परमाणुभ्यां द्व्यणुकारम्भात् द्व्यणुकादिप्रक्रमेणावयविनो महत आरम्भस्योपादनीयत्वादिति ॥

[3] वायवीयपरमाणुद्रव्यमिति शेषः । द्व्यणुकारम्भकसंयोगादिरूपगुणवत्त्वं तदनुकूलक्रियावत्त्वञ्च परमाणाववश्यमङ्गीकार्यमिति न सन्दिग्धासिद्धो हेतुः परमाणुसिद्धिप्रकारस्तु त्रसरेणुः सावयवश्चाक्षुषद्रव्यत्वाद् घटवत् त्रसरेणोरवयवाः सावयवामहदवयवत्वात् कपालवदित्यादिः एवञ्च पृथिव्यादो यथा परमाणुस्तथा वायुस्थले ऽपि निराबाध एव अवयवावयविपरम्परायास्तुल्यत्वादिति ॥

Earth &c., there is a primary atom, so it must be allowed equally in the case of the Air, since there are in each case similar series of portions and combinations of portions. V.

Air an eternal Substance. अद्रव्यत्त्वेन नित्यत्वमुक्तम् ॥ १३ ॥

Aph. 13. [Air.] is said to be eternal because it does not inhere in any Substance.

[2] 'Air in its primary atomic character' is to be supplied. A Substance is destroyed by the destruction of either its inherent or its non-inherent cause. A primary atom, not being composed of parts has neither such cause. Therefore, there being nothing to destroy it, it is not liable to destruction. The being composed of parts is a condition of which the cause is the possession of Actions and Qualities. U.

[3] 'Of the primary aerial atom' is to be supplied. That which has no Substance as its cause of inhesion is said to differ in that respect from that which has a Substance as the cause of inhesion. V.

वायोर्वायुसम्मूर्च्छनं नानात्वलिङ्गम् ॥ १४ ॥

Aph. 14. The concurrence of Air with Air is a mark of its diversity.

[4] Concurrence of wind with wind, or conflict of winds is a kind of Conjunction. This Conjunction is the meeting two winds of equal velocity, but coming in different directions and different in their Action [or motion.] It is inferred from the flying upwards of grass, cotton &c. For the upward motion and concurrence of two winds is invisible. But it is inferred that the visible Action characterised by the flying upward of visible grass &c., is produced by either a blow or impulse of Substance possessing feel and velocity. The upward motion of the two winds the character of which is to move horizontally being impossible unless they repel each other, proves a mutual repulse. U.

*(To be Continued.)*

[2] परमाणुलक्षणवायोरिति शेषः द्रव्यं हि समवायिकारणासमवायिकारणान्यतरनाशान्नश्यति परमाणोस्तु निरवयवतया नैतदुभयमस्ति तथा च विनाशकाभावान्न विनश्यति क्रियावत्त्वे गुणवत्त्वे च हेतौ सावयवत्वमुपाधिः ॥

[3] वायुपरमाणोरिति शेषः नास्ति द्रव्यं समवायिकारणतया यस्य तद्द्रव्यं द्रव्यसमवायिकारणकभिन्नं तत्त्वेनेत्यर्थः ॥

[4] वायुसम्मूर्च्छनमिति वाय्वोर्वायूनां वा सम्मूर्च्छनं संयोगविशेषः । स च समानवेगयोर्विरुद्धदिक्क्रिययोः सन्निपातः । स च तृणतूलकादेरूर्ध्वगमनेनानुमीयते वाय्वोरूर्ध्वगमनस्य सन्निपातस्य चातीन्द्रियत्वात् तृणादीनान्तु प्रत्यक्षाणामूर्ध्वगमनलक्षणायाः क्रियायाः प्रत्यक्षायाः स्पर्शवद्वेगवद्द्रव्याभिघातनोदनान्यतरजन्यत्वमनुमीयते तथा हि तिर्यग्गमनस्वभावस्य वायोरूर्ध्वगमनं परस्परप्रतीघातमन्तरेणानुपपद्यमानं परस्परप्रतीघातं साधयति ॥

## INDIAN MORALITY.

A question upon which a nation's history greatly depends is whether its morality be separable or inseparable from its religion. The belief in the inseparable connection of morality with religion acts injuriously upon legislation. Action and thought are needlessly cramped. The legal enforcement of religious duties as such is futile, the compulsory performance of them being fruitless. The same may be said of the enforcement of such moral duties as are not essential to the well being of society. It is well known how law in its earliest stage confuses sanatory, social, and religious duties. Such is the law of the ancient Indian codes. Are we then to infer that the distinction between morals and religion was unknown among the early Hindus? The answer may be furnished from the Mánava-dharma-śástra. That code—probably some five and twenty centuries ago—taught that the religious sanction of moral duties is purely self-regarding.

कामात्मता न प्रशस्ता न चैवेहास्त्यकामता ।
काम्यो हि वेदाधिगमः कर्मयोगश्च वैदिकः ॥
सङ्कल्पमूलः कामो वै यज्ञाः सङ्कल्पसम्भवाः ।
व्रता नियमधर्माश्च सर्वे सङ्कल्पजाः स्मृताः ॥ Manu II. 3. 4.

The same code teaches that there are four authorities in religious and ethical questions. Three are religious—revelation, tradition, and the example of the good,—but a fourth sanction is added, the approval of one's own soul.

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥ II. 6.
वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम् ॥ II. 12.

The former of these two ślokas has been happily illustrated by Deslongchamps a with quotation from the Śakuntalá (Act I).

सतां हि सन्देहपदेषु वस्तुषु ।
प्रमाणमन्तःकरणप्रवृत्तयः ॥

We may also compare with it Mánava-dharma-śástra. VIII, 84, 86.

आत्मैव ह्यात्मनः साक्षी गतिरात्मा तथात्मनः ।
मावमंस्थाः स्वमात्मानं नृणां साक्षिणमुत्तमम् ॥
मन्यन्ते वै पापकृतो न कश्चित् पश्यतीति नः ।
तांस्तु देवाः प्रपश्यन्ति स्वस्यैवान्तरपूरुषः ॥

This doctrine does not imply us any particular metaphysical views, like the ἠθικὴ αἴσθησις suggested by Aristotle, and the ordinary modern conception of the conscience. The approval of the soul and its testimony may be the result of education and experience. The Bhagavad-gítá perhaps implies this:

उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥ VI. 5.

An excellent morality (of which the grounds seem uncertain) is expressed in many passages of Sanskrit literature, as, for instance, in the celebrated speech of Yudhishṭhira.

धर्मं चरामि सुश्रोणि न धर्मफलकारणात् ।
आगमाननतिक्रम्य सतां वृत्तमवेक्ष्य च ॥ Mahábhárata Vana-p. 1167.

That you should do to others as you would that others should do to you is a precept well known to the Hindus.

प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा ।
आत्मौपम्येन भूतेषु दयां कुर्वन्ति साधवः ॥
प्रत्याख्याने च दाने च सुखदुःखे प्रियाप्रिये ।
आत्मौपम्येन पुरुषः प्रमाणमधिगच्छति ॥ Hitop. 166.

In so late a work as the Bhágavata-puráṇa the question is raised how God incarnate could do the unrighteous acts attributed to Kṛishṇa.

संस्थापनाय धर्मस्य प्रशमायेतरस्य च ।
अवतीर्णो हि भगवानंशेन जगदीश्वरः ॥
स कथं धर्मसेतूनां वक्ता कर्ताऽभिरक्षिता ।
प्रतीपमाचरद्ब्रह्मन् परदाराभिमर्शनम् ॥ X. 33, 27.

Here morality and religion are brought into contrast. There seems no reason why the Áryans of India should not have come to feel like their brethren of Europe, that religion and morality were independent of each other. Had they done so their history might have been widely different from what it is. But the spirit of inquiry seems to have failed at a certain point of the nation's progress. How the ancient Hindu yearned after the truth may be learnt from the Brahman's morning prayer the Sávitrí; how free his spirit of inquiry from the Vedic hymns and later from the tolerated divergence of the Darśanas. Let us hope that this spirit may revive, and that there may yet be developed from national resources an Indian literature worthy of the Indian mind.

A. E. G.

# RÁMÁYANA, BOOK I.

## X.

*(Continued from page 42.)*

On through the crowded streets he came,
And, radiant as the kindled flame,
He saw within the monarch's house
The hermit's son most glorious.
There Lomapád, with joyful breast,
  To him all honour paid,
For friendship for his royal guest
  His faithful bosom swayed.
Thus entertained with utmost care
Seven days, or eight, he tarried there,
And then that best of men thus broke
His purpose to the king, and spoke:
'O King of men, my ancient friend,'
  ('Twas thus the monarch prayed')
Thy Śántá with her husband send
  My sacrifice to aid.'
Said he who ruled the Angas, Yea;
  And his consent was won:
And then at once he turned away
  To warn the hermit's son.
He told him of their ties beyond
Their old affection's faithful bond:
'This king,' he said, 'from days of old
A well beloved friend I hold.
To me this pearl of dames he gave
From childless woe mine age to save,
The daughter whom he loved so much,
Moved by compassion's gentle touch.
In him thy Śántá's father see:
As I am even so is he.
For sons the childless monarch yearns:
To thee alone for help he turns.
Go thou, the sacred rite ordain
To win the sons he prays to gain:
Go, with thy wife thy succour lend,
And let his vows have blissful end.'
The hermit's son with quick accord
Obeyed the Angas' mighty lord,
And with fair Śántá at his side
To Daśaratha's city hied.
Each king, with suppliant hands upheld,
  Gazed on the other's face:
And then by mutual love impelled
  Met in a close embrace.
Then Daśaratha's thoughtful care,
  Before he parted thence,
Bade trusty servants homeward bear
  The glad intelligence.

'Let all the town be bright and gay,
With burning incense sweet;
Let banners wave, and water lay
The dust in every street.'
Glad were the citizens to learn
The tidings of their lord's return,
And through the city every man
Obediently his task began.
And fair and bright Ayodhyá showed,
As following his guest he rode
Through the full streets where shell and drum
Proclaimed aloud the king was come.
And all the people with delight
Kept gazing on their king,
Attended by that youth so bright,
The glorious Rishyaśring.
When to his home the king had brought
The hermit's saintly son,
He deemed that all his task was wrought,
And all he prayed for won.
And lords who saw that stranger dame
So beautiful to view,
Rejoiced within their hearts, and came
And paid her honour too.
There Rishyaśring passed blissful days,
Graced like the king with love and praise,
And shone in glorious light with her,
Sweet Śántá, for his minister,
As Brahmá's son Vaśistha, he
Who wedded Saint Arundhatí.

XI.

The Dewy Season came and went;
The spring returned again:
Then would the king, with mind intent,
His sacrifice ordain.
He came to Rishyaśring, and bowed
To him of look divine,
And bade him aid his offering vowed
For heirs, to save his line.
Nor would the youth his aid deny:
He spake the monarch fair,
And prayed him for that rite so high
All requisites prepare.
The king to wise Sumantra cried
Who stood aye ready near:
'Go summon quick each holy guide,
To counsel and to hear.'
Obedient to his lord's behest
Away Sumantra sped,
And brought Vaśishṭha and the rest,
In Scripture deeply read.
Suyajna, Vámadeva came,
Jáváli, Kaśyap's son,
And old Vaśishṭha, dear to fame,
Obedient every one.
King Daśaratha met them there
And duly honoured each,
And spoke in pleasant words his fair
And salutary speech:
'In childless longing doomed to pine,
No happiness, O lords, is mine.
So have I for this cause decreed
To slay the sacrificial steed.
Fain would I pay that offering high
Wherein the horse is doomed to die,
With Rishyaśring his aid to lend,
And with your glory to befriend.'
With loud applause each holy man
Received his speech, approved the plan,
And, by the wise Vaśishṭha led,
Gave praises to the king, and said:
'The sons thou cravest shall thou see,
Of fairest glory, born to thee,
Whose pious mind has bid thee take
This righteous course for offspring's sake.'
Cheered by the ready praise of those
Whose aid he sought, his spirits rose,
And thus the king his speech renewed
With looks of joy and gratitude:
'Let what the coming rites require
Be ready as the priests desire.
And let the horse, ordained to bleed,
With fitting guard and priest, be freed.
Yonder on Sarju's northern side
The sacrificial ground provide;
And let the saving rites, that naught
Ill-omened may occur, be wrought.
The offering I announce to-day
Each lord of earth may claim to pay,
Provided that his care can guard
The holy rite by flaws unmarred.
For wandering fiends, whose watchful spite
Waits eagerly to spoil each rite,
Hunting with keenest eye detect
The slightest slip, the least neglect;
And when the sacred work is crossed,
The workman is that moment lost.
Let preparation due be made—
Your powers the charge can meet—
That so the noble rite be paid
In every point complete.'
And all the Bráhmans answered, Yea,
His mandate honouring,

And gladly promised to obey
The order of the king.
They cried with voices raised aloud:
'Success attend thine aim!'
Then bade farewell, and lowly bowed,
And hastened whence they came.
King Daśaratha went within,
His well loved wives to see:
And said: 'Your lustral rites begin,
For these shall prosper me
In the great offering I prepare
That precious fruit of sons may bear.'
Their lily faces brightened fast
Those pleasant words to hear,
As lilies, when the winter's past,
In lovelier hues appear.

### XII.

Again the spring with genial heat
Returning made the year complete.
To win him sons, without delay
His vow the king resolved to pay:
And to Vaśishṭha, saintly man,
In modest words this speech began:
'Prepare the rite with all things fit
As is ordained in Holy Writ,
And keep with utmost care afar
Whate'er its sacred forms might mar.
Thou art, my lord, my trustiest guide,
Kind-hearted, and my friend beside;
So is it meet thou undertake
This heavy task for duty's sake'.

Then he, of Twice-born men the best,
His glad assent at once expressed:
'Fain will I do whate'er may be
Desired, O my king, by thee'.

To ancient priests he spoke, who, trained
In holy rites, deep skill had gained:
'Here guards be stationed, good and sage,
Religious men of trusted age.
And various workmen send and call,
Who frame the door and build the wall:
With men of every art and trade,
Who read the stars and ply the spade.
And mimes and minstrels hither bring,
And damsels trained to dance and sing.'

Then to the learned men he said,
In many a page of scripture read:
'Your care be to the rites addressed
According to the king's behest,
And stranger Brahmans quickly call
To this great rite that welcomes all.
Pavilions for the princes, decked
With art and ornament, erect,
And handsome booths by thousands made
The Brahman visitors to shade,
Arranged in order side by side,
With meat and drink and all supplied.
And ample stables we shall need
For many an elephant and steed:
And chambers where the men may lie,
And vast apartments, broad and high,
Fit to receive the learned bands
Of doctors come from distant lands.
For our own people too provide
Sufficient tents, extended wide,
And stores of meat and drink prepare,
And all that can be needed there.
And food in plenty must be found
For quests from all the country round.
Of various viands presents make,
For honour, not for pity's sake,
That fit regard and worship be
Paid to each caste in due degree.
And let not wish or rage excite
Your hearts the meanest guest to slight;
But still observe with special grace
Those who obtain the foremost place,
Whether for happier skill in art
Or bearing in the rite their part.
Do you, I pray, with friendly mind
Perform the task to you assigned,
And work the rite, as bids the law,
Without omission, slip, or flaw.'

They answered: 'As thou seest fit
So will we do and nought omit.'
The sage Vaśishṭha then addressed
Sumantra called at his behest:
'The princes of the earth invite,
And those whose hearts are set on right,
Priest, Warrior, Merchant, lowly thrall,
In countless thousands summon all.
Where'er their home be, far or near,
Gather the good with honour here.
And Janak, whose imperial sway
The men of Mithilá obey,
The firm of vow, the dread of foes,
Who all the lore of Scripture knows,
Invite him here with honour high,
King Daśaratha's old ally.
And Káśí's lord of gentle speech,
Who finds a pleasant word for each,

In length of days our monarch's peer,
Illustrious king, invite him here.
The father of our ruler's bride,
Known for his virtues far and wide,
The king whom Kekaya's realms obey,
Him with his son invite, I pray.
And Lomapád, the Angas' king,
True to his vows and godlike, bring.
Far be thine invitations sent
To west and south and orient.
Call those who rule Suráshṭra's land,
Suvíra's realm and Sindhu's strand.
And all the kings of earth beside
In friendship's bonds with us allied:
Invite them all to hasten in
With retinue and kith and kin.'
Vaśishṭha's speech without delay
Sumantra bent him to obey,
And sent his trusty envoys forth
Eastward and westward, south and north.
Obedient to the saint's request
Himself he hurried forth, and pressed
Each nobler chief and lord and king
To hasten to the gathering.
Before the saint Vaśishṭha stood
All those who wrought with stone and wood,
And showed the work which every one
In furtherance of the rite had done.
Rejoiced their ready zeal to see,
Thus to the craftsmen all said he:
'I charge ye, masters, see to this
That there be nothing done amiss.
And this, I pray, in mind be borne,
That not one gift ye give in scorn:
Whenever scorn a gift attends
Great sin is his who thus offends.'
And now some days and nights had past,
And kings began to gather fast,
And precious gems in liberal store
As gifts to Dásaratha bore.

Then joy thrilled through Vaśishṭha's breast
As thus the monarch he addressed:
'Obedient to thy high decree
The kings, my lord, are come to thee.
And it has been my care to greet
And honour all with reverence meet.
Thy servants' task is ended quite,
And all is ready for the rite.
Come forth then to the sacred ground
Where all in order will be found.'
Then Rishyaśring confirmed the tale:
Nor did their words to move him fail.
The stars propitious influence lent
When forth the world's great ruler went.
Then by the sage Vaśishṭha led
The priest began to speed
Those glorious rites wherein is shed
The life-blood of the steed.

XIII.

The circling year had filled its course,
And back was brought the wandering horse:
Then upon Sarju's northern strand
Began the rite the king had planned.
With Rishyaśring the rites to guide,
The Brahmans to their task applied
At that great offering of the steed
Their lofty-minded king decreed.
The priests, who all the Scripture knew,
Performed their part in order due,
And circled round in solemn train
As precepts of the law ordain.
Pravargya rites were duly sped
For Upsads the flames were fed. (1)
Then from the plant the juice was squeezed,
And those high saints with minds well pleased
Performed the mystic rites begun
With bathing ere the rise of sun.
They gave the share that's Indra's claim,
And hymned the king whom none can blame.
The mid-day bathing followed next,
Observed as bids the holy text.
Then the good priests with utmost care,
In form that Scripture's rules declare,
For the third time pure water shed
On high-souled Daśaratha's head.
Then Rishyaśring and all the rest
To Indra and the Gods addressed
Their sweet-toned hymn of praise and prayer,
And called them in the rite to share.
With sweetest song and hymn entoned
They gave the Gods in heaven enthroned,
As duty bids, the gifts they claim,
The holy oil that feeds the flame.
And many an offering there was paid,
And not one slip in all was made.
For with most careful heed they saw
That all was done by Veda law.
None, all those days, was seen oppressed
By hunger or by toil distressed.

(1) For an account of these ceremonies see Haug's *Aitareya Bráhmaṇam*, Vol. II. pp. 40—53.

Why speak of human kind? No beast
Was there that lacked an ample feast.
For there was store for all who came,
For orphan child and lonely dame;
The old and young were well supplied,
The poor and hungry satisfied.
There all the day ascetics fed,
And those who roam to beg their bread:
While all around the cry was still,
'Give forth, give forth,' and 'Eat your fill.'
'Give forth with liberal hand the meal,
And various robes in largess deal.'
Urged by these cries on every side
Unweariedly their task they plied:
And heaps of food like hills in size
In boundless plenty met the eyes:
And lakes of sauce each day renewed
Refreshed the weary multitude.
And strangers there from distant lands,
And women folk in crowded bands,
The best of food and drink obtained
At the great rite the king ordained.
Apart from all, the Brahmans there,
Thousands on thousands, took their share
Of various dainties sweet to taste,
On plates of gold and silver placed,
All ready set, as now and then
Came to the feast the Twice-born men,
And servants in fair garments dressed
Waited upon each Brahman guest.
Of cheerful mind and mien were they,
With gold and jewelled earrings gay.
The best of Brahmans praised the fare
Of countless sorts, of flavour rare:
And thus to Raghu's son they cried:
'We bless thee, and are satisfied.'
Between the rites some Brahmans spent
The time in learned argument,
With ready flow of speech, sedate,
And keen to vanquish in debate.

There day by day the holy train
Performed all rites as rules ordain.
No priest in all that host was found
But kept the vows that held him bound:
None, but the holy Vedas knew,
And all their sixfold science too.
No Brahman there was found unfit
To speak with eloquence and wit.

And now the appointed time came near
The sacrificial posts to rear.
They brought them, and prepared to fix
Of Bel and Khadir six and six.
Six, made of the Palásá tree,
Of Fig-wood one, apart to be:
Of Sleshmát and of Devadár
One column each, the mightiest far:
So thick the two, the arms of man
Their ample girth would fail to span.
All these with utmost care were wrought
By hand of priests in Scripture taught,
And all with gold were gilded bright
To add new splendour to the rite:
Twenty-and-one those stakes in all.
Each one-and-twenty cubits tall:
And one-and-twenty ribbons there
Hung on the pillars, bright and fair.
Firm in the earth they stood at last,
Where cunning craftsmen fixed them fast;
And there unshaken each remained,
Octagonal and smoothly planed.
Then ribbons over all were hung,
And flowers and scent around them flung.
Thus decked they cast a glory forth
Like the great saints who star the north.
The sacrificial altar then
Was raised by skilful twice-born men,
In shape and figure to behold
An eagle with his wings of gold,
With twice nine pits and formed three-fold.
Each for some special God, beside
The pillars were the victims tied;
The birds that roam the wood, the air,
The water, and the land were there,
And snakes and things of reptile birth,
And healing herbs that spring from earth:
As texts prescribe, in Scripture found,
Three hundred victims there were bound.
The steed devoted to the host
Of Gods, the gem they honour most,
Was duly sprinkled. Then the Queen
Kauśalyá, with delighted mien,
With reverent steps around him paced,
And with sweet wreaths the victim graced;
Then with three swords in order due
She smote the steed with joy, and slew.
That night the Queen, a son to gain,
With calm and steady heart was fain
By the dead charger's side to stay
From evening till the break of day.
Then came three priests, their care to lead
The other queens to touch the steed,

Upon Kauśalyá to attend,
Their company and aid to lend.
As by the horse she still reclined,
With happy mien and cheerful mind,
With Rishyásring the twice born came
And praised and blessed the royal dame.
The priest who well his duty knew,
And well his senses could subdue,
From chambers of the bone then freed
And boiled the marrow of the steed.
Above the steam the monarch bent,
And, as he smelt the fragrant scent,
In time and order drove afar
All sin that might his purpose mar.
Then sixteen priests together came
And cast into the sacred flame
The severed members of the horse,
Made ready all in ordered course.
On piles of holy fig-tree raised
The meaner victims' bodies blazed:
The steed of all the creatures slain
Alone required a pile of cane.
Three days, as is by law decreed,
Lasted that offering of the steed.
The Chatushṭom began the rite,
And when the sun renewed his light,
The Ukthya followed: third and last
The night in singing hymns that passed.
These were the rites, and many more,
Arranged by light of holy lore,
The Aptoryám of mighty power,
And, each performed in proper hour,
The Abhijit and Viśvajit
With ceremonies that befit;
And in the sacrifice at night
The Jotishṭom and Áyus rite.

The task was done, as laws prescribe:
The Monarch, glory of his tribe,
Bestowed the land in liberal grants,
Upon the sacred ministrants.
He gave the region of the east,
His conquest, to the Hotar priest.
The west, the celebrant obtained:
The south, the priest presiding gained:
The northern region was the share
Of him who chanted forth each prayer.
Thus did each priest obtain his meed
At the great slaughter of the steed,
Ordained, the best of all to be,
By self-existent Deity.
Ikshváku's son with joyful mind
This noble fee to each assigned,
But all the priests with one accord
Addressed that unpolluted lord:
''Tis thine alone to keep the whole
Of this broad earth in firm control.
No gift of lands from thee we seek:
To guard these realms our hands were weak.
On sacred lore our days are spent:
Let other gifts our wants content.'
The chief of old Ikshváku's line
Gave them ten hundred thousand kine,
A hundred millions of fine gold,
The same in silver four times told.
But every priest in presence there
With one accord resigned his share.
To Saint Vaśishṭha, high of soul,
And Rishyaśring they gave the whole.
That largess pleased those Brahmans well,
Who bade the king his wishes tell.
Then Daśaratha, mighty king,
Made answer thus to Rishyaśring:
'O holy hermit, of thy grace,
Vouchsafe the increase of my race.'
He spoke; nor was his prayer denied:
The best of Brahmans thus replied:
'Four sons, O Monarch, shall be thine,
Upholders of thy royal line.'
The saint, well read in holy lore,
Pondered awhile his answer o'er,
And thus again addressed the king,
His wandering thoughts regathering:
'Another rite will I begin
Which shall the sons thou cravest win,
Where all things shall be duly sped
And first Atharva texts be read.'

Then by Vibhánḍak's gentle son
Was that high sacrifice begun,
The king's advantage seeking still
And zealous to perform his will.
Now all the Gods had gathered there,
Each one for his allotted share:
Brahmá, the ruler of the sky,
Śiva, and Vishṇu, lord most high,
And holy Indra men might view
With Maruts for his retinue;
The heavenly chorister, and saint,
And spirit pure from earthly taint,
With one accord had sought the place
The high-souled monarch's rite to grace.
Then to the gathered Gods he spake,
Who came their proper share to take:

For you has Daśaratha slain
The votive steed, a son to gain ;
Stern penance-rites the king has tried,
And in firm faith on you relied,
And now with undiminished care
A second rite would fain prepare.
But, O ye Gods, consent to grant
The longing of your supplicant.
For him beseeching hands I lift,
And pray you all to grant the gift,
That four fair sons of high renown
The offerings of the king may crown.'
They to the hermit's son replied :
'His longing shall be gratified.
For, Brahman, in most high degree
We love the king and honour thee.'

These words the Gods in answer said,
And vanished thence by Indra led.

Thus to the Lord, the worlds who made,
The Immortals there assembled prayed :
'O Brahmá, mighty by thy grace,
Rávaṇ, who rules the Giant race,
Torments us in his senseless pride,
And penance-loving saints beside.
For thou well pleased in days of old
Gavest the boon that makes him bold,
That God nor demon e'er should kill
His charmed life, for so thy will.
We, honouring that high behest,
Bear all his rage though sore distrest.
That Lord of Giants fierce and fell
Scourges the earth and heaven and hell.
Mad with thy boon, his impious rage
Smites Saint and Bard and God and Sage.
The sun himself withholds his glow,
The wind in fear forbears to blow ;
The fire restrains his wonted heat
Where stand the dreaded Rávaṇ's feet,
And, necklaced with the wandering wave,
The sea before him fears to rave.
Kuvera's self in sad defeat
Is driven from his blissful seat.
We see, we feel the Giant's might,
And woe comes o'er us and affright.
To thee, O Lord, thy suppliants pray
To find some cure this plague to stay.'

Thus by the gathered Gods addressed
He pondered in his secret breast,
And said : 'One only way I find
To slay this fiend of evil mind.
He prayed me once his life to guard
From fiend and God and heavenly bard,
And spirits of the earth and air,
And I consenting heard his prayer.
But the proud Giant in his scorn
Recked not of man of woman born.
None else may take his life away,
But only man the fiend may slay.'

Glad were the Gods, by Indra led,
At the kind words that Brahmá said.
Then, crowned with glory like a flame,
Lord Vishṇu to the Council came ;
His hands shell, mace, and discus bore,
And saffron were the robes he wore.
Riding his eagle through the crowd,
As the sun rides upon a cloud,
With bracelets of fine gold, he came
Loud welcomed by the Gods' acclaim.
His praise they sang with one consent,
And cried, in lowly reverence bent :
'O Lord whose hand fierce Madhu slew,
Be thou our refuge, firm and true ;
Friend of the suffering worlds art thou,
We pray thee help thy suppliants now.'
Then Vishṇu spake : 'Ye Gods, declare,
What may I do to grant your prayer?'

'King Daśaratha,' thus cried they,
'Fervent in penance many a day,
The sacrificial steed has slain,
Longing for sons, but all in vain.
Now, at the cry of us forlorn,
Incarnate as his seed be born.
Three queens has he : each lovely dame
Like Beauty, Modesty, or Fame.
Divide thyself in four, and be
His offspring by these noble three.
Man's nature take, and slay in fight
Rávaṇ who laughs at heavenly might :
This common scourge, this rankling thorn
Whom the three worlds too long have borne.
For Rávaṇ in the senseless pride
Of might unequalled has defied
The host of heaven, and plagues with woe
Angel and Bard and Saint below,
Crushing each spirit and each maid
That plays in Nandan's heavenly shade.
O conquering Lord to thee we bow ;
Our surest hope and trust art thou.

Regard the world of men below,
And slay the Gods' tremendous foe.'
When thus the suppliant Gods had prayed,
His wise reply Náráyaṇ made:
'What task demands my presence there,
And whence this dread, ye Gods declare.'

The Gods replied: 'We fear, O Lord,
Fierce Rávaṇ, ravener abhorred.
Be thine the task, O God, we pray,
In human form this fiend to slay.
By thee of all the Gods alone
May this great sin be overthrown.
He gained by penance long and dire
The favour of the mighty Sire.
Then he, who every gift bestows,
Guarded the fiend from heavenly foes,
And gave a pledge his life that kept
From all things living, man except.
On him thus armed no other foe
Than man may deal the deadly blow.
Assume, O King, a mortal birth,
And strike the demon to the earth.'

Then Vishṇu, God of Gods, the Lord
Supreme by all the worlds adored,
To Brahmá and the suppliants spake:
'Dismiss your fear: for your dear sake
In battle will I smite him dead,
The cruel fiend, the Immortals' dread.
And lords and ministers and all
His kith and kin with him shall fall.
Then, in the world of mortal men,
Ten thousand years and hundreds ten
I as a human king will reign,
And guard the earth as my domain.'

God, saint, and nymph, and ministrel throng
With heavenly voices raised their song
In hymns of triumph to the God
Whose conquering feet on Madhu trod:
'Champion of Gods, as man appear,
This cruel Rávaṇ slay,
The thorn that saints and hermits fear,
The plague that none can stay.
In savage fury uncontrolled
His pride for ever grows:
He dares the Lord of Gods to hold
Among his deadly foes.'

XV.

When prudent Vishṇu thus had given
His promise to the Gods of heaven,
He pondered in his secret mind
A suited place of birth to find.
Then he decreed, the lotus-eyed,
In four his being to divide,
And Daśaratha, gracious king,
He chose as sire from whom to spring.
That childless prince, of high renown,
Who smote in war his foemen down,
At that same time with utmost care
Performed the rite that wins an heir.
Then Vishṇu, fain on earth to dwell,
Bade the Almighty Sire farewell,
And vanished while a reverent crowd
Of Gods and Saints in worship bowed.
The monarch watched the sacred rite,
When a vast form of awful might,
Of matchless splendour, strength and size
Was manifest before his eyes.
From forth the sacrificial flame,
Dark, robed in red, the being came.
His voice was drumlike, loud and low,
His face suffused with rosy glow.
Like a huge lion's mane appeared
The long locks of his hair and beard.
He shone with many a lucky sign,
And many an ornament divine.
A towering mountain in his height,
A tiger in his gait and might.
No lordly mine more rich could be,
No burning flame more bright than he.
His arms embraced in loving hold,
Like a dear wife, a vase of gold
Whose silver lining held a draught
Of nectar as in heaven is quaffed:
A vase so vast, so bright to view,
They scarce could count the vision true.
Upon the king his eyes he bent,
And said: 'The Lord of life has sent
His servant down, O Prince, to be
A messenger from heaven to thee.'
The king with all his nobles by
Raised reverent hands and made reply:
'Welcome, O glorious being! Say
How can my care thy grace repay.'
Envoy of Him whom all adore
Thus to the king he spake once more:
'The Gods accept thy worship: they
Give thee, O king, the fruit to-day.

*(To be continued.)*

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

# काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

# THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 40. Benares September 1, 1869. Vol. IV.


## ॥ उपदेशसहस्र्याः पद्यप्रबन्धः ॥

इदानीं पूर्वप्रकरणे युक्त्या व्यवस्थापितमात्मनो निर्विषयज्ञानस्वभावत्वं स्वानुभवाभिनयेन प्रकटयन्नविषयत्वेनैवात्मज्ञानं भवतीति द्रढयितुं प्रकरणान्तरमारभते ।

(१) दृशिस्वरूपं गगनोपमं परं
सकृद्विभातं त्वजमेकमक्षरम् ।
अलेपकं सर्वगतं यदद्वयं
तदेव चाहं सततं विमुक्त ओम् ॥ ७३ ॥

दृशिस्वरूपमिति । सकृद्विभातमेकदैव विस्फुरितं सदैव स्पष्टं भासमानमिति यावद्, यदेवंविधमक्षरं ब्रह्म तदेवाहं सततं भवामि अतो विमुक्तः ओमित्यभ्यनुज्ञार्थ ओंकारः, उक्तस्वरूपमोंकारद्वारा मुमुक्षुबुद्ध्यभिव्यक्तं भवतीति सूचयितुमोंकारनिर्देशः ॥ १ ॥

ननु नाकाशवदलेपकत्वं दृशेः संगच्छते, दृश्यसंबन्धादशुद्धिविक्रियादिदोषसंभवादित्याशङ्क्य, दृशेरात्मस्वरूपत्वात्तस्य च नित्यशुद्धत्वादेः श्रुत्यैव निर्द्धारणान्नैवमित्यभिप्रेत्य श्रुतिसिद्धमर्थं प्रकटयति ।

(२) दृशिस्तु शुद्धो ऽहमविक्रियात्मको
न मे ऽस्ति कश्चिद्विषयः स्वभावतः ।
पुरस्तिरश्चोर्ध्वमधश्च सर्वतः
संपूर्णभूमा त्वज आत्मनि स्थितः ॥ ७४ ॥

दृशिस्तु शुद्ध इति । अहं तु दृशिः ज्ञानस्वरूप इत्यन्वयः, अतः परमार्थः शुद्धो ऽशुद्ध्यादेरज्ञाननिबन्धनत्वात्तस्य चाभासत्वादिति भावः । "शुद्धमपापविद्ध"मिति मन्त्रवर्णात्, यतश्चाविक्रियात्मको विक्रियात्मकात्प्राणादन्यो "ऽप्राणो ह्यमनाः शुभ्रो ह्यस्थूलमनण्व ह्रस्वमदीर्घ"मित्यादिश्रुतेरतोपि शुद्ध इत्यर्थः । "न तदश्नाति किं चन न तदश्नाति कश्चने"ति श्रुतेर्नात्मनो विषयसंसर्ग इत्याह । न मेस्तीति । स्वभावतः परमार्थतः, अनेन विक्रियाहेतुविशेषाभावादप्यविक्रिय इत्युक्तं भवति । विषयाभावेनाद्वयात्मनो भूमावाक्यशेषमर्थतः पठति । पुरस्तिरश्चेति । "सभगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नि यदि वा न महिम्नी"ति स्वरूपावस्थानमनन्याधीनमुपन्यस्य तदुपपादनायेदंकारास्पदं सर्वं पूर्वादिविभागेनाधरोत्तरादिविभेदेन चोपलभ्यमानं भूमैवेति प्रतिपाद्याहंकारास्पदस्य देहादिबुद्धिपर्यन्तस्य तर्हि भूम्नो भेद इति शङ्कायामहंबुद्धिग्राह्यमपि भूमैवेति मध्ये निर्दिश्येदमनिदमात्मकस्य सर्वस्य भूम्नो ऽन्यत्वाभावे भेदकाभावात्प्रत्यगात्मैव भूमेत्यात्मैवेदं सर्वमित्यन्तेन संपूर्णभूमा छान्दोग्ये दर्शित इत्यर्थः । अतोहमाविर्भावंवर्जितो यत आत्मनि स्वे महिम्नि स्थितो नान्याधीन इत्यर्थः ॥ २ ॥

आत्मनो जन्मजरादिविक्रियाभावेन कूटस्थाद्वयस्वाभाव्यप्रतिपादनपराः श्रुतीः स्वरूपतोर्थतश्च पठति ।

(३) अजोमरश्चैव तथाजरोमृतः
स्वयंप्रभः सर्वगतोहमद्वयः ।
न कारणं कार्यमतीव निर्मलः
सदैकतृप्तश्च ततो विमुक्त ओम् ॥ ७५ ॥

अजोऽमर इति । तथा च श्रुतयः "अजो नित्यः शाश्वतोऽयं पुराणो""स वा एष महानज आत्मा ऽजरो ऽमरो ऽमृतो ऽभयो ब्रह्मे"ति "अत्रायं पुरुषः स्वयंज्योतिः तच्छुभ्रं ज्योतिषां ज्योतिर्नित्यं विभुं सर्वगतं सूक्ष्मम्""एको देव""एकमेवाद्वितीय"मिति। "तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्य"मित्यादिश्रुत्यर्थमाह । न कारणं कार्यमिति । निर्मलो निरञ्जनो "निरञ्जनः परमं साम्यमुपैतो"ति श्रुतेः, एकतृप्तः एकेन निजानन्देनैव तृप्त इत्यर्थः ।

"आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चन"

"आनन्दरूपममृतं यद्विभाति" इत्यादिश्रुतेः । "विमुक्तश्च विमुच्यत"इति श्रुतिमाश्रित्याह । ततो विमुक्त इति । यत एवंलक्षणस्ततो विमुक्त एव, सदेतिपदं सर्वत्रानुषञ्जनीयम् । यदाचार्येणोक्तं मम स्वरूपं तत्तथैवेति शिष्येणानुमन्यते ओमिति पदेनेत्यर्थः ॥ ३ ॥

ननु स्थानत्रये ऽन्यथान्यथा प्रथमानस्य कथमविक्रियात्मकत्वमित्यत आह ।

(४) सुषुप्तजाग्रत्स्वपतश्च दर्शनं
न मे ऽस्ति किं चित्स्वमिवेह मोहनम् ।
स्वतश्च तेषां परतोप्यसत्त्वत-
स्तुरीय एवास्मि सदा दृगद्वयः ॥ १६ ॥

सुषुप्तेति । सुषुप्तश्चासौ जाग्रच्च स चासौ स्वपंश्च सुषुप्तजाग्रत्स्वपन् तस्य सुषुप्तजाग्रत्स्वपतो मे मम स्वमिवात्मीयमिवेह व्यवहारे किं चिद्दर्शनं नास्ति, स्वमिवस्वरूपभूतमिवेति वा, किं तु मोहनमविवेकाविद्याध्यारोपितं जाग्रदादिदर्शनमिति योजना । तत्र हेतुमाह । स्वतश्चेति । तेषां जाग्रत्स्वप्नसुषुप्तिदर्शनानां जाग्रदाद्यवस्थारूपाणां वा स्वतश्च परतो प्यसत्त्वतो ऽसत्त्वादित्यन्वययोजना, नहि तेषां स्वतो ऽन्यनिरपेक्षं सत्त्वं संभाव्यते, चकारात् स्फुरणं च, आगमापायित्वेन रज्जुसर्पवदारोपितत्वनिश्चयात्, तथा परतोपि, न सत्त्वं स्फुरणं च संभाव्यते, परं चैतन्यं स्यान्नहि तेनात्मना सत्त्वादिकमेषां संभवति, प्रत्यक्पराग्भावेन विरुद्धस्वभावयोस्तादात्म्यानुपपत्तेस्तत्कल्पनायाश्च भ्रान्तिमात्रत्वादित्यर्थः । प्राज्ञस्तैजसोविश्वरेत्येते तत्तदवस्थावत्त्वेन भासमाना न मम स्वरूपमिति भावः । तर्हि किंस्वरूप आत्मेति तदाह । तुरीय एवास्मीति । विश्वादित्रयापेक्षया परतो गम्यमानत्वाच्चतुर्थ इत्यर्थः । तस्य लक्षणं सदा दृगिति । सर्वावस्थाद्रष्टेत्यर्थः । विश्वादीनां स्वस्वावस्थामात्रद्रष्टृत्वादयं ततो व्यतिरिक्तः, स्थूलसूक्ष्मक्रमेण विविच्यान्वेषणदशायां विश्वादिस्थानत्रयापोहेनावसीयमानत्वात्तुरीय इत्युच्यते, न पुनर्वस्तुतस्तुरीयत्वमस्तीति द्योतयत्यद्वय इति । निर्विशेष एव सदाहमस्मीत्यर्थः ॥ ४ ॥

कथमात्मनो निर्विशेषत्वं शरीरादिसंबन्धस्य प्रत्यक्षत्वादित्यत आह ।

(५) शरीरबुद्धीन्द्रियदुःखसंतते-
र्न मे न चाहं मम निर्विकारतः ।
असत्त्वहेतोश्च तथैव संतते-
रसत्त्वमस्याः स्वपतो हि दृश्यवत् ॥ १७ ॥

शरीरेति । शरीरादिसंततेर्न मदात्मत्वं मदीयत्वं वा परमार्थतोऽस्तीत्यर्थः । तत्र हेतुर्मम निर्विकारत इति । नह्यविक्रियं वस्त्वागमापायि शरीराद्यात्मना परिणमते संसृज्यते वा येन तत्स्वरूपता तद्धर्मता वा भवेदित्यर्थः । हेत्वन्तरमाहासत्त्वहेतोश्च तथैव संततेरिति, कुतो ऽसत्त्वमित्यत आहासत्त्वमस्या इति । स्वपतः स्वप्नावस्थायां यथा दृश्यं मिथ्या तथा ऽस्याः संततेः दृश्यत्वादेवासत्त्वमित्यर्थः । हिशब्दः स्वप्नदृश्यस्य मिथ्यात्वप्रसिद्धिद्योतनार्थः ॥ ५ ॥

शरीरादिसंततेर्दृश्यत्वेन चेन्मिथ्यात्वं तर्हि शुद्धत्वाविक्रियत्वादेरपि दृश्यत्वान्मिथ्यात्वं किं न स्यादित्यत आह ।

(६) इदं तु सत्यं मम नास्ति विक्रिया
विकारहेतुर्नहि मे ऽद्वयत्वतः ।
न पुण्यपापे न च मोक्षबन्धने
न चास्ति वर्णाश्रमता ऽशरीरतः ॥ १८ ॥

इदं त्विति । मम विक्रिया नास्ति, न मे विकारहेतुरप्यस्ति, ततः पूर्वनिरूपितादद्वयाद् द्वयाभावाद्धेतोः स्वतः परतो वा ममात्मनो विक्रिया नास्तीति यदिदं तत्सत्यमित्यर्थः । तुशब्दः शङ्काव्यावृत्त्यर्थः । अविक्रियत्वादिना विक्रियाभावाद्युपलक्षितस्वरूपस्याभिप्रेतत्वात्तस्मिंश्च हेत्वसिद्धेर्न शङ्कावकाश इत्यर्थः । कर्म वा तत्फलं वा तद्ध्वंसो वा कर्मादिसाधनं वा विक्रियादिहेतुर्भविष्यतीति कुतो ऽद्वयत्वमित्याशङ्क्याह । न पुण्येति । पुण्यादि नेति प्रतिज्ञायां हेतुरशरीरत इति । अशरीरत्वं तु पूर्वश्लोके प्रतिपादितमेवेत्यर्थः ॥ ६ ॥

ननु यद्यपि शरीरोपादानत्वेन तद्धर्मकत्वेन चात्मनः शरीरवत्त्वाभावस्तथापि शरीरेणास्ति संबन्ध उपलब्ध्रुपलभ्यभावलक्षण इति कथमशरीरतेत्याशङ्क्य नैतावता शरीरत्वेन कर्मादियोगितेत्यभिप्रेत्य पुण्यापुण्यादिसंबन्धवैधुर्यमुक्तमुपपादयति ।

(७) अनादितो निर्गुणतो न कर्म मे
फलं च तस्मात्परमोऽहमद्वयः ।
यथा नभः सर्वगतं न लिप्यते
तथा ह्यहं देहगतोऽपि सूक्ष्मतः ॥ ७६ ॥

अनादित इति । यत्कर्मसमवायि तदादिमद् दृष्टं, यथा रथशरीरादि, न च परमाणुमनसोरनैकान्तो, मनस उत्पत्तिश्रवणात्परपरिकल्पितपरमाणवनङ्गीकाराच्च, तथा यत्कर्मसमवायि तत्सगुणं दृष्टं, यथोक्तमेवोदाहरणं, तथा च सगुणत्वं सादित्वं च व्यापकप्रत्यगात्मनो व्यावर्त्तमानं तस्य क्रियावत्त्वं स्वव्याप्यमादाय निवर्त्तत इति भावः । कर्म पुण्यादिलक्षणं, फलं तत्साध्यसुखदुःखादिरूपं, फलं च न मेऽस्तीत्यन्वयः । तस्मादहं परम उत्तमः संसारिभ्यो विलक्षणः अद्वयो निर्विशेषः क्रियावत्त्वाभावात्तत्साध्यपुण्याद्यसंभव इति विलक्षणत्वमुपपादयति । यथेति । देहगतो देहे प्राप्तस्तत्रोपलभ्यमानोऽपीत्यर्थः । सूक्ष्मतो ऽमूर्त्तत्वादित्यर्थः । तथा चाह भगवान् ।

अनादित्वान्निर्गुणत्वात्परमात्मा ऽयमव्ययः ।
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते ॥
यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ।
सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ॥

इति ॥ ६ ॥

ननूपलब्ध्यधिष्ठानानां देहादीनां वैषम्यदर्शनात्तत्रोपलभ्यमानस्यात्मनो ऽपि तत्कृतवैषम्यसंभवात्कुतः परमात्मत्वं परिपूर्णता चेत्याशङ्क्य तारतम्यप्रतिभासो ऽविद्याविलसितो न परमार्थत इत्याह ।

(८) सदा च भूतेषु समोऽहमीश्वरः
क्षराक्षराभ्यां परमो ह्यथोत्तमः ।
परात्मतत्त्वश्च तथाद्वयोऽपि सन्
विपर्ययेणाभिमतस्त्वविद्यया ॥ ८० ॥

सदा चेति । ईश्वर इत्यनेनोपाधिवश्यत्वाभावं सूचयति । अतो न मे देहादिकृतं वैषम्यमित्यर्थः । ईश्वर इत्युक्ते तस्येशितव्यापेक्षत्वात्सद्वयत्वशङ्का स्यात्तत आह । क्षराक्षराभ्यामिति । अथ वेश्वरत्वमेव साधयति । क्षराक्षराभ्यामिति । हि यस्मात् क्षराक्षराभ्यां परमो ऽथ तस्मादहमुत्तम इत्यन्वयः । क्षरति नश्यतीति क्षरः कार्यवर्गः, न क्षरतीत्यक्षरः कारणं मायाशबलितं चिद्वस्तु, ताभ्यां परमो व्यतिरिक्तः कार्यकारणादिभेदकल्पनाधिष्ठानभूत इत्यत उत्तमः पुरुषोत्तम इत्यर्थः । यत उत्तमो ऽतः परेषामात्मनां तत्त्वं स्वरूपमस्मिन्निति परात्मतत्त्वश्च अहमेव सर्वात्मा चेत्यर्थः । एवंविधश्चेदात्मा कथं तर्हि तत्र विपरीतरूपप्रतिभास इत्यत आह । तथा ऽद्वयोऽपि सन्निति । उक्तोत्तरमेतदविद्याविलसित एव विपर्यय इत्यर्थः । तथा च भगवतोक्तम् ।

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थो ऽक्षर उच्यते ॥
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥
यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥

इति ॥ ८ ॥

तर्हि किमविद्यासंबन्धो वर्त्तते, नेत्याह ।

(९) अविद्यया भावनया च कर्मभि-
र्विविक्त आत्मा ऽव्यवधिः सुनिर्मलः ।
दृगादिशक्तिप्रचितोऽहमद्वयः
स्थितः स्वरूपे गगनं यथा ऽचलम् ॥ ८१ ॥

अविद्येति । अविद्या मूलाज्ञानं भावना तत्कृतो देहाद्यभिमानः, कर्माणि तत्पूर्वकाणि पुण्यपापलक्षणानि, तैर्विविक्तस्तत्संस्पर्शशून्यः,- कुतो, यस्मादव्यवधिः व्यवधिर्व्यवधानं वस्त्वन्तरकृतो ऽवच्छेदस्तद्रहितो ऽव्यवधिः । अयमाशयः । चित्प्रकाशस्तावदात्मेति श्रुतिस्मृतीतिहासपुराणन्यायसिद्धम्, अविद्या जडा ऽप्रकाशात्मिका, अतस्तयोर्विरुद्धस्वभावयोः परमार्थतः संबन्धो दुर्घट एवेति स्थिते ऽनवच्छिन्नचैतन्यमात्रं तावन्नाविद्याश्रय उपपद्यते, तथा सत्यणुमात्रस्यापि प्रकाशानुपपत्तिप्रसङ्गाद्, नापि केन चिदवच्छिन्नभागविशेषमविद्याव्यतिरिक्तस्य तस्य कल्पनाया अनिबन्धनत्वात्,तस्मादविद्यातिरिक्तव्यवधानाभावादव्यवधित्वे सति दिवान्धपरिकल्पितान्धकारवदात्मन्यविद्यादिकल्पनमिति । अत एव सुनिर्मलः सर्वाशङ्कितदोषरहित इत्यर्थः । एवंविध आत्मनि कथं द्रष्टा श्रोता मन्ता बोद्धेत्यादिव्यवहार इत्याशङ्क्याविद्याध्यस्तान्तःकरणपरिणामरूपदृगादिशक्तिसंबन्धादेव द्रष्टृत्वाद्युपचर्यप्रतिभासो न परमार्थत इत्याह । दृगादीति । स्पष्टमन्यत् ॥ ९ ॥

एवंविधात्मतत्त्वपरिज्ञाने सति कैवल्यं फलतीत्याह ।

(१०) अहं परं ब्रह्म विनिश्चयात्मदृग्
न जायते भूय इति श्रुतेर्वचः ।
न चैव बीजे त्वसति प्रजायते
फलं न जन्मास्ति ततो ह्यमोहता ॥ ८२ ॥

अहं परं ब्रह्मेति । अहं परं ब्रह्मेति निश्चयेनात्मनि

दृग् ज्ञानं यस्य स तथोक्तः, स भूयः पुनर्न जायते शरीरवान् न भवति इति श्रुतेर्वचो विद्यत इति शेषः। तथा च श्रुतिः।

"स तु तत्पदमाप्नोति यस्माद्भूयो न जायते।
पुरुषान्न परं किं चित्सा काष्ठा सा परा गतिः" ॥

इति। "अथ सो ऽभयंगतो भवति" "ब्रह्मविद्ब्रह्मैव भवती"ति च। श्रुतिसिद्धेर्थे युक्तिमप्याह। न चैवेति। उक्तं सामान्यन्यायं प्रकृते योजयति। न जन्मास्तीति। हि यस्मादमोहता प्रागुक्तवर्त्मना मोहराहित्यं ततो हेतोर्न जन्मास्तीति योजना, मोहपदवाच्याविद्यामूलत्वाज्जन्मादिविकारस्य तदभावे ऽभाव एवेत्यर्थः ॥ १० ॥

मोहकार्यत्वात्संसारस्य मोहनिवृत्त्या निवृत्तिरेवेत्युक्तं, तत्र क्रियात्मकं मोहकार्यमित्यपेक्षायां तदाह।

(११) ममेदमित्थं च तवेदमीदृशं
तथाहमेवं न परोपि चान्यथा।
विमूढतैवास्य जनस्य कल्पना
सदा समे ब्रह्मणि चाद्वये शिवे ॥ ८३ ॥

ममेदमिति। प्रथमं देहद्वयेहंकारस्ततस्तद्बाह्यार्थकल्पनमिदमिति। तत्र शोभनाशोभनाद्यध्यासः इत्थमिति। ततो ममेदं तवेदृशं तथा न ममेदमित्यादिकल्पना, तथा परोप्येवं नैवमन्यथा वा नास्ति वा अस्ति वा इति मूढता, मम परस्य वा सुज्ञता च तथा, इत्येवं जनस्य जन्मादियोगिनो ऽनाद्यज्ञानतिरोहितात्मस्वभावस्य या एवंविधा कल्पना सा सदा समे ब्रह्मण्यद्वये शिवे परमानन्दरूपे न च नास्त्येवेत्यर्थः ॥ ११ ॥

एवं विचित्रस्य संसारस्यात्मतत्त्वज्ञानेन तदज्ञाननिवृत्त्या निवृत्तिमुक्तां स्फुटयति।

(१२) यदद्वयं ज्ञानमतीव निर्मलं
महात्मनां तत्र न शोकमोहता।
तयोरभावे नहि कर्म जन्म वा
भवेदयं वेदविदां विनिश्चयः ॥ ८४ ॥

यदद्वयमिति। अद्वयमद्वयात्माकारमतीव निर्मलमसंभावनाविपरीतभावनादिप्रतिबन्धरहितं यद् ज्ञानं तत्र तस्मिन्सति महात्मनां ब्रह्मभूतानां शोकमोहता संसारित्वं नास्त्येवेत्यर्थः। तथा च मन्त्रः।

"तत्र को मोहः कः शोक एकत्वमनुपश्यतः"।

इति। तयोः शोकमोहयोरभावे तदुपलक्षितस्य तत्कारणस्याज्ञानस्य निवृत्तौ बीजाभावे फलाभावन्यायेन जन्मादिः पुनर्नहि भवेदिति वेदार्थविदां विनिश्चय इत्यर्थः। तथा च श्रुतिः।

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे" ॥ १२ ॥

एवमुक्तस्यात्मविदः स्वरूपमाह।

(१३) सुषुप्तवज्जाग्रति यो न पश्यति
द्वयं तु पश्यन्नपि चाद्वयत्वतः।
तथा च कुर्वन्नपि निष्क्रियश्च यः
स आत्मविन्नान्य इतीह निश्चयः ॥ ८५ ॥

सुषुप्तवदिति। जाग्रति विश्वावस्थायां द्वयं द्वैतप्रपञ्चं प्राग्वासनावशात्पश्यन्नप्युल्लिखन्नपि विशेषतो न पश्यति, किंतु सुषुप्तवत्स्वविलीनप्रपञ्चप्रत्यगात्मरूपेणैव पश्यतीति योजना। तत्र हेतुरद्वय इति। द्वैतस्य बाधितत्वादित्यर्थः। तथा च यथा पूर्वं स्नानशौचभिक्षाटनादि कुर्वन्नपि निर्विकारो ऽकर्तात्मस्वभावाविर्भावाद् य एवंविधः स आत्मविद्विक्षेपदशायामप्यप्रच्युतात्मयाथात्म्यदर्शनत्वाद्ब्रह्मविदामुत्तमोयमेव नान्यः शास्त्रार्थज्ञोपि यो व्यवहारकाले ज्ञातृत्वकर्तृत्वाद्यभिमानवानित्यर्थः। इति इत्थमिह वेदान्तशास्त्रे विनिश्चयः ॥ १३ ॥

शास्त्रन्यायानुसारेण स्वानुभवं प्रदर्श्येदानीमस्मिन्दर्शने परिनिष्ठितस्य कृतकृत्यता भवतीति दर्शयन्परानुग्रहाय प्रकरणनिर्माणप्रवृत्तिरिति सूचयति।

(१४) इतीदमुक्तं परमार्थदर्शनं
मया हि वेदान्तविनिश्चितं परम्।
विमुच्यते ऽस्मिन् यदि निश्चितो भवेद्
न लिप्यते व्योम इवेह कर्मभिः ॥ ८६ ॥

॥ इति दृशिप्रकरणम् ॥

इतीदमुक्तमिति। वेदान्तविनिश्चितमित्युक्तदर्शनस्य परमार्थविषयत्वप्रमाणमुक्तं, व्योम इवेति विसन्धिर्वृत्तपूरणार्थः ॥ १४ ॥

इति श्रीदृशिस्वरूपपरमार्थदर्शनप्रकरणं दशमम् ॥ १० ॥

ब्रह्मात्मैक्यज्ञानमात्रनिष्ठो मुच्यते इत्युक्तं, तन्नोपपद्यते कर्मसाध्यत्वान्मुक्तेः कर्मसहितज्ञानसाध्यत्वाद्वा, तथा ज्ञानस्य वेदान्तविनिश्चयत्वमुक्तं, तदपि सन्दिग्ध,मनुमानादिनाप्युपपत्तेरितीमामाशङ्कां परिहर्तुं प्रकरणान्तरमारभते।

(१) ईक्षितृत्वं स्वतः सिद्धं जन्तूनां च ततोन्यथा।
अज्ञानादित्यतोन्यत्वं सदसीति निवर्त्यते ॥ ८७ ॥

ईक्षितृत्वमित्यादिना। तत्रादौ ज्ञानादेवमुक्तिः, ज्ञानं च वेदान्तमहावाक्यादेव नानुमानादिनेत्येतत्साधयति। अन्यत्वं सदसीति। निवर्त्यत इति। त्वं तत्सच्छब्दलक्षितं ब्रह्मैवासि न

संसारीति वाक्योपदेशेनैव सच्छब्दार्थाद्ब्रह्मणोऽन्यत्वं जीवस्य निवर्त्यत इत्यर्थः । संसारिणो जीवस्याशुद्धस्य कथं तद्विपरीतब्रह्मत्वं संभाव्यत इत्यत आह । ईक्षितृत्वमिति । सर्वेषामेव जन्तूनां प्राणिनां चिद्रूपमेवेक्षितृत्वं तत्त्वतः सिद्धं स्वाभाविकं रूपं, चकारः शङ्कानिवृत्त्यर्थः । कर्तृत्वभोक्तृत्वादेरपि स्वाभाविकत्वशङ्का न कार्या स्वरूपव्यभिचारादित्यर्थः । कुतोऽज्ञानादेवान्यत्वनिवृत्तिरूपा मुक्तिरित्यत आहाज्ञानादित्यत इति । इति यतोऽन्यत्वमज्ञाननिबन्धनं न परमार्थोऽत इत्यर्थः । अज्ञानकल्पितत्वाद्ब्रह्मविपरीतरूपत्वस्य स्वतश्चिन्मात्रस्वभावत्वादज्ञाननिवृत्तिलक्षणत्वाच्च मोक्षस्य तस्य च तत्त्वज्ञानमात्रापेक्षणाज्ज्ञानस्य च यथोक्तवाक्यादेवोत्पत्तेर्न मानान्तरं साधनान्तरं वाऽत्र मृग्यते इति भावः ॥ १ ॥

कर्मणो मोक्षहेतुत्वकल्पनं ज्ञानसहायत्वेन नोपपद्यते, श्रुतियुक्तिविरोधादित्याह ।

(२) एतावदमृतत्वं न किं चिदन्यत्सहायकम् ।
ज्ञानस्येति ब्रुवच्छास्त्रं सलिङ्गं कर्म बाधते ॥ ८८ ॥

एतावद्धीति । "एतावदरे खल्वमृतत्व"मित्येतदमृतत्वसाधनमात्मज्ञानमेवेत्येतावच्छब्देनावधारयतीति श्रुतिः शास्त्रमुच्यते, तज्ज्ञानस्य किं चिदन्यन्न सहायभूतमस्तीति ब्रुवत्सलिङ्गं ससाधनं कर्म बाधत इति योजना । अद्वैतात्मज्ञानादूर्ध्वं कर्महेतुजात्याद्यभिमानाभावे कुतः कर्म, यज्ज्ञानस्य मोक्षे फले सहायभूतं भवेदिति भावः ॥ २ ॥

इदानीमीक्षितृत्वमित्यत्रोक्तं स्वाभाविकं चिद्रूपत्वं प्रपञ्चयन् ज्ञानिनः कर्म न घटते इत्येतदुपपादयति ।

(३) सर्वेषां मनसो वृत्तमविशेषेण पश्यतः ।
तस्य मे निर्विकारस्य विशेषः स्यात्कथं चन ॥ ८९ ॥

सर्वेषामिति । विशेषः कर्तृत्वादिलक्षणो विहितकर्मसाधनजात्याद्यभिमानलक्षणश्चेत्यर्थः । कथं चनेत्याक्षेपार्थो, न कथं चन मे विकारः स्यादित्यर्थः । कुत इत्यत आहाविशेषेणेति । अभिमानशून्यतया केवलं साक्षिमात्रेण पश्यत इत्यर्थः ॥ ३ ॥

कथं मनोवृत्तं पश्यत्यविशेषेणात्मेत्यपेक्षायां दृष्टान्तपूर्वकं तदुपपादयन् चिदेकरसत्वमात्मनो निगमयति ।

(४) मनोवृत्तं मनश्चैव स्वप्नवज्जाग्रतीक्षतुः ।
संप्रसादे द्वयासत्वाच्चिन्मात्रः सर्वगोऽद्वयः ॥ ९० ॥

मनोवृत्तमिति । स्वप्नदशायां सवृत्तिकं मन एव पश्यत्यात्मा यथा बाह्यविषयाभावात्तथा जाग्रति जागरणदशायां मनोवृत्तं मनःप्रचारं मनश्च तदाश्रयं पश्यतः कथं विशेषः स्यादिति पूर्वश्लोकेनान्वयः । जाग्रद्दशायामपि विषयाकारवृत्तिमन्मनोव्यतिरेकेण नात्मना किमप्युपलभ्यत इति भावः । तर्ह्येवंविधमनोदर्शनमेव स्वाभाविको विशेष इत्यत आह । संप्रसादेति । संप्रसादे सुषुप्तिदशायां द्वयस्य सवृत्तिकस्य मनसोऽसत्त्वात्तद्दर्शनमपि स्वाभाविकं "न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्ये"दिति श्रुतेः । तथा चात्मा चिन्मात्रः सर्वगोऽपरिच्छिन्नोऽव्ययो नित्य इति सिद्धमित्यर्थः ॥ ४ ॥

"ननु यद्येवं तदा बाह्याभ्यन्तरद्वैतस्याभाव एवेत्युक्तं स्यात्तच्चोपपद्यते, प्रत्यक्षादिप्रमाणविरोधात् लौकिकवैदिकव्यवहारविलोपप्रसङ्गाच्चे"ति चे"त्याह ।

(५) स्वप्नः सत्यो यथाऽऽबोधाद्देहात्मत्वं तथैव च ।
प्रत्यक्षादेः प्रमाणत्वं जाग्रत्स्यादाऽऽत्मवेदनात् ॥ ९१ ॥

स्वप्न इति । यथा आ बोधात्प्रबोधपर्यन्तं स्वप्नः सत्यो लौकिकवैदिकव्यवहारास्पदतयाऽवभासते तथैव च जाग्रदवस्थायामपि देहात्मत्वं प्रत्यक्षादेः प्रमाणत्वं च सर्वव्यवहाराङ्गं स्यात्, कियत्पर्यन्तमित्यत आहात्मवेदनादिति । आ आत्मवेदनादिति पदच्छेदः । आत्मतत्त्वसाक्षात्कारात्प्रागेव सर्वो व्यवहारस्तस्मिन्सति व्यवहाराभाव इष्ट एवेति भावः ॥ ५ ॥

अव्यवहार्यस्वरूपमाविष्करोति ।

(६) व्योमवत्सर्वभूतस्थो भूतदोषैर्विवर्जितः ।
साक्षी चेताऽगुणः शुद्धो ब्रह्मैवास्मीति केवलः ॥ ९२ ॥

व्योमवदिति द्वाभ्याम् । चेता चिद्रूपः साक्षीति भूतदोषराहित्ये हेतुः, व्योमवत्सर्वभूतस्थ इत्यसङ्गत्वमुक्तं, सर्वभूतेष्वहमाकारवृत्तावभिव्यक्त्यपेक्षया सर्वभूतस्थ इत्युच्यते, एतच्चा"हं मनुरभवं सूर्यश्चे"तिवत्सर्वात्मत्वाभिप्रायं द्रष्टव्यं, शुद्धोऽज्ञानरहितः, केवलोऽवस्थात्रयरहितः, ब्रह्मैव पूर्ण एवास्मीत्यर्थः ॥ ६ ॥

केवलत्वं व्यनक्ति ।

(७) नामरूपक्रियाभ्यो ऽन्यो नित्यमुक्तस्वरूपवान् ।
अहमात्मा परं ब्रह्म चिन्मात्रोऽहं सदाऽद्वयः ॥ ९३ ॥

नामरूपेति । वाच्यवाचकतद्व्यापारात्मकप्रपञ्चहीन इत्यर्थः । सुगममन्यत् ॥ ७ ॥

"कथमद्वयत्वमात्मनः संगच्छते, अहं ब्रह्मास्मीतिवदहं कर्तास्मीति चानुभवस्य प्रमाणमूलत्वादिति ज्ञानकर्मसमुच्चयवादिनो भेदाभेदमतानुसारिण"स्तान् कुत्सयन्नद्वैतात्ममतं द्रढयति ।

(८) अहं ब्रह्मास्मि कर्ता च भोक्ता चास्मीति ये विदुः ।

ते नष्टा ज्ञानकर्मभ्यां नास्तिकाः स्युर्न संशयः ॥ ६४ ॥

अहं ब्रह्मास्मीति। विरुद्धार्थप्रतिपादकत्वायोगाच्छास्त्रस्य विरुद्धं तत्त्वमवगच्छतां कर्मकाण्डाज्ज्ञानकाण्डाच्च बहिर्मुखत्वान्नास्तिकत्वमेव तेषां फलिष्यतीत्यर्थः ॥ ८ ॥

ननु निन्दामात्रेण कथमद्वैतमतसिद्धिस्तत्र प्रमाणस्यासंभवादित्यत आह।

(९) धर्माधर्मफलैर्योग इष्टो दृष्टो यथात्मनः।
शास्त्राद्ब्रह्मत्वमप्यस्य मोक्षो ज्ञानात्तथेष्यताम् ॥ ६५ ॥

धर्माधर्मेति। आत्मनो धर्माधर्मफलैः सुखदुःखादिरूपैर्योगः संबन्धः प्रमाणान्तरैरदृष्टोऽपि यथा शास्त्रादेव "पुण्यो वै पुण्येन कर्मणा भवति पापः पापेने"त्यादेरिष्टोङ्गीकृतः शास्त्रार्थविद्भिरिति शेषः, तथास्यात्मनो ब्रह्मत्वं ज्ञानादेव मोक्षश्चेति "ब्रह्म वेद ब्रह्मैव भवति" "तमेव विदित्वा ऽतिमृत्युमेति नान्यः पन्था विद्यते ऽयनाये"त्यादिशास्त्रादिष्यतां तथा च भेदकर्मणोर्निन्दितयोः शास्त्रतात्पर्यविषयत्वायोगाच्छास्त्रानुसारिभिर्यथाशास्त्रमर्थः प्रतिपत्तव्य इति भावः ॥ ९ ॥

"नन्वात्मनो धर्माधर्मफलयोगः शास्त्रोक्तो मानान्तरविरोधाभावात्तथैवेति युज्यते, न तथात्मनो ब्रह्मत्वं, प्रत्यक्षदृष्टकर्तृत्वादिविरोधादतः श्रुत्यनुभवयोरविरोधाय भेदाभेदावादरणीयाविति चेत्"मैवं कर्तृत्वादिप्रतिभासस्याध्यासत्वाच्छ्रुत्युक्ताद्वैतप्रतिपक्षत्वानुपपत्तेरिति सदृष्टान्तमाह।

(१०) या माहारजनाद्यास्ता वासनाः स्वप्नदर्शिभिः।
अनुभूयन्त एवेह ततोऽन्यः केवलो दृशिः ॥ ६६ ॥

या माहारजनाद्या इति। "तस्य हैतस्य पुरुषस्य रूपं यथा माहारजनं वास" इत्यारभ्य "यथा सकृद्विद्युत"मित्यन्तेन श्रुत्युक्ता या वासनास्ताः स्वप्नदर्शिभिरनुभूयन्त एव यथेत्यक्षरयोजना। महारजनं हरिद्रा तया रञ्जितं वस्त्रादि माहारजनं स्वप्नदशायां जाग्रद्वासनावासितस्य मनसो वातपित्तश्लेष्मदूषितरसं पूर्णनाडीष्वनुगतस्यादृष्टादिसमुद्बोधितानेकवासनतया जाग्रद्दृष्टार्थाकारेण परिणममानस्य हरिद्रारञ्जितपटादिरूपसदृशतया भासमानस्य द्रष्टृदृश्यदर्शनतत्कारणादिभावेन नित्यं स्वप्नद्रष्ट्रोपलभ्यमानत्वात्स्वप्ने दृश्याभ्यो माहारजनादिसदृशवासनाभ्यो लिङ्गात्मसहिताभ्यो द्रष्टात्मा दृशिस्वभावो विलक्षणो लक्ष्यते, तथा कर्तृत्वादीनां दृश्यत्वादनात्मधर्मत्वमेवेति निश्चितमेवेह जाग्रदवस्थायामपि ततः कर्तृत्वादिधर्मकाल्लिङ्गादन्यः केवलः शुद्धो दृशिरात्मेत्यर्थः ॥ १० ॥

आत्मनः स्वप्नावस्थायां दृश्यविलक्षणत्वेन प्रतीतिमेव दृष्टान्तेन स्पष्टयति।

(११) कोशादिव विनिष्कृष्टः कार्यकारणवर्ज्जितः।
यथासिर्दृश्यते स्वप्ने तद्वद्बोद्धा स्वयंप्रभः ॥ ६७ ॥

कोशादिवेति। इवशब्दो यथाशब्दार्थे, असिरिवेति संबन्धः, यथाशब्दो यथावदित्यर्थे, यथासिः खड्गः कोशात् पृथक्कृतः स्वरूपेण दृश्यते तद्वदेव बोद्धा आत्मा कार्यकारणवर्ज्जितः कार्यकारणाकारमनसो लिङ्गात्पृथग्भूतः स्वप्ने यथावद् दृश्यते दृश्यत इत्युक्ते विषयवद्दृश्यत्वान्मिथ्यात्वमित्याशङ्क्य विशिनष्टि। स्वयंप्रभ इति। स्वमहिम्नैव प्रथते न विषयतयेत्यर्थः। यद्वा कथमवगम्यते स्वप्ने कार्यकारणवर्ज्जित इति वीक्षाया"मत्रायं पुरुषः स्वयंज्योति"रिति श्रुतिसामर्थ्यादित्याह। स्वयंप्रभ इति। स्वयंप्रकाश इति श्रुत्या निर्णीत इत्यर्थः। उपाधेः पृथक् स्वरूपेणावभासमात्रे ऽसिर्दृष्टान्त इति न वैषम्यशङ्कावकाश इति द्रष्टव्यम् ॥ ११ ॥

आत्मनः कर्तृत्वादिप्रतिभासस्य स्वप्नप्रतिभासवन्मिथ्यात्वाच्छुद्ध एवात्मा ब्रह्मैवेति शास्त्रादविरोधेनैव प्रत्येतुं शक्यत्वान्न भेदाभेदकल्पनया मनः खेदनीयमिति सिद्धेऽर्थे सोपक्रमं वाक्यं प्रमाणमाह।

(१२) आपेषात्प्रतिबुद्धस्य ज्ञस्य स्वाभाविकं पदम्।
उक्तं नेत्यादिवाक्येन कल्पितस्यापनेतृणा ॥ ६८ ॥

आपेषादिति। "तं पाणिना पेषं बोधयांचकार स होत्तस्था"विति श्रुतौ सुप्तपुरुषो बृहत्पाण्डुरवासः सोमराजन्नित्यादिप्राणनामभिरामन्त्रितो नोत्थितः पाणिना त्वापिष्यमाण उत्थित इति निर्द्धारितस्तेन प्राणेन्द्रियादिरूपलिङ्गसंघातविलक्षणः स्थूलसंघातादप्यन्य एवात्मेति प्रतिपन्नः,मत एव जडविलक्षणत्वाज्ज्ञानस्वभावः तस्यापेषात्प्रतिबुद्धस्य ज्ञस्य त्वंपदार्थस्य स्वाभाविकं पदं परब्रह्मलक्षणमुक्तं, केन, नेत्यादिवाक्येन, "अथात आदेशो नेतिनेत्यारभ्य "सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्य" मित्यनेन वाक्येनेत्यर्थः। किंविषयेण वाक्येन कल्पितस्याध्यस्तस्य मूर्त्तामूर्त्ततद्वासनाश्रयरूपस्यापनेतृणा प्रतिषेधकेन नेतिनेतिवीप्सया समस्तकारणकार्यात्मकोपाधिप्रतिषेधनद्वारा ऽखण्डे ब्रह्मणि पर्यवसितेनेत्यर्थः ॥ १२ ॥

नेतिनेत्यादिशास्त्रेण निषिध्यमानस्य कल्पितत्वं श्रुत्यैवोपपादितमित्याह।

(१३) महाराजादयो लोका मयि यद्वत्प्रकल्पिताः।
स्वप्ने तद्वद् द्वयं विद्याद्रूपं वासनया सह ॥ ६९ ॥

महाराजादयइति। स्वप्ने स्वप्नावस्थायां महाराजादयो

लोका यद्वन्मयि दृगात्मनि प्रकल्पितास्तद्वदेव वासनया लिङ्गाश्रितया सह द्वयं रूपं मूर्त्तं चैवामूर्त्तं मयि कल्पितं विद्धा, तथा च श्रुति"यत्रैष एतत्सुप्तोऽभूद्य एष विज्ञानमयः पुरुष" इत्युपक्रम्य "स यत्रैतत्स्वप्नमाचरति ते हास्य लोकास्तदुतेव महाराजो भवत्युतेव महाब्राह्मण उतेवोच्चावचं निगच्छती"ति, इवशब्देन महाराजत्वादेः स्वप्नदृश्यस्याभासतां मध्ये निर्दिश्यै"वमेवैष एतत्प्राणान् गृहीत्वा स्वे शरीरे यथाकामं परिवर्त्तते" इत्युपसंहरन्ती शरीरमध्य एव प्राणशब्दवाच्यलिङ्गोपाधिमहाराजाद्यात्मतया गृहीत्वा स्वप्नदृग्व्यवहरतीति दर्शयति. अतो न स्वप्नोपलब्धं परमार्थमित्यर्थः । तथा च वासनाश्रयलिङ्गशरीरसहितस्य मूर्त्तामूर्त्तरूपस्थूलस्यापि दृगात्मनि कल्पितत्वं तद्दृश्यत्वादुपपन्नमेवेति युक्तमुक्तमिति तात्पर्यार्थः ॥ १३ ॥

स्वप्नप्रपञ्चवज्जाग्रत्प्रपञ्चस्यापि प्रत्यगात्मनि कल्पितत्वे सिद्धे प्रत्यक्त्वाभिज्ञस्य कर्मासंभवः सिद्ध इत्याह ।

(१४) देहलिङ्गात्मना कार्या वासनारूपिणा क्रियाः ।
नेतिनेत्यात्मरूपत्वान्न मे कार्या क्रिया क्व चित् ॥ १०० ॥

देहलिङ्गेति । क्रियाः कर्माणि देहलिङ्गात्मना स्थूलसूक्ष्मदेहरूपेण तदभिमानेन तदात्मतामापन्नेनात्मना कार्या अनुष्ठेया, न पुनस्तन्निरपेक्षेण तदभिमानहीनेन, असंभवादित्यर्थः । किंलक्षणेन वासनारूपिणा वासनाः रूपयितुं संचेतुं शीलमस्तीति वासनारूपी तेन पुनःपुनः कर्मप्रवृत्तिनिमित्तं न.वच्छिन्नेनेत्यर्थः । इदानीं मे मम नेतिनेत्यादिनोक्तात्मस्वरूपत्वाद्देहद्वयाभिमानाभावात्क्व चित्स्वप्ने वा जागरे वा न क्रिया कार्या कर्त्तव्या स्वभावतो विधितो वेत्यर्थः ॥ १४ ॥

अज्ञानविलसितदेहाद्यभिमानादेव कर्मेति तस्याज्ञानमूलत्वे सिद्धे न तेन मोक्षाशा कर्त्तव्येत्याह ।

(१५) न ततोऽमृतताऽऽशाऽस्ति कर्मणोऽज्ञानहेतुतः।
मोक्षस्य ज्ञानहेतुत्वान्न तदन्यदपेक्षते ॥ १०१ ॥

न तत इति । ततस्तस्मात्कर्मणो हेतोरमृततायाा मोक्षभावस्याशा आशंसनं नास्ति. कुतो, ऽज्ञानहेतुतोऽज्ञानहेतुकत्वादविवेकपूर्वकत्वात्कर्मण इत्यर्थः । जडयोरज्ञानकर्मणोर्विरोधाभावाच्चाज्ञाननिवृत्तिरूपे मोक्षे कर्माशा कार्या, ब्रह्मात्मनावस्थानरूपस्य च परमानन्दाविर्भावलक्षणस्य मोक्षस्य चतुर्विधक्रियाफलविलक्षणत्वाच्च तत्रापि कर्मापेक्षेति भावः । कर्मणः स्वतो मोक्षहेतुत्वाभावेपि मोक्षहेतुज्ञानसहायतया तद्धेतुर्भविष्यतीत्याशङ्क्याज्ञाननिवृत्तौ ज्ञानमात्रस्य समर्थत्वात्र तत्र कर्मसहायताऽपेक्ष्यते, नापीतरत्र, तस्य स्वतः सिद्धत्वादित्यभिप्रेत्याह, मोक्षस्येति ॥ १५ ॥

यदि कर्मसाध्यममृतत्वं स्यात्तर्हि स्वर्गादिवत्कृष्यादिफलवच्चानित्यं सभयं च स्यात्तच्चानिष्ट"मभयं प्रतिष्ठां विन्दते" इत्यभयरूपत्वश्रुतिविरोधा"दतोन्यदार्त्त"मिति मोक्षस्वरूपादन्यस्यार्त्तत्वोक्त्या तस्यानार्त्तत्वपर्यवसानवचनविरोधाच्चेत्यभिप्रेत्याह ।

(१६) अमृतं चाभयं नार्त्तं नेतीत्यात्मा प्रियो मम ।
विपरीतमतोन्यद्यत्त्यजेत्तत्सक्रियं ततः ॥ १०२ ॥

॥ इतीक्षितृत्वप्रकरणम् ॥

अमृतं चेति । चशब्दस्त्वर्थः । अमृतं त्वभयं नार्त्तमनार्त्तमित्यर्थः । यद्यपि ब्रह्मरूपममृतत्वमुक्तलक्षणमकर्मसाध्यं तथापि जीवोऽन्यस्तत्कर्मणैव लभेतेत्याशङ्क्य जीवस्य ब्रह्मणोन्यत्वाभावान्नैवमित्याह । नेतीति । यः प्रियो जायादिः प्रीत्यास्पदतया विभाव्यते स ममात्मा स्वरूपभूतो "ऽनेन जीवेनात्मनानुप्रविश्ये"त्यादिश्रुतेः, स च नेतीत्यपोढाशेषविशेष इति मद्रूपत्वाच्च तस्य कर्मप्राप्यममृतत्वमित्यर्थः । अत उक्तादात्मस्वभावाद्यदन्यद्भेदबुद्ध्या गृह्यमाणं विपरीतं दृश्यमनात्मभूतं तत्क्रियासहितं त्यजेत्तदभिमानं परित्यजेत्ततस्तस्मात्कारणादित्युपसंहारार्थः । न चायमात्मज्ञस्य विधि,स्तस्याविनियोज्यत्वात्तं प्रत्यनुवादमात्रं साधकस्य पुनरुपयुज्यते. नियोग इतीह विधिप्रत्ययनिर्देश इति द्रष्टव्यम् ॥ १६ ॥

ईक्षितृत्वप्रकरणमेकादशं विवृतम् ॥ ११ ॥

---

॥ श्रीगणेशाय नमः ॥

॥ अथ बालभारतकाव्यभूमिका ॥

देवं वन्दे शाश्वतं वेदवेद्यं
यस्येच्छातः कर्मसिद्धिर्जनानाम् ।
यं चाजस्रं भावयन्तो मनुष्याः
सर्वान् कामान् मुक्तिमप्याप्नुवन्ति ॥ १ ॥

अथ विपुलजिनदेवमन्दिरपरिपूर्णे हनुमत्तनयोदये दक्षिणदेशे मरुद्देवेन निर्माप्य प्रतिष्ठापितविविधबुधभूसुपर्वव्रणिग्जननिवहे प्रचुरधूपदानादिघनार्चनपरवणिग्भिर्निर्मितास्यापितस्थूलकुम्भोपरिगतध्वजश्रीमहावीरस्वामिमन्दिरालंकृते वायदनामजिनमहास्थानेऽधिष्ठातारं भूरिभासुरप्रभावं जिनमतदृढाशयपरिवृढं श्वेताम्बरं नतु दिगम्बरं गच्छोपाधिमन्तं जिनदत्तसूरिं यतिपतिं समया कदाचिदागत्य तन्महास्थाननिवासनिबन्धनावाप्तवायटीयनामानो द्विजा महाभारतकथाया बहुलविचित्रनिरुपमविषयवत्त्वेऽपि लक्षसंख्यामितश्लोकवत्त्वेन रत्नाकरवद्विस्तीर्णतया तां शुश्रूषमाणा अव्याकुलितचे-

ततः प्राञ्जलयः प्रार्थयांचक्रुः, भगवन्नस्मदीहितसकलशुभप्रयोक्तृजिनमतमतिकभगवन्मरुद्दैवतनयहनुमद्भीमभटसंगमप्रतिपादनवतीयं महाभारतकथा शुश्रूषूणामस्माकं वर्षाधिकसमयव्ययमापादयति, सर्वैरस्माभिश्च यावानवसरो लभ्यते तावता नैयमासमाप्ति वर्णिता श्रुतिपथनिवेशिता वा स्यात्, तस्मादियं महाभारतकथा कृपया तथा संक्षिप्याभिनवसंदर्भेण वर्णनीया यथा स्वल्पैरेवाहोभिरस्माकं श्रुतिपथमुपेयादिति,

तदनु जिनदत्तसूरिसमतिभिर्मतिमद्भिर्द्विजैः प्रोक्तवरैराज्ञापितो जिनदत्तसूरिमुख्यशिष्योऽमरचन्द्रनामधेयो व्रतीन्द्रोऽखिलां महाभारतकथामादाय सुसंक्षिप्य च सपञ्चाशत्पञ्चशतीयुतषट्सहस्रीसंख्यापरिमितं महाभारतबालीभूतं बालभारताभिधानं महाकाव्यं चतुश्चत्वारिंशत्सर्गसंशोभितं सहृदयकविहृदयप्रमोदकरं विपुलचमत्कृतिभृद्रचयांबभूव, अस्यैवामरचन्द्रस्य गच्छोपाधिमतोऽर्हन्मतानुवर्तिनो निर्मितिः काव्यकल्पलता नाम सत्रिपञ्चाशत्त्रिशताधिकत्रिसहस्रीसंख्यामिता बहुलमुपलभ्यते, अष्टचत्वारिंशदधिकपञ्चदशशततमसंवत्सरावतारितश्चतुरुल्लासमितः स्यादिशब्दसमुच्चयो नाम ग्रन्थश्च,

सोऽयममरचन्द्रोऽद्विशतसमापुरोवर्ती प्राचीनतमोऽप्यमरसिंहादावरकालिको जैनैरभिधीयत इति,

जैनमते च चतुर्विंशतिसंख्याका ऋषभदेवमुखा महावीरस्वाम्यन्तास्तीर्थंकरा अर्हन्मतप्रवृत्तिपराः प्रसिद्धतरा अभूवन्, ततो महावीरस्वामिमुख्यशिष्यगौतमस्वामिनमारभ्य पञ्चमगणधरसुधर्मस्वामिसदृशा एकादश गणधरपदसंकेतभाजोऽभूवन्, ततोऽपि किञ्चिद्भिन्नमत्याच्चतुरशीतिभिदभृतो गच्छपदसंकेतजुषोऽपि श्रीविद्यश्रीविलासाद्याः, तथा जिनदत्तसूरिस्तत्पट्टधरो रासिल्लसूरिस्तत्पट्टधरो जीवदेवसूरिः सर्व एवैते गच्छसाधव इति जैनाः,

अधुनाऽचलगच्छानामल्पः प्रचारः, तपगच्छानां महान् प्रचारः, खरतरगच्छेषु महामहान्तो ग्रन्थकाराः, अपरे च प्रायोऽल्पतमा उपलभ्यन्त इति वदन्ति,

तदेतेषां मतप्रतिपादकसूत्रादिवर्णननिबन्धना तीर्थंकरसंज्ञा, द्विचादिसहस्रशिष्यगणधारणाद्गणधरसंज्ञा, गच्छार्हन्मतं गृहाणेत्याचार्यादौ ब्रुवति मतग्रहणार्थं गच्छतां गच्छसंज्ञावसेयेति,

जीवदेवसूरेश्च महाश्चर्यजनकः प्रभावोऽस्ति, तथाहि, कश्चन महायोगी कापालिको ज्वलनललितलोचनोऽस्य सभायामागत्य कस्मिंश्चिद्दहनि मुखात् सुखेन जिह्वां कृष्ट्वा कृतपरिकरोऽग्रे निविश्य जीवदेवप्रभावादस्तुभ्यन् वाग्वृष्टिभिः सभासदमपूपुरत्, अथ सुकृतकथाया अन्ते गन्तुमिच्छन्सौ परिकरबन्धाद्रसज्ञामाकृष्टुमशक्नुवन् भषण इव दीनशब्दोऽभवत्, ततः किमिदमिति सभावर्तिजनैः पृष्टे जीवदेवसूरिराह, एष महाकापालिकोऽत्यन्तं सामर्थ्यवान् मयि स्तम्भनमाचरन् मत्कपालादानाय प्राप्तो मयैव स्तम्भितः, तदद्येत्यमेव निःसृतजिह्वः शोषमुपैतु, इति वादिनि जीवदेवे सदःसदि च साधुवर्गे भगवन्नपराधमस्य क्षमस्व न खलु जैनानामस्माकं परक्लेशकारिता न्याय्येति प्रार्थितवति स कापालिकोऽपृष्ट एवाशक्नुवन् वक्तुं खटिकया पट्टे लिलेख, ये जना उपकृतिकर्तुरुपकृतिं कुर्वते तादृशास्तु बहवो भवन्ति पृथिव्याम्, ये चापकृतिकर्तुरप्युपकारं कुर्वन्ति तादृशा अल्प एव मनुजा इति, अथेत्यमेवामृश्य जीवदेवेन बन्धान्मोचितस्तत्सभातः स कापालिको निःससार, ततो यस्यां दिशि कापालिकोऽयमगात् तत्रास्मद्वर्ग्यैर्न गन्तव्यमिति जीवदेवे वदति स कापालिको नगराद्बहिर्गच्छन् गच्छसाध्वीं मोहयित्वा स्वतनुमनु न्यवेशयत्, अथेदं विज्ञाय जीवदेवे तं कापालिकं कुशमयं विधाय तपनतापे तापयति स कापालिकोऽतिस्फुरज्ज्वरभरः साध्वीं विहायाकुलितचेता गलितगर्वो लूनाङ्गुलिर्जगाम, अथ मृतायां गवि प्रविष्टे जीवदेवेऽहं प्राणरहितस्यापितच्छरीरतः कपालं ग्रहीष्यामीति तत्कपालग्रहार्थं मृतगवीप्रयोगं कृतवति कापालिके जीवदेवः कृतप्राभातिकक्रियः सभावर्ती भूरिभिः सूरिभिरेत्य, भगवन् ब्रह्मशालान्तरे एका गौर्निपत्य प्राणानुज्झांचकार, तामेनां निष्क्रष्टुं म्लेच्छा न प्रविशन्ति विप्राश्च न कर्षन्ति तत् परपुरप्रवेशकलयोत्कर्षयेति प्रार्थ्यमानः परपुरप्रवेशकलया तां प्रविश्य स्फुरन्निःश्वासां ततो निष्कास्य द्विजदुःखमपाचकार, तैर्द्विजैश्चाधिब्रह्मशालान्तरमुत्सवेनानीतो लब्धमहास्थानपट्टसहितहैमयज्ञवीतो जीवदेवः शमनिधे जैनोऽपि त्वमस्माकं ब्रह्ममुख्योऽसीति, स्तुतो धर्मोपदेशं व्यदधादिति, अथायं जीवदेवो यतीन्द्रोऽमुक्तस्वाङ्गोऽप्येकः समसमयमेव जीवतामपि बहूनां देहेषु प्रवेशसामर्थ्यभागासीत्, तथानेन जीवदेवेन बहूनि जिनस्थानानि निरमायिषत, स तु योगी कापालिकः प्राणिविनाशनैस्त्रिभुवनविजयविद्यां साधयिष्यन् मत्कपालग्रहार्थं मन्मृत्युकालं प्रतीक्षमाणो विहरति, तद्धे शिष्या मयि परिहृतदेहे यदाध्वनि डमरुकध्वनिः श्रूयेत तदा मम शिरोऽस्थि चूर्णनीयं यथा स कापालिको मत्कपालं नाप्नुयात्, इति बहून् शिष्यान् निर्माय ध्याननिर्धारितायुर्गततर्षो विफलितदुष्टयोगिप्रयोगो देहेऽपि निरुद्योगो बभूवेत्यादि,

एतच्च प्रायोऽमरचन्द्रेणान्तिमे सर्गे चतुश्चत्वारिंशत्तमे स्फुटमेव प्रतिपादितम्, तद्यथा,

देशे सत्तीर्थसार्थत्रुटदुरुदुरिते श्रीहनूमत्तनूजो-
त्पत्तौ तेन प्रतेने भुजगदिव महास्थानमस्थानमाधिः ।

स्वाख्याङ्कज्ञातिनाम्ना मरकतमणिकामिश्रमुक्ताफलस्र-
ग्भूषाबद्धमृगाद्या द्विजपटलमिहास्यापि सोकं वणिग्भिः ॥१॥
श्रीमद्वायटनाम्नि सारसुकृतश्रीधाम्नि तस्मिन् महा-
स्थाने माननिदानमानसरसास्ते वायटीया द्विजाः ।
स्तोमस्तोमसमुत्थधूमनिवहैर्मालिन्यमालम्बया-
मासुर्द्यां वणिजो जिनार्चनघनोद्यद्धूपधूमोत्करैः ॥ २ ॥

ज्वज्जमिषभुजमूलस्थूलकुम्भैकवत्ता-
हहमहह महीयोऽधःकृतस्फाटिकाद्रि ।
विलसति वणिजां सत्कीर्तिधर्मार्धनारी-
श्वरवपुरिव तत्र श्रीमहावीरचैत्यम् ॥ ३ ॥

श्रीश्वेताम्बरमैालिमैाक्तिकमणिस्तस्मिन् जिनेन्द्रालयेऽ-
धिष्ठाता जिनदत्तसूरिरजनि ज्ञानैकवैज्ञानिकः ।
श्रेयस्तुङ्गयदङ्गसंगमसमुद्भूतप्रभूतस्फुरत्-
पुण्यैः पश्य गुणैर्गतं दिवि सितच्छायैरुडुच्छद्मना ॥ ४ ॥
तत्पट्टोर्वीधरवरमणिर्द्यामणिद्योतजैत्रै-
स्तेजःपुञ्जैः किमपि ककुभोऽपूरि रासिल्लसूरिः ।
यस्य व्योमच्छलकलशभृत्कीर्तिधारापयोभि-
र्गोभिर्भुक्ता घनजनमनःकानने मोहवल्ल्यः ॥ ५ ॥

सुरगजरजनीभुजंगगङ्गा-
भुजगपतिप्रतिशूरकीर्तिपूरः ।
तदनु मुनिपतिर्मतिप्रतिष्ठा-
जनितरसोऽजनि जीवदेवसूरिः ॥ ६ ॥

श्रीवायटस्थाननिवासिनस्ते
संभूय भूयस्तरहर्षभाजः ।
कदाचिदागत्य निवेशवेश्म
जगुर्द्विजास्तं मुनिचक्रशक्रम् ॥ ७ ॥

मरुद्भातास्माकं भुवनजयिनैा तस्य तनयैा
तयोः सङ्गो यस्यामजनि हनुमद्भीमभटयोः ।
तथा संक्षेप्यासैा पृथुरपि महाभारतकथा
यथा स्वल्पाभिः स्यात् तिथिभिरतिथिः कर्णपथयोः ॥ ८ ॥

आज्ञापितस्तदिह कर्मणि सूरिभिस्तैः
ख्यातः क्षितावमरचन्द्र इति स्वशिष्यः ।
श्रीबालभारतमिति प्रततान काव्यं
वीराङ्कमेतदविनश्वरमात्मनोऽङ्कम् ॥ ९ ॥

जीवदेवचरित्रपद्यानां बहुत्वान्न तानीहोपन्यस्यन्तेऽवशि-
ष्टानि तद्वृत्तानि चान्तिमयन्यत एवावसेयानि, एकं तु तद्वृत्तप्र-
तिपादि वृत्तं प्रदर्श्यतेऽनुपदमेव,

तेनाकारि पुरारिपर्वतशिरोधिक्कारि धात्रीतला-
लंकारि स्फुटपापहारि भुवने वृन्दं जिनेन्द्रौकसाम् ।
आरोपोच्चमितेन यस्य नियतं दण्डोच्चयेनोच्चकै-
र्विद्धं व्योम दधाति किं न परितश्छिद्राण्युडुच्छद्मना ॥ १० ॥

अथास्य प्रस्तुतचरस्य बालभारतकाव्यस्यैकं पुस्तकं सैका-
दशाष्टादशशततमसंवत्सरलिखितमासादितमस्माभिरिति वि-
ज्ञानर्थये दोषमिहत्यं क्षाम्यन्त्विति, तथास्य लावण्यामृतरस-
पानेन प्रमोदन्तां चेति, परमेश्वरं च निजभक्तजनमनःसंक-
ल्पितसाधकतममनुत्तमं प्रार्थये यत् स्वानुकम्प्यैतत् काव्यं मुद्र-
णेन परिसमाप्तिं साधयत्विति शिवम् ।

सांख्यशास्त्रप्रधानाध्यापको वेचनरामशर्मा

---

॥ श्रीगणेशाय नमः ॥

सतां परब्रह्मविलोकमार्ग-
मपङ्किलं दूरितकण्टकं यः ।
श्रीभारतं ब्रह्म ततान शाब्दं
स श्रेयसे सत्यवतीसुतोऽस्तु ॥ १ ॥

शश्वत्प्रभावैा भुवनं पुनाते
बटू यदीयाविव पुष्पवन्तैा ।
जनः समस्तोऽप्ययमस्तु तस्मिन्
महोमये ब्रह्मणि लीनचित्तः ॥ २ ॥

अयं पयोधिप्रभवः प्रभावी
प्रभाविनिद्रेण सुधारसेन ।
महाभिषेकं जगतां विधत्ते
विधुर्वपुष्मानिव पुण्यराशिः ॥ ३ ॥

किरन् सुधां यो वसुधान्तराले
महामहा हन्तितमां तमांसि ।
हुताशतीव्रः किमनेन साम्यं
समं समायातु सहस्ररश्मिः ॥ ४ ॥

अवाप कीर्तिं त्रिजगज्जयीति
ध्रुवामनङ्गः कुसुमायुधोऽपि ।
स येन सख्या जयसुन्दरेण
कन्दर्पजिन्मैालिमिलत्पदेन ॥ ५ ॥

स्वयं स्वयंभूर्भुवनस्रवन्ती-
स्रोतःपवित्रेऽपि निजोत्तमाङ्गे ।
अधारि बालोऽपि कुतोऽपि हेते-
र्महेश्वरेणापि निरन्तरं यः ॥ ६ ॥

तस्य प्रिया कामशरव्रणैक-
संरोहिणी स्निह्यति रोहिणीति ।
ध्यायन् यदास्यं किल तन्मयेन
ध्यानेन तद्रूपमवाप सोऽपि ॥ ७ ॥

तन्नन्दनस्तन्मिथुनानुरूप-
रूपोऽस्ति चिद्रूपतया बुधाख्यः ।
यद्योगभाजं न विधुंतुदोऽपि
विधुं तुदत्युग्रविरोधबोधः ॥ ८ ॥

उष्णांशुरासन्नचरस्य शश्व-
द्यस्येव सेवातिशयेन तुष्टः ।
स्वलोककोकाङ्गरिपोरपीन्दोः
कलां पुनर्वृद्धिकलां ददाति ॥ ९ ॥

मदान्धगन्धेन मरालबाल-
समानयानेन विभासमानः ।
स्वेच्छाविलासैकरसः प्रसर्प-
त्कन्दर्पदर्पव्ययकारिकान्तिः ॥ १० ॥

समं स मित्रैः समदः कदाचि-
च्चचाल चूलासु हिमाचलस्य ।
नेत्रं विचित्रासु वनावनीषु
रोलम्बलोलं बहुधा दधानः ॥ ११ ॥

॥ युग्मम् ॥

एकामयं कामपुरं कुरङ्ग-
दृशं दृशोः पुण्यसुधानिधानम् ।
एकाकिनीमत्र वनीषु चित्र-
क्रमं भ्रमन्तीं सहसा[1] ददर्श ॥ १२ ॥

लीलावलोकक्षणदूषणीय-
मपीक्षणं मुक्तनिमेषमेषः ।
तदा तदालोकनकौतुकेन
बहूकृतात्मा बहु मन्यते स्म ॥ १३ ॥

तस्याः पिबन्नास्यसुधांशुधाम-
सुधां दृशैवोत्पलिनीपुटेन ।
जगाम सौहित्यमसौ न सद्य-
श्चकार कम्पं शिरसस्तथापि ॥ १४ ॥

१ सहसा, अकस्मादित्यर्थः ।

तदङ्गसौभाग्यविलोकभाग्य-
महोदयानन्दनिलीननेत्रः ।
स्मरस्मयत्स्मेरमथायमित्थ-
मचिन्तयच्चेतसि चन्द्रसूनुः ॥ १५ ॥

क्व संभवोऽस्या भुवि भोगिनीनां
न स्यादिति श्रीर्विषदग्धभासाम् ।
दृष्ट्वैव सृष्टिः सुरसुन्दरीणां
तुरीयमास्ते न जगत् कुतोऽसौ ॥ १६ ॥

देवस्य पद्मप्रभवस्य पद्म-
नाभस्य वा देहविभागहर्त्रीम् ।
असूत गौरीं गिरिराजपत्नी
मेना किमेनामपरामिहैव ॥ १७ ॥

विरिञ्चिरस्यातितमाममान्त-
मङ्गेषु शृङ्गाररसं सुकेश्याः ।
स्निग्धोल्लसत्कुन्तलकैतवेन
निधाय मूर्ध्नि स्तबकीचकार ॥ १८ ॥

अस्मिन्नमुष्या जगदग्र्यकृष्णा-
जयेन लक्ष्मीमभिसूचयन्ती ।
चकास्ति विस्तारिणि केशहस्ते
सीमन्तवेषादियमूर्ध्वरेखा ॥ १९ ॥

विधोः किलैका हरमूर्ध्नि भाल-
मस्या वितेने विधिरेकया च ।
इति द्वितीयादिनिशासु दृश्या
वृद्धौ कलास्तस्य चतुर्दशैव ॥ २० ॥

भ्रूवल्लिरस्या हृदयालयस्य
द्वारायमाणे नयनद्वयेऽस्मिन् ।
कस्यापि धन्यस्य नवप्रवेशे
नन्दत्यसौ वन्दनमालिकेव ॥ २१ ॥

उत्तंसितं भाति सुखप्रभासु
न किंचिदङ्गं यदहो तदस्याः ।
युक्तं दृशावेव विधिर्विधित्त्वः
कर्णद्वयालंकरणं चकार ॥ २२ ॥

तादृग्दृगेणद्वयबन्धनाय
पाशद्वयं कर्णमिषादमुष्याः ।

दृग्दम्भविस्रम्भमृगोपसेव्यं
सज्जीकृतं मन्मथयौवनाभ्याम् ॥ २३ ॥
कपोलयोरिन्दुजितोरमुष्याः
प्रसर्पतोरेव मिथो जयाय ।
स्वयं स्वयंभूः कृतरोधमन्त-
र्व्यधत्त नासामिह साम्यदण्डम् ॥ २४ ॥
मुखेन्दुपीतेन्दुयशःप्रवाह-
प्रसृत्वरोद्गारनिभा विभाति ।
अस्याः स्मितश्री रसनाग्रदोला-
विलोलवाणीवसनान्तकान्ता ॥ २५ ॥
मुखेन्दुना दीधितिधोरणीना-
माधिक्यतोऽस्या गलहस्तितोऽपि ।
श्वासातिसौरभ्यचरद्द्विरेफ-
च्छलात् किलाङ्को न विमुञ्चतेऽग्रम् ॥ २६ ॥
अस्या विभाति स्मितरश्मिपूर-
श्लिष्टोऽधरः पाटलतापटीयान् ।
अन्तर्मनोभूरसदुग्धसिन्धु-
वीचीमुखप्रेङ्खितविद्रुमाभः ॥ २७ ॥
अस्याः स्मितैः सूक्तसुधानिधान-
जिह्वाग्रनिस्यन्दसमैः समन्तात् ।
सिक्तोऽधरः प्राप्नुत माधुरीं यां
तां वेत्तु कः स्वादुरसेन धन्यः ॥ २८ ॥
मुदं ददाति त्रिजगज्जयाय
प्रयाणशङ्खो मकरध्वजस्य ।
कण्ठोऽयमस्या मृदुमध्यतार-
स्वरत्रयाधार इति त्रिरेखः ॥ २९ ॥
अनन्यलावण्यभरातिपूर्ण-
कपोलनिस्यन्दकदम्बकाभ्याम् ।
रसातिशैत्यस्तबकीकृताभ्या-
मिव स्तनाभ्यां हृदि दीप्यतेऽसौ ॥ ३० ॥
अस्याः स्फुरत्कान्तकपोलकान्ति-
सरित्प्रवाहाकृति बाहुयुग्मम् ।
अन्योन्यसंभेदि ददातु हर्षं[1]-
माकण्ठमन्तःपतिताय कस्मै ॥ ३१ ॥

१ सौख्यमिति द्वितीयपुस्तकपाठः ।

कराविमौ चालयतां नखार्चि-[1]
च्छटार्चितौ चामरवत् किलेयम् ।
दष्टेऽधरे धन्यतमस्य कस्य
गतस्य शृङ्गारिषु राज्यलक्ष्मीम् ॥ ३२ ॥
हरत्सु दैत्येषु विधिः किमस्याः
सर्गे दधौ मुष्टिबलेन मध्यम् ।
ततो नितम्बस्तनवृद्धिहेतु-
च्युतोत्थितद्रव्यमिदं कृशीयः ॥ ३३ ॥
किं रोमराजीयमुनातटेऽस्या
बलित्रिदण्डीं कलयन्ननङ्गः ।
कस्यापि रूपेण जितस्तपस्वी
तमेव जेतुं तनुते तपांसि ॥ ३४ ॥
अस्या ध्रुवं नाभिह्रदे[2] पपात
स्मरो हरक्रोधकृशानुतप्तः ।
रोमावली भाति तदत्र मूर्त्ता-
द्रुतेव शृङ्गाररसस्य धारा ॥ ३५ ॥
अभ्यस्य शश्वज्जघने घनेऽस्याः
सौभाग्यसिन्धोः पुलिने पुलिन्दः ।
वेध्यं शराणां कुरुते न कस्य
चलं च सूक्ष्मं च मनो मनोभूः ॥ ३६ ॥
विधातुमेतां खलु सज्जयित्वा
लावण्यलेपं प्रचुरं विरिञ्चिः ।
नितम्बबिम्बे कृशचारुमूर्ति-
निर्माणशेषं न्यदधादशेषम् ॥ ३७ ॥
ऊरुद्वयस्य द्विपहस्तजेतु-
र्भवेद्ध्रुवं स्थौल्यमतोऽपि तुष्ट्या ।
यद्येतदस्याः करभावभीक्ष्णं
साम्येन हीनावपि न स्पृशेताम् ॥ ३८ ॥
जङ्घाद्वयं यौवनकामदेव-
चलज्जयस्तम्भयुगानुकारम् ।
अस्या विभात्युन्मुखसंमुखीन-
नखप्रतिच्छन्दयशःप्रशस्तिः ॥ ३९ ॥
अङ्घ्रेरधः क्षिप्रमिदं समग्र-
र्नखावलिव्याजधृतानमालम् ।

१ अर्चिः शब्द इकारान्तोऽपि ।
२ वर्णस्तु प्रहादिगतो विभाषा इत्यनुशासनाददोषः ।

मन्त्रान् जपत्यम्बुजबुद्धिलोल-
रोलम्बनादैः पदयुग्ममस्याः ॥ ४० ॥
सेवाऽऽगताभिर्दशदिक्पतीनां
कान्ताभिरङ्गद्युतिनिर्जिताभिः ।
अस्याः पदद्वन्द्वमपूजि चूडा-
रत्नैर्नखश्रेणिमिषेण मन्ये ॥ ४१ ॥
विनिर्जितोऽस्या गतिविभ्रमेण
रोषादिवारक्तमुखो मरालः ।
दुःखादिवेभः शितिकान्तिरेत-
त्क्रमभ्रमान्मर्दयतेऽम्बुजानि ॥ ४२ ॥
इदं हृदन्तः स्मरतः स्मरैक-
रसस्य तस्यापि पतन्मुखेन्दौ ।
लीलावनीकेलिचलोऽप्यलोल-
स्तन्नेत्रसारङ्गशिशुर्बभासे ॥ ४३ ॥
प्रवेशयन्तौ हृदयं हृदेव
दृग्भ्यां दृशावेव मिथः पिबन्तौ ।
स्नातौ महानन्दरसोर्मिपूरैः
स्थितौ चिरं तावथ भावभिन्नौ ॥ ४४ ॥
अथो मिथोऽपि प्रथमानुराग-
भृतोस्तयोरीक्षणमात्रतोऽपि ।
तदात्वजातत्रपमेणनेत्रा
चक्षुश्चलत्कण्ठमितश्चकर्ष ॥ ४५ ॥
तयानुरागस्मयमानलज्जा-
तिर्यग्वलत्कण्ठचलद्दृशैव ।
वीक्षागुणेनेव निबद्ध्य कृष्टः
समीपमाप द्रुतमप्यतोऽसौ ॥ ४६ ॥
त्वमुत्तमे कासि विकासिशक्ति-
स्मरत्रिलोकीजयवैजयन्ती ।
कुतः समेतासि च लोलदृष्टे
कृष्टेव मन्नेत्रयुगस्य भाग्यैः ॥ ४७ ॥
इति स्मरामोदवितन्द्रवाचि
चन्द्रात्मजे मन्द्रमुवाच सा च ।
सदा सुधापानरसां रसज्ञा-
मस्य [1] श्रुतिभ्यां परिहासयन्ती ॥ ४८ ॥

॥ युग्मम् ॥

सहाग्रजैर्बन्धुभिरुज्जगाम
मनोर्महायज्ञकृशानुकुण्डात् ।
इडाख्ययास्मिन् गहनेऽभ्युपेत्य
त्वां वीक्ष्य मन्ये सफलं स्वजन्म ॥ ४९ ॥
श्रुत्वेति शीतांशुसुतोऽप्युवाच
वाचं स्मितस्नानविशुद्धवर्णाम् ।
तदाननद्योतसुधोर्मिपानात्
सद्यःकृतोद्गारभराभिरामाम् ॥ ५० ॥
सुधामयीमाहुतिमाप्य शैत्यं
स्तम्भं च भेजे शिखिनः शिखेव ।
इति द्युतिं यद्भवती दधाति
स्थिरस्फुरद्धूमलताभवेणिः ॥ ५१ ॥
त्वमुग्रदीप्तेर्दहनस्य पुत्री
पुत्रोऽहमिन्दोस्तुहिनैकमूर्तेः ।
इति द्रुतं नौ ददतां समत्वं
मिथः परीरम्भमहौषधानि ॥ ५२ ॥
इत्थं मिथो जातकथाप्रथाभिः
स्थिरीकृतप्रेमरसैकचित्तौ ।
चिराय चिक्रीडतुरङ्गरिङ्ग-
दनङ्गशृङ्गारितसंगतौ तौ ॥ ५३ ॥
अथाभवच्चन्द्रकुलादिराजः
पुरूरवा नाम तयोस्तनूजः ।
यशःश्रियां धाम महामहस्वी
मुनीश्वराणामपि माननीयः ॥ ५४ ॥
कृष्णोऽप्यतृष्णा मदनेऽप्यदीना
रामेऽप्यकामा कमनीयकान्तिः ।
दोःक्रीतचित्ताऽभवदुर्वशीति
नृपस्य तस्याप्सरसः कलत्रम् ॥ ५५ ॥
अहीन् महीभृद्विवराध्वपातात्
पातालयातै रिपुवक्त्रवातैः ।
यज्ञैः सुरान् राज्यनयैर्मनुष्यान्
पुष्यन् दधौ यस्त्रिजगत्पतित्वम् ॥ ५६ ॥
तुल्येषु को गेय इतीशविष्णु-
पद्मौकसां संसदि संशयानाः ।

१ अस्य बुधस्य रसज्ञामस्यैव श्रुतिभ्यां परिहासयन्ती ।

वाक्पाणिवीणार्थितमस्य गीतं
जगुस्त्रयस्यापि निजं हयास्याः ॥ ५७ ॥
प्रविश्य यं दिक्पतयोऽष्ट यद्वा-
श्छायामधो विश्वविभुः प्रपद्य ।
नभोमणिर्यन्महसः सुहृत्त्व-
माश्रित्य याति [1] स्म सुखं दिशः स्वाः ॥ ५८ ॥
अतीव बाह्याङ्गिणादुदग्रान्
वदन्ति युक्तं मुनयोऽन्तरारीन् ।
चिराय मन्त्राधिकशास्त्रयोगा-
द्वशं यतो येन विजिग्यिरेऽमी ॥ ५९ ॥
पातालवैतालिकवृन्ददत्तां
बलिः समाकर्ण्य विलोलमौलिः ।
विलज्जमानोऽद्भुतदानशक्ते-
र्यस्योपमामात्मनि किं न्यषेधत् ॥ ६० ॥
व्यधाद्दयालुः सुरशाखिरत्न-
गवीषु काष्ठाश्मपशुत्वमीशः ।
ह्रिया न दीर्णे यदमूभिरुच्चै-
र्निशम्य यद्दानममर्त्यगीतैः ॥ ६१ ॥
न चक्षुषारज्यत नाधरेण
व्यकम्पि भालेन च नो विचक्रे ।
रागास्पदस्याप्यमितेङ्गितस्य
प्रियाभिषङ्गेऽपि रणेऽपि यस्य ॥ ६२ ॥
रेमे स धर्मैकधुरंधरोऽपि
पत्न्यां धरोद्धारकृते सुताय ।
पूतो जनः शंकरपूजनाय
न पङ्कजार्थं किमु पङ्कमेति ॥ ६३ ॥
स्वर्भानवीशः क्षितिपस्ततोऽरि-
पयोमुचां वायुरिवाविरासीत् ।
विनिर्मिता निर्मलशास्त्रकोटि-
महारहस्यैरिव यस्य बुद्धिः ॥ ६४ ॥
युवा विनिद्रः खलु मोहनिद्रां
कुतूहलेनाभिनयन् शनैर्यः ।
दृढाङ्गबन्धेन नवोढयापि
सुस्निग्धयालिङ्ग्यत राज्यलक्ष्म्या ॥ ६५ ॥

१ यान्तिस्मेति पाठान्तरम् ।

हर्षोल्लसल्लोलविलोचनश्री-
र्विलोकने चन्द्रमुखीमुखस्य ।
यश्चन्द्रचूडस्मरणप्रनष्ट-
स्मरो न रोद्धुं व्यसनेन शक्यः ॥ ६६ ॥
धाम्नैव कामं दहतो विपक्षान्
लक्ष्मैव तस्याजनि खड्गदण्डः ।
ज्वालोज्ज्वलस्य ज्वलतोऽनलस्य
दग्धव्यदाहाय न धूमलेखा ॥ ६७ ॥
अभूद्भुवोऽपि प्रियवासवोऽपि
प्रियः सुतः [1] श्रीनहुषो नरेन्द्रः ।
द्विषां यदीयाङ्घ्रिनखा नतानां
नृपत्वदीक्षामुकुटत्वमीयुः ॥ ६८ ॥
यद्दानगानव्यसनैकतान-
स्वर्भीरुभावाश्रुजलौघयोगात् ।
शङ्के पशुप्रस्तरपादपाना-
मप्यद्भुताभूद्दिवि दानबुद्धिः ॥ ६९ ॥
[2] पुण्यं निरूप्याद्भुतभोगयोगैः
प्रक्षीयमाणं क्रमतः पुराणम् ।
शक्रादयो दिक्पतयोऽप्रमेय-
श्रेयोंऽशलोभादविशंस्तमंशैः ॥ ७० ॥
भुवं भुजे योऽधित याचकेभ्यो
दिक्कुञ्जरान् दातुमना मनस्वी ।
तदेकयुग्यं भजतां प्रभुत्वं
न दिक्पतीनां कृपयाऽहरत् तान् ॥ ७१ ॥
अथावनीभारमुरीचकार
जयातिरेकप्रवरो ययातिः ।
गीतं दिगन्तेषु यशो यदीयं
श्रोतुं दधेऽष्टश्रुतितां विधाता ॥ ७२ ॥
सुदुस्तरन्यायपयोधिमध्य-
विलासतस्तुच्छभरां भृशं यः ।
मृणालिनीनालनिभेऽपि बाहौ
सुखेन भूमिं बिभरांबभूव ॥ ७३ ॥

१ तत इति पाठान्तरम् ।
२ कामधेनुचिन्तामणिकल्पवृक्षाणाम् ।

यत्साम्यचिन्ताभिरभून्निमेषो-
न्मेषोर्मिशून्यं नयनं सुराणाम् ।
यच्छक्तिहीनैरहिभिर्मुखान्त-
र्विषैर्मृतं नामृतमारुताद्रैः ॥ ७४ ॥
गीतानि चिन्तामणिकामधेनु-
कल्पद्रुमाणामधिदेवताभिः ।
शृण्वन्ति सिद्धाचलसंधिरन्ध्रे-
र्बलिस्त्रियो दानयशांसि यस्य ॥ ७५ ॥
वनं मृगव्याय गतः स भूपः
कूपं जलार्थी कमपि प्रपन्नः ।
तत्राऽऽप तोये पतितां नताङ्गी-
मालोक्य कासीति जगाद कांचित् ॥ ७६ ॥
ऊचे नृदेवं प्रति सापि देव-
यानीति देवारिगुरोः सुताहम् ।
शर्मिष्ठया श्रीवृषपर्वदैत्य-
पुत्र्या वनेऽस्मिन्नुदितास्मि रन्तुम् ॥ ७७ ॥
अस्माकमाकस्मिकतः समीर-
विवर्तनश्चीरविपर्ययोऽभूत् ।
तदा तदर्थं प्रथिते मिथोऽपि
वादेऽतिदुष्टा दनुजेन्द्रपुत्री ॥ ७८ ॥
त्वं पुत्रिका मत्पितृयाचकस्य
मूढाशये मामवमन्यसे हा ।
इत्थं सखीलक्षसमक्षमुक्त्वा
कोपेन कूपेऽक्षिपदत्र सा माम् ॥ ७९ ॥
॥ युग्मम् ॥
इत्युक्तिपङ्क्तेः श्रवणाध्वगायाः
ससंभ्रमाभ्युत्थितमानसस्ताम् ।
पातालकन्यामिव कान्तिधन्या-
मिलाविलासी स चकर्ष कूपात् ॥ ८० ॥
गत्वा गृहं साथ पितुः पुरस्ता-
न्न्यवेदयद् दुःखवृता स्ववृत्तम् ।
शुक्रोऽवदन्मे दनुजैर्विरोधं
कर्तुं तदेन्द्रः पवनत्वमाप ॥ ८१ ॥
तत् पुत्रि मा पूरय वैरिवार-
मनोरथं वारय रोषदोषम् ।
रोषः शिशूनां हि सखित्वभाजां
रेखेव सौजन्यजले क्षणं स्यात् ॥ ८२ ॥
उक्तेति पित्रावददुग्रमन्युः
कन्याथ सा बाष्पजलार्द्रनेत्रा ।
भिक्षोः सुतासीत्यवमानितास्मि
तया न तज्जीवितुमुत्सहेऽहम् ॥ ८३ ॥
इत्यङ्गजां मृत्युमुखीं निरीक्ष्य
रुषा सुरारिप्रभुमाह शुक्रः ।
त्वन्नन्दिनी केलिषु नन्दिनीं मे
व्यमानयत् किं करवै भवद्भिः ॥ ८४ ॥
इत्युक्तवान् दर्पवशोऽपसर्पन्
दैत्याधिपेन क्रमलग्नमूर्ध्ना ।
आर्द्रीकृतः स्माह स नाहमस्मि
क्रुद्धः क्रुधा दीव्यति देवयानी ॥ ८५ ॥
अथ स्वपुत्रीमपराधकर्त्रीं
प्रदाय दासीं दनुजेश्वरेण ।
प्रसादिता शुक्रसुतार्थिसूते-
र्दासी ममासीत्यहसीदसौ ताम् ॥ ८६ ॥
गतापरेद्युर्विपिनं तदेव
सा देवयानी स्मरराजधानी ।
तदैव तत्रोपगतं ययातिं
भवद्वशास्मीत्यवदन्मदान्धा ॥ ८७ ॥
लोलेक्षणे क्षत्रकुलोद्भवोऽहं
महर्षिपुत्रीं कथमर्थये त्वाम् ।
कोनेत्थमुक्ताथ पितुः पुरस्ता-
दार्ता स्वसंकल्पमियं जजल्प ॥ ८८ ॥
शुक्रोऽथ पुत्र्या नृपरागहेतुं
ध्यायन् हृदि ध्यानदृशेत्यपश्यत् ।
यन्नाकिसैन्यैर्निहतः पुरासौ
सुरारिवर्गः समरे समग्रः ॥ ८९ ॥
संजीवनीं नाम नियोज्य विद्यां
तज्जीवितास्ते दनुजा मयामी ।
बार्हस्पतीयस्तनयोऽथ विद्यां
तां ज्ञातुमागादिह मां कचाख्यः ॥ ९० ॥
॥ युग्मम् ॥

ममाकरोद्वार्षसहस्रिकं स
सेवाव्रतं देवपतिप्रगुन्नः ।
संजीवनीलिप्सुरसाविमीमं
गोरक्षणस्थं दनुजा निजघ्नुः ॥ ९१ ॥
विना कचेनैव गवां गणेऽथ
गृहाङ्गणे रङ्गति सायमत्र ।
तत्सेवया स्नेहमयी ममेयं
दुःखात् सुता मामवदत् तदेदम् ॥ ९२ ॥
तात प्रयातः सवितायमस्तं
नाद्यापि नेत्रोत्सवतां कचस्तु ।
शङ्के विशङ्कैर्निहतः स दैत्यै-
र्जीवामि नैवाद्य तु तं विनाहम् ॥ ९३ ॥
इत्युद्विलापां तनयां निरीक्ष्य
संजीवनीसंस्मरणात् क्षणात् तम् ।
अजीवयं प्रेषयति स्म चैषा
वनं प्रसूनाहृतये ततस्तम् ॥ ९४ ॥
दैत्याः पुनस्तत्र रहो निहत्य
तं दग्धमुत्पिष्य सुराविमिश्रम् ।
अपाययन्मां तनयार्थितोऽह-
मजीजिवं कुक्षिगमेव तत् तम् ॥ ९५ ॥
मयोपनीतां प्रतिपद्य विद्यां
मत्कुक्षिमुद्भिद्य विनिर्गतोऽसौ ।
मां जीवयामास मयेत्यथोचे
प्राप्स्यन्ति विप्रा निरयं सुरापाः ॥ ९६ ॥
पृष्टाथ मां यातुमनाः सविद्य-
स्त्वं मां भजेत्युक्तवतीमतीव ।
स्वसासि मे त्वं गुरुकुक्षिवासा-
न्निराचकारेति स देवयानीम् ॥ ९७ ॥
मदीहितध्वंसकृतोऽफलास्तु
विद्या तवेत्युद्वचसं कचोऽमूम् ।
ऊचे न शापो मयि धर्मिणि स्या-
दास्तां तव न्यूनकुलस्तु भर्ता ॥ ९८ ॥
तच्छापतः क्ष्मापरतेयमासी-
ज्ज्ञात्वेति दोषो न तवेत्युदीर्य ।
शर्मिष्ठया संजनितानुचर्यां
शुक्रो ददाति स्म ययातये ताम् ॥ ९९ ॥
क्रमात् प्रसूते स्म सुतौ यदुं च
सा तुर्वसुं चाथ कवेस्तनूजा ।
दैत्यात्मजा गुप्तरता त्वसूत
द्रुह्याणुपूरून् नृपतेः कुमारान् ॥ १०० ॥
तद्दैत्यजावृत्तमवेत्य देव-
यानी पितुर्धाम रुषा जगाम ।
तत्सान्त्वनायोपगतं नृपं स
क्रुधा सुधाभुग्रिपुसूरिरूचे ॥ १०१ ॥
इमां कुमारीं ददता सुरारि-
सुता न सेव्येति मया निषिद्धः ।
त्वं मूढ तारुण्यमदात् तदेव
व्यथा निधानं भव तज्जरायाः ॥ १०२ ॥
प्रसादितः क्ष्मापतिनाथ शुक्रो
जगौ जरां क्वापि सुते निधाय ।
तारुण्यशाली परिभुज्य भोगां-
स्तृप्तः पुनस्तां तपसे भजेथाः ॥ १०३ ॥
गतोऽथ राजा जरसश्चतुर्षु
चस्तेषु यद्वादिषु नन्दनेषु ।
वितीर्णतारुण्यभरेऽथ पूरौ
पौराङ्गनादृक्कुमुदेन्दुरासीत् ॥ १०४ ॥
क्ष्मापस्य शापेन ततश्चतुर्भिः
सुतैरपाविच्यमुपार्जि पूर्वैः ।
तद्यादवम्लेच्छशकैरिलायां
ख्यातान्वयास्ते यवनैश्च जाताः ॥ १०५ ॥
समाः सहस्रं विषयोपभोगी
ततः स योगी भवितुं प्रवृत्तः ।
पुनर्युवानं स नृपं स चक्रे
पूरुं समादाय जरां ययातिः ॥ १०६ ॥
योगाप्तद्युगतिः पतेति हरिणा शप्तः स्वयं संस्तुवन्
सत्सङ्गोऽस्तु ममेति याचितवरो यज्ञप्रवीरेषु सः ।
दौहित्रेषु पतन् शिविप्रभृतिषु ख्यातस्ववृत्तो दिवि
तद्दत्तं सुकृतं तु नादित ततः सत्त्वात् पुनः स्वर्ग्यभूत् ॥ १०७ ॥

इति श्रीजिनदत्तसूरिशिष्यकविचक्रचूडामणिश्रीमदमर-चन्द्रविरचिते श्रीबालभारतनाम्नि महाकाव्ये वीराङ्के आदिपर्वण्यादिवंशावतरणे पुरूरवप्रभृतिराजचतुष्टयवर्णनो नाम प्रथमः सर्गः ॥ १ ॥

# THE VAIŚESHIKA APHORISMS OF KANÁDA.

## SECOND BOOK, FIRST DAILY LESSON.

(Continued from page 62.)

वायुसन्निकर्षे प्रत्यक्षाभावाद्दृष्टं लिङ्गं न विद्यते ॥ १५ ॥

Aph. 15. Inasmuch as in contact with air there is no act of perception there exists [in it] no visible mark.

[1] For where there is a visible mark there is a perception of pervasion [essential presence of an attribute], as of fire by smoke, but in the present case of contact with air perception of pervasion of air is impossible because air transcends sense. Accordingly there is no mark in air essentially present and cognised by perception, and air has therefore an invisible mark. V.

सामान्यतो दृष्टाच्चाविशेषः ॥ १६ ॥

Aph. 16. And inasmuch as [its existence is known] by general inference it is not a particular.

[2] Not a particular means devoid of particularity, not particularised by particularity, and particular is the particular class included in the notion of substance, *i. e.* the notion of air. And by inferring from the notion of feel that the feel which is experienced must have some substratum, as also that it cannot be one of the other [substances]; the notion of its inhesion in a substance excluded from [*i.e.* other than] the eight substances being established, air is proved to be a substance excluded from [other than] the eight substances, with respect to the subject which determines that which is to be proved. 'By general inference' means from a mark different from the relation of cause and effect, or from a mark other than that of invariable sequence. In the Nyáya Aphorisms it is taught that inference is of three kinds, from the antecedent, from the subsequent, and that which is drawn generally. That which is from antecedence, has for its mark a cause, or an invariable sequence. That which is from subsequence, has an effect for its mark, or is invariably exclusive [of other causes]. That which is drawn generally has for its mark something distinct from cause and effect, or is exclusive of sequence. V.

तस्मादागमिकम् ॥ १७ ॥

Aph. 17. It is therefore declared by revelation.

[1] Since [the existence of] air is not inferred by means of a class having for its form the notion of air, the name 'air' is given by revelation, proclaimed by the Veda. V.

The existence of God: संज्ञाकर्म त्वस्मद्विशिष्टानां लिङ्गम् ॥ १८ ॥

Aph. 18. But word and work are the mark of those beings who are distinguished from ourselves.

[2] The word 'but' implies the exclusion of the marks of feel, &c. A word is a name, a work is an effect such as the earth &c. Both of these are a mark of the existence of God and the Maharshis who are distinguished from ourselves. U.

[3] The word 'but' expresses a division of the sections, and implies that the section treating of the Deity is now commenced. A word is a name such as 'air,' a 'boar,' 'barley,' a 'reed,' and the like, a work is an effect, as the earth, a blade of grass &c. These are both a mark warranting the inference of the existence of God and the Maharshis, who are distinguished from ourselves, who are able to produce this and that effect, and are possess-

---

[1] दृष्टं लिङ्गं हि यत्र व्याप्तेः प्रत्यक्षं भवति यथा वह्नेर्धूमः प्रकृते तु वायुसन्निकर्षे ऽपि वायुव्याप्तिप्रत्यक्षं न सम्भवति वायोरतीन्द्रियत्वात् तथा च प्रत्यक्षगृहीतव्याप्तिकं लिङ्गं वायो नास्तीत्यदृष्टलिङ्गो वायुरिति सुष्ठूक्तमेवेत्यर्थः ॥

[2] अविशेषः विशेषरहितः विशेषाविशेषित इति यावत् विशेषश्च द्रव्यत्वव्याप्यजातिविशेषो वायुत्वं तथा चानुभूयमानः स्पर्शः क्वचिदाश्रितः स्पर्शत्वादित्यनुमानेन इतरबाधसहकृतेन स्पर्शे अष्टद्रव्यातिरिक्तद्रव्याश्रितत्वसिद्धौ अष्टद्रव्यातिरिक्तद्रव्यत्वेन वायुरपि साध्यतावच्छेदककोटौ सिध्यतीति भावः सामान्यतोदृष्टादिति कार्यकारणभिन्नलिङ्गात् अन्वयव्यतिरेकिलिङ्गाद्वेत्यर्थः । न्यायसूत्रे पूर्ववत् शेषवत् सामान्यतो दृष्टमिति त्रिविधमनुमानमुक्तं तत्र पूर्ववत् कारणलिङ्गकं केवलान्वयि वा शेषवत् कार्यलिङ्गकं केवलव्यतिरेकि वा सामान्यतो दृष्टं कार्यकारणभिन्नलिङ्गकम् अन्वयव्यतिरेकि वा इत्यर्थः ॥

[1] यस्माद्वायुत्वस्वरूपजातिप्रकारेण वायोर्नानुमितिः तस्माद्वायुरिति नामआगमिकं वेदप्रसिद्धम् ॥

[2] तु शब्दः स्पर्शादिलिङ्गव्यवच्छेदार्थः संज्ञा नाम कर्म कार्यं क्षित्यादि तदुभयमस्मद्विशिष्टानाम् ईश्वरमहर्षीणां सत्त्वे ऽपि लिङ्गम् ॥

[3] तुशब्दः प्रकरणविच्छेदार्थः इदानीमीश्वरप्रकरणारब्धमिति भावः । संज्ञा नाम वायुवराहयववेतसादि कर्म कार्यं क्षित्यङ्कुरादि एतदुभयमस्मद्विशिष्टानाम् अस्मत्तो विशिष्टानां तत्तत्कार्यसमर्थानां सर्वज्ञैश्वर्यसम्पन्नानाम् ईश्वरमहर्षीणां लिङ्गमनुमापकं तुकारो लिङ्गान्तरव्यवच्छेदार्थो वा तथा चेश्वरमहर्षिसिद्धौ तत्प्रणीतत्वेन वेदस्मृत्यादेः प्रामाण्यमवश्यमङ्गीकार्यमिति यद्यपीदं पूर्वमुक्तं तथापि दार्ढ्यार्थमीश्वराद्यनुमानकथनार्थञ्च पुनर्वचनम् ॥

ed of omniscience and omnipotence. Or the particle 'but' may express the exclusion of other marks. According to this when the existence of God and the Maharshis is proved, the authority of the Veda, Smṛiti, &c. must be acknowledged because they were promulgated by them. Although this has been stated before it is repeated for the sake of confirming it and of stating the, [mode of] inferring the existence of God, &c. V.

प्रत्यक्षप्रवृत्तत्वात् संज्ञाकर्मणः ॥ १९ ॥

Aph. 19. Because words and works are known by perception to be produced.

[1] In this place also by the aggregative, copulative compound 'word and work,' existence as a single object is denoted with the purpose of implying that the framer of names and the maker of the world are indivisible. He of whose perception paradise, the unforeseen results of pious actions, &c. are objects, wills to frame the terms paradise, unforseen results, &c. As when the bodies of Chaitra, Maitra and others are objects of perception to a father and others, the names Chaitra, Maitra, &c., are given, so the giving of names to a water-pot, a piece of cloth, &c., is dependant on the will of God. Whatever word God wills to be the name of anything is applicable to it, in like manner as every herb that is touched by the edge of a mungoose's teeth is an antidote to the venom of a snake. Therefore a name of this kind is a mark warranting the inference of those beings which are distinguished from ourselves and others. The names also of Maitra and the like which are given by a father to a son are virtually given by God by means of such precepts as, Let a father on the twelfth day give a name [to his child.] Thus it is established that a name is a mark of the existence of God. In like manner a work being an effect is a mark of the being of a God, for the earth, &c., being effects, must have a maker, as is the case with a water-pot. U.

[1] It may be asked, How is the omniscience of the maker of words and works proved? Accordingly it is stated.......A name is produced on perceiving the thing named, and an effect is produced on perceiving the material cause. A father and others on seeing the body of a son and others give it a name such as Chaitra or Maitra, and in like manner a potter and others on seeing a piece of earthenware, &c., make a water-pot, &c. So it is concluded from the nature of the case that the framer of all applicable names, and the maker of the earth, &c., which are effects, must be omniscient, for he must know by perception all such things named, and the material causes of earth, &c. V.

The existence of ether. निष्क्रमणं प्रवेशनमित्याकाशस्य लिङ्गम् ॥२०॥

Aph. 20. Egress and ingress,—such is the mark [of the existence] of ether.

[2] Here the word 'such,' expressive of a class, includes also throwing upwards, &c. It is a doctrine of the Sánkhyas that the motion of tangible bodies, *i. e.* their egress and ingress being impossible without the existence of ether which is a vacuum, enables us to infer that there is another substance called ether. V.

तदलिङ्गमेकद्रव्यत्वात् कर्मणः ॥ २१ ॥

Aph. 21. That is not a mark [of the existence of ether], for an action inheres in one substance only.

[3] This opinion of the Sánkhyas is rejected. That—egress, &c.,—is not a mark, is not a mark of the existence of ether. Since action has one solid substance as its site, action which inheres only in that which is solid cannot warrant an inference of the existence of ether as underlying it. For an effect which is inhererent implies an underlying cause, and there is not between ether and action the relation of that which inheres and that which is inhered in. V.

[1] अत्रापि संज्ञा च कर्म चेति समाहारद्वन्द्वादेकवद्भावः संज्ञाकर्तुर्जगत्कर्तुश्चाभेदसूचनार्थः ॥
तथा हि यस्य स्वर्गापूर्वादयः प्रत्यक्षाः स एव तत्र स्वर्गापूर्वादिसंज्ञाः कर्तुमीष्टे प्रत्यक्षे चैत्रमैत्रादिसंज्ञानिवेशनवत् एवञ्च घटपटादिसंज्ञानिवेशनमपि ईश्वरसङ्केताधीनमेव यः शब्दो यत्रेश्वरेण सङ्केतितः स तत्र साधुः यथा या काचिदोषधिर्नकुलदंष्ट्राग्रस्पृष्टा सा सर्वा ऽपि सर्पविषं हन्तीत्येतादृशी संज्ञा अस्मदादिविशिष्टानां लिङ्गमनुमापकं या ऽपि मैत्रादिसंज्ञा पित्रा पुत्रे क्रियते सा ऽपि द्वादशे ऽहनि पिता नाम कुर्यात् इत्यादि विधिना नूनमीश्वरप्रयुक्तैव तथा च सिद्धं संज्ञाया ईश्वरलिङ्गत्वम् । एवं कर्मापि कार्यमपीश्वरे लिङ्गं तथा हि क्षित्यादिकं सकर्तृकं कार्यत्वात् घटवत् ॥

[1] ननु सर्वज्ञत्वं संज्ञाकर्मकर्तुः कुतः सिद्धमित्य आह । संज्ञायाः संज्ञिप्रत्यक्षसाध्यत्वम् कार्यस्य तूपादानप्रत्यक्षसाध्यत्वं पित्रादिना हि पुत्रादिशरीरं दृष्ट्वैव तत्र चैत्रमैत्रादिसंज्ञा निवेश्यन्ते एवं कुलालादयो ऽपि कपालादिकं दृष्ट्वैव घटादिकं कुर्वन्ति अतो निखिलसाधुसंज्ञाकर्तुस्तादृश संज्ञिप्रत्यक्षस्य क्षित्यादिकार्यकर्तुस्तदुपादानप्रत्यक्षस्य चावश्यकत्वात् सर्वज्ञत्वमर्थवशसम्पन्नमेव ॥

[2] अत्र प्रकारार्थकेतिशब्देनोत्क्षेपणादेरपि ग्रहणं स्पर्शवतां सञ्चारो निष्क्रमणं प्रवेशनञ्च शून्यात्मकाकाशं विना ऽनुपपद्यमानमाकाशनामकं द्रव्यान्तरमनुमापयतीति सांख्यमतम् ॥

[3] तदेतन्मतं निरस्यति । तत् निष्क्रमणादिकम् अलिङ्गम् आकाशस्य लिङ्गं न भवति कर्मणः क्रियाया एकं मूर्तं द्रव्यमाश्रयो यस्य तत्त्वात् तथा च मूर्तमात्रसमवेतं कर्म न समवायितयाकाशानुमानसमर्थं समवेतकार्यं हि समवायिकारणमाक्षिपति न चाकाशकर्मणोः समवायिसमवेतभाव इत्यर्थः ॥

कारणान्तरानुक्लृप्तिवैधर्म्याच्च ॥ २२ ॥

Aph. 22. Also because the properties [of ether] differ from the mark of another cause.

[1] It might be urged that egress, ingress, &c., will warrant the inference of the existence of ether, as being its non-inherent cause. Hence this statement is made. [Egress and ingress are not a mark of the existence of ether] because its properties differ from the mark of another cause, viz., of a non-inherent cause. U.

[2] Agreement (anuklṛipti) is an abstract term formed by a primary (kṛit) affix. The meaning is therefore that since there exists in ether a difference of properties, in consequence of its being a substance, from quality and action the ether or non-inherent cause which is agreed to, *i. e.* allowed by, both disputants, egress &c. cannot warrant the inference of the existence of ether as being its non-inherent cause. V.

संयोगादभावः कर्मणः ॥ २३ ॥

Aph. 23. Non-existence of action results from conjunction.

[3] It is stated that action does not warrant the inference of the existence of ether as its instrumental cause. Since after conjunction there is non-existence, *i. e.* non-production, of action, ether is not in relation to action an instrumental cause. The sense is this:—as it is observed that action [or motion] does not come into being in fruits, leaves, &c., after their conjunction with the ground, the instrumental cause of motion is the non-existence of a particular kind of conjunction, &c., and not ether, for the negation of ether does not involve the negation of action, ether being universally diffused. V.

कारणगुणपूर्वकः कार्यगुणो दृष्टः ॥ २४ ॥

Aph. 24. The quality of an effect is observed to be pre-existent in the quality of the cause.

[1] ननु चासमवायिकारणतयैवाकाशमनुमापयिष्यति निष्क्रमणप्रवेशनादीत्यत आह। कारणान्तरस्य असमवायिकारणस्य या ऽनुक्लृप्तिर्लक्षणं तद्वैधर्म्यादित्यर्थः ॥

[2] अनुक्लृप्तिरिति कृद्विहितो भाव इति न्यायात् अनुक्लृप्तं वादिप्रतिवाद्युभयसम्मतं यत् कारणान्तरम् असमवायिकारणं गुणः कर्म च तद्वैधर्म्यात् द्रव्यत्वरूपतद्वैधर्म्यस्याकाशे सत्त्वात् नासमवायिकारणतयाकाशमनुमापयितुं निष्क्रमणादिकं शक्नोतीत्यर्थः ॥

[3] निमित्तकारणतया ऽपि नाकाशानुमापकं कर्मेत्याह। यतः संयोगात् संयोगानन्तरं कर्मणो ऽभावः अनुत्पादः अत आकाशं न कर्मणि निमित्तकारणमित्यर्थः। अयं भावः फलपत्रादीनां भूम्यादिसंयोगानन्तरं कर्मानुत्पत्तिदर्शनात् संयोगविशेषाभावादिकमेव कर्मणि निमित्तकारणं न त्वाकाशं तद्व्यतिरेकेण कर्मव्यतिरेकस्यासिद्धेस्तस्य व्यापकत्वादिति भावः ॥

[1] The way is prepared for the statement that it is sound that justifies the inference of the existence of ether. The particular quality of an effect is observed to pre-exist in the cause, as the colour of a water-pot, &c., in portions of the water-pot, &c. Accordingly the particular quality sound which is apprehended by the organ of hearing, having no prior existence as the quality of a cause, is not the quality of an effect, but of an eternal substance. Thus it is proved that ether as being that in which sound exists is an eternal substance. V.

कार्यान्तराप्रादुर्भावाच्च शब्दः स्पर्शवतामगुणः ॥ २५ ॥

Aph. 25. Sound is not a quality of tangible things since there appears no other effect.

[2] It might be urged that sound is observed in a lute, flute, tabour, conch shell, drum, &c., which are effects, and that consequently it exists previously as a quality of their cause. Hence this statement is made. Let this be so, then as colour, taste, &c., are observed in threads, in the portions of a pot, &c., and as other homogeneous colour, taste, &c., are perceived in a piece of cloth, a water-pot, &c., so a sound homogeneous with which is observed in the constituent parts of a lute, flute, tabour &c., will be found in the complex whole, in the lute, flute, tabour, &c. But this is not the case. On the contrary it is seen that a lute &c., has its origin in constituent parts destitute of sound, whereas it does not appear that a piece of cloth, a water-pot, &c., have their origin in threads, and pieces of earthenware destitute of colour. Moreover if sound were a particular quality of tangible things a relation of high and higher and low and lower tones would not be observed, for colour, &c., existing in a single complex substance are not perceived to be various in degree; therefore sound is not a particular quality of tangible things. U.

[1] शब्द एव आकाशानुमापक इत्यभिधातुं भूमिकामारचयति। कार्यस्य यो विशेषगुणः स कारणगुणपूर्वक एव दृष्टः यथा घटरूपादिः कपालरूपादिपूर्वकः तथा च शब्दरूपो यो विशेषगुणः श्रोत्रेन्द्रियेणोपलभ्यते तस्य कारणगुणपूर्वकत्वाभावात् न कार्यगुणत्वं किन्तु नित्यद्रव्यस्यैव गुणः शब्द इति शब्दाधारतया नित्यद्रव्यसिद्धिरित्यर्थः ॥

[2] ननु वीणावेणुमृदङ्गशङ्खपटहादौ कार्ये शब्द उपलभ्यते तथा च तत्कारणगुणपूर्वकः स्यादत आह। भवेदेवं यथा तन्तुकपालादिषु रूपरसाद्यनुभूयते तत्सजातीयञ्च रूपरसाद्यन्तरं पटघटादावुपलभ्यते तथा वीणावेणुमृदङ्गाद्यवयवेषु यः शब्द उपलब्धस्तत्सजातीयश्चेत् वीणावेणुमृदङ्गाद्यवयविन्युपलभ्यते न चैवम् प्रत्युत निःशब्दैरेवावयवैर्वीणाद्यारम्भदर्शनात् नीरूपैस्तु तन्तुकपालादिभिः पटघटाद्यारम्भस्यादर्शनात् किञ्च यदि शब्दः स्पर्शवतां विशेषगुणः स्यात् तदा तत्र तारतारतरमन्दमन्दतरादिभावो नानुभूयेत न ह्येकावयव्याश्रिता रूपादयो वैचित्र्येणानुभूयन्ते तस्मान्न स्पर्शवद्विशेषगुणः शब्दः ॥

परत्र समवायात् प्रत्यक्षत्वाच्च नात्मगुणो न मनोगुणः ॥ २६ ॥

Aph. 26. Since it inheres in something else and is known by perception sound is neither a quality of the soul nor a quality of the internal organ.

[1] If sound were a quality of the soul there would be such notions as 'I am played by the breath or hand,' 'I am sounding,' as there are such notions as 'I am happy,' 'I will,' 'I know,' 'I wish,' &c. But this is not the case, but appears to all that a conch shell is played with the breath, and a lute with the hand. Moreover sound is not a quality of the soul, because it is, like colour, apprehended by an external organ. So too if sound were a particular quality belonging to the soul it would be, like pain, &c., perceived by a blind man. It is therefore fairly stated that it much inhere in something else. The reason that it is not a quality of the internal organ is stated to be that it is known by perception. The reason that the words 'soul' and 'internal organ' are not, as they might have been, made into one compound word (átma-manase) is that they may both with equal propriety be said to be known by perception. For the same reason it is implied that it is denied that sound is a quality of space and time. U.

परिशेषाल्लिङ्गमाकाशस्य ॥ २७ ॥

Aph. 27. It remains that [sound] is a mark of ether.

[2] 'Sound' is to be supplied. Sound must exist in something, because it is a quality, like colour, &c. Thus it is proved by a general inference that there is another substance over and above the eight substances [earth, water, light, air, time, space the soul, and the internal organ.] Sound is a quality, because, like colour, &c., it constitutes a class known by one external organ. It will be proved hereafter from its inhering, without continuity, in an eternal substance, that, like knowledge, it is not eternal. The substance proved as a residue is eternal, since there is no proof of its being formed of parts, and universally diffused inasmuch as sound is perceived every where. U.

A. E. G.

*(To be continued.)*

## RAMAYANA, BOOK I.

*(Continued from page 70.)*

'Approach and take, O tiger-king,
This heavenly nectar which I bring,
For it shall give thee sons and wealth,
And bless thee with a store of health.
Give it to those fair queens of thine,
And bid them quaff the drink divine:
And they the princely sons shall bear
Long sought by sacrifice and prayer.'
'Yea, O my lord,' the monarch said,
And took the vase upon his head,
The gift of Gods, of fine gold wrought,
With store of heavenly liquor fraught.
He honoured, filled with transport new,
That wondrous being, fair to view,
As round the envoy of the God
With reverential steps he trod.
His errand done, that form of light
Arose and vanished from the sight.
High rapture filled the monarch's soul,
Possessed of that celestial bowl,
As when a man by want distressed
With unexpected wealth is blest.
And rays of transport seemed to fall
Illuminating bower and hall,
As when the autumn moon rides high,
And floods with lovely light the sky.
Quick to the ladies' bower he sped,
And thus to Queen Kauśalyá said:
'This genial nectar take and quaff.'
He spoke, and gave the lady half.
Half of the nectar that remained
Sumitrá from his hand obtained.
He gave, to make her fruitful too,
Kaikeyí half the residue.
A portion yet remaining there,
He paused awhile to think,
Then gave Sumitrá, with her share,
The remnant of the drink.
Thus on each queen of those fair three
A part the king bestowed.
And with sweet hope a child to see,
Their yearning bosoms glowed.

---

[1] शब्दो यद्यात्मगुणः स्यात् तदाऽहं सुखी यते जाने इच्छामीत्यादिवत् अहं पूर्ये अहं वाद्ये अहं शब्दवानित्यादिधीः स्यात् न त्वेवमस्ति किन्तु शङ्खः पूर्यते वीणा वाद्यते इति प्रतियन्ति लौकिकाः। किञ्च शब्दो नात्मगुणः बाह्येन्द्रियग्राह्यत्वात् रूपादिवत् अपि च शब्दो यद्यात्मयोग्यविशेषगुणः स्याद्बधिरेणाप्युपलभ्येत दुःखादिवत् तस्मात् सुष्ठूक्तं परत्र समवायादिति अमनोगुणत्वे हेतुमाह प्रत्यक्षत्वादिति नात्ममनसोर्गुण इति समासे कर्तव्ये यदसमासकरणं तेन तुल्यन्यायतया प्रत्यक्षत्वादित्यनेनैव हेतुना दिक्कालयोरपि गुणत्वं शब्दस्य प्रतिषिद्धमिति सूचितम् ॥

[2] शब्द इति शेषः। अत्रापि शब्दः क्वचिदाश्रितो गुणत्वात् रूपादिवदिति सामान्यतोदृष्टादष्टद्रव्यातिरिक्तद्रव्यसिद्धिः। गुणश्चायं बाह्यैकेन्द्रियग्राह्यजातीयत्वात रूपादिवत् अनित्यत्वे सति विभुसमवेतत्वात् ज्ञानादिवत् अनित्यत्वञ्च साधयिष्यते। परिशेषसिद्धस्य द्रव्यस्यावयवकल्पनायां प्रमाणाभावान्नित्यत्वं सर्वत्र शब्दोपलब्धेर्विभुत्वम् ॥

The heavenly bowl the king supplied
Their longing souls relieved,
And soon, with rapture and with pride,
Each royal dame conceived.
He gazed upon each lady's face,
And triumphed as he gazed,
As Indra in his royal place
By Gods and Spirits praised.

XVI.

When Vishṇu thus had gone on earth,
From the great King to take his birth,
The self-existent Lord of all
Addressed the Gods who heard his call:
'For Vishṇu's sake, the strong and true,
Who seeks the good of all of you,
Make helps, in war to lend him aid,
In forms that change at will, arrayed,
Of wizard-skill and hero-might,
Outstrippers of the wind in flight,
Skilled in the arts of counsel, wise,
And Vishṇu's peers in bold emprise;
With heavenly arts and prudence fraught,
By no devices to be caught.
Skilled in all weapons' lore and use
As they who drink the immortal juice.
And let the Nymphs supreme in grace,
And maidens of the Minstrel race,
Monkeys and snakes, and those who rove
Free spirits of the hill and grove,
And wandering Daughters of the Air,
In monkey-form brave children bear.
So erst the lord of bears I shaped,
Born from my mouth as wide I gaped.'
Thus by the mighty Sire addressed
They all obeyed his high behest,
And thus begot in countless swarms.
Brave sons disguised in Monkey forms.
Each God, each sage, became a sire,
Each Minstrel of the heavenly quire,
Each Faun, of children strong and good
Whose feet should roam the hill and wood.
Snakes, Gryphons, Spirits, Dragons bold
Had sons too numerous to be told.
Báli, the monkey hosts who led,
High as Mahendra's lofty head,
Was Indra's child. That noblest fire,
The Sun, was great Sugríva's sire.
Tára the mighty monkey, he
Was offspring of Vrihaspati—
Tára the matchless chieftain, boast
For wisdom of the monkey host.
Of Gandhamádan brave and bold
The father was the Lord of Gold.
Nala the Mighty, dear to fame,
Of skilful Viśvakarmá came.
From Agni, Níla bright as flame,
Who in his splendour, might, and worth,
Surpassed the sire who gave him birth.
The heavenly Aśvins swift and fair
Were fathers of a noble pair,
Who, Dwivida and Mainda named,
For beauty like their sires were famed.
Varuṇ was father of Sushen,
Of Śarabh, he who sends the rain.
Hanumán, best of monkey kind,
Was son of him who breathes the wind:
Like thunderbolt in frame was he,
And swift as Garuḍ's self could flee.
These thousands did the Gods create
Endowed with might that none could mate,
In monkey forms that changed at will:
So strong their wish the fiend to kill.
In mountain size, like lions thewed,
Up sprang the wondrous multitude,
Auxiliar hosts in every shape,
Monkey and bear and highland ape.
In each the strength, the might, the mien
Of his own parent God was seen.
Some chiefs of monkey mothers came,
From many a bear and minstrel dame,
Skilled in all arms in battle's shock,
The brandished tree, the loosened rock;
And prompt, should other weapons fail,
To fight and slay with tooth and nail.
Their strength could shake the hills amain,
And rend the rooted trees in twain,
Disturb with their impetuous sweep,
The Rivers' Lord, the Ocean deep,
Rend with their feet the seated ground,
And pass wide oceans at a bound,
Or forcing through their sky their way
The very clouds by force could stay.
Mad elephants that wander through
The forest wilds could they subdue,
And with their furious shout could scare
Dead upon earth the birds of air.
So were the monkey chieftains formed;
Thousands on thousands still they swarmed.
These were the leaders honoured most,
The leaders of the monkey host,
And to each lord and chief and guide
Was monkey offspring born beside.

Then by the bears' great monarch stood
The other roamers of the wood,
And turned, their pathless homes to seek,
To forest and to mountain peak.
The leaders of the Vánar band
By the two brothers took their stand,
Sugríva, offspring of the Sun,
And Báli, Indra's mighty one.
They both endowed with Garuḍ's might,
And skilled in all the arts of fight,
Wandered in arms the forest through
And lions, snakes, and tigers, slew.
But every monkey, ape and bear
Ever were Báli's special care ;
With his vast strength and mighty arm
He kept them from all scathe and harm.
And so this earth with hill, wood, seas,
Was filled with mighty ones like these,
Of various shape and race and kind,
With proper homes to each assigned.
With Ráma's champions fierce and strong
The earth was overspread,
High as the hills and clouds, a throng
With bodies vast and dread.

XVII.

Now when the high-souled monarch's rite,
The Aśvamedh, was finished quite,
Their sacrificial dues obtained,
The Gods their heavenly homes regained.
The lofty-minded saints withdrew,
Each to his place, with honour due,
And kings and chieftains, one and all,
Who came to grace the festival.
And Daśaratha, ere they went,
Addressed them thus benevolent :
'Now may you, each with joyful heart,
To your own realms, O Kings, depart.
Peace and good luck attend you there,
And blessing, is my friendly prayer,
Let cares of state each mind engage,
To guard his royal heritage.
A monarch from his throne expelled
No better than the dead is held,
So he who cares for power and might
Must guard his realm and royal right.
Such care a meed in Heaven will bring,
Better than rites and offering,
Such care a king his country owes,
As man upon himself bestows.
When for his body he provides,
Raiment and every need besides,
For future days should kings foresee,
And keep the present error-free.'

Thus did the King the kings exhort :
They heard, and turned them from the court,
And, each to each in friendship bound,
Went forth to all the realms around.

The rites were o'er, the guests were sped :
The train the best of Bráhmans led,
In which the King with joyful soul,
With his dear wives, and with the whole
Of his imperial host and train
Of cars and servants turned again,
And, as a monarch dear to fame,
Within his royal city came.

Next, Rishyaśring, well-honoured sage,
And Śántá, sought their hermitage,
The King himself, of prudent mind,
Attended him, with troops behind,
And all her men the town outpoured
With saint Vaśishṭha and their lord.

High mounted on a car of state,
O'ercanopied fair Śántá state ;
White oxen drew the car, a band
Of servants marched on either hand.
Great gifts of countless price she bore,
With sheep and goats and gems in store.
Like Beauty's self the lady shone,
With all the jewels she had on,
As happy in her sweet content,
Peerless amid the fair she went.
Not sweet Paulomí's self could be,
More loving to her lord than she.
She who had lived in happy ease,
Honoured with all her heart could please,
While dames and kinsfolk ever vied,
To see her wishes gratified,
Soon as she knew her husband's will,
Again to seek the forest, still
Was ready for the hermit's cot,
Nor murmured at her altered lot.
The King attended to the wild
That hermit and his own dear child,
And in the centre of a throng
Of noble courtiers rode along.
The Sage's son had let prepare
A lodge within the wood, and there

Awhile they lingered blithe and gay,
Then, duly honoured, went away.
The glorious hermit, Rishyaśring,
Drew near and thus besought the King:
'Return, my honoured lord, I pray,
Return, upon thy homeward way.'
The monarch, with the waiting crowd,
Lifted his voice and wept aloud,
And with eyes dripping still to each
Of his good queen's he spake this speech:
'Kauśalyá and Sumitrá dear,
And thou, my sweet Kaikeyí, hear.
All upon Śántá feast your gaze,
The last time for a length of days,'
To Śántá's arms the ladies leapt,
And hung about her neck and wept,
And cried: 'O happy be the life
Of this great Bráhman and his wife.
The Wind, the Fire, the Moon on high,
The Earth, the Streams, the circling Sky,
Preserve thee in the wood, true spouse,
Devoted to thy husband's vows.
And O dear Śántá, ne'er neglect
To pay the dues of meek respect
To the great saint, thy husband's sire,
With all observance and with fire.
And sweet one, pure of spot and blame,
Forget not thou thy husband's claim;
In every change, in good and ill,
Let thy sweet words delight him still,
And let thy worship constant be:
Her lord is woman's deity.
To learn thy welfare, dearest friend,
The King will many a Bráhman send.
Let happy thoughts thy spirit cheer,
And be not troubled, daughter dear.'

These soothing words the ladies said,
And pressed their lips upon her head.
Each gave with sighs her last adieu,
Then at the King's command withdrew.
The King around the hermit went
With circling footsteps reverent,
And placed at Rishyaśring's command
Some soldiers of his royal band.
The Bráhman bowed in turn and cried:
'May fortune never leave thy side.
O mighty King, with justice reign,
And still thy people's love retain.'
He spoke, and turned away his face,
And as the hermit went
The monarch rooted to the place
Pursued with eyes intent.
But when the sage had past from view
King Daśaratha turned him too,
Still fixing on his friend each thought,
With such deep love his breast was fraught.
Amid his people's loud acclaim
Home to his royal seat he came,
And lived delighted there,
Expecting when each queenly dame,
Upholder of his ancient fame,
Her promised son should bear.
The glorious sage his way pursued
Till close before his eyes he viewed
Sweet Champá, Lomapád's fair town,
Wreathed with her Champacs' leafy crown.
Soon as the saint's approach he knew;
The King, to yield him honour due,
Went forth to meet him with a band
Of priests and nobles of the land:
'Hail, sage,' he cried, 'O joy to me!
What bliss it is, my lord, to see
Thee with thy wife and people well,
Returning here again to dwell.
Well is it with thy father, sage,
Who from his woodland hermitage
Has sent full many a messenger
For tidings both of thee and her.
Then joyfully, for due respect,
The Monarch bade the town be decked.
The King and Rishyaśring elate
Entered the royal city's gate:
In front the chaplain rode.
Then loved and honoured with all care
By monarch and by courtier, there
The glorious saint abode.

*(To be continued.)*

## ANCIENT INDIAN HISTORY.

It is now many years that the Sanskrit language has been submitted to the scrutiny of European scholars. It has illustrated the earliest stage of thought and its expression, and furnished a principle for the classification of languages. In the absence of all chronology and history its literature has been made to yield many facts respecting ancient India, which have obtained general assent. Hitherto no detailed political and philosophical history of the Hindus has been attempted. The materials for such a history are uncertain, and likely to remain a subject of controversy. Meanwhile a clear and comprehensive review of Sanskrit researches and their difficulties and uncertainties would be of provisional value. Information of this kind has at present to be sought in a number of works which can hardly interest any but Sanskrit students. The favour with which Sanskrit studies

are viewed in England is due mainly to the more popular of Prof. Max Müller's works. In a different degree Mr. Wheeler's History of India will, no doubt, contribute to the popularity of these studies; and its author may be regarded as in some measure an interpreter between Sanskrit scholars and general English readers. In this work Mr. Wheeler is undertaking to bring together the historical results of Sanskrit studies, with what success must be left to competent judges to determine. A few remarks may here be offered with the purpose of reminding general readers of the uncertainty of these results. But in the first place admiration must be expressed for the object, and in some degree for the execution of Mr. Wheeler's difficult task. He has made a laborious study of the translations and original works of the great European Sanskrit scholars, and consulted learned Hindus, and gives us his conclusions in an interesting and popular form. At the same time much of the oriental style is preserved in the narrative, perhaps many readers will think this too much the case, especially in the second volume where above four hundred pages are devoted to the beauties and deformities of the Rámáyaṇa. Mr. Wheeler tells us in his preface that 'his primary object is not to illustrate Sanskrit literature, or to treat of questions connected with the Sanskrit language, but to compile a political History of India.' In a note in his second volume (p. 409) he adds, 'those who desire to enter upon the larger field of inquiry must give their days and nights to the study of the critical labours of Goldstücker, Max Müller, Lassen, Weber, Benfey, Kuhn, Roth, Fitz-Edward Hall, Cowell, Muir Aufrecht, Monier Williams, Gorresio, and many other scholars in Europe, as well as in this country, who have attained a widely-spread reputation as the pioneers in the study of a comparison of roots and grammars.' It would be unfair, therefore, to object to his work on account of a few occasional inaccuracies in the names of people and places, and the rendering of Sanskrit words. It may be remembered that Macaulay in one of his best essays writes that Surajah Dowlah 'directed, that in memory of his great action Calcutta should thenceforward be called Alinagore, that is to say, the Port of God.'

In the brief notice of the Vedic period at the beginning of the first volume the Vedic religion is said to be a child-like make-believe (p. 11). Should it not rather be regarded as a stage in the growth of thought and language through which, as comparative philology shews us, all nations have had to pass? The actions of living beings and of the powers of nature were expressed in the same words, without any sense of their being applied to the latter by metaphor, and seemed to imply equally a personal agency in both. Language then as now reacted upon and limited thought. The Vedic Aryans were conscious of regularly recurring phenomena, some of which were subject to and others independent of their will They regarded the causes of these, external and internal, as similar to one another. The powers of nature were beings like themselves, but more powerful, and therefore to be propitiated by worship. Can this worship be fairly described as a child-like make-believe, or as the worship of personified abstractions?

There seems to be no reason for identifying the Nástikas of Manu with the Buddhists. Native authorities describe Nástikas generally as persons who deny the existence of a God and of a future life. The compilation of the laws of the Mánavas would seem to have taken place before the systematising of the Sánkhya doctrine, the cosmothetic theory of which appears in them in a rudimentary form. It has been held by some that Buddhism is later than the Sánkhya system, upon which it might be an advance in thought. It may be conjectured that the interval between the compilation of the laws of the Mánavas and that of the Rámáyaṇa was not very great. The Rámáyaṇa appears to describe not the conquest of, but an incursion into, the Dekhan. Its theology would not appear of a much later character, if we excepted certain passages which have been regarded as interpolations. The story in the Bála-káṇḍa of the páyasa oblation, and of the subsequent incarnation of Vishṇu in the four sons of Daśaratha, seems to be a later addition to the narrative of the Aśvamedha. The visit of Váyu to Ráma and Lakshmaṇa when wounded by the serpent-arrows of Indrajit, and many other passages in which Ráma is described as an incarnation of Vishṇu, have been shewn to be very possibly interpolations. Whether the Rákshasas of the Rámáyaṇa can be indentified with the Buddhists, it may be supposed, is very uncertain. The N. W. recension contains no certain allusions to Buddhism. There is no need to assume that Jáváli, who was attached to the orthodox court of Ayodhyá, was a Buddhist. Rávaṇa, the Rákshasa king of Lanká, is represented as of Bráhmanical descent as having obtained his power as a boon from Brahmá, as skilled in the Veda, an observer of religious rites, and finally as consigned to the funeral pile according to the Vedic ritual by Rákshasa bráhmans with Rákshasa mantras. His son Indrajit offers animal sacrifices. Another son, Atikáya, is reverent to the aged, and versed in the Veda. In the Araṇya-káṇḍa (ch. 1) the Rákshasas are described as black, with woolly hair and thick lips. Mr. Wheeler suggests that the episode of Kumbha-karṇa was originally intended as a satirical hit at the Buddhist dogma of Nirváṇa. It is difficult to determine exactly what is meant by the term Nirváṇa, but it appears to be, like the emancipation of the Sánkhyas, the cessation of the relation between subject and object. If it be an eternal rest of the soul, it would hardly have occurred to a Hindu to see any parallel between it and the sleeping of a giant for six months at a time. In contrasting the doctrines of Sákya-muni with those of modern Europe, Mr. Wheeler says, 'The modern European idea reposes upon the conclusion that there is nothing true in the universe of being, saving the life hereafter in heaven'? Of what sect religious or philosophical is this the doctrine? He assigns the same

grounds to Indian and western asceticism (vol. II. p. 540), 'Certain pleasures are lawful, but still they are pleasures; if therefore a man abstain from such pleasures now, he will enjoy pleasures hereafter'. Now Indian asceticism is not regarded as a means of obtaining future pleasures, both pleasure and pain being regarded as evils by the Hindus, but for the sake of liberation from personal existence, absorption in the universal soul. Western ascetics propose to themselves closer communion with God in this world, and the beatific vision of God in eternity.

In the first volume (p. 50, note 5) the story of Judah and Tamar (Gen. XXXVIII. 12—26) is said to bear a curious resemblance in some points to that of Dushyanta and Śakuntalá. It may be remarked that Judah gave his ring to Tamar as a pledge, while Dushyanta gave his to Śakuntalá as a token of recognition. It is stated (p. 122) that Arjuna at the Svayamvara of Draupadí 'offered up a mental prayer to his tutor Droṇa, and then bent the bow.' According to the Calcutta and Bombay editions of the Mahábhárata he called to mind, not Droṇa, but Kṛishṇa, for which may we conjecture Kṛishṇá to have been the original reading? Melchizedek (p. 129) is said to have offered sacrifices to Jehovah. In Genesis (XIV. 18—20) he is described as priest of the most high God, El 'Elyōn. We are told (vol. II. p. 441) that the marriage rites of Nala and Damayantí were performed by the Raja of Vidarbha. In the episode of Nala (V. 40) we read that 'Bhíma *caused* the marriage of Damayantí and Nala *to be celebrated* (गतेषु पार्थिवेन्द्रेषु भीमः प्रीतो महमनाः । विवाहं कारयामास दमयन्त्या नलस्य च ॥). It is said (p. 449) that under the head of the immemorial customs of good men Manu appears to include the usages of different countries, tribes, and families. Manu (II. 18) says that by immemorial customs are intended the traditional rules of the four castes and mixed classes of Brahmávarta.' In this brief space it has been possible only to offer a few suggestions for the consideration of the readers of Mr. Wheeler's first two volumes. We shall wait with much interest for the appearance of the third in which we may expect a fuller treatment of the Bráhmanic period, and the history of Buddhism in India.

A. E. G.

---

TO THE EDITOR OF THE PANDIT.

SIR,—About a year ago a carpenter named Jagat brought a copper plate 20 inches by 17½ inches to Mr. Griffith, the Principal of the Queen's College here, which he had found in his field, when ploughing about 6 miles North-east from the city in the village Sihvar.

It is the grant of a village to a Brahman from Raja Jaya Chandra the Rathaur King of Kanauj, dated 1232 of the Sambat Era (A. D. 1172). It traces the pedigree of the Raja to Yaśovigrah as noted below.* I find a duplicate of this grant, of course with the difference of the name of the village, the donee and the year of grant, published in the Journal of the Asiatic Society of Bengal, Vol. X. Part 1st, January to June 1841, No. 109, page 98, with its translation into English and the following remarks by the Secretary.

"Note on a Copper Land Grant, by Jaya Chandra. The "copper plate whence the accompanying reading in modern "Sanscrit Character and translation are taken, was found "near Fyzabad in Oudh, and a fac-simile of it was forwarded "to me by Lieut. Col. Caulfield then Resident at Lucknow. "The land grants of the donor, Raja Jaya Chandra, are not "uncommon. In the first volume of the Transactions of "the Asiatic Society there is a notice by the late Mr. Colebrooke (p. 441,) of a grant by this Raja, which is however "described at second hand: 'Without having seen the "original,' says Mr. Colebrooke, 'no opinion can be offered "as to the probable genuineness of this monument, (date S. "1220 A. D. 1164) the inscription is however consistent "with Chronology; for Jaya Chandra who is described in "the Ayeen Acberi as supreme Monarch of India, having "the seat of his Empire at Canouj, is there mentioned as "the ally of Shehabuddin in the war with Prithair Raja, "or Pithora, about the year of the Hejira 588, or A. D. "1192; twenty eight years after the date of this grant."

"The date of the grant now published is S. 1243, or "A. D. 1187, twenty three years subsequent to that of the "same monarch noted by Mr. Colebrooke, and only six "years prior to the death of the ill-fated donor, which occurred A. D. 1193. With him expired the dynasty of the "Rathore princes of Canouj."

"The genealogy, as given in the grant now before us, "differs only in the name of the first ancestor mentioned "from that found in Mr. Colebrooke's grant. The name is "there Sripala, here Yaśovigra, but the identity of the "monarch known under these different appellations, has "been already ascertained, and admitted by the highest "authorities, (As. Soc. Jour. Vol. III. p. 339)."

"The phraseology of this grant is not different from those "of Jaya Chundra, which have been already discovered: the "anathema against the resumers of land granted in free "tenure is remarkable for its peculiar bitterness. The "plate, judging from the fac-simile, must be in high preservation, and the date it gives is valuable, as bearing "corroborative testimony to the accuracy of chronological "data."

As the Sanskrit text published in the Journal contains several mistakes, I give it here as read in the College copper plate; but as the College copper plate is very illegible in some parts in the middle, the Journal text has been of great help to me in its restoration. Unfortunately the name of the village is only half readable. However it is evident

---

* 1 Yaśovigrah. 2 Mahíchandra. 3 Chandradeva. 4 Madanapál. 5 Govinda Chandra. 6 Vijaya Chandra. 7 Jaya Chandra.

that Jaya Chandra reigned supreme over the Benares Revenue Division which was conquered and made a dependency of Kanouj by his ancestors. The names of Gádhipura for Ghazeepore, Kuśiká for Baksar (Buxar) and Uttara Kośala mentioned in the plate cannot be but most interesting to those who are conversant with the Rámáyana.

The most striking feature in the plate is the mention of the हर्म्य हिम्बीर नारी. In the Journal's text it is printed हर्म्म हम्बीरनारी, but the translator there has left it blank with five asterisks! In my opinion it alludes to some war between the Muhammadan armies of the west and Jaya Chandra's father, who might have gone as an ally with the other Rájás to protect the frontier and gained a victory. I would translate it "women of the haramsará of the *Amír* (King of Ghazní and Ghor)." Amír being the title of the Khalífás of Baghdád the head of the Muhammadans, was considered in those days as the highest distinction, and it strengthens the assumption of Sir Henry Elliot that हमीर the name of the famous Rajpút hero of Chitour is nothing but a corruption of Amír. The poor poet of Jaya Chandra did not know at the time that his master was destined to be shot by the arrow of a slave of the same Amír upon whose wives' tears he has been thus jesting.

BENARES: 18*th August*, 1869. ŚIVAPRASÁD.

---

स्वस्ति । अकुण्ठोत्कण्ठवैकुण्ठकण्ठपीठलुठत्करः ।
संरम्भः सुरतारम्भे स श्रियः श्रेयसेऽस्तु वः ॥
आसीदशीतद्युतिवंशजातक्ष्मापालमालासु दिवं गतासु ।
साक्षाद्विवस्वानिव भूरिधाम्ना नाम्ना यशोविग्रह इत्युदारः ॥
तत्सुतोभून्महीचन्द्रश्चन्द्रधाम निभं निजं ।
येनापारमकूपारपारे व्यापारितं यशः ॥
तस्याभूत्तनयो नयैकरसिकः क्रान्ताद्विषन्मण्डलो
विध्वस्तोद्धतधीरयोधतिमिरः श्रीचन्द्रदेवो नृपः ।
येनोदारतरप्रतापशमिताशेषप्रजोपद्रवं
श्रीमद्गाधिपुराधिराज्यमसमं दोर्विक्रमेणार्जितं ॥
तीर्थानि काशिकुशिकोत्तरकोशलेन्द्र-
स्थानीयकानि परिपालयताऽधिगम्य ।
हेमात्मतुल्यमनिशं ददता द्विजेभ्यो
येनाङ्किता वसुमती शतशस्तुलाभिः ॥
तस्यात्मजो मदनपालइति क्षितीन्द्र-
चूडामणिर्विजयते निजगोत्रचन्द्रः ।
यस्याभिषेककलशोल्लसितैः पयोभिः
प्रक्षालितं कलिरजः पटलं धरित्र्याः ॥
यस्यासीद्विजयप्रयाणसमये तुङ्गाचलोच्चैश्चल-
न्माद्यत्कुम्भिपदक्रमासमतरङ्गभश्यन्महीमण्डले ।
चूडारत्नविभिन्नतालुगलितस्त्यानासृगुद्भासितः
शेषः पेषवशादिवक्षणमसौ क्रोडेनिलीनाननः ॥
तस्मादजायत निजायत बाहुवल्ली-
बन्धावरुद्धनवराज्यगजोनरेन्द्रः ।
सान्द्रामृतद्रवमुचां प्रभवो गवां यो
गोविन्दचन्द्र इति चन्द्रइवांबुराशेः ॥
न कथमप्यलभन्तरणक्षमास्तिसृषु दिक्षु गजानथवज्रिणः ।
ककुभिबंभ्रमुरभ्रमुवल्लभप्रतिभटा इव यस्य भटागजाः ॥
अजनिविजयचन्द्रोनाम तस्मान्नरेन्द्रोः
सुरपतिरिव भूभृत्पक्षविच्छेददक्षः ।
भुवनदलनहेला हर्म्यहिम्बीरनारी
नयनजलदधारा धौतभूलोकतापः ॥
लोकत्रया क्रमणकेलिविशृंखलानि
प्रख्यातकीर्तिकविवर्णितवैभवानि ।
यस्य त्रिविक्रमपदक्रमभाञ्जिभान्ति-
प्रोज्जृम्भयन्ति बलिराजभयं यशांसि ॥
यस्मिंश्चलत्युदधिनेमिमहीजयार्थ-
माद्यत्करीन्द्रगुरुभारनिपीडितेव ।
याति प्रजापतिपदं शरणार्थिनीभू-
स्तद्बत्तुरङ्गनिवहोत्थरजश्छलेन ॥
तस्मादद्भुतविक्रमादथ जयच्चन्द्राभिधानः पति
र्भूपानामवतीर्ण एष भुवनोद्धाराय नारायणः ।
द्वैधीभावमपास्य विग्रहरुचिं धिक्कृत्यशान्ताशयाः
सेवन्ते यमुदग्रबन्धनभयध्वंसार्थिनः पार्थिवाः ॥
गच्छेन्मूर्छामतुच्छां नयदि कवत्तयेत् कूर्म्मपृष्ठाभिघातः
प्रत्यावृत्तश्रमार्त्तो नमदखिलफणश्वासवात्यासहस्रं ।
उद्योगे यस्य धावद्धरणिधरधुनी निर्झरस्फारधार
भश्यद्दान द्विपाली बहुलभरगलद्धैर्य्यमुद्रः फणीन्द्रः ॥

सोयं समस्तराजचक्रसंसेवितचरणः स च परमभट्टारकमहाराजाधिराजपरमेश्वरपरममाहेश्वरनिजभुजोपार्जितश्रीकन्यकुब्जाधिपत्यश्रीचन्द्रदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरपरममाहेश्वरश्रीमदनपालदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरपरममाहेश्वराश्वपतिगजपतिनरपतिराजत्रयाधिपतिविविधविद्याविचारवाचस्पतिश्रीगोविन्दचन्द्रदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरपरममाहेश्वराश्वपतिगजपतिनरपतिराजत्रयाधिपतिविविधविद्याविचारवाचस्पतिश्रीविजयचंद्रदेवपादानुध्यातपरमभट्टार

कमहाराजाधिराजपरमेश्वरपरममाहेश्वराश्वपतिगजपतिनरपतिराजत्रायाधिपतिविविधविद्याविचारवाचस्पति श्रीमज्जयचंद्र देवोविजयी ॥

माणवपत्तलायां * * * नायीयाम * निवासिनोनिखिलजनपदानुपगतानपिचराजराज्ञी युवराजमन्त्रिपुरोहितप्रतीहारसेनापतिभाण्डागारिकोख्यपटलिकभिषङ् नैमित्तिकान्तः पुरिकदूतकरितुरगपत्तनाकरस्थानगोकुलाधिकारि पुरुषानां ज्ञापयति वोधयत्यादिशतिचविदितमस्तुभवतां ॥

यश्चोपरिलिखितग्रामैा सजलस्थलैा सलोहलवणाकरैा समत्स्याकरैा सगर्त्तोपदैासगिरिगहननिधानैा समधूकाम्रवनवाटिकाविटपतृण*तिगोचरपर्य्यंतैा सोर्द्धाधश्चतुराघाट विशुद्धैा श्वसीमापर्य्यन्तैा द्वात्रिंशदधिकद्वादशशतसम्वत्सरे भाद्रेमासि शुक्लपक्षे त्रयोदश्यां तिथैा रविदिने अङ्कतोपि संवत् १२३२ भाद्रसुदि १३ रवैा अद्येह श्रीमद्विजय वाराणस्यां गङ्गादकेन स्नात्वा विधिवन्मन्त्रदेवमुनिमनुजभूतपितृगणां स्तर्पयित्वा तिमिरपटलपाटलपटुमहसमुष्णरोचिषमुपस्थायैाषधीपति सकलशेखरं समभ्यर्च्य त्रिभुवनत्रातुर्भगवतो वासुदेवस्य पूजां विधाय प्रचुरपायसेन हविषाहविर्भुजं हुत्वा मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धये अस्माभिर्गोकर्णकुशलतापूतकरतलोदकपूर्वकशार्क्कराक्षगोत्राय भार्गवच्यवनाप्नवानैार्व्वजामदग्न्येति पञ्चप्रवराय महापण्डितश्रीमहीधरपैात्राय महामिश्रपण्डित श्रीहालेपुत्राय महापण्डितश्रीहृषीकेशशर्म्मणे ब्राह्मणाय राजपुत्रश्रीहरिश्चन्द्रनामकरणचन्द्रार्क्कं यावच्छासनीकृत्य प्रदत्तैा मया यथा दीयमान भागभोगकरप्रवणिकरप्रभृतिनियतानियतसमस्तादायानाज्ञाविधेयीभूयदा * * ति ॥

भवन्ति चात्रश्लोकाः ।
भूमिं यः प्रतिगृह्णाति यश्च भूमिं प्रयच्छति ।
उभैा तैा पुण्यकर्माणैा नियतं स्वर्गगामिनैा ॥
शंखं भद्रासनं छत्रं वराश्वावरवारणाः ।
भूमिदानस्य चिह्नानि फलमेतत्पुरंदर ॥
षष्टिवर्षसहस्राणि स्वर्गेवसति भूमिदः ।
आच्छेत्ता चानुमन्ताच तान्येव नरके वसेत् ॥
वहुभिर्वसुधा भुक्ता राजभिस्सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
गामेकां स्वर्णमेकं च भूमेरप्यैकमङ्गुलम् ।
हरन्नरकमाप्नोति यावदा भूतसंप्लवम् ॥
स्वदत्तां परदत्तां वा योहरेत् वसुंधरां ।
सविष्टायां कृमिर्भूत्वा पितृभिस्सह मज्जति ॥
वारिहीनेष्वरण्येषु शुष्ककोटरवासिनः ।
कृष्णसर्पास्तु जायन्ते देवब्रह्मस्वहारिणः ॥
नविषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते ।
विषमेकाकिनं हन्ति ब्रह्मस्वं पुत्रपैात्रकम् ॥
तडागानां सहस्रेण वाजपेयशतेन च ।
गवां कोटिप्रदानेन भूमिहर्ता न शुद्ध्यति ॥
सर्वानेतान् भाविनः पार्थिवेन्द्रान् भूयोभूयो याचते रामभद्रः ।
सामान्योयं धर्म्मसेतुर्नृपाणां कालेकाले पालनीयो भवद्भिः ॥
वाताभ्रविभ्रममिदं वसुधाधिपत्य-
मापातमात्रमधुरां विषयोपभोगाः ।
प्राणास्तृणाग्रजलबिन्दुसमा नराणां
धर्म्मस्सखा परमहो परलोकयाने ॥

लिखितं चेदं ताम्रपत्रकं महाक्षपटलिक ठक्कुर श्री श्री पति * * ति ।

---

NOTICES OF BOOKS.

---

*Śrińgára-ratnákara*, by Tárácharaṇa Tarkaratna. This little book on what may be termed the Art of Love is little more than an echo of the reiterations on the subject by later Sanskrit writers on Rhetoric. Just after the manner of such works as the *Rasamañjarí* or the *Sáhitya-Darpaṇa*, Chapter III. it consists of definitions and illustrations of characters, sentiments and bodily conditions with reference to that passion, to which, Bacon aptly says, 'the stage is more beholden than the life of man.' In a few places our author, aiming at originality, ventures to differ with former writers and sometimes talks with reason too, but the innovations he would introduce are not, in our opinion, generally of much consequence. The discovery of another Poetical Relish (रस) named आनन्द रस (Delightful Flavour) consisting merely in a jingle of sounds, ascribed to Hariśchandra indeed pertakes of the ludicrous *Rasa*. Several opinions broached by this gentleman (who is our author's pecuniary supporter) are introduced, it would seem, for the sake of mere compliment.

In conclusion we would observe that the Pandit would have laboured much more usefully, if he had got up an edition of one of the older Rhetorical works, instead of giving a compilation of his own.

---

*Kávya Prakáśiká*. We have received Part XI of this useful series, containing a portion of the text of Śakuntalá with Commentary in Sanskrit and translation in Bengálí.

---

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

# काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

# THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 41. Benares October 1, 1869. Vol. IV.


## ॥ उपदेशसहस्त्र्याः पद्यप्रबन्धः ॥

ननु यदि भोक्ता प्रियशब्दोक्तो निर्विशेषब्रह्मस्वरूप एव तर्हि सर्वो लोको ऽहमहमित्यात्मानमनुभवन्नपि ब्रह्माहमिति कथं नानुभवतीत्याशङ्कायां पदार्थतत्त्वपरिशोधनाभावापराधादेवेति त्वंपदार्थशोधनप्रधानं प्रकरणमारभमाणः साभासान्तःकरणाविवेकाद्याथात्म्येन स्वात्मानं न प्रत्येति सर्वो लोक इति प्रथमं सदृष्टान्तमाह ।

(१) प्रकाशस्थं यथा देहं सालोकमभिमन्यते ।
द्रष्टाभासं तथा चित्तं द्रष्टा ऽहमिति मन्यते ॥ १०३ ॥

प्रकाशस्थमिति । यथा ऽयं जनः स्फीतालोकमध्यगतस्थूलं देहं ततो विलक्षणमपि तेनालोकेन व्याप्तत्वात्सालोकमालोकविशिष्टमभिमन्यते, तथा द्रष्टाभासं चित्तं साक्षिचैतन्यव्याप्तमन्तःकरणं सचेतनं मन्यमानो ऽहं द्रष्टेति साभासं चित्तमेवात्मानं मन्यते, न तद्याथात्म्यं जानातीत्यर्थः । अयं भावः । यथा ऽविशेषेण सर्वत्र विप्रसृतमालोकदेहसंपर्कात्तदाकाराकारितमिव दृश्यमानं देहाभेदेन पश्यति लोक,स्तथा सदा स्वरूपेणानवच्छिन्नप्रकाशस्वभावो ऽप्यात्मा ऽन्तःकरणसंपर्कात्तदाकाराकारित इव भासत इत्यहं कर्ता द्रष्टा भोक्तेत्येवमन्तःकरणस्वभावविशिष्टमेवात्मानमनुभवति लोको न शुद्धमिति ॥ १ ॥

एवमात्मनः साभासान्तःकरणाविवेकमुक्त्वा तद्द्वारेण देहपर्यन्तमविवेकं दर्शयन्नात्माप्रतिपत्तिमेव लोकस्य द्रढयति ।

(२) यदेव दृश्यते लोके तेनाभिन्नत्वमात्मनः ।
प्रपद्यते ततो मूढस्तेनात्मानं न विन्दति ॥ १०४ ॥

यदेवेति । यदेव साभासचित्ताविविक्ततया ऽहंकारास्पदं प्राणेन्द्रियस्थूलदेहपर्यन्तं दृश्यते ऽनुभूयते लोके व्यवहारभूमाविति यावत्,तेन प्राणादिदेहान्तेनात्मनो ऽभिन्नत्वं तादात्म्यं प्रपद्यते, चित्तादिदेहपर्यन्तं चिदाभासप्रतीतेस्तदविवेकात्संघातमेवात्मानं मन्यत इत्यर्थः । यत एवं ततस्तस्मान्मूढो देहादेरात्मनश्चान्योन्यमध्यासकर्ता संस्तेन मौढ्येन हेतुना ऽऽत्मानं ब्रह्मत्वेन न विन्दति न प्रत्येतीत्यर्थः ॥ २ ॥

उक्तमर्थं दृष्टान्तेन साधयति ।

(३) दशमस्य नवात्मत्वप्रतिपत्तिवदात्मनः ।
दृश्येषु तद्वदेवायं मूढो लोको न चान्यथा ॥ १०५ ॥

दशमस्येति । दश हि माणवकाः क्व चिन्नदीं तीर्त्वा पारं गताः सन्तो गणयामासुः कति वयं स्म इति, तत्र गणयिता स्वात्मानं विहाय नवैव गणयति स्मेति प्रसिद्धिः, तत्र यद्वद्यथा दशमस्यात्मनो माणवकस्य गणयितुरविवेकान्नवात्मत्वप्रतिपत्तिः, नवभ्यो ऽन्यमात्मानं न विन्दति, नवैव वयं दशमो नास्तीति भ्रान्तिरुपलभ्यते इत्यर्थः, तद्वत्तथैवायं लोको बुद्ध्यादिषु दृश्येष्वेवात्मतादात्म्यप्रतिपत्त्या मूढः शास्त्राचार्योपदेशहीनः स्वात्मानमन्यथा प्रतिपद्यते,न चान्यथा, वैपरीत्येन बुद्ध्याद्यपोहे ब्रह्मास्मीति स्वरूपयाथात्म्यं न वेत्तीत्यर्थः ॥ ३ ॥

ननु प्रत्यक्षानुभवस्य श्रुतेश्चाविरोधाय प्रत्यगात्मन एव कर्तृत्वादिधर्मवत्त्वं ब्रह्मरूपत्वं चास्तु, किमविवेककल्पनया मूढत्वमास्थीयत इत्यत आह ।

(४) त्वं कुरु त्वं तदेवेति प्रत्ययावेककालिकौ ।
एकनीडे कथं स्यातां विरुद्धा न्यायतो वद ॥ १०६ ॥

त्वं कुर्विति । यद्वा शास्त्राचार्योपदेशहीनो बुद्ध्यादिवैपरीत्येनात्मयाथात्म्यं न जानातीति तस्य पदार्थविवेकाभावान्मोक्षो नोपपद्यत इति सूचितं, तत्र किं पदार्थविवेकेन कृत्यं शास्त्राद्ब्रह्मत्वे प्रतिपन्ने सति ब्रह्माहमस्मीति प्रसंख्यानादेवात्मयाथात्म्यापरोक्ष्यान्मोक्ष उपपद्यत इति प्रसंख्यानविध्यवसरमाशङ्क्य परिहरति । त्वं कुर्विति । एकनीडे एकस्मिन्नेव विषये विरुद्धौ प्रत्ययौ एककालिकावस्याभाजौ कथं स्यातामिति न्यायतो युक्तितो वदेत्यन्वयः । तथा चैकस्मिन्नात्मनि कुरु तदेव त्वमिति कर्तृत्वाकर्तृत्वप्रकारकविरुद्धबुद्ध्योः समसमययोर्मध्ये तादृशशीतोष्णबुद्धिवदवश्यमन्यतरबुद्ध्या ऽन्यतरबाध एव युक्तो, नोभयोः प्रामाण्यमित्यभिप्रायः ॥ ४ ॥

तर्हि दुःखित्वादिभानेन प्रत्यक्षानुभवेन शाब्दस्य ज्ञानस्य बाध्यत्वोपपत्तेस्तदीयस्थैर्यार्थः प्रसंख्यानविधिः स्यादित्यत आह ।

(५) देहाभिमानिनो दुःखं नादेहस्य स्वभावतः ।
स्वापवत्तत्प्रहाणाय तत्त्वमित्युच्यते दृशेः ॥ १०७ ॥

देहेति । यदि दुःखित्वादिकमात्मनः स्वाभाविकं स्यात्तदा तन्न ज्ञानाभ्यासशतेनापि निवर्तयितुं शक्यते, ज्ञानस्याज्ञानमात्रविरोधित्वात्, तथा च तद्विधिर्निरर्थकः । यदा त्वविद्याप्रयुक्तदेहाद्यभिमाननिबन्धनं दुःखित्वादि तदा ऽविद्यानिवृत्त्यैव तन्निवृत्तेरविद्यानिवृत्तेश्च ज्ञानमात्रायत्तत्वान्न कर्मविध्यवकाश इति श्लोकतात्पर्यार्थः । नादेहस्य, देहाभिमानरहितस्येत्यर्थः । तत्र हेतुः 'स्वभावत' इति, अदेहत्वमात्मनः स्वाभाविकं रूपमित्यत्र नियामकमाह । स्वापवदिति । यद्वा नादेहस्येत्यनेन देहाभिमानव्यतिरेकेण न दुःखमस्तीत्युक्तं व्यतिरेकमाह । स्वापवदिति । सुषुप्ताविवेत्यर्थः । दृशेरात्मनस्तत्प्रहाणाय समूलाभिमाननिवृत्तये तत्त्वमिति श्रुत्योच्यते ऐक्यमात्रं बोध्यते न कर्मेत्यक्षरार्थः ॥ ५ ॥

तत्त्वमस्यादिवाक्याद्देहादिव्यतिरिक्तमात्मानमवगच्छतोऽपि दुःख्यहमिति प्रतीतेरनुवृत्तेर्नाभिमाननिबन्धनं दुःखमित्याशङ्क्य, तद्विशिष्टात्मदर्शस्याभासत्वान्मैवमित्याह ।

(६) दृशेश्छाया यदारूढा मुखच्छायेव दर्शने ।
पश्यंस्तं प्रत्ययं योगी दृष्ट आत्मेति मन्यते ॥ १०८ ॥

दृशेरिति । दर्शयतीति दर्शनं दर्पणादि, तस्मिन् मुखच्छाया मुखाभासो मुखप्रतिबिम्बरूपा यथा आरूढा भवति तद्वद्दृशे प्रत्यगात्मनः छाया आभासो यदारूढा यस्मिन् संक्रान्तेव भवति तं प्रत्ययं प्रत्याययतीति प्रत्ययो ऽहंकारस्तं साभासमन्तःकरणं पश्यन्नहमित्युपलभ्यमानो योगी अग्रहणाविद्यादियोगवान् पुमानात्मा दृष्ट इति मन्यते । यथा कश्चिद्दर्पणमुखस्वभावाविवेकाद्यथादृष्टदर्पणदोषमालिन्याल्पत्वादिविशिष्टमेव स्वमुखं मन्यते, तथा ऽयं महाजन उपाधिदोषैरास्कन्दितमिव तदविवेकादात्मानं पश्यन्नहं कर्ता दुःखीत्यभिमन्यत इत्यर्थः । तथा चाहमिति दर्शनस्य कल्पितात्मविषयत्वाद्युक्तं दुःखित्वस्याविवेकाभिमाननिबन्धनत्वमिति न सम्यगात्मानं वाक्यादवगच्छतो दुःखित्वाद्यनुवृत्तिरुपपद्यते, कदा चित् प्रतिभानस्य बाधितानुवृत्तिमात्रत्वादिति भावः ॥ ६ ॥

यदि साभासाहंकारमात्मानं पश्यन्न सम्यग्दर्शी, कस्तर्हि सम्यग्दर्शीत्यपेक्षायामाह ।

(७) तं च मूढं च यद्यन्यं प्रत्ययं वेत्ति नो दृशेः ।
स एव योगिनां श्रेष्ठो नेतरः स्यान्न संशयः ॥ १०९ ॥

तं चेति । तमुपाधिभूतं प्रत्ययमहंकारं मूढं च मोहात्मकमविवेकमन्यं चोपाधिगतमाभासं दुःखादिकं वा यदि वेत्ति साक्ष्यमेवेदं सर्वमिति साक्ष्यत्वेनैव जानाति न दृशेरात्मनः साक्षिणः संबन्धीत्येव न वेत्ति य एवं विवेकमतिः स एव योगिनां युज्यते ऽनेनेति योगस्तत्त्वज्ञानं तद्विद्यते येषां ते योगिनस्तेषां श्रेष्ठः प्रियतमः सम्यग्दर्शीत्यर्थः, नेतरः, पूर्वोक्तसाहंकारात्मदर्शी, न संशयः, संशयो ऽत्र न कर्तव्यः ।

"अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति"

इति भगवद्वचनादित्यर्थः ॥ ७ ॥

सर्वस्य लोकस्यात्मत्वेन भासमानो ऽप्यहंकारश्चेदनात्मत्वेन त्यज्यते तदा तदन्यस्य त्वंपदार्थस्यादर्शनात् तत्त्वमस्यादिवाक्यस्य निरालम्बनत्वापत्तिरित्याशङ्क्याहंकारादिविविक्तस्य त्वमर्थस्य श्रुत्यैवोपपादितत्वान्मैवमित्याह ।

(८) विज्ञातेर्यस्तु विज्ञाता स त्वमित्युच्यते यतः ।
स स्यादनुभवस्तस्य ततो ऽन्यो ऽनुभवो मृषा ॥ ११० ॥

विज्ञातेरिति । "नहि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते न विज्ञातेर्विज्ञातारं विजानीयाः" इति श्रुतौ विज्ञातिशब्दनिर्दिष्टाया बुद्धिवृत्तिरूपाया विज्ञातेरनित्याया विज्ञातारं नित्यविज्ञप्तिरूपेण व्याप्तारं त्वं न विजानीया इति । यस्तु विज्ञातेर्विज्ञातिरूपो ऽविषयभूतः सर्वसाक्षी प्रतिपन्नः स सर्वावभासक एव त्वमिति त्वंशब्देन तत्त्वमसिवाक्ये उच्यते, नाहंकारात्मतया, यतो यस्मात्ततस्तमवलम्ब्य तत्त्वमस्यादिवाक्यप्रवृत्तेर्न निरालम्बनत्वशङ्कावकाश इति शेषः । तस्य

त्वंपदार्थस्य स एव श्रुत्युक्तप्रकारो ऽनुभवः सम्यगनुभवः स्या-त्ततोऽन्यो बुद्धितत्स्थाभासविशिष्टरूपतया ऽनुभवो मृषा मिथ्या ऽध्यास इत्यर्थः ॥ ८ ॥

नन्वविषयश्चेदात्मा श्रुत्या निवेद्यते कथं तर्हि तस्यानुभवो, ऽनुभवरूपत्वात्तस्य नानुभवापेक्षेति चे,न,अन्यत्रानुभाव्यानुभवयोर्भेददर्शनादित्याशङ्क्य जडत्वाजडत्वाभ्यां विशेषोपपत्तेर्मैवमित्याह ।

(६) दृशिरूपे सदा नित्ये दर्शनादर्शने मयि ।
कथं स्यातां ततो नान्य इष्यते ऽनुभवस्ततः ॥ १११ ॥

दृशिरूपे इति । यस्य स्वसत्तायां प्रकाशव्यभिचारस्तस्यागन्तुकज्ञानसापेक्षत्वात्स्वान्याज्ज्ञानागमापायनिबन्धने दर्शनादर्शने स्यातां, सदा दृशिरूपे ज्ञानस्वरूपे मयि सत्ये नित्ये ऽन्यनिरपेक्षसत्ताके स्वरूपतो ज्ञानतश्च नित्ये इति यावत्, दर्शनादर्शने कथं स्यातां न कथमपीत्यर्थः । ततस्तस्मात्कारणात्ततः स्वरूपादन्यो ऽनुभवो नेष्यत इति योजना ॥ ९ ॥

उक्तमेव नित्यदृष्टरूपत्वमात्मनः स्फुटयति ।

(१०) यत्स्थस्तापो रवेर्देहे दृशेः स विषयो यथा ।
सत्त्वस्थस्तद्वदेवेह दृशेः स विषयस्तथा ॥ ११२ ॥

यत्स्थस्ताप इति । यद्वा सुखदुःखादियुक्तत्वेनात्मनो भानाच्च नित्यदृशिमात्रत्वमित्याशङ्क्याह । यत्स्थस्ताप इति रवेस्तापो देहे भवन् यत्स्थो यत्प्रदेशस्थितो भवति स तापो यथा स्वाश्रयप्रदेशविशिष्ट एव दृशेरात्मनो विषयस्तद्वदेवेह व्यवहारकाले सत्त्वस्थो ऽन्तःकरणस्थ एव भवति स सुखदुःखादिरूपस्तापस्तथा स्वाश्रयान्तःकरणसहित एव दृशेर्विषयो न दृगात्मसमवेत इत्यर्थः,अतस्तापस्यान्यधर्मत्वेनैवानुभवादात्मा नित्यचैतन्यमात्रस्वभाव एवेति भावः । अथ वा देहे भवन् रवेस्तापो यत्स्थो यस्मिन् देहे स्थितः स देह एव तापविशिष्टस्तप्तो ऽहमिति मन्यमानस्य दृशेर्लौकिकस्यात्मनो विषयो यथा तद्वदेव विषयसंपर्कजनितः सुखदुःखादितापः सत्त्वस्थो ऽन्तःकरणस्थ इति सो ऽन्तःकरणाख्यः सुखादितापविशिष्टस्तथैव दृशेः साक्षिणो विषय इत्यर्थः । तथा च सुख्यहमित्याद्यभिमानस्य देहतापेन तदध्यासात्तप्तो ऽहमित्यभिमानवत् स्वदृश्यान्तःकरणाध्यासनिबन्धनत्वाद्विवेकिनो दुःखादिमत्तया ऽऽत्मा कदापि न भासत इति भावः ॥ १० ॥

आत्मनः सुखादियुक्तान्तःकरणसंबन्धाभावं स्फुटयन् विविक्तस्वरूपमनुसंधत्ते ।

(११) प्रतिषिद्धेदमंशो ज्ञः खमिवैकरसो ऽद्वयः ।
नित्यमुक्तस्तथा शुद्धः सोऽहं ब्रह्मास्मि केवलः ॥ ११३ ॥

प्रतिषिद्धेति । स्पष्टार्थः ॥ ११ ॥

यस्मादेवं विचार्यमाणे ऽहं ब्रह्मैव तस्मान्न साक्षिरूपस्य मम कुत्रापि स्वरूपभेदो ऽस्तीत्यद्वयात्मतत्त्वमाविष्करोति ।

(१२) विज्ञातुर्नैव विज्ञाता परो ऽन्यः संभवत्यतः ।
विज्ञाता ऽहं परो मुक्तः सर्वभूतेषु सर्वदा ॥ ११४ ॥

विज्ञातुरिति । सर्वविज्ञातृरूपादात्मनो ऽन्यो, यतः परो व्यापको विज्ञाता नैव संभवति, अतो ऽहमेव परो विज्ञाता सर्वभूतेषु स्थावरजङ्गमेषु सदा सर्वदा एवं सर्वविज्ञेयतद्धर्मरहितत्वान्मुक्तश्चेत्यर्थः ॥ १२ ॥

एवं श्रुत्युपदेशात्सर्वत्र सर्वदा ऽद्वयमात्मानमनुसंदधानस्यापि ब्रह्मविदहमस्मीत्यभिमानात्स्यात्सविशेषत्वमित्यत आह ।

(१३) यो वेदालुप्त * द्रष्टृत्वमात्मनो ऽकर्तृतां तथा ।
ब्रह्मवित्त्वं तथा मुक्त्वा स आत्मज्ञो न चेतरः ॥ ११५ ॥

यो वेदेति । यो ब्रह्मवित्त्वंमुक्त्वा ब्रह्मविदहमस्मीत्यभिमानं त्यक्त्वा यथा श्रुत्युक्तं तथा ऽऽत्मनो ऽलुप्तचिन्मात्रतया द्रष्टृत्वं तथा ऽकर्तृतां च वेद स आत्मज्ञः आत्मतत्त्वब्रह्मविन्न चेतरो यो ऽभिमानलेशमपि भजत इत्यर्थः ॥ १३ ॥

ननु ब्रह्मात्मज्ञानस्यात्मनि विद्यमानत्वात्कथं ब्रह्मवित्त्वाभिमानत्यागो ऽतो नात्यन्तं निर्विशेष आत्मेत्यत आह ।

(१४) ज्ञातैवाहमविज्ञेयः शुद्धो मुक्तः सदेत्यपि ।
विवेकी प्रत्ययो बुद्धेर्दृश्यत्वान्नाशवान्यतः ॥ ११६ ॥

ज्ञातैवेति । ज्ञातैवाहमित्यादिरूपो यो विवेकी विवेकवान् विविक्तात्मनिष्ठ इति यावत् प्रत्ययो बुद्धेर्बाधेच्छायां यो वृत्तिरूपः स दृश्यत्वात्साक्षिभास्यत्वान्नाशवान् नश्यत्येव यतो यस्मात्तस्मान्नास्ति ब्रह्मविदो ऽभिमानलेशस्याप्यवकाश इत्यर्थः, यथा कतकबीजरजः कलुषिते जले प्रक्षिप्तं जलगतसकलरजो विलापयत्स्वयमपि विलीयमानं सलिलमनाविलं करोति, तथा यथोक्तविवेकबुद्धिवृत्तिरपि परे प्रत्यगात्मनि संसिक्ता तद्गतसकलविशेषमुन्मूलयन्तो स्वयमप्युन्मूलिता प्रत्यगात्मानं निरस्तसमस्तविशेषमनाविलमापादयतीति भावः ॥ १४ ॥

नन्वात्मचैतन्यप्रतिभासोपि नाशवा,नात्मप्रकाशत्वा,त्पक्तबुद्धिप्रत्ययवदिति चेत्, मैवं, कारकाधीनात्मलाभत्वस्योपाधित्वादित्याह ।

(१५) अलुप्ता त्वात्मनो दृष्टिर्नोत्पाद्या कारकैर्यतः ।
दृश्यया चान्यया दृष्ट्या जन्यता ऽस्याः प्रकल्पिता ॥ ११७ ॥

अलुप्तेति । उपाधेः साधनव्यापकत्वमाशङ्क्य प्रत्याह । दृश्ययेति चेति । अस्या आत्मस्वरूपाया दृष्टेर्जन्यता तु दृ-

* दृष्टित्वमिति पाठो ज्यायान् ।

श्यया ऽन्यया बुद्धिवृत्तिरूपया स्वरूपदृष्टेर्विशेषाकाराभिव्यक्त्युपाधिभूतया प्रकल्पिता आरोपिता घटजन्मना घटाकाशजन्मवदिति नास्त्यतः साधनव्यापकत्वमित्यर्थः ॥ १५ ॥

तदेवमात्मन्यव्यभिचाराच्चित्प्रकाशस्य नित्यत्वा"द्यो वेदालुप्तदृक्त्व"मित्यत्रोक्तं नित्यदृष्टिरूपत्वमुपपाद्य "कर्तृतां तये"त्युक्तं निर्विकारत्वमुपपादयति द्वाभ्याम् ।

(१६) देहात्मबुद्ध्यपेक्षत्वादात्मनः कर्तृता मृषा ।
नैव किं चित्करोमीति सत्या बुद्धिः प्रमाणजा ॥ ११८ ॥

देहात्मबुद्धीति । देहात्मबुद्धि,र्मिथ्या बुद्धि,स्तत्पूर्वकत्वात्कर्तृत्वादिरात्मनो मृषा नैव किं चित्करोमीत्यकर्त्रात्मबुद्धि"र्निष्कलं निष्क्रियं शान्त"मित्यादिप्रमाणजा ऽतः सत्या देहात्मबुद्धेरप्रमाणजाया बाधिकेत्यर्थः ॥ १६ ॥

इतो ऽपि कर्तृत्वमात्मनो न परमार्थमित्याह ।

(१७) कर्तृत्वं कारकापेक्षमकर्तृत्वं स्वभावतः ।
कर्ता भोक्तेति विज्ञानं मृषैवेति सुनिश्चितम् ॥ ११९ ॥

कर्तृत्वं कारकापेक्षमिति । असङ्गे निरवयवे आत्मनि कारकसंसर्गस्य परमार्थतो ऽनुपपत्तेरकर्तृत्वस्य स्वाभाविकत्वात्कर्ता भोक्ता ऽऽत्मेति विज्ञानं मृषैव न परमार्थ इति सुनिश्चितं नित्यनिर्मल एवात्मेत्यर्थः ॥ १७ ॥

तदेवं परिशोधितपदार्थतत्त्वस्य वाक्यादेवाहं ब्रह्मास्मीति निरपवादे विज्ञाने जाते सति नियोज्यो ऽहमिति बुद्धेरुन्मूलितत्वाच्च प्रसंख्यानविध्यवकाश इत्याह ।

(१८) एवं शास्त्रानुमानाभ्यां स्वरूपे ऽवगते सति ।
नियोज्यो ऽहमिति ह्येषा सत्या बुद्धिः कथं भवेत् ॥ १२० ॥

एवं शास्त्रानुमानाभ्यामिति । शास्त्रं

"विज्ञातेर्यस्तु विज्ञाता स त्वमित्युच्यते यतः"

इत्यत्र दर्शितं "यत्स्यस्तापो रवेर्देहे" इत्यत्रोक्तमनुमानं ताभ्यामित्यर्थः ॥ १८ ॥

ब्रह्मविदो नियोज्यत्वादिबुद्धिर्नैव भवतीत्यत्र निर्विकारत्वादिकं हेतुं वदन् प्रकरणार्थमुपसंहरति ।

(१९) यथा सर्वान्तरं व्योम व्योम्नो ऽप्यभ्यन्तरो ह्यहम् ।
निर्विकारो ऽचलः शुद्धो ऽजरो मुक्तः सदा ऽद्वयः ॥ १२१ ॥

॥ इति प्रकाशप्रकरणम् ॥

यथा सर्वान्तरमिति ॥ १९ ॥

इति प्रकाशप्रकरणं द्वादशं विवृतम् ॥ १२ ॥

तदेवं पदार्थतत्त्वपरिचयाभावादेव वाक्यार्थाप्रतिपत्तिर्जनस्येति तत्परिचयमात्रादेव वाक्याद् वाक्यार्थयाथात्म्यावभासंभवे प्रसंख्यानादिविधिरनर्थको ऽनुपपन्नश्चेत्युक्त,मिदानीं पूर्वप्रकरणान्ते "निर्विकारो ऽचलः शुद्ध" इति यदुक्तमात्मनः शुद्धत्वमचलत्वं च तत्स्फुटीकर्तुं प्रकरणान्तरं प्रस्तौति ।

(१) अचक्षुष्ट्वान्न दृष्टिर्मे तथा ऽश्रोत्रस्य का श्रुतिः ।
अवाक्त्वान्न तु वक्तिः स्यादमनस्त्वान्मतिः कुतः ॥ १२२ ॥

अचक्षुष्ट्वादिति । दृष्टिशब्देन चक्षुरिन्द्रियद्वारकबुद्धिवृत्तिर्बहिः प्रसृता रूपादिविषयोपरञ्जिता ज्ञानातिक्रियात्मिकोच्यते, सा दृष्टिर्न मे ऽस्ति मद्विकारतया मद्धर्मभूता सा न भवतीत्यर्थः । तत्र हेतुरचक्षुष्ट्वादिति । चक्षुर्हि देहदेशाश्रितं भौतिकं करणं न मदाश्रितमित्यन्वयव्यतिरेकाभ्यां निश्चितमिति न हेत्वसिद्धिशङ्का,एवं का श्रुतिरित्यादिषु योज्यं, तथा च तत्तदिन्द्रियद्वारकबुद्धिवृत्तिरूपदृष्ट्यादिक्रियाहीनत्वात्सिद्धमात्मनो ऽचलत्वं शुद्धत्वं चेति भावः ॥ १ ॥

तथा कर्तृत्वज्ञातृत्वविकारहेतुप्राणबुद्ध्योरभावादपि शुद्ध इत्याह ।

(२) अप्राणस्य न कर्मास्ति बुद्ध्यभावे न वेदिता ।
विद्याविद्ये ततो न स्तश्चिन्मात्रज्योतिषो मम ॥ १२३ ॥

अप्राणस्येति । चिन्मात्रज्योतिषः सदा प्रकाशमानचिदेकरसस्य विद्याविद्ये ज्ञानतदभावौ ज्ञानक्रिये वा न स्तस्तयोरपि बुद्ध्यवस्थाविशेषत्वादात्मनश्च बुद्ध्यभावादिति सिद्धा शुद्धतेत्यर्थः ॥ २ ॥

उक्तधर्मजातस्यात्मन्यभावेन शुद्ध्यादिसिद्धावशरीरत्वमेव हेतुरित्यभिप्रेत्य चिन्मात्रज्योतिःस्वरूपं विशेषणैर्विशदयति ।

(३) नित्यमुक्तस्य शुद्धस्य कूटस्थस्याविचालिनः ।
अमृतस्याक्षरस्यैवमशरीरस्य सर्वदा ॥ १२४ ॥

नित्यमुक्तस्येति । विद्याविद्ये न स्त इति पूर्वेणान्वयः । शुद्धत्वान्नित्यमुक्तत्वमविचालित्वात् कूटस्थत्वमक्षरत्वादमृतत्वमिति विशेषणानां योजना, त्रिष्वपि हेतुरशरीरस्येति नहि शरीरसंबन्धमन्तरेणात्मनो ऽशुद्धिचलनक्षरणानि निरूपणपथमवतरन्ति, अतः सदैवाशरीरत्वात्सर्वदा शुद्ध इत्यादि योज्यम् ॥ ३ ॥

आत्मनः षडूर्मिसंबन्धाभावादपि सिद्धा शुद्धतेत्याह ।

(४) जिघत्सा वा पिपासा वा शोकमोहौ जरामृती ।
न विद्यन्ते ऽशरीरत्वाद् व्योमवद्व्यापिनो मम ॥ १२५ ॥

जिघत्सेति । खादितुमिच्छा जिघत्सा पातुमिच्छा पिपासा अन्यत्प्रसिद्धम्,अत्राशरीरत्वादित्युपलक्षणमप्राणत्वादमनस्त्वाच्चेत्यर्थः । तथा चोक्तम् ।

"प्राणस्य क्षुत्पिपासे द्वे मनसः शोकमोहकौ ।
जरामृत्यू शरीरस्य षडूर्मिरहितः शिवः" ॥

इति ॥ ४ ॥

इदानीमुक्तसकलेन्द्रियवृत्तिप्रतिषेधोपलक्षणतया, स्पर्शरसनसंबन्धं प्रतिषिध्याविर्भावतिरोभावहानतया विशुद्धचिद्रूपत्वमुक्तमुपसंहरति ।

(५) अस्पर्शत्वान्न मे स्पृष्टिर्नाजिव्हत्वाद्रसज्ञता ।
नित्यविज्ञानरूपस्य ज्ञानाज्ञाने न मे सदा ॥ १२६ ॥

अस्पर्शत्वादिति । स्पर्शनेन्द्रियरहितत्वादित्यर्थः ॥ ५ ॥

आत्मनो दृष्ट्यादयो न सन्तीत्युक्तेऽर्थे उपपत्तिमाह ।

(६) या तु स्यान्मानसी वृत्तिश्चाक्षुष्का रूपरञ्जना ।
नित्यमेवात्मनो दृष्ट्या नित्यया दृश्यते हि सा ॥ १२७ ॥

या तु स्यादिति। चाक्षुष्का चक्षुर्द्वारजनिता, रूपरञ्जना रूपाकाराकारिता या तु मानसी वृत्तिः, स्याच्छब्दो भवतीत्यर्थे, येवंविधा वृत्तिरस्ति सा ऽऽत्मरूपया नित्यया दृष्ट्या चैतन्यप्रकाशलक्षणया नित्यमेव दृश्यते प्रकाश्यते, हि प्रसिद्धमनुभवसिद्धमेवैतदित्यर्थः ॥ ६ ॥

तथा च न दृष्ट्यादयश्चिदात्मीया,स्तद्दृश्यत्वा,द्यो येन दृश्यते न स तदीयो, यथा रूपादि,रिति सिद्धमात्मनो दृष्ट्यादिराहित्येन शुद्धत्वादीत्यभिप्रेत्य चक्षुर्द्वारकवृत्तावुक्तं न्यायं वृत्त्यन्तरेष्वतिदिशति ।

(७) तथा ऽन्येन्द्रिययुक्ता या वृत्तयो विषयाञ्जनाः ।
स्मृतीरागादिरूपा च केवलान्तर्मनस्यपि ॥ १२८ ॥

यथेति । विषयाञ्जना विषयोपाधिका विषयाकारा इति यावत् । या च केवला चक्षुरादिद्वारनिरपेक्षा ऽन्तर्मनसि शरीरान्तर्वर्त्तिनि चित्ते स्मृतिः रागादिरूपा सा ऽपि पूर्वोक्तया ऽऽत्मदृष्ट्या दृश्यत इत्यन्वयः ॥ ७ ॥

किं च स्वप्नावस्थायां विद्यमाना मनःपरिणामरूपा विषयाकारा वृत्तयस्ततो व्यतिरिक्तस्यैव द्रष्टुर्दृश्या यथा संप्रतिपन्नास्तथा जाग्रद्दृश्या अपि दृश्यत्वात्स्वव्यतिरिक्तस्यैव द्रष्टुर्दृश्या इत्याह ।

(८) मानस्यस्तद्वदन्यस्य दृश्यन्ते स्वप्नवृत्तयः ।
द्रष्टुर्दृष्टिस्ततो नित्या शुद्धा ऽनन्ता च केवला ॥ १२९ ॥

मानस्य इति । मानस्यः स्वप्नवृत्तयो ऽन्यस्य साक्षिणो दृश्यन्ते दृश्यत्वेन विपरिवर्त्तन्त इत्यर्थः । तद्वज्जाग्रद्वृत्तय इति शेषः । सर्वदृष्टीनां कूटस्थदृष्टिभास्यत्वे सिद्धे फलितमाह, द्रष्टुरिति ॥ ८ ॥

कूटस्था चेदात्मदृष्टिरिष्टा कथं तत्रान्यथा प्रथेत्याशङ्क्य वृत्तिमदन्तःकरणाविवेकादेवेत्याह ।

(९) अनित्या सा ऽविशुद्धेति गृह्यते ऽत्राविवेकतः ।
सुखी दुःखी तथा चाहं दृश्ययोपाधिभूतया ॥ १३० ॥

अनित्येति । अविशुद्धेति छेदः । उपाधिभूतया दृश्यया दृष्ट्या सहाविवेकतो विवेकाग्रहादत्र व्यवहारभूमौ सा नित्या शुद्धा चात्मदृष्टिरनित्या ऽविशुद्धेति च गृह्यते इति योजना । तथा ऽहं सुखी दुःखीति च मन्यते इत्युत्तरश्लोकगतेनान्वयः ॥ ९ ॥

अविवेकनिबन्धनान्मिथ्याभिमानादेव संसारप्राप्तिरित्युक्तमेव स्फुटयति ।

(१०) मूढया मूढ इत्येवं शुद्धया शुद्ध इत्यपि ।
मन्यते सर्वलोको ऽयं येन संसारमृच्छति ॥ १३१ ॥

मूढयेति ॥ १० ॥

कथं तर्हि संसारनिवृत्तिरित्यपेक्षायां तदुपायं ब्रुवन्मुमुक्षुं शिक्षयति ।

(११) अचक्षुष्ट्वादि शास्त्रोक्तं सबाह्याभ्यन्तरं ह्यजम् ।
नित्यमुक्तमिहात्मानं मुमुक्षुश्चेत्सदा स्मरेत् ॥ १३२ ॥

अचक्षुष्ट्वादीति । इह प्राणिनां मध्ये यः कश्चिन्मुमुक्षुश्चेत्स्यात्स तर्हि स्वमात्मानमुक्तरूपं सदा स्मरेत् श्रुत्याचार्योपदिष्टमनवरतमनुसंदधीतेति योजना ॥ ११ ॥

यदात्मनश्चक्षुरादिराहित्यं प्राक् सिद्धवदुक्तं तत्र प्रमाणमाह ।

(१२) अचक्षुष्ट्वादिशास्त्राच्च नेन्द्रियाणि सदा मम ।
"अप्राणो ह्यमनाः शुभ्र,, इति चाथर्वणे वचः ॥ १३३ ॥

अचक्षुष्ट्वादिशास्त्राच्चेति । "अचक्षुष्कमश्रोत्रमवागमन" इत्यादि बृहदारण्यके यथा ऽऽत्मरूपमुक्तं तथा मुण्डके ऽप्युक्तमित्याहाप्राण इति ॥ १२ ॥

आत्मनो निर्विशेषत्वे श्रुत्यन्तरमुदाहरति ।

(१३) शब्दादीनामभावश्च श्रूयते मम काठके ।
अप्राणो ह्यमना यस्मादविकारी सदा ह्यहम् ॥ १३४ ॥

शब्दादीनामिति ।

"अशब्दमस्पर्शमरूपमव्ययं
तथा ऽरसं नित्यमगन्धवच्च यत् ।
अनाद्यनन्तं महतः परं ध्रुवं
निचाय्य तं मृत्युमुखात्प्रमुच्यते" ॥

इति काठके श्रूयते इत्यर्थः । उक्तं प्रमाणमनूद्य फलितमाहाप्राण इति । एतदचक्षुष्ट्वादेरप्युपलक्षणम् ॥ १३ ॥

अविकारित्वनिश्चयफलमाह ।

(१४) विक्षेपो नास्ति तस्मान्मे न समाधिस्ततो मम ।
विक्षेपो वा समाधिर्वा मनसः स्याद्विकारिणः ॥ १३५ ॥

विक्षेप इति । तस्मादविकारित्वादित्यर्थः । ततो, विक्षेपाभावादित्यर्थः । विक्षेपनिवृत्तिरूपत्वात्समाधेस्तदभावे तदभावः । कस्य तर्हि समाधिविक्षेपावित्यपेक्षायां विकारवत एवेति वदन्नविकारिणस्तदभावं द्रढयति, विक्षेपो वेति ॥ १४ ॥

मनोवद्विकारित्वाद् विकारिमनस्तादात्म्याद्वा विक्षेपसमाधी आत्मनि संभाव्येयातां तदुभयाभावात्तौ न स्त इत्याह ।

(१५) अमनस्कस्य शुद्धस्य कथं तत्स्याद् द्वयं मम ।
अमनस्त्वाविकारित्वे विदेहव्यापिनो मम ॥ १३६ ॥

अमनस्कस्येति । शुद्धस्याविकारिण इत्यर्थः । कथममनस्कत्वमविकारित्वं चेत्यत आहामनस्त्वाविकारित्वे इति । विदेहश्चासौ व्यापी चेति विदेहव्यापी तस्येति विग्रहः । विदेहत्वादमनस्कत्वं, व्यापित्वादविकारित्वं चेत्यर्थः ॥ १५ ॥

कथं तर्हि जिज्ञासावस्थायां समाध्यादिकं कर्त्तव्यमिति ते बुद्धिरासीदिति तत्राह ।

(१६) इत्येतद्यावदज्ञानं तावत्कार्यं ममाभवत् ।
नित्यमुक्तस्य शुद्धस्य बुद्धस्य च सदा मम ॥ १३७ ॥

इत्येतदिति । सदा नित्यमुक्तबुद्धस्यापि मम यावत्पर्यन्तमेतन्नित्यशुद्धत्वादिविषयमज्ञानमासीत्तावन्मम कार्यं समाधानादि कर्त्तव्यमभव,न्नेदानीं तज्ज्ञानतः कृत्यमस्तीत्यर्थः ॥ १६ ॥

इदानीं कस्मात्समाधानादि न कर्त्तव्यमित्यपेक्षायां तद्धेत्वभावादित्याह ।

(१७) समाधिर्वा ऽसमाधिर्वा कार्यं वा ऽन्यत्कुतो भवेत् ।
मां हि ध्यात्वा च बुद्ध्वा च मन्यन्ते कृतकृत्यताम् ॥ १३८ ॥

समाधिर्वेति । कुतो भवेन्ममेति शेषः । कुतो न भवेदित्यत्र हेतुमाह । मां हीति । हि यस्मान्मां प्रत्यगेकरसं ब्रह्म ध्यात्वा विचार्य बुद्ध्वा साक्षात्कृत्य कृतकृत्यतां मन्यन्ते मुमुक्षव इति शेषः । तथा च श्रुतिः ।

"एष नित्यो महिमा ब्राह्मणस्य
न कर्मणा वर्द्धते नो कनीयान्" ।

इति ।

"यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते" ॥

इति स्मृतिश्च । तस्मादज्ञानाभावान्नास्तीदानीं किमपि कर्त्तव्यमित्यर्थः ॥ १७ ॥

ननु यद्यपि यथोक्तात्मविदः समाध्यादि कर्त्तव्यं नास्ति तथाप्यात्मनो ब्रह्मत्वं संपाद्यं प्रपञ्चस्य च विलयः कर्त्तव्यो ऽवशिष्यत इत्याशङ्क्य ब्रह्मरूपत्वस्य नित्यसिद्धत्वात्प्रपञ्चस्य चाज्ञानमात्रविलसितस्य तन्निवृत्तिसमय एव चाधिष्ठानात्मना विलीनत्वाच्च तदनुष्ठेयमवशिष्यत इत्यभिप्रेत्याह ।

(१८) अहं ब्रह्मास्मि सर्वोऽस्मि शुद्धो बुद्धो ऽस्म्यतः सदा ।
अजः सर्वत एवाहमजरश्चाक्षयो ऽमृतः ॥ १३९ ॥

अहं ब्रह्मास्मीति । सदेति ब्रह्मास्मीत्यादिषु सर्वेषु विशेषणेषु योज्यम्, अतस्ततो बन्धहीनः सर्वत इति च पदमजो ऽक्षय इत्युभयत्र योज्यं, जन्मक्षयहेतुरहित इत्यर्थः ॥ १८ ॥

ननु प्रतिदेहं चेतनभेदे भासमाने कथं ब्रह्मास्मीति प्रतीचः पूर्णतानुभव इत्यत आह ।

(१९) मदन्यः सर्वभूतेषु बोद्धा कश्चिन्न विद्यते ।
कर्माध्यक्षश्च साक्षी च चेता नित्यो ऽगुणो ऽद्वयः ॥ १४० ॥

मदन्य इति । उक्ते ऽर्थे प्रमाणमाह । कर्माध्यक्ष इति ।

"एको देवः सर्वभूतेषु गूढः
सर्वव्यापी सर्वभूतान्तरात्मा ।
कर्माध्यक्षः सर्वभूताधिवासः
साक्षी चेता केवलो निर्गुणश्च" ॥

इति श्रुतावेकस्यैव सर्वभूतान्तरात्मत्वोपपादना,द्भेदप्रतिभानस्याकाशभेदभानवदुपाधिनिबन्धनत्वा,न्नात्मान्तरशङ्केति युक्तं पूर्णब्रह्मात्मानुभवनमित्यर्थः ॥ १९ ॥

अहं ब्रह्मास्मीत्यत्रोक्तमात्मनो ब्रह्मत्वमुपपादितं, सर्वोऽस्मीत्युक्तं तु बाधायां सामानाधिकरण्याभिप्रायमित्युपपादयति ।

(२०) न सच्चाहं न चासच्च नोभयं केवलः शिवः ।
न मे संध्या न रात्रिर्वा नाहर्वा सर्वदादृशेः ॥ १४१ ॥

न सच्चाहमिति । स,त्प्रत्यक्षयोग्यं, पृथिव्यप्तेजोरूपं भूतत्रयम् । अस,त्प्रत्यक्षायोग्यं,त्यच्छब्दनिर्दिष्टं वाय्वाकाशात्मकं भूतद्वयम् । उभयोः पञ्चभूतपरिणामात्मकं शरीरसंस्थानम् । एतत्सर्वं नाहमित्युक्ते नेति नेतीति मय्येवारोप्य निषिद्धत्वान्मदन्यत्र मयि चासत्त्वादहमेवेदं सर्वमिति युक्तमेवोक्तमित्यर्थः । केवलः, सर्वविशेषशून्यः, शिवो, निस्त्रैगुण्यः । संध्यादिकालविशेषयोगात्कथं केवलत्वमित्यत आह । न मे संध्येति । तत्र हेतुः, सर्वदादृशेरिति । अलुप्तप्रकाशात्मत्वादित्यर्थः । यद्वा संध्यादिशब्दैः क्रमेण स्वप्नसुषुप्तिजागरणान्युच्यन्ते सदैकरूपेण प्रकाशमानस्य स्वरूपावरणविक्षेपरूपावस्थाः कुतस्त्या इत्यर्थः ॥ २० ॥

तस्माच्चिदेकतानस्यात्मनो निर्विशेषस्य युक्तं ब्रह्मरूपेण पूर्णत्वमिति सदृष्टान्तमाह ।

(२१) सर्वमूर्त्तिविमुक्तं यद्यथा खं सूक्ष्ममद्वयम् ।
तेनाप्यस्मि विनाभूतं ब्रह्मैवाहं तथाऽद्वयम् ॥ १४२ ॥

सर्वमूर्त्तीति । यथाकाशं सर्वस्मात्परिच्छिन्नाकाराद्विलक्षणमतिसूक्ष्ममालक्ष्यते, तथेदं ब्रह्म परिपूर्णमत्यन्तसूक्ष्मं द्वैताभावोपलक्षितमिष्यते, तस्माद्ब्रह्मणोऽद्वितीयत्वादात्मनश्च तदनन्यत्वाद्ब्रह्मैवास्मीत्यर्थः । तर्हि ब्रह्माकाशयोरुपमानोपमेयभावेन भेदात्कथं ब्रह्माद्वितीयमित्यत आह । तेनापीति । तेनाकाशेनापि विनाभूतं सिद्धं ब्रह्मास्मि, व्यवहारदृष्ट्योपमानादिभेदेपि परमार्थतस्तदभावाचाद्वैतक्षतिरित्यर्थः । एकमद्वयपदमाकाशेन संबध्यते,द्वितीयं ब्रह्मणेत्यपौनरुक्त्यम् ॥ २१ ॥

पूर्वमाकाशदृष्टान्तेन पूर्णत्वनिरूपणात्परमार्थतः परिच्छेदाशङ्का निराकृता, इदानीं तेनैव दृष्टान्तेन भेदपरिच्छेदप्रतीतेर्गतिमाह ।

(२२) ममात्मा स्वत आत्मेति भेदो व्योम्नो यथा भवेत् ।
एकस्य सुषिभेदेन तथा मम विकल्पितः ॥ १४३ ॥

ममात्मेति । मम ज्ञातुरात्मा स्वरूपं ब्रह्मेति स्वतः स्वस्यात्मेति च यो ऽयमात्मात्मीयभावेन भेदप्रतिभासः स एकस्य ममान्तःकरणाद्युपाधिकृतभेदपरिच्छेदापेक्षया विकल्पित आरोपितो भवेद्यथैकस्य व्योम्नः सुषिभेदेन छिद्रभेदेनांशांशिभावरूपो भेदो विकल्पितो भवति तद्वदित्यर्थः ॥ २२ ॥

तस्मादविद्यादशायां भेदव्यवहारे ऽपीदानीमवगतात्मतत्त्वस्य सोपि नास्तीति सिद्धमाह ।

(२३) भेदो ऽभेदस्तथा चैको नाना चेति विकल्पितम् ।
ज्ञेयं ज्ञाता गतिर्गन्ता मय्येकस्मिन् कुतो भवेत् ॥ १४४ ॥

भेदो ऽभेद इति । मय्येवैकस्मिन् पूर्वभेदो ऽभेदश्च विकल्पितो व्यवहृतः, तथा एको नाना चेति चाहमेव विकल्पितो ज्ञेयं ज्ञाता गतिः फलं गन्ता फलप्राप्तिकर्त्ता भोक्तेति चाहं विकल्पित इति योजना, एतत्सर्वं कुतो भवेद्विचार्यमाणे न भवेदेवेत्यर्थः ॥ २३ ॥

ननु तथापि संसारित्वं हेयं ब्रह्मत्वं चोपादेयमिति न निर्विशेषत्वमात्मन इति चेत्तत्राह ।

(२४) न मे हेयं न चादेयमविकारी यतो ह्यहम् ।
सदा मुक्तस्तथा शुद्धः सदा बुद्धो ऽगुणो ऽद्वयः ॥ १४५ ॥

न मे हेयमिति । तत्र हेतुमाह,विकारीति । यतो यस्मादहमविकारी, कुतो ऽविकारीत्यपेक्षायां तत्र प्रमाणं हिशब्देन सूच्यते,

"अविकार्योयमुच्यते"

इति स्मृतेरित्यर्थः । फलितमाह । सदा मुक्त इति । सदैव बन्धसंसर्गशून्य इत्यर्थः । तथा शुद्ध,स्तद्धेत्वविद्यासंबन्धरहितो यतः, सदा बुद्धः, तर्हि किं बोधगुणो, नेत्याहागुणो बोधरूप एवेत्यर्थः । तर्हि बोध्यं किं चिदन्यदस्ति, नेत्याहाद्वय इति ॥ २४ ॥

तदेवमुक्तलक्षणमात्मतत्त्वं शास्त्राचार्यप्रसादात् श्रवणमनननिदिध्यासननिष्ठां प्राप्तः सन् सदा मुमुक्षुरहं ब्रह्मास्मीत्यनुसंदध्यादिति मुमुक्षुं प्रोत्साहयति ।

(२५) इत्येवं सर्वदाऽऽत्मानं विद्यात्सर्वं समाहितः ।
विदित्वा मां विदेहस्थमृषिर्मुक्तो ध्रुवो भवेत् ॥ १४६ ॥

इत्येवमिति । सर्वं पूर्वमुक्तं, वेदनफलमाह, विदित्वेति । ऋषिः सर्वदर्शी ॥ २५ ॥

उक्ततत्त्वविद उक्तां मुक्तिं प्रपञ्चयति ।

(२६) कृतकृत्यश्च सिद्धश्च योगी ब्राह्मण एव च ।
य एवं वेद तत्त्वार्थमन्यथा ह्यात्महा भवेत् ॥ १४७ ॥

कृतकृत्यश्चेति । स ब्राह्मण इति श्रुतेर्मुख्यो ब्राह्मण एव च भवेदिति संबन्धः । एवं निष्ठाहीनस्य प्रत्यवायमाहान्यथेति । उक्तं श्रीभागवते भगवता ।

"न देहमाद्यं सुलभं सुदुर्लभं
प्लवं सुकल्पं गुरुकर्णधारम् ।
मया ऽनुकूलेन नभस्वतेरितं
पुमान् भवाब्धिं न तरेत् स आत्महा" ॥

इति ॥ २६ ॥

उक्तस्य प्रकरणार्थस्य प्रामाणिकत्वं दर्शयन्प्रतिपत्तिसौकर्यमाह ।

(२७) वेदार्थो निश्चितो ह्येष समासेन मयोदितः ।
संन्यासिभ्यः प्रवक्तव्यः शान्तेभ्यः शिष्टबुद्धिना ॥ १४८ ॥

॥ इत्यचतुष्प्रकरणं त्रयोदशं विवृतम् ॥

वेदार्थ इति । अस्य ग्रहणे मुख्याधिकारिणो दर्शयति । संन्यासिभ्य इति । न केवलं प्राप्तसंन्यासाश्रममात्रेभ्यः, किं तु शान्तेभ्यः, शमादिसाधनसंपन्नेभ्य इत्यर्थः । उपदेष्टारं विशिनष्टि । शिष्टबुद्धिनेति । शास्त्राचार्यानुशिष्टबुद्धिनेत्यर्थः ।

॥ इत्यचतुष्प्रकरणं त्रयोदशं विवृतम् ॥ १३ ॥

॥ अथ बालभारतकाव्यस्य ॥

॥ द्वितीयः सर्गः ॥

द्वैपायनः पातु जगन्ति दूर-
मुद्यत्पुराणामृतबिन्दुवृन्दा

यन्मानसज्ञानसुधासमुद्रे
वाग्देवताया जलकेलिरासीत् ॥ १ ॥
कौशल्यया वल्लभया सहाथ
भुवं भुनक्ति स्म स पूरुभूपः ।
द्विषो यदीयासिनदीरयाभि-
मुखाधिरोहे निमिषा बभूवुः ॥ २ ॥
भुजावहंपूर्विकया प्रवेष्टुं
मुखैकमार्गादुदरे दरेण ।
दन्ताङ्गुलिग्रासमिषादरीणां
पराङ्मुखौ वीक्ष्य शमं ययौ यः ॥ ३ ॥
चकार निर्विघ्नचिकीर्षितस्य
यत्तेजसो द्रव्यलवेन वेधाः ।
महेशितुर्यं तिलकं तमेव
भालस्पृशं वह्निदृशं दिशन्ति ॥ ४ ॥
यं शङ्कया प्राप कयापि कम्पं
रते स धर्मज्ञमतेऽपि धीरः ।
अस्त्रेषु तेनापि वधूविलासान्
मूढः स्मरः स्मार्चति वीरमानी ॥ ५ ॥
भूपोऽथ जज्ञे जनमेजयाख्योऽ-
नन्तापतिर्मण्डलितं यदस्त्रम् ।
दधौ मुखेन्दोः परिवेषभावं
युधीषुधाराद्भुतवृष्टिहेतुम् ॥ ६ ॥
प्रतापदग्धाखिलकण्टकायां
यशोजलैः शान्तिमुपागतायाम् ।
लघूभवद्भूभृति सैन्यनागैः
चितौ यदाज्ञा सुखिनी चचार ॥ ७ ॥
संहारशक्तिं यदसेर्निशम्य
कृतान्तजिह्वाज्वलतो हरेण ।
न कम्पितो यः किल कालकूट-
ग्रासेऽपि स स्वैरमकम्पि मूर्धा ॥ ८ ॥
लोभेन केनापि नितम्बिनीषु
रक्तास्वरक्तोऽपि रसीव खेलन् ।
यं दोषमाहुर्गणिकासु धीराः
स्वस्मिन्नसौ तं गुणतां निनाय ॥ ९ ॥

तुरङ्गमेधव्रतियस्य कर्ता
चितेन्द्रसेवारसिकोऽन्वहं यः ।
जगत्त्रयख्यातिमयस्त्रिमार्गा-
चयीतनुस्पर्धियशःप्रतापः ॥ १० ॥
प्राचीनभूपोऽभवदश्मकोश-
स्ततः स्मरादप्यधिकेन येन ।
भृशं यशोभिः कुसुमावदातै-
र्व्यलेपि सोऽपि प्रसभं त्रिनेत्रः ॥ ११ ॥
सदा मदारम्भविजृम्भिणोऽपि
रणेषु वीक्ष्य त्रसतोऽरिवीरान् ।
स्मितं सुरौघैर्यदकारि यस्य
तदेव दिव्यानि यशांसि जातम् ॥ १२ ॥
वैराङ्गनालोचनवारिपूरै-
रन्यायवह्निः शमितो यदुर्व्याम् ।
निश्वासवातैरभिसृत्वरीणां
भस्मापि कुत्रापि निरासि तस्य ॥ १३ ॥
वृथाप्रयासो बलिजित् किमासी-
च्चतुर्दमोऽभूदथ नाकलोकः ।
रसैव रत्नं सुषुवेऽथवेद-
मित्यूचिरे दातरि यत्र लोकाः ॥ १४ ॥
रराज संयातिरिति चितीन्दु-
र्वरो वराङ्गा यदसिप्रगुन्नौ ।
विवर्धितस्पर्धमुदारवेगौ
दिवं यशोवैरिगणावयाताम् ॥ १५ ॥
जानन् युगान्तेऽथ वियुक्तमिन्दु-
गङ्गाभुजङ्गेशवृषादिभिः स्वम् ।
मन्ये मुदा नृत्यपरो हरोऽपि
प्रभाविविक्तेषु यशःसु यस्य ॥ १६ ॥
कर्तुं न यस्मिन् किमपि प्रगल्भा
द्विट्प्राणपानात्ययवायुवल्भाः ।
व्रीडादिवाधो विषभृन्मिषेण
द्विषन्नृपाणामगमन् कृपाणाः ॥ १७ ॥
ईर्ष्यां परित्यज्य कृती यदीय-
माधाय रूपं नलकूबरोऽपि ।

मदेकचित्तां परचित्तवेदी[1]
बभाज रम्भां विरहज्वरार्ताम् ॥ १८ ॥
तस्मादहंयातिरधत्त भानु-
मतीप्रियः क्ष्मां यदसौ प्रवेष्टुम् ।
अवीविशद्बिम्बमिषादरातिः
स्वमेव मूर्त्यन्तरमग्रतोऽपि ॥ १९ ॥
विधाय वैरं सह येन वीराः
प्रकाममज्ञानतयैव गावः ।
चतुष्पदाः क्षोणिमिलत्करं त्वा-
न्नतास्तृणं युक्तमधुर्मुखेषु ॥ २० ॥
एकोऽपि येन व्यतिपक्तकण्ठः
श्रीकण्ठ एव प्रथितः खलूग्रः ।
यस्यासिरुत्कृत्तबहूग्रकण्ठ-
स्तेनोपमेयः क्व हलाहलेन ॥ २१ ॥
एभिर्विमानैरुपरि भ्रमद्भि-[2]
र्मा ग्राहि नः श्रीरिति जाग्रति स्म ।
अहर्निशं यद्भुवि निर्निमेष-
कपाटपक्ष्माणि निकेतनानि ॥ २२ ॥
बभार भूमीमथ सार्वभौमो
नृपः सुनन्दाहृदयाधिनाथः ।
चकर्ष जीवां[3] युधि संमुखानां
शरासनानामिव वैरिणां यः ॥ २३ ॥
अपि प्रभिन्ना रुधिरैररीणां
तदङ्गनास्रैरपि जातसेका ।
स्वसैन्यभारेण च दुर्धरापि
धरा करे येन सुखेन दध्रे ॥ २४ ॥
विद्याधरीणां निवहो वयस्याः
स्मरातुराः स्मेरयितुं सयत्नः ।
छलादहार्यस्य शुभैकवृत्ते-
र्न रूपमप्यस्य शशाक धर्तुम्[4] ॥ २५ ॥

१ परिचिन्त्य देवीं इति पाठान्तरम् ।
२ स्फुरद्भि– इति पाठान्तरम् ।
३ जीवा धनुर्गुणो जीवनवृत्तिश्चेत्यर्थे हलायुध इत्युभयार्थनिर्वाहः ।
४ कर्तुम् इति पाठान्तरम् ।

अजानता यस्य तनुत्विषैव
छायां वियत्येव भृशं विशीर्णाम् ।
इतस्ततश्चालयतार्कधाम्नि
छत्रं मुहुश्छत्रधरेण खिन्नम् ॥ २६ ॥
ततो जयत्सेन इति क्षितीशो
जिगाय शत्रून् सुषुवाधिनाथः ।
अलङ्घि वीरै[1]र्भुवि सर्पिणीयं
चिरं नरेन्द्रैरपि नो यदाज्ञा ॥ २७ ॥
भुवेव भङ्गानसिनेव कम्पान्
शरासनेनेव नतीरतीव ।
प्रपाठिता यस्य युधि द्विषन्तो
मुखे तृणं तु स्वधियैव चक्रुः ॥ २८ ॥
खल्लिकाखेलनपुष्पलाव-
स्नानादिलीलाः शुभगस्य यस्य ।
ऐच्छन् न किं स्वस्वपदेषु काम-
चलाः स्थलारामजलाधिदेव्यः ॥ २९ ॥
यद्रूपशेषां तनुमारचय्य
श्रीविश्वरूपो रमते श्रियां किम् ।
यदद्भुताकारधरश्च विश्व-
चयीजयी चास्य सुतः स्मरोऽभूत् ॥ ३० ॥
मर्यादयोर्व्या च विभुर्द्विभार्यो
रोचीननामा[2] नृपतिस्ततोऽभूत् ।
विकम्प्य यस्यासिररीभमूर्ध्नि
पपात कान्ताकुचशङ्कयेव ॥ ३१ ॥
रणे मणिव्याप्तकिरीटकुम्भ-
तटोर्ध्वदोर्दण्डकृतप्रतिष्ठाम् ।
पटीपताकां भ्रमयन् प्रपेदे
प्रासादलीलां विजयश्रियो यः ॥ ३२ ॥
यस्य प्रतापं सृजता हरेण
करेण सस्वेदममार्जि भालम् ।
लग्नेन तद्द्रव्यलवेन तेन
तेने च नेत्रं ज्वलनाभिधानम् ॥ ३३ ॥

१ धीरै– इति पाठान्तरम् ।
२–ऽर्वाचीननामा इति पाठान्तरम् ।

कार्यैच्छया यद्रिपुदुर्यशोय-
त्प्रतापयत्कीर्तिवितानगानैः ।
ध्वान्तोच्छ्रयं वा दिवसोदयं वा
ज्योत्स्नाचयं वा रचयन्तु लोकाः ॥ ३४ ॥
ततः सुयज्ञा[१]धिपतिः प्रतङ्ग-
महा महाभौममहीधवो[२]ऽभूत् ।
अस्रैरसिञ्चन्त मुहुः स्वदेहं
यद्वैरिणस्त्रासगतेषु तप्ताः ॥ ३५ ॥
निपीय पीयूषरुचिं रुचैव
कृतस्थितिः कल्पशतानि यावत् ।
जगत्त्रयेऽप्यस्खलितं चलन्ती[३]
यदीयकीर्तिर्विरराज सिद्धा ॥ ३६ ॥
विशिष्यमाणप्रमदं यदङ्ग-
प्रवेशशोभाशुभगीकृताङ्गैः ।
दिक्पालवध्वो दयिते रसेन
परं परीरम्भभरं भजन्ते ॥ ३७ ॥
जानन् विभावं भवनाटकेऽस्मिन्
मायामयं सर्वमखर्वबोधः ।
रसैरभिन्नोऽभिनिनाय तोष-
रोषादिभावान् समयोचितान् यः ॥ ३८ ॥
जज्ञेऽथ राजायुतयाजिसंज्ञो
भासां[४] पतिर्यं स्मृतिभूर्निभाल्य ।
अमुं रतिर्मां च निरीक्ष्य मा भू-
दियं विखिन्ना[५]ऽभवदित्यनङ्गः ॥ ३९ ॥
सदाप्यहस्यन्त सुरप्रियाभिः
स्त्रियः प्रियालोकनविघ्ननिद्राः ।
स्वप्ने तु[६] यं प्राप्य मुदा तदाभि-
स्ताः प्रत्यहस्यन्त मुहुर्विलक्षाः ॥ ४० ॥

१ सुयज्ञोऽ–इति पाठान्तरम् ।
२–धरो– इति पाठान्तरम् ।
३ पतन्ती इति पाठान्तरम् ।
४–त्रस्तपापति– इति पाठान्तरम् ।
५ विपण्णा–इति पाठान्तरम् ।
६ प्रियं इति पाठान्तरम् ।

घनारिनारीनयनाम्बुनीरै-
र्यशोलता यस्य विभातु युक्तम् ।
प्रतापवह्निर्ज्वलितो यदेतै-
र्जगच्चमत्कारकरं तदेव ॥ ४१ ॥
फलन्ति जन्मान्तर एव देवाः
सेवाकृतामित्यतुलं कलङ्कम् ।
भेत्तुं भवन्ति स्म दिशामधीशाः
सद्यःफलस्मेरितसेवको यः ॥ ४२ ॥
करेणुकाजानिरिलाप्रबोध-
मक्रोधनो नाम ततस्ततान ।
भुजंगमीगीतिषु यस्य दानं
निशम्य मुक्तो बलिनापि दर्पः ॥ ४३ ॥
नभोऽङ्गणे यस्य यशःप्रतापौ
विलेसतुर्भासुरगोलकाभ्याम् ।
पातालगर्तान्निहितोद्धृताभ्या-
मिवान्वहं चन्द्ररविच्छलाभ्याम् ॥ ४४ ॥
निरन्तरं त्र्यम्बकपादपूजा-
पुण्यात्मनां संयति निर्जितानाम् ।
न येन जह्रे परमार्थवृत्तिः[१]
स्वसेवकानां द्विषतामपि श्रीः ॥ ४५ ॥
अहो महीभारमहीयसा यः
क्लेशेन रीणोऽह्नि निशि प्रहृष्टः ।
आत्मानमालोकत योगनिद्रा-
स्वप्नेष्वसंभाव्यपदप्रतिष्ठम् ॥ ४६ ॥
भाषाह्वया वल्लभया ततोऽस्मा-
द्देवातिथिर्भूविभुरुद्बभासे ।
स्पर्धां दधाना इव येन युद्धे
द्विषोऽपि देवातिथयो बभूवुः ॥ ४७ ॥
ययौ गलश्यामलता किमद्य
तवेति देव्याभिहितो महेशः ।
व्यलोकत स्वं फणिराजमौलि-
मणौ मुदा यद्यशसि प्रकीर्णे[२] ॥ ४८ ॥

१–वृत्तिस्व–इति पाठान्तरम् ।
२ प्रकीर्णम् इति पाठान्तरम् ।

दिक्पालपूजाविधिभिस्त्वमेव
मया प्रयाणावसरेऽर्चितोऽसि ।
तत् किं निहंसीति गिरा निरासि
परेण युद्धापदि यत्प्रकोपः ॥ ४६ ॥
रजोजलार्द्वेक्षणतारकाणून्
क्षमाब्धितेजोऽम्बरवायुमूर्तिः ।
संख्याय सर्वज्ञविभुर्गुणालीं
यस्यास्त संख्यान् जगदात्ममूर्तिः ॥ ५० ॥
देवपतिः श्रीरुच इत्ययासीत्
तदीयसिंहासनशैलसिंहः ।
विदारयन् वैरिगजव्रजं यो
यशांसि मुक्ताविशदानि तेने ॥ ५१ ॥
निजाश्रुनीरैः स्नपिता द्विषद्भिः
प्रदीपिता मौलिमणीमृजाभिः ।
दशापि यत्पादनखा वितेनु-
र्दिशां दशानामपि दर्पणत्वम् ॥ ५२ ॥
आविश्य नारीरमरीगणेन
नेत्रानिमेषानुमितेन दृष्टः ।
पातालबालाभिरनायि रूपं
श्रुत्यैव यो लोचनगोचरत्वम् ॥ ५३ ॥
यस्य प्रतापस्तपनो नवीनः
सर्वत्र लब्धाभ्युदयोऽस्तहीनः ।
यो यः क्षितीशोऽत्यजदातपत्रं
तापं तनोति स्म न तस्य तस्य ॥ ५४ ॥
ज्वालापतिर्वैरिवनेऽथ शौर्य-
ज्वालालिमज्ज्वालयदृक्षराजः ।
वृतः क्षितैर्यस्य यशोभिरिन्दु-
रवाप दुग्धोदधिवाससौख्यम् ॥ ५५ ॥
तटस्थकान्ताकुचदर्शनेन
प्रधावितान् कुञ्जरकुम्भबुद्ध्या ।
वने विनास्त्रैर्भुजलीलयैव
जिगाय सिंहानपि यद्विपक्षः ॥ ५६ ॥
सामस्त्यभावादधृतं वधूत्वं
त्रिलोचनः शोचति चेतसि स्म ।
स्त्रीत्वं गृहीत्वोज्झितमेव विश्व-
रूपस्तु यद्रूपनिरूपणेन ॥ ५७ ॥
यद्भूतले सञ्चरितोदयाना-
मविश्रुतादृष्टरुजां प्रजानाम् ।
अमीलयद्बन्धुसुखाप्तिभाजां
निद्रेव मृत्युर्नयनानि काले ॥ ५८ ॥
सरस्वतीशो मतिनारभूप-
स्ततोऽभवत् पादनखेषु यस्य ।
अपाति बिम्बेन नृपैर्दशाशाः
क्षितीशताखेलनपल्वलेषु ॥ ५९ ॥
विकम्पतेऽसौ युधि पृष्ठमेत-
द्विरोधिनां दर्शयतीति येन ।
असौ च चापे च निरादरेण
विजिग्यिरे भूमिभुजो भ्रुवैव ॥ ६० ॥
गुणैः स्थितं यद्धृदि कार्मुकस्य
न का मुहुः कामवशालिलिङ्ग ।
न काधिकं यद्गुणगानगर्भ-
मुपांशु चित्तेशमुखं चुचुम्ब ॥ ६१ ॥
स्वयंकृतानामपि कीर्तनानां
संख्यां स नाबुध्यत बुद्धसर्वः ।
जगत्पवित्रीकरणोल्बणानां[1]
यस्मिन् गुणानामिव पद्मयोनिः ॥ ६२ ॥
नृपस्त्वसुर्[2]नाम कलिन्दकन्या-
पतिस्ततो भूषयति स्म भूमिम् ।
त्रैलोक्यदीपत्विषि यत्प्रतापे
पतङ्गवद्भाति पतन् पतङ्गः ॥ ६३ ॥
विधाय पूजां रणमण्डलस्य
क्षतेभकुम्भच्युतरत्नपुष्पैः ।
द्विषां ज्वलन्तीरगिलत् प्रताप-
प्रदीपिका यत्करवालयोगी ॥ ६४ ॥
वामाविनोदावसरेऽपि विश्व-
जयज्वलन्मोहजयोज्ज्वलस्य ।

१—ज्वलानां इति पाठान्तरम् ।
२ नृपः शिशु—इति पाठान्तरम् ।

पपात यस्योपरि पुष्पवृष्टि-
रिवासिता मन्मथबाणवृष्टिः ॥ ६५ ॥

इयद्विधद्यस्य पदं वदन्ति
शिरोरुहं यस्य च पश्य ताभ्याम् ।
आदायि यद्दानपयोनिदान-
यशोऽम्बुजाङ्केऽलिमरालकेलिः ॥ ६६ ॥

रथंतरीजानिरथो पृथुश्री-
रिलाधिपोऽभूदलिनाभिधानः ।
महाहवे यत्प्रतिघाग्निधूम-
कृपाणसङ्गो द्विषतां दिवेऽभूत् ॥ ६७ ॥

केनापि भग्नं शिशुनापि नाकं
क्रान्ते गुणश्रीरपि रोहितस्य ।
संभाव्यते शार्ङ्गमपूर्वमेव
केनोपमेयं तदमुष्य चापम् ॥ ६८ ॥

स्निग्धा युवानस्तरुणीषु ताभि-
र्यदात्मकत्वेन रहः स्मृतास्ते ।
इति त्रिलोकीमिथुनानि तुल्य-
प्रीत्यैव किं तुल्यरतानि नासन् ॥ ६९ ॥

भिन्नोऽपि सत्कर्मरसेन सप्त-
द्वीपावनीभारभरेण तप्तः ।
खेदापनोदाय पपावमुष्य-
न्सना वधूनाममृताधरोर्मीः ॥ ७० ॥

ततो रिपुक्ष्मापचमूनिकारं
चकार दुष्यन्त इति क्षितीशः ।
चतुर्भिराभादनुजैर्भुजैर्वा
चतुर्भुजः श्रीपरिरम्भणे यः ॥ ७१ ॥

स्वयं कनिष्ठाङ्गुलिकोटिदत्त-
प्रसूनपत्त्रार्पितपूर्वशोभम् ।
पाणिद्वयं मूर्ध्नि विधाय चक्रे
स्तवक्रियां यस्य विरोधिवर्गः ॥ ७२ ॥

त्रिचेषु वर्गेषु पुरःस्फुरत्सु
यत्कार्मुके संगररङ्गभाजि ।
द्विषद्घटापाटननाटकैक-
नटोपमभ्रूरनटन्नटीव ॥ ७३ ॥

पातालयात्रासु गतस्य वाचा-
मगोचरं किंचन यस्य रूपम् ।
पातुं प्रमोदाय भुजंगमाना-
मगामि कामं नयनेषु कर्णैः ॥ ७४ ॥

विश्वत्रयीधवलनव्यसनेन यस्य
दामोदरोदरमपि प्रविवेश कीर्तिः ।
तस्या बभौ पदमदः कथमन्यथास्मिन्
नाभीपथे सितकुशेशयकैतवेन ॥ ७५ ॥

चक्रे कल्पतरुर्निरुञ्छनविधिं यं चैलाञ्चलैश्चञ्चलै-
स्तेने चामरकर्म चामरगवी लीलोल्लसद्वालधिः ।
उद्गीतस्य यदीयदानयशसो रेजे च नीराजना
प्रायः प्रीतिविकम्पितासु दिविषच्चूलासु चिन्तामणिः ॥ ७६ ॥

निःशेषप्रतिपन्थिपार्थिवचमूपाथोधिमन्थोद्धुरः
साम्राज्यश्रियमाप्य यः समतनोच्चक्रं क्रतूनां तथा ।
मन्ये येन तदुत्थधूमलहरीसंपातसंपादिता-
मद्यापि क्रतुपूरुषो न वपुषि श्यामां रुचं मुञ्चति ॥ ७७ ॥

उदन्वानुन्मीलद्बहलहरिमज्जत्प्रवहणः
परिभ्रश्यच्चूलाशिखरविषमान्ताः क्षितिभृतः ।
अटव्यः संघट्टज्वलिततरवो यद्बलभरै-
स्त्रिलोले भूगोले श्रित इति विपक्षैः सपदि यः ॥ ७८ ॥

चन्द्रक्षीरसमुद्ररुद्रशिखरिव्यालेन्द्रमन्दाकिनी-
मन्दारद्रुमहारतारकमुखाः सर्वेऽप्यखर्वत्विषः ।
वीरश्रीनिलयस्य यस्य यशसि त्रैलोक्यकुक्षिंभरौ
नेक्ष्यन्ते यदवश्यमस्य तदमी निर्माणकर्माणवः ॥ ७९ ॥

श्यामश्रीके किमपि विपुले स्वर्गदण्डप्रणाली-
पालीलीलाभृति विधुसुधाकूपरुङ्गीरसिक्ते ।
स्फारा ताराततिरतितरामम्बरक्षेत्रदेशे
दृश्या यस्य प्रतिगुणयशोवल्लिबीजावलीव ॥ ८० ॥

प्रेमातिरेकरसमग्रहृदोऽप्युपांशु-
लीलावतीललितवेणिविलोकनेन ।
आसन् रणाग्रयदसिस्मरणाद्विलीन-
कामाः परे कृपणमीलितकातराक्षाः ॥ ८१ ॥

फूत्कारैः फणिपुंगवं फणिगणो गङ्गां तरङ्गस्वनै-
र्धर्मी मन्द्ररवैरवैति तमपि स्वःकुम्भिनं जम्भजित् ।

अस्माभिर्बत बुध्यतां कथमयं स्वामीति तारा व्यधु-
श्चन्द्रे चिह्नमिवाङ्कनैस्त्रिभुवनभ्रान्तासु यत्कीर्तिषु ॥ ८२ ॥

लीलावापीसरसिजवने भद्रकुम्भीन्द्रकुम्भ-
क्रोडे कान्तावदनशशिनि द्वारवीरासिदण्डे ।
खेलं खेलं स्वयमिह मुहुर्यद्वितीर्णा स्थिरत्वं
लोलापि श्रीरभजत गृहे मार्गणानां गणस्य ॥८३॥

वीरोत्तंसस्य यस्याभिनवशशिसितैकातपत्रं प्रताप-
क्ष्मापालं सुप्रतिष्ठं नयनशिखिमिषाद्भालपट्टे भवस्य।
नागेन्द्रोऽद्यापि नीराजयति मणियुतैर्यद्गुणग्रामगीत-
प्रीतः कम्प्रैः शिरोभिः स्फुरितसु[1]रतटिन्यम्बुकम्बुप्रणादे ॥८४॥

इति श्रीजिनदत्तसूरिशिष्यकविनरेन्द्रचूडामणि-
श्रीमदमरचन्द्रविरचिते श्रीबालभारतनाम्नि
महाकाव्ये वीराङ्के आदिपर्वण्यादिवंशावतरणे पू-
रुप्रमुखाष्टादशराजवर्णनो नाम द्वितीयः
सर्गः ॥ २ ॥ * *

---

## ॥ श्रीः ॥

## ॥ निष्पक्षपातविवेचकसभ्या विज्ञाप्यन्ते ॥

हे सभ्याः प्रणम्य युष्मानेतदद्भुतमेकं वृत्तं प्रमोदयितुकामा निवेदयामस्तद् विदाङ्कुरुत । यत् प्रसिद्धमुपचक्षुर्विपरीतदर्शनं नाम यद्युक्ताभ्यामक्षिभ्यां विपरीतं तरुपुरुषाद्यालोच्यते ऊर्ध्व-मूलाधःशाखादि, तज्जातीयमपरमेकमस्माभिरन्तःकरणस्योपा-न्तःकरणं विपरीतदर्शनमुपलब्धं, विधवाविवाहप्रवर्तकानां तत्सहायानां च रण्डासु दुर्वृत्तासु करुणा नाम, यदावेशित-चित्तेन सर्वोयं प्रमाणप्रपञ्चो बाधकोपि साधक इव लक्ष्यते। तथाहि, तैत्तिरीयारण्यकस्य षष्ठप्रपाठके आहिताग्न्यौर्ध्वदेहि-कमन्त्रसमुदायघटक एको मन्त्रो विधवाविवाहलिङ्गत्वेनाभिम-न्यते तथाविधैः । वास्तविकस्तु तन्मन्त्रस्यायमर्थः । हे नारि त्वं इतासुं गतप्राणं एतं देहं पतित्वेनाभिमन्यमाना सती तस्य समीपे शेषे, (नैतद् युक्तं, नायं देहस्तव पतिः, किं त्वेतद्देह-स्याधिष्ठाता जीवः) अत 'उदीर्ष्व' ऊर्ध्वं गच्छ (क्व) यत्र तव पाणिग्राहवान् जीवः एतच्छरीरस्याधिष्ठाता तं लोकं मर्त्य-लोकादन्यम्, अभ्येहि उपागच्छ, तत्र च तव पाणिग्राहवान् इह लोके एकवारमूढामपि त्वां पुनस्तस्मिन् लोके भार्यामि-च्छति तस्य पत्युः एतच्छरीराधिष्ठातुः 'एतद्' इदमेव यद् व-हसि, 'जनित्वं' जायात्वं प्राप्नुहि । इति । सायणाचार्यस्य चा-त्रैवाभिप्रायः । यतस्तेन दिधिषोरित्येतत्पुनर्विवाहेच्छोरित्येवं विव्रियते । अन्यथा विधवां वोढुमिच्छोरिति व्याचक्षीत । किं च एतदित्येतज्जनित्वमित्यतः पूर्वं योजयता इदमेव जाया-त्वं प्राप्नुहीत्यर्थतात्पर्यकत्वं प्रत्यायितं, मर्त्यलोकस्थपुरुषान्तर-निरूपितजायात्वाभिप्रायकत्वे तु निरूपकभेदात्तस्य भिन्नत्वे-नैतदित्यसंगतं स्यात् । स्पष्टतरं चैतन्मृतशरीराधिष्ठातृनिरू-पितजायात्वस्य एतज्जनित्वमित्यादिपदप्रतिपाद्यत्वेनाभिप्रेत-त्वमेतदधिष्ठातुरेव दिधिष्वादिपदप्रतिपाद्यत्वेनाभिप्रेतत्वं चैतत्सदृशबह्वृचमन्त्रस्य सायणाचार्यीयभाष्यादवसीयते, तथा च तद्भाष्यम् ।

"हे नारि मृतस्य पत्नि जीवलोकं जीवानां लोकं स्थानं गृहम-भिलक्ष्य उदीर्ष्व अस्मात्स्थानादुत्तिष्ठ इतरगतौ आदादिकः गता-सुम् उत्क्रान्तप्राणम् एतं पतिम् उपशेषे तस्य समीपे स्वपिषि तस्मात्त्वं एहि आगच्छ यस्मात्त्वं हस्तग्राभस्य पाणिग्राहं कुर्वतो दिधिषोः गर्भस्य निधातुः तव पत्युः संबन्धादागतम् इदं जनित्वं जायात्वम् अभिलक्ष्य संबभूथ संभूतासि अनुमरणनिश्चयम-कार्षीः तस्मादागच्छ"। इति । इत्थं चात्र दिधिष्वादिपद-मेतत्पतिपरत्वेन व्याचक्षाण आचार्यसायणः कथं शून्यहृदय इव तैत्तिरीयारण्यकमन्त्रं तस्याः सत्याः पुरुषान्तरानुसरणोपदे-शपरमभिप्रेयात् ।

असंदर्भसिद्धं कथमपि श्रुतितात्पर्यविषयत्वेन संभावयितु-मशक्यं विधवोद्वाहिभिः स्वीयबोधातिरेकेण परिकल्प्यमान-मेतन्मन्त्रार्थं तत्परितोषायाभ्युपगम्यापि ब्रूमो, भवत्वस्य पु-रुषान्तरानुसरणोपदेशपरता तथापि पुनर्भूलिङ्गमेतत्स्यान्न तु पुरुषान्तरानुसरणस्य धर्म्यतालिङ्गम् । दिधिषुपदस्य पुनर्भूप-तिबोधकस्य सत्त्वात् । तस्याश्च

"मृते भर्तरि तु प्राप्तान् देवरादीनपास्य या ।
उपयच्छेत्परं कामात्सा तृतीया प्रकीर्तिता" ॥

इति प्रभृतिनारदबोधितस्वैरिणीत्वात् । किंच साक्षान्नि-षेधे जागरूके मन्त्रलिङ्गानामार्थवादिकलिङ्गानामैतिहासिका-चाराणां च विध्युन्नायकत्वकल्पनायाः केवलं बालिशबुद्धिवि-लसितत्वमेव । केवलमाकाङ्क्षितस्यार्थस्यान्यतोऽलाभेऽर्थवा-दतस्तत्कल्पना यथा रात्रिसत्रन्यायेन फलस्य । अविरोधे वा प्रमाणान्तरेण स्मृत्यादिभिः संवादेऽपि वा युक्ता मन्त्रलिङ्गा-दीनां तत्कल्पना । अन्यथाऽऽश्वमेधिकेन मन्त्रलिङ्गेन, सुब्र-ह्मण्यानिगदस्थेनेन्द्रकर्तृकव्यभिचारगमकेन मन्त्रवर्णेन, भग-वतो नन्दनस्य गोपाङ्गनासङ्गवर्णनपरेणेतिहासपुराणादिना च

---

१ स्फुरति इति पाठान्तरम् ।

व्यभिचारस्य धर्म्यतायाः श्रौतविश्वरूपोपाख्यानबलेन ब्राह्मणानामपि सुरापानस्य पापाजनकतायाश्च कल्पनाप्रसङ्गात् । तस्मात्स्मृतिशिष्टाचाराद्यनुरोधेन विधिप्रतिषेधविरुद्धानामर्थवादमन्त्रलिङ्गादीनामस्वारसिके ऽप्यर्थे तात्पर्यं समुन्नेयं न पुनरापाततः प्रतीयमाने बलवन्मानविरुद्धे ऽर्थे इति सांप्रदायिकसिद्धान्तः । प्रकृते तु प्रदर्शितमन्त्रस्य स्वरससिद्धेऽर्थे श्रुतिस्मृतिशिष्टाचाराविरुद्धे संभवति तद्विरुद्धे ऽस्वारसिके ऽर्थे श्रुतितात्पर्यमुत्प्रेक्ष्येमं बलवदनर्थावहमधर्ममुपोद्बलयतां महदिदं धार्ष्ट्यं सुव्युत्पन्नानां धार्मिकाणां कर्णान्तःकरणदाहकारीत्यलं खण्डनार्थयाप्यदभ्रतच्चर्च्चया । इति शम् ॥

काशीस्थराजकीयपाठशालायाम् { धर्मशा॰ राजारामशास्त्री
सांख्यशा॰ बालशास्त्री

## MAX MÜLLER'S TRANSLATION OF THE RIG-VEDA.

॥ श्रीः ॥

॥ पांडित्यविवेकः ॥

रायल् एशियाटिक् सोसाइटी जर्नल् नामकग्रन्थस्य तृतीयखण्डस्य सप्तषष्ट्यधिकाष्टादशशतपरिमितख्रिष्टाब्दे मुद्रितस्य प्रथमभागस्य दर्शनात् एतदालोचनविषये मम मतिरासीत् सा तु मतिरस्मिन्नेवाब्दे मुद्रितस्य ऋग्वेदसंहिता प्रथमभागस्य सहसालाभात् कुतूहलाक्रान्तहृदयम्मां प्रथममेकस्य मन्त्रस्यार्थम्पर्य्यालोचयितुं समादिशति तत्सप्रमाणम्प्रथममेकमन्त्रव्याख्यानं पर्य्यालोच्यते अत्र चेद्विदुषामाग्रहो भवेत्पत्रान्तरे मन्त्रान्तरम्प्रकाश्यते ऽस्माभिरिति ॥

विज्ञापनमेतत् पंडितमंडलेषु ।

कुसंस्कारांधतमससमाच्छन्नानां मद्देशीयाः पंडिता एव पंडिताः ते यद्वदंति तदेव साधु अस्माकं शास्त्रमेवशास्त्रं तत्र यद्वर्त्तते तदेवमंगलं तद्विपरीतममंगलमित्यादि स्थिरनिश्चयरूपपंकनिमग्नानां सत्यपि साक्षात् प्रतीयमानपदार्थसार्थविद्योतकमोहध्वांतविनाशकापरदेशीयदूरदर्शिनिकरकृतिचमत्काररूपमाध्यंदिनशारददिवाकरकरप्रचारे निमीलितनयनानामार्य्यावर्त्तवासिनामग्रतः किमपि देशाचारविरुद्धं वक्तुं नोत्सहामहे वयं, यतस्ते सदसदविवेच्य विद्यावलमनालोच्य अयं विरुद्धवादी नास्तिक इति अस्मान् प्रत्याक्रुश्य कृपाणपाणयः पश्चाद्धावंति किंकरोमि काप्यपक्षपातिनी विवेचनाशक्तिः स्वतएवाविर्भूता सततमेवास्मानुत्तेजयति नाच्छादनीयं प्रज्ञावतां प्रज्ञानैपुण्यमिति अतएव यातुवर्मशिरः भवतु वा जगद्विपरीतं त्यजंतु वा बांधवाः कथयामः समुचितमिति श्रुतमस्माभिः पुरा प्रलयपयोधिजले निमग्ना वेदा अवतीर्य मीनरूपेण संरक्षिताः स्वयं भगवता वासुदेवेन तदर्थं पुरातनाः पुराविदः कतिवानतं प्रशशंसुः केवानतंमहत्कारिणं विजानंति । किंत्विदानीं महर्षिसायनकृतभाष्यरूपसागरे निमग्नान् पुनरेव वेदानुद्धारयतां भगवद्विभूति विशेषाणां पंडितमंडलमंडनीभूतानामुपद्वीपवासिनां श्रीमन्मोक्षमूलरादीनां (1) दूरेतिष्ठतु प्रशंसावादः तिरोभवतु च क एतदिति विज्ञानं परन्तु कृतमन्त्रसिद्धिना साक्षात्कृतदेवेनास्मद्देशीयब्राह्मणेन न कृतं मोक्षमूलरादिकृतमेतदितिमत्वा कोपिन श्रोतुमिच्छति तत्कृतयथार्थवेदव्याख्यानं परिगणय्यचास्मान् नास्तिकपदवीषु निन्दयिष्यंति च मुहुर्मुहुरनभिज्ञात शास्त्रतात्पर्या अपरिचालितबुद्ध्य आर्य्यावर्त्तवासिनो नामतः ।

अथ नास्वाद्यते चेत् पित्तदूनरसनेनमधुररसः नाघ्रायते चेत् विगतघ्राणेन सुरभिगंधः न स्पृश्यते चेत् विनष्टत्वचासलिलशैत्यं न श्रूयते चेत् वधिरेण मधुरः स्वरः न दृश्यते चेदंधेन पार्व्वणशारदसुधाकरकरः तेन भवति कदाचिदमीषां मधुररसादीनां नावस्थां तरता विड़म्बनैव प्रतिभाति तदनास्वादनकारिणां आस्वादयंति च सादरं विगतव्याधयः सुकृतिनः एवमेवमनुचिंत्य धीरवर श्रीमन्मोक्षमूलरादिना इंग्लंडीय भाषया कृतं अभिनवं वेदव्याख्यानं संस्कृतभाषया अनूद्यक्रमशः प्रकाश्यते अस्माभिः श्रोताचेत् कोपिभारतवर्षीयः श्रोष्यति सएव अन्यथा श्रोष्यंत्येव अपरदेशीया युक्तिशास्त्रविशारदा अमुग्धाविदग्धाअन्ततः शृणोत्येव सर्वभूतसमदर्शी अपक्षपातीपरमेश्वरः प्रभुरेवेति ।

ऋग्वेदस्य प्रथमाध्याये प्रथमाष्टके प्रथममंडले षट्सुसूक्तेषु वर्गेष्वेकादशसुद्वादशसु च वायुदैवतयोरिन्द्रमरुतोः सूक्तं ।

युञ्जन्ति ब्रध्नम् अरुषम् चरन्तम् परि तस्थुषः । रोचन्ते
रोचना दिवि ॥

सायनाचार्यकृतभाष्यम् ।

इन्द्रोहि परमैश्वर्ययुक्तः । परमैश्वर्यम् चाग्निवाय्वादित्य नक्षत्ररूपेणावस्थानादुपपद्यते । ब्रध्नम् आदित्यरूपेणावस्थितम् अरुषम् हिंसकरहिताग्निरूपेणावस्थितम् चरन्तं वायुरूपेण सर्वतः प्रसरन्तम् इन्द्रम् परितस्थुषः परितोवस्थितालोकत्रयवर्तिनः प्राणिनो युञ्जन्ति स्वकीये कर्मणि देवतात्वेन सम्बद्धं कुर्वन्ति तस्यैव इन्द्रस्य मूर्त्तिविशेषभूता रोचना नक्षत्राणि दिवि द्युलोके रोचन्ते प्रकाशन्ते ।

(1) Max Müller.

अस्य मन्त्रस्य विल्सनेन इङ्गलण्डीयभाषया कृतस्यार्थस्य संस्कृतानुवादः ।

परि सर्वतः तस्थुषः स्थितवन्तः अर्थात् त्रिलोकवासिनः इन्द्रम् युञ्जन्ति अर्थात् इन्द्रेण सह मिलिताभवन्ति किं स्वरूपन्तमित्यपेक्षायाम् । ब्रध्नम् सूर्य्यरूपम् अरुषम् अग्निरूपम् चरन्तम् वायुरूपम् रोचना दीप्तिरूपम् कास्तारोचना इत्यपेक्षायाम् दिवि रोचन्ते अर्थात् या दीप्तयः आकाशे दीप्यन्ति नक्षत्रादिरूपेणेतिभावः ।

तथा बेम्फिना ।

अर्थात् ते तस्थुषः स्थितान् परि परितः चरन्तम् भ्रमन्तम् अरुषम् रक्तवर्णम् ब्रध्नम् सूर्य्यम् युञ्जन्ति सं योजयन्ति अर्थात् भूषयन्ति । रोचना दीप्तयः तस्यैवेतिभावः दिवि आकाशे रोचन्ते दीप्यन्ति ।

तथा लाङ्ग्लूइसेन ।

परि परितः तस्थुषः अर्थात् अग्निकुण्डस्य चतुःपार्श्वस्थाब्रध्नम् रथम् प्रभोरितिभावः युञ्जन्ति सज्जी कुर्वन्ति । कीदृशम् रथमित्यपेक्षायाम् । अरुषम् उज्ज्वलवर्णम् चरन्तम् वेगवन्तम् रोचनाः प्रातरग्नयः दिवि आकाशे रोचन्ते दीप्यन्ति तस्मिन्नेवकाले इतिभावः ।

तथा मोक्षमूलरेण ।

चरन्तम् परि तस्थुषः परितस्स्थितवन्तः ब्रध्नम् उज्ज्वलम् अरुषम् (१) रक्तवर्णाश्वम् युञ्जन्ति सज्जीकुर्वन्ति । रोचनाःज्योतींषि दिवि आकाशे रोचन्ते दीप्यन्ति ।

(१) तर्कयाम्यत्रसूर्य्यस्य रक्ताश्वत्वेन वर्णनं ।

इदम् सूक्तम् घोरपुत्रस्य कण्वस्य, अस्यगायत्रीछन्दः अनुमीयते चात्रमन्त्रे वर्ण्यते आकस्मिकसूर्य्य इति अत्रनिरूपित उज्ज्वलदिवसाधिदेवतात्वेनइन्द्रः यस्याश्वः सूर्य्यः सहगामिनो मरुतः । अरुषशब्दो रक्तवर्णपरिचायकोपि अत्रहि अश्वम् अर्थादुदयन्तं सूर्य्यम् वक्ति ।

यद्यपि चायं शब्दः रक्ताश्वम् वह्निशिखाम् वा प्रातर्ज्योतींषिच बोधयति ।

तथाप्यस्मिन्मन्त्रे अरुषशब्दं विशेष्यङ्कृत्वा अस्यविशेषणत्वेन ब्रध्नशब्दो निरूपितः ।

यावद्बुद्धौप्रतिभाति तावद् ज्ञायते ब्रध्नशब्दः सामान्यतः शक्त्या उज्ज्वलवर्णवाची कदाचित्पीतवर्णस्य उज्ज्वलपिंगलवर्णस्य वा वाचको भवितुमर्हति अस्य सोमरसपरत्वस्य दृष्टत्वात् ।

एकाभाषा स्थितशब्दस्य भाषान्तरेण तत्त्वतो निरूपयितुमशक्यत्वात् स्वल्पतो वैषम्यात् एवमेवसन्देः । भाषान्तरेण वेदव्याख्याने बहुशोनिपतिष्यति ।

रक्तार्थे विशेषणवाची अरुष शब्दः ।

७ मंडलम् ९७ सूक्तम् ६ ऋक् । तम् सग्मासः अरुषासः अश्वाः बृहस्पतिम् सहवाहः वहन्ति नमः न रूपम् अरुषम् वसानाः ।

३ मं· १ सू· ४ ऋ· । श्वेतम् जज्ञानम् अरुषम् महित्वा ।

३ मं· १५ सू· ३ ऋ· कृष्णासु अग्ने अरुषः वि भाहि ।

३ मं· ३१ सू· २१ ऋ· अन्तर (इति) कृष्णान् अरुषैः धाम-भिःगात् ।

६ मं· २७ सू· ७ ऋ· यस्य गावौ अरुषा: ।

७ मं· ७५ सू· ६ ऋ· प्रति द्युतानम् अरुषासः अश्वाः चित्राः अदृश्रन् उषसम् वहन्तः ।

४ मं· ४३ सू· १२ ऋ· हिरण्य-वर्णम् अरुषम् सपेम ।

१ मं· ११८ सू· ५ ऋ· परि वाम् अश्वाः वपुषः पतङ्गाः वयः वहन्तु अरुषाः अभी के ।

४ मं· ४३ सू· ६ ऋ· घृणा वयः अरुषासः परि ग्मन् ।

५ मं· ७३ सू· ५ ऋ· परि वाम् अरुषाः वयः घृणा वरन्ते आ-तपः ।

१ मं· ३६ सू· ९ ऋ· वि धूमम् अग्ने अरुषम् मियेध्य सृज ।

७ मं· ३ सू· ३ ऋ· अच्छ द्याम् अरुषः धूमः एति ।

७ मं· १६ सू· ३ ऋ· उत धूमासः अरुषासः दिविस्पृशः ।

१० मं· ४५ सू· ७ ऋ· इयर्त्ति धूमम् अरुषम् ।

१ मं· १४१ सू· ८ ऋ· द्याम् अंगेभिः अरुषेभिः ईयते ।

२ मं· २ सू· ८ ऋ· सः इधानः उषसः राम्याः अनु स्वः न दीदेत् अरुषेण भानुना ।

३ मं· २९ सू· ६ ऋ· अश्वः न वाजी अरुषः वनेषु आ ।

४ मं· ५८ सू· ७ ऋ· अरुषः न वाजी काष्ठाः भिन्दन् ।

१ मं· ११४ सू· ५ ऋ· दिवः वराहम् अरुषम् ।

५ मं· ५९ सू· ५ ऋ· अश्व-इव इद् अरुषासः ।

५ मं· १२ सू· २ ऋ· ऋतम् सपामि अरुषस्य वृष्णः

इह वृषन् शब्दस्य योर्थः स उपरिष्टाद् वक्ष्यते (१ मण्डलम् ८५ सूक्तम् १२ ऋक् व्याख्यां पश्य) ।

५ मं· १२ सू· ६ ऋ· ऋतम् सः पाति अरुषस्य वृष्णः ।

६ मं· ८ सू· १ ऋ· पृक्षस्य वृष्णः अरुषस्य नु सहः प्र नु वोचम् ।

६ मं· ४८ सू· ६ ऋ· श्यावासु अरुषः वृषा ।

३ मं· ७ सू· ५ ऋ· जानान्ति वृष्णः अरुषस्य शेवम्

एकत्र आगतम् वृषन् अरुष इत्यतस्तडिदग्नेर्नाम ।

१० मं· ८९ सू· ९ ऋ· नि अमित्रेषु वधम् इन्द्र तुम्रम् वृषन् वृष्णानम् अरुषम् शिशीहि ।

१० मं· ४३ सू· ९ ऋ· उत् गायताम् परशुः ज्योतिषा सह विरोचताम् अरुषः भानुना शुचिः ।

१० मं· १ सू· ६ ऋ· अरुषः जातः पदे इलायाः ।

६ मं· ३ सू· ६ ऋ· नक्तम् यः ईम् अरुषः यः दिवा ।

१० मं· २० सू· ९ ऋ· कृष्णः श्वेतः अरुषः यामः अस्य ब्रध्नः ऋज्रः उत शोणः ।

इह प्रत्येक वर्णस्य भाषान्तरेण पृथक् २ कथनेष्वसामर्थ्यमस्माकम् ।

बहुधा सोमार्थे आगतः अरुष शब्दः ।

९ मं· ८ सू· ६ ऋ· अरुषः हरिः ।

९ मं· ७१ सू· ७ ऋ· अरुषः दिवः कविः वृषा ।

९ मं· ७४ सू· १ ऋ· वाजी अरुषः ।

९ मं· ८२ सू· १ ऋ· अरुषः ब्रह्मा हरिः ।

९ मं· ८९ सू· ३ ऋ· हरिम् अरुषम् ।

९ मं· १११ सू· १ ऋ· अरुषः हरिः ।

(९ मण्डलम् २५ सूक्तम् ५ ऋक् एवं ६१ सू· २१ ऋ· पश्य)

९ मण्डले ७२ सू· १ ऋचि अरुषः सञ्ज्ञा शब्दो रक्ताश्व बोधे ।

अरुष शब्दः सञ्ज्ञा वाची ।

एकस्मिन् सूर्य्यस्य रक्ताश्वे किं वा अग्नेर्द्वयोर्वा बहुषु रक्ताश्वेषु ।

१ मं· ६ सू· १ ऋ· युञ्जन्ति ब्रध्नम् अरुषम् ।

१ मं· ९४ सू· १० ऋ· यत् अयुक्थाः अरुषा रोहिता रथे ।

१ मं· १४६ सू· २ ऋ· रिहन्ति ऊधः अरुषासः अस्य ।

२ मं· १० सू· २ ऋ· श्रुयाः अग्निः-हवम् मे-श्वावा रथम् वहन्तः रोहिताः वा उत अरुषा ।

इह वर्णत्रयम् दर्शितम् अरुषो रोहितादन्यो बुभुत्सितः ।

४ मं· २ सू· ३ ऋ· अरुषा युञ्जानः ।

४ मं· ६ सू· ९ ऋ· तव त्ये अग्ने ऋतः-रोहितासः अरुषासः वृषणः ।

पुनरपि वर्णत्रयविशिष्टा अश्वाः पृथक् २ प्रतीयन्ते, यथा हरितः रोहितः अरुषश्च ।

८ मं· ३४ सू· १७ ऋ· ये ऋज्रा वात-रम्हसः अरुषासः रघुस्यदः ।

इहारुषोविशिष्यवाची अन्यत्सर्वन्तद्विशेषणम् इदमपिसम्भवति अत्रसर्वं विशेषणम् आगामिमन्त्रस्याशुशब्दस्य । ऋज्रशब्दोऽपि विशिष्यरूपस्य कस्यचिद्रक्तवर्णस्य वाचकः तदत्र न बाधकम् पश्यतु ।

१ मं· ६ सू· १ ऋ· । एवं ९४ सू· १० ऋ· ।

७ मं· १६ सू· २ ऋ· स योजते अरुषा विश्व-भोजसा ।

७ मं· ४२ सू· २ ऋ· युंक्ष्व-हरितः रोहितः च ये वा सद्मन् अरुषा ।

इहारुष आयातोमेघार्थे सचमेघः वृत्रइव इन्द्रस्य शत्रुत्वेन निरूपितः स रुणद्धि जलम् तदपसारयितुं यतते इन्द्रो वायुश्च ।

१ मं· ८५ सू· ५ ऋ· उत अरुषस्य वि स्यन्ति धाराः ।

५ मं· ५६ सू· ७ ऋ· उत स्यः वाजी अरुषः ।

इहारुषार्थो मेघः परन्तु मरुदश्वेष्वेकस्सम्भवति ।

॥ रूढौ सूर्य्यदेवस्य नाम अरुषः ॥

अन्यस्मिन्मन्त्रे अरुषः रक्तार्थे विशेषणवाची अथवा कस्यचिदश्वस्य नाम अपरस्मिन्नपि मन्त्रे (योऽस्माभिर्ग्रन्थान्तरे लिखितः) अरुषस्सूर्य्यदेवस्य नाम समायातः यथा प्रातर्देदीप्यमानो देवः । मयायदेवं व्याख्यातम् ।

तत्र कस्मिंश्चिन्मन्त्रे तादृशार्थे केचिद्विप्रतिपद्यन्ते तद्यत्र प्रत्याख्यास्यामः येन कस्य कस्यापि मन्त्रस्य अर्थान्तरमपि भवितुमर्हति । एवमपिसम्भवति अरुषार्थे प्रकटने प्रातः कालस्य सूर्य्यस्य वैदिकदेवस्य वा (ग्रीकभाषायां इरोस् इति शब्दस्य निदानत्वात् ग्रन्थान्तरे मया दर्शितः) शङ्के इतरे मादृशा इव न मन्यन्ते चात्रविषये ।

तथा सर्वे मन्त्रा ये मया पर्य्यालोचिताः तेमन्त्रा अपि ये मया क्षणं परित्यक्तुमभीप्सिता अरुषं प्रातः कालसूर्य्यदेवार्थे पर्य्यवसितं सञ्ज्ञार्थे सङ्गमयितुं विशेषणार्थात्केवल संज्ञार्थो द्वा प्रकृष्टं कथयन्ति ।

ए तदपि वक्तुं शक्यते यत्रारुषशब्दो देवार्थे आयातः

तत्र सूर्य्यः इन्द्रोऽग्निर्वा अस्माभिस्तात्पर्य्यतो नियुज्यते, एव मपि यदि कोपि वदेत् तदपि किञ्चित्सु सङ्गतम्भवति ।

तस्य देवस्य मूर्त्तिः प्रातः किरणो वा उज्ज्वलाकाशो वा प्रातस्सूर्य्यो वा भवति ।

किन्त्वयमन्येषाचार्मां सूचकः तच्चान्यन्नाम प्रथममस्मिन्नेवार्थे आसीत् पश्चात्समयविशेषानुसारेण पृथक् २ देवानामपि बोधको भवति ।

१ मं· ६ सू· १ ऋ· युञ्जन्ति ब्रध्नमरुषमित्यत्राक्षपार्थो ऽस्माभिस्सञ्ज्ञार्थेऽश्वो रक्ताश्वो वा सङ्गमयितुंशक्यते परन्तु सूक्तस्य ऋषिम्प्रष्टुं शक्नुमः रक्ताश्वस्याशयः कः किंवात्मानमेवपृच्छामीति रक्ताश्वस्य कोऽभिप्रायः इति जिज्ञासायाम् प्रातस्सूर्य्यः प्रातःकिरणो वा ।

मन्त्रान्तरेऽस्यार्थो रक्ताश्वो न सम्भवति केवलं रक्तवर्ण एव तात्पर्य्यम् तस्माद्रक्तवर्णनामाप्रातर्देवः प्रातस्सूर्य्यो वा प्रतीयते ॥

७ मं· ७१ सू· १ ऋ· अयं स्वसुः उषसः नक्त जहीते ऋयक्ति कृष्णीः अरुषाय पन्थाम् ।

इहारुषस्य पुरातनकथायां तथा रूपं वर्णितं यथोषसः प्रातःकालस्य । एवं वयं यथा वदामः कालस्य विभागं तथा वैदिकर्षयः कथयन्ति । सजीवः ज्ञानीकश्चित्पुरुषइति यस्माद्धि देवाकारं अर्द्धञ्च मनुष्याकारम् । अस्यैव शक्तिर्वर्त्तते यथा सशृणोत्यस्माकं मन्त्रं ददातिच यजमानेभ्योऽभिप्रेतार्थम् । तदत्र किमपि न बाधकं वर्त्तते । अरुषार्थग्रहणं रूढौ प्रातःकालस्य प्रातः सूर्यस्य वा यस्य सविधे कृष्णादेवी पन्थानन्ददाति यदा सउदेति पूर्वस्यान्दिशि ॥

६ मं· ४९ सू· २ ऋ· दिवः शिशुम् सहसः सूनुम् अग्निम् यज्ञस्य केतुम् अरुषम् यजध्यै ॥

इह यत्रार्थेनाम आयाति तत्राऽनायासेन बोधगम्यम्भवति पूर्वस्मात्सुलभतरमरुषस्य विशेषणवाचित्वम् । तच्चविशेषणमग्नेर्वा यज्ञस्य केतोः ।

प्रथमग्रन्थे ऽस्यैव भाषान्तरेण यद्व्याख्यातं तद्द्वितीयग्रन्थे परिवर्त्तितं यथा अग्नेः पूजायै सदिवः शिशुः बलस्य पुत्रः एवं यस्य रक्तालोकः पुनरपि मया प्रथमव्याख्यानं गृह्यते ध्रुवं पश्यामिच अरुषः स्वतोग्नेर्नामेति । योऽग्निःप्रतिरूपीभूतः प्रातर्यज्ञायेरुदीयमानसूर्यस्यच, सूक्तकारस्य मनसिसहि अग्निः कश्चिदतिरिक्त एतेभ्यइति वर्त्तते यो दिवः पुत्रः कथमिति आकाशादुत्पन्नः यज्ञस्य केतुः कथमिति, विज्ञापयति यस्मात्प्रातर्यज्ञसमयआगत इति किंवा स्वयमेव पूर्वस्यान्दिशि आकाशरूपवेदिकायां यज्ञं प्रकाशयति सोऽरुषः कथमिति प्रथमतः उज्ज्वलरक्तवर्णस्य अनन्तरं क्रमात् प्रातःकालस्य प्रतिरूपत्वात् ।

पूर्वोक्तार्थविज्ञानेन पश्यामि कमपिकमपि मन्त्रम् यतः पुराणकथाऽनायासेन भवितुमर्हति यथा दिवः शिशुम् कोपिकोपि तथा कथायाङ्गन्तुंचशक्नोति यथा सहसः सूनुं यज्ञस्य केतुम् एतदनन्तरं यो मन्त्रोवर्त्तते ततइदमवगम्यते अरुषः पुराणेरोगसर्ग दूषितो बभूव । एव मरुषस्तादृशावस्थां प्राप्तः यतो विशेषणस्य विशेष्यपरता जाता ।

६ मं· ४९ सू· ३ ऋ· अरुषस्य दुहितरा विरूपे ( इति विरूपे ) स्तृभिः अन्यापिपिशे सूरः अन्या ॥

इहारुषः स्पष्टतः पौराणिकः पुरुषो भवति अग्निः स विता वैश्वानरः दिनं रात्रिश्च यद्यस्यादुहितरौ स्यातान्तदास्वयमपि कश्चित्पुरुषधर्म्मा भवति यथादिवः शिशुंदिवारात्रस्य पितरं अतएव नायङ्कालविशेषः नापि कार्यकारणरूपः ।

४ मं· १५ सू· ६ ऋ· तम् अर्वन्तम् न सा नसिम् अरुषं न दिवः शिशुम् मर्मृज्यन्ते दिवे-दिवे ।

इहापि अरुषंदिवःशिशुमित्यत्र पौरुषेयशीलमायाति अरुषमित्यनन्तरं यत्र पदं वर्त्तते तच्चेत्प्रामाणिकं तर्हि अग्नेर्यज्ञाग्नेः स्पष्टतः पृथक्त्वमायाति यस्येदं सूक्तम् एवमरुषं दिवः शिशु मित्यतो: निर्म्मलोज्ज्वलप्रातःकालोऽस्मिन्मन्त्रे दृष्टान्तः कस्येति वेदिस्याग्निमार्जनस्य ।

५ मं· ४७ सू· ३ ऋ· अरुषः सुपर्णः ।

स्त्रीलिङ्गरूपीशब्दो विशेष्यनिघ्नः ।

अरुषी शब्दोऽरुष इव विशेषणार्थकस्तस्मिन्नेवरक्तार्थे ।

३ मं· ५५ सू· ११ ऋ· श्यावी च यत् अरुषी च स्वसारौ ।

१ मं· ९२ सू· १ ऋ· अपिच २ ऋ· गावः अरुषीः अग्नि व अरुषीः गाः ।

१ मं· ९२ सू· २ ऋ· रुशन्तम् भानुम् अरुषीः अशिश्रयुः ।

इह उषस इति पदं समभिव्याहृत एक पंक्तौ अरुषी शब्द उष सो विशेषणं किं वा उषसः संज्ञा तस्यागोर्वा ।

१ मं· २० सू· २१ ऋ· अश्वे न चित्रे अरुषी ।

इहापि संबोधनेऽरुषीतिशब्दस्य विशेषणवाचित्वं बोध्यते अग्निमन्त्रार्थचिन्तनेन ।

४ मं· ५२ सू· २ ऋ· अश्वा-इव चित्रा अरुषी माता गवां ऋता-वरी सखा अभूत् अश्विनोः उषाः ।

१० मं· ५ सू· ५ ऋ· सप्त स्वसॄः अरुषीः ।

। स्त्रीलिङ्गरूपीशब्दः संज्ञाभूतः ।

यद्यरुषीति संज्ञास्यात्तदाग्न्यश्वस्य इन्द्रस्य सोमस्य च बोधपरत्वमस्य एकस्या अश्वाया अपि मन्त्रेषु उषा इति एवम्प्रकारेण स्पष्टतो दर्शितमेव सुषशब्दोऽपी त्यमतिसमीपेवर्त्तते एकप्रमाणेन न निश्चेतुं शक्यते अरुषीति शक्त्याउषसोवाचकम् । पुरा यथा केवलमरुषपदात् प्रातःकालो गृहीतः तथा केवल मरुषीपदात् उषोऽर्थग्रहणे अन्येषामपि मन्त्राणामर्थस्स्पष्टतः प्रतिपन्नो भवति ।

१ मं॰ ७२ सू॰ १॰ ऋ॰ प्र नीचीः अग्ने । अरुषीः अजानन् ।
८ मं॰ ६९ सू॰ ५ ऋ॰ इन्द्रस्याश्वं सूचयति अत्र विशेष्यं वा विशेषणञ्च निश्चीयते ॥

. . . आ हरयः ससृज्रिरे अरुषीः
यथामयादृष्टो बहुषु सोमार्थेहरिरिति कथितम् ॥

९ मं॰ १११ सू॰ २ऋ॰ त्रिधातुभिः अरुषीभिः- इत्यतो ज्ञायते सोमस्य तेषां रक्ताश्वानां वर्णनङ्क्रियते किन्तु सम्पूर्णञ्चस्पष्टम् ।

८ मं॰ ६८ सू॰ १८ ऋ॰ } अरुषी शब्दार्थः केवलमश्वातस्यां
८ मं॰ ५५ सू॰ ३ ऋ॰ } वर्णस्य कोऽपि संबन्धोनानास्ति

इदमेवाद्भुतं वेदे अरुषशब्दो रक्तवर्णः एवं पारसीकानां प्राचीनभाषायां एतत्प्रकृतिको ओरुषः श्वेतंवक्ति वेदे अरुषशब्दार्थोरक्तो नतुश्वेतः १ मं॰ २० सू॰ ९ ऋ॰ प्रकटितोभवति । कथमिति अरुषेणसहश्वेतो वर्त्तते अतएव ज्ञायते चास्माभिः अरुषः प्रथमतउज्ज्वलतावाची तेन संस्कृतज्ञाः पारसिकाश्चतमुज्ज्वलतामादायैव पृथग् २ वर्णाञ्चिरूपयन्ति अरुष इतिअर्वस् प्रकृतिकः अरधातुजः तस्यार्थः सवेगगतिः एतद्विषये मदीयं ग्रन्थान्तरं पश्य अरुषा हरीशब्दयोर्योयो ऽर्थःसम्भवति स विज्ञापितः ॥ इति ॥ शिवप्रसादः

---

॥ श्रीः ॥

## श्रीमत्सायणाचार्यकृतवेदभाष्यस्यास्वारसिकत्वं मन्यमानान् प्रति किंचिदुच्यते

अहह महानयं कतिपयभारतजनस्याविवेको यद् अहमेव परीक्षको, ऽहमेव च प्रेक्षावान्, मया च यदुच्यते तदेव प्रमाणं, सर्वो ऽयं जनो न किमपि वस्तुतत्त्वं निश्चेतुं शक्नोति मदृते, इति सुदृढं निश्चित्य नानाविधैर्दुर्भाषणैरपवादयति युगपत्सर्वान् आर्यावर्तीयान् । नह्यस्माकं वेदः शाकुन्तलं नाम नाटकं येन तस्य महाबुद्धिमता बलवत्प्रयत्नशालिना ऽपि दिव्यविज्ञानं विनैव क्रियमाणं व्याख्यानं विश्वासार्हं स्यात्, प्रवर्तेन्निवर्त्तयेद् वा प्रेक्षावतः । धर्माधर्माद्यतीन्द्रियेषु वस्तुषु केवलमार्षं विज्ञानमेव व्याचक्षाणस्य प्रामाण्ये उपयुज्यते, न पुनर्बुद्धिपरिश्रममात्रम् । अस्माभिरपि किं तथाविधानि वेदव्याख्यानानि न निर्मातुं शक्यन्ते यादृशानि महाशयमोक्षमूलरप्रभृतिभिर्निर्मितानि, तादृशानां च लौकिकदृष्ट्या कुत्रचिदंशे भगवद्विद्यारण्यप्रणीतभाष्यसंदर्भापेक्षया चारुतरत्वेन परिदृश्यमानानामपि किं धर्माधर्मयोः प्रामाण्यं स्यात् । किं द्वीपान्तरीयो ऽपि महाजनो भगवन्तं परमेश्वरमपि तदीयलोकोत्तरमहैश्वर्यदर्शनं विनैव धर्माधर्मयोः प्रमाणीकुरुते स्म, अथ च निःशङ्कं तदाज्ञावाक्यमनुप्रवर्तते स्म, भारता वा व्यासादिम् । न वयं तथा श्रद्धाजडा यत् को ऽपि किमपि वदतु तत्प्रमाणत्वेनानुमन्तव्यमननुमन्तारश्च वाग्वज्रेण प्रहर्तव्या यथा श्रीमन्मोक्षमूलरादिव्याख्यानानुसारिणः कतिपये भारताः, परं वयं द्वीपान्तरवासिनो ऽपि भारतदेशीयशास्त्रे ऽतिप्रवीणान् श्रीमन्मोक्षमूलरप्रभृतीन् समीक्ष्य तेषां परमोत्तमबुद्ध्यभ्यासोद्रेकं शिरसा श्लाघामहे, अतिपरिश्रमशालिप्रज्ञावद्गणगणनायां च प्रथमं गणयामहे । नैतावता ते उत्तमपण्डिता इति कृत्वा बलिष्ठेषु गायकेषु भटेष्वपि प्रथमं गणनीया गणने ऽपि न काचित्तेषां प्रशंसा स्यात् प्रत्युत गणयितुरविवेक एव प्रकाशितः स्यात्, एवमेतत् कतिपयानां विद्यारण्यव्याख्यानस्यास्वारसिकत्वाभिमननपुरस्सरं नवीनव्याख्यानस्य प्रामाणिकत्वेनानुमननं व्याख्यातॄणां प्रसादार्थं क्रियमाणं परं महाशयानां तेषामप्रसादमेव संपादयेदिति निश्चयः । नहि को ऽपि महात्मा मिथ्याप्रशंसया तुष्यतीति प्रसिद्धावप्येषामस्मदीयभारतानामत्यन्तमाश्चर्यावहा तथा प्रवृत्तिः केवलमर्थी दोषं न पश्यतीत्यस्य मुख्यमुदाहरणं भवितुमर्हति । अस्माकं तु द्वीपान्तरीयान् ईदृशविद्योद्रेकशालिनो दृष्ट्वात्यर्थं मोदमानानामपि निष्पक्षपातधीरेव मिथ्याप्रशंसाप्रवृत्तिं कुण्ठयतीति किं कुर्महे । अत्रायमेव प्राचीननवीनव्याख्यानां परीक्षानिकषोपलो योयमृग्वेदस्य प्रथमाष्टकप्रथमाध्यायैकादशवर्गीयो मन्त्रः । अस्य च आधुनिकं व्याख्याचतुष्टयं श्रीमद् विल्सन् बेन्फि लाङ्ग्लूइस मोक्षमूलराभिधैः प्रणीतं, तत्राद्यं सायणाचार्यानुसार्येव, पराणि त्रीणि तद्विरुद्धानि, तत्राप्यर्वाचीनतरैः कतिपयैर्विशेषतो ऽरुषशब्दस्यार्थो विचारितः बहुमन्त्रसंवादप्रदर्शनपुरःसरमुज्ज्वलपरतया व्यवस्थापितः । परं तु तान् सर्वान् प्रतिवदामस्तैत्तिरीयब्राह्मणतृतीयकाण्डस्यनवमप्रपाठकतुरीयानुवाकार्थानुसंधानपुरःसरं सायणाचार्येणायमर्थो निरूपितस्ततः स्पष्टं तादृश एवार्थस्तस्य मन्त्रस्यावधार्यते इत्यलमर्थान्तरोपवर्णनार्थैः क्लेशैः । नहि श्रुत्यैव स्वार्थे बोधिते तत्र कुतर्काणामवकाशः, नहि सिंहपरस्य हरिपदस्य सहस्रस्थलेषूपलम्भे ऽपि वक्ता मण्डूके स्वतात्पर्यं यदि स्पष्टं बोधयेत् तर्हि तद्धरिपदस्य सिंहपरता शक्या ऽवधारयितुम्, तथा ऽवधारयिता च शुक्लाम्बरधरव्याख्यातेवोपेक्षणीयः स्यात्,

तथा च लौकिकानां गाथा । शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेदिति भगवद्गणेशध्यानस्य केनचिदित्यमर्थोपवर्णनमकारि, शुक्ला गौरी अम्बा यस्य सशुक्लाम्बो गणेशस्तं राति वहनीयत्वेनादत्ते इति शुक्लाम्बरो मूषिकस्तं

भक्षणार्थं धरतीति शुक्लाम्बरधरो मार्जारः शशिवर्णः शुभ्रः चतुर्भुजत्वं तु स्पष्टमेव, भक्ष्यलाभेन च प्रसन्नवदनो ऽपीति गौरमार्जारध्यानमनेन विधीयत इति । अन्येन चान्यथैव व्याख्यातं रजकरासभपरो ऽयं श्लोक इति । भवति च स शुक्लाम्बरधरः पीतगौरत्वाच्छशिवर्णः महामूढपशुत्वाच्चिन्तालेशराहित्येन प्रसन्नवदनो ऽपीति । इत्थं चात्र मात्सर्यमुत्सार्य निष्पक्षपातधिया विचारणीयं तारतम्यं सुधीभिरिति शम् ॥

काशीस्थराजकीयपाठशालायाम् { धर्मशा॰ राजारामशास्त्री
संख्यशा॰ बालशास्त्री

---

# THE
# VAIŚESHIKA APHORISMS
## OF
# KAṆĀDA.
## SECOND BOOK, FIRST DAILY LESSON.

*(Continued from page 89.)*

Ether an eternal substance. द्रव्यत्वनित्यत्वे वायुना व्याख्याते ॥२८॥

Aph. 28. The substantiality and eternity [of ether] are explained by [its analogy with] air.

[1] To prove by analogy that the substance which has sound for its mark is a substance and eternal it is stated that as air is eternal because it does not inhere in any substance so also is ether, and that as air as a substance because it has qualities so also is ether. U.

[2] As the primary aerial atom is eternal because it does not inhere in any substance, and a substance because it has qualities, so also is ether. V.

Ether a unit. तत्त्वं भावेन ॥ २९ ॥

Aph. 29. Its unity is [explained by] existence.

[3] As being or existence is one, so also is ether only one. U.

शब्दलिङ्गाविशेषाद्विशेषलिङ्गाभावाच्च ॥ ३० ॥

Aph. 30. Also because sound its mark is not particular, and because there does not exist a particular mark [of ether.]

---

[1] शब्दलिङ्गस्य द्रव्यस्य द्रव्यत्वनित्यत्वे अतिदेशेन साधयन्नाह। अद्रव्यत्वाद्यथा वायोर्नित्यत्वं तथाकाशस्यापि गुणवत्त्वाद्यथा वायोर्द्रव्यत्वं तथाकाशस्यापीत्यर्थः ॥

[2] यथा वायुपरमाणोरद्रव्यवत्त्वेन नित्यत्वं गुणवत्त्वेन च द्रव्यत्वं तथाकाशस्यापीत्यर्थः ॥

[3] भावः सत्ता सा यथैका तथाकाशमप्येकमेवेत्यर्थः ॥

---

[1] 'The unity of ether is established' is to be understood. It being ascertained that it is an eternal substance, and that all sounds have that one only substratum, it follows that the conception of another substratum would be a forced conception. Moreover in the conception of ether sound [ is regarded as] its mark, and this mark is not particular and there is no other mark establishing its particularity or establishing its divisibility. It will be stated hereafter that though knowledge &c. are a non-particular mark of souls, yet there is a proof of the diversity of souls in another mark which is difference of conditions. U.

[2] As diversity of souls is proved by the consideration that in one soul at one time an effect is produced in the form of pleasure, and in another soul an effect is produced in the form of pain, and so there is a difference in two effects of soul, pleasure and pain, so it is established, by the absence of proof to the contrary and by the simplicity [of the conception] that ether is not manifold but exists as a unit, inasmuch as there is no particularity in sound, which is the mark of ether, by which the diversity of ether might be proved, there being no other mark demonstrative of the diversity of ether. V.

Individuality of ether. तदनुविधानादेकपृथक्त्वञ्चेति ॥ ३१ ॥

Aph. 31. In conformity with this is its individual unity.

[3] The individual unity of ether is proved by its unity, from the consideration of the universal presence of the attribute individual unity wherever unity exists. V.

[4] The proof of its individual unity is that individual

---

[1] तत्त्वमाकाशस्य सिद्धमित्यर्थः वैभवे सति सर्वेषां शब्दानां तदेकाश्रयतयैवोपपत्तावाश्रयान्तरकल्पनायां कल्पनागौरवप्रसङ्गः अन्यदपि यदाकाशः कल्पनीयं तत्रापि शब्द एव लिङ्गं तच्चाविशिष्टं न च विशेषसाधकं भेदसाधकं लिङ्गान्तरमस्ति आत्मनां यद्यपि ज्ञानादिकमविशिष्टमेव लिङ्गं तथापि व्यवस्थातो लिङ्गान्तरादात्मनानात्वसिद्धिरिति वक्ष्यते ॥

[2] यथा कुत्रचिदात्मनि कदाचित् सुखरूपमेव कार्यं जायते तदैवान्यस्मिन्नात्मनि दुःखरूपमेव कार्यं जायते इत्यात्मकार्ययोः सुखदुःखयोर्वैलक्षण्यादात्मनानात्वं तथाकाशे शब्दरूपलिङ्गस्य न कश्चिद्विशेषो येनाकाशनानात्वं सिध्यति न वाकाशनानात्वसाधकं लिङ्गान्तरमस्ति तया च प्रमाणाभावात् लाघवाच्चाकाशस्य न नानात्वं किन्त्वेकव्यक्तित्वमित्यर्थः ॥

[3] यत्र यत्र एकत्वं तत्रैवैकपृथक्त्वमिति व्याप्तेराकाशस्यैकत्वेनैव एकपृथक्त्वसिद्धिरिति ॥

[4] नियमेनैकपृथक्त्वमेकत्वमनुविधत्ते इत्येकपृथक्त्वसिद्धिः इति आह्निकपरिसमाप्तौ मानसप्रत्यक्षाविषयविशेषगुणवद्द्रव्यलक्षणमाह्निकार्थः। तेन पृथिव्यप्तेजोवाय्वाकाशानां प्रसङ्गत ईश्वरात्मनश्च लक्षणमस्मिन्नाह्निके तेन चतुर्दशगुणवती पृथिवी ते च गुणा रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वसंस्काराः । तावन्त एव गन्धमपास्य स्नेहेन सहापाम्। एत एव रसगन्धस्नेहगुरुत्वान्यपास्य तेजसः। गन्धरसरूपगुरुत्वस्नेहद्रवत्वान्यपास्य वायोः। शब्देन सह संख्यादिपञ्चगुणवत्त्वमाकाशस्यासंख्यादिपञ्चकमात्रं दिक्कालयोः। परत्वापरत्ववेगरहितं संख्यादिपञ्चकं मनसः। संख्यादिपञ्चकं ज्ञानेच्छाप्रयत्नाश्चेश्वरस्य ॥

unity necessarily follows unity. The particle *iti* implies the completion of the daily lesson. The scope of this section is to state the characteristics of particular substances which possess qualities and are not objects of the cognition of the internal organ. Therefore the characteristics of earth, water, light, ether, and in connection with them that of the divine soul, are stated in this daily lesson. Accordingly the earth has been said to be possessed of fourteen qualities. These qualities are colour, taste, smell, feel, number, extension, individuality, conjunction, disjunction, highest and not highest generality, gravity, fluidity, and self-restitution. Exactly the same number of qualities, with the exception of smell, and addition of viscidity, belong to water. These same qualities, with the exception of taste, smell, viscidity, and gravity, belong to light, and with the exception of smell, taste, colour, gravity, viscidity, fluidity, to air. With the addition of sound, number, and the four following qualities [extension, individuality, conjunction and disjunction,] belong to ether. Only number and the four following qualities belong to time and space. Number and the four following qualities, accompanied with highest and not highest generality, and with impetus, belong to the internal organ. Number and the four following qualities, and knowledge, desire, and volition belong to God. U.

---

## SECOND DAILY LESSON.

Natural and communicated qualities.

पुष्पवस्त्रयोः सति सन्निकर्षे गुणान्तराप्रादुर्भावो वस्त्रे गन्धाभावलिङ्गम् ॥ १ ॥

Aph. 1. A flower and a garment being brought into contact, the non-appearance in the garment [ of smell ] from another quality is a mark of the non-existence of smell in the garment.

[1] With the purpose of investigating smell &c., the characteristics of the elements, it is now established that smell &c. are natural and communicated. Colour, taste, smell, and feel being natural where they are produced in the order of qualities proceeding from causes become in such cases characteristics, but not in other cases. For the fragrance experienced in a breeze, or the cold experienced on the surface of a stone, or the warmth experienced in water, is not a characteristic. Therefore it is said, 'A flower and a garment being brought into contact,' or when a garment is brought into contact with a golden ketakí (Pandanus Odoratissimus) flower, the fragrance of the golden ketakí which is then experienced does not belong to the garment; for it is not produced from the garment in the order of a quality proceeding from a cause, but is communicated through contiguity with the golden ketaki flower. For the non-existence of smell in the ketakí is not a mark of the non-existence of smell in the garment. What then is the mark? It is said to be the non-appearance [of smell] from another attribute, *i. e.* its non-appearance or non-production from a quality which is a cause. For if the smell which is perceived in the garment be natural, it will be perceived, before the contact with the ketakí, in the threads which are its constituent parts. This is not the case and therefore the smell in question does not inhere in the garment, inasmuch as the particular quality is not produced by the qualities of the constituent parts, as is the case in cold and hot feel, and the like. U.

Smell the characteristic of earth.

व्यवस्थितः पृथिव्यां गन्धः ॥ २ ॥

Aph. 2. Smell is established as [the mark] of earth.

[1] The characteristic of earth is stated to be its natural smell. Smell discriminated by its disjunction from and conjunction with other things, and by its excluding things of similar and dissimilar classes, is established as the characteristic of earth. For the earth has smell only, and only the earth has smell. It is therefore established that smell, which excludes [earth] from water and the next seven [substances] which are of the same class, and from quality and the four following [categories] which are of a different class, is natural to earth. U.

Analogously heat is the characteristic of light.

एतेनोष्णता व्याख्याता ॥ ३ ॥

Aph. 3. By this heat is explained.

[2] It is stated that the method of establishing that

---

[1] इदानीं भूतानां लक्षणानि गन्धादीनि परीक्षिषुर्गन्धादीनां स्वाभाविकत्वमौपाधिकत्वञ्च व्यवस्थापयन्नाह। रूपरसगन्धस्पर्शा यत्र कारणगुणप्रक्रमेणोत्पद्यन्ते तत्र स्वाभाविकाः सन्तो लक्षणतामुपयान्ति नान्यथा न हि समीरणे उपलभ्यमानं सौरभं शिलातले उपलभ्यमानं शैत्यं जले उपलभ्यमानमौष्ण्यं वा लक्षणं भवति तदेतदाह पुष्पवस्त्रयोरिति न हि कनककेतकीकुसुमसन्निकृष्टे वाससि कनककेतकीसौरभमुपलभ्यमानं वाससः। न हि वाससः कारणगुणप्रक्रमेण तदुत्पन्नम् किं तर्हि कनककेतकीसन्निधानादौपाधिकं न हि वस्त्रे गन्धाभावे केतकीगन्धाभावो लिङ्गम्। किं लिङ्गमत उक्तं गुणान्तराप्रादुर्भाव इति गुणान्तरात् कारणगुणात् अप्रादुर्भावो ऽनुत्पत्तिः यदि हि वस्त्रे यो गन्ध उपलभ्यते स तस्य स्वाभाविकः स्यात्तदा तदवयवेषु तन्तुषु केतकीसन्निकर्षात् पूर्वं तत्र वस्त्रे चोपलभ्येत न चैवमित्यर्थः तथा च विवादाध्यासितो गन्धो न वस्त्रसमवेतः तदवयवगुणाजन्यविशेषगुणत्वात् शीतोष्णस्पर्शादिवत् ॥

[1] स्वभाविकं गन्धं पृथिव्या लक्षणमाह। पृथिव्यां व्यवस्थितो ऽयोगान्ययोगाभ्यां परिच्छिन्नः समानासमानजातीयव्यावर्तकतया गन्धो लक्षणमित्यर्थः भवति हि पृथिवी गन्धवत्येव पृथिव्येव गन्धवतीति तदेवं समानजातीयेभ्यो जलादिभ्यष्टभ्यो ऽसमानजातीयेभ्यो गुणादिपञ्चभ्यो व्यावर्तकः स्वाभाविकः पृथिव्यां गन्ध इति व्यवस्थितम् ॥

[2] गन्धस्य स्वाभाविकत्वव्यवस्थापनप्रकारमुष्णतायां तेजोलक्षणे ऽप्यतिदिशन्नाह। अबादिलक्षणे शैत्यादावप्ययमतिदेशो द्रष्टव्यः ॥

smell is a natural quality may be analogously applied to heat as the characteristic of light [or fire.] This analogy is to be regarded as holding good with respect to cold &c. as characteristic of water &c. U.

[1] It is stated that the characteristic of light [or fire] which consists of a hot feel is, like the characteristic of earth, not universally predicable of water, &c. V.

तेजस उष्णता ॥ ४ ॥

Aph. 4. Heat is [the characteristic] of light.

[2] The characteristic of light is examined. It is meant that natural heat is the characteristic of light. Colour also, white and luminous, is implied. U.

[3] Heat belongs to light alone not to any thing else. Therefore the characteristic of light cannot be universally affirmed of any thing else. V.

Cold the characteristic of water.

अप्सु शीतता ॥ ५ ॥

Aph. 5. Cold is [the characteristic] of water.

[4] Natural cold is the characteristic of water. Therefore it cannot be also universally affirmed of the surface of stone, sandal-wood, &c. By cold also its colour and taste are characterised, and viscidity and natural fluidity are also implied. U.

[5] Cold belongs to water not to any thing else. Therefore the characteristic of light cannot be universally affirmed also of the surface of stone &c, inasmuch as its appearance there is communicated [*i. e.* not natural.] V.

Existence of time as a substance proved.

अपरस्मिन्नपरं युगपत् चिरं क्षिप्रमिति काललिङ्गानि ॥ ६ ॥

Aph. 6. The [notions of] posteriority in relation to posteriority, of simultaneity, of slowness, and quickness are marks [of the existence] of time.

[6] The particle *iti* implying a kind of notion has relation to each individual word, so that the meaning is that the conception of posteriority, the conception of simultaneity, the conception of slowness, and the conception of quickness, are marks [of the existence] of time. By posteriority in relation to posteriority we are to understand also priority in relation to priority. The sense is therefore as follows :—if in relation to an old man, between whose birth and the present time there is an interval of many revolutions of the sun, we make a youth the subject of consideration, a [notion of] priority is produced, and this must have some non-inherent cause. In like manner if the old man be made the subject of consideration with reference to the youth, we shall find that [a notion of] posteriority is produced. Simultaneously means at the same time, during the same revolution of the sun, or during the same time other than a revolution of the sun, with reference to such judgments as, 'They are born at the same time,' 'they stand at the same time,' 'they make [something] at the same time.' Revolutions of the sun which have not yet taken place are not included and those revolutions do not exist at all. The substance, then, which particularises such particular notions, because otherwise they could not be produced, is time. U.

Time an eternal substance.

द्रव्यत्वनित्यत्वे वायुना व्याख्याते ॥ ७ ॥

Aph. 7. Its substantiality and eternity are explained by air.

[1] As the primary aërial atom is a substance because it possesses qualities, and eternal because it is a substance not inhering in any other substance (see II 1, 12, 13,) so also is time. U.

[2] Time is, like the primary aërial atom, a substance because a subject in which qualities exist, and eternal because it has no parts. V.

Unity of time.

तत्त्वं भावेन ॥ ८ ॥

Aph. 8. Its unity is explained by existence.

[3] The sense is that time, like existence, is one be-

---

[1] पृथिवीलक्षणस्येव उष्णस्पर्शवत्त्वरूपतेजोलक्षणस्यापि न जलादावतिव्याप्तिरित्याह ॥

[2] तेजोलक्षणं परीक्षते। स्वाभाविकमुष्णता तेजोलक्षणमित्यर्थः रूपमेव शुक्लभास्वरमुपलक्ष्यते ॥

[3] तेजस एव उष्णता नान्येषामिति तेजोलक्षणस्य नातिव्याप्तिरिति भावः ॥

[4] स्वाभाविकी शीतता अपां लक्षणमित्यर्थः। तथा च शिलातलश्रीखण्डादौ नातिव्याप्तिरिति भावः। शीततया रूपरसावप्युक्तलक्षणौ स्नेहं सांसिद्धिकद्रवत्वञ्चोपलक्षयति ॥

[5] अप्सु शीतता नान्यत्रेति न जललक्षणस्य शिलातलादावतिव्याप्तिस्तत्र शैत्यप्रतीतेरौपाधिकत्वादिति भावः।

[6] इतिकारो ज्ञानप्रकारपरः प्रत्येकमभिसम्बध्यते तथा चापरमिति प्रत्ययो युगपदिति प्रत्ययः चिरमिति प्रत्ययः क्षिप्रमिति प्रत्ययः काललिङ्गानीत्यर्थः। अपरस्मिन्नपरमित्यनेन परस्मिन् परमित्यपि द्रष्टव्यं तेनायमर्थः बहुतरतपनपरिस्पन्दनान्तरितजन्मनि स्थविरे युवानमवधिंकृत्वा परत्वमुत्पद्यते तच्च परत्वमसमवायिकारणसापेक्षम्। एवं स्थविरमवधिं कृत्वा यूनि अपरत्वोत्पत्तिर्निरूपणीया। युगपदिति युगपज्जायन्ते युगपत् तिष्ठन्ति युगपत् कुर्वन्ति इत्यादिप्रत्ययानाञ्च एकस्मिन् काले एकस्यां सूर्यगतौ एकस्मिन् सूर्यगत्यवच्छिन्नकाले इत्यर्थः न चाप्राप्ता एव सूर्यगतयो विशेषणतामनुभजन्ति न च स्वरूपप्रत्यासन्ना एव ताः तस्मादेतादृशविशिष्टप्रत्ययान्यथानुपपत्त्या विशेषणप्रापकं यद्द्रव्यं स कालः ॥

[1] यथा वायुपरमाणोर्गुणवत्त्वाद्द्रव्यत्वम् अद्रव्यद्रव्यत्वाच्च नित्यत्वं तथा कालस्यापीत्यर्थः ॥

[2] वायुपरमाणोरिव कालस्यापि गुणाश्रयत्वाद्द्रव्यत्वं निरवयवत्वान्नित्यत्वमित्यर्थः ॥

[3] चिरादिप्रत्ययानां काललिङ्गानां सर्वत्राविशेषादनेकत्वेऽप्यात्मनामिव विशेषलिङ्गाभावात् सत्तावदेकत्वं कालस्येत्यर्थः। नन्वेवं क्षणलवमुहूर्तयाममदिवसाहोरात्रपक्षमासर्त्वयनसंवत्सरादिभेदेन भुयांसः कालास्तत् कथमेक इति चेन्न भेदभानस्य उपाधिनिबन्धत्वात् यथा एक एव स्फटिकमणिर्जवातापिञ्जाद्युपाध्युपरागेण भिन्न इव भासते तथैक एव कालः सूर्यस्पन्दाद्यवच्छेदभेदेन तत्तत्कार्यावच्छेदभेदेन च भिन्न इव भासते इत्यभ्युपगमात् ॥

ननु तथाप्यतीतानागतवर्तमानभेदेन कालत्रयमस्तु श्रूयते हि त्रैकाल्यमुपावर्तते त्रैकाल्यासिद्धिः इत्यादीतिचेन्न वस्तुतत्प्रागभावतत्प्रध्वंसावच्छेदेन त्रैकाल्यव्यवहारात् येन हि वस्तुना यः कालोऽवच्छिद्यते स तस्य वर्तमानः यत्प्रागभावेन यः कालोऽवच्छिद्यते स तस्य भविष्यत् कालः यत्प्रध्वंसेन यः कालोऽवच्छिद्यते स तस्यातीतकालः तथा चावच्छेदकत्रित्वाधीनः कालत्रित्वव्यवहारः ॥

cause the conceptions of quickness &c. which are the marks of its existence are in every case not particular, and because there exists no particular mark like that of the plurality of souls (see II. 1, 30). It may be objected, Time is manifold according to its division into moments, aggregates of two moments, hours, watches, days, days and nights, lunar fortnights, months, seasons, half years, years, &c., how then can it be one? This is no valid objection, for the appearance of a division is caused by an accident. It is to be understood that as one and the same crystal, by accidentally reflecting the colour of a China rose, tápinja (Xanthochymus Pictorius) &c., appears to be divided, so also time though one only appears, by reason of the division which distinguishes the course of the sun, &c., and the division which distinguishes the effects of such and such causes, to be divided. It may be objected, 'Yet time is threefold according to the division into, past, future, and present, for it is said in the Veda, The three times return, The three times are unaccomplished, &c.' This is no valid objection, for the ordinary conception of time as threefold rests upon the distinguishing of things as antecedently non-existent [or potentially existent], and subsequently non-existent [*i. e.* as having ceased to exist.] For the time distinguished by a thing [existent] is its present, the time distinguished by its antecedent non-existence is its future, and the time distinguished by its destruction [or subsequent non-existence] is its past; so that the ordinary conception of time as threefold rests upon threefold nature of the distinction. U. A. E. G.

## USHAS, THE INDIAN AURORA.

The following verses contain a paraphrastic translation of some of the passages in the hymns of the Rigveda (the very finest, perhaps, in that ancient collection), which describe the appearance of Ushas, the personified Dawn. There are few ideas in these lines which are not derived from the Indian originals. The similes in the third and three following stanzas are all found in the hymns, but have been expanded and modified in the translation.

Aurora, daughter of the sky,
That, borne upon thy shining car
By ruddy steeds from realms afar,
For ever lightening, drawest nigh—

Thou sweetly smilest, goddess fair,
Disclosing all thy youthful grace,
Thy bosom bright, thy radiant face,
The lustre of thy golden hair;

(So shines a fond and winning bride,
Who robes her form in brilliant guise,
And to her lord's admiring eyes
Displays her charms with conscious pride;—

Or virgin by her mother decked,
Who, glorying in her beauty, shows
In every glance her power she knows
All eyes to fix, all hearts subject;—

Or actress who by skill in song
And dance, and graceful gestures light,
And many-coloured vestures bright,
Enchants the eager gazing throng;—

Or maid who wont her limbs to lave
In some cool stream among the woods,
Where never vulgar eye intrudes,
Emerges fairer from the wave;)—

But closely by the amorous sun
Pursued, and vanquished in the race,
Thou soon art locked in his embrace,
And with him blendest into one.

Fair Ushas, though through years untold
Thou hast lived on, yet thou art born
Anew on each succeeding morn,
And so thou art both young and old.

As in thy fated ceaseless course
Thou risest on us day by day,
Thou wearest all our lives away
With silent, ever-wasting force.

Their round our generations run—
The old depart, and in their place
Springs ever up a younger race,
Whilst thou, immortal, lookest on.

All those who watched for thee of old
Are gone, and now 'tis we who gaze
On thy approach; in future days
Shall other men thy beams behold.

But 'tis not thoughts so grave and sad
Alone that thou dost with thee bring,
A shadow o'er our hearts to fling;—
Thy beams returning make us glad.

Thy sister, sad and sombre Night,
And stars that in the blue expanse
Like scattered drops of silver glance,
By thy approach are put to flight;—

And earthly forms, till now concealed
Behind her veil of dusky hue,
Once more come sharply out to view,
By thy returning beams revealed.

Thine advent daily life renews—
Birds flutter forth from every brake,
All sleepers as from death awake;
The busy world its tasks pursues.

Some to a life of ease arise,
And others every nerve to strain
The goal of power or wealth to gain,
Or other good they more may prize;

But some to holier thoughts aspire,
In hymns the gods immortal praise,
And light, on earthly hearths to blaze,
The heaven-born sacrificial Fire.

And not alone do bard and priest
Awake;—the gods thy power confess
By starting into consciousness
When thy first rays suffuse the East;

And listening to their servants' cry,
Down from the empyrean haste,
Their praise to hear, their offerings taste,
And all their longings satisfy.

Bright goddess, let thy kindly rays
Upon us dawn with envied wealth
In flocks, and herds, and sons, with health,
And joy of heart, and length of days.

J. MUIR.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO. AT THE MEDICAL HALL PRESS, BENARES.

# काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

# THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 42. Benares November 1, 1869. Vol. IV.


## ॥ उपदेशसहस्र्याः पद्यप्रबन्धः ॥

पूर्वस्मिन् प्रकरणे ऽन्तःकरणाविवेकादात्मनि संसारित्वप्रतीतिर्न स्वत इति शास्त्रप्रामाण्याद् बाधिताज्ञानतत्कार्यो ब्रह्मरूप एवात्मेति निर्धारितम्, इदानीमन्तःकरणस्य परोक्षत्वात् संसारप्रतिभासस्य चापरोक्षत्वाच्च तत्प्रतिभासो बुद्ध्यविवेककृत इत्याशङ्क्यान्तःकरणस्यापरोक्षत्वप्रतिपादनपूर्वकं पूर्वोक्तशास्त्रार्थे युक्तिप्रदर्शनपरं प्रकरणं प्रक्रमते ।

(१) स्वप्नस्मृत्योर्घटादेर्हि रूपाभासः प्रदृश्यते ।
पुरा नूनं तदाकारो धीर्दृष्टेत्यनुमीयते ॥ १४९ ॥

स्वप्नस्मृत्योरिति । हि यस्मात् स्वप्ने स्मृतौ च घटादेर्विषयजातस्य रूपाभास आकारावभासो दृश्यते ऽनुभूयते, तस्मात्पुरा पूर्वं जाग्रदवस्थायामनुभवावस्थायामपि नूनमवश्यं तदाकारा घटाद्याकारा धीरन्तःकरणवृत्तिर्दृष्टा साक्षादनुभूत्या ऽनुमीयत इत्यक्षरार्थः । स्वप्नस्मृत्योर्दृष्टार्थविषयत्वनियमात्पूर्वदृष्टस्य बाह्यार्थस्य चात्राभावात्स्वप्नस्मृत्योरुपलभ्यमानो विषयो ऽर्थाकारवृत्तिमदन्तःकरणमेवेति जाग्रत्पूर्वानुभवयोरप्यन्तःकरणमेवार्थाकारवृत्तिमदपरोक्षमनुभूतमिति कल्प्यते, तस्मात्सर्वास्वप्यवस्थासु वृत्तिमदन्तःकरणस्यापरोक्षत्वात्तद्गतचिदाभासाविवेकादात्मनः संसारित्वावभासो ऽपरोक्षो युक्त इति भावः ॥ १ ॥

एवमन्तःकरणस्यापरोक्षत्वे निरूपिते किमायातमात्मन इत्यपेक्षायां दृश्यादन्तःकरणादिसंघाताद्विवेकसिद्धिरायातेति सदृष्टान्तमाह ।

(२) भिक्षामटन् यथा स्वप्ने दृष्टो देहो न स स्वयम् ।
जाग्रद्दृश्यात्तथा देहाद् द्रष्टृत्वादन्य एव सः ॥ १५० ॥

भिक्षामिति । सुप्तस्य यतेः स्वप्ने भिक्षामटन्दृष्टो यो देहः स स्वयं द्रष्टा न भवति यथा तद्देहात्मतत्त्वमभिमन्यमानो ऽपि तदात्मको न भवति, तथा जाग्रद्दृश्यादपि देहात्स आत्मा ऽन्य एव द्रष्टृत्वादित्यर्थः । देहपदमुपलक्षणमिन्द्रियान्तःकरणयोरपि । तथा च प्रयोगो, विमतो देहादिर्नात्मा, दृश्यत्वा,त्स्वप्नदृश्यदेहादिवदिति ॥ २ ॥

बुद्धिरेव सर्वास्ववस्थास्वर्थाकारा दृश्यत इत्युक्तमर्थं दृष्टान्तेन स्पष्टयति ।

(३) मूषासिक्तं यथा ताम्रं तन्निभं जायते तथा ।
रूपादीन् व्याप्नुवच्चित्तं तन्निभं दृश्यते ध्रुवम् ॥ १५१ ॥

मूषेति । मूषा ऽन्तःसुषिरा मृत्प्रतिमा यथा ऽग्निसंपर्काद् द्रवीभूतं ताम्रं मूषायां निषिक्तं निक्षिप्तं सत्तन्निभं जायते तत्समानाकृति भवति, तथा चित्तमपि रूपादीन् विषयाननुव्याप्तं तन्निभं दृश्यते तदाकारं जायत इत्यर्थः ॥ ३ ॥

ननु मूषासिक्तताम्रस्य कठिनमूषाभिघातेन शैत्यापत्तौ तदाकारापत्तिरिति युज्यते, चित्तस्य त्वमूर्तत्वाद्विषयव्याप्तावपि कथं तदाकारापत्तिसंभव इत्याशङ्क्य दृष्टान्तान्तरमाह ।

(४) व्यञ्जको वा यथा ऽऽलोको व्यङ्ग्यस्याकारतामियात् ।
सर्वार्थव्यञ्जकत्वाद्धीरर्थाकारा प्रदृश्यते ॥ १५२ ॥

व्यञ्जको वेति । व्यञ्जको ऽग्न्यादिरयःपिण्डादेरालोको वा घटादेः । स्पष्टार्थः ॥ ४ ॥

बुद्धेरन्वयमुखेन स्वप्नस्मृत्योरित्यत्रोपपादितमपरोक्षत्वमनूद्य व्यतिरेकेणोपपादयति ।

(५) धीरेवार्थस्वरूपा हि पुंसा दृष्टा पुरा ऽपि च ।
न चेत्स्वप्ने कथं पश्येत्स्मरतो वाकृतिः कुतः ॥ १५३ ॥

धीरेवेति ॥ ५ ॥

आलोकादिवद् व्यञ्जकत्वाद् बुद्धेर्व्यङ्ग्याकारत्वमुक्तं स्पष्टयति ।

(६) व्यञ्जकत्वं तदेवास्या रूपाद्याकारदृश्यता ।
द्रष्टृत्वं च दृशेस्तद्वद् व्याप्तिः स्याद्धिय उद्भवे ॥ १५४ ॥

व्यञ्जकत्वमिति । अस्या बुद्धेर्या रूपाद्याकारेण दृश्यता दर्शनयोग्यतापत्तिस्तदेव विषयव्यञ्जकत्वमित्यर्थः । चैतन्यं हि विषयावभासो, विषयश्च न बुद्धेरन्यत्र स्वातन्त्र्येण स्फुरति तथा च बुद्धेर्विषयाकारत्वाभावे चैतन्यस्य विषयात्मना स्फूर्तिरनुपपन्नेति विषयाभिव्यक्त्यर्थतया तदाकारापत्तिरेव बुद्धेर्व्यञ्जकत्वमित्यभिप्रायः । यथा रूपाद्याकारेणावभासमानत्वमेव धियो रूपादिव्यञ्जकत्वं, तथा दृशेरात्मनो धिय उद्भवे धर्माधर्म्मवशादुत्पत्तौ सत्यां तद्व्याप्तिस्तदात्मना स्फुरणमेव द्रष्टृत्वं न परिणाम इत्याह । द्रष्टृत्वं चेति । यद्यपि धियो विषयव्याप्तिः परिणाममन्तरेण न भवति विषयदेशे तस्याः प्रागेवासत्त्वा,त्तथापि चैतन्यात्मनो धीवृत्तिव्याप्तौ न परिणामापेक्षा, चिदात्मन्येव तत्प्रकाशकवलिताया एव धियः सदोत्पत्तेरिति भावः ॥ ६ ॥

बुद्धितद्वृत्तिसाक्षित्वेन चिदात्मनः परिणामाभावेपि न तस्य ब्रह्मरूपतयैकत्वं युक्तं प्रतिदेहं तत्तद्बुद्धिसाक्षिभेदादित्याशङ्क्य, प्रमाणाभावान्मैवमित्याह ।

(७) चिन्मात्रज्योतिषा सर्वाः सर्वदेहेषु बुद्धयः ।
मया यस्मात्प्रकाश्यन्ते सर्वस्यात्मा ततो ह्यहम् ॥ १५५ ॥

चिन्मात्रेति । यथैकस्मिञ्छरीरे बुद्ध्यवभासो ऽविकृतचिद्व्याप्तिमात्र,स्तथा सर्वशरीरगतबुद्ध्यवभास इति भास्यबुद्धिभेदे ऽपि न तदवभासस्वरूपभेदः प्रमाणपथमवतरति भेदस्यापि साक्ष्यत्वेन साक्षिधर्मत्वाभावाच्च साक्षिभेदाशङ्कावकाश इत्यर्थः ॥ ७ ॥

चैतन्यस्य सर्वत्रैकत्वे ऽपि दृश्यस्य बुद्ध्यादेरनेकत्वान्नाद्वयब्रह्मात्मतासिद्धिरित्याशङ्क्य, सकलदृश्यस्यानाद्यनिर्वाच्याविद्याविलासबुद्धिमात्रत्वाच्चैतन्यस्याद्वयब्रह्मत्वमविरुद्धमित्युपपादयति ।

(८) करणं कर्म कर्त्ता च क्रिया स्वप्ने फलं च धीः ।
जाग्रत्येवं यतो दृष्टा दृष्टा तस्मादतो ऽन्यथा ॥ १५६ ॥

करणमिति । यथा क्रियाकारकफलानि स्वप्ने धीरेव बाह्यार्थस्य तदा तत्राभावादिति निश्चितम्, एवमेव जाग्रति जाग्रदवस्थायां च यतो धीरेव क्रियाकारकफलरूपा दृष्टा, न धियो बहिष्पदार्थसत्त्वमवगतं, तथा सति सुषुप्तावपि तदाकारविशेषस्फुरणं कदा चित्स्या,त्तस्माद्विषयैः सहैवात्मनि बुद्धेरध्यस्तत्वा,त्तस्याश्चाद्यन्तवत्त्वेन मिथ्यात्वात् तद्द्रष्टा ऽऽत्मा ततो बुद्धेरन्यथा ऽन्यादृशः सत्यो ऽखण्डैकरस इत्यर्थः ॥ ८ ॥

अन्यथेत्युक्तं स्फुटयति ।

(९) बुद्ध्यादीनामनात्मत्वं हेयोपादेयरूपतः ।
हानोपादानकर्त्ता ऽऽत्मा न त्याज्यो न च गृह्यते ॥ १५७ ॥

बुद्ध्यादीनामिति । बुद्ध्यादयो नात्मस्वरूपधर्मा, आगमापायित्वा,द्दुःखादिवदित्युक्ते चिदात्मनि व्यभिचारमाशङ्क्य परिहरति । हानोपादानेति । बुद्ध्यादेर्हानोपादानयोर्लयविक्षेपयोः कर्त्ता ऽऽत्मा, तदधिष्ठानमात्रेण कर्त्तेत्युच्यते, स न केन चित्त्याज्यो, न विलाप्यो, न च गृह्यते, न विक्षिप्यते, आत्मनः सर्वाधिष्ठानत्वात्तस्य चाधिष्ठानान्तराभावादित्यर्थः ॥ ९ ॥

आत्मनः स्वरूपेणाहेयानुपादेयत्वे ऽपि तत्संबन्धित्वेन प्राप्तस्य बाह्यस्य वस्त्राभरणादेरान्तरस्य च पापादेर्हेयत्व,मान्तरस्य च योगध्यानादेरुपादेयत्वं च भविष्यतीति न विशुद्धिरात्मन इत्याशङ्क्याह ।

(१०) सबाह्याभ्यन्तरे शुद्धे प्रज्ञानैकरसे घने ।
बाह्यमाभ्यन्तरं चान्यत्कथं हेयं प्रकल्प्यते ॥ १५८ ॥

सबाह्येति । बाह्याभ्यन्तरसहिते बाह्यमाभ्यन्तरं चात्मैव न ततः पृथगित्यर्थः । यतः शुद्धः केवलो ऽतो बाह्याभावः, यतश्च प्रज्ञानैकरसो ऽतो नान्तरमपि पृथगस्ति । एकरसत्वं स्पष्टयति । घन इति । सैन्धवघनवद्विज्ञानघन इत्यर्थः । हेयमित्युपलक्षणम्, एवंभूते स्वआत्मनि कथं हेयमुपादेयं वा कल्प्यत इत्यर्थः । सत्तास्फूर्त्यनालिङ्गितस्य बाह्यस्याभ्यन्तरस्य चोल्लेखितुमशक्यत्वात्तयोश्चात्मस्वरूपत्वाच्च ततो बहिरन्तर्वा किमप्यस्ति, परमार्थतो यदुपादेयं हेयं वा भवेदिति नात्मनो विशुद्धिसंकोचावकाश इति भावः ॥ १० ॥

वस्तुस्वभावानुसारेण विचार्यमाणे नात्मनि हेयाद्यस्तीत्युक्त,मिदानीं विद्वदनुभवेनाप्ययमर्थो ऽवगम्यत इत्याह ।

(११) य आत्मा नेति नेतीति परापोहेन शेषितः ।
स चेद्ब्रह्मविदात्मेष्टो यतेतातः परं कथम् ॥ १५९ ॥

य आत्मेति । ब्रह्मविदो ज्ञानिन आत्मा स्वरूपं कथं यतेत, कृतकृत्यत्वादित्यर्थः ॥ ११ ॥

एवंविधमात्मतत्त्वं न परानुभवगम्यमिति स्वयमेवात्मविदा शास्त्राचार्योपदेशानुसारेण विवेक्तव्यमित्याह ।

(१२) अशनायाद्यतिक्रान्तं ब्रह्मैवास्मि निरन्तरम् ।
कार्यवान् स्यां कथं चाहं विमृशेदेवमञ्जसा ॥ १६० ॥

अशनायादीति । षडूर्मिरहितमित्यर्थः ॥ १२ ॥

एवं विमर्शे प्राप्तं प्रापणीयमिति कर्त्तव्यबुद्धिरेव न भवेदिति दृष्टान्तेनाह ।

(१३) पारगस्तु यथा नद्यास्तत्स्थः पारं यियासति ।
आत्मज्ञश्चेत्तथा कार्यं कर्तुमन्यदिहेच्छति ॥ १६१ ॥

पारग इति । नद्याः पारं परतीरं गतो यथा तत्स्थः परतीरस्थ एव तमेव पारं यियासति यातुं प्राप्तु मिच्छति चेदित्यन्वयः । तथा यथोक्तात्मज्ञो ऽन्यत्कार्यं कर्त्तुमिह श्रेयोमार्गे इच्छतीति योजना । नैव यियासति नैवेच्छति चेत्यर्थः ॥ १३ ॥

यः पुनरात्मज्ञो ऽपि कार्यवान्स्यात्स न सम्यग्दर्शीति तं निन्दति ।

(१४) आत्मज्ञस्यापि यस्य स्याद्धानोपादानता यदि ।
न मोक्षार्हः स विज्ञेयो वान्तोसौ ब्रह्मणा ध्रुवम् ॥ १६२ ॥

आत्मज्ञस्यापीति । स्पष्टार्थः ॥ १४ ॥

अनागतां तु ये पूर्वामनक्षत्रां तु पश्चिमाम् ।
संध्यां नोपासते विप्रास्ते कथं ब्राह्मणाः स्मृताः ॥

इति स्मृतेर्ब्रह्मविदो ऽपि विप्रस्य संध्यावन्दनमस्ति कार्यमित्याशङ्क्य कैमुतिकन्यायेन निराकरोति ।

(१५) सादित्यं हि जगत्प्राणस्तस्मान्नाहर्निशैव वा ।
प्राणज्ञस्यापि न स्यातां कुतो ब्रह्मविदो ऽद्वये ॥ १६३ ॥

सादित्यमिति । आदित्यः सूर्यस्तत्सहितमिदं जगत्सर्वं हि यस्मात्प्राणो हिरण्यगर्भस्तस्मात्प्राणज्ञस्यापि प्राणोहमस्मीति प्राणात्मभावमापन्नस्याप्युपासकस्येति यावद् अहर्निशैव वा न स्यातामुदयास्तमयरहितसूर्यरूपत्वात्तस्याहोरात्रे न स्यातामित्यर्थः । तथा च श्रुतिः । "न ह वा अस्मा उदेति न निम्लोचति सकृद्दिवा हैवास्मै भवति" इति, तथा च प्राणस्यापि प्राणविदोपि भेददर्शिनो यद्यहर्निशे न स्यातां तदा ऽस्य ब्रह्मविदो मुख्यब्रह्मभूतस्याद्वये सर्वद्वैतावभासरहिते स्वरूपे सति ते कुतः स्यातां न कुतोपीति कालभेददर्शनाभावादेव तन्निमित्तकर्त्तव्याभाव इत्यर्थः ॥ १५ ॥

ब्रह्मविदो बाह्यक्रियाभावेपि "संध्यं समाधावात्मन्याचरे" दिति श्रुतेः स्वात्मनि विस्मृतिं परित्यज्य मोक्षाय स्मृतिः कर्त्तव्येत्यत आह ।

(१६) न स्मरत्यात्मनो ह्यात्मा विस्मरेद्वा ऽप्यलुप्तचित् ।
मनोपि स्मरतीत्येतद् ज्ञानमज्ञानहेतुजम् ॥ १६४ ॥

न स्मरतीति । स्मरतियोगात् षष्ठी द्वितीयार्थे, स्मरणविस्मरणयोरभावे हेतुरलुप्तचिदिति । यद्यशक्यत्वादात्मनः स्मरणं न विधातुं युक्तं, तर्हि तत्त्वज्ञानादूर्द्धमाविर्भावतिरोभावादिविकारशान्तये मन एवात्मानं स्मरेदिति विधिः स्यादित्यत आह । मनो ऽपीति । मनसो ऽचेतनत्वात्स्मर्तृत्वानुपपत्तेर्मनः स्मरतीति ज्ञानमप्यज्ञानहेतुजमविवेकविलसितमित्यर्थः । तथा चासम्यग्ब्रह्मविद आत्मव्यतिरेकेण मनः पश्यतः संध्यं समाधाविति विधिर्न सम्यग्ब्रह्मविद इति भावः ॥ १६ ॥

यद्यप्यात्मा ऽलुप्तचिद्रूपत्वाच्चात्मानं स्मरति तथापि परमात्मानं स्मरेदेवेत्याशङ्क्याह ।

(१७) ज्ञातुर्ज्ञेयः परो ह्यात्मा सो ऽविद्याकल्पितः स्मृतः ।
अपोढे विद्यया तस्मिन् रज्ज्वां सर्पइवाद्वयः ॥ १६५ ॥

ज्ञातुरिति । यदि पर आत्मा ज्ञातुर्ज्ञेयो विषयः स्यात्तदा सो ऽविद्याकल्पितः स्वाज्ञानकल्पितो हि निश्चितः स्मृतो ज्ञातो विद्वद्भिः ज्ञानविषयस्य रज्जुसर्पवदविद्याकल्पितत्वनियमात्स आत्मैव न भवतीत्यर्थः । तथा च तस्मिन्नात्मनः परत्वज्ञेयत्वादिके विद्यया आत्मविद्यया ऽपोढे बाधिते सति ज्ञातृज्ञेयविभागाभावादद्वय एवात्मा भवतीत्यर्थः । तत्र दृष्टान्तो रज्ज्वां सर्पइवेति । यथा रज्जुविद्यया सर्पे बाधिते रज्जुरेवावशिष्यते तद्वदित्यर्थः ॥ १७ ॥

प्रत्यगात्मनो वस्तुतो ऽद्वितीयत्वेपि तस्मिन्ममाहमित्यादिसंसारप्रतिभासात्तन्निवृत्तये किमपि कर्त्तव्यं भविष्यतीत्यत आह ।

(१८) कर्तृकर्मफलाभावात्सबाह्याभ्यन्तरं ह्यजम् ।
ममाहं चेति यो भावस्तस्मिन्कस्य कुतो भवेत् ॥ १६६ ॥

कर्तृकर्मेति । कर्तृकर्मफलभेदाभावात्सबाह्याभ्यन्तरमजमेवात्मस्वरूपं हि यतो ऽतस्तस्मिन्नात्मनि ममाहमित्यादिरूपो यो भावः प्रतिभासः स कस्य भवेत् कुतो वा हेतोर्भवेन्न भवेद्वेति योजना, तस्माद् ज्ञानोत्पत्तेः प्रागेव सर्वकर्त्तव्यता नोर्द्ध्वमिति भावः ॥ १८ ॥

आत्मविदो देहादावहंकारममकाराभावे हेतुमाह ।

(१९) आत्मा ह्यात्मीय इत्येष भावो ऽविद्याप्रकल्पितः ।
आत्मैकत्वे ह्यसौ नास्ति बीजाभावे कुतः फलम् ॥ १६७ ॥

आत्मा ह्यात्मीय इति । आत्मैकत्वे ज्ञाते सतीति शेषः ॥ १९ ॥

केन प्रमाणेन तदात्मैकत्वं ज्ञातुं शक्यमित्यपेक्षायां वेदान्तवाक्यप्रमाणबलादित्याह ।

(२०) द्रष्टृ श्रोतृ तथा मन्तृ विज्ञात्रेव तदक्षरम् ।
द्रष्ट्राद्यन्यन्न तद्यस्मात्तस्माद्द्रष्टा ऽहमक्षरम् ॥ १६८ ॥

द्रष्टृ श्रोत्रिति । द्वाभ्यां, यद् द्रष्टृ श्रोतृ मन्तृ विज्ञातृ प्रसिद्धं प्रत्ययरूपं तदक्षरमेव सर्वाधिष्ठानं ब्रह्मैवेति योजना । तथा च श्रुतिरक्षरं प्रकृत्यादृष्टं द्रष्टृश्रुतं श्रोत्रमतं मन्त्रविज्ञातं विज्ञात्रिति । तथा नान्यदतोऽस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ नान्यदतोऽस्ति मन्तृ नान्यदतोऽस्ति विज्ञात्रित्युत्तरवाक्यार्थमाह । द्रष्ट्रादीति । तद् द्रष्ट्रादि प्रत्यक्स्वरूपं तस्मादक्षरादन्यत्र भवतीत्यर्थः । यस्मादेवमविषयभूतमेवाद्वयमात्मतत्त्वं श्रुतिसिद्धं तस्माद्द्रष्टा ऽहमक्षरमित्युपसंहारः ॥ २० ॥

प्रत्यगात्मनो ऽक्षरब्रह्मात्मत्वे ऽपि कथमद्वयात्मत्वसिद्धिरित्याशङ्क्येतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेति श्रुत्यर्थं वदन्नद्वयात्मत्वं साधयति ।

(२१) स्थावरं जङ्गमं चैव द्रष्टृत्वादिक्रियायुतम् ।
सर्वमक्षरमेवातः सर्वस्यात्मा ऽक्षरं त्वहम् ॥ १६९ ॥

स्थावरमिति । उपाधिरुपहितमुपाध्याधारश्चेति सर्वमक्षरमेवातो ऽहमक्षरं सर्वस्यात्मा स्वरूपं न मदन्यत्किमप्यस्तीत्यर्थः ॥ २१ ॥

स्थावरादि सर्वमक्षरमित्युक्ते सप्रपञ्चमेवाक्षरमात्मेति प्रतिभासशङ्कां वारयन्नागमिकमात्मज्ञानं स्फुटयति ।

(२२) अकार्यशेषमात्मानमक्रियात्म क्रियाफलम् ।
निर्ममं निरहंकारं यः पश्यति स पश्यति ॥ १७० ॥

अकार्यशेषमिति । अकार्यशेषत्वमकर्तृत्वं तत्र हेतुरक्रियात्मेति, क्रियास्वरूपतत्फलविलक्षणमित्यर्थः, क्रियातत्फलसंसर्गशून्यमिति वा, कुतो, यतो निर्ममं, तदपि कुतो, ऽनहंकारम् एवंविधमात्मानं यः सम्यक् पश्यति स एव तत्त्वदर्शीत्यर्थः ॥ २२ ॥

आत्मविदो ऽहंकाराद्यभावादकर्मशेषत्वमुक्तं प्रपञ्चयंस्तस्य कृतकृत्यतामाह ।

(२३) ममाहंकारयत्नेच्छाः शून्या एव स्वभावतः ।
आत्मनीति यदि ज्ञातमाध्वं स्वस्थाः किमीहितैः ॥१७१॥

ममाहंकारेति । आत्मनि स्वभावतः शून्या एवाविद्याप्रयुक्तदेहाद्यभिमानं विना न सन्तीत्यर्थः । हे मुमुक्षवो यद्येवं ज्ञातं तर्हि स्वस्था निर्व्यग्राः सन्त आध्वं तिष्ठत किमीहितैः कर्मभिः कृत्यं ज्ञानेनैव कृतकृत्यत्वात्कर्मणां चानधिकृतकृतानां विफलत्वाच्चेत्यर्थः ॥ २३ ॥

देहाद्यतिरिक्तात्मज्ञानवतः सर्वेषु पारलौकिककर्मस्वधिकाराभ्युपगमादस्त्यात्मविदोऽपि सफलं कर्मेत्याशङ्क्य तस्यात्मतत्त्ववित्त्वमेव नास्तीत्याह ।

(२४) योहंकर्त्तारमात्मानं तथा वेत्तारमेव च ।
वेत्त्यनात्मज्ञ एवासौ योन्यथाज्ञः स आत्मवित् ॥ १७२॥

योहंकर्त्तारमिति । कस्तर्ह्यात्मविदित्यत आह । योन्यथाज्ञ इति । यो ऽकर्त्तारमज्ञातारमभोक्तारं चात्मानं जानाति स आत्मतत्त्वविदित्यर्थः ॥ २४ ॥

किमिति कर्तात्मेति जानतो ऽनात्मवित्त्वमात्मन्येव कर्तृत्वादिप्रतिभासादित्याशङ्क्य कर्त्रविवेकनिबन्धनोयं भ्रम इत्यभिप्रेत्याह ।

(२५) यथान्यत्वेऽपि तादात्म्यं देहादिष्वात्मनो मतम् ।
तथा कर्तुरविज्ञानात्फलकर्मात्मतात्मनः ॥ १७३ ॥

यथा ऽन्यत्वे ऽपीति । यथा परमार्थतो देहादिभ्योन्यत्वेप्यात्मनस्तेषु तादात्म्यमाध्यात्मिकं मतमिष्टं, तथा ऽकर्तुरभोक्तुरविज्ञानादात्मनः फलकर्मात्मता भोक्तृकर्त्रात्मता मता, यथा स्थूलदेहात्मनोरभेदाध्यासान्मनुष्यत्वाद्यभिमानस्तथाहंकारप्रधानलिङ्गदेहाविवेकात्कर्तृत्वाद्यभिमानो मिथ्याबुद्धिरित्यर्थः ॥ २५ ॥

नन्वहंकारस्यैवात्मत्वात्कथमहंकारात्मनोरविवेक इत्युच्यते इत्यत आह ।

(२६) दृष्टिः श्रुतिर्मतिर्ज्ञातिः स्वप्ने दृष्टा जनैः सदा ।
तासामात्मस्वरूपत्वादतः प्रत्ययता ऽऽत्मनः ॥ १७४ ॥

दृष्टिरिति । दृष्ट्यादिशब्दैश्चक्षुरादिद्वारकान्तःकरणवृत्तयो निर्दिश्यन्ते, तास्तु सदैव स्वप्ने जनैर्दृष्टाः सवृत्तिकस्यान्तःकरणस्य स्वप्ने वेद्याकारत्वात्तद्भेदितान्यः साक्षी सिद्ध इत्यभिप्रायः । किं च तासां दृष्ट्यादीनामात्मस्वरूपत्वादित्ययमर्थः, सुषुप्ते सवृत्तिकस्यान्तःकरणस्याविद्यामात्रतयात्मन्यस्तमयादात्मनश्चानस्तमयात्स्वतस्तस्याद्वितीयापरोक्षचिन्मात्रतयावभासमानत्वाद्युक्तान्तःकरणादहंकारादिरूपादात्मनो व्यतिरेकसिद्धिरिति । यत एवमत आत्मनः प्रत्यक्षता साक्षिमात्रेण स्वयंप्रकाशमानतया नित्यापरोक्षब्रह्मरूपता सिद्धेत्यर्थः ॥ २६ ॥

एवमशेषप्रमातृसाक्षिभूततया प्रत्यगात्मनो ब्रह्मत्वापादने लाभं दर्शयन् "यो ऽन्यथाज्ञः स आत्मवि" दित्यत्रोक्तमात्मवित्त्वं स्पष्टीकरोति ।

(२७) परलोकभयं यस्य नास्ति मृत्युभयं तथा ।
तस्यात्मज्ञस्य शोच्याः स्युः सब्रह्मेन्द्रा अपीश्वराः ॥१७५॥

परलोकभयमिति । यस्य परलोकभयं परलोकनिमित्तं भयं "किमहं साधु नाकरवं किमहं पापमकरव"मित्यादिरूपं नास्ति "नैनं कृताकृते तपत"इति श्रुतेः, तथा यस्य मृत्युभयं मरणभयं नास्ति "न जीवो म्रियत"इति श्रुतेः, आत्मव्यतिरिक्तस्य द्वितीयस्यादर्शनाद्, द्वितीयदर्शननिमित्तं हि भयं "द्वितीयाद्वै भयं भवती"ति श्रुतेः तस्यात्मज्ञस्य ब्रह्मेन्द्राद्या

अपि ज्ञानैश्वर्यसंपन्नतया ईश्वरा अपि शोच्याः शोचनीयाः स्युरहो एते ऐश्वर्यासक्ततया व्यग्राः कथं स्वस्थाः स्युरिति। तस्माद्यः परलोकमरणनिमित्तव्यग्रताहेत्वहंकारादिशून्यतया ब्रह्मनिष्ठः स एवात्मवित्त विपरीत इति सिद्धम् ॥ २७ ॥

ब्रह्मेन्द्रादिभावस्य सर्वैः प्रार्थ्यमानत्वात्कथं शोच्यतेत्याशङ्क्य ब्रह्मात्मज्ञानादूर्द्धं न किमपि प्रार्थ्यमस्तीत्याशयेनाह।

(२८) ईश्वरत्वेन किं तस्य ब्रह्मेन्द्रत्वेन वा पुनः।
तृष्णा चेत्सर्वतश्छिन्ना सर्वदैन्योद्भवा ऽशुभा ॥ १७६ ॥

ईश्वरत्वेनेति। सर्वत्र दैन्यस्योद्भवो यस्याः सा तथा, अत एवाशुभा पापप्रवृत्तिद्वारत्वा,त्सा तृष्णा चेत्सर्वतः सर्वात्मना सह मूलेन छिन्नेत्यर्थः। तथा च श्रुतिः।

"यदा सर्वे प्रमुच्यन्ते कामा येस्य हृदि श्रिताः।
अथ मर्त्यो ऽमृतो भवत्यत्र ब्रह्म समश्नुते" ॥

इति ॥ २८ ॥

निर्ममं त्वनहंकारं यः पश्यति स पश्यति।

इत्युक्तं स्पष्टयन्नात्मज्ञस्य लक्षणमाह।

(२९) अहमित्यात्मधीर्या च ममेत्यात्मीयधीरपि।
अर्थशून्ये यदा यस्य स आत्मज्ञो भवेत्तदा ॥ १७७ ॥

अहमितीति। यस्य शास्त्राचार्यानुगृहीतस्य पदार्थद्वयविवेकवतो ऽहं ममेति चात्मात्मीयविषयधियावर्थशून्ये प्रयोजनशून्ये यदा स्यातां तत्प्रयुक्तव्यवहारहीनः पुमान् यदि स्यादित्यर्थः, तदा स आत्मविद्भवेद्देहादौ तदनुबन्धे च व्यवहारकालेपि पूर्ववद्वस्तुत्वोल्लेखरहिततया आत्ममात्रदर्शी सम्यगात्मविदित्यर्थः ॥ २९ ॥

यदैवमात्मज्ञानं वाक्याद्भवति तदा कृतकृत्यत्वाच्च तस्य कार्यशेषता संभवतीति प्रागुक्तमकार्यशेषत्वं प्रपञ्चयति।

(३०) बुद्ध्यादौ सत्युपाधौ च तथा ऽसत्यविशेषता।
यस्य चेदात्मनो ज्ञाता तस्य कार्यं कथं भवेत् ॥ १७८ ॥

बुद्ध्यादाविति। जाग्रत्स्वप्नयोर्बुद्ध्यादावुपाधौ सति तथा सुषुप्तावसति च यस्यात्मनो ऽविशेषता चेद् ज्ञाता, चेच्छब्दो ऽसंदेहेपि संदेहवचनो वेदाश्चेत्प्रमाणमितिवत्, तस्याविशेषात्मज्ञस्य कार्यं कथं भवेच्च कथं चिदित्यर्थः ॥ ३० ॥

आत्मविदो नास्ति कार्यमित्यत्र हेत्वन्तरमाह।

(३१) प्रसन्ने विमले व्योम्नि प्रज्ञानैकरसे ऽद्वये।
उत्पन्नात्मधियो ब्रूत किमन्यत्कार्यमिष्यते ॥ १७९ ॥

प्रसन्न इति। व्योम्नि व्योमसदृशे प्रसन्ने स्वतो दोषरहिते विमले आगन्तुकमलवर्जिते, उक्तविशेषणद्वयसाधकं क्रमेण विशेषणद्वयं प्रज्ञानैकरसे ऽद्वय इति। एतस्मिन्ब्रह्मण्युत्पन्ना आत्मधीरात्मेति मतिरेवंविधं ब्रह्मैवात्मेति बुद्धिर्यस्य तस्यात्मस्वरूपज्ञानादन्यत्किं कार्यमिष्यते तद्ब्रूत न किमपीत्यर्थः ॥ ३१ ॥

ननु शास्त्राचार्यप्रसादादेवं तत्त्वे ऽवगम्यमानेपि श्रेयोमार्गप्राप्तिप्रतिबन्धकस्य शत्रोः संभवात्तत्परिहारार्थं किमप्यनुष्ठेयं स्यादिति चेत्तत्राह।

(३२) आत्मानं सर्वभूतस्थममित्रं चात्मनोपि यः।
पश्यन्निच्छत्यसौ नूनं शीतीकर्तुं विभावसुम् ॥ १८० ॥

आत्मानमिति। यथोष्णस्वभावस्य विभावसोः शीतस्वभावतापादनं न संभाव्यते तथा सर्वभूतात्मभूतस्य शत्रुमित्रादिसंभावना दुःसंपादेति नानुष्ठेयकल्पनावसर इत्यर्थः ॥ ३२ ॥

आत्मनः कार्यशेषत्वं किं सोपाधिकस्येष्यते निरुपाधिकस्य वेति विकल्प्याद्यमङ्गीकृत्य द्वितीयं दूषयति।

(३३) प्रज्ञाप्राणानुकार्यात्मा छायेवाचादिगोचरः।
ध्यायतीवेति चोक्तो हि शुद्धो मुक्तः स्वतो हि सः ॥ १८१ ॥

प्रज्ञेति। प्रज्ञा बुद्धिः प्रज्ञाप्राणावनुकर्तुं शीलमस्यास्तीति प्रज्ञाप्राणानुकारी प्रज्ञाप्राणोपाधिक इत्यर्थः। छायेव सूर्यादिप्रतिबिम्बमिव जले, अतादिगोचरः इन्द्रियतद्द्वारकवृत्तिषु प्रतिबिम्बित आत्मा तदविवेकात्करोतीवेति "ध्यायतीव लेलायतीवे"ति श्रुत्योक्तस्तस्यां दशायां कर्मशेषत्वमश्नुवानोपि स्वतः शुद्धो मुक्तश्च हि स आत्मा भवति, उदकानुगत्वेन सूर्यस्य कम्पादिमत्तया भासमानत्वेपि न परमार्थतः सूर्यः कम्पादिमान् भवति, तथा चोपाधिविगमे भेदविपर्यासादिविगमाद् द्वारहीनं कर्मात्मतत्त्वविदं न ढौकत इत्यर्थः ॥ ३३ ॥

निरुपाधिकस्यात्मनो न कर्मशेषत्वमित्युक्तमुपपादय"न्नाणायामास्पडाचरे"दित्यादियतिधर्मविधिशेषतापि नास्यास्तीत्याह।

(३४) अप्राणस्यामनस्कस्य तथा ऽसंसर्गिणो दृशेः।
व्योमवद्व्यापिनो ह्यस्य कथं कार्यं भवेन्मम ॥ १८२ ॥

अप्राणस्येति। क्रियाशक्तिप्राणहीनस्य ज्ञानशक्तिमनोहीनस्य स्वभावतो ऽसंसर्गिणो ऽसङ्गस्य व्योमवदपरिच्छिन्नस्य स्वतश्चलनशक्तिरहितस्येति यावत्। दृशेश्चिदेकरसस्यास्यैवंविधस्य मम कथं कार्यं भवेन्न कथमपीत्यर्थः ॥ ३४ ॥

तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः।
उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये ॥

इत्यादिभगवद्वचनान्मनःसमाधानानुष्ठानेनात्मशुद्धिः संपाद्या ऽवशिष्यत इत्याशङ्क्य तस्याः प्रागेव सिद्धत्वान्नेदानीमस्त्यवसर इत्यभिप्रेत्याह।

(३५) असमाधिं न पश्यामि निर्विकारस्य सर्वदा ।
ब्रह्मणो मे विशुद्धस्य शोध्यं नान्यद्विपाप्मनः ॥ १८३ ॥

असमाधिमिति । विकारो ह्यसमाधिर्नाम तद्धेतूपाधिशून्यतया सदा निर्विकारस्य तन्न पश्यामि ब्रह्मभूतस्यात एव सर्वदा विशुद्धस्य प्रागेव विपाप्मनो नित्यनिवृत्तकल्मषस्य शोध्यं चान्यन्न पश्यामीत्यर्थः ॥ ३५ ॥

नन्वन्यन्न पश्यामीत्ययुक्तं, गन्तव्यब्रह्मलोकादेर्गमनसाधनस्याचिरादिमार्गस्य च ब्रह्मविदोपि ज्ञातव्यत्वादित्याशङ्क्य सगुणब्रह्मविदस्तथात्वेपि न निर्गुणब्रह्मविदस्तथात्वमिति सहेतुकमाह ।

(३६) गन्तव्यं च तथा नैव सर्वगस्याचलस्य च ।
नोर्द्ध्वं नाधस्तिरो वापि निष्कलस्यागुणत्वतः ॥ १८४ ॥

गन्तव्यमिति । गन्तव्यमिति भावकर्मणोस्तन्त्रेण ग्रहणं, तथा च सर्वगत्वेन चलनासामर्थ्याद्गन्तव्यं नैव पश्यामि गमधात्वर्थं न पश्यामीत्यर्थः । तथा गन्तव्यं गत्या प्राप्यं देशं स्थानविशेषं न पश्यामि, कुत इत्यत आह । नोर्द्ध्वमिति । तिर इति, पुरस्तात्पश्चाद्दक्षिणं चोत्तरं च नैव पश्यामीत्यनुषङ्गः, कुतो देशभेदाभाव इत्यत आह । निष्कलस्येति । पूर्णस्येत्यर्थः । कुतो निष्कलत्वं ज्ञानसुखादिगुणात्मकावयवयोगादित्यत आहागुणत्वत इति । ज्ञानसुखयोः स्वरूपत्वात्संसर्गिगुणस्य चासङ्गे मय्यसंभवाद्गुणतोपि विभागशून्यस्य न गन्तव्यं प्राप्यं गतिः प्राप्तिर्वा विद्यत इति न तत्साधननिष्ठाविधानावकाश इत्यर्थः ॥ ३६ ॥

किं चाज्ञानोपाधिं विनात्मनि नित्यमुक्ते कस्यापि विशेषस्योत्प्रेक्षितुमशक्यत्वादज्ञानस्य च ज्ञानस्वभावे वस्तुतो ऽसंभाव्यमानत्वान्न कदाप्यात्मनः क्रियायोग्यतेति स्थिते कुत इदानीमज्ञानप्रतिभासस्याप्यभावे कर्मशेषता स्यादित्यभिप्रेत्याह ।

(३७) चिन्मात्रज्योतिषो नित्यं तमस्तस्मिन्न विद्यते ।
कथं कार्यं ममैवाद्य नित्यमुक्तस्य शिष्यते ॥ १८५ ॥

चिन्मात्रेति । तस्मिन्नात्मनि तमः स्वरूपतः प्रतिभासतोपि न विद्यते, कुतः, चिन्मात्रज्योतिषः, ज्योतिष्ट्वत इति भावप्रधानो निर्देशः । सुगममन्यत् ॥ ३७ ॥

किं चाज्ञानाभावे बाह्यान्तःकरणतत्संसर्गाभावात्तं विना प्रवृत्त्यभावान्न मे कर्म्मावसर इत्याह ।

(३८) अमनस्कस्य का चिन्ता क्रिया वा ऽनिन्द्रियस्य का ।
"अप्राणो ह्यमनाः शुभ्र"इति सत्यं श्रुतेर्वचः ॥ १८६ ॥

अमनस्कस्येति । प्राणमनोविहीनत्वे प्रमाणमाह । अप्राणो हीति । श्रुतेर्वचः सत्यं सत्यार्थं निर्दोषतया स्वतः प्रमाणत्वादित्यर्थः ॥ ३८ ॥

अपररात्रादिकालस्य विविक्तपूतादिदेशस्य प्राच्यादिदिग्विशेषस्य मनोविक्षेपरागादिनिमित्तस्य च प्रतीक्षाया आत्मचिन्तने कर्त्तव्यत्वात्कथं कार्याभाव इत्याशङ्क्याह ।

(३९) अकालत्वाददेशत्वाददिक्त्वादनिमित्ततः ।
आत्मनो नैव कालादेरपेक्षा ध्यायतः सदा ॥ १८७ ॥

अकालत्वादिति । सदा ऽऽत्मानं ध्यायतो यतेर्नैव कालादेरपेक्षास्तीति योजना । तत्र हेतुरात्मनो ऽकालत्वादित्यादिः । आत्मस्वरूपस्य कालाद्यनिबन्धनत्वात्न तद्ध्याने तदपेक्षेत्यर्थः । तथा चाह भगवान् सूत्रकारः । "यत्रैकाग्रता तत्राविशेषा"दिति ॥ ३९ ॥

ब्रह्मविदो देशकालादिसव्यपेक्षे कर्म्मण्यपेक्षाभावेपि प्रयागादितीर्थे स्यादपेक्षा ।

"गङ्गातीरे वसेन्नित्यं भिक्षुर्मोक्षपरायणः"

इत्यादिस्मृतिविहितत्वादित्याशङ्क्य ब्रह्मात्मज्ञानरूपे तीर्थे साक्षान्मुक्तिहेतौ स्नातस्यात्मविदो न तीर्थान्तरापेक्षास्तीत्याह ।

(४०) यस्मिन्देवाश्च वेदाश्च पवित्रं कृत्स्नमेकताम् ।
व्रजेत्तन्मानसं तीर्थं यस्मिन् स्नात्वा ऽमृतो भवेत् ॥ १८८ ॥

यस्मिन्निति । यस्मिन् ब्रह्मात्मस्फूर्त्तिरूपे देवास्तत्तत्तीर्थस्थानविशेषाधिष्ठातारो माधवविश्वेश्वररामेश्वरत्रिविक्रमादयः पूजादर्शनस्पर्शनस्मरणादिभिर्भक्तपावनाः प्रसिद्धा,स्तथा वेदा ऋग्यजुःसामाथर्वाख्या अध्ययनब्रह्मयज्ञपाठार्थानुष्ठानादिभिः पावयन्ति, तथा कृत्स्नं पवित्रं पावनं तीर्थविशेषहरिहरनामोच्चारणादि, एतत्सर्वमेकतामेकत्वं व्रजेद्यस्मिन्सरित इव सागरेन्तर्भवन्तीत्यर्थः । सर्वात्मकब्रह्माविर्भावरूपत्वादिति परमो हेतुरत्रानुसन्धेयः । तन्मानसं मनसि वेदान्तमहावाक्यजनितान्तःकरणवृत्तिरूपे समुल्लसितं मानसं तीर्थं संसारपापमूलाविद्यातारकं, तीर्थत्वं स्पष्टयति । यस्मिन्निति । यस्मिन् स्नात्वा निमज्ज्योदकराशौ निक्षिप्तोदकबिन्दुवत्तदेकतां प्राप्य च अमृतो भवेन्निर्विशेषनित्यात्मस्वरूप एव भवेत्तस्मिंस्तीर्थे नित्यं निमग्नस्य न तीर्थान्तरापेक्षेति भावः । तथा च श्रुतिः ।

"शतं शुक्राणि यत्रैकं भवन्ति
सर्वे वेदा यत्रैकं भवन्ति ।
सर्वे होतारो यत्रैकं भवन्ति
स मानसीन आत्मा जनानाम्" ॥

इति । "यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति एवं मुनेर्विजानत आत्मा भवति गौतमे"ति च ॥ ४० ॥

एवं कृतार्थत्वापादकं ज्ञानतीर्थं केनोपायेन प्राप्यमित्यपेक्षायां पूर्वोक्तः पदार्थविवेक एव तल्लाभोपायं इति वक्तुं प्रथमं स्थूलदेहान्यत्वमात्मनो विशदयति ।

(४१) न चास्ति शब्दादिरनन्यवेदनः
परस्परेणापि न चैव दृश्यते ।
परेण दृश्यास्तु यथा रसादय-
स्तथैव दृश्यत्वत एव देहिकाः ॥ १७६ ॥

न चास्तीति । शब्दादिर्गन्धान्तो विषयो ऽनन्यवेदनो न चास्ति स्वयंप्रकाशस्तावन्नास्तीत्यर्थः । तथा परस्परेणापि शब्देन स्पर्शः स्पर्शेन शब्द इत्येवं परस्परेणापि न चैव दृश्यते प्रकाश्यते जडत्वादेवेत्यर्थः । दर्शनमन्तरेण व्यवहारानुपपत्तेर्दर्शनस्य स्वतः परस्परतश्चाभावे परिशेषात्परेण स्वविलक्षणेनाजडेन प्रकाश्या एव । तुशब्दो ऽवधारणार्थः । तथा च देहिका अपि रसादयः परेण दृश्याः दृश्यत्वाद्यथा बाह्यरसादयस्तथैवेमे तस्मात्तथेत्यक्षरार्थः ॥ ४१ ॥

तदेवं पञ्चभूतात्मकात्स्थूलदेहात्तद्द्रष्टारमात्मानं विविच्य सूक्ष्मादपि देहात्तं विविनक्ति ।

(४२) अहंममेत्येषणयत्नविक्रियाः
सुखादयस्तद्वदिह प्रदृश्यतः ।
दृश्यत्वयोगाच्च परस्परेण ते
न दृश्यतां यान्ति ततः परो भवान् ॥ १९० ॥

अहंममेति । अहमहंकारः । एषणायत्नविक्रियाः सुखादयः कामप्रयत्नकर्तृत्वभोक्तृत्वसुखदुःखमोहद्वेषादयो ममेति निर्दिश्यमाना मनोवृत्तयस्तद्वच्छब्दादिवन्नानन्यवेदनाः, कुतः, इह व्यवहारभूमौ प्रदृश्यतो दर्शनकर्मत्वात् ते परस्परेणापि दृश्यतां न यान्ति न प्राप्नुवन्ति दृश्यत्वयोगादेव परिशेषात्तेषां द्रष्टा ततस्तेभ्यो ऽहंकारादिभ्यस्तत्संघातरूपाल्लिङ्गदेहादिति यावत्, भवानात्मा परो ऽन्य इति योजना ॥ ४२ ॥

यद्यप्येवं देहद्वयग्राहकत्वात्तदतिरिक्त एवात्मा तथापि तत्संबन्धप्रतीतेस्तस्य न नित्यमुक्तरूपतेत्याशङ्क्याह ।

(४३) अहंक्रियाद्या हि समस्तविक्रिया
सकर्तृका कर्मफलेन संहता ।
चितिस्वरूपेण समन्ततोऽर्कवत्
प्रकाश्यमाना ऽसिततात्मनो ह्यतः ॥ १९१ ॥

अहंक्रियाद्या हीति । अहंक्रियाहंकरणमहंममेत्येवमाद्या समस्तविक्रिया चितिस्वरूपेण चैतन्यप्रकाशात्मना ऽर्कवदर्केणेव समन्ततः प्रकाश्यमाना हि यतो ऽत आत्मनो ऽसितता ऽबद्धता सिद्धा, विक्रियासंबन्धस्यापि दृश्यत्वाद्दृष्ट्धर्मत्वानुपपत्तेर्न मुक्तिविरोध इत्यर्थः ॥ ४३ ॥

एवं देहद्वयविविक्तस्याप्यात्मनः प्रतिदेहं परिच्छिन्नत्वाच्च ब्रह्मात्मना पूर्णता सिद्ध्येदित्याशङ्क्याह ।

(४४) दृशिस्वरूपेण हि सर्वदेहिनां
वियद्यथा व्याप्य मनांस्यवस्थितः ।
अतो न तस्मादपरोऽस्ति वेदिता
परोऽपि तस्मादत एव ईश्वरः ॥ १९२ ॥

दृशिस्वरूपेण हीति । हि यत आत्मा सर्वदेहिनां मनांसि दृशिस्वरूपेणैव व्याप्य घटादीनिव वियदवस्थितो न परिच्छिन्नरूपेण, अतस्तस्मादात्मनश्चितिस्वरूपादपरो जीवो वेदिता नास्ति, तथा पर ईश्वरोऽपि तस्मादन्यो वेदिता नास्ति, चितिस्वभावत्वाविशेषात्तस्मादेक एवात्मेत्यर्थः । आत्मा, न स्वरूपभेदवा,नुपाधिपरामर्शमन्तरेणाविभाव्यमानभेदत्वा,-दाकाशवदिति भावः ॥ ४४ ॥

देहद्वयसाक्षी ब्रह्मस्वभावश्चेदात्मा कथं तर्हि तस्य नास्तिताशङ्का केषां चिदित्याशङ्क्य स्वदोषवशादेवेत्यभिप्रेत्याह ।

(४५) शरीरबुद्ध्योर्यदि चान्यदृश्यता
निरात्मवादाः सुनिराकृता मया ।
परश्च शुद्धो ह्यविशुद्धिकर्मतः
सुनिर्मलः सर्वगतो ऽसितो ऽद्वयः ॥ १९३ ॥

शरीरेति । शरीरबुद्ध्योः स्थूलसूक्ष्मदेहयोर्यद्यन्येन नित्यस्वरूपेण दृश्यता पूर्वोक्तन्यायेन सिद्धा तदा निरात्मवादाः शून्यक्षणिकाद्यात्मवादाः मया निराकृता एवेत्यर्थः । तथा चाविशुद्धिकरात्कर्मतो धर्माधर्मादिलक्षणात्कर्मणः परो व्यतिरिक्तस्तत्साक्षित्वादतश्च शुद्धो ऽकर्त्ता ऽतश्च सुनिर्मलः कर्मफलभोगमललेशेनापि रहितः सर्वगतो ऽपरिच्छिन्नो ऽत एवासितो बन्धनशून्यश्चेत्यर्थः ॥ ४५ ॥

भवेदेतदेवं यदि शरीरबुद्ध्योरात्मदृश्यता सिद्ध्येत्, सा तु न संप्रतिपन्नेत्याशङ्क्य तयोरात्मदृश्यत्वाभावे बाधकमाह ।

(४६) घटादिरूपं यदि ते न गृह्यते
मनः प्रवृत्तं बहुधा स्ववृत्तिभिः ।
अशुद्धचिद्रूपविकारदोषता
मतेर्यथा वारयितुं न पार्यते ॥ १९४ ॥

घटादीति । यदि ते तव मते स्ववृत्तिभिर्बहुधा प्रवृत्तं घटादिरूपं विषयाकारं मनो ऽन्येनात्मना न गृह्यते न प्रकाश्यते तदात्मनो मनोऽन्यत्वासिद्ध्याऽशुद्धचिद्रूपविकारदोषदुष्टता

यथा मतेर्बुद्धेस्तथा वारयितुं न शक्यते, तस्य साक्षित्वानभ्युपगमे सति मतिदोषाणां तस्मिन्नवश्यंभावा,त्तथा चानिर्मोक्षप्रसङ्ग इत्यर्थः । अथ वा यद्यपि शरीरद्वयग्राहकतया तदन्य आत्मा नित्यसद्रूपस्तथापि दृश्यसंसर्गकृतदोषो न परिहर्तुं शक्यते स्वचैतन्याभेदेन हि दृश्यमवभासयन् द्रष्टा भवति, अन्यथा दृश्यस्यापरोक्षत्वानुपपत्ते,रतो विशुद्धत्वाद्यनुपपन्नमिति शङ्कते । घटादिरूपमिति । स्ववृत्तिभिर्बहुधा प्रवृत्तं घटाद्याकारं मनो यदि चेतनात्मना न गृह्यते तदा तस्य दृश्यसंबन्धादशुद्ध्यादिदोषता वारयितुं न पार्यते, यथा मतेश्चैतन्यसंसर्गाच्चिच्छायता वारयितुं न पार्यते तद्वदित्यर्थः ॥ ४६ ॥

स्यादेतदेवं यदि मतिवत्सावयवं परिच्छिन्नं परिणामि चात्मस्वरूपं स्या,न्नैवमात्मस्वरूप,मतो नास्याशुद्ध्यादिशङ्कावकाश इति दृष्टान्तेनोपपादयन्नुत्तरमाह ।

(४७) यथा विशुद्धं गगनं निरन्तरं
न सज्जते नापि च लिप्यते तथा ।
समस्तभूतेषु सदैव तेष्वयं
समः सदात्मा ह्यजरोमरो ऽभयः ॥ १६५ ॥

यथा विशुद्धमिति । विशुद्धं परिणामविक्रियामलरहितं निरन्तरमपरिच्छिन्नमत एव निरवयवं चेति द्रष्टव्यम् । एवंविधं यथा गगनं न सज्जते काष्ठे जतुवच्च संलग्नं भवति नापि लिप्यते भल्लातकरसेनेव वस्त्रादि, तथात्मापि विशुद्धो निरन्तरो निरवयवश्च शास्त्राविश्चितो न बुद्ध्यादिषु सज्जते नापि तद्दोषैर्लिप्यत इत्यर्थः । अत्र शास्त्रप्रसिद्धिं हिशब्देन द्योतयन् हेतुमाह । समस्तभूतेष्विति । तत्तदभिमानिदेवतासहितेष्वपि समस्तभूतेषु अयमात्मा सदा समो हि यस्मात्तस्मादजरो ऽमरो ऽभयो नित्यशुद्ध इत्यर्थः । तथा च शास्त्रं "यः सर्वेषु भूतेषु तिष्ठन् सर्वेभ्यो भूतेभ्योन्तरो यं सर्वाणि भूतानि न विदुर्यस्य सर्वाणि भूतानि शरीरं यः सर्वाणि भूतान्यन्तरो यमयत्येष त आत्मान्तर्याम्यमृत" इति ।

"समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् ।
विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति" ॥
"न लिप्यते लोकदुःखेन बाह्यः"

इत्यादि ॥ ४७ ॥

किं च दृश्यस्य बाधितत्वादपि न तत्कृतदोषसंबन्ध आत्मनः संभाव्यते, नहि मिथ्यार्थेन सत्यं वस्तु संसृज्यते, कथं बाधितत्वमिति चेत्, प्रतिपन्नोपाधौ निषिध्यमानत्वाद्रज्जुसर्पादिवदित्यभिप्रेत्याह ।

(४८) अमूर्तमूर्तानि च कर्म्मवासना
दृशिस्वरूपस्य बहिःप्रकल्पिता ।
अविद्यया ह्यात्मनि मूढदृष्टिभि-
रपोह्य नेतीत्यवशेषितो दृशिः ॥ १६६ ॥

अमूर्तेति । अमूर्तं च मूर्त्तानि च अमूर्तमूर्तानि च पञ्चमहाभूतात्मकानि स्थूलानि "द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं चे"ति श्रुतौ दृशिस्वरूपस्य ब्रह्मणः संबन्धीनि श्रुतानि, च अपरं कर्मवासनाश्रयं लिङ्गमिति यावत् । तदपि तस्य हैतस्य पुरुषस्य रूपं यथा माहारजनं वास इत्यत्रोक्तम्, एतत्सर्वं सकारणं मूढबुद्धिभिरविद्यया मोहरूपया आत्मनि दृशिस्वरूपे प्रत्यगात्मनि ब्रह्मणि प्रकल्पितं वासना प्रकल्पिता ऽमूर्तमूर्तानि प्रकल्पितानीति योजना, हि यस्मादविद्ययाध्यस्तमात्मनि सप्रञ्चत्वं तस्मा"न्नेति नेती"ति वीप्सया तत्सर्वमात्मनो बहिरपोह्यात्मविशेषणतारूपं बाधित्वा केवलं दृशिश्चिन्मात्र एवावशेषितः । "सत्यस्य सत्य"मिति श्रुत्येति योजना । यद्वा प्रकल्पिता इति विसर्गान्तपाठस्तदेत्थं योजना, अविद्यया मूढदृष्टिभिरात्मनि प्रत्यग्रूपे प्रकल्पिता आरोपिताः कर्मवासना अमूर्तमूर्तानि च भूतानि दृशिस्वरूपस्य प्रत्यक्स्वरूपस्य ब्रह्मणो बहिर्नेति नेतीत्यपोह्य दृशिरेवावशेषितो निषेधावधिभूतः श्रुत्या हि यस्मात्तस्मान्नास्त्यात्मनि दोषसङ्ग इति ॥ ४८ ॥

स्थूलसूक्ष्मप्रपञ्चस्य श्रुत्या बाधमुक्त्वा दृश्यत्वादिति युक्त्यापि बाधमाह ।

(४९) प्रबोधरूपं मनसो ऽर्थयोगजं
स्मृतौ च सुप्तस्य च दृश्यते ऽर्थवत् ।
तथैव देहप्रतिमानतः पृथग्
दृशेः शरीरं च मनश्च दृश्यतः ॥ १६७ ॥

प्रबोधेति । अर्थयोगाद्विषयसंबन्धाज्जातं मनसः प्रबोधरूपं विषयाकारवृत्तिरूपं यत्तत्स्मृतौ स्मृत्यवस्थायां सुप्तस्य पुंसः स्वप्नावस्थायां चार्थवदर्थाकारमेव दृश्यते,तद्यथा स्वप्नस्मृत्योरर्थाभावे ऽप्यर्थाकारं दृश्यमानमात्मनः पृथगेव नात्मविशेषणं तद्दृश्यत्वात्तथैव दृश्यतो दृश्यत्वहेतोः शरीरं मनश्च देहप्रतिमानतो देहप्रतिमानं च, तसेः सार्वविभक्तिकत्वाङ्गीकारात्प्रथमार्थः स इह गृह्यते, देहद्वयवासनारूपं च दृशेरात्मनः पृथग् न दृशिविशेषणमिति योजना । अत आत्मन्येव दृश्यस्यात्मनि निषेधान्मिथ्यात्वं शुक्तिरूप्यादिवत्सिद्धमिति भावः ॥ ४९ ॥

ननु श्रुत्या यद्यध्यस्तनिषेधेनात्मा प्रतिपाद्यते तदा निवृत्तसंसारत्वविशेषयोगाद्विक्रियावत्त्वेनानित्यत्वादिदोषप्रसङ्ग इति चेदेत्याह ।

(५०) स्वभावशुद्धे गगने घनादिके
मले ऽपयाते सति चाविशेषता ।
यथा च तद्वच्छ्रुतिबारितद्वये
सदा ऽविशेषो गगनोपमे दृशौ ॥ १६८ ॥

॥ इति स्वप्नस्मृतिप्रकरणम् ॥

स्वभावेति । यथा स्वभावशुद्धे शुद्धस्वभावे गगने अधिष्ठाने घनादिके मले सति तस्मिन्नपयातेसति वा ऽविशेषता न विशेषः कश्चिदस्ति, अविक्रियमेव सदा गगनमित्यर्थः । तद्वद्दृशावात्मन्यधिष्ठाने गगनोपमे स्वभावशुद्धे श्रुत्या वारितं बाधितं द्वयं यस्मिंस्तस्मिन् सदैवाविशेषः कूटस्थतेति योजना । तथा च संसारनिवृत्तौर्मिथ्यार्थप्रतियोगिकाया अधिष्ठानदृगात्मव्यतिरेकेणानिरूपणाच्च कोपि विशेष इति भावः ॥ ५० ॥

इति स्वप्नस्मृतिप्रकरणं चतुर्दशं विवृतम् ॥ १४ ॥

## ॥ अथ बालभारतकाव्यस्य ॥

॥ तृतीयोऽङ्कः ॥

सुकृतस्य खड्गमिव तारतीव्रता-
व्रतधारमाश्रयत कृष्णयोगिनम् ।
यदि वो दिवानिशपराभवोद्यत-
भ्रमदन्तरारिभयभङ्गुरं मनः ॥ १ ॥
नृपसिंहसंहतिषु संगरक्रिया-
विमुखीषु विक्रमविलासकौतुकी ।
स कदाचिदाचितशरासनो वनं
मृगराजराजिमृगयेच्छयागमत् ॥ २ ॥
अवनीधवः स मृगमिचलोचना-
जनलोचनप्रियतनुर्धनुर्धरः ।
उचितं यदेणरिपुवार*दारणो-
द्यमदारुणोऽजनि तदारुणो रुषा ॥ ३ ॥
प्रहरन् हरीनथ चमूपृथक्चरः
श्रितमालिनीसरिदुपान्तकाननः ।
स ददर्श कण्वमुनिभर्तुराश्रमे
रुचिधाम कामपि कुमारिकामयम् ॥ ४ ॥
सुमगुच्छचक्रयुगसंनिभस्तनी
मृगपोतनीलनलिनाभलोचना ।
नवपल्लवाम्बुजसदृक्करक्रमा
गजराजहंससमयानविभ्रमा ॥ ५ ॥
वनचारिणीयमिह वाहिनी*तटे
वनदेवता किमुत वारिदेवता ।
इति तद्विलोकनकुतूहलोल्लस-
न्नयनद्वयश्चिरमचिन्तयन्नृपः ॥ ६ ॥
॥ युग्मम् ॥
अथ भूपमप्रतिमरूपभासुरं
रभसान्निरूप्य विकसद्विलोचना ।
अपि गोचरीकृतरतिप्रियेण सा
मनसा रसाधिकमवाप[1] विस्मयम् ॥ ७ ॥
परिकल्पितातिथिजनोचितक्रिया-
मथ तामुवाच विनिविश्य पार्थिवः ।
क्व मृगाक्षि कण्वमुनिपुंगवोऽधुना
नमनाय तस्य तरलं हि मन्मनः ॥ ८ ॥
अथ तद्विलोकरसभावजत्रपा-
वशकर्णकोटरविशद्विलोचना ।
विपिनं गतः फलकृते समेष्यति
त्वरितं मुनिर्मम पितेति साभ्यधात् ॥ ९ ॥
अपि शैशवाद्व्यथितमन्मथः स किं
सविता तवेत्युदितवाचि पौरवे ।
निजगाद सा दशनदीप्तिमण्डल-
च्छलसेवकीकृतसुधाचयं वचः ॥ १० ॥
कुशिकात्मजस्य नृपतेस्तपस्यत-
स्तपसोऽन्तरायकृतये पुरा हरिः ।
विषमास्त्रवीरपरमास्त्रमप्सरो-
जनमौलिमण्डनमयुङ्क्त मेनकाम् ॥ ११ ॥
नलिनानि पानमधुभाजनानि नः
पिदधाति यः स विधुरेष गोचरः ।
इति रोषणैरिव मधुव्रतैर्धुतं
दधती मुखं सुरभिचारुमारुतम् ॥ १२ ॥
अथ तस्य पार्थिवमुनेस्तपोवने
विललास सालसगतिः कृशाङ्गिका ।

*–वारः संघातः ।

[1]–मुवाह इति पा० ।

* वाहिनी नदी ।

जयिना स्मितेन कुसुमायुधायुधा-
वलिजन्मजङ्गमलतेव पुष्पिता ॥ १३ ॥
॥ युग्मम् ॥

शतमन्युनुन्नपवमानडम्बरा-
द्गलदम्बरां नतिमतीं विलज्जया ।
जलदोज्झितामिव कलावतः कला-
मवलोक्य तामभवदुन्मना मुनिः ॥ १४ ॥

इयमर्थिता स्मरवशेन वाक्सुधा-
रसवर्षिणा तदनु पार्थिवर्षिणा ।
अधिकं समाः शतमसेवि चांशुमान्
ददृशे कदापि च दिनान्तपाटलः ॥ १५ ॥

अथ तत्र सांध्यविधिसोद्यमेऽद्य ते
प्रिय को विशेष इति सा प्रहासिनी ।
स्मृतभूरिकृत्यपरिलोपकोपने
चकिताऽत्रसत् तडिदिवाशु मेनका ॥ १६ ॥

अवलोकितापि न भयेन गर्भतो
गलिता तयाहमिह मालिनीतटे ।
विधुता शकुन्तततिभिः शकुन्तले-
त्यभिधाय कण्वमुनिनास्मि लालिता ॥ १७ ॥

इति वेद्मि कण्ववचसेति तद्वचः
स निशम्य संमदवशंवदोऽवदत् ।
नृपनन्दिनि त्वमुचितासि मे वश-
स्तव चास्मि तद्भव मुदा मदीश्वरी ॥ १८ ॥

भविता भुवो वरयिता भवत्सुतः
सुतरामिति क्षितिपतिः प्रमोद्य ताम् ।
इह देवगायनविवाहलीलया
झपदि व्युवाह मुदितः शकुन्तलाम् ॥ १९ ॥

अथ तां चुचुम्ब मदमन्दघूर्णनो
रसतोऽर्धमीलितविलोचनां नृपः ।
मधुरं रसन्नलियुवा नवाब्जिनी-
मिव किंचिदुन्मिषितपद्मकुड्मलाम् ॥ २० ॥

मलयानिलो विलुलितालिकुन्तलां
नवमाधवीमिव शनैः शकुन्तलाम् ।
रसभासुरां सुरभिशीतलस्तदा
मृदुवेपमानतनुमालिलिङ्ग सः ॥ २१ ॥

नटति स्म सज्जघनगौरवाद् ध्रुवं
पृथुतन्नितम्बभुवि कामबर्हिणः ।
इह तेन तच्चरणचारुचिह्नितां
प्रियदत्तपाणिजपदानि तेनिरे ॥ २२ ॥

अथ स त्वदानयनहेतवे द्रुतं
प्रहिणोमि वाहनमिति प्रजल्प्य ताम् ।
नृपतिर्जगाम पुरि तन्मनः पुन-
र्विधृतं तयैव तदधीश्वरी हि सा ॥ २३ ॥

मुनिरागतो नृपतिरागतोंऽघिणी-
मवलोक्य तामथ समन्मथश्रियम् ।
परया दृशोचितसमागमां विद-
न्नजनिष्ट हृष्टहृदयो दयोदधिः ॥ २४ ॥

अथ पार्थिवाय स तयार्थितो ददौ
वरमिन्दुधामधवलाशयो मुनिः ।
शुचिधर्मकर्मघटनाकटाक्षितं
क्षितिपत्वमस्खलितमस्तु तत्कुले ॥ २५ ॥

इति तद्वरे सति वरेण्यलक्षणं
क्षणदाहृदीशमिव वासवी हरित् ।
समयेऽद्भुतं सुतमसूत सूतिका-
गृहदीपदैन्यजनकं शकुन्तला ॥ २६ ॥

स चकार कण्ववनभूविभूषणः
करिणः क्रमेण गमने कलागुरून् ।
इति सिंहपोतदमनोद्यमाद्ददौ
मुदसेष तेषु गुरुर्दक्षिणामिव ॥ २७ ॥

अथ तेन रोचितनृपोचितव्रत-
स्थितिना सुतेन सह राजपत्तनम् ।
अयति स्म कण्वमुनिना कथंचन
प्रहिता स्वशिष्यसहिता शकुन्तला ॥ २८ ॥

नृपमेत्य सेत्यवददेष मद्भव-
स्तव नन्दनः कुलवनैकचन्दनः ।
प्रिय मालिनीपुलिनसाक्षि तद् वचः
प्रतिपन्नमद्य नरपाल पालय ॥ २९ ॥

अथ स स्मरन्नपि नृपोऽभ्यधान्मम
स्मृतिमेषि न त्वमपि तत् कुतः सुतः ।

इति तद्वचःप्रचितकोपकम्पिनी
गिरमाकुलामकलयच्छकुन्तला ॥ ३० ॥
परिषज्जनस्य नयनाय नन्दनं
ननु भूपरूपमहसैनमभ्यधाः ।
अनृतं वदन्निह तदस्य हस्यसे
श्रवसा यतः सहचरोऽचसंचयः ॥ ३१ ॥
यदि वा दिवाकरसमोऽप्यपह्नुत-
स्तनयस्त्वया मयि चिराद्विरागिणा ।
तदियं गताहममुमङ्कवर्तिनं
रचयेति दीनवदना रुरोद सा ॥ ३२ ॥
अवनीशसूनुजननी पतिव्रता
दयिता किमद्य कुतुकेन खेद्यते ।
इति दिव्यगीःश्रुतिचमत्कृतः प्रियां
सदमानयन्नयनकौमुदीं नृपः ॥ ३३ ॥
भरतप्रभुत्वकरलक्ष्यलक्षणं
क्षितिपः सुतं तु भरताभिधं व्यधात् ।
समये शमी समभिषिच्य तं पुन-
र्विपिनावनीमगमदङ्गनासखः ॥ ३४ ॥
इलिनान्ववायनलिनाहिमद्युतिः
प्रतिपक्षकक्षशमनाशुशुक्षणिः ।
तुलितत्रिविक्रमपराक्रमस्ततो
भरतोऽभवद्भरतवर्षभूषणम् ॥ ३५ ॥
स्फुरदङ्गचङ्गिमजुषा दधानया
परितः परं प्रतिभयोद्गमं हृदि ।
प्रमदं मनो दयितया सुनन्दया
कलयांचकार नयलीलयापि यः ॥ ३६ ॥
नवखण्डमण्डनधरावराङ्गना-
मुकुटीकृताङ्घ्रिनखरत्नदीधितिः ।
विभरांबभूव किल चक्रवर्तिता-
मपवर्तितारिनिकरो रणेषु यः ॥ ३७ ॥
कुलपूर्वजेन्दुरुचिहारिणं रविं
भुवि यो व्यधान्निजनिदेशकारिणम् ।
व्यसनात् कृशैरसहस्रमूर्तिभिः
किरणैर्वृतं स्फुरितचक्रकेतवात् ॥ ३८ ॥
लक्षता यदीययशसा जनार्दनं
विशदं विमुच्य मतिविभ्रमेण यः ।
तरुणीकटाक्षचयमेचकच्छवि-
र्भुवि चक्रवान् सपदि शिश्रिये श्रिया ॥ ३९ ॥
युधि यस्य चक्रवलयेन पातिता
रिपवः क्रुधेव दिवि भानुमण्डलम् ।
निजकण्ठकर्तनपरायुधभ्रमा-
द्विभिदुर्जवेन परलोकगामिनः ॥ ४० ॥
यशसापि यस्य सुरशैलनाभिभृ-
त्तटिनीचयारनिचिताम्बुधिप्रधि ।
भुजगाधिनाथभुजगामि बिभ्रता
क्षितिचक्रमाप्यत महत्सु चक्रिता ॥ ४१ ॥
नितरामनङ्गपदवीविरागतो
रचितावतार इव भूतले स्मरः ।
वितताान यः कमपि तं पराक्रमं
हृदि येन सोऽपि चकितस्त्रिलोचनः ॥ ४२ ॥
अधिरोपितां भ्रुवमवेक्ष्य सुभ्रुवः
सरुषो यदीयनतकार्मुकभ्रमात् ।
भयवर्तिता[1]ङ्गुलिदलाः स्म विद्विषो-
ऽभिनयन्ति तां प्रति वशंवदात्मताम् ॥ ४३ ॥
अखिलैकवेदितुरनन्तयद्गुण-
ग्रहणोद्यतस्य दयितामनोमुदे ।
वियदेव शब्दगुणमूलमीशितुः
शितितानुमेयमजनिष्ट कण्ठगम् ॥ ४४ ॥
विबुधाङ्गनाधरसुधानिपानयो-
रथ तत्र तन्वति विचारचातुरीम् ।
नृपतिर्मुमन्युरिति भूरिमन्युभू-
र्भ्रमरीचकार करकैरवे भुवम् ॥ ४५ ॥
स्मयमानमारविभवां विभासिनीं
तनुसंपदा विशदकान्तिधारया ।
उदुवाह सङ्गरसकौतुकाशयो[2]
दयितां जयामसिलतां च यो मुदा ॥ ४६ ॥

---

१—नर्त्तिता—इति पा० ।

२—कौतुकाद् भुवं इति पा० ।

यदसिद्धिषां कवलयन् महो मह-
द्वियदङ्गणे कवलमाद्यमक्षिपत् ।
तमहो महोष्णमहिमच्छविच्छला-
दधुनापि लालयति कालवायस: ॥ ४७ ॥
पतितं कुतोऽपि विजनेऽपि कानने
शनकैरुदस्य शयिताहिकौतुकात् ।
अवगम्य नीलमणिदाम यद्भुवि
द्रुतमाहितुण्डिकजनेन तत्यजे ॥ ४८ ॥
पिदधे हरि: करयुगेन मत्सरी
श्रवणौ गुणस्तुतिषु यस्य सश्रिय: ।
अपि गर्भविश्वनिनदं निशम्य त-
न्मयमेव नूनमयमाप कृष्णताम् ॥ ४९ ॥
चलयच्चमूचयरजोभिरुद्धुतै-
र्दधुनीजलेऽप्यतुलपङ्कसंकटे ।
न बभूव शंभुविभुमूर्ध्नि शाश्वत:
किमु पङ्कजप्रकरपूजनोत्सव: ॥ ५० ॥
स पुराणपूरुषपुराणवेदिनां
वदनादिदं स्वपनवद्विदन् जगत् ।
स्वपनेऽप्यनेकसुकृतैककृत् कृती
न बभार जागरणनिद्रयोर्भिदाम् ॥ ५१ ॥
अथ तत्र पत्रलतिकां मरुद्वधू-
कुचयोर्लिखत्यसुरराजमार्जिताम् ।
नृपति: सुहोत्र इति गोत्रभिद्गजा-
श्रयिणीरिवाकृत दिशो यशोभरै: ॥ ५२ ॥
समदीपि य: क्षितिधव: सुवर्णया
विकसत्कुशेशयमुखश्रियान्वहम् ।
विभया गभस्तिरिव लोकशोकभित्
प्रिययाद्भुतद्रुतसुवर्णवर्णया ॥ ५३ ॥
अपि सिन्धुरोचितगुणोऽपि संत्यजन्
कमलामपि स्फुटरथाङ्गवर्जित: ।
परिमुक्ततार्क्ष्यगमनोऽपि दूरतो
युधि कृष्ण एव यदरिव्रजोऽभवत् ॥ ५४ ॥
रिपुयोषिदाननविलोचनोच्छ्वस-
त्पवनाम्बुपूरमखधूमतेजसाम् ।
पटलेन मेघकरणीदलेन य:
सततं सुभिक्षमकरोत् किल क्षितौ ॥ ५५ ॥
परितर्पयन् मखभुजो मखव्रजै-
र्यशसैव राहुमपि विप्रतारयन् ।
विततान य: किल विभावरीविभो-
र्निजपूर्वजस्य परिरक्षणोद्यमम् ॥ ५६ ॥
अमुमब्जनालविवरालिसूक्ष्मता-
गलितेन नाभिपदत: प्रसारिणा ।
क्रतुपूरुषस्य परमात्मनेजसा
ध्रुवमद्भुताद्भुतविधिं विधिर्व्यधात् ॥ ५७ ॥
यदधीतवान् गुणकदम्बमेष त-
द्गणनेऽपि खेदमवह[1]द्बृहस्पति: ।
प्रविभिद्य तद्गणनमालिकामणीन्
क्षिपति स्म तारकनिभान्[2] नभोऽङ्गणे ॥ ५८ ॥
अथ तत्र कल्पतरुपल्लवै: करं
रमयत्यहो समगुणानुरागिभि: ।
अवनिर्दधेऽवनिधवेन हस्तिना-
नवमेन विष्टपधुरीणहस्तिनाम् ॥ ५९ ॥
घनपत्रवल्लरिविशेषकानन-
प्रभया समग्रविषयाग्रिमश्रिया ।
प्रिययान्वहं करगृहीतया यशो-
धरया रराज धरया च य: प्रभु: ॥ ६० ॥
मणिक्लृप्तकुट्टिममरीचिवीचिका-
सतताभिरुद्धकुलटामलिम्लुचम् ।
विफलीकृतेन्दुरविकर्म निर्ममे
भुवि येन हास्तिनपुरं पुरं महत् ॥ ६१ ॥
बहुहेतिदुर्धरसमिद्धिकस्वरे
ज्वलति प्रतापदहने जुहाव य: ।
पशुवद्विपक्षनिकरं यशोजलै-
रथ पूर्तवद् गगनमण्डलं व्यधात् ॥ ६२ ॥
नवकीर्तिदत्तसततामृताप्लव:
परिलूनदानववितानविप्लव: ।

१—गम—इति पा० ।
२—गणान् इति पा० ।

अधुनापि केन कुसुमैर्न पूज्यते
यदसिर्धृतः शिरसि वेणिमूर्तिभिः ॥ ६३ ॥
यदुरुप्रतापपरितापताडितं
निभृतं निभाल्य भुवनं सुखैकभूः ।
खरधाम नाम निजधामगर्भतो
निरगाद्बहिर्नहि पुरातनः पुमान् ॥ ६४ ॥
परदेशसंचलितदुस्थयाचक-
प्रकरार्थमेव यदिलातले जनैः ।
अभिभूषिता विविधभूषणाशनै-
र्वनशाखिनोऽदधत कल्पशाखिताम् ॥ ६५ ॥
दिवि तत्र भानुजयिनाङ्गतेजसा
प्रविलुम्पति[2] द्युपतिलोचनस्रजम् ।
प्रतिपक्षपार्थिवचमूविकुञ्चन-
स्तदभूद्विकुञ्चन इति क्षमापतिः ॥ ६६ ॥
मृदुमन्दमञ्जुलपदप्रपञ्चया
सुविलासया दयितया सुदेवया ।
अतिशुद्धपक्षयुगया रराज यः
पृथिवीविभुर्वरटयेव पल्वलः ॥ ६७ ॥
असिरेव यस्य दलितेभकुम्भतः
प्रहतिस्फुलिङ्गयुतमौक्तिकव्रजान् ।
परिकुट्टिताहितमहामहोयशः-
कणसंचयानिव दिवि व्यकाशयत् ॥ ६८ ॥
न कथं गुणैर्मदधिकोऽपमेति भू-
रखिलाप्यमुष्य सुकृतैरियं दिवि ।
इति विस्मयं रजसि यद्बलोद्गते
द्युगपत्तनाऽकृत भृशं त्रिशङ्कुभूः ॥ ६९ ॥
गिरिशस्य गर्भभुवनेऽपि तेन यः
प्रबलः प्रतापदहनः प्रदीपितः ।
उदितं तदग्रशिखया जगत्प्रभो-
र्ध्रुवमस्य भालमभिभिद्य दृङ्मिषात् ॥ ७० ॥
जगुरीदृगम्बरकदम्बडम्बर-
स्फुटरोम यद्वपुरपारमीशितुः ।
स्फटिकावनीध्रवृषशेषयामिनी-
पतिजाह्नवीजलति तत्र यद्यशः ॥ ७१ ॥
स्वपरप्रभेदरहितेन दुर्नयं
दधतो दयामयहृदैव देहिनः ।
उचितेन दण्डरचनेन मोचिता
महतोऽपि येन परलोककष्टतः ॥ ७२ ॥
अनिमेषलोचनकरालताशुचं
सुरसुभ्रुवां हरति तत्र हारिणि ।
अजमीढ इत्यथ भुजे भुवो भरं
बिभरांबभूव भुवनैकभास्करः ॥ ७३ ॥
रुधिरापगाभिरपवाह्यते स्म तद्-
द्विषतां यदान्तरमहो महो महत् ।
अधुनापि तज्ज्वलति वाडवानल-
च्छलधारि वारिनिधिवारिमध्यगम् ॥ ७४ ॥
यदनीकिनीहरिखुरस्फुरद्रजः-
पटलस्थलेऽर्णवजले जलेशयः ।
यदरिप्रियाश्रुभरसंभवे स्वपं-
स्तदधौ दधौ किमयमाञ्जनं महः ॥ ७५ ॥
अभिपूज्य शंभुमपि भालदृङ्मिषात्
स्वतनूलवेन नियतं तनूनपात् ।
कृतयत्प्रतापविजयोद्यमो दिशां
वदने दिशत्ययश एव धूम्यया ॥ ७६ ॥
किममुष्य दानमुपरिष्ठमल्पदोऽ-
प्यधुनापि शंभुरजिनास्थिमण्डनः ।
इति निर्विवेकमवधार्य यं कुले
किल हृद्दधाति कलुषं सुधाकरः ॥ ७७ ॥
रिपुमेदिनीदयितदुर्यशोमषी-[1]
कलुषीकृते गगनपट्टिकातले ।
व्यधित प्रशस्तिमिव तारकाक्षरां
निजकीर्तिकैतवखटी[2]रसेन यः ॥ ७८ ॥
शतमस्य साग्रमवनीशतक्रतो-
स्तनया व्यराजिषत वल्लभाचयात् ।

१—र्नव—इति पा० ।
२ प्रतिलुम्पति इति पा० ।

१—सी—इति पा० ।
२—वटी—इति पा० ।

अथ तेषु संवरणसंज्ञया बभौ
गुणसंकुलः कुलधरो धराधिपः[1] ॥ ७९ ॥
सुकृतानि तानि सततं वितन्वता
भुवनेषु तेन तदुपार्जितं यशः ।
निजपूर्वजस्य रजनीपतेर्यथा-
द्भुतलाञ्छनव्यतिकरोऽपि लोपितः ॥ ८० ॥
अवचःपथानि चरितानि तन्वतो
भुवि यस्य साहसविकाशशालिनः ।
अपि शास्त्रकोटिमनसां मनीषिणां
मुखमौनमेव भवतु स्तवक्रिया ॥ ८१ ॥
मृगयामगच्छदरिमुक्तसंयुगः[2]
स महाप्रहारकुतुकी कदाचन ।
असमश्रमव्यसुतुरंगमः क्रम-
प्यचलं क्रमैरधिरुरोह सिंहवत् ॥ ८२ ॥
अयमिन्दुसुन्दरमुखीं पयोमया-
र्णववर्णनीयदशनालिदीधितिम् ।
अमृतायिताधरदलामलोकयत्
त्रिजगद्रहस्यमिव कन्यकामिह ॥ ८३ ॥
अथ बाणयष्टिरिव चाम्पकीतनु-
द्युतिधूतनूतनसुवर्णवर्णिका ।
मुखदत्तपद्ममहिमेयमाहिता
मदनेन तस्य हृदि रूपमत्सरात् ॥ ८४ ॥
अभिसृत्य भूमिविभु[3]रभ्यधत्त ता-
मथ मन्मथव्यथितमानसो रसात् ।
तनयासि कस्य चरसीह तन्वि किं
कुरु मां हृदि स्मरवशं स्मराश्रिते ॥ ८५ ॥
इति रूपचाटुवचनेषु भूपते-
स्त्रपिता स्थिता क्षणमवागवाङ्मुखी ।
तडिदुत्प्लवेन रभसा ददर्श तं
गगनं जगाम मृगवामदृक् ततः ॥ ८६ ॥
क्व गतासि तन्वि सहसेत्युदीर्णवाग्
दशदिग्वल[1]तरलकातरेक्षणः ।
अनिरीक्ष्य तामथ स तापविह्वलः
प्रलपन् ह हेति भुवि मूर्च्छितोऽपतत् ॥ ८७ ॥
नृपतिं तथाविधमथावलोक्य सा
वियतोऽवतीर्य मदनैकवीर्यभूः ।
गदति स्म गत्वरतदीयजीवित-
स्थिरतापरीक्षितसुधागुणं वचः ॥ ८८ ॥
तपनात्मजास्मि तपतीत्यहं जग-
न्नुतकीर्तिरिन्दुकुलसंभवो भवान् ।
उचितो विवाहविधिरत्र किंतु मे
पितृवश्यतैव बत याति विघ्नताम् ॥ ८९ ॥
इतिवागियं वियदगादिलापतिः
स तु मूर्च्छितप्रमुदितातिमूर्च्छितः ।
तपतापतप्तजलवृष्टिहृष्टिम-
त्यविपातकातरतरूपमामधात् ॥ ९० ॥
इह चानुपत्य[2] सचिवश्चमूवृतः
शिशिरक्रियाभिरुदतिष्ठिपन्नृपम् ।
वचसा च तस्य मततत्कथस्य स
व्यसनी समारभत भानुसेवनम्[3] ॥ ९१ ॥
स गुरुं वशिष्ठमनुचिन्त्य चेतसा
विततोर्ध्वबाहुकृतसिद्धितोरणः ।
इह पञ्च सप्त च दिनान्युपोषित-
स्तपतीकृते तपनसेवनं[4] व्यधात् ॥ ९२ ॥
तदवेत्य दिव्यदृगरुन्धतीपतिः
स्वयमभ्युपेत्य तपनं ननाथ[5] च ।
अयमाशयोऽजनि ममाप्यदो वदन्
स ददौ च संवरणभूभृते सुताम् ॥ ९३ ॥
प्रथमानमानसविकासयोरथ
चितिकान्तकान्तिपतिकन्ययोस्तयोः ।

१–पतिः इति पा० ।
२–संगरः इति पा० ।
३–विधु–इति पा० ।

१–दिक्चल–इति पा० ।
२ चानुरूप–इति पा० ।
३–सेवनाः इति पा० ।
४–सेवना इति पा० ।
५ ययाच इति पा० ।

मदनव्यथाविपदि मज्जतोरभू-
दुभयोर्मिथो गुरुगिरा करग्रहः ॥ ९४ ॥
स च पञ्च सप्त च समाः समं तया
विललास वासवविलासभूमिषु ।
स्वपुरीमवृष्टिगुणकष्टितां विशन्
विदधेऽथ तत्क्षणसुभिक्षभासुराम् ॥ ९५ ॥
गुरुहारनिर्झरविलासभासुरा
स्तनशैलकेलिपरकामकुञ्जरा ।
धृतगौरवैव तपती प्रियाय सा
वितताम तस्य जगतीषपन्नताम् ॥ ९६ ॥
प्रभुरप्रभोर्भव मम प्रभूचिता
त्वयि मूर्तिरित्यरिनृपः कृपालुना ।
वननव्यकारितपुरीजनार्थनैः
श्रियमापि येन गिरिकूटकुट्टिमे ॥ ९७ ॥
हरिगर्भविश्वहरिगर्भविश्वत-
त्क्रमतो विभाव्य जगतामनन्तताम् ।
मुदितं जगद्भुवलनैकतानता-
व्यसनातिपूरणरसेन यद्यशः ॥ ९८ ॥
द्युपतेः पुरा गुणकृतार्थितश्रुते-
र्नयनानि तत्र सफलानि तन्वति ।
अपुषत् कुरुक्षितिपतिर्भृशं वशा-
मवनीं विनीतवनितामिवाज्ञया ॥ ९९ ॥
अनृतं यदीयमहसो महःपति-[1]
प्रतिमत्व[2]मेष तनुते जनो जडः ।
सति यत्र शत्रुधरणीभृतामहो
परिवर्धते तिमिरहारि* दुर्यशः ॥ १०० ॥
कृतवर्षणो विपुलकीर्तिवारिणा-
द्रुततेजसा जनितविद्युदुद्गमः ।
परवाहिनीषु मुखपद्मखण्डनै-
र्यदसिर्नवाब्द इव हंसनाशकृत् ॥ १०१ ॥
दिवि तत्र दैवतपतेरपि त्रपां
सहसा स्वरूपमहसा प्रतन्वति ।

नृपतिस्ततो विततविक्रमोदधि-
र्धरणीमरुण्वदभिधोऽभ्यधारयत् ॥ १०२ ॥
गुरुकुम्भिकुम्भयुगलस्तनी चल-[1]
तरवारिवेणिरुरुवाजिलोचना ।
प्रमदाय कामकलिकेलिभिर्बभा-
वमृतेति तस्य पृतनेव वल्लभा ॥ १०३ ॥
यदरातिभूरमणभूरिदुर्यशो-
विसरेण वारिधरवार[2]हारिणा ।
अभितो भृते निखिलरोदसीतले
विरराज कीटमणिवन्नभोमणिः ॥ १०४ ॥
पतता ध्रुवं त्रिजगतीनितम्बिनी-
नयनेन यन्महसि दुःसहावधौ ।
अमुना व्यमोचि यमुनापदेशत-
स्तपनेन कज्जलमलीमसं पयः ॥ १०५ ॥
निजमुन्नतैर्नतिकलङ्कशङ्कया
पथिपाति रत्नमपि नाददे जनैः ।
अजनि[3] ध्रुवं रजनिषु प्रभाभरैः
प्रहतासतीगति तदेव यद्भुवि ॥ १०६ ॥
तरलत्वनीलिमनृशंसतागुणैः
कृतविग्रहो यदसिना सहोरगः ।
अभजत् पराजयपदेषु शृङ्खला-
ग्रहरूढभीरिव निगूढपादताम् ॥ १०७ ॥
प्रथमं व्यधत्त वशगां जगत्त्रयी-
मथ विस्तृताम्बरमयालयाश्रयम् ।
प्रथितप्रयाणमिव यद्यशोऽग्रही-
दपि दुर्ग्रहं सपदि योगिनां मनः ॥ १०८ ॥
दिवि कान्तकान्तिभिरनङ्गताशुचं
मदनस्य तत्र हरति त्रपावतः ।
क्षितिपः परीक्षिदिति विद्विषद्द्विप-
व्ययकेलिकेशरिकिशोरकोऽभवत् ॥ १०९ ॥
अतिरागिणीं गुरुसमृद्धिवर्धित-
प्रबलप्रतापशिखिहेतिसाक्षिकम् ।

१—सामहर्पति—इति पा० ।
२—प्रतिमान—इति पा० ।
* तिमिरहारि तिमिरवन्मनोहरमित्यर्थः ।

१—चल—इति पा० ।
२—चारु—इति पा० ।
३ अनिशं इति पा० ।

नृपमण्डलीमिव सुविग्रहोऽग्रहीत्
सुयशां विलोलनयनां करेण यः ॥ ११० ॥
यदसिर्ननर्त रुधिरासवं रणे
परिपीय भिन्नकरिकुम्भमण्डलात् ।
स्फुटदन्तपङ्क्तिरिव लग्नमौक्तिकैः
सविकासहास इव कीर्तिकान्तिभिः ॥ १११ ॥
प्रतिपक्षपक्षघनकक्षमण्डले
नवरोषपावककणं परिक्षिपन् ।
भुवि यः प्रतापदहनं तथातनो-
च्छुशुभे स्फुलिङ्ग इव पावको यथा ॥ ११२ ॥
गुरुरोदसीवनचरिष्णुयद्यशो-
व्यपदेशकेशरिकिशोरकेलिभिः ।
किमिव ब्रुवे विधुमृगो यदक्षस-
द्यदलक्ष्य एव सुरदन्तिनो मदः ॥ ११३ ॥
उदयोग्रपातमृदुदण्डताडना
सुभगैव यस्य परिणामपावनी ।
कृतदुर्नयेऽजनि जने जनेशितुः
पितुरङ्गजन्मनि यथा मुधा क्रुधा ॥ ११४ ॥
प्रभविष्यदस्य भुवि दुःसहं महः
प्रविषोढुमभ्यसनतत्पराविव ।
अविशत् खरांशुमसुराररादित-
स्त्रिपुरारिरादित हुताशनं दृशा ॥ ११५ ॥
अथ तत्र पल्लवयति द्युकामिनी-
कुचयोर्विलाससकुम्भयोः करौ ।
अभवद्विभिन्नरिपुवैभवो विभु-
र्भुवनस्य भीम इति भीमविक्रमः ॥ ११६ ॥
प्रियया तिरोहिततमोविकारया
रुचिमान् रराज सुकुमारिकाख्यया ।
घनतारकाञ्चनमनोज्ञयैव यः
स्फुटलक्षणः क्षणदयेव चन्द्रमाः ॥ ११७ ॥
असिदण्डविस्फुरितरोषपौरुष-
द्वयपेषयन्त्रवशतो द्विषद्यशः ।
कणशश्चकार युधि यः पराहत-
द्विपकुम्भमुक्तनवमौक्तिकच्छलात् ॥ ११८ ॥

द्रुहिणोऽपि भालफलके तनूभृता[1]-
मपि पूर्वजन्मसुकृतैरुपार्जिताम् ।
अलिखद्यदीयपदपद्मसेवया
यदि राज्यलब्धिलिपिमन्यथा भयात् ॥ ११९ ॥
युधि जीवितव्य[2]पवनं विरोधिनां
नवकीर्तिदुग्धमपि पातुमुद्यतः ।
शमयन् प्रतापगृहरत्नमग्रतो
भुजगो यदीयतरवारिराबभौ ॥ १२० ॥
अवलोक्य यं विधिवशाद्धनुर्धरं
स्वपनेषु नैद्ररसनिर्भरो रिपुः ।
सहसोत्थितः सदनभित्तिचिह्नित-[3]
स्मरवीक्षणां न कुरुते स्म किं भिया ॥ १२१ ॥
प्रियमत्यजच्चलतरां नयेन यां
परमन्दिरे सुतमसूत सा यशः ।
इति यः शृणोति नहि तस्य संकथा-
मपि सत्यमेतदुचितं महात्मनाम् ॥ १२२ ॥
महसः सपत्नमथ तीव्रतेजसं
परिभिद्य तत्र परमं पदं गते ।
व्यधित प्रतीपनृपतिद्रुमानलः
पृथिवीं प्रतीपनृपतिः पतिव्रताम् ॥ १२३ ॥
गुणरुद्धया त्रिबुधसिन्धुशुद्धया
सुरसद्मकेतुरिव यः पताकया ।
सुमुदाढ्यया प्रमदया प्रमोदभृ-
द्विरराज राजशतसेवितक्रमः ॥ १२४ ॥
प्रतिनृपतियशोजलानि क्लृप्त-
प्रसृतिरपाद्गनपायमस्य खड्गः ।
इति समिति हतेभकुम्भमुक्ता-
वलि[4]रधित च्युतबिन्दुवृन्दशोभाम् ॥ १२५ ॥
रणारम्भस्तम्भायितभुजनमत्कार्मुकलता-
लसद्बाणश्रेणीहतिविहितगीर्वाणनिवहैः ।

१—न भूभृता—इति पा० ।
२—जीवितस्य इति पा० ।
३—चित्रतः इति पा० ।
४—तति—इति पा० ।

स्फुरत्कोपाटोपं दनुतनुजपचचयकृता
कृता सेना येनामरपरिवृढस्यापि विपुला ॥ १२६ ॥

लाटश्चाटुविधिं व्यधत्त मगधो मौग्ध्यानि बुद्धेर्दधौ[१]-
वङ्गान्यङ्गनृपोऽमुचत् कुशलभट्टेहो विदेहोऽजनि ।
वङ्गः संगरभङ्गुरः समभवत् काश्मीरवीरो रस-
स्मेरं न स्मरमस्मरद्विद्दमरक्रोधेऽच धाचीधवे ॥ १२७ ॥

देवेन्द्रोपवनैकसीम्नि पवनैर्मौलिं धुनाने मुदा
मन्ये कल्पतरौ मधुव्रतरवैः स्थानप्रदानोद्यते ।
सानन्दं परिवलत्पक्ष्मलदृशां वृन्दैर्यशो दानजं
शश्वद् यस्य विभावरीविभुविभाभङ्गीनि भंगीयते ॥ १२८ ॥

स्वदानैर्दीनेभ्यः प्रकृतिकृतिना येन निकृतं
विनिद्रं दारिद्र्यं रिपुनृपतिभिर्मैच्यमकरोत्[२] ।
प्रसत्या तेभ्योऽपि प्रसभमथ निष्कासितमथो
गतं स्वस्मिन्नेव प्रलयमिदमाधारविवशम् ॥ १२९ ॥

आकर्ण्याकर्ण्य पूर्णक्रतुशतजनितं यद्यशो गीयमानं
सानन्दं सुन्दरीभिः कति कति जगति प्रीतिमन्तो न जाताः ।
ऐश्वर्यभ्रंशभीत्याभजत शतमखः किंतु दैन्यानि दीनः
स्वैरं वैरोचनोऽभूल्मनसि सकलयन्[३] विघ्नमिन्द्रत्वलाभे
॥ १३० ॥

लोकार्थं क्रतुभोजिनां क्रतुशतं तन्वन् पयोजीविनां
विश्वाय द्विषदङ्गनासुसलिलाः स्रोतस्विनीः संसृजन् ।
वीरेन्दुर्जगते समीरणभुजां वाहाङ्घ्रिघातैर्मरु-
न्मार्गं च प्रथयन् न कुत्र विदधे दत्तः सुभिक्षोत्सवम् ॥ १३१ ॥

इति श्रीजिनदत्तसूरिशिष्यकविचक्रचूडामणिश्रीमदमर-
चन्द्रविरचिते श्रीबालभारतनाम्नि महाकाव्ये वीराङ्के आ-
दिपर्वण्यादिवंशावतरणे भरतप्रभृतिद्वादशराजवर्णनो नाम
तृतीयः सर्गः ॥ ३ ॥

---

१ युद्धे दधा—इति पा० ।
२—मतनोत् इति पा० ।
३ सिकलयन् इति पा० ।

THE

# VAIŚESHIKA APHORISMS

OF

# KAṆĀDA.

## SECOND BOOK, SECOND DAILY LESSON.

---

*(Continued from page 118.)*

Time a cause of non-eternal substances.

नित्येष्वभावादनित्येषु भावात् कारणे कालाख्येति ॥ ९ ॥

Aph. 9. The term *time* is applicable to a cause, inasmuch as it exists not in eternal [substances], and exists in [substances] not eternal.

[1] The term *time* is applicable to a cause, the cause of all things produced. The reason is stated to be that it does not exist in things eternal, and exists in things not eternal. For since with regard to eternal substances such as ether there is no such notion as 'produced simultaneously,' 'produced slowly,' 'produced quickly,' 'produced now,' 'produced during the day,' 'produced at night,' whereas notions of simultaneity and the like do exist with regard to substances not eternal such as a water-pot, a piece of cloth, &c.; time is proved by an inclusive and an exclusive [i. e. by an affirmative and a negative] argument to be a cause. It should be understood that time is the efficient cause of all things produced, not only in virtue of such notions as simultaneity, but also in virtue of the terms hibernal, vernal, pluvial, &c., as applied to flowers, fruits, &c. U.

Existence of space proved.

इत इदमिति यतस्तद्दिश्यं लिङ्गम् ॥ १० ॥

Aph. 10. The mark pertaining to space is that whence [the knowledge arises] that one thing is [remote or not remote] from another.

[2] Pertaining to space—belonging to space, causing us

---

[1] कारणे सर्वोत्पत्तिमत्कारणे काल इत्याख्या । हेतुमाह नित्येष्वभावात् अनित्येषु भावादिति नित्येषु आकाशादिषु युगपज्जातः चिरं जातः क्षिप्रं जातः इदानीं जातः दिवा जातः रात्रौ जात इत्यादिप्रत्ययस्याभावात् अनित्येषु घटपटादिषु यौगपद्यादिप्रत्ययानां भावात् अन्वयव्यतिरेकाभ्यां कारणं काल इत्यर्थः न केवलं यौगपद्यादिप्रत्ययबलात् कालस्य सर्वोत्पत्तिमन्निमित्तकारणत्वम् अपि तु पुष्पफलादीनां हैमन्तिकवासन्तिकप्रावृषेण्यादिसंज्ञाबलादेतदध्यवसेयम् ॥

[2] दिश इदं दिश्यं दिगनुमापकम् इतो ऽल्पतरसंयुक्तसंयोगाश्रयादिदं बहुतरसंयुक्तसंयोगाधिकरणं परम् इतश्च संयुक्तसंयोगभूयस्त्वाधिकरणादिदं संयुक्तसंयोगाल्पीयस्त्वाधिकरणमपरमिति नियतदिग्देशयोः समानकालयोः पिण्डयोर्यतो द्रव्याद्भवति सा दिगित्यर्थः । न हि तादृशं द्रव्यमन्तरेण भूयसां संयुक्तसंयोगानामल्पीयसां वा पिण्डयोरुपनायकमन्यदस्ति न च तदुपनयमन्तरेण तत्तद्विशिष्टबुद्धिः न च तामन्तरेण परत्वापरत्वयोरुत्पत्तिः न च तदुत्पत्तिं विना तद्विशिष्टप्रत्ययव्यवहारौ ॥

to infer the existence of space. For that substance is space from which, with reference to two bodies in a determinate position and existing simultaneously, there springs the knowledge that one in which there is the conjunction of more numerous conjunct portions is other than one in which there is conjunction of less numerous conjunct portions, and that that body in which there are less numerous conjunctions of conjunct portions is other than that body in which there are more numerous conjunctions of conjunct portions. For unless such a substance exist there is nothing to account for the two bodies being of more or less numerous conjunctions of conjunct parts. Unless this be accounted for, there can exist no such thing as the conception of each body so characterised; and without such a notion a highest and not highest [generic and specific] form of generality is impossible; but if that were impossible there would not be, as there actually are, notions characterised by such generality. U.

[1] The words 'near or remote' are to be supplied after 'one thing from another.' The mark, then, of space is the conception of local contiguity or remoteness, according to which we know that one thing is far from, or near to, another. Space, therefore, like time, is proved to exist inasmuch as it is that in which conjunction takes place, and the not inherent cause of local propinquity or remoteness. Space moreover, though one, being divided according to an accidental attribute gives rise to the common distinction of east, &c. The quarter adjacent to this accidental attribute, i. e. to the mountain behind which the sun rises, is the east. That which is remote from this mountain is the west. The region adjacent to mount Meru is the north. That which is remote from mount Meru is the south. That which is adjacent to the mountain behind which the sun rises, and remote from mount Meru, is the south-east. The region remote from Meru, and remote from the mountain behind which the sun rises, is the south-west. That which is adjacent to Meru, and remote from the mountain behind which the sun rises, is the north-west. That which is adjacent to Meru, and adjacent to the mountain behind which the sun rises, is the north-east. That in which the conjunction takes place which is produced by the burnt offering, which is produced by the conjunction of soul with the result of actions done in a former state of being, is above; that in which the conjunction caused by falling takes place is below. V.

Space an eternal substance.

**द्रव्यत्वनित्यत्वे वायुना व्याख्याते ॥ ११ ॥**

Aph. 11. The substantiality and eternity [of space] are explained by air.

[1] It is a substance because possessed of attributes, and eternal because it has no substratum [cf II. 2, 7.] U.

**तत्त्वं भावेन ॥ १२ ॥**

Aph. 12. Its unity [is explained] by existence.

[2] The unity of space, like that of existence, is proved by its having a not particular mark, and by the non-existence in it of a particular mark. From this its individual unity may be inferred [cf II. 1. 31.] U.

**कार्यविशेषेण नानात्वम् ॥ १३ ॥**

Aph. 13. Its diversity is [caused to be conceived] by the difference of its effects.

[3] It is explained why, whereas space is one only, there is the popular conception of east, &c. Its diversity, the common diverse conceptions of east, &c., is caused by the difference of its effects, the accidental qualities of produced bodies. But in reality space is one only. V.

**आदित्यसंयोगाद्भूतपूर्वाद्भविष्यतो भूताच्च प्राची ॥ १४ ॥**

Aph. 14. [Space is regarded as] east because of a past, future, or present conjunction of the sun.

[4] The east [*práchí*] is so called because the sun moves [*anchati*] forward [*prák*] there. Accordingly the space in which conjunction first takes place of the sun in its course from east to west of Meru, whether such conjunction be past, future, or present, is east. Mention is here

---

[1] इत इदमिति परमपरं वेति शेषः तया चास्मादिदं दूरम् अस्मादिदमन्तिकमिति दैशिकपरत्वबुद्धिर्यतस्ताद्दृश्यं दिग्लिङ्गं तथा च कालवत् दैशिकपरत्वापरत्वासमवायिकारणसंयोगाश्रयतया दिक् सिध्यति सा च एकापि उपाधिभेदात् प्राच्यादिव्यवहारं उपाधिश्च तदीयोदयगिरिसन्निहिता या दिक् सा तदीयप्राची तदीयोदयगिरिव्यवहिता तु तदीयप्रतीची तदीयसुमेरुसन्निहिता या दिक् सा तदीयोदीची एवं सुमेरुव्यवहिता अवाची उदयगिरिसन्निहिता सुमेरुव्यवहिता आग्नेयी सुमेरुव्यवहितोदयगिरिव्यवहिता च नैर्ऋती सुमेरुसन्निहिता उदयगिरिव्यवहिता च वायवी सुमेरुसन्निहिता उदयगिरिसन्निहिता च ऐशानी अदृष्टवदात्मसंयोगजन्याग्निक्रियाजन्यसंयोगाश्रयः ऊर्ध्वम् पतनजन्यसंयोगाश्रयः अधः ॥

[1] गुणवत्त्वाद्द्रव्यत्वम् अनाश्रितत्वाच्च नित्यत्वमित्यर्थः ॥

[2] दिग्लिङ्गाविशेषाद्विशेषलिङ्गाभावाच्च सत्तावदेकत्वं तदनुविधानादेकपृथक्त्वम् ॥

[3] दिश एकत्वे ऽपि प्राच्यादिव्यवहारमुपपादयति । कार्यविशेषेण जन्यमूर्तरूपोपाधिना नानात्वं प्राच्यादिनानाव्यवहारः वस्तुत एकैव दिगित्यर्थः ॥

[4] प्राक् अस्यां सविता अञ्चतीति प्राची तथा च यस्यां दिशि मेरुप्रदक्षिणक्रमेण भ्रमत आदित्यस्य प्रथमं संयोगो भूतपूर्वो भविष्यन् वा भवन् वा दिक् प्राची अत्र पुरुषाभिसन्धिभेदमाश्रित्य कालत्रयोपवर्णनं भवति हि कस्यचित् पूर्वेद्युः प्रातरस्यां दिशि आदित्यसंयोगः प्रथमं वृत्त इतीयं

made of these three divisions of time, which rest upon the division of human observation. One man has the conventional notion that this is the east because the conjunction of the sun in the orient first took place yesterday. Another has the notion of the east from observing that the conjunction of the sun in the orient will first take place to-morrow. Another has the notion of the east from observing that there is a present conjunction of the sun now taking place in that quarter. U.

### तथा दक्षिणा प्रतीची उदीची च ॥ १५ ॥

Aph. 15. So likewise [space is regarded as] south, west, and north.

[1] In like manner the conventional notion of the south arises from past, future, or present conjunction of the sun with the mountains, &c., in the southern quarter. So also the notion of west and north may be analogously accounted for. U.

### एतेन दिगन्तरालानि व्याख्यातानि ॥ १६ ॥

Aph. 16. By this [similarly] the intermediate divisions of space are explained.

[2] The notion of the south-east quarter arises from combining the characteristics of the eastern and southern quarters. So also the south-west, and north-east may be inferred. It is explained at length in the Kaṇáda-rahasya that space is that by which, as an eternal substance, these and other conjunctions of the sun are manifested. U.

Nature of doubt.

### सामान्यप्रत्यक्षाद्विशेषाप्रत्यक्षाद्विशेषस्मृतेश्च संशयः ॥ १७ ॥

Aph. 17. Doubt [arises] from perception of a general, non-perception of a particular, and remembrance of particularity.

[3] Doubt arises from perception or knowledge of a general i. e. of a common property, from non-perception or ignorance of a particular included in one of two alternatives, and from remembrance or knowledge of two alternatives. With reference to doubt therefore, the cause is knowledge of a common property, absence of certainty as to some thing comprised in one or two alternatives, and knowledge of two alternatives. The word 'and' implies the addition of knowledge of a non-general property, and of opposed propositions, which are mentioned in the Nyáya Aphorisms. V.

### दृष्टञ्च दृष्टवत् ॥ १८ ॥

Aph. 18. That which is seen, and that which was formerly seen [are causes of doubt.]

[1] Doubt is two-fold, that which has an external, and that which has an internal object. That again which has an external object relates to something of which the properties are perceived, or to something of which the properties are unperceived. That which relates to something of which the properties are perceived is such as when on seeing an object possessed of properties and having tallness as an attribute, the doubt arises whether the object be a post or a man. That which relates to an object the properties of which are not perceived is such as when on seeing merely the horns belonging to a cow, gayal, or other animal in a forest where it is concealed by the intervention of bushes, &c., the doubt arises whether it be a cow or a gayal. But in the latter case the doubt really relates to the quality of the horn, whether the horn belong to a cow or to a gayal, and consequently the statement of this distinction is due merely to a refinement of language. The general [i. e. common property] which is the cause of doubt, gives rise to a doubt either when observed in several or in one object. The first statement is therefore explained in this aphorism. Height perceived is [in the former case] the cause of the doubt. The height, that is to say, which is perceived in a present object, and which belonged equally to a post and to a man previously seen, is the cause of the doubt. U.

### यथादृष्टमयथादृष्टत्वाच्च ॥ १९ ॥

Aph. 19. That which is perceived in a certain way [is a cause of doubt] because it is [at another time] perceived not in that way.

---

प्राचीति प्राचीव्यवहारः कस्यचिदपरेद्युरस्यां आदित्यसंयोगः प्रथमं भावीत्यभिसन्धाय प्राचीव्यवहारः कस्यचिदिदानीं अस्यां आदित्यसंयोगो भवन्नस्तीत्यभिसन्धाय प्राचीव्यवहारः ॥

[1] तद्वदेव दक्षिणदिग्वर्तिनगादिना सहादित्यसंयोगाद्भूतपूर्वाद्भविष्यतो भूताद्वा दक्षिणाव्यवहारः एवं प्रतीच्युदीच्योरपि व्यवहार उन्नेयः ॥

[2] प्राचीदक्षिणयोर्दिशोर्लक्षणसाङ्कर्येण दक्षिणपूर्वा दिगिति व्यवहारः एवं दक्षिणपश्चिमा पश्चिमोत्तरा उत्तरपूर्वेत्यूध्वम् एते चादित्यसंयोगा येन विभुना द्रव्येणोपनीयन्ते सा दिगिति कणादरहस्ये व्युत्पादितं विस्तरतः ॥

[3] सामान्यस्य साधारणधर्मस्य प्रत्यक्षात् ज्ञानात् विशेषस्य एककोटिव्याप्यस्य अप्रत्यक्षात् अज्ञानात् विशेषस्य कोटिद्वयस्य स्मृतेर्ज्ञानात् संशयो भवतीति शेषः। तथा च संशयं प्रति साधारणधर्मज्ञानम् एककोटिव्याप्यनिश्चयाभावः कोटिद्वयज्ञानञ्च हेतुरित्यर्थः चकारात् न्यायसूत्रोक्तयोः असाधारणधर्मज्ञानप्रतिपत्तिवाक्यज्ञानयोः सङ्ग्रहः ॥

[1] द्विविधः संशयो बहिर्विषयको ऽन्तर्विषयकश्च बहिर्विषयको ऽपि दृश्यमानधर्मिको दृश्यमानधर्मिकश्च तत्र दृश्यमानधर्मिको यथा ऊर्ध्वत्वविशिष्टस्य धर्मिणो दर्शनात् अयं स्थाणुः पुरुषो वेति अदृश्यमानधर्मिको यथा अरण्ये झाटाद्यन्तरिते गोगवयादिपिण्डे विषाणमात्रदर्शनात् अयं गौर्गवयो वेति वस्तुतस्तत्रापि विषाणधर्मिक एव सन्देहो विषाणमिदं गोसम्बन्धि गवयसम्बन्धि वेति विवक्षामात्रात्तु द्वैविध्याभिधानम् यत् सामान्य संशयहेतुस्तदनेकत्र दृष्टं संशायकम् चैकत्र धर्मिणि वा दृष्टं

[1] That which is seen in a certain way, gives rises to doubt by reason of its being perceived not in that way. For instance Chaitra being seen in a certain manner, with hair, is at another time seen not in that manner but without hair. When in the course of time Chaitra is seen with his head covered with his garments a doubt arises whether this Chaitra have hair or no. In this case the notion Chaitra is a common property which gives rise to doubt, and this common property is seen in one object. The cause of the doubt therefore is seen in one undivided object. U.

[2] It is stated that a property may exist under two alternative conditions in one object. For if Chaitra be seen with his head muffled up, a doubt arises whether he have hair or no, and the cause of this doubt is the knowledge of the notion Chaitra accompanied by the notion of hair or of the absence of hair. V.

विद्या ऽविद्यातश्च संशयः ॥ २० ॥

Aph. 20. Doubt also [arises] from knowledge and want of knowledge.

[3] Internal doubt is produced by knowledge and the want of knowledge. For instance, an astronomer predicts truly, and predicts untruly, eclipses, &c., of the moon. Accordingly a doubt arises in his mind as to his knowledge, whether it be accurate or not. Or knowledge is sometimes science, and sometimes not science, wanting demonstration; and consequently a doubt arises with respect to something, whether, inasmuch as it is known, it exist or not. U.

श्रोत्रग्रहणो यो ऽर्थः स शब्दः ॥ २१ ॥

Aph. 21. The object which is apprehended by hearing is sound.

---

संशयहेतुरित्यत्र प्रथमां विधामाह। दृष्टमूर्धत्वं संशयहेतुः तेन दृष्टाभ्यां स्थाणुपुरुषाभ्यां तुल्यं वर्तते पुरोवर्तिनि यदूर्धत्वं तद्दृष्टं संशयहेतुरित्यर्थः॥

[1] अयथादृष्टत्वाद्धेतोर्यथादृष्टमपि संशायकं यथा चैत्रो यथादृष्टः केशवान् कालान्तरे अयथादृष्टः केशविनाकृतो दृष्ट इत्यर्थः। क्रमेण तत्रैव चैत्रे वस्त्रावृतमस्तके दृष्टे सति भवति संशयश्चैत्रोऽयं सकेशो निष्केशो वेति तत्र हि चैत्रत्वं समानो धर्मः संशायकः स चैकत्रैव दृष्ट इत्यभिन्न एव धर्मिणि दृष्टः संशयहेतुः ॥

[2] एकत्र कोटिद्वयसहचरितं धर्ममाह। भवति हि प्रावृतशिरसि चैत्रे अयं केशवान् निष्केशो वेत्यादिसंशयः तत्कारणञ्च केशतदभावसहचरितचैत्रत्वज्ञानम् ॥

[3] आन्तरसंशयो हि विद्या ऽविद्याभ्यां भवति यथा मौहूर्तिकः सम्यगादिशति चन्द्रोपरागादि असम्यगपि तत्र स्वज्ञाने संशयो ऽस्य जायते सम्यगादिष्टमसंयग्वेति यद्वा ज्ञानं हि क्वचिद्विद्या क्वचिदविद्या अप्रमा भवति तथा च ज्ञायमानत्वात् सदिदमसद्वेति संशयो जायते ॥

[1] It is now established by means of a definition [or rather by a statement of its characteristic], that sound is possessed of properties. It is apprehended by hearing, that is, it is the object of every one's perception produced in the organ of hearing. The notion of sound, being of the same kind, is an object, and is therefore a class. The full definition, then, of sound is that it is a class included in the notion of a quality which exists as the object of common perception produced in the organ of hearing. V.

A. E. G.

## RAMAYANA, BOOK I.

*(Continued from page 92.)*

### XVIII.

The Monarch called a Bráhman near
  And said, 'Now speed away
To Kaśyap's son, the mighty seer,
  And with all reverence say
The holy child he holds so dear,
The hermit of the noble mind,
Whose equal it were hard to find,
  Returned, is dwelling here.
Go, and instead of me do thou
Before that best of hermits bow,
That still he may, for his dear son,
Show me the favour I have won.'
Soon as the king these words had said
To Kaśyap's son the Bráhman sped.
Before the hermit low he bent
And did obeisance, reverent;
Then with meek words his grace to crave
The message of his lord he gave:
'The high-souled father of his bride
Had called thy son his rites to guide:
Those rites are o'er, the steed is slain;
Thy noble child is come again.'
Soon as the saint that speech had heard
His spirit with desire was stirred
To seek the city of the King
And to his cot his son to bring.
With young disciples at his side
Forth on his way the hermit hied;
While peasants from their hamlets ran
To honour him, the holy man.
Each with his little gift of food
Forth came the village multitude,
And, as they humbly bowed the head,
'What may we do for thee?' they said.

---

[1] इदानीं शब्दं धर्मिणं लक्षणमुखेन व्यवस्थापयति। श्रोत्रेण गृह्यते ऽसौ श्रवणेन्द्रियजन्यलौकिकप्रत्यक्षविषय इत्यर्थः। शब्दत्वादेरपि तादृश्यत्वादर्थः इति जातिमान् इति तदर्थस्तथा च श्रवणेन्द्रियजन्यलौकिकप्रत्यक्षविषयवृत्तिगुणत्वव्याप्यजातिमत्त्वमेव शब्दलक्षणं पर्यवसितम् ॥

Then he, of Brahmans first and best,
The gathered people thus addressed :
'Now tell me, for I fain would know,
'Why is it I am honoured so?'
They to the high-souled saint replied :
'Our ruler is with thee allied.
Our master's order we fulfil ;
O Bráhman, let thy mind be still.'
With joy the saintly hermit heard
Each pleasant and delightful word,
And poured a benediction down
On King and ministers and town.
Glad at the words of that high saint
Some servants hastened to acquaint
Their King, rejoicing to impart
Such tidings as would cheer his heart.
Soon as the joyful tale he knew
To meet the saint the Monarch flew,
The guest-gift in his hand he brought,
And bowed before him and besought :
'This day by seeing thee I gain
Not to have lived my life in vain.
Now be not wroth with me, I pray,
Because I wiled thy son away.' [1]
The best of Bráhmans answer made :
'Be not, great lord of kings, afraid.
Thy virtues have not failed to win
My favour, O thou pure of sin.'
Then in the front the saint was placed,
The King came next in joyous haste,
And with him entered his abode,
Mid glad acclaim as on they rode.
To greet the sage the reverent crowd
Raised suppliant hands and humbly bowed.
Then from the palace many a dame
Following well-dressed Śántá came,
Stood by the mighty saint and cried :
'See, honour's source, thy son's dear bride.'
The saint, who every virtue knew,
His arms around his daughter threw,
And with a father's rapture pressed
The lady to his wondering breast.
Uprising from the saint's embrace
She bowed her low before his face,
And then, with palm to palm applied,
Stood by her hermit father's side.
He for his son, as laws ordain,
Performed the rite that frees from stain, [2]
And, honoured by the wise and good,
With him departed to the wood.

XIX.

The seasons six in rapid flight
Had circled since that glorious rite.
Eleven months had passed away :
'Twas Chaitra's ninth returning day,
The moon within that mansion shone
Which Aditi looks kindly on.
Raised to their apex in the sky
Five brilliant planets beamed on high.
Shone with the moon, in Cancer's sign,
Vrihaspati with light divine.
Kauśalyá bore an infant blest
With heavenly marks of grace imprest ;
Ráma, the universe's lord,
A prince by all the worlds adored.
New glory Queen Kauśalyá won
Reflected from her splendid son.
So Aditi shone more and more,
The Mother of the Gods, when she
The King of the Immortals bore,
The thunder-wielding deity.
The lotus-eyed, the beauteous boy,
He came fierce Rávaṇ to destroy ;
From half of Vishṇu's vigour born,
He came to help the worlds forlorn.
And Queen Kaikeyí bore a child
Of truest valour, Bharat styled,
With every princely virtue blest,
One fourth of Vishṇu manifest.
Sumitrá too a noble pair,
Called Lakshmaṇ and Satrughna, bare,
Of high emprise, devoted, true,
Sharers in Vishṇu's essence too.
'Neath Pushya's mansion, Mína's sign,
Was Bharat born, of soul benign.
The sun had reached the Crab at morn
When Queen Sumitrá's babes were born,
What time the moon had gone to make
His nightly dwelling with the Snake.
The high-souled monarch's consorts bore
At different times those glorious four,
Like to himself and virtuous, bright
As Proshṭhapadá's [1] fourfold light.
Then danced the Nymphs' celestial throng,
The minstrels raised their strain ;
The drums of Heaven pealed loud and long,
And flowers came down in rain.
Within Ayodhyá, blithe and gay,
All kept the joyous holiday.

[1] A hemiśloka is wanting in Schlegel's text, which he thus fills up in his La in translation.

[2] Rishyaśring, a Bráhman, had married Śántá who was of the Kshat iya or Warrior caste and an expiatory ceremony was necessary account of this violation of the law.

[1] One of the constellations, containing stars in the wing of Pegasus.

The spacious square, the ample road,
With mimes and dancers overflowed,
And with the voice of music rang
Where minstrels played and singers sang,
And shone, a wonder to behold,
With dazzling show of gems and gold.
Nor did the King his largess spare,
Bard, minstrel, driver, had his share;
Much wealth the Brahmans bore away,
And many thousand kine that day.
Soon as each babe was twelve days old
'Twas time the naming rite to hold,
When Saint Vaśishṭha, rapt with joy,
Assigned a name to every boy.
Ráma, to him the high-souled heir,
Bharat, to him Kaikeyí bare:
Of Queen Sumitrá one fair son
Was Lakshmaṇ, and Śatrughna one.
Ráma, his sire's supreme delight,
Like some proud banner cheered his sight,
And to all creatures seemed to be
The self-existent deity.
All heroes, versed in holy lore,
To all mankind great love they bore.
Fair stores of wisdom all possessed,
With princely graces all were blest.
But mid those youths of high descent,
With lordly light preëminent,
Like the full moon unclouded, shone
Ráma, the world's dear paragon.
He best the elephant could guide,
Urge the fleet car, the charger ride:
A master he of bowman's skill,
Joying to do his father's will.
The world's delight and darling, he
Loved Lakshmaṇ best from infancy;
And Lakshmaṇ, lord of lofty fate,
Upon his elder joyed to wait,
Striving his second self to please
With friendship's sweet observances.
His limbs the hero ne'er would rest
Unless the couch his brother pressed;
Except beloved Ráma shared,
He could not taste the meal prepared.
When Ráma, pride of Raghu's race,
Sprang on his steed to urge the chase,
Behind him Lakshmaṇ loved to go
And guard him with his trusty bow.
As Ráma was to Lakshmaṇ dear
More than his life and ever near,
So fond Śatrughna prized above
His very life his Bharat's love.
Illustrious heroes, nobly kind
In mutual love they all combined,
And gave their royal sire delight
With modest grace and warrior might:
Supported by the glorious four
Shone Daśaratha more and more,
As though, with every guardian God
Who keeps the land and skies,
The Father of all creatures trod
The earth before men's eyes.

XX.

Now Daśaratha's pious mind
Meet wedlock for his sons designed;
With priests and friends the King began
To counsel and prepare his plan.
Such thoughts engaged his bosom, when,
To see Ayodhyá's lord of men,
A mighty saint of glorious fame,
The hermit Viśvámitra came.
For evil fiends that roam by night
Disturbed him in each holy rite,
And in their strength and frantic rage
Assailed with witcheries the sage.
He came to seek the monarch's aid
To guard the rites the demons stayed,
Unable to a close to bring
One unpolluted offering.
Seeking the King in this dire strait
He said to those who kept the gate:
'Haste, warders, to your master run,
And say that here stands Gádhi's son.'
Soon as they heard the holy man,
To the King's chamber swift they ran
With minds disordered all and spurred
To wildest zeal by what they heard.
On to the royal hall they sped,
There stood and lowly bowed the head,
And made the lord of men aware
That the great Saint was waiting there.
The King with priest and peer arose
And ran the sage to meet,
As Indra from his palace goes
Lord Brahmá's self to greet.
When glowing with celestial light
The pious hermit was in sight,
The King, whose mien his transport showed,
The honoured gift for guests bestowed,

*(To be continued.)*

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO. AT THE MEDICAL HALL PRESS, BENARES.

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

# THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 43. Benares December 1, 1869. Vol. IV.

## ॥ उपदेशसहस्र्याः पद्यप्रबन्धः ॥

ननु न स्वभावशुद्ध आत्मा, तथा सति साधनवैयर्थ्यात्, किं तु संसारिस्वभाव एव सन् ज्ञानध्यानादिसाध्वनुष्ठानेन स्वभावशुद्धब्रह्मस्वरूपो भविष्यतीति केचिदेकदेशीयाः प्रतिपेदिरे, तन्न श्रद्धेयं मुमुक्षुभिस्तस्य श्रुतियुक्तिबाधितत्वादित्याह।

(१) नान्यदन्यद्भवेद्यस्मान्नान्यत्किं चिद्विचिन्तयेत् ।
अन्यस्यान्यत्वभावे हि नाशस्तस्य ध्रुवो भवेत् ॥ १६६ ॥

नान्यदिति । जीवब्रह्मणोरत्यन्तं भेद इष्यते किं वा भेदाभेदौ, नाद्यो विरुद्धस्वभावतया ब्रह्माहमित्येकरूपध्यानज्ञानयोरसंभवात्तदसंभवे चासंसारिब्रह्मभावफलानिष्पत्तेरिति मनसि निधायाद्ये दोषमाह । नान्यदन्यद्भवेद्यस्मादिति । यस्मादन्यज्जीवरूपस्थितं सदन्यद्ब्रह्म न भवेत् तद्रूपस्थितिविरोधात्तथा तदेव ब्रह्मणोऽन्यज्जीवरूपं वस्तु नष्टं सदन्यद्ब्रह्म न भवेद् नष्टत्वादेव तस्य ब्रह्मभावप्राप्तेरभावादिति योजना। ब्रह्मैव सन् ब्रह्माप्येतीति विरोधः स्फुट एवेति नात्रोदाहृतः। यस्मादेवं श्रुतियुक्तिविरुद्धमिदं मतं तस्मात्किं चिदीषन्मात्रमप्यन्यद्ब्रह्मेति न विचिन्तयेत्, मुमुक्षुरिति शेषः, किं त्वहमेव ब्रह्म ब्रह्मैवाहमिति भेदोपमर्द्देनैकरूपमेवात्मवस्तु चिन्तयेदित्यर्थः । नन्वन्यस्याप्यन्यात्मता दृष्टा साधनविशेषसाध्या, यथौषधविशेषयोगात्ताम्रादेरपि सुवर्णात्मता, तद्वदिहापि स्यादित्याशङ्क्याहान्यस्येति । जीवस्य स्वविरुद्धस्वभावस्यान्यब्रह्मण्येकीभावे तप्तायोगोलकप्रविष्टोदकबिन्दुवत्तस्य नाशो ध्रुवो भवेत्तथा च न ब्रह्मभावः पुरुषार्थः किं त्वनर्थोऽर्थः स्यादित्यर्थः । दृष्टान्तोऽसंप्रतिपन्नो वस्तुरूपाभिभावकनील्यादिवद्रसविशेषस्य ताम्ररूपाभिभावकमात्रत्वात्कालान्तरे सुवर्णाकारतापगमदर्शनाच्च ताम्रादेस्ततश्च भ्रममात्रं तदित्यभिप्रायः ॥ १ ॥

ननु यद्येवमन्यत्र ध्येयं स्वात्मनि च ध्यानं न संभवत्येकस्मिन् ध्यातृध्येयभावायोगात्कथं तर्हि निदिध्यासनविधिरिति चेदन्यथैवोपपत्तेर्न तदर्थं भेद आस्थेय इत्याह ।

(२) स्मरतो दृश्यते दृष्टं पटे चित्रमिवार्पितम् ।
यत्र येन च तौ ज्ञेयौ सत्त्वक्षेत्रज्ञसंज्ञकौ ॥ २०० ॥

स्मरत इति । दृष्टं नीलपीतादि स्मरतः पुंसो यत्रान्तःकरणे तद्वासनारूपं पटे ऽर्पितं चित्रमिव दृश्यते, येन च चैतन्यात्मना दृश्यते उपलभ्यते, तौ सत्त्वक्षेत्रज्ञसंज्ञकौ, यत्र दृश्यते तत्सत्त्वं, येन दृश्यते स क्षेत्रज्ञ इत्यर्थः । तथा चात्मा निदिध्यासितव्य इति विधिना नैरन्तर्येण त्वंपदार्थविवेकसंपादनमेव कर्त्तव्यतयोच्यते, विविक्तत्वमर्थस्यैव ब्रह्मत्वादहं ब्रह्मास्मीत्यपरोक्षानुभवसंभवात्संसारनिवृत्तिफलसिद्धिः । अन्यभावनायां तु प्रागुक्तन्यायेनान्यस्यान्यात्मतायोगात्संसारानिवृत्तेर्निष्फलो विधिः स्यादिति भावः ॥ २ ॥

अन्तःकरणस्याप्रत्यक्षत्वात्कथं स्मृत्यवस्थायां तस्मिन्नीलपीताद्युपलम्भ इत्यत आह ।

(३) फलान्तं चानुभूतं यद्युतं कर्त्रादिकारकैः ।
स्मर्यमाणं हि कर्मस्थं पूर्वं कर्मैव तच्चितः ॥ २०१ ॥

फलान्तमिति । फलान्तं सुखादिफलावसानं कर्त्रादिकारकैर्युतं युक्तं यद् द्वैतं पूर्वमनुभूतं तदिदानीं स्मर्यमाणं कर्मस्थं

दृश्यनिष्ठं दृश्यते, न द्रष्टृनिष्ठं, हि यस्मात्तस्मात्पूर्वमपि तत्स्मर्यमाणस्याधिकरणमन्तःकरणं चितः आत्मनः कर्मैव दृश्यमेवेत्यर्थः । अयं भावः । पूर्वानुभूतविषयाकारा हि वृत्तिरन्तःकरणपरिणामात्मिका स्मृतिरित्युच्यते, तस्या हि विषयो भासमानः साश्रयो भासते, नहि तदा साक्षिणाऽनुभूयमानस्य विषयस्य बहिराश्रयेऽवस्थानमस्ति, तथा चेदं स्मरामीति-परामर्शयोग्यतया दृश्यस्यतयानुभवस्यावश्यंभावात्तदा चित्तमेव स्मर्यमाणाधिकरणतया दृश्यतइति सिद्धमन्तःकरणस्य साक्षिप्रत्यक्षत्वमिति ॥ ३ ॥

आत्मैव द्रष्टा दृश्यं चेति भाट्टा मेनिरे, ऽतः स्वगतमेव वासनारूपमात्मा पश्यतीतीदं स्मरामीत्यनुभवस्यान्यथासिद्धत्वाचान्तःकरणस्य साक्षिप्रत्यक्षतेत्याशङ्क्याह ।

(४) द्रष्टुश्चान्यद्भवेद्दृश्यं दृश्यत्वाद् घटवत्सदा ।
दृश्याद् द्रष्टाऽसजातीयो न धीवत्साक्षितान्यथा ॥२०२॥

द्रष्टुश्चेति । विमतं दृश्यं द्रष्टुरत्यन्तं भिन्नं, दृश्यत्वाद्घटवदित्युक्ते द्रष्टृदृश्ययोर्भेदेऽपि परिणामित्वेन साजात्यसंभवाद् द्रष्टुः सजातीयमेतद्दृश्यमित्याशङ्क्याह । दृश्यादिति । द्रष्टा सदैव दृश्यासजातीयो दृश्यांशस्याचेतनत्वादात्मत्वानुपपत्तेरित्यर्थः । विपक्षे दोषमाह । न धीवदिति । अन्यथा द्रष्टृदृश्ययोरसजातीयत्वानङ्गीकारे द्रष्टुः परिणामित्वाद्धीवत्साक्षिता आत्मता न स्यादित्यर्थः ॥ ४ ॥

ननु न भवत्येवात्मा साक्षी तस्य ब्राह्मणत्वादिजातिमत्तया सविशेषत्वात्कर्माधिकारित्वेन परिणामित्वोपपत्तेरित्याशङ्क्याह ।

(५) स्वात्मबुद्धिमपेक्ष्यासौ विधीनां स्यात्प्रयोजकः ।
जात्यादिः शववत्तेन तद्वन्नानात्मतान्यथा ॥ २०३ ॥

स्वात्मेति । असौ जात्यादिर्ब्राह्मणत्वादिः । आदिशब्दाद्वयोवस्थादिर्गृह्यते, स्वात्मबुद्धिः स्वस्मिन्नात्मात्मीयाभिमानलक्षणां मिथ्यादृष्टिमपेक्ष्य विधीनां प्रयोजकः प्रवर्त्तकः स्यान्नान्यथा, यथा शववदुत्क्रान्तप्राणो देहो मम माता मम पिता वेत्यध्यासानुसारेण संस्कारप्रयोजको दृश्यते तदभावे न दृश्यतइति योजना । तेन हेतुना तद्वच्छववदेव जात्यादिरात्मधर्मो न भवतीत्यर्थः । अन्यथा जात्यादिमत्त्वे त्वात्मनो घटादिवदनात्मता प्रसज्येतेति योजनीयम् । तस्मात्साक्ष्येवात्मा न कर्माधिकारितया परिणामीति भावः ॥ ५ ॥

ननु नाध्यासनिबन्धनं कर्तृत्वं विदुषोपि मोक्षाय क्रियानुष्ठानादिति चेन्नेत्याह ।

(६) न प्रियाप्रियइत्युक्तेर्नादेहत्वं क्रियाफलम् ।
देहयोगः क्रियाहेतुस्तस्माद्विद्वान् क्रियास्त्यजेत् ॥२०४॥

न प्रियेति । अदेहत्वमशरीरत्वं हि मोक्षस्तच्च क्रियाफलं, क्रियाफलं तु सुखदुःखे प्रसिद्धे, ते तु नाशरीरस्य दृष्टे श्रुते वा, "अशरीरं वा वसन्तं न प्रियाप्रिये स्पृशत" इत्युक्तेः श्रुत्यैवमुक्तत्वादित्यर्थः । क्रिया हेतुर्यस्य स क्रियाहेतुर्देहयोगः, क्रियाया देहसंबन्ध एव साध्यो न मोक्ष इत्यर्थः । यस्मादेवं तस्माद्विद्वान् कर्मसाध्या मुक्तिः किं तु ज्ञानैकसाध्येति जानन् क्रियाः सर्वाणि साहंकाराणि कर्माणि त्यजेत्संन्यस्य श्रवणादिनिष्ठो भवेदित्यर्थः ॥ ६ ॥

ननु सर्वेषां कर्मणामात्मकर्त्तव्यत्वप्रतीतेर्न विद्वान् क्रियास्त्यक्तुं शक्नुयादिति चेन्नेत्याह ।

(७) कर्मस्वात्मा स्वतन्त्रश्चेन्निवृत्तौ च तथेष्यताम् ।
अदेहत्वे फले ऽकार्ये ज्ञाते कुर्यात्कथं क्रियाः ॥२०५॥

कर्मस्विति । आत्मा चेत्कर्मसु स्वतन्त्रः कर्त्ता तर्हि निवृत्तौ च कर्मत्यागरूपे च तथेष्यतां, यथा रागादिमान्प्रवृत्तिलक्षणे कर्मणि स्वतन्त्रस्तथा विशुद्धसत्त्वो वीतरागस्तत्त्यागेपि स्वतन्त्र इष्यतां, कर्मसाध्यफलाभिलाषाभावे कर्मत्यागस्यार्थप्राप्तत्वादित्यर्थः । एतदेव स्पष्टयत्यदेहत्वइति । देहसंबन्धशून्ये फले मोक्षलक्षणे अकार्ये केनापि कर्मणाऽसाध्ये शास्त्रादिना ज्ञाते सति क्रियाः कथं कुर्यादेव ताभिः प्रयोजनाभावादित्यर्थः ॥ ७ ॥

किं क्रियापरित्यागमात्रेण विदेहकैवल्यं प्राप्यते, नेत्याह ।

(८) जात्यादीन्संपरित्यज्य निमित्तं कर्मणां बुधः ।
कर्महेतुविरुद्धं यत्स्वरूपं शास्त्रतः स्मरेत् ॥ २०६ ॥

जात्यादीनिति । बुधः पण्डितो बुद्धिमान् कर्मणां निमित्तं निमित्तभूतान् जात्यादीन्संपरित्यज्य जात्याद्यभिमानं परित्यज्य यत्स्वरूपं कर्महेतुविरुद्धं कर्मनिमित्तोपमर्द्दकमुद्वाय्य स्वरूपं तच्छास्त्रतो यथा शास्त्रोक्तं तथा स्मरेदनुचिन्तयेदित्यर्थः ॥ ८ ॥

शास्त्रमेवोदाहरन्स्मर्त्तव्यमात्मरूपं विशदयति ।

(९) आत्मैकः सर्वभूतेषु तानि तस्मिंश्च खे यथा ।
पर्यगाद्व्योमवत्सर्वं शुक्रं दीप्तिमदिष्यते ॥ २०७ ॥

आत्मैक इत्यादिना ।

"यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते" ॥

इति मन्त्रार्थः पूर्वार्द्धेनोच्यते । "स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्ध"मिति मन्त्रार्थं सार्द्धश्लोकेनाह । पर्यगादिति । एषाक्षरयोजना, सर्वभूतेष्वहमेक एवात्मा न चेतनभेदोस्ति, तर्हि किं भूतान्यधिकरणमात्मनो, नेत्याह ।

तानीति । तानि च भूतानि तस्मिन्नात्मन्येवाध्यस्तानि, न ततः पृथग्वर्त्तन्ते, तथा च स्वाध्यस्तसकलविकारानुस्यूतसत्तास्फूर्त्तिरूपो विकारोपमर्द्दनानुसन्धेय इत्यर्थः । खे यथेति । अन्तः सुषिररूपेण बहिरवकाशरूपेण वर्त्तमाने आकाशे यथा भूतसंबन्धस्तथेत्यर्थः । पर्यगादात्मा व्योमवत्स्वसत्तामात्रेण परि समन्तादगात् गतवान्सर्वमशेषमात्मना न किं चिदव्याप्तमस्तीत्यर्थः । तथा च ब्राह्मणं "नैनेन किं चनानावृतं नैनेन किं चनासंवृत"मिति । शुक्रमिति मन्त्रपदं तस्य व्याख्यानं दीप्तिमदिति । प्रकाशस्वभावं शुद्धं तदात्मस्वरूपमिष्यतइत्यर्थः ॥ ९ ॥

अव्रणमस्नाविरमिति पदयोरर्थमाह ।

(१०) व्रणस्नाय्वोरभावेन स्थूलं देहं निवारयेत् ।
शुद्धापापतया लेपं लिङ्गं चाकायमित्युत ॥ २०८ ॥

व्रणेति । क्षतशिरा जालनिरासेन स्थूलदेहात्मत्वमात्मनो ऽपोह्यमित्यर्थः । शुद्धमपापविद्धमित्यनयोरर्थमाह । शुद्धेति । शुद्धं रागादिदोषहीनमत एवापापं पुण्यपापहीनं तस्मात्कारणाभावादेव सुखदुःखादितदनुभवसंस्कारलेपहीनमित्यर्थः । आकायमिति । मन्त्रपदेन सूक्ष्मदेहात्मता निरसनीयेत्याह । लिङ्गमिति । निवारयेदिति सर्वत्रानुषङ्गः । स्थूलसूक्ष्मदेहतत्कार्यतद्वासनाभ्यो व्यावृत्तः सम एको ऽपरिच्छिन्न आत्मेति सदा चिन्तयेदित्यर्थः ॥ १० ॥

य एवं यथोक्तमात्मानं वेत्ति स ब्रह्मविदामुत्तम इत्याह ।

(११) वासुदेवो यथा ऽश्वत्थे स्वदेहे चाब्रवीत्समम् ।
तद्वद्वेत्ति य आत्मानं समं स ब्रह्मवित्तमः ॥ २०९ ॥

वासुदेव इति । वासुदेवो भगवान्कृष्णो ऽश्वत्थे निकृष्टोपाधौ स्वदेहे चाविर्भूतविज्ञानैश्वर्यशक्तिमदात्माधिष्ठिते उत्कृष्टोपाधौ च यथा सममविशिष्टमात्मानमब्रवीदश्वत्थः सर्ववृक्षाणामिति वृष्णीनां वासुदेवोस्मीति च तद्वद्य आत्मानं सममुपाधिकृतवैषम्यापोहेनैकरूपं वेत्ति सोतिशयेन ब्रह्मविदित्यर्थः ॥ ११ ॥

वासुदेवस्य युक्तं सर्वत्र समात्मदर्शनं तस्योपाधिषु ममाहंकाररहितत्वान्न तु मुमुक्षोस्तस्य तद्वैपरीत्यादित्यत आह ।

(१२) यथा ह्यन्यशरीरेषु ममाहन्ता न चेष्यते ।
अस्मिंश्चापि तथा देहे धीसाक्षित्वाविशेषतः ॥ २१० ॥

यथा हीति । अन्यशरीरेषु बहिर्दृश्यमानेषु देहेषु यथा ममाहन्ता ममाहमोर्भावो न चेष्यते तस्य दृश्यत्वेनानात्मत्वनिश्चयात्, तथास्मिंश्चापि स्वत्वाभिमते देहे ममाहंता नेष्यते, कुतः, धीसाक्षित्वाविशेषतः, उभयदेहाकारपरिणतबुद्धिसाक्षित्वाविशेषादित्यर्थः । तथा चात्मतत्त्वालोचनायामहंकारादेरनवसरत्वाद्वासुदेववत्समात्मदर्शनं युक्तमेवेति भावः ॥१२॥

रागद्वेषभयोपलम्भान्नास्ति मुमुक्षोरभिमानाभाव इति चेन्नेत्याह ।

(१३) रूपसंस्कारतुल्याधी रागद्वेषौ भयं च यत् ।
गृह्यते धीश्रयं तस्माद् ज्ञाता शुद्धो ऽभयः सदा ॥ २११ ॥

रूपेति । नीलादिरूपसंस्कारेण तुल्यः समान आधिराश्रयो ययोस्तौ रागद्वेषौ रूपसंस्कारतुल्याधी, यच्च भयं तदपि तत्समानाश्रयमिति, संस्कारो नाम स्वाश्रयस्य प्रागुद्भूतावस्यासमानावस्थान्तरापादको ऽतीन्द्रियो धर्मः, ततश्चायमर्थः । रूपाद्याकारपरिणतान्तःकरणे हि रूपादिसंस्कारः पुनरपि रूपाद्याकारपरिणामहेतुर्विद्यते, तत्रैव च रागद्वेषौ रूपादिदर्शननिमित्तौ तन्निमित्तकं च भयं "तत्रैव कामः संकल्पो ह्रीर्द्धीर्भीरित्येतत्सर्वं मन एवे"तिश्रुतेः, यस्माद्धीश्रयं बुद्धिसंश्रयमेव रागद्वेषौ भयं वेति त्रयमात्मना गृह्यते नात्मसंश्रयं तस्माद् ज्ञाता शुद्धो रागादिरहितो ऽभयश्च सदेति ॥ १३ ॥

ननु न सदा शुद्ध आत्मा किं तु "यथा क्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्यभवती"ति श्रुतेः

"यंयं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम्"।
तंतमेवैति कौन्तेय सदा तद्भावभावितः" ॥

इति स्मृतेश्च पूर्वमशुद्धोपि पुरुषो ब्रह्मभावनया शुद्धः पश्चाद् ब्रह्म भविष्यतीत्याशङ्क्याह ।

(१४) यन्मनास्तन्मयोन्यत्वे नात्मत्वाप्तौ क्रियात्मनि ।
आत्मत्वे चानपेक्षत्वात्सापेक्षं हि न तत्स्वयम् ॥ २१२ ॥

यन्मना इति । यस्मिन् ध्येये देवादौ मनो यस्य स यन्मनाः ध्यायी पुरुषः स तन्मयो ध्येयदेवादिमयो भवति ध्यातृध्येययोरन्यत्वे सति ध्यानक्रियायास्तत्रार्थवत्त्वसंभवादित्यर्थः । न पुनरात्मत्वाप्तौ आत्मस्वरूपावस्थानप्राप्त्यर्थमात्मनि क्रिया ध्यानादिरूपा ऽपेक्ष्यतइत्यर्थः । तत्र हेतुरात्मत्वइति । मोक्षरूपस्य ब्रह्मण आत्मत्वे सति तस्य चतुर्विधक्रियाफलविलक्षणत्वात् क्रियाया अनपेक्षत्वादित्यर्थः । मोहमात्रव्यवधानाच्चात्र न क्रियापेक्षेति चकारार्थः । विपक्षे दोषमाह । सापेक्षं हीति । यदि क्रियासापेक्षं कैवल्यं भवेत्तर्हि तत्स्वयमात्मरूपं न स्यात् क्रियासाध्यस्यानात्मत्वादनित्यत्वाच्चेत्यर्थः । तस्मात्सदा शुद्ध एवात्मा तस्मिन्न शुद्धाभासो मिथ्याध्यास इति भावः ॥१४॥

विभागादिमलाभावाच्चिदेकरसत्वाच्चात्मा सदा शुद्ध एवाभ्युपेय इत्याह ।

(१५) खमिवैकरसा ज्ञप्तिरविभक्ता ऽजरा ऽमला ।
चक्षुराद्युपधानात्सा विपरीता विभाव्यते ॥ २१३ ॥

खमिवेति । यद्येवंस्वभावैषा ज्ञप्तिस्तर्हि तस्या जन्मविनाशभेदप्रतिभासाः कथमित्याशङ्क्य चक्षुराद्युपाधिसंसर्गदोषादित्याह । चक्षुरादीति ॥ १५ ॥

आत्मनः प्रतिपादितममलत्वं विशदयति ।

(१६) दृश्यत्वादहमित्येषो ऽनात्मधर्मो घटादिवत् ।
तथान्ये प्रत्यया ज्ञेया दोषाश्चात्मा मलो ह्यतः ॥ २१४ ॥

दृश्यत्वादिति । अहमित्येषो ऽहमितिप्रत्ययो ऽनात्मधर्मो ऽनात्मनिष्ठो दृश्यत्वाद्घटवत्तथान्येपि प्रत्ययाः परिणामाः दोषाः दोषरूपा रागद्वेषादयो ऽनात्मधर्मा ज्ञेया हि यस्मादत आत्मा ऽमलो हि निर्मल एवेत्यर्थः ॥ १६ ॥

अहंकारादीनामात्मधर्मत्वाभावेपि नात्मनो विशुद्धिः सिद्ध्यति विकारित्वात्परिच्छिन्नत्वाच्चेत्याशङ्क्याह ।

(१७) सर्वप्रत्ययसाक्षित्वादविकारी च सर्वगः ।
विक्रियेत यदि द्रष्टा बुद्ध्यादीवाल्पविद्भवेत् ॥ २१५ ॥

सर्वप्रत्ययेति । विपक्षे दोषमाह । विक्रियेतेति । विक्रियेत परिच्छिन्नो वा यद्यात्मा तदाल्पविद्विषयमात्रावभासको भवेद् बुद्ध्यादीव बुद्धिचित्तमनोवदित्युत्तरार्थः । बुद्ध्यादिशब्देन तद्गताभासो लक्ष्यते, अन्यथा स्वरूपतो ऽचेतनत्वाद्वेदनायोगवत्वेनाल्पवित्त्ववचनमनुपपन्नं स्यात्तत्र बुद्धेः साभासाया विषयावभासनमात्रे उपक्षीणपरिणामाया यथा पूर्वापरानुभूतितदवस्थातत्प्रचारानुसंधानाभावो विक्रियावत्त्वात्तथा द्रष्टुरपि विक्रियावत्त्वे ऽनुसंधानाभावप्रसङ्गात्सर्वव्यवहारविलोपप्रसङ्ग इति भावः ॥ १७ ॥

द्रष्टुरात्मनोपि बुद्धिवदल्पवित्त्वमेव ज्ञानस्य साधनाधीनस्योत्पत्तिविनाशवत्त्वादिति चेन्नेत्याह ।

(१८) न दृष्टिर्लुप्यते द्रष्टुश्चक्षुरादेर्यथैव तत् ।
नहि द्रष्टुरिति ह्युक्तं तस्माद् द्रष्टा सदैकदृक् ॥ २१६ ॥

न दृष्टिरिति । तथैव चक्षुरादिद्वारकदृष्टिर्लुप्यते परिणामित्वान्न तथा द्रष्टुरात्मनो दृष्टिर्लुप्यते अपरिणाम्यात्मस्वरूपत्वात्तस्या इत्यर्थः । तद्दृष्टेर्नित्यत्वं "नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते ऽविनाशित्वा"दिति श्रुत्योक्तमित्यर्थः । यस्मात्प्रमाणसिद्धमिदं तस्मादित्यर्थः । सदैकदृग् एकरूपदृष्टिस्वभाव इत्यर्थः । सदैकभुगितिपाठे भुङ्क्ते पश्यतीति भुक् साक्षीत्यर्थः ॥ १८ ॥

यस्मादेवमात्मा शुद्धस्वभावो ऽपि सचुपाधिसंबन्धादन्यथा प्रतीयते तस्मादात्मानं ब्रह्मत्वेन प्रतिपत्तुं पदार्थविवेकं कुर्यान्मुमुक्षुरित्याह ।

(१९) संघातो वास्मि भूतानां करणानां तथैव च ।
व्यस्तं वान्यतमो वास्मि को वास्मीति विचारयेत् ॥२१७॥

संघातो वेति । अयमर्थः । अहमिति तावदात्मावभासते, स भासमानो ऽहं मनुष्यः कृशः स्थूल इत्यादौ भूतसंघातात्मकदेहरूपः स्फुरति, तदिदमुच्यते, संघातो वास्मि भूतानामिति, तथाहं द्रष्टा श्रोता रसयिता काणो बधिर इति करणेष्वप्यहमुल्लेखो दृश्यते, अतः करणसंघातो वाहमिति, तत्रापि पृथक्पृथगेवाहंकारदर्शनाद्व्यस्तमेकैकं चेन्द्रियमहमस्मि, अथ वैकस्मिन् देहे ऽनेकात्मत्वे कदा चिद्वैमत्यसंभवाद्भोगव्यवस्थानुपपत्तेरन्यतमो वास्मीन्द्रियसंघातादन्यो वा तदधिष्ठातास्मि, यद्यन्यतमस्तर्हि स को वा ऽन्तःकरणप्राणाद्यन्यतमः किं वा तत्साक्षी तद्विलक्षणस्वभाव इति विचारयेत् ॥ १९ ॥

विचारफलं पदार्थविवेकं कथयति ।

(२०) व्यस्तं नाहं समस्तं वा भूतमिन्द्रियमेव वा ।
ज्ञेयत्वात्करणत्वाच्च ज्ञातान्यो ऽस्माद्घटादिवत् ॥२१८॥

व्यस्तं नाहमिति । भूतं चेन्द्रियं वा समस्तं व्यस्तं वा नाहमस्मि, ज्ञेयत्वादचेतनत्वाद्, घटादिवत्करणत्वात्कुठारादिवदिति यथायोगं योज्यं, तस्माद् ज्ञाता चेतनो ऽन्योन्तःकरणप्राणादिभ्यो ऽप्यचेतनेभ्य इति द्रष्टृदृश्यान्वयव्यतिरेकालोचनेन विवेकः कार्य इत्यर्थः ॥ २० ॥

इदानीं साक्षिसाक्ष्यान्वयव्यतिरेकालोचनेनावस्थात्रयविवेकद्वारा तत्साक्षिणस्तुरीयस्याधिगमप्रकारमाह ।

(२१) आत्माग्नेरिन्धना बुद्धिरविद्या कामकर्मभिः ।
दीपिता प्रज्वलत्येषा द्वारैः श्रोत्रादिभिः सदा ॥ २१९ ॥

आत्माग्नेरित्यादिना । तत्रैवं सतीत्यतः प्राक्तनैः श्लोकैः आत्मैवाग्निस्तस्येन्धना इध्यते प्रकाश्यते व्यवहारयोग्यः क्रियते ऽनयेतीन्धना बुद्धिरात्मचैतन्यस्य विशेषाकारतयाभिव्यक्तिकारणभूतेत्यर्थः । सा विद्या कामकर्मभिर्दीपिता उत्तेजिता वायुनेवाग्निस्थमिन्धनमाध्माता सती प्रज्वलति चैतन्ययस्ततया प्रकाशमाना जायते ऽभिव्यक्ताग्निना दह्यमानमिन्धनमिवेत्यर्थः । गवाक्षेभ्यो निःसृतदीर्घप्रभान्यायेन श्रोत्रादिभिर्द्वारैर्निःसृता सती सदा प्रज्वलत्येषेति योजना । अत्राग्नीन्धनादिरूपकनिर्देशप्रयोजनं व्यवहारकाले विषयग्रहणस्य होमत्वभावना, तत्फलं च विषयेष्वासक्तिनिवृत्तिरिति द्रष्टव्यम् ॥ २१ ॥

एवंविधबुद्ध्यवस्थाज्जागरणं तस्यामात्मा स्थूलपदार्थभुग्भवतीत्याह ।

(२२) दक्षिणाक्षिप्रधानेषु यदा बुद्धिर्विचेष्टते ।
विषयैर्हविषा दीप्ता आत्माग्निः स्थूलभुक् तदा ॥ २२० ॥

दक्षिणाक्षीति । दक्षिणस्याङ्गस्य पुरुषे श्रेष्ठत्वप्रसिद्धेरिदं विशेषणं, दक्षिणमक्षि प्रधानं मुख्यं येषामिन्द्रियाणां तेषु बुद्धिर्यदा विचेष्टते व्यापारवती भवति हविःस्थानीयैर्विषयैर्दीप्ता विषयं व्याप्य तदाकारेण दीप्यमाना सतीति यावत्, तदात्माग्निः स्थूलभुक् स्थूलविषयाणां भोक्ता जागर्तीत्युच्यतइत्यर्थः ॥ २२ ॥

रूपकनिरूपणफलं स्पष्टयति ।

(२३) हूयन्ते तु हवींषीति रूपादिग्रहणे स्मरन् ।
अरागद्वेष आत्माग्नौ जाग्रद्दोषैर्न लिप्यते ॥ २२१ ॥

हूयन्तइति । रूपादिग्रहणे विषयग्रहणसमये अरागद्वेषः शोभनाशोभनाध्यासेन रागद्वेषावकुर्वन् हवींषीमान्यात्माग्नौ हूयन्तइति स्मरन् ध्यायन्नात्मा जाग्रद्दोषैः विषयोपलब्धिनिबन्धनैः पुण्यापुण्यलक्षणैर्न लिप्यते न संश्लिष्यतइत्यर्थः ॥ २३ ॥

इदानीं स्वप्नावस्थामाह ।

(२४) मानसे तु गृहे व्यक्तः सो ऽविद्याकर्मवासनाम् ।
पश्यंस्तैजस आत्मोक्तः स्वयंज्योतिः प्रकाशिता ॥ २२२ ॥

मानसे त्विति । मनःपरिणामोपाधिर्मानसं गृहं स तत्राभिव्यक्त आत्मा ऽविद्याप्रयुक्तकर्मोद्बुद्धा वासना ऽविद्या कर्मवासनेत्युच्यते, तां विषयाकारां पश्यंस्तैजस इत्युक्तो विद्वद्भिः तेजसि वासनामये विषये ऽभिव्यक्त इति व्युत्पत्तेरित्यर्थः । तत्र भासमानकर्मसुखदुःखादीनां मनोमात्रत्वात्तस्य च दृश्यत्वेनैव तदावस्थानादात्मन उपाध्यन्तराभावे सति बाह्यस्य चादित्यादिज्योतिषस्तदानीमुपरमादात्मैव स्वयंज्योतिः सन् प्रकाशिता साक्षी भवतीत्यर्थः । तथा च श्रुतिः " दृष्ट्वैव पुण्यं च पापं चे"ति "अत्रायं पुरुषः स्वयंज्योतिर्भवती"ति ॥ २४ ॥

सुषुप्तिमाह ।

(२५) विषया वासनाश्चापि चोद्यन्ते नैव कर्मभिः ।
यदा बुद्धौ तदा ज्ञेयः प्राज्ञ आत्मा ह्यनन्यदृक् ॥ २२३ ॥

विषया इति । यदा बुद्धावन्तःकरणे विषयाः स्थूलाः वासनाश्च सूक्ष्माः स्वप्नदृश्याश्च कर्मभिर्न चोद्यन्ते नोद्भूताः क्रियन्ते तदात्मा प्राज्ञे ज्ञेयस्तत्संज्ञकस्तदा भवतीत्यर्थः । प्रज्ञातिशयात्तदा प्राज्ञ इति व्युत्पत्तिमभिप्रेत्य विशिनष्ट्यनन्यदृगिति । अन्यदात्मव्यतिरिक्तं विषयवासनां वा न पश्यतीत्यनन्यदृक्, अपरिच्छिन्नप्रज्ञ इत्यर्थः ॥ २५ ॥

एवमवस्थात्रयं तदवस्थं चात्मानं द्रष्टृदृश्यभावेन विविच्येदानीमभिमानिसहितावस्थात्रयसाक्षितया विश्वादित्रयापेक्षया तुरीयं प्रत्यञ्चमात्मानं नित्यविज्ञप्तिस्वभावमुपलम्भयति ।

(२६) मनोबुद्धीन्द्रियाणां या अवस्थाः कर्मचोदिताः ।
चैतन्येनैव भास्यन्ते रविणेव घटादयः ॥ २२४ ॥

मनोबुद्धीति । इन्द्रियाणामवस्था जागरितं, मनोवस्था स्वप्नः, बुद्ध्यवस्था कारणावस्था, सा सुषुप्तिरिति विभागः । स्पष्टमन्यत् ॥ २६ ॥

ननु यद्यात्मा निर्विकार एव साक्षी कथं तर्हि बुद्ध्यादीनां कर्त्तोच्यते तत्राह ।

(२७) तत्रैवं सति बुद्धीश्च आत्मभासावभासयन् ।
कर्त्ता तासां यदर्थास्ता मूढैरेवाभिधीयते ॥ २२५ ॥

तत्रैवं सतीति । तत्र तस्मिन्नात्मनि एवं सति अवस्थात्रये ऽध्यस्ते सति सावस्थाः बुद्धीः आत्मभासा स्वचैतन्याभासेनावभासयन् च आत्मा तासां कर्त्तेति मूढैः शास्त्राचार्योपदेशरहितैरभिधीयते व्यपदिश्यतइति योजना । तथा व्यवहारप्रवृत्तौ निमित्तं सूचयन् बुद्धीर्विशिनष्टि । यदर्थास्ता इति । यस्यात्मनः सुखदुःखप्रतिभासार्थास्ता भासयन्निति कर्मोद्भासितबुद्ध्यवस्थानुगतचिदाभासाविवेकादात्मा दर्शनकर्त्तेत्युच्यते मूढैरित्यर्थः ॥ २७ ॥

एवमज्ञाने तत्कार्ये च प्रतिचिन्तितस्य चिदात्मनो ज्ञातृत्वमुपाधिनिबन्धनं व्युत्पाद्य सर्वज्ञत्वं सर्वकर्तृत्वं च तस्यैव मायोपाधिप्रतिबिम्बवशादिति व्युत्पादयति ।

(२८) सर्वज्ञो ऽप्यत एव स्यात्स्वेन भासावभासयन् ।
सर्वं सर्वक्रियाहेतोः सर्वकृत्त्वं तथात्मनः ॥ २२६ ॥

सर्वज्ञोपीति । अत एवेत्युक्तमेव विशदयति । स्वेनेति । स्वात्माश्रयविषयकमायाविवर्त्तं सर्वं स्वचैतन्येनादित्यप्रकाशवदविक्रतेन भासयन्सर्वज्ञ उच्यते, न पुनः सर्वविषयज्ञानकर्तृत्वेनेत्यर्थः । तथा तद्वन्मायानिबन्धनमेवात्मनः सर्वकृत्त्वं सर्वकर्तृत्वं तदेवाह । सर्वक्रियाहेतोरिति । संनिधिसत्तामात्रेण भ्रामकवत्सर्वकारकप्रवृत्तिहेतुत्वादित्यर्थः ॥ २८ ॥

तदेवमवस्थात्रयसाक्षितया विविक्तशुद्धचिद्रूपस्यात्मनः कार्यकारणात्मकमायोपाधिवशाज्ज्ञातृत्वकर्तृत्वसर्वज्ञत्वादिव्यवहारास्पदत्वं न स्वभावत इत्युक्तमर्थमनूद्य, किं तत् स्वाभाविकं बिम्बकल्पमात्मस्वरूपमित्यपेक्षायां तदाह ।

(२९) सोपाधिश्चैवमात्मोक्तो निरुपाख्यो ऽनुपाधिकः ।
निष्कलो निर्गुणः शुद्धस्तं मनो वाक् च नाप्नुतः ॥ २२७ ॥

सोपाधिश्चेति । यस्तु निरुपाख्यो विषयतयोल्लेखयोग्यो न भवति सो ऽनुपाधिकः सर्वव्यवहारातीत इत्यर्थः । गुणा-

यवयवशून्यत्वाच्छुद्धः कूटस्थ इत्यर्थः । निरुपाख्यत्वमुक्तं व्यनक्ति तमिति ॥ २९ ॥

मनोवागगम्यत्वं साधयति ।

(३०) चेतनो ऽचेतनो वापि कर्त्ता ऽकर्त्ता गतो ऽगतः ।
बद्धो मुक्तस्तथा चैको ऽनेकः शुद्धो ऽन्यथेति वा ॥ २२८ ॥

चेतन इति । अचेतन इति । अयमर्थः । अहमिति शब्दप्रत्ययौ तावत्पराग्व्यावृत्ततयात्मानं प्रत्यञ्चमवगाहेते इत्यविवादं, तौ चेच्छुद्धमेवात्मानं गोचरयेतां तदा प्रत्यक्षोपलब्धे घटादाविव वादिनां विप्रतिपत्त्यभाव एव स्यात् । विप्रतिपद्यन्ते तु ते देहेन्द्रियमनोबुद्धीनामन्यतमो ऽचेतन एव चेतनावानात्मेति वेदबाह्याः । तदन्यश्चेतन इति वेदवादिनस्तेष्वपि के चित्कर्त्तेति के चिदकर्त्तेति गतो व्यापको ऽगतो ऽणुपरिमाणो देहपरिमाणो वेति । के चित्तु बद्धो जीवो मुक्तो ऽन्य ईश्वरस्तथा सर्वशरीरेष्वेको ऽनेको वा शुद्धो रागादिगुणरहितो ऽन्यथा तद्युक्तश्चेति ॥ ३० ॥

अतो विप्रतिपत्तेरयथाभूतात्ममात्रगोचरत्वादसमर्थौ शब्दप्रत्ययौ शुद्धात्मनीत्याह ।

(३१) अप्राप्यैव निवर्त्तन्ते वाचो धीभिः सहैव तु ।
निर्गुणत्वात्क्रियाभावाद्विशेषाणां ह्यभावतः ॥ २२९ ॥

अप्राप्यैवेति । कथमात्माप्राप्तिर्वाचां धियामिति चेत्परमार्थतः प्रवृत्तिबीजाभावादित्याह । निर्गुणत्वादिति । रूपादिगुणहीनत्वाद्बाह्येन्द्रियद्वारकधीभिस्तावदात्मा न प्राप्यते, मनसश्च बाह्येन्द्रियद्वारोपलब्धविषयातिरेकेण स्वतन्त्रस्य विषयस्यानिरूपणात्तदगोचरमात्मानं तन्न प्राप्नोति क्रियाभावादात्मनो मनोगोचरत्वाभावः, नहि क्रियाहीनो ऽनवच्छिन्ने वस्तुनि क्रियावदनुगतिमात्रेणापूर्वधर्मोपजनिः संभवति, घटादिनानुगते गगने तददर्शनात्, तस्मान्मनः संयोगजज्ञानासंभवान्न मनसापि प्राप्य आत्मेत्यर्थः । तथा विशेषाणां गोधनरूपाणां बाह्यानां स्वगतानां वा जात्यादीनां प्रवृत्तिनिमित्तानामभावान्न शब्दोपि प्राप्नोत्यात्मानमित्यर्थः । तथा च श्रुतिः ।

"यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह" ।

इति ॥

"न चक्षुषा गृह्यते नापि वाचा
नान्यैर्देवैस्तपसा कर्मणा वा"

इति च ॥ ३१ ॥

अविषयस्यात्मनः कथं वेदान्तवेदनीयत्वमित्याशङ्क्य लक्षणावर्त्मनेत्यभिप्रेत्याह ।

(३२) व्यापकं सर्वतो व्योम मूर्त्तैः सर्वैर्वियोजितम् ।
यथा तद्वदिहात्मानं विद्याच्छुद्धं परं पदम् ॥ २३० ॥

व्यापकमिति । सर्वैर्मूर्त्तैः सर्वतो वियोजितं परिच्छेदप्रतिभासहेतूपाधिवर्ज्जितं व्यापकं स्वरूपतोपरिच्छिन्नं च व्योम यथा तद्वदेवमवस्थात्रयोपाधिवियोजितमवस्थात्रयसाक्षितया लक्षितं शुद्धमात्मानमिह वेदान्तसमये परं पदं परमात्मानं ब्रह्म विद्यादिति योजना ॥ ३२ ॥

एवमात्मतत्त्वे ऽवधारिते पुनरवस्थात्रयाभिमानं न कुर्यादित्याह ।

(३३) दृष्टं हित्वा स्मृतिं तस्मिन्सर्वग्रश्च तमस्त्यजेत् ।
सर्वदृग् ज्योतिषा युक्तो दिनकृच्छार्वरं यथा ॥ २३१ ॥

दृष्टमिति । दृष्टं जागरितं तद्धित्वा द्रष्टा श्रोता मन्तेत्येवमेकैकक्रियोपरक्ततयात्माभिमानं त्यक्त्वेत्यर्थः । दर्शनाद्यवस्थायामपि निर्विशेषमेवात्मानं मन्वीतेति भावः, तस्मिन् दृष्टेर्थे स्मृतिं स्वप्नं हित्वा संस्कारद्वारकत्वात्स्वप्न एवेह स्मृतिरुच्यते । अहं स्वप्ने देवो ऽभूवं व्याघ्रो वा ऽभूवमिति तदभिमानं हित्वेत्यर्थः । दृश्यस्य सवासनस्य मनसो विकारो ऽसौ नात्मन इत्यसङ्गतामात्मनोनुसंदधीतेति भावः । तथा तमः सुषुप्तिं त्यजेत्तमसो विशेषणं सर्वग्र इति । सर्वं ग्रसतीति सर्वग्रः, सान्तमिदं पदं, सुषुप्तेरप्यवभासकतया ऽलुप्तप्रकाशस्वभाव एवात्मा न तु मूढो ऽज्ञानं वा न वेति मन्वीतेत्यर्थः । को ऽसाववस्थात्रयं त्यक्तेति तमाह । सर्वदृगिति । सर्वदृक् सर्वसाक्षी प्रत्यगात्मा ज्योतिषा युक्तो ज्योतिषां ज्योतिरित्युक्तेन ब्रह्मणैकीभूत इत्यर्थः । यथा दिनकृत्सविता शर्वर्यां भवं शार्वरं तमः स्वतेजसा ग्रसित्वा निस्तमस्क एवावतिष्ठते तथा ऽवस्थाविकारहेत्वज्ञानं ब्राह्मेण ज्योतिषाभिभूयाद्वयानन्दस्वभाव एवावतिष्ठेतेत्यर्थः ॥ ३३ ॥

उक्तमेव त्यागप्रकारं प्रकटयति ।

(३४) रूपस्मृत्यन्धकारार्थाः प्रत्यया यस्य गोचराः ।
स एवात्मा समो द्रष्टा सर्वभूतेषु सर्वगः ॥ २३२ ॥

रूपस्मृतीति । रूपस्मृत्यन्धकारा जाग्रत्स्वप्नसुषुप्तयो ऽर्था विषया येषां प्रत्ययानां ते तथोक्ताः ते यस्य साक्षिणो गोचराः प्रतिभास्याः स एवात्मा सर्वभूतेषु द्रष्टा तथापि समो निर्विशेषो यतः सर्वगः परिच्छेदरहित इत्यर्थः ॥ ३४ ॥

यद्येवं मुक्तस्वभाव एवात्मा कुतस्तस्मिन्विचित्रसंसारप्रत्ययोदयस्तत्राह ।

(३५) आत्मबुद्धिमनश्चक्षुर्विषयालोकसंगमात् ।
विचित्रो जायते बुद्धेः प्रत्ययो ऽज्ञानलक्षणः ॥ २३३ ॥

आत्मबुद्धीति । अज्ञानलक्षणो ऽज्ञानोपाधिनिबन्धन इत्यर्थः ॥ ३५ ॥

अविद्यातत्कार्योपाधीनामात्मनश्च विवेकानुपलम्भादेव संसारप्रतिभास इति स्थिते मुमुक्षोः कर्त्तव्यमुपदिशति ।

(३६) विविच्यास्मात्स्वमात्मानं विद्याच्छुद्धं परं पदम् ।
द्रष्टारं सर्वभूतस्थं समं सर्वभयातिगम् ॥ २३४ ॥

विविच्येति । अस्माद् बुद्ध्यादिसंघाताद्विविच्य स्वमात्मानं विद्यादिति संबन्धः । स्पष्टमन्यत् ॥ ३६ ॥

वेद्यमेवात्मरूपं पुनर्विशिनष्टि ।

(३७) समस्तं सर्वगं शान्तं विमलं व्योमवत् स्थितम् ।
निष्कलं निष्क्रियं सर्वं नित्यं द्वन्द्वैर्विवर्ज्जितम् ॥ २३५ ॥

समस्तमिति । समस्तमात्मानं सर्वं परं पदं ब्रह्मेति पृथगेवाज्यमपुनरुक्ततायै, अत्र विधिमुखेन प्रतिषेधमुखेन च ये विशेषा निर्दिष्टास्तानशेषान्विशेषान्साक्षिणि त्वंपदार्थे च तत्पदार्थे ब्रह्मण्यनुसंधायानयोस्तुल्यलक्षणत्वं निश्चित्य तत्त्वमसिवाक्यादहं ब्रह्मेति निश्चिनुयादिति तात्पर्यार्थः ॥ ३७ ॥

एवं ब्रह्मात्मरूपेणैव ज्ञातव्यमित्युक्ते पुनर्मुमुक्षुं शिक्षयति ।

(३८) सर्वप्रत्ययसाक्षी यः कथं ज्ञेयो मयेत्युत ।
विमृश्यैवं विजानीयाद् ज्ञानकर्म न वेति वा ॥ २३६ ॥

सर्वेति । सर्वप्रत्ययसाक्षी ज्ञानैकस्वभावो य उक्तः स कथं कीदृक्स्वभाव इति विमृशेदिति योजनीयं, कथंशब्दसूचितं विमर्शमेव विभजते । ज्ञेय इति । मया ज्ञेय उत न ज्ञेय इति शेषः । यदि ज्ञेयस्तदपि ज्ञानं प्रति कर्म वा न वेत्येवं विमृश्य विजानीयात्तत्त्वमात्मन इत्यर्थः ॥ ३८ ॥

एवं विमर्शज्ञेयत्वपक्षस्तावन्न संगच्छत इत्याह ।

(३९) अदृष्टं द्रष्टृविज्ञातं दहमित्यादिशासनात् ।
नैव ज्ञेयं मयान्यैर्वा परं ब्रह्म कथं चन ॥ २३७ ॥

अदृष्टमिति । यदि मन्यसे सुवेदेति दहरमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपमिति ज्ञेयस्याल्पत्वोपदेशादब्रह्मत्वापत्तेरदृष्टमविज्ञातमिति च श्रुतिशासनाच्च ब्रह्मात्मतत्त्वं ज्ञानकर्म्मत्वेन मया ऽन्यैर्वा कथं चन ज्ञेयमित्यर्थः ॥ ३९ ॥

यद्येवं ज्ञेयत्वं न संभवति कथं तर्हि आत्मन्येवात्मानं पश्येदित्याद्युपदेश इत्याशङ्काविषयत्वेनाविर्भावमात्रमेवात्मतत्त्वविज्ञानं न विषयत्वेन,

"यस्या मतं तस्य मतं मतं यस्य न वेद सः"

इति श्रुतेरिति मन्वानो ऽज्ञेयत्वपक्षमपि प्रतिक्षिपति ।

(४०) स्वरूपाव्यवधानाभ्यां ज्ञानालोकस्वभावतः ।
अन्यज्ञानानपेक्षत्वाद् ज्ञातं चैव सदा मया ॥ २३८ ॥

स्वरूपेति । यद् ज्ञानस्वरूपादन्यज्जडं यच्च व्यवहितं ज्ञानदेशात् तदागन्तुकज्ञानसापेक्षसिद्धिकत्वाज्ज्ञानविषयतया ज्ञेयं भवति, न तथेदमात्मतत्त्वं, कथं तर्हि, शृणु, ज्ञानालोकस्वभावतो ज्ञानप्रकाशस्वरूपत्वात्स्वरूपाव्यवधानाभ्यां हेतुभ्यामन्यज्ञानानपेक्षत्वादविषयत्वेन विज्ञातं भवत्यात्मतत्त्वमिति योजना । ज्ञातुरेव ब्रह्मत्वोपदेशाद् ज्ञातुश्च स्वज्ञेयत्वानुपपत्तेरविज्ञातत्वाभावाच्च सदा मया ज्ञातं च ब्रह्मात्मतत्त्वमित्यर्थः ॥ ४० ॥

ज्ञानस्वरूपस्य नान्यज्ञानापेक्षेत्येतद्दृष्टान्तेन साधयति ।

(४१) नान्येन ज्योतिषा कार्यं रवेरात्मप्रकाशने ।
स्वबोधान्नान्यबोधेच्छा बोधस्यात्मप्रकाशने ॥ २३९ ॥

नान्येनेति स्पष्टार्थः ॥ ४१ ॥

दृष्टान्तस्य दार्ष्टान्तिकस्य च नैरपेक्ष्यमुक्तं साधयति ।

(४२) न तस्यैवान्यतो ऽपेक्षा स्वरूपं यस्य यद्भवेत् ।
प्रकाशान्तरदृश्यो न प्रकाशो ह्यस्ति कश्चन ॥ २४० ॥

न तस्येति । आत्मा नान्यतो ज्ञानमपेक्षते, तत्स्वरूपत्वा,-द्यद्यस्य स्वरूपं तन्नान्यतस्तदपेक्षते, यथा प्रकाशरूपः सविता न प्रकाशमन्यतो ऽपेक्षते, तथा चायं, तस्मादेवमित्यर्थः । किंच नात्मा प्रकाशान्तरदृश्यः, प्रकाशरूपत्वा,दादित्यवदित्याह । प्रकाशान्तरेति ॥ ४२ ॥

ननु प्रकाशान्तरदृश्यत्वाभावेपि स्वरूपप्रकाशदृश्य एव किं न स्याद्, यथा सविता घटादि प्रकाशयन् स्वात्मानमपि प्रकाशयत्येव तथात्मापि दृश्यमवभासयन्स्वात्मानमपि भासयेदिति चेन्नेत्याह ।

(४३) व्यक्तिः स्यादप्रकाशस्य प्रकाशात्मसमागमात् ।
प्रकाशस्त्वर्क्ककार्यः स्यादिति मिथ्या वचो ह्यतः ॥ २४१ ॥

व्यक्तिः स्यादिति । अप्रकाशस्य स्वभावतः प्रकाशहीनस्य प्रकाशात्मसमागमात्प्रकाशस्वभावसंसर्गमात्राद्व्यक्तिरभिव्यक्तिस्तमोनिवृत्तिलक्षणा स्यान्न तत्र प्रकाशगुणोदय इत्यर्थः । अतः प्रकाशो ऽर्ककार्य इति मृषा व्यपदेशः, प्रकाशावगुण्ठिते वस्तुनि प्रकाशोदयाभावेभिव्यक्त्यभावादर्शनादित्यर्थः । तस्माद्भासमानस्वरूपसंसर्ग एव भास्यस्याभिव्यक्तिरिति प्रकाशस्वभावस्य सवितुर्नान्यप्रकाश्यता स्वप्रकाश्यता वास्तीति न दृष्टान्तत्वसिद्धिरतो न दार्ष्टान्तिकसिद्धिस्त्वत्पक्ष इति भावः ॥ ४३ ॥

घटादिप्रकाशः कस्मादर्ककार्यो न भवतीति चेत्तत्राह ।

(४४) यतो ऽभूत्वा भवेद्यच्च तस्य तत्कार्यमिष्यते ।
स्वरूपत्वादभूत्वा न प्रकाशो जायते रवेः ॥ २४२ ॥

यतोभूत्वेति । यत्तु प्रागभूत्वा यतो भवेत्तत् तस्य कार्यमिष्यतइति संबन्धः । स्पष्टमन्यत् ॥ ४४ ॥

कथं तर्हि प्रकाशस्वरूपस्यादित्यस्य प्रकाशयितृत्वमात्मनश्च बोधमात्रस्वभावस्य बोद्धृत्वं व्यपदिश्यते तत्राह ।

(४५) सत्तामात्रे प्रकाशस्य कर्त्तादित्यादिरिष्यते ।
घटादिव्यक्तितो यद्वत्तद्वद्बोधात्मनीष्यताम् ॥ २४३ ॥

सत्तामात्रइति । प्रकाशस्य सन्निधिसत्तामात्रे सति घटादिव्यक्तितो घटाद्यभिव्यक्तेर्दर्शनादादित्यादिः प्रकाशस्य कर्त्तेष्यते यद्वत्तद्वद्बोधरूपेप्यात्मनि स्वाध्यस्तवस्तुसन्निधिसत्तामात्रे सति बोद्धृत्वमिष्यतामङ्गीक्रियतामिति योजना ॥ ४५ ॥

स्वगतविकारमन्तरेणैवात्मनोर्थप्रकाशत्वमित्येतदपि रविदृष्टान्तेन स्पष्टयति ।

(४६) बिलात्सर्पस्य निर्याणे सूर्यो यद्वत्प्रकाशकः ।
प्रयत्नेन विना तद्वज्ज्ञातात्मा बोधरूपतः ॥ २४४ ॥

बिलादिति । सर्पस्य बिलद्वारान्निर्गमे ज्ञायमाने यद्वत्सूर्यः प्रयत्नेन विना पूर्वसिद्धेनैव स्वज्योतिषा तं भासयन्प्रकाशको व्यपदिश्यते तद्वदात्मा बोधरूपत्वात्प्रयत्नेन विना विकारमन्तरेण ज्ञाता व्यपदिश्यतइत्यर्थः ॥ ४६ ॥

इदानीमुपाधिभावे ज्ञातृत्वव्यपदेशात्तदभावे तदभावादौपाधिकमेव ज्ञातृत्वमिति दर्शयितुं परमुदाहरणमाह ।

(४७) दग्धैवमुष्णसत्तायां तद्वद्बोधात्मनीष्यताम् ।
सत्येव यदुपाधौ तु ज्ञाते सर्पइवोत्थिते ॥ २४५ ॥

दग्धैवमिति । यथा दाह्यसन्निधावुष्णस्वरूपस्याग्नेः सत्तामात्रेण दाहकत्वं तथा बोधस्वरूपस्याप्यात्मनो बोध्यसन्निधिमात्रेण बोद्धृत्वमिष्यतां, यद्यस्मादुपाधौ ज्ञाते सत्येवात्मा ज्ञातोच्यते यथा बिलादुत्थिते सर्पे उपाधौ ज्ञाते सत्येव सविता प्रकाशकः कथ्यते न तदभावे, तस्मादौपचारिक एवात्मनो ज्ञातृत्वव्यपदेश इत्यर्थः ॥ ४७ ॥

औपाधिकं ज्ञातृत्वमात्मनो रविदृष्टान्तेन प्रतिपाद्य तेनैव दृष्टान्तेन कर्तृत्वमप्यौपाधिकं प्रतिपादयति ।

(४८) ज्ञाता ऽयत्नोपि तद्वद् यः कर्त्ता भ्रामकवद्भवेत् ।
स्वरूपेण स्वयं नात्मा ज्ञेयो ऽज्ञेयो ऽथ वा ततः ॥२४६॥

ज्ञातेति । यद्वदयं य आत्मा यत्नरहितोपि ज्ञाता व्याख्यातस्तद्वत्स्वगतविशेषशून्योपि सन्निधिमात्रेण कारकाणि प्रवर्त्तयन् क्रियाणां कर्त्तेति व्यपदिश्यते भ्रामकवदित्यर्थः । भ्रामयति प्रवर्त्तयति प्राक् सुप्तं जनसमूहमिति भ्रामकः सूर्यः, यद्वा भ्रामको ऽयस्कान्तः यथा स्वयं चलनादिव्यापाररहितोपि लोहकीलादीनां चालको दृष्टस्तथा ऽयमपीत्यर्थः । तदेवं व्यक्तिः स्यादप्रकाशस्येत्यारभ्योक्तं प्रासङ्गिकमात्मनो ज्ञातृत्वं कर्तृत्वं चौपाधिकं व्यवस्थाप्य प्रक्रान्तमात्मनो ज्ञानकर्मत्वाकर्मत्वाभ्यामज्ञेयज्ञेयत्वपक्षद्वयसमर्थनमुपसंहरति । स्वरूपेणेति । यतो ऽयमात्मा निर्विशेषः स्वभावतो ऽलुप्तप्रकाशरूपश्च ततः स्वयं स्वरूपेणासाधारणस्वभावेन न ज्ञेयो ज्ञानक्रियाव्याप्यो न भवति, तथा नाज्ञेयो व्यवहितवस्तुवच्च ज्ञानप्रकाशरहित इत्यर्थः । अथ वेत्यनेन ज्ञाता वा ऽन्यस्याज्ञाता वा न भवत्यात्मा निर्विकारत्वाच्चैतन्ययोगाच्च तथा कर्त्ता कारकाध्यासाधिष्ठानत्वाच्च कर्त्ता च निर्व्यापारत्वादित्यादिविरुद्धप्रतिभासव्यवस्थोपसंहार उक्तो वेदितव्यः ॥ ४८ ॥

आत्मन उक्ते ज्ञेयत्वाद्यभावे प्रमाणमाह ।

(४९) विदिताविदिताभ्यां तदन्यदेवेति शासनात् ।
बन्धमोक्षादयो भावास्तद्वदात्मनि कल्पिताः ॥ २४७ ॥

विदिताविदिताभ्यां तदिति । "अन्यदेव तद्विदितादथो अविदितादधी"ति श्रुत्या विदिताविदिताभ्यां कार्यकारणाभ्यामन्यदात्मतत्त्वं ब्रह्मेति शासनात्कार्यकारणधर्मविलक्षणस्वभाव एवायमात्मेत्यर्थः । तथा च यथात्मनि ज्ञातृत्वकर्तृत्वमकर्तृत्वं कारणत्वमित्यादि सर्वमविद्यावशादेव कल्पितं तथा बन्धो मोक्षः भिन्नोभिन्नः सुखी दुःखीत्यादयोपि भावा आत्मनि कल्पिता एवेत्याह । बन्धेति ॥ ४९ ॥

बन्धादीनामात्मनि कल्पितत्वे सदृष्टान्तहेतुमाह ।

(५०) नाहोरात्रे यथा सूर्ये प्रभारूपाविशेषतः ।
बोधरूपाविशेषान्न बोधाबोधौ तथात्मनि ॥ २४८ ॥

नाहोरात्रेइति । अबोधनिबन्धनो बन्धो बोधनिबन्धनो मोक्षस्तयोरभावे तत्तयोरभाव इत्यर्थः ॥ ५० ॥

उक्तेनोपायेनोक्तस्वरूपं ब्रह्म विजानतः फलमाह ।

(५१) यथोक्तं ब्रह्म यो वेद हानोपादानवर्ज्जितम् ।
यथोक्तेन विधानेन स सत्यं नैव जायते ॥ २४९ ॥

यथोक्तमिति । हानोपादानवर्ज्जितमिति हानोपादानकर्तृत्वं कर्मत्वं च व्यावर्त्यते । अनेन सर्वे एव विशेषाः प्रतिषिद्धा भवन्ति । परिग्रहपरित्यागात्मकत्वात्सर्वविशेषाणामित्यर्थः । यथोक्तविधानं पदार्थपरिशोधनप्रकारः स नैव जायतइति सत्यमिति संबन्धः । "न स भूयोभिजायत"इति स्मृतेरित्यर्थः ॥ ५१ ॥

यथोक्तब्रह्मवेदनेन विनापि यथोक्तफलसिद्धिः कृतं ज्ञानेनेत्याशङ्क्य "नान्यः पन्था विद्यते ऽयनाय" इत्यादिश्रुतिविरोधान्मैवमित्याह ।

(५२) जन्ममृत्युप्रवाहेषु पतितो नैव शक्नुयात् ।
इत उद्धर्तुमात्मानं ज्ञानादन्येन केन चित् ॥ २५० ॥

जन्मेति । इत एभ्यो जन्ममृत्युप्रवाहेभ्यः केन चित्साधनान्तरेण ॥ ५२ ॥

उक्तेर्थे ऽथर्वोपनिषद्वाक्यं प्रमाणयति ।

(५३) "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे" इति श्रुतेः ॥ २५१ ॥

भिद्यतइति ॥ ५३ ॥

प्रकरणार्थं संक्षिप्योपसंहरति ।

(५४) ममाहमित्येतदपोह्य सर्वतो
विमुक्तदेहं पदमम्बरोपमम् ।
सुदृष्टशास्त्रानुमितिभ्य ईरितं
विमुच्यतेस्मिन्यदि निश्चितो नरः ॥ २५२ ॥

॥ इति नान्यदन्यत्प्रकरणम् ॥

ममाहमिति । सर्वतः सर्वात्मना ममाहमित्येतत्सविषयमपोह्य त्यक्त्वा नरो मनुष्यो ऽस्मिन् यदि निश्चितो निश्चितमतिः स्यात्तदा स विमुच्यतइति योजना । अस्मिन्कस्मिन् विनिश्चित इति तदाह । विमुक्तदेहमिति । देहद्वयसंबन्धशून्यं प्रत्यक्तत्वं पदं च ब्रह्माम्बरोपमं निरतिशयं निष्प्रपञ्चमिति यावत्, कुत एवंविधं ब्रह्मात्मस्वरूपमित्यपेक्षायां श्रुतियुक्तिभ्यां निर्द्धारितत्वादत्रासंभावना नास्तीत्यभिप्रेत्य तद्विशिनष्टि । सुदृष्टेत्यादीरितमित्यन्तेन । यदेवंविधं सम्यग्विचारितशास्त्रानुमानेभ्यो ऽस्माभिरीरितमस्मिन्निति संबन्धः ।

इति नान्यदन्यत्प्रकरणं पञ्चदशं विवृतम् ॥ १५ ॥

## ॥ अथ बालभारतस्य ॥

॥ तृतीयोऽङ्कः ॥

पाराशरमकूपारमिव पुंरूपिणं स्तुमः ।
येनोद्गीर्णाः सुधासिक्तमुक्तावद्भारतोक्तयः ॥ १ ॥
इक्ष्वाकुकुलकोटीरः पुरा भूपो महाभिषः ।
पुण्यं निर्माय निर्माय निर्मायः स्वर्गितां गतः ॥ २ ॥
द्युसद्भिः सममन्येद्युः प्राप्तः पद्मभुवः सभाम् ।
त्रिमार्गामागतां तत्र मरुतापहृताम्बराम् ॥ ३ ॥
साकाङ्क्षं वीक्षमाणो न्यक्षुखेष्वनिमिषेष्वपि ।
ब्रह्मशापादवाप्यायमपायं च्यवनं दिवः ॥ ४ ॥
अहं प्रतीपभूपस्य भूयासं तनुभूरिति ।
चिन्तयन् स च्युतः स्वर्गात् सुमुदागर्भमासदत् ॥ ५ ॥
त्रिभिर्विशेषकम् ।
सोऽयं महाप्रभावोऽभूत् प्रतीपपृथिवीपतेः ।
शशिवंशसरोहंसः शंतनुर्[1]नाम नन्दनः ॥ ६ ॥
प्रतीपे शान्तताराण्ये श्रितारण्ये तपःस्पृशि ।
तनुतां शंतनुः क्ष्मापः शत्रुसंतानमानयत् ॥ ७ ॥
विना नाशेन जीवन्तः पुरतो यस्य पक्षिणाम् ।
अच्छुटन् नीतमर्माणामधमर्णा इव द्विषः ॥ ८ ॥
यस्याद्भुतप्रभावेन पाणिस्पर्शेन यौवनम् ।
जीर्णास्तूर्णमयन्ति स्म मधुनेव महीरुहाः ॥ ९ ॥
अष्टौ वशिष्ठकान्तारं कान्तारङ्गपराः पुरा ।
रन्तुं मेरुभुवि स्मेरवसवो वसवो ययुः ॥ १० ॥
तत्रावलोक्य गां स्पष्टमष्टमस्य वसोः प्रिया ।
स्माह माहात्म्यमेतस्यास्तथ्यं मे नाथ कथ्यताम् ॥ ११ ॥
गिरा मधुक्षिरावोचदथ द्युरष्टमो वसुः ।
वाशिष्ठी नन्दिनी विश्वानन्दिनी गौरि गौरियम् ॥ १२ ॥
पीत्वा प्रशस्यमौधस्यमस्या मानिनि मानवः ।
दश वर्षसहस्राणि यावज्जीवति निर्जरः ॥ १३ ॥
उशीनरोर्वीशसुतां स्वसखीमजिनावतीम् ।
पयः पाययितुं साथ गां भर्ता*रमहारयत्[2] ॥ १४ ॥
तामवीक्ष्य वने धेनुं ज्ञात्वा च ज्ञानतो मुनिः ।
वसन्तु गर्भवासेऽमी वसूनिति स शप्तवान् ॥ १५ ॥
अथ भक्तिभराभुग्नभाला भूवासभीरवः ।

---

१ यं यं कराभ्यां स्पृशति जीर्णं स सुखमश्नुते ।
पुनर्युवा च भवति तस्मात् तं शंतनुं विदुः ॥

इत्याकारकमहाभागवतमहाभारतगतपद्यद्वयकृतनिर्वचनदर्शनात् शंतनुरिति नाम सिध्यति, तथा ।

शान्तस्य जज्ञे संतानस्तस्मादासीत् स शान्तनुः ।

इति महाभारतगतपद्यान्तरकृतनिर्वचनदर्शनात् शान्तनुरित्यपि नाम सिद्धमिति ध्येयम् ।

२ गां भर्त्रा तामहारयत् इति पा० ।

* हृक्रोरन्यतरस्यामिति भर्तृशब्दाद् द्वितीया ।

अनीनमन्नमी दीनाः सापदः शापदं मुनिम् ॥ १६ ॥
तदोवाच मुदा वाचं वाचंयमशिरोमणिः ।
स्वच्छा गच्छत हे वत्साः प्रार्थयध्वं मरुद्वुनीम् ॥ १७ ॥
एषा यथा वधूवेषा नृपमाश्रित्य शंतनुम् ।
जातानेव स्वयं गङ्गा स्ववाहे वः प्रवाहयेत् ॥ १८ ॥
सुरोऽप्यसुरवल्लोभभासुरः सुरभिं मम ।
यो जहार विहारं स द्युश्चिरं सृजतु चितौ ॥ १९ ॥
अथ तैरर्थिता गङ्गा मृगीदृशमदीदृशत् ।
आत्मानमात्मनस्तीरे खेलतस्तस्य शंतनोः ॥ २० ॥
एकादशभिः कुलकम् ।
मान्मथैर्मथितो बाणैरथ तां रथिनां वरः ।
ययाचे पार्थिवोत्तंसः कंसशत्रुरिव श्रियम् ॥ २१ ॥
अहं कृत्यमकृत्यं वा निषिद्धा यदि तन्वती ।
तद्यास्यामीति निर्बन्धवती तेनेयमादृता ॥ २२ ॥
जातमात्रान् सुतान् शापैरवतीर्णान् क्रमाद्वसून् ।
गङ्गासौ सप्त गङ्गान्तः चिप्त्वा शापादमूमुचत् ॥ २३ ॥
तनुजं मनुजेन्द्रेण कष्टतः स्पष्टमष्टमम् ।
चिपन्ती वारिता वारि सपुत्रा स्वयमप्यगात् ॥ २४ ॥
तया विरहितो राजा निशयेव निशाकरः ।
म्लानिं संप्राप तापेन तेजसेव विवस्वतः ॥ २५ ॥
अपि स्त्री भ्रूणहत्याभिर्न शोषं याति जाह्नवी ।
कर्मसाक्षी न किं भानुरेनां शोषयते न यत् ॥ २६ ॥
बिभर्तु शिरसा शंभुरेनां भस्मास्थिभूषणः ।
त्रपा तव क्रमेणापि स्पृशतः पुरुषोत्तम ॥ २७ ॥
जलस्पर्शेन लोकानां पातकं याति दूरतः ।
अस्याः स्वयं कृतैः पापैर्द्रुतैरभितो जितम् ॥ २८ ॥
ईदृक्पापकृतां स्थानं नरकेऽपि न विद्यते ।
एतत्तटमृतं जन्तुं कालस्तद्वर्णेऽर्पयेत् ॥ २९ ॥
किमेषा न विशेषेण पातकस्तोमकारिणी ।
यमुनापि समुद्रोऽपि श्यामौ यदभिषङ्गतः ॥ ३० ॥
स दूषयन् नदीमेतामेतादृग्दुःखभागिति ।
सचिवैः शुचिवैदग्ध्यप्रतिभैरिति भाषितः ॥ ३१ ॥
मा पतः पातके वन्द्यां जाह्नवीमिति दूषयन् ।
स्वेच्छारोधेन यातासौ प्राच्यं तद्वचनं स्मर ॥ ३२ ॥
प्रतिबुध्येति शुद्धात्मा सचिवानां वचोभरैः ।
चमस्वेत्याशु संभाष्य[1] गङ्गां धाम जगाम सः ॥ ३३ ॥
कालेन विहरन्नेष रथी भागीरथीतटे ।
ददर्श दर्शनीयाङ्गमेकमेकः कुमारकम् ॥ ३४ ॥
मूर्तं दर्पं तु सर्पन्तं धीरं वीरं नु वा रसम् ।
तृणाय त्रिजगद्वीर्यं मन्यमानं दृशा भृशम् ॥ ३५ ॥
जितेन गौरवाद्व्योम्ना क्लिपचरितं चिरात् ।
ताडङ्कचन्द्रचण्डांशुहारमौक्तिकतारकैः ॥ ३६ ॥
कर्णान्ताकृष्टकोदण्डक्राङ्गुलिनखावलौ ।
प्रतिबिम्बिमुखं गङ्गासमीपे किल षण्मुखम् ॥ ३७ ॥
वेगादलक्ष्यसंधानकर्षमोचविधिं शरैः ।
पातालगामिभिः कर्णकुण्डो[2]त्थैर्भुजगैरिव ॥ ३८ ॥
एकान्ते वपुषा कान्तिम[3]भ्यस्यन्तमिति स्वयम् ।
सदर्पमिव कन्दर्पं विजयाय पिनाकिनः ॥ ३९ ॥
षड्भिरादिकुलकम् ।
चिन्तामथ चकारायं कारायन्त्रितशात्रवः ।
ईदृक्पुत्रैर्विना राज्ञां वृद्धानां दुर्धरा धरा ॥ ४० ॥
अपि बालोऽयमालोक्य पृथिवीपालमग्रतः ।
प्रविवेश द्रुतं गाङ्गे जलमानुषवज्जले ॥ ४१ ॥
किमेतदिति संभ्रान्तः सन्निहैव महीपतिः ।
नद्यामुद्यत् प्रियावक्त्रपद्मं दृक्षट्पदैः पपौ ॥ ४२ ॥
समं तेन कुमारेण निःससार नदी रयात् ।
बालासौ बालसूर्येण दिनश्रीरिव वारिधेः ॥ ४३ ॥
लब्धचिन्तामणिं दुःस्थं सद्यःप्राप्तामृतं मृतम् ।
जातपुत्रमपुत्रं तं दृष्ट्वा तुष्ट्या जिगाय सः ॥ ४४ ॥
अश्रुवेपथुरोमाञ्चस्वेदानभिनिनाय सा ।
अप्रेमापि नृपं प्रेक्ष्य नदी जलकणाञ्चिता ॥ ४५ ॥
आचचचे[4] मृगाचीयं प्रीतं प्रति निजं प्रियम् ।
मयासौ जननीपाल्याद्बाल्यादुत्तारितः सुतः ॥ ४६ ॥
शास्त्राणि गुरुशुक्राभ्यां शस्त्राणि भृगुसूनुना ।

१ संभाव्य इति पा० ।
२–कुण्डो–इति पा० ।
३–न्तिना–इति पा० ।
४ अथाचख्यौ इति पा० ।

साङ्गान् वेदान् वशिष्ठेन शिक्षितोऽयं तवात्मजः ॥ ४७ ॥
देवैः कृतव्रतः* इति श्रुतो देवव्रताख्यया ।
मयायं गङ्गया जातः ख्यातो गाङ्गेय इत्यपि ॥ ४८ ॥
असौ शास्त्रधनुर्वेदवेदज्ञो राजधर्मवित् ।
गृह्यतामग्र्यमः सूनुरित्युक्त्वान्तरधत्त सा ॥ ४९ ॥
गते दत्ताङ्गजे तत्र कलत्रे तोषदुःखभाक् ।
अभूद्भूयो द्वितीयेन्दुमुचि भानौ यथा जनः ॥ ५० ॥
रिपुकालेन बालेन सह साहसिनामुना ।
विरराज तदा राजा दिनेनेव दिनेश्वरः ॥ ५१ ॥
न्यस्य भारं भुवस्तस्य भुजे भूमीभुजां वरः ।
विष्णुः शेष इवाशेषमेष चिक्रीड केलिभिः ॥ ५२ ॥
पुरा वशी वसुर्नाम चेदिपो मृगयां गतः ।
वीर्यं मुमोच गिरिकां स्मरन्नृतुमतीं प्रियाम् ॥ ५३ ॥
श्येनः पत्रपुटीबद्धमेतद्रेतो नृपाज्ञया ।
गृहीत्वा गिरिकाहेतोरुत्पपात विहंगमः ॥ ५४ ॥
श्येनेनान्येन रुद्धस्य योद्धुं तस्य पलभ्रमात् ।
मुखतः पतिता रेतःपुटी सा यमुनाम्बुनि ॥ ५५ ॥
अद्रिकाख्या तिमीभूता पद्मभूशापतोऽप्सराः† ।
तदेत्य दूरतो रेतः पपौ पुट्याः परिच्युतम् ॥ ५६ ॥
तिमिस्त्री सान्यदा दाशैर्जालेनाकृष्य दारिता ।
तैः प्रापि तत्र तद्बीजभवं पुंस्त्रीशिशुद्वयम् ॥ ५७ ॥
शापान्मुक्ताथ सा मत्सी देवीभूय दिवं ययौ ।
अदर्शि वसुभूपाय दाशैस्तन्मिथुनं ततः ॥ ५८ ॥
नृपोऽग्रहीत् सुतं योऽभून्मत्स्याह्वो मत्स्यदेशकृत्[१] ।
दाशेन्द्रायार्पयद्भागे मत्स्यगन्धां सुतां पुनः ॥ ५९ ॥
नाम्नासौ गन्धकालीति श्रुता सत्यवतीति सा ।
कलयामास कन्दर्पोज्जीवनं यौवनं शनैः ॥ ६० ॥
तीर्थयात्राचरोऽन्येद्युः कालिन्द्याः पुलिने मुनिः ।
पराशराभिधोऽभ्यायाद्बहुभिर्मुनिभिर्वृतः ॥ ६१ ॥
नावोत्तार्य ऋषीनन्यान् खिन्ने स्वपितरि स्थिते ।
एकं पराशरं सत्यवत्युत्तारयितुं ततः ॥ ६२ ॥
एका प्रववृते नावं वाहयन्ती नदीजले ।
तां तत्रेक्ष्य स्मरार्तोऽभून्मुनिर्भाव्यर्थभावतः ॥ ६३ ॥
युग्मम् ।
स्तनस्तबकिनी पाणिपदपल्लविनी मुनेः ।
वेणिस्फुरदलिश्रेणी मोहवल्लीव साभवत् ॥ ६४ ॥
तीरस्थिता निरीक्षन्ते मुनिपित्रादयः प्रभो ।
आवयोः सङ्गमित्युक्ते व्यक्तमर्थितया तया ॥ ६५ ॥
विधाय धूमरीं दिक्षु मुनिस्तां नावि सोऽभजत् ।
मत्स्यगन्धामपि सृजन् योजनोत्पलगन्धिकाम् ॥ ६६ ॥
युग्मम् ।
सद्योऽप्यसूत सा कृष्णं वेदविद्यायुतं सुतम् ।
यमुनाद्वीपजातत्वाज्जातद्वैपायनाभिधम् ॥ ६७ ॥
विपदि स्मरणीयोऽहमित्युक्त्वा जननीमसौ ।
कृती बालोऽपि तत्कालं तपसे विपिनं ययौ ॥ ६८ ॥
जातपुत्रापि कन्याभूत् प्रसादात् सा मुने पुनः ।
अचिन्त्यो हि प्रभावः स्यात् तपःपात्रस्य मन्त्रवत् ॥ ६९ ॥
पुत्रिणीमपि तां कन्यां सोऽन्येद्युः शंतनुर्नृपः ।
निरूप्य दासवाटेषु दासराजमयाचत ॥ ७० ॥
अथोचे दासभूपस्तं ददे तुभ्यमिमां ततः ।
यदि स्यान्नृप जातोऽस्यां तनयस्तव राज्यभाक् ॥ ७१ ॥
राजापि राज्यधौरेयं ध्यात्वा देवव्रतं सुतम् ।
तस्य वाक्यमनादृत्य व्यावृत्य स्वपुरं ययौ ॥ ७२ ॥
नृपः सदर्पकन्दर्पशरैर्विधुरितस्ततः ।
स्मरन् सत्यवतीं स्वान्ते न निद्रामपि भेजिवान् ॥ ७३ ॥
ततो मन्त्रिगिरा मत्वा तद्वृत्तं तटिनीजनिः ।
जनकाय ययाचे तां कन्यां धन्याशयः स्वयम् ॥ ७४ ॥
अथैनं यमुनाकूलवासी दासेश्वरोऽवदत् ।
कथं स्यान्मम दौहित्रो राजा राज्यधरे त्वयि ॥ ७५ ॥
सेवे नृपश्रियं नैव सत्योऽयं समयो मम ।
इति सत्यव्रतेनोक्ते पुनर्दासपतिर्जगौ ॥ ७६ ॥
कथंचित् पितृभक्त्या त्वं भविता न प्रियः श्रियः ।
क्रुद्धास्तु केन रुध्यन्ते गजा इव तवाङ्गजाः ॥ ७७ ॥
ततः शांतनवः स्माह रहसी दासवासवम् ।

* कृतव्रतः कृतव्रतबन्धः ।

† स्त्रियां बहुष्वप्सरसः स्यादेकत्वेऽप्सरा अपीति शब्दार्णवादेकवचनान्तत्वमपीति बोध्यम् ।

१–राट् इति पा० ।

आजन्मापि समाचर्यं ब्रह्मचर्यं मया व्रतम् ॥ ७८ ॥
इत्युक्ते तेन गगनाद्गीर्वाणाः पुष्पवर्षिणः ।
अहो भीष्मप्रतिज्ञोऽयमिति भीष्ममम्मुं जगुः ॥ ७९ ॥
तत् तां दासपतिः प्रत्तां स नृपाय मुदार्पयत् ।
भीष्मः पित्राप्ययं स्वेच्छाहूतमृत्युवरः कृतः ॥ ८० ॥
उदूढया तया राजा रराज गुणनद्धया ।
सदा हृदयवर्तिन्या पङ्कजिन्येव पल्वलः ॥ ८१ ॥
सेवमानः स तां क्ष्मापः क्रमात् पुत्रावजीजनत् ।
तपःश्रियं श्रयन् साधुर्यशोधर्माविवोज्ज्वलौ ॥ ८२ ॥
आद्यश्चित्राङ्गदोऽन्यस्तु विचित्रवीर्य इत्यपि ।
स गाङ्गेयेन ताभ्यां च राजाप्यासीत् त्रयीतनुः ॥ ८३ ॥
भूपे रूपेण साफल्यं सृजत्यनिमिषीदृशाम् ।
अभूच्चित्राङ्गदो भीष्माभिषिक्तो रिपुभीषणः ॥ ८४ ॥
येन निर्वापितस्तीव्रैः प्रतापै रिपुसागरः ।
अपार इव संसारस्तपोभारैस्तपस्विना ॥ ८५ ॥
चित्राङ्गदो मदोत्सेकाद्भीष्ममन्त्रावमानकृत् ।
चक्रे चित्राङ्गदाख्येन गन्धर्वेण महारणम् ॥ ८६ ॥
नामसाम्यक्रुधेनाथ गन्धर्वेण स मायया ।
हतो हिरण्मयीतीरे वीरो वर्षत्रयीयुधा ॥ ८७ ॥
अथ भागीरथीसूनुश्चक्रे भूचक्रभूषणम् ।
विचित्रवीर्यनामानं शत्रुशाखिद्विपं नृपम् ॥ ८८ ॥
आज्ञा यस्य महीभर्तुः कीर्तिश्च स्पर्धया मिथः ।
आरुरोह शिरोदेशमशेषपृथिवीभृताम् ॥ ८९ ॥
ततो विचित्रवीर्याय तिस्रः सत्यव्रतोऽहरत् ।
अम्बाम्बालाम्बिका बालाः काशिराजस्वयंवरात् ॥ ९० ॥
अथ धन्वानि धुन्वाना लोलाः कोलाहलोद्धुराः ।
स्वयंवरनृपा वव्रुः प्रधनाय धुनीजनिम् ॥ ९१ ॥
नक्षत्राणीव तीव्रांशुर्भित्त्वा क्षत्राणि सिन्धुजः ।
राजानमिव राजानं शाल्वं कोपी लुलोप सः ॥ ९२ ॥
इत्यादित्यायमानौजा रथी त्रिपथगात्मजः ।
अवधूय वधूलुब्धानाजगाम स्ववेश्मनि ॥ ९३ ॥
चित्ते चित्तेश्वरः शाल्वो मां पीडयति शल्यवत् ।
अम्बाभिधा वदन्तीदं प्रैषि शंतनुसूनुना ॥ ९४ ॥
द्वे कन्ये तदसौ धन्ये मदवानुदवाहयत् ।
विचित्रवीर्यभूता चित्तभुवा प्रीतिरती इव ॥ ९५ ॥
प्राणद्यूते पणीभूता हारिता भवती मया ।
अङ्गीकरोमि नेति त्वां जेतारं भज भामिनि ॥ ९६ ॥
इत्थमम्बापि शाल्वेन न्यक्कृता धिक्कृताग्रया ।
पुनर्धुनीसुतं प्राप स्वस्रसापत्न्यकाङ्क्षया ॥ ९७ ॥
युग्मम् ।
आसक्तापि कुरङ्गाक्षी शङ्कनीया विचक्षणैः ।
अन्यासक्ता न वक्तव्या भीष्मेणेति न्यकारि सा ॥ ९८ ॥
नाग्रतश्च न पश्चाच्च संदिग्धा दग्धधीरगात् ।
तदाम्बा चटिकाचञ्चुचरिष्णुवदरोपमा ॥ ९९ ॥
दैवादुभयतो भ्रष्टा कष्टाद्गत्वा वनं मुनीन् ।
तं निवेद्य स्ववृत्तान्तं प्रव्रज्यां याचते स्म सा ॥ १०० ॥
होत्रवाहननामात्र तस्या मातामहः स्थितः ।
राजर्षिस्तत्कथां श्रुत्वा तां जगाद विषादभाक् ॥ १ ॥
पर्शुरामं महेन्द्राद्रौ पुत्रि त्वं शरणं श्रय ।
शिष्यस्तस्य गिरा स त्वां गाङ्गेयः स्वीकरिष्यति ॥ २ ॥
तस्मिन्निदं वदत्येव रामशिष्योऽकृतव्रणः ।
तत्र स्वेच्छागतो ज्ञातकन्यावृत्तोऽब्रवीदिति ॥ ३ ॥
एतत् तपोवनं प्रातः स्वयं रामः समेष्यति ।
इत्युक्ते तेन रामोत्का कन्या तस्थौ तथैव सा ॥ ४ ॥
स्वयं प्रातः समायातमथ तं मुनिपूजितम् ।
नृपात्मजा कृपारामं सा रामं शरणं ययौ ॥ ५ ॥
श्रुत्वाथ तत्कथां रामो रामां तामिदमब्रवीत् ।
शिष्यो भीष्मः शुभे न त्वां निराकर्ता गिरा मम ॥ ६ ॥
त्वत्कामसिद्धये यामः कौरवं क्षेत्रमित्यसौ ।
गदित्वा तां सहादाय कुरुक्षेत्राय चेलिवान् ॥ ७ ॥
प्राप्तो गुरुः कुरुक्षेत्रं रामो भीष्मेण पूजितः ।
जल्पन्नम्बाविवाहाय निराकारि गिरां भरैः ॥ ८ ॥
रामो रथमथारूढः क्रोधनः प्रधनेच्छया ।
गुरुरप्याततायीति संनद्धः सिन्धुभूरपि ॥ ९ ॥

---

१—रूपे इति पा० ।

२ हिरण्मती—इति पा० ।

३ धनुरर्थको धन्वशब्दोऽपि बोद्धव्यः ।

क्षत्रान्तकेन रामेण समरं पुत्र मा कृथा: ।
इत्येवं गङ्गयाप्युक्तो भीष्मो नैाज्झद्गुर्वायुधम् ॥ १० ॥
क्षोभयन्तौ भिया लोकं लोभयन्तौ च नारदम् ।
शोभयन्तौ दिवं बाणैर्युयुधाते क्रुधाथ तौ ॥ ११ ॥
जाह्नव्या वसुभिर्विप्राकारै रामास्त्रमूर्च्छितः ।
आश्वासितो धृतोत्साहश्चक्रे भीष्मो मुहुर्युधम् ॥ १२ ॥
युद्धं कृत्वाद्भुतं क्रुद्धौ त्रयोविंशतिवासरान् ।
तौ ब्रह्मास्त्रमहोदग्रौ[1] वारितौ त्वातुरैः सुरैः ॥ १३ ॥
रामेऽपि निष्फलीभूते पराभूतेति कन्यका ।
धुनीसूनुवधध्याना तपस्तप्तुं वने ययौ ॥ १४ ॥
इयमासाद्य कालिन्दीमिन्दीवरविलोचना ।
तेपे द्वादश वर्षाणि सामर्षा दुस्तपं तपः ॥ १५ ॥
जन्मान्तरे त्वदिच्छेयं फलतादिति भाषिणि ।
पुरो भूत्वा तिरोभूते भूतेशे साग्निमाविशत् ॥ १६ ॥
प्राक् पुत्री सैव पुत्रोऽस्तु तवेति वरदे हरे ।
सा पुत्रार्थोग्रतपसो द्रुपदस्य सुताभवत् ॥ १७ ॥
पित्रा पुत्रोऽयमित्येषा ख्यापिता नरवेषभाक् ।
हिरण्यवर्मणः पुत्रीं दशार्णेन्दोर्व्यवाहयत् ॥ १८ ॥
मत्वा कालेन तत्कूटं विग्रहोग्रे दशार्णपे ।
पित्रोर्दुःखितयोरगात् सारण्यं मरणेच्छया ॥ १९ ॥
क्लिश्यन्त्यै मर्तुमेतस्यै विग्रहोपशमावधि ।
स्थूणस्तदटवीयक्षः स्वं पुंस्त्वं दयया ददौ ॥ २० ॥
गत्वाथ ज्ञापयामास तद्वृत्तं पितरावसौ ।
ततो हिरण्यवर्मापि ययौ संहृत्य विग्रहम् ॥ २१ ॥
स्त्रीवेषं[2] तु स्वयं तस्य बिभ्रत् प्रासादगर्भगः ।
श्रीदेऽप्यभ्यागते नाभ्युत्थानं स्थूणो ह्रियाकरोत् ॥ २२ ॥
त्वं स्त्री सा तु पुमानेव यावज्जीवं[3] धनाधिप: ।
तस्य रूपपरिज्ञातकोपोत्तापः शशाप तम् ॥ २३ ॥
इत्यादातुं न यक्षोऽभूत् क्षमः पुंस्त्वं तथार्पितम् ।
शिखण्ड्याख्योऽभवद्भीष्मभिदे सा द्रौपदिस्ततः ॥ २४ ॥
इतश्चारिच्छिदाभीष्मे भीष्मे भीष्मार्कतेजसि ।
प्रियाभ्यां सममक्रीडद्विचित्रनृपतिः सुखम् ॥ २५ ॥
अतिस्त्रीसंगतो राजा पीडितो राजयक्ष्मणा ।
द्रष्टुं रम्भादिरम्भोरूरिव कामी दिवं ययौ ॥ २६ ॥
सचिवैः सत्यवत्या च बोधितोऽथ धुनीसुतः ।
प्रतिज्ञाभङ्गभीर्भेजे न भुवं न च सुभ्रुवम् ॥ २७ ॥
बन्धूनां वा द्विजानां वा वीर्याद्वृद्धियते कुलम् ।
इति श्रुतिगिरा भीष्मः सत्यवत्या न्यवेदयत् ॥ २८ ॥
द्विजं निजसुतं व्यासं तत्र निश्चित्य कर्मणि ।
स्मृती यदा हृदा दध्यौ स तदैवाभवत् पुरः ॥ २९ ॥
स मातुरातुरैर्वाक्यैरपि भीष्मस्य भाषितैः ।
शीलमाधुर्यधुर्योऽपि तत् कर्म प्रतिपन्नवान् ॥ ३० ॥
राज्ञीं विचित्रवीर्यस्य भेजिवानम्बिकामथ ।
एष दुर्वेषभाक् शूकसंकोचितविलोचनाम् ॥ ३१ ॥
अन्धः सुतोऽस्या भावीति जल्पन् मातृगिरा पुनः ।
व्यासोऽम्बालां द्वितीयां स्त्रीं शूकपाण्डुमथाभजत् ॥ ३२ ॥
अस्याः पाण्डुः सुतो भावीत्याख्यन्मातुः पुरो मुनिः ।
ततोऽन्धं धृतराष्ट्राख्यं सुषुवे सुतमम्बिका ॥ ३३ ॥
अम्बालाप्यङ्गजं पाण्डुपिण्डं पाण्डुमजीजनत् ।
अम्बिकाभावभोगार्थं पुनर्मात्रार्थितो मुनिः ॥ ३४ ॥
सोऽम्बिकाशूकसंदिष्टां हृष्टां शूद्रीमथाभ्यगात् ।
साप्यसूत सुतं धर्मविदुरं विदुराभिधम् ॥ ३५ ॥
अणीमाण्डव्यशापेन धर्मोऽयं शूद्रतां श्रितः ।
विदुरो धर्मविद्धीमान् भावीत्युक्त्वागमन्मुनिः ॥ ३६ ॥
धृतराष्ट्रो धियां धाम नागायुतबलोऽजनि ।
समस्तशास्त्रसंदोहविदुरो विदुरोऽप्यभूत् ॥ ३७ ॥
पुनर्द्विषियशोऽम्भोधिशोषकुम्भोद्भवोऽभवत् ।
इलाविलासिनीजानिः पाण्डुरुद्दण्डचण्डिमा ॥ ३८ ॥
यशःसुधाकरो यस्य वचसां कस्य गोचरे ।
ब्रह्मणोऽपि निशा येन नूनं ज्योत्स्नी * भविष्यति ॥ ३९ ॥
उदूढा धृतराष्ट्रेण गान्धारी सुबलाङ्गजा ।
उग्राराधनलब्धोग्रशतपुत्रवरा वरा ॥ ४० ॥
विष्णोः पितामहः शूरः पितृष्वस्रेयबन्धवे ।
प्राक् पुत्रीं कुन्तिभोजाय धर्मपुत्रीमदात् पृथाम् ॥ ४१ ॥

१-धृतोत्साहो इति पा० ।
२-चिह्नं इति पा० ।
३-न यावज्जीवतीति इति पा० ।

* रात्रिर्ज्योत्स्नी चन्द्रिकयान्विता इत्यमरः ।

भोज्यादिभक्तितुष्टेन तस्यै दुर्वाससान्यदा ।
मन्त्रो ददे मुदाहूतदेवसंपर्कपुत्त्रदः ॥ ४२ ॥
अथाहूय रविं मन्त्रप्रत्ययाय कुमारिका ।
नन्दनं तत्प्रसादेनासूत कन्यैव चाभवत् ॥ ४३ ॥
बालं सहोत्थताडङ्कवज्रसंनाहमक्षिपत् ।
सा तं बन्धुह्रिया पेटान्यस्तमाशु नदीजले ॥ ४४ ॥
चरित्रमखण्डचीर्णमित्यसौ बिभ्रती शुभम् ।
कन्या पाण्डुनरेन्द्रेण पर्यणायि स्वयंवरे ॥ ४५ ॥
पञ्चभिः कुलकम् ।
परां पर्यणयन्माद्रीमद्रीश इव मेनकाम् ।
पाण्डुभूपः स्फुरद्रूपसंपदा विश्वविश्रुताम् ॥ ४६ ॥
द्युतिं दधार धाराभ्यामिवासिर्भूमिवासवः ।
ताभ्यां लक्ष्मीनटीनित्यनृत्यरङ्गेण रङ्गितः ॥ ४७ ॥
विदुरो देवकक्ष्मापसुतां पारशवीं श्रुताम्
परिणीय परप्रेमा सुषुवे शतशः सुतान् ॥ ४८ ॥
एकदानेकदावाग्निप्रतापः पाण्डुभूपतिः ।
आखेटकविधानाय सुभटान् समनीनहत् ॥ ४९ ॥
वाताभयानलीलेषु नीलेषु ययुषु* स्थिताः ।
नीलीचीरधरा वव्रुर्धराधीशं धनुर्धराः ॥ ५० ॥
पापर्द्धिवर्धितोत्साहाश्चेलुर्मेचकरोचिषः ।
अशुभध्यानसंजातपातकैरिव वेष्टिताः ॥ ५१ ॥
तेषां ह्रेषां विशेषेण हयानामुपकर्णयन् ।
अभूद्वनावनीजीवकुलं सकलमाकुलम् ॥ ५२ ॥
केऽपि त्रस्ता भयग्रस्ताः क्रुद्धा युद्धाश्च केचन ।
वनेचरा हरीणां तु न भियो न रुषोऽभवन् ॥ ५३ ॥
विभिन्नयुग्यवाहेन वराहेण सहापरः ।
पातदूरगलद्भल्लो नययुद्धं रदैर्व्यधात् ॥ ५४ ॥
मुखे प्रविश्य सिंहस्य प्राणत्यागेन कश्चन ।
गृह्णन् प्राणांश्च कीर्तिं च लाभव्यवहृतिं व्यधात् ॥ ५५ ॥
सिंहं क्रोधितमायान्तं कश्चिदोष्ठपुटीधृतम् ।
शुद्धमूर्ध्वशरीरेण चक्रे खण्डद्वयं रयात् ॥ ५६ ॥
वञ्चयन् पञ्चवक्त्रस्य वक्त्रमन्यो महाबलः ।
प्रौढः पृष्ठं समारूढो गौरीकृतगुणोऽभवत् ॥ ५७ ॥

* ययुः पुमानश्वमेधतुरगे च तुरंगमे इति मेदिनी ।

सह सिंहेन संग्रामं कुर्वन् कोऽपि महाभटः[1] ।
मध्यं पस्पर्श तस्यैव संकल्पान्निजसुभ्रुवः ॥ ५८ ॥
कलया कलयामास मध्ये वध्यं हरिं परः ।
मुष्ट्या तथा यथा ग्रावनिष्पन्न इव सोऽभवत् ॥ ५९ ॥
चपेटापाटनक्रूरं दूरं शूरः परो हरिम् ।
चण्डदोर्दण्डघातेन घूर्णिताक्षमलूलुठत् ॥ ६० ॥
नृसिंहेषु तथा सिंहसंघातपरिघातिषु ।
शङ्के स्वर्सिंहरक्षायै कैलाशं शैलजा ययौ ॥ ६१ ॥
तदाभवद्बलाभोगभयभङ्गुरचेतसाम् ।
नश्यतां सह सारङ्गैर्मृगेन्द्राणां मृगेन्द्रता ॥ ६२ ॥
आश्चर्यं तत्र शार्दूलविक्रीडितमहो महत् ।
सेनाभिर्यदिदं बाणस्रग्धराभिरधः कृतम् ॥ ६३ ॥
चन्द्रपातालचण्डीषु बीजं निक्षिप्य रक्षितम् ।
मृगकोलमृगेन्द्राणां धात्रा तत्र क्षयक्षणे ॥ ६४ ॥
रत्नैः कुम्भिशिरोयुक्तमुक्तैरुपरि दोष्मताम् ।
पुष्पवृष्टिरभूत् खड्गोत्क्षिप्तसिंहोदरच्युतैः ॥ ६५ ॥
बूत्कारैश्च मृगेन्द्राणां हुंकारैश्च भुजाभृताम्* ।
शङ्के भयं भयस्यापि तत्र प्रविशतोऽभवत् ॥ ६६ ॥
वीरभारनमद्भूमिभुग्नशेषग्रहाकुलः ।
तदा पाताललोकोऽपि धनुर्धर इवाबभौ ॥ ६७ ॥
कुम्भिकुम्भमणीनुप्त्वा सिंहैः कृषिरकारि या ।
असिलावैर्भटा भूरि जगृहुस्तद्यशःफलम् ॥ ६८ ॥
कम्पितः शङ्कया शङ्के सोऽपि पातालशूकरः ।
तत्र व्यतिकरे धात्री चकम्पे कथमन्यथा ॥ ६९ ॥
मृगेन्द्रघातिनां मूर्ध्नि निपेतुः पुष्पवृष्टयः ।
त्रस्यन्मृगधृतौ खिद्यमानेन्दुस्वेदबिन्दुवत् ॥ ७० ॥
इति निर्जित्य गर्जन्तो निर्ययुस्ते भुजाभृतः ।
समदा मेदिनीनाथं मोदयन्तो मिथः स्तवैः ॥ ७१ ॥
मृगो जीवन्नपि मृगः सिंहः सिंहो मृतोऽपि सन् ।
नासन्नोऽपि स तस्य स्यात् परासोर्विरते रणे ॥ ७२ ॥
इति कौतुककेलीभिर्वितीर्णव्यसनो नृपः ।
नाभवत् तद्दिनं यत्र न पापर्द्धिविधिं व्यधात् ॥ ७३ ॥

१–बलः इति पा० ।

* भुजाशब्दो दीर्घान्तोऽप्यस्ति ।

अन्यदा किंदमो नाम वने स्त्रीं रमयन्मुनिः ।
ह्रीवशान्मृगरूपस्थः पाण्डुना पीडितः शरैः ॥ ७४ ॥
मृत्युस्ते स्त्रीरसादेवं दत्तेन मुनिनामुना ।
दृष्टपापेन शापेन क्ष्मापस्तापमवाप सः ॥ ७५ ॥
प्रियाद्वयान्वितो भीष्मे भारं न्यस्य ततो नृपः ।
अनुशायी वनं प्राप हिमाद्रेर्गन्धमादनम् ॥ ७६ ॥
तत्र संतोषपीयूषसिक्तस्वान्तस्तपश्चरन् ।
सोऽस्थान्महर्षिसाहाय्यैः शतशृङ्गाह्वये गिरौ ॥ ७७ ॥
कुन्ती पाण्डूपरोधेन दुर्वासोदत्तमन्त्रतः ।
निर्मला धर्ममाहूय तत्रासूत सुतं सती ॥ ७८ ॥
धर्मोऽयं मूर्तिमान् भावी नृपो नाम्ना युधिष्ठिरः ।
इत्यवोचत् तदा तस्मिन् संजातेऽम्बरभारती ॥ ७९ ॥
ईदृङ्निशम्य तज्जन्म गान्धारी विधुरध्वनिः ।
गर्भादपातयद्घातैरपूर्णां पुत्रपेशिकाम् ॥ ८० ॥
व्यासादेशात् ततो राज्ञी सुतामेकां शतं सुतान् ।
सूक्ष्मान् पेशीसमुद्भूतान्[1] घृतकुम्भेष्वजीवयत् ॥ ८१ ॥
इतः कुन्त्या पुनर्मन्त्रसंहूतान्मरुतस्ततः ।
भीमः सहजभीमश्रीरजायत गजायतः ॥ ८२ ॥
भ्रातृभक्तो बली शूरो दूरमेष भविष्यति ।
इत्यस्मिन् जातमात्रेऽपि चचार व्योमभारती ॥ ८३ ॥
सोऽन्यदा व्याघ्रभीतायाः क्रोडान्मातुः पपात च ।
चूर्णीचकार च शिलाः ख्यातो भीमाख्यया ततः ॥ ८४ ॥
जातोऽयं तनयो यस्मिन्नह्नि वह्निमहा महान् ।
तस्मिन्नजनि पूर्णाङ्गो गान्धार्याः प्रथमोऽङ्गजः ॥ ८५ ॥
सम्यङ्मन्त्रसमाहूतात् पुरुहूतादथो पृथा ।
तीव्रपाण्डुतपस्तुष्टादसूत सुतमर्जुनम् ॥ ८६ ॥
बालस्यास्य मुखं वीक्ष्य निजवल्लभविभ्रमात् ।
प्रापुस्तदा दिवस्ताराः पुष्पवृष्टिच्छलादिलाम् ॥ ८७ ॥
तेजसा तस्य बालस्य जिता इव दिवौकसः ।
तदाजग्मुर्महेन्द्राद्याः परितः स्फुरितोत्सवाः ॥ ८८ ॥
जयी नयी बली बालो रिपुजम्बालभास्करः ।
भविष्यत्ययमित्यासीत् तदा गगनभारती ॥ ८९ ॥
स्पर्धया वर्धयित्वामुं प्रमदोद्भासुराः सुराः ।
सद्योऽपि दिवमुत्पेतुः पातोत्पातितडित्त्वराः ॥ ९० ॥
माद्री चाहूय नासत्यौ पृथाप्रथितमन्त्रतः ।
नकुलं सहदेवं च सुषुवे विश्रुतौ सुतौ ॥ ९१ ॥
द्विषद्यमौ यमौ सत्त्वोपेतावेतावतिद्युती ।
भविष्यतः सुतौ सत्यं तदाभूदिति दिव्यगीः ॥ ९२ ॥
स्फुरिता मूर्तिमन्तोऽमी खेलन्तो गन्धमादने ।
पञ्चाग्नय इव व्यक्तास्तपसेव तपस्विनाम् ॥ ९३ ॥
अथैकदा मदाविष्टो वसन्ते पाण्डुपार्थिवः ।
उपांशु कामयन् माद्रीं प्राप शापफलं मुनेः ॥ ९४ ॥
प्रियमन्वेम्यहं त्वं तु पञ्चैतान् पालयात्मजान् ।
इत्युक्तिकलितां कुन्तीं ततो माद्रीत्यभाषत ॥ ९५ ॥
अतृप्त इव कामानां मन्मुखे निहितेक्षणः ।
प्रियः प्राप्तो दिवं तन्मां विना तस्य कुतः सुखम् ॥ ९६ ॥
प्राणेशमनुयास्यामि तदहं विरहासहा ।
पालनीयाविमौ किंतु सुतौ स्वसुतवत् त्वया ॥ ९७ ॥
इत्युक्त्वा साविशन्माद्री परलोकस्पृशि प्रिये ।
वह्निं जगत्त्रयीनेत्रे रवाविव जवाच्छविः ॥ ९८ ॥
ते ततः शतशृङ्गाद्रितापसास्तापदापदम्[1] ।
त्रयोदशेऽह्नि भीष्माग्रे निन्युः कुन्तीं सुतान्विताम् ॥ ९९ ॥
विज्ञातपाण्डुवृत्तान्तः प्रवृत्तान्तःशुचातुरः ।
भीष्मो जनैः सहाक्रन्दशब्दाद्वैतमवर्तयत् ॥ १०० ॥
दृग्भिरश्रुच्छलादादौ चक्षुष्याय जलं ददौ ।
तस्मै स्पर्शैकयोग्याय कुटुम्बस्य करैस्ततः ॥ १ ॥
प्रथिते प्रेतकार्येऽथ तस्य सत्यवती तदा ।
सवधूका तपो भेजे व्यासोक्ते दुःखमागमे ॥ २ ॥
अन्धस्य धृतराष्ट्रस्य पुत्रान् पाण्डोर्मृतस्य च ।
शतं च पञ्च चाभेदाद्धुनीसूनुरवीवृधत् ॥ ३ ॥
प्राक् तपस्तप्यमानस्य तपोराशेः शरद्वतः ।
जानपद्यप्सरोदर्शाद्वीर्यमस्त्रं च विच्युतम् ॥ ४ ॥
गतेऽन्यतो मुनौ तत्र प्राप शंतनुपार्थिवः ।
पुंस्त्रीशिशू शरद्द्वेधाभूततद्वीर्यसंभवौ ॥ ५ ॥
कृपः कृपीति तौ ख्यातौ कृपया वर्धिताविति ।
धनुर्वेद्यां कृपोऽशिक्षि नित्यमेत्य शरद्वता ॥ ६ ॥

१—पृथग्भूतान् इति पा० ।

१ शतशृङ्गतपोराशेस्तापसास्तापशालिनीम् इति पा० ।

चापविद्याविदग्धस्य कृपस्येति धुनीसुतः ।
अभ्यासाय सुतानेतानर्पयामास दुःसहान् ॥ ७ ॥

चतुर्भिः कालापकम् ।

आस्फालयन्मिथो मौलौ वृक्षाद्रूढानपातयत् ।
पादे धृत्वा मुदाकर्षद् भीमः क्रीडासु कौरवान् ॥ ८ ॥
गङ्गातटेऽन्यदा क्रीडागृहं तैः कौरवैः कृतम् ।
हन्तुं छलवशाद्भीममतिभीमविरोधतः ॥ ६ ॥
भीमो भोज्ये विषं दत्तं तैः शंभुरिव जीर्णवान् ।
सुप्तः क्षिप्तो लताबद्धः सिन्धोस्तल्पादिवोत्थितः ॥१०॥
सुप्तः प्रमाणकोट्याख्ये भागीरथ्यास्तटे पुनः ।
कुरुसारथिना सर्पैरदश्यत वृकोदरः ॥ ११ ॥
प्रतिबुद्धस्ततः क्रुद्धः सर्पान् दर्पाद्वृकोदरः ।
क्रीडयापीडयच्चण्डसारः सारथिमप्यहन् ॥ १२ ॥
इति हन्तुमशक्येऽस्मिंश्छलादपि बलादपि ।
अन्तःस्खलितशल्याभे लेभे दुःखं सुयोधनः ॥ १३ ॥
इत्थं परस्परामर्षादुत्कर्षेण वितेनिरे ।
शस्त्राभ्यासं कृपाभ्यासे वीराः पञ्च शतं च ते ॥ १४ ॥
भरद्वाजमुनिर्बीजं घृताचीदर्शनच्युतम् ।
द्रोणान्तर्निदधे द्रोणस्तेन सूनुः पुराभवत् ॥ १५ ॥
अवेदयं स्वयं वेदवेदाङ्गानि पितुः पठन् ।
शिवप्रत्तं भरद्वाजादस्त्रं चाशेषमग्रहीत् ॥ १६ ॥
कृपीं कृपस्वसारं स व्युवाह तदिहाभवत् ।
उच्चैःश्रवा इव नदन्नश्वत्थामेति नन्दनः ॥ १७ ॥
भारद्वाजोऽथ वितार्थी स भार्गवममार्गयत् ।
निःस्वेनास्मै धनुर्वेदः सरहस्योऽमुना ददे ॥ १८ ॥
द्रुपदन्यक्कृतेनाथ नगरे नागसाह्वये ।
वितन्वता महस्तेन सहस्तेनाश्रितः कृपः ॥ १६ ॥
अविज्ञातः कृपेणासौ कुमारेभ्योऽन्तरान्तरा ।
नित्यं ददौ धनुर्विद्यामनवद्यां विदां वरः ॥ २० ॥
कूपेऽन्यदा कुमाराणां क्रीडतां कन्दुकश्च्युतः ।
ऐषीकैरन्वनुक्षेपविद्धैराकर्षि तेन सः ॥ २१ ॥
कलामिति परिज्ञाय द्रोणाय तटिनीसुतः ।
तनयानर्पयामास धनुरभ्यासहेतवे ॥ २२ ॥

अष्टभिः कुलकम् ।

नद्यां यः प्रापि सूतेन राधया पालितो मुदा ।
कुन्तीसूनुः स कानीनः कर्णोऽभ्यासमिह व्यधात् ॥ २३ ॥
अभ्यास्यदिह वैश्याभूर्युयुत्सुर्धृतराष्ट्रजः ।
भूरयोऽन्येऽपि भूपालाश्चक्रुर्वैदेशिकाः श्रमम् ॥ २४ ॥
एकस्तेषु बभौ कर्णो नक्षत्रेष्विव चन्द्रमाः ।
अपि तस्मादशेभिष्ट दीप्त्या रविरिवार्जुनः ॥ २५ ॥
चिन्तयन् कवलं ध्वान्तेऽप्यभ्यासाद्वक्त्रगं नरः ।
अभ्यस्यन् नक्तमप्यासीच्छब्दवेधी गुरुप्रियः ॥ २६ ॥
अर्जुनं च स्वपुत्रं च स्वविद्याभारधारणे ।
वामदक्षिणधौरेयौ मेनेऽसौ मनसा गुरुः ॥ २७ ॥
भीमोऽभवद्गदायुद्धे धुर्यो दुर्योधनस्तथा ।
कृपाणे नकुलोऽश्वेषु सहदेवयुधिष्ठिरौ ॥ २८ ॥
आगच्छदेकदा द्रोणमेकलव्यो निषादराट् ।
अस्त्राभ्यासमतिर्दीस इत्यनेन न्यषेधि च ॥ २६ ॥
व्यावृत्तोऽथ गुरुं कृत्वा मृन्मयं चिन्मयाशयः ।
चापाभ्यासं चकारासौ जातश्च धुरि धन्विनाम् ॥ ३० ॥
द्रोणशिष्यगणोऽन्येद्युरभ्यासाय वनं गतः ।
श्वानं श्वानं विदीर्णास्यक्षिप्तसप्तेषुमैक्षत ॥ ३१ ॥
कस्येदं लाघवमिति ध्यात्वा तत्पदमार्गगाः ।
एकलव्यं व्यलोकन्त तेऽभ्यस्यन्तमिषुव्रजैः ॥ ३२ ॥
कस्त्वमित्येष तैः पृष्टो निजगाद निषादराट् ।
हिरण्यधन्वा तातो मे द्रोणो धनुषि मे गुरुः ॥ ३३ ॥
द्रोणोऽथ ज्ञाततद्वृत्तः स मा भूदधिकोऽर्जुनात् ।
इति तद्दक्षिणाङ्गुष्ठं गुरुदक्षिणयाग्रहीत् ॥ ३४ ॥
लक्षीकृते तरुस्थायिभासपक्षिगलेऽन्यदा ।
दृष्टिमुष्टिलयात् पार्थः सर्वेभ्योऽधिकतां गतः ॥ ३५ ॥
स्नानं गाङ्गजले गुरुर्विरचयन्नन्येद्युरङ्घ्रिग्रहो-
दग्रं ग्राहमहो शरैः क्षितवते प्रीतः पृथासूनवे ।
वीरः कोऽपि धनुर्धरो न भवतः कल्पोऽस्ति जल्पन्निदं
शस्त्रं ब्रह्मशिरोऽभिधानमसमद्वेषिप्रयोज्यं ददौ ॥ ३६ ॥

इति श्रीजिनदत्तसूरिशिष्यश्रीमदमरचन्द्रविरचिते श्री-
बालभारतनाम्नि महाकाव्ये वीराङ्के आदिपर्वणि पाण्डवकौ-
रवसंभवो नाम चतुर्थः सर्गः ॥ ४ ॥

# THE RIG-VEDA.

LETTER TO THE EDITOR.

। परमेश्वरो जयति ।

एतदस्मानतीव सुखाकरोति यदस्मद्देशीयपण्डितवरा वेदव्याख्यानशुद्ध्यशुद्धिविचारे प्रवृत्ताः । धन्योऽसौ विज्ञवरोऽनल्पभाषाभिज्ञः श्रीयुतबाबूशिवप्रसादो येन स्वयमेव भाषान्तरेभ्य ऋग्व्याख्यानानि संस्कृतेष्वनुवादं कृत्वा पण्डितमण्डलीनयनगोचरार्थं काशीविद्यासुधानिधौ प्रकाशितानि । अहो कीदृशी धीमतां क्षमता का वा परिश्रमस्य फलजनकता यदनागतानामपि भारतवर्षेऽदृष्टवतामपि भारतवर्षीयपण्डितमुखानि म्लेच्छानामप्यध्यापकमोक्षमूलरादीनां वेदव्याख्यानपाटवमस्मद्धृदयं चमत्करोति ॥

नह्यसूयापरवशैस्तैः श्रीमत्सायनगुणाननादृत्य दोषांश्चाभिमुखीकृत्य स्वकीयं मतं प्रकाशितम् । प्रकृतार्थान्वेषण एव तेषामाशयः । व्याख्यानप्रकृताप्रकृतत्वे त्वपक्षपातिनां कुसंस्काररहितानां विद्वद्धुर्य्याणां मतमेव प्रमाणम् । येतु परोन्नतिमसहमाना धर्म्मलोपभीता वा स्वजातीयवर्ज्जमन्यं कमपि सार्थं वेदमेव नाध्यापयन्ति ते किं परम्परागतामसंलग्नामपि सायनकृतव्याख्यामनादृत्य नवीनानां म्लेच्छमूलरादीनां वाक्यं स्वीकुर्वन्ति । ते न केवलं स्वयमेव प्रकृतार्थं ज्ञातुं यतन्तेऽपितु प्रयत्नशीलानन्यानपि वारयितुमग्रसरा भवन्ति । एतेषां वाक्यं किं प्रमाणत्वेन ग्रहीतव्यम् । तदेवमाशास्महे बुद्धिमन्तोऽनुवादकाः स्वारब्धे कर्मण्यभिलषितंफलं निर्बाधं साधयन्तु ॥

येतु मन्यन्ते महाबुद्धिमता बलवत्प्रयत्नशालिनापि दिव्यविज्ञानं विनैव क्रियमाणं व्याख्यानं विश्वासार्हं न स्यात् तान् पृच्छामः, दिव्यविज्ञानं किं तावत् शास्त्राभ्यसनादिभूतं वा उपायान्तरलभ्यं वा । द्वितीये नास्ति प्रमाणम् । शास्त्राभ्यसनादिभूतं चेन्मोक्षमूलसदृशपण्डितानामपि सम्भवति । नापि युष्माकं सायनो द्वैपायनादिवन्महर्षिरिति प्रसिद्धो यस्य व्याख्याने स्खलनमपि न सम्भवति ॥ नहि तेन स्वयं व्याख्यानानि कल्पितानि किंतु यास्कादिनिरुक्तकाराणां ब्राह्मणानां च तात्पर्य्यं दृष्ट्वैव लिखितानीत्युच्यते चेत् प्रतिवदामोऽत्र । द्रष्टव्यं तावत् सायनेन यथार्थं सुसङ्गतं तात्पर्य्यं गृहीतमगृहीतं वा । प्रायेण मनुष्याः स्खलद्गतयो भवन्ति अत एव न मन्तव्यं कदाचित् सायनेन यल्लिखितं तदेव शुद्धमपरैर्यदुक्तं तदसत्यमिति ॥

एतत्तु डाक्तरम्यूराख्यपण्डितवरेणाप्युच्यते यद् यास्कस्य निरुक्तेन सायनकृतभाष्येण च बहूनि वाक्यानि स्फुटतया नावगम्यन्तेऽतोऽन्यानि साहाय्यानि भाषान्तराल्लभ्यान्यवलम्ब्य प्रकृतान्यसंशयितानि च तात्पर्य्याणि ग्रहीतव्यानि ॥ किंच प्रथमतः कुत्रचित् पदव्याख्याने सायनो यास्कस्य मतं न स्वीकरोति । द्वितीयतः तौतु निश्चयाभावात् कस्यचित् पदस्य द्वयं वाधिकं व्याख्यानं कृतवन्तौ । तृतीयतः सायनेनैकपदस्य नाना स्थानेषु नाना व्याख्यानानि कृतानि अत एव संशयो निःसंशयितव्याख्यानप्रयोजनं च ॥

इदानीमुदाहरणरूपे चतुर्थसूक्तस्य पञ्चमषष्ठऋचोर्व्याख्याने सायनमोक्षमूलयोरत्रोदाह्रियेते, द्रष्टव्यं तयोः कतरस्य व्याख्यानं स्पष्टं हृदयंगमं च ।

(५) उत ब्रुवन्तु नो निदो निरन्यतश्चिदारत । दधाना इन्द्र इद्दुवः ।

(६) उत नः सुभगान् अरिर्वोचेयुर्दस्म कृष्टयः स्यामेदिन्द्रस्य शर्म्मणि ।

॥ सायनव्याख्यानम् ॥

(५) नोऽस्माकं सम्बन्धिन ऋत्विज इति शेषः, ते ब्रुवन्तु इन्द्रं स्तुवन्तु, उत अपिच हे निदः हे निन्दितारः पुरुषा निरारत इतो देशान्निर्गच्छत अन्यतः अन्यस्माद्देशात् निर्गच्छत । कीदृशा ऋत्विजः परिचर्यां कुर्वाणाः ।

(६) हे दस्म शत्रूणामुपक्षयितरिन्द्र त्वदनुग्रहात् अरिकृत शत्रवोऽपि नोऽस्मान् सुभगान् शोभनधनोपेतान् वोचेयुरुच्यासुः कृष्टयो मनुष्या अस्मदमित्रभूता वदन्तीति शेषः । ततः सम्पन्ना वयमिन्द्रस्य शर्म्मणि इन्द्रप्रसादलब्धे सुखे स्यामेत भवेमैव ॥

॥ तथा मोक्षमूलस्य ॥

गच्छत अन्यं स्थानं यूयं येतु इन्द्रमेव पूजयथ इति वदन्तु अस्माकं शत्रवः ।

अथवा हे ईश्वर सर्व्वे अस्मान् सुभगान् वदन्तु इन्द्रस्य शर्म्मणि चिरं स्यामेति ॥

एतत्तु विधौ कलङ्क इव सायनभाष्ये यत्र कुत्रचित् मालिन्यं दर्शितं तस्य गुणान् वर्णयितुं कः समर्थः । मोक्षमूलपण्डितवरेणैवं लिखितं स्वग्रन्थस्यानुक्रमणिकायाम्, तथाहि

"सत्यपि दोषे सायनभाष्ये वेदाध्ययने तत्त्वतीवावश्यकमिति,, । किञ्च "येतु तस्य व्याख्यानं समीचीनं न मन्यन्ते ते न जानन्ति दुर्गमवैदिकभाषायां सायन एव नेतेति,, ॥

उपसंहारकाले निवेदनमेतदस्माकं मात्सर्य्यमुत्सार्य्य महतामतं विचारणीयम्, अविचार्य्यैवान्येषामपशब्दप्रयोगेणावमाननाकरणन्तु नहि सभ्यानां रीतिरिति शम् ॥

काशिकराजकीयपाठशालायामादित्यरामशर्मा ।

# THE VAIŚESHIKA APHORISMS OF KAṆĀDA.

## SECOND BOOK, SECOND DAILY LESSON.

(*Continued from page 138.*)

Doubt with respect to sound answered.

**तुल्यजातीयेष्वर्थान्तरभूतेषु विशेषस्य उभयथा दृष्टत्वात् ॥ २२ ॥**

Aph. 22. Since the particular [class of sound] is perceived both in things homogeneous and in things heterogeneous [a doubt arises with respect to it.]

[1] 'A doubt arises with respect to sound' is to be supplied, and by 'sound' must also be understood the notion or class of sound, and the notion of its being apprehended by the organ of hearing. Since, then, the exclusion of particularity or difference of sound is perceived in things homogeneous, i. e. in the twenty-three qualities, and in things heterogeneous, i. e. in substances and actions, sound gives rise to a doubt respecting itself whether it be a quality, a substance, or an action. U.

[2] Some have maintained that, inasmuch as there exist conventional notions of low and loud sounds, sound is a substance. The refutation of this opinion is here commenced. Since there is perceived no particularity in the notion of sound apprehended in sound both in the twenty-three things homogeneous, i. e. in the qualities, colour, &c., and in things heterogeneous, i. e. in substances and actions which are distinguished by belonging to the class substance and other classes, 'a doubt arises'—for these words are to be supplied—whether sound be a substance or no. The knowledge of the existence in the notion of sound of particularity in the form of exclusion from that by which both alternatives are distinguished, gives rises to such a doubt. V.

**एकद्रव्यत्वान्न द्रव्यम् ॥ २३ ॥**

Aph. 23. Since it inheres in one substance only, [sound] is not a substance.

[1] That of which one substance is the substratum, inheres in one substance only. Inasmuch, therefore, as no substance has only one cause of inhesion, sound, since it differs in properties from substance, is not a substance. U.

[2] The notion that sound is a substance is here refuted. Sound is not a substance, for it inheres in one substance, i. e. abides in one only; whereas it is well known that no substance abides in one other substance only. V.

**नापि कर्माचाक्षुषत्वात् ॥ २४ ॥**

Aph. 24. Nor is it an action, for it is invisible.

[3] Sound is not an action for the perception of which sound is the object is invisible, i. e. is produced by some other external organ than the eye. The class sound, therefore, does not belong to action, because like the class taste &c. it exists as a class not included in things visibly perceived. U.

**गुणस्य सतोऽपवर्गः कर्मभिः साधर्म्यम् ॥ २५ ॥**

Aph. 25. The transiency of [sound] which is a quality, is a property common also to actions.

[4] It may be objected that sound is an action, since like throwing upwards &c. it comes rapidly to an end. The answer is as follows:—Transiency is rapid destruction. This in the class quality is dependant, like qualities [such as pleasure and pain, and the like], on rapid occurrence of being and ceasing to be. It is, therefore, only a property common also to actions, but not the whole essence of action. Rapid destruction, which you advance as an argument, is not a peculiar property of action, as is shown by the conception of dualities, by pleasure and pain, &c. U.

---

[1] शब्दे संशय इति शेषः । शब्दे शब्दत्वं श्रोत्रग्राह्यत्वं चोपलभ्यते तच्च तुल्यजातीयेषु त्रयोविंशतौ गुणेषु अर्थान्तरभूतेषु द्रव्येषु कर्मसु च विशेषस्य व्यावृत्तेः उभयथा उभयत्र दर्शनात् शब्दो किं गुणो द्रव्यं कर्म वेति संशयं जनयति ॥

[2] केचित्तु सूक्ष्मः शब्दः महाञ्छब्द इत्यादिव्यवहाराद्द्रव्यमेव शब्द इत्याहुस्तन्मतं निराकर्तुमारभते । शब्दे गृह्यमाणस्य शब्दत्वादेर्विशेषस्य तुल्यजातीयेषु रूपादिषु त्रयोविंशतौ गुणेषु अर्थान्तरेषु द्रव्येषु कर्मसु च उभयथा उभयत्र द्रव्यत्वादिमत्तया निश्चितेषु तदभाववत्तया निश्चितेषु च अदृष्टत्वात् शब्दो द्रव्यं न वेति संशय इति पूरणीयं तथा च निश्चितोभयकोटिमद्व्यावृत्तत्वरूपासाधारणस्य शब्दत्वादौ सत्त्वात् तज्ज्ञानं तादृशसंशयं जनयतीति भावः ॥

[1] एकं द्रव्यं समवायि यस्य तदेकद्रव्यं द्रव्यञ्च किमप्येकद्रव्यसमवायिकारणकं न भवतीति द्रव्यवैधर्म्यान्नायं शब्दो द्रव्यमित्यर्थः ॥

[2] इदानीं शब्दस्य द्रव्यत्वं निरस्यति । शब्दो न द्रव्यम् एकद्रव्यत्वात् एकमात्राश्रितत्वात् न ह्येकमात्राश्रितत्वं किमपि द्रव्यं प्रसिद्धम् ॥

[3] प्रत्ययस्य शब्दविषयकस्याचाक्षुषत्वात् चक्षुर्भिन्नबहिरिन्द्रियजन्यत्वादित्यर्थः तथा च शब्दत्वं न कर्मवृत्तिचाक्षुषप्रत्यक्षावृत्तिजातित्वात् रसत्वादिवदिति भावः ॥

[4] ननु शब्दः कर्म आशुतरविनाशित्वात् उत्क्षेपणादिवदिति चेदत्राह । अपवर्गः आशुनाशः स च गुणत्वे ऽपि द्वित्वादिवदाशुभावविनाशकसन्निपाताधीन इति कर्मभिः साधर्म्यमात्रमस्य न तु कर्मत्वमेव त्वदुक्तहेतोराशुतरविनाशित्वस्य द्वित्वज्ञानसुखदुःखादिभिरनैकान्तिकत्वमिति भावः ॥

सतो लिङ्गाभावात् ॥ २६ ॥

Aph. 26. Since there is no mark of [sound as] existing [before utterance, it does not so exist.]

[1] Meeting the objection:—Let it be allowed that sound is a quality; yet it is not a mark of the existence of ether; for it would justify the inference of the existence of ether, only if it were an effect of ether; whereas it is eternal, its occasionally not being observed being due to the non-existence of something to make it known, it is stated: If sound existed previously to its utterance, there would be a mark or another proof of it as an existing thing. There is no proof of the existence of sound in the case of its not being heard. It is not therefore to be made known. U.

[2] The doctrine of the Mímáṇsakas that sound is not produced, but eternal; but that it is sometimes unperceived because there is nothing to make it known, is rejected. 'Because there is no mark of sound as existing', means because there exists no proof establishing the eternity of sound. V.

नित्यवैधर्म्यात् ॥ २७ ॥

Aph. 27. Since [sound] differs from the eternal [it does not exist previously to utterance.]

[3] A difference is perceived between sound and the eternal. For it is inferred by what is spoken, that Chaitra, Maitra and others exist even when concealed, because Chaitra speaks; but it is never inferred from that which is made known, as a water pot and the like, that that which makes known, such as a lamp and the like, exists. Therefore sound is produced, but is not made known as previously existent. U.

[4] After the statement of the absence of a proof, a proof of the contrary is stated. Sound is not eternal because it differs from the eternal, i. e. because it ceases to be: for that it ceases to be is established by the evidence of the senses. V.

अनित्यश्चायं कारणतः ॥ २८ ॥

Aph. 28. It is not eternal, for it has a cause.

[1] 'Because its production is observed' is to be supplied. For a sound becoming manifest is observed by means of the conjunction of a drum and drumstick, and the like. It is, therefore, not eternal, because it is produced. Or 'for it has a cause' implies that the reason is that it possesses a cause. U.

[2] Sound is not eternal, because it has a cause. For eternal things have no causes. V.

न चासिद्धं विकारात् ॥ २९ ॥

Aph. 29. This is not disproved by change.

[3] It must not be argued that there is no proof that sound has a cause, since, inasmuch as it is loud or soft, a change is perceived. For a loud or soft sound is perceived in consequence of the hardness or softness of the beating of a drum with a drumstick, and the like. But the loudness &c. of that which is made known, is not dependant on the loudness &c. of that which makes known. From its cause or change, therefore, it is inferred that it is produced, not that its existence is made known. U

[4] That sound has a cause is not disproved by its change or existence as loud, soft, &c. For in the absence of hardness or softness in the beating of a drum with a drumstick and the like, there could not be observed to exist loudness or softness of sound. It is impossible that loudness, softness, &c. should exist in sound as a consequence of the loudness, softness, &c. of that which manifests it. It must therefore be admitted even by an opponent that sound is produced from a cause, this cause being the beating &c. of a drum with a drumstick, &c. V.

अभिव्यक्तौ दोषात् ॥ ३० ॥

Aph. 30. Since in its manifestation there would be a defect [sound is not manifested.]

---

[1] ननु सिध्यतु शब्दो गुणस्तथापि नासावाकाशलिङ्गम् आकाशं हि तदा ऽनुमापयेत् यदि तस्य कार्यः स्यात् किन्तु नित्य एवायं कादाचिदनुपलम्भस्तु व्यञ्जकाभावः प्रयुक्त इत्याशङ्क्याह। यदि हि उच्चारणात् प्रागूर्ध्वं शब्दः सन् स्यात् तदा सतो ऽस्य लिङ्गं प्रमाणान्तरं स्यात् न चाश्रवणदशायां शब्दसत्त्वे प्रमाणमस्ति तस्मात् कार्य एवायं न व्यङ्ग्य इति ॥

[2] शब्दो न जन्यते किन्तु नित्य एव सः कदाचिदप्रत्यक्षन्तु तस्य व्यञ्जकवैधुर्यादिति मीमांसकमतं निरस्यति। सतो नित्यस्य शब्दस्य लिङ्गाभावात् शब्दनित्यतासाधकप्रमाणाभावादिति फलितार्थः ॥

[3] नित्येन सहास्य शब्दस्य वैधर्म्यमुपलभ्यते यतश्चैत्रो वक्तीत्यत्रावृतो ऽपि चैत्रमैत्रादिवचनेनानुमीयते न च व्यञ्जकः प्रदीपादिर्व्यङ्ग्येन घटादिना क्वचिदनुमीयते तस्माज्जन्य एवायं न व्यङ्ग्य इति भावः ॥

[4] साधकाभावमुक्त्वा बाधकमप्याह। नित्यवैधर्म्यात् विनाशित्वात् शब्दो न नित्यस्तन्नाशस्य प्रत्यक्षसिद्धत्वादिति भावः ॥

[1] कारणत उत्पत्तेर्दृष्टत्वादिति शेषः उपलभ्यते हि भेरीदण्डसंयोगादिभ्यः प्रादुर्भवन् शब्दः तथा चोत्पत्तिमत्त्वादनित्यो ऽयमिति यद्वा कारणत इति कारणवत्त्वहेतुमुपलक्षयति ॥

[2] शब्दो ऽनित्यः कारणतः कारणवत्त्वादिति यावत् न हि नित्यानि कारणवन्ति भवन्ति इत्यर्थः ॥

[3] शब्दस्य कारणवत्त्वमसिद्धमिति न वाच्यं तीव्रमन्दादिभावेन विकारस्य दर्शनात् भेरीदण्डाभिघातस्य तीव्रतया तीव्रस्य मन्दतया मन्दस्य शब्दोपलम्भात् न ह्यभिव्यञ्जकतीव्रत्वाद्याधीनो ऽभिव्यङ्ग्यतीव्रत्वादिः तथा च कारणतो विकारादनुमीयते जन्यो ऽयं न त्वभिव्यङ्ग्य इति ॥

[4] शब्दस्य कारणवत्त्वं नासिद्धं विकारत् तीव्रमन्दादिभावात् न हि भेरीदण्डाद्यभिघातस्य तीव्रमन्दादित्वाभावे शब्दस्य तीव्रमन्दादिभावः केनचिदुपलभ्यते नाप्यभिव्यञ्जकस्य तीव्रमन्दादिभावेन शब्दे तीव्रमन्दादिभावो भवितुमर्हति अतो भेरीदण्डाद्यभिघातादिरकारणजन्यत्वं शब्दस्याकामेनापि वाच्यमिति नासिद्धिरिति भावः ॥

[1] If sound were manifested, an unalterable relation in things co-extensive and apprehended by sense would be wrongly conceived to exist. But no such unalterable relation is observed to exist among such objects. If this be not assented to, it will follow that when one letter (the letter *ka*) is manifested, all letters will be manifested. The objection that an unalterable relation of that which manifests and that which is manifested is observed to exist between the notions of the existent, of a man, and of a Bráhman, which are co-extensive, and are manifested in their origin, i. e. in the constitution of a division of their form, is invalid. For they are not co-extensive, for the extension of the human, and the Bráhmanical is not so great as the extension of the existent. U.

संयोगाद्विभागाच्च शब्दाच्च शब्दनिष्पत्तिः ॥ ३१ ॥

Aph. 31. Sound is produced by conjunction, disjunction and [other] sound.

[2] By conjunction—by the conjunction of a drum and drumstick, and the like. By disjunction—in a bamboo when being split, for in this case conjunction is not the cause of the first sound, for no such conjunction exists, and consequently disjunction of the two pieces of bamboo is the efficient cause, and the non-intimate cause is the disjunction of the piece split off and of ether. When sound is produced at a distance on a lute &c., it is continually reproduced till arriving at that space in ether which is limited by the outer ear, it is perceived. Sound therefore is produced also from sound. U

लिङ्गाच्चानित्यः शब्दः ॥ ३२ ॥

Aph. 32. Sound is not eternal, because of its mark.

[3] Articulate sound is not eternal, because, though constituting a class, it is apprehended by the organ of hearing, as in the case of a lute &c. U.

Objections of the Mímánsakas. द्वयोस्तु प्रवृत्त्योरभावात् ॥ ३३ ॥

Aph. 33. But [were sound quickly destructible] the activities of two would not exist.

[1] The objection of a Mímánsaka is stated. Of two—of teacher, and pupil,—the activities—the activity of the teacher in teaching and of the pupil in learning—would not exist, would follow to be non-existent. Since such expressions as The teacher teaches his pupils the Veda, and The teacher gives his pupils the Veda, are recognised to be identical in sense, teaching is nothing else than giving. As, therefore, if sound were rapidly destructible it would be impossible to give and to receive it, there would exist no activity in relation to teaching and learning. The permanency of sound must, therefore, be admitted. It also follows from the absence of a proof of destruction of sound, no destroying agent being observed. The eternity of sound is also established by the argument, It has so long existed, who shall destroy it after this? V.

*To be continued.*

# THE BHARS.

*By the Rev. M. A. Sherring, LL. B.*

All investigation into the races of India goes to prove, that a multitude of tribes has, at various epochs, spread over the land. One tribe has pushed forward another, the weaker and less civilized retreating to the jungles and hilly fastnesses; while those that have dispossessed them, have, in their turn, been dispossessed by fresh and more vigorous clans. It is remarkable, that the races of India have throughout very largely maintained their distinctive individuality, notwithstanding the fluctuations in their separate histories; and yet it is indisputable that not a few of them sprang from a common stock. To some extent, they have united with one another, and there can be no question that a large number of the low-castes of India are the progeny of distinct races more or less blended together. Still, in many instances, a careful scrutiny can detect in these castes, not only their special differences, but also the very names by which the clans they represent were originally designated.

This scattering of tribes over the country has produced a very singular result, which perhaps is not found, on the same scale, in any other part of the world, namely, that every district in India has its peculiar clans, which have their own traditions and annals; and bas, in addition, a host of

[1] शब्दस्याभिव्यक्तौ समानदेशानां समानेन्द्रियग्राह्याणां प्रतिनियतव्यञ्जकव्यङ्ग्यत्वं दोषः स्यात् न च तादृशानां प्रतिनियतव्यञ्जकव्यङ्ग्यत्वं कच्चिद्दृष्टम् अत्र यदि तदा न स्वीक्रियेत तदा ककाराभिव्यक्तौ सर्ववर्णाभिव्यक्तिप्रसङ्गः । ननु समानदेशानामपि सत्त्वनरत्वब्राह्मणत्वानां स्वरूपभेदसंस्थानयोनिव्यङ्ग्यानां प्रतिनियतव्यञ्जकव्यङ्ग्यत्वं दृष्टमेवेति चेन्न तेषां समानदेशत्वाभावात् न हि यावात् देशः सत्त्वस्य तीवानेव नरत्वस्य ब्राह्मणत्वस्य वा ॥

[2] संयोगात् भेरीदण्डादिसंयोगात् विभागात् वंशे पाट्यमाने तत्र संयोगस्तावन्नाद्यस्य शब्दस्य कारणं तदभावात् तस्मात् वंशदलद्वयविभागो निमित्तकारणं दलाकाशविभागश्चासमवायिकारणम् । यत्र च दूरे वीणादावुत्पन्नः शब्दः तत्र सन्तानक्रमेण उत्पद्यमानः शब्दः कर्णशष्कुल्यवच्छिन्नमाकाशदेशमासादयन् गृह्यते तेन शब्दादपि शब्दनिष्पत्तिरिति ॥

[3] वर्णात्मकः शब्दो ऽनित्यः जातिमत्त्वे सति श्रोत्रग्राह्यत्वात् वीणादिध्वनिवदित्यर्थः ॥

[1] मीमांसकः प्रत्यवतिष्ठते । द्वयोर्गुरुशिष्ययोः प्रवत्त्योः गुरोरध्यापने प्रवृत्तिः शिष्यस्य तु अध्ययने तयोरभावात् अभावप्रसङ्गात् गुरुः शिष्यान् वेदमध्यापयति शिष्येभ्यो वेदं ददाति इत्यादिवाक्यानामेकार्थत्वानुभवेन अध्यापनं दानमेव तथा च शब्दस्याशुविनाशित्वे तस्य दानप्रतिग्रहयोरसम्भवत्वात् अध्यापने अध्ययने च प्रवृत्तिर्न स्यात् अतः शब्दस्यावश्यं स्थैर्यं स्वीकार्यं नाशकानुपलब्धेश्च तन्नाशे प्रमाणाभावात् तावत् कालं स्थिरञ्चैनं कः पश्चान्नाशयिष्यति इति न्यायेन नित्यतैव फलितेति भावः ॥

fragmentary and isolated remnants of lost and vanquished tribes, of which scarcely more than their bare names can now be traced.

An illustration of some of these observations is furnished by the history of the once powerful and numerous tribe of Bhars. This race, variously known by the terms Rájbhar, Bharat, Bharpatwa, and Bhar, once inhabited a wide tract of country extending from Gorruckpore in Northern India to Saugor in Central India. Other tribes were associated with them; but there is good reason to believe that the Bhars greatly outnumbered them. The country lying between Benares and Allahabad, a space of about seventy miles in extent, was almost exclusively in their possession; and they occupied the land on both sides of the Ganges, which flows through this region. The entire district of Allahabad also was originally in their hands; and traces of them are still found in every pergunnah or sub-division of the district, more especially in the pergunnahs across the Ganges and Jumna. Their forts, called Bhar-dih, some of which are of vast size, are very numerous; and they have the credit of having excavated all the deep tanks that now exist. The pergunnah of Soraon exhibits many examples of their laborious perseverance, and has no fewer than a dozen ponds and thirteen tanks attributed to them. The pergunnah of Kheyragurh, however, bears perhaps the most abundant trace of their toil and enterprise. The stone fort of that name, of immense proportions, is said to have been their work.

Not in this district alone, but also in the districts of Mirzapore, Jounpore, Azimgurh, as far as Gorruckpore, numerous embankments, tanks, subterraneous caverns, and stone forts, still exist, to testify to their energy and skill. The present inhabitants of the district of Azimgurh have a tradition, that their country, in the time of Rám, with whose kingdom of Ayudhia it was formerly connected, was inhabited by Rájbhars and Asúrs. In this neighbourhood the Bhars have left behind them large mud forts, of which specimens may be seen at Harbanspúr and Unchgáon, near Azimgurh, and also at Ghosi. The district of Mirzapore exhibits traces and remains of this people to a greater extent than those of any other ancient tribe. The pergunnah of Bhadohee, or more properly 'Bhardohee,' is called after them. Mr. Duthoit, Deputy Superintendent of the Family Domains of the Maharaja of Benares, in his recent elaborate report on the Bhadohee pergunnah, says, that traces of the Bhar *raj* "abound in the pergunnah, in the form of old tanks and village forts. One cannot go for three miles in any direction without coming upon some of the latter." Their tanks, he adds, are Suraj-bedi, that is, longer from east to west than from north to south; and thereby distinguishable from modern tanks, which are Chandr-bedi, and lie north and south. In the names of places in India as elsewhere old associations and traditions are faithfully represented. Thus we find that in this pergunnah bazars and towns are still called after Raja Lílí, the last Bhar King.

The pergunnah stretches along the north bank of the Ganges; but on the south side of that river, likewise, Bhar forts and towns are met with. One of their principal cities was situated about five miles to the west of the modern city of Mirzapore, and was evidently of great extent. Its brick and stone *debris* is scattered over the fields for several miles. The city included the ancient town of Vindhyáchal, famous in the Purános, and still celebrated throughout a great part of India for its shrine of the goddess Vindhyeśvarí, whom many thousands of pilgrims from every quarter visit yearly. To the east of the town are the remains of a fort from which spot in a westerly direction *debris* is found in great abundance. This old city is called Pampápúrá by the people now living in the neighbourhood. From its size and the substantial nature of the buildings which, judging from the *debris*, it contained, the city must have been of sufficient importance to be the capital of the country.

Tradition says that the city once possessed one hundred and fifty temples, all which were destroyed by that indomitable enemy of idolatry, Aurungzebe. This statement is manifestly extravagant; yet that there were formerly magnificent temples on this spot is indisputable. Below the Ashtbhújí bungalow, a sanatarium erected on a spur of the ridge immediately above the site of the ancient city, by a public-spirited native of Mirzapore, for the special benefit of its European residents is a massive square building having the appearance of a fort. It is, however, a Hindu monastery with a temple on its summit reputed to be of some sanctity. This edifice has in its foundations, walls, and breastworks, a multitude of carved stones and figures, while many more cover the ground in the vicinity. These sculptures are not of modern Hindu style; and indeed are far superior to the productions of Hindus of the present day. Some of the figures are of that curious type described, hesitatingly, by Mr. Fergusson, in his "Tree and Serpent Worship in India," as Dasyas or aborigines, in contradistinction to the immigrant tribes of Hindus. They are readily distinguishable by their peculiar head-dress and long pointed beards. They form, however, but a small portion of the figures, which are, for the most part, representations of Hindu men and women with most elaborate turbans and head-dresses, while exceedingly few apparently are of a sacred character. It is probable that all these relics point to a later period of Bhar history, when Hindus had come into their midst, and settled amongst them. The contrast between the long-bearded figures and the Hindu is very striking. It is exceedingly questionable whether at the date of these sculptures the Bhars were still in possession of the country; indeed, I am strongly inclined to the supposition that it had, in part or in whole, already passed from them into the hands of the Rajpoots, who are known to have been the rulers over this tract for a period of five hundred years. At the same time, the position and attitude of the Bhar figures on these sculptures, indicate that, at the time of their execution, the Bhars were still a people of importance, although, it is likely, they were subordinate to the Rajpoots.

That the Bhars were not altogether an uncouth and barbarous race is sufficiently proved by the works of skill which they have left. Their numerous massive forts testify to their warlike propensities, yet they were probably chiefly erected as means of defence, and as places of refuge; for in their later history it is certain that they were exposed to fierce attacks from their Rajpoot neighbours. The same energy and genius which they exhibited in defending themselves against their enemies, they also displayed in more peaceful pursuits. They excavated tanks and ponds, raised substantial earthworks, and dug trenches between rivers. The Kunwar and Manghai rivers in the Azimgurh district seem to have been connected by a trench, the work, it is said, of the former Bhar inhabitants. The Hari Bándh or dam, at Amín-nagar in the Nizámábád pergunnah of the same district, is an embankment generally attributed to them. Whence this people obtained the civilization which placed them much above the condition of many other aboriginal tribes, it is hard to say, unless we suppose that it had its origin in themselves. I know not why we should always be so ready to ascribe all the ancient civilization of India to successive troops of Hindu immigrants. For my part, I am inclined to think that the Hindus have learnt much from the aboriginal races, whom, in the course of ages, they have so subdued and trodden upon, and have treated with such scorn and rigour, that in their present debasement we have no adequate means of judging of their original genius and power.

How long prior to the Rajpoot invasion the Bhars had occupied this tract of country, cannot be ascertained; yet the prosperity to which they had attained, and the civilization which they had acquired, are sound reasons for thinking that they had held possession of it for a protracted period. While they cultivated the land round their villages and towns, nevertheless a large portion remained uncleared, and was an immense forest infested by wild beasts. Even as late as Akbar's reign, in the sixteenth century, elephants frequented the dense jungle between Chunar and Allahabad, and the hills to the south of the Ganges must have been almost unapproachable. The emperor Baber, in his Memoirs, says, that while at Chunar, close on the edge of the camp, a lion and rhinoceros were seen, and also a wild buffalo, and that many elephants roamed in the jungle around Chunar, and, apparently, even as far as, and beyond, Benares. It is manifest, therefore, that the Bhars inhabited a vast forest, which they cleared in places, and cultivated, building villages, towns and cities, subduing the untamed land, providing against dearth by digging splendid tanks, banking up morasses, utilizing water-courses, and thus laying the foundations of their own prosperity and of those that came after them.

Sir Henry Elliot considers it strange that so little notice is taken of the Bhars in the Puránas, yet it is not at all remarkable, seeing that Brahmanical writers generally speak of the Dasyas, Asuryas, and all other non-Hindu races with superciliousness, if not with contempt; and consequently rarely exhibit a particle of interest in their history. Yet he gives one or two references, where, he conjectures, they may possibly be alluded to. His remarks are as follows:—"It is strange," he says, "that no trace of Bhurs is to be found in the Purans, unless we may consider that there is an obscure indication of them in the Brahma Purana, where, it is said, that among the descendants of Jayadhwaja are the Bháratas who, it is added, are not commonly specified *from their great number.*' So also the 'Harivansa' says of the Bharatas. 1. p. 157, 'They form an immense family, whose numbers it is impossible to mention.' Or they may perhaps be the Bhurgas, of the 'Mahabharata,' subdued by Bhim Sen on his eastern expedition." *

With all their industry and capacity, the Bhars were destined to perish. The final cause of their destruction was, doubtless, the success of the Mahommedan invasions of India, whereby the Rajpoot rulers of the North West, being driven from their homes, fled into the more secure regions of the east, where, coming in contact with aboriginal tribes, they gradually subdued them. These Rajpoot raids occurred at various periods extending over several centuries. The districts in which they located themselves, under different leaders, have been, to some extent, discovered. For instance, the Bais Rajpoots are found in pergunnah Jhunsa of the Allahabad district; the Monus Rajpoots, in Kewai; the Sonuk, in Meh; the Tissyál, in Secundra; and the Nanwak, in Nawab Gunj. The Bissen Rajpoots have settled in Karra and Atharban in the Dooab.

In the Ghazeepore district, in what is now the Luknepore pergunnah, a fierce and prolonged contest was carried on between the Bhars and Rajpoots, and several battles were fought. But the former were at length completely overthrown, and their lands fell to the lot of their conquerors, who were of the family of Har Thakur and Bír Thakur, of the clan of Singhi Rishi, of Karn Chetra, Delhi.

The extensive pergunnah of Kuntit in the Mirzapore district derives its name, according to tradition, from the famous Raja Karn, who, it is said, came on a *tírth* or pilgrimage to the island of Rámgyah in the Ganges near Vindhyachal. Karn-tírth has been contracted into Kuntit. Formerly, this tract was, for the most part, in the possession of the Bhars; but was wrested from them by the Ghaharwar Rajpoots, under a chief, of the family of Raja Jai Chand of Kanouj, of the name of Gúdhan Deo, who massacred the Bhar ruler together with his relations and attendants. Gúdhan Deo built forts at Kuntit and Bijaipur, portions of which are still standing. He also took from the Bhars the lands of Khyragurh, now a pergunnah in the Allahabad district, which afterwards fell to one of his sons. The number Chaurási or eighty-four was, on the division of his property at his death, applied to so many villages; hence there is a *tuppeh Chaurási* or sub-division, both in the pergunnahs of Kuntit and Khyragurh. Originally, this family held

* Supplemental Glossary, p. 83.

estates over a wide extent of country, in the districts of Allahabad, Mirzapore, Jaunpore and Benares. The present Raja of Mánda, one of his descendants, occupies a small portion only of this tract; yet it consists of six hundred and seventy-five square miles of territory.

One division of the Kuntit pergunnah, namely that now styled the tuppeh or sub-division of Saktísgarh, was, in ancient times, occupied by the Kols, and seems never to have been in the possession of the Bhars. The Kols continued to hold it long after the Rajpoots had established themselves in their neighbourhood, the chief reason of this being, that neither their lands, nor their chattels, nor their own persons, furnished a bait sufficiently tempting. They were a wild people, living in swamps in the dense jungle, their favourite dwellings being stone caverns surrounded by deep pools of water. Here they lived in independence and security. They were, however, eventually subdued, though in what era does not appear; but in the reign of Akbar, a small tax was imposed upon them. When Sakat Singh, a descendant of Gúdhan Deo, was Raja of Kuntit, he seized the country occupied by the Kols for non-payment of the tax, and, apparently with the permission of the emperor, annexed it to his own estate. On the site of their stronghold, he erected a fort, which is still known as the Saktísgarh fort. In its neighbourhood the jungles continue to be infested with tigers and other wild animals, and for tiger-shooting perhaps no region in India surpasses it. The Kols have not been utterly exterminated, but are yet found in some places, and are mostly employed in agriculture. The tuppeh was formerly called Kolána, a term even now occasionally applied to it.

To the north of the Ganges, in what is now the Bhadohee pergunnah, the Bhar principality was destroyed by the Monus Rajpoots, who came from Amber, or Old Jeypore, where the elder branch of the clan still exists. The tradition of the circumstance is as follows. Five persons of the Mon race undertook to perform a pilgrimage from their own country to Benares. Passing through the Bhar territory, they were attracted by its advantages, and determined to remain there, and to settle among its inhabitants. They were joined by other members of their family, whom they invited over. As they increased in numbers and importance, the Bhars, it is said, sought to make alliances with them, but their overtures being discountenanced, at length a dispute arose on the subject of intermarriage, which increased to blows. This seems to have been the signal for a general attack upon the Bhars; and, in the struggle which occurred, the Monus people were so successful that they not only completely subjugated the aborigines, but utterly destroyed them. At the present day, scarcely a Bhar is to be met with from one extremity of the pergunnah to the other, so absolute and entire has been their extermination.

Fortune, however, is a fickle goddess, and the fate of the Monus Rajpoots of the Bhadohee, and also of the Ghaharwar Rajpoots of Kuntit, affords notable instances of her inconstancy. The former, calling in the aid of Pirtheepat Singh, Raja of Pertabgurh, to settle their family disputes, fell into his power; and in the year 1775 the pergunnah passed from his hands into those of Balwant Singh, Raja of Benares, with whose descendants it still remains. This powerful and ambitious Raja also obtained possession of the Kuntit territory, which continued for a short time in his family, and drove out the Ghaharwar chief, Raja Vikramajít, who with his attendants sought safety in flight. For nearly five hundred years the Raja and his predecessors had occupied the country. On the rebellion of Raja Cheit Singh of Benares, Warren Hastings sent for Raja Gobindjít, son of Vikramajít, from his hiding-place, for the purpose of restoring to him his patrimonial estate of Kuntit. The new Raja of Benares, however, had sufficient influence with the British Government to hinder its restoration; and he only received a tenth part of the original land revenue. His descendants now reside in the old Ghaharwar fort of Bijaipur, the talooqa of which was afterwards given as a commutation of the tenth. The prestige of the ancient Ghaharwar family, as represented by the Rajas of Bijaipur, in the city of Mirzapore and its neighbourhood, is very great; and in the Mutiny the Government wisely availed themselves of it in preserving order among the people.

It is greatly to the credit of the Raja of Benares that, during the time of his occupancy of the Kuntit estate, he exerted himself most energetically in promoting the prosperity of the rising city of Mirzapore. He sent over traders of various kinds from Benares; and a detachment of horse and foot was stationed there for the security of its inhabitants. The commerce of the city rapidly increased; and its present high commercial position is the result of the enterprise of the Raja. His possession of the pergunnah, however, was of short duration; and in the year 1781, or thereabouts, it passed from the family, although the present Raja has still considerable property within it.

The Rajpoot tribes, although the principal, were not the only destroyers of the Bhars. The Mahommedans also, at various times, settled in many places on their lands. In the Allahabad district the pergunnahs of Chail and Karálí are almost entirely in the occupation of Mahommedan proprietors. Being near the city itself in which the Názim or chief local officer and his underlings resided, it is not remarkable that they should have fallen a prey to their cupidity. When the kingdom of Jounpore was established in the fourteenth century, all this part of the country formed a portion of the King of Jounpore's dominions, and remained so until the downfall of the last king, Husain Khan, towards the end of the fifteenth century.

Yet what has become of the old Bhar race? Their fate has been most disastrous; and their present condition only proves too conclusively that they were ever regarded by their oppressors as fair game, to be hunted down and de-

stroyed. Not content with doing their utmost to exterminate them during long centuries of grinding tyranny, they have degraded the survivors to the lowest position in the social scale. Here and there, in many places, Bhars are still found, but with few exceptions, which will presently be referred to, their condition is one of great social ignominy. They are largely employed to tend swine, an office which in India only the most despised and disreputable classes will undertake. By some, they are included in the caste of Pásís, one of the lowest of the non-Hindu castes. It would be interesting to learn the history of the degradation of a race of people, of enterprise and skill, of originality and singular practical ability, which it is evident they once possessed in no ordinary degree. Their supplanters, whether Rajpoots, Brahmans, or Mahommedans, though more civilized and refined, are not to be compared with the humbler aborigines, whom they have ruined, for the great works of public utility which they have executed in the land. In default of such historical information, which indeed there is no probability of our ever acquiring, the only explanation of the circumstance that I can give is, that their abject degradation is the result of the pride and intolerance of their conquerors. As a non-Hindu tribe they were impure, and were altogether unfit to be the companions of the twice-born and their associates. Their industry, their natural gifts, their energy and perseverance, in the opinion of these high-caste intolerants, constituted no claim to their consideration; but, on the contrary, may have provided a reason, in addition to their religious uncleanness, for depressing them as low as possible.

Yet a few are still in possession of property and independence, although they may not have saved themselves from social contempt. While not a single Bhar landed proprietor exists in the Bhadohee pergunnah, there are two Bhar landlords, or were, not long since, in the Kuntit pergunnah of the Mirzapore district. But these, disloyal to their tribe, though wise in their generation, feeling the grievous burden of their social position, affect a Rajpoot title, notwithstanding that it is well known that they are descended directly from the Bhars. In the Allahabad district this unfortunate race seems to have been well nigh extinguished. There are, however, three Bhar villages in the Khyragurh pergunnah, namely Majera, Kaliyánpár, and Omraicha, the families in which are said to have the right to six others, while in reality only occupying these three. It is probable that the Bhars, driven away from more civilized regions, retreated into the wild jungle of Khyragurh, and remained there long after multitudes of their race, in other places, had been destroyed. But they were finally expelled from these haunts by the ancestors of the present Raja of Mánda, to whom reference has already been made. The Arail and Barrah pergunnahs also have Bhars residing in them.

In spite of the pertinacity with which, if tradition is correct, the higher castes kept aloof from Bhar alliances, they were not always successful in doing so. In the Allahabad district, for instance, three examples are found of unions with Bhar families. Mr. G. Ricketts, in his Memorandum in the General Report of the census of 1865, states, that "three influential castes or clans claim an admixture of Bhar blood. These are the Bhurors, Gurhors, and Tikaits. The two former are not numerous. They are landed proprietors in the southern portions of this district; and appear to be a connecting link between the higher castes, who are generally landed proprietors, and those inferior castes whose lot is servitude. The Tikaits are numerous, and possess much influence. A Chowhan leader carried off his Bhur chief's daughter. The descendants are still proprietors of a portion of that Bhur chief's possessions."

It is a question of considerable ethnological interest, whether the Bhars are connected with the Cheroos, Seorees, and other ancient races, inhabiting the southern part of the Mirzapore district. The Cheroos are sometimes spoken of as a branch of the Bhars; and as to the Seorees, it was the opinion of Sir H. Elliot, that there was great reason to suppose that Cheroos and Seorees were originally one and the same; yet he says it is very difficult to trace the connexion between these tribes. It is certainly remarkable that the pergunnah of Barhar in the Mirzapore district, which I have no doubt should be 'Bharhar,' the second syllable 'har' being a reduplication of the 'har' of the first syllable, is partly inhabited by a race of Seorees, and that the Raja of Barhar himself has Seoree blood in his veins. My own conviction is, that many of the aboriginal tribes of India were originally blended together. But this subject is one which, while to the settlement of it material is being gradually collected, is nevertheless so intricate and involved, that it will require long and patient research before satisfactory conclusions can be attained. The unravelling of the tangled skein of Indian history, although very far from being accomplished, has, however, by no means resulted in complete failure. Difficult and exceedingly harassing as the task undoubtedly is, yet knot after knot of the disordered thread is being gradually unloosed. The labour is one demanding perseverance and industry, which will achieve in this, as in most pursuits, far greater and more brilliant results than the sudden efforts of an intense yet fitful enthusiasm.

It now only remains for me to add, that I am indebted to the following works for information on the subject of this paper:—Sir H. Elliot's Supplemental Glossary; Memoirs of the Emperor Baber; Mr. Plowden's General Report of the Census of the North West Provinces for 1865; Mr. G. Ricketts' Memorandum on Allahabad in the General Report; Report on the Bhadohee Pergunnah of the Family Domains of the Maharaja of Benares, by Mr. W. Duthoit, Deputy Superintendent; Settlement Records of the Kuntit Pergunnah, Mirzapore, by Mr. C. Raikes; Revenue Settlement Reports of Gorruckpore, Allahabad, and Azimgurh; and the Benares Magazine, Vol. II.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO. AT THE MEDICAL HALL PRESS, BENARES.

# काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

# THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 44. Benares, January 1st, 1870. Vol. IV.


## ॥ उपदेशसहस्र्याः पद्यप्रबन्धः ॥

पूर्वस्मिन् प्रकरणे एकदेशिमतप्रतिक्षेपमुखेन ब्रह्मैकत्वज्ञानमेव स्वरूपावस्थानलक्षणमोक्षसाधनं, न भेदाभेदज्ञानमिति प्रतिपादित,मधुना सर्वतार्किकमतप्रतिषेधेन मुमुक्षुं स्वाराज्ये ऽभिषेक्तुं प्रकरणान्तरमारभमाणः प्रथमं स्थूलशरीरात्मवादिमतं निराकरोति ।

(१) पार्थिवः कठिनो धातुर्द्रवो देहे स्मृतो ऽम्मयः ।
पक्तिश्चेष्टावकाशाः स्युर्वह्निवाय्वम्बरोद्भवाः ॥ २५३ ॥

पार्थिव इति । यः स्थूलदेहे कठिनो धातुर्मांसादिरूपः स पार्थिवः पृथिव्यंशः पृथिवीपरिणामात्मकः स्मृतो ज्ञातो विद्वद्भिरित्यर्थः । एवं द्रवोऽम्मयो ऽपां परिणामः पक्तिः पाकश्चेष्टा स्पन्दनमवकाशोऽन्नपानमनसां संचारमार्गो देहगतसुषयो ये स्युः एते क्रमेण वह्निवाय्वम्बरोद्भवा देहानुगतवह्न्याद्यंशकार्यभूताः स्मृता इत्यक्षरार्थः । देहो नात्मा, भूतपरिणामत्वा,द्वल्मीकादिवदिति भावः ॥ १ ॥

इन्द्रियात्मवादिनं प्रत्याह ।

(२) घ्राणादीनि तदर्थाश्च पृथिव्यादिगुणाः क्रमात् ।
रूपालोकवदिष्टं हि सजातीयार्थमिन्द्रियम् ॥ २५४ ॥

घ्राणादीनीति । घ्राणादीनीन्द्रियाणि तदर्थास्तेषां विषया गन्धादयश्च क्रमात् पृथिव्यादीनां गुणाः कार्याणीत्यर्थः । गन्धरसरूपस्पर्शशब्दास्तावत्पृथिव्यप्तेजोवाय्वाकाशानां क्रमेण धर्माः प्रसिद्धास्तेषां घ्राणाद्येकैकेन्द्रियग्राह्यतान्वयव्यतिरेकसिद्धा, तथा च यदिन्द्रियं यस्य धर्मं ग्राहयति तदिन्द्रियं तस्य सजातीयं भवितुमर्हति, यथा तैजसस्य रूपस्य प्रकाशको दीपादिस्तैजसो दृष्टस्तथेन्द्रियाण्यपि भौतिकानां प्रकाशकत्वाद्भौतिकान्येवेत्यनुमानमाह । रूपालोकवदिति । एवमिन्द्रियाणां भौतिकत्वे सिद्धे देहवदेषामप्यनात्मत्वं सिद्धमिति भावः ॥ २ ॥

किं चेन्द्रियाणि नात्मानः, करणत्वा,त्कुठारवदित्यनुमानान्तरं सूचयन् कार्यवशादिन्द्रियाणामेकादशत्वनियममाह ।

(३) बुद्ध्यर्थान्याहुरेतानि वाक्पाण्यादीनि कर्म्मणे ।
तद्विकल्पार्थमन्तःस्थं मन एकादशं भवेत् ॥ २५५ ॥

बुद्ध्यर्थानीति । एतानि घ्राणादीनि बुद्ध्यर्थानि ज्ञानकरणान्याहुः । वाक्पाणिपादपायूपस्थाख्यानीन्द्रियाणि कर्मणे कर्मार्थं वचनादानगमनविसर्गानन्दार्थं तत्करणान्याहुरित्यर्थः । तेषां दशानामिन्द्रियाणां विकल्पार्थं युगपद्विषयसन्निधाने क्रमेण तत्तद्विषयज्ञानादिनियमार्थं यदिन्द्रियं तन्मनः, उक्तदशापेक्षया एकादशं भवेत् । मनश्चैकं साधारणकरणमवश्यमङ्गीकार्यमन्यथात्मनो युगपदनेकेन्द्रियविषयसंप्रयोगे सति युगपदेवानेकज्ञानानि जायेरन्न चैवमस्ति । तथा च तस्यापि मनसः करणत्वादनात्मत्वमिन्द्रियवदिति सिद्धम् ॥ ३ ॥

बुद्धिरपि नात्मा,करणविशेषत्वा,न्मनोवदिति बौद्धमतं निराकुर्वंस्तस्याः स्वभावं दर्शयति ।

(४) निश्चयार्था भवेद्बुद्धिस्तां सर्वार्थानुभाविनीम् ।
ज्ञातात्मोक्तः स्वरूपेण ज्योतिषा व्यञ्जयन् सदा ॥ २५६ ॥

निश्चयार्थेति । निश्चयोऽर्थपरिच्छेदः सोऽर्थः प्रयोजनं यस्या अन्तःकरणवृत्तेः सा निश्चयार्था बुद्धिर्भवेत् निश्चयकरणं बु-

द्धिरित्यर्थः । अन्यदृश्यत्वादपि तस्या अनात्मत्वमित्याह, तामिति । बुद्धिज्ञातुरपि बुद्धिवदन्यज्ञेयत्वशङ्कां वारयति, स्वरूपेण ज्योतिषेति । तया च भास्यभासकयो रूपालोकयोरिव भेदाद्भास्याया बुद्धेरन्यो भासक आत्मेत्यर्थः ॥ ४ ॥

यदि बुद्धेरात्मा भासकस्तर्हि तया संसर्गादशुद्धिरापद्येतेत्याशङ्क्य दृष्टान्तेन प्रत्याह ।

(५) व्यञ्जकस्तु यथा ऽऽलोको व्यङ्ग्यस्याकारतां गतः ।
व्यतिकीर्णोऽप्यसंकीर्णस्तद्वज्ज्ञः प्रत्ययैः सदा ॥ २५७ ॥

व्यञ्जकस्त्विति । यथा ऽऽलोको व्यञ्जको दीपालोकादिर्व्यङ्ग्यस्य घटादेराकारतां गतः सन् व्यतिकीर्णोपि व्यामिश्रतया भासमानोपि वस्तुतो ऽसंकीर्णो विविक्तस्वभाव एव भवति तद्वदेव ज्ञ आत्मा सदा प्रत्ययैः बुद्धिवृत्तिभिरित्यर्थः । अतो नित्यशुद्ध एवात्मेति भावः ॥ ५ ॥

यदि बुद्ध्यादेरत्यन्तविलक्षणो निर्व्यापार आत्मा कथं तर्हि तस्य तदवभासकत्वमित्याशङ्क्य तदपि दृष्टान्तेनाह ।

(६) स्थितो दीपो यथा ऽयत्नः प्राप्तं सर्वं प्रकाशयेत् ।
शब्दाद्याकारबुद्धीर्ज्ञः प्राप्तास्तद्वत्प्रपश्यति ॥ २५८ ॥

स्थित इति । स्पष्टार्थः ॥ ६ ॥

तथापि कथं शुद्धिः सुखित्वादिस्फुरणादित्याशङ्क्याह ।

(७) शरीरेन्द्रियसंघात आत्मत्वेन गतां धियम् ।
नित्यात्मज्योतिषा दीप्तां विशिंषन्ति सुखादयः ॥ २५९ ॥

शरीरेति । सुखादयः शरीरादिसंघाते आत्मत्वेन प्रवृत्तां धियं बुद्धिं विशिंषन्ति, न त्वात्मानं, किं लक्षणां, नित्यात्मज्योतिषा दीप्तां प्रकाशितां, तथा च भास्यभासकबुद्ध्यात्मनोरविवेकादात्मा सुखादिमानिति भ्रान्तिरित्यर्थः ॥ ७ ॥

कुत एवं निश्चय इत्यत आह ।

(८) शिरोदुःखादिनात्मानं दुःख्यस्मीति हि पश्यति ।
द्रष्टान्यो दुःखिनो दृश्याद् द्रष्टृत्वाच्च न दुःख्यसौ ॥ २६० ॥

शिरइति । शिरआदिदेहावयवगतेन दुःखेन हि यस्माद्दुःख्यहमस्मीत्यात्मानं पश्यति, तस्माद् देहमात्मत्वेन गता बुद्धिरिति योजना । अयमाशयः । आत्मनो विशेषविज्ञानं बुद्ध्यध्यासनिबन्धनमिति हि स्थितिस्तथा च शिरोदुःखेनोदरदुःखेन वा दुःख्यस्मीत्यभिमानात्मकबुद्ध्यवस्थापन्नविशेषस्यैव दुःखित्वात्सुखदुःखादयो बुद्धिं विशिंषन्तीति युक्तं वक्तुमिति । द्रष्टा तु दुःखिनो दृश्यादन्यः, आत्मत्वेनाभिमन्यमानदेहावयवोपघातादिजनितदुःख्याकारसाभासबुद्धेर्दृश्यायाः साक्षी तदन्य एवासौ द्रष्टृत्वादेव न दुःखीत्यर्थः ॥ ८ ॥

द्रष्टृत्वादसौ न दुःखीत्युक्तमेव स्पष्टयति ।

(९) दुःखी स्याद् दुःख्यहंमानाद् दुःखिनो दर्शनान्न च ।
संहतेऽङ्गादिभिर्द्रष्टा दुःखी दुःखस्य नैव सः ॥ २६१ ॥

दुःखी स्यादिति । अयमात्मा दुःख्यहंमानात् दुःखाकारपरिणामवत्यन्तःकरणे ऽहमित्यभिमानाद् दुःखिनो दुःखाकारपरिणामवतो दर्शनात्तया सत्युदासीनानामपि दुःखिनं पश्यतां दुःखित्वप्रसङ्ग इत्यर्थः । प्रकृते किमायातं तदाह । संहत इति । अङ्गादिभिर्हस्ताद्यङ्गैश्चक्षुरादीन्द्रियैश्च संहते देहे यद् दुःखं तस्य द्रष्टा य आत्मा साक्षी स नैव दुःखी इति सिद्धमिति शेषः ॥ ९ ॥

दुःखिनो द्रष्टृत्वेपि दुःखित्वमात्मनो युज्यतइति दृष्टान्तेन शङ्कते ।

(१०) चक्षुर्वत्कर्मकर्तृत्वं स्याच्चेन्नानेकमेव तत् ।
संहतं च ततो नात्मा द्रष्टृत्वात्कर्मतां व्रजेत् ॥ २६२ ॥

चक्षुर्वदिति । यथा चक्षुषो दर्पणादिनिष्ठतया दृश्यत्वं तस्यैव मुखदेशस्थतया द्रष्टृत्वं च तथात्मनो दुःखसंभिन्नतया दृश्यत्वं स्वरूपचैतन्यावस्थतया द्रष्टृत्वं चेति कर्मकर्तृत्वं घटतइत्यर्थः । सिद्धान्ती परिहरति, नेति । कुत इत्यत आह । अनेकमेव तदिति । तच्चक्षुरनेकमनेकाकारमेव संहतं च भवतीत्यतो घटते तस्य कर्मत्वं कर्तृत्वं चांशभेदोपपत्तेरित्यक्षरार्थः । गोलकांशस्य दर्पणस्थस्य दृश्यत्वं तस्यैव शक्तिमत्त्वांशस्य मुखनिविष्टस्य द्रष्टृत्वमिति युक्तमुभयरूपत्वमिति विवक्षितार्थः । आत्मनस्तु नैवमंशभेदोस्ति एकरूपत्वादसंहतत्वाच्चेत्यभिप्रेत्याह । तत इति । चित्प्रकाशैकस्वभावो ह्यात्मा द्रष्टैव, न दृश्यांशसंभिन्नो, दृश्यांशस्यानात्मत्वा,दतो द्रष्टृत्वात्कर्म्मतां न प्राप्नोतीत्यर्थः ॥ १० ॥

नन्वात्मनोपि ज्ञानादिभिरनेकात्मत्वसंभवाच्चक्षुर्वद्भास्यभासकता स्यादित्याशङ्क्य प्रत्याह ।

(११) ज्ञानयत्नाद्यनेकत्वमात्मनोपि मतं यदि ।
नैकज्ञानगुणत्वात्तु ज्योतिर्वत्तस्य कर्मता ॥ २६३ ॥

ज्ञानयत्नादीति । ज्ञानप्रयत्नेच्छाद्वेषादिगुणभेदैरनेकात्मकत्वादात्मनोपि केन चिदंशेन विशिष्टस्य ग्राह्यत्वमंशान्तरेण ग्राहकत्वं च यदि तव मतमिति शङ्कायन्यार्थः । तुशब्दः शङ्कानिषेधार्थः । नैवमेकज्ञानगुणत्वात्, कृत्स्नः प्रज्ञानघन एवेति श्रुत्या ज्ञानैकस्वभावत्वावधारणादनेकात्मत्वायोगाज्ज्योतिर्वत्तस्य न कर्मता, ग्राह्यता तस्य न संभवतीति परिहारग्रन्थार्थः ॥ ११ ॥

दृष्टान्तं व्याचष्टे ।

(१२) ज्योतिषो द्योतकत्वेपि यद्वन्नात्मप्रकाशनम् ।
भेदेप्येवं समत्वाज्ज्ञ आत्मानं नैव पश्यति ॥ २६४ ॥

ज्योतिष इति । अयमर्थः । यद्यात्मनो ग्राहकांशभेदोऽभ्युपगम्यते, तदेदं वक्तव्यं, ग्राह्यांशोपि चेतनः किं वा जड इति, तत्राद्यं निराकरोति । दृष्टान्तेन, ज्योतिष इति । आदित्यादिज्योतिषो द्योतकत्वेपि प्रकाशनस्वभावत्वेपि नात्मप्रकाशनं न ज्योतिःस्वरूपप्रकाशनं तद्वदेवं यथा दृष्टान्तस्तथा भेदेप्यंशभेदकल्पनेपि ज्ञ आत्मा समत्वाच्चैतन्यस्वभावाविशेषादात्मानं नैव पश्यति न स्वांशं विषयीकरोतीत्यर्थः । न द्वितीयो, जडाजडयोरंशांशित्वेनाभेदानुपपत्तेर्न ग्राह्यांशस्यात्मत्वमिति नात्मनः स्ववेद्यत्वसिद्धिरिति दूषणं स्पष्टमेवेत्युपेक्षितमिति द्रष्टव्यम् ॥ १२ ॥

स्वरूपेणांशद्वारेण वा यद्यप्यात्मात्मानं नैव पश्यति तथापि स्वगुणज्ञानस्य कर्मत्वं गमिष्यतीत्याशङ्क्याह ।

(१३) यद्धर्मा यः पदार्थो, न तस्यैवेयात्सकर्मताम् ।
न स्वात्मानं दहत्यग्निस्तथा नैव प्रकाशयेत् ॥ २६५ ॥

यद्धर्मेति । यः पदार्थो यद्धर्मा येनासाधारणधर्मेण धर्मवान् स तस्यैव धर्मस्य कर्मतां नेयात्, तथा च ज्ञानस्वभाव आत्मा न ज्ञानकर्मतां गन्तुमर्हतीत्यर्थः । दृष्टान्तभागः स्पष्टार्थः । आत्मा, न स्वीयधर्मव्याप्यः, पदार्थत्वा,दग्निवदित्यर्थः ॥ १३ ॥

उक्तन्यायेन विज्ञानवादी बौद्धोपि निराकृत इत्याह ।

(१४) एतेनैवात्मनात्मानो ग्रहो बुद्धेर्निराकृतः ।
अंशोप्येवं समत्वाद्धि निर्भेदत्वान्न युज्यते ॥ २६६ ॥

एतेनैवेति । आत्मन इत्यस्मिन्नात्मान इति छान्दसः प्रयोगः, बुद्धेरात्मानः स्वरूपस्यात्मना स्वेनैव ग्रह इति बौद्धपक्षोप्येतेनोक्तदृष्टान्तप्रबन्धेन निराकृत इत्यर्थः । स्वरूपस्य स्वरूपेणैव ग्राह्यत्वाभावेपि एकेनांशेन ग्राह्यत्वमंशान्तरेण ग्राहकत्वमिति कल्पनाप्यत्र न घटते इत्याहांशोप्येवमिति । एवं, प्रागुक्तवर्त्मना, तदेवाह । समत्वान्निर्भेदत्वादिति ॥ १४ ॥

एवं बुद्धेः स्वग्राह्यत्वनिराकरणेनार्थादन्यग्राह्यत्वमुपक्षिप्त,-मन्यथा तस्याः क्षणिकत्वाद्यसिद्धेः, तत्र माभूत्तर्हि बुद्धिस्तद्ग्राहकश्चापरः, शून्यमेवात्मतत्त्वमस्त्विति वादिनं निराकरोति ।

(१५) शून्यतापि न युक्तैवं बुद्धेरन्येन दृश्यता ।
युक्तातो घटवत्तस्याः प्राक् सिद्धेश्च विकल्पतः ॥ २६७ ॥

शून्यतापीति । एवं सति शून्यतापि न युक्ता, यद्वा यथा बुद्धेः स्वग्राह्यता न युक्ता, युक्तिविरोधादेवं शून्यतापि बुद्धेस्तदवभासस्य च न युक्ता, अपरोक्षतया तस्याः प्रतीयमानत्वादित्यर्थः । अतो हेतोर्घटवदन्येन साक्षिणा बुद्धेर्ग्राह्यता युक्ता साक्षिणि पर्यवसानात्तस्या अपि न शून्यताशङ्केत्यर्थः । किं च तस्या बुद्धेर्विकल्पतो विकल्पनात्प्रागेव तत्साक्षिणः सिद्धेर्न शून्यता कदापीत्यर्थः । बुद्धेर्विकल्पनात्पूर्वमेव सुषुप्तावप्यात्मप्रकाशसद्भावोऽङ्गीकर्तव्योऽन्यथा सुषुप्तेरसाक्षिकत्वादवस्थान्तरे परामर्शानुदयप्रसङ्गादिति भावः ॥ १५ ॥

किं च यत्कार्यं यदन्वितं दृश्यते तत् तस्य कारणं कार्यविकल्पात्प्राक् सिद्धं च, यथा घटान्विता मृत्तया बुद्ध्यादेर्विकल्पस्य सदर्थान्विततयोपलभ्यमानत्वात्प्राक् सिद्धत्वात्कारणत्वमेव युक्तमित्याह ।

(१६) अविकल्पं तदस्त्येव यत्पूर्वं स्याद्विकल्पतः ।
विकल्पोत्पत्तिहेतुत्वाद्यद्यस्यैव तु कारणम् ॥ २६८ ॥

अविकल्पमिति । सर्वविकल्परहितं कूटस्थमित्यर्थः । अकारणकार्योत्पत्तेरनुपपत्तेः कारणसत्त्वमेष्टव्यमन्यथा कार्यविशेषार्थिनां कारणविशेषोपादानप्रवृत्तिनियमानुपपत्तिः, शून्यस्य सर्वत्र सुलभत्वादिति भावः ॥ १६ ॥

कूटस्थस्य ब्रह्मात्मनः कथं कारणत्वं व्यापारवद्धि कारणं नामेत्याशङ्क्य रज्जुवत्सर्पस्य विवर्त्ताधिष्ठानतया तस्य कारणत्वं घटत इत्यभिप्रेत्याह ।

(१७) अज्ञानं कल्पनामूलं संसारस्य नियामकम् ।
हित्वात्मानं परं ब्रह्म विद्यान्मुक्तं सदाऽभयम् ॥ २६९ ॥

अज्ञानमिति । अज्ञानमनाद्यविद्या कूटस्थे प्रत्यगात्मनि ब्रह्मणि सर्वकल्पनाया मूलमतद्रूपप्रतिभासहेतुरित्यर्थः । यथा च चिदविद्याविवर्त्तेषु कार्येषु सत्तात्मना भासमानतया कारणत्वं कूटस्थस्यापि घटतइति भावः । संसारस्य नियामकमिति विशेषणेन सर्वविकल्पनाया अज्ञानमूलत्वेऽन्वयव्यतिरेकाख्यं प्रमाणमनुमानं सूचयति । तर्ह्यज्ञानविशिष्टमेव किं ब्रह्म प्रत्यक्त्वेनानुसंधेयं, नेत्याह । हित्वेति । सकार्यमज्ञानं हित्वा साध्यत्वेन तस्य साक्षिधर्मतां बाधित्वात्मानं प्रत्यञ्चं साक्षित्वेनोर्वरितं साध्यबाधया परं ब्रह्म परिपूर्णमुक्तं कार्यकारणप्रपञ्चसंसर्गरहितमभयमद्वयमहं ब्रह्मास्मीति महावाक्यार्थभूतं सदा विद्यादनुसंदध्यादित्यर्थः ॥ १७ ॥

संसारनियामकमज्ञानं हित्वात्मानं ब्रह्म विद्यादित्युक्तं, तत्र कः संसारः, कथं वा तस्याज्ञानं कारणं, ततो वा कथमात्मनो विवेकः स्यादित्यपेक्षायामाह ।

(१८) जाग्रत्स्वप्नौ तयोर्बीजं सुषुप्ताख्यं तमोमयम् ।
अन्योन्यस्मिन्नसत्वाच्च नास्तीत्येतत्त्रयं त्यजेत् ॥ २७० ॥

जाग्रदिति । जाग्रत्स्वप्नौ स्थूलसूक्ष्मविषयभोगलक्षणौ, संसार इति शेषः, तयोर्बीजं कारणं, तमोमयमज्ञानप्रायं सुषुप्ताख्यं सुषुप्तिसंज्ञितं तमोबीजमिति वक्तव्ये मयट्प्रयोगादज्ञानस्य स्वातन्त्र्यं वार्यते, साभासं तमोबीजमित्यर्थः । एवं कार्यकारणस्वरूपमुक्त्वा तत्त्यागप्रकारमाह । अन्योन्यस्मिन्निति । स्थूलसूक्ष्मकारणावस्थानामन्योन्यस्मिन्नसत्त्वात्सत्त्वव्यभिचाराच्चकाराद्दृश्यत्वाच्चैतत् त्रयं रज्ज्वां दृष्टसर्पधारादिवदात्मनि ततोन्यत्र च नास्तीति ज्ञात्वा त्यजेद्विलापयेदात्मानं शोधयेदित्यर्थः ॥ १८ ॥

त्यजेदित्युक्ते कर्तृत्वप्रतीतेः कथमस्यात्मनो ब्रह्मत्वमित्यत आह ।

(१६) आत्मबुद्धिमनश्चक्षुरालोकार्थादिसंकरात् ।
भ्रान्तिः स्यादात्मकर्मेति क्रियाणां सन्निपाततः ॥ २७१ ॥

आत्मबुद्धीति । आत्मा देहः, अर्थादीत्यादिपदाद्देशकालादिग्रहः, आत्मादीनां संकरान्मिथो गुणप्रधानभावेनाध्यासाद्धेतोः क्रियाणां सन्निपाततः समुद्भवादात्मकर्म आत्मनः कर्म क्रियेत्यात्मा तदधिष्ठानभूतः कूटस्थोपि करोतीति भ्रान्तिः स्यात्, तस्मादात्मनः स्वतो निष्क्रियत्वान्निष्क्रियब्रह्मत्वमविरुद्धमित्यर्थः ॥ १९ ॥

अन्यधर्मस्याप्यन्यत्रारोपे दृष्टान्तमाह ।

(२०) निमीलोन्मीलने स्थाने वायव्ये ते न चक्षुषः ।
प्रकाशत्वान्मनस्येवं बुद्धौ न स्तः प्रकाशतः ॥ २७२ ॥

निमीलेति । ये नेत्रगोलकस्थाने निमीलोन्मीलने दृष्टे ते वायव्ये वायुकार्ये क्रियात्मकस्य वायोस्तदाश्रयत्वान्न चक्षुरिन्द्रियस्य, तस्य प्रकाशरूपत्वात्क्रियाश्रयत्वानुपपत्तेः, तथापि चक्षुष्येव ते व्यपदिश्येते ऽध्यासाद्यथा, एवं मनसि बुद्धौ च चलनाचलने न स्तः, प्रकाशत्वादेव स्वतो न विद्येते, तथापि प्राणव्यापाररूपे ते तयोरारोप्येते, चञ्चलं मनः स्थिरा बुद्धिरिति व्यपदेशदर्शनादित्यर्थः ॥ २० ॥

मनोबुद्ध्योरसाधारणधर्मकथनपूर्वकं प्रासङ्गिकमुपपादितमुपसंहरति ।

(२१) संकल्पाध्यवसायौ तु मनोबुद्ध्योर्यथाक्रमात् ।
नेतरेतरधर्मत्वं सर्वं चात्मनि कल्पितम् ॥ २७३ ॥

संकल्पेति । संकल्पधर्मकं मनो ऽध्यवसायधर्मिका बुद्धिरिति व्यवस्थैव न सांकर्यमित्यर्थः । तस्मात्कूटस्थस्यात्मनः स्वतः कर्तृत्वासंभवादविद्यादेश्च जडस्य स्वातन्त्र्येण प्रवृत्त्यसंभवाज्जडाजडयोश्च परमार्थतः संबन्धानिरूपणात्सर्वं सहेतुकसंसारबन्धनमात्मनि कल्पितमध्यस्तं न परमार्थत इति सदैवात्माद्वयं ब्रह्मेति सिद्धमित्यर्थः ॥ २१ ॥

पूर्वं देहेन्द्रियमनोबुद्धिशून्यात्मवादनिराकरणेन तद्विलक्षण आत्मा विवेचितः, इदानीं देहादिविलक्षणोप्यात्मा देहसमपरिमाण इति जैनमतेनात्मनः परिच्छिन्नत्वशङ्कायां न तस्य ब्रह्मत्वमुपपद्यते, न च तत्र सर्वं कल्पितमिति युज्यते, कल्पकाभावादित्याशङ्क्याह ।

(२२) स्थानाद्यवच्छेददृष्टिः स्यादिन्द्रियाणां तदात्मताम् ।
गता धीस्तां हि पश्यन् ज्ञो देहमात्रइवेक्ष्यते ॥ २७४ ॥

स्थानेति । इन्द्रियाणां देहाद्बहिर्वृत्त्यभावाद्देहावयवगोलकस्थानावच्छेदेन दृष्टिरुपलम्भः स्यात्, भवतीत्यर्थे स्याच्छब्दः, तथा च त्वगादीनामिन्द्रियाणां यथायोगं देहपरिमाणत्वात्तदात्मतां गता धीः सेन्द्रियदेहतादात्म्यं प्राप्ता बुद्धिः स्यादिति योजना, तां बुद्धिं पश्यन्नवभासयन् ज्ञ आत्मा स्वतो ऽपरिच्छिन्नोपि देहमात्रइव देहपरिमाणावच्छिन्नइवेक्ष्यते ज्ञायते भ्रान्त्या प्रतिभासते, ऽन्यथा मध्यमपरिमाणस्य घटादिवत्सावयवत्वेनानित्यत्वापत्तेः पारलौकिकसाधनप्रवृत्त्यसंभवप्रसङ्ग इति दिक् । उक्तोपाधिमन्तरेणात्मनः स्वतः परिच्छेदानुपलम्भाद्युक्तं तस्य ब्रह्मत्वं, निरवयवस्य च परमार्थत उपाधिसंसर्गायोगाद्युक्तं तस्मिन् सर्वस्य कल्पितत्वं चेति भावः ॥२२॥

दिगम्बरमतनिराकरणेन यदनन्तत्वमात्मन उक्तं तदमृष्यमाणाः शाक्याः प्रत्यवतिष्ठन्ते ।

(२३) क्षणिकं हि तदत्यर्थं धर्ममात्रं निरन्तरम् ।
सादृश्याद्दीपवत् तद्धीस्तच्छान्तिः पुरुषार्थता ॥ २७५ ॥

क्षणिकं हीति । तत् ज्ञानं ज्ञेयं चेत्युभयं क्षणिकं हि निश्चितं, कतिपयानेकक्षणवर्तित्वशङ्कां वारयत्यत्यर्थमिति । स्वरसभङ्गुरमित्यर्थः । धर्ममात्रं वस्तुमात्रं न स्थायि किं चित्स्याधिष्ठानमस्तीति मात्रस्यार्थः । तर्हि कथं विच्छेदो नोपलभ्यते, तत्राह । निरन्तरमिति । नैरन्तर्येणोत्पद्यमानमित्यर्थः । यदि सर्वं क्षणिकमेव, कथं तर्हि तदेवेदमिति सोहमिति च दृश्यद्रष्टृविषयं प्रत्यभिज्ञानं घटत इत्याशङ्क्याह सादृश्यादित्याह । सादृश्यादिति । तद्धीस्तदेवेदमिति मतिः तच्छान्तिस्तस्य स्थायित्वप्रतिभासस्य ज्ञानज्ञेयगतस्य तन्मूलस्याविवेकस्य च शान्तिरस्तमयः प्रतिभासनिवृत्तिरेव पुरुषार्थता मोक्ष इत्यर्थः ॥ २३ ॥

सिद्धान्ती दूषणविभागज्ञानाय बौद्धमतभेदं विविच्य दर्शयति ।

(२४) स्वाकारान्यावभासं च येषां रूपादि विद्यते ।
येषां नास्ति ततश्चान्यत्पूर्वोसंगतिरुच्यते ॥ २७६ ॥

स्वाकारेति । स्वाकारस्यान्येन ज्ञानेनावभासोऽस्यास्तीति स्वाकारान्यावभासं रूपादि बाह्यं वस्तु येषां बौद्धानां मते विद्यते येषां च ज्ञानमात्रास्तित्ववादिनां मते ततोऽवभासाज्ज्ञानादन्यद् बाह्यरूपादि नास्ति, पूर्वार्द्धगतचकारादेषां मते विज्ञानमपि नास्ति शून्यमेव सर्वमिति, तत्र पूर्वासंगतिर्बाह्यार्थसत्त्ववादस्यासंगतिरघटमानता तावदुच्यतइति प्रतिज्ञानीतइति योजना ॥ २४ ॥

तन्मतस्यासंगतिं प्रतिपादयति ।

(२५) बाह्याकारत्वतो ज्ञप्तेः स्मृत्यभावः सदा क्षणात् ।
क्षणिकत्वाच्च संस्कारं नैवाधत्ते क्व चित्तु धीः ॥ २७७ ॥

बाह्येति । ज्ञप्तेर्ज्ञानस्यैव बाह्याकारत्वतो बाह्यवस्त्वाकारत्वप्रसङ्गादित्यक्षरार्थः । ज्ञेयस्योत्पत्तेः प्राक्तावद् ज्ञानसंबन्धो नास्ति, उत्पन्नस्य च स्वरसभङ्गुरत्वात्कर्मकारकतया ज्ञानात्प्रागवस्थानाभावाज्ज्ञानेन संबन्धानिरूपणाच्च प्रत्यक्षानुभवविरोधान्नित्यानुमेयत्वकल्पनानुपपत्तेश्च परिशेषाज्ज्ञानस्यैवाकारो विषय इति विज्ञानमात्रास्तित्ववादिमतप्रवेश इति भावः । किं चानुभवितुरपि ते मते क्षणिकत्वादन्यानुभूतेऽन्यस्य स्मृत्यदर्शनादनुभूतविषयस्मृत्यभावश्च प्रसज्येतेत्याह । स्मृत्यभाव इति । क्षणात् क्षणिकत्वात्सदा स्मृत्यभावः प्रसज्येतेत्यर्थः । स्मृतिहेतुसंस्कारोऽपि ते दुर्लभ इत्याह । क्षणिकत्वादिति । धीः क्व चिदपि संस्कारं नैवाधत्ते न निक्षिपति सर्वस्य क्षणिकत्वादित्यर्थः । चशब्दान्न स्वात्मन्यपि स्वस्या अपि क्षणिकत्वादित्यर्थः ॥ २५ ॥

क्व चिदित्युक्तं स्फुटयति ।

(२६) आधारस्याप्यसत्त्वाच्च तुल्यतानिर्निमित्ततः ।
स्थाने वा क्षणिकत्वस्य हानं स्यान्न तदिष्यते ॥ २७८ ॥

आधारस्येति । यत्र संस्कार आधातव्य आत्मन्यन्तःकरणे वा तस्याप्याधारस्य संस्काराधानकाले ऽसत्त्वाच्च स्मृत्यभाव इत्यन्वयः । यदुक्तं सादृश्यनिबन्धनो भ्रम एव प्रत्यभिज्ञानमिति, तद्दूषयति । तुल्यतेति । इत आरभ्य क्रियमाणं दूषणं क्षणिकविज्ञानमात्रवादेऽपि समानं ज्ञेयम् । तुल्यतानिर्निमित्तत इत्येकं पदं, तुल्यतायाः पूर्वापरक्षणयोः सदृशत्वस्य निमित्ताभावादित्यर्थः । गुणैरवयवैर्वा सामान्यं सादृश्यव्यवहारनिमित्तं तद्विज्ञानानां नास्ति, निर्गुणत्वान्निरवयवत्वाच्च, तथा पूर्वापरक्षणयोर्द्रष्टुरेकस्यासत्त्वाच्च न सादृश्यसिद्धिरतस्तुल्यताया असिद्धेर्न तन्निबन्धनं प्रत्यभिज्ञानमित्यर्थः । अथ पूर्वापरक्षणसादृश्यद्रष्टा स्थायी कश्चिदास्थीयते तत्राह । स्थाने वेति । तत्र क्षणिकत्वहानं नेष्यते त्वयेति शेषः ॥ २६ ॥

यत्तु क्षणिकत्वादिभावनया स्थायित्वादिभ्रान्तिशान्तिर्मुक्तिरित्युच्यते बौद्धैस्तदपि नोपपद्यत इत्याह ।

(२७) शान्तेश्चायत्नसिद्धत्वात्साधनोक्तिरनर्थिका ।
एकैकस्मिन् समाप्तत्वाच्छान्तेरन्यानपेक्षता ॥ २७९ ॥

शान्तेश्चेति । शान्तेरयत्नसिद्धत्वमेव साधय,त्येकैकस्मिन्निति । भावनानामेकैकस्मिन् क्षणे समाप्तत्वात्तत्सन्तानस्य चावस्तुत्वादेकैकस्मिंश्च भ्रान्त्यभावाच्छान्तेरन्यनिरपेक्षता सिद्धा, ऽतस्तत्साधनविधानोक्तिर्निरवकाशेत्यर्थः ॥ २७ ॥

किं चास्मिन् मते लोकेऽपि साध्यसाधनभावो न घटत इत्याह ।

(२८) अपेक्षा यदि भिन्नेऽपि परसन्तानइष्यताम् ।
सर्वार्थे क्षणिके कस्मिंस्तथाप्यन्यानपेक्षता ॥ २८० ॥

अपेक्षा यदीति । कार्यकारणलक्षणानामत्यन्तविलक्षणत्वाद् भिन्नेष्वत्यन्तव्यावृत्तेऽपि क्षीरे यदि दध्नोऽपेक्षा तदा परसन्ताने सिकतादावपि दध्नोऽपेक्षेष्यतामत्यन्तभेदाविशेषात् कथं नेष्यतइत्यर्थः । तथा च सिकताभ्योऽपि दधि जायेतेत्यतिप्रसङ्ग इति भावः । प्रसिद्ध्यवष्टम्भेनातिप्रसङ्गपरिहारशङ्कां तदीयामनूद्य निराकरोति । सर्वार्थइति । सर्वस्य जनस्यार्थे ऽर्थ्यमाने कार्यकारणभावेन स्थिते दधिक्षीरादौ वस्तुनि क्षणिकेऽपि कस्मिंश्चित्क्षीरएव कस्य चिद्दध्नोऽपेक्षा न सर्वत्रेति लोकप्रसिद्धेर्नातिप्रसङ्ग इति चेदिति शङ्कानुवादार्थः । तथापि प्रसिद्ध्याश्रयणेऽपि क्षणिकपक्षे ऽन्यानपेक्षतैवेति परिहारभागार्थः ॥ २८ ॥

तत्र हेतुमाह ।

(२९) तुल्यकालसमुद्भूतावितरेतरयोगिनौ ।
योगाच्च संस्कृतो यस्तु सोऽन्यं हीक्षितुमर्हति ॥ २८१ ॥

तुल्यकालेति । यौ भावौ तुल्यकालसमुद्भूतावेककालेन लब्धात्मकौ इतरेतरयोगिनौ परस्परं संबद्धौ च यथा पर्जन्याङ्कुरौ तयोर्मध्ये यस्तु भावोऽङ्कुरलक्षणः पर्जन्ययोगात् संस्कृतश्च लब्धातिशयश्च भवेत्स हि खल्वन्यमुपकारिणमीक्षितुमर्हति न क्षणिकस्तथा प्रसिद्ध्यभावादतः क्षणिकानां भिन्नकालतया परस्परसंबन्धाभावेनोपकार्योपकारकत्वायोगान्नापेक्षा घटयितुं शक्यतइति भावः ॥ २९ ॥

तदेवं क्षणिकमतं निराकृत्य शून्यमतं निराकरिष्यन्नादौ स्वमतसामञ्जस्यमुपन्यस्यति ।

(३०) मृषाध्यासस्तु यत्र स्यात्तन्नाशस्तत्र नो मतः ।
सर्वनाशो भवेद्यस्य मोक्षः कस्य फलं वद ॥ २८२ ॥

मृषेति । यद्वा वेदान्तिमतेऽपि ब्रह्मात्मनोऽनाधेयातिशयत्वात् क्षणिकमतइव तुल्या मोक्षानुपपत्तिरित्याशङ्क्य परमार्थतोऽतिशयायोगेऽपि स्थायित्वात्फलित्वोपपत्तेर्मैवमित्याह । मृषेति । यत्राधिष्ठाने ब्रह्मात्मनि कर्तृत्वादिसंहाराध्यासो मृषा मिथ्या, अथ वा मृषाध्यासोऽविद्यानिबन्धनो भ्रमः कर्तृत्वादिसंसारप्रतिभासो यत्र स्यादिति योजना । तत्राहं ब्रह्मास्मीति विद्यया तत्रैव तन्नाशोध्यस्तनाश इति नो मतोऽस्माकं मतमित्यर्थः । तथा च योऽज्ञानाद्बन्धानुभववांस्तस्य ज्ञानाद्बन्धनिवृत्त्या शुद्धस्वरूपानुभवः पुरुषार्थ इति वेदान्तिमतं समञ्जसमिति भावः । इदानीं शून्यमते दोषमाह । सर्वनाश इति । अनुभवितुरभावात्कस्य पुरुषार्थः सर्वनाश इति वदेत्यर्थः । अधिष्ठानारोप्ययोरुभयोरपि नाशे फलाभावात्फलासिद्धेर्मोक्षासिद्धिरिति भावः ॥ ३० ॥

सर्वनाश एव मोक्षो बलादापतति, परमार्थभावस्यास्तित्वे प्रमाणाभावादित्याशङ्क्याह ।

(३१) अस्ति तावत्स्वयं नाम ज्ञानं वात्माऽन्यदेव वा ।
भावाभावज्ञतस्तस्य नाभावस्त्वधिगम्यते ॥ २८३ ॥

अस्तीति । स्वयं नामास्तीत्यविवादं सर्ववादिनां, स च ज्ञानं वा आत्मा वाऽन्यच्छून्यं वेति परं विकल्पस्तस्याभावस्तु नाधिगम्यते, शून्यता तु न प्रामाणिकीत्यर्थः । कुत इति तत्राह । भावाभावज्ञत इति । लोकव्यवहारसिद्धार्थानां भावाभावाभिज्ञत्वादन्यथा स्थिरस्य कस्य चित् साक्षिणोऽभावे सर्वव्यवहारलोपप्रसङ्ग इत्यर्थः ॥ ३१ ॥

तस्याप्यभावः कस्य चिद्भातीत्याशङ्क्य यस्य भाति तस्यैव सत्त्वप्राप्तेर्न शून्यत्वशङ्कावकाश इति परिहरति ।

(३२) येनाधिगम्यतेऽभावस्तत्सत्स्यात्तन्न चेद्भवेत् ।
भावाभावानभिज्ञत्वं लोकस्य स्यान्न चेष्यते ॥ २८४ ॥

येनेति । अथ वा उक्तमेवार्थं प्रपञ्चयति । येनेति । येनाभावोवगम्यते सर्वस्य तत्सदेव स्यात्, विपक्षे दोषमाह । तन्न चेदित्यादिना । अस्तु लोकस्य भावाभावानभिज्ञत्वमिति चेत्, नेत्याह । न चेष्यतइति । केनापि सोऽभिज्ञो निराकर्त्तुं न शक्यते निराकर्त्तुरेव तत्स्वरूपत्वात्तस्य च सत्त्वात्तस्यापह्नववचनं स्वानुभवविरुद्धमेवेत्यर्थः ॥ ३२ ॥

यद्यपि भावाभावविभागज्ञं किं चिदस्तीत्यवगतं, तथापि तत्कीदृशमिति विशेषतो निर्द्धारणे कारणं नास्तीत्याशङ्क्य तत्स्वरूपमुपपादयति ।

(३३) सदसत्सदसच्चेति विकल्पात्प्रागयदिष्यते ।
तदद्वैतं समत्वात्तु नित्यं चान्यद्विकल्पितात् ॥ ३८५ ॥

सदसदिति । साक्षिस्वरूपं जगच्च सद् असत्सदसद्रूपमिति च यो विकल्पो विवादस्तस्मात्प्रागेव सिद्धं निरालम्बनविकल्पानुपपत्तेर्यत्स्वरूपमिष्यते तत्त्वद्वैतं, तत्र हेतुः समत्वादिति, विकल्पात्प्राग् वैषम्यहेत्वभावादित्यर्थः, द्वैतजडविलक्षणत्वं तत्स्वरूपमभिधायाविनाशित्वं विशेषान्तरमाह । नित्यं चेति । अनृतविलक्षणत्वेन सत्यत्वं च विशेषान्तरमाहान्यद्विकल्पितादिति । विकल्पात् प्रागयदिष्यतइत्यत्र स्वतः सिद्धत्वोक्त्या ज्ञानरूपत्वमुक्तम्, अद्वैतमित्यानन्त्यमुक्तं नित्यमिति कूटस्थत्वोक्त्या दुःखाभावस्य सूचितत्वात्तदविनाभूतानन्दरूपता ध्वनिता । तथा च सत्यज्ञानानन्तानन्दरूपमात्मतत्त्वमित्यनुभवादेव सिद्धमिति न तत्र कारणान्तरं मृग्यमिति भावः ॥ ३३ ॥

नानाविधे द्वैते प्रतीयमाने कथमद्वैतमात्मतत्त्वमनुभूयतइत्यत आह, यद्वा द्रष्टुः सत्यत्वमुपपाद्य दृश्यस्य विकल्पात्मकतयाऽनृतत्वं प्रतिपादयति ।

(३४) विकल्पोद्भवतोऽसत्त्वं स्वप्नदृश्यवदिष्यताम् ।
द्वैतस्य प्रागसत्त्वाच्च सदसत्त्वादिकल्पनात् ॥ १८६ ॥

विकल्पोद्भवत इति । द्वैतस्यासत्त्वं परमार्थत्वाभाव इष्यतां, कुतो, विकल्पोद्भवतो, विकल्परूपेणोद्भूतत्वा,त्स्वप्नदृश्यवदिति योजना, द्वैतं न परमार्थसत्, दृश्यत्वा,त्स्वप्नदृश्यवदित्यर्थः । हेत्वन्तरमाह । प्रागिति । सदसत्त्वादिविकल्पनात्प्रागसत्त्वाच्च स्वप्नदृश्यवदिति संबन्धः । नहि द्वैतस्याज्ञातसत्त्वे प्रमाणमस्तीति भावः ॥ ३४ ॥

न्यायतो द्वैतमिथ्यात्वमुपपाद्य शास्त्रादपि तन्मिथ्यात्वमुपपन्नमित्याह ।

(३५) वाचारम्भणशास्त्राच्च विकाराणां ह्यभावता ।
मृत्योः स मृत्युमित्यादेर्मम मायेति च स्मृतेः ॥ २८७ ॥

वाचारम्भणेति । "वाचारम्भणं विकारो नामधेय"मिति श्रुतिशास्त्राद्विकाराणामभावता सिद्धेति शेषः । वाचारम्भणशब्दो ह्यनृतत्ववचनोऽवगम्यते मृत्तिकेत्येव सत्यमिति कारणसत्यत्वावधारणादित्यर्थः । मृत्योः स मृत्युमिति शास्त्रेण द्वैतदर्शनस्य निन्दितत्वात्सत्यत्वे द्वैतस्य तदयोगादर्थादनृतत्वं तस्योक्तमित्यर्थः । आदिशब्दाच्चेह नानास्ति किं चनेत्यादि साक्षाद् द्वैतापवादकं शास्त्रं गृह्यते । मम मायेत्यत्र

"मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते"

इति गुणमय्याः सकार्यायाः परमात्मज्ञाननिवर्त्यत्वस्य भगवताऽनुशासनात्सत्यत्वे तदनुपपत्तेर्मायिकत्वं द्वैतस्य सिद्धमित्यर्थः ॥ ३५ ॥

तदेवं श्रुतियुक्तिभ्यां द्वैतमिथ्यात्वप्रतिपादनेनात्मनो ऽद्वितीयत्वे दृढीकृते सत्यशुद्धिकारणाभावात्तस्य विशुद्धिरपि सिद्धतीत्याह ।

(३६) विशुद्धिश्चात एवास्य विकल्पाच्च विलक्षणः ।
उपादेयो न हेयोत आत्मा नान्यैरकल्पितः ॥ २८८ ॥

विशुद्धिरिति । अस्यात्मनो विशुद्धिर्धर्माधर्मतत्फलसंस्पर्शाभावो ऽत एव द्वैतस्यानृतत्वादेव स च यतो विकल्पाद्विलक्षणस्तद्विपरीतस्वभावोत एव आत्मा नोपादेयो हेयो वा भवति हानोपादाने हि मूर्त्तविषये नामूर्त्ते प्रत्यगात्मनि ते संभवत इत्यर्थः । किं चान्यैरकल्पितोऽन्यैः कल्पयितुमशक्यत्वादपि विशुद्ध एवात्मेत्यर्थः । नहि सर्वकल्पनाधिष्ठानं केन चित्कल्पयितुं शक्यते, अतो नित्यशुद्ध इति भावः ॥ ३६ ॥

कस्मादात्मा कल्पितो न भवतीत्याशङ्क्य कल्पनाहेतोरज्ञानस्य वस्तुत आत्मन्यनात्मनि चाभावादित्याह ।

(३७) अप्रकाशो यथादित्ये नास्ति ज्योतिः स्वभावतः ।
नित्यबोधस्वरूपत्वान्नाज्ञानं तद्वदात्मनि ॥ २८९ ॥

अप्रकाश इति । अनात्मनो ऽज्ञानकल्पितत्वादेव तत्र तदभाव इति द्रष्टव्यम् ॥ ३७ ॥

यथा नित्यबोधस्वरूपत्वादज्ञानमात्मनि वस्तुतो नास्ति, तथा सर्वविक्रियारहितस्वभावत्वादवस्थान्तरं कूटस्थताप्रच्युतिरूपं तस्य नास्तीत्याह ।

(३८) तथा ऽविक्रियरूपत्वान्नावस्थान्तरमात्मनः ।
अवस्थान्तरवत्त्वे हि नाशोस्य स्यान्न संशयः ॥ २९० ॥

तथाविक्रियेति । विपक्षे दोषमाह,वस्यान्तरवत्त्वे हीति ॥ ३८ ॥

मोक्षस्यावस्थान्तरत्वात्कथमवस्थान्तराभाव इति तत्राह ।

(३९) मोक्षो ऽवस्थान्तरं यस्य कृतकः स चलो ह्यतः ।
न संयोगो वियोगो वा मोक्षो युक्तः कथं चन ॥ २९१ ॥

मोक्ष इति । यस्य वादिनो मते मोक्षो ऽवस्थान्तरमात्मनः स्यात्तस्य मते कृतको मोक्षः स्यात्प्रागवस्थायां स्थितायां नष्टायां वा तदन्यावस्थायोगित्वानुपपत्तेरतः स मोक्षश्चलो ऽनित्य एव स्यादित्यपुरुषार्थतापत्तिरित्यर्थः । मा भूदवस्थान्तरं मोक्षस्तथापि ब्रह्मणा संयोगो वा प्रकृतेर्वियोगो वा मोक्षो भविष्यतीति मतान्तरमाशङ्क्य प्रत्याह । न संयोग इति ॥ ३९ ॥

अयुक्तत्वे हेतुमाह ।

(४०) संयोगस्याप्यनित्यत्वाद्वियोगस्य तथैव च ।
गमनागमने चैव स्वरूपं तु न हीयते ॥ २९२ ॥

संयोगस्येति । कृतकस्यानित्यत्वनियमादित्यर्थः । ननु जीवस्य संसारदेशात्परमात्मदेशगमनं वा परमात्मनो वा स्वोपासकानुग्रहाय तं प्रत्यागमनं मोक्ष इत्याशङ्क्याह । गमनागमने चैवेति । न मोक्षो युक्त इति पूर्वेणानुषङ्गः, जीवपरयोर्द्वयोरप्यविक्रियत्वाद्गमनागमनायोगादित्यर्थः, परमते दोषमुक्त्वा स्वमते निर्दोषतामाह । स्वरूपं त्विति । न हीयते न विनश्यति, अत आत्मस्वरूपमेव मोक्षो युक्त इत्यर्थः ॥ ४० ॥

॥ एतत्प्रकरणशेष उत्तराङ्के ॥

## ॥ अथ बालभारतस्य ॥

### ॥ पञ्चमः सर्गः ॥

पाराशरो मुनिपतिः स मुदे हृदा यं
लक्ष्मच्छलेन कलयन् हरशेखरोऽपि ।
तद्वद्यमानजगदिष्टपुराणवाणी-
गर्भाद्गलद्भिरमृतैरमृतांशुरासीत् ॥ १ ॥

विस्तारशालिनि कुमारकुलश्रमेक्षा-
हेतोः कृती विदुरदर्शितभूविभागे ।
भीष्मोऽन्यदा गुरुगिरा नगरस्य बाह्ये
प्रापञ्चयत् किमपि मञ्चकचक्रवालम् ॥ २ ॥

भीष्मादिकेषु धृतराष्ट्रपुरोगमेषु
भूपेषु भूरिषु विभूषितमञ्चकेषु ।
रङ्गं प्रविश्य गुरुरुज्ज्वलवेषधारी
पुत्रान्वितो बलिविधिं विधिवद्व्यधत्त ॥ ३ ॥

नानाविधप्रहरणग्रहणप्रवीणा
वीणामृदङ्गपटहादिषु वादितेषु ।
पादाङ्गुलिस्थितिनतोन्नतलोकदृष्टा
हृष्टास्ततोऽङ्कमविशन् वशिनः कुमाराः ॥ ४ ॥

आज्ञां गुरोर्गुणगुरोरधिगम्य वीरा
धर्माङ्गजप्रभृतयोऽथ पृथुप्रभावाः ।
तत्रास्त्रविस्तृतिकलातनुलाघवानि
भूजानिमण्डलमुदे कलयांबभूवुः ॥ ५ ॥

उद्यद्गदौ कृतमदौ तदनु प्रवीरौ
वन्यद्विपाविव विकस्वरचण्डशुण्डौ ।
विक्षोभिताखिलसभौ रभसेन भीम-
दुर्योधनौ निजमदर्शयतां विरोधम् ॥ ६ ॥

दुर्वारवैरघनयोरनयोरिदानीं
क्षोभेण मा भवतु भेदभयं सभायाः ।
अन्तस्तयोर्गुरुगिरेति निरोद्धुमश्व-
त्थाम्ना स्थितं गिरिवरेण गरीयसेव ॥ ७ ॥
द्रोणाज्जयाय विदितां मुनितोऽस्त्रविद्यां
विद्योतमानविनयस्तनयः पृथायाः ।
भूपेषु विस्मयरसप्रसरेण चित्र-
रूपेष्वदीदृशदनीदृशविक्रमश्रीः ॥ ८ ॥
धीरैर्गुणध्वनिभिरर्जुनकार्मुकस्य
त्रस्तस्तदा दिनपतेर्ध्रुवमष्टमोऽश्वः ।
तन्मुक्तमार्गणगणप्रभवैरदायि
भ्रान्तिस्तदैव दिवि गन्धवहैर्ग्रहेभ्यः ॥ ९ ॥
आसीत् तदार्जुनधनुर्गुणमुक्तबाण-
पक्षोद्भवो नभसि कोऽपि भृशं स वायुः ।
उन्मूलितारिकुलमानमहीरुहेण
येनाघटि क्षितिभृतामपि मौलिकम्पः ॥ १० ॥
आसीद्गुरुर्गिरिरिवाणुरिवातिसूक्ष्मो
दृश्यस्तडिल्लव इव द्रुतमप्यदृश्यः ।
सोऽभ्युत्पपात पतगेन्द्र इवान्तरिक्षं
सारस्वतौघ इव भूमितलं विवेश ॥ ११ ॥
नीरं यशो निजमिव स्वमिव प्रताप-
मग्निं स्वकीयमिव गौरवमद्रिजालम् ।
तन्वन्निति क्षितिपभूर्विभवद्विभावो
दिव्यास्त्रदर्शनरसः स तदा मुदेऽभूत् ॥ १२ ॥
सर्वास्त्रकौशलकलाकलितेऽथ तस्मि-
न्नित्थं स्थिते भुजभुजिष्यभुजंगराजे ।
लोकस्तदाननविलोकरसस्तदाभू-
द्बद्धश्चमत्कृतगुणैरिव निश्चलाङ्गः ॥ १३ ॥
दासीकृतक्षयपयोधितरङ्गभङ्गः
किंकारिताद्रिभरभैरववज्रपातः ।
रङ्गाद्बहिर्बहु बभूव कुतोऽपि दोष्णो-
रास्फालनध्वनिरथ ध्वनितान्तरिक्षः ॥ १४ ॥
मत्तद्विपेन्द्र इव सान्द्रमदः पुरस्ताद्
द्वेधाविघट्टितपुरोजनदत्तवर्त्मा ।
रङ्गेऽविशत् सहजकाञ्चनकर्णिकावान्
कर्णस्ततः कवचवत्त्वचमेव बिभ्रत् ॥ १५ ॥
कोऽयं महाभट इति क्षितिपैरशेषै-
रालोक्यमानवदनः सदनं मदस्य ।
द्रोणं कृपं च सपदि प्रणिपत्य पार्थ-
स्पर्धि व्यधत्त सकलाः स्वकलाः किलासौ ॥ १६ ॥
इत्यर्जुनप्रतिभटाय भटाय तस्मै
चम्पां ददौ कुरुपतिः कृतसौहृदाय ।
अत्रान्तरे च नृपसारथिराजगाम
कर्णो ननाम तमतः पितृगौरवेण ॥ १७ ॥
दत्ता त्वया किमिव सूतसुताय चम्पा
लम्पाक[1] पाकरिपुसूनुरिति ब्रुवाणः ।
भीमेन साकमथ चापमवाप कर्ण-
दुर्योधनावपि धनुर्दधतुः क्रुधार्तौ ॥ १८ ॥
यावत् कुलक्षयकरं कलयन्ति नाङ्के
शङ्काकुले सकलराजकुले कलिं ते ।
तेषां प्रतापदहनैरिव तप्तमूर्ति-
स्तावत् पपात तपनोऽप्यपराम्बुराशौ ॥ १९ ॥
अग्रस्फुरन्निजनिजप्रबलप्रताप-
श्रीभिस्तदास्ततमसो नवदीपिकाभिः ।
ते कौरवा गृहमगुर्मदगौरवाढ्या-
स्ते पाण्डवाः कलितविक्रमताण्डवाश्च ॥ २० ॥
मत्वा स्पृहामथ गुरोर्गुरुदक्षिणायां
जित्वा नियन्त्रितमदद्द्रुपदं कुमाराः ।
तं चाह साहसरसेन हसन् विरोधं
मुक्त्वा कृपीपतिरवाप्तकृपः पुरस्तात् ॥ २१ ॥
प्राग्बालकेलिसुहृदा प्रतिपन्नमर्धं
लब्धस्य राज्यविभवस्य किल त्वया मे ।
आसाद्य तं द्रुपद यन्मदतो न्यकार्षी
रोषेण मां तदिदमद्य फलं तवाभूत् ॥ २२ ॥
मित्रं ममासि पितृमित्रसुतोऽसि तस्मा-
दुक्तं स्वमेव परिपालय भूमिपाल ।
उक्त्वेति राज्यविषयार्धमपि प्रदाय
प्रैषीद्गुरुर्द्रुपदमादृतगुप्तवैरस् ॥ २३ ॥

१ लम्पाको लम्पटः ।

त्रिभिर्विशेषकम् ।

तस्मिन् जये पृषतपार्थिवनन्दनस्य
विश्वाधिकौ हरिसुतौ सततं विचिन्त्य ।
धर्माङ्गजं जनितपौरजनानुरागं
मत्वा च कौरवपतिः पितरं जगाद ॥ २४ ॥

तात क्व तावककुलस्य कथापि पार्था
येनानुरञ्जितजनाश्च जयोज्ज्वलाश्च ।
एतान् विवासय निवासय तत्र दूरे
श्रीवारणावतपुरे छलतः कुतोऽपि ॥ २५ ॥

श्रुत्वेति सूनुवचनानि युधिष्ठिराय
तां वारणावतपुरीमदित प्रसादात् ।
एषा चितौ सुरपुरीव सुरैरिवैषा
लोकैर्वृतेति कथयन्नथ सर्वथान्धः ॥ २६ ॥

भावं विदन् भृशममुष्य महासहायं
मत्वा तदङ्गजगणं सहजद्विषन्तम् ।
नत्वा नृपः कृपकृपीपतिभीष्ममुख्यान्
श्रीवारणावतपुराय ततः प्रतस्थे ॥ २७ ॥

पौरान् विसृज्य सकलान् सकलाभिरामः
शिक्षाप्रदानविदुरं विदुरं च नत्वा ।
कुन्तीयुतः सह सहोदरमण्डलेन
तत् पत्तनं विदितहर्षपदं प्रपेदे ॥ २८ ॥

तन्नागसाह्वयमभूदपभूति तस्मिं-
स्तद्वारणावतपुरं त्वतिभूति याते ।
यन्मुञ्चते दिनकरः किल तत्र रात्रि-
र्यत्रैष दीव्यति विभुर्दिवसो हि तत्र ॥ २९ ॥

कूटाशयेन सचिवेन पुरोचनेन
प्राक् प्रेषितेन रिपुभिर्धृतराष्ट्रपुत्रैः ।
निर्मापितं जतुगृहं दहनैकयोग्यं
नीतश्छलेन दशमेऽह्नि पृथातनूजः ॥ ३० ॥

तन्मुञ्जसर्जरसयावकवंशकाशसर्पिः-
शणप्रभृतिभिर्द्रविणैः प्रकॢप्तम् ।
आग्नेयमेतदिति सद्म विभाव्य गन्धै-
र्धर्माङ्गभूरिदमभाषत भीममुख्यान् ॥ ३१ ॥

शङ्क्यं सदा हुतवहाच्च विषाच्च दिष्टु
युष्माकमस्त्यविदितो नच कोऽपि पन्थाः ।
शिक्षामिमामदित मे विदुरस्तदानी-
मागच्छतः पथि वचोभिरमूढगूढैः ॥ ३२ ॥

शिक्षेयमद्य विदिता सदनेऽत्र नेत्र-
मार्गं गते हुतवहद्रविणावकॢप्ते ।
मन्ये पुरोचनममुं च सुयोधनार्थे
विश्वासघातिनमिति प्रथितप्रपञ्चम् ॥ ३३ ॥

विश्वस्तवद्दृशमिहैव गृहे सुरुङ्गां
निर्माय नाशकृतये सततं वसामः ।
दाहक्षणे खलु मृता इति वञ्चयित्वा
दुर्योधनं च सचिवं च सुखं चरामः ॥ ३४ ॥

एवं प्रकाश्य नृपमत्र वसन्तमेत्य
कोऽप्याह गुप्तखनको विदुरप्रयुक्तः ।
वर्षोषितान् निशि शठः सचिवोऽत्र कृष्ण-
पक्षे स धक्ष्यति बताह्नि चतुर्दशे वः ॥ ३५ ॥

यत् फाल्गुनाष्टमदिने पुरमेतदेतः
स्वामिन् भवांस्तदवधारयतां दिनं तत् ।
मित्रं स्वमेव खनकं विदुरः सुरुङ्गां
निर्मातुमातुरतया खलु मां न्ययुङ्क्त ॥ ३६ ॥

मत्वेति राज्ञि सहसा रहसि प्रसन्ने
तेन व्यधायि खनकेन गृहे सुरुङ्गा ।
तद्दाहकर्मणि शठः स पुरोचनोऽपि
चक्रे मतिं जतुगृहाग्रगृहाधिवासी ॥ ३७ ॥

पञ्चाङ्गजामशनदानमिषान्निषादी-
मत्राधिवास्य सुमतिर्नृपतिर्निशीथे ।
भीमेन मन्त्रिभवने च विमोच्य वह्निं
कुन्त्या युतोऽथ विवरेण ययौ सबन्धुः ॥ ३८ ॥

धूमैर्मुहुर्मलिनयन् जगदन्तरालं
दुर्योधनस्य विदितैरिव दुर्यशोभिः ।
साकं शठेन सचिवेन पुरोचनेन
दूरादथो जतुगृहं दहनो ददाह ॥ ३९ ॥

दिष्ट्या ययौ स जगदेकसुहृत् पृथाभूः
प्लुष्टो मयाधमतमश्च पुरोचनोऽपि ।
इत्यट्टहासमिव यं गृहवंशदाहे-
र्वह्निश्चकार मिलितस्त्वत्र एव लोकः ॥ ४० ॥

धिक् त्वां मुखं मखभुजां धिगपि द्विजास्त्वा-
मर्चन्ति धिक् च शुचितां तव येन दग्धः ।
दैत्यावतारधृतराष्ट्रसुतप्रियार्थं
देवद्विजप्रियतमश्च शुचिश्च राजा ॥ ४१ ॥

इत्यात्मनः किल कलङ्कमलीकमेव
यच्छन्तमुच्छलितशोकमतीव लोकम् ।
कान्त्या हसन्निव शिखी पथि गच्छतस्ता-
नालोकताम्बरनिखातशिखातरङ्गः ॥ ४२ ॥

युग्मम् ।

सौभाग्यभाग्यशुचितादिगुणैर्न केषां
नेत्रप्रियाः समभवन् भुवि पाण्डवास्ते ।
तद्दाहनिश्चयवशादिति नागराणां
नेत्रैरमोचि जलमग्निशमाय मन्ये ॥ ४३ ॥

हा धर्म कर्मपर हा निजबान्धवैक-
प्राकार हा कलशयोनिकलैकधुर्य ।
हा रूपसंभ्रमनिधी क्व गता भवन्तो
लोकारवैरिति निशाप्यसुखाद्विलिल्ये ॥ ४४ ॥

दुर्योधनस्य सुहृदेष युधिष्ठिरादि-
व्यापादने व्यवसितोऽयमिति क्रुधार्तः ।
प्रातः प्रदग्धवपुषोऽपि पुरोचनस्य
लोकः कपालमपिषद्दृढपादघातैः ॥ ४५ ॥

तां वीक्ष्य पञ्चतनयां च पुरो निषादीं
चक्रन्द मातृयुतवीरधियैव लोकः ।
तच्चाङ्घ्रिचारितरजःप्रसरैः सुरङ्गा-
द्वारं चकार खनकः स लसन्नलक्ष्यम् ॥ ४६ ॥

आसीत् तवेप्सितमगुर्दिवि पाण्डुपुत्रा-
स्त्वद्दीपिताग्निजतुमन्दिरकन्दरस्थाः ।
राज्यं चिरं कुरु पुरीपुरुषप्रयुक्तां
श्रुत्वा कथामिति रुरोद दृढं नृपोऽन्धः ॥ ४७ ॥

मन्त्रज्ञभूपतनुभूविदुरादिवर्जं
लोकेऽखिलेऽपि खलु निर्भरजातशोके ।
सर्वौर्ध्वदैहिकविधानविधीनमीषा-
मेष स्वयं क्षितिधवो रचयांचकार ॥ ४८ ॥

ते चाग्निदग्धसदनाद्दिशि दक्षिणस्यां
कुन्तीसुता ययुरहर्निशमप्रमत्ताः ।
गङ्गां कदाचन विलङ्घ्य निदाघकाले
सायं स्थिता गहनसीम्नि वटस्य मूले ॥ ४९ ॥

भीमोऽथ सारसरवाननुसृत्य तूर्णं
तृष्णार्तबन्धुकृतये ह्रदसीम्नि यातः ।
पीत्वा पयः स्नपनमप्ययमारचय्य
धीरः पुटीरचितनीरभरः समेतः ॥ ५० ॥

बालप्रबालशयनीयविलासयोग्यान्
बन्धून् विलोक्य जननीं च भुवि प्रसुप्तान् ।
धिग्दुर्विधेर्विलसितानि बलं च धिङ्मे
ध्यायन्निदं हृदि रुरोद वृकोदरोऽसौ ॥ ५१ ॥

दृष्ट्वाथ तानिह वने क्षुधितो न्ययुङ्क्त
हन्तुं हिडम्बपलभुग्भगिनीं हिडम्बाम् ।
तस्यां पुनः स्ववशताजुषि स प्रकुप्यन्
भीमेन हन्त निहतो हरिणेव दन्ती ॥ ५२ ॥

कामार्तिदीनवचनामथ तां हिडम्बां
मातुर्नृपस्य च गिरा भजति स्म भीमः ।
नित्यं तया सह विलस्य च सर्वदिक्षु
सायं स्वबान्धवसमीपमुपाययौ च ॥ ५३ ॥

जज्ञे तयोरथ घटोत्कचनामधेयः
सूनुर्बली विपुलशस्त्रभृतां वरेण्यः ।
पृष्ट्वाथ भीममगमद्विपिनं हिडम्बा
स्मार्योऽस्मि कार्यत इतीरितगीः सुतोऽपि ॥ ५४ ॥

श्रान्तान् वहन् वपुषि वल्कजटाभृतोऽथ
बन्धून् गुरुक्षितिरुहानिव जङ्गमोऽद्रिः ।
अध्वेक्षिताचितपराशरसूनुदिष्ट्या
भीमो जगाम तरलः पुरमेकचक्राम् ॥ ५५ ॥

विप्रस्य कस्यचिदुपाश्रयमाप्य तस्थु-
स्ते भैक्ष्यभोजनभुजो भुजशालिनोऽपि ।
अस्मिन् पुरे सरसि वा बकवारभुज्य-
मानप्रजातिमिकुले विधुरत्वभाजि ॥ ५६ ॥

वारे द्विजस्य निजवासपदप्रदस्य
कर्तुं चिरादुपकृतिं प्रहितो जनन्या ।
भीमो बकाय बहुभोज्यभरं गृहीत्वा
संकेतपर्वतशिलावलयं जगाम ॥ ५७ ॥

आहूय भोजनकृते बकदैत्यमन्न-
मश्नन्नयं स्वयमयन्त्रितशौर्यलक्ष्मीः ।
साटोपकोपममुमद्भुतसंगरेण
भीमो जघान घनजातमिवोरुवातः ॥ ५८ ॥

मद्वैवतेन करुणां मयि तन्वतासौ
भिन्नो निवेद्यमिदमित्यनुशिष्य विप्रम् ।
एकत्र न स्थितिरपि वसतां शुभेति
पञ्चालदेशमभिचेलुरमी कुमाराः ॥ ५९ ॥

तेषां यतां वनमहीषु पुरो महीयः-
पुण्येन मूर्त इव धर्मरसो बभूव ।
द्वैपायनो मुनिपतिर्भवतोयराशि-
द्वैपायनः शमरसप्रसरप्रशस्यः ॥ ६० ॥

अग्रे कलापिन इवाभिनवं पयोदं
चक्राभिधा इव दिनाधिपतिं नवीनम् ।
द्वैपायनं समवलोक्य मुदामुदाराः
पात्रं बभूवुरथ पाण्डुनरेन्द्रपुत्राः ॥ ६१ ॥

नीलीविनीलतनवः सततभ्रमेण
हर्षप्रकर्षपरिपूर्णमदास्तदानीम् ।
व्यासक्रमाम्बुजयुगे[1] नतबाहुपत्रा-
स्ते षट्पदद्युतिभृतोऽतिभृशं निपेतुः ॥ ६२ ॥

दत्त्वाशिषं निखिलभूतभवद्भविष्य-
द्विज्ञोऽभ्यधादिति मुदा मुनिपुंगवस्तान् ।
यात द्रुतं द्रुपदराजपुरे कुमारीं
राधाव्यधैकपणितां परिणेतुमेव ॥ ६३ ॥

पीत्वा द्रुतं द्रुतमधुच्छविमस्य वाचं
वाचंयमस्य वदनाम्बुजतस्ततोऽमी ।
आनन्दकन्दलपदा द्रुपदाय चेलु-
र्भृङ्गा इवोज्ज्वलयशस्ततिपुष्पिताय ॥ ६४ ॥

एतान् यतो रजनियामयुगे त्रिमार्गा-
तीरे ततोऽर्जुनधृतोल्मुकदृष्टमार्गान् ।
अङ्गारपर्ण इति तत्र जले विलासी
गन्धर्वमण्डलपतिः कुपितो रुरोध ॥ ६५ ॥

इन्द्राङ्गजप्रथितपावकमार्गणेन
दग्ध्वा रथं विधुरितः स तदा विरोधी ।
कुम्भीनसी तदवलाय पृथ्वां नृपं च
दैन्यान्ननाम तदमुच्यत सोऽर्जुनेन ॥ ६६ ॥

मैत्र्यं चकार सह तेन पृथातनूज-
स्तस्मै ददौ दहनमन्त्रमयं च शस्त्रम् ।
पार्थाय सोऽप्यदित विश्वदृशं च विद्यां
मेने युधे च हयपञ्चशतीमभेद्याम् ॥ ६७ ॥

उत्कोचकाख्यशुचितीर्थपतिं विधाय
धौम्यं पुरोहितममी सुहृदोऽस्य वाचा ।
वाचस्पतिव्यतिकरप्रहतोपसर्गान्
स्वर्गौकसोऽप्यजगणन् न तृणाय पार्थाः ॥ ६८ ॥

गत्वा पुरे द्रुपदभूमिधवस्य माचां
माचा समं किल कुलालगृहं विमुच्य ।
ते जग्मुराशु रमणीपणभूतराधा-
वेधव्यधाय नृपसंसदि षोडशेऽह्नि ॥ ६९ ॥

वीक्ष्य स्वयंवरणमण्डपमग्रतोऽथ
व्याचष्ट धर्मतनुजोऽनुजमण्डलाय ।
स्वर्गोऽवतारित इव द्रुपदेन सोऽयं
न्यक्कुर्वता पुरुषकारवशेन दैवम् ॥ ७० ॥

तस्यास्ततेषु निजकुण्डभुवो विवाह-
यज्ञेषु रत्नमयमञ्चयच्छलेन ।
आश्चर्यमग्नहृदयः स्वयमत्र चित्र-
विन्यस्तमूर्तिरिव पश्यति पावकोऽपि ॥ ७१ ॥

आकारितासु चलवन्दनमालयेव
भूसंचया नृपतिपङ्क्तिषु मण्डपोऽयम् ।
कन्यानुरूपमिह भूपमवीक्ष्य कंचि-
दुच्चैः समाह्वयति केतुकरैः सुरेन्द्रान् ॥ ७२ ॥

सूर्यात्मजामिलितजह्नुसुतासहस्र-
भ्रान्त्या सहर्षतरसप्रमहर्षिदृष्टाः ।
वेल्लन्ति धूपघनधूमघटाभिरामि-
रुद्भासिता नभसि वातहताः पताकाः ॥ ७३ ॥

आसन्नदर्शननरेन्द्रसुताननेन्दु-
प्रोज्जागरस्य नृपसंमदसागरस्य ।

[1] क्रमावत्र पादौ त्ववधिती।

वेलातरङ्गरवराशिरिवान्तरिक्ष-
कुक्षिंभरिः करटिगर्जिततूर्यनादः ॥ ७४ ॥
अस्मत्पतेः सितरुचेरपि चारुरूप-
माहुर्विदो द्रुपदराजसुतामुखेन्दुम् ।
इत्येत्य पुष्पगृहपुष्पमिषेण तारा-
स्तद्वीक्ष्य जग्मुरलिभिर्मलिनाननत्वम् ॥ ७५ ॥
इत्युन्मुदः कृतगिरो धृतविप्रवेषा-
स्ते शिश्रियुर्द्विजसमाजविराजितं यम् ।
मञ्चः स पञ्चभिरमीभिररातिजाति-
दर्पद्विपप्रलयपञ्चमुखश्चकाशे ॥ ७६ ॥
दास्यन् पृथातनुभुवे द्रुपदः कुमारीं
ज्ञातुं च तं धनुरचीकरदत्युदारम् ।
वैहायसाख्यकृतयन्त्रगतं च लक्ष्यं
पुत्रीविवाहपणमत्र कृती ततान ॥ ७७ ॥
आबिभ्रती कुसुमकार्मुककार्मुकाभं
पाणौ स्वयंवरणमाल्यमथो कुमारी ।
शृङ्गारसागरतरङ्गकरङ्गदम्बु-
बिन्दूपमभ्रमरराशिरवाप रङ्गम् ॥ ७८ ॥
मुक्तावलीमयकिरीटमरीचिवार-
गुच्छानुकारविमलातपवारणश्रीः ।
लीलाविलासचलनिर्मलकर्णिकाग्र-
जाग्रद्विभानिभचलाचलचामरोर्मिः ॥ ७९ ॥
पाणिद्वयीकलितनिर्मलमुग्धपुष्प-
मालाकृतप्रतिकृतिप्रतिमल्लहारा ।
अग्रेसरस्मरधनुर्गुणनादमञ्जु-
सिञ्जानकङ्कणकलापकनूपुरालिः ॥ ८० ॥
त्रिभिर्विशेषकम् ।
क्षीराम्बुराशिविहरल्लहरीनिभासु
संभ्रान्तभूमिविभुवृन्ददृगन्तभासु ।
लक्ष्मीरिव स्वयमराजत राजपुत्री
कस्मैचन प्रगुणिता पुरुषोत्तमाय ॥ ८१ ॥
भूमीभृतः श्रितमुदो मदिरेक्षणाया
दृग्वीक्षणादपि तदा मदमत्तचित्ताः ।
स्मेरस्मरस्मयविकारविसंस्थुलानि
चक्रुश्चिराय विविधानि विचेष्टितानि ॥ ८२ ॥

लीलापरः कररुहाग्रपरंपराभिः
केशानमार्जयदनङ्गकृताभिषङ्गः ।
भारं न मे सृजसि तन्वि शिरःस्थितापि
संज्ञामिमां विरचयन्निव कोऽपि भूपः ॥ ८३ ॥
कश्चिद्व्यलोकत विलासविसंस्थुलात्मा
स्वं पाणिकङ्कणमणौ वदनारविन्दम् ।
द्रष्टुं ललाटफलके ध्रुवमेतदीय-
लाभाक्षराणि विधिना विनिवेशितानि ॥ ८४ ॥
एतामनङ्गनृपजङ्गमराजधानीं
दृष्ट्वा विलासनलिने नयनं न्ययुङ्क्त ।
देवी सरोजवसतिर्लसतीति रूपा
नो वेति वीक्षितुमिवातिरसेन कश्चित् ॥ ८५ ॥
सद्यस्तदीयकुचदर्शनजातभाव-
संभाव्यमानमृदुपाणिजविभ्रमाभिः ।
कोऽप्येकपाणिपरिमीलितपत्रपङ्क्तिः
पस्पर्श नीररुहमन्यकराङ्गुलीभिः ॥ ८६ ॥
संमार्जयन् क्रमुकलेशनिवेशभाञ्जि
कश्चित् तृणाग्रलसनैर्दशनान्तराणि ।
दास्यं तवैव तरलाक्षि वहामि सोऽह-
मित्थं मुखे किल तृणं कलयांचकार ॥ ८७ ॥
शुभ्रप्रभोर्मिपुनरुक्तविलोलहारे
नेत्रं ददौ हृदि परः स्मरभावभिन्नः ।
व्यक्तां वधूमनवलोक्य पुरोऽतिदूरे
साक्षाद्विलोकितुमिवेह कृतप्रवेशाम् ॥ ८८ ॥
तस्यामनादरमना इव कश्चिदग्रे
नीचासनस्थितमभाषत यद् वयस्यम् ।
तेनैव नम्रितशिराः स रराज कामं
सामप्रविष्ट इव कामधराधिपस्य ॥ ८९ ॥
कोऽप्युल्लिलेख मृदुवामकराङ्गुलीभि-
र्भावाद्धुतो विततदक्षिणपाणिमध्यम् ।
अत्युत्सुकं नृपसुताकुचकुम्भयुग्म-
स्पर्शोत्सवे स्थिरयमाण इवात्तधैर्यः ॥ ९० ॥
एका विलोचनयुगेन हृदा च तन्वी
सर्वैरपि क्षितिधरैर्विधृता स्मरार्तैः ।

एषा पुनर्धनुरलोकत दृग्युगेन
चित्तेन दोर्युगमचिन्तयदर्जुनस्य ॥ ९१ ॥
अभ्यर्च्य चापमथ वाचमुवाच धृष्ट-
द्युम्नः कराम्बुजमुदञ्चय मुदा सदोऽन्तः ।
यः कश्चन स्पृहयति द्रुपदात्मजायै
राधां स विध्यतु धनुर्धरधैर्यधुर्यः ॥ ९२ ॥
इत्युक्तिभाजि पृषतान्वयमौलिरत्ने
यत्नं न के क्षितिभुजो विदधुर्भुजालाः ।
तच्चाधिरोपणविधावपि कोऽपि किंतु
दर्पो धनुर्निबिडतानिकषो न जातः ॥ ९३ ॥
केचिद्धनुःप्रगुणनेऽप्यभवन् विलक्षा
न प्राग्यशःक्षयभिया किल केऽप्युदस्थुः ।
मञ्चाच्चचाल तदनु द्विजवेषधारी
भीमानुजो गजगतिः सममग्रजेन ॥ ९४ ॥
मूर्त्या त्विषा च गमनेन च लीलया च
राजन्यकस्य हृदि दत्तपदौ तदानीम् ।
एतौ समीरसुरराजसुताविति श्री-
चित्तेशभीष्मगुरुभिर्विनियम्यमानौ ॥ ९५ ॥
किं भूचरौ तरणिशीतरुचौ किमन्यौ
रामाच्युतौ किमु गणेशगुहाविहैतौ ।
एतौ पुनः किमुदितौ रघुराजपुत्रा-
वित्याकुलैर्नृपकुलैः सहसैव दृष्टौ ॥ ९६ ॥
आश्लिष्यतामथ भुजाविव विक्रमस्य
मूर्तौ सभाग्रभुवमेकधनुर्भुवं तौ ।
नत्वा कृते धनुषि सज्जगुणेऽर्जुनेन
भीमो मदादिदमुवाच भुवामधीशान् ॥ ९७ ॥
त्रिभिर्विशेषकम् ।

रे भूभुजो यदि भुजोल्लसितं न किंचित्
तत् किं स्पृहाजनि सुतां प्रति पार्षतस्य ।
जज्ञे स्पृहाथ कथमागतमागतं वा
प्राणाधिके धनुषि तत् कथमाग्रहोऽभूत् ॥ ९८ ॥
आरम्भमेतमयथाबलमाकलय्य
युष्मान् न कोऽपि निषिषेध मिषेण मन्त्री ।
चापाधिरोपणविधावपि निष्फलानां
वचोऽपि न स्फुटितमद्य भुजाभृतां वः ॥ ९९ ॥
कान्तापणेऽत्र गुरुभीष्महृदि त्रपैव
कृष्णास्तु षोडशसहस्रवधूवशात्मा ।
रे कौरवा धृतभुजा मदगौरवाणां
किं वो मनःशमगुरुर्धनुरेतदेव ॥ १०० ॥
रे कर्ण कुण्डलित एष न किं त्वयापि
चापः पृथुप्रथितदोर्युगपाशभाजा ।
किं दुर्यशःकुवलये[1]न तवावतंस-
श्रद्धा बभूव भुवनावधि शाश्वतेन ॥ १०१ ॥
विप्रोऽप्ययं द्रुतमहीनमहीनकीर्ति-
लुण्ठाकशक्तिरपसादगुरुप्रसादः ।
वेध्यं प्रपातयति पश्यत रे नरेन्द्राः
कीर्तिं स्मरन् मनसि गौरहचं न कृष्णाम् ॥ १०२ ॥
इत्यूर्ध्वशब्दजयशालिनि तस्य वाक्येऽ-
नध्यायमेकमिव चेतसि चिन्तयत्सु ।
तत्रद्विजेषु निखिलेष्वपि तेषु सद्यो
मौनावलम्बिनि नमद्वदनाम्बुजेषु ॥ १०३ ॥
उग्रस्वधैर्यगजगर्जितरुदं कुमारी-
चेतोमयूरनवनृत्तपयोदनादम् ।
राजन्यगर्वगिरिवज्ररवं चकार
टङ्कारमिन्द्रतनुजोऽथ धनुर्गुणस्य ॥ १०४ ॥
युग्मम् ।

रागास्पदद्रुपदराजसुतावलोक-
पीयूषकन्दलितसान्द्रभुजाबलेन ।
पार्थेन पार्षतचमत्कृतविक्रमेण
वेध्यं व्यपाति भुवि मार्गणलीलयैव ॥ १०५ ॥
उत्तालतालतरलेषु तदा जनेषु
खे दुन्दुभिध्वनिपरेषु च दैवतेषु ।
कृष्णाननेषु च नृपेषु पितुर्गिराथ
कृष्णाऽर्जुनस्य वरमाल्यमयुङ्क्त कण्ठे ॥ १०६ ॥
अस्मान् व्यडम्बयदसौ बटुमात्रकाय
पुत्रीं ददाविति तदा द्रुपदाय दूनाः ।

१ निकषः परीक्षकः ।

१ कुवलयं नीलोत्पलमिति राजनिघण्टुः ।

तत्र स्वयंवरसभाभुवि भूभुजंगाः
क्षोभास्पदं सपदि शस्त्रभृतोऽभ्यधावन् ॥ १०७ ॥
भीमार्जुनौ तदिह संनिहितौ हिताय
तेनाश्रितौ हरिहराविव दुर्निरीक्षौ ।
उत्पाट्य पादपमुदारमदातिभीमो
भीमोऽथ पार्थिवचमूरुदमूमुलत् ताः ॥ १०८ ॥
हारानपि स्वकुसुमप्रतिमान् स्वकीय-
शाखासमानपि भुजानसमञ्जसेऽस्मिन् ।
मौलीनपि स्वफलजालसमान् नृपाणां
चिच्छेद भीमकलितः स तरुः क्रुधेव ॥ १०९ ॥
उर्वीरुहस्य कुसुमानि यशांसि राज्ञां
तस्य च्छदानि पुनराभरणानि तेषाम् ।
भीमाहवव्यतिकरे जगलुः सहैव
किंतु स्वयं निपतितो न स ते तु पेतुः ॥ ११० ॥
वेगादमूर्नृपसमूहचमूर्विमूल्य
भीमो जिगाय समरप्रसरेण शल्यम् ।
चापं तमेव युधि देवपतेः सुतोऽय-
मासाद्य कर्णमपवर्णमथ व्यधत्त ॥ १११ ॥
नायं नयो भुजभृतामिति ते निकामं
दामोदरेण युधि तत्त्वविदा निषिद्धाः ।
जग्मुर्नृपा निजपदान्यथ तेऽपि पाण्डु-
पुत्राः कुलालकुलसीम्नि समं कुमार्या ॥ ११२ ॥
तानागतानथ जगाद पृथाद्य भिक्षा
भोज्यैव पञ्चभिरभेदपरैर्मिलित्वा ।
मा भूदसत्यवचना जननीति तेऽपि
पञ्चापि तत्परिणये समयं वितेनुः ॥ ११३ ॥
आलोक्य भूपतनयामथ किं मयोक्त-
मित्याकुलां स्वजननीं प्रतिबोध्य धीराः ।
स्नेहादुपेत्य हरिसीरियुगे प्रयाते
भिक्षार्थिनः पुरि गताश्च समागताश्च ॥ ११४ ॥
मातुः पुरस्तदनु धर्मसुतान्विताया
भिक्षां तदा निजनिजाममुचन् दिनान्ते ।
दृष्टापदो द्रुपदभूपसुता न ताप-
मन्तस्तदापि किमु वक्ति मनः सतीनाम् ॥ ११५ ॥

कृत्वा बलिं द्विजजनाय वितीर्य भिक्षां
दत्त्वा च याचककुलाय ततः कुलीनाः ।
कुन्तीगिरा द्रुपदसूरदितान्नमर्धं
भीमाय शेषमकरोन्मुदिता षडंशम् ॥ ११६ ॥
सुप्तास्ततो निशि भटा दिशि दक्षिणस्यां
कृत्वा शिरांसि कुशकल्पिततल्पभाजः ।
तेषां स्थिता शिरसि भोजसुता पदान्ते
कृष्णा च क्लृप्तसमरायुधशौर्यवाचाम् ॥ ११७ ॥
तेषां नृपोचितवचांसि निशम्य धृष्ट-
द्युम्नः कुलालगृहसीमनि कुड्यगुप्तः ।
प्रातर्न्यवेदयदिति द्रुपदाय सर्वं
सर्वंसहापतिसुताः किल केचिदेते ॥ ११८ ॥
क्षत्राणि तानथ पुरोहितयोजनेन
निश्चित्य पाण्डुनृपनन्दनविभ्रमेण ।
आनीय सद्मनि रथैरथ भोजयित्वा
पृष्टो यथातथमुवाच युधिष्ठिरोऽस्मै ॥ ११९ ॥
चण्डांशूज्ज्वलदुज्ज्वलोज्ज्वलमहस्तोमाय सोमायित-
क्रीडत्कीर्तिभराय वासवभुवे देया मुदेयं सुता ।
एवं जल्पति पार्षते निजगदे धर्मात्मनासौ प्रिया
पञ्चानामपि नो भविष्यति मनःश्रीरिन्द्रियाणामिव ॥ १२० ॥
पञ्चानामपि किमिव प्रिया भवित्री
पुत्री मे वदति च धर्मसूः किमित्थम् ।
संदेहाम्बुधिविधुरात्मवृत्तिरित्थं
वीरोऽपि द्रुपदनृपस्तदाप मौग्ध्यम् ॥ १२१ ॥

इति श्रीजिनदत्तसूरिशिष्यश्रीमदमरचन्द्रविरचिते श्री-
बालभारतनाम्नि महाकाव्ये वीराङ्के आदिपर्वणि द्रौपदी-
स्वयंवरो नाम पञ्चमः सर्गः ॥ ५ ॥ :: ::

## RAMAYANA, BOOK I.

*(Continued from page 140.)*

Nor did the saint that gift despise,
Offered as holy texts advise;
He kindly asked the earth's great king
How all with him was prospering.
The seed of Kuśik bade him tell
If all in town and field were well,

All well with friends, and kith and kin,
And royal treasure stored within:
'Do all thy neighbours own thy sway?
Thy foes confess thee yet?
Dost thou continue still to pay
To Gods and men each debt?
Then he, of hermits first and best,
Vaśishṭha with a smile addressed,
And asked him of his welfare too,
Showing him honour as was due.
Then with the sainted hermit all
Went joyous to the monarch's hall,
And sate them down by due degree,
Each one, of rank and dignity.
Joy filled the noble prince's breast
Who thus bespoke the honoured guest:
'As amrit by a mortal found,
As rain upon the thirsty ground,
As to an heirless man a son
Born to him of his precious one;
As gain of what we sorely miss,
As sudden dawn of mighty bliss,
So is thy coming here to me,
All welcome, mighty Saint, to thee.
What wish within thy heart hast thou?
If I can please thee, tell me how.
Hail, Saint, from whom all honours flow,
Worthy of all I can bestow.
Blest is my birth with fruit to-day,
Nor has my life been thrown away.
I see the best of Bráhman race,
And night to glorious morn gives place.
Thou, holy Sage, in days of old
Among the royal saints enrolled,
Didst, penance-glorified, within
The Bráhman caste high station win.
'Tis meet and right in many a way
That I to thee should honour pay.
This seems a marvel to mine eyes:
All sin thy visit purifies;
And I by seeing thee, O Sage,
Have reaped the fruit of pilgrimage.
Then say what thou wouldst have me do,
That thou hast sought this interview.
Favoured by thee, my wish is still,
O Hermit, to perform thy will.
Nor needest thou at length explain
The object that thy heart would gain.
Without reserve I grant it now:
My deity, O Lord, art thou.'
The glorious hermit, far renowned,
With highest fame and virtue crowned,
Rejoiced these modest words to hear
Delightful to the mind and ear.

### Canto XXI.

### VIŚVÁMITRA'S SPEECH.

The hermit heard with high content
That speech so wondrous eloquent,
And while each hair with joy arose,
He thus made answer at the close:
'Good is thy speech O noble King,
And like thyself in every thing.
So should his lips be wisdom-fraught
Whom kings begot, Vaśishṭha taught.
The favour which I came to seek
Thou grantest ere my tongue can speak.
But let my tale attention claim,
And hear the need for which I came.
O King, as Scripture texts allow,
A holy rite employs me now.
Two fiends who change their forms at will
Impede that rite with cursed skill.
Oft when the task is nigh complete,
These worst of fiends my toil defeat,
Throw bits of bleeding flesh, and o'er
The altar shed a stream of gore.
When thus the rite is mocked and stayed,
And all my pious hopes delayed,
Cast down in heart the spot I leave,
And spent with fruitless labour grieve.
Nor can I, checked by prudence, dare
Let loose my fury on them there:
The muttered curse, the threatening word,
In such a rite must ne'er be heard.
Thy grace the rite from check can free,
And yield the fruit I long to see.
Thy duty bids thee, King, defend
The suffering guest, the suppliant friend.
Give me thy son, thine eldest born,
Whom locks like ravens' wings adorn,
That hero youth, the truly brave,
Of thee, O glorious King, I crave.
For he can lay those demons low
Who mar my rites and work me woe:
My power shall shield the youth from harm,
And heavenly might shall nerve his arm.
And on my champion will I shower
Unnumbered gifts of varied power,
Such gifts as shall ensure his fame
And spread through all the worlds his name.
Be sure those fiends can never stand
Before the might of Ráma's hand,
And mid the best and bravest none
Can slay that pair but Raghu's son.

Entangled in the toils of Fate
Those sins, so proud and obstinate,
Are, in their fury overbold,
No match for Ráma mighty-souled.
Nor let a father's breast give way
Too far to fond affection's sway.
Count thou the fiends already slain:
My word is pledged, nor pledged in vain.
I know the hero Ráma well
In whom high thoughts and valour dwell;
So does Vaśishṭha, so do these
Engaged in long austerities.
If thou would do the righteous deed,
And win high fame, thy virtue's meed,
Fame that on earth shall last and live,
To me, great King, thy Ráma give.
If to the words that I have said,
With Saint Vaśishṭha at their head
Thy holy men, O King, agree,
Then let thy Ráma go with me.
Ten nights my sacrifice will last,
And ere the stated time be past
Those wicked fiends, those impious twain,
Must fall by wondrous Ráma slain.
Let not the hours, I warn thee, fly,
Fixt for the rite, unheeded by;
Good luck have thou, O royal chief,
Nor give thy heart to needless grief.'

Thus in fair words with virtue fraught
The pious glorious saint besought.
But the good speech with poignant sting
Pierced ear and bosom of the king,
Who, stabbed with pangs too sharp to bear,
Fell postrate and lay fainting there.

## Canto XXII.

## DAŚARATHA'S SPEECH.

His tortured senses all astray
Awhile the hapless monarch lay,
Then slowly gathering thought and strength
To Viśvámitra spoke at length:
'My son is but a child, I ween;
This year he will be just sixteen.
How is he fit for such emprise,
My darling with the lotus eyes?
A mighty army will I bring
That calls me master, lord, and king,
And with its countless squadrons fight
Against these rovers of the night.
My faithful heroes skilled to wield
The arms of war will take the field;
Their skill the demons' might may break:
Ráma, my child, thou must not take.
I, even I, my bow in hand,
Will in the van of battle stand,
And, while my soul is left alive,
With the night-roaming demons strive.
Thy guarded sacrifice shall be
Completed, from all hindrance free.
Thither will I my journey make:
Ráma, my child, thou must not take.
A child unskilled, he knows not yet
The bounds to strength and weakness set.
No match is he for demon foes
Who magic arts to arms oppose.
O chief of saints, I have no power,
Of Ráma reft, to live one hour:
Mine aged heart at once would break:
Ráma, my child, thou must not take.
Nine thousand circling years have fled
With all their seasons o'er my head,
And as a hard-won boon, O Sage,
These sons have come to cheer mine age.
My dearest love amid the four
Is his whom first his mother bore,
Still dearer for his virtues' sake:
Ráma, my child, thou must not take.
But if, unmoved by all I say,
Thou needs must bear my son away,
Let me lead with him, I entreat,
A four-fold army all complete.
What is the demons' might, O sage?
Who are they? What their parentage?
What is their size? What beings lend
Their power to guard them and befriend?
How can my son their arts withstand?
Or I or all my armed band?
Tell me the whole that I may know
To meet in war each evil foe
Whom conscious might inspires with pride.'

And Viśvámitra thus replied:
'Sprung from Pulastya's race there came
A giant known by Rávaṇ's name.
Once favoured by the Eternal Sire
He plagues the worlds in ceaseless ire,
For peerless power and might renowned,
By giant bands encompassed round.
Viśravas for his sire they hold,
His brother is the Lord of Gold.
King of the giant hosts is he,
And worst of all in cruelty.
This Rávaṇ's dread commands impel
Two demons who in might excel,

Márícha and Subáhu hight,
To trouble and impede the rite.'

Then thus the king addressed the sage:
'No power have I, my lord, to wage
War with this evil-minded foe;
Now pity on my darling show,
And upon me of hapless fate,
For thee as God I venerate.
Gods, spirits, bards of heavenly birth,
The birds of air, the snakes of earth,
Before the might of Rávaṇ quail,
Much less can mortal man avail.
He draws, I hear, from out the breast
The valour of the mightiest.
No, ne'er can I with him contend,
Or with the forces he may send.
How can I then my darling lend,
Godlike, unskilled in battle? No,
I will not let my young child go.
Foes of thy rite, those mighty ones,
Sunda and Upasunda's sons,
Are fierce as Fate to overthrow:
I will not let my young child go.
Márícha and Subáhu fell
Are valiant and instructed well,
One of the twain I might attack
With all my friends their lord to back.'

## XXIII.

### VAŚISHṬHA'S SPEECH.

While thus the hapless monarch spoke,
Paternal love his utterance broke.
Then words like these the saint returned,
And fury in his bosom burned:
'Didst thou, O King, a promise make,
And wishest now thy word to break?
A son of Raghu's line should scorn
To fail in faith, a man forsworn.
But if thy soul can bear the shame
I will return e'en as I came.
Live with thy sons, and joy be thine,
False scion of Kakutstha's line.'

As Viśvámitra, prudent sage,
Was moved with this tempestuous rage,
Earth rocked and reeled throughout her frame,
And fear upon the Immortals came.
But Saint Vaśishṭha, wisest seer,
Observant of his vows austere,
Saw the whole world convulsed with dread,
And thus unto the monarch said:
'Thou, born of old Ikshváku's seed,
Art Justice' self in mortal weed.
Constant and pious, blest by fate,
The right thou must not violate.
Thou, Raghu's son, so famous through
The triple world as just and true,
Perform thy bounden duty still,
Nor stain thy race by deed of ill.
If thou have sworn and now refuse
Thou must thy store of merit lose.
Then, Monarch, let thy Ráma go,
Nor fear for him the demon foe.
The fiends shall have no power to hurt
Him trained to war or inexpert,
Nor vanquish him in battle field,
For Kuśik's son the youth will shield.
He is incarnate Justice, he
The best of men for bravery.
Embodied love of penance drear,
Among the wise without a peer.
Full well he knows, great Kuśik's son,
The arms celestial, every one,
Arms from the Gods themselves concealed,
Far less to other men revealed.
These arms to him, when earth he swayed,
Mighty Kriśáśva, pleased, conveyed.
Kriśáśva's sons they are indeed
Brought forth by Daksha's lovely seed,
Heralds of conquest, strong and bold,
Brilliant, of semblance manifold.
Jayá and Vijayá, most fair,
A hundred splendid weapons bare.
Of Jayá glorious as the morn
First fifty noble sons were born,
Boundless in size yet viewless too,
They came the demons to subdue.
And fifty children also came
Of Vijayá the beauteous dame,
Sanháras named, of mighty force,
Hard to assail or check in course.
Of these the hermit knows the use
And weapons new can he produce.
All these the mighty saint will yield
To Ráma's hand. to own and wield,
And armed with these, beyond a doubt
Shall Ráma put those fiends to rout.
For Ráma and the people's sake,
For thine own good my counsel take,
Nor seek, O King, with fond delay,
The parting of thy son to stay.'

## XXIV.

### THE SPELLS.

Vaśishṭha thus was speaking still:
The monarch, of his own free will,

Bade with quick zeal and joyful cheer
Ráma and Lakshmaṇ hasten near.
Mother and sire in loving care
Sped their dear son with rite and prayer:
Vaśishṭha blessed him ere he went.
O'er his loved head the father bent,
And then to Kuśik's son resigned
Ráma with Lakshmaṇ close behind.
Standing by Viśvámitra's side,
The youthful hero, lotus-eyed,
The Wind-God saw, and sent a breeze
Whose sweet pure touch just waved the trees.
There fell from heaven a flowery rain,
And with the song and dance the strain
Of shell and tambour sweetly blent
As forth the son of Raghu went.
The hermit led: behind him came
The bow-armed Ráma, dear to fame,
Whose locks were like the raven's wing:
Then Lakshmaṇ. closely following.
The Gods and Indra, filled with joy,
Looked down upon the royal boy,
And much they longed the death to see
Of their ten-headed enemy.
Ráma and Lakshmaṇ paced behind
That hermit of the lofty mind,
As the young Aśvins, heavenly pair,
Follow Lord Indra through the air.
On arm and hand the guard they wore,
Quiver and bow and sword they bore;
Two fire-born Gods of War seemed they,
He, Śiva's self who led the way.

Upon fair Sarjú's southern shore
They now had walked a league and more,
When thus the sage in accents mild
To Ráma said: 'Beloved child,
This lustral water duly touch:
My counsel will avail thee much.
Forget not all the words I say,
Nor let the occasion slip away.
Lo, with two spells I thee invest,
The mighty and the mightiest.
O'er thee fatigue shall ne'er prevail,
Nor age or change thy limbs assail.
Thee powers of darkness ne'er shall smite
In tranquil sleep or wild delight.
No one is there in all the land
Thine equal for the vigorous hand.
Thou, when thy lips pronounce the spell,
Shalt have no peer in heaven or hell.
None in the world with thee shall vie,
O sinless one, in apt reply,
In fortune, knowledge, wit, and tact,
Wisdom to plan and skill to act.
This double science take, and gain
Glory that shall for aye remain.
Wisdom and judgment spring from each
Of these fair spells whose use I teach.
Hunger and thirst unknown to thee,
High in the worlds thy rank shall be,
For these two spells with might endued,
Are the Great Father's heavenly brood,
And thee, O chief, may fitly grace,
Thou glory of Kakutstha's race.
Virtues which none can match are thine,
Lord, from thy birth, of gifts divine,
And now these spells of might shall cast
Fresh radiance o'er the gifts thou hast.'
Then Ráma duly touched the wave,
Raised suppliant hands, bowed low his head,
And took the spells the hermit gave
Whose soul on contemplation fed.
From him whose might these gifts enhanced,
A brighter beam of glory glanced,
So shines in all his autumn blaze
The Day-God of the thousand rays.
The hermit's wants those youths supplied,
As pupils use to holy guide.
And then the night in sweet content
Upon the Sarjú's bank they spent.

## XXV.
## THE HERMITAGE OF LOVE.

Soon as appeared the morning light
Uprose the mighty anchorite,
And thus to youthful Ráma said,
Who lay upon his leafy bed:
'High fate is hers who calls thee son:
Arise, 'tis break of day;
Rise, Chief, and let those rites be done
Due at the morning's ray.'
At that great sage's high behest
Upsprang the princely pair,
To bathing rites themselves addressed,
And breathed the holiest prayer.
Their morning task completed, they
To Viśvámitra came,
That mine of holy works, to pay
The worship saints may claim.
Then to that holy spot they went
Along fair Sarjú's side,
Where mix her waters confluent
With three-pathed Gangá's tide.

There was a sacred hermitage
  Where saints devout of mind
Their lives through many a lengthened age
  To penance had resigned.
That pure abode the princes eyed
  With unrestrained delight,
And thus unto the saint they cried,
  Rejoicing at the sight:
'Whose is that hermitage we see?
  Who makes his dwelling there?
Full of desire to hear are we:
  O Saint, the truth declare.'
The hermit smiling made reply
  To the two boys' request:
'Hear, Ráma, who in days gone by
  This calm retreat possessed.
Kandarpa in apparent form,
  Called Káma by the wise,
Dared Umá's new-wed lord to storm
  And make the God his prize.
'Gainst Sthánu's self, on rites austere
  And vows intent, they say
His bold rash hand he dared to rear,
  Though Sthánu cried, Away!
But the God's eye with scornful glare
  Fell terrible on him,
Dissolved the shape that was so fair
  And burnt up every limb.
Since the great God's terrific rage
  Destroyed his form and frame,
Káma in each succeeding age
  Has born Ananga's name.
So, where his lovely form decayed,
  This land is Anga styled:
Sacred to him of old this shade,
  And hermits undefiled.
Here Scripture-talking elders sway
  Each sense with firm control,
And penance-rites have washed away
  All sin from every soul.
One night, fair boy, we here will spend,
  A pure stream on each hand,
And with to-morrow's light will bend
  Our steps to yonder strand.
Here let us bathe and free from stain
  To that pure grove repair,
Sacred to Káma, and remain
  One night in comfort there.'
With penance' far-discerning eye
  The saintly men beheld
Their coming, and with transport high
  Each holy bosom swelled.
To Kuśik's son the gift they gave
  That honoured guest should greet,
Water they brought his feet to lave,
  And showed him honour meet.
Ráma and Lakshmaṇ next obtained
  In due degree their share.
Then with sweet talk the guests remained,
  And charmed each listener there.
The evening prayers were duly said
  With voices calm and low:
Then on the ground each laid his head
  And slept till morning's glow.

## XXVI.
## THE FOREST OF TAḌAKÁ.

When the fair light of morning rose
The princely tamers of their foes
Followed, his morning worship o'er,
The hermit to the river's shore.
The high-souled men with thoughtful care
A pretty barge had stationed there.
All cried, 'O lord, this barge ascend,
And with thy princely followers bend
To yonder side thy prosperous way
With naught to check thee or delay'.

Nor did the saint their rede reject:
He bade farewell with due respect,
And crossed, attended by the twain,
That river rushing to the main.
When now the bark was half way o'er,
Ráma and Lakshmaṇ heard the roar,
That louder grew and louder yet,
Of waves by dashing waters met.
Then Ráma asked the mighty seer:
'What is the tumult that I hear
Of waters cleft in mid career?'
Soon as the speech of Ráma, stirred
By deep desire to know, he heard,
The pious saint began to tell
What caused the waters' roar and swell:
'On high Kailása's distant hill
  There lies a noble lake
Whose waters, made by Brahmá's will,
  The name of Mánas take.
Thence, hallowing where'er they flow,
  The streams of Sarjú fall,
And wandering through the plains below
  Embrace Ayodhyá's wall.
Still, still preserved in Sarjú's name
  Sarovar's fame we trace,
The flood of Brahmá whence she came
  To run her holy race.

To meet great Gangá here she hies
With tributary wave :
Hence the loud roar ye hear arise,
Of floods that swell and rave.
Here, pride of Raghu's line, do thou
In humble adoration bow.'
He spoke. The princes both obeyed,
And reverence to each river paid.
They reached the southern shore at last,
And gaily on their journey past.
A little space beyond there stood
A gloomy awe-inspiring wood.
The noble monarch's son began
To question thus the holy man :
'Whose gloomy forest meets mine eye
Like some vast cloud that fills the sky ?
Pathless and dark it seems to be,
Where birds in thousands wander free.
Where shrill cicalas' cries resound,
And fowl of dismal note abound.
Lion, rhinoceros, and bear,
Boar, tiger, elephant are there.
There shrubs and thorns run wild :
Dháo, Sál, Bignonia, Bel, are found,
And every tree that grows on ground :
How is the forest styled ?'
The glorious saint this answer made :
'Dear child of Raghu, hear
Who dwells within the horrid shade
That looks so dark and drear.
Where now is wood, long ere this day
Two broad and fertile lands,
Malaja and Karúsha lay,
Adorned by heavenly hands.
Here, mourning friendship's broken ties,
Lord Indra of the thousand eyes
Hungered and sorrowed many a day,
His brightness soiled with mud and clay,
When in a storm of passion he
Had slain his dear friend Namuchi.
Then came the Gods and saints who bore
Their golden pitchers brimming o'er
With holy streams that banish stain,
And bathed Lord Indra pure again.
When in this land the God was freed
From spot and stain of impious deed
For that his own dear friend he slew,
High transport thrilled his bosom through.
Then in his joy the lands he blessed,
And gave a boon they long possessed :
'Because these fertile lands retain
The washings of the blot and stain,'

*(To be continued.)*

TO THE EDITOR OF THE PANDIT.

Sir,

The examination for Honours in Arts of the Calcutta University being near, I take the liberty to suggest a little change in the pass standard of the Sanskrit Examination. The present rule requires a minimum of twenty-five per cent. in every branch and thirty-three per cent. in the aggregate.

In my humble opinion, this rule of requiring the minimum marks is unnecessarily troublesome and merely a bar to a student's getting a Sanskrit degree.

Similar objections to those which Mr. Beebee of the Presidency College brought forward against this rule in the Mathematical Examination can be shown to exist in this case.

I here quote Mr. Beebee's words :

"This rule of requiring a minimum in each subject, though most desirable in taking the merits of students who aspire to a pass-man's degree in the various branches of a general education, is not applicable to those who after having already obtained this degree seek destinction in one special Science.

For example, a student who is a fair English scholar or Mathematican, if he be totally ignorant of History, cannot be accounted a properly educated man, but a candidate for Mathematical Honours, who might sacrifice the study of Optics or Spherical Astronomy, in order to devote more time to Mechanics, need not by any means be considered to have received an inferior Mathematical training to a competitor who has made only a moderate progress in both."

Do not similar arguments hold with more force in the case of the Sanskrit Examination ? Can a student who has made better progress in Kávya or the Darśaṇas than in the Vedas be regarded as an inferior Sanskrit scholar to him who has made only 'a moderate progress in both ?' There being so many subjects—Kávya, Náṭaka, Alankára, Nyáya, Sánkhya, Vedánta, Veda and Vyákaraṇa—it would be manifest injustice to pluck a candidate simply if he failed to gain the minimum marks in only one of these. I therefore beg to suggest that the rule requiring a minimum in each subject be done away with. I hope this proposal will meet with your approval and I doubt not that with your support the change will be effected much to the relief of the Sanskrit candidates. Hoping the Syndicate will give due consideration to this matter,

BENARES :
*December* 1869.

I am yours,
&c., &c.
A. B.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

# काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

# THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 45. Benares, February 1st, 1870. Vol. IV.


## ॥ उपदेशसहस्र्याः पद्यप्रबन्धः ॥

आत्मस्वरूपस्य मोक्षस्य नित्यत्वे ऽकार्यत्वे हेतुमाह ।

(४१) स्वरूपस्यानिमित्तत्वात्सनिमित्ता हि चापरे ।
अनुपात्तं स्वरूपं हि स्वेनात्यक्तं तथैव च ॥ १६३ ॥

स्वरूपस्येति । नास्ति निमित्तं कारणं यस्य तदनिमित्तं तस्य भावो ऽनिमित्तत्वं तस्मादकार्यत्वादित्यर्थः । अपरे त्ववस्थान्तरादयः सनिमित्ता हीत्यतो ऽनित्याः स्युरित्यर्थः, स्वरूपस्यानिमित्तत्वं तल्लक्षणोक्त्या साधयति । अनुपात्तमिति । स्वरूपं हि नाम तद्वत्स्वेनान्येन वा नोपात्तमुपार्जितं न भवति, तथा स्वेनान्येन वा त्यक्तमपि न भवति, नह्युपादेयस्य हेयस्य वा वस्त्रादेः स्वरूपत्वं दृष्टमतो नागन्तुकं वस्तुस्वरूपं किं तु नित्यमेवेत्यर्थः ॥ ४१ ॥

उक्तं स्वरूपलक्षणमात्मनि लक्ष्ये योजयति ।

(४२) स्वरूपत्वान्न सर्वस्य त्यक्तुं शक्यो ह्यनन्यतः ।
ग्रहीतुं वा ततो नित्यो ऽविषयत्वापृथक्त्वतः ॥ २६४ ॥

स्वरूपत्वादिति । सर्वस्याकाशादेः स्वरूपत्वादारोपितसर्पादे रज्ज्वादिवत्सर्वस्यात्मभूतत्वात्त्यक्तुं ग्रहीतुं वा न शक्य आत्मा, कुतो, हि यस्मादनन्यतो भेदाभावादित्यर्थः । हेयोपादेयत्वाभावे सिद्धे फलितमाह । ततो नित्य इति । आत्मन उपादानहानयोरयोगे पुनरपि क्रमेण हेतुद्वयमाह । अविषयत्वापृथक्त्वत इति । नह्यविषय उपादीयते स्वरूपं वा त्यज्यत इति युज्यतइत्यर्थः ॥ ४२ ॥

आत्मनो नित्यत्वे हेत्वन्तरमाह ।

(४३) आत्मार्थत्वाच्च सर्वस्य नित्य आत्मैव केवलः ।
त्यजेत् तस्मात्क्रियाः सर्वाः साधनैः सह मोक्षवित् ॥ २६५ ॥

आत्मार्थत्वाच्चेति । सर्वस्यागमापायिन आत्मार्थत्वादात्मभोग्यत्वात्तेष्वनागमापायी भोक्तात्मा नित्य एवेति योजना । केवलो निरुपाधिरित्यर्थः, उपाध्यायत्तो ऽप्यस्य विशेषो नास्तीत्यर्थः । यस्मादात्मा नित्यो ऽन्यत्सर्वमनित्यमात्मार्थं च, स्वात्मन्यवस्थानं च मोक्ष इति, सिद्धं, तस्माद् मुमुक्षुणा ससाधनं सर्वं कर्म्म त्याज्यमित्याह । त्यजेदिति ॥ ४३ ॥

इतो ऽपि मुमुक्षुणा क्रिया त्याज्येत्याह ।

(४४) आत्मलाभः परो लाभ इति शास्त्रोपपत्तयः ।
अलाभो ऽन्यात्मलाभस्तु त्यजेत्तस्मादनात्मताम् ॥ २६६ ॥

आत्मलाभइति । आत्मलाभान्न परं विद्यतइति स्मृतिः शास्त्रं, सर्वस्य त्यागेनाप्यात्मसंरक्षणप्रवृत्तिदर्शनमुपपत्तिः, बहुवचनप्रयोगादनेकत्वं शास्त्रोपपत्तीनां सूचयति, आत्मलाभस्य नित्यसिद्धत्वात्किमिदमपूर्वमिवोच्यतइत्यत आह । अलाभ इति । अन्यस्मिन् स्वाज्ञानपरिनिष्पन्ने ऽहंकारादावभेदेनात्मस्फुरणमन्यात्मलाभ उच्यते, स तु लाभो न भवति, संसारदुःखहेतुत्वात्स्वतःसिद्धपरमानन्दाविर्भावप्रतिबन्धकत्वात् प्रत्युत क्षतिरेवेत्यर्थः । तस्मादनात्मतामहंकाराद्यात्माभिमानितामविद्याध्यारोपितां प्रमाणजनितब्रह्मात्मज्ञानेनाज्ञानबाधनद्वारा त्यजेदित्यर्थः ॥ ४४ ॥

आत्मतत्त्वब्रह्मस्वरूपावगमे आत्मलाभ एव परमो लाभः परमपुरुषार्थ इत्यात्मैक्यज्ञानं मोक्षसाधनमात्मा चाद्वयानन्दरूपस्तस्मिन्नज्ञानमूलः संसारो न परमार्थत इति स्वमतमभिधाय

तत्रैव मुमुक्षूणां मतिस्थैर्याय मतान्तरनिराकरणं कर्तुमारभमाणो भगवान्भाष्यकारः सांख्यकल्पनां तावन्निराकरोति ।

(४५) गुणानां समभावस्य भ्रंशो नह्युपपद्यते ।
अविद्यादेः प्रसुप्तत्वान्न चान्यो हेतुरिष्यते ॥ २९७ ॥

गुणानामिति । तत्र यत्प्रधानं त्रिगुणात्मकं स्वतन्त्रमचेतनं पुरुषस्य भोगापवर्गार्थं महदादिरूपेण परिणमतइति कल्पयन्ति,तत्तावन्न संभवति, यतो गुणानां सत्त्वरजस्तमसां समभावस्य सृष्टिप्राक्कालीनमेलनस्य भ्रंशः प्रच्युतिः पूर्वावस्थात्यागेनावस्थान्तरापत्तिरूपः परिणामो दुर्घटत्वान्नोपपद्यते । कुत इति चे,त्तत्र वक्तव्यं, किं निर्हेतुक एव गुणपरिणाम इष्यते सहेतुको वा, नाद्यः, सदा परिणामप्रसङ्गात्, द्वितीये ऽप्यविद्याप्राण्यदृष्टपुरुषा एव हेतुस्तदन्यो वा परमेश्वरो, नाद्य, इत्याह । अविद्यादेरिति । तस्यामवस्थायामविद्यादेः प्रसुप्तत्वाल्लीनत्वात्पुरुषाणामुदासीनत्वाच्च तन्निमित्तः साम्यावस्थाभ्रंश इत्यर्थः । न द्वितीय इत्याह । न चान्य इति । अविद्यादिभ्यो ऽन्यः परमेश्वराङ्गीकारे ऽपसिद्धान्तप्रसङ्ग इत्यर्थः ॥ ४५ ॥

गुणानामन्योन्यं प्रवृत्तिहेतुत्वं स्यादिति चेत्तत्राह ।

(४६) इतरेतरहेतुत्वे प्रवृत्तिः स्यात्सदा न वा ।
नियमो न प्रवृत्तीनां गुणेष्वात्मनि वा भवेत् ॥ २९८ ॥

इतरेतरेति । अस्मिन् पक्षे प्रयोजकान्तरप्रतीक्षानपेक्षणात्सदा प्रवृत्तिः परिणामः स्यान्न वा स्याद्विशेषाभावादित्यर्थः । अथ क्रमेणोत्पत्तिसंहाराणां प्रसिद्धत्वान्न सदा तत्प्रसङ्ग इति तत्राह । नियम इति । नियम्यतेनेनेति नियमो नियामको हेतुः प्रवृत्तीनां गुणकार्योत्पत्त्यादीनां गुणेषु सत्त्वादिष्वात्मनि पुरुषे वा यतो न भवेन्न संभवेदतः सदा प्रवृत्तिरप्रवृत्तिर्वा स्यादिति योजना । नहि गुणपुरुषातिरिक्तं किं चित् तत्त्वमभ्युपगतुमस्ति सांख्यैर्यद्गुणेषु वा पुरुषेषु वा स्थित्वा प्रवृत्त्यादिनियामकं स्यादित्यर्थः ॥ ४६ ॥

यथा कथं चिदस्तु वा प्रधानप्रवृत्तिस्तथापि दोषप्रसक्तिं परिहर्तुं न पार्यतइत्याह ।

(४७) विशेषो बद्धमुक्तानां तादर्थ्ये न च युज्यते ।
अर्थार्थिनोस्त्वसंबन्धो नार्थी ज्ञो नेतरो ऽपि वा ॥ २९९ ॥

विशेष इति । तादर्थ्ये प्रधानस्य पुरुषार्थत्वे सति बद्धमुक्तानां बद्धानां मुक्तानां विशेषो न युज्यते, नहि सर्वपुरुषान् प्रति साधारणे प्रधानस्यैकस्य व्यापारे के चिद्बद्धाः के चिन्मुक्ता इति व्यवस्थोपपद्यते, तथा च सर्वएव सदा बद्धाः स्युः सर्वएव सदा मुक्ता वा स्युरित्यर्थः । किं चास्मिन्मते ऽर्थार्थिनोः शेषशेषिणोः संबन्धश्च न युज्यतइत्यन्वयः, अर्थ्यते प्रार्थ्यतइत्यर्थः । सुखतत्साधनरूपः पदार्थः सोभिलषितो विद्यते यस्य सोर्थी तयोः संबन्ध उपकार्योपकारकभावलक्षणः स प्रधानवादे न युज्यते न घटतइत्यर्थः । कुत इत्यत आह । नेति । ज्ञो ज्ञानैकस्वभावः पुरुषो नार्थी युक्तः तस्यासङ्गत्वनिर्विशेषत्वाभ्युपगमात्, नेतरोपि वा, प्रधानाख्यो ऽपि नार्थी जडत्वादेवेत्यर्थः । तस्मात्प्रधानस्य परार्थत्वकल्पनमयुक्तमिति भावः ॥ ४७ ॥

एवं प्रधानस्य पुरुषान् प्रति प्रवृत्तिमङ्गीकृत्यव्यवस्योक्ता सापीदानीं न घटतइति साधयति ।

(४८) प्रधानस्य च पारार्थ्यं पुरुषस्याविकारतः ।
न युक्तं सांख्यशास्त्रेपि विकारेपि न युज्यते ॥ ३०० ॥

प्रधानस्येति । पुरुषस्याविकारतः प्रधानकृतातिशययोगित्वलक्षणविकाररहितत्वात्प्रधानस्य पारार्थ्यं च न युक्तमिति योजना । नह्यननुविधेयकृतातिशयायोगिनि स्वामितोपपद्यतइत्यर्थः । यदि पुरुषस्य प्रधानं प्रति स्वाम्योपपत्तये विकारोप्यङ्गीक्रियेत तदङ्गीकृतेपि विकारे प्रधानस्य पारार्थ्यं न युज्यते विकारवतो ऽनित्यत्वनियमान्नित्यप्रधानस्वाम्यायोगादित्यर्थः । सांख्यशास्त्रेपीत्यपिशब्दान्न वेदबाह्यशास्त्रेष्वेवाव्यवस्था, किं तु सांख्यशास्त्रे ऽपीति तस्यापि पुम्बुद्धिमूलत्वं न सम्यग्वेदमूलत्वमस्तीति द्योत्यते ॥ ४८ ॥

प्रधानपुरुषयोः संबन्धाभावमुक्तं प्रपञ्चयति ।

(४९) संबन्धानुपपत्तेश्च प्रकृतेः पुरुषस्य च ।
मिथो ऽयुक्तं तदर्थत्वं प्रधानस्याचितित्वतः ॥ ३०१ ॥

संबन्धानुपपत्तेश्चेति । पुरुषस्यासङ्गोदासीनस्वभावत्वात्प्रकृतेर्जडत्वेन स्वतः प्रवृत्त्यनुपपत्तेस्तयोर्मिथः संबन्धानुपपत्तेः प्रधानस्य तादर्थ्यं पुरुषार्थत्वमयुक्तं युक्तिशून्यमचितित्वतो जडत्वात्प्रधानस्य भृत्यवदुपकारकत्वासंभवादित्यर्थः । अतः, प्रधानपुरुषयोरर्थार्थित्वकल्पना न युक्तिमतीति भावः ॥ ४९ ॥

पुरुषस्याविकारत इत्युक्तमविकारित्वं स्पष्टयति ।

(५०) क्रियोत्पत्तौ विनाशित्वं ज्ञानमात्रे च पूर्ववत् ।
निर्निमित्ते त्वनिर्मोक्षः प्रधानस्य प्रसज्यते ॥ ३०२ ॥

क्रियोत्पत्ताविति । पुरुषे यत्किंचित्क्रियोत्पत्तावभ्युपगम्यमानायां विनाशित्वं तस्य प्रसज्येत यत्क्रियावत्तदनित्यं यथा क्षीरादीतिव्याप्तिदर्शनात्, नित्यश्च पुरुषोभ्युपगम्यते सांख्यैरित्यर्थः । ननु न परिस्पन्दः परिणामो वा पुरुषस्य क्रियाभ्युपगम्यते येनानित्यत्वप्रसङ्गः किं तु ज्ञानमेव क्रियाभ्युपगम्यतइति चेत्, तर्हि जन्यमजन्यं वा ज्ञानमभ्युपेयते, नोभयथापि घटतइत्याह । ज्ञानमात्रे च पूर्ववदिति । जन्यज्ञानयोगे विकारित्वादनित्यत्वापत्तिरजन्यज्ञानयोगित्वे न प्रधानं प्रति

स्वाम्यसंभव इत्युक्तदोषापत्तिरित्यर्थः। तस्मात्पुरुषस्यासङ्गोदासीनत्वादनाधेयातिशयत्वात्प्रवर्त्तकत्वानुपपत्तेरन्यस्य च हेत्वन्तरस्य प्रधानविकारातिरिक्तस्यानभ्युपगमात्,प्रलये च प्रधानविकाराणामलब्धात्मलाभतया प्रवर्त्तकत्वायोगान्निर्निमित्तैव प्रधानप्रवृत्तिरङ्गीकार्या, तथा चाव्यवस्था सुस्थैवेति प्रतिपादयन्नुपसंहरति । निर्निमित्तइति । प्रधानस्य व्यापारेनिर्निमित्ते ऽभ्युपगम्यमाने तस्य सर्वदा सर्वान्प्रति प्रवृत्तिसंभवाद्दृकशक्तिमतां पुरुषाणां तद्दर्शनस्यावर्ज्जनीयत्वादनिर्मोक्षः प्रसज्येत, अत इत्यमव्यवस्थितं सांख्यशास्त्रं न मुमुक्षुभिः श्रद्धेयमिति भावः ॥ ५० ॥

निर्गुणपुरुषमतप्रक्रियां निराकृत्य सगुणाः पुरुषा इति वैशेषिकमतप्रक्रियां दूषयति ।

(५१) न प्रकाश्यं यथोष्णत्वं ज्ञानेनैवं सुखादयः ।
एकनीडत्वतो ऽग्राह्याः स्युः कणादादिवर्त्मनाम् ॥३०३॥

न प्रकाश्यमित्यादिना । आत्मगतेन ज्ञानेनात्मगताः सुखादयो गुणाः प्रकाश्यन्तइति हि ते मन्यन्ते, तन्नोपपद्यते, तथाहि, यथोष्णत्वमग्निनिष्ठमग्निनिष्ठेन प्रकाशेन न प्रकाश्यं प्रकाशार्हं नभवति एकाश्रयत्वादेवं सुखादयो गुणा आत्मनिष्ठा आत्मनिष्ठेन ज्ञानेनाग्राह्याः स्युः, कुतः, एकनीडत्वतः एकाश्रयत्वात्कणादादिवर्त्मनां मतइत्यर्थः । विषयविषयिणोः समानदेशत्वे ग्राह्यमिदं ग्राहकमिदमिति च भेदनियमासिद्धेरिति भावः ॥ ५१ ॥

न केवलमेकाश्रयत्वादेव ज्ञानसुखादीनां भास्यभासकत्वानुपपत्तिरपि तु यौगपद्यासंभवादपीत्याह ।

(५२) युगपत्समवेतत्वं सुखविज्ञानयोरपि ।
मनोयोगैकहेतुत्वादग्राह्यत्वं सुखस्य च ॥ ३०४ ॥

युगपदिति। नेति पूर्वश्लोकादनुवर्त्तनीयं, तथा चायमर्थः। सुखविज्ञानयोर्न युगपत्समवेतत्वं संभवति कुतः मनोयोगैकहेतुत्वान्मनःसंयोगस्यासमवायिकारणस्यैकमेवात्मगुणं प्रति हेतुत्वाभ्युपगमात्तथात्वे सुखासमवायिकारणमनःसंयोगनाशे सुखस्य नाशात्संयोगान्तरासमवायिकारणकज्ञानेन सुखस्य न ग्राह्यत्वं प्रत्यक्षत उपपद्यतइति, अपिशब्दात्समवायोपि न प्रमाणयुक्तिपथमवतरतीति द्योत्यते, चशब्दादात्ममनसोर्निरवयवयोः प्रदेशाभावादात्मनोरिव संयोगानुपपत्तिः संयोगे वा विभोरात्मनो विभागानुपपत्तिस्तदभावे संयोगान्तरानुपपत्तौ ज्ञानादिकार्यक्रमानुपपत्तिः कार्याणामसमवायिकारणदेशानतिवर्त्तित्वं नियमदर्शनादन्यत्रेहापि तत्प्रसङ्गे ऽणुपरिमाणमनःसंयोगस्याणुदेशमात्रवर्त्तितया तत्कार्यस्यापि तन्मात्रवर्त्तित्वे सकलशरीरगतात्मवेदनाया अप्रत्यक्षत्वप्रसङ्ग इत्यादिदूषणगणः समुच्चीयते ॥ ५२ ॥

सुखवदेव दुःखेच्छाद्वेषप्रयत्नानामप्यग्राह्यत्वं न्यायसाम्यादित्याह ।

(५३) तथान्येषां च भिन्नत्वाद्युगपज्जन्म नेष्यते ।
गुणानां समवेतत्वं ज्ञानं चेन्न विशेषणात् ॥ ३०५ ॥

तथेति । अन्येषां गुणानां भिन्नत्वात्परस्परविलक्षणत्वाज्ज्ञानसुखयोरिव युगपज्जन्म नेष्यते । एकस्यात्मनः संयोगस्यानेककार्यहेतुत्वासंभवस्योक्तत्वादित्यर्थः । चकारादेकाश्रययोर्विषयविषयित्वायोगः पूर्वोक्तः संगृह्यते । मा भूज्ज्ञानभास्यत्वं सुखादीनामेकस्मिन्नात्मनि समवेतत्वमेव तेषां ज्ञानं नामेत्याशङ्क्य ज्ञानेन तेषां विशेषितत्वान्नैवमित्याह । गुणानामिति । ज्ञातं सुखं ज्ञातं दुःखमिति विशिष्टव्यवहारदर्शनादित्यर्थः ॥ ५३ ॥

एतदेव विशदयति ।

(५४) ज्ञानेनैव विशेष्यत्वाद् ज्ञानाप्यत्वं स्मृतेस्तथा ।
सुखं ज्ञातं मयेत्येवं तवाज्ञानात्मकत्वतः ॥ ३०६ ॥

ज्ञानेनैवेति । ज्ञानेन विशेष्यत्वादेव ज्ञानाप्यत्वं सुखादीनामेष्टव्यमित्यर्थः । ज्ञानाहितसंस्कारजन्यस्मृतिविषयत्वादपि ज्ञानाप्यत्वं सुखादेरेष्टव्यमित्याह । स्मृतेस्तथेति । सुखं मया ज्ञातमित्येवं स्मृतेरिति संबन्धः । किं च ज्ञानविशिष्टात्मसमवेतत्वं सुखादेर्ज्ञानमिष्यते, केवलात्मसमवेतत्वं वा, नाद्यो युगपत् क्षणिकात्मविशेषगुणानां समवायासंभवस्योक्तत्वादात्मगतसंख्यापरिमाणादेरपि ग्रहणप्रसङ्गाच्चेत्यभिप्रेत्य द्वितीयं दूषयति । तवेति । तव मते आत्मनो ज्ञानभिन्नत्वाद् घटवद्द्रव्यमात्रत्वात्समवेतत्वमात्रेण न सुखादिसिद्धिः सर्वस्य जडत्वादित्यर्थः ॥ ५४ ॥

ज्ञानसुखादीनामात्मगुणत्वाभ्युपगमेन भास्यभासकत्वासंभव उक्तः, इदानीं तेषामात्मगुणत्वमपि दुर्भणमित्याह ।

(५५) सुखादेर्नात्मधर्मत्वमात्मनस्ते ऽविकारतः ।
भेदादन्यस्य कस्मान्न मनसो वा ऽविशेषतः ॥ ३०७ ॥

सुखादेरिति। सुखादेरात्मधर्मत्वं न संभवति ते तव मते आत्मनो ऽविकारतो विकारत्वाभावाद्विभुत्वाङ्गीकारेण नित्यत्वाभ्युपगमात्,नहि नित्यमनित्यगुणकमिति मां प्रति दृष्टान्तः कोपि विधत्ते ऽतो नात्मनो गुणवत्त्वसिद्धिः दूरे ग्राह्यग्राहकत्वकल्पनेति भावः। किं च गुणगुणिनोरत्यन्तभेदवादिनस्तव मते ऽस्यैवात्मनो ऽयं सुखादिरिति नियमोपि दुर्घट इत्याह । भेदादिति। अन्यस्यात्मान्तरस्य मनसो वा कस्मात्सुखादयो

गुणा न स्युरविशेषतो भेदाविशेषादित्युत्तरार्थः । अयमाशयः । सर्वात्मनां विभुत्वाङ्गीकाराद्यच्छरीरावच्छेदेनात्मनि सुखादयो जायन्ते तत्र तदा सर्वात्मनां सत्त्वात्तद्भेदस्य च तत्रानवगमादस्यैवात्मनोयं सुखादिधर्मो नान्यस्येति नियन्तुं न शक्यते न मनःसंयोगभेदो नियामको मनस्यपि सर्वात्मसंबन्धस्याविशेषात्, नाप्यदृष्टभेदो नियामकस्तस्याद्याप्यात्मधर्मत्वासिद्धेरदृष्टहेतुप्रयत्नादेरपि मनःसंयोगनिमित्तकत्वात्तस्य च सर्वात्मसु विशेषासिद्धेरदृष्टस्यापि नाश्रयविशेषसिद्धिरिति, यत्र कुत्रापि जायमानं सुखादि यस्य कस्यापि कस्मान्न स्यात् तथा मनसः क्रियावत्वात्मूर्त्तत्वात्सुखादिदेशाव्यभिचाराच्च तस्यैव कस्माद्धर्माः सुखादयो न स्युर्विनिगमनाभावादिति ॥ ५५ ॥

यदपि वैशेषिकैर्ज्ञानस्य ज्ञानान्तरवेद्यत्वमिष्यते तदप्ययुक्तमनवस्थाप्रसङ्गादित्याह ।

(५६) स्यान्माला ऽपरिहार्या तु ज्ञानं चेद् ज्ञेयतां व्रजेत् ।
युगपद्वापि चोत्पत्तिरभ्युपेताऽत इष्यते ॥ ३०८ ॥

स्यान्मालेति । अयमर्थः । येनात्ममनःसंयोगेन प्रथमं ज्ञानं जायते तदन्येन संयोगान्तरेण तद्विषयं ज्ञानान्तरं जायते, किं वा तेनैव संयोगेन, आद्ये दोषमाह । स्यादिति । ज्ञानं चेज्ज्ञेयतां व्रजेत्तदा ऽपरिहार्या ज्ञानमाला परंपरा स्याज्ज्ञानानवस्था स्यादित्यर्थः । विषयावभाससमये यदि ज्ञानं नावभासेत तदा विषयः स्वयमेव भासते ज्ञानाधीनतया वेति विवेक्तुमशक्यत्वात्तदैव ज्ञानभानं ज्ञानान्तरमेष्टव्यं तस्याप्यभाने पूर्वज्ञानस्य ज्ञानान्तरभास्यत्वासिद्धिस्तद्भानाय ज्ञानान्तरमिति दुर्निवारा ऽनवस्था स्यादिति भावः । तुशब्दश्चार्थः । तेन च प्रथमज्ञानोत्पत्त्यनन्तरं मनसि क्रिया ततो विभागस्ततः पूर्वसंयोगनाशस्ततः संयोगान्तरं ततो ज्ञानान्तरमिति बहुक्षणविलम्बेनोत्पद्यमानमुत्तरज्ञानं पूर्वज्ञानावभासनं कथं कुर्यात्तस्य तदानीमभावादित्यादियुक्त्यन्तरं समुच्चीयते । अथ द्वितीयकल्पमनूद्यातिप्रसङ्गेन दूषयति । युगपद्वेति । अपि चानवस्थादोषपरिजिहीर्षया पूर्वोत्तरज्ञानयोरेकस्मादेव संयोगाद्युगपद्वोत्पत्तिरभ्युपेता चेदित्यनुषज्यते, तदा ऽतो ऽस्मादेव संयोगाद्युगपत्सन्निकृष्टरूपरसगन्धशब्दस्पर्शज्ञानानामपि तदैवोत्पत्तिरिष्यते, इष्यतां तदा संस्कारोद्बोधसन्निपाते सहकारिलाभात्तत्तदर्थस्मृतीनामप्युत्पत्तिरिष्यतामतो न ज्ञानस्य ज्ञानान्तरवेद्यत्वकल्पना युक्तिमतीति स्थितमित्यर्थः ॥ ५६ ॥

किं चात्मनश्चैतन्यं स्वरूपलक्षणमिष्यते, तटस्थलक्षणं वा, आद्ये पृथिव्यादौ गन्धादिवत्सदातनत्वात्तस्य च स्वरूपानतिरेकादनित्यज्ञान आत्मेत्युद्घोषो मृषैव स्यात्, द्वितीये तु स्वरूपलक्षणमन्यदनात्मासाधारणं वक्तव्यं तच्च चेतनातिरिक्तं न किमपि संभावितमस्त्यतो देहादिजडविलक्षणमात्मानमभ्युपगच्छता सदा निर्विशेषचिद्रूपः कूटस्थ एवात्माभ्युपेतव्यो ऽन्यथा विकारिणो ऽनित्यत्वनियमाद्बन्धमोक्षान्वय्येक आत्मा भवतीति दुःसंपादमित्येतत्सर्वमभिप्रेत्याह ।

(५७) अनवस्थान्तरत्वाच्च बन्धो नात्मनि विद्यते ।
नाशुद्धिश्चाप्यसङ्गत्वादसङ्गो हीति च श्रुतेः ॥ ३०९ ॥

अनवस्थान्तरत्वाच्चेति । नास्त्यवस्थान्तरं यस्य सो ऽनवस्थान्तरस्तस्य भावो ऽनवस्थान्तरत्वं तस्मादिति विग्रहः । आत्मन इति शेषः । तथा चात्मनः कूटस्थत्वात्तस्मिन्नात्मनि बन्धो विशेषगुणवत्त्वलक्षणः परमार्थतो न विद्यते चकारात्तन्निवृत्तिरूपो मोक्षो ऽपि न विद्यते इति योज्यं, तस्मान्नित्यशुद्ध एवात्मेत्यत्र प्रमाणं वदन्परकल्पनानिराकरणफलमाह । नाशुद्धिश्चापीति । स्वगतधर्मकृतबन्धाभाववदन्यसंसर्गकृता शुद्धिरपि न चास्त्यसङ्गत्वादित्यर्थः ॥ ५७ ॥

इतश्च नात्मनः पारमार्थिको बन्ध इत्याह ।

(५८) सूक्ष्मैकागोचरेभ्यश्च न लिप्यतइति श्रुतेः ।
एवं तर्हि न मोक्षोस्ति बन्धाभावात्कथं चन ॥ ३१० ॥

(५९) शास्त्रानर्थक्यमेवं स्यान्न बुद्धेर्भ्रान्तिरिष्यते ।
बन्धो मोक्षश्च तन्नाशः स यथोक्तो न चान्यथा ॥ ३११ ॥

सूक्ष्मेति । सूक्ष्मत्वं मनोवागगम्यत्वमेकत्वमद्वितीयत्वमगोचरत्वं निर्विशेषत्वमेतेभ्यश्च हेतुभ्यो नित्यशुद्ध एवात्मा न लिप्यते लोकदुःखेन बाह्य इति श्रुतेरित्यर्थः ।

यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ।
सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ॥

इति भगवद्वचनं चात्रोदाहर्त्तव्यम् । अर्द्धश्लोकः । एवमात्मनो नित्यशुद्धबुद्धमुक्तस्वभावत्वं साधयन्तो वेदान्तिन आत्मोपदेशशास्त्रानर्थक्यमित्याक्षिपन्ति पूर्ववादिनः । एवं तर्हीति । यदीत्यध्याहार्यं, यद्येवं नित्यशुद्ध आत्मा तर्हि कथं चन केनापि रूपेण बन्धाभावान्मोक्षोपि नास्ति बन्धपूर्वकत्वान्मोक्षस्य तदभावे ऽभावात्तथा च मोक्षोपायोपदेशशास्त्रानर्थक्यमेवं स्यादिति । उत्तरमाह न बुद्धेरित्यादिना । बुद्धेर्भ्रान्तिर्बन्ध इष्यतइत्यन्वयः । तन्नाशो भ्रान्तिनाशो मोक्ष इति चेष्यते न परमार्थ इत्यर्थः । संबन्धो यथा पूर्वमुक्तो ऽज्ञानं कल्पनामूलं संसारस्य नियामकमिति तथैव न चान्यथा तथा चाज्ञानकल्पितबन्धभ्रमनिवृत्त्यर्थत्वादुपदेशशास्त्रस्य न वैयर्थ्यप्रसङ्ग इत्यर्थः ॥ ५९ ॥

अज्ञानमूलबुद्धिधर्माध्यासलक्षणो बन्धश्चिदात्मनीत्युक्तमुपपादयति ।

(६०) बोधात्मज्योतिषा दीप्ता बोधमात्मनि मन्यते।
बुद्धिर्नान्यो ऽस्तिबोद्धेति सेयं भ्रान्तिर्हि धीगता॥ ३१२॥

बोधात्मेति। बोधरूपस्यात्मनो यज्ज्योतिः प्रकाशश्चिदाभासस्तेन दीप्ता व्याप्ता प्रकाशिता बुद्धिरात्मनि स्वस्यां बोधं चैतन्यं मन्यते अन्यो बोद्धा साक्षी नास्ति अहमेव बोद्धेति साभासबुद्धिः प्रकाशते तदविवेकादहमेव बोद्धा कर्त्तेत्यादिरात्मनि संसारो धीगता भ्रान्तिरेवेत्यर्थः॥ ६०॥

बुद्धेरेव बोधात्मत्वं यथाप्रतीति परमार्थं किं न स्यादिति, नेत्याह।

(६१) बोधस्यात्मस्वरूपत्वान्नित्यं तत्रोपचर्यते।
अविवेको ऽप्यनाद्यो ऽयं संसारो नान्य इष्यते॥ ३१३॥

बोधस्येति। बुद्धेरागन्तुकत्वेन बोधव्यभिचाराद् बोधस्य च विनापि बुद्धिं सुषुप्ते सद्भावादात्मस्वरूपत्वात्तत्र बुद्धौ स उपचर्यते ऽध्यस्य व्यवह्रियते ऽविवेकादित्यर्थः। तर्हि सो ऽविवेकः सादिरनादिर्वेति वीक्षायामाह। अविवेकोपीति। यद्यविवेक एवानाद्यज्ञानकृतत्वादनादिस्तर्हि तस्यैव ब्रह्मात्मज्ञानान्निवृत्तिः स्यान्न संसारस्येति भ्रमं वारयति। संसारो नान्य इष्यते। कर्त्रादिधर्मकबुद्ध्यविवेक एव संसार इत्यर्थः॥ ६१॥

बन्धस्याज्ञानात्मकत्वे फलितमाह।

(६२) मोक्षस्तन्नाश एव स्यान्नान्यथानुपपत्तितः।
येषां वस्त्वन्तरापत्तिर्मोक्षो नाशस्तु तैर्मतः॥ ३१४॥

मोक्ष इति। ज्ञानादज्ञाननिवृत्त्या तत्कार्यबन्धनिवृत्तिरेव मुक्तिर्नान्यथा हेयस्योपादेयस्य वा मोक्षस्यानुपपत्तितोनुपपत्तेरित्यर्थः। अनुपपत्तिमेव द्रढयन् पक्षान्तरं निराकरोति। येषामिति। येषां वादिनां स्वरूपादन्यवस्त्वन्तरापत्तिरात्मनो मोक्ष इति मतं तैरात्मनाश एव मोक्ष इतीष्टः स्यात् स्थितस्य नष्टस्य वान्यस्यान्यत्वासंभवाद्वस्त्वन्तरापत्तिशब्देन यदि प्राप्तिर्विवक्ष्यते तथापि संयोगा विप्रयोगान्ता इति न्यायेन कृतकस्यानित्यत्वव्याप्तेश्चानित्यो मोक्षः स्यादित्यर्थः॥ ६२॥

यथा वस्त्वन्तरापत्तिर्मोक्ष इति पक्षे ऽनुपपत्तिरनित्यत्वापत्तिश्च तथात्मनो ऽवस्थान्तरापत्तिर्मोक्षपक्षेपि स दोषस्तुल्य इत्याह।

(६३) अवस्थान्तरमप्येवमविकारान्न युज्यते।
विकारे ऽवयवित्वं स्यात्ततो नाशो घटादिवत्॥ ३१५॥

अवस्थान्तरमप्येवमिति। अविकारित्वादात्मनो ऽवस्थान्तरमपि न युज्यते, यदि पुनर्विकारोऽप्यभ्युपगम्येत तथा सति सावयवत्वमात्मनः स्यात्ततः सावयवत्वान्नाश एव घटादिवदपरिहार्यः स्यादतो भ्रान्तिनिवृत्तिमात्र एव मोक्षो नान्यथा संभवतीत्यर्थः॥ ६३॥

वेदान्तसिद्धान्तादन्या बन्धमोक्षादिकल्पना वादिभिरुत्प्रेक्षिताः श्रुतिस्मृतिन्यायबाधितत्वान्नादरणीया मुमुक्षुभिरित्युपसंहरति।

(६४) तस्माद्भ्रान्तिरतोन्या हि बन्धमोक्षादिकल्पनाः।
सांख्यकाणादबौद्धानां मीमांसाहतकल्पनाः॥ ३१६॥

तस्मादिति द्वाभ्याम्। भ्रान्तिरेव परिशेषादात्मनि बन्धमोक्षप्रतिभास इति कल्पनाः श्रुत्याद्यविरुद्धाः, अतोन्या बन्धमोक्षादिकल्पना, आदिशब्दात्तद्धेतुकल्पनाश्च नादर्त्तव्याः कदा चनेति संबन्धः, अतोस्मात्सिद्धान्तादन्याबन्धमोक्षादिकल्पना हि यस्माद्भ्रान्तिः प्रमाणशून्या तस्मान्नादर्त्तव्येति वान्वयः, केषां वा कल्पना नादर्त्तव्या इत्यत आह। सांख्येति। मीमांसाहता विचारविरुद्धा विचारासहा वा कल्पना मीमांसाहतकल्पना इत्यर्थः॥ ६४॥

अनादरे हेतुमाह।

(६५) शास्त्रयुक्तिविहीनत्वान्नादर्त्तव्याः कदा चन।
शक्यन्ते शतशो वक्तुं दोषास्तासां सहस्रशः॥ ३१७॥

शास्त्रेति। शास्त्रयुक्तिविरुद्धाश्च ताः कल्पना इत्याह। शक्यन्तइति॥ ६५॥

इतश्च सांख्यादिकल्पना नादर्त्तव्या इत्याह।

(६६) अपि निन्दोपपत्तेश्च यान्यतो ऽन्यानि चेत्यतः।
त्यक्त्वातो ह्यन्यशास्त्रोक्तीर्मतिं कुर्याद्दृढां बुधः॥ ३१८॥

अपि निन्दोपपत्तेरिति।

यान्यतो ऽन्यानि शास्त्राणि पृथिव्यां विविधानि वै।
शङ्कनीयानि विद्वद्भिर्धर्मशुद्धिमभीप्सुभिः॥
या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः।
सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः॥

इत्यादिनिन्दावचनान्नादर्त्तव्या इत्यर्थः। अतोन्यशास्त्रोक्तीस्त्यक्त्वा दृढां मतिं बुधः कुर्यादित्यन्वयः॥ ६६॥

कथं मतिं कुर्यात्कुत्र वेत्याकाङ्क्षायामाह।

(६७) श्रद्धाभक्ती पुरस्कृत्य हित्वा सर्वमनार्जवम्।
वेदान्तस्यैव तत्त्वार्थे व्यासस्यापि मतौ तथा॥ ३१९॥

श्रद्धेति। श्रद्धा श्रुत्युक्तेर्थे विश्वासो भक्तिस्तत्परता ते पुरस्कृत्यादरेणावलम्ब्येत्यर्थः। सुगममन्यत्॥ ६७॥

एवमुक्तं परपक्षनिराकरणं संक्षिप्य तत्प्रयोजनं कथयति।

(६८) इति प्रणुन्ना द्वयवादकल्पना
निरात्मवादाश्च तथा हि युक्तितः।

व्यपेतशङ्काः परवादतः स्थिरा
मुमुक्षवो ज्ञानपथे स्युरित्युत ॥ ३२० ॥

इतीति। इति इत्थं युक्तितः प्रणुन्ना निराकृता द्वयवादकल्पना भेदवादकल्पनाः सांख्यादिकल्पना इति यावत्, तथा निरात्मवादा बौद्धवादाश्च युक्तितः प्रणुन्ना इत्यर्थः। तदाह। व्यपेतेति। मुमुक्षवः परवादतः परशास्त्रेभ्यो व्यपेतशङ्कास्तत्प्रामाणिकत्वशङ्कारहिताः सन्तो ज्ञानपथे वेदान्तोक्तज्ञानमार्गे स्थिराः स्युर्भवेयुरित्युत अपीति योजना ॥ ६८ ॥

वेदान्तविहितब्रह्मात्मज्ञानस्यैव परमपुरुषार्थसाधनत्वमिति तत्स्वरूपकथनपूर्वकं मुमुक्षूणां तन्निष्ठत्वमावश्यकमिति दर्शयति।

(६९) स्वसाक्षिकं ज्ञानमतीव निर्मलं
विकल्पनाभ्यो विपरीतमद्वयम्।
अवाप्य सम्यग्यदि निश्चितो भवे-
न्निरन्वयो निर्वृतिमेति शाश्वतीम् ॥ ३२१ ॥

स्वसाक्षिकमिति। अद्वयमखण्डवस्तुमात्राकारमित्यर्थः। निरन्वयो निरस्ताज्ञानतत्कार्यसंबन्धः सन्नित्यर्थः। शाश्वती निर्वृतिरखण्डानन्दानुभवस्वरूपाविर्भावः ॥ ६९ ॥

यथोक्तज्ञानाधिकारिणं संक्षिप्तविशेषणसारं कथयंस्तत्त्वनिष्ठालक्षणमाह।

(७०) इदं रहस्यं परमं परायणं
व्यपेतदोषैरभिमानवर्ज्जितैः।
समीक्ष्य कार्या मतिरार्ज्जवे सदा
न तत्त्वदृक् स्वान्यमतिर्हि कश्चन ॥ ३२२ ॥

इदं रहस्यमिति। यदवाप्य शाश्वतीं निर्वृतिमेति तदिदं रहस्यमुपदेशैकगम्यं परमं परमात्मतत्त्वप्रकाशत्वात्सर्वोत्तमं परायणं निरवधिकसर्वाश्रयं परमगतिरूपमिति यावत्, एवं विधमात्मज्ञानं समीक्ष्य सम्यगालोच्य दृढीकृत्येति यावत्। व्यपेतदोषैरपगतेन्द्रियबहिर्मुखैरभिमानवर्ज्जितैः पाण्डित्यादिनिमित्तचित्तदोषरहितैः शान्तैर्दान्तैश्चेति यावत्। एवंविधैरधिकारिभिरार्ज्जवे ऋजुभावे सर्वसमे ब्रह्मात्मतत्त्वे मतिर्निष्ठा सदा कार्या ब्रह्मात्मतत्त्वमेव ऋजु सर्वदा सर्वत्रैकरूपत्वात्तत्स्वरूपमेवार्ज्जवं नाम तस्य निर्विशेषत्वादिति द्रष्टव्यं, तथा च ब्रह्माभेदेनात्मज्ञाननिष्ठा तत्त्वनिष्ठेत्युक्तं भवति। एतदेव व्यतिरेककथनेन विशदयति। न तत्त्वदृगिति। यः कश्चन स्वान्यमतिः प्रत्यगात्मनोऽन्यस्मिन् ब्रह्मणि मतिर्यस्य स स्वान्यमतिः स न तत्त्वदृक् तत्त्वदृष्टिर्न भवतीत्यर्थः। "तदेव ब्रह्मत्वं विद्धि नेदं यदिदमुपासते। अथ योऽन्यां देवतामुपास्तेऽन्यो ऽसावन्योहमस्मीति न स वेदेति" श्रुतेः ॥ ७० ॥

एवमतियत्नलभ्येन ज्ञानेन किं फलं साध्यते तदाह।

(७१) अनेकजन्मान्तरसंचितैर्नरो
विमुच्यतेऽज्ञाननिमित्तपातकैः।
इदं विदित्वा परमं हि पावनं
न लिप्यते व्योमइवेह कर्म्मभिः ॥ ३२३ ॥

अनेकेति। स्पष्टार्थः ॥ ७१ ॥

इदं ज्ञानमाचार्येण कस्मै दातव्यमित्यपेक्षायां विस्तृतविशेषणमधिकारिणमाह।

(७२) प्रशान्तचित्ताय जितेन्द्रियाय च
प्रहीणदोषाय यथोक्तकारिणे।
गुणान्वितायानुगताय सर्वदा
प्रदेयमेतत्सततं मुमुक्षवे ॥ ३२४ ॥

प्रशान्तेति। प्रशान्तचित्ताय शान्तिगुणयुक्ताय जितेन्द्रियाय दान्ताय प्रहीणदोषायानेकजन्मानुष्ठितयज्ञादिपरितोषितेश्वरप्रसादहतसमस्तकल्मषाय यथोक्तकारिणे शास्त्रोक्तस्वधर्मस्य यथाशास्त्रमनुष्ठात्रे गुणान्विताय विद्याविनयार्ज्जवादिगुणयुक्ताय सर्वदा दीर्घकालं सततं च नैरन्तर्येणानुगताय गुरुमनुसृताय एवंविधाय मुमुक्षवे मोक्षमात्रे निष्ठावते एतदात्मज्ञानं गुरुणा देयं प्रतिपादयितव्यमित्यर्थः ॥ ७२ ॥

एवंविधः शिष्यो महावाक्येनावगमितमात्मतत्त्वं कथमवगच्छति किं वा फलं प्राप्नोतीत्यपेक्षायामाह।

(७३) परस्य देहे न यथाभिमानिता
परस्य तद्वत्परमार्थमीक्ष्य च।
इदं हि विज्ञानमतीव निर्मलं
संप्राप्य मुक्तोऽथ भवेच्च सर्वतः ॥ ३२५ ॥

परस्येति। यथा परस्यान्यस्य देहे परस्यापरस्य नाभिमानिताऽहं ममेत्यभिमानित्वं न भवति तद्वत्स्वदेहेपि परमार्थमीक्ष्य देहातिरिक्तमात्मतत्त्वमीक्ष्यालोच्याभिमानरहितः सन्निति यावत्, चकारात्तत्प्रतिपादकवेदान्तवचांस्यालोच्येति गृह्यते। एवंविध इदं विज्ञानं पूर्वोक्तं साक्षात्कारं संप्राप्याथ तदैव सर्वतो मुक्तो भवेन्निरस्ताज्ञानतत्कार्यसंस्कारपरमानन्दानुभवब्रह्मात्मरूपो भवेदित्यर्थः ॥ ७३ ॥

किमिति गुणविशेषवच्छिष्यपरीक्षणं गुरोर्यस्मै कस्मै चिच्छिष्याय कस्माद्विद्या न दीयते तत्राह।

(७४) नहीह लाभोऽभ्यधिकोऽस्ति कश्चन
स्वरूपलाभात्स इतो हि नान्यतः ।
न देयमैन्द्रादपि राज्यतो ऽधिकं
स्वरूपलाभं त्वपरीक्ष्य यत्नतः ॥ ३२६ ॥

॥ इति पार्थिवप्रकरणम् ॥

नहीति । स्वरूपमात्मतत्त्वं लभ्यते ऽनेनेति स्वरूपलाभस्तत्त्वज्ञानं तस्मादभ्यधिको लाभः कश्चन कोपीह देवमनुष्यादिभवपरंपरायां नास्ति, आत्मलाभाच्च परं विद्यतइति स्मृतेः, स लाभः इत एव वेदान्तवाक्याचान्यतोन्यस्माच्छास्त्रान्तराच्च भवति हि यस्मात्तस्माद्यत्नतः शिष्यमपरीक्ष्य स्वरूपलाभं तु ज्ञानं न देयम्, ऐन्द्रादपि राज्यतो राज्यादधिकमिति विशेषणेन प्रशाय्याय चान्तेवासिने नान्यस्मै कस्मै चन "यद्यप्यस्मा इमामद्भिः परिगृहीतां धनस्य पूर्णां दद्यादेतदेव ततो भूय" इति श्रुतिं प्रमाणयति ॥ ७४ ॥

॥ इति पार्थिवप्रकरणं षोडशं विवृतम् ॥ १६ ॥

---

॥ अथ बालभारतस्य ॥

॥ षष्ठः सर्गः ॥

अन्तर्धृतानाममलेन धाम्ना
बहिर्महाभारतजैर्यशोभिः ।
तमस्विषां येन तनुत्वगेव
पदं ददे कृष्णमुनिर्मुदेऽसौ ॥ १ ॥

अथ क्षितीशं द्रुपदं तदा किं-
कर्तव्यतामूढमुदूढचिन्तम् ।
उपेत्य कृप्तप्रणतिं जगाद
व्यासो रहः सर्वरहस्यवेदी ॥ २ ॥

पुरा पुरारौ वरदे तपोभि-
र्दौर्भाग्यभाक् क्वापि मुनीन्द्रकन्या ।
पतिं प्रयच्छेति जगाद पञ्च-
वारं वरालाभवितीर्णरोषा ॥ ३ ॥

भवान्तरे पञ्च भवन्तु वीराः
परस्परप्रीतिपरा वरास्ते ।
तदा प्रदायेति वरं वराङ्गा-
स्तस्यास्तिरोधत्त पुरां विरोधी ॥ ४ ॥

धवा भविष्यन्ति भवान्तरे मे
ध्यात्वेति रेमे तपसैव सेयम् ।
आयुःक्षये पुण्यचयेन नाक-
यंस्त्युपान्ते समभूद्वयस्य ॥ ५ ॥

इतश्च यज्ञं रचयांचकार
प्राङ्नैमिषारण्यगतः कृतान्तः ।
अनिघ्नति प्राणभृते तदस्मिन्
मर्त्यैरमर्त्यैरिव भूरभूषि ॥ ६ ॥

बुडिष्यति क्ष्मा द्रुतमर्त्यभारा
मर्त्येष्वमर्त्येष्वपि नो विशेषः ।
सुराः पुरस्कृत्य हरिं विरिञ्चे-
र्वेदादुपालम्भमिति प्रणेनुः ॥ ७ ॥

अथावदत् पद्मभवो यदायं
कर्ता भवान्नाशनं कृतान्तः ।
तदा नियतः क्रमतः प्रजानां
पूर्णायुषां पङ्कदलावलीवत् ॥ ८ ॥

निशम्य सम्यग्वचनं विरिञ्चे-
रेवं प्रमोदेन गताः सुरेन्द्राः ।
सुरापगायां विलसन्नवस्य-
दद्देवतास्यद्युति हेमपद्मम् ॥ ९ ॥

इदं कुतो जातमिति प्रमोदा-
दादातुमन्तःसलिलं विवेश ।
ततोऽग्रतस्तां रुदतीं ददर्श
स्वर्गश्रियं भर्गकृताञ्चलेन ॥ १० ॥

तदश्रुभिर्गाङ्गजले गलद्भि-
स्तूर्णं सुवर्णाम्बुरुहीभवद्भिः ।
चमत्कृतस्तावदिति द्युभर्ता
स्मेरैस्तदास्येन्दुपुरो विशेषात् ॥ ११ ॥

वरोरु किं रोदिषि कासि नाक-
भर्त्रेति पृष्टा रुदती चचाल ।
जगाम तत् तामनु वासवोऽपि
प्रत्यूषसंध्यामिव शीतभानुः ॥ १२ ॥

हरिर्गिरीन्द्रं हरिणीदृशेति
नीतो युवानं किल वीक्ष्य कंचित् ।
स्थिरासने स्वप्रतिपत्तिमूढं
स्त्रिया समं शारिरसं चुकोप ॥ १३ ॥

अनेन यूना कुपितो हरेण
दृष्ट्या हतो दृग्विषभोगिनेव ।
हिमाद्रिमौलौ हरिराससाद
स्तम्भीकृतो नूतनशृङ्गभङ्गिः ॥ १४ ॥
समाप्तशारिव्यसनस्य विश्व-
नाथस्य वाग्भिस्त्रिदिवश्रियाथ ।
करेण संस्पृष्टवपुः पपात
शीर्णासनः स्तम्भ इव द्युभर्ता ॥ १५ ॥
अथावदद्विश्वगुरुः सुरेन्द्र-
मद्रेरिदं कन्दरमाविश त्वम् ।
भवन्निभैरग्रगतैश्चतुर्भिः
पञ्चेन्द्रियो वा गिरिरेष भातु ॥ १६ ॥
गतो गुहायामथ तैश्चतुर्भिः
साकं स पाकस्य रिपुः सपीडः ।
उपेत्य पादप्रणतः पुरारेः
किं किं करोमीति जगाद दीनः ॥ १७ ॥
अथाह नाथः प्रथिता चिराय
हत्या मम ब्रह्मशिरश्छिदोत्था ।
निवर्ततेऽष्टादशसंमितानां-
मक्षौहिणीनां रुधिराणि पीत्वा ॥ १८ ॥
अतो यतन्तां निभृतं भवन्तो
मल्लग्रहत्याशमनाय शक्राः ।
कृतावतारैरवनी भवद्भि-
राभातु पञ्चाननकामिनीव ॥ १९ ॥
असौ रणारम्भविजृम्भितार्थं
सार्थं नृपाणां प्रगुणीकरोतु ।
कृतावतारा भुवि नाकलक्ष्मी-
र्युष्मासु पञ्चस्वपि वल्लभैका ॥ २० ॥
इहावतारं विरचय्य देव्यां
सा ब्रह्महत्या मम कापि कृत्या ।
भुजाभृतामग्रमधूनि पीत्वा
तृप्ता मदान्मोक्ष्यति मां क्षणेन ॥ २१ ॥
तथेति निश्चित्य कृतप्रतिज्ञै-
रिन्द्रैश्चतुर्भिर्जगदे विभुस्तैः ।
नरान्न कार्यं ननु धर्मवात-
नासत्यतो जन्म विधीयतां नः ॥ २२ ॥
उवाच वाचं स च पञ्चमेन्द्रो
नाहं करिष्ये वसुधावतारम् ।
पुमान् मदंशप्रभवोऽस्तु भूमौ
भूरिप्रभावैर्विभुकार्यहेतुः ॥ २३ ॥
अथेति हत्याशमके समाप्त-
प्राये स्वकार्ये समदप्रमोदः ।
जगाद नाथो जगतामितीद-
मस्त्वेव विश्वे जयिनश्च यूयम् ॥ २४ ॥
किंत्वेतु वैवस्वतवासवस्य
नरः सुतत्वं बदरीवनर्षिः ।
साहाय्यहेतोः सुहृदस्य भूमौ
नारायणोऽप्यस्तु कृतावतारः ॥ २५ ॥
स विश्वभुङ्नाम किलान्तरस्य
स्वायंभुवस्य त्रिदशाधिनाथः ।
युधिष्ठिराङ्गेन कृतावतारो
धर्माङ्गजन्मा भुवनप्रियोऽभूत् ॥ २६ ॥
पतिः सुराणामृतधामनामा
स्वारोचिषस्य स्वयमन्तरस्य ।
बभूव भीमाङ्गकृतावतारो
वाताङ्गजोऽसौ गजसैन्यजेता ॥ २७ ॥
पुनस्तनूजोऽजनि वर्तमान-
वैवस्वताख्यान्तरसंभवस्य ।
सुरेशितुर्दुर्धरधन्वधारी
तेजस्विनाम्नः स्वयमर्जुनोऽसौ ॥ २८ ॥
सुरेश्वरावौत्तमतामसाख्य-
ख्यातान्तरस्फारतरप्रभावौ ।
श्रुतिश्रुतौ शान्तिशिबी च यौ तौ
नासत्यपुत्रौ यमलावभूताम् ॥ २९ ॥
इतस्त्वया द्रोणवधाय साधू
याजोपयाजावनुकूल्य वर्षम् ।
अकारि यज्ञः सुरसिन्धुतीरे
पुत्रार्थिना ध्यातपराभवेन ॥ ३० ॥

अथोपयाजे क्रतुकर्मनिष्ठे
याजे पुनर्ध्यातमखाधिदेवे ।
रथी धृतास्त्रः कवची च धृष्ट-
द्युम्नोऽग्निकुण्डेऽजनि पावकांशः ॥ ३१ ॥
तदा कुमारी तव सैव नाक-
श्रीर्वेदिमध्यादिह वेदिमध्या ।
अभूदियं भूप यया पुरारिः
प्राक् प्रीणितः पञ्चवरी च लब्धा ॥ ३२ ॥
अमी च वीरास्तत्र चाङ्गजेय-
मीदृक्चरित्राय चिरं चरन्तु ।
मुनिर्निवेद्येति स पार्षताग्रे
प्रत्यक्षयामास च दिव्यदृष्ट्या ॥ ३३ ॥
इदं गदित्वाथ गते यतीन्द्रे
प्रौढप्रमोदं द्रुपदेन राज्ञा ।
विवाहिताः पाण्डुसुताः[1] स्वपुत्रीं
कन्यां मुहुः पञ्चदिनक्रमेण ॥ ३४ ॥
जयन्ति कुन्तीतनया नयाढ्या
वार्तेत्यनार्ताथ बभूव भूमौ ।
स्वयंवरायातनृपाश्च जग्मुः
स्वं स्वं पुरं पाण्डवकाण्डभीत्या ॥ ३५ ॥
सुयोधनेनाथ हठेन हन्तुं
कुन्तीसुतान् दुर्ललितेन पृष्टः ।
अलोचनो भूमिपतिश्चकार
द्रोणेन भीष्मेण समं स मन्त्रम् ॥ ३६ ॥
धुनीतनूजो निजगाद केन
शक्या विजेतुं भुवि पाण्डुपुत्राः ।
भटीभवद्यादवपार्षतेषु
भीमार्जुनौ येषु रणप्रवीरौ ॥ ३७ ॥
ततः पतङ्गप्रतिमप्रतापा-
नाकार्य कुन्तीतनयान् भुजालान्
स्वयं रयादर्हसि तात दातुं
राज्यार्धमुन्मार्जय दुर्यशोऽय्यस्
मते मतेर्वासगृहेण भार-
द्वाजेन तस्मिन्नथ भीष्ममन्त्रे ।
न्ययुङ्क्त राजा विदुरं तदानीं
युधिष्ठिराकारणकारणेन ॥ ३८ ॥
रथैरथैष द्रुपदस्य पुर्यां
धुर्यो गुणानां विदुरः प्रयातः ।
समेतकृष्णान् पुरमानिनाय
पाण्डोः सुतान् पार्षतसैन्यधन्यान् ॥ ४० ॥
कृतप्रणामाय गुरुक्रमेषु
धर्माङ्गजायाथ सबान्धवाय ।
कुले विरोधः पुनरस्तु मेति
तत् खाण्डवप्रस्थमदात् तदान्धः ॥ ४१ ॥
स खाण्डवप्रस्थमथो पृथायाः
सूनुर्ययौ गर्जिततर्जितारिः ।
तत्र व्यधादिन्द्रपुराभमिन्द्र-
प्रस्थाभिधानं नगरं नरेशः ॥ ४२ ॥
इदं मनःकल्पिततूर्णपूर्ण-
वाञ्छाभरैरप्यमरैरलभ्यम् ।
पुरं प्रपन्नाय पुरंदरोऽपि
तस्मै नृपाय स्पृहयांबभूव ॥ ४३ ॥
निवेश्य वैश्वानरतुल्यभास-
स्तान् पाण्डवानच गते मुरारौ ।
सभाभुवं प्राप युधिष्ठिरस्य
श्रीनारदः स्फारदयामयात्मा ॥ ४४ ॥
अथास्य वाचा महितस्य चक्रुः
पञ्चापि वीराः समयं किलेति ।
उपैति कृष्णाजुषि यो द्वितीयः
स स्यात् समा द्वादश तीर्थसेवी ॥ ४५ ॥
इति प्रतिज्ञाय कृतप्रणामाः
कामप्रचारे व्रतिनि प्रयाते ।
समृद्धराज्याः समयेन तेन
ते द्रौपदीभोगभृतो बभूवुः ॥ ४६ ॥
अथैकदा कश्चन चौरचक्रै-
र्गोचक्रबालेषु हृतेषु विप्रः ।
पृथाभुवो धावत धावतेति

१ पाण्डुसुतानामत्र प्रधानकर्मता विवक्षिता ।

क्रन्दन् मुहुस्तत् पुरमाससाद ॥ ४७ ॥

प्रियायुतच्मापतिरुद्धसौध-
गुप्ते तदास्त्रे विधुरे च विप्रे ।
स्मरन् मनोऽन्त: समयं किरीटी
किं किं करोमीति मुहुर्मुमोह ॥ ४८ ॥

रयैर्द्विजार्थे सुकृतं विशेषात्
तद्द्वादशाब्दैश्च वने मुनित्वात् ।
तदार्जुनो दुर्जनमौलिशूलं
ध्यात्वेति चापं गृहतश्चकर्ष ॥ ४९ ॥

विजित्य चौरानथ सव्यसाची
विप्राय दत्त्वा सुरभीरभीरु: ।
तदा निषिद्धोऽपि नृपेण धीरो-
ऽरण्यं ययौ विप्रगणेन साकम् ॥ ५० ॥

द्विजैर्द्विरेफैरिव पीयमान-
दान: स नागेन्द्र इवेन्द्रसूनु: ।
भ्रमन्नरण्येषु जगाम गङ्गा-
द्वारेऽथ भास्वद्व्रतापभित्त्यै ॥ ५१ ॥

इहाग्निहोत्राणि तथा कथं चि-
च्चक्रुर्द्विजा: पाण्डुसुतानुयाता: ।
यथा त्रिमार्गा तनुते तरङ्गै-
रद्यापि तत्रैव विवर्तनानि ॥ ५२ ॥

अथाग्निकृत्याभिषवाय गङ्गा-
गर्भप्रविष्टं रभसादुलूपी ।
जहार कौरव्यभुजङ्गपुत्री
कौरव्यमेनं मदनाभितप्ता ॥ ५३ ॥

तयाथ नीत: फणिपत्तनान्त-
स्तत्राग्निमालोक्य समाहितं स: ।
कृती चकाराखिलमग्निकार्यं
श्रेय:स्पृशां कुत्र न कार्यसिद्धि: ॥ ५४ ॥

अतीव रक्तां भजत: कृशाङ्गीं
न ब्रह्मचर्यव्रतभङ्गमाहु: ।
विना तदालिङ्गनसंगमेन
यस्मादसून् धर्तुमसौ न शक्ता ॥ ५५ ॥

चिरं विचिन्त्येति कृती निकामं
कामार्तिलोलार्दितकातराक्षीम् ।
दयामयो दीनगिरं किरीटी
कौरव्यकन्यामभजद्भुजङ्गीम् ॥ ५६ ॥
युग्मम् ।

निशोषितस्तामयमात्तगर्भा-
मापृच्छ्य याति स्म पुनर्निवेशम् ।
निवेद्य सद्यश्चरितं द्विजेभ्य:
प्रालेयशैलोपतटं प्रपेदे ॥ ५७ ॥

ततो गतोऽगस्त्यवटाद्वशिष्ठ-
शैलेऽभिषिक्तो भृगुतुङ्गतीर्थे ।
विलोक्य तीर्थं स हिरण्यबिन्दो-
स्तं पर्वतश्रेष्ठमपि प्रपेदे ॥ ५८ ॥

व्रजन्नथ प्राग्दिशि स प्रपेदे
नन्दीं नदीं नैमिषकाननं तत् ।
तटानि नन्दापरनन्दयोस्तां
श्रीकौशिकीं ते च गयात्रिमार्गे ॥ ५९ ॥

स सागरं वीक्ष्य कृती कलिङ्ग-
देशान्महेन्द्रं च महामहीध्रम् ।
तटेन सिन्धोर्मणिपूरमाप्य
तीर्थानि पार्थो निखिलान्युपास्त ॥ ६० ॥

ततोऽत्र दृष्ट्वा मणिपूरभर्तु-
श्चित्राङ्गदां चित्रनृपस्य पुत्रीम् ।
रूपे रतिं स्वैरविहारशीलां
तां प्रत्यभूत् पाण्डुसुत: सकाम: ॥ ६१ ॥

प्रभङ्कराह्वेन ममान्वये प्रा-
गपुत्रिणोर्वीपतिना तपोभि: ।
आराधितोऽदत्त वरं हरोऽस्मै
वंशे तवैकैकमपत्यमस्तु ॥ ६२ ॥

मा यावदासंस्तनुजा ममेयं
सुताभवद्वंशकरी तु पार्थ ।
जातस्ततोऽस्यां तनयस्तवास्तु
मद्रूपताभागिह संविदेति ॥ ६३ ॥

पित्रार्थितेनाथ वितीर्णयास्यात्
तया समं तत्र नरस्त्रिवर्षीम्

ततोऽभवद्बभ्रुरिति प्रतीतः
सूनुर्द्विषद्भूपभुजङ्गबभ्रुः ॥ ६४ ॥
त्रिभिर्विशेषकम् ।
स दक्षिणाम्भोनिधितीरतीर्थ-
सार्थाय पार्थस्तदितश्चचाल ।
महर्षिभिस्तत्र निवारितोऽपि
सौभद्रतीर्थे सवनं स चक्रे ॥ ६५ ॥
पदग्रहव्यग्रमिहोग्रमये
जग्राह स ग्राहमुदग्रबाहुः ।
विपक्षपक्षक्षयदक्षिणस्तं
चिक्षेप साक्षेपमथान्तरिक्षे ॥ ६६ ॥
व्यलोकयद्ग्राहपदे तदेष
नभोऽन्तरा देशमिवोत्पलाक्षीम् ।
उवाच सा वाचमिति प्रतीतां
पार्थं प्रति प्रीतिसुधोर्मिधौताम् ॥ ६७ ॥
प्रवीर पञ्चाप्सरसः प्रसिद्धाः
सिद्धालिगोष्ठीषु वयं वयस्याः ।
इहास्मि धर्माथ च सौरभेयी
सामीरिका बुद्बुदिका लता च ॥ ६८ ॥
द्विजेन केनापि तपःस्थितेन
शप्ता वयं विघ्नविधाननिघ्नाः ।
अभूम धीमन्निह पञ्चतीर्थ्यां
पञ्चापि यादांस्यतिनिष्ठुराणि ॥ ६९ ॥
यदा नरः क्षेप्स्यति खे समर्थः
कश्चित् तदा वः खलु शापमुक्तिः ।
अनुग्रहोऽस्माकमभूत् तदाय-
मित्यस्मि मुक्तार्जुन मोचयान्याः ॥ ७० ॥
इदं निशम्यापि परेषु पार्थ-
स्तीर्थेषु ता मोचयति स्म शापात् ।
तदादि संप्रत्यपि पञ्च नारी-
तीर्थान्यमूनीति ययुः प्रसिद्धिम् ॥ ७१ ॥
अथार्जुनस्तीर्थशतानि पश्यन्
गोकर्णमुख्यानि दिशि प्रतीच्याम् ।
पृथुप्रभावप्रसरं प्रभास-
क्षेत्रं ययौ क्षत्रियसार्वभौमः ॥ ७२ ॥
रोमाञ्चितो मारकतप्रभाभि-
र्यः पद्मरागै रचितानुरागः ।
तरङ्गिणीसङ्गरसो बभार
स्वेदोदबिन्दूनिव मौक्तिकानि ॥ ७३ ॥
सुधास्य कुक्षौ पतिरौषधीना-
मस्याङ्कभूरेष पदं मणीनाम् ।
उदेत्यतो मन्त्रमयोऽयमेति
यस्मिन् न सर्पत्यपि कालसर्पः ॥ ७४ ॥
कुर्वंस्तपो नक्तमिति श्रुतं यः
क्षयक्षपायां भुवनानि भुक्त्वा ।
विष्णुं हृदि न्यस्य महेशभाल-
दृग्दीपभृज्जागरणं करोति ॥ ७५ ॥
पितृद्विषं कुम्भभवं विभाव्य
यत्संभवाः कुम्भधियेव मुक्ताः ।
पदं ददत्यादृतहाररूपा
भूपालकान्ताकुचमण्डलेषु ॥ ७६ ॥
कृष्णस्य कुक्षौ स्थितमब्धिनेति
हसन् जनोक्तीः स्फुटफेनभाभिः ।
यो वक्ति कृष्णं निजकुक्षिभाजं
स्वभावशुद्धोदककृष्णभाभिः ॥ ७७ ॥
अस्ताचलाग्रच्युतभग्नमग्न-
चण्डांशुखण्डानि तमीषु यस्मिन् ।
वीचीचयोत्थज्वलनस्फुलिङ्गा-
वलिच्छलेनाधिकमुच्छलन्ति ॥ ७८ ॥
ब्रह्माण्डमादौ सृजति स्वयं य-
स्ततोऽभितः पाति पयोदवृन्दैः ।
वीचीचयैः संहरतीदमन्ते
त्रिशं[1]मुहासी मणिदन्तदीप्त्या ॥ ७९ ॥
कल्पद्रुचिन्तामणिकामगव्यो
यस्यैकदानं हृदि यस्य विष्णुः ।
ररक्ष शक्रादपि भूभृतो य-
स्तं वीक्ष्य वार्धिं मुमुदेऽत्र पार्थः ॥ ८० ॥

१ शंभवोऽत्र ब्रह्मविष्णुमहेश्वरा विवक्षिताः ।

अष्टभिः कुलकम् ।

अथैतमायातमिहावगम्य
स्फारस्मयं द्वारवतीक्षितीशः ।
समं समग्रैरपि यादवेन्द्रै-
रभ्याययौ रैवतकाद्रिसीम्नि ॥ ८१ ॥

यथोचितं चक्रुरथ क्रमेण
पार्थाय सर्वेऽपि यदुप्रवीराः ।
नदीप्रवाहैरिव तैरथायं
शाखीव निन्ये स्वपुरीं प्रवाह्य ॥ ८२ ॥

महोत्सवे रैवतकोपकण्ठं
ययुः कदाचिद्यादवः प्रमत्ताः ।
अथात्र भद्रावयवा सुभद्रा
विष्णोः स्वसा जिष्णुमनश्चकर्ष ॥ ८३ ॥

स्वयंवरे वा हरणे हठाद्वा
वीरस्य माहात्म्यवहो विवाहः ।
इयं स्वयं वा वृणुयान्न वा त्वां
ततस्त्वमेतां हठतो हरेति ॥ ८४ ॥

विष्णुर्मनस्तस्य विदन् यदूनां
द्रव्यप्रियत्वं[1] च जगाद जिष्णुम् ।
अथेति विज्ञाप्य युधिष्ठिराय
पार्थः सुभद्राहरणोद्यतोऽभूत् ॥ ८५ ॥

युग्मम् ।

अथैकदा रैवतकप्रयातां
मत्वा सुभद्रां तनयः पृथायाः ।
अनुप्रयातो मृगयामिषेण
जित्वाङ्गरक्षान् किल तामहार्षीत् ॥ ८६ ॥

कृष्णः क्रुधार्तेषु बलादिकेषु
सर्वैरजय्योऽयमिति प्रजल्पन् ।
नरैः प्रसाद्यागमितेन शक्र-
भुवा सुभद्रामुदवीवहत् ताम् ॥ ८७ ॥

पुरे यदूनामथ पुष्करेषु
निर्वाह्य कालं तमशेषमेषः ।
अथाययौ कृष्णयुतस्तमिन्द्र-
प्रस्थं सुभद्रासहितः किरीटी ॥ ८८ ॥

विशन् पुरान्तः स्थविराङ्गनाभि-
श्चेलाञ्चलोच्चालनतत्पराभिः ।
बभौ तदाध्वश्रमवारिबिन्दु-
च्छेदप्रवीणाभिरिवैष वीरः ॥ ८९ ॥

अथो यथौचित्यमयं महौजा-
श्चक्रे चतुर्णामपि बान्धवानाम् ।
नत्वा पृथां पार्षतनन्दिनीं तां
तवास्मि दासीत्यवदत् सुभद्रा ॥ ९० ॥

शुभं सुभद्राथ सुतं सुषाव
धन्याभिमन्युं दलितारिमन्युम् ।
जवेन यस्मिन् पितृमातुलीयं
सामर्थ्यमेकत्र समाजगाम ॥ ९१ ॥

कलाकलापं सकलं किरीटी
संयोजयामास निजे सुतेऽस्मिन् ।
हरिश्च बाल्यादपि भागिनेये-
ऽमुष्मिन्नुभाभ्यामिति स क्षमोऽभूत् ॥ ९२ ॥

क्रमेण पञ्चालसुता च पञ्च
पञ्चप्रियेभ्यस्तनयानसूत ।
कलावधूकेलिगृहाणि वर्ष-
वर्षान्तरेणाग्निसमानभासः ॥ ९३ ॥

अबन्ध्यधामाप्रतिबन्ध्यनामा
सोमाभकीर्तिः श्रुतसोमसंज्ञः ।
रणोग्रकर्मा श्रुतकर्मनाम-
धेयः शतानीक इति श्रुतश्च ॥ ९४ ॥

हतारिसेनः श्रुतसेनसंज्ञः
कुन्तीसुतानामिति ते तनूजाः ।
अदादमीषामपि सव्यसाची
सर्वाः कला धौम्यकृतक्रियाणाम् ॥ ९५ ॥

विशेषकम् ।

वितन्वता षण्मुखतां कुमार-
वीरव्रजेन प्रतिभासमानः ।

१ यदवोऽधिकद्रव्यवते कन्यां ददतीति द्रव्यप्रियत्वसंभावना यदुषु कृष्णेन कृतेति तत्त्वम् ।

नमस्यतां पञ्चमुखः स पाण्डु-
नरेन्द्रवंशो नहि कस्य जातः ॥ ९६ ॥

गोवामनस्य क्षितिशासनस्य
शैव्यस्य पुत्रीं तपसः सुतेन ।
स्वयंवरे प्राप्यत देविकाख्या
जातोऽस्य यौधेयसुतस्ततोऽस्याम् ॥ ९७ ॥

काश्यां वकस्यान्तकरो बलैक-
शुल्कां बलाग्रस्यधरां व्युवाह ।
तस्यां ततस्तेन पतङ्गधामा
सर्वाङ्गनामा जनितोऽङ्गजन्मा ॥ ९८ ॥

जग्राह चैद्यां नकुलः करेणु-
वतीं करेणुप्रतिरूपरूपाम् ।
ततोऽस्य तस्यामजनिष्ट सूनु-
रमित्रजेत्रो निरमित्रनामा ॥ ९९ ॥

स्वयंवरे तु द्युतिमत्तनूजा-
मवाप माद्रीं नकुलानुजन्मा ।
ततः स तस्यां विजयाह्वयायां
सुहोत्रमुत्पादयति स्म पुत्रम् ॥ १०० ॥

चत्वारोऽमी यौधेयकसर्वाङ्गनिरमित्रकसुहोत्राः ।
पाण्डुजतनुजा याता मातामहराज्यराजत्वम् ॥ १०१ ॥

चिराय चिक्रीडुरमी समीप-
श्रीजानयः पाण्डुसुताः पुरेऽस्मिन् ।
जितेव येषां महसार्कपङ्क्तिः
सेवां व्यधात् कुण्डलकैतवेन ॥ १०२ ॥

नयविनयविवेकादभ्रविभ्राजितश्री-
स्तदवनिवनिताया वल्लभो धर्मवीरः ।
घनधनजनपूर्णं पालयित्वा समन्ता-
दकृत सुकृतदृश्यं तत् पुरं ब्रह्मणोऽपि ॥ १०३ ॥

इति श्रीजिनदत्तसूरिशिष्यश्रीमदमरचन्द्रविरचिते श्रीबालभारतनाम्नि महाकाव्ये वीराङ्के आदिपर्वणि पाण्डवराज्यार्धलाभवर्णनो नाम षष्ठः सर्गः ॥ ६ ॥ :: ::

## ॥ अथ बालभारतस्य ॥

### ॥ सप्तमः सर्गः ॥

सेवध्वमध्वरभुजामपि सेवनीयं
पाराशरं मुनिमवाप्नयदङ्गसङ्गः ।
वर्णः शुचित्वमसितोऽपि तदाप केश-
व्याजेन येन शिरसा ध्रियते न कैः कैः ॥ १ ॥

अन्येद्युरर्जुनहरी तपसस्तनूज-
मापृच्छ्य पौरपरिवारपरीतपार्श्वौ ।
जाते वसन्तसमये यमुनोर्मिबिन्दु-
सिक्ताय खाण्डववनाय गतौ विहर्तुम् ॥ २ ॥

अन्तःप्रसृत्वरपतङ्गभवस्रवन्ती-
नीरप्रभाभिरिव नीरदनीलवर्णम् ।
आलोक्य खाण्डववनं पुरतो मुरारि-
रानन्दकन्दलितगीर्निजगाद पार्थम् ॥ ३ ॥

उल्लङ्घितं च परितः परितापितं च
तिग्मांशुना कलितदुःखमिवान्तरिक्षम् ।
पश्येदमत्र यमुनाजलसीम्नि वल्ल-
द्वल्लीजटं वनमिषेण तपस्तनोति ॥ ४ ॥

वर्षाभ्रमादिह सुसंहतशाखिसङ्घ-
शाखातिरोहितशशिद्युमणौ मयूराः ।
सूर्यात्मजाजलगजध्वनितेन नित्यं
नृत्यन्ति नादविधुरीकृतपान्थसार्थाः ॥ ५ ॥

वन्येभकुम्भहृतमौक्तिकमिश्रगुञ्जा-
संजातभूषणभराः शबरेन्द्रकन्याः ।
अस्मिन् विचित्रसिचयीकृतचित्रकाय-
कायत्वचः पुरपुरन्ध्रिजनं हसन्ति ॥ ६ ॥

लीलावतीमुखमिवेन्दुजयावदातं
विद्योतमानमणिकुण्डलमण्डनेन ।
पश्य स्वभावशुभशोभमपीदमद्य
कांचिद्वसन्तविभवेन बिभर्ति भूतिम् ॥ ७ ॥

क्रौञ्चप्रपञ्चितदरं ननु माधवस्य
पश्यावतारमतिमत्तशिलीमुखौघम् ।
येन व्यभूषि वनभूरपि मानसौक-
स्तोमेन शुभ्रकुसुमस्तवकच्छलेन ॥ ८ ॥

मन्ये प्रसूनभरसौरभवासलोभा-
दात्मा व्यसारि सहसैव विहायसापि ।
अस्मिन्निति द्युमणिवाहनवाहिवाहै-
र्लङ्घ्ये चिरेण ववृधे दिवसैरवश्यम् ॥ ९ ॥

शङ्के वसन्तवशनिर्भरभासमान-
सीमन्तिनीमुखमयूखभराभिभूतम् ।
पीयूषदीधितिममुं दयितं निरीक्ष्य
दुःखादमूर्दधति दुर्बलतां त्रियामाः ॥ १० ॥

ईदृग्वसन्तविभवेन यथा यथामी
प्रौढिं क्रमेण दिवसाः परिदर्शयन्ति ।
शङ्के त्रपापरिभवेन तथा तथैताः
श्यामा नवीनवनिता इव संकुचन्ति ॥ ११ ॥

दीर्घोऽपि दैर्घ्यमभजद्दिवसो बभार
कार्श्यं कृशापि च निशा प्रिययोगभाजाम् ।
प्रौढोऽप्यधत्त लघुतां स पुनर्गुरुत्वं
क्षामापि सा समतनोद्विरहातुराणाम् ॥ १२ ॥

तापार्द्धिरुत्तरदिशि व्रजतो रराज
राजीविनीयुवतिर्जीवितवल्लभस्य ।
काप्युत्कटा क्वचितेव तदन्तराशा-
वासित्रिलोचनविलोचनवह्निबाष्पैः ॥ १३ ॥

संतापिता इव खरै रविरश्मिभारै-
स्तारा विहाय गगनं तुहिनांशुवध्वः ।
स्वेदोदबिन्दुपटलीकपटेन कान्त-
भ्रान्त्येव चन्द्रवदनावदनानि भेजुः ॥ १४ ॥

उत्तेजयत्यनिशमेणदृशां मुखानि
कामायुधाय मधुरेष यथा यथोच्चैः ।
स्पर्धावशादिव महांसि तथा तथाय-
मुद्योतयत्यनुदिनं मृगलाञ्छनोऽपि ॥ १५ ॥

पुंस्कोकिले किमपि गायति सार्वभौम-
राज्याभिषेकमिव संतनुते स्मरस्य ।
आम्रान्तकान्तरतकौतुकजातखेद-
स्वेदोदबिन्दुभिरिह प्रमदामुखेन्दुः ॥ १६ ॥

विश्वत्रयं विजयते मकरध्वजोऽय-
मस्त्रीकृतेन मम कोमलकूजितेन ।
एनं तथापि कुसुमास्त्रमुशन्ति लोकाः
पुंस्कोकिलोऽरुणितदृष्टिरिति क्रुधेव ॥ १७ ॥

आपत्य विन्ध्यगिरिसीमनि मूर्च्छितोऽय-
मभ्रंकषाग्रशिखरस्खलनेन वायुः ।
वन्येभदानसलिलश्रुतितालवृन्त-
योगेन जीवित इवातिशनैरुपैति ॥ १८ ॥

ग्रासोन्मुखैः फणिकुलैरिव मारुतोऽयं
वित्रासितो मलयजद्रुमबद्धवासैः ।
आयाति मन्दमिह गीतविलासलोला
वेणीर्विलोक्य सुदृशां भृशतद्भियेव ॥ १९ ॥

विन्ध्यत्रिकूटमलयाचलकन्दराभिः
पीतोऽपि तोषयति नः पवनः प्रसर्पन् ।
दोलाविलासचलकेरलकैरवाक्षी-
वक्षोजवायुलहरीलयलालितोऽयम् ॥ २० ॥

आवाति पश्य शनकैर्मलयानिलोऽयं
यल्लूननूतनविलोलवनप्रसूनः ।
अस्मिन् वियुक्तवनिताजनतापकारी
तद्बाणवृष्टिरसिको विलसत्यनङ्गः ॥ २१ ॥

तं विक्रमं वितनुते मलयानिलोऽयं
कामस्य वीर इव मानिपताकिनीषु ।
येन द्विरेफमुखरास्तरवः शिरांसि
प्रीत्यैव काष्ठवपुषोऽपि विकम्पयन्ति ॥ २२ ॥

दूरं गते त्वयि भवन्मुखसोदराणि
संतापमत्र नलिनान्यपि धारयन्ति ।
मासः कृतोऽवधिरधीश स पूर्ण एव
संप्रत्यपि स्मरसि मां न कथं कथंचित् ॥ २३ ॥

पङ्केरुहव्यतिकरैरपि तापिताभि-
र्मासायमानघटिकाघटिकागमाभिः ।
प्रातः प्रयाणचलितेषु मुहूर्तकाले
संदिश्यते विरहिणीभिरिति प्रियेषु ॥ २४ ॥
युग्मम् ।

मञ्जीरमन्द्ररवमञ्जुमरालमाला-
वाचालबालकमलक्रमया रयेण ।

क्लृप्ते पदे मदवशेन वसन्तलक्ष्म्या
किंकिल्लिवल्लिभिरलभ्यत पल्लवालि: ॥ २५ ॥
रक्तोपलप्रचितकुञ्चितकुञ्चिकाभै-
रुत्फुल्लकिंशुकलताकुसुमैरमीभि: ।
उद्घाट्य किंचिदपि मानमयं कपाटं
कामो विवेश हृदि संप्रति दंपतीनाम् ॥ २६ ॥
सौभाग्यभाग्यमुररीकुरुते लतासु
सर्वासु चम्पकलतैव नितान्तमेषा ।
यस्या वसन्तरमण: कुसुमच्छलेन
भूषाभरं सुरभिभि: कुरुते सुवर्णै: ॥ २७ ॥
उत्फुल्लफुल्लमहसा हसति द्विरेफ-
नादेन गायति विघूर्णति मारुतेन ।
सद्य: प्रपद्य सुमुखीमुखमद्यमद्य
धत्ते प्रमत्त इव कां बकुलो न लीलाम् ॥ २८ ॥
आलिङ्गित: कुरुवकाख्यतरुस्तरुण्या
शक्रेभकुम्भकुचया सुरुचाभिसृत्य ।
इत्येष शेषधवलाभिरलाभि सद्य:
सौभाग्यकीर्तिभिरिव प्रसवप्रभाभि: ॥ २९ ॥
कामाकुल: खलु कटाक्षघटा: क्षिपन्ती-
मात्मन्यवेक्ष्य रमणीं रमणीयतार्थी ।
अह्नाय मूर्ध्नि कुसुमानि नवानि बध्नन्
प्रीतिं तनोति तिलक: किल कस्य नासौ ॥ ३० ॥
कोऽप्येष कुब्जकतरुर्घनसारधूप-
धूमोर्मिधूपिततनुर्धृतपुष्पमालाम् ।
गायन् मधुव्रतवधूमधुरारवेण
वश्यीकरोति कुतुकीव वसन्तलक्ष्मीम् ॥ ३१ ॥
श्रीमद्वसन्तऋतुराजविलासभूमि-
र्भ्रान्तर्विभाति सहकारमहीरुहोऽयम् ।
स्थानप्रदायिषु षडङ्घ्रिषु कोकिलेय-
मत्र प्रपञ्चयति कंचन पञ्चमं यत् ॥ ३२ ॥
मत्तेषु पश्य दयितारसविह्वलेषु
पारावतेषु कृतकौतुककूजितेषु ।
एषा वसन्तपरिरम्भभरेण रम्भा
कामातुरेव मकरन्दरसं ददाति ॥ ३३ ॥

नव्यप्रसूनमिषतो नवमाधवीयं
स्वेदोदबिन्दुनिवहानिव हासयन्ती ।
सङ्गे वसन्तकमितुर्घनचञ्चरीक-
रोमाञ्चकञ्चुकितचारुतनुश्चकास्ति ॥ ३४ ॥
अद्याप्यजातकुचकल्पफला मिलन्त्यो
मन्दानिलेन शिशुकेलिकलेन पश्य ।
कन्या इव स्फुरितनूतनपुष्पहासा:
क्रीडां मिथो विदधते नवनालिकेर्य: ॥ ३५ ॥
खर्जूरिका विशदरेणुकणावलीभि-
रश्यामलीकृततनू: पटलीरलीनाम्
प्रध्मानिनीर्मदनपुष्पमयेषुपङ्क्तिकल्पा:
कृताम्बरगती: कति नामनन्ति ॥ ३६ ॥
व्यालोलमञ्जरिभर: स्फुरितप्रसून:
कस्योत्सवं हृदि ददाति न सिन्दुवार: ।
पुष्पायुधस्य नवकार्मुककाण्डभार-
वाहीककिंकर इव त्रिजगद्विजेतु: ॥ ३७ ॥
पश्य स्वभावमधुराणि मधूकगुल्माद्
गुञ्जन्मधुव्रतवधूनि मधूनि पीत्वा ।
उच्चैस्तरेषु कलितस्खलित: समीरो
वात्येष मत्त इव हासितवल्लिपुष्प: ॥ ३८ ॥
किंकिल्लिपल्लवकरा स्मितपङ्कजास्या-
कर्णीयकोकिलरवा मधुरा मधुश्री: ।
आभाति मञ्जुलकुचाश्रयचन्दनाक्त-
काश्मीरपत्त्ररचनायितपुष्पपङ्क्ति: ॥ ३९ ॥
आपत्य चम्पकधिया नवकर्णिकार-
पुष्पेषु गन्धरहितेष्वपि चञ्चरीक: ।
प्रीतो मधूनि रसयत्ययमन्यपुष्प-
सौरभ्यसंभृतनिजाननवासितानि ॥ ४० ॥
कौन्तेय पश्य वनसीमनि दूरकृष्ट-
कालायसासितशिलीमुखचक्रवाल: ।
पान्थान् विकम्पयति केशव किंकिरात:
कोऽप्यत्र निष्कृपमना न न किं किरात: ॥ ४१ ॥
शुभ्रप्रभे करुणिकाकुसुमे विभाति
श्यामोऽथवारुणरुचौ नवकाञ्चनारे ।

इत्थं स्मरन्निव मुहुर्महनीयतार्थी
भृङ्गीपतिः स्फुरति तत्र च तत्र चायम् ॥ ४२ ॥

एलावने कुरुवकस्तबके प्रियाले
कङ्कोलके दमनके नवमालिकायाम् ।
पुष्पाणि जिघ्रति मुहुर्मधुपीभुजङ्गः
कामेन नुन्न इव बाणपरीक्षणाय ॥ ४३ ॥

सद्योवसन्तभरफुल्लितफुल्लमल्ली-
संभारसौरभमिलत्पवने वनेऽस्मिन् ।
कुन्तीतनूज तनुजन्म च जीवितं च
रागेण नागरजनस्य कृतार्थयावः ॥ ४४ ॥

इत्युक्तिसंमदवशीकृतचित्तवृत्ती
कृष्णार्जुनौ परिजनेन समं समन्तात् ।
तौ निन्यतुः सफलतां वनमण्डलानि
लीलारसेन मधुना मधुरीकृतानि ॥ ४५ ॥

खेलाय खाण्डववनाय ततो युवान-
श्चेलुर्मधूत्सवरसेन वधूसहायाः ।
पूर्वप्रयुक्तनयनद्वयकृष्यमाणा
मन्ये विलासमदभारभृतोऽतिमन्दम् ॥ ४६ ॥

अद्य त्वदेकहृदयो हृदयाधिनाथ-
श्चाटुक्रियाभिरनुकूलयते सखि त्वाम् ।
मुञ्चाभिमानमिदमान्तरलोचनेन
मुग्धे विचारय वचो मम मानयैनम् ॥ ४७ ॥

स्वच्छे न वेत्सि किमु चाटुपटुं सपत्नीं
प्रायो भवन्ति पुरुषाः खलु चाटुसाध्याः ।
चेदुत्सवेऽद्य स करिष्यति खेलनानि
सार्धं तया किमयशःपटहो न तेऽसौ ॥ ४८ ॥

किंचान्यभृद्युवतिकूजितपञ्चबाण-
बाणासनक्वणितरौद्रदिगन्तराणि ।
एतानि तानवितमानवतीमनांसि
वत्से मधूत्सवदिनानि सुदुस्सहानि ॥ ४९ ॥

सेयं दशापि तव तप्ततनूविवर्त-
संवर्तमर्मरितबालमृणालशय्या ।
तुभ्यं सदैव नलिनानि समानयन्ती
लोकेऽपि कोपिनि बभूव निरुत्तराहम् ॥ ५० ॥

एषा पदे निपतितास्मि कुरु प्रसाद-
मद्यास्तु ते रिपुजनो विफलाभिलाषः ।
इत्थं विचक्षणसखीवचनानुरोधात्
प्राणाधिनाथमनुकूलयति स्म काचित् ॥ ५१ ॥

पञ्चभिः कुलकम् ।

नन्तुं परः करयुगेन गृहीतपाद-
पद्मः सृजन्ननुनयानभिमानवत्याः ।
उत्पत्य दीनवदनोऽप्यनिरीक्ष्य वक्त्रं
तस्याः शुशोच कुचगौरवमप्यभीष्टम् ॥ ५२ ॥

यस्या ध्वनिर्मम गिराप्युपमीयते सा
स्यात् कीदृशी पिकवधूः सखि दृश्यमेतत् ।
इत्युक्तिकैतववती वनमाप कापि
पूर्वं गतेऽपि दयितेऽनुनयान्निरस्ते ॥ ५३ ॥

प्रौढागसा परिबृढेन पदप्रणाम-
लीलावतापि रचितं बत गोत्रभेदम् ।
तं काचिदश्रुतवतीव मनोभुवि ज्या-
टङ्काररावकलिते चलिता वनाय ॥ ५४ ॥

एषा कथं परिहरिष्यति मानमित्थं
चिन्तानिधिर्नतमुखो विलिखन् धरित्रीम् ।
उद्दामकामशरपीडितया कयापि
कान्तो नितान्तमनुनीय वनाय निन्ये ॥ ५५ ॥

कश्चित् प्रियामनुपतन्नितमामुरोज-
संस्पर्शलालसमना विततैः कराग्रैः ।
आसादयद् गुरुतदीयनितम्बबिम्ब-
दूरीकृतो बत कथंचन बाहुमूलम् ॥ ५६ ॥

खेदं सखीषु गमनादभिनीय काचि-
दाकाङ्क्षितो रसवशादवलम्बनाय ।
ताम्यद्भुजापि पुरतः कुचपूरदूर-
नुन्नस्य वर्त्मनि न भर्तुरवापदंसौ ॥ ५७ ॥

दूरादुपेत्य पुरुषायितलाघवोत्थ-
वेगादनुप्रथितमन्दपदामजानन् ।
वल्लीविलग्नवसनव्यसनच्छलेन
प्रत्यैक्षत प्रणयिनीमपरो मुधैव ॥ ५८ ॥

उच्चैर्नितम्बकुचडम्बरभारभुग्ना
लीलावती किमपि मन्दपदं जगाम ।
एवंविधामपि सदैव हृदा दधानः
कान्तोऽन्वगादतिशनैरिति युक्तमेव ॥ ५९ ॥

तादृग्वसन्तसमयस्पृहणीयमेव
दोलासुखं रतिपतेरपि पूरयन्ती ।
आलम्ब्य काचन करेण करं प्रियस्य
लीलाविलोलभुजमिन्दुमुखी जगाम ॥ ६० ॥

विष्वग्विलासवनगुल्मलतांगतानां
मेणीदृशामसमभासुरभाभिरास्यैः ।
उल्लासिभिः कुसुमितः शुशुभे वसन्त-
श्चन्द्रैरिवायुधकृते कुसुमायुधस्य ॥ ६१ ॥

एणीदृशस्तनुतिरस्कृतजातरूपा
नानामणिप्रवणभूषणभासमानाः ।
दोलासु कौतुकवनीपृथुकर्णपाश-
लोलासु कुण्डलितुमीषुरुदारभासः ॥ ६२ ॥

भर्ताधिरोपयति यावदुदञ्च्य दोर्भ्यां
तावद्वधूरधिरुरोह रयेण दोलाम् ।
अभ्यस्तनित्यपुरुषायितलाघवानि
श्रोणिस्तनोन्नतिनताप्यभिदर्शयन्ती ॥ ६३ ॥

प्रेङ्खोलने परिबृढेन कूतूहलेन
काप्यध्यरोपि रमणी समुदस्य दोर्भ्याम् ।
दूरास्त्रपातबलसंभ्रमभाजि यन्त्रे
शस्त्रं जगत्त्रयजितेव मनोभवेन ॥ ६४ ॥

दोलाधिरोहपरयापरया प्रियस्य
पृष्ठे न्यधीयत पदं यदलक्तकाङ्कम् ।
पञ्चाङ्गुलीपरिचितेन स तेन चङ्ग-
रङ्गन्निषङ्ग इव पञ्चशरो विरेजे ॥ ६५ ॥

दोलाधिरोपकृतये रभसादुदस्यन्
कोऽपि प्रियां कृशतरो दरबद्धमुष्टिः ।
चासातुरं स्मरजितापि मृणालधन्वा
नन्वात्तवज्रजयशक्तिरिवाशशङ्के ॥ ६६ ॥

दोलास्पृशां मृगदृशां वदनानि रेजु-
र्दण्डावलम्बनतबाहुयुगान्तराले ।
सद्योमृणालजनितेषु शरासनेषु
वाणीकृतानि नलिनानि मनोभुवेव ॥ ६७ ॥

किंचिन्नतस्फुरितपृष्ठततात्रपादं
लोलालकं रणितनूपुरकङ्कणादि ।
नृत्यन्नितम्बमुपविष्टरतानि दोला-
लीलायितं स्मरयति स्म नितम्बिनीनाम् ॥ ६८ ॥

उच्चैर्गतित्रुटितहारलतासमुत्थ-
मुक्तावृतः चणमलम्बि मरुत्पथोऽपि ।
स्वेदोदबिन्दुपरिपूर्ण इवाङ्गनानां
दोलाविलासकलया प्रहतः पदाग्रैः ॥ ६९ ॥

दोलाकलाविलसितेन विलासिनीतां
मत्वा वशां त्रिजगतीमपि पञ्चबाणः ।
धम्मिल्लतः श्लथतराद्रभसेन तासा-
माकृष्य तूणत इव प्रसवान्यमुञ्चत् ॥ ७० ॥

प्रेङ्खोलनेऽम्बरगतेऽप्यतिधार्ष्ट्यमुक्त-
यष्टिग्रहाद् द्रुतविनिर्मितहस्तताला ।
अत्रासयन्मृदुलगीतिभिरापतन्तं
काचिद्विधोर्मृगमिवास्यकलङ्कभीत्या ॥ ७१ ॥

दोलागतेन गगनाग्रमवाप्य शोणं
कस्याश्चन क्रमयुगं विनमद्विलोक्य ।
भानुर्न्यधत्त नयनं निजपाणियुग्मे
लीलासरोजयुगलीगलनभ्रमेण ॥ ७२ ॥

यष्टिग्रहव्यतिकरेण करेण सज्जी-
कर्तुं तताङ्घ्रिलुलितं वसनं न शक्ताः ।
ऊर्ध्वा बभूवुरिति केलिकुतूहलाय
दोलाकलासु कुशलास्तरलायताक्ष्यः ॥ ७३ ॥

स्वच्छाद्भुतस्फटिकरत्नविनिर्मितासु
दोलासु निर्मलतया स्फुटमस्फुटासु ।
ऊर्ध्वाः स्त्रियो निरवलम्बनमम्बरान्तः-
खेला इव त्रिदशचारुदृशो विरेजुः ॥ ७४ ॥

आसीत् परस्परपरिक्रमणानुभावै-
र्यः स्वेदबिन्दुविसरः किल दंपतीनाम् ।
सोऽपि व्यलोपि शिशिरेण तदा विलोल-
दोलाविलाससुलभेन समीरणेन ॥ ७५ ॥

दोलागतागतविनोदरसेन गीतं
प्रापञ्चयन्त सुदृशः स्मितपञ्चमं यत् ।
तस्य प्रतिध्वनिरिवोपवनाश्रयाणा-
मश्रावि कण्ठकुहरेषु कुहूकरीणाम् ॥ ७६ ॥

साध्यं न मन्मथशरैरपि यत् तदेव
मात्सर्यमाशु गलहस्तयितुं प्रियाणाम् ।
रेखामिषाद्विनमनोन्नमनेन रत्न-
प्रेङ्खोलनैर्विदधिरे ध्रुवमर्धचन्द्राः ॥ ७७ ॥

दोलाविलासकुतुकोद्धुरकृष्णपार्थ-
वीरावलीसरलपादहतं तदैव ।
स्पष्टान्तरान्तरपरिस्फुरिताम्बुवाह-
मद्यापि जर्जरमिवाम्बरवर्त्म भाति ॥ ७८ ॥

दोलाचलद्युत्रमिषेण सहस्रमूर्ती-
भूय स्वयं स्मर इव स्मृतपूर्ववैरः ।
व्यालोलहारमिषकौसुमचापधारी
धाटीकृते पुररिपोर्दिवि धावति स्म ॥ ७९ ॥

सद्यःस्फुरत्तरलकातरदृग्विलोका-
स्वेदप्रकम्पपुलकोद्गमविभ्रमाणाम् ।
पार्श्वोपवेशललिते दयिते वधूनां
दोलाधिरोहभयमेव मिषं बभूव ॥ ८० ॥

स्वेदोद्गमव्यतिकरश्लथितानि यष्टि-
मुष्टिग्रहे करतलानि वधूसखानाम् ।
दोलागतागतधुतद्रुममौलिपुष्प-
श्रेणीपरागपतनेन दृढत्वमापुः ॥ ८१ ॥

प्रेङ्खोलनान्यतुलखेलनधूतशाखि-
पुष्पच्युतैर्मधुरसैस्तिमितानि बाढम् ।
साक्षादशक्यललितानि विमुच्य चक्रु-
श्चेतः क्रुधेव कुसुमावचये युवानः ॥ ८२ ॥

प्रागुत्तीर्णप्रियतमभुजाडम्बरालम्बलोला
दोलासौख्यं क्षणमकलयन्नुत्तरन्त्योऽपि नार्यः ।
सद्योऽभ्यासप्रबलमबलाचक्रवाले समन्ता-
दप्युत्तीर्णे न चिरममुचल्लोलभावं च दोला ॥ ८३ ॥

वीराः पार्थमुकुन्दयोरथ वनोत्सङ्गे कुरङ्गीदृशां
विभ्वोकैर्ह्रियमाणमानमनसो मन्दं विलेसुर्मुदा ।
एभिर्विग्रहरूपविग्रहधरैः सार्धं वितन्वन्निव
स्पर्धामत्र मनोभवोऽपि ललितं चक्रे रतिक्रीडनैः ॥ ८४ ॥

इति श्रीमज्जिनदत्तसूरिशिष्यश्रीमदमरचन्द्रविरचिते श्रीबालभारतनाम्नि महाकाव्ये आदिपर्वणि वसन्तवर्णनो नाम सप्तमः सर्गः ॥ ७ ॥ :: ::

---

# THE APHORISMS

OF THE

# YOGA PHILOSOPHY,

OF

PATAÑJALI.

*(Continued from Vol. III. p. 163.)*

एतेन शब्दाद्यन्तर्धानमुक्तम् ॥ २२ ॥

Aph. 22.—By this, a concealment (Antardhána) of speech (Śabda) &c. is also stated.

*a.* "By this" i. e. by explaining the means of disappearance of form (see the preceding Aph.) a concealment of speech (Śabda) &c. cognizable by the organ of hearing and other organs is (also) to be understood as stated.* [That is to say that the speech of an ascetic cannot be heard by any body if he performs Sanyama—restraint—about it, and this is the case with all other qualities of the organs of perception.] [It is to be observed here that Bhojarája the commentator of this work maintains that this Aphorism belongs to the text and consequently gives a comment upon it; but this is not the case because, Vijñána Bhikshu the expositor of the Bháshya says that the author of the Bháshya removes the deficiency of Patañjali by stating the following sentence एतेन शब्दाद्यन्तर्धानमुक्तम् । in his Bháshya. Therefore it is not one of the Aphorisms of the text but a sentence of the Bháshya.]

*a.* (He now) states another Siddhi.†

The superhuman faculty which consists in a foreknowledge of death.

सोपक्रमं निरुपक्रमं च कर्म तत्संयमादपरान्तज्ञानमरिष्टेभ्यो वा ॥ २३ ॥

Aph. 23.—An action (karma) is two-fold; one accompanied by anticipation of consequences (Sopakrama) and other destitute of it (Nirupakrama) :—from performing Sanyama—restraint—with regard to this two-fold action, a knowledge (arises in an ascetic) of the separation from (his) body—Aparánta—(i. e. death). Or (the time of death is known) from portents (Arishṭa.)

---

* एतेन रूपाद्यन्तर्धानोपायप्रदर्शनेन शब्दादीनां श्रोत्रादिग्राह्याणामन्तर्धानमुक्तं वेदितव्यम् ।

† सिद्ध्यन्तरमाह ।

*b.* The action, performed before (i. e. in the former birth) the consequence of which is years (A'yus) is two-fold, Sopakrama and Nirupakrama. Of these, Sopakrama is that which has an inclination to produce a fruit or anticipate consequences. As, for example, a wet cloth spread in a warm place dries quickly [This action is called Sopakrama]. Nirupakrama is the converse of it, as the same cloth folded and (put) in a cold place dries after a long time. A knowledge of the separation of body—Aparánta—i. e. death, arises in him who performs Sanyama in (the above mentioned) two-fold action, so that he discovers what action anticipates consequences quickly and what after a long time, from steadfastness of contemplation (Dhyána). (That is to say) he knows undoubtedly that he shall be deprived of his body (in other words that he shall die) at such and such time and such and such place.

"Or from portents," which are three-fold according to the distinction of A'dhyátmika, A'dhibhautika, and A'dhidaivika. Of these, the A'dhyátmikas are such as (when a man) shutting his ears does not hear the sound of the vital air (diffused) throughout his body &c. A'dhibhautikas are such as a sudden appearance of a deformed person &c. and A'dhidaivikas are such as seeing unexpectedly such things as paradise (Svarga) &c. which are incapable of being seen. From these (i. e. from seeing these, a man) knows the time of separation from his body (Aparánta) i. e. death. Though the persons who are not ascetic know for the most part (the time of their death) from (seeing) the portents; still they know it generally (and not particularly and consequently their knowledge of it) is doubtful. But ascetics know it (i. e. their death) invariably like a thing before their eyes (pratyaksha) on account of (their knowing) the fixed time and place (i. e. they know certainly when and at what place they will die.)*

*a.* He now proceeds to declare the Siddhis resulting from the purifying processes (see Aph. 33, Book 1, P. 39.)*

Superhuman faculties about benevolence, &c.

मैत्र्यादिषु बलानि ॥ २४ ॥

Aph. 24.—(Superhuman) faculties (are manifested in an ascetic by performing restraint) in benevolence, &c.

*b.* By performing restraint in benevolence, tenderness, complacency, and disregard (towards objects) the faculties of Sanyama about them are manifested (in an ascetic). He has such an excellent command over benevolence, tenderness, complacency, and disregard, that he can contract friendship &c. with all (persons).†

*a.* (He) declares (now) another Siddhi.‡

बलेषु हस्तिबलानि ॥ २५ ॥

Aph. 25.—The faculties of an elephant &c. (are manifested in an ascetic by performing restraint) in these faculties.

*b.* The ascetic who performs restraint in the faculties of an elephant &c. gets these manifested in him. That is to say; every faculty whether of an elephant, wind, or of a lion, in which he performs restraint by paying close attention, is manifested in him on account of his having command over every one of them.§

## RAMAYANA, BOOK I.

*(Continued from page 184.)*

'Twas thus Lord Indra sware,
'Malaja and Karúsha's name
Shall celebrate with deathless fame
My malady and care.'
'So be it', all the Immortals cried,
When Indra's speech they heard,
And with acclaim they ratified
The names his lips conferred.
Long time, O victor of thy foes,
These happy lands had sweet repose,
And higher still in fortune rose.
At length a spirit, loving ill,
Táḍaká, wearing shapes at will,

* आयुर्विपाकं यत्पूर्वकृतं कर्म तद् द्विप्रकारं सोपक्रमं निरुपक्रमं च तत्र सोपक्रमं यत् फलजननायोपक्रमेण कार्यकरणाभिमुख्येन सह वर्तते। यथोष्णप्रदेशे प्रसारितमार्द्रं वस्त्रं शीघ्रमेव शुष्यति। उक्तरूपविपरीतं निरुपक्रमं यथा तदेवार्द्रं वासः संवर्तितमनुष्णदेशे चिरेण शोषमेति। तस्मिन् द्विविधे कर्मणि यः संयमं करोति किं कर्म शीघ्रविपाकं किं चिरविपाकमिति। एवं ध्यानदार्ढ्यादपरान्तज्ञानमस्योत्पद्यते। अपरान्तः शरीरवियोगस्तस्मिन् ज्ञानमसुष्मिन् देशे ऽमुष्मिन् काले मम शरीरवियोगो भविष्यतीति निःसंशयं जनाति। अरिष्टेभ्यो वा ऽरिष्टानि त्रिविधान्याध्यात्मिकाधिभौतिकाधिदैविकभेदेन। तत्राध्यात्मिकानि पिहितकर्णः कोष्ठस्य वायोर्घोषं न शृणोतीत्येवमादीनि। आधिभौतिकान्यकस्माद्विकृतपुरुषदर्शनादीनि। आधिदैविकान्यकाण्ड एव द्रष्टुमशक्यस्वर्गादिपदार्थदर्शनादीनि। तेभ्यः शरीरवियोगकालं जानाति। यद्यप्ययोगिनामप्यरिष्टेभ्यः प्रायेण ज्ञानमुत्पद्यते तथापि तेषां सामान्याकारेण तत्संशयरूपं योगिनां पुनर्नियतकालदेशतया प्रत्यक्षवदव्यभिचारि।

* परिकर्मनिस्यन्दभूताः सिद्धीः प्रतिपादयितुमाह।

† मैत्रीकरुणामुदितोपेक्षासु यो विहितः संयमस्तस्य बलानि मैत्र्यादीनां संबन्धीनि प्रादुर्भवन्ति। मैत्रीकरुणामुदितोपेक्षास्तथाऽस्य प्रकर्षं गच्छन्ति यथा सर्वस्य मित्रत्वादिकं संप्रतिपद्यते।

‡ सिद्ध्यन्तरमाह।

§ हस्त्यादिसंबन्धेषु बलेषु कृतसंयमस्य तद्बलानि हस्त्यादिबलान्याविर्भवन्ति। तदयमर्थो यस्मिन् हस्तिबले वायुवेगे वा सिंहवीर्ये वा तन्मयीभावेन संयमं करोति तत्सर्वसामर्थ्ययुक्तत्वात्सर्वमस्य प्रादुर्भवतीत्यर्थः।

Whose mighty strength, exceeding vast,
A thousand elephants' surpassed,
Was to fierce Sunda, lord and head
Of all the demon armies, wed.
From her, Lord Indra's peer in might
Giant Márícha sprang to light;
And she, a constant plague and pest,
These two fair realms has long distressed,
Now dwelling in her dark abode
A league away she bars the road:
And we, O Ráma, hence must go
Where lies the forest of the foe.
Now on thine own right arm rely,
And my command obey;
Smite the foul monster that she die,
And take the plague away.
To reach this country none may dare,
Fallen from its old estate,
Which she, whose fury naught can bear,
Has left so desolate.
And now my truthful tale is told
How with accursed sway
The spirit plagued this wood of old,
And ceases not to-day.'

## XXVII.

## THE BIRTH OF TAḌAKÁ.

When thus the sage without a peer
Had closed that story strange to hear,
Ráma again the saint addressed
To set one lingering doubt at rest:
'O holy man, 'tis said by all
That spirits' strength is weak and small;
How can she match, of power so slight,
A thousand elephants in might?'
And Viśvámitra thus replied
To Raghu's son the glorified:
'Listen, and I will tell thee how
She gained the strength that arms her now.
A mighty spirit lived of yore;
Suketu was the name he bore.
Childless was he, and free from crime
In rites austere he passed his time.
The mighty Sire was pleased to show
His favour, and a child bestow,
Táḍaká named, most fair to see,
A pearl among the maids was she,
And matched, for such was Brahmá's dower,
A thousand elephants in power.
Nor would the Eternal Sire, although
The spirit longed, a son bestow.
That maid in beauty's youthful pride
Was given to Sunda for a bride.
Her son, Márícha was his name,
A giant, through a curse, became.
She, widowed, dared with him molest
Agastya, of all saints the best.
Inflamed with hunger's wildest rage,
Roaring she rushed upon the sage.
When the great hermit saw her near,
On speeding in her fierce career,
He thus pronounced Márícha's doom:
'A giant's form and shape assume.'
And, then, by mighty anger swayed,
On Táḍaká this curse he laid:
'Thy present form and semblance quit,
And wear a shape thy mood to fit;
Changed form and feature by my ban,
A fearful thing that feeds on man.'
She, by his awful curse possessed,
And mad with rage that fills her breast,
Has on this land her fury dealt
Where once the saint Agastya dwelt.
Go, Ráma, smite this monster dead,
The wicked plague, of power so dread,
And further by this deed of thine
The good of Bráhmans and of kine.
Thy hand alone can overthrow,
In all the worlds, this impious foe.
Nor let compassion lead thy mind
To shrink from blood of womankind;
A monarch's son must ever count
The people's welfare paramount,
And whether pain or joy he deal
Dare all things for his subjects' weal;
Yea, if the deed bring praise or guilt,
If life be saved or blood be spilt:
Such, through all time, should be the care
Of those a kingdom's weight who bear.
Slay, Ráma, slay this impious fiend,
For by no law her life is screened.
So Manthará, as bards have told,
Virochan's child, was slain of old
By Indra, when in furious hate
She longed the earth to devastate.
So Kávya's mother, Bhrigu's wife,
Who loved her husband as her life,
When Indra's throne she sought to gain,
By Vishṇu's hand of yore was slain.
By these and high-souled kings beside,
Struck down, have lawless women died.'

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

# काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

# THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 46. Benares, March 1st, 1870. Vol. IV.

## ॥ उपदेशसहस्र्याः पद्यप्रबन्धः ॥

परपक्षनिराकरणमुखेनोक्तं मोक्षसाधनं ज्ञानं स्वप्रक्रिययापि व्यक्तीकर्त्तुं प्रकरणान्तरमारभमाणो देवताभक्तेर्विद्याप्राप्त्यन्तरङ्गत्वं द्योतयन् प्रकरणप्रतिपाद्यार्थं नमस्कारव्याजेन संक्षिप्याह ।

(१) आत्मा ज्ञेयः परो ह्यात्मा यस्मादन्यन्न विद्यते ।
सर्वज्ञः सर्वदृक् शुद्धस्तस्मै ज्ञेयात्मने नमः ॥ ३२६ ॥

आत्मा ज्ञेय इति । आत्मा स्वरूपं ज्ञेयः स्वरूपतोऽवधार्यः, किं घटादिवद्विषयत्वेन नेत्याह । परो ह्यात्मेति । हि यस्मादात्मा सर्वज्ञो ज्ञेयात्परो ज्ञेयत्वधर्म्मरहितः, तत्कुतस्तत्राह । यस्मादन्यन्न विद्यतइति । यस्मादात्मनः स्वरूपादन्यत्परमार्थतः पृथक्भूतं तद्धर्मो वा न विद्यते तथा च रूपादिहीनतया चक्षुराद्यगोचरत्वात्स्वसमानजातीयप्रत्यक्षव्यक्त्यन्तराभावाद्व्याप्तिग्रहाभावे सत्यनुमानार्थापत्तिग्राह्यत्वाभावात् सदृशवस्त्वन्तराभावेनोपमानाग्राह्यत्वाद् जातिगुणक्रियादिधर्मराहित्येन शब्दागोचरत्वाद् ज्ञातुः स्वरूपत्वादेव नास्तीत्यभ्युपगन्तुमशक्यत्वात्परिशेषाद्विषयभूतदेहेन्द्रियान्तःकरणप्रत्याख्यानेनान्विष्य तत्साक्षितयाऽविषयत्वेन स्वयंप्रकाश आत्मा ज्ञेय इत्यर्थः । एवं त्वंपदार्थं परिशोध्य तस्य तत्पदार्थात्मकत्वं वाक्यार्थं कथयितुं तत्पदार्थमाह । सर्वज्ञ इति । सामान्यतः सर्वं जानातीति सर्वज्ञो विशेषतः सर्वं पश्यतीति सर्वदृक् सर्वज्ञत्वमुपलक्षणमुक्त्वा तस्य स्वरूपलक्षणमाह । शुद्ध इति । अनृतजडपरिच्छिन्नदुःखादिप्रपञ्चसंसर्गरहितः सत्यज्ञानानन्तानन्दरूप इत्यर्थः । वाक्यार्थं तत्त्वंपदार्थैक्यमाह । तस्माइति । पूर्वोक्तप्रकारेण ज्ञेयश्चासावात्मा च ज्ञेयात्मा तस्मै ज्ञेयात्मने तस्मै सर्वज्ञत्वाद्युपलक्षिताय सत्यादिस्वरूपाय नमः प्रह्वीभावोस्तु तद्भेददृष्टिविलय एवेह नमःशब्दार्थः ॥ १ ॥

देवताभक्तिवद्गुरुभक्तेरपि विद्याप्राप्त्यन्तरङ्गत्वम् ।

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

इति श्रुतिसिद्धं द्योतयन् गुरुपरंपरा प्रणमति ।

(२) पदवाक्यप्रमाणज्ञैर्दीपभूतैः प्रकाशितम् ।
ब्रह्म वेदरहस्यं यैस्तान्नित्यं प्रणतोस्म्यहम् ॥ ३२७ ॥

पदवाक्येति । यैर्गुरुभिर्वेदरहस्यं ब्रह्म प्रकाशितं तान्नित्यं प्रणतोस्म्यहमिति संबन्धः, पदानां वाक्यानां च शक्तितात्पर्यमर्यादया प्रमाणज्ञैः पदवाक्यप्रमाणज्ञैः, यद्वा पदवाक्ये प्रसिद्धे प्रमाणमनुमानादि तज्ज्ञैरित्यर्थः । दीपभूतैरयत्नेन सर्वार्थप्रकाशकैः यैरिति संबन्धः ॥ २ ॥

सामान्येनाचार्यपरंपरां नमस्कृत्य विशेषेण स्वगुरुप्रणामपूर्वकमुद्देश्यं प्रतिजानीते ।

(३) यद्वाक्सूर्यांशुसंपातप्रणष्टध्वान्तकल्मषः ।
प्रणम्य तान् गुरून् वक्ष्ये ब्रह्मविद्याविनिश्चयम् ॥ ३२८ ॥

यद्वागिति । ब्रह्मविद्याया विनिश्चयो यस्मान्न्यायविशेषाद्भवति तं न्यायविशेषं वक्ष्ये इत्यर्थः । सुगममन्यत् ॥ ३ ॥

किमर्थं ब्रह्मविद्याविनिश्चयो वक्ष्यते तदाह ।

(४) आत्मलाभात्परो नान्यो लाभः कश्चन विद्यते ।
यदर्था वेदवादाश्च स्मार्त्ताश्चापि तु याः क्रियाः ॥ ३२९ ॥

आत्मलाभादिति । आत्मलाभस्य परमत्वे प्रमाणं सूचयति । यदर्था इति । वेदवादा वेदवचनानि स्मार्त्ताश्चवादाः स्मृतिवचनानि साक्षाद् ज्ञानार्थाः वेदवादाः स्मृतिवादाश्च यदर्थाः अपि तु याः क्रियाः कर्मपरवेदस्मृतिविहितास्ताश्च चित्तशुद्धिपरंपरया यदर्थाः तस्मादात्मलाभादिति संबन्धः ॥ ४ ॥

पुत्रादिलाभापेक्षया आत्मलाभस्य परत्वं प्रामाणिकमित्युक्तमुपपादयति ।

(५) आत्मार्थो ऽपि हि यो लाभः सुखायेष्टो विपर्ययः ।
आत्मलाभः परः प्रोक्तो नित्यत्वाद्ब्रह्मवेदिभिः ॥ ३३० ॥

आत्मार्थोपीति । योपि लाभः पुत्त्रधनादिविषयो लोके सुखायेष्टः सोप्यात्मार्थ आत्मसुखार्थ इति हि प्रसिद्धमिति योजना, तर्हि पुत्रादिलाभेनैवात्मसुखसिद्धेः, किमित्यात्मज्ञानमात्मलाभायैष्टव्यं विशेषाभावादित्यत आह । विपर्यय इति । सुखविपर्ययः दुःखायापि स लाभः स्यात्कदा चित् कस्य चित्पुत्रादेरेव दुःखहेतुत्वदर्शनादित्यर्थः । तस्माल्लाभान्तरापेक्षयात्मलाभः परमो लाभ इति तदर्थं सर्वपरित्यागेनात्मज्ञानं संपादनीयमित्यभिप्रेत्याह । आत्मेति । विपर्ययप्रसङ्गस्तत्र नास्तीत्याह । नित्यत्वादिति । तथा च श्रुतिः । "तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादन्तरतरं यदयमात्मा स यो ऽन्यमात्मनः प्रियं ब्रुवाणं ब्रूयात्प्रियं रोत्स्यतीतीश्वरो ह तथैव तस्मादात्मानमेव प्रियमुपासीत स य आत्मानमेव प्रियमुपास्ते न हास्यप्रियं प्रमायुकं भवती"ति ॥ ५ ॥

आत्मसुखलाभस्य नित्यत्वमुक्तं साधयति ।

(६) स्वयंलब्धस्वभावत्वाल्लाभस्तस्य न चान्यतः ।
अन्यापेक्षस्तु यो लाभः सोन्यदृष्टिसमुद्भवः ॥ ३३१ ॥

स्वयमिति । तस्यात्मनो लाभो न चान्यतो ऽन्यनिमित्तको न भवति, कुतः, स्वयंलब्धस्वभावत्वात्साधनसाध्यत्वाभावान्नित्यत्वमित्यर्थः । पुत्रादिलाभस्य साधनाधीनत्वेनानित्यत्वं साधयति । अन्यापेक्ष इति । अन्यदृष्टेः सकाशात्समुद्भवो यस्य स तथा अन्याधीनस्य तदपगमे ऽपगमादनित्यत्वमित्यर्थः ॥ ६ ॥

केयमन्यदृष्टिः का वा तदुद्भवस्यान्यपुत्रादिलाभस्यानित्यत्वे हानिरित्यत आह ।

(७) अन्यदृष्टिस्त्वविद्या स्यात्तन्नाशो मोक्ष उच्यते ।
ज्ञानेनैव तु सोपि स्याद्विरोधित्वान्न कर्म्मणा ॥ ३३२ ॥

अन्यदृष्टिस्त्विति । अन्यस्मिन्ननात्मनि दृष्टिः प्रतीतिर्यस्याः सान्यदृष्टिः सा ऽविद्या भवतीत्यर्थः "ततश्चात्मा ऽविद्याकृतभ्रान्तिनिबन्धनत्वात्पुत्रादिलाभप्रीतेस्तस्याश्च स्वप्नतुल्यत्वान्नित्यात्मप्रियत्वहानिः स्यादिति भावः । तथा चाविद्यानिवृत्तिमन्तरेणात्मस्वरूपनित्यसुखलाभाभावात्सा संपाद्येत्याह । तन्नाश इति । मोक्षो नित्यनिरतिशयपरमानन्दाविर्भावो ऽज्ञानहानिलक्षणः, तत्प्राप्त्युपायमाह । ज्ञानेनैवेति । सोप्यज्ञाननाशलक्षणो मोक्षो ज्ञानेनैव स्यात्तस्यैवाज्ञानविरोधित्वान्न कर्मणा तस्याज्ञानविरोधित्वाभावात्तस्मात्सर्वकर्मपरित्यागेनात्मज्ञानं सर्वथा संपादनीयमेव मुमुक्षुणेत्यर्थः ॥ ७ ॥

ननु विरोधाभावात्सकार्याविद्यानिवृत्तिरूपो मोक्षः कर्मणा मा भूत्तथापि तेन नित्यपुरुषार्थो भविष्यत्यतः किं ज्ञानेनेति, नेत्याह ।

(८) कर्मकार्यस्त्वनित्यः स्यादविद्याकामकारणः ।
प्रमाणं वेद एवात्र ज्ञानस्याधिगमे स्मृतः ॥ ३३३ ॥

कर्मकार्यस्त्विति । तत्र हेतुगर्भविशेषणमविद्येति, मिथ्याप्रत्ययमूलरागप्रयुक्तकर्मसाध्यत्वादित्यर्थः । कर्मसाध्यफलमनित्यं ज्ञानसाध्यं तु नित्यमित्यत्र किं प्रमाणमिति चेद्वेद एवेत्याह । प्रमाणमिति । "तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयते, ब्रह्मविदाप्नोति परं, तरति शोकमात्मवि"दित्यादिवेद एव कर्मसाध्यमनित्यं ज्ञानसाध्यं नित्यं मोक्षरूपमित्यत्र ज्ञानस्य विवेकस्याधिगमे प्रमाणं विद्वद्भिः स्मृत इत्यर्थः ॥ ८ ॥

किं च वेदस्य सर्वस्याध्ययनविध्युपपादितत्वादपुरुषार्थे पर्यवसानायोगात्परमपुरुषार्थपर्यवसानायात्मैक्यज्ञानपरत्वमेष्टव्यं ततो न कर्म्मसु तस्य महातात्पर्यं लभ्यत इत्यभिप्रेत्याह ।

(९) ज्ञानैकार्थपरत्वात्तं वाक्यमेकं ततो विदुः ।
एकत्वं ह्यात्मनो ज्ञेयं वाक्यार्थप्रतिपत्तितः ॥ ३३४ ॥

ज्ञानैकार्थेति । ज्ञानमेवैकार्थः प्रयोजनं परं प्रतिपाद्यं यस्य वेदस्य स तथा तस्य भावस्तत्त्वं तस्मात्तं वेदमेकं वाक्यं विदुर्वाक्यप्रमाणकोविद इति शेषः, किं तस्य ज्ञेयमित्यपेक्षायामाह । एकत्वं हीति । ततो ज्ञानादात्मन एकत्वमेव ज्ञेयमित्यन्वयः, हिशब्दोवधारणार्थः, ज्ञानप्रकारमाह । वाक्यार्थप्रतिपत्तित इति । "सत्यं ज्ञानमनन्त"मित्याद्यवान्तरवाक्यार्थप्रतिपत्तिद्वारेण तत्त्वमस्यादिमहावाक्यैरात्मनो ब्रह्मैकत्वं ज्ञेयमित्यर्थः । आत्मतत्त्वज्ञानस्यैव परमपुरुषार्थहेतुतायाः श्रुतत्वात्कर्मकाण्डमपि तत्त्वज्ञानापेक्षितचित्तशुद्धिहेतुकर्मविधानद्वारा पारंपर्येण परमपुरुषार्थसाधनभावं भजतइति युक्तमेकार्थपर्यवसानेनैकवाक्यत्वं वेदस्येति भावः ॥ ९ ॥

नन्वात्मनो ब्रह्मणश्चैकत्वज्ञानमनुपपन्नं तयोरपर्यायशब्दवाच्यत्वेन भेदादित्याशङ्क्य नैवमन्योन्याश्रयापत्तेरित्याह ।

(१०) वाच्यभेदात्तु तद्भेदः कल्प्यो वाच्यो हि तच्छ्रुतेः ।
त्रयं त्वेतत्ततः प्रोक्तं रूपं नाम च कर्म च ॥ ३३५ ॥
असदेतत्त्रयं तस्मादन्योन्येन हि कल्पितम् ।

वाच्यभेदादिति । तद्भेदः पर्यायशब्दभेदो वाच्यभेदात्कल्प्यस्त्वया वाच्योऽपि तच्छ्रुतेरपर्यायशब्दभेदश्रवणाद्भिन्नः कल्प्यस्तथा च सिद्धे वाच्यजीवब्रह्मभेदे तद्वाचकशब्दयोरपर्यायत्वसिद्धिस्तत्सिद्धावितरसिद्धिरित्यन्योन्याश्रयः स्यादित्यर्थः । स्वरूपतो भेदकल्पनायां प्रमाणाभावादिति भावः । भेदस्याप्रामाणिकत्वादेकत्वज्ञानमुपपन्नमित्युक्ते भेदस्यापि प्रमाणसिद्धत्वं पूर्ववादी शङ्कते,त्रयं त्वेतदिति । "त्रयं वा इदं नाम रूपं कर्मे" ति श्रुत्या तत आत्मनोऽतिरिक्तं रूपं नाम च कर्म च प्रोक्तमतो नैकत्वमेव वेदार्थ इत्यर्थः । सिद्धान्ती दूषयत्य,सदेतदिति । हि यस्मादेतत्त्रयमन्योन्येन कल्पितमन्योन्यसापेक्षसिद्धिकं तस्मादसदित्यन्वयः । अन्योन्याश्रयग्रस्ततया भेदस्य प्रमातुमशक्यतया प्रामाणिकत्वाभावाद्यथा कथं चिल्लोकसिद्धो मिथ्याभेदः श्रुत्यानूद्यते केवलं वैराग्यायातो नाद्वैतज्ञानविरोधितेति भावः । अथ वा कथं सर्वस्य वेदस्यैकार्थज्ञानपरत्वेनैकवाक्यत्वं नियन्तुं शक्यते ऽपुनरुक्तशब्दभेदवशात्तत्तत्तत्त्वार्थभेदस्य प्रतीयमानत्वादिति चेत्सत्यं, तथापि न तत्र तात्पर्यं युक्तं प्रमाणयुक्तिबाधितत्वाद् द्वैतस्येत्यभिप्रेत्याह । वाच्यभेदादिति । वाच्यभेदे प्रामाणिके सति तद्विषयतात्पर्यवच्छब्दभेदादनेकवाक्यता सिद्ध्यति तथा तद्भेदो वाच्यभेदोऽपि तच्छ्रुतेर्वाचकशब्दभेदश्रुतेः श्रवणात्कल्प्यः प्रकारान्तरेण वाच्यभेदासिद्धेः, नहि शब्दाधीनो ऽर्थतत्त्वनिश्चयः आरोपितविषयेऽपि शब्दभेददर्शनाद् नाप्यर्थाधीनः शब्दनिश्चयः, एकस्मिन्नपि पुरुषे पिता भ्राता मातुलो जामाता पितृव्य इत्युपाधिभेदादपुनरुक्तशब्दभेददर्शना,न्नहि तत्र प्रतियोग्युपाधिभेदव्यतिरेकेण वस्तुभेदो विद्यते, तथा चानाद्यविद्याकल्पितानेकोपाधिभेदावच्छिन्नानेककर्त्रादिकारकभेदानुवादेन ज्ञानापेक्षितान्तःकरणशुद्धिसाधनकर्मविधिपरत्वात्कर्मकाण्डस्यात्मतत्त्वज्ञानवाक्यैकवाक्यत्वोपपत्तेर्निरतिशयानन्दात्यन्तिकदुःखनिवृत्तिफलस्य सर्वेषां स्वरसतोऽभिलाषगोचरस्यात्मतत्त्वज्ञानादन्यतो ऽसंभवादविद्याविद्यावदवस्थोपाधिभेदेनाधिकारिभेदप्रयोगभेदयोश्चोपपत्तेरेकपुरुषापेक्षितैकपरमपुरुषार्थैकसाधनप्रकाशकत्वेनैकवाक्यता वेदस्य युक्तेति भावः । एवं द्वैतस्याविद्याकल्पितत्वे युक्तिमभिधाय प्रमाणमभिधत्ते ।

त्रयं त्विति । यतो यमनिरूपिताकारभेदः प्रपञ्चस्ततो हेतोरेतत्सर्वं दृश्यं रूपं नाम च कर्म चेति त्रयं राशीकृत्य श्रुत्या प्रोक्तमिति योजना, त्रयं वा इदं नाम रूपं कर्मेत्यस्मिन्ब्राह्मणे हेतूक्तिपूर्वकं शब्दविशेषाणां वाङ्मात्रत्वं रूपविशेषाणां चक्षुर्मात्रत्वं कर्मविशेषाणां शरीरमात्रत्वमिति विशेषप्रविलापनेन तत्तत्सामान्यत्रित्वमभिधाय तदेतत्त्रयं सदेकमयमात्मात्मैकः सन्नेतत्त्रयमित्यैकात्म्यं सर्वस्य जगत उपसंहृतमतो न तत्त्वभेदोऽस्तीत्यर्थः । उपसंहरत्य,सदेतदिति । उक्तार्थमेतत् ॥ १० ॥

अन्योन्यापेक्षयावगम्यमानस्य मिथ्यात्वे दृष्टान्तमाह ।

(११) कृतो वर्णो यथा शब्दाच्छ्रुतो ऽन्यत्र धिया बहिः ॥३३६॥

कृत इति । शब्दाच्छ्रुतो वर्ण इन्द्रादिरूपविशेषः सहस्राक्षवज्रबाहुत्वादिः धिया प्रत्यूह्यान्यत्र बहिः कुड्यादौ चित्ररूपेण कृतो यथा कल्पितो मिथ्येति योजना,नहि चित्रे दृश्यमेव रूपमिन्द्रस्य वज्रस्य वा भवति तथा च मिथ्यार्थगोचरः शब्द इत्यर्थः ॥ ११ ॥

शब्दान्मिथ्यार्थकल्पनामुदाहृत्य मिथ्यार्थाच्छब्दकल्पनामुदाहरति ।

(१२) दृष्टं चापि यथा रूपं बुद्धेः शब्दाय कल्पते ।
एवमेतज्जगत्सर्वं भ्रान्तबुद्धिविकल्पितम् ॥ ३३७ ॥

दृष्टं चापीति । भित्तिपटादौ दृष्टं देवतारूपं तथा तद्देव बुद्धेस्तद्दर्शनसंस्कृताया आगत्य शब्दाय शब्दव्यपदेशाय कल्पतइति योजना । दार्ष्टान्तिकमाह । एवमिति । एतत्सर्वं जगदेवं यथा दृष्टान्तमेव भ्रान्तबुद्ध्या शुक्तौ रजतमिवात्मनि विविधं कल्पितं न वस्तुसदस्तीत्यर्थः ॥ १२ ॥

जगतो मिथ्यात्वे फलितमाह ।

(१३) असदेतत्ततो युक्तं सच्चिन्मात्रं न कल्पितम् ।
वेदश्चापि स एवाद्यो वेद्यं चान्यत्तु कल्पितम् ॥ ३३८ ॥

असदेतत्तत इति । सर्वं कल्पितं चेच्छून्यवादापत्तिरित्याशङ्का न कार्येत्याह । सच्चिदिति । निरधिष्ठानकल्पनानुपपत्तेः सर्वकल्पनास्पदं सच्चिन्मात्रं प्रत्यक्त्वं न कल्पितं सर्वसाक्षित्वात्तस्य सर्वकल्पनायाः प्रागेव सिद्धत्वादित्यर्थः । वेदाचार्यादेरात्मतत्त्वप्रतिपत्तिहेतुत्वादकल्पितत्वमस्तीति कथं सच्चिन्मात्रमकल्पितमित्युच्यते तत्राह । वेदश्चापीति । स एवाद्यः पूर्वसिद्ध आत्मा वेदोऽपि वेदनहेतुः श्रुत्याचार्यरूपेण मायया प्रथते ऽर्थप्रकाशनशक्तेरन्यत्र जडे ऽसंभवाद्, नह्यग्निगतप्रकाशनशक्तिव्यतिरेकेण दीपादेरपरा प्रकाशनशक्तिरस्ति वेद्यं च तत्त्वं स एवाद्य इति संबन्धः, अन्यत्तु विशेषमात्रं कल्पितं, तथा च कल्पितविशेषानुगतत्वेनात्मन एव बोधकत्वं सर्वकल्पनापवादावधितया तस्यैव बोध्यत्वं चोपपद्यत इत्यर्थः ॥ १३ ॥

कथं स एवाद्यो वेदो वेद्यं चेत्याशङ्क्य स्वप्नदृष्टान्तेन व्युत्पादयति ।

(१४) येन वेत्ति स वेदः स्यात्स्वप्ने सर्वं तु मायया।
येन पश्यति तच्चक्षुः शृणोति श्रोत्रमुच्यते ॥ ३३९ ॥

येनेति। स्वप्ने स्थित आत्मा येन स्वाप्नं विषयजातं वेत्ति स एव वेदः स्याद् नहि स्वप्ने चिदात्मव्यतिरिक्तं भासकमस्ति आदित्यादिज्योतिषां तदोपरमात्स्वयंज्योतिष्ट्वश्रुतेश्च, यत्तु तत्र सर्ववेद्यं, तदपि मायया स एव नहि स्वप्ने बाह्यं विषयजातमस्ति तत्रानवकाशाच्च तत्र रथा इत्यादिश्रुतेश्च। तथा च स एवात्मा स्वसात्म्यमायाकृतोपाधिभेदावच्छिन्नसदात्मना वेद्यस्तदनुस्यूतचिदात्मना वेदनरूपश्चेति वेद्यवेदितृभावो मायिक इत्यर्थः। चक्षुरादीन्द्रियाणामुपरमात्स्वप्नगत आत्मा येन पश्यति रूपमुपलभते तदेव चक्षुरिति योजना, स्वप्ने रूपाकारसंस्कृतमनोवस्थचिन्निष्ठाविद्यात्मकं रूपं प्रकाशयन् पश्यतीत्युच्यते, एवं श्रोत्रादावप्यूह्यम् ॥ १४ ॥

(१५) येन स्वप्नगतो वक्ति सा वाग् घ्राणं तथैव च।
रसनस्पर्शने चैव मनश्चान्यत्तथेन्द्रियम् ॥ ३४० ॥

येन स्वप्नगत इति। येन स्वप्नगतो जिघ्रति तद्घ्राणमित्यादि यथायोगं योज्यम् ॥ १५ ॥

कथमेकरूपं चैतन्यं वेदवेद्यवेदकचक्षुरादिरूपेण भिद्यते तत्राह।

(१६) कल्प्योपाधिभिरेवैतद्भिन्नं ज्ञानमनेकधा।
आधिभेदाद्यथा भेदो मणेरेकस्य जायते ॥ ३४१ ॥

कल्प्योपाधिभिरिति। स्वप्नकल्प्योपाधिभेदादेकमेवेदं ज्ञानमनेकधा भिन्नमित्यत्र दृष्टान्तमाह। आधिभेदादिति। मणेः स्फटिकादेराधिभेदान्नीलपीताद्युपाधिभेदात् तथा ज्ञानमेकमनेकधा जायतइत्यर्थः ॥ १६ ॥

यथा स्वप्ने निर्भेदस्य ज्ञानस्य कल्पितोपाधिभेदादशेषव्यवहारास्पदत्वं दृष्टमेवमेव जागरितेप्यशेषव्यवहारास्पदत्वं तस्योपपन्नमिति दार्ष्टान्तिकमाह।

(१७) जाग्रतश्च तथा भेदो ज्ञानस्यास्य विकल्पितः।
बुद्धिस्थं व्याकरोत्यर्थं भ्रान्त्या तृष्णोद्भवक्रियः ॥ ३४२ ॥

जाग्रतश्चेति। कथं चिद्रूपस्य ज्ञानस्यास्य जाग्रति विकल्पितत्वं तदाह। बुद्धिस्थमिति। आत्मा खल्वज्ञानकञ्चुकः प्रथमं बुद्धिं परिकल्प्य ततस्तत्कञ्चुकः संस्तदविवेकाद् भ्रान्त्या बुद्धिस्थमेवार्थं व्याकरोति स्वात्मगतया कल्पयन् व्यवहरति ततश्च भ्रान्तिप्रयुक्ततृष्णाख्यकामोद्भूता क्रिया हानोपादानव्यवहाररूपा यस्य स तथा अविद्याप्रत्युपस्थापितान्तःकरणपरिणामावस्थामवभासयंस्तदविवेकादनेकरूपप्रपञ्चमात्मनि कल्पयन् व्यवहरतीत्यर्थः ॥ १७ ॥

स्वप्नदृष्टान्तसिद्धमनूद्य दार्ष्टान्तिकं निगमयत्यर्द्धेन।

(१८) स्वप्ने तद्वत्प्रबोधे यो बहिश्चान्तस्तथैव च।
आलेख्याध्ययने यद्वत्तदन्योन्यधियोद्भवम् ॥ ३४३ ॥

स्वप्ने तद्वदिति। यद्वत्स्वप्ने व्यवहारस्तद्वत्प्रबोधेपि व्यवहारः यथैव स्वप्ने ऽन्तर्बहिर्भावस्तथैव च प्रबोधेप्यन्तर्बहिर्भाव इति योजना। अन्तर्बहिर्भावेन प्रथमानो व्यवहारः स्वप्नवत्कल्पित इत्युक्त्वा तत्रैव दृष्टान्तान्तरमाह। आलेख्येति। यथा आलेख्यापेक्षया ऽध्ययनं श्लोकादेरध्ययनापेक्षया च पत्रादौ पुनरालेखनं मिथ्यैव सर्वगतानां निरवयवानां वर्णानां लेखनासंभवादित्यर्थः। एवमक्षरयोजना, आलेख्यं चाध्ययनं चालेख्याध्ययने तदुभयं यथान्योन्यधियोद्भवमन्तर्बहिर्भावेन परस्परापेक्षबुद्धिजन्यं बहीरेखाविशेषाकारेणानुभूतमपेक्ष्यान्तर्बुद्धौ संस्काररूपेणाधीयते तदपेक्ष्य च बहिःशब्दव्यवहारायालिख्यतइत्यत्र रेषु दृष्टयोरन्योन्यापेक्षत्वेनालेख्याध्ययनयोरवस्तुत्वं यद्वत्तद्वदात्मन्यप्यन्तर्बहिर्भावेन दृश्यमानः सर्वो व्यवहारो न वस्तुसन्निति ॥ १८ ॥

बुद्धिनिष्ठमर्थं व्याकुर्वन् भ्रान्त्या तृष्णोद्भवक्रिय इत्युक्तं प्रपञ्चयति।

(१९) यदायं कल्पयेद्भेदं तत्कामः सन् यथा क्रतुः।
यत्कामस्तत्क्रतुर्भूत्वा कृतं यत्तत्प्रपद्यते ॥ ३४४ ॥

यदायमिति। अयमात्मा पूर्वभ्रान्तिसंस्कारवशाद्यदा बुद्धिकञ्चुकरूढः सन्नविद्यया भेदं कल्पयेत् तदा तत्कामः शोभनत्वेनाध्यस्तविषयभेदे ऽभिलाषवान् सन् यथा क्रतुर्यथाकामं कृतसंकल्पो भवति क्रतुः संकल्प इदमहं साधयिष्य इत्यध्यवसायरूपः ततश्च यत्कामस्तत्क्रतुर्भूत्वा यत्कामसाधनं कर्म कृतं तदभिनिष्पादितं तत्फलावस्थं प्रपद्यते प्राप्नोति पुनस्तत्संस्कारसचिवो भेदं परिकल्प्य कामक्रतुपूर्वकं कर्मानुष्ठानाय फलभागित्येवमन्योन्यधिया हेतुफलात्मना परिकल्पितं संसारमनुभवतीत्यर्थः। तथा च श्रुतिः "अथो खल्वाहुः काममय एवायं पुरुष इति स यथा कामो भवति तथा क्रतुर्भवति यथा क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसंपद्यत" इति ॥ १९ ॥

उक्तं दृश्यमिथ्यात्वं सोपपत्तिकमुपसंहरति।

(२०) अविद्याप्रभवं सर्वमसत्तस्मादिदं जगत्।
तद्वता दृश्यते यस्मात्सुषुप्ते न च गृह्यते ॥ ३४५ ॥

अविद्याप्रभवमिति। तद्वता ऽविद्यावता यस्माद्दृश्यते तदभावे सुषुप्ते न च नैव गृह्यते तस्मात्सर्वमिदं जगदविद्याप्रभवं मिथ्याज्ञानविजृम्भितमसदपरमार्थमिति योजना ॥ २० ॥

तर्हि जगद्धेतुरविद्या कीदृशी तन्निवर्त्तिका विद्या का केन वा विद्याविद्ये ज्ञायेते इत्याकाङ्क्षायामाह ।

(२१) विद्याविद्ये श्रुतिप्रोक्ते एकत्वान्यधियौ हि नः ।
तस्मात्सर्वप्रयत्नेन शास्त्रे विद्या विधीयते ॥ ३४६ ॥

विद्याविद्ये इति । एकत्वान्यधियौ विद्याविद्ये ब्रह्मात्मैकत्वधीर्विद्या तद्भेदधीरविद्येति स्वरूपोक्तिः श्रुतिप्रोक्ते इति ज्ञापकोक्तिः "अथ योन्यां देवता" मिति श्रुत्या भेदधियो ऽविद्यात्वं लोकानुभवसिद्धभेदानुवादरूपतयोक्तं किमु तद्ब्रह्मावेदित्यात्मप्रपुरस्सरं "ब्रह्म वा इदमग्रआसीत् तदात्मानमेवावेदहं ब्रह्मास्मी"ति प्रवृत्ता प्रमाणभूता ऽप्रसिद्धार्थबोधिनी श्रुतिरेकत्वज्ञानस्य विद्यात्वं ज्ञापयति नोस्माकमित्यर्थः । यस्मादविद्यावद्विद्या लोकस्यानुभवसिद्धा न भवति तस्मात्सर्वप्रयत्नेनाध्यारोपापवादप्रबन्धनिर्माणेन शास्त्रे विद्या विधीयते प्रतिपाद्यतइति मुमुक्षुः शास्त्रतः तत्परो भवेदित्यर्थः ॥ २१॥

शास्त्रे चेत्सर्वप्रयत्नेन विद्या व्युत्पाद्यते किमिति तर्हि सर्वोपि शास्त्रे न प्रवर्त्तते प्रवर्त्तमानो वा कथं विद्यां न प्राप्नोतीत्यपेक्षायां चित्तशुद्ध्यभावादित्यभिप्रेत्याह ।

(२२) चित्ते ह्यादर्शवद्यस्माच्छुद्धे विद्या प्रकाशते ।
यमैर्नित्यैश्च यज्ञैश्च तपोभिस्तस्य शोधनम् ॥ ३४७ ॥

चित्ते हीति । तस्माच्चित्तशुद्धिः कर्त्तव्येति शेषः, तर्हि कैरुपायैश्चित्तशोधनमित्यत आह । यमैरिति । अहिंसाब्रह्मचर्यादयो यमास्तैर्नित्यैः शौचादिभिर्नियमैरित्यर्थः । यज्ञैः स्वाश्रमविहितधर्मैरीश्वरसात्कृतैस्तपोभिश्च तस्य चित्तस्य शोधनं कार्यमित्यर्थः ॥ २२ ॥

तपःशब्दार्थमाह ।

(२३) शारीरादि तपः कुर्यात्तद्विशुद्ध्यर्थमुत्तमम् ।
मनआदिसमाधानं तत्तद्देहविशोषणम् ॥ ३४८ ॥

शारीरादीति । तस्य स्वरूपं भगवतोक्तम् ।

"देवद्विजगुरुप्राज्ञपूजनं शौचमार्ज्जवम् ।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥
अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥
मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते" ॥

इति । एतान्यपि सात्त्विकान्यनुष्ठेयानि न राजसतामसानि तत्र सात्त्विकतपोलक्षणम् ।

"श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः ।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते" ॥

इति । एतदुक्तमुत्तममिति, तद्विशुद्ध्यर्थं, चित्तविशुद्ध्यर्थं.मनआदीत्यादिपदाद्बाह्येन्द्रियग्रहः समाधानं नैश्चल्यं तत्रतत्र त्यस्मिन्नर्थे तत्तच्छब्दः तेषुतेषु क्रतुषु देहविशेषणं शीतोष्णवर्षवातसहनेन कृशीकरणमित्यर्थः ॥ २३ ॥

एवमारादुपकारकं तप उक्त्वा श्रवणादौ सन्निपत्योपकारकं तयोर्विशेषं स्मृतिवचनपठनादाह ।

(२४) मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः ।
तज्ज्यायः सर्वधर्मेभ्यः स धर्मः पर उच्यते ॥ ३४९ ॥

मनसश्चेति । ऐकाग्र्यं श्रुत्युक्ते वस्तुनि मननद्वारा स्थिरीकरणम्, एतस्यावश्यकर्त्तव्यत्वाय स्तुतिः क्रियते,तज्ज्याय इति ॥ २४ ॥

एवमुक्तैः साधनैः संशुद्धचित्तः श्रवणादिपरः सन्नवस्थात्रयात्तत्साक्षिणं विविच्य वाक्याद्ब्रह्मात्मत्वेन जानीयादित्याह ।

(२५) दृष्टं जागरितं विद्यात्स्मृतं स्वप्नं तदेव तु ।
सुषुप्तं तदभावं च स्वमात्मानं परं पदम् ॥ ३५० ॥

दृष्टमिति । दृष्टं दर्शनं बाह्येन्द्रियैर्बाह्यार्थोपलम्भनं जागरितं विद्यात् तदेव तु दृष्टशब्दवाच्यमेव स्मृतं संस्कारवशान्निद्रादशायां भातं स्वप्नं विद्यात् तदभावं तयोर्दृष्टस्मृतयोरभावो यस्मिंस्तत्सुषुप्तं विद्याद् एवं दृश्यत्रयं पृथक्कृत्य तत्साक्षिणं स्वं स्वरूपभूतमात्मानं परं पदं सत्यज्ञानादिलक्षणं ब्रह्माहमस्मीति विद्यादित्यर्थः ॥ २५ ॥

नन्ववस्थात्रयहेतावज्ञाने सति कथं तद्विविक्ततया प्रत्यगात्मनो ब्रह्मत्वमुपपद्यतइति तत्राह ।

(२६) सुषुप्ताख्यं तमो ऽज्ञानं बीजं स्वप्नप्रबोधयोः ।
स्वात्मबोधप्रदग्धं स्याद्बीजं दग्धं यथा ऽभवम् ॥ ३५१ ॥

सुषुप्ताख्यमिति । तम इति विशेषणेनाज्ञानस्य भावरूपत्वमुच्यते ततो बीजत्वमुपादानत्वमुपपद्यते तदज्ञानं स्वात्मनः सम्यग्बोधाग्निना प्रकर्षेण निर्लेपं दग्धं स्याद्यथा दग्धं बीजमभवं भवशून्यं कार्योत्पादकं न भवति तथा तत्त्वज्ञानाग्निदग्धमज्ञानं पुनरवस्थाप्ररोहकरं न भवतीति युज्यतएव प्रतीचो ब्रह्मत्वमित्यर्थः ॥ २६ ॥

अज्ञानस्यावस्थाबीजत्वमुक्तमुपपादयन्नज्ञाननिवृत्त्यैव सर्वसंसारोपाधिनिवृत्तिर्न यत्नान्तरसाध्येति दर्शयति ।

(२७) तदेवैकं त्रिधा ज्ञेयं मायाबीजं पुनः क्रमात् ।
मायाव्यात्माविकारोपि बहुधैको जलार्कवत् ॥ ३५२ ॥

तदेवैकमिति । तदेवैकं मायाख्यं बीजं त्रिधा भिन्नं क्रमात्सुषुप्त्यादिक्रमेणेत्यर्थः । पुनरित्यत्र वीप्सा द्रष्टव्या, सुषुप्तिमा-

रभ्य जागरितपर्यन्तं तदारभ्य सुषुप्तिपर्यन्तमहरहस्त्रिधा विक्रियतइत्यर्थः । एतदुक्तं भवति, चिन्मात्राश्रयविषयमेकमेवाज्ञानमनाद्यनिर्वचनीयमनेककार्यविक्षेपसंस्कारोपेतं चैतन्याभासखचितं स्वाश्रये आत्मन्यध्यात्माधिदैवतभेदेन प्राज्ञेश्वरोपाधिविशिष्टसुषुप्तिप्रलयावस्थाकारं जायते, तथा तैजसहिरण्यगर्भोपाधिसंभिन्नस्वप्नसृष्ट्यवस्थात्मकं भवति, तथा पुनर्विश्ववैश्वानरोपाधिखचितजाग्रत्स्थित्यवस्थारूपमापद्यते तत्रापि देवतिर्यङ्मनुष्यस्थावरादिभेदेन नानाविधशरीरेन्द्रियान्तःकरणोपाध्याकारं सत्प्रत्यग्ब्रह्मचिदात्मन्यनन्तजीवभेदव्यवहारनिर्वाहकं भवति यथैकं वटादिबीजं मृदाश्रयं सत्तस्यामेव मृदि अङ्कुरकाण्डविटपशाखापत्रपुष्पफलादिभावमापद्य पुनर्बीजभावं चापद्यते तथेदमपीति द्रष्टव्यं, तदेव वृक्षाकारं वस्तु स्वमूलदाहे सति तत्रैव मृद्भावमापद्य पुनर्न भवति यथा तथा संसारवृक्षमूलाज्ञानस्य तत्त्वज्ञानाग्निना दाहे स्वाश्रयचिदेकात्मना विलीनत्वात्पुनर्न दर्शनयोग्यो भवति संसार इत्यज्ञानदाहायैव तत्त्वज्ञाने यतितव्यमिति तदेवैकं त्रिधेत्युक्ते तमोबीजस्य स्वातन्त्र्येण प्रवृत्तिशङ्का स्यात्तथा सति सांख्यसिद्धान्तापात इत्यतस्तमसो ऽपेक्षितमाश्रयं दर्शयति । मायावीति । आत्मा निरुपचरितव्याप्तिमान्स्वप्रकाशचिदेकरसो मायावी मायादिशब्दवाच्याज्ञानाश्रय इत्यर्थः । मायाश्रयश्चेदात्मा तर्हि तस्य मायाविक्षिप्तानन्तोपाधिष्वनेकधा विक्षिप्यमाणस्य कथं कूटस्थत्वमित्याशङ्क्य दृष्टान्तेन प्रत्याचष्टे, ऽविकार इति । एक एवात्मा स्वगतविकाररहितोपि बहुधा विभाव्यमानो भवति जलार्कवद् यथैक एवार्को जलभेदोपाधिष्वनेकधा विभाव्यमानोपि नानेको भवति न वा जलोपाधिविकारेण विक्रियते तथायमपीत्यर्थः ॥ २७ ॥

उक्तमेव दृष्टान्तदार्ष्टान्तिकरूपं प्रपञ्चयति ।

(२८) बीजं चैकं यथा भिन्नं प्राणस्वप्नादिभिस्तथा ।
स्वप्नजाग्रच्छरीरेषु तद्वच्चात्मा जलेन्दुवत् ॥ ३५३ ॥

बीजं चेति । प्राण इत्यव्याकृतावस्थोक्तिः स्वप्नादिभिरिति जाग्रदवस्था मूर्च्छावस्था च गृह्यते, यथैकमविद्यामायाख्यं बीजमव्याकृताद्यवस्थाभेदेन भिन्नं, तथा स्वप्नजाग्रच्छरीरेषु समष्टिव्यष्टिस्थूलसूक्ष्मशरीरेषु जलेषु जलेन्दुवच्चिदाभासोपि भिन्नो भवति तदा तदधिष्ठानभूतश्चिदात्मा चोपाधिगताभासाविवेकात्तद्वद्भिन्नो विभाव्यते तैजसहिरण्यगर्भविश्ववैश्वानरादिभेदेन प्रकाशतइत्यर्थः ॥ २८ ॥

ननु यद्यात्मनो मायाकल्पितेषु उपाधिषु बहुत्वं, तर्हि तत्र व्यापारवत्त्वमपि स्यादिति कथं कूटस्थतेत्याशङ्क्य दृष्टान्तेन निराकरोति ।

(२९) मायाहस्तिनमारुह्य मायाव्येको यथा व्रजेत् ।
आगच्छंस्तद्वदेवात्मा प्राणस्वप्नादिगो ऽचलः ॥ ३५४ ॥

मायाहस्तिनमिति । यथैवैको मायावी स्वमायानिर्मितं हस्तिनमारुह्य व्रजेदिष्टं देशमागच्छंश्च भवति गमनागमने आचरन्निव भासमानोप्यचल एव तद्वत्तथैवात्मा प्राणस्वप्नादिगतत्वेन विभाव्यमानोप्यचलः कूटस्थ एवेत्यर्थः ॥ २९ ॥

प्राणाद्युपाधिसंबन्धमात्मनो ऽङ्गीकृत्योक्तमिदानीं सोपि नास्ति वस्तुत इत्याह ।

(३०) न हस्ती न तदारूढो मायाव्यन्यो यथा स्थितः ।
न प्राणादि न तद्द्रष्टा तथा चान्यः सदा दृशिः ॥ ३५५ ॥

न हस्तीति । निगदव्याख्यातं पद्यम् ॥ ३० ॥

वस्तुतः प्राणाद्युपाधिसंबन्धाभावेपि मायासंबन्धो ऽपरिहार्य इत्यत आह ।

(३१) अबद्धचक्षुषो नास्ति माया मायाविनोपि वा ।
बद्धाक्षस्यैव सा माया ऽमायाव्येव ततो भवेत् ॥ ३५६ ॥

अबद्धेति । न बद्धं चक्षुर्यस्य सो ऽबद्धचक्षुस्तस्य लौकिकस्य यथा माया नास्ति मायाविनोपि तथा चक्षुर्बन्धाभावान्माया नास्ति वाशब्द इवार्थः । अपिशब्दादवस्तुत्वनिश्चयादपि मायावी न व्यामुह्यतीत्यर्थः । व्यतिरेकमुक्त्वान्वयमाह । बद्धाक्षस्यैवेति । सा माया बद्धाक्षस्यैव भयहेतुर्हस्त्यादिरूपाभासत इत्यर्थः । ततस्तस्मादमायाव्येव मायोपलक्षित एव भवेत्परमात्र मायाधार इत्यर्थः । अयमेव श्लोको दार्ष्टान्तिकेपि योज्यः, अबद्धचक्षुषो मायानावृतचित्स्वभावस्य मायाविनोपि मायावित्वेन विभाव्यमानस्यापि माया नास्ति व्यामोहहेतुर्हि माया साहमस्मि परं ब्रह्मेति प्रकाशमानआत्मनि विरोधादेव न भवतीत्यर्थः । वाशब्दो लोकप्रसिद्धमायाविदृष्टान्तार्थः, तथा च ज्ञानावस्थायां कदा चित्प्राणाद्याकारां मायां पश्यन्नप्यज्ञानावस्थायामिव न व्यामुह्यति किं तु सुषुप्तवन्निर्विकार एव भवतीत्यर्थः । समानमन्यत् ॥ ३१ ॥

तस्मात्साक्षाद् ब्रह्मात्मज्ञानादमायातत्कार्यसंबन्धविनिर्मुक्तो भवतीत्ययमर्थः श्रुतिसिद्धः श्रद्धेयो मुमुक्षुणा इत्याह ।

(३२) साक्षाद्देवः स विज्ञेयःसाक्षादात्मेति च श्रुतेः ।
भिद्यते हृदयग्रन्थिर्न चेदित्यादितः श्रुतेः ॥ २५७ ॥

साक्षाद्देव इति । स सर्वविकारसाक्षी कूटस्थ आत्मा साक्षाद्देवो विज्ञानमानन्दं ब्रह्मेत्युक्तलक्षणो विज्ञेयः, "यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तर" इति ब्रह्मात्मैकत्वश्रुतेरित्यर्थः । एवं विज्ञाने लाभमविज्ञाने हानिं च श्रुत्या दर्शयति । भिद्यतइति । न चेदिहावेदीन्महती विनष्टिरित्यादित इ-

त्यादिशब्दा "इहैकधैवानुद्रष्टव्यं मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यती"त्यादिश्रुतयो गृह्यन्ते ॥ ३२ ॥

साक्षादात्मविज्ञानमुक्तमाक्षिपति ।

(३३) अशब्दादित्वतो नास्य ग्रहणं चेन्द्रियैर्भवेत् ।
सुखादिभ्यस्तथान्यत्वाद्बुद्ध्या वापि कथं भवेत् ॥ ३५८ ॥

अशब्दादित्वत इति । बाह्यान्तःकरणायाह्यत्वादात्मनः कथं साक्षाद्विज्ञानं स्यादित्यर्थः ॥ ३३ ॥

परिहरति ।

(३४) अदृश्योपि यथा राहुश्चन्द्रे बिम्बं यथाम्भसि ।
सर्वगोपि तथैवात्मा बुद्धावेव स गृह्यते ॥ ३५९ ॥

अदृश्योपीति । यथा स्वरूपेणादृश्योपि राहुश्चन्द्रे चन्द्रमण्डले उपरक्तो दृश्यते, यथा वाम्भसि जले चन्द्रादेर्बिम्बं दृश्यते, तथैव चक्षुराद्यगोचरोपि स परमात्मा सर्वगोपि सर्वत्र वर्त्तमानोपि तत्त्वमस्यादिमहावाक्योत्थबुद्धावेव प्रतिबिम्बितः सन् गृह्यते तत्र प्रतिबिम्बिततया स्वतः स्फुरणमेव ग्रहणं न विषयीभाव इत्यर्थः । शास्त्रैकगम्यस्यापि प्रत्यक्षत्वे राहुदृष्टान्तः, सर्वसन्निहिततया भासमानस्य सर्वत्र यथावदस्फुरतोप्युपाधिविशेषे यथावत्स्फुरणे प्रतिबिम्बदृष्टान्त इति विवेकः ॥ ३४ ॥

बुद्धौ बोधात्मा गृह्यते चेद्बुद्धिधर्म्मो बोध इतिशङ्कां दृष्टान्तेन प्रत्याचष्टे ।

(३५) भानोर्बिम्बं यथा चौष्ण्यं जले दृष्टं न चाम्भसः ।
बुद्धौ बोधो न तद्धर्मस्तथैव स्याद्विधर्म्मतः ॥ ३६० ॥

भानोरिति । यथा जले दृष्टं बिम्बमौष्ण्यं च भानोरेव न चाम्भसो जलस्य धर्मस्तस्य शैत्यस्वाभाव्यात्तथैव बुद्धौ स्फुरन् बोधो न बुद्धिधर्मः स्यात् कुतो विधर्मतो विपरीतधर्मतो बुद्धेर्जाड्यधर्म्मत्वनिश्चयादित्यर्थः ॥ ३५ ॥

न केवलं शास्त्रीयबुद्धावेव विदुषः परमात्मा स्फुरति किंतु लौकिकीष्वपि विषयाकारबुद्धिवृत्तिष्वात्मा स्वतो ऽपरोक्षः साक्षितया स्फुरतीत्याह ।

(३६) चक्षुर्युक्ता धियो वृत्तिर्या तां पश्यन्न लुप्तदृक् ।
दृष्टेर्द्रष्टा भवेदात्मा श्रुतेः श्रोता तथा भवेत् ॥ ३६१ ॥

चक्षुरिति । चक्षुर्द्वारिका रूपाकारा या धियो वृत्तिस्तां पश्यन्नवभासयन्नात्मा ऽलुप्तदृगकुण्ठितज्ञानशक्तिर्दृष्टेर्द्रष्टा भवेद्, एवमुत्तरत्रापि योज्यम् ॥ ३६ ॥

(३७) केवलां मनसो वृत्तिं पश्यन्नन्ता मतेरजः ।
विज्ञातालुप्तशक्तित्वात्तथा शास्त्रं नहीत्यतः ॥ ३६२ ॥

केवलामिति । चक्षुरादिद्वारा बहिरप्रवृत्तामन्तरेव विषयाकारामित्यर्थः । अजो विकाररहित इत्यर्थः, अलुप्तचिच्छक्तित्वादित्यर्थः । अलुप्तशक्तित्वे श्रुतिमुदाहरति । तथा शास्त्रमिति । एतादित्यस्मिन्नर्थे ऽतःशब्दः तसेः सार्वविभक्तिकत्वाङ्गीकारात् सप्तम्यर्थेयं तसिरिति के चिद्, नहि द्रष्टुर्दृष्टेरित्यारभ्य नहि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतइतिश्रुतेरित्यर्थः । दृष्टेर्द्रष्टेत्यादौ च न दृष्टेर्द्रष्टारं पश्येन श्रुतेः श्रोतारं शृणुयान्न मतेर्मन्तारं मन्वीयान्न विज्ञातेर्विज्ञातारं विजानीयादेष त आत्मा सर्वान्तर इति श्रुतिरुदाहार्या ॥ ३७ ॥

दृष्टृत्वादिव्यपदेशाद्विकारित्वाशुद्धत्वप्रसक्तिमाशङ्क्याह ।

(३८) ध्यायतीत्यविकारित्वं तथा लेलायतीत्यपि ।
अत्र स्तेनेति शुद्धत्वं तथानन्वागतं श्रुतेः ॥ ३६३ ॥

ध्यायतीति । श्रुताविवशब्दाद् ध्यानचलनयोराभासत्वमुच्यते, अतोऽविकारित्वं सिद्धमित्यर्थः । "अत्र स्तेनो ऽस्तेनो भवति भ्रूणहाभ्रूणहेति अनन्वागतं पुण्येनानन्वागतं पापेने"ति च श्रुतेः शुद्धत्वं सिद्धमित्यर्थः ॥ ३८ ॥

ननु सुषुप्ते ज्ञानाभावाज्जाग्रत्स्वप्नयोश्च तद्भावादात्मनः कथमविकारित्वमित्यत आह ।

(३९) शक्त्यलोपात्सुषुप्ते ज्ञस्तथा बोधे ऽविकारतः ।
ज्ञेयस्यैव विशेषस्तु यत्र वेति श्रुतेर्मतः ॥ ३६४ ॥

शक्त्यलोपादिति । सुषुप्तेप्यात्मा ज्ञ एव शक्त्यलोपादिति योजना, "यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यती"त्यादिश्रुतिरित्यर्थः । तथा बोधे बोधदशायां जाग्रत्स्वप्नयोरिति यावद्, ज्ञो ज्ञानस्वरूप एवात्मा निरवयवत्वेनाविकारतो विकारानुपपत्तेरित्यर्थः । अवस्थात्रयेपि निर्विशेषचिद्रूपश्चेदात्मा कथं तर्हि नाज्ञासिषमिति सुषुप्तिपरामर्शो बोधावस्थायां च कथं जानामीत्यनुभव इत्याशङ्क्य विषयो परमानुपरमोपाधिनिबन्धनं तदुभयं न स्वरूपनिबन्धनं तथैव श्रुत्योक्तत्वादित्याह । ज्ञेयस्येति । यत्र वा अन्यदिव स्यात्तत्रान्योन्यं पश्येदित्यादिका यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिका चोदाहरणम् ॥ ३९ ॥

एवं नित्यचैतन्यस्वरूपत्वान्नित्यापरोक्षो निर्विकारश्चात्मेत्युक्तं प्रपञ्चयति श्लोकत्रयेण ।

(४०) व्यवधानाद्धि पारोक्ष्यं लोकदृष्टेरनात्मनः ।
दृष्टेरात्मस्वरूपत्वात्प्रत्यक्षं ब्रह्म तत् स्मृतम् ॥ ३६५ ॥

व्यवधानाद्धीति । अनात्मनो घटादेर्विषयस्य ग्राहिकाया लोकदृष्टेस्तद्ग्राहकचक्षुरादिदृष्टेर्देशतः कालतो वा व्यवधानादसन्निकर्षात्पारोक्ष्यं हि प्रसिद्धमित्यर्थः । न तथात्मनो दृष्टि-

व्यवधानमस्ति दृष्टेरात्मस्वरूपत्वादात्मन एव ब्रह्मत्वात्तद्ब्रह्म स्वत एव सदा प्रत्यक्षं स्मृतं ब्रह्मविद्भिरिति योजना ॥ ४० ॥

स्वरूपप्रकाशस्यानन्यापेक्षत्वं दृष्टान्तेन स्फुटयति ।

(४१) नहि दीपान्तरापेक्षा यद्वद्दीपप्रकाशने ।
बोधस्यात्मस्वरूपत्वान्न बोधो ऽन्यस्तथेष्यते ॥ ३६६ ॥

नहीति ॥ ४१ ॥

एवमपरोक्षत्वं विशदीकृत्याविकारत्वं विशदीकुर्वन्नात्मनो निर्विशेषत्वमाह ।

(४२) विषयित्वं विकारित्वं नानात्वं वा नहीष्यते ।
न हेयो नाप्युपादेय आत्मनो ऽन्येन वा ततः ॥ ३६७ ॥

विषयित्वमिति । नहीष्यते श्रुतिविरोधादिति शेषः, अन्यस्यासत्त्वाज्जडत्वाच्चेति हेतुरनुसंधेयः, वाशब्दात्स्वेनापीत्यर्थः ॥ ४२ ॥

नन्वेवमपि कुतश्चात्मनो निर्विकारत्वं नरकपातादिभयदर्शनादित्याशङ्क्याह ।

(४३) स बाह्याभ्यन्तरो जीर्णो जन्ममृत्युजरातिगः ।
अहमात्मेति यो वेत्ति कुतो न्वेव बिभेति सः ॥ ३६८ ॥

स बाह्याभ्यन्तर इति । सम्यक्पदार्थशोधनपूर्वकं य आत्मतत्त्वं जानाति स कुतो न्वेव बिभेति भयहेतोर्द्वितीयस्य बाधितत्वादित्यर्थः ॥ ४३ ॥

तथापि यावज्जीवादिश्रुतिविहितत्वात्कर्मणां तदकरणे प्रत्यवायभयं विदुषोऽप्यस्तीति तत्परिहारायानुष्ठानं स्यादिति चेन्नेत्याह ।

(४४) प्रागेवैतद्विधेः कर्म्म वर्णित्वादेरपोहनात् ।
तदस्थूलादिशास्त्रेभ्यस्तत्त्वमेवेति निश्चयात् ॥ ३६९ ॥

प्रागेवेति । अस्थूलादिशास्त्रेभ्यो वर्णित्वादेः कर्माधिकारहेतोरपोहनात्तत्त्वमेवेति वाक्येन ब्रह्मस्वरूपत्वनिश्चयादेतद्विधेरेतदात्मतत्त्वविधानात्प्रतिपादनात्प्रागेव पूर्वमेव तद्यावज्जीवादिशास्त्रविहितं कर्म नोर्ध्वमिति योजना, अनधिकारिणो ऽकरणे प्रत्यवायासंभवान्नानुष्ठानप्राप्तिरिति भावः ॥ ४४ ॥

आत्मनो ऽध्यासं विना न वर्णित्वाद्यस्तीत्यत्र युक्तिमाह ।

(४५) पूर्वदेहपरित्यागे जात्यादीनां प्रहाणतः ।
देहस्यैव तु जात्यादिस्तस्याप्येवं ह्यनात्मता ॥ ३७० ॥

पूर्वेति । देहपरित्यागे तदनुरक्तजातेरपि परित्यागादागमापायित्वेन न जात्यादेरात्मधर्मत्वं किं तु देहस्यैव जात्यादिधर्मः, तर्हि देह एवात्मास्त्वित्यत आह । तस्यापीति । एवमागमापायित्वादेव देहस्याप्यनात्मतेत्यर्थः । देहस्य जात्यादेश्च वर्णित्वादिना प्रकारेण कर्माधिकारहेतोरभावादात्मनो न स्वभावतः कर्मकर्तृत्वमुपपद्यतइति भावः ॥ ४५ ॥

शरीरादिष्वात्मात्मीयाभिमानस्य प्रसिद्धत्वेन हेयत्वायोगमाशङ्क्याह ।

(४६) ममाहं चेत्यतो ऽविद्या शरीरादिष्वनात्मसु ।
आत्मज्ञानेन हेया स्यादसुराणामिति श्रुतेः ॥ ३७१ ॥

ममाहमिति । यत आत्मन्यागमापायाभ्यामनात्मत्वं देहादेर्निश्चितमतो हेतोः शरीरादिष्वनात्मसु ममाहं चेत्यभिमानो ऽविद्या मिथ्याप्रत्ययः सात्मज्ञानेनात्मतत्त्वब्रह्मानुसंधानेन हेया स्याद्बाध्या स्याद्देहात्मदृष्टेरासुरत्वेन निन्दाश्रुतेश्चेत्याह । असुराणामिति । "असुराणां ह्येषोपनिषदि"तिश्रुतेरित्यर्थः ॥ ४६ ॥

तत्त्वज्ञानादूर्ध्वं न कर्म न वा तत्प्रयोजकं जात्याद्यात्मनो नास्तीत्येतद्दृष्टान्तेन साधयति ।

(४७) दशाहाशौचकार्याणां परिव्राज्ये निवर्त्तनम् ।
यथा ज्ञानस्य संप्राप्तौ तद्वज्जात्यादिकर्म्मणाम् ॥ ३७२ ॥

दशाहेति । पारिव्राज्ये सति सपिण्डताभिमानाभावात्संन्यासिनो यथा आशौचादेरननुष्ठेयता, तथा ब्रह्मात्मज्ञानस्य संप्राप्तौ सत्यां जात्याद्यभिमानाभावाद्विदुषः कर्म्मानुष्ठानाभाव इत्यर्थः ॥ ४७ ॥

यस्मादेवमात्मनो ब्रह्मात्मत्वाज्ञानमूलो देहाद्यध्यासनिबन्धनः संसारस्तस्मात्तत्त्वज्ञानात्प्राक्कामादियुक्तो धर्माधर्मद्वारा संसरति ब्रह्मात्मज्ञाने च सति कामादेरभावान्मुक्तो भवेदित्याह ।

(४८) यत्कामस्तत्क्रतुर्भूत्वा कृतं त्वक्षः प्रपद्यते ।
यदा स्वात्मदृशः कामाः प्रमुच्यन्ते ऽमृतस्तदा ॥ ३७३ ॥

यत्काम इति । स्वःस्वरूपे ब्रह्मण्येवात्मदृष्टिर्यस्य स स्वात्मदृक् तस्य स्वात्मदृश इति विग्रहः, "यदा सर्वे प्रमुच्यन्ते कामा येस्य हृदि श्रिताः अथ मर्त्यो ऽमृतो भवती"ति श्रुतेः, हृदयाः कामाः हृदयाध्यासबाधनेन बाधिताः सन्तो यदा प्रकर्षेण मुच्यन्ते तदा प्रवृत्तिबीजाभावात्स्वात्मसंस्य आत्मा ऽमृतो मुक्तसंसारबन्धनो भवतीत्यर्थः ॥ ४८ ॥

"एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति नित्यतृप्तो निरञ्जन" इत्यादिश्रुतेरात्मनो नित्यतृप्तत्वावगमात्तस्य साध्यसाधनविलक्षणत्वेन स्वतः क्रियादिसंस्पर्शित्वाभावादध्यासमूलत्वं क्रियातत्कारकयोगस्येति निश्चित्यात्मतत्त्वावबोधनेनैव क्रियादि त्याज्यमित्याह ।

(४८) आत्मस्वरूपविधिः कार्यं क्रियादिभ्यो निवर्त्तनम्।
न साध्यं साधनं चात्मा नित्यतृप्तः श्रुतिर्मतः ॥ ३७४ ॥

आत्मस्वरूपेति। विधिर्विधानं तत्स्वरूपावधारणम् ॥ ४९ ॥

यद्यपि विज्ञातात्मतत्त्वस्य क्रियाहेत्वभावात्तदभावस्तथापि विजिज्ञासोर्मुमुक्षोर्मोक्षाय क्रियानुष्ठानं स्यादित्याशङ्क्य मोक्षस्य क्रियाफलविलक्षणत्वान्न तस्यापि क्रियासंभव इत्याह।

(५०) उत्पाद्याप्यविकार्याणि संस्कार्यं च क्रियाफलम्।
नातो ऽन्यत्कर्मणः कार्यं त्यजेत्तस्मात्ससाधनम् ॥ ३७५ ॥

उत्पाद्येति। ससाधनं जायापत्यवित्तशिखायज्ञोपवीतादिसाधनसहितं कर्म विधिलक्षणं त्यजेन्मुमुक्षुरिति शेषः। कृतकस्यानित्यत्वान्मोक्षस्य च नित्यात्मस्वरूपावस्थानरूपत्वान्न मुमुक्षोरपि कर्मणा कृत्यमस्तीति भावः ॥ ५० ॥

किं ससाधनकर्मत्यागमात्रेण मुक्तिसिद्धिः किं वान्यत्किमपि कृत्यमस्तीत्यपेक्षायामात्मतत्त्वज्ञानाय गुरूपसत्तिः कर्त्तव्येत्याह।

(५१) तापान्तत्वादनित्यत्वादात्मार्थत्वाच्च या बहिः।
संहृत्यात्मनि तां प्रीतिं सत्यार्थी गुरुमाश्रयेत् ॥ ३७६ ॥

तापान्तेति। यद्वा यस्मात्सर्वकर्मनिबन्धना प्रीतिरनित्या दुःखान्ता स्वार्थप्रयुक्ता च तस्मात्तन्निमित्तां प्रीतिमनात्मविषयामात्मन्येवोपसंहृत्य नित्यपुरुषार्थी गुरुं संश्रयेतेति मुमुक्षुं शिक्षयति। तापान्तत्वादिति। या बहिरात्मनोऽन्यत्र जायापुत्रादौ प्रीतिस्तां प्रीतिमात्मन्युपसंहृत्यात्मसात्कृत्वेत्यर्थः ॥ ५१ ॥

शेष उत्तराङ्के ॥

---

## ॥ अथ बालभारतस्य ॥

### ॥ अष्टमः सर्गः ॥

अहो महत्त्वं वचसामगोचरं
प्रपञ्चयन् कृष्णमुनिः पुनातु वः ।
भवार्णवोऽप्येष विशोषमेति यत्-
पदद्वयीरेणुकणैरपि क्षणात् ॥ १ ॥

रथाङ्गिपार्थानुचरैरथ द्रुमा
नवप्रवालप्रसवग्रहाशयैः ।
भूरीभवत्पल्लवपुष्पवैभवा
इव व्यचीयन्त कराङ्गुलीनखैः ॥ २ ॥

लतासु लातुं लसिते मृगीदृशां
घनध्वनत्कङ्कणसंकरे करे ।
द्रुतोत्पतिष्णुभ्रमरीभरैर्भया-
दिव प्रसूनैरुदनामि दूरतः ॥ ३ ॥

विलूयमानानि मुकुन्दकामिनी-
जनेन लीलाविपिनान्तवल्लिषु ।
पुष्पाणि तत्पाणिजपाटलप्रभा-
टोपानि कोपादिव शोणतां ययुः ॥ ४ ॥

निजप्रियाणामिव वश्यताकृते
परस्परं दम्पतिभिः ससंमदैः ।
जवादवाचायिषत स्वपाणिभिः
पुष्पाणि बाणार्थमनङ्गधन्विनः ॥ ५ ॥

बहून्नमन्त्यः कुसुमेच्छया मुहु-
र्मुहुर्नमन्त्यश्च नितम्बभारतः ।
स्त्रियः प्रियाण्यूर्ध्वरतानि रागिभिः
स्मरस्मयस्मेररसैरसस्मरन् ॥ ६ ॥

दूराद्धदाने कुसुमानि कामुके-
ऽभिधाभिदि प्रौढलताकृतस्थितौ ।
तान्येव तस्मिन् मदनास्त्रतां ययुः
श्वासानिलैर्व्याघुटितानि सुभ्रुवाम् ॥ ७ ॥

तन्वीं तनूतुल्यतया लतातती
पुरः स्फुरन्तीमविभाव्य वल्लभः ।
चिक्षिप्वा प्रसूनस्तवकभ्रमात् करं
कुचौ स्पृशन्नेव दधार दक्षताम् ॥ ८ ॥

प्रियस्य पुष्पाय लताधिरोहिणः
पदाङ्गुली निम्नशिखावलम्बिनी ।
अलब्धपूर्वं करजक्षतोत्सवं
मृगीदृशालभ्यत पल्लवभ्रमात् ॥ ९ ॥

द्रुमाधिरूढे कुसुमं प्रयच्छति
प्रिये गिरा कोमलयाभिभाषिणि ।
नवीनवध्वाः पुलकप्रकम्पयो-
र्गलन्मरन्दाभिगमोऽभवन्मिषम् ॥ १० ॥

लूने प्रसूने मधुपस्तदाश्रयः
अयन्मुखाब्जं रणितं चकार यत् ।
भियाभिषक्तः प्रथमं नवोढया
वोढास्मरन्मङ्गलगीतमेव तत् ॥ ११ ॥

अलिं विलूनात् प्रसवादुपागतं
कयापि वित्रासयितुं विदग्धया ।
करः क्वणत्कङ्कणकं न कम्पितो
विलोलयालिङ्गि भियेव वल्लभः ॥ १२ ॥

शुचिस्मिताः पुष्पितवल्लिविभ्रमा-
दुपेयुषी षट्पदपद्धतिर्वधूः ।
विकम्पयन्तीरपि ताः करौ भया-
दियं मुदा पल्लविनीरमन्यत ॥ १३ ॥

मुखाद्बहिर्लम्बिनि सुभ्रुवां स्मिते
समेत्य दूरादलयः सुमभ्रमात् ।
कृतोपवेशा द्रुतबद्धपक्षति
क्षितौ पतन्तो दधिरे पदि स्तनैः ॥ १४ ॥

प्रियेण मुक्ते कुसुमोत्करेऽन्तरा-
न्यतः सपत्नीश्वसितैरपीरिते ।
मुदा स्फुरत्पुष्प इवैक्षि सज्जितो
निजस्मितस्मेरतलः करोऽन्यया ॥ १५ ॥

परस्परालोकनमग्नचेतनं
करादजानन् गलितानि पूर्वतः ।
वृथा प्रसूनानि ददौ प्रियः प्रिया
वृथा गृहीत्वैव शिरस्यरोपयत् ॥ १६ ॥

कराग्रकर्षेण वधूमपि द्रुमेऽ-
धिरोपयन् कोऽपि विकम्पितः पतन् ।
हारेण शाखाग्रविलम्बिना रहः-
स्तम्भीकृतश्वासलघुश्चिरं धृतः ॥ १७ ॥

स्मरातुरः कश्चन दूरचुम्बना-
नुकारलीलामिलदोष्ठसंपुटः ।
प्रियामुखे पुष्पलयोन्मुखे समं
तदेवं[१] तन्वत्यतिसंमदं दधौ ॥ १८ ॥

युवा विचिन्वन् कुसुमानि वृक्षतः
पपात पश्यन्नपरामचेतनः ।
अघानि पादेन ततो विदग्धया
धृतक्रुधा निर्दयमेव कान्तया ॥ १९ ॥

चिरं प्रियाया मुखमीक्षितुं प्रिये
पुष्पाण्यमुञ्चत्यपि कम्पतोऽपतन् ।
अजानती तानि पतन्ति संमुखी
न सापि चक्षुः प्रियचक्षुषोऽकृषत् ॥ २० ॥

अपि प्रसूनेषु नखक्षतं प्रिये
सृजत्यसूयां विदधे मनस्विनी ।
भृङ्गोऽपि पुष्पावचयोत्थितः पिबन्
प्रियामुखाब्जं रसिनाप्यसूयत ॥ २१ ॥

भृङ्गेण दष्टो नवपल्लवभ्रमा-
दुपेत्य दूरादधरो मृगीदृशः ।
विषव्यथां हर्तुमिव स्वयं रया-
दुपालि पीतो दयितेन धीमता ॥ २२ ॥

प्रिय प्रयच्छेदमतीव मञ्जुलं
प्रसूनमित्युक्तिभिरुच्छ्रिताङ्गुलौ ।
लतोन्मुखायां सुदृशि द्रुतं पपौ
परः परस्याश्छलबन्धुरोऽधरम् ॥ २३ ॥

रहः समालिङ्ग्य परां परोऽन्यतः
परागरज्यन्नयनां समागताम् ।
क्रुद्धेति दीनोऽनुनयन् वधूं मृषा
कृतागसं स्वं स्वयमप्यजिज्ञपत् ॥ २४ ॥

प्रसूनपाताद्गलदश्रु सुभ्रुवो
विलोचनं कूकृतिकारिकामिषात् ।
अचुम्बदच्छन्नमिवाच्छवाससा
पिधाय कश्चिच्चतुरः स्मरातुरः ॥ २५ ॥

रुग्णे रजोभिः प्रियदत्तपुष्पजै-
रङ्गे कृशाङ्ग्याः परिमार्जनोद्यतम् ।
शुशोच निःश्वासमपि प्रसृत्वरं
निजं सपत्नी सविधे कृतस्थितिः ॥ २६ ॥

अवाप्य कस्याश्चन कण्ठकन्दलं
प्रदत्तया चित्तहरेण मालया ।
मुदेव नृत्यं विदधे विलोलया
मुहुः सपत्नीश्वसितोर्मिनुन्नया ॥ २७ ॥

रजोऽवकीर्णे दयितेन कौसुमं
परां यदालिङ्गितुमङ्गनादृशि ।

---

१ दूरचुम्बनमेव ।

तदाशु निश्वासभरेण निघ्नती
हृद्दात्मनि द्रोहमपि व्यधत्त सा ॥ २८ ॥

निशम्य क्रूराममुनाभिधाभिदा
मदर्पणेऽसौ त्यजदाशु मा स्म माम् ।
प्रियेण वध्वा हृदि रोपिता व्यधा-
दितीव माला तुमुलं चलालिभिः ॥ २९ ॥

रसोत्थकम्पेन न पारितः स्रजा
धम्मिल्लबन्धो दयितेन सुभ्रुवः ।
मुधा सपत्न्या मुमुदे नु मूढया
तमात्मभीतं हृदि मन्यमानया ॥ ३० ॥

अन्याकटाक्षाहतिभीगलत्करः
स्फुरद्रसोऽसाविति शङ्कमानया ।
धम्मिल्लबन्धग्रगुणः प्रियः स्त्रिया
चिरं चुचुम्बे बलिताननं मुदा ॥ ३१ ॥

चुम्बाय धृत्वा चिबुकं विवर्तिते
वेगेन वक्त्रे किल कापि किंनरी ।
धम्मिल्लबन्धे कुचसंगते बभौ
हयास्यतुल्ये कुसुमालिगायिनि ॥ ३२ ॥

उरःस्फुरन्माल्यभृतः सुमावली-
परीतधम्मिल्लपरार्धपृष्ठकाः ।
सचापतूणा इव पुष्पधन्वन-
श्चमूचरा दम्पतयो विरेजिरे ॥ ३३ ॥

वधूवराणां वपुषि प्रसूनजै-
र्वृते रजोभिः श्रमवारिपङ्किले ।
हतद्विषन्मानमहाबलो बली
मुदं दधौ मन्मथमत्तशूकरः ॥ ३४ ॥

प्रसूनरेणुप्रकरा वनान्तरे
मृदुस्फुरद्वायुविवर्तनर्तिताः ।
वधूजनस्पर्शकृतोत्सवा बभु-
र्दिवाकरस्येव करा विकम्पिनः ॥ ३५ ॥

प्रियेण वध्वाः श्रमघर्मभेदिभिः
पटान्तवातैः प्रमदा[1]श्रुशीतलैः ।
वृथाकृतस्नेहभरस्थितिर्द्रुतं
हतः सपत्न्यामभिमानदीपकः ॥ ३६ ॥

मरुत्कृते चालयितुं पटान्तरं
स्वयं भुजङ्गे प्रणयादनीश्वरे ।
अघानि कस्याश्चन घर्मजं पय-
स्तदा सपत्नीश्वसितैः खरैरपि ॥ ३७ ॥

सरोजबन्धुर्नलिनद्विषन्मुखा-
नतापयद्युक्तमहो वधूवरान् ।
इमेऽपि युक्तं तपनात्मजां तदा
बभूवुरालोडयितुं समुत्सुकाः ॥ ३८ ॥

वनान्तराद्दम्पतयो विभूषण-
प्रसूनमालामिलितालिमण्डलाः ।
तीव्रांशुतप्ताः पयसे चलल्लता-
जुषो गता जङ्गमतामिव द्रुमाः ॥ ३९ ॥

प्रसूनसर्वस्वमुदारविग्रहे
स्वयं गृहीत्वा चलिते वधूजने ।
चेलुश्छलायेव सहैव शाखिनः
शिखिच्छदच्छत्रकदम्बदम्भतः ॥ ४० ॥

रवौ प्रतीचीजुषि कोऽपि धारयन्
शठः पटीं मूर्धनि मुग्धसुभ्रुवः ।
सृजन् स्मितप्राग्दिशि दत्तयोपिति-
च्छायां पुनस्तद्द्वयमप्यतोषयत् ॥ ४१ ॥

प्रियेण कस्याश्चन मूर्ध्नि धारिता
तापच्छिदे सात्त्विकभावकम्पिना ।
सुदूरमुड्डीय ययौ पटी पुनः
पुरः परस्याः श्वसितानिलोर्मिभिः ॥ ४२ ॥

अथाग्रतः कण्ठमयूषमण्डलीं
महेशमूर्तेरिव विस्तृतां भुवः ।
छन्दानुवृत्त्या जलधेरिवासित-
च्छविं युवानो यमुनामलोकयन् ॥ ४३ ॥

अथो रथाङ्गैश्चलचन्द्रघाटिका-
भयान्न्यभाल्यन्त मुखानि योषिताम् ।
मरालबालैः सुविहारवारिज-
व्रजप्रमोदाद्यमुनाजलस्थितैः ॥ ४४ ॥

१ प्रमदो हर्षः ।

समापतत्तुङ्गतरङ्गसंगता-
द्भुतप्रतिच्छन्दमिषेण योषिताम् ।
कृतस्थितीनां तटिनीतटे रया-
दभ्युत्थितिं चक्रुरिवाम्बुदेवताः ॥ ४५ ॥
अमुत्र मा भैष्ट पुरोऽपि सुभ्रुवः
सृजन्ति केलिं लहरीषु पश्यत ।
इति प्रतार्य प्रतिबिम्बदर्शना-
दवीविशत् कामिजनोऽङ्गना जलम् ॥ ४६ ॥
पयांसि नाभिद्वयसान्यपि द्रुतं
जनातिरेके ययुरंसदघ्नताम् ।
ह्रियेव मग्ने निजपङ्कजव्रजे
मुखानि राजीवयितुं मृगीदृशाम् ॥ ४७ ॥
प्रदत्तकम्पेषु तटाद्विलासिषु
प्रणादभागुच्छलति स्म यज्जलम् ।
तन्नूनमाह्वानविधिं व्यधत्त तत्
तदा नु कम्प्रामनसां मृगीदृशाम् ॥ ४८ ॥
जनार्दनो मण्डनरत्नमण्डली-
समुज्ज्वलः कज्जलमञ्जुलद्युतिः ।
कलिन्दपुत्र्या हृदये रसस्पृशि
स्थितो धुनीजानिरिवाङ्कवान् बभौ ॥ ४९ ॥
स्फुरत्करोल्लासितवारिशीकरौ
नदीजले लूनसरोरुहौ मुहुः ।
अखेलतामञ्जनमञ्जुदीधिती
रथाङ्गिपाणी विपिनद्विपाविव ॥ ५० ॥
आमौलि सर्वाङ्गविलासलीलया
मुदा मुकुन्देन रसेन लालिता ।
कराहतिस्फारितफेनसंपदा
तदाहसद्विष्णुपदीं कलिन्दभूः ॥ ५१ ॥
विलासकारी यमुनाजलान्तरे
हरिः स्मरन् बालविहारकौतुकम् ।
तदा मदामात्यविवेकयन्त्रितं
स्वमाधिपत्येऽपि न बह्वमन्यत ॥ ५२ ॥
तदा महामोदिविलासभासुरान्
विलोकयन्तो कुतुकेन दम्पतीन् ।
तरङ्गिणीपाथसि पार्थकेशवौ
कृतार्थयामासतुरक्षिणी क्षणम् ॥ ५३ ॥
क्रीडासु पाणिप्रसरेण मुञ्चतः
सदम्भमम्भांसि निषेद्धुमक्षमा ।
काचित् प्रियस्योरसि वक्त्रपङ्कजं
ररक्ष दत्त्वा विनियोज्य रागिणी ॥ ५४ ॥
अनीश्वरा जेतुमनन्तकैतवं
पयोविलासैर्दयितं मनस्विनी ।
कठोरवक्षोरुहकोटिभिर्मुहु-
र्जघान धन्यं रुषितेव वक्षसि ॥ ५५ ॥
मिथःसमालोकनभिन्नचेतसो
रसात् प्रियावल्लभयोः कयोश्चन ।
अव्यापृतं तज्जलमञ्जलौ स्रुतं
रुरोद निःस्यन्दिभिरेव बिन्दुभिः ॥ ५६ ॥
सरित्तरङ्गेऽभिमुखाभिपातुके
निजौ निरीक्ष्य प्रतिबिम्बितौ स्तनौ ।
प्रसर्पदम्भःकरिकुम्भशङ्कया
कयाचिदाश्लिष्यत भीतया प्रियः ॥ ५७ ॥
आकण्ठनिर्मग्नतनोर्मृगीदृशः
श्वासोर्मिसौरभ्यमिलन्मधुव्रतम् ।
जले सरोजं व्यपदिश्य रागवा-
नचुम्बदाघ्राणमिषान्मुखं मुहुः ॥ ५८ ॥
राजीवराजीविपिने विलासिभि-
र्विलासकौतूहलतो विमर्दिते ।
मृगीदृशामाननपद्मकानन-
क्रोडेषु विक्रीडितमब्जवासया ॥ ५९ ॥
परस्परोदस्तजलौघलीलया-
नया प्रियेषु प्रहताक्षिवर्त्मसु ।
चिक्रीडतुः कौचन दम्पती तदा
दक्षौ समालिङ्गनचुम्बनोत्सवैः ॥ ६० ॥
दधौ प्रियक्षिप्तजलोक्षिता मुहु-
र्दृगब्जमुच्चैरसितं च कापि यत् ।
विलस्य कोपेन तदा तदीर्ष्यया
स्वयं सपत्नी विदधौ तदेव तत् ॥ ६१ ॥

कदाप्यसंभावितविभ्रमेऽम्भसा
प्रियेऽभिषिञ्चत्यपि नामभेदतः ।
संवृत्तरागा सहसा प्रवृत्तितो
मुदं दधौ काप्यपरा चुकोप च ॥ ६२ ॥
दृङ्मार्गमागत्य विवृद्धमत्सरा
मिथः सपत्न्यो बहुशः स्मृतागसः ।
स्वस्वक्रुधैकं सलिलाहतैः समं
व्यधुर्विलासिस्पृहणीयमाकुलम् ॥ ६३ ॥
चिराय पर्याकुलया जलोक्षणैः
क्षणात् कृतं साचि कयाचिदाननम् ।
नाबोधि सिञ्चन् रसमोहितो युवा
पश्यन् पुरः कर्णवतंसवारिजम् ॥ ६४ ॥
सरोरुहिण्यन्तरिता मुहुर्मुहुः
सिञ्चन्तमङ्गं स्मितमाननभ्रमात् ।
कुतूहलोत्तालमना मनःप्रियं
पयःप्रहारैर्विधुरं वधूर्व्यधात् ॥ ६५ ॥
प्रियोरसि प्रेमतरुं सखीरिता
मुग्धा नवोप्तं चुलुकाम्भसासिचत् ।
नेत्राञ्जलिभ्यां हृदि शोकमत्सर-
द्रुमौ परा तत्क्षणरोपितौ पुनः ॥ ६६ ॥
तदाङ्गनानामिव लोचनाञ्जनै-
स्तथाजनि श्यामजला कलिन्दभूः ।
यथा तदाश्लेषवशादिवाभज-
न्निजं तदर्णः शितिवर्णमर्णवः ॥ ६७ ॥
ससंभ्रमाश्लेषगलद्विलेपनं
कुचाग्रमारुह्य रसान्मृगीदृशाम् ।
सद्यः प्रलीनोऽपि पुनर्नवोऽभव-
न्मुहुस्तरङ्गस्तरलैर्वनानिलैः ॥ ६८ ॥
सरागहृद्भिस्तरुणीभिरापतन्
निहन्यमानोऽपि मुहुश्चपेटया ।
उत्फेनभासा प्रजहास चञ्चलः
शठोऽपराधीव तरङ्गसंचयः ॥ ६९ ॥
विमर्दिताम्भोरुहकेशराङ्कुरैः
परिस्फुरत्फेनलवालिमारुतैः ।
विलासिनीनव्यविलासतो बभौ
सस्वेदरोमाञ्च इवोर्मिसंचयः ॥ ७० ॥
मदङ्कमुन्मुच्य बहूकृताकृति-
र्विधुर्दधौ क्रोडगताः कुमुद्वतीः ।
इतीव सिन्धूत्थितपातिशीकरै-
र्द्यौः कैरवाक्षी मुखवीक्षयारुदत् ॥ ७१ ॥
रोमाञ्चदण्डान्तरगैर्मृगीदृशां
नखक्षतैः स्नानपरिस्फुटीकृतैः ।
तीव्रार्धचन्द्रायुधमञ्जुलैर्जग-
ज्जयाय दर्पं विततान दर्पकः ॥ ७२ ॥
विस्रस्तधम्मिल्लगलत्प्रसूनक-
प्रभ्रष्टमालामिषतो मृगीदृशाम् ।
विमुच्य कामः शरचापसंमदं
मदेन तासां ललितान्यशिश्रियत् ॥ ७३ ॥
गङ्गां पयोगौरतया मदस्पृशं
तां ताम्रपर्णीमपि मौक्तिकश्रिया ।
तदा विजिग्ये यमुना वधूकुच-
स्थलीगलच्चन्दनहारहारिणी ॥ ७४ ॥
कनीनिकाकान्तिभिरञ्जनं दृशोः
स्मितत्विषा चन्दनचर्चनं हृदः ।
कटाक्षभाभिर्नवमुत्पलं श्रुते-
स्तदा वधूनामिति भूषणान्यभान् ॥ ७५ ॥
वधूवराणां जलखेलनोत्सवै-
स्तथा प्रवृद्धो हृदि रागसागरः ।
यथा समुद्भ्रान्त इव व्यलोक्यत
क्षणेन रज्यन्नयनच्छविच्छलात् ॥ ७६ ॥
मुखद्विषीवाम्बुवने वधूजनै-
र्लूनेऽरुणः क्रुद्ध इवाब्जबान्धवः ।
ययौ तटं तोयनिधेस्तदानन-
स्पर्धार्थमुत्साहयितुं सुधाकरम् ॥ ७७ ॥
रुचिप्रियाभिः सह कान्तिकामुके
विलस्य निर्याति नभःसरोवरात् ।
समं समन्तान्निजकामिनीजनै-
र्ज्जैवादुवानोऽपि निरीयुरम्भसः ॥ ७८ ॥

शनैर्विनिर्गच्छति कामिनीजने
बभूव जानुद्वयसं तदा पयः ।
प्रवृद्धिहेतूच्चनितम्बनिर्गमात्
स्वेनापसृत्याजनि तीरगं तदा ॥ ७९ ॥

गतासु कान्तासु तदा तदानन-
प्रभाभवद्भर्त्सननिर्भयैरिव ।
क्रीडाप्रवृद्धोदकनाशिभिर्मुदा
स्फुटीबभूवे सरिदब्जकाननैः ॥ ८० ॥

नितम्बिनीनां वदनेन्दुसंपदा
पश्चात्कृतैर्विस्तृतकेशकैतवात् ।
गलत्पयोबिन्दुकदम्बकच्छला-
च्छिन्नैरिवान्तर्व्यथितैररुध्यत ॥ ८१ ॥

आप्रेक्ष्यमानेऽपि धवैर्वधूतनो-
र्विच्छोटिते क्लेदिनि चीवरे हठात् ।
अस्यां दृढाश्लेषणमन्यवाससा
तेने सुतारुण्यदशाभृतां क्व भीः ॥ ८२ ॥

मौलौ पाटलपुष्पदामघटना सीमन्तसीमान्तरे
सिन्दूरप्रसरो ललाटफलके माञ्जिष्ठरत्नाङ्कुरः ।
गण्डे कुङ्कुमपत्त्रवल्लिरधरे लाक्षारसस्थापना
कर्णे पङ्कजकर्णिकेति सुदृशां संध्यार्कभासोऽभवन् ॥ ८३ ॥

संध्याशोणतरे रविच्छविभरे मूर्तानुरागार्णवे
मग्ना दम्पतयो निशागमसमुत्कण्ठां च रन्तुं व्यधुः ।
सद्यःस्नातनिशाकरान्वयमहावीरद्वयीदीधिति-
व्यालोकेन तदात्वजाततिमिरभ्रान्त्या च भेजुर्मुदम् ॥ ८४ ॥

इति श्रीजिनदत्तसूरिशिष्यश्रीमदमरचन्द्रविरचिते श्रीबालभारतनाम्नि महाकाव्ये वीराङ्के आदिपर्वणि पुष्पावचयाम्बुकेलिवर्णनो नामाष्टमः सर्गः ॥ ८ ॥ :: ॥ :: ॥

## ॥ अथ बालभारतस्य ॥

### ॥ नवमः सर्गः ॥

कृष्णमानमत तं महामुनिं
यत्पदद्वयनखांशुभासुरः ।
मुक्तिभुक्तिरमणीशिरोमणी-
भावमावहति को न कोविदः ॥ १ ॥

भानुमत्यपरसानुमच्छिरः-
संमुखेऽथ खलु मार्गखेदिनि ।
सौधमौलिशिखराग्रशेखरो
रुक्मिणीरमणमाह फाल्गुनः ॥ २ ॥

आवहन्निव दिवाकरस्त्वया
द्वेषमेष हरिनामसाम्यतः ।
त्वां निरूप्य गुरुसौधशेखरं
पश्चिमाचलशिरोऽधिरोहति ॥ ३ ॥

एष दुर्नियतिदण्डचण्डिम-
प्रेरितो बत रविर्गतच्छविः ।
स्थास्यति स्वयमतः पतन् किय-
त्कालमम्बरविलम्बिभिः करैः ॥ ४ ॥

हन्त संतमसमण्डलीसुहृ-
त्पांशुलाकटुकटाक्षयष्टिभिः ।
प्रेर्यमाण इव पश्चिमाचले
निष्पपात तुहिनेतरद्युतिः ॥ ५ ॥

दीधितिर्दिनकरे तु नायके
सापराध इव तापमाप या ।
अत्र गच्छति पराङ्मुखेऽधुना
विद्यते खलु निराशयानया ॥ ६ ॥

क्वापि तापिदिवसार्धविह्वलो
बह्वलीयत सदागतिर्ध्रुवम् ।
साम्प्रतं दिनविरामवामने
भानुधामनि शनैर्लसत्यसौ ॥ ७ ॥

पश्चिमां भजति वल्लभे निजे
रागभाजि शिशिरे दिनेश्वरे ।
ईर्ष्ययेव पतनार्थमुन्नता-
न्युन्नतान्यधिरुरोह दीधितिः ॥ ८ ॥

मीलदब्जमुखमध्यसूक्ष्मक-
द्वारनिर्यदलिदम्भतोऽब्जिनी ।
मुञ्चतेऽर्कविपदेव दुःखिता
पश्य निःश्वसितधूमधोरणीम् ॥ ९ ॥

जागृहीति पुरतः षडङ्घ्रिणा
व्याहृतेव निनदैः कुमुद्वती ।

किंचिदुन्मिषितकैरवेक्षणा
हुं करोति मृदु तत्प्रतिस्वनैः ॥ १० ॥

आगतागतवियोगदुःखितौ
क्लृप्तगाढपरिरम्भविभ्रमौ ।
मुञ्चतोऽश्रु चितपक्ष्मपक्षिणा-
वक्षिदीनवदनौ दिनाधिपे ॥ ११ ॥

मण्डलीचलितपक्षिमण्डली-
कैतवेन तरवो वितन्वते ।
यामिनीसमयशीलभीतितो
मौलिबन्धमिव पश्य मौलिषु ॥ १२ ॥

एष्यदुद्धुरतमश्चमूपुर-
श्चारिवीरनिकरानुकारिभिः ।
गोरजोभिरभितोऽभिषङ्गिभिः
शेष एष दिवसोऽवसीदति ॥ १३ ॥

दूरतः स्वयमुपेयुषो रवेः
पूजितस्य सबलैः सुरासुरैः ।
रत्नपीठमिव सज्जयत्ययं
बिम्बबिम्बनमिषेण वारिधिः ॥ १४ ॥

वासरास्यकमलस्य भास्वरं
भास्करस्य लवमात्रकं वपुः ।
ओष्ठबिम्बमिव चुम्बनोत्सवा-
दापपेऽपरदिशानुरक्तया ॥ १५ ॥

क्वापि गन्तुमनसा दिनश्रिया
यामिनीसमयकेलिलोलया ।
भानुरब्धितरणाय सज्ज्यते
न्यङ्मुखो घट इवार्धलक्षितः ॥ १६ ॥

अस्तभूमिभृति भाति वारुणी-
दिग्वधूस्तनसमे समुन्नते ।
रागिणोऽरुणवपुर्लवो रवेः
रागचिह्नखलक्ष्मसंनिभः ॥ १७ ॥

अस्तभूमिधरमस्तकज्वल-
द्भास्करोपलकृशानुभानुभिः ।
एष तप्त इव स्फटलद्युतिः
स्नप्तसप्तिरपतत् पयोनिधौ ॥ १८ ॥

यद्विदे त्रिभुवनं भ्रमाम्यहं
लब्धमेतदधुना क्व यास्यति ।
इत्यसौ खलु रुषारुणो रवि-
स्तोयधौ तिमिरशङ्कयापतत् ॥ १९ ॥

सुप्तनीरशयनाभिनीरज-
क्रोडपीडितविरञ्चिपञ्चितैः ।
अम्बुधौ कमलबान्धवोऽधुना-
कृष्टिमन्त्रजपनैरिवापतत् ॥ २० ॥

द्रागवितीर्य ककुभां मुखे मखी-
कूर्चकं निचिततद्रुचिस्पृशाम् ।
अन्वगामि दयितो दिनश्रिया
सांध्यरागशिखिसेवया रविः ॥ २१ ॥

अत्र सांध्यसमये समागते
यज्जनो भजति नम्रतां कृती ।
चित्रमत्र किमु नीलिताः करा
यज्जलैरपि सरोरुहच्छलात् ॥ २२ ॥

वासरान्तशिशिरत्वचारुणा
मारुतेन गमितेव निर्वृतिम् ।
भानुतापभवखेदभेदिना
मीलदब्जनयना बभूव भूः ॥ २३ ॥

विष्टपत्रयकिरीटतां गते
भास्करे जलधिमध्यपातिनि ।
दिक्षु भूरितुमुलासु पक्षिभि-
र्मङ्क्षु तारकगणोऽयमुद्ययौ ॥ २४ ॥

द्यौरुदारपरिरम्भविभ्रमा-
दस्य सांध्यसमयस्य रागिणः ।
स्वेदबिन्दुभिरिवोडुभिर्वृता
गाहतेऽल्पतमसा विवर्णताम् ॥ २५ ॥

सद्गुरूहघटया तमस्ततौ
पङ्कमग्नमिव मन्यमानया ।
पल्वलाद्बहिरुपेतयाप्यहो
मन्दमन्दमनयाभिसृप्यते ॥ २६ ॥

सुप्तनीररुहगुप्तषट्पदी-
वृन्दमन्द्रकृतगीतिरीतिषु ।

आविशन्ति करिणीसखाः सुखं
पश्य वारिशयनेषु वारणाः ॥ २७ ॥
वितमाग्रमिव पद्मिनीपते-
स्तापमस्य परदेशगामिनः ।
सौहृदाद्धृदयपञ्जरे परि-
क्षिप्य रक्षति रथाङ्गसंचयः ॥ २८ ॥
सूक्ष्मकादपि दिनान्धलोचना-
दल्पमप्यजनि यद्बहिस्तमः ।
वर्धते तदिह पश्य पांशुला-
चक्रवालसुकृतैरिव क्रमात् ॥ २९ ॥
तत्क्षणोदितविलीनयानया
संध्यया क्षणिकतामिव स्मरन् ।
बोधितः सृजति कैरवाकरो
बद्धषट्चरणवन्दिमोक्षणम् ॥ ३० ॥
अक्षिपातिनि विरोचने जग-
ल्लोचने निचितदुःखदुःखितः ।
न्यङ्मुखः सृजति पाणिघर्षणं
दीपवर्तिजननच्छलाज्जनः ॥ ३१ ॥
दीपवर्तिकृतिमेलितं स्त्रिया
भाति पाणियुगमुद्यताङ्गुलि ।
विश्वविश्वजयिनश्चलाचलं
सारचक्रमिव मारचक्रिणः ॥ ३२ ॥
अन्धकारसुभटस्य भास्करं
दुर्जयं जितवतः समन्ततः ।
पुष्पवृष्टिरिव निर्ममे सुरै-
र्मूर्ध्नि तारककदम्बकैतवात् ॥ ३३ ॥
एकतोऽपि भुवि भूरिशोऽभवन्
दीपकादहह पश्य दीपकाः ।
अन्धकारनिधनाय भानुम-
न्मुक्तदिव्यविशिखादिवेषवः ॥ ३४ ॥
दैवमुक्तमिह तामसं मह-
च्छस्त्रमाहतमहो महोमयैः ।
अस्त्रवत् पुरुषकारवारिते-
र्दीपकैरहह विग्रहस्तयोः ॥ ३५ ॥

सुप्रलोचनगतीनि सान्द्रतां
यत् तमांसि दधिरेतमां दिवि ।
दीपकैः सपदि तद्ध्रुवं भुवः
प्रेरितानि ययुरत्र पिण्डताम् ॥ ३६ ॥
किं प्रदीपचयकज्जलोर्मिभिः
किं निमीलिनलिनोत्थितालिभिः ।
किं नु घूककुलदृक्कनीनिका-
कान्तिभिर्नभसि तुन्दिलं तमः ॥ ३७ ॥
अन्धकारनिकरेण सर्पता
शान्तसांध्यरुचिवह्निभस्मना ।
तारकामुकुरमार्जनामियं
संतनोति नियतं निशीथिनी ॥ ३८ ॥
तापमर्कमणिरौदमत्यज-
ज्जाड्यमुद्गतमहो महौषधी ।
अङ्कोचममुचत् कुमुद्वती
तत् तमः किमु न सर्वरोगभित् ॥ ३९ ॥
एकतानसुरतत्वचिन्तया
सिद्धतां ध्रुवमवाप्य पांशुलाः ।
अस्फुटा जगति दैवनिर्मिता-
दन्धकारपटतोऽधुनाचलन् ॥ ४० ॥
अन्धकारमयगोमयच्छटा-
डम्बरे रजनिरम्बराजिरे ।
सोमकामुकसमागमोत्सुका
तारकाकुसुमभारमाकिरत् ॥ ४१ ॥
व्योमरङ्गभुवि तारकासभा-
भाजि किंचिदुदिताच कौमुदी ।
अन्धकारवधनाटकोदय-
द्राजपात्रपुरतः पटीनिभा ॥ ४२ ॥
शैलगुप्ततनुरेव चन्द्रमाः
प्राग्दिशं मलयजैरिवांशुभिः ।
कौतुकेन परिताडयत्यसा-
वम्बरोच्छलदुडुच्छलच्छटाम् ॥ ४३ ॥
चापयष्टिरिव मान्मथी पुरः
सेयमभ्युदयते विधोः कला ।

तत्प्रसूनविशिखैरिवोडुभि-
र्भानुमद्विरहिता दिशोऽङ्किताः ॥ ४४ ॥
चान्द्रमर्धमुरुचिह्नमोषधी-
दीप्रदीपभृति पूर्वपर्वते ।
शातकुम्भमयकुम्भकर्परं
सज्जकज्जलमिवेन्व्यते दिवः ॥ ४५ ॥
अस्फुटैकलवमैन्दवं वपुः
कस्य न स्मरमदं करोत्यदः ।
सेवितामरपतेर्व्रणचपा-
गोपिताधरमिवाननं दिशः ॥ ४६ ॥
अस्य पश्य सकला कलानिधे-
र्मूर्तिरम्बरविलम्बिनी बभौ ।
लाञ्छनच्छललसन्निशाप्रति-
च्छन्दसुन्दरितदर्पणाकृतिः ४७ ॥
सज्जितं त्रिजगतीजयेच्छया
लाञ्छनच्छलविलोकितान्तरम् ।
मण्डलीकृतमनङ्गधन्विनो
धन्व नन्वयमुदन्वदन्वयः ॥ ४८ ॥
दीधितिस्तुहिनदीधितेरसौ
भाति जर्जरतमिस्रमिश्रिता ।
कल्पितो नु दिनशिल्पिने ककु-
ब्वयौवतेन सतिलो जलाञ्जलिः ॥ ४९ ॥
प्राघुणस्य समुपेयुषः कर-
क्रीडया कुमुदिनीहृदीशितुः ।
निर्ममे तिमिरसर्पमारणं
हा स्वभावमलिनो मरुत्पथः ॥ ५० ॥
श्याममन्तरलसज्जगत्त्रयं
स्फीतशीतरुचिमण्डलं नभः ।
आससाद मुरवैरिणोऽशुम-
न्नेत्रपूजितहरस्य तुल्यताम् ॥ ५१ ॥
सर्वदिग्जुषि तमश्चये रुषा
ताम्रमाननमिवादधौ विधुम् ।
निर्गतेऽत्र चकिते तमस्विनी
पाण्डुरं विरहलीलयावहत् ॥ ५२ ॥

लक्ष्मलक्ष्यहरितालकाङ्कुरा-
दालवालवलयादिवेन्दुतः ।
उद्यता मदनकीर्तिवल्लिवत्
कौमुदीयमुडुपूरपुष्पिता ॥ ५३ ॥
ओषधीमिषसमुज्ज्वलन्महा-
शोकवह्नय इवान्तरद्रयः ।
आगते शशिनि मित्रदुःखत-
श्चन्द्रकान्तसलिलै रुदन्त्यमी ॥ ५४ ॥
सौधमौलिमहिलाचिकैरव-
स्तोमक्लृप्तरुचिदण्डपद्यया ।
पश्य कैरवसुहृन्नभःशिखां
मन्दमन्दमयमेति चन्द्रमाः ॥ ५५ ॥
क्षीरनीरनिधिनीरदः शशी
तस्य तारककदम्बबुद्बुदम् ।
भूरिवृष्टिभरचुम्बिताम्बरं
कौमुदीमयमहो पतत् पयः ॥ ५६ ॥
रक्ष रक्ष वशवल्लभे भवद्-
वल्लभस्तुदति कैरवाचि माम् ।
ध्वान्तमित्यलिकुलच्छलादलं
क्रन्दतीव परितः कुमुद्वतीम् ॥ ५७ ॥
पीततामसमधुः सुधारुचे-
रेष मत्त इव कान्तिसंचयः ।
उत्पतन् नभसि भूतले पत-
न्नाशु हासयति दिग्विलासिनीः ॥ ५८ ॥
ओषधीपतिरयं तमोमयं
लोहपिण्डमिव पिष्टपत्रयम् ।
किंचिदौषधमिवाङ्कमावहत्
किं न रौप्यमयमेव निर्ममे ॥ ५९ ॥
शीतरश्मितमसोरिदं यशो-
र्दुर्यशोभिरभितोऽपि भूतलम् ।
कौमुदीचयपदार्थकायक-
च्छायमण्डलमिषैर्विचित्रितम् ॥ ६० ॥
कल्पितो गगनचर्मणि स्वयं
प्रेषयन्त्वदद्यं मनोभुवा ।

किं दलीकृतवियोगिलोकहृत्
कीकशाभतटतारकः शशी ॥ ६१ ॥
उच्छलन्ति वियदर्णवे नवा-
श्चन्द्रिकामयचलज्जलोर्मयः ।
इत्यवैमि मकरो विशङ्कलं
खेलतीह मकरध्वजध्वजः ॥ ६२ ॥
नागलोकतिमिरच्छिदोत्सुकै-
र्द्रागहंप्रथमिकाविकाशिभिः ।
आविशद्भिरिव सोमरश्मिभिः
चोभितः पतिरपामपि चणात् ॥ ६३ ॥
प्रेमसीधुरसनोपदंशकं
यच्छतो बत चकोरदम्पती ।
सोमकोमलकराङ्कुरं मिथ-
श्चारुचञ्चुपुटकोटिमोटितम् ॥ ६४ ॥
चन्द्रिकाभिस्तृतकामिनीतनु-
च्छायमण्डलकमेव सेवकम् ।
दृश्यतेऽस्ततिमिरावरोधन-
स्त्रीकुलं भुवि शुचेव निर्लुठत् ॥ ६५ ॥
किं न सैष समयः सुधामय-
श्छाययापि बत यत्र पुष्पितम् ।
भूरुहां चलदलान्तरस्फुर-
च्चन्द्रिकानिचितचन्द्रकच्छलात् ॥ ६६ ॥
चन्द्रचक्रधृतिदुर्धरोऽधुना
चित्तभूरधित चक्रवर्तिताम् ।
तेन दूरितमदं तदाज्ञया
वर्तते जगदशेषमप्यदः ॥ ६७ ॥
कामुकागमसमुत्सुका मुहुः
कामबाणगणशाणतां गतैः ।
सुभ्रुवस्तनुमयूखभूषणै-
र्भूषयन्त्यहह भूषणान्यपि ॥ ६८ ॥
पुष्पशेखरविशेषसौरभ-
भ्रान्तषट्पदपदेन सुभ्रुवाम् ।
उच्छलन्ति खलु भचणाङ्गुली-
मार्जितोरुकबरीमरीचयः ॥ ६९ ॥

सुभ्रुवो विशदचित्रकादिकं
यद्यदेव विदधुः प्रसाधनम् ।
तत् तदाननतुषारदीधिते-
श्चिह्नतामगमदिद्धदीधितेः ॥ ७० ॥
सुभ्रुवां रतिरतीशयोः कृता-
वासयोरिव विलोचनद्वये ।
क्वापि कज्जललिपिर्जगज्जितो-
श्चापयुग्मरुचिरा व्यराजत ॥ ७१ ॥
दृक्प्रभाकुसुमिताः कपोलयो-
र्यल्लसन्ति नवपत्रवल्लयः ।
तन्मधुर्मधुसखस्य योगतोऽ-
लंचकार नियतं नितम्बिनीः ॥ ७२ ॥
पारिपार्श्वकयुगायितस्फुर-
न्मौक्तिकस्तबकितोरुकुण्डलः ।
कामकेलिरसनाटिकानटः
कामिनीवदनचन्द्रमा बभौ ॥ ७३ ॥
तन्मधूर्मिरसनं सुधारसे
तच्च चन्द्रमसि चन्दनार्चनम् ।
यावकद्रवनवप्रसाधनं
योषितो यदधरे वितेनिरे ॥ ७४ ॥
पाञ्चजन्यविजयेऽपि योषितां
तारहारविमलाचमालया ।
कण्ठिकातरलकण्ठुलारवे-
ग्रीवया क इव जप्यते जपः ॥ ७५ ॥
कामयौवनवनेभखेलन-
स्तम्बयोर्मृगदृशामुरोजयोः ।
एणनाभिमयपत्रवल्लयो
रेजिरे मदजलावलेपवत् ॥ ७६ ॥
शक्रकार्मुकसहस्रमावह-
न्नङ्गदद्युतिभरैर्यदङ्गनाः ।
तत्सहस्रमितवेध्यवेधने
चित्तभूर्ध्रुवमभूत् सहस्रदृक् ॥ ७७ ॥
जित्वरं युवतिपाणितां गतं
तोयवासतपसेव तोयजम् ।

शौक्तिकेयवलयावलिच्छलात्
सेव्यते शशिकलाभिरप्यदः ॥ ७८ ॥
अङ्गुलीषु नवरत्नमुद्रिका-
भूषणानि पुनरुक्तभूषणम् ।
भूषिता मुकुरजप्रभाङ्कुरै-
श्चक्रिरे रसवशान्मृगीदृशः ॥ ७९ ॥
धार्यतामिह दृढं त्वया त्वया
बध्यतामिति कृतारवैर्मिथः ।
मेखला खलु नितम्बमण्डले
बध्यते मृगदृशः सखीजनैः ॥ ८० ॥
स्मेरमश्रुरसमानहंसकं
पादपङ्कजयुगं मृगीदृशाम् ।
यत् तदाननमहोमहोर्मिभि-
र्निर्मदः कमलमर्दनोऽजनि ॥ ८१ ॥
योषितां रमणरागजागरैः
सांध्यरागरुचयो विनिर्जिताः ।
अञ्जसौहृदरिपूनपि क्रमात्
तत्क्षणं जतुमिषात् सिषेविरे ॥ ८२ ॥
कौमुदीविशदयोः सदच्छता-
दृश्यमानविशदाङ्गशोभयोः ।
चारुचन्दनविलेपचीरयो-
र्लभ्यतेऽपि न भिदा नतभ्रुवा ॥ ८३ ॥
इत्यवाप्तनवभूषणाः क्षणं
वीक्ष्य रत्नमुकुरेऽङ्गमङ्गनाः ।
भासमानरसभावभङ्ग्यो
जज्ञिरे दयितदर्शनोत्सुकाः ॥ ८४ ॥
तद्रसप्रसरसारसारणी[1]-
भूतभूतलसुरेश केशव ।
आवयोरपि वयो नवं प्रिया-
दर्शने सफलतां विगाहताम् ॥ ८५ ॥
इत्यनङ्गलसदङ्गनारस-
स्मेरमानसविलासयोस्तयोः ।

केषु मानमथनेच्छया मिथोऽ-
दीपि दम्पतिषु नेक्षणस्पृहा ॥ ८६ ॥
मन्मथस्य किमु सूक्ष्मवेधितां
वच्मि यन्मृगदृशामुरः शरैः ।
अप्रसृत्वरमृणालतन्तुना-
प्याजघान कुचमध्यवर्त्मना ॥ ८७ ॥
प्रस्तुतागतहृदीशसंकथा-
स्वेदवारिभरनिर्भरा बभुः ।
धौतमूर्तय इव स्त्रियोऽङ्गभू-
बाणपुष्पमकरन्दबिन्दुभिः ॥ ८८ ॥
पञ्चबाण इति मन्मथं जगु-
र्धिग्जना यदयमङ्गनाजने ।
एकमेकमिह रोमकूपक-
श्रेणिकासु विशिखं निखातवान् ॥ ८९ ॥
ईशमानय यथा तथापि तं
प्रेरयच्च वचसेति दूतिकाम् ।
आगतं सुकृतिनी कुतोऽप्यमुं
काप्यलोकत च पादपातिनम् ॥ ९० ॥
उत्सुकापि हृदि वामलोचना
काचन स्फुरितवामलोचना ।
निश्चितप्रियसमागमा सखीं
न न्ययुङ्क्त किल मानमुद्रया ॥ ९१ ॥
ध्यातवल्लभसमागमा गृह-
द्वारनिश्चलविलोचनद्वया ।
शून्यहुंकृतिमुखी सखीकथा-
वाचि काचिदुदकण्ठताधिकम् ॥ ९२ ॥
तन्वती प्रियतमे गतागतं
तद्गुणग्रहणमञ्जुना मुहुः ।
दूततामिव गतेन मानिनी
मानमात्ममनसैव मोचिता ॥ ९३ ॥
द्वारि काचन नियुक्तया दृशा
वीक्ष्य पक्षमपि तोरणे बलत् ।
वल्लभोऽयमिति जातसंमदा
नैकवारमुदतिष्ठदासनात् ॥ ९४ ॥

१ स्वल्पनद्यां तु सारणी इति मेदिनी ।

प्रेषिता प्रियजनेन दूतिका
यद्युलोकि पुरतोऽनुनायिका ।
अन्वतापि निजदूतिकाद्रुत-
प्रेरणेन मिथुनेन तन्मिथः ॥ ६५ ॥

द्वारसीमनि ददर्श च प्रियं
काचिदप्यघकृतं नुनाव च ।
प्राङ्नियोजिततदात्वसंचल-
दूतिकागतिविलम्बकारकम् ॥ ६६ ॥

दूतिकां चतुरचाटुशिक्षया
योषितः स्वयमसज्जयन्त च ।
आययुश्च हृदयेश्वराः स्वयं
प्रेम्णि साम्यमसमञ्जयत्यदः ॥ ६७ ॥

वल्लभेऽभ्ययति तिर्यगानना
मानमानयत काचिदस्वताम् ।
तन्मुखेन्दुगतकोणया दृशा
प्रेम हृद्गतमपि न्यवेदयत् ॥ ६८ ॥

द्वारमेतवति वल्लभेऽदिशत्
कापि मानपरतां पराङ्मुखी ।
तद्विलोकनमनाश्च लोचनं
लोचनेऽसृजदपृष्ठदर्शिनि ॥ ६९ ॥

काचिदेत्य परिरम्भिणि प्रिये
मानिनी प्रसृतपाणिनीरजा ।
कोपनेव लसदंशुकम्पना
स्पष्टतां न खलु मानमानयत् ॥ १०० ॥

कापि चाटु परिरम्भणैः प्रियं
छेकमेकनिपुणापि नापृणोत् ।
कोपगोपनकलासु कृत्रिमं
भावमक्षणि विधातुमक्षमा ॥ १ ॥

संमुखोत्थितिकृतो नतभ्रुवः
शुभ्रभासि मनसि स्मरः स्फुरन् ।
अग्रमागतवतो हृदीशितु-
र्देहबिम्बितमिव व्यराजत ॥ २ ॥

तथा स्वयं प्राणसमे समागते
पुरः परस्याः प्रससार लोचनम् ।
कुशेशयं कर्णावतंसितं यथा
स्मितं तदेकावयवच्छविं दधौ ॥ ३ ॥

प्रिये समायाति समुत्सुकायाः
कस्याश्चिदभ्युत्थितिभासुरायाः ।
मुदेव सांशाविणमङ्गकानि
विभूषणानां क्वणितेन तेनुः ॥ ४ ॥

आगसां निधिरधिष्ठितमानं
कान्तयावगणितो बलमानः ।
यासि तां पुनरिति द्रुतमेकः
कृष्टमूर्धजमपात्यत तल्पे ॥ ५ ॥

नयनं प्लुतमम्बुवारिभि-
र्बत सादेन शरीरसंभ्रमः ।
रसदर्शनसंमुखोत्थिती-
र्मनसैव व्यदधन् प्रिये स्त्रियः ॥ ६ ॥

एकासनेषु विविशुः सुदृशः प्रियैस्ताः
पर्यस्तमानमुपमानवियोगरम्याः ।
एतानि वीक्ष्य मिथुनानि रतिप्रदत्त-
नेत्रोऽजनि स्मरविकारपरः स्मरोऽपि ॥ ७ ॥

वञ्चच्चन्द्ररुचिप्रपञ्चविगलन्मानान्धकारश्रियः
साटोपस्मरमार्गमार्गणगणास्तचपासंपदः ।
एवं दम्पतयस्तदा रतरसप्रारम्भसंरम्भित-
प्रागल्भ्याय मदाय मद्यरसनस्वेच्छाभिरुत्सङ्गिताः ॥ ८ ॥

इति श्रीजिनदत्तसूरिशिष्यश्रीमदमरचन्द्रविरचिते श्रीबालभारतनाम्नि महाकाव्ये वीराङ्के आदिपर्वणि चन्द्रोदयवर्णनो नाम नवमः सर्गः ॥ ९ ॥ :: ॥ :: ॥

# THE APHORISMS
OF THE
# YOGA PHILOSOPHY,
OF
## PATAÑJALI.

(*Continued from p.* 203.)

*a.* He (now) states another Siddhi.*

Expedient for the knowledge of minute, concealed and distant objects.

प्रवृत्त्यालोकन्यासात्सूक्ष्मव्यवहितविप्रकृष्टज्ञानम् ॥ २६ ॥

Aph. 26. A knowledge of the minute, concealed and distant (objects of sense arises in an asetic) by his throwing the light of immediate cognition—Pravṛitti (on them.)

*b.* Pravṛitti, the immediate cognition which is sensuous and luminous, as it is stated before (see Aphs. 35, 36, book 1, P. 42 & 43):—by placing the spreading light of the pure element—Sattva which exists in immediate cognition, i. e. by brooding on the objects of sense modified in the spreading light of the pure element of immediate cognition, the organs of sense and the mind (of an ascetic) acquire a particular power (and then), a knowledge arises (in him) of minute objects, atoms &c., concealed objects, wealth hidden in a certain place &c. and distant objects, the life-prolonging medicine or elixir—Rasáyana, &c.

*a.* He (now) states another Siddhi.*

भुवनज्ञानं सूर्यसंयमात् ॥ २७ ॥

Aph. 27.—A knowledge of (seven) worlds (arises in an ascetic) by his performing restraint in regard to the (luminous body) the sun.

*b.* He, who performs restraint with regard to the luminous sun knows exactly about the cities consisting of the seven worlds which are Bhúr-loka; the earth, Bhuvar-loka, the space between the earth and the sun; swar-loka, the heaven of Indra and others.

In the preceding aphorism, the light of pure element (is to be understood) as stated as a support (for fixation of the mind and in this the elemental light. This is the difference only.†

* सिद्ध्यान्तरमाह ।

† प्रवृत्ति र्विषयवती ज्योतिष्मती च प्रागुक्ता तस्यां योसावालोकः सात्विकप्रकाशप्रसरस्तस्य निखिलेषु न्यासात्तद्वासितानां विषयाणां भावनात्सान्तःकरणेषु प्रकृष्टशक्तिमा चेषु सूक्ष्मस्य परमाणवादेर्व्यवहितस्य भूम्यन्तर्गतस्य निधानादेर्विप्रकृष्टस्य मेर्वपरपार्श्ववर्तिनोरसायनदेर्ज्ञानमुत्पद्यते ।

* सिद्ध्यान्तरमाह ।

† सूर्ये प्रकाशमये यः संयमं करोमि तस्य सप्तसु भूर्भुवःस्वःप्रभृतिषु लोकेषु यानि भुवनानि तत्सन्निवेशभाञ्जि पुराणि तेषु यथावदस्य ज्ञानमुत्पद्यते । पूर्वस्मिन् सूत्रे सात्विकः प्रकाश आलम्बनतयोक्त इह तु भौतिक इति विशेषः ।

*a.* He states another Siddhi through the very support of the elemental light.*

An expedient. चन्द्रे ताराव्यूहज्ञानम् ॥ २८ ॥

Aph. 28. A knowledge of forms of the asterisms (arises in an ascetic) when he performs restraint with regard to the Moon.

*b.* "Forms of the asterisms" i. e. the particular figures of the fixed stars:—a knowledge arises (in an ascetic) about these (when) he performs restraint with regard to the Moon. As the lustre of the the asterisms is destroyed by the light of the sun and consequently a knowledge cannot be obtained about them, this expedient is therfore separately stated.

*a.* He states another Siddhi.*

ध्रुवे तद्गतिज्ञानम् ॥ २९ ॥

Aph. 29. A knowledge of the motion of the stars (arises in an ascetic by his performing restraint) with regard to the polar star (Dhruva).

*b.* An ascetic when he performs his restraint with regard to the fixed polar star, the principal of all constellations, knows the fixed time and fixed amount of the motion of every star. (The true) meaning of the Aphorism is this that the ascetic knows all this that such and such a (heavenly body) is a star and such and such a heavenly body is a planet. This star will reach such and such a sign of the Zodiac by such and such a fixed time. This (sort of) knowledge of time is the result of the restraint (performed with regard to the polar star. G. D. Ś.

# THE
# VAIŚESHIKA APHORISMS
OF
## KAṆÁDA.

### SECOND BOOK, SECOND DAILY LESSON.

(*Continued from page* 160.)

प्रथमाशब्दात् ॥ ३४ ॥

Aph. 34. From the word 'first' [it follows that sound is eternal.]

* भौतिकप्रकाशद्वारेणैव सिद्ध्यान्तरमाह ।

† ताराणां ज्योतिषां यो व्यूहो विशिष्टः सन्निवेशस्तस्मिन् चन्द्रे कृतसंयमस्य ज्ञानमुत्पद्यते । सूर्यप्रकाशेन हततेजस्कत्वात् ताराणां सूर्यसंयमात्तत्ज्ञानं न शक्नोति भवितुमिति पृथगयमुपायो ऽभिहितः ।

* सिद्ध्यान्तरमाह ।

† ध्रुवे निश्चले ज्योतिषां प्रधाने कृतसंयमस्य तासां ताराणां या गतिः प्रत्येकं नियतकाल नियतदेशा च तस्य ज्ञानमुत्पद्यते । इयं तारेयं ग्रह इयता कालेनामुं राशिमिदं नक्षत्रं यास्यतीति सर्वं जानातीति सूत्रार्थः । इदं कालज्ञानमस्य फलमित्युक्तं भवति ।

[1] The eternity of sound must be admitted, Inasmuch as in the Vedic text, "He thrice recited the first, and thrice the last," it is affirmed that the first and last texts recited at the adding of fuel to the sacred fire were thrice pronounced; for to pronounce them thrice would be impossible, unless sound were eternal. Therefore its eternity is established according to the argument previously employed. V.

**सम्प्रतिपत्तिभावाच्च ॥ ३५ ॥**

Aph. 35. Also from the existence of recognition.

[2] The permanence of sound necessarily follows from the existence of recognition or recollection. Such recognitions as that Maitra is reading the same verse as Chaitra read, or that this is the same letter *ka*, would be impossible unless sound were permanent. V.

Mimánsaka objections answered.

**सन्दिग्धाः सति बहुत्वे ॥ ३६ ॥**

Aph. 36. A plurality existing, [these arguments] are doubtful.

[3] A plurality, diversity, and non-permanency existing in the particular motions of the limbs in dancing and the like, teaching, learning, and recognition are observed to exist in regard to them. Therefore the arguments for establishing the permanence of sound drawn from teaching &c. are doubtful or inconclusive. For otherwise from such observations as "He learns dancing," "He dances thrice," "Maitra is performing the same dance as was performed by Chaitra," permanence would be proved of all these actions. V.

**संख्याभावः सामान्यतः ॥ ३७ ॥**

Aph. 37. The existence [in sound] of number, [results] from generality.

[4] It may be said, "There are fifty letters, texts of eight and text of three syllables, and the anushṭubh metre of eight syllables. How, if letters be not eternal, can they be infinite according to diversity of utterance?" The reply is as follows. "The existence of number i. e. of the numbers fifty and the like, results from universality, from the letters *ka*, *ga*, &c. existing as classes. Though there be an infinity of the letters *ka* &c., the things belonging to the class *ka*, *ga*, &c. exist as fifty or three or eight, just as substance, quality &c. exist as nine or twenty-four in virtue of a division of that which is included in the class." U.

---

## THIRD BOOK, FIRST DAILY LESSON.

**प्रसिद्धा इन्द्रियार्थाः ॥ १ ॥**

Aph. 1. The objects of sense are universally known

[5] Having in the second book completed his investigation of external substances, the author according to the order of enunciation now proceeds to construct the basis for an inquiry respecting the soul. The objects of sense, smells, tastes, colours, feels and sounds are cognisable by the several exterior organs of sense. That object which is apprehended by the organ of hearing is sound. It having been shown that sound is universally known, it is in like manner demonstrated that smell &c. ending with touch [i. e. smell, taste, colour, feel] are universally known. Thus, the object which is apprehended by the olfactory organ is odour; the object which is apprehended by the organ of taste is savour; the object which is apprehended by the eye alone is colour; the object which is apprehended by the organ of touch alone is feel. By the word object there is every where intended a real entity possessed of attributes, and therefore there is [in the above aphorism] no excess of predication which would apply also to the idea of smell and to the non-existence of smell. It is therefore to be understood that the notion of smell is

---

[1] शब्दस्यावश्यं नित्यत्वमुपेयम् त्रिः प्रथमामन्वाह त्रिरुत्तमामन्वाह इति श्रुतौ प्रथमोत्तमयोः सामिधेन्योः त्रिरुच्चारणस्य विहितत्वात् न हि स्थैर्यमन्तरेण त्रिरुच्चारणं सम्भवतीति पूर्वोक्तन्यायेन नित्यतायाः सिद्धेरित्यर्थः ॥

[2] शब्दस्यावश्यं स्थैर्यं सम्प्रतिपत्तेः प्रत्यभिज्ञाया भावात् सत्त्वात् यः श्लोकश्चैत्रेण पठितस्तमेव मैत्रः पठति स एवायं इत्यादि प्रत्यभिज्ञा शब्दस्य स्थिरतामन्तरेणानुपपन्नेति भावः ॥

[3] नृत्यादीनामङ्गक्रियाविशेषाणां बहुत्वे ऽपि नानात्वे ऽपि अस्थैर्ये ऽपीति यावत् सति अध्यापनाभ्यासप्रत्यभिज्ञानां दर्शनात् अध्यापनाद्याः स्थैर्ये साध्ये सन्दिग्धाः अनैकान्तिकाः नृत्यमधीते त्रिर्नृत्यते यदेव नृत्यं चैत्रेण कृतं मैत्रस्तदेव करोतीत्यनुभवस्य सर्वसिद्धत्वादित्यर्थः ॥

[4] ननु पञ्चाशद्वर्णा अष्टाक्षरो मन्त्रः त्र्यक्षरो मन्त्रः अष्टाक्षरो ऽनुष्टुबित्यादिसंख्या कथं वर्णानामनित्यत्वे उच्चारणभेदेनानन्त्यसम्भवादित्यत आह । संख्यायाः पञ्चाशदादिसंख्याया भावः सद्भावः सामान्यतः कत्वगत्वादिजातित इत्यर्थः ककारादीनामानन्त्ये ऽपि कत्वगत्वाद्यवच्छिन्नानपञ्चाशत्त्वं त्रित्वमष्टत्वं वा द्रव्यगुणादीनामान्तर्गणिकभेदेन नवचतुर्विंशतित्वादिवदित्यर्थः ॥

[5] तदेवं द्वितीयाध्याये बहिर्द्रव्यपरीक्षामुपपाद्य उद्देशक्रमादिदानीमात्मपरीक्षायै पीठमारचयितुमाह । इन्द्रियाणामर्था गन्धरूपरसस्पर्शशब्दा बाह्यैकैकेन्द्रियग्राह्याः तत्र श्रोत्रग्रहणो यो ऽर्थः स शब्द इति शब्दप्रसिद्धौ दर्शितायामर्थाद्गन्धादौ स्पर्शपर्यन्ते प्रसिद्धिर्दर्शितेत्यर्थः तथाहि घ्राणग्रहणो यो ऽर्थः स गन्धः रसनग्रहणो यो ऽर्थः स रसः चक्षुर्मात्रग्रहणो यो ऽर्थः तद्रूपम् त्वगिन्द्रियमात्रग्रहणो यो ऽर्थः स स्पर्शः सर्वत्र चार्थशब्देन धर्मीभावभूत उच्यते तेन गन्धत्वादौ गन्धाद्यभावे च नातिव्याप्तिः तदेवं घ्राणग्रहणवृत्तिगुणत्वावान्तरजातिमत्त्वं गन्धत्वं एवं रसादावपि वाच्यं तेन नातीन्द्रियगन्धाद्यनुपग्रहः ॥

that of a class included in the notion of quality and existing as something apprehended by the olfactory organ, and so also with regard to taste, &c. Consequently supersensual odour, &c., are not excluded. U.

[1] The objects of the senses are colour, taste, smell, feel and sound. 'Universally known' means 'objects of conviction given by perception.' That immediate presentation to the mind which has for its objects colour, &c., is allowed by all. V.

इन्द्रियार्थप्रसिद्धिरिन्द्रियार्थेभ्यो ऽर्थान्तरस्य हेतुः ॥ २ ॥

Aph. 2. The universal cognition of the objects of the sense is an argument for [the existence of] another object than the objects of sense.

[2] The application of the doctrine of universal cognition of objects of sense to the inquiry respecting the soul is here explained. By an 'argument' is meant a 'mark of the existence' of another object, which other object is the soul; a mark of the existence of the soul which is an object other than the senses and their objects, than colour, &c., and the substrata of colour, &c., Though it is implied here that knowledge is the mark of the existence of the soul, yet inasmuch as there being a universal cognition of the objects of sense, the immediate presentation to the mind of colour, &c., being more commonly known, the mark or evidence of there being a soul is described as constituted by that universal cognition. This universal cognition must inhere in something, either as an effect as a water-pot, or as an attribute, or as an action. Since it is an action in the same manner as cutting is an action, it must be produced by an instrument. The instrument of universal cognition is sense, and that, being an instrument, must be employed by an agent, as an axe and the like are employed. Now, that in which this universal cognition resides and which employs for its instruments the olfactory and other organs is the soul. U.

सो ऽनपदेशः ॥ ३ ॥

Aph. 3. That is an invalid argument [which affirms that sensible cognition is an attribute either of the body or of the senses.]

[3] In anticipation of the objection:—"Let the body or the organs of sense be that in which cognition resides; for, these being both more manifestly related to cognition than their negations are, why should we imagine any other cognising subject? For consciousness is an attribute of the body being, like its colour, &c., one of its effects; and the same may be said to be the case with regard to the organs of sense as attributes,"—it is stated that this is an invalid argument, i. e. merely the appearance of an argument, inasmuch as it is as uncertain that cognition is the effect of the body or the senses, as that knowledge of an object is generated by the lamp [by the light of which it is seen.] U.

[4] That—the argument to establish the existence of cognition in the body—is an invalid argument—the mere appearance of an argument. For a water-pot, a piece of cloth and the like in virtue of being effects of the body do not reside in the body. It cannot be proved that cognition exists in the body, for this would be a violation of the argument just stated. V.

कारणाज्ञानात् ॥ ४ ॥

Aph. 4. Because there is unconsciousness in the causes.

[5] It is meant [that cognition cannot reside in the body or in the organs of sense] because of the unconsciousness or absence of consciousness in the causes, or constituent parts, of the body, such as the hands, feet, &c. It is observed that the particular qualities of earth and the other substances are determined by the previous qualities of the causes of the substances. In like manner if there existed consciousness in the causes of the body, it might possibly exist also in the body itself. But this is not the case. Should it be urged that consciousness must also exist in the constitutive portions of the body, it may be denied on the ground of the want of unanimity which would ensue, for unanimity is

---

[1] इन्द्रियार्थाः रूपरसगन्धस्पर्शशब्दाः प्रसिद्धाः प्रत्यक्षनिश्चयविषया इत्यर्थः तथापि रूपादिविषयकः साक्षात्कारः सर्वसिद्ध इति भावः ॥

[2] इन्द्रियार्थप्रसिद्धेरात्मपरीक्षायामुपयोगमाह । हेतुर्लिङ्गमर्थान्तरस्य आत्मन इन्द्रियार्थेभ्य इति इन्द्रियेभ्यो ऽर्थेभ्यश्च रूपादिभ्यस्तद्द्रव्येभ्यश्च यदर्थान्तरमात्मा तस्य लिङ्गिमित्यर्थः । यद्यपि ज्ञानमेव लिङ्गमिह विवक्षितं तथापीन्द्रियप्रसिद्धे रूपादिसाक्षात्कारस्य प्रसिद्धतरतया तादृप्येणैव लिङ्गत्वमुक्तं तथाहि प्रसिद्धिः क्वचिदाश्रिता कार्यत्वात् घटवत् गुणत्वाद्वा क्रियात्वाद्वा सा च प्रसिद्धिः करणजन्या क्रियात्वात् छिदिक्रियावत् यच्च प्रसिद्धेः करणं तदिन्द्रियं तच्च कर्तृप्रयोज्यं करणत्वात् वास्योदिवत् तथा यत्रेयं प्रसिद्धिराश्रिता यः घ्राणादीनां करणानां प्रयोक्ता स आत्मा ॥

[3] ननु शरीरमिन्द्रियाणि वा प्रसिद्धेराश्रयो ऽस्तु प्रसिद्धिं प्रति तदुभयान्वयव्यतिरेकयोः स्फुटरत्वात् किं तदन्याश्रयकल्पनया तथाहि चैतन्यं शरीरगुणः तत्कार्यत्वात् तद्रूपादिवत् एवमिन्द्रियगुणत्वे ऽपि वाच्यमित्याशङ्क्याह । अपदेशो हेतुः तदभासो ऽनपदेशः तथा च तत्कार्यत्वं प्रदीपजन्यादावनैकान्तिकत्वादनपदेश इत्यर्थः ॥

[4] सः देहवृत्तित्वसाधको हेतुः अनपदेशः हेत्वाभासः देहकार्यत्वस्य घटपटादौ सत्त्वेन तत्र देहाश्रितत्वाभावात् उक्तहेतोर्व्यभिचाराच्च प्रसिद्धेर्देहवृत्तित्वसिद्धिरित्यर्थः ॥

[5] शरीरकारणानां करचरणादीनां तदवयवानां वा अज्ञानात् ज्ञानशून्यत्वादित्यर्थः पृथिव्यादिविशेषगुणानां हि कारणगुणपूर्वकता दृष्टा तथा च शरीरकारणेषु यदि ज्ञानं स्यात्तदा शरीरे ऽपि सम्भाव्येत न चैवम् नन्वस्तु शरीरकारणेष्वपि चैतन्यमिति चेन्न ऐकमत्याभावप्रसङ्गात् न हि बहूनां चेतनानामैकमत्यं दृष्टम् करावच्छेदेनानुभूतस्य करच्छेदे ऽस्मरणप्रसङ्गात् ततो नान्यदृष्टं स्मरत्यन्य इति किञ्च शरीरनाशे तत्कृतहिंसादिफलानुपभोगप्रसङ्गात् न हि चैत्रेण कृतस्य पापस्य फलं मैत्रो भुङ्क्ते ततश्च कृतहानिरकृताभ्यागमश्च स्यात् ॥

never observed between many sentient beings, [whereas it is observed in the actions of the body.] Moreover were the hand for instance cut off there would be no recollection of that which was experienced at the amputation according to the maxim, "One does not remember that which is experienced by another". Again when the body perished there would as a consequence be no fruition of the results of its actions, such as injuries and the like, for Maitra does not experience the result of the evil done by Chaitra; and actions would accordingly be lost, and there would come to pass events not determined by former acts. U.

कार्य्येषु ज्ञानात् ॥ ५ ॥

Aph. 5. Because there would be consciousness in the effects.

[1] Anticipating the objection that consciousness exists in a minute degree in the causes of the body, and is manifest in the body, and that there is not therefore the absence of a prior existence of the quality in the causes, nor the impossibility of unanimity, it is stated that if consciousness existed in the atoms which are the primary causes of the body, it would exist also in the water-pots and like products of effects which derive their origin from it; and also consciousness would exist in products such as water-pots and the like, because the particular attributes of the earth pervade all terrestrial existence. But consciousness is not observed to exist in these products. U.

अज्ञानाच्च ॥ ६ ॥

Aph. 6. And because it is not known [that any minute degree of consciousness exists in products of matter.]

[2] In anticipation of the objection that consciousness may exist in an inappreciable degree in water-pots and other material products, it is stated that, inasmuch as it is not known by any kind of evidence, there is no consciousness in a water-jar and the like. Otherwise it might have to be admitted that a hare has horns, it being admitted that this is also unwarranted by any form of evidence. For by no kind of evidence is it known that there exists consciousness in a water-jar and the like. U.

[3] 'It is not known', means 'because there is no form of evidence conveying the notion of consciousness as existing in the various products.' The word 'and' implies that such an hypothesis is unnecessary. It is more fitting to conceive some one other substance as the subject of consciousness than to imagine a varied consciousness existing in various portions of matter. V.

अन्यदेव हेतुरित्यनपदेशः ॥ ७ ॥

Aph. 7. "The means of proof is something else [than has been supposed]" :—this is not a valid argument.

[4] It may be urged:—"It has been affirmed that a ruling soul is inferred from the organ of hearing and other instruments. This is not a legitimate inference, for the auditory and other organs are neither identical with, nor produced by the soul, and unless one of these alternatives be admitted there is no proof of any inseparable existence of these organs and the soul; and unless there be such inseparable existence, there can be no valid inference of this kind." To this it is replied that the means of proof can but be something else than that which is to be proved. It cannot be identical with that which has to be proved, for were it so, it would follow that there would be no difference between the means of proof and thing proved. A means of proof constituted by identity with that which is to be proved, is no means of proof,—is invalid as an argument. U.

अर्थान्तरं ह्यर्थान्तरस्याऽनपदेशः ॥ ८ ॥

Aph. 8. One thing cannot be an argument [of the existence] of another thing [with which it is wholly unconnected.]

[5] It might be asked by an objector how quality not produced by that which is to be proved can warrant any inference; for were this the case smoke &c., might prove the existence of an ass &c., as well as that of fire. It is therefore stated that one thing or kind of

---

[1] ननु शरीरकारणेषु सूक्ष्ममात्रया ज्ञानमस्ति शरीरे तु स्फुटमतो नाऽकारणगुणपूर्वकता न चैकमत्यानुपपत्तिरित्याशङ्क्याह । यदि तु शरीरमूलकारणेषु परमाणुषु चैतन्यं स्यात् तदा तदारब्धेषु कार्य्येषु घटादिष्वपि स्यात् किञ्च पार्थिवविशेषगुणानां सर्वपार्थिववृत्तितया व्याप्तेः कार्य्येष्वपि घटादिषु चैतन्यं स्यान्न च तत्र चैतन्यमुपलभ्यते इत्यर्थः ॥

[2] ननु घटादावपि सूक्ष्ममात्रया चैतन्यमस्त्येवेत्याशङ्क्याह । सर्वैः प्रमाणैरज्ञानात् कुम्भादौ न चैतन्यमित्यार्थः सर्वप्रमाणागोचरस्याप्यभ्युपगमे शशविषाणादेरप्यभ्युपगमप्रसङ्गः न हि घटादौ चैतन्यं केनापि प्रमाणेन ज्ञायत इति ॥

[3] अज्ञानात् केनापि प्रमाणेन तत्तत्कार्य्यगतज्ञानस्याऽज्ञानाजननात् तथा च निष्प्रमाणकत्वान्न तत्तत्कार्य्येषु ज्ञानमित्यर्थः चकारो गौरवं समुच्चिनोति तथा च नानावयवेषु नानाचैतन्यकल्पनापेक्षया चैतन्यधारतया एकं द्रव्यान्तरमेव कल्पयितुमुचितमिति भावः ।

[4] ननु श्रोत्रादिभिः करणैरधिष्ठाता अनुमीयते इत्युक्तं तदयुक्तं न हि श्रोत्रादिभिरात्मनस्तादात्म्यं तदुत्पत्तिर्वा न च ताभ्यामन्तरेणाऽविनाभावसिद्धिः न चाविनाभावमन्तरेणाऽनुमितिरित्यत आह । हेतुः साध्यादन्य एव भवति न तु साध्यात्मा साध्याविशेषप्रसङ्गात् तस्मात्तादात्म्यघटितो हेतुरहेतुरनपदेश इत्यर्थः ॥

[5] ननु साध्यादनुत्पन्नस्य गुणत्वस्य कथमनुमापकत्वम् तथा सति धूमादिना वह्नेरिव रासभादेरप्यनुमानापत्तेरित्यत आह । हि हेतौ यतोऽर्थान्तरं वस्त्वन्तरम् अर्थान्तरस्य ननु वस्त्वन्तरस्य अनपदेशः अहेतुः रासभादेर्व्याप्तिशून्यो हि धूमादिः रासभादौ साध्यो हेत्वाभासः वह्न्यादौ तद्व्याप्यत्वस्य तत्र सत्त्वात् प्रकृते तु व्याप्तिसत्त्वान्नागमकत्वमिति भावः ॥

substance cannot be an argument for the existence of another thing or another kind of substance. Thus smoke, &c., if the existence of an ass is to be proved, would be fallaciously adduced as a means of proof, being void of essential connexion with asses, &c. But with reference to fire &c., it would not be so, for in that case there would exist an essential connexion. In the present case there must be an essential connexion, there is not merely an accidental relation. V.

**संयोगिसमवाय्येकार्थसमवायिविरोधि च ॥ ९ ॥**

Aph. 9. The conjunct, the inherent, the co-inherent in one thing, and the contradictory [are means of proof.]

[1] Such method of proof as :—The body has skin because of its corporeality, is that of conjunction. For skin is described as a natural integument of matter capable of growth and decay, and is neither a cause nor an effect of the body, but merely produced together with the body and invariably conjoined with it. In like manner the method of proof from inhesion is such as:—Ether possesses extension, because of it substantiality, like a water-pot, &c. Here extension which has to be proved is established by substantiality a property essential to ether. Or another example would be :—The divisibility of extension must somewhere cease ; therefore the atomic, the lowest degree of extension is proved ; whence it is inferred that atoms exist in which the atomic inheres. The inference from sound of ether, and from knowledge &c. of soul, is not given as an inference of cause from effect. U.

[2] 'The conjunct' means the means of proof connected with conjunction. 'Is a means of the proof' is to be supplied after each term of the aphorism. That which is connected by conjunction, i. e. the mark of the existence of that which is dependant on conjunction, is included in the conjunction. Otherwise how could there be such inferences as that in a particular place there are charioteers because there are chariots excellently driven there? Here the relation determining the conclusion is the connection of things conjunct with each other. In like manner the inherent is a mark of the existence of that in which it inheres. Else how in the case of seeing a mere portion of an animal &c. could it be inferred according to the particular portion that the whole is an animal &c. ? Nor can it be argued that there being in the case of conjunction of the sight with that portion a conjunction with the whole object, it is difficult to prove that such an inference as this is not a mere perception ; for is possible only where there is a desire to infer. Since, therefore, a chariot and the like are not effects or products of a charioteer, &c., and are different from the charioter, &c., but included in [i. e. having their existence implied by that of ] the charioteer &c., the being included [in an object, i. e. the being inferrible from it,] is not exclusively due to identity with or production by that object.] V.

**कार्यं कार्यान्तरस्य ॥ १० ॥**

Aph. 10. One effect is [a mark of the existence] of another effect.

[3] An effect, colour for instance, is a mark of the existence of another effect, such as feel. It is implied also that that which is not an effect, the unity of ether, is a mark of the existence of the individual unity of ether [which is not an effect], and so in the case of infinite magnitude. U.

[4] An effect or product of the earth, such as smell, is a mark of the existence—for these words are to be supplied—of another effect, such as taste. Co-inhesion in one object is the having a common substratum consisting of co-inhesion. In like manner invariable taste, &c. should be regarded as a mark of the existence of invariable colour, &c. Since, therefore, there is in smell &c., an inclusion [i. e. an implication of the existence] of taste, &c. which is not a mere variety of smell, and which is not generated or produced by smell, it is proved that [the being included in, or inferrible from an object] is not exclusively due to the two [ principles of identity with and generation by that object.] V. A. E. G.

---

## VARUNA

(CONSIDERED BY PHILOLOGISTS TO BE INDENTIFIABLE WITH THE GREEK URANOS).

*According to the Rig and Atharva Vedas.*

Lo! reared of old by hands divine,
  High towers in heaven a palace fair:
  Its roof a thousand columns bear ;
A thousand portals round it shine.

---

[1] शरीरं त्वग्वत् शरीरत्वादित्ययं हेतुः संयोगो वृद्धिक्षयवद्द्रव्यसहजावरणं हि त्वगित्युच्यते तच्च न शरीरस्य कार्यं कारणं वा किन्तु सहोत्पत्तिकमात्रं नियतसंयोगवत् । एवं समवायि यथाकाशं परिमाणवद्द्रव्यत्वात् घटादिवदिति अत्र परिमाणं साध्यं द्रव्यत्वेनाकाशसमवायिना धर्मेण साध्यते यद्वा परिमाणतारतम्यं क्वचिद्विश्रान्तमित्यनेना ऽणुत्वं परिमाणविशेषः सिद्धः तेन तदाश्रयः परमाणुरनुमीयते शब्दादिना त्वाकाशस्य ज्ञानादिना त्वात्मनो ऽनुमानं कार्येणैव कारणानुमानमिति नोदाहृतम् ॥

[2] संयोगि संयोगानुयोगि लिङ्गमिति सर्वशेषः । तथा च संयोगानुयोगि संयोगप्रतियोगिनो लिङ्गं व्याप्यं कथमन्यथा अयं देशः सारथिमान् विलक्षणगतिमद्रथादित्यादावनुमितिः साध्यतावच्छेदकसम्बन्धश्चात्र स्वसंयुक्तसंयोगः एवं समवाय्यपि समवेतस्य लिङ्गं कथमन्यथा पश्वाद्यवयवमात्रदर्शनदशायां विशिष्टावयवेना ऽवयविनः पश्वादेरनुमितिः न चावयवचक्षुःसंयोगदशायामवयविन्यपि संयोगसत्त्वात् तस्यापि प्रत्यक्षं दुर्वारमिति वाच्यं तथापि सिषाधयिषया तादृशानुमानसम्भवात् तथा सारथ्यादिभिन्नस्य सारथ्याद्यकार्यस्य च रथादेः सारथ्यादेर्व्याप्यत्वात् व्याप्यत्वं न तादात्म्यतदुत्पत्तिनियतमिति भावः ॥

[3] कार्यं रूपं कार्यान्तरस्य स्पर्शस्य लिङ्गम् । उपलक्षणाञ्चैतत् अकार्यमप्याकाशैकत्वम् आकाशैकपृथक्त्वे लिङ्गम् एवं परममहत्त्वे ॥

[4] कार्यं पृथिव्याः कार्यं गन्धादिकं कार्यान्तरस्य रसादेर्लिङ्गमिति शेषः एकार्थसमवायः समवायघटितसामानाधिकरण्यम् एवं नित्यरसादिकमपि नित्यरूपादेर्लिङ्गं द्रष्टव्यम् तथा च गन्धादे रसाद्यभेदस्य रसादिजन्यत्वस्य चाऽभावात् व्याप्तेस्तदुभयनैयत्यं बाधितमेवेति भावः ॥

Within, enthroned in godlike state,
Sits Varuṇa in golden sheen;
To work his will, with reverent mien,
His angel hosts around him wait.

When I beheld this vision bright
I deemed the god was clad in flame,
Such radiance from his presence came,
And overpowered my aching sight.

Each morn, when Ushas starts from sleep,
He mounts his car, which gleams with gold;
All worlds before him lie unrolled,
As o'er the sky his coursers sweep.

The king is he of gods and men,
Who all the powers of nature wields;
To his decree the proudest yields;
No act escapes his searching ken.

He spread the earth and watery waste;
He reared the sky; he formed the sun
His daily circling course to run;
In him the worlds are all embraced.

By his decree the radiant moon
Moves through the nightly sky serene,
And planets sparkle round their queen;—*
But whither have they fled at noon?

The rivers flow at his behest,
And yet—admire his wondrous skill—
The ocean-bed they cannot fill,
Although their currents never rest.

The path of ships across the sea,
The soaring eagle's flight, he knows,
The course of every wind that blows,
And all that was or is to be.

Descending, ceaseless, from the skies,
His angels glide this world around;
As far as earth's remotest bound
All-scanning sweep their thousand eyes.

This mighty lord who rules on high,
Although concealed from mortal gaze,
All men's most secret acts surveys;
He, ever far, is ever nigh.

Two think they are not overheard
Who sit and plot, as if alone;
Their fancied secrets all are known,
Unseen, the god is there, a third.

Whoe'er should think his way to wing,
And lurk unseen, beyond the sky,
Yet could not there elude the eye
And grasp of Varuṇa the King.

For all within the vast expanse
Of air that heaven and earth divides,
Whate'er above the heaven abides,
Lies open to his piercing glance.

The ceaseless winkings all he sees,
And counts, of every mortal's eyes:
In vain to wink a creature tries,
Unless the god the power decrees.

To thoughtful men who truth discern,
And deeply things divine explore,
The god reveals his hidden lore;
But fools his secrets may not learn.

He marks the good and ill within
The hearts of men—the false and true
Discerns with never-erring view:
He hates deceit, chastises sin.

His viewless bonds, than cords and gyves
More hard to burst, the wicked bind;
In vain, within their folds confined,
To cast them off the sinner strives.

And yet the god will not refuse
His grace to one who inly groans
When fetter-bound, his errors owns,
And for forgiveness meekly sues.

Lord, whither is thy friendship fled?
Thine ancient kindness now restore;
May we, so dear to thee of yore,
Thy chastening hand no longer dread.

Thine ire we did not rashly brave,
Nor break thy laws in wanton mood;
We fell, by wrath, dice, wine, subdued:
Forgive us, gracious lord, and save.

Absolve us from the guilt, we pray,
Of all the sins our fathers wrought,
And sins which we commit by thought,
And speech, and act, from day to day.

From dire disease preserve us free,
Nor doom us to the house of clay
Before our shrivelling frames decay:
A good old age yet let us see.

In vain shall hostile shafts assail
The man thy shielding arm defends;
Secure, no wrong he apprehends,
Safe, as if cased in iron mail.

As mother birds their pinions spread
To guard from harm their cowering brood,
Do thou, O lord, most great and good,
Preserve from all the ills we dread.

J. MUIR.

* In Indian mythology the moon is a god, not a goddess; but I have in this line adhered to customary English poetical phraseology.

ADVERTISEMENT.

Sanskrit scholars are aware that several commentaries are in existence on the Vedánta Aphorisms, totally differing from each other. Similarly, there are divergent commentaries on the Nyáya, Bhakti, Yoga, and I have resolved to publish the four principal commentaries (Bháshyas) on the Sútras, by monthly issues of 8 pages each of large paper and in clear types. Annual subscription in advance with postage, Rs. 12.

Gentlemen wishing to subscribe to this valuable Magazine are requested to send their subscriptions or notice of their intentions, for unless 100 subscribers are secured, it cannot be started.

BENARES: *February* 1870. HARISCHUNDRA.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

# काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

# THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 47. Benares, April 1st, 1870. Vol. IV.


## ॥ उपदेशसहस्र्याः पद्यप्रबन्धः ॥

उपगन्तव्यं गुरुं विशिनष्टि ।

(५२) शान्तं प्राज्ञं तथा मुक्तं निष्क्रियं ब्रह्मणि स्थितम् ।
श्रुतेराचार्यवान्वेद तद्विद्धीति स्मृतेस्तथा ॥ ३७७ ॥

शान्तमिति । शान्तमक्षुब्धचित्तं प्राज्ञं मेधाविनं यथा परित्यक्तबन्धसजातीयेन पुनर्बन्धो न भवति तथा मुक्तं निष्क्रियं निष्किंचनमित्यर्थः । निष्क्रियमैहिकामुष्मिककार्यप्रवृत्तिरहितं ब्रह्मणि स्थितं स्वस्वरूपानन्दानुभवेन सर्वत्रोदासीनमित्यर्थः । गुरोराश्रयणीयत्वे प्रमाणमाह । श्रुतेरिति । "आचार्यवान्पुरुषो वेद"तिश्रुतेः ।

"तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः" ॥
इति स्मृतेश्चेत्यर्थः ॥ ५२ ॥

उक्तप्रकरणानुसारेणोक्तविशेषेण गुरूपगमने फलं निरतिशयं दर्शयति ।

(५३) स गुरुस्तारयेद्युक्तं शिष्यं शिष्यगुणान्वितम् ।
ब्रह्मविद्याप्लवेनाशु स्वान्तध्वान्तमहोदधिम् ॥ ३७८ ॥

स गुरुरिति । युक्तं समाहितं शिष्यगुणाः प्रशान्तचित्ताय जितेन्द्रियायेत्यत्रोक्ता गुणा अमानित्वादयश्च भगवद्गीतोक्तास्तैरन्वितमित्यर्थः । ब्रह्मविद्यैव प्लवो ब्रह्मविद्याप्लवस्तेनेत्यर्थः । स्वान्तमन्तःकरणमुपाधिवचनेनोपाधीयमानो जीवो लक्ष्यते तस्य ध्वान्तमात्मस्वभावावरणात्मविक्षेपलक्षणमनाद्यनिर्वाच्याज्ञानं तदेव महानुदधिरपर्यन्तत्वात्तमित्यर्थः ॥ ५३ ॥

कथमुक्तलक्षणो गुरुरुक्तविशेषणं शिष्यं सम्यग्ज्ञानेन सद्यः संसारसागरं तारयेदित्यपेक्षायां प्रथमं पदार्थविवेकं कारयित्वा वाक्यार्थज्ञानोपदेशेनेत्यभिप्रेत्य संक्षेपतः पदार्थविवेकमाह ।

(५४) दृष्टिः स्पृष्टिः श्रुतिर्घ्रातिर्मतिर्विज्ञातिरेव च ।
शक्तयोऽन्याश्च भिद्यन्ते चिद्रूपत्वेप्युपाधिभिः ॥ ३७९ ॥

दृष्टिः स्पृष्टिरिति । अन्याश्च रसयितिवक्तिगत्याद्याश्च शक्तय इत्यर्थः । एता दृष्ट्यादिशक्तयो यद्यप्यखण्डचिद्रूपा एव तथापि तत्तदिन्द्रियद्वारकबुद्धिवृत्तिभेदोपाधिभिर्भिद्यन्ते न वस्तुतो भेदोस्तीति तत्तद्वृत्त्यंशपरित्यागेन सर्ववृत्तिसाक्षितयाऽनुगतप्रकाशस्वभाव एवात्मा त्वंपदार्थ इति प्रथमं ग्राहयेदित्यर्थः ॥ ५४ ॥

कथमुपाधिभिरेव चिच्छक्तिभेदः स्वरूपत एव भेदो यथानुभवमस्त्विति चेन्नैव,मात्मनो विकारित्वापत्तेः कल्पनागौरवाच्चेत्यभिप्रेत्य दृष्टान्तेनाखण्डरूपतां साधयति ।

(५५) अपायोद्भूतिहीनाभिर्नित्यं दीप्यन् रविर्यथा ।
सर्वगः सर्वदृक् शुद्धः सर्वं जानाति सर्वदा ॥ ३८० ॥

अपायेति । यथा रविरपायोद्भूतिहीनाभिर्विनाशजन्मशून्याभिः स्वरश्मिभिः सर्वं ब्रह्माण्डं दीपयन्प्रकाशयन्नेक एवाविक्रतो वर्त्तते तथात्माप्यपायोत्पत्तिहीनाभिरेव स्वरूपभूतचिच्छक्तिभिस्तत्तद्बुद्धिवृत्त्युपाधिभेदाद्भिन्नाभिः सर्वं विषयजातं विशेषतो जानाति सर्वदा सर्वदृक् सामान्येनापि सर्वं पश्यन्नास्ते यतः सर्वगतः सर्वदृश्याधिष्ठानत्वेन सर्वाव्यभिचारी तस्माच्छुद्धो निर्विकार इति योजना ॥ ५५ ॥

यद्येवमुक्तलक्षण आत्मा कथं तस्य संसारोपलब्धता परिच्छेदप्रतिभासश्चेत्यत आह ।

(५६) अन्यदृष्टिः शरीरस्थस्तावन्मात्रो ह्यविद्यया ।
जलेन्द्वाद्युपमाभिस्तु तद्धर्मा च विभाव्यते ॥ ३८१ ॥

अन्यदृष्टिरिति । अविद्यया शरीरस्थः स्थूलसूक्ष्मशरीरयोरेवोपलभ्यमानत्वात्तत्र वर्त्तमानस्तावन्मात्रः शरीरं यावत्तावन्मात्रो ऽहमिति मन्यमानो ऽन्यदृष्टिर्देहबाह्येभ्यो व्यावृत्तात्मदृष्टिस्तद्गतधर्मैरात्मनो धर्मवत्त्वदृष्टिरपि सन्परिच्छिन्नः संसारीव चावभासत इत्यर्थः । एतदेव दृष्टान्तेन स्पष्टयति । जलेन्द्वादीति । यथा चन्द्रादिर्जले प्रतिबिम्बितो जलोपाधिभेदाद्भेदवानिव जलकम्पादिना कम्पादिमानिव चाविवेकादेव विभाव्यते तथैव ताभिरुपमाभिस्तद्धर्मेत्याद्युक्तार्थः ॥ ५६ ॥

तदेवमुपाधिपरामर्शमन्तरेणात्मनि भेदसंसारादेरनुपलम्भादुपाधीनां चात्मनो बहिः स्वातन्त्र्येण सत्तायां प्रमाणाभावादविद्यामयत्वे सति नित्यशुद्धः परिपूर्ण एव चिदात्मेत्यवान्तरवाक्यैरवधारित आत्मैव सत्यज्ञानादिलक्षणं ब्रह्मेति महावाक्येनाचार्यादवगतात्मतत्त्वो मुमुक्षुरवस्थात्रयात्मकस्यैव सर्वदृश्यत्वात्तदपोहेन तत्साक्षितया तदधिष्ठानतया चाव्यभिचारी चिदेकरसं ब्रह्मात्मेति स्वानुभवमापादयन्मुच्यत इत्यभिप्रेत्यानुसंधानप्रकारमाह ।

(५७) दृष्ट्वा बाह्यं निमील्याथ स्मृत्वा तत्प्रविहाय च ।
अथोन्मील्यात्मनो दृष्टिं ब्रह्म प्राप्नोत्यनध्वगः ॥ ३८२ ॥

दृष्ट्वेति । बाह्यं जागरितं पञ्चीकृतपञ्चमहाभूततत्कार्यात्मकं समष्टिव्यष्टिरूपं सर्वं विषयजातं दृष्ट्वा द्रष्टृदृश्यान्वयव्यतिरेकाभ्यां कार्यकारणान्वयव्यतिरेकाभ्यां चालोच्याथ निमील्य दृश्यं तत्सर्वं द्रष्टृमात्रत्वेन कार्यं सर्वकारणभूततन्मात्रत्वेन विलाप्येत्यर्थः । अथानन्तरं स्मृत्वा जाग्रद्दृष्टवासनाकार्यं स्वप्नदर्शनं स्मृतिस्तां कृत्वा विश्ववैश्वानरसहितं स्थूलोपाधिः तद्वासनामये लिङ्गे सूक्ष्मभूतसहिते प्रविलाप्य वासनामयं स्वप्नमात्रमेव तदित्यनुसंधायेत्यर्थः । तदपि लिङ्गशरीरं वासनामयं प्रविहाय च वासनासहितस्य मनःप्राणेन्द्रियसंघातस्यापि तत्कारणपञ्चतन्मात्रादनतिरेकात्तादन्मात्रेण प्रविलाप्य तेषां चोत्पत्तिक्रमवैपरीत्येन तत्कारणसाभासाज्ञानमात्रत्वेन प्रविलाप्यावस्थानं तद्धानं तत्कृत्वेत्यर्थः । अथानन्तरं सुषुप्तौ बीजात्मकज्ञानमात्रं यदुर्वरितं तदपि सदसत्त्वभिन्नाभिन्नादिप्रकारनिरूपणासहत्वाद्दिवान्धपरिकल्पितान्धकारवदसत्किंचिदिति विवेकेन बाधित्वात्मनः सर्वावस्थासाक्षितयानुस्यूतसच्चिदानन्दमात्रस्य दृष्टिं ज्ञानप्रकाशस्वरूपामुन्मील्य निरुपाधिकां कृत्वा स्थितो ब्रह्म प्राप्नोति सत्यज्ञानादिलक्षणं ब्रह्मैव भवतीति यावद्, अनध्वगो ऽर्चिरादिकमध्वानं न प्राप्तो ब्रह्मण आत्मत्वाच्च गत्यायत्ता ब्रह्मप्राप्तिरित्यर्थः ॥ ५७ ॥

अनध्वगो ब्रह्म प्राप्नोतीत्युक्तमेव विशदयन्निरुपचरितैवास्य मुक्तिर्नोपासकस्येवापेक्षिकीति द्योतयति ।

(५८) प्राणाद्येवं त्रिकं हित्वा तीर्णो ऽज्ञानमहोदधिम् ।
स्वात्मस्थो निर्गुणः शुद्धो बुद्धो मुक्तः स्वतो हि सः ॥३८३॥

प्राणादीति । द्वाभ्यां सुषुप्त्यादीत्यर्थः, स्वात्मस्थो नार्चिरादिमार्गस्थः यतो निर्गुणः स्वात्मनि प्रविलापितसकलगुण इत्यर्थः । शुद्धो निरुपाधिको ऽतः स्वतःस्वभावत एव मुक्त इत्यर्थः ॥ ५८ ॥

(५९) अजो ऽहं चामरो ऽमृत्युरजरो ऽभय एव च ।
सर्वज्ञः सर्वदृक् शुद्ध इति बुद्धो न जायते ॥ ३८४ ॥

अजोहमिति । एवंविधो ऽहं ब्रह्मास्मीति यो बुद्धो ऽज्ञाननिद्राया निर्गतः स न जायते पुनः शरीरं न गृह्णातीत्यर्थः ॥ ५९ ॥

प्रबुद्धस्य पुनर्जन्माभावे हेतुमाह ।

(६०) पूर्वोक्तं यत्तमोबीजं तन्नास्तीति विनिश्चयः ।
तदभावे कुतो जन्म ब्रह्मैकत्वं विजानतः ॥ ३८५ ॥

पूर्वोक्तमिति । सुषुप्ताख्यं तमो ऽज्ञानमित्यादिना यत्पूर्वोक्तमज्ञानं तत्कालत्रयेपि नास्तीति विनिश्चयः कस्मिन्नपि काले सतो ज्ञानमात्रात्तिरोधानासंभवादस्य तु ज्ञानोदयमात्र एव तिरोधानाच्छुक्तिरजतवदित्यर्थः । तदभाव इति । कारणाभावात्कार्याभाव इत्यर्थः ॥ ६० ॥

अहं ब्रह्मास्मीत्यात्मानं साक्षात्पश्यतोपि पूर्वव्यवहारदर्शनात्तत्कृतधर्माधर्मनिबन्धनं पुनः शरीरग्रहणं स्यादित्याशङ्क्य बाधितानुवृत्तिमात्रत्वाज्ज्ञानिव्यवहारस्य न तन्निबन्धनः पुनः शरीरग्रहणादिसंसार इति दृष्टान्तपूर्वकमाह ।

(६१) क्षीरात्सर्पिर्यथोद्धृत्याक्षिप्तं तस्मिन्न पूर्ववत् ।
बुद्ध्यादेर्ज्ञस्तथा ऽसत्यान्न देही पूर्ववद्भवेत् ॥ ३८६ ॥

क्षीरादिति । यथा सर्पिर्नवनीतं क्षीरादुपायेनोद्धृत्य तस्मिन्नेव निःसारीकृते क्षीरे क्षिप्तं न पूर्ववदविविक्तं भवति तथा ऽसत्याद्बुद्ध्यादेः संघातात्प्रथममात्मा ऽविविक्तो ज्ञानमात्ररूपेणोद्धृतो ब्रह्माहमस्मीति वाक्यादवगतब्रह्मभावः पूर्ववत्पुनर्देही देहद्वयसंघाताभिमानवांस्तस्मिन्विद्यमानोपि न भवेदित्यर्थः । साहंकारस्य हि कर्म बन्धहेतुर्न निरहंकारस्य, तथा चोक्तं भगवता ।

"यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमांल्लोकान् न हन्ति न निबद्धते" ॥

इति ॥ ६१ ॥

पदार्थपरिशोधनपूर्वकं वाक्यादहं ब्रह्मास्मीति प्रतिबुद्धस्य पुनः संसारभयशङ्का नास्तीत्युक्तेर्थे "आनन्दं ब्रह्मणो विद्वान् बिभेति कुतश्चने"ति श्रुतिमर्थतः पठति ।

(६२) सत्यं ज्ञानमनन्तं च रसादेः पञ्चकात्परम् ।
स्यामदृश्यादिशास्त्रोक्तमहं ब्रह्मेति निर्भयः ॥ ३८७ ॥

सत्यं ज्ञानमिति । रसादेरन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयाख्यकोशपञ्चकात्परं तदाधारभूतं ब्रह्मपुच्छं प्रतिष्ठेति निर्दिष्टं यत्तदेवादृश्ये ऽनात्म्ये ऽनिरुक्ते ऽनिलयने ऽभयं प्रतिष्ठां विन्दतइति शास्त्रोक्तं ब्रह्माहं स्यामस्मीति पश्यन्निर्भयो भवतीति योजना ॥ ६२ ॥

भयङ्कराणामपि भयङ्करब्रह्मात्मभूतस्य कुतो भयशङ्कावकाश इति ब्रह्मज्ञस्य पुनः संसाराभावमुक्तं द्रढयति ।

(६३) यस्माद्भीताः प्रवर्तन्ते वाङ्मनःपावकादयः ।
तदात्मानन्दतत्त्वज्ञो न बिभेति कुतश्चन ॥ ३८८ ॥

यस्मादिति । यदि वाय्विनौ पावकादय इति पाठस्तदा इनः सूर्यः आदिपदादिन्द्रमृत्यू गृह्येते, तथा च श्रुतिः । "भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चम"इति । वाङ्मनःपावकादय इति पाठे ऽध्यात्मं वागादयोधिदैवमग्न्यादयश्च यस्माद्भीताः प्रवर्त्तन्तइत्यर्थः । तथा च श्रुतिः "केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः केनेषितां वाचमिमां वदन्ति चक्षुः श्रोत्रं क उ देवो युनक्ति भयादस्याग्निस्तपति भयात्तपति सूर्यः भयादिन्द्रश्चं वायुश्च मृत्युर्धावति पञ्चमः"इति च ॥ ६३ ॥

ननु विदुषो ऽपि हरिहरहिरण्यगर्भादीनां नमस्कार्यत्वात्तदतिक्रमे भयसंभवात्कार्यशेषो विद्यतइति चेन्नेत्याह ।

(६४) नामादिभ्यः परे भूम्नि स्वाराज्ये चेत् स्थितो ऽद्वये।
प्रणमेत्कं तदात्मज्ञो न कार्यं कर्मणा तदा ॥ ३८९ ॥

नामादिभ्य इति । नामवाङ्मनआदिप्राणान्तेभ्य उत्तरोत्तरं भूयस्त्वेन श्रुतेभ्यः परे परस्मिन् भूम्नि सर्वव्यवहारातीते अमृते सुखरूपे ऽद्वये स्वे महिम्नि स्वराजि चेदहमस्मि भूमा ब्रह्मेति व्यवस्थित आत्मा ज्ञो विद्वांस्तदा तस्यान्यं प्रति गुणभावाभावात्कं प्रणमेत्प्रणम्यानोमात्मभूतत्वादतः परिपक्वज्ञानस्य कृतकृत्यत्वान्न कर्मणा किमपि कार्यमस्तीत्यर्थः ॥ ६४ ॥

भूम्नो नामादिभ्यः परत्वेपि कथमद्वयत्वमित्याशङ्क्य नामादेरवस्थात्रयरूपस्याध्यस्तत्वेन मिथ्यात्वात्तत्साक्षिणस्तुरीयस्य भूम्नो ऽद्वयत्वमिति वक्तुमवस्थात्रयमनुवदति ।

(६५) विराड्वैश्वानरो बाह्यः स्मरन्नन्तः प्रजापतिः ।
प्रविलीने तु सर्वस्मिन् प्राज्ञो ऽव्याकृतमुच्यते ॥ ३९० ॥

विराडिति । अध्यात्माधिदैवतयोरभेदाभिप्रायेण विराड्वैश्वानर इत्युक्तं विश्ववैश्वानरइत्यर्थः । बाह्यो बहिःप्रज्ञ इत्यर्थः । अन्तः स्मरंश्चिति स्वप्ने वासनामयविषयदर्शी प्रजापतिर्हिरण्यगर्भस्तैजस इति योज्यम्.अव्याकृतं मायोपाधीश्वराख्यं तत्त्वं प्राज्ञ उच्यतइत्यर्थः ॥ ६५ ॥

एतदवस्थात्रयात्मकं जगदपोह्य तत्साक्षिणो वस्तुभूतस्याहं ब्रह्मेति सम्यग्ज्ञानान्मुक्तो भवतीत्याह ।

(६६) वाचारम्भणमात्रत्वात्सुषुप्तादिकं त्वसत् ।
सत्यो ज्ञश्चाहमित्येवं सत्यसन्धो विमुच्यते ॥ ३९१ ॥

वाचेति । ज्ञः साक्षी सत्यः परमात्मा सोहमेवेत्येवं सत्यसंधो ऽनायासेन मुच्यतइत्यर्थः ॥ ६६ ॥

आत्मतत्त्वाज्ञानाध्यस्तः संसारस्तज्ज्ञानान्निवर्त्ततइत्युक्ते ज्ञानाज्ञानयोरात्मधर्मत्वं स्यादित्याशङ्क्य दृष्टान्तेन प्रत्याह ।

(६७) भारूपत्वाद्यथा भानोर्नाहोरात्रे तथैव च ।
ज्ञानाज्ञाने न मे स्यातां चिद्रूपत्वाविशेषतः ॥ ३९२ ॥

भारूपत्वादिति । ज्ञानाज्ञानयोरपि साक्ष्यत्वात्कल्पितत्वे सति नात्मधर्मत्वमिति भावः ॥ ६७ ॥

आत्मनो निर्विशेषत्वादेः शास्त्रप्रामाण्यादेव सिद्धेर्नात्र युक्तिकल्पनया मनः खेदनीयमित्यभिप्रेत्याह ।

(६८) शास्त्रस्यानतिशङ्क्यत्वाद्ब्रह्मैव स्यामहं सदा ।
ब्रह्मणो मे न हेयं स्याद्ग्राह्यं चेति च संस्मरेत् ॥ ३९३ ॥

शास्त्रस्येति । स्पष्टम् ॥ ६८ ॥

किं तद्ब्रह्मपरं शास्त्रं किं वा सर्वदाऽहेयानुपादेयब्रह्मात्मज्ञाननिष्ठस्य फलमित्यपेक्षायां यस्तु सर्वाणि भूतानीत्यादिमन्त्रार्थमुदाहरति ।

(६९) अहमेव च भूतेषु सर्वेष्वेको नभो यथा ।
मयि सर्वाणि भूतानि पश्यन्नेवं न जायते ॥ ३९४ ॥

अहमिति ॥ ६९ ॥

आत्मनो ऽद्वितीयब्रह्मरूपत्वे शास्त्रमर्थत उदाहृत्य निर्विशेषब्रह्मरूपत्वेप्युदाहरति ।

(७०) न बाह्यं मध्यतो वान्तर्विद्यते ऽन्यत्स्वतः क्व चित्।
अबाह्यान्तः श्रुतेः किं चित् तस्माच्छुद्धः स्वयंप्रभः ॥ ३९५ ॥

न बाह्यमिति । "तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभू"रिति श्रुतेरित्यर्थः । सर्वानुभूरित्यस्यार्थः स्वयंप्रभ इति ॥ ७० ॥

सामान्येन सर्वप्रपञ्चसंस्पर्शरहितत्वे श्रुतिमुदाहरति ।

(७१) नेतिनेत्यादिशास्त्रेभ्यः प्रपञ्चोपशमोद्भयः ।
अविज्ञातादिशास्त्राच्च नैव ज्ञेयो ह्यतो ऽन्यथा ॥ ३९६ ॥

नेतीति । प्रपञ्चनिषेधद्वारेणैवात्मा विज्ञेयो न पुनर्विषयतया सप्रपञ्चतया वेत्यत्रान्यदेव "तद्विदितादथो अविदितादधि यस्यामतं तस्य मतमविज्ञातं विज्ञाते"त्यादि,शास्त्रमुदाहरति । अविज्ञातादीति ॥ ७१ ॥

"तस्मादेषां तन्न प्रियं यदेतन्मनुष्या विद्यु"रिति श्रुतेरेवमद्वयादिलक्षणमात्मानं जानतो देवाः फलप्राप्तिं विघ्नन्तीति चे,न्नैवम् । देवानामप्यात्मभूतत्वाद्विदुषो विघ्नश्रुतेरविद्वद्विषयत्वादित्यभिप्रेत्याह ।

(७२) सर्वस्यात्माहमेवेति ब्रह्म चेद्विदितं परम् ।
स आत्मा सर्वभूतानामात्मा ह्येषामिति श्रुतेः ॥ ३९७ ॥

सर्वस्येति । "तस्य ह न देवाश्च नाभूत्या ईशत आत्मा ह्येषां स भवती"ति श्रुतेरित्यर्थः ॥ ७२ ॥

एवं ब्रह्मात्मज्ञानवतो देवैरप्युपास्यत्वसिद्धेर्न तस्य देवपशुत्वशङ्कापीत्यतो न कुतश्चिद्भयमस्तीत्यत्र श्रुतिमर्थतः पठति ।

(७३) जीवश्चेत्परमात्मानं स्वात्मानं देवमञ्जसा ।
वेदोपास्यः स देवानां पशुत्वाच्च निवर्त्तते ॥ ३९८ ॥

जीवश्चेदिति । "यदैवमनुपश्यत्यात्मानं देवमञ्जसा । ईशानं भूतभव्यस्य न तदा विजुगुप्सते ॥ सर्वस्मै देवा बलिमावहन्ति तमेवं विद्वानमृत इह भवती"ति च श्रुतिभ्य इत्यर्थः ॥ ७३ ॥

यदुक्तं सत्यसंधो विमुच्यतइति तत्स्फुटयति ।

(७४) अहमेव सदात्मज्ञः शून्यस्त्वन्यैर्यथाम्बरम् ।
इत्येवं सत्यसंधत्वादसद्धाता न बध्यते ॥ ३९९ ॥

अहमेवेति । सदात्मा चासौ ज्ञश्चेति सदात्मज्ञः "तत्सत्यं स आत्मे"ति श्रुतिरिहोदाहरणम्,अन्यैः शून्य इति वाचारम्भणश्रुत्यर्थो दर्शितः । यथाम्बरमिति । दृश्यसंसर्गशून्यत्वाच्छुद्ध इत्यत्र दृष्टान्तोक्तिः असद्धाता ऽनृताभिसन्धिरहितो ऽतस्कर इव न बध्यते बन्धनार्यहीनो भवति "स यथा तत्र न दह्येत एतदात्म्यमिदं सर्व"मित्यादिश्रुतिरिहोदाहार्या ॥ ७४ ॥

एवंविधज्ञानाभावादितरे पशुभूताः शोच्या भवन्तीति दर्शयन्नथ ये ऽन्यथातो विदुरन्यराजानस्ते ऽक्षय्यलोका भवन्तीति श्रुत्यर्थमाह ।

(७५) कृपणास्ते ऽन्यथैवातो विदुर्ब्रह्म परं हि ये ।
स्वराड्योनन्यदृक् स्वस्थस्तस्य देवा असन् वशे ॥ ४०० ॥

कृपणा इति । ये परं ब्रह्मातोन्यथैवोक्तवैपरीत्येनानात्मभूततया विदुस्ते हि कृपणाः शोच्या एवेति योजना । अभेददर्शी तु न कृपण इत्याह । स्वराडिति । "एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स्वराड्भवती"ति श्रुतिरिहोदाहरणं, तस्य सर्वेषु लोकेषु कामचारो भवतीति श्रुत्यर्थमन्त्रभागोदाहरणेन द्योतयति । तस्येति । आसन्नित्यर्थे असन्निति छान्दसं "यस्त्वेवं ब्राह्मणो विद्यात्तस्य देवा असन्वशे" इति मन्त्रो, ऽस्यायमर्थः । यस्त्वेवं ब्राह्मणो ब्रह्मनिष्ठ एवं वेदाहमेतं पुरुषं महान्तमित्युक्तप्रकारेण ब्रह्मात्मानं विद्यात्तस्य विदुषो देवा वशगा भवन्तीति ॥ ७५ ॥

यस्माद्यथोक्तात्मज्ञानादेव कृतकृत्यता तस्मान्मुमुक्षुभिस्तदर्थं यत्नवद्भिर्भवितव्यमिति ताञ्छिक्षयन्नाह ।

(७६) हित्वा जात्यादिसंबन्धान् वाचोन्याः सह कर्मभिः ।
ओमित्येवं सदात्मानं सर्वशुद्धं प्रपद्यथ ॥ ४०१ ॥

हित्वेति । "यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैस्तमेवैकं जानथात्मानमन्या वाचो विमुञ्चथामृतस्यैष सेतुः ओमित्येव ध्यायथ आत्मान"मिति च वाक्यद्वयमत्रोदाहरणम्, अन्या वाचो ऽनात्मविषयाः प्रवृत्तिपराः सर्वं सर्वाधारभूतं शुद्धं विविक्तं निर्विशेषमित्यर्थः ॥ ७६ ॥

तमेवं प्रतिपत्तव्यमात्मानं श्रुत्यन्तरेण विशिनष्टि ।

(७७) सेतुं सर्वव्यवस्थानामहोरात्रादिवर्जितम् ।
तिर्यगूर्ध्वमधः सर्वं सकृज्ज्योतिरनामयम् ॥ ४०२ ॥

सेतुमिति । सर्वव्यवस्थानां वर्णाश्रमादिमर्यादानां सेतुं विधारकम्, "अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदाय नैनं सेतुमहोरात्रे तरतः सकृद्विभातो ह्येवैष ब्रह्मलोक"इति श्रुतिरत्रोदाहरणम् ॥ ७७ ॥

पुनः किंलक्षणमात्मानं प्रपद्यते इत्यपेक्षायामन्यत्र धर्म्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतादन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वदेति श्रुत्यर्थमाह ।

(७८) धर्माधर्म्मविनिर्मुक्तं भूतभव्यात्कृताकृतात् ।
स्वमात्मानं परं विद्याद्विमुक्तं सर्वबन्धनैः ॥ ४०३ ॥

धर्म्माधर्म्मेति । कृताकृतात् कार्यकारणादित्यर्थः ॥ ७८ ॥

ननु कथं सर्वबन्धनैर्मुक्त आत्मा तस्य कर्तृत्वादिश्रवणादित्याशङ्क्याकर्तृत्वादेरपि सहैव श्रवणाद्विरुद्धोभयस्वभावस्यैकस्मिन्नयोगात् स्वभावप्राप्तकर्तृत्वादिकं मायामयं प्रमाणावधेयमकर्तृत्वादिकमात्मस्वभाव इति विशेषमभिप्रेत्य विरुद्धधर्मवादिनीः श्रुतीरुदाहरति ।

(७९) अकुर्वन् सर्वकृच्छुद्धस्तिष्ठन्नत्येति धावतः ।
मायया सर्वशक्तित्वादजः सन् बहुधा मतः ॥ ४०४ ॥

अकुर्वन्निति । अनेजदेकं मनसो जवीय इति मन्त्रभागार्थो ऽकुर्वन् सर्वकृदित्युक्तः, शुद्धमपापविद्धमित्यस्यार्थः शुद्ध इति । तद्धावतोन्यानत्येति तिष्ठदित्यस्यार्थमाह । तिष्ठन्निति । धावतो वेगवतोन्यान्मनःप्राणादीनत्येति अतीत्य गच्छति यत्र मनःप्राणादि गच्छति तत्र सर्वत्रात्मचैतन्यस्याभिव्यक्तिनियमादात्मा तिष्ठन्नपि गच्छतीव भासतइत्यर्थः । अजायमानो बहुधा विजायतइति मन्त्रार्थमाह । अजः सन्बहुधा मत इति । सर्वत्र हेतुर्मायया सर्वशक्तित्वादिति, नहि मायायामसंभावनीयमस्तीति भावः ॥ ७९ ॥

अक्रियस्यापि क्रियावत्त्वोपचारमुक्तं दृष्टान्तेन प्रपञ्चयति ।

(८०) राजवत्साक्षिमात्रत्वात्सान्निध्याद्भ्रामको यथा ।
भ्रामयञ्जगदात्माहं निष्क्रियो ऽकारको ऽद्वयः ॥ ४०५ ॥

राजवदिति । स्पष्टम् ॥ ८० ॥

यस्मादेवमात्मा स्वतो नित्यशुद्धत्वादिस्वभावः शास्त्रन्यायाभ्यामवगतस्तस्मात्तं तथैव जानीयान्नान्यथेत्युपसंहरति ।

(८१) निर्गुणं निष्क्रियं नित्यं निर्द्वन्द्वं यन्निरामयम् ।
शुद्धं बुद्धं तथा मुक्तं तद्ब्रह्मास्मीति धारयेत् ॥ ४०६ ॥

निर्गुणमिति । नैतेषु श्लोकेषु पुनरुक्तं दोषावहं यतः प्रतिपाद्यवस्तुनो दुर्बोधत्वान्मुमुक्षूपकाराय कारुणिक आचार्यः क्व चिच्छास्त्रतः क्व चित्फलकथनेन क्व चिद्विद्वदनुभवाभिनयेन पुनःपुनः प्रतिपादयति । भूयोपि पथ्यं वक्तव्यमिति न्यायादिति ॥ ८१ ॥

उक्तं प्रकरणार्थं प्रतिपत्तिसौकर्यार्थं संक्षिप्य कथयति ।

(८२) बन्धं मोक्षं च सर्वं यत इदमुभयं हेयमेकं द्वयं च
ज्ञेयं ज्ञेयाभ्यतीतं परममधिगतं तत्त्वमेकं विशुद्धम् ।
विज्ञायैतद्यथावच्छ्रुतिमुनिगदितं शोकमोहावतीतः
सर्वज्ञः सर्वकृत्स्याद्भवभयरहितो ब्राह्मणो ऽवाप्तकृत्यः ॥ ४०७ ॥

बन्धं मोक्षमिति । बन्धं मोक्षं च सर्वं यथावद्विज्ञाय भवभयरहितः स्यादित्यन्वयः । बन्धः प्रमातृकर्तृत्वादिप्रतिभासलक्षणो, मोक्षो ब्रह्मस्वरूपावस्थानं, सर्वमिति । निःशेषं पूर्वोक्तप्रकारमित्यर्थः । इदमुभयं बन्धं मोक्षं यतो हेतोरज्ञानाज्ज्ञानाच्च भवतः ते अपि विज्ञायेति संबन्धः, तथा एकमनुवृत्तं कारणं द्वयं व्यावृत्तं कार्यं च यज्ज्ञेयं विषयभूतं तत्सर्वं हेयं बाध्यं विज्ञायेत्यन्वयः । ज्ञेयाभ्यतीतं दृश्यात्सम्यक् पृथक्कृतं परमं निरतिशयं विशुद्धमेकं ब्रह्म यद्वेदान्तेष्वधिगतं तत्त्वं परमार्थं तदपि यथावद्विज्ञायात्मत्वेनोपादाय किंलक्षणं श्रुतिमुनिगदितं श्रुतिवाक्येन मुनिना गुरुणोपदिष्टमित्यर्थः । "एवमात्मानात्मतत्त्वं ज्ञात्वा ऽनात्मापोहेनात्मतत्त्वनिष्ठः शोकमोहावतीतः स्यात्तत्र को मोहः कः शोक एकत्वमनुपश्यत" इति श्रुतेः । सर्वं हि ब्रह्म तज्जानन् सर्वज्ञः स्यात्सर्वं स्वात्मन्येकं करोतीति सर्वकृत्स्यात्, तथा च मुक्तविषया श्रुतिः । "अहं विश्वं भुवनमभ्यभवा"मिति । दैर्घ्यं गानार्थं अभ्यभवमभिभूतवानात्मसात्कृतवानस्मीति श्रुत्यर्थः । भवभयरहितः न बिभेति कुतश्चनेति श्रुतेः । ब्राह्मणो मुख्यया वृत्त्या ब्राह्मणशब्दाभिधेयः मौनं चामौनं च निर्विद्याथ ब्राह्मण इति । "अथ य एतदक्षरं गार्गि विदित्वा ऽस्माल्लोकात्प्रैति स ब्राह्मण" इति श्रुतेः । अवाप्तकृत्यः प्राप्तसर्वक्रियाफल इत्यर्थः, "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते"ति श्रुतेरित्यर्थः ॥ ८२ ॥

एवमात्मानं जानतः कृतकृत्यत्वमुक्तं प्रकटयति ।

(८३) न स्वयं स्वस्य नान्यश्च नान्यस्यात्मा च हेयगः ।
उपादेयो न चाप्येवमिति सम्यङ्मतिः स्मृता ॥ ४०८ ॥

न स्वयमिति । स्वयमात्मा स्वस्य न हेयगस्त्यक्तव्यकोटौ पतितो न चाप्युपादेय एकस्मिन्कर्मकर्तृत्वासंभवात्स्वरूपस्य स्थितौ नाशे वा स्वविषयहानोपादानयोरसंभवाच्च तथा ऽन्यश्च न स्वस्य हेयगो ऽद्वैते ऽन्यस्यैवाभावाद् नाप्युपादेयो ऽत एव तथान्यस्यापि स्वयमुपादेयो हेयगो वा न भवत्यात्मान्तराभावादनात्मनश्च बाधितत्वादचैतन्याच्चेति योजना । इत्येवं या निष्ठा सा सम्यङ्मतिः सम्यग्ज्ञानं स्मृता ब्रह्मविद्भिरित्यर्थः ॥ ८३ ॥

कूटस्थचैतन्यैकरसे पूर्णे वस्तुनि हानाद्यसंभवान्निरायासं परं ब्रह्मैवास्मीत्येवंविधाया धियः सम्यङ्मतित्वे हेतुमाह ।

(८४) आत्मप्रत्यायिका ह्येषा सर्ववेदान्तगोचरा ।
ज्ञात्वैनां हि विमुच्यन्ते सर्वसंसारबन्धनैः ॥ ४०९ ॥

आत्मप्रत्यायिकेति । आत्मानं ब्रह्मत्वेन प्रत्याययतीत्यात्मप्रत्यायिका हि यस्मादेषा मतिः स्वानुभवसिद्धेति वा, सर्ववेदान्तगोचरेति प्रमाणमूलत्वमस्यां दर्शयति । एनां ज्ञात्वा लब्ध्वा सर्वसंसारबन्धनैर्विमुच्यन्ते कृतकृत्या भवन्तीत्यर्थः । तथा च भगवद्वचनम् ।

"इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ ।
एतद्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत" ॥

इति ॥ ८४ ॥

प्रकरणोक्तं ज्ञानमिदानीं प्रशंसन्नस्योपादेयत्वं द्रढयति ।

(८५) रहस्यं सर्ववेदानां देवानां चापि यत्परम् ।
पवित्रं परमं ह्येतत्तदेतत्संप्रकाशितम् ॥ ४१० ॥

रहस्यमिति । रहस्यमुपदेशव्यतिरेकेणाविज्ञेयम्, "आचार्यवान् पुरुषो वेद सर्वे वेदा यत्पदमामनन्ती"ति च श्रुतेः। "देवैरत्रापि विचिकित्सितं पुरा नहि सुविज्ञेयमणुरेष धर्म" इति श्रुतेर्देवानां चापि रहस्य मित्यर्थः । परं सर्वोत्तमं पवित्रं पावनं "क्षीयन्ते चास्य कर्माणि, एवंविदि पापं कर्म न श्लिष्यत" इत्यादिश्रुतेः । हि यस्मात्परमं परमार्थरूपं निरतिशयानन्दप्रकाशमिति यावत् । यदेवंरूपं सम्यग्ज्ञानं तदेतत्सम्यक् प्रकाशितं प्रकटीकृतमस्मिन् प्रकरणइत्यर्थः ॥ ८५ ॥

एतस्य गोपनीयत्वं सूचयति ।

(८६) नैतद्देयमशान्ताय रहस्यं ज्ञानमुत्तमम् ।
विरक्ताय प्रदातव्यं शिष्यायानुगताय च ॥ ४११ ॥

नैतदिति । यद्वा ऽस्यदुर्विज्ञेयत्वेन दुर्द्धरत्वात्तद्धारणसमर्थाधिकारिणं विशिंषन्ननधिकारिभ्यो विवेचयति । नैतद्देयमिति ॥ ८६ ॥

यस्मादेवंलक्षणज्ञानद आचार्यः कृतकृत्यो न प्रलोभादिना ज्ञानं प्रयच्छति तस्माद् मुमुक्षुरमानित्वादिशिष्यगुणयुक्तः स्याद् यथाचार्यः कृपया विद्यां दद्यादित्येतमर्थमाह ।

(८७) ददतश्चात्मनो ज्ञानं निष्क्रियो ऽन्यो न विद्यते।
ज्ञानमिच्छन् भवेत् तस्माद्युक्तः शिष्यगुणैः सदा॥४१२॥

ददतश्चेति । न विद्यते यस्मादिति योज्यं, तस्माच्छिष्यगुणैः सदा युक्तो ज्ञानमिच्छन् संपादयंस्तरेत्संसारमिति शेषः ॥ ८७ ॥

आदावेवोपसंहारे देवताचार्यनमस्कारौ तद्भक्तेर्विद्यां प्रत्यन्तरङ्गत्वख्यापनाय कार्याविति दर्शयति श्लोकद्वयेन ।

(८८) ज्ञानं ज्ञेयं तथा ज्ञाता यस्मादन्यन्न विद्यते ।
सर्वज्ञः सर्वशक्तिर्यस्तस्मै ज्ञानात्मने नमः ॥ ४१३ ॥

ज्ञानमित्यादिना । ज्ञानात्मने चित्सदानन्दरूपायेत्यर्थः ॥ ८८ ॥

(८९) विद्यया तारिताः स्मो यैर्जन्ममृत्युमहोदधिम् ।
सर्वज्ञेभ्यो नमस्तेभ्यो गुरुभ्यो ऽज्ञानसंकुलम् ॥ ४१४ ॥

॥ इति सम्यङ्मतिप्रकरणं सप्तदशम् ॥

विद्ययेति ।

अज्ञानसंकुलमिति छेदः ॥ ८९ ॥

इति सम्यङ्मतिप्रकरणं सप्तदशं विवृतम् ॥ १७ ॥

पूर्वस्मिन् प्रकरणे ब्रह्मात्मविषयमपरोक्षज्ञानं मोक्षसाधनं वेदान्तेभ्यो भवतीत्युक्तं, तदयुक्तं, वेदान्तानामपि स्वर्गकामादिवाक्यवत्परोक्षज्ञानजनकत्वादतो ऽपरोक्षज्ञानाय प्रसंख्यानमेष्टव्यमिति के चित्प्रतिपेदिरे, तन्मतनिराकरणेन पूर्वोक्तं सर्वं स्वसिद्धान्तं श्रौतमुपपत्तितः स्फुटमुपपादयितुं प्रकरणान्तरमारभमाणो देवतानमस्कारव्याजेनान्तःकरणवृत्तिभावाभावसाक्षिणं कूटस्थचिदेकतानमेवात्मानं नित्यापरोक्षं वेदान्ता ब्रह्मेति प्रतिपादयन्तो न परोक्षं ब्रह्म समर्पयन्तीति सूचयन् प्रकरणप्रतिपाद्यं दर्शयति ।

(१) येनात्मना विलीयन्ते उद्भवन्ति च वृत्तयः ।
नित्यावगतये तस्मै नमो धीप्रत्ययात्मने ॥ ४१५ ॥

येनेति । वृत्तयो धीपरिणामाः अलातचक्रमिवान्यात्मना येन चैतन्यज्योतिःस्वरूपेण विलीयन्ते सुषुप्तौ अवस्थान्तरे उद्भवन्ति च चिदात्मव्याप्ता इत्यर्थः । धीप्रत्ययाः साभासबुद्धिवृत्तयस्तेषामात्मने तदध्यासाधिष्ठानायेत्यर्थः । नित्यश्चासाववगतिश्चेति विग्रहः ॥ १ ॥

इदानीं स्वोक्तेर्थे मुमुक्षूणां विश्वासार्थं स्वाचार्यगुणोपवर्णनपूर्वकं संप्रदायशुद्धिं कथयति ।

(२) प्रमथ्य वज्रोपमयुक्तिसंभृतैः
श्रुतेररातीन् शतशो वचोऽसिभिः ।
ररक्ष वेदार्थनिधिं विशालधी-
र्नमो यतीन्द्राय गुरोर्गरीयसे ॥ ४१६ ॥

प्रमथ्येति । संभृतैरभेद्यतया घटितैः श्रुतेर्वचोऽसिभिर्वेदान्तवाक्यरूपनिस्त्रिंशैररातीन् भेदतत्त्वारण्यवासिनो ऽद्वैतरत्नापहारिणः शत्रून् प्रमथ्य समूलमुन्मूल्य यो विशालधारप्रतिहतदीर्घबुद्धिर्वेदान्तार्थमञ्जूषागतं निधिं निधीयते ऽस्मिन् सर्वमिति निधिरद्वयं ब्रह्मात्मतत्त्वं ररक्ष तस्मै यतीन्द्राय गुरोर्गरीयसे परमगुरवे नम इति योजना ॥ २ ॥

एवं नमस्कारव्याजेन प्रकरणार्थं स्वसंप्रदायशुद्धिं चोक्त्वा तत्त्वमस्यादिवाक्यादेवापरोक्षज्ञानमात्मनीति प्रकरणसिद्धान्तं तावदाह ।

(३) नित्यमुक्तः सदेवास्मीत्येवं चेन्न भवेन्मतिः ।
किमर्थं श्रावयत्येवं मातृवच्छ्रुतिरादृता ॥ ४१७ ॥

नित्यमुक्त इति । सदेवाहमहमेव सदस्मि नित्यमुक्त इत्येवं चेदपरोक्षा मतिर्वेदान्तवाक्यान्न भवेत्तर्ह्येवं सिद्धवन्निर्देशेन

तत्त्वमसीति श्रुतिः किमर्थं कस्मादादृता आदरवती पुनःपुनर्मातेव पुत्रहितैषिणी श्रावयेदित्यर्थः ॥ ३ ॥

नित्यापरोक्षस्वभावात्मस्वरूपत्वाद्ब्रह्मणो वाक्यादेवापरोक्षज्ञानमारोपितानर्थनिवृत्तिफलमुत्पद्यतइत्याह ।

(४) सिद्धादेवाहमित्यस्माद्युष्मद्धर्मो निषिध्यते ।
रज्ज्वामिवाहिधीर्युक्त्या तत्त्वमित्यादिशासनैः ॥ ४१८ ॥

सिद्धादेवेति । अहमित्यत्राहंशब्दलक्ष्यादपरोक्षतया स्वतःसिद्धादात्मनः सकाशाद्युष्मद्धर्मः परागर्थाहंकारादिस्तत्त्वमित्यादिशासनैर्युक्त्या सहितैः शोधितार्थैरिति यावन्निषिध्यते भ्रमगृहीतपारोक्ष्यसद्वयत्वाकारविलापनेनात्मतत्त्वं प्रतिपाद्यतइत्यर्थः, तत्र दृष्टान्तार्थः स्पष्टः ॥ ४ ॥

तन्निवृत्तिं दृष्टान्ताभ्यां स्पष्टयति ।

(५) शास्त्रप्रामाण्यतो ज्ञेया धर्मादेरस्तिता यथा ।
विषापोहो यथा ध्यानाद् न्हुतिः स्यात्पाप्मनस्तथा ॥ ४१९ ॥

शास्त्रेति । यद्वा नित्यापरोक्षात्मैव ब्रह्म, तदवगमश्चानर्थनिवृत्तिहेतुरित्येतत् क्रमेण दृष्टान्ताभ्यां साधयति । शास्त्रेति । तथा ब्रह्मण एवात्मत्वं नास्तिता अनेन जीवेनात्मनानुप्रविश्य तत्त्वमसीति शास्त्रप्रमाण्यतो ज्ञेयेति दार्ष्टान्तिकं योज्यं ध्यानाद्गरुडादिमन्त्रबीजस्मरणाद्विषापोहः सद्योविषनिवृत्तिस्तथा पाप्मनोऽविद्याद्यनर्थरूपस्य वाक्यादात्मतत्त्वावगममात्रेण सद्य एव न्हुतिर्बाधरूपा निवृत्तिः स्यादित्यर्थः ॥ ५ ॥

ननु वाक्योत्थोऽहं ब्रह्मास्मीति प्रत्ययवदहं करोमीत्यपि प्रत्ययोऽनुभवसिद्धस्तत्र को हेतुरयमेवापरेण बाध्यतइत्यत्रेति शङ्कते ।

(६) सद्ब्रह्माहं करोमीति प्रत्ययावात्मसाक्षिकौ ।
तयोरज्ञानजस्यैव त्यागो युक्ततरो मतः ॥ ४२० ॥

सद्ब्रह्माहमिति । तत्र नियामकं हेतुं वदन्नुत्तरमाह । तयोरिति । युक्तर इति । तस्यायमर्थः । यथा पूर्वप्रवृत्तया यागविनियोजकश्रुत्या पश्चात्प्रवृत्ता लिङ्गादयोऽप्राप्ता एव बाध्यन्ते यथा वा पूर्वमेव प्रकृतेर्विकृतावतिदेशप्राप्तानामङ्गानां विकृतिगतविशेषोपदेशेन पाश्चात्येन बाध इति युक्तत्वेऽप्यनियमो बाध्यबाधकयोः पूर्वापरीभावस्य न तथास्य न्यायस्येति युक्ततरं इत्युक्तमिति ॥ ६ ॥

अत्र कः प्रमाणजः प्रत्ययः को वाऽज्ञानज इति वीक्षायां विविच्य तद्दर्शयति ।

(७) सदस्मीति प्रमाणोत्था धीरन्या तन्निभोद्भवा ।
प्रत्यक्षादिनिभा वापि बाध्यते दिग्भ्रमादिवत् ॥ ४२१ ॥

सदस्मीतीति । सदस्मीति धीस्तत्त्वमसीतिनिर्दिष्टवाक्यप्रमाणोत्था अन्या कर्ताहमित्यादिधीस्तन्निभोद्भवा प्रमाणाभाससमुद्भूताऽविवेकदोषास्कन्दितत्वादित्यर्थः । वाक्यजन्यज्ञानस्यापि प्रत्यक्षाभासबाधनं दृष्टान्तेन बुद्धिमारोहयति । प्रत्यक्षादीति ॥ ७ ॥

ननु ब्रह्मास्मीति बुद्धिवत्कर्तृत्वादिबुद्धेरपि सत्यं वद धर्मं चर स हि कर्ता भोक्तेत्याहुर्मनीषिण इत्यादिवचनाच्छास्त्रसिद्धत्वं तुल्यमिति कथं तस्याबाध्यत्वमित्याशङ्क्याह ।

(८) कुरु भोक्तेति यच्छास्त्रं लोकबुद्ध्यनुवादि तत् ।
सदस्मीति श्रुतेर्जाता बाध्यते ऽन्यैतयैव धीः ॥ ४२२ ॥

कुरु भोक्तेतीति । शास्त्रानभिज्ञानां तदभिज्ञसंगतिहीनानामपि कर्ता भोक्ताहमस्मीति धियः सिद्धत्वात्कुर्वित्यादिशास्त्रं लोकसिद्धार्थानुवादि नानधिगतार्थबोधकमित्यर्थः । सदस्मीति धीस्तु श्रुतेरनन्यसिद्धार्थायाः सकाशाज्जातेत्यर्थः । तस्मादेतयैव निरवकाशया सदस्मीतिश्रुतिजातया धियैवान्या सावकाशानुवादवाक्यजन्या बाध्यते बाधतएवेति वान्वयः ॥ ८ ॥

तदेवं वाक्यादेवापरोक्षज्ञानमात्मविषयमुत्पद्यते तच्च निरपेक्षमेवानर्थनिवृत्तिहेतुरिति स्वमतमुपन्यस्य स्वपथ्यमतमुत्थापयति ।

(९) सदेव त्वमसीत्युक्ते नात्मनो मुक्ततां स्थिराम् ।
प्रपद्यते प्रसंख्यानमतो युक्त्यानुचिन्तयेत् ॥ ४२३ ॥

सदेवेति । प्रसंख्यानं शब्दावृत्तियुक्त्या सहाभ्यसेदित्यर्थः ॥ ९ ॥

उक्तमेवसाधयति ।

(१०) सकृदुक्तं न गृह्णाति वाक्यार्थज्ञोपि यो भवेत् ।
अपेक्षते ऽत एवान्यदवोचाम द्वयं हि तत् ॥ ४२४ ॥

सकृदिति । योपि वाक्यार्थज्ञ एकार्थं सकृदुक्तं न गृह्णाति न जानाति न सम्यक् प्रतिपद्यते यतोऽत एवान्यत्सहकारिभूतमपेक्षते तद् द्वयं वाक्यानुचिन्तनं युक्त्यालोचनं च पूर्वश्लोके वयमवोचामेत्यर्थः ॥ १० ॥

ननु तत्त्वमस्यादिवाक्येषु विधिं नोपलभामहे ब्रह्मात्मभावस्य च स्वत एव सिद्धेर्मुमुक्षोर्नियोगोपि न घटतइत्यत आह ।

(११) नियोगोऽप्रतिपन्नत्वात् कर्मणां स यथा भवेत् ।
अविरुद्धो भवेत्तावद्यावत्संवेद्यता ऽदृढा ॥ ४२५ ॥

नियोग इति । वाक्यमात्रादैकात्म्यस्याप्रतिपन्नत्वात्साक्षात्कृतत्वाभावात्तावन्नियोगोऽविरुद्धो भवेद्यावत्संवेद्यता ब्रह्मात्मैकात्मता ऽदृढा दृढा वा प्रतीयतइति योजना, स नि-

योगः कर्मणामग्निष्टोमादीनां यथा भवेद्वाक्यादवगतीनामपि फलप्राप्त्यइति दृष्टान्तार्थः ॥ ११ ॥

किं च विधिमन्तरेण चेद्ब्रह्मात्मैक्यं वाक्यात्स्वयमेव प्रतिपद्येत तदा यमनियमादिकमनुष्ठीयमानं मिथ्या स्यादुपकार्याभावादित्याह ।

(१२) चेष्टितं च तथा मिथ्या स्वच्छन्दः प्रतिपद्यते ।
प्रसंख्यानमतः कार्यं यावदात्मानुभूयते ॥ ४२६ ॥

चेष्टितमिति । चेष्टितमनुष्ठितं यमादि स्वच्छन्दः स्वेच्छावाननियुक्त इति यावत्,प्रतिपद्यते चेदित्यध्याहारः । आत्मानुभूयते साक्षात् क्रियतइत्यर्थः ॥ १२ ॥

इतोपि प्रसंख्यानं विधितोनुष्ठेयमित्याह ।

(१३) सदस्मीति च विज्ञानमक्षजो बाधते ध्रुवम् ।
शब्दोत्थं दृढसंस्कारो दोषैश्चाकृष्यते बहिः ॥ ४२७ ॥

सदस्मीति । सदस्मीतिशब्दोत्थं विज्ञानमक्षजः प्रत्यक्षः प्रत्ययः कर्त्ता भोक्तेत्येवमाद्याकारो बाधते ध्रुवं निश्चितमेतत् । अक्षजस्य प्राबल्ये हेतुगर्भविशेषणं दृढसंस्कार इति । किं च तेन मुमुक्षुर्दोषै रागादिभिश्च बहिराकृष्यते बहिर्मुखीक्रियते ऽतः प्रसंख्यानं दोषनिवृत्तये च कार्यमित्यर्थः ॥ १३ ॥

न केवलं चिरनिरूढवासनाघटितत्वेन प्रत्यक्षप्राबल्यमपि तु विशेषविषयत्वाच्चेत्याह ।

(१४) श्रुतानुमानजन्मानौ सामान्यविषयौ यतः ।
प्रत्ययावक्षजो ऽवश्यं विशेषार्थे निवारयेत् ॥ ४२८ ॥

श्रुतेति । श्रुतः शब्दोनुमानं लिङ्गज्ञानं विप्रलिप्साभ्रान्त्योरपि तत्र संभाव्यमानत्वाद्वृत्त्यन्तरसंभवाच्च प्रत्यक्षस्य तदभावाद्युक्तं बाधकत्वमित्यर्थः ॥ १४ ॥

यदि वाक्यार्थज्ञानमात्रात्कृतकृत्यता कस्य चिद्दृश्येत तदा प्रसंख्यानकल्पनमनर्थकं स्यान्न तु तथा कश्चिद्दृश्यते अतः प्रसंख्यानमावश्यकमित्याह ।

(१५) वाक्यार्थप्रत्ययी कश्चिन्निर्दुःखो नोपलभ्यते ।
यदि वा दृश्यते कश्चिद्वाक्यार्थश्रुतिमात्रतः ॥ ४२९ ॥

वाक्यार्थेति । तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे तद्धास्य विजिज्ञावित्यादौ वाक्यार्थज्ञानमात्राद्वामदेवादिः कृतकृत्यो दृश्यतइति चेत्तत्राह । यदि वेति । दृश्यते निर्दुःख इत्युत्तरश्लोकगतेनान्वयः ॥ १५ ॥

(१६) निर्दुःखो ऽतीतदेहेषु कृतभावो ऽनुमीयते ।
चर्या नो ऽशास्त्रसंवेद्या स्यादनिष्टं तथा सति ॥ ४३० ॥

निर्दुःख इति । वाक्यार्थश्रवणमात्रात्कश्चिद्यदि निर्दुःखो दृश्यते श्रुतिपुराणादिषु सो ऽतीतदेहेषु कृतभावो ऽनुष्ठितप्रसंख्यानो ऽनुमीयते निर्दुःखत्वलिङ्गेनेत्यर्थः, किं च सकृद्विज्ञातवाक्यार्थस्य विध्यनभ्युपगमे नो ऽस्माकं चर्या परमहंसाश्रमाचारो ऽशास्त्रसंवेद्या स्यात् शास्त्रविहिता न स्यात्तथा सत्यनिष्टं स्याद्यत्याश्रमचर्यापरित्यागेप्यारूढपतितो भवेदित्यनिष्टप्रसङ्ग इत्यर्थः ॥ १६ ॥

कस्तर्हि प्रसंख्यानविधिपक्षे सिद्धब्रह्मोपदेशस्यार्थः स्यादित्यत आह ।

(१७) सदसीति फलं चोक्त्वा विधेयं साधनं यतः ।
न तदन्यत्प्रसंख्यानात्प्रसिद्धार्थमिहेष्यते ॥ ४३१ ॥

सदसीति । त्वं सद्ब्रह्मासीतिवर्त्तमानोपदेशेन फलमिदं साधनविधानार्थमुच्यते यतो यस्मात्सर्वत्र फलमुक्त्वा साधनं विधेयमतो ब्रह्मात्मैक्यकामः प्रसंचक्षीतेति सार्थको विधिर्भवेदित्यर्थः । प्रसंख्यानमेव किमिति विधीयते ज्योतिष्टोमादि कस्माद्ब्रह्मभावाय न विधीयतइत्यत आह । न तदन्यदिति । प्रसंख्यानादन्यदिह वेदान्तेषु प्रसिद्धार्थं सिद्धार्थाभिव्यञ्जनसमर्थं साधनं यत्तन्नेष्यते ज्योतिष्टोमादेर्व्यञ्जकत्वसामर्थ्याभावादित्यर्थः ॥ १७ ॥

पूर्वपक्षमुपसंहरति ।

(१८) तस्मादनुभवायैव प्रसंचक्षीत यत्नतः ।
त्यजन् साधनतत्साध्यविरुद्धं शमनादिमान् ॥ ४३२ ॥

तस्मादिति । किं कुर्वन्, साधनतत्साध्यविरुद्धं त्यजन् साधनं प्रसंख्यानं तत्साध्यं तत्फलमात्मैक्यसाक्षात्कारः । तद्विरुद्धं कर्म निष्ठत्वं, शमनं शमः आदिपदाद्दमोपरत्यादिग्रहः । शमादियुक्तश्च सन्नित्यर्थः ॥ १८ ॥

प्रकरणशेष उत्तराङ्के भविता

## ॥ अथ बालभारतस्य ॥

॥ दशमः सर्गः ॥

दुष्टकर्मफणिदष्टजनाली-
दोषमोषकृतयेऽङ्कमिषेण ।
यः सुधात्विषि विवेश सुधार्थं
स श्रिये भवतु भारतकारः ॥ १ ॥

जातमन्मथमथो मदिराक्षी-
लोचनानि परिचुम्ब्य युवानः ।
तत्क्षणाप्तरुचयो मधुरासु
स्वं मनो विदधिरे मदिरासु ॥ २ ॥

स्त्रीजने धृतमदे मदनाज्ञा-
पालनाक्रमणनूतनदूत्या ।
हुंकृतं कृतमहंकृतिहेला-
लोलयेव सुरयालिरवेण ॥ ३ ॥

हालयालिकुलकूजितगीतै-
रुत्सवं नवमिव प्रथयन्त्या ।
आददे मदभिदे प्रमदानां
कामदेवपृतनाधिपतित्वम् ॥ ४ ॥

लोलषट्पदकनीनिकमक्ष्णा
शोणतां कलयताब्जमयेन ।
वीक्षिता इव रुषा मदिराभि-
र्भीरवो मुमुचिरे मदमन्तः ॥ ५ ॥

काप्युदस्य कुसुमानि रसेन
प्रेक्ष्य बिम्बि च मुखं मधुपात्रे ।
भ्रान्तिभृत्यपि धवेऽम्बुजबुद्ध्या
गृह्णती यदि हृदैव ललज्जे ॥ ६ ॥

सीधुसंनिहितवाससरोजं
नो तथा रसनलोभनमासीत् ।
रागिणां निभृतरागभराणां
बिम्बितैरपि यथा मुखपद्मैः ॥ ७ ॥

विम्बनाद्विधुरियाय सुरायां
वासवारिजमिवाशु विजेतुम् ।
किं जडः सहजवैरवशान्धो
नाङ्गनामुखमिहैव ददर्श ॥ ८ ॥

माधुरीं दधतु निर्भरमासा-
माननाब्जकलनाभिरिमानि ।
इत्युपायिभिरपायिषत प्राग्
वल्लभैर्नवमधूनि मृगाक्ष्यः ॥ ९ ॥

अर्धपीतमवलाभिरलाभि
प्रेयसा मधु नवं मदनं यत् ।
तोषतोऽतिरसदं रसनायां
तन्मुखार्पितमपीति न पीतम् ॥ १० ॥

प्रेमतः खलु तदाजनि यूना-
मैक्यमेव मनसोरिव तन्वोः ।
आस्यसीधुमिषरागरसोर्मि-
क्रीडनान्यत इतोऽपि यदासन् ॥ ११ ॥

प्रेम निष्कपटमस्ति न यूनां
गृह्णतां सुगुणमल्पगुणेन ।
स्वं प्रदाय मुखसीधु मिथस्ते
द्राक् पपुर्यदधरं दयितानाम् ॥ १२ ॥

यद्ददे मधुरसाय सुधाब्जि-
न्माधुरी मृगदृशामधरेण ।
मञ्जिमा तदमुनापि हि तासा-
माननेषु विदधे विधुजेता ॥ १३ ॥

अन्तरन्तरधरं च सुरां च
प्रेयसां रसयतामनुवेलम् ।
एतयोः किमु विदंशपदेऽभूत्
पेयतां च किमवाप न विद्मः ॥ १४ ॥

कामिनि प्रियतमाधरपाना-
रम्भकारिणि निजावसरेऽपि ।
कोपिनीव मदिरारुणकान्तिः
कम्पमाप विततालिरयेण ॥ १५ ॥

प्रेयसीं प्रति धवेऽर्धनिपीत-
सीधुदातरि दधौ क्रुधमन्या ।
संभ्रमास्तचषके मुदिताभू-
न्मङ्क्षु वक्त्रमधुदे च विलक्षा ॥ १६ ॥

रागवृद्धिविदुरं प्रमदाना-
मन्तराशु मदिरा विनिविश्य ।
एकमद्भुतमुदच्छिददुच्चै-
रध्यरोपयदथो मदमन्यम् ॥ १७ ॥

अन्धतामधित मानतमोभि-
र्यो मनःसु सुदृशामपि सैव ।
वीक्षितुं प्रियजनं किल रागो
रागिणां प्रसृमरे स्मरदीपे ॥ १८ ॥

घूर्णमानवपुषां सुमुखीनां
रत्नकुण्डलरुचिर्द्विगुणाभिः ।
स्फीतरागरसवीचिनिभाभि-
र्लोललोचनविभाभिरभासि ॥ १९ ॥

भूषणं भृशमनन्यमनन्यं
योषितामजनि यन्मद एव ।
चारुचीवरवराभरणानि
भ्रंशभाञ्जि जगृहुर्न तदेताः ॥ २० ॥

निर्निमित्तगमनोत्थितिभाजा-
मर्धजल्पितनिरर्थकवाचाम् ।
पुष्पचापहृतमानधनानां
वल्गतु ग्रहिलता महिलानाम् ॥ २१ ॥

मद्यपानमदमञ्जुतनूनां
प्रेयसि प्रस्मरे परिरब्धुं ।
निर्भयोऽजनि मदः प्रमदानां
ह्रीमतीव हृदि संकुचिता ह्रीः ॥ २२ ॥

कोऽपि भीरुमपरां परिरम्भ-
श्रद्धया मधुरसैर्मदयित्वा ।
उद्यतद्विगुणभावभृतं ता-
मेव मन्मथवशेन सिषेवे ॥ २३ ॥

काप्यनिर्वृतमना मधु पीत्वा
कृत्रिमं मदमधत्त मृगाक्षी ।
वीक्ष्य च प्रियतमं स्वमनस्कं
संभ्रमादकृतकं मदमाप ॥ २४ ॥

वीक्ष्य पाटलदृशं प्रियमेष
क्रोधवानिति धिया विनमन्ती ।
अग्रतः स्मिततदङ्घ्रिनखान्त-
र्लम्बमाननिजबिम्बविलोकात् ॥ २५ ॥

काचिदन्ययुवतिभ्रमदत्त-
क्रोधमुक्तमदलब्धविवेका ।
ह्रीमती मदवशात् प्रणतेऽस्मिन्
खेलति स्म कृतकेन मदेन ॥ २६ ॥

युग्मम् ।

दत्तदृक् प्रियमुखप्रतिबिम्बे
प्रोल्लसद्रसवशान्मधु पीत्वा ।
कापि तत्क्रमसमुज्झितमौग्ध्या
प्रौढिमाप्य रमणी रमते स्म ॥ २७ ॥

निःसृतोऽपि हृदयादभिमानः
प्राप्यते क्व पुनरीदृगितीव ।
स्त्रीजनस्य रसनाञ्चलदोला-
खेलनानि वचनैः क्षणमाधात् ॥ २८ ॥

हृद्गृहे मधुवशान्मधुबन्धो-
रर्पिते रतियुतस्य वधूभिः ।
तत्पराभववशादिव मानो
निर्जगाम ह्रियमेव गृहीत्वा ॥ २९ ॥

उद्धुतः पिहितकामधनुर्ज्या-
टंकृतिव्यतिकरोऽजनि यूनोः ।
भावनिर्भरपरस्परहस्तो-
त्तालतालसरसः परिहासः ॥ ३० ॥

ताः प्रतिक्षणविलक्षणतोष-
क्रोधहास्यरुदितादिविकाराः ।
चक्रिरेऽद्भुतमदा मदिराक्ष्यः
प्रीतिमेव हृदये दयितानाम् ॥ ३१ ॥

यद्वदन्त्यशनसंनिभमेवो-
द्गारमित्यनृतमत्र बभासे ।
गीतकं यदुदगारि सुधावत्
पीतसीधुभिरपि प्रमदाभिः ॥ ३२ ॥

गीतकं मृदुपदेन तदानीं
यन्मदेन जगुरम्बुजनेत्राः ।
षट्पदास्तदलपन् खलु लोलाः
सीधुगन्धिमुखपानमिषेण ॥ ३३ ॥

योषितो विदधिरे मृदु गीतं
नृत्यकर्म च रतिर्मृदु चक्रे ।
मन्मथो मृदु ततान च मौर्वी-
नादवाद्यमिह रागिरसाय ॥ ३४ ॥

आवहद्भिरतिरूपगुणस्य
स्फीतिमातिशयिकीं मदयोगात् ।
रागिणां चकृषिरे च मिथोऽङ्गै-
श्चञ्चलानि मदवन्नयनानि ॥ ३५ ॥

कामिनीजनकुचेषु मनोभू-
राज्यपुण्यकलशेषु विलेसे ।
द्वारि वारिजनिभैस्तदनन्य-
प्रेक्षणप्रतिमितैः प्रियनेत्रैः ॥ ३६ ॥

लोचनद्वयमुदारमरीचि-
स्फारवीचिनि तरत् तरुणस्य ।
योषितो वपुषि नाभिगभीरा-
वर्तमग्नमिदमुत्पततु क्व ॥ ३७ ॥

दृङ्मृगद्वयममन्दमनोभू-
काण्डपाततरलं तरुणानाम् ।
श्रोणिशैलशिखरेषु निखिन्नं
चारुखिन्नमिव मुग्धमुखीनाम् ॥ ३८ ॥

अङ्गकान्तरविलोकिनि नेत्रे
भर्तुरैक्षत मुखं प्रसृताक्षी ।
तत्र पश्यति पुनर्वदनाब्जं
न्यङ्मुखीव निभृतं त्रपयाभूत् ॥ ३९ ॥

आननं प्रियतमस्य दिदृक्षु-
र्वीक्षितुं पुनरनीशतमेव ।
काप्यशिक्ष्यत ह्रियैव नवोढा
नेत्रकोणकविलोकितकानि ॥ ४० ॥

अङ्कके प्रियतमस्य मृगाक्ष्या
यत्र यत्र नयनं निपपात ।
विव्यधे मधुसखेन पृषत्कै-
स्तत् तदङ्कितशरव्यमिवाशु ॥ ४१ ॥

मानसानि निभृतेक्षणपीतो-
न्मृष्टमप्यरसयन् नयनोष्ठम् ।
आननैरथ रसस्तरुणानां
पातुमैषि कटरेति रसत्वम् ॥ ४२ ॥

यावदिच्छति मुदाधरपानं
कामुको मदवशंवदचित्तः ।
रक्तया स्वकरकुञ्चितकेश-
स्तावदेव चकृषे मदिराक्ष्या ॥ ४३ ॥

कापि पातुमुदिते हृदयेशे
संभ्रमादपसरन्मृदुमौग्ध्या ।
ह्रीमती च मदनेन च दूना
नार्पयच्च न जहार च वक्त्रम् ॥ ४४ ॥

लोभयन् मलयजादिभिरीशः
संमुखीमकृत कामपि मुग्धाम् ।
येन मौग्ध्यकवचां कुसुमेषु-
र्नैषुभिर्व्यर्थयितुं प्रभुरेनाम् ॥ ४५ ॥

अक्षिपन् शयनमूर्धनि चक्षुः
सुभ्रुवः स्मरवशेन यदैव ।
निन्यिरे स्वयमुदस्य कराभ्यां
तत्र ताः खलु तदैव हृदीशैः ॥ ४६ ॥

संगमेच्छुरपि कापि नवोढा
श्लिष्यतो न न न नेति वदन्ती ।
भीपदे वहतु कम्पिशरीरं
हृष्टरोम तु वरस्य रसाय ॥ ४७ ॥

शिक्षिता मुहुरुपांशु सखीभि-
श्चाटु यत् प्रियवशीकृतिमन्त्रम् ।
तत् प्रकाशयितुमत्र नवोढा
गुप्तमेनमजपद्रसनाग्रे ॥ ४८ ॥

वाणिनीभिरुरुभिः श्रवणान्ता-
कृष्टमुक्ततरलैर्नयनान्तैः ।
ताडिताः स्मरशरैरिव कम्पं
स्वेदमश्रु च भजन्तु युवानः ॥ ४९ ॥

उत्तरीयहरणे परिणेतु-
र्द्राङ्मुधा करमरुद्ध कराभ्याम् ।
कापि गूढरसमूढमनस्का
स्रस्तनीविनि नितम्बदुकूले ॥ ५० ॥

हारकान्तिलहरीं हरिणाक्ष्या
वक्षसोंऽशुकधिया मुहुरस्यन् ।
कोऽपि तत्प्रहसितस्त्रपमाणो
मीलिताक्षमसृजत् परिरम्भम् ॥ ५१ ॥

उत्तरीयहृतिलज्जितयान्यः
सुभ्रुवा दृशि हतोऽब्जदलेन ।
अश्रुतेरितपरागविविक्ता-
लोकनश्च सहसा परिरब्धः ॥ ५२ ॥

प्रेमकोमलरुषा परिरम्भे
ताडितः पुलकितेन करेण ।
वीक्षितो भ्रुकुटिभिश्च नवाश्रु-
स्निग्धनेत्रगतिभिः प्रिययान्यः ॥ ५३ ॥
अङ्गकैरपुलकैः परिरेभे
मानिनी सपदि कंचन दृष्ट्वा ।
मर्मवेदिनममुं तु समन्तुं
व्यक्तसीत्कृतिरसैव चुचुम्ब ॥ ५४ ॥
स्यूतयोः स्मरशिलीमुखमाला-
सूचिकानिचितसंचरणेन ।
विद्रुताद्रुतरुषां द्रुतमासी-
दैक्यमेव मनसोर्ननु यूनाम् ॥ ५५ ॥
रागिणामथ मिथःपतितानि
स्वैरमाननसुधासरसीषु ।
संमदाश्रुसुधया स्नपितानि
क्रोधतापममुचन् नयनानि ॥ ५६ ॥
स्तम्भकम्पगुणजुंषि वपूंषि
स्वेदबिन्दुकलितानि च यूनाम् ।
पुष्पितद्रुमलतावनलक्ष्मी-
मीयुरायुधकृते कुसुमेषोः ॥ ५७ ॥
मङ्क्षु दम्पतिवपूंषि तदात्व-
स्फायमानपुलकैः श्वसितानि ।
गौरवादिव परस्परमभ्यु-
त्थानकर्म विदधुः परिरब्धुम् ॥ ५८ ॥
मन्मथार्तिषु ततासु विवर्ण-
मेवमेव मिथुनानि मिथोऽङ्गम् ।
माधुरीविरहितं स्वरभेदा-
च्चाटु च प्रियकृदेव वितेनुः ॥ ५९ ॥
नष्टसंभ्रमनसो दयितस्य
प्रेयसीकुचशिखासु विलासि ।
लब्धसङ्गमिव पाणिसरोजं
मन्दमन्दमलसत् तदधोऽधः ॥ ६० ॥
विस्तृते प्रियकरे खलु तारे
कान्तया प्रणयमग्रहृदैव ।

मुक्तमाशु समयैकविदैव
स्रस्तनीवि वसनं जघनेन ॥ ६१ ॥
कान्तहृन्निबिडमग्नकुचाना-
मुच्छ्वसत्पुलकपूरितसंधिः ।
भ्रष्टहारवलयः परिरम्भो
रागिणां तदनु निर्विवरोऽभूत् ॥ ६२ ॥
तादृशोग्रपरिरम्भनिरोधा-
ज्जीवितव्यमपि विह्वलमन्तः ।
सुस्थितं प्रणयिनं व्यधुराशु
स्वादिताधरसुधारसधाराः ॥ ६३ ॥
लोचनान्यपि मुखेन्दुमरीचिं
श्वाससौरभभरानपि नासाः ।
आननान्यपि पिबन्त्यधरोष्ठं
रागवृद्धिमसृजन् मिथुनानाम् ॥ ६४ ॥
स्पर्शशालिनि विवृद्धसुगन्धि-
श्वासमालिनि विशेषितकान्तौ ।
ओष्ठपानजुषि सन्मणिताद्यैः
प्रीतिराप्यत मिथो युवयुग्मे ॥ ६५ ॥
लोलता भृशमधारि वधूनां
यत् करैरधरखण्डिनि कान्ते ।
लब्धतादृशरसं रतमेतत्
तेन पल्लवितमेव विरेजे ॥ ६६ ॥
रागवाननुलवं नलिनाक्ष्या
मङ्क्षु चञ्चुरधरं च चुचुम्ब ।
ते परस्परपरिस्फुरदीर्ष्या-
संभ्रमादिव धृतारुणभावे ॥ ६७ ॥
बाहुमूलकृतवाढनखाङ्कः
खण्डिताधरदलो यदरज्यत् ।
तद्रतेषु सुदृशश्चलकाञ्ची-
नूपुरादिभिरदूयत कान्तः ॥ ६८ ॥
छिन्नहारमणिभिः क्षितिपाता-
दुच्छलद्भिरभितः सुरतेषु ।
नृत्यते स्म कृतकृत्यमनोभू-
पुष्पमार्गणगणैरिव यूनाम् ॥ ६९ ॥

सुश्रुते रहसि वाद्यविचित्रे
मेखलावलयनूपुरनादे ।
गीतरीतिषु पुनर्मणितेषु
प्रेयसां पटु ननर्त मनोभूः ॥ ७० ॥

दुर्वहस्तननितम्बभरेयं
मा स्म खेदि रभसेन रतानाम् ।
मूर्ध्नि सुभ्रुवमिति प्रियभाल-
स्वेदवारिभिरसिञ्चदनङ्गः ॥ ७१ ॥

धार्ष्ट्यकर्मविकसन्न्दलज्जाः
सञ्जधैर्यकुपितस्मरलोलाः ।
इत्यभीक्ष्णमहरन्नधरत्वं
कामुकस्य रतिकेलिषु कान्ताः ॥ ७२ ॥

यद्यदैहत हृदैव हृदीश-
स्तत् तदप्रथितमेव वितेने ।
तादृशप्रसरतुष्टमनोभू-
दत्तदिव्यनयनेव नताङ्गी ॥ ७३ ॥

स्वेदवारि कुचकुङ्कुममिश्रं
कामुकोरसि रतश्रमसूतम् ।
कामिनी भृशममान्तमिवान्त-
र्मूर्तिमन्तमनुरागमवर्षत् ॥ ७४ ॥

न्यङ्मुखेन पुरुषायितरङ्ग-
त्कामिनीकुचयुगेन शुचेव ।
दूरितप्रियहृदा विततामिः
स्वेदबिन्दुपटलीभिररोदि ॥ ७५ ॥

मुक्तदन्तमुखचुम्बनलीला
दृग्भिरेव दृश एव पिबन्तः ।
रागिणो रतभरेण मिथोऽन्तः
सीत्कृतैररसयन् रससारम् ॥ ७६ ॥

स्मितरुचि रुदितार्द्रं सान्द्रसीत्कारमन्द्रं
करुणवचनमूचुर्मन्दमित्यङ्गना यत् ।
समजनि दयितानां वाढमुत्साहहेतोः
सरभसरतलीलानिर्दयाणां तदेव ॥ ७७ ॥

क्षणमुपचितचञ्चच्चाटुमन्त्रोक्तिभाजो
रभसभरनिरुद्धश्वासयोराशु यूनोः ।
मनसि रतमनन्यध्यायिनि ध्यायमानं
समजनि सममेव स्निग्धयोः सुप्रसन्नम् ॥ ७८ ॥

यूनः सदम्भपरिरम्भभरै रतान्ते
कामोऽपि मूर्च्छित इव क्षणमेकमस्थात् ।
उज्जीवितः पुनरपि क्रमजायमान-
मन्दातिशीतसुरभिश्वसितानिलेन ॥ ७९ ॥

आलिङ्गनाद्विघटनैकमना रतान्ते
नामुच्यत प्रमदया हृदयाधिनाथः ।
तस्या मुखं च सविशेषरसानुभावं
पश्यन्नवाप स पुनर्नवतामतीव ॥ ८० ॥

हृष्टस्मराणि भृशमुत्सुकतागृहीत-
वासोविपर्ययविलोकमृदुस्मितानि ।
व्रीडाविकुञ्चितविलोलविलोचनानि
यूनां रतान्तललितानि महोत्सवोऽभूत् ॥ ८१ ॥

सुभ्रुवामवयवेषु नखाङ्का
भूषणं विरहिताभरणेषु ।
तद्वपुर्विरहितेषु तदर्था
म्लानिराभरणमाभरणेषु ॥ ८२ ॥

वीक्ष्य तादृशरसद्विगुणश्री-
भासुराणि वदनानि युवानः ।
निन्यिरे मुहुरपि स्मरलोला
लीलयैव दयिताः शयनीयम् ॥ ८३ ॥

उद्यत्तन्द्र इवोपभुक्तरजनीखेदेन चन्द्रोऽप्ययं
डिण्डीरप्रतिवीरमूर्तिररुचितः स्रस्यत्कराडम्बरः ।
अस्तक्ष्माधरमस्तकस्थितिमतिर्मन्ये चचार स्फुर-
त्पारावारतरङ्गरङ्गितमरुत्पूराय दूरादपि ॥ ८४ ॥

इति श्रीजिनदत्तसूरिशिष्यश्रीमदमरचन्द्रविरचिते श्री-बालभारतनाम्नि महाकाव्ये वीराङ्के आदिपर्वणि सुरापानसुरतवर्णनो नाम दशमः सर्गः ॥ १० ॥ :: ::

---

## ॥ अथ बालभारतस्य ॥

### ॥ एकादशः सर्गः ॥

कृतवसतिरजस्रं साधुहृत्पद्मरान्तः
किमपि किमपि वक्ता सत्पुराणोक्तिसूक्तीः ।

भवतु भुवनचित्तप्रीतये ज्ञानलक्ष्मी-
कुहकशुकविहङ्गः सत्यवत्यङ्गजन्मा ॥ १ ॥

कुसुमशरशरालीसंपदा दम्पतीनां
सुरभिणि सुरतान्तस्वेदनीरे निमज्जन् ।
अथ गुरु मिथुनस्य प्रीतये मन्दचारोऽ-
जनि रजनिविरामारम्भशंसी समीरः ॥ २ ॥

व्रज रजनि सरोज स्मेरतामेहि मौनं
कुवलय कलय द्राक् चापलं मुञ्च वार्धे ।
परिहर दिवमिन्दो कोक संश्लिष्य कोकी-
मिति जगति मृदङ्गोऽताडि सूर्याज्ञयेव ॥ ३ ॥

अविरतरतलीलाखेदभाजां मिथोऽपि
श्लथतरपरिरम्भस्यूतसर्वाङ्गकानाम् ।
अवसरममृतोर्मिप्लावितानामिवान्त-
र्मुकुलितनयनत्वात् प्रेयसां प्राप निद्रा ॥ ४ ॥

स्वमनसि परमात्मज्योतिरुज्जीव्य सार-
स्वतलय इव मूर्ते ब्राह्मसंज्ञे मुहूर्ते ।
किल निजनिजशिल्पं शिल्पिनः कल्पयन्तः
किमपि किमपि जन्मापूर्वमुन्मेषमापुः ॥ ५ ॥

दधिमथनविलोलल्लोलदृग्वेणिदम्भा-
दयमदयमनङ्गो विश्वविश्वैकजेता ।
भवपरिभवकोपत्यक्तबाणः कृपाण-
श्रममिव दिवसादौ व्यक्तशक्तिर्व्यनक्ति ॥ ६ ॥

व्रजति रजनिरेषा कामयुक् कामिनीना-
मुदयति दिनमेतद्विप्रयोगप्रयोगः ।
त्यजत झटिति मानं मानिनीनामिवेत्थं
दिशि विदिशि दिनेशोद्दामगीस्ताम्रचूडः ॥ ७ ॥

कथमपि कृतनिद्रा मानिनी स्वप्नदृष्टं
प्रियमुपनतमग्रे ताडयन्ती प्रबुद्धा ।
अतिहृतिषु दयालुः श्लिष्यति स्म स्मरार्ता
शठमपि शयनान्ते गुप्तमागत्य सुप्तम् ॥ ८ ॥

प्रियतममवलोक्य स्वप्नमोहे सपत्न्या
सह कलितविलासं मानिनी नष्टनिद्रा ।
स्फुरति च पुरतोऽस्मिंस्तद्भ्रमेण क्रमेण
स्फटिकभुवि जघान स्वं प्रतिच्छन्दमेव ॥ ९ ॥

चिरमुपचितमानं यामिनीं जागरित्वा
क्षणमथ मृदुनिद्रौ रागिणावेकतल्पे ।
स्वयमनुनयमाप्य स्वप्नतोऽन्योन्यमेव
व्यवसितपरिरम्भौ भेजतुः कां न केलिम् ॥ १० ॥

अजनि युगसहस्रं तत् किमद्यापि भासा-
मुदयति दयितोऽस्यां नेति जातप्रकोपैः ।
रथचरणविहङ्गैर्वीक्षितेवारुणाभि-
श्चिरमलभत दृग्भिः शोणतां वासवाशा ॥ ११ ॥

अपरशिखरिचूलासिन्धुसंबन्धिनीभिः
किमपि कुमुदिनीभिर्द्राक् परीरम्भलुब्धे ।
लसति शशिनि कान्ते कौमुदी कोपनेवा-
द्भुतमलभत कार्श्यं शोणिमानं च किंचित् ॥ १२ ॥

धुरि मधुरिमभाजां कौमुदी हन्त लभ्या
क्व पुनरपि गतेऽस्मिन्नोषधीनामधीशे ।
इति च रुचिचयान्तःसंग्रहं शीघ्रमस्या
व्यतनुत जनतासौ धेनुदुग्धच्छलेन ॥ १३ ॥

अजनि जनितनीराकृष्टियन्त्राभलक्ष्म्या
गगनगहनगर्भे चन्द्रमाः कूपकूपः ।
इह पुनरुपशान्ते तत्प्रभानीरसेके
व्यहरत हरितालीबन्धुरं ध्वान्तमेतत् ॥ १४ ॥

तिमिरकरिकदम्बैरम्बरोत्तानतल्लात्
कवलितमिदमुच्चैर्निर्भरं चन्द्रिकाम्भः ।
अथ पृथुतरताराम्भोजिनीकन्दवृन्द-
क्षयसमयमवेक्ष्य प्रस्थितो राजहंसः ॥ १५ ॥

अभिनवमधुगन्धाबन्धसंधावदैरा-
वतमदमधुपालीपक्षवातप्रणुन्नैः ।
अरुणकिरणदम्भाद्भुग्नसप्ताश्वलीला-
सरसिरुहरजोभिर्दिग्बभौ जम्भजेतुः ॥ १६ ॥

निशि विकसितवन्ति प्रापुरक्षीणि किंचित्
प्रियतमरमणीनां कैरवाणीव निद्राम् ।
रयविलुलिततारालोलरोलम्बभाञ्जि
द्रुतमुषसि विकाशं नीरजानीव भेजुः ॥ १७ ॥

अपृथुपथविलासायासपार्थिंधमाभि-
र्मधुकरनिकराणां मैहिरेयीं गिराभिः ।

अलभत न समन्तान्मीलितुं नीलपङ्के-
रुहगहनदलाली किंचिदाकुञ्चितापि ॥ १८ ॥

सकृदपसृतपत्राभ्यन्तराभ्यन्तरोद्यत्-
परिमलमिलितालिश्रेणिकामण्डलानि ।
उदयति हृदयेशे कङ्कणानीव पङ्के-
रुहमुकुलकराग्रैर्भेजिरेऽम्भोरुहिण्या ॥ १९ ॥

रुचिनिचयममुञ्चत् तारकाचक्रवालं
विधुरपि विधुरत्वं प्राप सूरागमेऽस्मिन् ।
इति चकित इवोच्चैः कम्पितो दम्पतीनां
रतिगृहकुहरान्तर्दुर्गदीप्रोऽपि दीपः ॥ २० ॥

सपदि पदमशेषद्वीपदीपायमान-
द्युमणिकिरणवीथीचक्रवालप्रणुन्नैः ।
भृशमुपशमधूमैरोषधीनामिवोर्वी-
धरनिवहगुहान्तर्ध्वान्तभारैरकारि ॥ २१ ॥

विलसनसदनेभ्यो जग्मुराश्लिष्टकान्ता-
स्तनघनघुसृणाङ्कद्वन्द्वदम्भेन सद्यः ।
स्फुरदुरसि युवानो मन्मथक्ष्मापलीला-
रथ इव पृथुशोभे चक्रयुग्मं दधानाः ॥ २२ ॥

उदितमुदितकान्ताश्लेषपीयूषवीची-
चकित इव कृशानुश्चित्ततश्चक्रनाम्नाम् ।
गुरुतरगिरिशृङ्गोत्सङ्गदुर्गेषु मङ्क्षु
द्युमणिमणिगणोष्मच्छद्मना सद्म चक्रे ॥ २३ ॥

प्रियविरहितकोकीदृक्पयोवाहिनीभिः
सह शममगुरिन्दुग्रावनिःस्यन्दनद्यः ।
किमपि कलितमौनस्तद्वियोगादिव द्राक्
पतिरधित नदीनामेष दीनामवस्थाम् ॥ २४ ॥

द्रुतकृतपदपाताः प्रातरायातवन्तो
नखरदपदलक्ष्मीमण्डिताः खण्डिताभिः ।
विधृतगृहवयस्यागर्वभीताभिराभिः
कृतकसुभगतार्थं पर्यरभ्यन्त धन्याः ॥ २५ ॥

हरिरिव दिवसोऽभूद्विश्वकान्तारचारी
स्फुरदरुणकरालीकेशरश्रीकरालः ।
तिमिरकरटिमीलाभुक्तिरक्तेव दंष्ट्रा-
घटत कुटिलवेषा यन्मुखे सूर्यरेखा ॥ २६ ॥

अतनुत तनुभाजां कामुकः पङ्कजिन्या
मुदमुदयमहीभृन्मूर्ध्नि गुप्तार्घमूर्तिः ।
सततविततमार्गश्रान्तिविश्रान्तिहेतोः
स्थित इव विनिविश्योत्तुङ्गशैलाग्रशृङ्गे ॥ २७ ॥

कृशयति बत सिन्धुर्मत्कलत्राणि तापै-
रयमयममृतांशुं मत्तनूजं दुनोति ।
इति कुपितपयोधिप्रौढवीचीकराग्र-
प्रहत इव स मग्नोऽप्याप भानुर्नभोऽग्रम् ॥ २८ ॥

त्रिभुवनजनताया दृग्भिराशङ्क्यमान-
भ्रमिरहिममरीचिः शोचिषां चाकचक्यैः ।
उदयगिरिशिरोऽग्रे तर्कुयन्त्रप्रपञ्च-
स्फुरिततनुरिवोच्चै रज्यमानो विरेजे ॥ २९ ॥

अहिमकरघरट्टस्फारसंचारलीला-
दलिततिमिरखण्डश्रेणिसंवावदूकैः ।
तरुणतरतमालश्यामलैरुल्लसद्भिः
प्रसृतमुषसि लक्ष्वैः पक्षिणामन्तरिक्षे ॥ ३० ॥

गगनगहनगर्भे दाववत् पूर्वसंध्या-
वतमसतृणजालं ज्वालयित्वास्तमाप ।
तदिह नियतमुग्रः कान्तिलेशोऽपि भानो-
र्दशशतमितशाखश्चित्तचित्राय भावी ॥ ३१ ॥

विधुरुचिशुचिवस्त्राच्छादमुत्क्षिप्य रात्रि-
प्रथितकुसुमपूजाहारितारा कुलं च ।
हरमरकतलिङ्गश्रीसदृक्षेऽन्तरिक्षे
स्नपनमकृत भानुर्भानुकाश्मीरनीरैः ॥ ३२ ॥

द्विषति शशिनि दूने नूनमम्भोजभारैः
स्मितमवतमसौघे म्लानमेव प्रदीपैः ।
अपि सदृशरुचीनामन्तरं किंचिदेत-
ज्जयति जलमयानां तारतेजःस्पृशां च ॥ ३३ ॥

निशि सरसिरुहिण्याः संपदां संप्रदायं
यदहरत तदेष प्रातरायाति सूर्ये ।
विधुरपरमहीभृन्मौलितो दत्तझम्पः
स्फुटमरुचदुदन्वत्तीरपङ्केऽर्घमग्नः ॥ ३४ ॥

अहरत हरगर्वे पर्वतोऽयं प्रतीच्याः
स्फुरिततिमिरभित्तिद्योतिताधोविभागः ।

कपिशपटुजटालीबन्धबन्धुत्वपात्र-
द्युतिपरिचितलेखामाचशीतांशुमौलिः ॥ ३५ ॥
तरणितरुणिमानं प्राप्य रक्ता किल द्यौ-
रिति सितरुचिरब्धौ दुःखितः पश्चिमाद्रेः ।
द्रुतमतनुत झम्पां वार्धकाधिक्यभावाद्
गलितपलितपङ्क्तिः प्रोषिताभीषुदम्भात् ॥ ३६ ॥
व्यरुचदलिकदम्बं हेमरागैः परागै-
र्विकचकमलकोषे बिभ्रदङ्गं पिशङ्गम् ।
हिमरुहिममनोज्ञे भानुमद्भानुवह्नि-
ज्वलितमिव विलीनं वृन्दमिन्दुप्रियाणाम् ॥ ३७ ॥
गगनमलिनिमानं धूमतामानयन्त्यः
स्फुटमदधत भासो भास्वरा भास्करस्य ।
त्रिभुवनभुवनान्तर्दम्पतीनां तदात्व-
ज्वलितविरहकीलाजिह्व[1]कीलालिलीलाम् ॥ ३८ ॥
परिवृढपरिरब्धप्रेयसीतारहारा-
वलिविगलितमुक्ताचक्रवालच्छलेन ।
तरणिरथरथाङ्गक्ष्वेदभीत्येव तारा
गुरुगृहशिखराणि स्पष्टमभ्येतवत्यः ॥ ३९ ॥
व्रतमतनुत मुक्ताहारवृत्तिश्चकोरः
कुमुदसमुदयेन ध्यानमध्यायि किंचित् ।
भृशमरुजदुलूकः कुञ्जवासं तपस्वी
पुनरुदयविभूत्यै यामिनीकर्तुरिन्दोः ॥ ४० ॥
दिनमणिमणिराजीधूतधूमध्वजोग्रा-
दुदयगिरिशिरोऽग्रान्नूनमुड्डीय तप्तः ।
त्वरितमधिरुरोह व्योमवृक्षस्य शाखा-
शिखरमिव पतङ्गः प्राग्दिशो मौलिदेशम् ॥ ४१ ॥
द्विजपतिहुतमग्निर्नव्यमादत्त हव्यं
खलु मुखमखिलानां नाकिनां लोलजिह्वः ।
इति पतिरयमह्नां नूनमह्नाय शक्रा-
दिकसुरमयमूर्तिस्तेजसां स्फूर्तिमाप ॥ ४२ ॥
पतितवति विपाण्डौ पक्वपत्रानुकारे
तुहिनमहसि जातः पल्लवोऽयं नवीनः ।
दिवसविभुनिभेन व्योमवृक्षस्य विश्व-
त्रयसुकृतसुधाभिर्लब्धसेकस्य शङ्के ॥ ४३ ॥

यदकृत जनतासौ भक्तिभारं तदप्य-
ञ्जलिजलनिजबिम्बच्छद्मना पद्मबन्धुः ।
सपदि विपदपास्त्यै मूर्तिमत् पाकपिङ्गं
सुकृतफलमिवास्या हस्तवर्ति व्यधत्त ॥ ४४ ॥
भुवि गतमतिदूरं दीर्घकाण्डाग्रचक्रा-
कृति विततदलालि क्ष्मारुहच्छायवृन्दम् ।
अवहत नवशूरव्याहतध्वान्तसेना-
ततिपतितषदण्डच्छत्रखण्डानुकारम् ॥ ४५ ॥
अपि गृहकुहरेषु ध्वान्तजालानि जाला-
न्तरसरलगतीनां चाकचक्यै रुचीनाम् ।
प्रसृमरहरिणाक्षीरत्नताटङ्कचक्र-
प्रतिफलनविचित्रैश्चित्रभानुर्जघान ॥ ४६ ॥
गहनतरुवनस्थं तामसं त्रासकम्पा-
कुलमिव चलपत्रच्छायपूरच्छलेन ।
द्युमणिरनणुशाखामध्यलब्धावकाशै-
र्दिशि दिशि करदण्डैः खण्डयामास चण्डैः ॥ ४७ ॥
लघुतरविलगर्भादग्रदुर्गान्तरेषु
स्थितमपभयगर्वोद्भावमप्यन्धकारम् ।
दिवसविवशनश्यत्पन्नगश्रेणिचूडा-
मणिकिरणविकाशैस्त्रासयामास भास्वान् ॥ ४८ ॥
दिवसमुखविशेषध्यानसंलीनयोगी-
श्वरविसरशिरोऽधःस्कन्धभाबन्धदम्भात्[1] ।
अपि गुरुषु गिरीणां कन्दरासु प्रविश्य
स्वयमुपचयधीरं ध्वान्तमध्वंसतार्कः ॥ ४९ ॥
रविरविरलसर्पत् सर्पशारीररोचिः
क्वचितमपि नीचैर्विश्वशश्वन्निवासम् ।
अवतमसकुटुम्बं स्फाटिकाद्रिस्फुटत्व-
स्फुटितकरकलापैः प्रापयामास नाशम् ॥ ५० ॥
निचिततरतरङ्गच्छद्मकाश्मीरनीर-
च्छुरणगुणपिशङ्गाभोगमङ्गं वहन्त्याः ।
तदनु कमलिनीनां कामुकः काञ्चनीयं
तिलकमिव विरेजे व्योमलक्ष्मीमृगाक्ष्याः ॥ ५१ ॥
प्रत्यूषयामखुरलीजगर्नर्तितास्त्रौ
ब्राह्मं मुहूर्तमनु सेवितवामदेवौ ।

1 कीलाजिह्वोऽत्राग्निः ।

1 व्याजात् ।

अर्कोदये व्यतनुतामथ दानकेलिं
कृष्णौ कलिन्दतनयासविधे निखिन्नौ ॥ ५२ ॥
रङ्गत्पतङ्गप्रतिमोऽतिमात्र-
गात्रस्थितिर्मेचकचीरधारी ।
विशालचक्षुश्चतुरस्रमूर्ति-
र्रक्षार्हवर्चा मधुपिङ्गकूर्चः ॥ ५३ ॥
पुरस्तयोरस्तसमस्तशत्रु-
विस्तारयोस्तारमतिर्जटावान् ।
द्विजाग्रणीर्जाग्रदुदग्रबाहुः
कश्चित् ततश्चित्तहरोऽभ्युपेतः ॥ ५४ ॥
युग्मम् ।
किमेष मेरुर्घनमेखलावान्
बिभ्रत् किमर्को यमुनां तनूजाम् ।
धृतोरुधूमोऽथ शिखीति ताभ्यां
कृष्णांशुकोऽशङ्कि स पिङ्गकान्तिः ॥ ५५ ॥
प्रमोदमन्दात्मकथावथैतौ
दैत्यारिपार्थौ रभसात् कृतार्थौ ।
समुत्थितौ तस्य पदाब्जयुग्मे
भृङ्गोपमावस्पृशतां नतास्यौ ॥ ५६ ॥
मुदा समुत्थाप्य करेण रेणु-
भ्राजिष्णुभालौ सुभटौ द्विजस्तौ ।
जगाद दन्तांशुभिरंशुकाग्र-
लग्नास्त्रमार्गो यमुनाप्रयोगः ॥ ५७ ॥
पुरा मुरारिप्रतिमप्रतापः
क्षोणीपतिः श्वेतकिसंज्ञयाभूत् ।
सदा कृतैस्तत्क्रतुचक्रवालै-
र्निर्वेदमापुः किल वेदभाजः ॥ ५८ ॥
तपांसि तीव्राणि तदेष तन्वन्
प्रीतेन गौरीपतिनोपदिष्टः ।
अतोषयद् द्वादश हायनानि
धाराभिराज्यस्य नृपः स वह्निम् ॥ ५९ ॥
पुनः पुनानो निजदर्शनेन
तं भूपतिं शंभुरुवाच तुष्टः ।
सदा मदंशेन मुनीश्वरेण
दुर्वाससा ते क्रतुकर्म भूयात् ॥ ६० ॥
इति प्रभोः प्राप्य गिरं स राजा
चक्रे शताब्दीं क्रतुमण्डलानि ।
अवाप्य विप्रान् गिरिशोपमेन
दुर्वाससा संघटिताधिवासान् ॥ ६१ ॥
ततः शताब्दीमखहव्यलाभै-
स्तद्द्वादशाब्दीघृतपानकैश्च ।
हुताशनः श्वेतकिभूपदत्तै-
र्लब्ध्वाद्भुतग्लानिरभूदतेजाः ॥ ६२ ॥
चिरं विरञ्चेरुपदेशमाप्य
ग्लानिच्छिदाये दहनस्तदानीम् ।
स सप्तकृत्वः खलु खाण्डवेऽस्मिन्
दीप्तोऽपि रक्षापुरुषैरलोपि ॥ ६३ ॥
शिखी वनस्यास्य समस्तजन्तु-
मेदांसि पीत्वा लभते स्वतेजः ।
इदं सदा रक्षति तक्षकस्य
वास्तोष्पतिर्मित्रमहो महाहेः ॥ ६४ ॥
अहं स वह्निः शशिहंसकीर्ती
लब्ध्वा भवन्तौ स्वजनीभवन्तौ ।
क्षणेन धक्ष्यामि विरिञ्चिवाचा
तत् खाण्डवं पाण्डवपद्मनाभौ ॥ ६५ ॥
महावने मानवदानवा हि
रक्षांसि रक्षां सततं सृजन्ति ।
तथा हरिस्तक्षकमैत्र्यदक्षो
दाहक्षणे वर्षति खाण्डवेऽस्मिन् ॥ ६६ ॥
ज्वलाम्यलं तद्युवयोरवाप्य
साहाय्यमाहात्म्यमहं वनेऽस्मिन् ।
सखा मदीयः स महाबलोऽपि
कर्मण्यमुष्मिन्नजनिष्ट कुण्ठः ॥ ६७ ॥
युग्मम् ।
कथां पृथासूनुरिमां निशम्य
वह्निं जगाद प्रगलत्प्रमादः ।
नभोनिभे वक्षसि दन्तभासो
गङ्गातरङ्गान् बलिवद्भितन्वन् ॥ ६८ ॥

सुदुर्बलं दोर्बलतो धनुर्मे
मन्दत्वरास्ते तुरगाश्च रथ्या: ।
रथस्तथोदग्ररयासहोऽयं
बाणाश्च तादृग्रणकर्मणोऽल्पा: ॥ ६९ ॥

किमप्यमुष्यापि हरेर्न बाहु-
सामर्थ्यबाहुल्यसहं महास्त्रम् ।
पराक्रमोपक्रमतां त्वदर्थ-
मेतान् पुन: साधय सिद्धिहेतून् ॥ ७० ॥

श्रुत्वेति तस्मै समदत्त वह्नि:
सोमञ्चितीशाद्वरुणेन लब्धम् ।
रथं सिताश्वं कपिकेतुमस्त्रं
गाण्डीवमप्यक्षयतूणयुग्मम् ॥ ७१ ॥

मुरारये चक्रमरातिरौद्र-
माग्नेयमस्त्रं च हुताशनेन ।
अमानवानामपि तानवाय
कौमोदकी नाम गदाप्यदायि ॥ ७२ ॥

नत्वा वह्निमथायुधानि विधुवन्नाबद्धगोधाङ्गुलि-
त्राणो वीरवरस्तदाजनि रथी पार्थो रथाङ्गी तथा ।
तत्साहाय्यसुदु:सहो हुतवहस्तत्र ज्वलन्नुज्ज्वला
ज्वालास्ताण्डवयन् स खाण्डववने चिक्रीड कल्पान्तवत् ।७३।

इति श्रीजिनदत्तसूरिशिष्यश्रीमदमरचन्द्रविरचिते श्री-
बालभारतनाम्नि महाकाव्ये वीराङ्के आदिपर्वणि कृष्णा-
र्जुनास्त्रलाभो नामैकादश: सर्ग: ॥ ११ ॥ :: ::

---

## THE VAIŚESHIKA APHORISMS OF KAṆĀDA.

### THIRD BOOK, FIRST DAILY LESSON.

(*Continued from page 229.*)

Forms of argument. विरोध्यभूतं भूतस्य ॥ ११ ॥

Aph. 11. The opposite non-existent [is a mark] of the existent.

[1] The opposite mark of co-existence [or middle term] is exemplified thus: There has been no rain, a mark of there having been conjunction of air and clouds. In like manner the recitation of a sacred text is opposed to a tumour &c., and accordingly there not having existed a tumour &c. is a mark of there having been recitation of a sacred text. U.

[2] It is exemplified how the opposite may be employed as a middle term. The non-existent, or non-co-existent opposite, or in other words the non-coexistence of the opposite, is a mark—for these words are to be supplied —of the existent, of that which has come into or remains in existence. The deduction assumes the following form. This wood is combustible when conjoined with fire, because gems &c. [said to have the power of extinguishing fire] do not co-exist, as in the case of other substances reduced to ashes. This country is free from dangerous snakes, for though there are snakes there are no ichneumons, as is the case in certain similar countries. V.

भूतमभूतस्य ॥ १२ ॥

Aph. 12. That which has been [is a mark] of that which has not been.

[3] Another opposite argument is exemplified. A tumour &c. which has been is a mark of the recitation of a sacred text which has not been; so also there being conjunction of wind and clouds is a mark that there has not been rain; there having been a fire is a mark that there has not been extinction of fire by means of gems, &c. Similar instances may be inferred. U.

[4] That which has been, that which has come into or remains in existence, is a mark that there has not been its opposite, a mark, in other words, of the non-co-existence of its opposite. For examples:—This wood is not co-existent with gems &c., for it burns; This country has no ichneumons, for it has harmless snakes; and so forth. V.

---

[1] विरोधिलिङ्गमुदाहरति । अभूतं वर्षं भूतस्य वाय्वभ्रसंयोगस्य लिङ्गमेवं स्फोटादेर्विरोधी मन्त्रपाठ: तथा चाभूतमनुत्पन्नं स्फोटादिभूतस्य मन्त्रपाठस्य लिङ्गम् ॥

[2] विरोधिनो व्याप्यत्वमुदाहरति । अभूतम् असन्निहितं विरोधि विरोध्यसन्निधानमिति यावत् भूतस्य जातस्य स्थितस्य वा विरोधिनो लिङ्गमिति शेष: अयमनुमानप्रकार: अयं काष्ठो दाहवान् वह्निसंयुक्तत्वे सति मण्याद्यसन्निधानात् भस्मीभूतवस्त्वन्तरवत् अयं देशो निर्भयाहिमान् अहिमत्त्वे सति नकुलशून्यत्वात् तादृशनिश्चितदेशान्तरवदित्यर्थ: ॥

[3] विरोधिलिङ्गस्योदाहरणान्तरमाह । भूतं स्फोटादिकम् अभूतस्य मन्त्रपाठस्य लिङ्गम् एवं भूतो वाय्वभ्रसंयोगो ऽभूतस्य वर्षस्य लिङ्गम् एवं भूतो दाहो ऽभूतस्य मण्यादिसमवधानस्य लिङ्गमेवमन्यदप्यूह्यम् ॥

[4] भूतमुत्पन्नं स्थितं वा अभूतस्य विरोधिनो विरोध्यसन्निधानस्य लिङ्गमित्यर्थ: यथायं काष्ठो मण्याद्यसन्निहितो दाहवत्त्वात् अयं देशो नकुलशून्य: भीतिरहिताहिमत्त्वात् ॥

भूतो भूतस्य ॥ १३ ॥

Aph. 13. That which has been [is a mark of something opposite] which has not been.

[5] Another mark of co-existence [or middle term] is exemplified. There is sometimes inference from an existing opposite to an existing opposite, as when on seeing a snake swelling with anger it is inferred that there is an ichneumon behind a bush. In this case the snake excited is in existence, and the ichneumon hidden by the bush is in existence. There is therefore an existent as the mark of an existent object. On the other hand, rain cannot exist at the same time as conjunction of clouds and wind, nor can tumours &c. co-exist with recitation of sacred texts. U.

प्रसिद्धिपूर्वकत्वादपदेशस्य ॥ १४ ॥

Aph. 14. [These forms of inferrence are valid] because the mark is accompanied by knowledge [of invariable co-existence.]

[6] Knowledge is recollection of invariable co-existence (vyápti). The mark of this co-existence is the middle term. There is therefore expressed by that member of the syllogism which states the argument, a middle term characterised by invariable co-existence the subject of recollection. Therefore there is, as has been stated, an argument accompanied with general knowledge. In the inference, then, which has been stated of the soul as a governing element from its instruments such as the organ of hearing, and of the soul as a substratum from qualities such as knowledge, there is an invariable co-existence [a true major premiss]; but when you [our opponent] attempted to prove, by the mark of being an effect of the body, that knowledge is an effect of the body, there was no invariable co-existence.

It may be asked, What is this invariable co-existence? It is not merely unfailing connection, for it is not known that it can only be affirmed of the unfailing that it is the not inhering in same substratum as absolute non-existence of that which has to be proved [viz. what is denoted by the major term]; we cannot always assert that it non-inherence in what is not the substratum of that which is to be proved; and smoke &c. have a substratum which is not that of that which is to be proved. Nor is it dependent existence, for that is either non-existence of the mark of co-existence [middle term] in the absence of that which is to be proved [viz. the major term which has to be proved of the minor], or existence of the mark which is argued from the existence of that which co-exists [viz. of what is denoted by the major term]. And if you say that anything can be definitely affirmed or denied of smoke &c., because it does not exist where an ass does not exist and exists where an ass exists, we deny it, for such would be the case only if we found any definite relation.

Nor is it connection with a whole. If it be the connection of the middle term with the major term, such connection does not exist in the case of smoke &c., where the middle and major terms are not co-extensive [for though fire exists wherever smoke exists, smoke is said not always to exist where fire exists, not being found in red-hot iron.] Let it be connection of the whole middle term with the major, but this is impossible for there does not exist in the whole of the middle term connection with the individuals denoted by major [e. g. all fire does not exist in a hearth, in a cattle-station, a mountain &c. but exists in the whole aggregate of places where smoke exists.] Let it be connection of the whole major with the whole middle term. This also it cannot be, for it is impossible that there should be connection of the one thing to be proved, with the whole means of the proof [mark of co-existence.] In the case of the middle and major terms not being co-extensive, through the particular connection of the middie and major terms, this definition would be too narrow.

---

[5] लिङ्गान्तरमुदाहरति। विद्यमानेनैव विरोधिना विद्यमानस्यैव वि-
रोधिनः क्वचिदनुमानं यथा विस्फूर्जन्तमहिं दृष्ट्वा झाटान्तरितस्य नकु-
लस्य अत्र हि विस्फूर्जन्नहिर्भूतो विद्यमानो नकुलो ऽपि विद्यमान एवेति
भवति भूतो भूतस्य लिङ्गमित्यर्थः वर्षवाय्वभ्रसंयोगयोस्तु नैकस्मिन् काले
विद्यमानता न वा स्फोटमन्त्रपाठयोरिति ॥

[6] प्रसिद्धिः स्मर्यमाणा व्याप्तिः अपदेशो हेतुवचनं तेन स्मर्यमाण-
व्याप्तिविशिष्टो हेतुर्हेत्ववयवेनोपनयावयवेन वोच्यते इति भवति प्रसि-
द्धिपूर्वको ऽपदेश इति तथा च श्रोत्रादिना करणेनाधिष्ठातुः ज्ञानादिना
च गुणेन तदाश्रयस्यात्मनो यदनुमानमुक्तं तत्र सर्वत्र व्याप्तिरस्ति त्वया
तु शरीरकार्यत्वेन हेतुना ज्ञानस्य यच्छरीरगुणत्वं साधितं तत्र न व्याप्तिरिति
भावः। ननु केयं व्याप्तिर्न तावदव्यभिचारितसम्बन्धः अव्यभिचारस्य
साध्यात्यन्ताभावसामानाधिकरण्यानधिकरणत्वस्य केवलान्वयिन्यप्रसिद्धेः
साध्यानधिकरणानधिकरणत्वस्यापि केवलान्वयिसम्भवात् धूमादेरपि य-
त्किञ्चित्साध्यानधिकरणाधिकरणत्वात्। नाप्यविनाभावः। स हि साध्यं
विना ऽभावो वा हेतोः अविना साध्यान्वये सति भावो वा धूमस्यापि
क्वचिद्रासभाभावे ऽभावात् रासभसत्त्वे सत्त्वाच्च नियतव्यतिरेको नियत-
श्चान्वयो विवक्षित इति चेत् न नियमस्यैव निरूप्यमाणत्वात् नापि का-
र्त्स्न्येन सम्बन्धः स यदि कृत्स्नस्य साध्यस्य साधनसम्बन्धः स विषमव्याप्ते धूमा-
दावपि नास्ति अथ कृत्स्नस्य साधनस्य साध्यसम्बन्धः सो ऽप्येकस्य साध्यस्य कृ-
त्स्नसाधने सम्बन्धाभावादनुपपन्नः अथ कृत्स्नस्य साध्यस्य कृत्स्नेन साधनेन स-
म्बन्धः एतदप्ययुक्तं न हि कृत्स्नेन साधनेन कृत्स्नस्य साध्यस्य क्वचिदपि सम्ब-
न्धः सम्भवति प्रत्येकमेव साध्यसाधनयोः सम्बन्धात् विषमव्याप्ते चाव्याप्तेः
नापि स्वाभाविकः सम्बन्धः स्वभावो हि स्वस्य भावो वा स्वयमेव भावो वा
तत्र तज्जन्यत्वञ्चेत्तद्विवक्षितार्थःतदा समवायलक्षणायां व्याप्तावव्याप्तेः तदाश्रि-
तत्वञ्चेत्तद्विवक्षितार्थः तदापि समवाये ऽव्याप्तिः न हि समवायः क्वचिदाश्रितः
संयोगस्यापि हेतुधर्मधूमत्वाद्यनाश्रितत्वात् हेतुधर्मधूमत्वाद्यजन्यत्वाच्च
नाप्यनौपाधिकः सम्बन्धः उपाधेरेव दुर्वचत्वात् सुवचत्वे ऽपि दुर्ग्रहत्वात्
सुग्रहत्वे ऽप्यन्योन्याश्रयत्वात् साध्यव्यापकत्वे सति साधनाव्यापकत्वादेर्व्या-
प्तिग्रहाधीनग्रहत्वात् नापि सम्बन्धमात्रं व्याप्तिः व्यभिचारिसम्बन्धस्यापि
देशविशेषकालविशेषगर्भतया व्याप्तिरूपत्वे ऽपि तज्ज्ञानस्यानुमितावतन्त्र

Nor is it natural conjunction. For the nature of a thing is the condition of that thing, or its condition in itself. If by this we mean its being produced in such and such a place, our definition will be too narrow to apply to invariable co-existence characterised by co-inherence. If by this we mean its co-inherence in any thing the definition will be too narrow to apply to co-inhesion, for co-inhesion is not co-inherent with anything else, [otherwise there would be an infinite regression which it is impossible to conceive.] Nor is it non-accidental conjunction for conjunction neither inheres in, nor is produced by, smokiness the attribute of the middle term. The accidental is difficult to explain and were it easy, would be difficult to conceive. And were it easy to conceive, yet as the middle and major terms exist in one another, the major being universal the conception of universality &c. in the middle would depend upon the conception of the invariable co-existence [or major premiss.] Invariable co-existence is not merely connection. For since fallacious connection includes particular place and particular time, knowledge of that is not required in the inferential process even in the notion of the form of the invariable concomitance, and we ought to say that the assertion of such co-existence rests only on such knowledge as will warrant an inference.

Nor is invariable co-existence the inhesion [of the mark of co-existence] in the same substratum with that which is to be proved as co-existing, that which is thus to be proved not failing to exist through non-existence of that of which it is to be proved [viz. the minor term]. For fire may not exist where that which has smoke exists, as volcanic fire can but be non-existent in a kitchen hearth. For in such an instance as 'This is conjunct for it is a substance' the definition would be inapplicable, for the mark of co-existence would inhere in the same substratum as non-existence of conjunction. It may be said that invariable co-existence is the inhesion [of the mark of co-existence, i. e. the middle] in the same substratum as that which is to be proved as co-existent [i. e. the major], not failing to exist where there exists a common substratum opposed to the non-existent; for, on this supposition, there will not be contradiction of the non-existence [of such mark] where there is absolute non-existence of conjunction. This we deny, for the non-existence [of such mark] is contradictory to absolute non-existence of conjunction, for otherwise it will be useless to imagine any kind of distinctive attribute, as it is not imagined that there is any distinctive attribute showing the existence of the produced and the non-eternal.

---

त्वात् अनुमितिकारणीभूतज्ञानविषयव्याप्तेरेव निरूपयितुमुचितत्वात् नापि साधनवन्निष्ठात्यन्ताभावप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिः वह्नेरपि धूमवन्निष्ठात्यन्ताभावप्रतियोगित्वात् न हि धूमवति महानसे पर्वतीयवह्नेर्नात्यन्ताभावः इदं संयोगि द्रव्यत्वादित्यादौ संयोगात्यन्ताभावस्य साधनसमानाधिकरणत्वादव्यापकताप्रसङ्गात् प्रतियोगिविरुद्धस्वसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिः संयोगात्यन्ताभावस्यापि प्रतियोगिविरुद्धत्वाभावादिति चेन्न संयोगात्यन्ताभावस्यापि प्रतियोगिविरुद्धत्वात् अन्यथा ऽवच्छेदभेदकल्पनावैयर्थ्यात् न हि कृतकत्वानित्यत्वयोर्वृत्त्यर्थमवच्छेदभेदः कल्प्यते नापि साध्यवैयधिकरण्यानधिकरणत्वं केवलान्वयिनि साध्यवैयधिकरण्याप्रसिद्धेः साध्यानधिकरणाधिकरणत्वं हि तत् नापि यत्सम्बन्धितावच्छेदकरूपवत्त्वं यस्य तस्य वा व्याप्तिः वह्नित्वस्यापि धूमसम्बन्धितावच्छेदकत्वात् अधिकदेशवृत्तितया तन्न तथेति चेत् व्यापकतावच्छेदकस्याधिकदेशवृत्तेरप्यभ्युपगमात् धूमत्वस्यापि गगनतलावलम्बिधूमवृत्तितयाधिकदेशवृत्तित्वात् अत एव एतद्वारणार्थं विशेषणमिति चेत् तर्हि यद्व्याप्यतावच्छेदकं तदेव सम्बन्धितावच्छेदकत्वेनानुमतं तथा चात्माश्रयः । एवञ्च यत् सामानाधिकरण्यावच्छेदकरूपवत्त्वं यस्य तस्य सा व्याप्तिरित्यप्युक्तदोषाक्रान्तमिति चेत् अत्रोच्यते अनौपाधिकः सम्बन्धो व्याप्तिः अनौपाधिकत्वन्तु यावत् स्वव्यभिचारिव्यभिचारिसाध्यसामानाधिकरण्यं यावत्स्वसमानाधिकरणात्यन्ताभावप्रतियोगिप्रतियोगिकात्यन्ताभावसमानाधिकरणसाध्यसामानाधिकरण्यं वा यावत् साधनाव्यापकाव्याप्यसाध्यसामानाधिकरण्यमिति निरुक्तित्रयार्थः यावत्साध्यव्यापकव्यापकत्वं वा बहुव्रीहिणा दुर्ग्रहमिदमिति चेत् अत एव भूयोदर्शनापेक्षा तर्कापेक्षा च । यद्वा साधनसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिः अत्यन्ताभावश्च वह्नित्वादिसामान्यावच्छिन्नप्रतियोगिताको विवक्षितः तेन महानसीयधूमे पर्वतीयवह्न्यत्यन्ताभावसामान्याधिकरण्ये ऽपि न दोषः धूमवति वह्निर्नास्तीति प्रतीतेरनुदयात् द्रव्यत्वन्तु संयोगित्वात्यन्ताभावासमानाधिकरणमेव न हि भवति द्रव्यं न संयोगीति प्रतीतिः संयोगानां प्रत्येकमव्याप्यवृत्तित्वे ऽपि संयोगित्वसामान्यस्य व्याप्यवृत्तित्वात् तस्यैव च व्यापकत्वात् । नन्वनौपाधिकत्वमुपाधिविरहः उपाधिरेव दुष्परिकथनीय इति चेन्न साध्यव्यापकत्वे सति साधनाव्यापकस्योपाधित्वात् तदुक्तं साधने सोपाधिः साध्ये निरुपाधिरुपाधिः । ननु केवलसाध्याव्यापकोपाध्यव्यापकत्वमेतत् यथा वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूतरूपवत्त्वम् स श्यामो मित्रातनयत्वादित्यत्र शाकपाकजत्वम् न ह्युद्भूतरूपवत्त्वं प्रत्यक्षव्यापकम् आत्मनि गुणकर्मादौ च प्रत्यक्षे तदभावात् नापि शाकपाकजत्वं श्यामत्वव्यापकं काककोकिलजलदजम्बूफलादौ श्यामे तदभावादिति चेन्न पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापकत्वस्य तथा विवक्षितत्वात् पर्यवसितञ्च साध्यं यद्धर्मावच्छेदेनोपाधेर्व्यापकत्वमभग्नं तद्धर्मावच्छिन्नम् प्रकृते बहिर्द्रव्यत्वावच्छेदेन प्रत्यक्षस्योद्भूतरूपवत्त्वं व्यापकम् अन्वयव्यतिरेकाभ्यां गृहीतम् औत्पत्तिकनरश्यामत्वावच्छिन्नं साध्यं प्रति चरकसुश्रुतादौ शाकपाकजत्वस्य व्यापकत्वावधारणादेवमन्यत्राप्यूह्यम् । ननु नायमुपाधिपदवाच्यः यद्धर्मो ऽन्यत्र भासते स उपाधिः यथा स्फटिकादौ जवाकुसुमादि विषमव्याप्तोपाधौ च व्याप्यत्वाभावात्तद्धर्मस्य साधनाभिमते ऽनवभासनादिति चेत् सत्यं समव्याप्त एवार्द्रेन्धनप्रभववह्निमत्त्वादौ मुख्य उपाधिपदप्रयोगः अन्यत्र तु गौणः गुणः व्यभिचारोन्नायकत्वं यद्धि यद्व्यापकव्यभिचारि तस्य तद्व्यभिचारित्वनियमात् भवति च साध्यव्यापकस्योपाधेर्व्यभिचारिसाधनं अतः साध्यव्यभिचारीति यद्व्यापकाव्याप्यं यत् तत् तदव्याप्यम् इति व्याप्यत्वासिद्ध्युन्नायकत्वं वा सत्प्रतिपक्षोत्थापकत्वं वा पक्षे उपाधेः साध्यव्यापकस्याभावात् साध्याभावसाधनात् तदुक्तं वाद्युक्तसाध्यनियमच्युतौ ऽपि कथकैरुपाधिरुद्भाव्यः पर्यवसितं नियमयन् दूषकताबीजसाम्यात् इति उन्नीयते चायं बाधव्यभिचारानुकूलतर्काभावप्रतिकूलतर्कैः । यत्तु यद्व्यभिचारित्वेन साधनस्य साध्यव्यभिचारित्वं स उपाधिरिति तत्र तृतीया न करणे न हेतौ न प्रकारे न लक्षणे न तु यद्व्यभिचारित्वेन ज्ञातेन साधनस्य साध्यव्यभिचारित्वं ज्ञायते इति पूरणीयम् अज्ञायमानोपाध्याव्यापनात् स्फुटव्यभिचारिस्थलोपाध्यव्यापनात् योग्यतागर्भा तु दुर्निरूपा व्यभिचारोन्नायकत्वमव्यवस्थाप्य उपाध्युद्भावनाशक्यत्वाच्च पक्षेतरत्वन्तु उपाधिलक्षणाक्रान्तमपि स्वव्याघातकत्वान्नोपाधिः यथा पक्षे सन्दिग्धानैकान्तिकत्वम् यदि हि तत्र न सन्देहस्तदा न पक्षता यदि पक्षता तदा सन्देहस्यावश्यकतया सन्दिग्धानैकान्तिकत्वध्रौव्यात् अवशिष्टं मयूखे ऽन्वेष्टव्यम्॥

Nor is invariable co-existence the non-inherence [of the mark of co-existence] in a different substratum from that which has to be proved, since we do not know that there is any substratum different from the substratum of that which has to be proved when the co-existence is affirmed, for that would be a substratum of all that exists not in that which is to be proved as a substratum.

Nor is invariable co-existence the possession of a form characterised by that with which there is connection. For on that supposition the notion of fire would be the notion of that which is characterised by there being connection with smoke. This is not the case, for [the notion of fire] is more extensive [fire existing where there is no smoke, as in a heated lump of iron.] Were it the case there would be observed a wider extension [of the notion of fire] characterised by invariable co-existence [with smoke], there being a wide extension of the notion of smoke [or vapour] inasmuch as there exists smoke [or vapour] pendant on the surface of the sky [cf Megha-dúta, v. 5. where it is said that a cloud is a mass of vapour, light, water, and air.] If a distinction be made for the purpose of excluding such instances, it must be allowed that that which is characterised by invariable concomitance is allowed to be characterised by existence of connection, and there is knowledge independent of that which is known.

If the statement that invariable concomitance is the possession of a form determined by a common substratum, has been thus shown to be fallacious, we may here proceed to state that invariable co-existence is a not-accidental connection. By being not accidental is meant inhering in the same substratum with that which has to be proved, this being fallaciously inferred only where that which inheres [the mark of co-existence, or middle term] is itself fallaciously inferred. Or, in other words, it is inhesion in a common substratum with that which is to be proved, such substratum being non-existent absolute non-existence of that which is non-existent where there is absolute non-existence of a substratum common to that which inheres [viz. the mark of co-existence.] The meaning of the last two expressions is inhesion [of the mark of co-existence or middle term] in the same substratum with that which has to be proved [i. e. the major which has to be proved of the minor] neither more nor less extensive than the means of proof [or middle term.] In other words, it is extensiveness as extensive as that which is to be proved. If you object that this is difficult to understand because a relative compound *(bahuvríhi)* has been employed, you must look at it and consider it again.

In other words invariable concomitance is inherence in the same substratum with that which is to be proved, that which is to be proved not failing to exist by reason of the absolute non-existence of a substratum common to the means of proof [or mark of co-existence.] By absolute non-existence is meant non-existence of that which has as a common characteristic the notion of fire &c. It is therefore no objection to our definition that the smoke of a culinary hearth exists in a common substratum with non-existence of the smoke of a mountain, for there never arises the conviction that there is not fire in that which has smoke. Substantiality never has a common substratum with absolute non-existence of connection, for we have the conviction that there is no substance which is not conjunct. Though conjunctions singly are not included, the notion of conjunction in general is so included, and substantiality may be predicated universally [i. e. wherever there is conjunction it may be affirmed that it is conjunction of substances.]

It may be objected that the non-accidental *(anaupádhikatva)* is the not existing as a special condition and that it is difficult to describe any condition which is not a cause *(upádhi)*. This we deny, for an accident [or special condition] is that which does not invariably exist in the mark of co-existence, whereas it does invariably exist in that which is to be proved. Accordingly it has been said: "A special condition is accidental in relation to a mark of co-existence, and not accidental in relation to that which is to be proved." It may be objected "This definition does not include an accident which is only not invariably present in that which is to be proved, as in the instance, "Air is perceptible, for there exists in it perceptible feel," where the having an appreciable colour is [a special condition of that which has to be proved, i. e. of the perceptibility of air]; or in the instance, "He is black, for he is the son of Mitrá [a low-caste woman] where the production [of blackness] by eating herbs [might be a special condition, of blackness.] For possession of an appreciable colour is not invariably concomitant with perceptibility, since it does not exist in the perceptibility of soul, quality and action; nor is the being produced by cooking herbs invariably concomitant with blackness, inasmuch as it does not exist in a black crow, cuckoo, cloud, fruit of the rose-apple, &c." This objection is not valid. For it was meant that a special condition is invariably present in that which is finally determined as what is to be proved, and not invariably present in the means of proof. That which is finally determined as that which is to be proved, has the property of the universal presence in it of the conditions which are special. The possession of appreciable colour, in the first instance, is universally present in the per-

ceptible qualified by external substantiality, and may be predicated affirmatively and negatively [of the perceptible ; i. e. it may be asserted that wherever there is appreciable colour there is preceptibility, and wherever there is not appreciable colour there is not perceptibility of external substances.] In the second instance we may make a similar inference from its being observed on the authority of the Charaka and the Susruta [two medical works] that the fact of being produced by eating [bad] herbs is an attribute universally present in that which is to be proved, which is determined to an accidental darkness in men.

It may be said that this is not the meaning of the word 'accident' [*upádhi*] ; for an 'accident' is that of which the attributes appear in some other object, as a China rose &c. [seen reflected] in crystal &c. ; as in the universal co-existence of one thing with another, which other thing does not always co-exist with the first [as in the co-existence of fire with smoke which is said to be invariable, while that of smoke with fire is not invariable] the accident not being inseparable, does not appear in the means of proof [or middle term.] This is true. The term 'special condition' is used in its primary meaning only where there is a mutually implied co-existence of fire produced from moist faggots [for wherever there is such fire there is also smoke, and *vice versá*]. In other cases the word is employed in a secondary sense. The secondary sense expresses that which is casual or accidental, according to the rule that that is accidental in an object which is accidental to that which is universally present in that object. The evidence of concomitance is accidental in an accident inseparable from that which is to be shewn to be concomitant. Hence from the hypothesis that the evidence of concomitance is accidental to that which is to be proved, and according to the rule that which is not included in what is invariably concomitant with an object is not included in that object, we are led to conclude that there is no proof of such concomitance, or there results the possibility of a contrary argument. For an accident of the subject of the conclusion is not invariably concomitant with that which is predicated, and thus there may be an argument of the absence of what is to be proved. It has accordingly been said: "The disputant may bring forward an accident determining another conclusion, inconsistent with the establishment of the conclusion maintained by the speaker, such accident being equally a source of the fallacious," and this may be upheld by arguments adverse to the absence of erroneous and fallacious arguments in its favour.

It may be said that that is an accident by the accidentalness of which the argument is accidental in relation to that which is to be proved. But in this definition the third [or instrumental] case is not employed to express instrument, means, form, or definition. Nor is the construction to be completed thus, That is an accident by the accidentalness of which *being known* the argument *is known* to be accidental in relation to that which is to be proved. For this definition would not apply to obvious cases of the accidental, not applying to the unknown accidental. A fitting sense is difficult to discover in these words, since it is impossible to express an accident, without stating that it is casual or accidental. The being other than the subject, though included in the definition of an accident, is not [itself the definition of] an accident, for it would involve a contradiction. Where there is an uncertain fallacy of uncertainty in the subject, as in such a case if it be not uncertain it is not the subject, and since, if it be the subject it must be doubtful, there is certainty of doubtful uncertainty. That which remains to be said on this topic may be sought in the Mayúkha. U.

A. E. G.


## ADVERTISEMENT.

Sanskrit scholars are aware that several commentaries are in existence on the Vedánta Aphorisms, totally differing from each other. Similarly, there are divergent commentaries on the Nyáya, Bhakti, Yoga, and I have resolved to publish the four principal commentaries (Bháshyas) on the Sútras, by monthly issues of 8 pages each of large paper and in clear types. Annual subscription in advance with postage, Rs. 12.

Gentlemen wishing to subscribe to this valuable Magazine are requested to send their subscriptions or notice of their intentions, for unless 100 subscribers are secured, it cannot be started.

BENARES: *February*, 1870. } HARISCHUNDRA.


*Communications of a literary nature should be addressed to the* EDITOR : *all letters on business, to the Proprietors,* MESSRS. E. J. LAZARUS & CO., *to whom Drafts should be made payable.* ADVERTISEMENTS *will be inserted at four annas per line.*

*Annual subscription, in advance, including postage, Rs.* 12.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

# काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रताच्यवाक्पूर्वापरपचद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

# THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 48. Benares, May 2nd, 1870. Vol. IV.


## ॥ उपदेशसहस्र्याः पद्यप्रबन्धः ॥

सिद्धान्तमुपक्रमते ।

(१९) नैतदेवं रहस्यानां नेतिनेत्यवसानतः ।
क्रियासाध्यं पुरा श्राव्यं न मोक्षो नित्यसिद्धतः ॥ ४३३ ॥

नैतदेवमिति । किं वेदान्तेषु प्रसंख्यानं साक्षाद्विधीयते, किं वा वर्त्तमानोपदेशेन फलवचनानुपपत्त्या कल्प्यतइति, तत्र नाद्य इत्याह । रहस्यानामिति । उपनिषद्वाक्यानामित्यर्थः । नेतिनेतिदृश्यनिषेधद्वारा तदवधिमात्रे ब्रह्मात्मस्वरूपे पर्यवसानदर्शनाद्वेदान्तानां न विध्यर्थतेत्यर्थः । द्वितीयं प्रत्याह । क्रियासाध्यमिति । यत्क्रियासाध्यं फलं तत्पुरा पूर्वकाण्डे श्राव्यं नोपनिषत्सु, अत्र श्रूयमाणो मोक्षो न क्रियासाध्यः, कुतो नित्यसिद्धतो ऽसाध्यत्वादित्यर्थः ॥ १९ ॥

तत्त्वमस्यादिवाक्यमपरोक्षाद्वितीयब्रह्मात्मज्ञानद्वारा तदज्ञानं तदध्यस्तं च दुःखित्वादि संसारं निवर्त्तयतीति वक्तुमज्ञानाध्यस्तं दुःखादीत्यत्र दृष्टान्तमाह ।

(२०) पुत्रदुःखं यथाध्यस्तं पित्रा ऽदुःखे स्वआत्मनि ।
अहंकर्त्ता तथाध्यस्तो नित्यादुःखे स्वआत्मनि ॥ ४३४ ॥

पुत्रेति । अदुःखे ज्वरादिदुःखरहितइत्यर्थः । दार्ष्टान्तिकमाह । अहंकर्त्तेति । नित्यादुःखे सदा दुःखादिसंसाररहिते स्वे स्वरूपे आत्मनि निरुपाधिके ऽहंकर्त्ता साभासान्तःकरणाविविक्तो दुःखादिधर्मको ऽविवेकलक्षणया ऽविद्यया तथाध्यस्त इत्यर्थः । अहंकर्त्तेति पाठे स्वआत्मनीत्यत्र दुःखादिरिति शेषः ॥ २० ॥

आत्मनो ब्रह्मस्वभावाज्ञानेनाध्यस्तः संसारस्तत्स्वभावज्ञानमात्रान्नेतिनेति तत्त्वमसीति च शास्त्रोत्थान्निवर्त्तते तदात्मनः सर्वक्रियाधिकारनिवृत्तेः सुषुप्ताविव पुनरध्यासबीजाभावात्कृतकृत्यस्य न प्रसंख्यानविध्यवसर इति फलितमाह ।

(२१) सोध्यासो नेतिनेतीति प्राप्तवत्प्रतिषिध्यते ।
भूयोध्यासविधिः कश्चित् कुतश्चिन्नोपपद्यते ॥ ४३५ ॥

सोध्यास इति । प्राप्तवदिति वतिप्रयोगाद्वस्तुवृत्त्या प्राप्त्यभावादारोपितत्वं द्रढयति ॥ २१ ॥

नन्वविषये ब्रह्मात्मनि विषयधर्माणां दुःखित्वादीनां कथमध्यासः संभाव्यते यतः पुरोवस्थिते विषयभूते शुक्तिकादौ रजताद्यध्यासो दृष्ट इत्याशङ्क्य व्यभिचारान्नैवं नियम इत्याह ।

(२२) आत्मनीह यथाध्यासः प्रतिषेधस्तथैव च ।
मलाध्यासनिषेधौ खे क्रियेते च यथा ऽबुधैः ॥ ४३६ ॥

आत्मनीति । यथा देहव्यतिरिक्तात्मवादिनामात्मनीह पुरःस्थिते देहे जरामरणाद्यध्यासस्तत्प्रतिषेधश्च यथा चेन्द्रियाविषयेपि खे मलाध्यासनिषेधावबुधैः क्रियेते तथैव च प्रत्यगात्मनि ब्रह्मण्यप्यविषये संसाराध्यासनिषेधौ स्यातामित्यर्थः । आत्मनीह तथाध्यास इति पाठे दृष्टान्तदार्ष्टान्तिकपरतयोत्तरार्द्धपूर्वार्द्धौ स्पष्टार्थौ । अधिष्ठानस्वरूपमात्रस्फुरणमध्यासे ऽपेक्ष्यते न विषयत्वेन स्फुरणं, तदिह स्वप्रकाशे आत्मनि स्वतःसिद्धमिति नानुपपत्तिरिति भावः ॥ २२ ॥

प्राप्तवत्प्रतिषिध्यतइत्युक्तं प्रपञ्चयति ।

(२३) प्राप्तश्चेत्प्रतिषिध्येत मोक्षो ऽनित्यो भवेद् ध्रुवम् ।
अतो ऽप्राप्तनिषेधो ऽयं दिव्यग्निचयनादिवत् ॥ ४३७ ॥

प्राप्तश्चेदिति । प्रमाणसिद्धश्चेत्संसारः प्रतिषिध्येत तर्हि संसारबन्धनिवृत्तिरूपस्य मोक्षस्यागन्तुकत्वाद् ध्रुवं निश्चितं मोक्षो ऽनित्यो भवेत्परमार्थवृत्त्यात्मगतस्य बन्धस्य परमार्थत एव निवृत्तौ तस्यात्मनो ऽवस्थान्तरापत्त्या विकारित्वादनित्यत्वमावश्यकं, तथा ऽनादिभावरूपस्य बन्धस्य परमार्थत्वे तन्निवृत्तिरेवासंभाविनी सादित्वाभ्युपगमे तु तस्यात्मनैव कृतत्वान्निवृत्तसजातीयस्य पुनस्तस्मिन् पूर्ववदुत्पत्त्युपपत्तेरनित्यो मोक्षः प्रसज्येतैवेति बन्धस्याविद्यकत्वमवश्यमेष्टव्यं, तस्य च ज्ञानादेव निवृत्तेर्निरर्थकं प्रसंख्यानमित्यभिप्रेत्योपसंहरति । अत इति । यथा नान्तरिक्षे न दिव्यग्निश्चेतव्य इति पृथिव्यामिवाग्निचयनमन्तरिक्षादावारोप्याप्राप्तमेव प्रतिषिध्यते, तथा संसारबन्धरहितएवात्मनि तदारोपनिषेधाविति दृष्टान्तेनाह । दिव्यग्नीति । आदिपदादाकाशमालिन्यं लौकिकं गृह्यते ॥ २३ ॥

आत्मनि बन्धसंबन्धबोधकप्रमाणाभावादपि न तत्र बन्धस्य सत्यताप्राप्तिरस्तीत्याह ।

(२४) संभाव्यौ गोचरे शब्दः प्रत्ययो वा न चान्यथा ।
न संभाव्यौ तदात्मत्वादहंकर्तुस्तथैव च ॥ ४३८ ॥

संभाव्य इति । अयमर्थः । आत्मनि बन्धसंबन्धबोधकं प्रमाणं शब्दः प्रमाणान्तरं वा सर्वथापि नोपपद्यतइत्याह । शब्दः प्रत्ययो वेति । प्रत्ययः प्रमाणान्तरजन्यः शब्दो वा प्रत्ययो वा लोके गोचरे विषये संभाव्यः संभावनायोग्यो न चान्यथा विषयत्वायोग्ये तथा च षष्ठी जातिगुणक्रियादिशब्दप्रवृत्तिनिमित्तरहितस्यात्मनो न शब्दगोचरत्वं संभाव्यते येनायमात्मा संसारीति बोधः शब्दादुत्पद्येतेति । तथा रूपादिहीनत्वाच्च बाह्येन्द्रियवर्गस्तस्मिन् क्रमते ऽत एव न तत्स्वरूपसंबद्धतया लिङ्गविशेषाग्रहणादनुमानार्थापत्ती तस्मिन् संभवतो ऽवयवाद्यभावान्नोपमानं भावरूपत्वादेव नानुपलब्धिरपीति प्रतीतिमात्रं परिशिष्यतइति न प्रमाणसिद्धो बन्धसंबन्ध इति, यतो न संभाव्यावात्मन्यपि शब्दप्रत्ययाविति, किं च शब्दप्रत्यययोः प्रमाणत्वाभिमतयोस्तथैव चाहंकर्तुः प्रमातृत्वाभिमतस्य च तदात्मत्वाद्ब्रह्मात्मत्वाच्च तद्गोचरत्वमुपपद्यते नह्यागन्तुकयोः शब्दप्रत्यययोरहंकर्तुर्वा चिदात्मनः पृथक् स्वरूपमस्ति स्वात्मनि तु क्रियानुपपत्तिरित्यर्थः ॥ २४ ॥

तस्मादध्यस्तनिषेध एव वक्तव्य इति सिद्धमित्याह ।

(२५) अहंकर्त्रात्मनि न्यस्तं चैतन्ये कर्तृतादि यत् ।
नेतिनेतीति तत्सर्वं साहंकर्त्रा निषिध्यते ॥ ४३९ ॥

अहंकर्त्रेति । चैतन्ये चित्स्वरूपआत्मनि यदहंकर्त्रा साभासान्तःकरणाविवेकेन कर्तृतादि न्यस्तमारोपितं तत्सर्वं नेतिनेतीति निषिध्यते साहंकर्त्रा अहंकर्त्रा सहेत्यर्थः ॥ २५ ॥

अध्यस्तनिषेध एव चेच्छास्त्रेण क्रियते कथं तर्ह्यात्मनः स्वरूपोपलब्धिरित्यत आह ।

(२६) उपलब्धिः स्वयंज्योतिर्दृशिः प्रत्यक् सदक्रियः ।
साक्षात्सर्वान्तरः साक्षी चेता नित्यो ऽगुणो ऽद्वयः ॥ ४४० ॥

उपलब्धिरिति । अनुपलब्ध्यादिस्वरूपत्वे प्रमाणाभावादितरत्र च साक्षादित्यादिनोत्तरार्द्धसूचितश्रुतीनां प्रमाणत्वात्स्वप्रकाश एवात्मा सदा स्वतःसिद्ध इत्यर्थः ॥ २६ ॥

नन्वात्मात्मीयमिति च द्वयमहंममप्रत्ययगोचरत्वेन प्रसिद्धं, तथा सति कथमात्मा स्वतःसिद्ध इत्याशङ्क्योपाधिवशात्तथा प्रसिद्धिरित्याह ।

(२७) सन्निधौ सर्वदा तस्य स्यात्तदाभो ऽभिमानकृत् ।
आत्मात्मीयं द्वयं चातः स्यादहंममगोचरः ॥ ४४१ ॥

सन्निधाविति । अभिमानकृदहंकारस्तस्य चिदात्मनः सर्वदा सन्निधौ सति तदाभश्चैतन्यप्रकाशयुक्ततया तदाकारः स्यादतो हेतोरात्मात्मीयं द्वयं च स्यादहं ममेति व्यवहारगोचर इत्यर्थः । तथा च साभासान्तःकरणं तद्वृत्त्यविवेकादात्माहमिति ममेति च भासमानोपि स्वतःसिद्ध एव स्वभावत इति भावः ॥ २७ ॥

एवमहंप्रत्ययादेरन्यविषयत्वोपपादनेन संभाव्यो गोचरे शब्द इति श्लोकोक्तं प्रत्ययागोचरत्वमात्मनः प्रतिपादितमिदानीं शब्दस्यापि विषयान्तरं दर्शयंस्तदगोचरत्वमुपपादयति ।

(२८) जातिकर्मादिमत्त्वाद्धि तस्मिन् शब्दास्त्वहंकृति ।
न कश्चिद्वर्तते शब्दस्तदभावात्स्वआत्मनि ॥ ४४२ ॥

जातीति । तस्मिन्नहंकृत्यहंकारे साभासे हि निश्चितं जातिकर्मादिशब्दप्रवृत्तिनिमित्तवत्त्वाच्छब्दाः प्रवर्तन्ते तदभावात्प्रवृत्तिनिमित्तजात्याद्यभावात्स्वे स्वरूपभूते आत्मनि निरुपाधिके कश्चिदपि शब्दो न प्रवर्त्तते तं विषयीकुर्वन्नित्यर्थः । अत आत्मा स्वतःसिद्ध इति भावः ॥ २८ ॥

स्वतःसिद्धस्वरूपे आत्मनि प्रवृत्तिनिमित्तजात्याद्यभावात्कश्चिदपि शब्दो न प्रवर्त्तते चेत्कथं तस्य वेदान्तवेद्यतयौपनिषदत्वमुद्घुष्यतइत्यत आह ।

(२९) आभासो यत्र तत्रैव शब्दाः प्रत्यग्दृशिं स्थिताः ।
लक्षयेयुर्न साक्षात्तमभिदध्युः कथं चन ॥ ४४३ ॥

आभास इति । यत्राहंकारादावाभासश्चैतन्यप्रतिबिम्बोदयस्तत्रैवाभासाविविक्तान्तःकरणादौ वाचकत्वेन स्थिता आत्मा-

दिशब्दाः प्रत्यग्दृशिं प्रत्यक्तया भासमानं दृशिमात्मानं शुद्धं लक्षयेयुः लक्षणया ज्ञापयेयुर्न तु तं साक्षादभिदध्युः कथं चन विशेषणादिप्रकारेणापीत्यर्थः । अतो नौपनिषदत्वप्रसिद्धिवि-रोध इति भावः ॥ २९ ॥

कथं नाभिदध्युरित्यत्र हेतुमाह ।

(३०) नह्यजात्यादिमान् कश्चिदर्थः शब्दैर्निरुच्यते ।
नहीत्यर्द्धेन ॥ ३० ॥

ननु लक्षणयापि यत्र शब्दस्य तात्पर्यं स एव शब्दार्थस्त-था चात्मादिशब्दानामहंकारातिरिक्ते प्रत्यगात्मनि चेद्वृत्तिः कथं तर्हि लोका अहंकारादावात्मशब्दं प्रयुञ्जते इत्यपेक्षाया-मुपचारादिति सदृष्टान्तमाह ।

(३१) आत्माभासो यथा ऽहंकृदात्मशब्दैस्तथोच्यते ॥४४४॥
उल्मुकादौ यथाग्न्यर्थाः परार्थत्वान्न चाञ्जसा ।

आत्माभास इति श्लोकेन । अहंकृदहंकारो वस्तुतो ऽनात्माप्यात्माभास आत्मवदस्मच्छब्दप्रत्ययालम्बनो भासते यथा, तथात्मादिशब्दैरपि यथाप्रतिभासमुच्यते वस्तुगत्या तु शब्दप्रत्यययोः शुद्ध एवात्मनि पर्यवसानं यथाग्न्यर्थाः शब्दा दहतीत्यादय उल्मुकं दहत्ययो दहतीत्युल्मुकादौ प्रयुज्यमा-ना अञ्जसा साक्षादुल्मुकादौ न च पर्यवस्यन्ति तेषां दाहा-द्याश्रयत्वानुपपत्तेर्दहत्यादिशब्दानां परार्थत्वात्तदभिव्यक्ताग्न्य-र्थत्वात्ते ऽग्न्यादावेव पर्यवस्यन्ति तथाहंकारस्यात्माभिव्यञ्जकत्वार्थ-त्वात्तस्मिन् जडे परिच्छिन्ने पराधीनप्रकाशे आत्मादिशब्दा-श्चित्सदानन्दानन्ताद्यर्था अनुपपद्यमाना विचार्यमाणे शुद्ध एव पर्यवस्यन्तीति सर्वमुपपन्नमित्यर्थः ॥ ३१ ॥

आभासोत्रेति श्लोके सिद्धान्तिनाभासोङ्गीकृतः सत्त्वभे-दविपर्यासविशिष्टतया भासमानः परमार्थो ऽपरमार्थो वेति वादिविप्रतिपत्त्या संशये न परमार्थत इति स्वसिद्धान्तं वक्तुं दृष्टान्तमाह ।

(३२) मुखादन्यो मुखाभासो यथा ऽऽदर्शानुकारतः ॥४४५॥
आभासान्मुखमप्येवमादर्शाननुवर्त्तनात् ।

मुखादन्य इति । यथा मुखाभासो मुखप्रतिबिम्ब आदर्शा-नुकारत आदर्शभावाभावयोरनुकारादादर्शान्वयव्यतिरेकानु-विधायित्वादिति यावद्, मुखाद्ग्रीवास्यादनागमापायितया-स्थितादन्यो न पुनः स्वरूपेणेति योज्यं, तथा सति बिम्बचेष्टया विनापि प्रतिबिम्बं चेष्टेतेत्यर्थः । आभासान्मुखमप्येवमन्यदेव कुत आदर्शाननुवर्त्तनादादर्शनिरपेक्षसत्तास्फुरणयोगादित्यर्थः । तथा च ग्रीवास्थस्यैव मुखस्यादर्शे प्रतिबिम्बितस्यादर्शस्थता-वैशिष्ट्येन भासमानत्वमेवाभासत्वं तच्च न सत्यं मुखवियुक्ता-दर्शे तिर्यङ्गिरीक्ष्यमाणे वा तस्मिन्नदर्शनाद् नाप्यसदपरोक्षप्र-तिभासात्तस्मादनिर्वचनीय एवाभासस्तस्माच्चान्यन्मुखमिति भावः ॥ ३२ ॥

दार्ष्टान्तिकमाह ।

(३३) अहंकृत्यात्मनिर्भासो मुखाभासवदिष्यते ॥४४६॥
मुखवत् स्थित आत्मान्यो ऽविविक्तौ तौ तथैव च ।

अहंकृतीति । अहंकृत्यहंकारे आत्मनिर्भासश्चेतनावत्त्वा-वभासो मुखाभासवन्मुखान्मुखप्रतिबिम्बवच्छुद्धादात्मनो भिन्न इष्यते आत्मा शुद्ध आभासादन्यः स्मृतो ज्ञातः प्रतिबिम्बा-न्मुखवदित्यर्थः । मुखस्य मुखाभासस्यादर्शस्य चाभासाश्रयस्य प्रतीतितो भेदेपि वस्तुतो भेदाभाववदात्मात्माभासतदाश्र-यान्तःकरणादीनां प्रतिभासतो भेदेपि वस्तुतो नात्मातिरिक्तं किं चिदस्तीति न परमार्थो भेद इत्यभिप्रेत्याह । अविविक्तौ तौ तथैव चेति, । तावात्मात्माभासौ तथैव मुखमुखाभासा-विव वस्तुतो ऽविविक्तौ परमार्थभेदरहितावित्यर्थः । चका-रादाभासाश्रयान्तःकरणं च न तद्विविक्तमिति योज्यम् ॥ ४३३ ॥

एवं चिन्मात्रतन्त्रानाद्यविद्यायां तत्कार्ये चाहंकारादौ प्रतिबिम्बितं तदेव चिदात्मस्वरूपमुपाधिस्थतावैशिष्ट्याध्या-सवशात्संसारीति स्वमतमुक्त्वा तद्दृढीकरणायैकदेशिमतं दूष-यितुमुत्थापयति ।

(३४) संसारी च स इत्येक आभासो यस्त्वहंकृति ॥४४७॥
वस्तुच्छायास्मृतेरन्यद् माधुर्यादि च कारणम् ।

संसारीति । यस्त्वहंकृत्याभासो ऽस्माभिः पृथगुक्तः स एव संसारीत्येके मन्यन्त इत्यर्थः । नन्वाभासस्यावस्तुत्वात्कथं तस्य बन्धमोक्षभागितया संसारित्वमित्याशङ्क्याभासशब्देन चिच्छा-याया अभिप्रेतत्वात्तस्याश्च वस्तुत्वान्नानुपपत्तिरित्यभिप्रेत्याह । वस्तुच्छायेति । छाया वस्तुपरमार्था, "नाक्रामेत्कामतश्छायां गुर्वादे"रिति स्मृतेरिति योजना । तथा याज्ञवल्क्यः ।

"देवर्त्विक्स्नातकाचार्यराज्ञां छायां परस्त्रियः ।
नाक्रामेद्रक्तविण्मूत्रष्ठीवनोद्वर्तनादिकम्" ॥

इति । न केवलं स्मृतिवचनादेव छायाया वस्तुत्वावग-मो ऽस्त्यन्यच्च कारणं माधुर्यादिच्छायायामासीनस्य मुखे मा-धुर्योपलब्धेः शैत्योपलब्धेश्चेत्यर्थः ॥ ३४ ॥

पुनरेकदेशिमतत्रयमाह ।

(३५) ज्ञैकदेशो विकारो वा तदाभासाश्रयः परे ॥४४८॥
अहंकर्त्तैव संसारी स्वतन्त्र इति के चन ।

ज्ञैकदेश इति । ज्ञस्य चित्सदानन्दपरमात्मन एकदेशः सं-सारी "ममैवांशो जीवलोके जीवभूतः सनातन" इति स्मृतेरित्ये-

के। अग्निविस्फुलिङ्गदृष्टान्तेन "सर्वएव आत्मानो व्युच्चरन्ती"-ति श्रुतेः, परमात्मनो विकारः संसारी,त्यपरे तु तदाभासाश्रयश्चिदात्माभासविशिष्टो ऽहंकार एव संसारी तन्मनो दिशंदिशं पतित्वेति श्रुतेरित्याहुरित्यर्थः। भाट्टादिमतमाह। अहं कर्तैवेति। स्वतन्त्रो न परमात्मांशादिरूप इत्यर्थः ॥ ३५ ॥

बौद्धमतमाह।

(३६) अहंकारादिसंतानः संसारी नान्वयी पृथक् ॥४४९॥
इत्येवं सौगता आहुस्तत्र न्यायो विचार्यताम्।

अहंकारादीति। संतानो ऽविरलोदयतया ऽविच्छिन्नानि क्षणिकज्ञानान्येवात्मा संसारी न ततः पृथगन्वय्येको विज्ञानोत्पत्तिविनाशद्रष्टास्तीत्येवं सौगता आहुरित्यर्थः। एवमुक्तेषु पक्षेषु वस्तुविषयत्वाद्विरोधाच्च विकल्पसमुच्चययोरसंभवादन्यतमस्यैव कस्य चिदुपादेयत्वमथ वा ऽस्मदुक्तस्य ब्रह्मैवाविद्ययाहंकारादिगताभासाविवेकात्संसारीत्येतस्येति निर्द्धारणे न्यायो विचार्यतामित्याह। तत्रेति ॥ ३६ ॥

प्रासङ्गिकीं संसारिचिन्तां हित्वा प्रकृतमाभासनिरूपणं प्रतिजानीते।

(३७) संसारिणां कथा चास्तां प्रकृतं त्वधुनोच्यते ॥ ४५० ॥

संसारिणामिति। स्पष्टम् ॥ ३७ ॥

प्रकृतमाभासमेव निरूपयन्नादौ मुखाभासदृष्टान्तत्वेनापरमार्थमुक्तं विशदयति।

(३८) मुखाभासो य आदर्शे धर्मो नान्यतरस्य सः।
द्वयोरेकस्य चेद्धर्मो वियुक्ते ऽन्यतरे भवेत् ॥ ४५१ ॥

मुखाभास इति। योयमादर्शे मुखाभासो दृश्यते स किं मुखादर्शयोरन्यतरस्य कस्य चिद्धर्म्मः किं वा मुखस्यैव धर्मो ऽथ वा द्वयोरपि धर्मो वस्त्वन्तरं वा किं चिदिति विकल्प्याद्यं निराकरोति। धर्मो नान्यतरस्य स इति। एतदेव स्पष्टयति। द्वयोरिति। द्वयोर्म्मध्ये एकस्यान्यतरस्य चेदाभासो धर्म्मः स्यात्तदा वियुक्ते ऽन्यतरे सति दर्पणवियुक्ते मुखे तद्गतरूपादिवद्दर्शनगोचरो भवेद् मुखवियुक्ते वा दर्पणे दृश्यो भवेन्न चैवमस्त्यतो नान्यतरस्य धर्म्म इत्यर्थः ॥ ३८ ॥

कल्पान्तरमुत्थापयति।

(३९) मुखेन व्यपदेशात्स मुखस्यैवेति चेन्मतम्।
नादर्शानुविधानाच्च मुखे सत्यविभावतः ॥ ४५२ ॥

मुखेनेति। दूषयति। नेति। यद्यपि मुखाभास इति मुखेन व्यपदिश्यते तथापि न मुखधर्म्म आभासः, आदर्शानुविधानाद् मुखैकधर्म्मत्वे तदयोगात्, किं च सत्यपि मुखे दर्पणवियुक्ते ऽविभावतो ऽदर्शनादित्यर्थः ॥ ३९ ॥

तृतीयं कल्पमनूद्य प्रत्याह।

(४०) द्वयोरेवेति चेत् तन्न द्वयोरेवाप्यदर्शनात्।
अदृश्यस्य सतो दृष्टिः स्याद्राहोश्चन्द्रसूर्ययोः ॥ ४५३ ॥

द्वयोरेवेति चेदिति। द्वयोरप्यदर्शनादेवेति संबन्धः, नहि मुखादर्शयोर्वियुक्तयोराभासो दृश्यते नापि संयुक्तयोरयं धर्मो यथाकथंचन संयुक्तयोरपि तद्दर्शनप्रसङ्गान्न तथा दृश्यते तस्मान्न द्वयोर्धर्म्म इत्यर्थः। तर्ह्यस्तु परमार्थवस्त्वन्तरमेवाभास इति चतुर्थपक्षं दृष्टान्तेन शङ्कते। अदृश्यस्येति। सतो विद्यमानस्यैव सर्वैः करणैरदृश्यस्य राहोश्चन्द्रे सूर्ये चोपाधौ कदा चिद्दृष्टिर्दर्शनं यथा तथा मुखाभासस्यापि वस्तुभूतस्य सतो मुखसन्मुखवद्दर्पणोपाधौ दर्शनं स्यादित्यर्थः ॥ ४० ॥

वैषम्येण दूषयति।

(४१) राहोः प्रागेव वस्तुत्वं सिद्धं शास्त्रप्रमाणतः।
छायापक्षे त्ववस्तुत्वं तस्य स्यात्पूर्वयुक्तितः ॥ ४५४ ॥

राहोरिति। चन्द्राद्युपरागात्प्रागेव ज्योतिःशास्त्रप्रमाणतः पुराणादिशास्त्रप्रमाणतो वा राहोः सैंहिकेयस्य वस्तुत्वं सिद्धं निश्चितं नेह तथा निश्चायकं प्रमाणमस्तीति शेषः। नहि मुखदर्पणयोः संबन्धात्पूर्वमूर्ध्वं वा तद्व्यतिरिक्तवस्तुता मुखाभासस्य केन चित्प्रमाणेन क्वापि संभावितेत्यर्थः। राहोर्वस्तुत्वमङ्गीकृत्य दार्ष्टान्तिकाननुगुणत्वमुक्तमिदानीं तस्यापि नास्ति वस्तुत्वमित्याभासस्य वस्तुत्वे नायं दृष्टान्त इत्याह। छायापक्षे त्विति। स्याद्भूम्यादिच्छाया राहुरितिकेषां चित्पक्षः, तस्मिन् छायापक्षे तु तस्य राहोरवस्तुत्वं स्याद्,मुखाभासो य आदर्श इत्यादौ पूर्वोक्तयुक्तितो युक्तिसंचारादित्यर्थः ॥ ४१ ॥

वस्तुच्छायास्मृतेरित्यत्र छायाया वस्तुत्वे स्मृतिः प्रमाणमित्युक्तं तत्राह।

(४२) छायाक्रान्तेर्निषेधोयं न तु वस्तुत्वसाधकः।
नह्यर्थान्तरनिष्ठं सद्वाक्यमर्थान्तरं वदेत् ॥ ४५५ ॥

छायाक्रान्तेरिति। न त्वित्यत्र छायाया इति शेषः, ननु छायोल्लङ्घनप्रतिषेधपरमपि वचनं तस्या वस्तुत्वमपि बोधयिष्यतीति चेत्, तत्र वक्तव्यं, साक्षादेवोतार्थादिति, नाद्य इत्याह। नहीति। एकस्य वाक्यस्योभयार्थत्वे वाक्यभेदप्रसङ्गादित्यर्थः। न द्वितीयो, निषेधस्य प्राप्तिमात्रसापेक्षत्वान्निषेध्यविषयादेव वस्तुत्वाभावे निषेधानुपपत्तिरित्यत्र नियामकाभावादिति द्रष्टव्यम् ॥ ४२ ॥

यदप्युक्तं माधुर्यादिकार्यदर्शनादर्थक्रियाकारित्वेन छायाया वस्तुत्वमिति तदप्यन्यथासिद्धमित्याह।

(४३) माधुर्यादि च यत्कार्यमुष्णाद्रव्याद्यसेवनात् ।
छायाया न त्वदृष्टत्वादपामेव च दर्शनात् ॥ ४५६ ॥

माधुर्यादीति । छायायामुपविष्टस्य यन्माधुर्यादिकार्यं दृश्यते तदुष्णाद्रव्याद्यसेवनान्निमित्ताच्च तु छायाया हेतुभूतायास्तन्माधुर्यादि कार्यं कुतो, ऽदृष्टत्वात्तप्यमानशिलाकूटच्छायायां माधुर्यादेरदर्शनादपामेव च दर्शनादयं धर्मस्तास्वेवाव्यभिचारादतः छायायामुपविष्टस्य निवृत्तातपसंसर्गस्य स्वाभाविकस्योदकमाधुर्याभिव्यक्तौ छाया मधुरेति विभ्रम इत्यर्थः ॥ ४३ ॥

तद्देवं यथा मुखं तदाभासस्तदाश्रयश्चेत्येते त्रयो व्यवहारदृष्ट्या विभक्ता अवभासन्ते न परमार्थदृष्ट्या तथात्मा तदाभासस्तदाश्रयश्चेत्यर्थत्रयं मिथो विलक्षणं गम्यते व्यवहारदृष्ट्येति दार्ष्टान्तिकमाह ।

(४४) आत्माभासाश्रयाश्चैव मुखाभासाश्रया यथा ।
गम्यन्ते शास्त्रयुक्तिभ्यामाभासासत्त्वमेव च ॥ ४५७ ॥

आत्माभासाश्रयाश्चैतमिति । आत्मा त्वंपदलक्ष्यश्चिद्धातुस्तस्यानाद्यविद्यातत्कार्यप्रतिबिम्बिततया तदुपाधिस्थत्ववैशिष्ट्यं जीवत्वमाभासो ऽविद्यातत्कार्योपाधिराश्रय इति त्वंपदार्थः । शास्त्रयुक्तिभ्यामिति । "रूपंरूपं प्रतिरूपो बभूव इन्द्रो मायाभिः पुरुरूप ईयते अनीशया शोचति मुह्यमान" इत्यादिश्रुते"रेको वशी सर्वभूतान्तरात्मैकं रूपं बहुधा यः करोती"-त्यादिस्मृतेश्च । तथा बुद्ध्यादेर्विषयान्तस्यागमापायिनो दृश्यस्य नित्यसिद्धसाक्ष्यात्मन्यध्यासव्यतिरेकेण स्फुरणसत्तयोरनुपपत्तेरित्यादियुक्तेश्च प्रत्यगात्मन एकस्यैव सत्त्वमाभासादेरसत्त्वं परमार्थसत्त्वाभावश्च गम्यते निश्चीयतइत्यर्थः ॥ ४४ ॥

नन्वेवं सति त्वन्मते संसारमोक्षयोराश्रयाभावादनुपपत्तिरेव नह्यात्मतदाभासतदाश्रयाणामन्यतमस्य मिलितानां वा संसाराद्याश्रयत्वं घटतइति शङ्कते ।

(४५) न दृशेरविकारित्वादाभासस्याप्यवस्तुतः ।
नाचितित्वादहंकर्तुः कस्य संसारिता भवेत् ॥ ४५८ ॥

न दृशेरिति । संसारो नाम ज्ञातृत्वकर्तृत्वभोक्तृत्वादिलक्षणो विकाररूप उपचयस्तदात्यन्तिकापचयश्च मोक्षस्तथा च ताभ्यां क्रमेण संबध्यमानो विकारी स्यात्तत्र दृशेश्चैतन्यैकरसस्य न संसारिता भवेदितिसंबन्धः । तत्र हेतुरविकारित्वादिति । कूटस्थत्वादित्यर्थः, तथाभासस्यापि न संसारिता भवेदिति पूर्वनकारमादायान्वयः । तत्र हेतुरवस्तुत इति । पूर्वोक्तयुक्त्या तस्यावस्तुत्वनिश्चयादवस्तुनः शून्यस्य न को ऽप्यतिशयसंभव इत्यर्थः । अहंकर्तुरहंकारस्याभासाश्रयत्वेनाभिमतस्याचितित्वाज्जडत्वाच्च संसारिता भवेन्नहि ज्ञातृत्वसुखदुःखादिभोक्तृत्वस्वरूपस्य संसारस्य जडाश्रयत्वसंभवो ऽतस्त्वन्मते कस्य संसारिता भवेद् मोक्षो वेति च योज्यं, न कस्यापीति वदतो ऽनुभवविरोध इत्यभिप्रायः ॥ ४५ ॥

सिद्धान्ती यद्येवमनिरूपिताश्रयौ संसारमोक्षौ तर्हि मा भूतां परमार्थौ कस्यापीति परिहरति ।

(४६) अविद्यामात्र एवातः संसारोस्त्वविवेकतः ।
कूटस्थेनात्मना नित्यमात्मवानात्मनीव सः ॥ ४५९ ॥

अविद्येति । यत एवमतः संसारो ऽविद्यामात्र एव भ्रान्तिमात्र एव स्वप्नवदस्तु अविवेकत आत्मस्वरूपाविवेकात्संसार आत्मनीवात्मधर्मइवावभासतइति योजना । अवस्तुभूतस्यात्मन्यपरोक्षतया सदिति प्रतिभासे निमित्तमाह । कूटस्थेनेति । तत्राध्यस्तत्वात्तत्सत्तया सत्तावानित्यर्थः । नित्यमित्यन्याधीनात्मवतस्तत्राध्यस्ततां सूचयति ॥ ४६ ॥

आत्मसत्तया सत्तावानात्मधर्मइवभासते संसार इत्येतद्दृष्टान्तेन स्पष्टयति ।

(४७) रज्जुसर्पो यथा रज्ज्वा सात्मकः प्राग्विवेकतः ।
अवस्तु सन्नपि ह्येष कूटस्थेनात्मना तथा ॥ ४६० ॥

रज्जुसर्प इति । स्पष्टोर्थः ॥ ४७ ॥

मतान्तरमाश्रित्य कल्पनालाघवेन शङ्कते ।

(४८) आत्माभासाश्रयश्चात्मा प्रत्ययैः स्वैर्विकारवान् ।
सुखी दुःखी च संसारी नित्य एवेति के चन ॥ ४६१ ॥

आत्माभासाश्रय इति । चकार एवकारार्थ आत्मैवात्माभासाश्रयः, आत्माभासत्वाभिमतस्य जीवत्वस्याश्रयो ऽतः स एव स्वैः स्वधर्मभूतैः प्रत्ययैर्विकारवान् सुखी दुःखी चेत्येवं संसारी भवति तथापि नित्य एव तरङ्गादिभिर्विक्रियमाणस्यापि समुद्रस्य स्थैर्यदर्शनादत आभासतदाश्रयात्मनां भेदकल्पना तदविवेककल्पना तद्वशादात्मनि संसारकल्पना च गुर्वी आत्मैव संसारीति कल्पना लघीयसीति के चन मन्यन्तइत्यर्थः ॥ ३८ ॥

उक्तं पुरस्तादस्माभिः संभाव्यो गोचरे शब्द इत्यत्रात्मनि संसारित्वग्राहकं प्रमाणं नास्तीति तन्न विस्मर्तव्यं त्वयेत्यभिप्रेत्योत्प्रेक्षामात्रमूलैवैषा कल्पना न प्रमाणमूलेति परिहरति ।

(४९) आत्माभासापरिज्ञानाद्याथात्म्येन विमोहिताः ।
अहंकर्तारमात्मेति मन्यन्ते ते निरागमाः ॥ ४६२ ॥

आत्माभासापरिज्ञानादिति । आत्मा परमार्थः कूटस्थो नित्य आत्माभासस्तच्छायारूपो ऽन्यत्र संक्रान्तो मिथ्याभूत

इत्यात्माभासयोर्याथात्म्येनापरिज्ञानान्मोहिताः सन्तो ऽहंकर्तारं साभासान्तःकरणमेवात्मेति ते मन्यन्ते यतो निरागमा आगमरहस्यपरिचयशून्या इत्यर्थः । "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनं साक्षी चेता केवलो निर्गुणश्च कृत्स्नः प्रज्ञानघन एवात्रायं पुरुषः स्वयंज्योति"रित्यादिनित्यशुद्धत्वादिपरश्रुतिसंदर्भे तथा "ऽनीशया शोचति मुह्यमानः, अविद्यायामन्तरे वेष्टमाना अनृतेन हि प्रत्यूढा" इत्यादिश्रुतिसंदर्भे चात्मन आविद्यकं संसारित्वानुवादपरं ते न पश्यन्त्यतः स्वोत्प्रेक्षया यत्किं चिदेव वदन्तीत्यभिप्रायः ॥ ४९ ॥

मोक्षो ऽप्येषां दुर्लभ इत्याह ।

(५०) संसारो वस्तुसंस्तेषां कर्तृभोक्तृत्वलक्षणः ।
आत्माभासाश्रयाज्ज्ञानात्संसरन्त्यविवेकतः ॥ ४६३ ॥

संसार इति । तेषां मते संसारो वस्तुसन् परमार्थसन् भवेत्तथा च "नासतो विद्यते भावो नाभावो विद्यते सतः" । इति नियमस्मृतेरविनाशी संसार इति तेषां मते मोक्षासिद्धिरित्यर्थः । यदि मोक्षाप्राप्तिभयात्संसारस्यावस्तुत्वं ते ऽपि मन्येरंस्तर्ह्यस्मदुक्तप्रकार एव स इत्यनुजानाति । आत्माभासाश्रयाज्ज्ञानादिति । आत्मादित्रयाणां तत्त्वाज्ञानादविवेकतो भेदाग्रहात्संसरन्तीति योजना ॥ ५० ॥

परपक्षे मोक्षवर्तिं दोषमुक्त्वा स्वपक्षे त्वाभासाभ्युपगमे लाभविशेषमाह ।

(५१) चैतन्याभासता बुद्धेरात्मनस्तत्स्वरूपता ।
स्याच्चेत्तज्ज्ञानशब्दैश्च वेदः शास्तीति युज्यते ॥ ४६४ ॥

चैतन्येति । बुद्धेरन्तःकरणस्य चैतन्याभासता आत्मनश्चैतन्यस्वरूपता च चेत्स्याद्भवेत्तदा वेदस्तमात्मानं ज्ञानशब्दैर्ज्ञानसत्यानन्तानन्दात्मादिशब्दैः शास्ति प्रतिपादयतीति युज्यते घटतइत्युत्तरार्थः । अयं भावः । प्रकाशस्वभावं वस्तु यत्र प्रतिबिम्बते तत्र प्रकाशाभासोदयहेतुर्भवति,यथा जले प्रतिबिम्बितः सविता, तथा बुद्धौ प्रतिबिम्बितं चैतन्यं तत्र चित्प्रकाशाभासोदयहेतुर्भवति,ततः साभासायां बुद्धौ गृहीतसंबन्धैर्ज्ञानादिशब्दैर्वेद आत्मानं लक्षणया बोधयतीति संगच्छते ऽन्यथा निर्धर्मके आत्मनि शब्दप्रवृत्त्यनुपपत्तेर्वेदान्तवेद्यता तस्य न सिद्धेन्मानान्तरं च तत्र न क्रमतइति असिद्धिरेवात्मनः स्यादित्याभासाभ्युपगमः श्रुतिस्मृतिन्यायविद्भिः कर्तव्य इति ॥ ५१ ॥

यद्यप्येवमाभासाभ्युपगमे वेदप्रवृत्तिरात्मन्युपपद्यते तथाप्यस्मिन् जानात्यादिशब्दा न प्रवर्त्तेरन्निति व्यवहारासिद्धिःप्रसज्येतेति शङ्क्यते । ननु ज्ञानशब्दो व्युत्पाद्यमान आत्मनि मुख्यां वृत्तिं लभतएव, अतः कथं साभासबुद्धिवाचकः सन् स आत्मनि लक्षणया वर्त्तिष्यतइति कल्प्यते इति वा शङ्क्यते ।

(५२) प्रकृतिप्रत्ययार्थौ यो भिन्नावेकाश्रयौ यथा ।
करोति गच्छतीत्यादौ दृष्टौ लोकप्रसिद्धितः ॥ ४६५ ॥

प्रकृतीति । प्रकृत्यर्थः क्रिया प्रत्ययार्थः कर्तृत्वं तावुभौ स्वरूपतो भिन्नावेकस्मिन्नाश्रये स्थितौ करोति गच्छतीत्यादौ लोके दृष्टौ यथा तथा लोकप्रसिद्धित एव जानाति करोतीत्यादेरप्यात्मैकाश्रयत्वं युक्तमित्यर्थः ॥ ५२ ॥

अथैकाश्रयत्वमनयोर्दृष्टं तथा भिन्नाश्रयत्वमपि किं चित्किं न स्यादित्यत आह ।

(५३) नानयोर्द्व्याश्रयत्वं च लोके दृष्टं स्मृतौ तथा ।
जानात्यर्थेषु को हेतुर्द्व्याश्रयत्वे निगद्यताम् ॥ ४६६ ॥

नानयोरिति । अनयोः प्रकृतिप्रत्यययोर्द्व्याश्रयत्वं न लोकप्रयोगेषु दृष्टं तथा स्मृतौ व्याकरणकृपायामपि न दृष्टमतो जानात्यर्थेषु द्व्याश्रयत्वे आत्मा प्रत्ययार्थाश्रयः बुद्धिः प्रकृत्यर्थाश्रय इति द्व्याश्रयत्वाभ्युपगमे को हेतुः स निगद्यतामित्यर्थः ॥ ५३ ॥

प्रकृतिप्रत्यययोरेकाश्रयत्वमात्रमस्मन्मते न संगच्छतइत्युच्यते, किं वा परमार्थतस्तयोरेकाश्रयत्वं, तत्र नाद्य इत्याह सिद्धान्ती ।

(५४) आत्माभासस्तु तिङ्वाच्यो धात्वर्थश्च धियः क्रिया ।
उभयं चाविवेकेन जानातीत्युच्यते मृषा ॥ ४६७ ॥

आत्माभास इति । तुशब्दः शङ्कानिषेधार्थः आत्माभासो बुद्धिगतस्तिङ्वाच्यः धियो बुद्धेः क्रिया वृत्तिरूपा धात्वर्थः प्रकृत्यर्थः, तथा चात्माभासो बुद्धिश्चेत्युभयं चाविवेकेन परमार्थात्माविवेकेन मृषैव जानातीत्युच्यते, तथा चात्माभासव्याप्तक्रियावद् बुद्ध्यैक्याध्यासादात्मा जानातीत्येकाश्रयत्वावभासः प्रकृतिप्रत्यययोरिहापि नानुपपन्न इत्यर्थः ॥ ५४ ॥

द्वितीयं प्रत्याह ।

(५५) न बुद्धेरवबोधोस्ति नात्मनो विद्यते क्रिया ।
अतो नान्यतरस्यापि जानातीति च युज्यते ॥ ४६८ ॥

न बुद्धेरिति । सम्यक्विचार्यमाणे क्रियावत्या बुद्धेरवबोधश्चित्प्रकाशो नास्ति नाप्यात्मनो ऽवबोधस्वभावस्य क्रिया विद्यते ऽतो नान्यतरस्यापि जानात्यवगच्छतीति निर्देशो युज्यते । तथा च प्रतीतिमात्रशरणैरारोपितत्तदैक्यविषयत्वं जानात्यादेराश्रयणीयमिति न लोकव्यवहारविरोधः स्मृतिविरोधो वा भवतीत्यर्थः ॥ ५५ ॥

यथा जानातीति ज्ञ इति कर्तृव्युत्पत्त्या बुद्ध्यात्मनोरेकैकस्मिन् जानात्यर्थानुपपत्तिर्नापि मिलितयोस्तदुपपत्तिः परमार्थतो जडाजडयोरैक्यायोगात्, नाप्यन्यतरसंनिधिनिमित्तान्यतरस्मिन्नुभयाश्रयतेति घटते ऽध्यासव्यतिरेकेण संनिधेरनिरूपणात्, तथा ज्ञप्तिर्ज्ञानमिति भावव्युत्पत्त्या ऽपि ज्ञानशब्दप्रयोग आत्मनि न घटतइत्याह ।

(५६) नाप्यतो भावशब्देन ज्ञप्तिरित्यपि युज्यते ।
नह्यात्मा विक्रियामात्रो नित्य आत्मेति शासनात् ॥ ४६९ ॥

नाप्यत इति । भावशब्देनधात्वर्थसामान्यवचनेन ज्ञप्तिर्ज्ञानमिति भावव्युत्पत्त्यापि ज्ञानशब्दप्रयोग आत्मनि न युज्यते, अत इत्युक्तहेतुं व्यनक्ति । नहीति । विक्रियामात्रत्वे पारतन्त्र्येणात्मनो ऽनित्यत्वप्रसङ्गस्तच्चानिष्टं नित्य आत्मेति श्रुतिशासनादित्यर्थः ॥ ५६ ॥

यथा जानातीति ज्ञ इति कर्तृव्युत्पत्त्या ज्ञप्तिर्ज्ञानमिति भावव्युत्पत्त्या चात्मनि ज्ञानशब्दानुपपत्तिस्तथा ज्ञायते ऽनेनेति करणव्युत्पत्त्या ज्ञायतइति ज्ञानमिति कर्मव्युत्पत्त्या चात्मनि ज्ञानशब्दप्रवृत्तिर्न युज्यतइत्याह ।

(५७) न बुद्धेर्बुद्धिवाच्यत्वं करणं नह्यकर्तृकम् ।
नापि ज्ञायतइत्येवं कर्मशब्दैर्निरुच्यते ॥ ४७० ॥

न बुद्धेरिति । बुध्यते ऽनयेति बुद्धिरिति व्युत्पत्त्या बुद्धिशब्दवाच्यत्वं बुद्धेरन्तःकरणस्य स्याच्चात्मन इति योजना । तत्र हेतुः करणमिति । करणव्युत्पत्तिपक्षे बुद्धिशब्दवाच्यस्यात्मनः करणत्वापत्तौ कर्त्रन्तराभावादकर्तृकं करणं स्यान्नहि करणमकर्तृकं क्व चिद्दृष्टमित्यर्थः,तथा ज्ञायतइति ज्ञानमिति कर्मशब्दैरप्यात्मा न निरुच्यते न सम्यगुच्यते स्वस्य स्ववेद्यत्वानुपपत्तेर्ज्ञात्रन्तरस्याभावाच्च न कर्मव्युत्पत्तिरपीहेत्यर्थः । ज्ञायते ऽस्मिन्निति ज्ञानमिति व्युत्पत्त्यन्तरमस्तीति चेत्तत्र वक्तव्यं ज्ञेयाधारत्वमात्रं ज्ञानशब्देनेहोच्यते, ज्ञातृत्वे सति ज्ञेयाधारत्वं वा, नाद्यो,ज्ञेयघटाद्याधारभूतलादेरपि व्युत्पत्तियोगाज्ज्ञानशब्दाभिधेयत्वप्रसङ्गात्, न द्वितीयः, आत्मनो ज्ञातृत्वस्य निराकृतत्वादि,त्ययं पक्षो ऽतिस्थूल इत्याचार्यैरुपेक्षित इति द्रष्टव्यम् ॥ ५७ ॥

एवं मुख्यया वृत्त्या ज्ञानादिशब्दवाच्यत्वमात्मनो नोपपद्यतइति प्रतिपादिते तवाप्येतत्तुल्यमित्याशङ्क्येष्टापत्त्या परिहरति ।

(५८) न येषामेक एवात्मा निर्दुःखो ऽविक्रियः सदा ।
तेषां स्याच्छब्दवाच्यत्वं ज्ञेयत्वं चात्मनः सदा ॥ ४७१ ॥

न येषामिति । येषां मते एक एवात्मा सदा निर्दुःखादिलक्षणो ऽभ्युपगतस्तेषामात्मनः सदा शब्दवाच्यत्वं ज्ञेयत्वं च न स्यात्परमार्थत इति योजना । यद्वात्मनि मुख्यशब्दप्रवृत्त्यभावमुक्तं व्यतिरेकमुखेनोपपादयति । न येषामिति । येषां मते एक एव यथानिर्दिष्ट आत्मा न भवति तेषां शब्दवाच्यत्वं ज्ञेयत्वं चात्मनः सदा स्यादस्त्विति योजना । तत्र कर्त्रादिव्युत्पत्तेः संभवाद् न त्वेकात्मवादे श्रौते तत्संभव इत्यर्थः ॥ ५८ ॥

तर्ह्यस्तु शब्दार्थमुख्यत्वाय सविकार एवात्मेति शङ्कते ।

(५९) यदा ऽहंकर्तुरात्मत्वं तदा शब्दार्थमुख्यता ।
नाशनायादिमत्त्वात्तु श्रुतौ तस्यात्मतेष्यते ॥ ४७२ ॥

यदेति । अहंकर्त्तेत्याद्यभिमन्यमानाकारस्यात्मत्वमेव नास्तीति परिहरति । नेति । "यो ऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येत्येतं वै तमात्मानं विदित्वे"ति श्रुतावात्मनो ऽशनायाद्यतीतत्वस्वाभाव्यावगमादशनायादिधर्मवत्त्वादहंकर्तुस्तस्यात्मता नेष्यतइति योजना, अतो ज्ञानादिशब्दा आत्मनि न साक्षात्प्रवर्त्तन्तइत्याभासद्वारता ऽस्मदुक्ता तेषां सिद्धेति भावः ॥ ५९ ॥

नन्वेवमुक्तरीत्या यदि जानात्यादेरात्मन्यन्यत्र च मुख्यता न संभवेत्तर्हि वृत्त्यन्तरेणाप्यात्मनि प्रवृत्तिरनुपपन्ना नहि क्वाप्यमुख्यं क्व चिदुपचर्यतइति संभवतीति शङ्कते ।

(६०) हन्त तर्हि न मुख्यार्थो नापि गौणः कथं चन ।
जानातीत्यादिशब्दस्य गतिर्वाच्या तथापि तु ॥ ४७३ ॥

हन्त तर्हीति । स्पष्टम् ॥ ६० ॥

मास्तु मुख्याभावाद्गौणोपि तथापि किमिति गतिर्वाच्येति चेत्तत्राह ।

(६१) शब्दानामयथार्थत्वे वेदस्याप्यप्रमाणता ।
सा च नेष्टा ततो ग्राह्या गतिरस्य प्रसिद्धितः ॥ ४७४ ॥

शब्दानामिति । न केवलं लौकिकशब्दानामेव जानात्यादीनामप्रमाणता, किं तु वेदस्यापीत्यपिशब्दयोजना, किं च लोकसिद्धव्युत्पत्त्यपेक्षत्वाद्वेदे बोधकत्वस्येत्यभिप्रायः सा वेदस्याप्रमाणता नेष्टा चकाराद्वेदस्यैवात्मनि प्रमाणतेष्टेति समुच्चीयते । अतो वेदप्रामाण्याङ्गीकारलोभादेव गतिर्वाच्येत्यर्थः, तर्हि प्रसिद्धैव गतिः किमिह वक्तव्यमिति सिद्धान्तिनः शङ्कां गृह्णन्तीति ततो ग्राह्येति प्रसिद्धित इति चेदिति शेषः ॥ ६१ ॥

तत्र वक्तव्यं प्राकृतजनप्रसिद्ध्या गतिराश्रीयते, पाणिन्याद्यभियुक्तप्रसिद्ध्या वा,तत्राद्यमनूद्य दूषयति ।

(६२) प्रसिद्धिर्मूढलोकस्य यदि ग्राह्या निरात्मता ।
लौकायतिकसिद्धान्तः स चानिष्टः प्रसज्यते ॥ ४७५ ॥

प्रसिद्धिर्मूढलोकस्येति । प्राकृतप्रसिद्ध्यभ्युपगमे देहात्मप्रसिद्धेरप्यभ्युपगमाच्चिरात्मवादाद्वापत्तिरनिष्टा प्रसज्येतेत्यर्थः ॥६२॥

द्वितीयमनूद्य प्रत्याह ।

(६३) अभियुक्तप्रसिद्धिश्चेत्पूर्ववद् दुर्विवेकता ।
गतिशून्यं न वेदो ऽयं प्रमाणं संवदत्युत ॥ ४७६ ॥

अभियुक्तेति । पूर्ववदिति । बुद्धेरात्मनो वा ज्ञातृत्वं दुर्निरूपमिति प्रागुक्तदोषप्रसङ्ग इत्यर्थः । यद्येवं तर्ह्यात्मनो गतिशून्यमेव ज्ञातृत्वं वेदो ऽनुवदिष्यतीति तत्राह । गतीति । प्रमाणमिति हेतुगर्भं वेदविशेषणम् ॥ ६३ ॥

चिदात्मन्येवौपाधिको जानात्यादिशब्दप्रयोगः संभवतीत्यभिप्रेत्य सिद्धान्ती दृष्टान्तमाह ।

(६४) आदर्शे मुखसामान्यं मुखस्येष्टं हि मानवैः ।
मुखस्य प्रतिबिम्बो हि मुखाकारेण दृश्यते ॥ ४७७ ॥

आदर्शइति । आदर्शे दृश्यमानं यन्मुखं तेन सामान्यं समानत्वमेकत्वं मुखस्यादर्शाद्बहिस्तिष्ठतो मानवैरिष्टं हि प्रसिद्धमित्यक्षरार्थः । आदर्शे मुखव्यक्त्यन्तरोत्पादानुपपत्तिसहकृतया मदीयं मुखमिति प्रत्यभिज्ञया बिम्बप्रतिबिम्बभावेनोपाधितो भेदावभासे ऽपि मुखैक्यं मानवैरिष्यतएवेत्युक्तं भवति,उक्तमेवैकत्वं स्फुटयति । मुखस्येति ॥ ६४ ॥

यथा कल्पितमुखस्य परमार्थमुखस्य चान्योन्यविवेकान्मलिनं मे मुखमल्पं वक्रमित्यादिव्यपदेश उपाधिनिबन्धनस्तथात्मन्यपि ज्ञातृत्वादिव्यपदेश उपाधिनिबन्धन इत्युपपन्नमिति दार्ष्टान्तिकमाह ।

(६५) यत्र यस्यावभासस्तु तयोरेवाविवेकतः ।
जानातीति क्रियां सर्वो लोको वक्ति स्वभावतः ॥ ४७८ ॥

यत्रेति । अवभास आभासः प्रतिबिम्बभाव इति यावत् ॥ ६५ ॥

यच्छब्दाभ्यामुक्तमर्थं स्पष्टयति ।

(६६) बुद्धेः कर्तृत्वमध्यस्य जानातीति च उच्यते ।
तथा चैतन्यमध्यस्य चत्वं बुद्धेरिहोच्यते ॥ ४७९ ॥

बुद्धेरिति । बुद्ध्यात्मनोस्तादात्म्याध्यासे सत्यन्योन्यधर्मसङ्करादात्मा जानात्यहं जानामीति च व्यपदेशो भवतीति समुदायार्थः ॥ ६६ ॥

॥ शेष, उत्तराङ्के ॥

## ॥ अथ बालभारतस्य ॥

॥ द्वादशः सर्गः ॥

स मुदे पराशरसुतः सुतरां
भवतोयराशितरणैकतरी ।
प्रससार भारतमिषेण मुखे
खलु यस्य निर्मलवितानपटः ॥ १ ॥
अथ सप्रतिज्ञ इव दग्धुमिदं
वनमुग्रधूममुखमुक्तशिखः ।
चिरकालनिर्दहनकोपवशात्
कपिशः किल व्यलसदेष शिखी ॥ २ ॥
प्रबलप्रवृद्धबहुजिह्वतया
कवलीकृतार्करुचिराजिरिव ।
अतिदुःसहोऽजनि शिखी महसा
स हसन्निवाद्भुतयुगान्तदवम् ॥ ३ ॥
परिपालितस्य जलदेन सदा
निजवैरिणा तरुगणस्य तदा ।
ज्वलितः शिरांसि विदलय्य शिखी
जलदाश्रये न्यधित धूममिषात् ॥ ४ ॥
दहनस्तदा स्फुटितवेणुघटा-
घटितोत्कटध्वनिमिषेण मुहुः ।
विपिनान्तरे तनुमतस्त्रसतः
प्रति कोपहुंकृतिमिव व्यतनोत् ॥ ५ ॥
अभवत् तदा परमकोटिगत-
ज्वलनाभिषङ्गपरितापभृताम् ।
वनवासिनां कलकलः सकल-
त्रिजगज्जनप्रलयभीतिमयः ॥ ६ ॥
वसनेऽग्रहीदथ कचप्रचये
तदपुस्फुटत् पटु दृशौ दहनः ।
तदपि चसन्तमखिलाङ्गपद-
ग्रहणादनिष्प्रियदरण्यजनम् ॥ ७ ॥
ज्वलनचसज्जननिषेधकरः
कनकाभकेतुकपिशीर्षगुरुः ।
त्वरितं वनानि परितः स्फुरिते-
र्विरराज वप्र इव पार्थरथः ॥ ८ ॥

पततां वनात् त्वरितमुत्पततां
पतितं रवेण वपुरेव भुवि ।
पवनेन पार्थशरसार्थहता
छदपद्धतिस्तु दिवमेव ययौ ॥ ९ ॥
अथ यक्षराक्षसतुरङ्गमुख-
प्रमुखैररण्यपुरुषैः सरुषैः ।
उपशान्तये हुतभुजः स्वभुज-
प्रथिताम्बुपात्रमभितः स्फुरितम् ॥ १० ॥
प्रहितस्य शान्तिजननाय जनै-
र्ज्वलने जलस्य न लवोऽप्यपतत् ।
अतिदूरतोऽप्यतुलतापवशात्
परिशोषितस्य नभसि स्फुरतः ॥ ११ ॥
मिलितैरतीव वनवासिजनैः
प्रहितं पयो बहु दवज्वलने ।
अशनान्तरालजलपानकलां
कलयांबभूव तरुभारभुजि ॥ १२ ॥
जलमानयन् घटघटीपटलै-
र्ज्वलनोपशान्तिकृतये किल यत् ।
स्वतनौ तदाशु परितप्ततरा
निदधुर्न वस्तुनि जना ज्वलिते ॥ १३ ॥
अभितो भुजान् दहनशान्तिधियां
खरणानपि त्वरितनाशभृताम् ।
अभिदत् पृथाजनिरनेकशर-
प्रसरै रथाङ्गपतनैश्च हरिः ॥ १४ ॥
अभितस्त्वमेव परिरक्ष शिखी
भवतः सखा दहति संप्रति नः ।
पृषदश्वमेतदिव वक्तुमगु-
र्गुरुफालया गगनवर्त्म मृगाः ॥ १५ ॥
घनहर्षहेषितभृतस्तुरगाः
स्वयमेत्य पेतुरनले ज्वलति ।
मरणे नितान्तनियते भयतो
न महस्विनः परिहरन्ति महः ॥ १६ ॥
दशनैर्ददार यदुदारभयो
हरिसंचयः किमपि भूवलयम् ।
विपिनं प्रदीपयति तद् दहने
खनति स्म कूपमिव मूढमतिः ॥ १७ ॥
अपवैरमग्निभयतोऽनुगता
हरयस्तलेषु करिणां शरणम् ।
निहताः पतद्भिरथ तैरपि ते
क्व फलत्यकृत्यमभिमानमुचाम् ॥ १८ ॥
विलनिर्गमे समणयः फणिनो
यदधुः स्फुलिङ्गयुतधूमकलाम् ।
नितरामधो जगदपि ज्वलितं
वनसीम्नि तेन दहनेन ततः ॥ १९ ॥
सरिदम्बुचूर्णितपरिज्वलिता-
चलनागवल्लिदलपूगफलैः ।
कवलीकृतैरिव तदा विपिनेऽ-
रुणजिह्व एव विललास शिखी ॥ २० ॥
अतिलौल्यतः कवलयन् मलिन-
द्युति काननं किमपि दावशिखी ।
बहुभक्षणेन शितिधूममिषात्
तनुते स्म भोजनबहूद्गिरणम् ॥ २१ ॥
अवलोक्य दावदहनं तमहो
परितापितत्रिभुवनं गहने ।
अपि पार्थकेतनकपिर्निदधौ
स्मयमद्भुतं हुतपलादपुरः ॥ २२ ॥
अपि तापचूत्कृतिकृतां वदनो-
ल्लसितस्वभावशिखिहेतिमिषात् ।
वनरक्षसां व्यधित गर्भशिखी
विशतोऽन्तरभ्युपगमं शिखिनः ॥ २३ ॥
उपरि प्रपत्य पिदधुः स्वशिशून्
मृगयोषितोऽवगणितात्मरुजः ।
अथ तासु पाततरलाः सुतरा-
मसहन्त हन्त विरहं नृमृगाः ॥ २४ ॥
प्रणयक्रुधा विरहितानि चिरं
वनवासिलोकमिथुनानि तदा ।
कृतहाकृतीन्यपि परिक्रमणे
सुखनिर्व्यथं पुलकितान्यमिलन् ॥ २५ ॥

भयसंभ्रमेऽपि परिरभ्य तथा
सुखमाप तद्वनजुषां मिथुनम् ।
ह्रियमाणमग्निपतनेन यथा
न हि जीवितव्यमपि वेद पुरा ॥ २६ ॥

हिमतागुणादभिमतं मरणं
वरमेव वारिणि न दीप्रदवे ।
गलबद्धबालनिवहा न्यपतन्
वनसुभ्रुवो नदनदीषु ततः ॥ २७ ॥

दहनो दहेज्जननि हा सुत हा
दयितेह हा हृदयनाथ ह हा ।
हह हा सगर्भ हह हा भगिनी-
त्युदितं तदा वनजनेन मिथः ॥ २८ ॥

दवदह्यमानहरिहस्तिमहो-
रगमुख्यजीवरवकञ्चुकितः ।
गुरुभूधरस्फुटनभूर्निनदो
द्युसदां ददौ भुवनभङ्गभयम् ॥ २९ ॥

अथ खाण्डवप्रसभरक्षणधीः
क्षणधीरिताब्दपटलो बलभित् ।
मुशलप्रमाणसरलैः सलिलैः
प्रववर्ष पत्त्रिभिरिवास्य सुतः ॥ ३० ॥

अतिदीप्रतद्दवशिखाशिखरैः
खलु दह्यमानमिदमब्दजलम् ।
गगनेऽप्यवाप वडवाग्निहतो-
दधिवासदुःखमिति धिङ्नियतिम् ॥ ३१ ॥

अथ पार्थमार्गणगणोऽगणयन्
जलवारिणीं वियति कुट्टिमताम् ।
अतिवेगसंचरणपत्त्रभवत्-
पवनैरजिज्वलदहो ज्वलनम् ॥ ३२ ॥

अभवत् तदा स कुरुवर्षचरः
किल तक्षकोऽत्र विपिने ज्वलति ।
प्रविवेश मातृजठरं भयतः
पुनरश्वसेन इति तत्तनयः ॥ ३३ ॥

सुतरक्षणाय फणिराजवधू-
र्द्रुतमुत्पपात दिवि दीप्रदवात् ।
गिलनावशिष्टफणिपुच्छयुतं
विजयी चकर्त च तदीयशिरः ॥ ३४ ॥

अथ तत्क्षणप्रणयतः पवनैः
परिमोह्य पाण्डुपृथिवीशसुतम् ।
अपमौलिपन्नगवधूजठरा-
दहरत् तदा हरिरहीन्द्रसुतम् ॥ ३५ ॥

इति वञ्चनेन कुपितः फणिनीं
विशिखैस्त्रिधा दिवि चकर्त नरः ।
दहनो हरिः स च तदाप्यशपद्
भव निष्प्रतिष्ठ इति सर्पसुतम् ॥ ३६ ॥

स्वयमश्वसेनकृतकण्ठतया
कुपितः कृतान्त इव पाण्डुसुतः ।
अतिभीषणैर्विशिखदण्डगणै-
र्गगनं व्यधाद्विधुरयन्मरुतः ॥ ३७ ॥

अथ तं प्रतिद्युपतिरुग्ररुषा-
रुणदृष्टिराजि निजमङ्गमधात् ।
गगनान्तरालविकरालदव-
ज्वलनस्फुलिङ्गभरभिन्नमिव ॥ ३८ ॥

जलदास्त्रमास्तृतवियद्वलया-
म्बुदराजिराजितममोचि ततः ।
हरिणा रयेण हरिणाधिपति-
प्रतिमल्लपौरुषकिरीटिरुषा ॥ ३९ ॥

चटदुत्कटोत्कटतडित्पटलै-
र्दृढगर्जितैर्जितदिगन्तगजैः ।
जलदैस्तदैव परितः स्फुरितैः
क्षयकालभीषणमकारि नभः ॥ ४० ॥

घनपद्धतिः पिहिततिग्मरुचि-
स्तिमिराणि तानि विततान तदा ।
विरराज येषु शिखिकीट इव
द्युतिदीपितत्रिभुवनोऽपि दवः ॥ ४१ ॥

अपतन् घनाघनघनाम्बुभरै-
र्गलहस्तिता इव शिखाः शिखिनः ।
स दधौ क्षमिच्छमितशब्दमिषा-
दथ दुःखनिःश्वसितमल्परुचिः ॥ ४२ ॥

स्वमथ प्रतापमिव मूर्तमयं
परिभूयमानमवलोक्य दवम् ।
पवनास्त्रमस्त्रकुशलो मुशल-
ध्वजधैर्यधाम विजयी व्यसृजत् ॥ ४३ ॥
शिखिसौहृदेन मरुतामभिधा-
द्विषतां रुषा विजयिमन्त्रबलात् ।
उदितो महाबलतया च ततः
पवनश्चतुर्गुणितसंभ्रमतान् ॥ ४४ ॥
अहह व्यरोधि युधि मत्तनुजा-
नुज एष पाण्डुतनुभूरमुना ।
इति कोपनेन पवनेन किल
द्युपतेरलोडि गृहमद्रिपतिः ॥ ४५ ॥
सपदि विपन्ननुदिशं जलदान्
जयसंपदा सह सहस्रदृशः ।
अदिदीपदर्दितवनं ज्वलनं
नरतेजसा सममसौ पवनः ॥ ४६ ॥
निकृते विरोधिनि घने पवनै-
रुदितास्ततः शिखिशिखा मुदिताः ।
रुचिदभ्रमम्बुरुहबन्धुमपि
द्रुतमस्पृशन् दिवि हसन्महसम् ॥ ४७ ॥
यदवारि वारिदततिर्वितता
वियति स्वयं विजयिना जयिना ।
तदतिक्रुधा दिवि दधार पविं
मघवाधिरुह्य विशदं रदिनम् ॥ ४८ ॥
अथ संभ्रमभ्रमितभीमपवौ
पवनप्रपातकुपिते द्युपतौ ।
त्रिदशैर्भृशं निजनिजास्त्रततिः
कलिता किरीटिकलिकेलिकृते ॥ ४९ ॥
स्वजनप्रमाथभवदुःखदवा-
कुललोकनिश्वसितधूमभरैः ।
ध्रुवमङ्गसङ्गिभिरतीव शितिं
स दधार दण्डमिह दण्डधरः ॥ ५० ॥
परिपिण्ड्य दत्तमिव धूर्जटिना
जगदन्तकारि दहनाचिमहः ।
द्विषदस्खलं स खलु रुद्रसखः
समये हिरण्मयगदाम्रमधात् ॥ ५१ ॥
दनुजेन्द्रकीर्तितरला बलिनो
न पदात् पदं ददति यद्भयतः ।
तमुरीचकार वरुणस्तरुणा-
द्युमणिद्युतिं सपदि पाशमपि ॥ ५२ ॥
इति शस्त्रविस्तृतरसा सहसा
सह वासवेन दिविषत् परिषत् ।
दववह्निनिह्नवसमर्थरुचिः
प्रचचाल पार्थसमरार्थमसौ ॥ ५३ ॥
अचलन्नितश्च गुरुगर्वभृतः
क्षणमात्रवृष्टिकलितोच्छ्वसिताः ।
युधि यक्षराक्षसखगेन्द्रफणि-
प्रमुखा रुषा विजयिने विपिनात् ॥ ५४ ॥
युधि यक्षराजिरसिराजिकरा
विकरालतां निदधती परितः ।
स्फुटकोपताम्ररुचिरभ्यचलद्
दवहेतिपङ्क्तिरिव धूमयुता ॥ ५५ ॥
विविधास्त्रधारणकरालतराः
कृतहुंकृतो विकृतभालभुवः ।
रसनाञ्चलज्वलदुरुज्वलना
रजनीचरा विदधुरुद्धुरताम् ॥ ५६ ॥
अतिचण्डतुण्डनखराः खगतैः
पवनं छदैस्तमसृजन् गरुडाः ।
ननु सोऽपि दीपकलिकेव दवः
शमनोन्मुखः सपदि येन कृतः ॥ ५७ ॥
मणिपाणिजज्वलदनेकफणा-
ङ्गुलिशालिनस्तरलतां दधतः ।
परितः प्रसस्रुरसितद्युतयो
युधि मृत्युराजभुजवद्भुजगाः ॥ ५८ ॥
दिवि दैवतेषु कुपितेषु पुरः
फणिदैत्यराक्षसमनुष्यकुलैः ।
विजयी विभुस्त्रिजगतीसुभटैः
कटरि व्यधत्त युधमस्त्रसखः ॥ ५९ ॥

निजशस्त्रपाततरलेषु तदा
त्रिजगद्भटेषु विकटेषु रुषा ।
चयवारिवाह इव वासवभू-
रिषुवृष्टिमष्टसु स दिक्षु दधौ ॥ ६० ॥
स्वयमुद्धृतेन युधि कोऽपि चलन्
ज्वलदङ्घ्रिपेण गिरिणा पलभुक् ।
नरबाणपातहतबाहुतया
पतता व्यपाति निरदाहि ततः ॥ ६१ ॥
समिति च्यसन्नरशरैः शमनः
करलम्बितश्लथितदण्डतया ।
नर एव वीर इति भूषितवान्
नवरेखया हृदवनिं महताम् ॥ ६२ ॥
परजीवितच्छिदुरकर्तनिका-
भिधयन्त्रलोलरसनायुगलः ।
युधि कालपाश इव पाण्डुभुवा
विशिखैर्गणः फणभृतां बिभिदे ॥ ६३ ॥
अभजद्द्वियं भृशमपूर्वचरीं
नरबाणदौत्यघटितां धनदः ।
इति तस्य पाणिकृतयापि तदा
गदया रुषेव दिवि विच्छुटितम् ॥ ६४ ॥
दिवि जातरूपगिरिगोचभृतां
शिशुभूभृतामिव समुत्पतताम् ।
स गरुत्मतां सपदि पक्षततिं
विचकर्त युक्तमयमिन्द्रसुतः ॥ ६५ ॥
प्रचरिष्णुपार्थशरपातभयात्
च्यसतः क्षणेन वरुणस्य रणे ।
करलम्बिपाशमयमस्त्रमपि
व्यधित क्रुधेव चरणस्खलनम् ॥ ६६ ॥
कुपितश्चकार कदनानि हरि-
र्वनवासिनामपि रथाङ्गरयात् ।
अतिजिह्वयातितरलीकृतया
कवलीचकार किल ताननलः ॥ ६७ ॥
द्विषतो निपिष्य युधि चक्रमहो
मुहुरारुरोह मुरवैरिकरम् ।
दिवि बिम्बमम्बरमणेस्तिमिरा-
ण्यभिहत्य पूर्वगिरिशृङ्गमिव ॥ ६८ ॥
हरिचक्रपार्थशरचक्रहतै-
र्वनवासिनस्त्रिदशतां गमिताः ।
नवरोचमानभुजशौर्यभरै-
रचलन् पुनर्युधि सुराः सह तैः ॥ ६९ ॥
नरसंगरेण दनुजान् मनुजा-
नपि वीक्ष्य देवपदवीं गमितान् ।
सहजैरचालि किमु मुक्तिपद-
स्पृहयालुभिः समरसीम्नि सुरैः ॥ ७० ॥
विललास चक्रधरचक्रमथ
द्युपथे सहार्जुनसुवर्णशरैः ।
परितापितामरकुलं किरणा-
कुलमर्कबिम्बमिदमन्यदिव ॥ ७१ ॥
परितप्रदीर्णचलितस्खलित-
प्रतिशस्त्रराशिभिरयोग्रतरैः ।
नरमार्गणैर्विधुरिता युधि ते
ययुरिन्द्रमेव शरणं त्रिदशाः ॥ ७२ ॥
अथ विक्रमेण तनयस्य तदा
मुदितो विशेषबलदर्शनधीः ।
बलसूदनः कृतककोपकणः
घणमश्मवृष्टिमसृजन्नभसः ॥ ७३ ॥
शरजालकं किमपि संभ्रमतो
विजयी ववर्ष तदमर्षनिधिः ।
अपिषत् पतत्पवनेन शिलाः
परमाणुवत् क्वचन चिक्षिपिरे ॥ ७४ ॥
अथ मेरुशृङ्गमुरु पार्थभिदे
मुमुचे रुषेव नमुचेर्द्विषता ।
दिवि लोहगोलकमिव ज्वलितो-
ज्ज्वलदन्तरं तरलितत्रिजगत् ॥ ७५ ॥
अथ पार्थबाणततिभिः पतिते
दवसीम्नि तत्र शिखरे महति ।
अपि कल्पशाखिभिरपूरि नहि
स्वमनःप्रकल्पितमपि वसनम् ॥ ७६ ॥

बलशचुरम्बरगिरानुभवे-
रपि दुर्जयौ नरहरी कलयन् ।
अथ मुक्तसंगररसप्रसर-
स्त्रिदशैः समं त्रिदिवसीम्नि ययौ ॥ ७७ ॥

निरपायमग्निरथ संज्वलितो
नरविक्रमस्मरणकम्पिशिराः ।
मरुदध्वमूर्ध्नि विललास रणा-
पर्स्रुतं विलोकयितुमिन्द्रमिव ॥ ७८ ॥

जितशक्रयोर्मुरजिदर्जुनयो-
र्द्वलितः स कश्चन महोदहनः ।
यशसा तयोर्विशदितो हिमवा-
निव यत् पुरो दवशिखी स बभौ ॥ ७९ ॥

दृढदावपावकभवानि बभु-
र्मलिनानि धूमवलयान्यभितः ।
दिवि मूर्तिमन्ति समिति चसतो
नवदुर्यशांसि सुरभर्तुरिव ॥ ८० ॥

यदुपार्जि जम्भमुखदैत्यजया-
द्दिवि वासवेन हिमहारि यशः ।
इषुभिर्नरेण दलितस्य कणा-
इव तस्य तारकगणाः शुशुभे ॥ ८१ ॥

मदसिंहनादमथ तौ दधतु-
र्नरकेशवौ जयरसेन तथा ।
अनुसंगतौ किमु रणाय भटा-
विति शङ्कितं दिवि यथा विबुधैः ॥ ८२ ॥

वनजीवनिर्गमनिषेधकृते
स्थितयोस्तयोरथ रथस्थितयोः ।
दिवि मूर्तिमान् हुतवहो जटिलः
प्रमदी जगर्ज च वशाश्च पपौ ॥ ८३ ॥

अपि नीरनामभृति वैरभरं
बत बिभ्रदौर्व इव तत्र वने ।
दवदम्भतोऽज्वलदुदग्रशिखा-
ततिरब्दमार्गमपि दग्धुमनाः ॥ ८४ ॥

ज्वलितस्य तस्य दहनस्य भयाद्
गहनत्विषा कुवलकोमलया ।
ध्रुवमन्वसारि शिशिरा सविधे
यमुना धुनी तदधुनाप्यसिता ॥ ८५ ॥

दवपावकप्रबलतापहता
यमुनापि मङ्क्षु विपिनान्तरतः ।
गगनं जगाम परिरब्धुमिव
द्युधुनीसखीमसमधूममिषात् ॥ ८६ ॥

विपिनप्रभूततरभूतपल-
ग्रसनोत्थतृष्ण इव कृष्णपथः ।
ह्रदकूपसिन्धुसरसीषु रसा-
दपिवत् पयः स्वयमसेचनकम् ॥ ८७ ॥

व्यथितस्तदा विततदाहवशा-
द्दिवसाधिपोऽपि दिवि तापभरैः ।
न लभेत शान्तिमधुनापि धुनी-
धवमध्यसंविशननिस्सरणैः ॥ ८८ ॥

परितापसंकुचदशेषदशा-
कृशवक्रिताकृतिरतिग्मरुचिः ।
अभजत् तदा मदनवैरिशिर-
स्तटिनीतटं ज्वलति तत्र वने ॥ ८९ ॥

स दवस्तदा दिवि तथा परितः
परिताप्य पित्तमदितोडुततेः ।
अधुनापि भानुमसहिष्णुरिव
प्लवते यथा क्वचन सा दिवसे ॥ ९० ॥

चयमित्यवेत्य शिखिमैच्यवशान्-
मृगमेकमेव पवनश्चलितम् ।
दवतस्ततः किल विकृष्य तदा
निदधौ सुधारुचि स चिह्नमभूत् ॥ ९१ ॥

घनतद्वनज्वलनतप्तधरा-
तलसङ्गसंगतकृशानुकणम् ।
अधुनापि भाति फणिराजफणा-
पटलं प्रदीप्तमिव रत्नमिषात् ॥ ९२ ॥

अमुना चयाभिनयिना शिखिना
हरिरप्यतापि सविधे स तथा ।
जननान्तरेऽप्यनिशमेव यथा
ध्रुवमब्धितीयशयनोऽयमभूत् ॥ ९३ ॥

ज्वलनोऽप्यतिज्वलनतः स तदा
ध्रुवमातुरः स्वपरितापभरैः ।
अविशत् पयोधिमयशःशमित-
स्तदगात् प्रतीतिमयमौर्व इति ॥ ६४ ॥

अरण्यतः पार्थ शरण्य पाहि मां
हिमांशुहारीणि यशांसि वर्धय ।
मयो भयेनेति वदन् कृशानुना
व्यमोचि दैत्यो नमुचेः सहोदरः ॥ ६५ ॥

प्राग्विप्रो मन्दपालस्त्रिदिवभुवमगात् तत्र निष्पुत्र इत्या-
पायं नैवानपायं फलमुरुतपसां बाल्यतो ब्रह्मचारी ।
तत् कृत्वा शार्ङ्गरूपं द्रुतसुतकृतये शार्ङ्गिकायां स्म सूते
यत् पुत्राणां चतुष्कं प्रणुतिभिरमुनामोचि वह्निस्ततस्तत् ॥६६॥

वह्निः शार्ङ्गाश्वसेनोरगमयदनुजान् षड्विना खाण्डवं तद्
दग्ध्वा षड्वासराणि चयकुपितमहाकालभालाग्निभीमः ।
षट्वक्त्रप्रायमूर्ती कुरुकुकुरकुलौ तूर्णमापृच्छ्य वीरौ
धीरौ षट्चक्रितोऽपि प्रकृतशुचिरुचिः स्वं पदं प्राप हृष्टः ॥६७॥

भेजे श्रीजिनदत्तसूरिसुगुरोरर्हन्मतार्हस्थितेः
पादाब्जभ्रमरोपमानममरो नाम व्रतीन्द्रः कृती ।
तत्प्रज्ञात्मनि बालभारतमहाकाव्ये महेच्छप्रियं
निर्याति स्म रसैः सुधोर्मिसरसैः स्वर्वादि पर्वादिमम् ॥६८॥

सर्गा द्वादश तैरेकं सहस्रं नवशत्यपि ।
अष्टेत्यनुष्टुभां संख्या निश्चिताचादिपर्वणि ॥ ६९ ॥

इति श्रीजिनदत्तसूरिशिष्यश्रीमदमरचन्द्रविरचिते श्रीबालभारतनाम्नि महाकाव्ये वीराङ्के आदिपर्वणि खाण्डववनवर्णनो नाम द्वादशतमः सर्गः ॥ १२ ॥ :: ::

---

## ॥ अथ बालभारतस्य सभापर्वारम्भः ॥

### ॥ तत्र प्रथमः सर्गः ॥

चन्द्रायमाणाः सुकृताम्बुराशेः
सूर्यायिताः साधुहृदम्बुजानाम् ।
स्फारं त्रिलोकीदुरितान्धकारं
पाराशरस्याङ्घ्रिनखाः क्षिपन्तु ॥ १ ॥

अथार्कक्रन्दातटसीम्नि धन्या
विष्णुश्च जिष्णुश्च मयासुरश्च ।
प्रियोक्तयः खाण्डवखण्डदाह-
खेदच्छिदे मैत्र्यजुषो निषेदुः ॥ २ ॥

मयासुरः स्वं वनवह्निमुक्तं
जानन् पुनर्जातमिवात्ततोषः ।
पार्थं ततो बाहुभृतां वतंस-
मुवाच कंसद्विषतः समक्षम् ॥ ३ ॥

भाराय दिक्सिन्धुरभूधरास्ते
धाता क्व वाताशन एष शेषः ।
विश्वंभरां भूरिभरां बिभर्ति
परोपकारी पुनरेक एव ॥ ४ ॥

परोपकारे न रतिं करोति
यस्तद्भराधिक्यनतां धरित्रीम् ।
धर्तुं मुकुन्दोऽपि परोपकारि-
लोकच्छलाद्वल्गति कोटिमूर्तिः ॥ ५ ॥

दीप्रेषु संसारदवानलेषु
यशःसुधानीरनिधौ निलीनः ।
महानिहामुत्र च नैव ताप-
माप्नोति कुत्रापि परोपकारी ॥ ६ ॥

कथं तपस्तीव्रतरं चरन्ति
स्फुरन्ति तीर्थेषु कथं वृथैव ।
सतां नितान्तं सुकृतानि तानि
परोपकारव्रतमेव दत्ते ॥ ७ ॥

वित्तादिदानप्रभवा भुवोऽन्तः
परोपकाराः कति न प्रतीताः ।
अमी शतांशेऽपि समीभवन्ति
भयार्तजन्तोरभयार्पणैर्न ॥ ८ ॥

न किंचन प्रत्युपकारमूचे
स्थिरं विरञ्चोऽप्यभयप्रदातुः ।
तत् कैरहं पार्थ तवार्थपूर-
संपूरणैरप्यनृणो भवामि ॥ ९ ॥

पितुः कलादातुरभीतिदातु-
र्मातुश्च किं प्रत्युपकारकर्म ।
इति स्मरन्तो हृदि केऽपि खेदं
तदङ्घ्रिभक्त्यैव यदि क्षिपन्ति ॥ १० ॥

त्वज्ज्येष्ठयोः पार्थ तवापि पाद-
पूजां ततः काममपि कामयिष्ये ।
इति प्रतिज्ञाय तदा तदग्रे
तिरोदधे दानवसूत्रधारः ॥ ११ ॥
किरीटिनः खाण्डवदाहमित्रं
श्रीखाण्डवप्रस्थपुरान्मुरारिम् ।
प्रैषीदथ द्वारवतीपुराय
तं पूजयित्वा तपसस्तनूजः ॥ १२ ॥
कैलासधात्रीधरमुत्तरेण
मैनाकशैलं प्रति यत् प्रतीतं ।
पूर्वोत्तरस्यां दिशि हेमरत्नै-
रलंकृतं बिन्दुसरः सरोऽस्ति ॥ १३ ॥
न्यासीकृतं तत्र पुरा गरीय-
स्त्वरोऽथ गत्वा स्वयमानिनाय ।
वस्तुत्रयं विस्मयकारि शङ्ख-
गदासभाभाण्डमयं मयोऽपि ॥ १४ ॥
मूर्च्छां यदापूरणशब्दपूरे
दूरेण देवद्विरदोऽपि याति ।
तं फाल्गुनायाथ स देवदत्त-
मदत्त सख्ये वरुणस्य शङ्खम् ॥ १५ ॥
सभावजन्याभिधभूमिजाने-
र्गदामदान्मारुतनन्दनाय ।
क्षुभ्यन्ति यद्भ्रान्तिरवैर्जगन्ति
कल्पान्तशङ्कार्तसुरासुराणि ॥ १६ ॥
मयाभिधानां वृषपर्वदैत्य-
प्रभोः सभां हस्तसहस्रमात्राम्
ददौ प्रक्लृप्तामृतुनाधिकेन
वर्षेण हर्षी स युधिष्ठिराय ॥ १७ ॥
विनिर्मितायां स्फटिकाश्मसार्थैः
पार्थस्य कीर्त्यामिव मूर्त्तिमत्याम् ।
यस्यां सहस्राणि वितेनुरष्टौ
रक्षांसि रक्षां मयवाग्वशानि ॥ १८ ॥
यस्यामदृश्ये स्फटिकस्य वप्रे
कल्याणक्लृप्ता कपिशीर्षमाला ।
व्योमापगायाः पुलिने निलीना
रथाङ्गराजीव विराजते स्म ॥ १९ ॥
यत्पीठबन्धस्फटिकावनीषु
मयूखलुप्ताः स्म विभान्ति सत्यः ।
हंसीरुतैः पद्मविहारिपद्मा-
मञ्जीररावैरिव केलिवाप्यः ॥ २० ॥
वैडूर्यपत्राः स्मितपद्मराग-
पद्मालयो मञ्जुलरत्नमालाः ।
आमुक्तमुक्तामयबिन्दुवृन्दा
वापीषु यस्यां व्यलसन् नलिन्यः ॥ २१ ॥
अच्छेन क्लृप्तं स्फटिकेन भित्ति-
स्तम्भाद्यदर्श स्खलनस्य हेतुम् ।
यस्यां बलन्तः प्रतिबिम्बितेन
पुरो निजेनैव जना व्यजानन् ॥ २२ ॥
यत्रेन्दुकान्तग्रथितालवाल-
पालीषु तन्वन्नमृतप्रणालीः ।
लीलावनीनामवनीरुहेषु
बभौ वनीपाल इवामृतांशुः ॥ २३ ॥
सूर्याश्मभूमीषु निवेश्य कुम्भी-
र्यशो हसद्भिर्नलभूभुजोऽपि ।
यत्रार्कपाका रसवत्यवश्यं
किं कापि नाक्लृप्यत सूपकारैः ॥ २४ ॥
यस्याः शिरःसीम्नि वियद्विचित्रं
नानामणीनां रमणीयभाभिः ।
तादृक्सुधर्मादिसभाजयेन
धात्रा कृतं जैत्रमिवातपत्रम् ॥ २५ ॥
धूमायमानाग्निनिभासु नील-
स्तम्भासु शोणाश्ममहीषु यत्र ।
अमर्त्ययूनोर्मनसी द्रवत्वा-
न्निकाममेकीकुरुते स्म कामः ॥ २६ ॥
नीलोपलक्षोणिषु शोणरत्न-
स्तम्भा दृगम्भोजमुदे यदन्तः ।
प्रातः समुद्रोत्पतदंशुमालि-
प्रौढप्रभा दण्डनिभाः स्म भान्ति ॥ २७ ॥

यत्र स्फुटस्फाटिकभूविभूषा
स्तम्भा महानीलमया विरेजुः ।
स्फारेन्दुकान्तिप्रकरातिपीत-
ध्वान्तव्रजोद्गारभराभिरामाः ॥ २८ ॥

चन्द्रातपं यत्र पपुः सिताब्ज-
संदेहलीनालिकलङ्कितेषु ।
क्रीडाचकोराः स्फटिकाश्मक्लृप्त-
पाञ्चलिकास्येषु शशिभ्रमेण ॥ २९ ॥

यस्यां दधुः स्वस्तिकपङ्क्तिलेखा-
मुक्तानि मुक्ताफलमण्डलानि ।
चूलाचलत्केतुपटान्ततान्त-
पतद्द्युगङ्गाजलबिन्दुलीलाम् ॥ ३० ॥

वसन् सदा तुम्बुरुरर्जुनस्य
मैत्र्येण गन्धर्वपरीतपार्श्वः ।
स्थाने प्रमाणे च लये च यस्यां
जगौ समं किंपुरुषाप्सरोभिः ॥ ३१ ॥

विशारदैर्यैरपि शारदायाः
सभा न्यभालि स्मितबुद्धिबोधैः ।
सविस्मयास्तेऽपि समौलिकम्पं
निर्वर्ण्य यां वर्णयितुं न शक्ताः ॥ ३२ ॥

तस्यां प्रविश्याथ शुभे मुहूर्ते
नृपो ददौ सप्त दिनानि दानम् ।
द्विजावलीषु स्फुरितासु सप्त-
द्वीपावनीमण्डलपावनीषु ॥ ३३ ॥

नभोऽन्तरा नारदमङ्गभाभिः
पतङ्गभासोऽपि भुजिष्ययन्तम् ।
कदाचिदालोकयति स्म तस्यां
स्थितः सभायामवनीभुजंगः ॥ ३४ ॥

ध्यानैकतानैः शमहर्षिभिस्तै-
र्महर्षिभिः सप्तभिरुत्कचित्तैः ।
पीतास्यशीतांशुरुचं तदात्व-
विमुद्रचक्षुःकुमुदैरुदारम् ॥ ३५ ॥

पतिव्रताभिर्दिवि तारकाभिः
शशिभ्रमोच्छृङ्खललोचनाभिः ।
अलाञ्छनालोकनभग्नकान्त-
शङ्काभिरल्पाल्पनिरूपितास्यम् ॥ ३६ ॥

मैते मदालोकनसावहित्था
भूवन्निति च्छन्नतनुं घनान्ते ।
विलोकयन्तं कलहायमानान्
विमानिनः कानपि मानिनीभिः ॥ ३७ ॥

तदात्वकान्ताकुचकोटिकृष्टैः
शिरस्तटीकुड्मलितैः कराग्रैः ।
ह्रिया च भक्त्या च नताननेन
विमानिवर्गेण विनम्यमानम् ॥ ३८ ॥

उदस्तहस्तेन समुत्सुकत्व-
संभारभाजाम्बुजबान्धवेन ।
लीलारविन्दद्वितयं विहाय
विहायसि स्पृष्टपदाब्जयुग्मम् ॥ ३९ ॥

उदञ्चदुत्तुङ्गतरङ्गहस्त-
विस्तारवत्या गगनस्रवन्त्या ।
पवित्रतायै शिवसेव्ययापि
दूरादपि क्षालितपादपद्मम् ॥ ४० ॥

शृण्वन्तमन्तःकरणेन किंचि-
दनाहतं नाम मुदां निधानम् ।
समीरणाभोगरणद्गुणाया
निरादरं नादरसे महत्याः ॥ ४१ ॥

गङ्गातरङ्गावलिमञ्जुलानि
सद्ध्यानधामानि जटान्तरेषु ।
उद्भासयन्तं शशिशुभ्रभासं
सतीवियोगस्थमिवैकमीशम् ॥ ४२ ॥

स्फुरत्परीवारमुनीन्द्रवार-
नेत्रप्रभाम्भःकमलायितास्यम् ।
ध्रुवं पथः श्रान्तिभिदे सभाग्र-
ध्वजाञ्चलैर्वीजितमुत्तरन्तम् ॥ ४३ ॥

कुलकम् ।

अथायमभ्युत्थितिभाजि भूपे
कृतानतौ व्योमतलावतीर्णः ।
दत्त्वाशिषं भूषितभद्रपीठः
पुरो निविष्टे मुनिरित्युवाच ॥ ४४ ॥

तेजस्विनस्त्वत्क्रतुनित्यतृप्त्या
प्रेक्ष्य प्रियान् दैत्यभुजेरजेयान् ।
दत्ताशिषस्त्वय्यधुनैव देव्यः
स्वयं मया स्वर्गगतेन दृष्टाः ॥ ४५ ॥

स्वर्गे महेन्द्रादिमहासभाली-
निभालनेनाजनि यः प्रमोदः ।
तमप्यसौ लुम्पति मेऽतिमात्र-
प्रभाभरात्तप्रसभा सभा ते ॥ ४६ ॥

प्रभूतसंभूतविभूतितेजः-
शोभापराभूतसुराधिनाथम् ।
राजन् हरिश्चन्द्रनरेन्द्रमीर्ष्या-
परः सुधर्मापरिगं निरीक्ष्य ॥ ४७ ॥

श्रीपाण्डुभूपस्त्वयि धर्मराज-
सभाविभूषायितवैभवात्मा ।
दिवं समीक्ष्य चितिमीयुषो मे
मुखेन संदेशमिमं दिदेश ॥ ४८ ॥
युग्मम् ।

सद्धर्मकल्पद्रुजुषि त्वदीय-
यशःसुधासिन्धुशतावतारे ।
जानाति नातिश्रममश्रमेण
नीतस्त्वया नीतिपथे जनोऽयम् ॥ ४९ ॥

महोन्नतः संततताकलङ्क-
शङ्की धरापातिनि वस्तुनि स्वे ।
जिघृक्षया कोऽपि नतिं न याति
कुतः परद्रव्यहृतिस्त्वदुर्व्याम् ॥ ५० ॥

लीलाचलानां चललोचनानां
नृरत्नरत्नाभरणे रणद्भिः ।
पुरे पुरे वर्त्मनि वर्त्मनि स्यात्
तवानिशं कोऽपि नयप्रघोषः ॥ ५१ ॥

पृथ्वीश पृथ्वीं त्वयि पाति पान्था
भृशं निशीथेऽपि महापथेऽपि ।
हस्ताग्रविन्यस्तमणिप्रदीप-
द्युतिच्युतध्वान्तचयाश्चलन्ति ॥ ५२ ॥

त्वद्यज्ञतृप्तामरनिर्भयेन्दु-
भाभिस्तथासौ सरसा रसाभूत् ।
यथा पृथानन्दन नन्दनोर्वीं
जहास शश्वत्फलशालिशस्या ॥ ५३ ॥

उच्छृङ्खलं खेलति पुत्रराज्य-
मदादसौ यद्यपि नित्यमुर्व्याम् ।
धर्मो धराधीश भवत्पितेति
पदे पदे सत्क्रियते तथापि ॥ ५४ ॥

भवत्क्रतुप्रीतिहृदः पयोधि-
रत्नाकरेभ्यो रविणा गृहीतैः ।
वृष्टैर्जलैरेव मणीभवद्भि-
र्बभूव भूः कुत्र न रत्नगर्भा ॥ ५५ ॥

वनानि सर्वाणि करिप्रसूनि
बहूनि सर्वे गिरयः सुवन्ति ।
त्वयि चितिं पाति नयैकनिष्ठे
विन्ध्याटवीरोहणयोः क्व गर्वः ॥ ५६ ॥

ऊधस्विधेनुस्तननित्यवर्ष-
त्पयोनदीमातृकतां वहन्तः ।
ग्राम्याः स्तवस्फारफलाभिराम-
क्षेत्रा न नेत्राणि धने क्षिपन्ति ॥ ५७ ॥

राजन् भवान् राजति तारनीति-
रस्तापनीतिस्तव किंतु देशः ।
महामुनीनामपि साम्यरम्य-
मनोधनानां हरते मनांसि ॥ ५८ ॥

धर्मैकधीरं सकलं विलोक्य
क्रूरे निजे कर्मणि लज्जमानाः ।
राजज्जनं तावकमाधयो वा
न व्याधयो वा खलु बाधयन्ति ॥ ५९ ॥

पदे पदे संमदिना सदैव
महेषु लोकेन वितन्यमानम् ।
नवं नवं भोगमुपाददाना-
स्तवाशिषः स्वर्गिगणा गृणन्ति ॥ ६० ॥

तव स्तवोक्त्या सफलैव वाणी
मुखे भवद्देशजुषां जनानाम् ।

तेषां पुनर्वेश्मनि निष्फलैव
लक्ष्मीरभावेन वनीयकस्य ॥ ६१ ॥
सिक्तो यदि व्यर्थमनोरथाना-
मस्रैरजस्रैरभिसृत्वरीणाम् ।
तत् किं तवायं नयकल्पशाखी
मनोरथं पूरयति प्रजासु ॥ ६२ ॥
त्वत्पालनादाश्रममेदिनीषु
सुखं यदापुर्मुनयो महान्तः ।
जानन्ति नूनं फलनोन्मुखीनां
मुक्तेर्मुदामग्रयणं तदेव ॥ ६३ ॥
मुक्त्वा तरन्तीमिति तावकीने
सद्धर्मसिन्धौ धरणीं फणीन्द्रः ।
शृणोति कीर्तिं भवतो भुजंगी-
गीतेषु मौलीनधुना धुनानः ॥ ६४ ॥
भवत्पुरीवासविलासभास्व-
न्मनोरथाविष्टहृदः सदैव ।
देवा दिवं मोक्तुममी न शक्ताः
क्वः स्यात् क्षमः कर्मनियोगभङ्गे ॥ ६५ ॥
एतां परित्यज्य पुरीं पुरोऽस्तु
क्व ते रतिः स्वर्गमुपागतस्य ।
त्रिशङ्कुसूनोर्जनयन्नपायं
न राजसूयं तनुषे मखं चेत् ॥ ६६ ॥
यतो जयी राजसु राजसूय-
यज्ञैकयाजी सुकृतैकभाजी ।
हसत्यसावत्र विभुत्वभूत्या
हरिं हरिश्चन्द्रमहीमहेन्द्रः ॥ ६७ ॥
योग्यो जयश्रीचतुरैश्चतुर्भि-
स्त्वं सोदरैरीदृशराज्यसंपत् ।
नयज्ञ यज्ञं जनयेत्यमुं ते
मैत्रीपरो राजतु देवराजः ॥ ६८ ॥
संदिष्टमेतत् तव याम्यतोऽहं
देवेशसंदेशकृते मुरारिम् ।
इदं निगद्याशु मुनिस्तिरोभूद्
विद्योतयन् विद्युदिवांशुभिर्द्याम् ॥ ६९ ॥

अथाह्वयद्दुर्वहराजसूय-
मन्त्राय नारायणमेकमित्रम् ।
धनाधिपोऽयं गुरुकार्यभाने
यन्मन्यते वामधुरीणमेनम् ॥ ७० ॥
श्रीपाण्डुसंदिष्टमखाय मन्त्रं
युधिष्ठिरेणायमुपांशु पृष्टः ।
नारायणः संगतराजनीति-
पारायणं सारमिदं जगाद ॥ ७१ ॥
सर्वैर्गुणैरर्हसि राजसूयं
राजन् पुनस्तस्य महाबलस्य ।
वधं जरासंधधराधवस्य
विना न निर्वाहसखो मखोऽयम् ॥ ७२ ॥
भर्गाय भूमीधवमेधयज्ञं
संकल्प्य यस्मिन् बलिनां जयाय ।
समुद्यते केऽपि नताः पदान्ते
नेशुः परे केचन कांदिशीकाः ॥ ७३ ॥
ये ये पुनः शौर्यबलावलेपात्
तत्संमुखा भूपतयो बभूवुः ।
विजित्य ते ते समरैर्निरुद्धा
गिरिव्रजान्तः षडशीतिसंख्याः ॥ ७४ ॥
राज्ञोऽधुनावध्यचतुर्दशैव
शतेन तेषां मखमीहतेऽसौ ।
यस्तान् कृती मोचयति प्रबद्धान्
सम्राट् स भूमौ विभवत्यवश्यम् ॥ ७५ ॥
स प्राणयुद्धैर्विजने यदि स्या-
ज्जेयो हरेणापि रणे त्वजेयः ।
अहं निजे दुर्यशसीव सिन्धौ
पलायितस्तन्महसा वसामि ॥ ७६ ॥
भीमो भुजस्तम्भबलाद्भुतश्री-
र्जम्भारिजन्मा जगदेकजेता ।
अहं महानीतिरिति त्रयोऽपि
युता जरासंधवधाय यामः ॥ ७७ ॥
इत्युक्तमन्त्रोच्छ्वसितस्य राज्ञः
समाज्ञया शौरिररिव्ययाय ।

भीमार्जुनाभ्यां सह शुक्लसौम्य-
रम्योपकण्ठोऽर्क इव प्रतस्थे ॥ ७८ ॥
क्रमाद्ययुः प्राग्दिशि पञ्चसंख्यै-
र्विहारमुख्यैर्गिरिभिः परीतम् ।
त्रयोऽपि वीरा मगधाधिपस्य
गिरिव्रजाख्यं नगरं गरीयः ॥ ७९ ॥
निहत्य यस्मिन् वृषभासुरेन्द्रं
तच्चर्मसंनद्धतदस्थिढक्काः ।
तिस्रो जरासंधनृपेण क्लृप्ता
नदन्ति चैत्यद्रुमपुष्पकीर्णाः ॥ ८० ॥
भङ्क्त्वा प्रतोलीं स्वभुजप्रहारै-
र्निपात्य तच्चैत्यकमद्रिशृङ्गम् ।
अवर्त्मना तत्त्रयसंनिपातः
पुरे द्विमातुर्नृपतेः पपात ॥ ८१ ॥
अमी बलत्रासितमालिकात-
मालास्ततः कैतवविप्रवेषाः ।
सदस्यकस्मान्मगधाधिपस्य
ययुः प्रवीरा धृतचित्तवैराः ॥ ८२ ॥
गिरिव्रजेशोऽतिथिपूजनैक-
रतिर्निषण्णानगृहीतपूजान् ।
ऊचेऽथ तान् विस्मयमानचेता
धाराकृतिज्ञातनृपान्ववायान् ॥ ८३ ॥
विध्वस्य तीर्थं किमु मागधानां
सदार्चितं चैत्यकमद्रिशृङ्गम् ।
अद्वारमार्गेण पुरं प्रविष्टा
गृह्णीत मे संप्रति नातिथेयम् ॥ ८४ ॥
द्विजा न यूयं भवतां भुजेर्वी
मौर्वीकिणश्रेणिवशंवदश्रीः ।
राजत्यसौ संततसंचरिष्णु-
शौर्यद्विपस्यन्दिमदप्लुतेव ॥ ८५ ॥
प्राप्ता द्विजव्याजभृतः किमत्र
क्षत्रस्य कस्य प्रभवा भवन्तः ।
क्षिप्रः किमङ्घ्रिर्ज्वलदुज्ज्वलोग्र-
ज्वालाकराले ज्वलनान्तराले ॥ ८६ ॥

इत्यत्र धीरोद्धतवाचि साचि-
विलोचनश्रीरुचितस्मितास्यः ।
तत्कर्णयुग्माध्वनवाध्वनीन-
मूचे वचः श्रीकुचकेलिकारः ॥ ८७ ॥
स्युः क्षत्रियाः पार्थिव बाहुवीर्या
विशन्त्यमार्गेण च वैरिगेहम् ।
केनापि कार्येण गृहानुपेत्य
रिपोर्न गृह्णन्ति तथातिथेयम् ॥ ८८ ॥
अपूर्वमद्याः श्रवसश्च भूप-
वधेन धर्मप्रतिकूलमेव ।
क्रतुं करिष्यन् मगधेश धर्म-
रक्षाकराणामसि नः सपत्नः ॥ ८९ ॥
वधाय यज्ञेऽवनिपान् निरुद्धां-
स्तन्मुञ्च पञ्चत्वपथेन मा गाः ।
युधिष्ठिरादेशवशादुपेताः
स्वज्ञातिदुःखं न सहामहेऽद्य ॥ ९० ॥
अहं स हन्ता दनुजावतंसं
कंसं हिडम्बस्य विडम्बनोऽसौ ।
अयं पुनः खाण्डवदाहरक्षा-
विजृम्भिजम्भारियशोनिशुम्भी ॥ ९१ ॥
राजन् नियुक्तास्त्वयि राजसूयं
चिकीर्षता धर्मसुतेन तेन ।
भवास्य यज्ञे वसुदोऽसुदो वा
भीमस्य यज्ञे भव भीमबाहो ॥ ९२ ॥
युग्मम् ।
आकर्ण्य कर्णद्वयवज्रसूची-
मिदं वचः संगरभङ्गुरभ्रूः ।
आस्फालयत् तालबलेन बाहुं
द्वैमातुरः कातरितत्रिलोकः ॥ ९३ ॥
रे रे शठास्तिष्ठत तिष्ठतेति
गिरं किरन्नुत्थित एष यावत् ।
अभ्युत्थितस्तावदभीः स भीमो
योद्धुं जवादुद्धृषितोद्धताङ्गः ॥ ९४ ॥
दोःस्फालनस्फाररवैस्तदैव

तयोः स्फुटं स्फोटितमन्तरिक्षम् ।
स्वर्दण्डवेषादखिलेह तस्य
प्रस्फोटरेखा स्फुरति स्फुटा तत् ॥ ९५ ॥
तदा तयोरुद्धुतपादपातैः
पातालभर्तुः खलु भूमिधर्तुः ।
सहस्रधा मौलिरभूत् प्रभूत-
मणिच्छविच्छद्मनिषक्तरक्तः ॥ ९६ ॥
रणक्षणेच्छागतवज्रपाणि-
पाणिस्पृशाद्रिप्रहतिप्रसूतः ।
मिथस्तयोस्तालमहाप्रहारा-
नुत्प्रेक्ष्य मुक्तः पविनापि दर्पः ॥ ९७ ॥
तार्क्ष्यकृतलार्तित्रुटिताङ्गमध्य-
संधिर्जरासंधधराधिनाथः ।
भीमेन भूमावितिः कार्तिकादि-
चतुर्दशाहःप्रधनैर्न्यपाति ॥ ९८ ॥
वृक्षेषु न श्लिष्यति शस्त्रपातै-
र्न भिद्यते स्वःप्रभुचापकान्तिः ।
आयोजनं सर्वरथेषु यस्य
ध्वजो जयस्तम्भ इवेक्ष्यते च ॥ ९९ ॥
शक्राद्वसुः प्राप बृहद्रथोऽयं
तस्माज्जरासंधनृपोऽपि तस्मात् ।
तं सारथीभूय रथं मुरारि-
र्भीमार्जुनारूढमथारुरोह ॥ १०० ॥
रथध्वजे भूतपतेः परीतं
ध्यानाभ्युपेतं विनिवेश्य तार्क्ष्यम् ।
राज्ये जरासंधनृपस्य पुत्रं
विष्णुर्विनीतं सहदेवमाधात् ॥ १०१ ॥
वन्दीकृतान् क्षितिपतीनथ तान् विमोच्य
तैरेव सार्धमथ ते प्रहृतप्रमोदैः ।
ईयुस्त्रयीतनुमहःसहजप्रतापा
धर्माङ्गजं त्रिजगताजयिनस्त्रयोऽमी ॥ १०२ ॥
अभ्युद्धृता मगधभूधवसिन्धुमग्नाः
कुर्मो वयं किमिति तान् वदतः क्षितीशान् ।
कृष्णोऽभ्यधादिति ममेप्सितराजसूये
धर्मोद्भवस्य भवितव्यमहो सहायैः ॥ १०३ ॥
दत्तस्ततो मगधराजजयस्य सारं[1]
मूर्तं रथो मधुभिदे स युधिष्ठिरेण ।
संमान्य तेऽपि जगतीपतयो विसृष्टा
देशं जवान्निजनिजं ययुरुत्कचित्ताः ॥ १०४ ॥
वीरश्रीचतुरान् नियोज्य चतुरो बन्धून् धनौघैश्चतु-
र्दिग्दण्डेन निधाय कोशमसमं यज्ञाय सज्जीभव ।
दत्त्वा मन्त्रममुं युधिष्ठिरधराधीशाय तस्याज्ञया
विष्णुर्द्वारवतीविलासयुवतीनेत्रेषु मैत्रीमधात् ॥ १०५ ॥

इति श्रीजिनदत्तसूरिशिष्यश्रीमदमरचन्द्रविरचिते श्रीबालभारतनाम्नि महाकाव्ये सभापर्वणि जरासंधवधो नाम प्रथमः सर्गः ॥ १ ॥ :: ::

---

[1] धनमित्यर्थः ।

---

## ॥ शाकुन्तलनाटकानुवादविमर्शः ॥

इह खलु भारते वर्षेऽद्यत्वे प्रचरितानामुत्तमनाटकानामवतंसभूतस्य कविवरश्रीकालिदासप्रणीताभिज्ञानशाकुन्तलाभिधेयनाटकस्योत्तमो रसः केवलं संस्कृतज्ञैरेवाद्ययावदास्वादितो न पुनः प्राकृतज्ञैरित्येतेष्वत्यन्तं दयमानो मोहमयीनगरनिवासी घोसालकरोपाह्वगोपालरावः समग्रस्यास्य नाटकस्य महाराष्ट्रभाषया विरचितमनुवादं मुद्रणद्वारा प्रकाश्यैकं तदीयपुस्तकमेतत्पत्रसंपादकाय काशिकसंस्कृतपाठशालाप्रधानाध्यक्षाय श्रीग्रिफिथसाहिबायोपदारूपेण प्राहिणोत्। अयं च महाशयोऽस्य ग्रन्थस्य महाराष्ट्रभाषीयातिमञ्जुलपदैर्निबद्धां सुकोमलगद्यपद्यमयीं कवितां दृष्ट्वाऽतिप्रहृष्टान्तःकरणो विशेषतोऽस्य ग्रन्थस्य सदसद्विवेचने मां न्ययुंक्त । अहं चाद्ययावददृष्टाश्रुतपूर्वस्य शाकुन्तलीयमहाराष्ट्रभाषीयानुवादस्य दर्शने समुपजातपरमकुतूहलः सकलमिमं ग्रन्थं सम्यगवाचयं नाध्यगच्छं च कमपि दोषं केवलं केषुचित् स्थलेषु प्राकृतभाषीयरसानुबन्धेनान्येन वा केनचित् कारणेन संस्कृतक्रमस्त्यक्तः क्वचिच्च ग्रन्थबहिर्भूतोऽप्यर्थोऽतिमञ्जुलपदैरुपनिबद्धस्तदेतदुभयमपि रसिकजनमनःसु प्रमोदततिमेवाङ्कुरयेदिति निश्चिन्वानोऽस्मि। अपरं चात्र भूमिकायां कविवरमुकुटालङ्करणभूतोऽयं कालिदासः सारस्वतब्राह्मण आसीदिति यल्लिखितं तत्र किञ्चिद्वक्तुकाम इदमावेदयामि यदत्र मैथिलब्राह्मणेष्वियमस्ति दृढा प्रसिद्धिर्यत्कालिदासो मैथिलब्राह्मणएवाऽऽसीन्नान्यजातीय इत्यतोऽस्य ग्रन्थस्य रचयिताऽवश्यमत्र विषये दृढप्रमाणदानेनापनयत्विमां सुरूढां प्रसिद्धिमितीहमानोऽस्मि। आशासे चैतद्ग्रन्थकर्तुरयमुद्यमः संस्कृतप्राकृतोभयभाषाप्रवीणानां मनःस्वेतद्ग्रन्थस्यानन्ददातृत्वेन सफलो भवेदित्यलं बहुपल्लवितेन ।

गोविन्ददेवशास्त्री

# THE VAIŚESHIKA APHORISMS OF KAṆÁDA.

## THIRD BOOK, FIRST DAILY LESSON.

(Continued from page 252.)

Enumeration of Fallacies.

अप्रसिद्धो ऽनपदेशो ऽसन् सन्दिग्धश्चानपदेशः ॥ १५ ॥

Aph. 15. Fallacious arguments are the unproved, the non-existent, and the dubious.

[1] For the discrimination of past and future marks of co-existence from fallacious arguments, the author proceeds to commence the section on fallacies. The unproved is that which is not contained, that with which no universal co-existence has been observed, and the contradictory is that of which there is a contradictory universal co-existence. In this [term, the unproved,] are included that of which the inclusion is unestablished, and the contrary. The non-existent is the non-existent in the subject, or that of which the attributes are not in the subject. This is sometimes due to the absence from the means of proof of the real form and sometimes from the non-existence of uncertainty and the desire of proving, of that which is to be proved. The dubious is that which gives rise to a doubt as to the two alternatives of the existence or non-existence of that which is to be proved to be in the subject of the conclusion. This arises sometimes from observation of a common attribute, sometimes from observation of a not common attribute, and sometimes from observation of the arguments' being accompanied by that which is to be proved, or the non-existence of that which is to be proved, in respect to the subject of the conclusion. The first is general inconclusiveness, the second is particular inconclusiveness, and the third is non-exclusive. U.

An example.

यस्माद्विषाणी तस्मादश्वः ॥ १६ ॥

Aph. 16. Because this has horns, therefore it is a horse.

[2] An example is here given of the fallacies of want of proof of inclusion, of contrary argument, and of want of proof respecting the nature of the argument. U.

[3] Where a hare or the like is the subject, and the notion of a horse that which is to be proved, and the notion of having horns the argument, in such a case there are five fallacies. V.

An example.

यस्माद्विषाणी तस्माद्गौरिति चानैकान्तिकस्योदाहरणम् ॥ १७ ॥

Aph. 17. And 'Because it has horns, therefore it is a cow' is an example of the [fallacy of] many-sidedness.

[4] Many-sidedness is exemplified. Where taking as

---

[1] इदानीं वृत्तानां वर्तिष्यमाणाञ्च हेतूनां हेत्वाभासाद्विवेकाय हेत्वाभासप्रकरणमारभमाण आह । अप्रसिद्ध इति अव्याप्तो ऽगृहीतव्याप्तिको विपरीतव्याप्तिकश्च विरुद्धः एतेन व्याप्यत्वासिद्धविरुद्धयोः सङ्ग्रहः असन् इति पक्षे ऽसन् अपक्षधर्म इत्यर्थः स च क्वचित् स्वरूपविरहात् क्वचित् सन्देहसिषाधयिषयोरभावात् सिद्धसाधने सन्दिग्ध इति पक्षे साध्यसदसत्त्वकोटिकसंशयजनकः स च संशयः समानधर्मदर्शनात् क्वचिदसाधारणधर्मदर्शनात् क्वचित् पक्षे एव हेतोः साध्यतदभावसाहचर्यदर्शनात् आद्यः साधारणानैकान्तिकः द्वितीयस्त्वसाधारणानैकान्तिकः तृतीयो ऽनुपसंहारी ॥

[2] तत्र व्याप्यत्वासिद्धविरुद्धस्वरूपासिद्धानामुदाहरणमाह ॥

[3] यत्र शशादिः पक्षः अश्वत्वं साध्यं विषाणित्वं हेतुस्तत्र पञ्चैव हेतुदोषाः सन्ति ॥

[4] अनैकान्तिकमुदाहरति । यत्र महिषं पक्षयित्वा अयं गौर्विषाणित्वादिति साधयति तत्र साधारणानैकान्तिकता यदा त्वाकाशं नित्यं शब्दाश्रयत्वादिति साधयति तदा ऽस्यासाधारणानैकान्तिकता एवं शब्दो ऽनित्यः शब्दत्वादित्याद्यप्यगृह्यमाणदशायामसाधारणानैकान्तिकमेव यदा तु विपक्षबाधकतर्कावतारात् पक्ष एव साध्यं सिध्येत् तदा सपक्षवृत्तिताज्ञानदशायां सद्धेतुरेव पक्षस्यापि सपक्षत्वात् तत्र व्याप्तपक्षधर्मतया ऽप्रमितो ऽसिद्धः स एव त्रिविधः व्याप्यत्वासिद्धः स्वरूपासिद्धः आश्रयासिद्धश्च तत्रागृहीतव्याप्तिको व्याप्यत्वासिद्धः सत्या एव व्याप्तेरग्रहात् व्याप्तेरभावाच्च उभयथा ऽपि तेनानुकूलतर्काभावादयो ऽसिद्धभेदाः स चायमसमर्थविशेषणासमर्थविशेष्यासमर्थोभयसन्दिग्धासमर्थविशेषणसन्दिग्धासमर्थविशेष्यसन्दिग्धासमर्थोभयभेदप्रपञ्चेन सहस्रधा भिद्यते सर्वत्र चात्र सिद्धिविरह एवोद्भाव्यः । अत्रेदं तत्त्वं हेतुस्तावत् केवलान्वय्यन्वयव्यतिरेकिकेवलव्यतिरेकिभेदात् त्रिविधः तत्र सर्वधर्मिगतो धर्मः केवलान्वयी यथा प्रमेयत्वाभिधेयत्वविशेष्यत्वविशेषणत्वनित्यद्रव्यात्यन्ताभावाश्रयनाशनाश्यगुणादिध्वंसात्यन्ताभावादयः न ह्यस्ति तादृशं किञ्चित् यत्रैते धर्मा न विद्यन्ते तथा च सर्वगतत्वम् अत्यन्ताभावप्रतियोगित्वं वा केवलान्वयित्वं एतेषाञ्च स्वात्मवृत्तित्वे ऽपि न दोषः तदुक्तं प्रमाणं शरणं वृत्तौ न भिन्नाभिन्नते यतः इति केवलान्वयिसाधको हेतुः केवलान्वयी अस्य च पक्षसत्त्वसपक्षसत्त्वाबाधितत्वासत्प्रतिपक्षितत्वानि चत्वारि रूपाणि गमकत्वौपयिकानि अन्वयव्यतिरेकिणस्तु हेतोर्विपक्षासत्त्वेन सह पञ्च केवलव्यतिरेकिणः सपक्षसत्त्वव्यतिरेकेण चत्वारि तथा च यस्य हेतोर्यावन्ति रूपाणि गमकत्वौपयिकानि तदन्यतररूपहीनः स हेत्वाभासः एवञ्च गमकतौपयिकान्यतररूपशून्यत्वं हेत्वाभासत्वं तेनान्यतररूपशून्यत्वस्य निश्चयवत्सन्देहो ऽप्यनुमितिप्रतिबन्धकः वादिहेतोरसाधकतासाधकः न च केवलान्वयिकेवलव्यतिरेकिणोर्हेत्वोरन्यतररूपशून्यतया हेत्वाभासत्वापत्तिः केवलान्वयिनि विपक्षासत्त्वस्य केवलव्यतिरेकिणि सपक्षसत्त्वस्य गमकत्वौपयिकत्वाभावात् एवञ्चाश्रयासिद्धस्वरूपासिद्धभागासिद्धानां पक्षसत्त्वरूपविरहादाभासत्वं व्याप्यत्वासिद्धविरुद्धसाधारणानैकान्तिकानां विपक्षासत्त्वरूपवैकल्यात् असाधारणानैकान्तिकानुपसंहारिणोः सपक्षसत्त्ववैकल्यात् बाधितसत्प्रतिपक्षितयोरबाधितत्वासत्प्रतिपक्षितत्वविरहात् एवं सोपाधित्वाप्रयोजकत्वयोरपि विपक्षासत्त्वनिश्चयाभावादगमकत्वं अनुकूलतर्काभावप्रतिकूलतर्कयोरपि विपक्षासत्त्वनिश्चयविरहात् एवं साध्यविकलसाधनविकलोभयविकलदृष्टान्ताभासानां यदि हेत्वाभासविधया दोषत्वं तदा सपक्षसत्त्वानिश्चयात् यदि स्वातन्त्र्येण दृष्टान्ताभासतया तथापि द्वारं हेतोः सपक्षसत्त्वानिश्चय एव अनुपदर्शितान्वयानुपदर्शितव्यतिरेकास्तु न्यूनाप्राप्तनिग्रहस्थानपर्यवसन्ना एव आत्माश्रयान्योन्याश्रयचक्रकानवस्थास्तु व्याप्तिनिश्चयं विघटयन्तः सपक्षसत्त्वविपक्षासत्त्वान्यतररूपविकला एव हेत्वाभासतामासादयन्ति तत्र पक्षे साध्यसदसत्त्वकोटिकसंशयजनको हेत्वाभासः सव्यभिचारः पक्षे साध्याभावनिश्चयफलको हेत्वाभासो विरुद्धः व्याप्तिपक्षधर्मताप्रमितिविरहो ऽसिद्धः बाधसत्प्रतिपक्षौ काश्यपमते न स्वतन्त्रौ तत्र बोध आश्रयासिद्धावनैकान्तिके वा पर्यवसति तदुक्तं बाधायामपक्षधर्मा हेतुरनैकान्तिको वा इति सत्प्रतिपक्षो ऽन्यतर

the subject a buffalo it is concluded that it is a cow because it has horns, there is general many-sidedness [or possibility of more than one conclusion.] Where it is argued that ether is eternal because sound exists in it, there is particular many-sidedness. So also in such examples as 'Sound is non-eternal because it is sound,' there being no condition observed there is particular many-sidedness. But when, by showing from hypothetical reasoning that there can be no contrary instances, it is proved that that which is to be proved is in the subject, and then that only in the case of there being similar instances can a valid argument exist since the subject must possess similar instances;—in this case, it being a property of the subject to be included, there is the fallacy of the not certainly known or the unproved. This is of three kinds, want of proof regarding the included, want of proof regarding the nature [of the argument or middle term], and want of proof regarding the substratum or subject. Of these, want of proof regarding inclusion is where no invariable co-existence has been observed, whether because the co-existence though real has not been observed, or whether there be no co-existence. Hence the divisions of the unproved, such as absence of favourable hypothesis. And this same fallacy of absence of proof may be divided a thousand ways according to the diversity of impossibility of predicate, impossibility of subject, impossibility of both subject and predicate, uncertainty or impossibility of predicate, uncertainty or impossibility of subject, and uncertainty or impossibility of both predicate and subject. In every one of these cases there must arise absence of proof. Now this principle, I mean the argument, is of three kinds according to its division into the purely positive, the positive and negative, and the purely negative. Among these the purely positive is an attribute existing in all subjects of attributes, such as knowableness, nameableness, predicability, and absolute non-existence of subsequent non-existence in attributes &c. which are destructible by destruction of that wherein exists absolute non-existence of eternal substances. For there is no such thing as that in which these properties do not exist. The purely positive is therefore omnipresence, or non-existence of non-existence. Though these exist in themselves, that is no objection. It has been said, 'Validity of reasoning is recourse to existence, not the being different or not different.' That argument, therefore, is purely positive, that which is to be proved by that which is purely positive. Of this the four forms, existence of the subject, existence of similar instances, absence of contrary instances, and absence of contrary but equally valid subjects, lead to conviction. Of an argument positive and negative, together with non-existence of contrary instances, there are five forms; of the purely negative, together with the exclusion of existence of similar instances, there are four forms. An apparent argument [or fallacy] is, therefore, that which is void of one or other of the forms which lead to conviction; and similarly fallaciousness is voidness of one or other of the forms which lead to conviction. Doubt accompanied by assurance of the voidness of one or other of the forms prevents inference, and proves the inconclusiveness of the disputant's argument. Fallaciousness is not incident upon voidness of one or other of the two arguments, the purely positive and the purely negative, because of the non-existence of that which leads to the conviction of there not being contrary instances in the purely positive, and of there being similar instances in the purely negative. Absence of proof respecting the subject, respecting the nature of the argument, and partial inconclusiveness are fallacies by reason of the absence of that form which is existence of the subject. Absence of proof of inclusion, self-contradiction, and general many-sidedness are fallacies due to the form which is non-existence of contrary instances. Particular diversity of result, and non-exclusion [defined as that fallacy in which that which is to be proved is not non-existent where there is absolute non-existence, i. e. in which it may be asserted of any subject whatever], are fallacies due to the failure of similar instances. Impossibility [where that which is to be proved does not exist in the subject], and possibility of a contrary subject, are fallacies due to the absence of possibility and of impossibility of contrary subjects. In like manner accidentalness and inapplicability in an argument fail to produce conviction, because of the absence of certainty of the non-existence of contrary instances. Absence of favourable hypothesis, and unfavourable hypothesis also fail to produce conviction, because of the absence of certitude as to the non-existence of contrary instances. In like manner apparent [but unreal] examples inadequate in regard to that which is to be proved, or in regard to the argument, if invalid as being fallacies, are so through the uncertainty of the existence of similar instances. If they are independently invalid as being examples in appearance only yet are they so mediately through the arguments, on account of the uncertainty of the existence of similar instances. Arguments where neither positiveness nor

---

व्याप्यादिसंशयमापादयन् अनैकान्तिकादावेव पर्यवसति वृत्तिकारस्तु अप्रसिद्धो ऽनपदेशो ऽसन् सन्दिग्धश्चानपदेशः इति सूत्रस्यचकारस्य बाधसत्प्रतिपक्षसमुच्चयार्थतामाह तेन सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतकालाः पञ्च हेत्वाभासा इति गौतमीयमेव मतमनुधावति परन्तु विरुद्धासिद्धसन्दिग्धमलिङ्गं काश्यपो ऽब्रवीत् इत्याद्यभिधानात् सूत्रकारस्वरसो हेत्वाभासत्रित्वे चकारस्तूक्तसमुच्चयार्थ इति तत्त्वम् ग्रन्थगौरवभयात् प्रपञ्चो न कृतो मयूखे विस्तरो ऽन्वेष्टव्यः ॥

negativeness can be shown, are determined by urging the objection that time is insufficient or not to be obtained. Petitio principii, arguing in a circle, and arguments which involve an infinite regression, while they afford conviction of a universal co-existence, being deficient of one or other of the forms [or conditions of valid argumentation] of existence of similar instances or non-existence of contrary instances, involve fallaciousness The fallacy which gives rise to doubt with respect to the alternatives of the existence or non-existence in the subjects, of that which is to be proved, is that of including too much or too little [in the statement of an invariable co-existence.] The fallacy which results in certainty of the non-existence of that which is to be proved in the subject, is the contradictory. Absence of certain knowledge of what are the attributes of a subject of a general proposition is the unproved. But in the opinion of Káśyapa the impossible and the existence of contrary but equally valid subjects, are not independent fallacies. Of these the impossible is determined to be included in absence of proof as regards the subject, or in many-sidedness. Therefore it has been said, 'An impossible or too extensive attribute of the subject, as an argument, leads to diverse results.' Valid counter subject also, showing the doubtfulness of the universal co-existence, he determines to be included in many-sidedness. The author of the Vritti asserts that the particle 'and' in the aphorism, 'Fallacious arguments are the unproved, the non-existent and the dubious,' implies the addition of the impossible, and possibility of a real contradictory subject. He therefore follows the doctrine of Gautama, 'The five merely apparent arguments are that of which the extension is too great or too small, that which involves a contradiction, that which is identical with the subject, that which is identical with the major term, and that the time of which is the past.' But the author of the aphorism's own view of the fallacious appears from such statements as 'Káśyapa declared the self-contradictory, the unproved, and the doubtful to be invalid arguments,' and the particle 'and' in reality serves to connect the aphorism [with the preceding aphorisms.] Prolixity has been avoided [in this note] from fear of needlessly encumbering the treatise. Full details may be sought in the Mayúkha. U.

The existence of the soul proved.

आत्मेन्द्रियार्थसन्निकर्षाद्यन्निष्पद्यते तदन्यत् ॥ १८ ॥

Aph. 18. That which is produced from the connection of soul with objects of sense is other [than a fallacious argument.]

[1] The result of the distinction drawn between fallacies is now stated. It is by connection of the soul with objects of sense that knowledge is produced, and knowledge, the argument for the existence of the soul, is other than the unproved, the contradictory, and the many-sided, i. e. it is not an argument in appearance only. Knowledge, then, is in two ways a mark of the existence of the soul ; either because knowledge has a substratum [or must exist in a knowing subject], because it is an effect, like colour, or because it assumes the form of recollection, 'I who saw am the same as I who am touching.' In the former case, that knowledge is an effect is not unproved, knowledge being designated as that which is produced ; nor is it contradictory, for there can be no contradiction with regard to what is universally observed ; on the same grounds it is not many-sided. Knowledge, then, mediately through the notion it involves of being an effect or an attribute, is a mark of the existence of the soul. In the second case recollection being excluded from diverse agents is limited to a single agency. U.

Plurality of souls.

प्रवृत्तिनिवृत्ती च प्रत्यगात्मनि दृष्टे परत्र लिङ्गम् ॥ १९ ॥

Aph. 19. Activity and inactivity observed in one's own soul, are the mark of the existence of other souls.

[2] The inference of the existence of soul being explained, the mode in which the existence of other souls is inferred is now stated. Activity and inactivity generated by desire and aversion are modes of volition. By activity and inactivity bodily functions resulting in attainment and avoidance of the pleasant and the unpleasant and characterised by muscular action, are produced Therefore when we see muscular action in the body of another, we infer in the following manner the existence of another soul. This muscular action is generated by volition, being a muscular action like our own muscular action ; and this volition is produced by, or exists in, soul, being a volition like our own volitions. U.

[1] इदानीं हेत्वाभासविवेचनस्य फलमाह । आत्मेन्द्रियार्थसन्निकर्षात्ता-

वज्ज्ञानमुत्पद्यते तच्चात्मनि लिङ्गम् असिद्धविरुद्धानैकान्तिकेभ्यो ऽन्यत् अनाभासमित्यर्थः । तथाहि ज्ञानमात्मन्युभयथा लिङ्गम् ज्ञानं क्वचिदाश्रितं कार्यत्वाद्रूपादिवदिति वा प्रत्यभिज्ञारूपतया वा यो ऽहमद्राक्षं सो ऽहं स्पृशामीति तत्र ज्ञानगतं कार्यत्वं नासिद्धं यन्निष्पद्यत इत्यभिधानात् न विरुद्धं सामान्यतो दृष्टे ऽत्र विरोधाभावात् न चानैकान्तिकं तत एव तथा च स्वगतकार्यत्वगुणत्वद्वारा सामान्यतो दृष्टेन ज्ञानमेवात्मनि लिङ्गम् प्रत्यभिज्ञानन्तु भिन्नकर्तृकेभ्यो व्यावर्तमानमेककर्तृकतायां पर्यवस्यति ॥

[2] आत्मन्यनुमानमभिधाय इदानीं परात्मानुमानमाह । प्रत्यगात्मनीति स्वात्मनीत्यर्थः इच्छाद्वेषजनिते प्रवृत्तिनिवृत्ती प्रयत्नविशेषौ ताभ्याञ्च हिताहितप्राप्तिपरिहारफलके शरीरकर्मणी चेष्टालक्षणे जन्येते तथा च परशरीरे चेष्टां दृष्ट्वा इयं चेष्टा प्रयत्नजन्या चेष्टात्वात् मदीयचेष्टावत् स च प्रयत्न आत्मजन्यः आत्मनिष्ठो वा प्रयत्नत्वात् मदीयप्रयत्नवदिति परात्मानुमानम् ॥

[3] Though in going and other actions activity only, and not inactivity, is seen to be the cause, yet muscular action in such forms as the fanning away of insects from places resorted to, for the sake of inactivity in regard to injury, is observed. There is, therefore, no want of proof [that inactivity is a cause of muscular action.] V.

A. E. G.

## RÁMÁYANA, BOOK I.

*Continued from page 204.*

### THE DEATH OF TÁḌAKÁ.

### XXVIII.

Thus spoke the saint. Each vigorous word
The noble monarch's offspring heard,
And, reverent hands together laid.
His answer to the hermit made :
'My sire and mother bade me aye
Thy word, O mighty Saint, obey.
So will I, O most glorious, kill
This Táḍaká who joys in ill,
For such my sire's, and such thy will.
To aid with mine avenging hand
The Bráhmans, kine, and all the land,
Obedient, heart and soul, I stand.'
 Thus spoke the tamer of the foe,
And by the middle grasped his bow.
Strongly he drew the sounding string
That made the distant welkin ring.
Scared by the mighty clang the deer
That roamed the forest shook with fear.
And Táḍaká the echo heard,
And rose in haste from slumber stirred.
In wild amaze, her soul aflame
With fury toward the spot she came.
When that foul shape of evil mien
And stature vast as e'er was seen
The wrathful son of Raghu eyed,
He thus unto has brother cried :
'Her dreadful shape, O Lakshmaṇ, see,
A form to shudder at and flee.
The hideous monster's very view
Would cleave a timid heart in two.
Behold the demon hard to smite,
Defended by her magic might.
My hand shall stay her course to-day,
And shear her nose and ears away.
No heart have I her life to take :
I spare it for her sex's sake.
My will is but, with minished force,
To check her in her evil course.'
While thus he spoke, by rage impelled
 Roaring as she came nigh,
The fiend her course at Ráma held
 With huge arms tossed on high.
Her, rushing on, the seer assailed
 With a loud cry of hate ;
And thus the sons of Raghu hailed ;
 'Fight, and be fortunate.'
Then from the earth a horrid cloud
 Of dust the demon raised,
And for awhile in darkling shroud
 Wrapt Raghu's sons amazed.
Then calling on her magic power
 The fearful fight to wage,
She smote him with a stony shower,
 Till Ráma burned with rage.
Then pouring forth his arrowy rain
 That stony flood to stay,
With wingèd darts, as she charged amain,
 He shore her hands away.
As Táḍaká still thundered near
 Thus maimed by Ráma's blows,
Lakshmaṇ in fury severed sheer
 The monster's ears and nose.
Assuming by her magic skill
 A fresh and fresh disguise,
She tried a thousand shapes at will,
 Then vanished from their eyes.
When Gádhi's son of high renown
Still saw the stony rain pour down
Upon each princely warrior's head,
With words of wisdom thus he said :
'Enough of mercy, Ráma, lest
This sinful evil-working pest,
Disturber of each holy rite,
Repair by magic arts her might.
Without delay the fiend should die,
For, see, the twilight hour is nigh.
And at the joints of night and day
Such giant foes are hard to slay.'
Then Ráma, skilful to direct
 His arrow to the sound,
With shafts the mighty demon checked
 Who rained her stones around.
She sore impeded and beset
By Ráma and his arrowy net,
Though skilled in guile and magic lore,
Rushed on the brothers with a roar.

*(To be continued.)*

[3] यद्यपि गमनादिक्रियायां प्रवृत्तिरेव हेतुर्दृश्यते न तु निवृत्तिरिति तथापि हिंसादिनिवृत्तितो गन्तव्यदेशावस्थितानां क्षुद्रजन्तूनां व्यजनादिना अपसारणादिरूपा चेष्टा ऽपि दृश्यत एवेति नानुपपत्तिः ॥

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.